UNIVERSAL
LIBRARY
OU_184205
UNIVERSAL
LIBRARY

आनन्दाश्रमसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः १५

बृहदारण्यकोपनिषत् ।

आनन्दगिरिकृतटीकासंवलितशाङ्करभाष्यसमेता ।

एतत्पुस्तकं

वे० शा० रा० रा० 'काशीनाथ शास्त्री आगाशे"

इत्येतैः संशोधितम् ।

तथा

रावबहादुर इत्युपपदधारिभिः

'गंगाधर बापूराव काळे'

जे. पी.

इत्येतैः

पुण्यालयपत्तने

श्रीमन् 'महादेव चिमणाजी आपटे'

इत्यभिधेयमहाभागप्रतिष्ठापिते

आनन्दाश्रममुद्रणालये

आयसाक्षरैर्मुद्रयित्वा

प्रकाशितम् ।

पञ्चमीयमावृत्तिः ।

शालिवाहनशकाब्दाः १८७५ ।

ख्रिस्ताब्दाः (दि. १७-१-१९५३) ।

(अस्य सर्वेऽधिकारा राजशासनानुसारेण स्वाधीनाः)

मूल्यं त्रयोदश रूपकाः (१३) ।

आदर्शपुस्तकोल्लेखपत्रिका ।

अथैतस्याः सटीकशांकरभाष्यसमेताया बृहदारण्यकोपनिषदः पुस्तकानि यैः परहितैकपरतया संस्करणार्थं प्रदत्तानि तेषां नामादीनि पुस्तकानां संज्ञाश्च कृतज्ञतया प्रकाश्यन्ते ।

(क.) इति संज्ञितम्–मूलं सटीकभाष्योपेतं कलिकातानगरस्थमुद्रणालये मुद्रितं कैलासवासिनां 'देव' इत्युपाह्वानां पुण्यपत्तननिवासिनां वे० शा० रा० रा० बालशास्त्रिणाम् । पृष्ठानां संख्या १०९६ । एकपृष्ठस्थपङ्क्तिसंख्या २४ । एकपङ्क्तिस्थानामक्षराणां संख्या २३ ।

(ख.) इति संज्ञितम्–मूलं सटीकभाष्योपेतं, बडलीग्रामनिवासिनां चिदम्बरदीक्षितकुलोत्पन्नानां श्री० वे० शा० रा० रा० मार्तण्डदीक्षितानाम् । पत्राणि ३०९ । पङ्क्तयः २६ । अक्षराणि ५० । लेखनकालः शके १७८३ ।

(ग.) इति संज्ञितम्–मूलं केवलभाष्यसमेतं, इन्दूरपुरनिवासिनां "किबे" इत्युपाह्वानां श्री० रा० रा० "भाऊसाहेब बाळासाहेब" इत्येतेषाम् । पत्राणि १२६ । पङ्क्तयः १९ । अक्षराणि ५६ । लेखनकालः पञ्चाशत्संवत्सरमित इत्यनुमीयते ।

(घ.) इति संज्ञितम्–मूलं सटीकभाष्योपेतं, वटोदरनगरनिवासिनां पटवर्धनोपाह्वानां श्री० रा० रा० "कृष्णराव भीमाशंकर" इत्येतेषाम् । पत्राणि ३५९ । पङ्क्तयः १८ । अक्षराणि ५० । लेखनकालस्तु शतसंवत्सरमित इत्यनुमीयते ।

(ङ.) इति संज्ञितम्–मूलं सभाष्यं टीकारहितं, पुण्यपत्तननिवासिनां कै० श्री० रा० रा० "बाळासाहेब पटवर्धन" इत्येतेषाम् । पत्राणि ३५७ । पङ्क्तयः १० । अक्षराणि ३८ । लेखनकालः पादोनशतसंवत्सरमित इत्यनुमीयते ।

(च.) इति संज्ञितम्—मूलं सभाष्यं टीकारहितम्, अष्टग्रामनिवासिनां लिमये इत्युपनामकानां रा० रा० "गोविन्द-राव" इत्येतेषाम् । पत्राणि २४२ । पङ्क्तयः १३ । अक्षराणि ५० । लेखनकालस्त्वनुमानेन षष्टिवर्षात्मकः ।

(छ.) इति संज्ञितम्—मूलं सभाष्यं केवलान्तिमाध्यायद्वयटीकोपेतम्, उज्जयिनीक्षेत्रनिवासिनां वे० शा०सं० रा०रा० "सोरटीबुवा" इत्येतेषाम् । पत्राणि २६० । पङ्क्तयः १४ । अक्षराणि ४२ । लेखनकालः पञ्चविंशतिसंवत्सरात्मक इत्यनुमीयते ।

(ज.) इति संज्ञितम्—मूलं सभाष्यं टीकारहितं, पुण्यपत्तननिवासिनां फडणीस इत्युपनामकानां कै० रा० रा० "मोरोबादादा" इत्याख्यानाम् । पत्राणि २५९ । पङ्क्तयः १५ । अक्षराणि ४८ । लेखनकाल-स्त्वनुमानेन शतसंवत्सरमितो दृश्यते ।

(झ.) इति संज्ञितम्—केवलभाष्यं, कै० रा० रा० "मोरोबादादा फडणीस" इत्येतेषाम् । पत्राणि २११ । पङ्क्तयः १२ । अक्षराणि ४८ । अस्यापि लेख-नकालः पादोनशतसंवत्सरमित इत्यनुमीयते ।

(ञ.) इति संज्ञितम्—केवलटीका, कै० रा० रा० "मोरोबादादा फडणीस" इत्येतेषाम् । पत्राणि ३१४ । पङ्क्तयः १२ । अक्षराणि ४५ । लेखनकालः शतसंवत्सरमित इत्यनुमीयते ।

(ट.) इति संज्ञितम्—केवलमूलं, रा० रा० "भाऊसाहेब नगरकर" इत्येतेषाम् । पत्राणि ६४ । पङ्क्तयः ९ । अक्ष-राणि ३६ । लेखनकालः पञ्चाशत्संवत्सरमित इत्यनुमीयते ।

(ठ.) इति संज्ञितम्—केवलं मूलं, पुरंदरे इत्युपाह्वानां श्री० रा० रा० 'अप्पासाहेब" इत्येतेषाम् । पत्राणि ७० । पङ्क्तयः ८ । अक्षराणि २९ । लेखनकालस्त्व-नुमानेन पञ्चविंशतिवत्सरात्मको वर्तते ।

(ड.) इति संज्ञितम्—केवलं मूलं, सुरतग्रामवासिनां करंवेळकर इत्युपनामकानां रा० रा० हरि बाबाजी " इत्येतेषाम् । पत्राणि १३६ । पङ्क्तयः ६ । अक्षराणि २६ । लेखनकालोऽनुमानेन षष्टिवर्षात्मकः ।

(ढ.) इति संज्ञितम्—मूलं सटीकभाष्योपेतं, पुण्यपत्तननिवासिनां परचुरे इत्युपनामकानां रा० रा० " आबाजी रामचन्द्र " इत्येतेषाम् । पत्राणि ६३७ । पङ्क्तयः १५ । अक्षराणि ३५ । लेखनकालस्त्वनुमानेन पादोनशतवत्सरात्मक. । टीकालेखनकालस्तु शके १७६८ ।

(ण.) इति संज्ञितम्—केवला टीका, रा० रा० " भाऊसाहेब नगरकर " इत्येतेषाम् । पत्राणि ४३३ । पङ्क्तयः ९ । अक्षराणि ४० । लेखनकालोऽनुमानेन पञ्चाशद्वत्सरात्मकः ।

समाप्तेयमादर्शपुस्तकोल्लेखपत्रिका ।

अथैतस्याः सटीकशांकरभाष्यसमेताया बृहदारण्यकोपनिषदः पुस्तकानि यैः परहितैकपरतया संस्करणार्थं प्रदत्तानि तेषां नामादीनि पुस्तकानां संज्ञाश्च कृतज्ञतया प्रकाश्यन्ते ।

(क.) इति संज्ञितम्–मूलं सटीकभाष्योपेतं कलिकातानगरस्थमुद्रणालये मुद्रितं कैलासवासिनां 'देव' इत्युपाह्वानां पुण्यपत्तननिवासिनां वे० शा० रा० रा० बालशास्त्रिणाम् । पृष्ठानां संख्या १०९६ । एकपृष्ठस्थपङ्क्तिसंख्या २४ । एकपङ्क्तिस्थानामक्षराणां संख्या २३ ।

(ख.) इति संज्ञितम्–मूलं सटीकभाष्योपेतं, बडलीग्रामनिवासिनां चिदम्बरदीक्षितकुलोत्पन्नानां श्री० वे० शा० रा० रा० मार्तण्डदीक्षितानाम् । पत्राणि ३०९। पङ्क्तयः २३। अक्षराणि ५० । लेखनकालः शके १७८३।

(ग.) इति संज्ञितम्–मूलं केवलभाष्यसमेतं, इन्दूरपुरनिवासिनां "किबे" इत्युपाह्वानां श्री० रा० रा० "भाऊसाहेब बाळासाहेब" इत्येतेषाम् । पत्राणि १२६। पङ्क्तयः १९। अक्षराणि ५६। लेखनकालः पञ्चाशत्संवत्सरमित इत्यनुमीयते ।

(घ.) इति संज्ञितम्–मूलं सटीकभाष्योपेतं, वटोदरनगरनिवासिनां पटवर्धनोपाह्वानां श्री० रा० रा० "कृष्णराव भीमाशंकर" इत्येतेषाम् । पत्राणि ३५९। पङ्क्तयः १८। अक्षराणि ५० । लेखनकालस्तु शतसंवत्सरमित इत्यनुमीयते ।

(ङ.) इति संज्ञितम्–मूलं सभाष्यं टीकारहितं, पुण्यपत्तननिवासिनां कै० श्री० रा० रा० "बाळासाहेब पटवर्धन" इत्येतेषाम् । पत्राणि ३५७ । पङ्क्तयः १० । अक्षराणि ३८ । लेखनकालः पादोनशतसंवत्सरमित इत्यनुमीयते ।

(च.) इति संज्ञितम्—मूलं सभाष्यं टीकारहितम्, अष्टेग्रामनिवासिनां लिमये इत्युपनामकानां रा० रा० "गोविन्द-राव" इत्येतेषाम्। पत्राणि २४२। पङ्क्तयः १३। अक्षराणि ५०। लेखनकालस्त्वनुमानेन षष्टिवर्षात्मकः।

(छ.) इति संज्ञितम्—मूलं सभाष्यं केवलान्तिमाध्यायद्वयटीकोपेतम्, उज्जयिनीक्षेत्रनिवासिनां वे० शा०सं० रा०रा० "सोरटीबुवा" इत्येतेषाम्। पत्राणि २६०। पङ्क्तयः १४। अक्षराणि ४२। लेखनकालः पञ्चविंशतिसंवत्सरात्मक इत्यनुमीयते।

(ज.) इति संज्ञितम्—मूलं सभाष्यं टीकारहितं, पुण्यपत्तननिवासिनां फडणीस इत्युपनामकानां कै० रा० रा० "मोरोबादादा" इत्याख्यानाम्। पत्राणि २५९। पङ्क्तयः १५। अक्षराणि ४८। लेखनकाल-स्त्वनुमानेन शतसंवत्सरमितो दृश्यते।

(झ.) इति संज्ञितम्—केवलभाष्यं, कै० रा० रा० "मोरोबादादा फडणीस" इत्येतेषाम्। पत्राणि २११। पङ्क्तयः १२। अक्षराणि ४८। अस्यापि लेखनकालः पादोनशतसंवत्सरमित इत्यनुमीयते।

(ञ.) इति संज्ञितम्—केवलटीका, कै० रा० रा० "मोरोबादादा फडणीस" इत्येतेषाम्। पत्राणि ३१४। पङ्क्तयः १२। अक्षराणि ४५। लेखनकालः शतसंवत्सरमित इत्यनुमीयते।

(ट.) इति संज्ञितम्—केवलमूलं, रा० रा० "भाऊसाहेब नगरकर" इत्येतेषाम्। पत्राणि ६४। पङ्क्तयः ९। अक्षराणि ३६। लेखनकालः पञ्चाशत्संवत्सरमित इत्यनुमीयते।

(ठ.) इति संज्ञितम्—केवलं मूलं, पुरंदरे इत्युपाह्वानां श्री० रा० रा० 'अप्पासाहेब" इत्येतेषाम्। पत्राणि ७०। पङ्क्तयः ८। अक्षराणि २९। लेखनकालस्त्व-नुमानेन पञ्चविंशतिवत्सरात्मको वर्तते।

(ड.) इति संज्ञितम्—केवलं मूलं, सुरतग्रामवासिनां करंबेळकरं इत्युपनामकानां रा० रा० हरि बाबाजी " इत्येतेषाम् । पत्राणि १३६ । पङ्क्तयः ६ । अक्षराणि २६ । लेखनकालोऽनुमानेन षष्टिवर्षात्मकः ।

(ढ.) इति संज्ञितम्—मूलं सटीकभाष्योपेतं, पुण्यपत्तननिवासिनां परचुरे इत्युपनामकानां रा० रा० " आबाजी रामचन्द्र" इत्येतेषाम् । पत्राणि ६३७ । पङ्क्तयः १५ । अक्षराणि ३५ । लेखनकालस्त्वनुमानेन पादोनशतवत्सरात्मकः । टीकालेखनकालस्तु शके १७६८ ।

(ण.) इति संज्ञितम्—केवला टीका, रा० रा० " भाऊसाहेब नगरकर " इत्येतेषाम् । पत्राणि ४३६ । पङ्क्तयः ९ । अक्षराणि ४० । लेखनकालोऽनुमानेन पञ्चाशद्वत्सरात्मकः ।

समाप्तेयमादर्शपुस्तकोल्लेखपत्रिका ।

अथ बृहदारण्यकोपनिषत्काण्डिकाद्यपदानां वर्णानुक्रमः प्रारभ्यते ।

काण्डिकाद्यपदानि.	अध्यायादीनि.		
अ.			
अग्नये स्वाहेत्यग्नौ हुत्वा	६	३	३
अनुः पन्था वितनः...	४	४	८
अत्र पिताऽपिता भवति	४	३	२२
अथ कर्मणामात्मेत्येत-देषा ...	१	६	३
अथ चक्षुरत्यवहत्तद्यदा	१	३	१४
अथ त्रयो वाव लोका	१	५	१६
अथ प्राणमत्यवहरत् यदा	१	३	१३
अथ मनोऽत्यवहरत्-यदा ...	१	३	१६
अथ य इच्छेत्पुत्रो मे कपिलः पिङ्गलो	६	४	१५
अथ य इच्छेत्पुत्रो मे पण्डितो जायेत	६	४	१८
अथ य इच्छेत्पुत्रो मे श्यामो ...	६	४	१६
अथ य इच्छेद्दुहिता मे पण्डिता	६	४	१७
अथ यदा सुषुप्तो भवति	२	१	१९
अथ यदुदक आत्मानं	६	४	६
अथ यस्य जायामार्तवं	६	४	१३
अथ यस्य जायायै	६	४	१२
अथ यामिच्छेद्दधीतेति	६	४	११
अथ यामिच्छेन्न गर्भं दधीतेति ...	६	४	१०

काण्डिकाद्यपदानि.	अध्यायादीनि.		
अथ ये यज्ञेन दानेन	६	२	१६
अथ रूपाणां चक्षुरित्ये-तदेषा ...	१	६	२
अथ वंशः पौतमा-षीपुत्र ...	६	५	१
अथ वंशः पौति-माष्यो ...	२	६	१
अथ वंशः पौतिमाष्यो	४	६	१
अथ श्रोत्रमत्यवहत्तद्य-दा ...	१	३	१५
अथ ह चक्षुरूचुः	१	३	४
अथ ह प्राण उत्क्रमि-ष्यन् ...	६	१	१३
अथ ह प्राणमूचुस्त्वं न उद्गायेति ...	१	३	३
अथ ह मन ऊचुः	१	३	६
अथ ह याज्ञवल्क्यस्य द्वे भार्ये ...	४	५	१
अथ ह वाचक्नव्युवाच	३	८	१
अथ ह श्रोत्रमूचुः	१	३	५
अथ हैनमासन्यं प्राण-मूचुः ...	१	३	७
अथ हैनमसुरा ऊचुः	५	२	३
अथ हैनमुद्दालक आ-रुणिः	३	७	१
अथ हैनमुषस्तश्चाक्रा-यणः ...	३	४	१

काण्डिकाद्यपदानि.	अध्यायादीनि.		
अथ हैनं कहोलं कौ-			
षीतकेयः ...	३	५	१
अथ हैनं गार्गी वाच-			
क्नवी ...	३	६	१
अथ हैनं जारत्कारव	३	२	१
अथ हैनं भुज्युर्लाह्यायनिः	३	३	१
अथ हैनं मनुष्या ऊचुः	५	२	२
अथ हैनं विदग्धः शा-			
कल्यः ...	३	९	१
अथ होवाच ब्राह्मणा			
भगवन्तो	३	९	२७
अथातः पवमानानामेवा-			
भ्यारोहः ...	१	३	२८
अथातः संप्रत्तिर्यदा	१	५	१७
अथातो व्रतमीमांसा	१	५	२१
अथाऽऽत्मनेऽन्नाद्यमा-			
गायद्यद्धि	१	३	१७
अथाधिदैवतं ज्वलिष्या-			
म्येवाहमित्यग्निर्दध्र	१	५	२२
अथाध्यात्ममिदमेव मूर्ति	२	३	४
अथाभिप्रातरेव स्थाली-			
पाकावृताऽऽज्यम्	६	४	१९
अथामूर्तं प्राणश्च यश्च -			
यमन्तरा ...	२	३	५
अथामूर्तं वायुश्चान्तरिक्षं	२	३	३
अथास्य दक्षिणं कर्णम-			
भिनिधाय	६	४	२५
अथास्य नाम करोति	६	४	२६
अथास्य मातरमभिम-			
न्त्रयते ...	६	४	२८
अथास्या ऊरू विहा-			
पयति ...	६	४	२१

काण्डिकाद्यपदानि.	अध्यायादीनि.		
अथैतयोर्मन्थत्स मु-			
स्राच्च	१	४	६
अथैतद्वामेऽक्षणि	४	२	३
अथैतस्य प्राणस्याऽऽपः			
शरीरं ...	१	५	१३
अथैतस्य मनसो द्यौः			
शरीरं ...	१	५	१२
अथैतमग्नये	६	३	१४
अथैनमभिस्पृशति	६	३	४
अथैनमाचामति	६	३	६
अथैनमुद्यच्छत्यामे-			
स्यामेहि ते ...	६	३	५
अथैनं मात्रे प्रदाय	६	४	२७
अथैनं वसत्योपमन्त्रयां-	६	२	३
अथैनामभिपद्यते...	६	४	२०
अथैष श्लोको भवति	१	५	२३
अथो अयं वा आत्मा			
सर्वेषां भूतानां	१	४	१६
अद्भ्यश्चैनं चन्द्रमसं			
देवः ...	१	५	२०
अनन्दा नाम ते लोका	४	४	११
अन्धं तमः प्रविशन्ति	४	४	१०
अन्नं ब्रह्मेत्येक आहुः	५	१२	१
अयमग्निः सर्वेषां भूतानां	२	५	३
अयमग्निर्वैश्वानरः	५	९	१
अयमाकाशः सर्वेषां			
भूतानां ...	१	५	१०
अयमात्मा सर्वेषां भू-			
तानां ...	२	५	१४
अयमादित्यः सर्वेषां			
भूतानां ...	२	५	५
अयं चन्द्रः सर्वेषां			

कण्डिकाद्यपदानि.	अध्यायादीनि.		
भूतानां ...	२	५	७
अयं धर्मः सर्वेषां भूतानां	२	५	११
अयं वायुः सर्वेषां भूतानां .	२	५	४
अयं वै लोकोऽनिर्दो-तम .	६	२	११
अयꣳ स्तनयित्नुः सर्वेषां भूतानां	२	५	९
असौ व लोकोऽनिर्दा-तम ...	२	५	
अस्तमित आदित्ये याज्ञवल्क्य किंज्योतिरेवायं	४	३	३
अस्तमित आदित्ये याज्ञवल्क्य चन्द्रमस्यस्तमिते किंज्योतिरेवायं	४	३	४
अस्तमित आदित्ये याज्ञवल्क्य चन्द्रमस्यस्तमिते शान्तेऽग्नौ किंज्योतिरेवायं	४	३	५
अस्तमित आदित्ये याज्ञवल्क्य चन्द्रमस्यस्तमिते शान्तेऽग्नौ शान्तायां वाचि किंज्योतिरेवायं	४	३	६
अहर्वा अग्रं पुरस्तात् ।	१	२	
अहंब्रह्मेति होवाच याज्ञवल्क्यः	३	९	२५

आ.

आकाश एव यस्याऽऽयतनꣳ ...	३	९	१२
आग्नेवेश्यादाग्नेवेश्यो ...	४	६	२
आग्नेवेश्यादाग्नेवेश्यः	२	६	२
आत्मानं चेद्विजानीयादयमस्मीति पुरुषः	४	४	१२
आत्मैवेदमग्र आसीत्पुरुषविधः ...	१	४	१
आत्मैवेदमग्र आसीदेक एव ...	१	४	१७
आत्रेयीपुत्रादात्रेयीपुत्रो	६	५	२
आप एव यस्याऽऽयतनम् ...	३	९	१६
आप एवेदमग्र आसुः	५	५	१
आपो वा अर्कस्तद्यदपां	१	२	२
आरामस्य पश्यन्ति	४	२	१४

इ.

इदं मानुषं सर्वेषां भूतानां ...	२	५	१३
इदं वै तन्मधु पश्यन्नवोचत् । आथर्वणोऽश्विना	२	५	१७
इदं वै तन्मधु पश्यन्नवोचत् । ब्रह्मा मरा मनवे	२	५	१६
इदं वै तन्मधु पश्यन्नवोचत्पुरश्चक्रे द्विपदः	२	५	१८
इदं वै तन्मधु पश्यन्नवोचत् । रूपꣳ रूपं	२	५	१९
इदं सत्यं सर्वेषां भूतानां	२	५	१२
इन्धो ह वै नामैष	४	२	२
इमा आपः सर्वेषां भू-			

काण्डिकाद्यपदानि.	अध्यायादीनि.		
तानां ...	२	५	२
इमा दिशः सर्वेषां भू-			
तानां	२	५	६
इमावेव गोतमभरद्वा-			
जावयमेव ...	२	२	४
इयं पृथिवी सर्वेषां भू-			
तानां ...	२	५	१
इयं विद्युत्सर्वेषां भूता			
नां ...	२	५	८
इहैव सन्तोऽथ विद्मः	४	४	१४
उ.			
उक्थं प्राणो वा उक्थं	५	३	१
उषा वा अश्वस्य मे-			
ध्यस्य शिरः	१	१	१
ऋ.			
ऋचो यजूंषि	५	१४	२
ए.			
एकधैवानुद्रष्टव्यमेतद-			
प्रमेयं ...	४	४	२०
एकी भवति न पश्यति	४	४	२
एतद्ध वै तज्जनको	५	१४	८
एतद्ध स्म वै तद्विद्वानु-			
द्दालक ...	६	४	४
एतद्वै परमं ...	५	११	१
एतमु हैव चूलो	६	३	१०
एतमु हैव जानकिराय			
स्थूणः	६	३	११
एतमु हैव मधुकः	६	३	९
एतमु हैव वाजसनेयो	६	३	८
एतमु हैव सत्यकामो	६	३	२
एतस्य वा अक्षरस्य			
"शासने ...	३	८	९

काण्डिकाद्यपदानि.	अध्यायादीनि.		
एष उ एव बृहस्पति-			
र्वाग्वै ...	१	३	२०
एष उ एव ब्रह्मणस्पतिः	१	३	२१
एष उ एव साम वाग्वै	१	३	२२
एष उ वा उद्गीथः	१	३	२३
एष नित्यो महिमा ब्रा-			
ह्मणस्य ...	४	४	२३
एष प्रजापतिः	५	३	१
एषा वै भूतानां पृथिवी	६	४	१
क.			
कतम आत्मेति योऽयम्	४	३	७
कतम आदित्य इति	३	९	५
कतम इन्द्रः कतमः			
प्रजापतिः ...	३	९	३
कतमे ते त्रयो देवा	३	९	८
कतमे रुद्रा इति	३	९	४
कतमे वसव इत्यग्निश्च	३	९	३
कतमे षडित्यग्निश्च	३	९	७
कस्मिन्नु त्वं चाऽऽत्मा	३	९	२३
काम एव यस्याऽऽय-			
तनं	३	९	११
किंदेवतोऽस्यामुदीच्यां	३	९	२३
किंदेवतोऽस्यां दक्षिणा-			
यां ...	३	९	२१
किंदेवतोऽस्यां ध्रुवायां	३	९	२४
किंदेवतोऽस्यां प्रतीच्यां	३	९	२२
किंदेवतोऽस्यां प्राच्यां	३	९	२०
क्षत्रं प्राणो वै क्षत्रं			
प्राणो ...	५	१३	४
घ.			
घृतकौशिकाद्घृतकौ-			
शिकः ...	४	३	३
,, ,, ,,	२	३	३

कण्डिकाद्यपदानि.	अध्यायादीनि.		
च.			
चक्षुर्वै ग्रहः ...	३	२	५
चक्षुर्होच्चक्राम	६	१	९
चतुरौदुम्बरो भवत्यौ-			
दुम्बरः ...	६	४	१३
ज.			
जनको ह वैदेह आसां-			
चक्रे ...	४	१	१
जनको ह वैदेहो बहुद-			
क्षिणेन ...	३	१	१
जनको ह वैदेहः कूर्चा-			
दुपावसर्पन्नुवाच	४	२	१
जनकं ह वैदेहं याज्ञव-			
ल्क्यो ...	४	३	१
जात एव न जायते	३	९	२८
जातेऽग्निमुपसमाधा-			
याङ्क आधाय	६	४	२४
जिह्वा वै ग्रहः	३	२	४
ज्येष्ठाय स्वाहा श्रेष्ठाय			
स्वाहा ...	६	३	२
त.			
तदभिमृशेदनु वा मन्त्र-			
येत ...	६	४	५
तदाहुर्यदयमेक इवैव	३	९	९
तदाहुर्यद्ब्रह्मविद्यया	१	४	९
तदेतत्प्रेयः पुत्रात्प्रेयो	१	४	८
तदेतदृचाऽभ्युक्तम्। एष			
नित्यो महिमा	४	४	२३
तदेतद्ब्रह्म क्षत्त्रं विट्			
शूद्रः ...	१	४	१५
तदेतन्मूर्त यदन्यत्	२	३	२

कण्डिकाद्यपदानि.	अध्यायादीनि.		
तदेते श्लोका भवन्ति।			
अणुः पन्था विततः	४	४	८
तदेते श्लोका भवन्ति।			
स्वप्नेन ...	४	३	११
तदेष श्लोको भवति।			
अवांग्विलश्चमस	२	२	३
तदेष श्लोको भवति।			
तदेव सक्तः सह कर्म-			
णेति ...	४	४	६
तदेष श्लोको भवति।			
यदा सर्वे ...	४	४	७
तद्धापि ब्रह्मदत्तश्चैकि-			
तानेयो ...	१	३	२४
तद्धेदं तर्ह्यव्याकृतमा-			
सीत् ...	१	४	७
तद्यत्तत्सत्यमसौ...	५	५	२
तद्यथा तृणजलायुका			
तृणस्यान्तं ...	४	४	३
तद्यथाऽनः सुसमाहित-			
मु ...	४	३	१५
तद्यथा पेशस्कारी पे-			
शसो ...	४	४	४
तद्यथा महामत्स्य उभे			
कूले ...	४	३	१८
तद्यथा राजानमायान्तं	४	३	१७
तद्यथा राजानं प्रयियास-			
न्तमुग्राः ...	४	४	१८
तद्यथाऽस्मिन्नाकाशे	४	३	१९
तद्वा अस्यैतदतिच्छन्दा	४	३	२१
तद्वा एतदक्षरं गार्ग्यदृष्टं	३	८	११
तद्वैतदेतदेव ...	५	४	१

काण्डिकाद्यपदानि.	अध्यायादीनि.		
तव एव वस्याऽऽयतनं	३	१	१४
तमेताः सप्तार्चिषः	६	२	२
तमेव धीरो विज्ञाय	४	४	२१
तस्मिञ्शुक्लमुत नील-			
माहुः ...	४	४	९
तस्य प्राची दिक्प्राणः	४	२	४
तस्य वा एतस्य पुरु-			
षस्य ...	४	३	९
तस्य हैतस्य साम्नो यः			
प्रतिष्ठां वेद	१	३	२
तस्य हैतस्य साम्नो यः			
सुवर्णं वेद ...	१	३	३
तस्य हैतस्य साम्नो यः			
स्वं वेद ...	१	३	२५
तस्या उपस्थानं गाय-			
त्र्यस्येकपदी	५	१४	७
तस्या वेदिरुपस्थो	६	४	३
तस्यैव वाचः पृथिवी			
शरीरं ...	१	५	११
तान्होवाच ब्राह्मणा	३	१	२
ता वा अस्यैता हिता			
नाम नाड्यो	४	३	२०
ता२ हैतामेके	५	१४	५
ते देवा अब्रुवन्नेतावद्वा	१	३	१८
ते च एवमेतदिदुः	६	२	१५
ते ह वाचमूचुस्त्वं न			
उद्गायेति ...	१	३	२
ते हेमे प्राणा अहं२			
श्रेयसे ...	६	१	७
ते होचुर्नमो वयमुतो	१	३	८
तद्ध हैतमुद्दालक	६	३	७

काण्डिकाद्यपदानि.	अध्यायादीनि.		
त्रयाः प्राजापत्याः	५	२	१
त्रयो लोका एत एव			
वागेवायं ...	१	५	४
त्रयो वेदा एत एव	१	५	५
त्रयं वा इदं नाम रूपं	१	६	१
त्रीण्यात्मनेऽकुरुतेति			
मनो वाचं ...	१	५	३
त्वमेव ग्रह ...	२	२	९
त्वमेवास्य रुधिरं	३	९	२८
द.			
दिवं नमादित्याच्च	१	५	१९
दैवाः पितरो मनुष्या			
एत एव ...	१	५	६
दृषद्वालाकेहानचानो	२	१	१
दृप्ता ह प्राजापत्या दे-			
वाश्चासुराश्च	१	३	१
द्वे वाव ब्रह्मणा रूपे मूर्त	२	३	१
न.			
न तत्र रथा न रथ-			
योगा ...	४	३	१०
नैवेह किंचनाग्र आ-			
सीत् ...	१	२	१
प.			
पर्जन्यो वा अग्निर्गौतम	६	२	१०
पिता माता प्रजेति	१	५	७
पुरुषो वा अग्निर्गौतम	६	२	१२
पूर्णमदः पूर्णमिदं	५	१	१
पृथिव्येव यस्याऽऽयतनं	३	९	१०
पृथिव्यै चैनमग्नेश्च	१	५	१८
प्राणस्य प्राणमुत च-			
क्षुषः ...	४	४	१८

कण्डिकाद्यपदानि.	अध्यायादीनि.		
प्राणेन रक्षन्नवरं कु-			
लायं ...	४	३	१२
प्राणोऽपानो व्यान	५	१४	३
प्राणो वै ग्रहः	३	२	२
ब.			
ब्रह्म तं परादाद्यो भू-			
तानि तं ...	२	४	६
ब्रह्म तं परादाद्यो वे-			
दास्तं ...	४	५	७
ब्रह्म वा इदमग्र आ-			
सीत्तदात्मानमेवावेत्	१	४	१०
ब्रह्म वा इदमग्र आ-			
सीदेकमेव ...	१	४	११
भ.			
भूमिरन्तरिक्षं	५	१४	१
म.			
मनसैवानुद्रष्टव्यं	४	५	१
मनोमयोऽयं पुरुषः	५	६	१
मनो वै ग्रहः	३	२	७
मनो ह्येच्चक्राम	६	१	११
मांसान्यस्य शुक्रा-			
णि ...	३	९	२८
मैत्रेयीति होवाच	२	४	१
मैत्रेयीति होवाच या-			
ज्ञवल्क्य ...	४	५	२
य.			
यः पृथिव्यां तिष्ठन्	३	७	३
यः प्राणे तिष्ठन्	३	७	१६
यः श्रोत्रे तिष्ठन्	३	७	१९
यः सर्वेषु भूतेषु	३	७	१५
य आकाशे तिष्ठन्	३	७	१२

कण्डिकाद्यपदानि.	अध्यायादीनि.		
य आदित्ये तिष्ठन्	३	७	१८
य एष एतस्मिन्मण्डले			
पुरुषः ...	५	५	१
यजुः प्राणो वै यजुः			
प्राणे ...	५	१३	२
यत्किंच विजिज्ञास्यं	१	५	९
यत्किंचाविज्ञातं प्राणस्य	१	५	१०
यत्ते कश्चिदब्रवीत्तच्छृ-			
णवामेत्यब्रवीन्मे जि-			
त्वा ...	४	१	२
यत्र वा अन्यदिव			
स्यात् ...	४	३	३१
यत्र हि द्वैतमिव भवति			
तदितर इतरं जिघ्रति	२	४	१४
यत्र हि द्वैतमिव भवति			
तदितर इतरं पश्यति	४	४	१५
यत्सप्तान्नानि मेधया			
तपसाऽजनयत्पिता	१	५	१
यत्सप्तान्नानि मेधया			
तपसाऽजनयत्पिता	१	५	२
यत्समूलमावृहेयुः	३	९	२८
यथा महारजनं वासो	२	३	६
यथा वृक्षो वनस्पतिः	३	९	२८
यदा वै पुरुष ...	५	१०	१
यदा सर्वे प्रमुच्यन्ते			
कामा ...	४	४	७
यदेव ते कश्चिदब्र-			
वीन्म उदङ्कः	४	१	३
यदेव ते कश्चिदब्रवी-			
न्मे गर्दभीविपीतो	४	१	५
यदेव ते कश्चिदब्र-			

कण्डिकाद्यपदानि.	अध्यायादीनि.		
वीम्मे वर्कुर्वार्ष्णः	४	१	४
वदेव ते कश्चिदब्रवी- म्मे विदग्धः	४	१	७
वदेव ते कश्चिदब्रवी- म्मे सत्यकामो	४	१	६
वदेतमनुपश्यत्यात्मानं देवमञ्जसा	४	४	१५
वद्वृक्षो वृक्णो रोहति	३	९	२८
वद्वै तन्न जिघ्रति जि- घ्रन्मे ...	४	३	२४
वद्वै तन्न पश्यति पश्यं- म्मे ...	४	३	२३
वद्वै तन्न मनुते	४	३	२८
वद्वै तन्न रसयते	४	३	२५
वद्वै तन्न वदति	४	३	२६
वद्वै तन्न विजानाति	४	३	३०
वद्वै तन्न शृणोति	४	३	२७
वद्वै तन्न स्पृशति	४	३	२९
वश्चक्षुषि तिष्ठन्	३	७	१८
वश्चन्द्रतारके	३	७	११
वस्त्वमसि तिष्ठन्	३	७	१३
वस्तेजसि तिष्ठन्	३	७	१४
वस्त्वयि तिष्ठन्	३	७	२१
वस्मादर्वाक्संवत्सरोऽ- होभिः ...	४	४	१६
वस्मिन्पञ्चपञ्चजनाः	४	४	१७
वस्मान्नुविद्धः प्रतिबुद्ध आत्मा ...	४	४	१३
वाज्ञवल्क्य किंज्योति- रयं पुरुष	४	३	२
वाज्ञवल्क्याद्याज्ञवल्क्य	६	५	३
वाज्ञवल्क्योति होवाच कतिभिरयमद्य ब्रह्मा			
यज्ञं ...	३	१	९
याज्ञवल्क्येति होवाच कतिभिरयमद्यर्त्विभः	३	१	७
याज्ञवल्क्येति होवाच कत्यमद्याध्वर्युरस्मिन्	३	१	८
याज्ञवल्क्येति होवाच कत्ययमद्योद्गाता	३	१	१०
याज्ञवल्क्येति होवाच यत्रायं पुरुषो म्रियत उदस्मात् ...	३	२	११
याज्ञवल्क्येति होवाच यत्रायं पुरुषो म्रियते	३	२	१२
याज्ञवल्क्येति होवाच यत्रास्य पुरुषस्य	३	२	१३
याज्ञवल्क्येति होवाच यदिदमन्तरिक्षं	३	१	६
याज्ञवल्क्येति होवाच यदिदं सर्वमहोरात्रा- भ्यां ...	३	१	४
याज्ञवल्क्येति होवाच यदिदं सर्वं मृत्युनाऽऽ प्तं सर्वं ...	३	१	३
याज्ञवल्क्येति होवाच यदिदं सर्वं मृत्योरन्नं	३	२	१०
याज्ञवल्क्येति होवाच यदिदं सर्वं पूर्वपक्षा	३	१	५
याज्ञवल्क्येति होवाच शाकल्यो ...	३	९	१९
योऽग्नौ तिष्ठन्	३	७	५
यो दिक्षु तिष्ठन्	३	७	१०
यो दिवि तिष्ठन्	२	७	८
योऽन्तरिक्षे तिष्ठन्	३	७	६
योऽप्सु तिष्ठन्...	३	७	४

कण्डिकाद्यपदानि.	अध्यायादीनि.		
यो मनसि तिष्ठन्	३	७	२०
योऽयं दक्षिणेऽक्षन्पुरुषः	५	५	४
यो रेतसि तिष्ठन्	३	७	२३
यो वा एतदक्षरं	३	८	१०
यो वाचि तिष्ठन्	३	७	१७
यो वायौ तिष्ठन्	३	७	७
यो विज्ञाने तिष्ठन्	३	७	२२
यो वै स संवत्सरः	१	५	१५
योषा वा अग्निर्गौतम	६	२	१३
यो ह वा आयतनं वेद	१	५	
यो ह वै ज्येष्ठं च श्रेष्ठं च	६	१	१
यो ह वै प्रजातिं वेद	६	१	६
यो ह वै प्रतिष्ठां वेद	६	१	३
यो ह वै वसिष्ठां वेद	६	१	२
यो ह वै संपदं वेद	६	१	४
यो ह वै शिशुꣳ साधानꣳ	...	२	२	१
र.			
रूपाण्येव यस्याऽऽयतनं एवायमादर्शे	३	९	१५
रूपाण्येव यस्याऽऽयतनं एवासावादित्ये	३	९	१२
रेत एव यस्याऽऽयतनं	३	९	१७
रेतस इति मा वोचत	३	९	२८
रेतो होच्चक्राम	६	१	१२
व.			
वाग्वोच्चक्राम...	६	१	८
वाग्वै ग्रहः ...	३	२	३
वाचं धेनुमुपासीत	५	८	१
विज्ञातं विजिज्ञास्यमविज्ञातमेव	...	१	५	८
विद्युद्ब्रह्मेत्याहुः	५	७	१
वेत्थ यथेमाः प्रजाः	६	२	२
श.			
शाकल्येति होवाच	३	९	१८
श्रोत्रं वै ग्रहः ...	३	२	६
श्रोत्रं होच्चक्राम	६	१	१०
श्वेतकेतुर्ह वा आरुणेयः	६	२	१
स.			
स एष संवत्सरः प्रजापतिः ...	१	५	१४
स ऐक्षत यदि वा	१	२	५
स त्रेधाऽऽत्मानं व्यकुरुताऽऽदित्यं ...	१	२	३
स नैव व्यभवत्तच्छ्रेयोरूपमत्यसृजत	१	४	१४
स नैव व्यभवत्स विशमसृजत ...	१	४	१२
स नैव व्यभवत्स शौद्रं वर्णमसृजत ...	१	४	१३
समानमा सांजीवीपुत्रात् ...	६	५	४
स य इच्छेत्पुत्रो मे	६	४	१४
स य इमाꣳस्त्रीँल्लोकान्पूर्णान् ...	५	१४	६
स यत्रायमणिमानं न्येति	४	३	३६
स यत्रायमात्माऽबल्यं	४	४	१
स यत्रैतत्स्वप्न्यया चरति ...	२	१	१८
स यथा दुन्दुभेर्हन्यमानस्य ...	२	४	७
स यथा दुन्दुभेर्हन्यमानस्य ...	४	५	८
स यथाऽऽर्द्रैधाग्नेरभ्या-			

काण्डिकाद्यपदानि.	अध्यायादीनि.		
हिताद्व्याख्यातानि	४	५	११
स यथाऽऽद्वैधाग्नेरभ्याहितात्.....व्याख्यानानि... ...	२	४	१०
स यथा वीणायै वाद्यमानायै	२	४	९
स यथा वीणायै वाद्यमानायै ...	४	५	१२
स यथा शङ्खस्य ध्मायमानस्य ...	२	४	८
स यथा शङ्खस्य	४	५	९
स यथा सर्वासामपा॰	२	४	११
स यथा सर्वासामपां	४	५	१२
स यथा सैन्धवखिल्य उदके ...	२	४	१२
स यथा सैन्धवघनो	४	५	१३
स यथोर्णनाभिः	२	१	२०
स यामिच्छेत्कामयेत मेति ...	६	४	१
स यो मनुष्याणां	४	३	३३
स यः कामयेत	६	३	१
सलिल एको द्रष्टाऽद्वैतो	४	३	३२
स वा अयमात्मा ब्रह्म विज्ञानमयो	४	४	५
स वा अयमात्मा सर्वेषां भूतानामधिपतिः	२	५	१५
स वा अयं पुरुषो जायमानः ...	४	३	८
स वा एष एतस्मिन्बुद्धान्ते ...	४	३	१७
स वा एष संप्रसादे	४	३	१५
स वा एष स्वप्नान्ते	४	३	३४

काण्डिकाद्यपदानि.	अध्यायादीनि.		
स वा एष स्वप्ने	४	३	१६
स वा एष महानज आत्माऽजरोऽमरो	४	४	२५
स वा एष महानज आत्माऽन्नादो...	४	४	२४
स वा एष महानज आत्मा योऽयं	४	४	२२
स वै नैव रेमे तस्मादेकाकी न रमते	१	४	३
स वै वाचमेव प्रथमामत्यवहत्सा ...	१	३	१२
स ह प्रजापतिरीक्षांचक्रे ...	६	४	३
स होवाच गार्ग्यो य एवायमग्नौ	२	१	७
स होवाच गार्ग्यो य एवायमप्सु ...	२	१	८
स होवाच गार्ग्यो य एवायमाकाशे	२	१	९
स होवाच गार्ग्यो य एवायमात्मनि	२	१	१३
स होवाच गार्ग्यो य एवायमादर्शे	२	१	९
स होवाच गार्ग्यो य एवायं छायामयः	२	१	१२
स होवाच गार्ग्यो य एवायं दिक्षु	२	१	११
स होवाच गार्ग्यो य एवायं यन्तं ...	२	१	१०
स होवाच गार्ग्यो य एवायं वायौ ...	२	१	६
स होवाच गार्ग्यो य एवासावादित्ये	२	१	२

कण्डिकाद्यपदानि.	अध्यायादीनि.		
स होवाच गार्ग्यो य एवासौ चन्द्रे ...	२	१	३
स होवाच गार्ग्यो य एवासौ विद्युति	२	१	४
स होवाच तथा नस्त्वं गौतम ...	६	२	८
स होवाच तथा नस्त्वं तात ...	६	२	४
स होवाच देवेषु वै गौतम ...	६	२	६
स होवाच न वा अरे पत्युः कामाय	२	४	५
स होवाच न वा अरे पत्युः ...	४	५	६
स होवाच प्रतिज्ञातो	६	२	५
स होवाच महिमान एवैषा ...	३	९	२
स होवाच यदूर्ध्वं गार्गि आकाश एव तदोतं	३	८	७
स होवाच यदूर्ध्वं गार्गि आकाशे तदोतं	३	८	४
स होवाच याज्ञवल्क्यः प्रिया बतारे ...	२	४	४
स होवाच याज्ञवल्क्यः प्रिया वै खलु...	४	५	५
स होवाच वायुर्वै गौतम ...	३	७	२
स होवाच विज्ञायते	६	२	७
स होवाचाजातशत्रुः प्रतिलोमं ...	२	१	१५
स होवाचाजातशत्रु-रेतावत् ...	२	१	१४
स होवाचाजातशत्रुर्य-त्रैष एतत् पुरुषः क्वैष	२	१	१६
स होवाचाजातशत्रुर्य-त्रैष एतत् पुरुषस्तदेषा	२	१	१७
स होवाचैतद्वै तदक्षरं	३	८	८
स होवाचोवाच वै सो-ऽगच्छन्वै ...	३	३	२
स होवाचोषस्तश्चा-क्रायणो ...	३	४	२
सा चेदस्मै न दद्यात्का-ममेनां ...	६	४	७
सा चेदस्मै न दद्यादि-न्द्रियेण ...	६	४	८
साम प्राणो वै साम प्राणे ...	५	१३	३
सा वा एषा देवता दुर्नाम ...	१	३	९
सा वा एषा देवतैतासां मृत्युमपहत्य ...	१	३	१०
सा वा एषा देवतैतासां मृत्युमपहत्यायेना	१	३	११
सा ह वागुवाच	६	१	१४
सा होवाच नमस्तेऽस्तु	३	८	५
सा होवाच ब्राह्मणा	३	८	१२

काण्डिकाद्यपदानि.	अध्यायादीनि.		
सा होवाच मैत्रेयी । यन्नु म इयं वित्तेन पूर्णा स्यात्कथं	२	४	२
सा होवाच मैत्रेयी । यन्नु म इयं वित्तेन पूर्णा स्यात्स्यां...	४	५	३
सा होवाच मैत्रेयी येनाहं ...	२	४	३
सा होवाच मैत्रेयी	४	५	४
सा होवाच मैत्रेय्यत्रैव मा भगवानमूमुहन्न	२	४	१३
सा होवाच मैत्रेय्यत्रैव मा भगवान्मोहान्त	४	५	१४
सा होवाच यद्यूर्ध्वं याज्ञवल्क्य ...	३	८	३
सा होवाचाहं वै त्वा	३	८	२
सैषा गायत्र्येतस्मिंस्तु- रीये	४	१४	४
सोऽकामयत द्वितीयो	१	२	४
सोऽकामयत भूयसा	१	२	६
सोऽकामयत मेध्यं	१	२	७
सोऽबिभेत्तस्मादेकाकी	१	४	२
सोऽयास्य आङ्गिरसो- ऽङ्गानां हि रसः	१	३	१९
सोऽवेदहं वाव सृष्टिः	१	४	५
सोष्यन्तीमद्भिरभ्युक्षति	५	४	२३
सो हेयमीक्षांचक्रे	१	४	४
स्वप्नान्त उच्चावचमी- यमानो ...	४	३	१३
स्वप्नेन शारीरमभिप्र- हत्य	४	३	११

समाप्तोऽयं बृहदारण्यकोपनिषत्काण्डिकाद्यपदानां वर्णानुक्रमः ।

ॐ तत्सद्ब्रह्मणे नमः ।

बृहदारण्यकोपनिषत् ।

आनन्दगिरिकृतटीकासंवलितशाङ्करभाष्यसमेता ।

(अथ श्रीमच्छंकरभगवत्पादविरचितं भाष्यम्) ।

ॐ नमो ब्रह्मादिभ्यो ब्रह्मविद्यासंप्रदायकर्तृभ्यो वंशऋषिभ्यो नमो गुरुभ्यः ।

(अथाऽऽनन्दगिरिकृता बृहदारण्यकभाष्यटीका) ।

यदविद्यावशाद्विश्वं दृश्यते रशनाहिवत् ।
यद्विद्यया च तद्ध्वानिस्तं वन्दे पुरुषोत्तमम् ॥ १ ॥
नमस्त्र्यन्तसंदोहसरसरुहभानवे ।
गुरवे परपक्षौघध्वान्तध्वंसपटीयसे ॥ २ ॥
भगवत्पादपादाब्जद्वंद्वं द्वंद्वनिबर्हणम् ।
सुरेश्वरादिसद्भृङ्गैरवलम्बितमाभजे ॥ ३ ॥
बृहदारण्यके भाष्ये शिष्योपक्रमसिद्धये ।
सुरेश्वरोक्तिमाश्रित्य क्रियते न्यायनिर्णयः ॥ ४ ॥

काण्वोपनिषद्विवरणव्याजेनाशेषामेवोपनिषदं शोधयितुकामो भगवान्भाष्यकारो विद्योपशमादिसमर्थं शिष्टाचारप्रमाणकं परापरगुरुनमस्काररूपं मङ्गलमाचरति—नमो ब्रह्मादिभ्य इति । वेदो हिरण्यगर्भो वा ब्रह्म तन्नमस्कारेण सर्वा देवता नमस्कृता भवन्ति तदर्थत्वात्तदात्मकत्वाच्च । 'एष उ एव सर्वे देवाः' इति श्रुतेः । आदिपदेन परमेष्ठिप्रभृतयो गृह्यन्ते । यद्यपि तेषामुक्तो ब्रह्मान्तर्भावस्तथाऽपि तेष्वनादरनिरासार्थं पृथग्ग्रहणम् । चतुर्थी नमोयोगे । नमःशब्दस्त्रिविधप्रह्वीभावविषयः । ननु ब्रह्मविद्यां वक्तुकामेन किमित्येते नमस्क्रियन्ते सैव हि वक्तव्येत्यत आह—ब्रह्मविद्येति । एतेषां तत्संप्रदायकर्तृत्वे वंशब्राह्मणं प्रमाणयति—वंशऋषिभ्य इति । यद्यपि तत्र पौतिमाष्यादयो ब्रह्मान्ताः संप्रदायकर्तारः श्रूयन्ते तथाऽपि गुरुशिष्यक्रमेण ब्रह्मणः प्राथम्यमिति तदित्वमिति भावः । संप्रत्यपरगुरूनमस्करोति—नमो गुरुभ्य

---

१ ग. घ. च. छ. °ऋषिभ्यो । २ क. रसना° । ३ घ. °ति । ॐ म° । ४ घ. °ऋषिभ्य ।

इति । यद्यपि ब्रह्मविद्यासंप्रदायकर्तृन्तर्भावादेते प्रागेव नमस्कृतास्तथाऽपि शिष्याणां गुरुविषयादरातिरेककार्यार्थं पृथग्गुरुनमस्करणम् । यस्य 'देवे परा भक्तिः' इत्यादिश्रुतेरिति ।

" उषा वा अश्वस्य " इत्यवमाद्या वाजसनेयिब्राह्मणोपनिषत् । तस्या इयमल्पग्रन्था वृत्तिरारभ्यते संसारव्याविवृत्सुभ्यः संसारहेतुनिवृत्तिसाधनब्रह्मात्मैकत्वविद्याप्रतिपत्तये ।

यदुद्दिश्य भगवान्भाष्यमाचरितं तत्प्रतिज्ञातुं प्रतीकमादत्ते—**उषा वा इति** । एतेन चिकीर्षितायाः वृत्तेर्भर्तृप्रपञ्चभाष्येणागतार्थत्वमुक्तम् । तद्धि द्वया हेत्यादिमाध्यंदिनश्रुतिमधिकृत्य प्रवृत्तम् । इयं पुनः 'उषा वा अश्वस्य' इत्यादिकाण्वश्रुतिमाश्रित्येति । अथोद्देश्यं निर्दिशति—**तस्या इति** । भर्तृप्रपञ्चभाष्यादिशेषान्तरमाह—**अल्पग्रन्थेति** । अस्या ग्रन्थतोऽल्पत्वेऽपि नार्थतस्तथात्वमिति ग्रन्थस्य ग्रहणम् । वृत्तिशब्दो भाष्यविषयः । सूत्रानुकारिभिर्वाक्यैः सूत्रार्थस्य स्वपदानां चोपवर्णनस्य भाष्यलक्षणस्यात्र भावादिति । ननु कर्मकाण्डाधिकारिणो विलक्षणोऽधिकारी न ज्ञानकाण्डे संभवति । अर्थित्वादेः साधारणत्वाद्वैराग्यादेश्च दुर्वचनत्वात् । नच निरधिकारं शास्त्रमारम्भमर्हतीत्यत आह—**संसारेति** । कर्मकाण्डे हि स्वर्गादिकामः संसारपरवशो नरपशुरधिकारी । इह तु संसारादुद्यावृत्तिमिच्छवो विरक्ताः । नच वैराग्यं दुर्वचं शुद्धबुद्धेर्विवेकिनो ब्रह्मलोकान्ते संसारे तत्संभवात् । उक्तं हि—

" शोष्यमाणं तु तच्चित्तमीश्वरार्पितकर्मभिः ।
वैराग्यं ब्रह्मलोकादौ व्यनक्त्याशु सुनिर्मलम् " इति ॥

अतो यथोक्तविशिष्टाधिकारिभ्यो वृत्तेरारम्भः संभवतीत्यर्थः । तथाऽपि विषयप्रयोजनसंबन्धानामभावे कथं वृत्तिरारभ्यते तत्राऽऽह—**संसारहेत्विति** । प्रमातृतामुखः कर्तृत्वादिरनर्थः संसारस्तस्य हेतुरात्माविद्या तन्निवृत्तेः साधनं ब्रह्मात्मैकत्वविद्या तस्याः प्रतिपत्तिरप्रतिबद्धायाः प्राप्तिस्तदर्थं वृत्तिरारभ्यत इति योजना । एतदुक्तं भवति—सनिदानानर्थनिवृत्तिः शास्त्रस्य प्रयोजनम् । ब्रह्मात्मैक्यविद्या तदुपायः । तदैक्यं विषयः । संबन्धो ज्ञानफलयोरुपायोपेयत्वम् । शास्त्रतद्विषययोर्विषयविषयितया तदारभ्यं शास्त्रमिति ।

सेयं ब्रह्मविद्योपनिषच्छब्दवाच्या तत्पराणां सहेतोः संसारस्यात्यन्तावसादनात् । उपनिपूर्वस्य सदेस्तदर्थत्वात । तादर्थ्याद्ग्रन्थोऽप्युपनिषदुच्यते ।

---

१ क. 'रतिवि' । २ अ. 'लोकं च ज्ञानमेव तु नि' । ३ घ. ण. 'नक्यथ सु' । ४ ङ. 'स्यन्तमव' ।

प्रयोजनादिषु प्रवृत्त्यङ्गत्वोक्तेष्वपि सर्वव्यापाराणां प्रयोजनार्थत्वात्तस्य प्राधान्यम् । उक्तं हि—

" सर्वस्यैव हि शास्त्रस्य कर्मणो वाऽपि कस्यचित् ।
यावत्प्रयोजनं नोक्तं तावत्तत्केन गृह्यते " इति ॥

तथा च शास्त्रारम्भौपयिकं प्रयोजनमेव नामव्युत्पादनद्वारा व्युत्पादयति—**सेयमिति** । अध्यात्मशास्त्रेषु प्रसिद्धा संनिहिता चात्र ब्रह्मात्मैक्यविद्या तन्निष्ठानां सर्वकर्मसंन्यासिनां सनिदानस्य संसारस्यात्यन्तनाशकत्वाद्भवत्युपनिषच्छब्दवाच्या । ' उपनिषदं भो ब्रूहि ' इत्याद्या च श्रुतिः । तस्मादुपनिषच्छब्दवाच्यत्वप्रसिद्धेर्विद्यायास्ततो यथोक्तफलसिद्धिरित्यर्थः । कथं तस्यास्तच्छब्दवाच्यत्वेऽप्येतावानर्थो लभ्यते तत्राऽऽह—**उपनिपूर्वस्येति** । अस्यार्थः—' षद्लृ विशरणगत्यवसादनेषु ' इति स्मर्यते । सदेर्धातोरुपनिपूर्वस्य क्विबन्तस्य सहेतुसंसारनिवर्तकब्रह्मविद्यार्थत्वादुपनिषच्छब्दवाच्या सा भवत्युक्तफलवती । उपशब्दो हि सामीप्यमाह । तच्चासति संकोचके प्रतीचि पर्यवस्यति । निशब्दश्च निश्चयार्थस्तस्मादैकात्म्यं निश्चितं तद्विद्या सहेतुं संसारं सादयतीत्युपनिषदुच्यते । उक्तं हि—'अवसादनार्थस्य चावसादात्' इति । ब्रह्मविद्यैव चेदुपनिषदिष्यते कथं तर्हि ग्रन्थे वृद्धास्तच्छब्दं प्रयुञ्जते न खल्वेकस्य शब्दस्यानेकार्थत्वं न्याय्यमित्याशङ्क्याऽऽह—**तादर्थ्यादिति** । ग्रन्थस्य ब्रह्मविद्याजनकत्वादुपचारात्तत्रोपनिषत्पदमित्यर्थः ।

सेयं षडध्याय्यरण्येऽनूच्यमानत्वादारण्यका । बृहत्त्वात्परिमाणतो बृहदारण्यकम् । तस्यास्य कर्मकाण्डेन संबन्धोऽभिधीयते ।

यथोक्तविद्याजनकत्वे ग्रन्थस्य किमिति तदध्येतॄणां सर्वेषां विद्या न भवतीत्याशङ्क्य श्रवणादिपराणामेवारण्यानुवचनादिनियमाधीताक्षरेभ्यस्तज्जन्मेति बृहदारण्यकनामनिर्वचनपूर्वकमाह—**सेयमिति** । अथारण्यानुवचनादिनियमाधीतवेदान्तनामपि केषांचिद्विद्यानुपलम्भात्कुतो यथोक्ताक्षरेभ्यस्तदुत्पत्तिरित्यत आह—**बृहत्त्वादिति** । उपनिषदन्तरेभ्यो ग्रन्थपरिमाणातिरेकादस्य बृहत्त्वं प्रसिद्धमर्थतोऽपि तदस्ति ब्रह्मणोऽखण्डैकरसस्यात्र प्रतिपाद्यत्वात्तज्ज्ञानहेतूनां चान्तरङ्गाणां भूयसामिह प्रतिपादनात् । अतो बृहत्त्वादारण्यकत्वाच्च बृहदारण्यकम् । नचैतदद्दशुद्धबुद्धेरधीतमपि विद्यामादधाति । "कषाये कर्मभिः पक्वे ततो ज्ञानम्" इति स्मृतेरित्यर्थः । ज्ञानकाण्डस्य विशिष्टाधिकार्यादिवैशिष्ट्येऽपि कर्मकाण्डेन नियतपूर्वापरभावानुपपत्तिलभ्यः संबन्धो वक्तव्यः । स च परीक्षकविप्रतिपत्तेरशक्यो विशेषतो ज्ञातुमित्याशङ्क्याऽऽह—**तस्येति** ।

---

१ क. °त्मैकत्वावि° । २ ख. °नर्थ उपल° । ३ घ. ञ. ण. निश्चिन्वता । ४ ख. । बृहदार° । ५ क. ख. °पि तस्य त° ।

सर्वोऽप्ययं वेदः प्रत्यक्षानुमानाभ्यामनवगतेष्टानिष्टप्राप्तिपरिहारोपायप्रकाशनपरः सर्वपुरुषाणां निसर्गत एव तत्प्राप्तिपरिहारयोरिष्टत्वात् ।

प्रतिज्ञातं संबन्धं प्रकटयितुमसिद्धप्रमाणभावानां वेदान्तानां संबन्धाभिधानावसराभावात्तत्प्रामाण्यं प्रतिपाद्य पश्चात्तेषां कर्मकाण्डेन सबन्धविशेषवचनमुचितमिति मन्वानस्तत्प्रामाण्यं साधयति—**सर्वोऽपीति** । प्रत्यक्षानुमानाभ्यामित्यागमातिरिक्तप्रमाणोपलक्षणार्थम् । एषोऽर्थोऽध्ययनविध्युपात्तः सर्वोऽपि काण्डद्वयात्मको वेदो मानान्तरानधिगतं यदिष्टोपायादि तज्ज्ञापनपरस्तथा चाज्ञातज्ञापकत्वाविशेषात्तुल्यं प्रामाण्यं काण्डयोरिति । अथवा वेदनं वेदोऽनुभवः । स च शब्देतरमानायोग्यो रूपादिहीनत्वात् । 'एतदप्रमेयम्' इति हि श्रुतिः । स चेष्टानिष्टप्राप्तिपरिहारोपायस्तस्यैव तत्तदात्मनाऽवस्थानात् । 'तच्च त्वमसि' इत्यादिश्रुतेः । स च प्रकाशनः सर्वप्रकाशकत्वात् । 'तमेव भान्तमनुभाति सर्वम्' इति श्रुतेः । स च परोऽविद्यातत्कार्यातीतत्वात् । 'विरजः पर आकाशात्' इत्यादिश्रुतेः । एवंरूपो वेदपदवेदनीयश्चिदेकरसः प्रत्यग्धातुरेव सर्वोऽपि कार्यकारणात्मकः प्रपञ्चः । 'आत्मैवेदं सर्वम्' इति श्रुतेः । तथा च यथोक्तं वस्तु प्रकाशयन्तो वेदान्ता विधिवाक्यवत्प्रमाणमिति । अथवा प्रत्यक्षादिनाऽनवगतो योऽसाविष्टप्राप्त्याद्युपायो ब्रह्मात्मा तस्य प्रकाशनपरः सर्वोऽप्ययं वेदः । तस्यैवाज्ञातत्वात्तत्र कर्मकाण्डं कर्मानुष्ठानप्रयुक्तबुद्धिशुद्धिद्वारा ब्रह्माधिगतावारादुपकारकम् । 'विविदिषन्ति यज्ञेन' इति श्रुतेः । ज्ञानकाण्डं तु साक्षादेव तत्रोपयुक्तम् । परमपुरुषस्यौपनिषदत्वश्रवणात् । 'सर्वे वेदा यत्पदमामनन्ति' इति च श्रुतेः । यद्युक्तं कर्मकाण्डवज्ज्ञानकाण्डस्यापि प्रामाण्यमिति । अधिकारिसौलभ्यप्रतिपादनद्वारा ज्ञानकाण्डप्रामाण्यमेव स्फुटयति—**सर्वपुरुषाणामिति** । अयमर्थः—सुखं मे स्याद्दुःखं मा भूदिति स्वभावतः शास्त्रं विना सर्वेषां पुरुषाणामनवच्छिन्नसुखादिमात्रेऽभिलाषोपलम्भात्तन्मात्रस्य च मोक्षत्वात्तत्कामिनो ज्ञानकाण्डाधिकारिणः सुलभत्वाच्चास्मिन्प्रमां स्वार्थविषयामादधत्कथं तदप्रमाणमिति । **दृष्टविषये चेष्टानिष्टप्राप्तिपरिहारोपायज्ञानस्य प्रत्यक्षानुमाभ्यामेव सिद्धत्वान्नाऽऽगमान्वेषणा । न चासति जन्मान्तरसंबन्ध्यात्मास्तित्वे विज्ञाते जन्मान्तरेष्टप्राप्तिपरिहारेच्छा स्यात् । स्वभाववादिदर्शनात् ।**

ननु वेदस्य कार्यपरतया प्रामाण्यात्कर्मकाण्डवत्काण्डान्तरस्यापि कार्यपरतया प्रामाण्यमेष्टव्यमिति नेत्याह—**दृष्टविषय इति** । क्रियाकारकफलेतिकर्तव्यतानामन्यतमस्मिन्का (मे का) र्ये सप्रीहितप्राप्त्याद्युपायभूते व्युत्पत्तिकाले प्रत्यक्षादिसिद्धे तथाविधकार्यार्थियोऽन्यथालब्धत्वात्तत्र नाऽऽगमोऽनुसंधेयः। न हि लोकवेदयोस्तन्नि-

---

१ क. °स्तुस्वरूपं प्र° । २ ख. °द्विमानान° । ३ झ °षयत्वे चे° । ४ छ. झ. °त्वज्ञा° ।

ऋते अलौकिके तस्मिन्नव्युत्पत्तिप्रसङ्गात्। नचाव्युत्पन्नानि पदानि बोधकान्यतिप्रसङ्गात्। नच ब्रह्मण्यपि तुल्या व्युत्पत्त्यनुपपत्तिः। तस्मिन्ब्रह्मत्वेनाऽऽत्मत्वेन च प्रसिद्धेः। तेनतत्सामान्योपायो विज्ञानादिपदानां व्युत्पत्तेः सुकरत्वात्। तानि चालौकिकमखण्डं प्रत्यग्ब्रह्म निर्लुठितसामान्यविशेषं लक्षणया बोधयन्ति। तस्माद्ब्रह्मैव वेदप्रमाणकं न कार्यमिति भावः। किंच तिष्ठतु वेदान्तप्रामाण्यं कर्मकाण्डेऽपि व्यतिरिक्तात्मास्तित्वादौ सिद्धेऽर्थे प्रामाण्यमावश्यकम्। तदभावे तत्प्रामाण्यायोगात्। न हि भविष्यद्देहसंबन्ध्यात्मसद्भावानभिगमे पारलौकिकप्रवृत्तिर्विश्रम्भः। तस्मात्कर्मकाण्डप्रामाण्यमिच्छता सिद्धेऽर्थे भविष्यद्देहसंबन्धिन्यात्मनि स्वर्गादौ च तत्प्रामाण्यस्याभ्युपेयत्वात्कार्ये वेदप्रामाण्यानियमाद्वेदान्तानामपि स्वार्थे मानत्वं सिध्यतीत्याह—नचेति। ननु देहान्तरसंबन्ध्यात्मज्ञानं विनाऽपि विधिवशाद्दृष्टार्थक्रियासु प्रवृत्तिः स्यादिति नेत्याह—स्वभावेति। यदाऽऽत्मा देहान्तरसंबन्धी शास्त्रान्मानान्तराच्च न प्रमितस्तदा भोक्तुरनवगमान्न प्रेक्षापूर्वकारी यागाद्यनुतिष्ठेत्। लोकायतस्य व्यतिरिक्तात्मास्तित्वमजानतो जन्मान्तरेष्टानिष्टप्राप्तिहानीच्छया वैदिकक्रियास्वप्रवृत्तेर्दर्शनात्। अतो नातिरिक्तात्मज्ञानं विना सांपरायिके प्रवृत्तिरित्यर्थः।

तस्माज्जन्मान्तरसंबन्ध्यात्मास्तित्वे जन्मान्तरेष्टप्राप्तिपरिहारोपायविशेषे च शास्त्रं प्रवर्तते। "येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके" इत्युपक्रम्यास्तीत्येवोपलब्धव्य इत्येवमादिनिर्णयदर्शनात्। "यथा च मरणं प्राप्य" इत्युपक्रम्य—

"योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः।
स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथाश्रुतम्"

इति च "स्वयं ज्योतिः" इत्युपक्रम्य "तं विद्याकर्मणी समन्वारभेते" "पुण्यो वै पुण्येन कर्मणा भवति पापः पापेन" इति च "ज्ञापयिष्यामि" इत्युपक्रम्य "विज्ञानमयः" इति च व्यतिरिक्तात्मास्तित्वम्।

ननु विधयः साधनविशेषं बोधयन्तो नातिरिक्तात्मास्तित्वादौ मानं वाक्यभेदप्रसङ्गादित्यत आह—तस्मादिति। अतिरिक्तात्मधियं विना पारलौकिकप्रवृत्त्यनुपपत्त्या कर्मकाण्डप्रामाण्यायोगादिति यावत्। विधीनां श्रुत्यर्थाम्यामुभयार्थत्वमविरुद्धमित्यर्थः। न केवलं विधिभिरेवार्थादाक्षिप्तमतिरिक्तात्मास्तित्वं किंतु श्रुत्याऽपि स्वमुखेनोक्तमित्याह—येयमिति। निर्णयदर्शनाद्व्यतिरिक्तात्मास्तित्वमिति संबन्धः। तत्रैव प्रकृतोपयोगित्वेनोपक्रमोपसंहारान्तरे दर्शयति—यथा चेति। पूर्व-

---

१ क. घ. तत्सा°। ण. तत्र सामा°। २ ख. घ. °लुण्ठित°। ३ घ. ज. ण. °निष्टाप्ति°। ४ ग, छ. °म्ये तु सं°। ५ क. ख. ग. च. छ. झ. °ति ज्ञ°। ६ ज्ञ. च ज्ञाप°। ७ घ. ण. °न्तरं द°।

वदेव संबन्धद्योतनार्थं चकारः। उपक्रमोपसंहारैकरूप्यात्कठवल्लीनामपि निरिक्तात्मास्तित्वे तात्पर्यमुक्त्वा बृहदारण्यकवाक्यस्यापि तत्र तात्पर्यमाह—**स्वयमिति**। न हि प्रसिद्धजडत्वस्य देहादेः स्वयंज्योतिष्ट्वमिति ज्योतिर्ब्राह्मणगतोपक्रमस्तद्विषयो देहादिव्यतिरिक्तात्मानमधिकरोति। तं प्रेतं विद्याकर्मणी पूर्वोपार्जिते फलदानायानुगच्छतः। स च गत्वा ज्ञानकर्मानुगुणं फलमनुभवतीति शारीरकब्राह्मणगतोपसंहारोऽपि जन्मान्तरसंबन्धविषयः। नचावैव भस्मीभवतो देहादेर्जन्मान्तरसंबन्धो युक्तः। तेनाऽऽत्मा देहादिव्यतिरिक्तो जन्मान्तरसंबन्धी सिद्धो ब्राह्मणाभ्यामित्यर्थः। अजातशत्रुब्राह्मणे च त्वेव त्वां ज्ञपयिष्यामीत्युपक्रमो व्यतिरिक्तात्मास्तित्वविषयः। न हि प्रत्यक्षे देहादौ जिज्ञासाऽस्ति। तत्रैवोपसंहारे "य एष विज्ञानमयः पुरुषः" इति विज्ञानमयविशेषणादतिरिक्तात्मास्तित्वं दर्शितं न हि देहादेर्विज्ञानमयत्वमस्ति तस्मात्तदप्युपक्रमोपसंहाराभ्यां व्यतिरिक्तात्मास्तित्वं गमयतीत्याहं—**ज्ञपयिष्यामीत्युपक्रम्येति**। नचोदाहृतानां वाक्यानामप्रामाण्यम्। तत्प्रामाण्यस्यौत्पत्तिकसूत्रे हेत्वविशेषादभ्युपेयत्वादिति भावः।

तत्प्रत्यक्षविषयमेवेति चेत्। न। वादिविप्रतिपत्तिदर्शनात्। न हि देहान्तरसंबन्धिन आत्मनः प्रत्यक्षेणास्तित्वाविज्ञाने लोकायतिका बौद्धाश्च नः प्रतिकूलाः स्युर्नास्त्यात्मेति वदन्तः। न हि घटादौ प्रत्यक्षविषये कश्चिद्विप्रतिपद्यते नास्ति घट इति।

यथोक्तात्मन्यहंप्रत्ययो मानं तत्र देहाकारास्फुरणादतिरिक्तात्मास्तित्वस्य तेनैव स्फूर्त्युपपत्तेरतो न तत्र श्रुतिप्रामाण्यमिति शङ्कते—**तत्प्रत्यक्षेति**। प्रत्यक्षस्य विषयोऽवकाशो यस्मिन्नित्यतिरिक्तात्मास्तित्वमुच्यते। यद्यपि व्यतिरिक्तात्मास्तित्वं त्वदभिप्रायेणाहं धीगोचरस्तथाऽपि न सा व्यतिरेकमात्मनो गोचरयति युक्त्यागमविवेकशून्यानामहंप्रत्ययभाजां व्यतिरेकप्रत्ययप्राप्तौ विपश्चितां विप्रतिपत्त्यभावप्रसङ्गादिति परिहरति—**न वादीति**। वेदप्रतिकूला वादिनो नास्तिका नैव विवादं मुञ्चन्तीत्याह—**न हीति**। तेषु प्रातिकूल्यसंभावनार्थं विशेषणं नेत्यादि। इति वदन्तः सन्तो नोऽस्माकं प्रतिकूला न हि स्युरेवं वदनस्यैवासंभवादध्यक्षविरोधादिति योजना। प्रत्यक्षे विषये विप्रतिपत्त्यभावे दृष्टान्तमाह—**न हीति**।

स्थाण्वादौ पुरुषादिदर्शनान्नेति चेत्। न। निरूपितेऽभावात्। न हि प्रत्यक्षेण निरूपिते स्थाण्वादौ विप्रतिपत्तिर्भवति। वैनाशिकास्त्वहमिति

---

१ घ ण. °नार्थश्चका°। २ क. त्वा ज्ञाप°। ३ ञ. °ह ज्ञाप°। ४ झ. °त्। नापि दे°। ५ ण. °ति। तत्प्रत्य°। ६ ण. °योऽस्मि°। ७ क. °त्यक्षवि°। ८ अ. ण. °ये प्र°।

प्रत्यये जायमानेऽपि देहान्तरव्यतिरिक्तस्य नास्तित्वमेव प्रतिजानते ।

तत्र व्यभिचारं शङ्कते—**स्थाण्वादाविति** । प्रत्यक्षे धर्मिणि स्थाणुर्वा पुरुषो वेति विप्रतिपत्तेरुपलम्भान्न प्रत्यक्षे विप्रतिपत्त्यभावो व्यभिचारादिति शङ्कार्थः। आदिपदेन पाषाणादौ गजादिविप्रतिपत्तिः संगृह्यते । [1]किं प्रत्यक्षमात्रे विप्रतिपत्तिः किंवा तेन विविक्ते प्रतिपन्ने । नाऽऽद्योऽङ्गीकारात् । नचैवमात्मनि प्रत्यक्षे विप्रतिपत्तावपि नाऽऽगमान्वेषणा । तेनैव तन्निरासेन तन्निर्णयादिति मन्वानो द्वितीयं दूषयति—**नेत्यादिना** । प्रत्यक्षतो विविक्तेऽर्थे विप्रतिपत्त्यभावं प्रपञ्चयति—**न हीति** । आत्मनः स्थूलदेहव्यतिरिक्तत्वं न प्रत्यक्षमिति प्रतिपाद्य सूक्ष्मदेहव्यतिरिक्तत्वमपि नाहंप्रत्ययग्राह्यमित्याह—**वैनाशिकास्त्विति** । ते खल्वहमिति धियमनुभवन्ति । तथाऽपि देहान्तरं स्थूलदेहातिरिक्तं सूक्ष्मं तत्र प्रधानभूताया बुद्धेरतिरिक्तस्याऽऽत्मनो नास्तित्वमेव पश्यन्ति । तच्चाहंधिया सूक्ष्मदेहातिरिक्तात्मसिद्धिरित्यर्थः ।

तस्मात्प्रत्यक्षविषयवैलक्षण्यात्प्रत्यक्षान्नाऽऽत्मास्तित्वसिद्धिः। तथाऽनुमानादपि। श्रुत्याऽऽत्मास्तित्वे लिङ्गस्य दर्शितत्वाल्लिङ्गस्य च प्रत्यक्षविषयत्वान्नेति चेत् । न । जन्मान्तरसंबन्धस्याग्रहणात् । आगमेनत्वात्मास्तित्वेऽवगते वेदप्रदर्शितलौकिकलिङ्गविशेषैश्च तदनुसारिणो मीमांसकास्तार्किकाश्चाहंप्रत्ययलिङ्गानि च वैदिकान्येव स्वमतिप्रभवानीति कल्पयन्तो वदन्ति प्रत्यक्षश्चानुभेयश्चाऽऽत्मेति ।

किंच प्रत्यक्षस्य विषयो रूपादिस्तद्ग्राहित्वं तद्वैलक्षण्यं तदात्मकोऽस्ति । "अशब्दमस्पर्शमरूपम् " इत्यादिश्रुतेः । न हि रूपादि तदाधारं विना प्रत्यक्षं क्रमते । अतो न देहाद्यतिरिक्तात्मास्तित्वस्य प्रत्यक्षात्प्रसिद्धिरित्याह—**तस्मादिति**। प्रत्यक्षतो विविक्ते विप्रतिपत्त्ययोगात् । प्रकृते च तद्दर्शनादिति यावत् । अथेच्छादयः क्वचिदाश्रिता गुणत्वाद्रूपवदित्यनुमानादतिरिक्तात्मासिद्धिरिति नेत्याह—**तथेति** । नाऽऽत्मास्तित्वप्रसिद्धिरितिसंबन्धार्थस्तथाशब्दः । अयं भावः—इच्छादीना स्वातन्त्र्ये स्वरूपासिद्धिः पारतन्त्र्ये परस्पराश्रयत्वमाधारस्येदानीमेव साध्यमानत्वात् । क्वचिच्छब्देन चाऽऽश्रयमात्रवचने सिद्धसाधनत्वं मनसस्तदाश्रयस्य सिद्धत्वादात्मोक्तौ च दृष्टान्तस्य साध्यविकलतेति । "यः प्राणेन प्राणिति" इत्यादिश्रुत्या प्राणनादिव्यापाराख्यस्य लिङ्गस्याऽऽत्मास्तित्वे प्रदर्शितत्वात्तस्य च व्याप्तिसापेक्षस्य प्रत्यक्षादिसिद्धात्मविषयत्वान्न तस्य शब्दैकगम्यतेति शङ्कते—**श्रुत्येति**। आत्मनः स्वातन्त्र्येण लिङ्गगम्यत्वाभिप्रायेण श्रुत्या लिङ्गं नोपन्य-

---

१ ग. छ. ञ. देहव्य° । २ ञ. ण. °दिशब्देन। ३ घ. ज. °ने त° । ४ ग. घ. ङ. °छ. झ. °त्ययं लि° । ५ ग. घ. ङ. च. ज. °त्यक्षोऽनु° । ६ घ. ञ. °रं वा वि° । ७ क. °हाव्यति° । ८ घ. ण. °द्रूपादिव° । ९ घ. °स्याऽऽत्मनि व° ।

स्तमिति परिहरति—नेति। योऽचेतनव्यापारः स चेतनाधिष्ठानपूर्वको यथा रथादिव्यापारः। प्राणनादिव्यापारस्याप्यचेतनव्यापारत्वाच्चेतनाधिष्ठानपूर्वकत्वमिति संभावनामात्रेण लिङ्गोपन्यासः। न हि निश्चायकत्वेन तदुपन्यस्यते। आत्मनो जन्मान्तरसंबद्धस्य प्रमाणान्तरेणाग्रहणात्तद्ग्राहिलिङ्गायोगादित्याह—जन्मान्तरेति। ननु व्यतिरिक्तात्मास्तित्वमागमैकगम्यं चेत्कथं तत्प्रत्यक्षमनुमेयं चेति वादिनो वदन्तीति तत्राऽऽह—आगमेनत्विति। येयं प्रेते विचिकित्सेत्याद्यागमेन "को ह्येवान्यात्" इत्यादिवेदोक्तैश्च प्राणनादिभिर्लौकिकैर्लिङ्गविशेषैरात्मास्तित्वे सिद्धे यथोक्तात्मासिद्धिमनुसरन्तो वादिनो वैदिकमेवाहंप्रत्ययं प्रतिलभमाना वैदिकान्येव च लिङ्गानि पश्यन्तः स्वोत्प्रेक्षानिर्मितानि तानीति कल्पयन्तो द्विधाऽऽत्मानं वदन्ति। वस्तुतस्त्वात्मा यथोक्तश्रुत्यैकसमधिगम्य इत्यर्थः।

सर्वथाऽप्यस्त्यात्मा देहान्तरसंबन्धीत्येवं प्रतिपत्तुर्देहान्तरगतेष्टानिष्टप्राप्तिपरिहारोपायविशेषार्थिनस्तद्विशेषज्ञापनाय कर्मकाण्डमारब्धम्; न त्वात्मन इष्टानिष्टप्राप्तिपरिहारेच्छाकारणमात्मविषयमज्ञानं कर्तृभोक्तृस्वरूपाभिमानलक्षणं तद्विपरीतब्रह्मात्मस्वरूपविज्ञानेनापनीतम्। यावद्धि तन्नापनीयते तावदयं कर्मफलरागद्वेषादिस्वाभाविकदोषप्रयुक्तः शास्त्रविहितप्रतिषिद्धातिक्रमेणापि प्रवर्तमानो मनोवाक्कायैर्दृष्टादृष्टानिष्टसाधनान्यधर्मसंज्ञकानि कर्माण्युपचिनोति बाहुल्येन स्वाभाविकदोषबलीयस्त्वात्। ततः स्थावरान्ताधोगतिः।

तस्यास्येत्यादिना काण्डयोः संबन्धं प्रतिज्ञाय तादर्थ्येन सिद्धेऽर्थे वेदान्तप्रामाण्यं सर्वाऽपीत्यादिना प्रसाध्याधुना कर्मभिः शुद्धबुद्धवैराग्यादिद्वारा ज्ञानोत्पत्तिरिति तयोः संबन्धं कथयति—**सर्वथाऽपीति**। आगमान्मानान्तराद्वा व्यतिरिक्तात्मास्तित्वप्रतिपत्तावपीत्यर्थः। पुरुषार्थोपायविशेषार्थिनस्तज्ज्ञापनार्थं कर्मकाण्डमारब्धं चेत्तर्हि तत्रोक्तकर्मभिरेव विवक्षितपुरुषार्थसिद्धेर्वेदान्तारम्भवैयर्थ्यात्र संबन्धोक्तिः सावकाशेत्याशङ्क्याऽऽह—**नत्विति**। आत्माज्ञानं खल्वनर्थकारणमन्वयव्यतिरेकशास्त्रगम्यं मिथ्याज्ञानकार्यलिङ्गकं च। तच्चाकर्तृभोक्तृब्रह्मात्मज्ञानादपनेयम्। न हि तत्कर्मकाण्डोक्तैरेव कर्मभिः शक्यमपनेतुं विरोधाभावात्। तस्मात्तदुद्बोधनार्थं ज्ञानसिद्धये वेदान्तारम्भसंभवादुक्तसंबन्धसिद्धिरित्यर्थः। यदि कर्मभिरज्ञानं न निवर्तते। मा निवर्तिष्ट। सत्येव

---

१ ज. निश्चयाणक°। २ घ. ञ ण. °क्तामात्म°। ३ क. घ. ज. °काण्डं समा°। ४ झ. °ब्धव्यम्। ५ क. ख. छ. °र्तृत्वभो°। ६ क. ख. घ. छ. °कृत्वस्व°। ७ ख. °स्तित्वोपप°। ८ घ. ण. ण. पुमर्थो°। ९ क. थितो ज्ञाप°। १० क. °काण्डं समा°। ११ ख. [illegible]°।

तस्मिन्कर्मवशान्मोक्षः स्यादित्याशङ्क्याऽऽह—यावद्धीति। सम्यग्ज्ञानमेव साक्षान्मोक्षहेतुर्न कर्म। तत्तु प्रनाड्या तदुपयोगि। न हि सत्येवाज्ञाने मुक्तिः। तस्मिन्सति संसारस्य दुर्वारत्वात्। तस्मात्कर्मकाण्डस्य वैराग्यद्वारा प्रवेशो मुक्ताविति भावः। अयमित्यज्ञो निर्दिश्यते। रागद्वेषादीत्यादिशब्देनाविद्यास्मिताभिनिवेशादयो गृह्यन्ते। दोषाणां स्वाभाविकत्वं शास्त्रानपेक्षत्वम। अपिकारः संभावनार्थः। दृष्टत्वमन्वयव्यतिरेकसिद्धत्वम्। अदृष्टत्वं शास्त्रमात्रगम्यत्वम्। अधर्मोपचयप्राचुर्ये हेतुमाह—स्वाभाविकेति। अथ वैराग्यार्थं कर्मफलं प्रपञ्चयन्नधर्मफलमाह—तत इति। उक्तं हि—

" शारीरजैः कर्मदोषैर्याति स्थावरतां नरः " इति।

कदाचिच्छास्त्रकृतसंस्कारबलीयस्त्वम्। ततो मनआदिभिरिष्टसाधनं बाहुल्येनोपचिनोति धर्माख्यम्। तद्द्विविधम्—ज्ञानपूर्वकं केवलं च। तत्र केवलं पितृलोकादिप्राप्तिफलम्। ज्ञानपूर्वकं देवलोकादिब्रह्मलोकान्तप्राप्तिफलम्। तथा च शास्त्रम् "आत्मयाजी श्रेयान्देवयाजिनः" इत्यादि। स्मृतिश्च "द्विविधं कर्म वैदिकम्" इत्याद्या। साम्ये च धर्माधर्मयोर्मनुष्यत्वप्राप्तिः। एवं ब्रह्माद्या स्थावरान्ता स्वाभाविकाविद्यादिदोषवतो धर्माधर्मसाधनकृता संसारगतिर्नामरूपकर्माश्रया।

तर्हि पुण्योपचयाभावादनवकाशं स्वर्गादिफलमिति नेत्याह—कदाचिदिति। शास्त्रीयसंस्कारस्य बलीयस्त्वे फलितमाह—तत इति। आदिशब्दो वाग्देहविषयः। फलविभागं वक्तुं कर्म भिनत्ति—तद्द्विविधमिति। तस्य मुक्तिफलत्वं निरसितुं फलं विभजते—तत्रेति। केवलमिष्टादिकर्मेति शेषः। 'कर्मणा पितृलोकः' इति हि वक्ष्यति। तस्मिन्फले नानात्वमभिप्रेत्याऽऽदिशब्दः। 'विद्यया देवलोकः' इति श्रुतिमाश्रित्याऽऽह—ज्ञानेति। देवलोको यस्याऽऽदिर्ब्रह्मलोके यस्यान्तस्तस्यार्थस्य प्राप्तिरेव फलमस्येति विग्रहः। उक्तेऽर्थे शातपथीं श्रुतिं प्रमाणयति—तथा चेति। सर्वत्र परमात्मभावनापुरःसरं नित्यं कर्मानुतिष्ठन्नात्मयाजी। कामनापुरःसरं देवान्यजमानो देवयाजी। तयोर्मध्ये कतरः श्रेयानिति विचारे सत्यात्मयाजी श्रेयानिति निर्णयः कृतः। अतो ज्ञानपूर्वकं कर्म देवलोकस्य कामनापूर्वं तु पितृलोकस्य प्रापकमित्यर्थः।

' प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकम्।
इहैवाऽमुत्र वा काम्यं प्रवृत्तं कर्म कीर्त्यते॥
निष्कामं ज्ञानपूर्वं तु निवृत्तमभिधीयते '।

---

१ क. मत्यादि°। २ क. °यान्न देवयाजी " इ°। ३ घ. ञ. ण. लोकश्चान्तो यस्य तस्यार्थ°। ४ ख. ञ. ण. 'पूर्वं क°। ५ क. घ. ञ. ण. °ह चामु°।

इत्यादि मनुस्मृतिं चात्रैवोदाहरति—स्मृतिश्चेति । धर्माधर्मयोरेकैकस्य फलमुक्त्वा मिश्रयोः फलमाह—साम्ये चेति । उक्तं हि—

' उभाभ्यां पुण्यपापाभ्यां मानुष्यं लभतेऽवशः ' इति ।

त्रिविधमपि कर्मफलं वैराग्यार्थं संक्षिप्योपसंहरति—एवमिति । सा चाविद्याकृतत्वादनर्थरूपेत्याह—स्वाभाविकेति । विचित्रकर्मजन्यतया तस्या वैचित्र्यमाह—धर्माधर्मेति । तर्हि धर्माधर्माभ्यामेव तन्निर्माणसंभवात्कृतमविद्ययेत्यत आह—नामेति । तेषां सूक्ष्मावस्थाऽविद्या तदालम्बनेति यावत् । धर्मादेरविद्यायाश्च निमित्तत्वोपादानत्वाभ्यामुपयोग इति भावः ।

तदेवेदं व्याकृतं साध्यसाधनरूपं जगत्प्रागुत्पत्तेरव्याकृतमासीत् । स एष बीजाङ्कुरादिवदविद्याकृतः संसार आत्मनि क्रियाकारकफलाध्यारोपलक्षणोऽनादिरनन्तोऽनर्थ इत्येतस्माद्विरक्तस्याविद्यानिवृत्तये तद्विपरीतब्रह्मविद्याप्रतिपत्त्यर्थोपनिषदारभ्यते ।

ननु संसारगतेराविद्यकत्वमयुक्तं प्रत्यक्षादिप्रतिपन्नत्वात्तन्नामरूपाभ्यामेव व्याक्रियतेति श्रुतौ च नामरूपात्मनो जगतोऽभिव्यक्तिश्रवणान्न च प्रामाणिकस्याविद्याकृतत्वमत आह—तदेवेदमिति । जगतः स्वरूपमात्मा तत्राध्यस्तत्वात्तस्मादात्मतत्त्वेऽनभिव्यक्ते प्रत्यक्षादिना श्रुत्या चाभिव्यक्तमिवं दृश्यमानमपि जगदनभिव्यक्तमेवेति न तस्याविद्याकृतत्वक्षतिरिति भावः । अविद्याकृतां संसारगतिमनुभाषते—स एष इति । नन्वविद्याकृतत्वे कथमनादित्वमित्याशङ्क्य तस्य प्रवाहरूपेणेत्याह—बीजाङ्कुरादिवदिति । चैतन्यवदात्मनि तस्याविद्याकृतत्वानुपपत्तिमाशङ्क्य नानारूपत्वेन ततो विलक्षणत्वादेकरूपे युक्तं तस्य कल्पितत्वमित्याह—क्रियेति । तर्हि कादाचित्कतया साधनापेक्षामन्तरेण नाशो भविष्यतीत्याशङ्क्याऽऽह—अनादिरिति । अनादेरपि संसारस्य प्रागभाववन्निवृत्तिः स्यादिति चेत्तथाऽपि ब्रह्मविद्यामन्तरेण नाशो नास्तीत्याह—अनन्त इति । प्रयत्नतो हेयत्वं द्योतयितुमनर्थ इति विशेषणम् । नैसर्गिक इति पाठे तु कारणरूपेण तत्त्वमुच्येयम् । यस्मात्कर्म संसारफलं न मोक्षं फलयति तस्मात्सनिदानसंसारनिवर्तकात्मज्ञानार्थत्वेन साधनचतुष्टयसंपन्नमधिकारणमधिकृत्य वेदान्तारम्भः संभवतीत्युपसंहरति—इत्येतस्मादिति ।

अस्य त्वश्वमेधकर्मसंबन्धिनो विज्ञानस्य प्रयोजनं येषामश्वमेधे नाधि-

---

१ क. ख. °राविद्याविं° । २ ङ. झ. °न्तो नैसर्गिकोऽन° । क. ख. °द्यकत्व° । ४ ण. °तिमुक्तम° । ५ क. ज. ण. °राविवेति । ६ झ. °मेधीयसं° । ७ च. °धसं° । ८ ग. घ. ङ.

कारस्तेषामस्मादेव विज्ञानात्तत्फलप्राप्तिः । "विद्यया वा कर्मणा वा" "तद्धैतल्लोकजिदेव" इत्येवमादिश्रुतिभ्यः ।

यथोक्तज्ञानार्थत्वेनोपनिषदारम्भे 'ब्रह्म वा इदमग्र आसीत्' इत्यारब्धव्यं तस्मादारभ्य ज्ञानोपदेशात् । 'उषा अश्वस्य' इत्यारम्भस्तु न युक्तः साक्षादत्र तदनुक्तेरित्याशङ्क्यास्मादारभ्योपनिषदारम्भेऽभीष्टं फलमभिधित्समानः प्रथममश्वमेधोपासनफलमाह—अस्य त्विति । राजयज्ञत्वादश्वमेधस्य तदनधिकारिणामपि ब्राह्मणादीनां तत्फलार्थिनामस्मादेवोपासनात्तदाप्तिरिति मत्वा श्रुतौ तदुपासनोक्तिरित्यर्थः । किमत्र नियामकमित्याङ्क्य विकल्पश्रवणं केवलस्यापि ज्ञानस्य साधनत्वं सूचयतीत्यर्थतो विकल्पश्रुतिमुदाहरति—विद्ययेति । तत्फलप्राप्तिरिति पूर्वेण संबन्धः । तत्रैव श्रुत्यन्तरमाह—तद्धेति । तदेतत्पापदर्शनं लोकप्राप्तिसाधनं प्रसिद्धमिति यावत् । आदिशब्देन केवलोपास्त्या ब्रह्मलोकाप्तिवादिन्यः श्रुतयो गृह्यन्ते ।

कर्मविषयत्वमेवं विज्ञानस्येति चेत् । न । "योऽश्वमेधेन यजते य उ चैनमेवं वेद" इति विकल्पश्रुतेः । विद्याप्रकरणे चाऽऽज्ञानात् । कर्मान्तरे च संपादनदर्शनाद्विज्ञानात्तत्फलप्राप्तिरस्तीत्यवगम्यते । सर्वेषां च कर्मणां परं कर्माश्वमेधः । समष्टिव्यष्टिप्राप्तिफलत्वात् ।

अश्वमेधे यदुपासनं तस्याप्यश्वादिवत्तच्छेषत्वेन फलवत्त्वान्न स्वातन्त्र्येण तद्वत्त्वमङ्गेषु स्वतन्त्रफलाभावादिति शङ्कते—कर्मविषयत्वमिति । ज्ञानस्य क्रत्वर्थत्वं दूषयति—नेति । पूर्वत्रार्थतो दर्शितां विकल्पश्रुतिमत्र हेतुतया स्वरूपतोऽनुकामति—योऽश्वमेधेनेति । स सर्वं पाप्मानं तरति ब्रह्महत्यामिति संबन्धः । ज्ञानकर्मणोस्तुल्यफलत्वस्य न्याय्यत्वादिति शेषः । उपास्तिफलश्रुतेरर्थवादत्वमाशङ्क्याश्वमेधवदुपास्तेरपि कर्मत्वाद्विहितत्वात्कर्मप्रकरणाद्वुत्थितत्वाच्च नैवमित्याह—विद्येति । फलश्रुतेरर्थवादत्वाभावे हेत्वन्तरमाह—कर्मान्तरे चेति । अश्वमेधातिरिक्ते कर्मण्ययं वाव लोको ऽग्निरित्यादौ चित्याग्न्यादावेतल्लोकादिसंपादनस्य स्वतन्त्रफलोपासनस्य दर्शनान्न फलश्रुतेरर्थवादतेत्यर्थः अश्वमेधोपासनं न क्रत्वर्थं किंतु पुरुषार्थं तत्र चाधिकारोऽश्वमेधक्रत्वनधिकारिणामपीत्येतावदेवेष्टं चेदुपासने कर्मप्रकरणस्थेऽपि तस्माद्विद्याप्रकरणे नास्याध्ययनमर्थवदित्याशङ्क्याऽऽह—सर्वेषां चेति । परत्वे हेतुः समष्टीति । अनुवृत्तव्यावृत्तरूपहिरण्यगर्भप्राप्तिहेतुत्वात्तस्य श्रेष्ठतेत्यर्थः ।

तस्य चेह ब्रह्मविद्याप्रारम्भ आम्नानं सर्वकर्मणां संसारविषयत्वंप्रदर्शनार्थम् । तथा च दर्शयिष्यति फलमशनायां मृत्युर्भावम् ।

---

१ ख. घ. ण. °भीष्टफ° । २ क. ख. °धनमि° । ३ झ. °व ज्ञा° । ४ ग. ङ. च. छ. ज. °नात्फ° । ५ च. छ. झ. °स्तीति ग° । ६ क. ङ. °त्वद° । ७ ख. ग. °नायामृ° । ८ भावमयम् ।

तस्य पुण्यश्रेष्ठत्वेऽपि प्रकृते किमायातं तदाह-तस्य चेति । यदा क्रतुप्रधानस्याश्वमेधस्योपास्तिसहितस्यापि संसारफलत्वं तदाऽल्पीयसामग्निहोत्रादीनां संसारफलत्वं किं वाच्यमित्यस्मिन्कर्मराशौ बन्धहेतौ विरक्ताः साधनचतुष्टयाविशिष्टा ज्ञानमपेक्षमाणास्तदुपाये श्रवणादावेव सर्वकर्मसंन्यासपूर्वके कथं प्रवर्तेरन्नित्याशयवती श्रुतिरुपासनां विद्यारम्भेऽभिदधाति । तेनोषा वा अश्वस्येत्याद्युपनिषदारम्भो युक्तोऽस्य विशिष्टाधिकारिसमर्पकत्वादित्यर्थः । उपासनफलस्य संसारगोचरत्वमेव कुतः सिद्धमत आह-तथा चेति । अशनाया हि मृत्यु स वै नैव रेमे सोऽबिभेदिति भयारत्यादिश्रवणादुपास्तियुक्तक्रतुफलस्य सूत्रस्य बन्धमध्यपातित्वाद्विशिष्टोऽपि क्रतुर्न मुक्तये पर्याप्तोतीत्यर्थः ।

न नित्यानां संसारविषयफलत्वमिति चेत्। न । सर्वकर्मफलोपसंहारश्रुतेः । सर्वं हि पत्नीसंबद्धं कर्म । "जाया मे स्यादेतावान्वै कामः" इति निसर्गत एव सर्वकर्मणां काम्यत्वं दर्शयित्वा पुत्रकर्मापरविद्यानां च "अयं लोकः पितृलोको देवलोकः" इति फलं दर्शयित्वा व्यन्नात्मकतां चान्त उपसंहरिष्यति " त्रयं वा इदं नाम रूपं कर्म " इति । सर्वकर्मणां फलं व्याकृतं संसार एवेति ।

उक्ते सर्वकर्मणां बन्धफलत्वे नित्यनैमित्तिकानां न तत्फलत्वं तेषां विध्युद्देशे फलाश्रुतेर्नष्टाश्वदग्धरथन्यायेन मुक्तिफलत्वलाभादिति शङ्कते-**न नित्यानामिति** एतावान्वै काम इति सर्वकर्मणामविशेषेण फलसंबन्धश्रवणात्पश्वादेश्च काम्यफलत्वस्य तद्विध्युद्देशवशात्सिद्धत्वात्कर्मणा पितृलोक इति वाक्यस्य नित्यादिकर्मफलविषयत्वान्न मोक्षफलत्वाशङ्केति परिहरति-**नेति** । उक्तमेव स्फुटयति **सर्वं हीति** । पत्नीसंबन्धे मानमाह--**जायेति** । तथाऽपि कथं कर्मणः सर्वस्य कामोपायत्वं तत्राऽऽह-**एतावान्वै काम इति** । कथं तर्हि तेषां फलभेदो लभ्यते तत्राऽऽह-**पुत्रेति** । अथैवं फलविभागे कथं समष्टिव्यष्टिप्राप्तिफलत्वमश्वमेधस्योक्तमत आह-**व्यन्नात्मकतां चेति**। अस्याध्यायस्यावसाने कर्मफलस्य हिरण्यगर्भरूपतां त्रयमित्याद्या श्रुतिरुपसंहरिष्यतीत्यर्थः । उपसंहारश्रुतेस्तात्पर्यमाह-**सर्वकर्मणामिति** ।

इदमेव त्रयं प्रागुत्पत्तेस्तर्ह्यव्याकृतमासीत् । तदेव पुनः सर्वप्राणिकर्मवशाद्व्याक्रियते बीजादिव वृक्षः । सोऽयं व्याकृताव्याकृतरूपः

---

१ घ. ञ. °लत्वे किं । २ घ °र्वकं क° । ३ घ. °थं न प्र° । ४ ख. °सनं वि° । ५ क. ञ. °धातीति । ६ ञ. ण. °त्यारभ्योप° । ७ ण °सनाफ° । ८ घ. °र्थात्तो भवती° ९ क. ख. °त्वाऽन्ना° । १० क. ग. घ. ङ. ज. झ. °हरति । ११ क. ख. °ह अन्ना° ।

संसारोऽविद्याविषयः क्रियाकारकफलात्मकतयाऽऽत्मरूपत्वेनाध्यारोपितोऽविद्ययैव मूर्तामूर्ततद्वामनात्मकोऽतो विलक्षणोऽनामरूपकर्मात्मकोऽद्वयो नित्यशुद्धबुद्धमुक्तस्वभावोऽपि क्रियाकारकफलभेदादिविपर्ययेणावभासते । अतोऽस्मात्क्रियाकारकफलभेदस्वरूपादतावादिदमिति साध्यसाधनरूपाद्विरक्तस्य कामादिदोषकर्मबीजभूताविद्यानिवृत्तये रज्ज्वामिव सर्पविज्ञानापनयाय ब्रह्मविद्याऽऽरभ्यते ।

कर्मफलं संसारश्चेत्पाक्तदनुष्ठानात्तदभावान्मुक्तानां पुनर्बन्धः स्यादित्याशङ्क्याऽऽह—इदमेवेति । तर्हि तस्यामवस्थायामिति यावत् । तस्य पुनर्व्याकरणे कारणमाह—तदेवेति । व्याकृताव्याकृतात्मनः संसारस्यं प्रामाणिकत्वेन सत्यत्वपाशङ्क्याविद्याकृतत्वेन तन्मिथ्यात्वमुक्तं स्मारयति—सोऽयमिति । स एष हि भ्रान्तिविषयो न प्रामाणिकस्तत्कृतोऽस्य सत्यतेत्यर्थः । कथमस्याऽऽत्मन्यद्वये कूटस्थे प्रामाणिरित्याशङ्क्याऽऽह—क्रियेति । समारोपे मूलकारणमाह—अविद्ययेति । आत्मन्यविद्यारोपितं द्वैतमित्यत्र द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं चेत्यादिवाक्यं प्रमाणयति—मूर्तेति । नन्वात्मन्यारोपो नोपपद्यते तस्य नित्यशुद्धबुद्धमुक्तस्वभावस्य द्वैतविलक्षणत्वादसति सादृश्येऽध्यासासिद्धेरत आह—अत इति । संसाराद्वैलक्षण्यमेव प्रकटयति—अनामेति । आदिपदेनान्येऽपि विपर्ययभेदाः संगृह्यन्ते । आरोपे प्रमिणोमि करोमि भुञ्जे चेत्यनुभवं प्रमाणयति—अवभासत इति । आत्मन्यध्यासः सादृश्याद्यभावेऽपि नभसि मलिनत्वादिवद्यतोऽनुभूयतेऽतः सविलासाविद्यानिवर्तकब्रह्मविद्यार्थत्वेनोपनिषदारम्भः संभवतीत्युपसंहरति—अत इति । एतावदित्यनेनार्थात्मन्वोक्तिः । तत्त्वज्ञानादज्ञाननिवृत्तौ दृष्टान्तमाह—रज्ज्वामिवेति ।

तत्र तावदश्वमेधविज्ञानाय "उषा वा अश्वस्य" इत्यादि । तत्राश्वविषयमेवं दर्शनमुच्यते प्राधान्यादश्वस्य । प्राधान्यं च तन्नामाङ्कितत्वाक्रतोः प्राजापत्यत्वाच्च ।

ॐ उषा वा अश्वस्य मेध्यस्य शिरः । सूर्यश्चक्षुर्वातः प्राणो व्यात्तमग्निर्वैश्वानरः संवत्सर आत्माऽश्वस्य मेध्यस्य । द्यौः पृष्ठमन्तरिक्षमुदरं पृथिवी पाजस्यं दिशः पार्श्वे अवान्तरदिशः पर्शव ऋतवोऽङ्गानि

---

१ ग. च. छ. ञ °त्मत° । २ ग. ङ. झ. °त्मस्वक° । ३ ख. ग घ. छ. °नयनाथ । ४ क. ख. °स्य च प्रा° । ख. °र्तं चामु° । ६ क. ख. °नर्थोक्तिः । ७ च. 'त्मकत्वो° । ८ तावद्दर्श° ।

मासाश्चार्धमासाश्च पर्वाण्यहोरात्राणि प्रतिष्ठा नक्षत्राण्यस्थीनि नभो मांसानि । ऊवध्यꣳ सिकताः सिन्धवो गुदा यकृच्च क्लोमानश्च पर्वता ओषधयश्च वनस्पतयश्च लोमान्युद्यन्पूर्वार्धो निम्लोचञ्जघनार्धो यद्विजृम्भते तद्विद्योतते यद्विधूनुते तत्स्तनयति यन्मेहति तद्वर्षति वागेवास्य वाक् ॥ १ ॥

उषा इति ब्राह्मो मुहूर्त उषाः । वैशब्दः स्मारणार्थः प्रसिद्धं कालं स्मारयति । शिरः प्राधान्यात् । शिरश्च प्रधानं शरीरायवानाम् । मेध्यस्य मेधार्हस्य यज्ञियस्योषाः शिर इति संबन्धः ।

एवमुपनिषदाम्भे स्थिते प्राथमिकब्राह्मणयोरवान्तरतात्पर्यमाह—तत्र तावदिति । आद्यस्य पुनरवान्तरतात्पर्यं दर्शयति—तत्रेति । नन्वश्वमेधस्याङ्गबाहुल्ये कस्मादश्वाख्याङ्गविषयमेवोपासनमुच्यते तत्राऽऽह—प्राधान्यादिति । तदेव कथमिति यदाह—प्राधान्यं चेति । प्रजापतिदेवताकत्वाच्चाश्वस्य प्राधान्यमित्याह—प्राजापत्यत्वाच्चेति । प्रतीकमादाय व्याचष्टे उषा इत्यादिना । स्मारणार्थत्वमेव निपातस्य स्फुटयति—प्रसिद्धमिति । शास्त्रीये लौकिके च व्यवहारे प्रसिद्धो ब्राह्मो मुहूर्तस्तं कालमिति यावत् । उषसि शिरःशब्दप्रयोगे दिनावयवेषु तस्य प्राधान्यं हेतुमाह—प्राधान्यादिति । तथाऽपि कथं तत्र तच्छब्दप्रयोगस्तत्राऽऽह—शिरश्चेति । आश्वमेधिकाश्वांशेरस्युषसो दृष्टिः कर्तव्येत्याह—अश्वस्येति ।

कर्माङ्गस्य पशोः संस्कर्तव्यत्वात्कालादिदृष्टयः शिरआदिषु क्षिप्यन्ते । प्राजापत्यत्वं च प्रजापतिदृष्ट्यध्यारोपणात् । काललोकदेवतात्वाध्यारोपणं च प्रजापतित्वकरणं पशोः । एवंरूपो हि प्रजापतिः । विष्णुत्वादिकरणमिव प्रतिमादौ ।

कालादिदृष्टिरश्वाङ्गेषु किमिति क्षिप्यतेऽश्वाङ्गदृष्टिरेव तेषु किं न स्यादित्याशङ्क्याऽऽह—कर्माङ्गस्येति । अङ्गेष्वनङ्गमिति क्षेपे हेत्वन्तरमाह—प्राजापत्यत्वं

---

१ ट. °द्विधुनु° । २ क. च. °षा वा इ° । ख. घ. ङ. च. छ. उषा । ४ ख. ङ. छ. ज. ञ. °ब्दः स्मर° । ५ ख. घ. च. छ. °स्योषा शि° । ६ क. ख. °ना स्मर° । ७ °तात्मत्वा° ।

चेति। अश्वस्य सेत्स्यतीति शेषः तत्र हेतुः—प्रजापतीति। ननु कालादिदृष्टयोऽश्ववयवेष्वारोप्यन्ते न तस्य प्रजापतित्वं क्रियते तत्राऽऽह—कालेति। कालाद्यात्मको हि प्रजापतिः। तथा च यथा प्रतिमायां विष्णुत्वकरणं तद्दृष्टिस्तथा कालादिदृष्टिरश्ववयवेषु तस्य प्रजापतित्वकरणम्। अश्वमेधाधिकारी हि सत्यमे कर्मणो वीर्यवत्तरत्वार्थं कालादिदृष्टीरश्ववयवेषु कुर्यात्। तदनधिकारी त्वश्वभावे स्वात्मानमश्वं कल्पयित्वा स्वशिरःप्रभृतिषु कालादिदृष्टिकरणेन प्रजापतित्वं संपाद्य प्रजापतिरस्मीति ज्ञानात्तद्भावं प्रतिपद्येतेति भावः।

सूर्यश्चक्षुः शिरसोऽनन्तरत्वात्सूर्याधिदैवत्वाच्च। वातः प्राणो वायुस्वाभाव्यात्। व्यात्तं विवृतं मुखमग्निर्वैश्वानरः। वैश्वानर इत्यग्नेर्विशेषणम्। वैश्वानरो नामाग्निर्विवृतं मुखमित्यर्थो मुखस्याग्निदैवतत्वात्। संवत्सर आत्मा संवत्सरो द्वादशमासस्त्रयोदशमासो वा। आत्मा शरीरम्। कालावयवानां च संवत्सरः शरीरं चाऽऽत्मा। "मध्यं ह्येषामङ्गानामात्मा" इति श्रुतेः। अश्वस्य मेध्यस्येति सर्वत्रानुषङ्गार्थं पुनर्वचनम्।

चक्षुषि सूर्यदृष्टौ हेतुमाह—शिरस इति। उषसोऽनन्तरत्वं सूर्ये दृष्टं चक्षुषि च शिरसोऽनन्तरत्वं दृश्यते तस्मात्तत्र तद्दृष्टिर्युक्तेत्यर्थः। तत्रैव हेत्वन्तरमाह—सूर्यति। "आदित्यश्चक्षुर्भूत्वाऽक्षिणी प्राविशत्" इति श्रुतेश्चक्षुषि सूर्योऽधिष्ठात्री देवता तेनापीत्यात्तत्र तद्दृष्टिरित्यर्थः। अश्वमाणे वायुदृष्टौ चलनस्वाभाव्यं हेतुः। अश्वस्य विदारिते मुखे भवत्वग्निदृष्टिस्तथाऽपि पर्यायोपादानं व्यर्थमित्याशङ्क्य क्रव्यादादिव्यावृत्त्यर्थं विशेषणमित्याह—वैश्वानर इत्यग्नेरिति। "अग्निर्वाग्भूत्वा मुखं प्राविशत्" इति श्रुतिमाश्रित्य मुखे तद्दृष्टौ हेतुमाह—मुखस्येति। अधिकमासमनुसृत्य त्रयोदशमासो वेत्युक्तम्। शरीरे संवत्सरदृष्टिरित्यत्राऽऽत्मत्वं हेतुमाह—कालेति। आत्मा हस्तादीनामङ्गानामिति शेषः। कालावयवानां संवत्सरस्याऽऽत्मत्ववदङ्गानां शरीरस्याऽऽत्मत्वे प्रमाणमाह—मध्यं हीति। पुनरुक्तेरर्थवत्त्वमाह—अश्वस्येति।

द्यौः पृष्ठम्। ऊर्ध्वत्वसामान्यात्। अन्तरिक्षमुदरं सुषिरत्वसामान्यात्। पृथिवी पाजस्यं पादस्थमिति वर्णव्यत्ययेन पादासनस्थानमित्यर्थः। दिशश्चतस्रोऽपि पार्श्वेन दिशां संबन्धात्। पार्श्वयोर्दिशां च संख्यावैषम्यादयुक्तमिति चेत्। न। सर्वमुखत्वोपपत्तेरश्वस्य पार्श्वाभ्या-

---

१ क. 'ति विज्ञा'। २ ग, च. वातस्वा°। ३ घ. ञ. ण. °दिनिवृ°। ४ छ. पार्श्व°। ५ क. °दस्थम्। पाजस्थमि°।

मेव सर्वदिशां संबन्धादोषः । अवान्तरदिश आग्नेय्याद्याः पर्शवः पार्श्वास्थीनि ।

पृष्ठे द्युलोकदृष्टौ हेतुमाह–ऊर्ध्वत्वेति । उदरेऽन्तरिक्षदृष्टौ निमित्तमाह–सुषिरत्वेति । पादा अस्यन्ते यस्मिन्निति व्युत्पत्तिमाश्रित्य विवक्षितमाह–पादेति । अश्वस्य हि खुरे पादासनत्वसामान्यात्पृथिवीदृष्टिरित्यर्थः । पार्श्वयोर्दिक्चतुयदृष्टौ हेतुमाह–पार्श्वेनेति । द्वे पार्श्वे चतस्रश्च दिशस्तत्र कथं तयोस्तदारोपणं द्वाभ्यामेव द्वयोः संबन्धादिति शङ्कते–पार्श्वयोरिति । यद्यपि द्वे दिशौ द्वाभ्यां पार्श्वाभ्यां संबध्येते तथाऽप्यश्वस्य प्राङ्मुखत्वे प्रत्यङ्मुखत्वे च दक्षिणोत्तरयोस्तन्मुखत्वे च प्राक्प्रतीच्योर्दिशोस्ताभ्यां संबन्धसंभवात्तत्र तद्दृष्टिरविरुद्धेति परिहरति–नेत्यादिना । तदुपपत्तौ चाश्वस्य चरिष्णुत्वं हेतूकर्तव्यम् । पार्श्वास्थिष्ववान्तरदिशामारोपे पार्श्वदिक्संबन्धो हेतुः ।

ऋतवोऽङ्गानि संवत्सरावयवत्वादङ्गसाधर्म्यात् । मासाश्चार्धमासाश्च पर्वाणि संधयः संधिसामान्यात् । अहोरात्राणि प्रतिष्ठाः बहुवचनात्प्राजापत्यदैवपित्र्यमानुषाणि प्रतिष्ठाः पादाः प्रतितिष्ठत्येतैरिति । अहोरात्रैर्हि कालात्मा प्रतितिष्ठत्यश्वेश्च पादैः । नक्षत्राण्यस्थीनि शुक्लत्वसामान्यात् । नभो नभस्या मेघा अन्तरिक्षस्योदरत्वोक्तेर्मांसान्युदकरुधिरसेचनसामान्यात् ।

ऋतवः संवत्सरस्याङ्गानि हस्तादीनि च देहस्यावयवास्तस्मादृतुदृष्टिरङ्गेषु कर्तव्येत्याह–ऋतव इति । अस्ति मासादीनां संवत्सरसंबन्धित्वमस्ति च शरीरसंधित्वं पर्वणामतस्तेषु मासादिदृष्टिरित्याह-संधीति । युगसहस्राभ्यां प्राजापत्यमेकमहोरात्रम् । अयनाभ्यां दैवम् । पक्षाभ्यां पित्र्यम् । षष्टिघटिकाभिर्मानुषमिति भेदः । प्रतिष्ठाशब्दस्य पादविषयत्वं व्युत्पादयति–प्रतितिष्ठतीति । पादेष्वहोरात्रदृष्टिसिद्ध्यर्थं शुक्लिमुपपादयति–अहोरात्रैरिति । अस्थिषु नक्षत्रदृष्टौ हेतुमाह–शुक्लत्वेति । नभःशब्देनान्तरिक्षं किमिति न गृह्यते मुख्ये सत्युपचारायोगादित्याशङ्क्य पुनरुक्तिं परिहर्तुमित्याह–अन्तरिक्षस्येति । उदकं सिञ्चन्ति मेघा मांसानि रुधिरमतः सेकैकर्तृत्वसामान्यान्मांसेषु मेघदृष्टिरित्याह–उदकेति ।

ऊबध्यमुदरस्थमर्धजीर्णमशनं सिकताँ विश्लेष्टावंयत्वसामान्यात् । सिन्धवः स्यन्दनसामान्यान्नद्यो गुदा नाड्यो बहुवचनाच्च । यकृच्च

---

१ ण. °स्तत्कथं । २ क. ञ. °श्वस्य पा° । ङ. श्वस्तु पा° । ३ ख. °स्ति हि मा° । ४ क. °यकत्वं । ५ क. ख. ण. °द्धयर्थमुक्तमु° । ६ घ. ण. सेक्तृत्व° । ७ च. छ. °ता शालुका वि° । ८ क. ख. ग. घ. ङ. च. छ. वसा ।

क्लोमानश्च हृदयस्याधस्ताद्दक्षिणोत्तरौ मांसखण्डौ । क्लोमान इति नित्यं बहुवचनमेकस्मिन्नेव । पर्वताः काठिन्यादुच्छ्रितत्वाच्च । ओषधयश्च क्षुद्राः स्थावरा वनस्पतयो महान्तो लोमानि केशाश्च यथासंभवम् । उद्यन्नुदुच्छन्भवति सविताऽऽमध्याह्नादश्वस्य पूर्वार्धो नाभेरूर्ध्वमित्यर्थः । निम्लोचन्नस्तं यन्नामध्याह्नाज्जघनार्धोऽपरार्धः पूर्वापरत्वसाधर्म्यात् । यद्विजृम्भते गात्राणि विनामयति विक्षिपति तद्विद्योतते विद्योतनं मुखघर्नविदारणसामान्यात् । यद्विधूनुते गात्राणि कम्पयति तत्स्तनयति गर्जनशब्दसामान्यात् । यन्मेहति मूत्रं करोत्यश्वस्तद्वर्षति वर्षणं तत्सेचनसामान्यात् । वागेव शब्द एवास्याश्वस्य वागिति नात्र कल्पनेत्यर्थः ॥ १ ॥

अश्वजठरविसरिवार्तिन्यर्थजीर्णे सिकताद्दष्टौ हेतुमाह—विश्लिष्टेति । किमिति गुदशब्देन पायुरेव न गृह्यते शिराग्रहणे हि मुख्यार्थातिक्रमः स्यात्तत्राऽऽह—बहुवचनाच्चेति । चकारोऽवधारणार्थः । यद्यपि बहूक्त्या शिराभ्योऽर्थान्तरमपि गुदशब्दमर्हति तथाऽपि स्यन्दनसादृश्यात्तास्वेव सिन्धुदृष्टिरिति तासामिह ग्रहणमिति भावः । कुतो मांसखण्डयोर्द्वित्वमेकत्र बहुवचनाद्बहुत्वमतीतिरित्याशङ्क्य दारा इतिवद्बहुकेर्गातिमाह—क्लोमान इति । तयोः पर्वतदृष्टौ हेतुद्वयमाह—काठिन्यादित्यादिना । क्षुद्रत्वसाधर्म्यादोषधिदृष्टिर्लोमसु महत्त्वसामान्याद्वनस्पतिदृष्टिश्चाधिकेशेषु कर्तव्येत्याह—यथासंभवमिति । पूर्वसामान्यान्मध्याह्नात्प्रागवस्थादित्यदृष्टिरश्वस्य नाभेरूर्ध्वभागे कर्तव्येत्याह—उद्यन्नित्यादिना । अपरत्वसादृश्यादश्वस्य नाभेरपरार्धे मध्याह्नादनन्तरमाद्यादित्यदृष्टिः कार्येत्याह—निम्लोचन्नित्यादिना । विजृम्भत इत्यादौ प्रत्ययार्थो न विवक्षितः । विजृम्भणं मुखं विदारयति विद्योतनं पुनर्नेघतो विद्योतनदृष्टिर्जम्भणे कर्तव्येत्याह—मुखेति । स्तनयतीति स्तनितमुच्यते तद्दृष्टिर्गात्रकम्पे कर्तव्येत्यत्र हेतुमाह—गर्जनेति । मूत्रकरणे वर्षणदृष्टौ कारणमाह—सेचनेति । अश्वत्व हेषितशब्दे नास्त्यारोपणमित्यतो न सादृश्यं वक्तव्यमित्याह—नात्रेति ॥ १ ॥

अथवा अश्वं पुरस्तान्महिमाऽन्वजायत तस्य पूर्वे समुद्रे योनी रात्रिरेनं पश्चान्महिमाऽन्वजायत तस्यापरे समुद्रे योनिरेतौ वा अश्वं महिमानावभितः

---

१ ग. घ. ङ. ज. °क्षुद्रत्था° । २ घ. च. °नर्थोर्विदा । ३ छ °द्विधुनु । ४ घ. ञ. ण. हेतुः—वि° । ५ घ. ञ. °ष्टिरश्व° । ६ क. ख. °र्धभागे म° । ७ घ. मुखविदारणं घ. ण. विदारजम° ।

संबभूवतुः । हयौ भूत्वा देवानवहद्वाजी गन्धर्वानवाऽसुरानश्वो मनुष्यान्समुद्र एवास्य बन्धुः समुद्रो योनिः ॥ २ ॥

इति प्रथमाध्यायस्य प्रथमं ब्राह्मणं समाप्तम् ॥ १ ॥

अहर्वा इति सौवर्णराजतौ महिमाख्यौ ग्रहावश्वस्याग्रतः पृष्ठतश्च स्याप्येते तद्विषयमिदं दर्शनम् । अहः सौवर्णो ग्रहो दीप्तिसामान्याद्वै । अहरश्वं पुरस्तान्महिमाऽन्वजायतेति कथम् । अश्वस्य प्रजापतित्वात् । प्रजापतिर्ह्यादित्यादिलक्षणोऽह्ना लक्ष्यते । अश्वं लक्षयित्वाऽजायत सौवर्णो महिमा ग्रहो वृक्षमनु विद्योतत विद्युदिति यद्वत् । तस्य ग्रहस्य पूर्वे पूर्वः समुद्रे समुद्रो योनिर्विमार्क्तव्यत्ययेन । योनिरित्यासादनस्थानम् । तथा रात्री राजतो ग्रहो वपसामान्याज्जघन्यत्वसामान्याद्वा । एनमश्वं पश्चात्पृष्ठतो महिमाऽन्वजायत तस्यापरे समुद्रे योनिः । महिमा महत्त्वात् । अश्वस्य हि विभूतिरपां यत्सौवर्णो राजतश्च ग्रहावुभयतः स्याप्येते । तावेतौ वै महिमानौ महिमाख्यौ ग्रहावश्वमभितः सबभूवतुरुक्तलक्षणावेव संभूतौ । इत्थमसावश्वो महत्त्वयुक्त इति पुनर्वचनं स्तुत्यर्थम् ।

अथ यज्ञेषु कालादिदृष्टीर्विधायार्थं प्रजापतिरूपं विवक्षित्वा कण्डिकान्तरं गृहीत्वा तात्पर्यमाह—अहरित्यादिना । ग्रहो हवनीयदर्व्याधारो पात्रविशेषावुभयतः पृष्ठतश्चेति संज्ञानात्सामर्थ्यं चेति यावत् । प्रसिद्धा तादृष्टिर्हि दीप्तिः सौवर्णे च ग्रहे साऽस्त्यतस्तस्मिन्नहर्दृष्टिरिति दर्शनं विभजते-अहरिति । अश्वसंज्ञानात्पूर्वो यो महिमाख्यो ग्रहः स्याप्यते स चेदहर्दृष्ट्योपास्यते कथं सोऽश्वमन्वजायतेति पश्चादृश्वस्य तज्जन्मवाचोयुक्तिरिति शङ्कते-अहरश्वमिति । नायं पश्चादर्थोऽनुशब्दः किंतु लक्षणार्थः । तथा चाश्वस्य प्रजापतिरूपत्वात्तं लक्षयित्वा ग्रहस्य यथोक्तस्य प्रवृत्तेरुपदेशादश्वमन्वन्वजायतेत्यविरुद्धमिति परिहरति-अश्वस्येति । तदेव स्फुटयति—प्रजापतिरिति । काललोकदेवतात्मा प्रजापतिरध्यात्मना दृश्यमानोऽह्नाहर्दृष्ट्या दृष्टेन ग्रहेण लक्ष्यते । तथा चाश्वमन्वजायतेति श्रुतिरविरुद्धेत्यर्थः । अनुशब्दो न पश्चाद्भावीत्यत्र दृष्टान्तमाह—वृक्षमिति । यद्वा वृक्षं लक्षयित्वा तस्याग्रे विद्युद्द्योतते तद्वा वृक्षमनु विद्यो-

---

१ क. ग. घ. ङ. ज. झ. °तं वृ° । २ ङ. झ. योनिर्नैवयानत्वाद्विभ° । ३ ग. ङ. च. छ. ज. °न्यसा° । ४ घ. ग. ब. च छ. ज. झ °ताऽन्व° । ५ क. ख. °हत्त्वम् । अ° । ६ ख. °तः पुरतः पष्ठतः सं° ।

वते सेति प्रयुज्यते । तथाऽत्राप्यनुशब्दो न पश्चादर्थ इत्यर्थः । यत्र च स्थाने ग्रहः स्थाप्यते तत्पूर्वसमुद्रदृष्ट्या ध्येयमित्याह—तस्येति । पूर्वत्वमत्र सादृश्यम् । कथं सप्तमी प्रथमार्थे योज्यते छन्दस्यर्थानुसारेण व्यत्ययसंभवादित्याह—विभक्तीति । यथा सौवर्णे ग्रहेऽहर्दृष्टिरुपदिष्टा तथा राजते ग्रहे रात्रिदृष्टिः कर्तव्येत्यार्ह—तथेति । अस्ति हि चन्द्रातपवत्त्वाद्रात्रेः शौक्ल्यमस्ति च राजतस्य ग्रहस्य तदुक्तं तत्र रात्रिदर्शनमित्याह—वर्णेति । रजतं सुवर्णाज्जघन्यमहनश्च रात्रिरतो वा सादृश्यात्तत्र रात्रिदृष्टिरित्याह—जघन्येति । प्रजापतिरूपं प्रकृतमर्थं लक्षयित्वा तत्संज्ञपनात्पश्चादस्य प्रवृत्तिं दर्शयति—एनामिति । तदासादनस्थाने पश्चिमसमुद्रदृष्टिर्विधेयेत्याह—तस्येति । कथमेतौ ग्रहौ महिमाख्यावुक्तौ महत्त्वोपेतत्वादित्याह—महिमेति । अथाश्वविषयं दर्शनमादिश्य ग्रहविषयं तदादिशतो वाक्यभेदः स्यान्नेत्याह—अश्वस्येति । किमत्र नियामकमित्याशङ्क्य पुनरुक्तिरिति मत्वाऽऽह तावित्यादिना । वैशब्दार्थकथनम्—एवेति ।

तथा च हयो भूत्वेत्यादि स्तुत्यर्थमेव । हयो हिनोतेर्गतिकर्मणो विशिष्टगतिरित्यर्थः । जातिविशेषो वा । देवानवहद्देवत्वमगमयत्प्रजापतित्वाद्देवानां वा वोढाऽभवत् । ननु निन्देव वाहनत्वम् । नैष दोषः । वाहनत्वं स्वाभाविकमश्वस्य स्वाभाविकत्वादुच्छ्रायप्राप्तिर्देवादिसंबन्धोऽश्वस्येति स्तुतिरेवैषा । तथा वाज्यादयो जातिविशेषाः । वाजो भूत्वा गन्धर्वानवहदित्यनुषङ्गः । तथाऽर्वा भूत्वाऽसुरान् । अश्वो भूत्वा मनुष्यान् । समुद्र एवेति परमात्मा बन्धुर्बन्धनं बध्यतेऽस्मिन्निति । समुद्रो योनिः कारणमुत्पत्तिं प्रति । एवमसौ शुद्धयोनिः शुद्धस्थितिरिति स्तूयते "अप्सुयोनिर्वा अश्वः" इति श्रुतेः । प्रसिद्ध एव वा समुद्रो योनिः ॥ २ ॥

इति प्रथमाध्यायस्य प्रथमं ब्राह्मणम् ॥ १ ॥

वाक्यशेषोऽप्यत्रानुगुणो भवतीत्याह—तथा चेति । हयशब्दनिष्पत्तिपुरःसरं तदर्थमाह—हय इति । वाज्यादिशब्दानां जातिविशेषवाचित्वादत्रापि तदेव ग्राह्यमिति पक्षान्तरमाह—जातीति । देवानां देवत्वप्रापकत्वं कथमस्येत्याशङ्क्याऽऽह—प्रजापतित्वादिति । अश्वं स्तोतुमारभ्य कल्पान्तरोक्त्या तन्निन्दावचनमनुचितमिति शङ्कते—नन्विति । उपक्रमविरोधो नास्तीति परिहरति—नेत्यादिना ।

---

१ क. °ब्दार्थं कथयति—ए° । २ ख. च । ३ ग. °न्देषा वा° । ४ ग. घ. ङ. च. छ. ज. झ. °दुच्छ्रय° । ५ ख. घ. छ. ज झ. ति च । स° ।

समुत्पद्य भूतानि द्रवन्त्यस्मिन्निति व्युत्पत्त्या परमगम्भीरस्येश्वरस्य समुद्रशब्दनाभाह-परमात्मेति । तत्र योनित्वमुत्पादकत्वं बन्धुत्वं स्थापकत्वं समुद्रत्वं विलापकत्वमिति भेदः । अथ परमात्मयोनित्वादिवचनमुपास्याश्रयस्य क्रोपयुज्यते तत्राऽऽह-एवमिति । श्रुत्यन्तरानुरोधेन समुद्रो योनिरित्यत्र समुद्रशब्दस्य रूढिमनुजानाति-अप्सुयोनिरिति ॥ २ ॥

इति प्रथमाध्यायस्य प्रथमं ब्राह्मणम् ॥ १ ॥

(अथ प्रथमाध्यायस्य द्वितीयं ब्राह्मणम्)।

नैवेह किंचनाग्र आसीन्मृत्युनैवेदमावृतमासीत् । अशनायया ऽशनाया हि मृत्युस्तन्मनोऽकुरुताऽऽत्मन्वी स्यामिति। सोऽर्चन्नचरत्तस्यार्चत आपोऽजायन्तार्चते वै मे कमभूदिति तदेवार्कस्यार्कत्वं कꣳ ह वा अस्मै भवति य एवमेतदर्कस्यार्कत्वं वेद ॥ १ ॥

अथाग्नेरश्वमेधोपयोगिकस्योत्पत्तिरुच्यते । तद्विषयदर्शनाविवक्षयैवोत्पत्तिः स्तुत्यर्था । नैवेह किंचनाग्र आसीत् । इह संसारमण्डले किंचन किंचिदपि नामरूपप्रविभक्तविशेषं नैवाऽऽसीन्न बभूव । अग्रे प्रागुत्पत्तेर्मनआदेः । किं शून्यमेव बभूव शून्यमेव स्यात् । " नैवेह किंचन" इति श्रुतेः । न कार्यं कारणं वाऽऽसीदुत्पत्तेश्च । उत्पद्यते हि घटः । अतः प्रागुत्पत्तेर्घटस्य नास्तित्वम् ।

अश्वादिदर्शनोक्त्यनन्तरमग्निदर्शनं वक्तुं ब्राह्मणान्तरमवतारयति-अथेति । नैवेहेत्यादौ तद्दृष्टिर्नास्तीति चेत्सत्यं तत्राग्नेर्जन्म वक्तुं भूमिका क्रियत इत्याह-अग्नेरिति । वायोराग्निरित्यादौ प्रसिद्धं तज्जन्मेति चेत्सत्यं तद्विशेषस्यात्र जन्मोक्तिरित्याह-अश्वमेधेति । दर्शने विधित्सिते किं जन्मोक्त्येति चेत्तत्राऽऽह-तद्विषयेति । अग्निदर्शनस्य विधानुमिष्टस्य सिद्ध्यर्थमुपास्याग्नितुतिफला तदुत्पत्तिरिष्टा शुद्धजन्मत्वादुत्कृष्टत्वेनायमुपास्यो राजादिवदित्यर्थः । तात्पर्यमुक्त्वा वाक्यमादायाक्षराणि व्याचष्टे-नैवेत्यादिना । नामरूपाभ्यां विभक्तो विशेषो यस्मिन्निति बहुव्रीहिः । अत्र शून्यवादी लब्धावकाशोऽविमृश्य परेष्टश्रुत्यवष्टम्भेन स्वपक्षमाह-किमित्यादिना ।

---

१ क. ग. घ ङ. ट. ठ. ड. °वाक्यर्थस्था° । २ क. ग. ङ. ज. ट. ठ. ड.-°दर्कर्यस्या° । ३ घ. °स्यार्कत्वं । ४ ण. °ति । सदृशं° । ५ क. ख. °स्य विष्यर्थ° ।

कार्यस्य प्रागसत्त्वे हेत्वन्तरमाह—उत्पत्तेश्चेति । विमतं प्रागसदुत्पद्यमानत्वाद्यत्तथैवं न तदेवं यथा परेष्टं ब्रह्मेत्यर्थः । हेत्वसिद्धिं शङ्कित्वोत्तरमाह—उत्पद्यते हीति । घटग्रहणं कार्यमात्रस्योपलक्षणार्थम् । उक्तमनुमानं निगमयति—अत इति ।

ननु कारणस्य न नास्तित्वं मृत्पिण्डादिदर्शनात् । यन्नोपलभ्यते तस्यैव नास्तिताऽस्तु कार्यस्य न तु कारणस्योपलभ्यमानत्वात् । न । प्रागुत्पत्तेः सर्वानुपलम्भात् । अनुपलब्धिश्चेदभावहेतुः सर्वस्य जगतः प्रागुत्पत्तेर्न कारणं कार्यं वोपलभ्यते । तस्मात्सर्वस्यैवाभावोऽस्तु । न । "मृत्युनैवेदमावृतमासीत्" इति श्रुतेः । यदि हि किंचिदपि नाऽऽसीद्येनाऽऽव्रियते यच्चाऽऽव्रियते तदा नावक्ष्यन्मृत्युनैवेदमावृतमिति । न हि भवति गगनकुसुमच्छन्नो वन्ध्यापुत्र इति । ब्रवीति च मृत्युनवदमावृतमासीदिति ।

तत्र तार्किको ब्रूते—नान्विति । यदुक्तं न कार्यं कारणं वाऽऽसीदिति तत्र भागे बाधो भागे चानुमितिरित्यर्थः । कार्यस्यापि कथं प्रागसत्त्वोपपत्तिरित्याशङ्क्याऽऽह—यन्नेति । एतेनानुमानस्य सिद्धसाध्यतोक्ता । कार्यवत्कारणस्यापि प्रागसत्त्वं किं न स्यादित्याशङ्क्योक्तहेत्वभावान्नैवमित्याह—नान्विति । शून्यवाद्याह—न प्रागुत्पत्तेरिति । विमतं प्रागसद्योग्यत्वे सति तदाऽनुपलब्धत्वात्संमतवत् । न चासिद्धो हेतुः श्रुतेरनतिशङ्क्यत्वात् । तद्विरोधे सत्युपलब्धेराभासत्वादित्यर्थः । तदेव प्रपञ्चयति—अनुपलब्धिश्चेदिति । कार्यवत्कारणस्यापि प्रागसत्त्वे प्राप्ते सिद्धान्तयति—नेत्यादिना । नेवेत्यादिश्रुतिरव्यक्तनामरूपादिविषया न प्रागसत्त्वं कार्यकारणयोराह । अन्यथा वाक्यशेषविरोधादित्यर्थः । श्रुतिं विवृणोति—यदि हीति । द्वयोरसत्त्वे का वाचोयुक्तेरनुपपत्तिस्तत्राऽऽह—न हीति । मा तर्हि वाक्यमेव भूदित्याशङ्क्याऽऽह—ब्रवीति चेति ।

तस्माद्येनाऽऽवृतं कारणे यच्चाऽऽवृतं कार्यं प्रागुत्पत्तेस्तदुभयमासीच्छ्रुतेः प्रामाण्यादनुमेयत्वाच्च । अनुमीयते च प्रागुत्पत्तेः कार्यकारणयोरस्तित्वम् । कार्यस्य हि सतो जायमानस्य कारणे सत्युत्पत्तिदर्शनात् । असति चादर्शनात् । जगतोऽपि प्रागुत्पत्तेः कारणास्तित्वमनुमीयते घटादिकारणास्तित्ववत् ।

---

१ क. ग. च. °र्थं । २ ख. °च्चाप्याव्रि° । ३ ख. °ति श्रुतिः । न । ४ घ. तदनु° । ५ क. °रव्याकृतना° । ६ ञ. ण. °पार्थावि° ।

मृत्युनेत्यादिवाक्यार्थमुपसंहरति-तस्मादिति श्रुतेः प्रामाण्यादिति । तत्प्रा
ाण्यस्य प्रमाणलक्षणे स्थितत्वादिति यावत् । परकीयेऽनुमाने श्रुतिविरोधमभिधा-
ानुमानविरोधमाह-अनुमेयत्वाच्चेति । कार्यकारणयोः सत्त्वस्यानुमेयतया तद-
ात्त्वमनुमातुमशक्यम् । उपजीव्यविषयतया सत्त्वमनुमानस्य बलीयस्त्वादित्यर्थः ।
ार्यकारणयोः सत्त्वानुमानं प्रतिज्ञाय प्रथमं कारणसत्त्वमनुमिनोति-अनुमीयते
ित्यादिना । कारणस्य सत्त्वेऽनुमानमाह-कार्यस्य हीति । विमतं सत्पूर्वं
ार्यत्वात्कुम्भवदित्यर्थः ।

घटादिकारणस्याप्यसत्त्वमेवानुपमृद्य मृत्पिण्डादिकं घटाद्यनुत्पत्ते-
रिति चेन्न । मृदादेः कारणत्वात् । मृत्सुवर्णादि हि तत्र कारणं घट.
रुचकादेर्न पिण्डाकारविशेषः । तदभावे भावात् । असत्यपि पिण्डाका
रविशेषे मृत्सुवर्णादिकारणद्रव्यमात्रादेव घटरुचकादिकार्योत्पत्तिर्दृश्यते
स्मान्न पिण्डाकारविशेषो घटरुचकादिकारणम् । असति तु मृत्सुव-
र्णादिद्रव्ये घटरुचकादिर्न जायत इति मृत्सुवर्णादिद्रव्यमेव कारणं नतु
पिण्डाकारविशेषः। सर्वं हि कारणं कार्यमुत्पादयत्पूर्वोत्पन्नस्याऽऽत्मका-
स्य तिरोधानं कुर्वत्कार्यान्तरमुत्पादयति । एकस्मिन्कारणे युगपदने-
ककार्यविरोधात् । न च पूर्वकार्योपमर्दं कारणस्य स्वात्मोपमर्दो
वति । तस्मात्पिण्डाद्युपमर्दं कार्योत्पत्तिदर्शनमहेतुः प्रागुत्पत्तेः कार-
णासत्त्वे ।

नानुपमृद्य प्रादुर्भावादिति न्यायेन दृष्टान्तस्य साध्यवैकल्यं चोदयति-घटा-
दीति । न तावदसिद्धो घटः स्वकारणमुपमृद्नात्यसतोऽकारकत्वात्सिद्धस्य तूपम-
र्दकत्वेनासत्पूर्वकत्वमिति कुतः साध्यविकलतेत्याह-नेति । किंचान्वयिद्रव्यमेव
र्वत्र कारणं न पिण्डाकारविशेषोऽनन्वयादनवस्थानाच्चेति कुतः साध्यवैकल्यमि-
ाह-मृदादेरिति । तदेव स्फुटयति-मृत्सुवर्णादीति । तत्रेति दृष्टान्तोक्तिः ।
किंचान्वयव्यतिरेकाभ्यां कारणमवधेयम् । नच पिण्डाभावे घटो न भवतीति व्यति-
रेकोऽपि शकलादिभ्योऽपि घटाद्युद्भवोपलम्भादित्याह-तदभाव इति । तदेव
स्फुटयति-असत्यपीति । त्वन्मतेऽपि व्यतिरेकराहित्यं तुल्यमित्याशङ्क्याऽऽह-
असतीति । मृदाद्येव घटादिकरणं चेत्किमिति पिण्डादौ सत्येव ततो घटाद्यनुत्प-

---

१ क. °ण्डाद्याका° । २ घ. छ. ज. झ न मृत्सुवर्णादिर्पि° । ३ ड. °तु मृत्सुवर्णा-
पि° । ४ घ ण. °द्धस्याप° । ५ क ख. °ण्डार्दिवि° । क. ञ ण. °स्फुटयते । ७ ञ.
°भ्यो घ° । ८ ख. °टाद्युत्प° । ९ ण. °नुपपत्ति° ।

त्तिरित्याशङ्क्याऽऽह—सर्वमिति। ब्रह्मणि त्वविद्यावशादुपपत्तिरिति भावः। अन्वयिद्रव्यं पूर्वोत्पन्नस्वकार्यतिरोधानेन कार्यान्तरं जनयति चेत्कार्यतादात्म्येन स्वयमपि नश्येत्तेनोत्तरकार्योत्पत्तिर्हेत्वभावादित्याशङ्क्याऽऽह—न चेति। कार्यान्तरेऽप्यनुवृत्तिदर्शनात्कार्यान्तरात्मना भावाच्चेत्यर्थः। अन्वयिद्रव्यस्यैव कारणत्वे फलितमाह—तस्मादिति।

पिण्डादिव्यतिरेकेण मृदादेरसत्त्वादयुक्तमिति चेत्। पिण्डादिपूर्वकार्योपमर्दे मृदादिकारणं नोपमृद्यते घटादिकार्यान्तरेऽप्यनुवर्तत इत्येतदयुक्तम्। पिण्डघटादिव्यतिरेकेण मृदादिकारणस्यानुपलम्भादिति चेन्न। मृदादिकारणानां घटाद्युत्पत्तौ पिण्डादिनिवृत्तावनुवृत्तिदर्शनात्। सादृश्यादन्वयदर्शनं न कारणानुवृत्तेरिति चेन्न। पिण्डादिगतानां मृदाद्यवयवानामेव घटादौ प्रत्यक्षत्वेऽनुमानाभासात्तादृशादिकल्पनानुपपत्तेः।

अन्वयिनो मृदादेरभावेनाभावान्न कारणमिति शङ्कते—पिण्डादीति। तदेव चोद्यं विवृणोति—नेत्यादिना। मृद्घटः सुवर्णं कुण्डलमित्यादितादात्म्यप्रत्ययस्य पिण्डाद्यतिरिक्तमृद्घटाद्यभावेऽनुपपत्तेरनुभवं मृदाद्युपपत्तिमिति परिहरति—नेति। किंच वा पिण्डादेर्वा पूर्वमृदादीत्येव घटाद्यमूरिति प्रत्यभिज्ञया मृदोऽन्वयिन्याः सिद्धेस्तत्कारणत्वं दुर्वारमित्याह—मृदादीति। यत्तत्तत्क्षणिकं यथा दीपः सन्तश्चेमे भावा इत्यनुमानात्सर्वार्थानां क्षणिकत्वसिद्धेरन्वयदर्शनं सादृश्याद्भ्रान्तिरिति शङ्कते—सादृश्यादिति। प्रत्यभिज्ञासिद्धस्यान्वयस्यार्थविरुद्धं क्षणिकार्थबोधलिङ्गमनुष्णतानमानवन्न भवतीति दूषयति—नेत्यादिना। सादृश्यादित्यादिशब्देन प्रत्यभिज्ञाभ्रान्तित्वादि गृह्यते।

न च प्रत्यक्षानुमानयोर्विरुद्धा व्याप्तिश्चारिता। प्रत्यक्षपूर्वकत्वादनुमानस्य सर्वत्रैवानाश्वासप्रसङ्गात्। यदि च क्षणिकं सर्वं तदेवेदमिति गम्यमानं तदबुद्धेरप्यन्यतदबुद्ध्यपेक्षत्वे तस्या अप्यन्यतदबुद्ध्यपेक्षत्वमित्यनवस्थाया तत्सदृशमिदमित्यस्या अपि बुद्धेर्भूषात्वात्सर्वत्रानाश्वासतैव। तदिदंबुद्ध्योरपि कुत्रचिद्भावे संबन्धानुपपत्तेः। सादृश्यात्तत्संबन्ध इति चेन्न। तदिदंबुद्ध्योरितरेतरविषयत्वानुपपत्तेः। असति चेतरेतरविषयत्वे सादृश्यग्रहणानुपपत्तिः।

---

१ क. घ. ञ. °त्तन्नात्तं। २ क. घ. °त्तिर्हेत्वं। ३ ख. ञ. ण. °र्यात्मं। ४ ख. छ. ज. झ. °वृत्तिरिं। ५ ञ. छ. °पत्तिः। न। ६ ञ. ण. °त्सवाथ घ°। ७ ग. °वैत्र वाऽना°। घ. छ. ज. झ. °वैत्र चाना°। ८ ङ. °वन स°। ९ क. °इयात्स्यात्स। ग. घ. इयात्त°।

प्रत्यक्षात्कारणैक्यं गम्यते । अनुमानात्तद्भेदः । अतो द्वयोर्विरुद्धत्वस्याव्यभिचारित्वान्नाध्यक्षेणानुमानबाधो वैपरीत्यसंभवादित्याशङ्क्याऽऽह—नचेति । प्रत्यभिज्ञामुपजीव्यक्षणिकत्वानुमानाप्रवृत्तावप्युपजीव्यजातीयत्वात्तत्माबल्यादुपजीवकमतीर्थैकमुक्तानुमानं दुर्बलं तद्बाध्यमित्यर्थः। प्रत्यभिज्ञा स्वार्थे स्वतो न मानं बुद्ध्यन्तरसंवादादेव बुद्धीनां मानत्वस्य बौद्धैरिष्टत्वात् । न च बुद्ध्यन्तरं स्थायित्वसाधकमस्तीति प्रत्यभिज्ञायमानस्यापि क्षणिकत्वमित्याशङ्क्याऽऽह—सर्वत्रेति । प्रसङ्गमेव प्रकटयति—यदि चेति । क्षणिकत्वादिबुद्धेरपि स्वार्थे स्वतो मानत्वाभावात्तादृग्बुद्ध्यन्तरापेक्षायां तस्यापि तथात्वेनानवस्थानाद्बुद्धेः स्वतः प्रामाण्यमुपेयम् । तथा च प्रत्यभिज्ञानं सर्वं तथैवाबाधादित्यर्थः । किंच प्रत्यभिज्ञाया भ्रान्तित्वं वदता स्वरूपापह्नवात्तादृग्बुद्ध्योः सामानाधिकरण्येन संबन्धो वाच्यः, स च वक्तुं न शक्यते क्षणद्वयसंबन्धिनो द्रष्टुरभावादित्याह—तादृगिति असति संबन्धे बुद्ध्योः सादृश्यात्तद्बुद्धिरिति शङ्कते-सादृश्यादिति । तयोः स्वसंवेद्यत्वाद्ग्राहकान्तरस्य चाभावान्न सादृश्यसिद्धिरिति दूषयति—न तादृगिति । तथाऽपि किमिति सादृश्यासिद्धिरिति दूषयतिन तादृग्बुद्ध्योरिति तथाऽपि किमिति सादृश्यासिद्धिरित्याशङ्क्याऽऽह—असति चेति ।

असत्येव सादृश्ये तद्बुद्धिरिति चेन्न । तादृग्बुद्ध्योरपि सादृश्यबुद्धिवदसद्विषयत्वप्रसङ्गात् । असद्विषयत्वमेव सर्वबुद्धीनामस्त्विति चेन्न बुद्धिबुद्धेरप्यसद्विषयत्वप्रसङ्गात् । तदप्यस्त्विति चेन्न सर्वबुद्धीनां मृषात्वेऽसत्यबुद्ध्यनुपपत्तेः। तस्मादसदेतत्सादृश्यात्तद्बुद्धिरिति । अतः सिद्धः प्राक्कार्योत्पत्तेः कारणसद्भावः । कार्यस्य चाभिव्यक्तिलिङ्गत्वात् । कार्यस्य च सद्भावः प्रागुत्पत्तेः सिद्धः ।

सादृश्यासिद्धिमभ्युपेत्य शङ्कते—असत्यवेति । यत्र सत्येवार्थे धीस्तत्रैव साधकापेक्षा नान्यत्रेति भावः । तत्र बाह्यार्थवादिनं प्रत्याह—न तादृगिति । विज्ञानवाद्याह-असदिति । तथा सत्यनालम्बनं क्षणिकविज्ञानमित्यस्यापि ज्ञानस्यासद्विषयतया विज्ञानवादासिद्धिरित्याह—नेति । शून्यवाद्याह—तदपीति । सर्वा धीरसद्विषयेत्येषा धीरसद्विषया स्यात्ततश्च सर्वबुद्धेरसद्विषयत्वासिद्धिरिति दूषयति—नेत्यादिना । परपक्षासंभवात्तत्सत्यत्वशङ्कायाः स्यात्सिद्धौ हेतुसिद्धौ दृष्टान्तस्य साध्यवैकल्यं परिहृत्यावान्तरप्रकृतमुपसंहरति—तस्मादिति । संप्रति कारणसत्त्वानुमानं निगमयति—अत इति । कार्यकारणयोर्द्वयोरपि प्रागुत्पत्तेः सत्त्वमनुमेयमिति प्रतिज्ञाय

---

१ स. ण. °त्यक्षत्वात्का° । २ घ. ण. °यमु° । ३ घ. °मुपादेय° । ४ ख. ञ. °पाप° । ५ ख. सादृश्येन । ६ ख. घ. °त्तद्धीरि° । ज. °त्तत्सिद्धिरि° । म. °त्तद्धीसंबन्ध° बुद्धि° । ७ ख. ञ. ण. स्वबे । ८ ख. घ. °षाऽपि धी° । ९ घ. ञ. °भिज्ञया स्या° । १० ख. ञ. ण. °इतमित्यवा° ।

कारणास्तित्वं प्रपञ्चितमिदानीं कार्यास्तित्वानुमानं दर्शयति—कार्यस्य चेति । प्रागुत्पत्तेः सद्भावः प्रसिद्ध इति चकारार्थः । प्रतिज्ञाभागं विवृणोति—कार्यस्येति ।

कथमभिव्यक्तिलिङ्गत्वादभिव्यक्तिलिङ्गमस्येति । अभिव्यक्तिः साक्षाद्विज्ञानालम्बनत्वप्राप्तिः । यद्धि लोके प्रावृतं तमआदिना घटादिवस्तु तदालोकादिना प्रावरणतिरस्कारेण विज्ञानविषयत्वं प्राप्नुवत्प्राक्सद्भावं न व्यभिचरति । तथेदमपि जगत्प्रागुत्पत्तेरित्यवगच्छामः । न ह्यविद्यमानो घट उदितेऽप्यादित्य उपलभ्यते ।

हेतुभागमाक्षिपति—कथमिति । अभिव्यक्तिर्लिङ्गमस्येति व्युत्पत्त्या कथमभिव्यक्तिलिङ्गत्वादिति कार्यसत्त्वे हेतुरुच्यते सिद्धे हि सत्त्वेऽभिव्यक्तिर्लिङ्गमस्येति सिध्यति तद्बलाच्च सत्त्वसिद्धिरित्यन्योन्याश्रयादित्यर्थः । संप्रतिपन्नयाऽभिव्यक्त्या विप्रतिपन्नं सत्त्वं साध्यते तन्नान्योन्याश्रयत्वमिति परिहरति—अभिव्यक्तिरिति । कथं तर्हीहानुमानं प्रयोक्तव्यमित्याशङ्क्य प्रथमं व्याप्तिमाह—यद्धीति । यदभिव्यज्येमानं तत्प्रागभिव्यक्तेरस्ति यथा तमोनाःस्थं घटादीत्यर्थः । संप्रत्यनुमिनोति—तथेति । विमतं प्रागभिव्यक्तेः सदभिव्यक्तिविषयत्वाद्यद्यदभिव्यज्यते तत्तत्प्राक्सत्संप्रतिपन्नवदित्यर्थः । ननु तमोन्तःस्थो घटोऽभिव्यञ्जकसामीप्यादभिव्यज्यते न तत्र प्राक्कालिकं सत्त्वं प्रयोजकमित्याशङ्क्याऽऽह—न हीति ।

न तेऽविद्यमानत्वाभावादुपलभ्येतैवेति चेत् । न हि तव घटादिकार्यं कदाचिदप्यविद्यमानमित्युदित आदित्य उपलभ्येतैव । मृत्पिण्डेऽसंनिहिते तमआद्यावरणे चासति विद्यमानत्वादिति चेत् । न । द्विविधत्वादावरणस्य । घटादिकार्यस्य द्विविधं ह्यावरणं मृदादेरभिव्यक्तस्य तमःकुड्यादि प्राङ्मृदोऽभिव्यक्तेर्मृदाद्यवयवानां पिण्डादिकार्यान्तररूपेण संस्थानम् । तस्मात्प्रागुत्पत्तेर्विद्यमानस्यैव घटादिकार्यस्याऽऽवृतत्वादनुपलब्धिः । नष्टोत्पन्नभावाभावशब्दप्रत्ययभेदस्त्वभिव्यक्तितिरोभावयोर्द्विविधत्वापेक्षः ।

उक्तेऽनुमाने कार्यस्य सदोपलब्धिप्रसङ्गं विपक्षे बाधकमाशङ्क्याह—नेत्यादिना । उक्तानुमानविषेधो नञर्थः । अविद्यमानत्वाभावादिति च्छेदः । अनुमाने बाधकोपन्यासं विवृणोति—न हीति । वर्तमानवदतीतमागामि च घटादि सदेव चेदुपलब्धिसाम्ग्र्यां सत्यां तद्वत्प्राग्जनेर्नाशाच्चोर्ध्वमुपलभ्येत न चैवमुपलभ्यते तस्मादयुक्तं कार्यस्य सदा सत्त्वमित्यर्थः। मृत्पिण्डग्रहणं विरोधिकार्यान्तरोपलक्षणार्थम् । असंनिहिते सतीति च्छेदः। न तावद्विद्यमानत्वमात्रं कार्यस्य सदोपलम्भाधारकं सतोऽपि

१ च. °व हि घ ।

घटादेरभिव्यक्त्यनभिव्यक्त्योरुपलब्धत्वादिति समाधत्ते—नेति । अभिव्यक्तिसामग्रीसत्त्वं त्वभिव्यक्तिसाधकं न तु सततत्सामग्रीनियमोऽस्तीत्यभिप्रत्याऽऽह—द्विविधत्वादिति । उत्पन्नस्य कुड्याद्यावरणमनुत्पन्नस्य विशिष्टं कारणमिति द्वैविध्यमेव प्रतिज्ञापूर्वकं साधयति—घटादीति । यदोपलभ्यमानकारणावयवानां कार्यान्तराकारेण स्थितिस्तदा नेदं कार्यमुपलभ्येत[1] तत्रान्यथा चोपलभ्यत इत्यन्वयव्यतिरेकसिद्धं कारणस्य कार्यान्तररूपेण स्थितस्य कार्यावरकत्वमिति द्रष्टव्यम् । विशिष्टस्य कारणस्य ऽऽवरकत्वसिद्धौ सिद्धमर्थमाह—तस्मादिति । प्राक्कार्यास्तित्वे सिद्धे सदा तदुपलब्धिप्रसङ्गबाधकं निराकृत्य नष्टो घटो नास्तीत्यादिप्रयोगप्रत्ययभेदानुपपत्तिं बाधकान्तरमाशङ्क्याऽऽह—नष्टेति । कपालादिना तिरोभावे नष्टव्यवहारः पिण्डाद्यावरणभङ्गेनाभिव्यक्तावुत्पन्नव्यवहारो दीपादिना तमोनिरासेनाभिव्यक्तौ भावव्यवहारः पिण्डादिना तिरोभावेऽभावव्यवहारः । तदेवं कार्यस्य सदा सत्त्वेऽपि प्रयोगभेदसिद्धिरित्यर्थः ॥

पिण्डकपालादेरावरणवैलक्षण्यादयुक्तमिति चेत् । तमःकुड्यादि हि घटाद्यावरणं घटादिभिन्नदेशं दृष्टं न तथा घटादिभिन्नदेशे दृष्टे पिण्डकपाले । तस्मात्पिण्डकपालसंस्थानयोर्विद्यमानस्यैव घटस्याऽऽवृतत्वादनुपलब्धेरित्ययुक्तमावरणधर्मवलक्षण्यादिति चेत् । न । क्षीरोदकादेः क्षीराद्यावरणैकदेशत्वदर्शनात् । घटादिकार्ये कपालचूर्णाद्यवयवानामन्तर्भावादनावरणत्वमिति चेत् । न । विभक्तानां कार्यान्तरत्वादावरणत्वानुपपत्तेः ।

पिण्डादि न घटावरणं तेन समानदेशत्वात् । यद्यस्याऽऽवरणं न तत्तेन समानदेशं यथा कुड्यादीति शङ्कते—पिण्डेति । व्यतिरेक्यनुमानं विवृणोति—तमइत्यादिना । अनुमानफलं निगमयति—तस्मादिति । किमिदं समानदेशत्वं किमेकाश्रयत्वं किंवैककारणत्वमिति विकल्प्याऽऽद्यं विरुद्धत्वेन दूषयति—नेत्यादिना क्षीरेण संकीर्णस्योदकादेराश्रियमाणस्येति यावत् । द्वितीयमुत्थापयति—घटादीति यस्येदं कार्यं तस्मिन्मृदात्मनि तेषामवस्थानात्तद्धेतूनामनावरणत्वमित्यर्थः । घटावस्थमृत्पात्रवृत्तिकपालादेर्घटानावरणत्वमिष्टमेवेति सिद्धसाध्यताऽऽयक्तघटावस्थमृद्वृत्तिकपालादेरनावरणत्वसाधने हेत्वसिद्धिर्घटस्य कपालादेश्चाऽऽश्रयमृदवयवभेदादिति दूषयति—न विभक्तानामिति ।

---

१ न. कार्याव । २ अ. ण. तऽन्य° । ३ ण. ण्ढाद्यवस्थकारणाव° । ४ ण. °हार एवं भावाभावव्यवहारऽपि दी° । ५ क. छ. झ. °रिति तदय° । ६ ग. च. झ. °पत्तिः । आ° । ७ क. °मुपपादय° । ण. °मृद्घटय° । ८ क. °साधनता° ।

आवरणाभाव एव यत्नः कर्तव्य इति चेत्पिण्डकपालावस्थयोर्विद्यमानमेव घटादिकार्यमावृतत्वान्नोपलभ्यत इति चेत् । घटादिकार्यार्थिना तदावरणविनाश एव यत्नः कर्तव्यो न घटाद्युत्पत्तौ । न चेतदस्ति तस्मादयुक्तं, विद्यमानस्यैवाऽऽवृतत्वादनुपलब्धिरिति चेत् । न । अनियमात् । न हि विनाशमात्रप्रयत्नादेव घटाद्यभिव्यक्तिर्नियता । तमआद्यावृते घटादौ प्रदीपाद्युत्पत्तौ प्रयत्नदर्शनात् । सोऽपि तमोनाशायैवेति चेत् । दीपाद्युत्पत्तावपि यः प्रयत्नः सोऽपि तमस्तिरस्करणाय तस्मिन्नष्टे घटः स्वयमेवोपलभ्यते । न हि घटे किंचिदार्धीयत इति चेत् । न प्रकाशवतो घटस्योपलभ्यमानत्वात् । यथा प्रकाशविशिष्टो घट उपलभ्यते प्रदीपकरणे तथा प्राक्प्रदीपकरणात् । तस्मान्न तमस्तिरस्कारायैव प्रदीपकरणं किं तर्हि प्रकाशवत्त्वाय । प्रकाशवत्त्वेनैवोपलभ्यमानत्वात् । क्वचिदावरणविनाशेऽपि यत्नः स्यात् । यथा कुड्यादिविनाशे । तस्मान्न नियमोऽस्त्यभिव्यक्त्यर्थिनाऽऽवरणविनाश एव यत्नः कार्य इति ।

विद्यमानस्यैवाऽऽवृतत्वादनुपलब्धिश्चेदावरणतिरस्कारे यत्नः स्यान्न घटादेरुत्पत्तावतोऽनुभवविरोधः सत्कार्यवादिनः स्यादिति शङ्कते-आवरणेति । तदेव प्रपञ्चयति-पिण्डेति । यत्राऽऽवृतं वस्तु व्यज्यते तत्राऽऽवरणभङ्ग एव यत्न इति व्याप्त्यभावान्नानुभवविरोधोऽस्तीति दूषयति-नानियमादिति । अनियमं साधयति-न हीति । तमसाऽऽवृते घटादौ दीपोत्पत्तौ यत्नोऽस्तीत्यत्र चोदयति-सोऽपीति । अनुभवविरोधमाशङ्क्योक्तमेव व्यनक्ति-दीपादीति । दीपस्तमस्तिरयति चेत्कथं कुम्भोपलब्धिरत आह-तस्मिन्निति । तत्र हेतुमाह-न हीति । अनुभवमनुसृत्य परिहरति-नेत्यादिना । किमिदानीमावरणभङ्गे प्रयत्नो नेत्यत्र नियमोऽस्तु नेत्याह-क्वचिदिति । अनियमं निगमयन्ननुभवविरोधाभावमुपसंहरति-तस्मादिति ।

नियमार्थत्वाच्च । कारणे वर्तमानं कार्यं कार्यान्तराणामावरणमित्यवोचाम । तत्र यदि पूर्वाभिव्यक्तस्य कार्यस्य पिण्डस्य व्यवहितस्य वा

---

१ घ. च. यत्नप्राप्तिरिति । २ च. °क्तिरिति नियमः । व° । ३ ङ. झ °रस्करणाय° । ४ ख. कर्तव्य । ५ क. °दित्याश° । ६ घ. °मोऽस्ति ने° । ७ ङ. झ. °र्थत्वाच्च ।

कपालस्य विनाश एव यत्नः क्रियेत । तदा विदलचूर्णाद्यपि कार्यं जायेत । तेनाप्याबृतो घटो नोपलभ्यत इति पुनः प्रयत्नान्तरापेक्षैव । तस्माद्घटाद्यभिव्यक्त्यर्थिनो नियम एव कारकव्यापारोऽर्थवान् । तस्मात्प्रागुत्पत्तेरपि सदेव कार्यम् ।

किंचाभिव्यञ्जकव्यापारे सति नियमेन घटो व्यज्यते तदभावे नेत्यन्वयव्यतिरेकावधारितो घटार्थः कुलालादिव्यापारस्तस्यार्थवत्त्वार्थमभिव्यक्त्यर्थ एव प्रयत्नो वक्तव्य आवरणभङ्गस्त्वार्थिक इत्याह—**नियमेति** । उक्तं स्मारयन्नेतदेव विवृणोति—**कारण** इत्यादिना । आवृतिभङ्गार्थे यत्ने यतो घटानुपलब्धिरतस्तदुपलब्ध्यर्थत्वेन नियतः सन्यत्नः सफलः स्यादिति फलितमाह—**तस्मादिति** । पक्षतमभिव्यक्तिलिङ्गकमनुमानं निर्दोषत्वादादेयं मन्वानस्तत्फलमुपसंहरति—**तस्मात्प्रागिति** ।

अतीतानागतप्रत्ययभेदाच्च । अतीतो घटोऽनागतो घट इत्येतयोश्च प्रत्याययोर्वर्तमानघटप्रत्ययवन्न निर्विषयत्वं युक्तम् । अनागतार्थिप्रवृत्तेश्च । न ह्यसत्यर्थितया प्रवृत्तिर्लोके दृष्टा । योगिनां चातीतानागतज्ञानस्य सत्यत्वात् । असंश्चेद्भविष्यद्घट ऐश्वरं भविष्यद्घटविषयं प्रत्यक्षज्ञानं मिथ्या स्यात् । न च प्रत्यक्षमुपचर्यते । घटसद्भावे ह्यनुमानमवोचाम ।

कार्यस्य सत्त्वे युक्त्यन्तरमाह—**अतीतेति** । विगतं सद्[1]र्थं प्रमाणत्वात्संप्रतिपन्नवदित्यर्थः । तदेवानुमानं विशदयति—**अतीत इति**[2] । अत्रैवोपपत्त्यन्तरमाह—**अनागतेति** । आगामिनि घटे तदर्थित्वेन लोके प्रवृत्तिर्दृष्टा न चात्यन्तासति सा युक्ता तेन तस्यासद्विलक्षणतेत्यर्थः । किंच योगिनामीशस्य चातीतादिविषयं प्रत्यक्षज्ञानमिष्टं तच्च विद्यमानोपलम्भनमतया घटस्य सदा सत्त्वमित्याह—**योगिनां चेति** । ईश्वरसमुच्चयार्थश्चकारः । भविष्यद्ग्रहणमतीतोपलक्षणार्थम् । ऐश्वरं यौगिकं चेति द्रष्टव्यम् । प्रसङ्गस्येष्टत्वमाशङ्क्याऽऽह—**न चेति** । अधिकबलं हि बाधकं न चातिशयादेशादिज्ञानादधिकबलं ज्ञानं दृष्टमतो बाधकाभावान्न तन्मिथ्येत्यर्थः । तस्य सम्यक्त्वेऽपि पूर्वोत्तरकालयोरसद्घटविषयत्वं किं न स्यादित्याशङ्क्याऽऽह—**घटेति** । पूर्वोत्तरैकालयोरिति शेषः ।

विप्रतिषेधाच्च । यदि[3] घटो भविष्यतीति कुलालादिषु व्याप्रियमा-

---

१ छ. °दा द्वि[4]। २ घ ङ. च. ज झ °पेक्षतैव। ३ ख. ग. °त्यविषयत्वा°। ४ घ. °र्थप्र°। ५ क. °र्थं सप्र°। ६ घ ञ. ण. °ति। तत्रै°। ७ क. ख. °रयोः का°। ८ ग[4]. च. छ. ज. °दि हि घ°।

ष्वेषु घटार्थं प्रमाणेन निश्चितम् । येन च कालेन घटस्य संबन्धो भविष्यतीत्युच्यते तस्मिन्नेव काले घटोऽसन्निति विप्रतिषिद्धमभिधीयते । भविष्यन्घटोऽसन्निति न भविष्यतीत्यर्थः । अयं घटो न वर्तत इति यद्वत् ।

घटस्य प्रागसत्त्वाभावे हेत्वन्तरमाह–विप्रतिषेधादिति । स हि कारकव्यापारदशायामसन्निति कोऽर्थः किं तस्य भविष्यत्त्वादि तदा नास्ति किंवाऽर्थक्रियासामर्थ्यमात्रे व्याहतिं साधयति–यदीति । घटार्थं कुलालादिषु व्याप्रियमाणेषु सत्सु घटो भविष्यतीति प्रमाणेन निश्चितं चेत्कथं तद्विरुद्धं प्रागसत्त्वमुच्यते । कारकव्यापारावच्छिन्नेन हि कालेन घटस्य भविष्यत्त्वेनातीतत्वेन वा भविष्यत्यभूदिति वा संबन्धो विवक्ष्यते । तथा च तस्मिन्नेव काले घटस्य तथाविधसत्त्वनिषेधे व्याहतिरितिव्यक्तेत्यर्थः । तामेवाभिनयति–भावेष्यन्निति । यो हि कारकव्यापारदशायां भविष्यत्त्वादिरूपेणास्ति स तदा नास्तीत्युक्ते तस्य तस्यामवस्थायां तेनाऽऽकारेणासत्त्वमर्थो भवति । तथा च घटो यदा येनाऽऽकारेणास्ति स तदा तेनाऽऽकारेण नास्तीति व्याहतिरित्यर्थः ।

अथ प्रागुत्पत्तेर्घटोऽसन्नित्युच्यत घटार्थं प्रवृत्तेषु कुलालादिषु तत्र यथा व्यापाररूपेण वर्तमानास्तावत्कुलालादयस्तथा घटो न वर्तत इत्यसच्छब्दस्यार्थश्चेन्न विरुध्यते । कस्मात् । स्वेन हि भविष्यद्रूपेण घटो वर्तते । न हि पिण्डस्य वर्तमानता कपालस्य वा घटस्य भवति । न च तयोर्भविष्यत्ता घटस्य । तस्मात्कुलालादिव्यापारवर्तमानतायां प्रागुत्पत्तेर्घटोऽसन्निति न विरुध्यते । यदि घटस्य यत्स्वं भविष्यत्ताकार्यरूपं तत्प्रतिषिध्येत । तत्प्रतिषेधे विरोधः स्यात् । ननु तद्भवान्प्रतिषेधति । न च सर्वेषां क्रियावतामेकैव वर्तमानता भविष्यत्त्वं वा ।

द्वितीयमुत्थापयति–अथेति । प्रागुत्पत्तेर्घटार्थं कुलालादिषु प्रवृत्तेषु सोऽसन्नित्यसच्छब्दार्थं स्वयमेव विवेचयति–तत्रेत्यादिना । तत्र सिद्धान्ती ब्रूते–न विरुध्यत इति । कथं पुनः सत्कार्यवादिनस्तदसत्त्वमविरुद्धमित्याह-कस्मादिति। प्रागुत्पत्तेस्तुच्छव्यावृत्तिरूपं सत्त्वं घटस्य सिषाधयिषितं तच्चेद्भवानपि तस्य तदातनमनर्थक्रियासामर्थ्यं निषेधत्यनुमन्यते नाऽऽवयोर्विप्रतिपत्तिरित्याभिप्रेत्याऽऽह-स्वेन हीति । ननु त्वन्मते सर्वस्य मृन्मात्रत्वाविशेषात्पिण्डादेर्वर्तमानता घटस्य स्यात्तस्य चातीतता भविष्यत्ता च पिण्डकपालयोः स्यादिति सांकर्यमाशङ्क्याऽऽह–न हीति ।

१ छ. झ. °त्युच्यते घ° । २ ग. च. °ष्यत्त्वं घ° । ३ घ. झ. °ष्यत्ता वा । ४ क. ख. °त्तेष्वसावेस° । ५ क. °त्तेस्त्वसद्व्यावृ° ।

व्यवहारदशायां यथाप्रतिभासमनिर्वाच्यसंस्थानभेदाश्रयणादित्यर्थः। प्रागवस्थायां घटस्यार्थक्रियासामर्थ्यलक्षणसत्त्वनिषेधे विरोधाभावमुपपादितमुपसंहरति-**तस्मादिति**। उक्तमेव व्यतिरेकद्वारा विवृणोति-**यदीत्यादिना**। यदा कारकाणि व्याप्रियन्ते तदा घटोऽस्तीति तस्य भविष्यत्त्वादिरूपं तत्काले निषिध्यते चेदुक्तविधया व्याघातः स्यात्। न च तस्य तस्मिन्काले भविष्यत्त्वादिरूपं सत्त्वं निषिध्यते। अर्थक्रियासामर्थ्यस्यैव निषेधात्तन्न विरोधावकाशोऽस्तीत्यर्थः। न हि पिण्डस्येत्यादिना सांकर्यसमाधिरुक्तस्तमिदानीं सर्वतन्त्रसिद्धान्ततया स्फुटयति-**न चेति**। भविष्यत्त्वमतीतत्वं चेति शेषः।

अपि च चतुर्विधानामभावानां घटस्येतरेतराभावो घटादन्यो दृष्टो यथा घटाभावः पटादिरेव न घटस्वरूपमेव। न च घटाभावः सन्पटोऽभावात्मकः किं तर्हि भावरूप एव। एवं घटस्य प्राक्प्रध्वंसात्यन्ताभावानामपि घटादन्यत्वं स्यात्। घटेन व्यपदिश्यमानत्वाद्घटस्येतरेतराभाववत्। **तथैव भावात्मकताऽभावानाम्** एवं चैं सति **घटस्य प्रागभाव इति न घटस्वरूपमेव प्रागुत्पत्तेर्नास्ति।**

कार्यस्य प्रागुत्पत्तेर्नाशाच्चोर्ध्वमसत्त्वाभावे हेत्वन्तरमाह-**अपि चेति**। तदेवानुमानतया स्पष्टयितुं दृष्टान्तं साधयति-**चतुर्विधानामिति**। षष्ठी निर्धारणे। घटान्योन्याभावस्य घटादन्यत्वे तत्राप्यन्योन्याभावान्तराङ्गीकारादनवस्थेत्याशङ्क्याऽऽह-**दृष्ट इति**। न यौक्तिकपन्यत्वं किंतु घटो न भवति पट इति प्रातीतिकं तथा च घटाभावः पटादिरेवेति पटादेस्ततोऽन्यत्वाद्घटान्योन्याभावस्यापि घटादन्यत्वसिद्धिरित्यर्थः। ननु घटाभावः पटादिरित्ययुक्तं विशेषणत्वेन घटस्यापि पटादावन्तर्भावप्रसङ्गादिति चेन्नैवं दृष्टपदेनैं क्रोडीकृतत्वात्। घटाभावस्य पटादित्वाभावेऽपि न स्वातन्त्र्यमभावत्वविरोधात्। नापि तदन्योन्याभावः पटादेर्धर्मः संसर्गाभावान्तर्भावापातात्। न च स घटस्यैव धर्मः स्वरूपं वा घटो घटो न भवतीतिप्रतीत्यभावादित्यभिप्रेत्याऽऽह- **न घटस्वरूपमेवेति**। यदि प्रतीतिमाश्रित्य घटान्योन्याभावः पटादिरिष्यते तदा पटादेर्भावस्याभावत्वविधानाद्व्याघात इत्याशङ्क्याऽऽह-**न चेति**। स्वरूपपररूपाभ्यां सर्वं सदसदात्मकमिति हि वृद्धाः। तथा च पटादेः स्वेनाऽऽत्मना भावत्वं घटतादात्म्याभावात्तदभावत्वं चेत्यव्याहतिरित्यर्थः। सिद्धे प्रतीत्यनुसारिणि दृष्टान्ते विवक्षितमनुमानमाह-**एवमिति**। किंच तेषामभावानां घटाद्भिन्नत्वात्पटवदेव सत्त्वमेष्टव्यमित्यनुमानान्तरमाह-**तथेति**। अनुमानफलं कथयति-

---

१ ण. °धान्न तद्विरो°। घ. °धान्न तत्र वि°। २ ख. ग. च. छ. झ. °वदेव। त°। झ. च घ°। ४ घ. तस्याप्य°। ५ क. °न निराकु°। ख. ण. °न क्षारीकु°।

एवं चेति। तेषां घटादन्यत्वे तस्यानाद्यनन्तत्वमद्वयत्वं सर्वात्मत्वं प्राप्नोति। सत्त्वे च तेषामभावावान्न भावाभावयोर्मिथः संगतिरित्यर्थः।

अथ घटस्य प्रागभाव इति घटस्य यत्स्वरूपं तदेवोच्येत। घटस्येतिव्यपदेशानुपपत्तिः। अथ कल्पयित्वा व्यपदिश्येत शिलापुत्रकस्य शरीरामिति यद्वत्। तथाऽपि घटस्य प्रागभाव इति कल्पितस्यैवाभावस्य घटेन व्यपदेशो न घटस्वरूपस्यैव। अथार्थान्तरं घटाद्घटस्याभाव इत्युक्तोत्तरमेतत्। किंचान्यत्प्रागुत्पत्तेः शशविषाणवदभावभूतस्य घटस्य स्वकारणसत्तासंबन्धानुपपत्तिः। द्विनिष्ठत्वात्संबन्धस्य। अयुतसिद्धानामदोष इति चेत। न। भावाभावयोरयुतसिद्धत्वानुपपत्तेः भवभूतयोर्हि युतसिद्धताऽयुतसिद्धता वा स्यान्न तु भावाभावयोरभावयोर्वा तस्मात्सदेव कार्यं प्रागुत्पत्तेरिति सिद्धम्।

ननु प्रसिद्धोऽभावो भाववदशक्योऽपह्नोतुमिति चेत्स तर्हि घटस्य स्वरूपमर्थान्तरं वेति विकल्प्याऽद्यमनूद्य दूषयति—अथेत्यादिना। प्रागभावादेर्घटत्वेऽपि संबन्धं कल्पयित्वा घटस्येत्युक्तिरिति शङ्कते—अथेति। संबन्धस्य कल्पितत्वे संबन्धिनोऽप्यभावस्य तथात्वं स्यादिति दूषयति—तथाऽपीति। यत्र संबन्धं कल्पयित्वा व्यपदेशस्तत्र न वास्तवो भेदो यथा राहुशिरसोस्तथाऽत्रापि कल्पिते संबन्धे भेदस्य तथात्वाद्वास्तवत्वं संबन्धिनोरन्यतरस्य स्यात्। न चाभावस्तथा सापेक्षत्वादतो घटस्तथत्यर्थः। कल्पान्तरमनुवदति—अथेति। अनुमानफलं वदद्भिर्घटस्य कारणात्मनो ध्रुवत्ववचनेन समाहितमेतदित्याह—उक्तोत्तरमिति। असत्कार्यवादे दोषान्तरमाह—किंचेति। स्वहेतुसंबन्धः सत्तासंबन्धो वा जन्मेति तार्किकाः। न च प्रागुत्पत्तेरसतः संबन्धस्तस्य सतोर्वृत्तेरित्यर्थः। युतसिद्धयो रज्जुघटयोर्मिथः संयोगे पृथक्सिद्धिरीक्ष्यतेऽयुतसिद्धानां परस्परपरिहारेण प्रतीत्यनर्हाणां कार्यकारणादीनां मिथोयोगे पृथक्सिद्धयभावो न दोषमावहतीति शङ्कते—अयुतेति। परिहरति—नेति। उक्तमेव स्फोरयति—भावेति। व्यवहारदृष्ट्या कार्यकारणयोः साधिता तुच्छव्यावृत्तिमुपसंहरति—तस्मादिति।

किंलक्षणेन मृत्युनाऽऽवृतामित्यत आह—अशनायया ऽशितुमिच्छाऽशनाया सैव मृत्योर्लक्षणं तया लक्षितेन मृत्युनाऽशनायया। कथमशनाया मृत्युरिति। उच्यते—अशनाया हि मृत्युः। हिशब्देन प्रसिद्धं हेतुमवद्योतयति। यो ह्यशितुमिच्छति सोऽशनायानन्तरमेव हन्ति जन्तून्।

१ ण. °ना सत्त्वव°। २ क. स्फोटयति। ख. स्फुटयति।

तेनासावशनायया लक्ष्यते मृत्युरित्यशनाया हीत्याह । बुद्ध्यात्मनोऽशनाया धर्म इति स एष बुद्ध्यवस्थो हिरण्यगर्भो मृत्युरित्युच्यते । तेन मृत्युनेदं कार्यमावृतमासीत् । यथा पिण्डावस्थया मृदा घटाद्य आवृताः स्युरिति तद्वत् । तन्मनोऽकुरुत । तदिति मनसो निर्देशः । स प्रकृतो मृत्युर्वक्ष्यमाणकार्यसिसृक्षया तत्कार्यालोचनक्षमं मनःशब्दवाच्यं संकल्पादिलक्षणमन्तःकरणमकुरुत कृतवान् । केनाभिप्रायेण मनोऽकरोदिति । उच्यते––आत्मन्व्यात्मवान्स्यां भवेयम् । अहमनेनाऽऽत्मना मनसा मनस्वी स्यामित्यभिप्रायः ।

नैवेहेत्यत्र सर्वस्य प्रागुत्पत्तेरसत्त्वशङ्का मृत्युनेत्यादिवाक्यव्याख्यानेन निरस्ता । संप्रति मृत्युशब्दस्यार्थान्तरे रूढत्वान्न तेनाऽऽवरणं जगतः संभवतीत्याक्षिपति–किंलक्षणेनेति । अनभिव्यक्तनामरूपमध्यक्षाद्ययोग्यमपञ्चीकृतपञ्चमहाभूतावस्थातिरिक्तं मायारूपं सामान्यं मृत्युरित्युच्यते । न हि सर्वं कार्यमवान्तरकारणादुत्पत्तुमर्हतीत्यभिप्रेत्याऽऽह–अत आहेति । कथं यथोक्तो मृत्युरशनायया लक्ष्यते । न हि मूलकारणस्याशनायादिमत्त्वम् । अशनायापिपासे प्राणस्येति स्थितेरिति शङ्कते–कथमिति । मूलकारणस्यैव सूत्रत्वं प्राप्तस्य सर्वसंहर्तृत्वान्मृत्युत्वे सति वाक्यशेषोपपत्तिरिति परिहरति–उच्यत इति । प्रसिद्धमेव प्रकटयति–यो हीति । तथाऽपि प्रसिद्धं मृत्युं हित्वा कथं हिरण्यगर्भोपादानमत आह–बुद्ध्यात्मन इति । उक्तं हेतुं कृत्वाफलितमाह–इति स इति । ननु न तेन जगदावियते मूलकारणेनैव तदावरणात्तत्कथं वाक्योपक्रमोपपत्तिरत आह–तेनेति । ननु हिरण्यगर्भे प्रकृते कथं स्रष्टरि नपुंसकप्रयोगस्तत्राऽऽह–तादिति मनस इति । वाक्यार्थमधुना कथयति–स प्रकृत इति । भूतसृष्ट्यतिरेकेण भौतिकस्य मनसः सृष्टिरयुक्तेति मत्वा पृच्छति–केनेति । अपञ्चीकृतानां भूतानां हिरण्यगर्भदेहभूतानां प्रागेवालब्धात्मकत्वात्तेभ्यो मनोव्यक्तिरविरुद्धेति मन्वानो ब्रूते–उच्यत इति । स्वात्मवत्त्वस्य स्वाभाविकत्वान्न तदाशंसनीयमित्याशङ्क्य वाक्यार्थमाह–अहमिति ।

स प्रजापतिरभिव्यक्तेन मनसा समनस्कः सन्नर्चन्नर्चयन्पूजयन्नात्मानमेव कृतार्थोऽस्मीत्यचरच्चरणमकरोत् । तस्य प्रजापतेरर्चतः पूजयत आपो रसात्मिकाः पूजाङ्गभूता अजायन्तोत्पन्नाः । अत्राऽऽकाशप्रभृतीनां त्रयाणामुत्पत्त्यनन्तरमिति वक्तव्यं श्रुत्यन्तरसामर्थ्याद्विकल्पासंभवाच्च सृष्टिक्रमस्य । अर्चते पूजां कुर्वते वै मे मह्यं कमुदकमभूदित्ये-

१ क. घ. °वानिति लिङ्गव्यत्ययेन स्यां । ख. ग. °वानिति स्यां । २ घ. ङ. ज. झ. °श्चेतं शोरास्य° ।

वममन्यत यस्मान्मृत्युस्तदेव हेतोरर्कस्याग्नेरश्वमेधक्रतूपयोगिकस्यार्क-त्वमर्कत्वे हेतुरित्यर्थः। अग्नेरर्कनामनिर्वचनमेतत्। अर्चनात्सुखहेतु-पूजाकरणादप्संबन्धाच्चाग्नेरेतद्यौगं नामार्क इति। य एवं यथोक्तमर्क-स्यार्कत्वं वेद जानाति। कमुदकं वा नामसामान्यात्। ह वा इत्यव-धारणार्थौ। भवत्येवेति। अस्मा एवंविद एवंविदर्थं भवति॥ १॥

मनसो व्यक्तस्योपयोगमाह—स प्रजापतिरिति। ननु तैत्तिरीयकाणामाका-शादिसृष्टिरुच्यते तत्कथमिहापामादौ सृष्टिवचनं तत्राऽऽह—अत्रेति। तत्रम्या हिरण्यगर्भकर्तृकसर्गोक्तिः। त्रयाणा पञ्चीकृतानामिति यावत्। नन्वाकाशाद्या तैत्तिरीये सृष्टिरिह त्वबाद्येत्युदितानुदितहोमवद्विकल्पो भविष्यति नेत्याह—विक-ल्पेति। पुरुषतन्त्रत्वात्क्रियाया युक्तो विकल्पः सिद्धेऽर्थे तु पुरुषानधीने नासौ संभवत्यतः सृष्टिर्विवक्षिता चेदाकाशाद्येव सा युक्ता विद्याप्रधानत्वात्तु नाऽऽदरः सृष्टाविति भावः। अत्रोभय सृष्टिवचनमनुपयुक्तं न स्रष्टुस्तामिरेव पूजा सिध्यती-त्याशङ्क्याऽऽधमेधिकाग्नेरर्कनामसिद्ध्यर्थं तदुपयोगमुपन्यस्यति—अर्चत इति। कोऽसौ हेतुरित्यपेक्षायामर्चतिपदावयवस्यार्कशब्देन संगतिरिति मन्वानः तत्राह—अर्कत्वमिति। एवं मृत्योरर्कत्वेऽपि कथमग्नेरर्कत्वमित्याशङ्क्य मृत्युसंबन्धादि-त्याह—अग्नेरिति। किमर्थमग्नेरर्कनामनिर्वचनमित्याशङ्क्यापूर्वसंज्ञायोगस्य फला-न्तराभावादुपासनार्थमित्याह—अग्नेरिति। निर्वचनमेव स्फोरयति—अर्चनादिति। फलवत्त्वाच्च यथोक्तनामवतोऽग्नेरुपास्तिरत्र विवक्षितेत्याह—य एवमिति॥ १॥

आपो वा अर्कस्तद्यदपाꣳ शर आसीत्तत्सम-
हन्यत। सा पृथिव्यभवत्तस्यामश्राम्यत्तस्य
श्रान्तस्य तप्तस्य तेजोरसो निरवर्ततााग्निः॥ २॥

आपो वा क(अ)र्कः। कः पुनरसावर्क इति। उच्यते—आपो वा या अर्चनाङ्गभूतास्ता एवार्कोऽग्नेरर्कस्य हेतुत्वात्। अप्सु चाग्निः प्रति-ष्ठित इति। न पुनः साक्षादेवार्कस्ताः। तासामप्रकरणात्। अग्नेश्च प्रकरणम्। वक्ष्यति चायमग्निरर्क इति। तत्तत्र यदपां शर इव शरो दघ्न इव मण्डभूतमासीत्तत्समहन्यत संघातमापद्यत तेजसा बाह्यान्तः-पच्यमानं लिङ्गव्यत्ययेन वा योऽपां शरः स समहन्यतेति सा पृथिव्यभ-

१ क. ग. °रर्क्यस्यार्क°। घ. च. °रर्कस्या°। २ छ. °स्यार्कत्वं। ३ घ. °यायी पु°। ४ क. °क्ताऽवि। ५ घ. ण. °पामादौ सृ°। ६ घ. ञ. ण. °त्व इति। ७ ण शङ्क-त्यार्कमृ°। ८ क. ख. °र्वक्रियायो°। ९ घ. °र्क्ता तासाम्, अप्र°।

वत्स संघातो येयं पृथिवी साऽभवत् । ताभ्योऽद्भ्योऽण्डमाभिनिर्वृत्तामित्यर्थः । तस्यां पृथिव्यामुत्पादितायां स मृत्युः प्रजापतिरश्राम्यच्छ्रमयुक्तो बभूव । सर्वो हि लोकः कार्यं कृत्वा श्राम्यति । प्रजापतेश्च तन्महत्कार्यं यत्पृथिवीसर्गः। किं तस्य श्रान्तस्येत्युच्यते-तस्य श्रान्तस्य तप्तस्य-खिन्नस्य तेजोरसस्तेज एव रसस्तेजोरसः सारो निरवर्तत प्रजापतिशरीरान्निष्क्रान्त इत्यर्थः। कोऽसौ निष्क्रान्तोऽग्निः सोऽण्डस्यान्तर्विराट्प्रजापतिः प्रथमजः कार्यकरणसंघातवाञ्जातः । "स वै शरीरी प्रथमः" इति स्मरणात् ॥ २ ॥

अपामर्कत्वश्रवणान्नाग्नेरर्कत्वमिति शङ्कते-कः पुनरिति । प्रकरणमाश्रित्य तासामर्कत्वमौपचारिकमित्युत्तरमाह-उच्यत इति । तास्वन्तर्हिरण्मयमण्डं संबभूवेति श्रुतिमनुसरन्नुपचारे हेत्वन्तरमाह-अप्सु चेति । मुख्यमर्कत्वमपां वारयति-न पुनरिति । ननु 'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्' इतिन्यायात्प्रकरणादापो वा अर्क इति वाक्यं बलवदित्याशङ्क्य वाक्यसहकृतं प्रकरणमेव केवलवाक्याद्बलवदित्याशयवानाह-वक्ष्यति चेति भूतान्तरसहितास्वप्सु कारणभूतासु पृथिवीद्वारा पार्थिवोऽग्निः प्रतिष्ठित इत्युक्तमिदानीं पृथिवीसर्गं ताभ्यो दर्शयति-तदित्यादिना । अप्सु भूतान्तरसहितासूत्पन्नासु सतीष्विति सप्तम्यर्थः । शर इव शर इत्युक्तमेव व्याचष्टे-दग्ध इवेति । संघात सहकारिकारणमाह-तेजसेति । यत्तदिति पदे नपुंसकत्वेन श्रुते कथं तयोः शरशब्देन कारणस्योच्छ्रमत्ववाचिना पुंलिङ्गेनान्वयस्तत्राऽऽह-लिङ्गव्यत्ययेनेति । उक्तानुपपत्तिद्योतनार्थो वाशब्दः । व्यत्ययेनान्वयमेवाभिनयति-योऽपामिति । वाक्यतात्पर्यमाह-ताभ्य इति । स्थूलरूपश्चात्मकविराजः सूक्ष्मरूपश्चात्मकसूत्रादुत्पत्तिं वक्तुं पातनिकामाह-तस्यामिति । उक्तेऽर्थे लोकप्रसिद्धिमनुकूलयति-सर्वो हीति । इदानीं विराडुत्पत्तिमुपदिशति-किं तस्येत्यादिना । अग्निशब्दार्थं स्फुटयति-सोऽण्डस्येति । तस्य प्रथमशरीरित्वे मानमाह-स वा इति ॥ २ ॥

स त्रेधाऽऽत्मानं व्यकुरुताऽऽदित्यं तृतीयं वायुं तृतीयꣳ स एष प्राणस्त्रेधा विहितः । तस्य प्राची दिक्शिरोऽसौ चासौ चेमौ । अथास्य प्रतीची दिक्पुच्छमसौ चासौ च सक्थ्यौ

१ च. °द्भ्योऽण्डं विराट्शब्दवाच्यमभवत् । त° । २. च. छ. °म्यलोकवच्छ्रु° । ३ ख. ग. घ. च. ज. झ. र्यकार° । ४ क. ख. °नुरुन्धन्न° । ५ ञ. ण. °नु प्रकरणाद्वा° ।

दक्षिणा चोदीची च पार्श्वे द्यौः पृष्ठमन्तरिक्षमुदर-
मियमुरः स एषोऽप्सु प्रतिष्ठितो यत्र क्वचेति तदेव
प्रतितिष्ठत्येवं विद्वान् ॥ ३ ॥

स च जातः प्रजापतिस्त्रेधा त्रिप्रकारमात्मानं स्वयमेव कार्यकर-णसंघातं व्यकुरुत व्यभजदित्येतत् । कथं त्रेधेत्याह—आदित्यं तृतीय-मग्निवाय्वपेक्षया त्रयाणां पूरणमकुरुतेत्यनुवर्तते । तथाऽग्न्यादित्यापे-क्षया वायुं तृतीयम् । तथा वाय्वादित्यापेक्षयाऽग्निं तृतीयमिति द्रष्ट-व्यम् । सामर्थ्यस्य तुल्यत्वात्त्रयाणां संख्यापूरणत्वे स एष प्राणः सर्व-भूतानामात्माऽप्याग्नेयवाय्वादित्यरूपेण विशेषतः स्वेनैव मूर्त्यात्मना त्रेधा विहितो विभक्तो न विराट्स्वरूपोपमर्दनेन । तस्यास्य प्रथमजस्याग्ने-रश्वमेधोपयोगिकस्यार्कस्य विराजश्चित्यात्मकस्याश्वस्येव दर्शनमु-च्यते । सर्वा हि पूर्वोक्तोत्पत्तिरस्य स्तुत्यर्थेत्यवोचाम—इत्थमसौ शुद्ध-जन्मेति । तस्य प्राची दिक्शिरो विशिष्टत्वसामान्यात् । असौ चासौ चैशान्याग्नेय्यावंसौ बाहू । ईरयतेर्गतिकर्मणः । अथास्याग्नेः प्रतीची दिक्पुच्छं जघन्यो भागः । प्राङ्मुखस्य प्रत्यग्दिक्संबन्धात् । असौ चासौ च वायव्यनैर्ऋत्यौ सक्थ्यौ सक्थिनौ पृष्ठकोणत्वसामान्यात् । दक्षिणा चोदीची च पार्श्वे उभयदिक्संबन्धसामान्यात् । द्यौः पृष्ठम-न्तरिक्षमुदरमिति पूर्ववत् । इयमुरः । अधोभागसामान्यात् । स एषोऽग्नेः प्रजापतिरूपो लोकाद्यात्मकोऽग्निरप्सु प्रतिष्ठितः । " एवमिमे लोका अप्स्वन्तः " इति श्रुतेः । यत्र क्वच यस्मिन्कस्मिंश्चिदेति तदेव तत्रैव प्रतितिष्ठति स्थितिं लभते । कोऽसावेवं यथोक्तमप्सु प्रतिष्ठितत्वमग्नेर्वि-द्वांस्विजानन्गुणफलमेतत् ॥ ३ ॥

विराजो ध्यानार्थमवच्छेदभेदमाह स चेति । कोऽस्य त्रेधाभावस्य कर्तेति वीक्षाया-माह—स्वयमेवेति । कथमेकस्य त्रिधात्वमन्यथा कथमेकत्वमित्याह—कथमिति । मृदो घटशरावाद्यनेकरूपैत्ववद्विराजो बहुरूपत्वं साधयति—आहेत्यादिना । कथ-मग्निं तृतीयमित्यश्रुतं कल्प्यते तत्राऽऽह—सामर्थ्यस्येति । वाय्वादित्ययोरिवाग्नेरपि संख्यापूरणत्वशक्तेरविशिष्टत्वादग्निं तृतीयमकुरुतेत्युपसंख्यायते स त्रेधाऽऽत्मानमिति

१ ख. ग. ङ. च. ज. झ. °र्यकार° । २ ग. घ. ङ. °तात्मा° । ३ ख. ग. ङ. च. छ. झ. °सौ चेशा° । ४ ख. प्रतीचीदिक्सं° । ५ ख. कोऽसौ य एव । ६ ख. च छ. झ. °द्वा-ञ्ज्ञान° । ७ क. ख. °पवस्वव° ।

षोपक्रमादित्यर्थः । ननु किमयं त्रेधाभावो विराट्स्वरूपोपमर्देन क्रियते न हि स तस्मिन्सत्येव युक्तो विरोधादित्याह–स एष इति । यथा तन्त्ववस्थानुपमर्देनैव मूलकारणात्पटो जायते तथा सर्वेषां भूतानां प्राणतया साधारणोऽप्ययं स्वेनैव स्वतन्त्रेणानुगतेन मृत्युरूपेण त्रेधाविभागस्य कर्ता । न चैकस्य बहुरूपत्वविरोधो मायाविवदुपपत्तेरित्यर्थः । तस्य प्राचीत्यादेस्तात्पर्यमाह–तस्येति । उक्तानि विशेषणानि प्रकरणाविच्छेदार्थमनूद्यन्ते । आग्नेयविषयं दर्शनमिदानीमुच्यते चत्रेवहेत्यादि पूर्वोक्तमनर्थकमित्याशङ्क्याऽऽह–सर्वा हीति । स्तुतिमेवाभिनयति–इत्यामिति । कर्माङ्गत्वाग्नेः संस्कर्तव्यत्वाच्चित्याग्निशिरसि प्राचीदृष्टिः कर्तव्येत्याह–तस्येति । आरोपे सादृश्यमाह–विशिष्टत्वेति । शिरसोऽनन्तरभावित्वात्तद्वाहोरैशान्यादिदृष्टिमाह–असौ चेति । कथमीमंशब्दो बाहुवाचीत्याशङ्क्य तदुत्पत्तिमाह–ईरयतेरिति । गत्यर्थधोगादीमंशब्दो बाहुमधिकरोतीत्यर्थः । तत्पुच्छादिषु प्रतीच्यादिदृष्टिरध्यस्यति–अथेत्यादिना । चित्यस्याग्नेः शिरसि बाह्वोः प्राच्यादिदृष्टिकरणानन्तरमित्यर्थः । सक्थिपदं पृष्ठनिष्ठोन्नतास्थिद्वयविषयम् । उभयशब्देन प्राचीप्रतीचीद्वयं गृह्यते । उरसि पृथिवीदृष्टिमाह–इयामिति । उपास्यमग्निमुक्तमनुवदति–स एष इति । तस्योपासनार्थमेवाप्सु प्रतिष्ठितत्वं गुणमुपदिशति–अग्निरिति । भूतान्तरसहितानामपां सर्वलोककारणत्वादशेषलोकात्मकोऽग्निस्तत्र प्रतिष्ठितः संभवतीत्यत्र श्रुत्यन्तरं संवादयति–एवमिति । यथैतेषु सर्वं कार्यं प्रतिष्ठितं तथेति यावत् । लोकशब्देन स्थूलानां भूतानां संनिवेशविशेषा गृह्यन्ते । अप्सु भूतान्तरसहितासु कारणभूतास्विति यावत् । फलश्रुतिं व्याचष्टे–यत्रेति । अथोपास्तिफलमपि पुनर्मृत्युं जयतीत्यादिना वक्ष्यते । किमिदमस्थाने फलसंकीर्तनमत आह–गुणेति ॥ ३ ॥

सोऽकामयत द्वितीयो म आत्मा जायेतेति स मनसा वाचं मिथुन[२] समभवदशनाया मृत्युस्तद्रेत आसीत्स संवत्सरोऽभवत् । न ह पुरा ततः संवत्सर आस तमेतावन्तं कालमबिभः । यावान्संवत्सरस्तमेतावतः कालस्य परस्तादसृजत । तं जातमभिव्याददात्स भाणकरोत्सैव वागभवत् ॥ ४ ॥

सोऽकामयत योऽसौ मृत्युः सोऽबादिक्रमेणाऽऽत्मनाऽऽत्मानमण्ड-

---

१ घ. ञ. ण. °मर्देन । २ ख. घ. °ण त्रिधा° । ३ ग. °या हि मृ° ।

स्यान्तः कार्यकरणसंघातवन्तं विराजमग्निमसृजत त्रेधा चाऽऽत्मानमकुरुतेत्युक्तम्। स किंव्यापारः सन्नसृजतेति। उच्यते—स मृत्युरकामयत कामितवान्। किम्। द्वितीयो मे ममाऽऽत्मा शरीरं येनाहं शरीरी स्यां स जायेतोत्पद्यतत्येवमेतदकामयत। स एवं कामयित्वा मनसा पूर्वोत्पन्नेन वाचं त्रयीलक्षणां मिथुनं द्वंद्वभाव ममभवत्संभवनं कृतवान्मनसा त्रयीमालोचितवांस्त्रयीविहितं सृष्टिक्रमं मनसाऽन्वालोचयदित्यर्थः। कोऽसावशनायया लक्षितो मृत्युः। अशा (श) नाया मृत्युरित्युक्तम्। तमेव परामृशत्यन्यत्र प्रसङ्गे मा भूदिति। तँयद्वृत आर्मीत्। तत्तत्र मिथुन यद्वृत आसीत्प्रथमशरीरिणः प्रजापतेरुत्पत्तौ कारणं रेतो बीजं ज्ञानकर्मरूपं त्रय्यालोचनायां यद्दृष्टवानासीज्जन्मान्तरकृतम्। तद्भावभावितोऽपः सृष्ट्वा तेन तेन रेतसा बीजेनाप्स्वनुप्रविश्याण्डरूपेण गर्भीभूतः स संवत्सरोऽभवत्संवत्सरकालनिर्मितो संवत्सरः प्रजापतिरभवत्।

उत्तरग्रन्थमवतार्य तस्य पूर्वग्रन्थेन संबन्धं वक्तु वृत्त कीर्तयति—सोऽकामयतेत्यादिना। अवान्तरव्यापारमन्तरेण कर्तृत्वानुपपत्तेरिति मत्वा पृच्छति स किं व्यापार इति। कामनादिरूपमवान्तरव्यापारमुत्तरवाक्यावष्टम्भेन दर्शयति—उच्यत इति। कामनाकार्यं मनःसंयोगमुपन्यस्यति—स एवमिति। कोऽयं मनसा सह वाचो द्वंद्वभावस्तत्राऽऽह मनसेति। वाक्यार्थमेव स्फुटयति—त्रयीविहितमिति। वेदोक्तसृष्टिक्रमालोचनं प्रजापतेर्नेदं प्रथमं संसारस्यानादित्वादिति वक्तुमनुशब्दः। 'सोऽकामयत' इत्यादौ सर्वनाम्नोऽव्यवहितविराड्विषयत्वमाशङ्क्य परिहरति—कोऽसावित्यादिना। कथं तया मृत्युर्लक्ष्यते तत्राऽऽह—अशनायेति। किमिति तर्हि पुनरुक्तिरित्याशङ्क्याऽऽह—तमेवेति। अन्यत्रानन्तरपक्षते विराडात्मनीति यावत्। अवान्तरव्यापारान्तरमाह—तदित्यादिना। प्रसिद्धं रेतो व्यावर्तयति—ज्ञानेति। ननु प्रजापतेर्न ज्ञानं कर्म वा संभवति तत्रानधिकारादित्याशङ्क्याऽऽसीदित्यस्यार्थमाह—जन्मान्तरेति। वाक्यस्यापेक्षितं पूरयित्वा वाक्यान्तरमादाय व्याकरोति—तद्भावेत्यादिना।

---

१ घ. च. ज. झ. °र्यंकार°। २ क. °त स त्रे°। ३ च °त्संभाव°। ४ ग. घ. ङ ज. झ. °नायाल°। च. छ. °नायोपल°। क. ख. घ. ङ. च. छ. झ. °यालक्षणो मृ°। ६ ख. घ च. छ. ज. °रिति यदुक्त°। ७ घ. ङ ज झ. तत्तत्र। ८ छ. °त्पत्तेः का°। ९ क. घ. °वत्स संव°। १० ख. छ. °त्सरः संवत्सर°। ११ ग. च. °ता प्र°। १२ क. °त्यस्व° १३ घ. ञ. °रयन्वाक्या°।

न ह पुरा पूर्वं ततस्तस्मात्संवत्सरकालनिर्मातुः प्रजापतेः संवत्सरः कालो नाम नाऽऽस न बभूव ह । तं संवत्सरकालनिर्मातारमन्तर्गर्भं प्रजापतिं यावानिह प्रसिद्धः काल एतावन्तमेतावत्संवत्सरपरिमाणं कालमबिभर्भृतवान्मृत्युः । यावान्संवत्सर इह प्रसिद्धस्ततः परस्तात्किं कृतवान् । तमेतावतः कालस्य संवत्सरमात्रस्य परस्तादूर्ध्वमसृजत सृष्टवानण्डमभिनदित्यर्थः । तमेवं कुमार जातमग्निः प्रथमशरीरिणमशनायावत्त्वान्मृत्युरभिव्याददान्मुखविदारणं कृतवानित्यम् । स च कुमारो भीतः स्वाभाविकयाऽविद्यया युक्तो भाणित्यवं शब्दमकरोत् । सैव वागभवद्वाकशब्दोऽभवत् ॥ ४ ॥

ननु संवत्सरस्य प्रागेवं सिद्धत्वान्न प्रजापतेस्तन्निर्माणेन तदानीत्वमित्याशङ्क्योत्तरं वाक्यमुपादत्ते—न ह पुरेति । तद्व्याचष्टे—पूर्वमिति । प्रजापतेरादित्यात्मकत्वात्तदधीनत्वाच्च संवत्सरव्यवहारस्याऽऽदित्यात्पूर्वं तद्व्यवहारो नाऽऽसीदेवेत्यर्थः कियन्तं कालमण्डरूपेण गर्भो बभूवेत्यपेक्षायाह—तमित्यादिना । अवान्तरव्यापारमनेकविधमभिधाय विराडुत्पत्तिमाकाङ्क्षाद्वारोपसंहरति—यावानित्यादिना । कथं पूर्वमेव गर्भतया विद्यमानस्य विराजः सृष्टिस्तत्राऽऽह—अण्डामिति । विराडुत्पत्तिमुक्त्वा शब्दमात्रस्य सृष्टिं विवक्षुर्भूमिकां करोति—तमेवमिति । अयोग्येऽपि पुत्रभक्षणे प्रवर्तकं दर्शयति—अशनायावत्त्वादिति । विराजो भयकारणमाह—स्वाभाविकयेति । इन्द्रियं देवतां च व्यावर्तयति—वाकशब्द इति ॥ ४ ॥

स ऐक्षत यदि वा इयमभिमरिष्यते कनीयोऽन्नं करिष्य इति स तया वाचा तेनाऽऽत्मनेदꣳ सर्वमसृजत यदिदं किंचर्चो यजूꣳषि सामानि छन्दाꣳसि यज्ञान्प्रजाः पशून् । स यद्यदेवासृजत तत्तदत्तुमधियत सर्वं वा अत्तीति तददितेरदितित्वꣳ सर्वस्यैतस्यात्ता भवति सर्वमस्यान्नं भवति य एवमेतददितेरदितित्वं वेद ॥ ५ ॥

स ऐक्षत स एवं भीतं कृतरवं कुमारं दृष्ट्वा मृत्युरैक्षतेक्षितवान् ।

---

१ क. च. झ. °लो नाऽऽस । २ ग. नामाऽऽस । ३ क ख. स ह न । ४ क. ग घ. ङ. छ. ज. झ °वान् । या° । ५ ङ. झ. भीत्या । ६ क. °व प्रासि° । ७ क. °र्वं व्यव । ख. °ध्व तवाद्वप° । घ. °र्वं तावत्तद्व्य° । ८ घ. ङ. छ. ज. ट. ठ. °न्प्रजां प° ।

अशनायावानपि यदि कदाचिद्वा इयं कुमारमभिमंस्ये । अभिपूर्वो मन्यतिर्हिंसार्थः । हिंसिष्य इत्यर्थः । कनीयोऽन्नं करिष्ये कनीयोऽल्पमन्नं करिष्य इत्येवमीक्षित्वा तद्भक्षणादुपरराम । बहु ह्यन्नं कर्तव्यं दीर्घकालभक्षणाय न कनीयः । तद्भक्षणे हि कनीयोऽन्नं स्याद्बीजभक्षण इव सस्याभावः । स एवं प्रयोजनमन्नबाहुल्यमालोच्य तयैव त्रय्या वाचा पूर्वोक्तया तेनैव चाऽऽत्मना मनसा मिथुनीभावमालोचनमुपगम्योपमन्थ्यदं सर्वं स्थावरं जङ्गमं चासृजत यदिदं किंच यत्किंचेदम् । किं तत् । ऋचो यजूंषि सामानि च्छन्दांसि च सप्त गायत्र्यादीनि स्तोत्रशस्त्रादिकर्माङ्गभूतान्त्रिविधान्मन्त्रान्गायत्र्यादिच्छन्दोविशिष्टान्यज्ञांश्च तत्साध्यान्प्रजास्तत्कर्त्रीः पशूंश्च ग्राम्यानारण्यान्कर्मसाधनभूतान् । ननु त्रय्या मिथुनीभूतयाऽसृजतेत्युक्तमृगादीनीह कथमसृजतेति । नैष दोषः । मनसस्त्वव्यक्तोऽयं मिथुनीभावस्त्रय्या बाह्यस्तु ऋगादीनां विद्यमानानामेव कर्मसु विनियोगभावेन व्यक्तीभावः सर्ग इति ।

इदानीमृगादिसृष्टिमुद्दिदुं पातनिकां करोति—स इत्यादिना । ईक्षणप्रतिबन्धकसद्भावं दर्शयति—अशनायावानपीति । अभिपूर्वो मन्यतिरिति । रुद्रोऽस्य पशूनभिमन्येत नास्य रुद्रः पशूनभिमन्यत इत्यादि शास्त्रमत्र प्रमाणयितव्यम् । अन्नस्य कनीयस्त्वे का हानिरित्याशङ्क्याऽऽह—बहु हीति । तथापि विराजो भक्षणे का क्षतिस्तत्राऽऽह—तद्भक्षणे हीति । तस्यान्नात्मकत्वात्तदुत्पादकत्वाच्चेति शेषः । कारणनिवृत्तौ कार्यनिवृत्तिरित्यत्र दृष्टान्तमाह—बीजेति । यथोक्तेक्षणानन्तरं मिथुनभावद्वारा त्रयीसृष्टिं प्रस्तौति—स एवमिति । ननु विराजः सृष्ट्वा स्थावरजङ्गमात्मनो जगतः सृष्टेरुक्तत्वात्किं पुनरुक्त्येत्याशयेन पृष्ट्वा परिहरति—किं तदिति । गायत्र्यादीनीत्यादिपदेनोष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगतीछन्दांस्युक्तानि । केवलानां छन्दसां सर्गासंभवात्तद्रूढानामृग्यजुःसामात्मनां मन्त्राणां सृष्टिरत्र विवक्षितेत्याह—स्तोत्रेति । उद्गात्रादिना गीयमानमृग्जातं स्तोत्रं पदैरध्वर्वादिना शस्यमानं शस्त्रम् । स्तुतमनुशंसतीति हि श्रुतिः मन्त्र गीयते न च शस्यतेऽध्वर्युप्रभृतिभिश्च प्रयुज्यते तदप्यत्र ग्राह्यमित्यभिप्रेत्याऽऽदिपदम् । अत एव त्रिविधानित्युक्तम् । अजादयो ग्राम्याः पशवो गवयाद-

---

१ छ. झ. °थुनभा° । २ ङ. च. °न्प्रजां च. तत्कर्त्री पं° । घ. छ. झ. न्प्रजा प्रजा° । ३ ग. घ. ङ. ज. °स्यार । ४ च. °त्युक्तं तद्गा° । ५ ख. °षः । स म° । ६ ञ. ट. °त्मत्वा° । ७ क. °ति श्रुतेः । थ° । घ. °ति श्रु° ।

वस्त्वारण्या इति भेदः । कर्मसाधनभूतानसृजतेति संबन्धः । स मनसा वाचं मिथुनं समभवदित्युक्तत्वात्प्रागेव त्रय्याः सिद्धत्वान्न तस्याः सृष्टिः श्लिष्टेति शङ्कते—नन्विति । व्यक्ताव्यक्तविभागेन परिहरति—नेत्यादिना । इति मिथुनीभावसर्गयोरुपपत्तिरिति शेषः । अन्नसर्गश्चान्नसर्गश्चेति द्वयमुक्तम् ।

स प्रजापतिरेवमन्नवृद्धिं बुद्ध्वा यद्यदेव क्रियां क्रियासाधनं फलं वा किंचिदसृजत तत्तदत्तुं भक्षयितुमध्रियत धृतवान्मनः सर्वं कृत्स्नं वै यस्मादत्तीति तत्तस्माददितेरदितिनाम्नो मृत्योरदितित्वं प्रासिद्धम् । तथाच मन्त्रः "अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता" इत्यादिः । सर्वस्यैतस्य जगतोऽन्नभूतस्यात्ता सर्वात्मनैव भवत्यन्यथा विरोधात् । न हि कश्चित्सर्वस्यैकोऽत्ता दृश्यते तस्मात्सर्वात्मा भवतीत्यर्थः । सर्वमस्यान्नं भवत्यत एव । सर्वात्मनो ह्यत्तुः सर्वमन्नं भवतीत्युपपद्यते । य एवमेतद्यथोक्तमदितेर्मृत्योः प्रजापतेः सर्वस्यादनाददितित्वं वेद तस्यैतत्फलम् ॥ ५ ॥

इदानीमुपास्यस्य प्रजापतेर्गुणान्तरं निर्दिशति—स प्रजापतिरित्यादिना । कथं मृत्योरदितिनामत्वं सिद्धवदुच्यते तत्राऽऽह—तथा चेति । अदितेः सर्वात्मत्वं वदता मन्त्रेण सर्वकारणस्य मृत्योरदितिनामत्वं सूचितमिति भावः । मृत्योरदितित्वविज्ञानवतोऽवान्तरफलमाह—सर्वस्येति । सर्वात्मनोति कुतो विशिष्यते तत्राऽऽह—अन्यथेति । सर्वरूपेणावस्थानाभावे सर्वान्नभक्षणस्याशक्यत्वादित्यर्थः । विरोधमेव साधयति—न हीति । फलस्येपासनाधीनत्वात्प्रजापतिमदितिनामानमात्मत्वेन ध्यायन्ध्येयात्मा भूत्वा तत्तद्रूपत्वमापन्नः सर्वस्यान्नस्यात्ता स्यादित्यर्थः । अन्नमन्नमेवास्य सदा न कदाचित्तदस्यात्ता भवतीति वक्तुमनन्तरवाक्यमादत्ते—सर्वमिति । अत एवेत्युक्तं व्यक्ती करोति—सर्वात्मनो हीति ॥ ५ ॥

सोऽकामयत भूयसा यज्ञेन भूयो यजेयेति । सोऽश्राम्यत्स तपोऽतप्यत तस्य श्रान्तस्य तप्तस्य यशो वीर्यमुदक्रामत् । प्राणा वै यशो वीर्यं तत्प्राणेषूत्क्रान्तेषु शरीरꣳ श्वयितुमध्रियत तस्य शरीर एव मन आसीत् ॥ ६ ॥

सोऽकामयतेत्यश्वाश्वमेधयोर्निर्वचनार्थमिदमाह । भूयसा महता यज्ञेन भूयः पुनरपि यजेयेति । जन्मान्तरकरणापेक्षया भूयः शब्दः । स

१ ब. ग. °घनभूतं फ° । २ घ. ङ. ण. सर्वकारणत्वं । ३ ण. विशेष्यते । ४ घ. ङ. ण. °स्यात्ता ।

प्रजापतिर्जन्मान्तरेऽश्वमेधेनायजत। स तद्भावभावित एव कल्पादौ व्यावर्तत। सोऽश्वमेधक्रियाकारकफलात्मत्वेन निर्वृत्तः सन्नकामयत भूयसा यज्ञेन भूयो यजेयेत्येवं महत्कार्यं कामयित्वा लोकवदश्राम्यत्। स तपोऽतप्यत। तस्य श्रान्तस्य तप्तस्येति पूर्ववत्। यशो वीर्यमुदक्रामदिति स्वयमेव पदार्थमाह। प्राणाश्चक्षुरादयो वै यशो यशोहेतुत्वात्तेषु हि सत्सु ख्यातिर्भवति। तथा वीर्यं बलमस्मिञ्शरीरे। न ह्युत्क्रान्तप्राणो यशस्वी बलवान्वा भवति। तस्मात्प्राणा एव यशो वीर्यं चास्मिञ्शरीरे। तदेवं प्राणलक्षणं यशो वीर्यमुदक्रामदुत्क्रान्तवत्। तदेवं यशोवीर्यभूतेषु प्राणेषूत्क्रान्तेषु शरीरान्निष्क्रान्तेषु तच्छरीरं प्रजापतेः श्वयितुमुच्छूनभावं गन्तुमध्रियतामेध्यं चाभवत्। तस्य प्रजापतेः शरीरान्निर्गतस्यापि तस्मिन्नेव शरीरे मन आसीत्। यथा कस्यचित्प्रिये विषये दूरं गतस्यापि मनो भवति तद्वत्॥ २॥

उपास्तिविधौ सफले सति समाप्तिरेव ब्राह्मणस्योचिता किमुत्तरग्रन्थेनेत्याशङ्क्य प्रतीकमादाय तात्पर्यमाह—सोऽकामयतेत्यादिना। तदेवाश्वमेधस्याश्वमेधत्वमित्येतदन्तं वाक्यमिदमा निर्दिश्यते। भूयोदक्षिणाकत्वादश्वमेधस्य भूयस्त्वम्। इतिशब्दोऽकामयतेत्यनेन संबध्यते। कथं पुनस्तेन यक्ष्यमाणस्य प्रजापतेर्भूयःशब्दोक्तिः। न हि स पूर्वमश्वमेधमन्वतिष्ठत्कर्मानधिकारित्वात्तत्राऽऽह—जन्मान्तरेति। तदेव स्पष्टयति—स प्रजापतिरिति। अयातीते जन्मनि यजमानोऽश्वमेधस्य कर्ताऽभूत्। अधुना हिरण्यगर्भो भूयो यजेयेत्याह। तथाच कर्तृभेदाद्भूयःशब्दासामञ्जस्यमत आह—स तद्भावेति। स प्रजापतिरश्वमेधवासनाविशिष्टो ज्ञानकर्मफलत्वेन कल्पादौ निर्वृत्तो भूयो यजेयेत्याह कर्तृभोक्तृरैक्येन साधकफलावस्थयोर्यजमानसूत्रयोर्भेदाभावादित्यर्थः। प्रजापतिरीश्वरो न तस्य दुःखात्मकत्वनुष्ठानेच्छा युक्तेत्याशङ्क्य प्रकृतिवशात्तदुपपत्तिमभिप्रेत्याऽऽह-सोऽश्वमेधेति। कथमेतावता विवक्षिता स्तुतिः सिद्धेत्याशङ्क्याऽऽह—एवमिति। श्रमकार्यमाह—स तप इति। चक्षुरादीनां यशस्त्वे हेतुमाह—यशोहेतुत्वादिति। तदेव साधयति—तेषु हीति। प्राणा एवेति तथाशब्दार्थः। सत्सु हि तेषु शरीरे बलं भवतीति पूर्ववदेव हेतुरुन्नेयः। उक्तमर्थं व्यतिरेकद्वारा स्फोरयति—न

१ ख. ग. घ. ङ. छ. ज. झ. ॅसा महता य°। २ ख. घ. छ. ज. झ. भूयः पुनरपि य°। ३ ग. घ. ङ. च. °ति ञिषु। ४ घ. ञ. ण. णावस्त्वाद°। ५ ण. °कारित्वा°। क. ख. °कारणना°। ७ घ. °क्तकेतुं व्य°।

हीति । प्राणानां यशस्त्वं वीर्यत्वं चोपसंहृत्य वाक्यार्थं निगमयति—**तदेवामिति** । तत्प्राणेष्वित्यादि व्याचष्टे—तदेवमित्यादिना । शरीरान्निर्गतस्य प्रजापतेर्मुक्तत्व-माशङ्क्याऽऽह—तस्येति ॥ ६ ॥

> सोऽकामयत मेध्यं म इदꣳ स्यादात्मन्व्यनेन स्या-मिति । ततोऽश्वः समभवद्यदश्वत्तन्मेध्यमभूदिति तदेवाश्वमेधस्याश्वमेधत्वम् । एष ह वा अश्वमेधं वेद य एनमेवं वेद । तमनवरुंध्यैवामन्यत । तꣳ संवत्सरस्य परस्तादात्मन आलभत । पशून्देवताभ्यः प्रत्यौहत् । तस्मात्सर्वदेवत्यं प्रोक्षितं प्राजापत्यमा-लभन्त एषं ह वा अश्वमेधो य एष तपति तस्य संवत्सर आत्माऽयमग्निरर्कस्तस्येमे लोका आत्मा-नस्तावेतावर्काश्वमेधौ । सो पुनरेकैव देवता भवति मृत्युरेवाप पुनर्मृत्युं जयति नैनं मृत्युरा-प्नोति मृत्युरस्याऽऽत्मा भवत्येतासां देवतानामेको भवतिँ ॥ ७ ॥
>
> इति प्रथमाध्यायस्य द्वितीयं ब्राह्मणम् ॥ २ ॥

स तस्मिन्नेव शरीरे गतमनाः सन्किमकरोदिति । उच्यते—सोऽ-कामयत कथं मेध्यं मेधार्हं यज्ञियं मे ममेदं शरीरं स्यात् । किंचाऽऽ-त्मन्व्यात्मवाश्वानेन शरीरेण शरीरवान्स्यामिति प्रविवेश । यस्मात्त-च्छशरीरं मद्वियोगाद्भृतयशोवीर्यं सदश्वयत्तस्मादश्वः समभवत् । ततोऽश्वनामा प्रजापतिरेव साक्षादिति स्तूयते । यस्माच्च पुनस्तत्प्रवे-शाद्भृतयशोवीर्यत्वादमेध्यं सन्मेध्यमभूत्तदेव तस्मादेवाश्वमेधस्याश्वमे-धनाम्नः क्रतोरश्वमेधत्वमश्वमेधनामलाभः । क्रियाकारकफलात्मको हि क्रतुः । स च प्रजापतिरेवेति स्तूयते ।

---

१ ख. घ. ङ. ज. ट. ठ. ड. रुध्येवा° । २ क. ख. छ. ज. ट. ढ. °ष वा । ३ क. ख. च. सा । ४ घ. ङ. च. ठ. °ति य एवं वेद ॥७॥ ५ ग. घ. °त्माऽतच्छ° । ६ क. ख. °क्षादत्र स्तू° । ७ ख. ढ. छ. °फलरूपो हि ।

सम्यग्ज्ञानाभावादासङ्गे सत्यपि न पुनस्तस्मिन्प्रवेशो युक्तः परित्यक्तपरिग्रहा-योगादिति शङ्कते—स तस्मिन्निति । अज्ञानवशात्परित्यक्तपरिग्रहोऽपि संभवती-त्याह—उच्यत इति । वीतदेहस्य कामनाऽयुक्तेति शङ्कते—कथामिति । साय-ज्यातिशयादशरीरस्यापि प्रजापतेस्तदुपपत्तिरिति मन्वानो ब्रूते—मेध्यामिति । कामनाफलमाह—इति प्रविवेशेति । तथाऽपि कथं प्रकृतनिरुक्तिसिद्धिरित्याश-ङ्क्याऽऽह—यस्मादिति । यच्छब्दो यस्मादिति व्याख्यातः । देहस्याश्वत्वेऽपि कथं प्रजापतेस्तथात्वमित्याशङ्क्य तत्तादात्म्यादित्याह—तत इति । अश्वस्य प्रजा-पतित्वेन स्तुतत्वात्तस्योपास्यत्वं फलतीति भावः । तथाऽपि कथमश्वमेधनामनिर्व-चनमित्याशङ्क्याऽऽह—यस्माच्चेति । क्रतोस्तदात्मकस्य प्रजापतेरिति यावत् । देहो हि प्राणवियोगादश्वयत्पुनस्तत्प्रवेशाच्च मेधार्होऽभूदतः सोऽश्वमेधस्तत्तादात्म्या-त्प्रजापतिरपि तथेत्यर्थः । ननु प्रजापतित्वेनाश्वमेधस्य स्तुतिर्नोपयोगिनी, अग्नेरु-पास्यत्वेन प्रस्तुतत्वात्क्रतूपासनाभावादत आह—क्रियेति ।

क्रतुनिर्वर्तकस्याश्वस्य प्रजापतित्वमुक्त्वा वा अश्वस्य मेध्यस्ये-त्यादिना । तस्यैवाश्वस्य मेध्यस्य प्रजापतिस्वरूपस्याग्नेश्च यथोक्तस्य क्रतुफलात्मरूपतया समस्योपासनं विधातव्यमित्यारभ्यते । पूर्वत्र क्रियापदस्य विधायकस्याश्रुतत्वात्क्रियापदापेक्षत्वाच्च प्रकरणस्याय-मर्थोऽवगम्यते । एष ह वा अश्वमेधं क्रतुं वेद यः कश्चिदेनमश्वमग्नि-रूपमर्कं च यथोक्तमेवं वक्ष्यमाणेन समासेन प्रदर्श्यमानेन विशेषणेन विशिष्टं वेद स एषोऽश्वमेधं वेद नान्यः । तस्मादेवं वेदितव्य इत्यर्थः ।

ननु क्रत्वङ्गस्याश्वस्याश्वमेधक्रतात्मनश्चाग्नेरुक्तरीत्या स्तुतत्वात्तदुपास्तेश्च प्राग-वोक्तत्वादेष ह वा अश्वमेधमित्यादिवाक्यं नोपयुज्यते तत्राऽऽह—क्रतुनिर्वर्तक-स्येति । उक्तं च चित्यस्याग्नेस्तस्य प्राची दिगित्यादिना प्रजापतित्वमिति शेषः अथोपासनमग्न्युपासनं चैकमेवेति वक्तुमुत्तरं वाक्यमित्याह—तस्यैवेति । य एव-मेतददितेरदितित्वं वेदेत्यादौ प्रागेव विहितमुपासनं किं पुनरारम्भेणेत्याशङ्क्याऽऽह—पूर्वत्रेति । यद्यपि विधिरदितित्वं वेदेति श्रुतस्तथाऽपि स गुणोपास्तिविधिर्न प्रधा-नविधिः । अत्र तु प्रधानविधिरुपास्तिप्रकरणत्वादपेक्ष्यते । अतोऽश्वमेधं वेदेति प्रधा-नविधिरिति भावः । तात्पर्यमुक्त्वा वाक्यमादायाक्षराणि व्याकरोति—एष इति । यथोक्तमित्युत्तरत्र प्रजापतित्वमनुकृष्यते । तमनवरुध्येत्यादि प्रदर्श्यमानविशेषणम् ।

---

१ ग. घ ङ च छ. ज. झ. °श्वस्येत्येवमादि° । २ ग. घ ढ छ ज. झ. °मर्कै । ३ ग. घ. ङ. च छ ज झ. °शेषेण वि° । ४ क. घ. ङ. ज. झ. विस्पष्टं । ५ ख. । ता° । ६ क. ख. म. °त्युभयत्र ।

विधिरत्र स्पष्टो न भवतीत्याशङ्क्याऽऽह—तस्मादिति । अश्वमेधो विधेय-त्वेन संबध्यते ।

कथं, तत्र पशुविषयमेव तावद्दर्शनमाह । तत्र प्रजापतिर्भूयसा यज्ञेन भूयो यजेयेति कामयित्वाऽऽत्मानमेव पशुं मेध्यं कल्पयित्वा तं पशुमनवरुध्यैवोत्सृष्टं पशुमवरोधमकृत्वैव मुक्तप्रग्रहममन्यताचि-न्तयत् । तं संवत्सरस्य पूर्णस्य परस्तादूर्ध्वमात्मन आत्मार्थमालभत । प्रजापतिर्देवतात्मकत्वेनेत्येतदालभताऽऽलम्भं कृतवान् । पशूनन्यान्ग्राम्या-नारण्यांश्च देवताभ्यो यथादैवतं प्रत्यौहत्प्रतिगमितवान् । यस्माच्चैवं प्रजापतिरमन्यत तस्मादेवमन्योऽप्युक्तेन विधिनाऽऽत्मानं पशुमश्वं मेध्यं कल्पयित्वा सर्वदेवत्योऽहं प्रोक्ष्यमाण आलभ्यमानस्त्वहं महे-वत्य एव स्याम् । अन्य इतरे पशवो ग्राम्याऽरण्या यथादैवतमन्याभ्यो देवताभ्य आलभ्यन्ते मदवयवभूताभ्य एवेति विद्यात् । अत एवेदानीं सर्वदेवत्यं प्रोक्षितं प्राजापत्यमालभन्ते याज्ञिकाः ।

एवंशब्दात्प्रसिद्धार्थत्वं भाति कुतो विधिरित्याह—कथमिति । एष ह वा अश्वमेधं वेदेत्यादौ विवक्षितस्य विधेर्भूमिकां करोति—तत्रेत्यादिना । उपास्तिवि-धिप्रस्तावः सप्तम्यर्थः । कथं नु पशुविषयं दर्शनं तद्दर्शयति—तत्रेति । एवमन-न्तरवाक्ये प्रवृत्ते सतीति यावत् । अथ विवक्षितविधिमभिदधाति—यस्माच्चेति । प्रजापतिरित्थं फलावस्थायाममन्यतेत्यत्र किं प्रमाणमित्याशङ्क्य संप्रति तत्कार्य-भूतासु प्रजासु तथाविधचेष्टादृष्टिरित्याह—अत एवेति । प्रोक्षितं मन्त्रसंस्कृतं पशुमिति यावत् ।

एवमेष ह वा अश्वमेधो य एष तपति यस्त्वेवं पशुसाधनकः क्रतुः स एष साक्षात्फलभूतो निर्दिश्यत एष ह वा अश्वमेधः । कोऽसौ य एष सविता तपति जगदवभासयति तेजसा । तस्यास्य क्रतुफलात्मन संवत्सरः कालविशेष आत्मा शरीरं तन्निर्वर्त्यत्वात्संवत्सरस्य । तस्यैव क्रत्वात्मनोऽग्निसाध्यत्वाच्च फलस्य क्रतुत्वरूपेणैव निर्देशः । अयं पार्थिवोऽग्निरर्कः साधनभूतः । तस्य चार्कस्य क्रतौ चित्यस्येमे लोकास्त्रयोऽप्यात्मानः शरीरावयवाः । तथाच व्याख्यातं तस्य प्राची-

---

१ ख. घ. ज. °रुध्येको° । २ घ. ज °कृत्वेत्र । ३ क. घ. °तात्मक° । ४ ख. झ. °लम्भनं कृ° । ५ ग. ङ. च. झ. °शून्ग्राम्या° । ६ ग. छ. °तं प्रति प्रत्यौहप्रत्यौ° । ७ ख. ङ. झ. °म्या आर° । ८ क. ख. झ. झ. °प वा । ९ क. ख. ग. ङ. च. छ. झ. °ष वा । १० ङ. च. ज. °नोऽयं सा° । ११ ग. झ. °तुरू° । १२ ख. क्रतूपचितस्ये° । छ. क्रतूचि-तस्ये° । १३ ग. ज. ज. चितस्ये ।

दिगित्यादिना । तावग्न्यादित्यावेतौ यथाविशेषितावकाश्वमेधौ क्रतुफले अर्को यः पार्थिवोऽग्निः स साक्षात्क्रतुरूपः क्रियात्मकः क्रतोरग्निसाध्यत्वात्तद्रूपेणैव निर्देशः । क्रतुसाध्यत्वाच्च फलस्य क्रतुरूपेणैव निर्देश आदित्योऽश्वमेध इति ।

फलावस्थप्रजापतिवदित्येवंशब्दार्थः । उपासनविधिरुक्तः संप्रति प्रतीकमादाय तात्पर्यमाह—एष इति । द्विविधो हि क्रतुः कल्पितपशुहेतुको वास्तवहेतुकश्च । स च द्विप्रकारोऽपि फलरूपेण स्थितः सवितैवेत्युपास्तिफलं वक्तुमेतदाख्यायिकेत्यर्थः । विशेषोक्तिं विना नास्ति बुभुत्सोपशान्तिरित्याह—कोऽसाविति । क्रतुफलात्मकः सविता मण्डलं देवता वेति संदेहे द्वितीयं गृहीत्वा तस्येत्यादि व्याचष्टे—तस्यास्येति । आदित्योदयानुदयाभ्यामहोरात्रद्वारा संवत्सरव्यवस्थानात्तन्निर्मातुस्तस्य युक्तं तत्तादात्म्यमित्यर्थः । क्रतोरादित्यत्वमुक्त्वा तदङ्गस्याग्नेस्तद्रूपमयमग्निरर्क इति वाक्यं तस्यार्थमाह—तस्यैवेति । ननु पूर्वोक्तस्यैवाग्नेरादित्यत्वं कुतो नियम्यतेऽन्यश्चित्योऽग्निरन्यश्चाग्निरादित्यः किं न स्यादित्याशङ्क्याऽऽह—तस्य चेति । तथाऽपि कथं तस्यैवाऽऽदित्यत्वं तत्राऽऽह—तथा चेति । तस्य प्राचीत्यादिना लोकात्मकत्वं चित्याग्नेरुक्तं तदिहाप्युच्यते तस्मात्तस्यैवाग्नेराऽऽदित्यत्वमिष्टमित्यर्थः । अग्न्यादित्यभेदस्य लोकवेदसिद्धत्वान्न तयोरैक्येन क्रतुना तादात्म्यमित्याशङ्क्याऽऽह—ताविति । यथाविशेषितत्वमादित्यरूपत्वम् । कुतस्तस्य चाकर्षस्य क्रतुरूपत्वं साधनत्वेन भेदादित्याशङ्क्योपचारादित्याह-क्रियात्मक इति । तथाऽपि कथमादित्यस्य क्रतुतादात्म्योक्तिरित्याशङ्क्याऽऽह—क्रतुसाध्यत्वादिति ।

तौ साध्यसाधनौ क्रतुफलभूतावग्न्यादित्यौ सा उ पुनर्मृत्यु एकैव देवता भवति । का सा, मृत्युरेव । पूर्वमप्येकैवाऽऽसीत्क्रियासाध्यफलभेदाय विभक्ता । तथा चोक्तम् " स त्रेधाऽऽत्मानं व्यकुरुत " इति । सा पुनरपि क्रियानिर्वृत्त्युत्तरकालमेकैव देवता भवति मृत्युरेव फलरूपः। यः पुनरेवमेनमश्वमेधं मृत्युमेकां देवतां वेदाहमेव मृत्युरस्म्यश्वमेध एका देवता मद्रूपोऽश्वाग्निसाधनसाध्येति । सोऽपजयति पुनर्मृत्युं पुनर्मरणं सकृन्मृत्वा पुनर्मरणाय न जायत इत्यर्थः । अपजितोऽपि मृत्युरेनं पुनराप्नुयादित्याशङ्क्याऽऽह—न नैनं मृत्युराप्नोति । कस्मात् । मृत्युरस्यैवंविद आत्मा भवति । किंच मृत्युरेव फलरूपः सञ्छेतासां देवतानामेको भवति तस्यैतत्फलम् ॥ ७ ॥

---

१ ब्र. ण. °यास्तमया° । २ स. घ. ब्र ण. °त्मत्व । ३ छ. च. । ४ क. ख. च. छ. °ता सा म° । ५ घ. ङ. ञ. °पा चाग्नि° । च. °पाग्नि° । ६ क. घ. च. ज. °साध्ये° । °च. °लभूतः स्व° ।

इति प्रथमाध्यायस्य द्वितीयं ब्राह्मणम् ॥ २ ॥

ननु आदित्यस्य क्रतुफलत्वेन क्रतुत्वे तद्धेतोरग्नेस्तादात्म्यायोगादयुक्तमग्नेरादित्यत्वमित्याशङ्क्याऽऽह—ताविति । क्रतुफलत्वात्तदात्मा सविता तद्धेतुश्चित्योऽग्निस्तावुक्तविभागाद्व्युत्पादितोपासनादिव्यापारौ सन्तावेकैव प्राणाख्या देवतेति तयोरेक्योक्तिरित्यर्थः । एकैवेत्युक्ते प्रकृतयोरग्न्यादित्ययोरन्यतरपरिशेषं शङ्कते—का सेति । कथं द्वयोरेकत्वमेकत्वे वा कथं द्वित्वं तत्राऽऽह—पूर्वमपीति । उक्तेऽर्थे वाक्योपक्रममनुकूलयति—तथा चेति । पुनरित्यादेरर्थं निगमयति—सा पुनरिति । ननु फलकथनार्थमुपक्रम्य प्राणात्मनाऽग्न्यादित्ययोरेकत्वं वदता प्रक्रान्तं विस्मृतमिति नेत्याह—यः पुनरिति । एकत्वमभिन्नत्वम् ॥ ७ ॥

इति प्रथमाध्यायस्य द्वितीयं ब्राह्मणम् ॥ २ ॥

अथ प्रथमाध्यायस्य तृतीयं ब्राह्मणम् ।

द्वया हेत्याद्यस्य कः संबन्धः । कर्मणां ज्ञानसहितानां परा गतिरुक्ता । मृत्व्वात्मभावोऽश्वमेधगत्युक्त्या । अथेदानीं मृत्व्वात्मभावसाधनभूतयोः कर्मज्ञानयोर्यत उद्भवस्तत्प्रकाशनार्थमुद्गीथब्राह्मणमारभ्यते । ननु मृत्व्वात्मभावः पूर्वत्र ज्ञानकर्मणोः फलमुक्तम् । उद्गीथज्ञानकर्मणोस्तु मृत्व्वात्मभावातिक्रमणं फलं वक्ष्यति । अतो भिन्नविषयत्वात्फलस्य न पूर्वकर्मज्ञानोद्भवप्रकाशनार्थमिति चेत् । नायं दोषः । अग्न्यादित्यात्मभावत्वादुद्गीथफलस्य पूर्वत्राप्येतदेव फलमुक्तमेतासां देवतानामेको भवतीति । ननु मृत्युमतिक्रान्तइत्यादि विरुद्धम् । न । स्वाभाविकपाप्मासङ्गविषयत्वादतिक्रमणस्य ।

ब्राह्मणान्तरमवतार्य तस्य पूर्वेण संबन्धमुक्त्वा तेन सोऽस्तीत्याक्षिपति—द्वया हेत्याद्यस्येति । विवक्षितं संबन्धं वक्तुं वृत्तं कीर्तयति—कर्मणामिति । सा काष्ठा सा परा गतिरिति श्रुतेरुक्ता परा गतिर्मुक्तिरित्याशङ्क्याऽऽह—मृत्व्वात्मभाव इति । अश्वमेधोपासनस्य साश्वमेधस्य केवलस्य वा फलमुक्तं नोपास्यन्तराणां कर्मान्तराणां चेत्याशङ्क्याश्वमेधफलोक्त्योपास्यन्तराणां केवलानां च फलमुपलक्षितमित्याह—अश्वमेधेति । वृत्तमनूद्योत्तरब्राह्मणस्य तात्पर्यमाह—अथेति । ज्ञानयुक्तानां कर्मणां संसारफलत्वप्रदर्शनानन्तरमिति यावत् । ज्ञान-

---

१ क. ख. घ. °ति । सा पुनरित्यत्र पु° । ण. °ति । सा पु° । २ क. घ. ञ. ण. °र्त्तं प्रस्तु° । ३ क. घ. °ममु ॥ २ ॥ द्वितीयमग्निब्रा° । ४ ख. घ. ङ. च. ज. हेत्यस्य । ५ क. ख. °र्थत्वामे° । ६ घ. °तार्यैत° । ७ ख. घ. ञ. ण. हेत्यस्ये° । ८ ण. °लक्त्वप्र° ।

कर्मणोरुद्भावकस्य प्राणस्य स्वरूपं निरूपयितुं ब्राह्मणमित्युत्थाप्योत्थापकत्वं संबन्धमुक्त्वाक्षिपति—नन्विति । मृत्युमतिक्रान्तो दीप्यत इति मृत्योरतिक्रमस्य वक्ष्यमाणज्ञानकर्मफलत्वात्पूर्वत्र च तद्भावस्य तत्फलस्योक्तत्वादुभयस्यापि फलस्य भेदात्पूर्वोत्तरयोर्ज्ञानकर्मणोर्विषयशब्दितोद्देश्यभेदान्न पूर्वोक्तयोस्तयोरुद्भवकारणप्रकाशनार्थं ब्राह्मणमित्यर्थः । पूर्वोत्तरज्ञानकर्मफलभेदाभावादेकविषयत्वात्तदुद्भावकप्रकाशनार्थं ब्राह्मणं युक्तमिति परिहरति—नायमिति । वाक्यशेषविरोधं शङ्कित्वा दूषयति—नन्वित्यादिना । स्वाभाविकः शास्त्रानाधेयो योऽयं पाप्मा विषयात्मकरूपः स मृत्युस्तस्यातिक्रमणं वाक्यशेषे कथ्यते न हि हिरण्यगर्भरूपं मृत्योरतः पूर्वोक्तज्ञानकर्मभ्यां तुल्यविषयत्वमेवोत्तरज्ञानकर्मणोरित्यर्थः ।

कोऽसौ स्वाभाविकः पाप्मासङ्गो मृत्युः । कुतो वा तस्योद्भवः केन वा तस्यातिक्रमणम् । कथं वेत्येतस्यार्थस्य प्रकाशनायाऽऽख्यायिकाऽऽरभ्यते । कथम्—

> द्वया ह प्राजापत्या देवाश्चासुराश्च । ततः कानीयसा एव देवा ज्यायसा असुरास्त एषु लोकेष्वस्पर्धन्त ते ह देवा ऊचुर्हन्तासुरान्यज्ञ उद्गीथेनात्ययामेति ॥ १ ॥

द्वया द्विप्रकाराः । हेति पूर्ववृत्तावद्योतको निपातः । वर्तमानप्रजापतेः पूर्वजन्मनि यदवृत्तं तदेव द्योतयति हशब्देन । प्राजापत्याः प्रजापतेर्वृत्तजन्मावस्थस्यापत्यानि प्राजापत्याः । के ते । देवाश्चासुराश्च । तस्यैव प्रजापतेः प्राणा वागादयः । कथं पुनस्तेषां देवासुरत्वम् । उच्यते—शास्त्रजनितज्ञानकर्मभाविता द्योतनाद्देवा भवन्ति । त एव स्वाभाविकप्रत्यक्षानुमानजनितदृष्टप्रयोजनकर्मज्ञानभाविता असुराः । स्वेष्वेवासुषु रमणात्सुरेभ्यो वा देवेभ्योऽन्यत्वात् ।

ज्ञानकर्मणोरुद्भावकत्वं वक्तुं ब्राह्मणमारभ्यतामाख्यायिका तु किमर्थमित्याशङ्क्य तस्यास्तात्पर्यमाह—कोऽसाविति । कथं यथोक्तो ब्राह्मणाख्यायिकयोरर्थः शक्यो ज्ञातुमित्याकाङ्क्षां निक्षिप्याक्षराणि व्याकरोति—कथमित्यादिना । निपातार्थमेव स्फुटयति—वर्तमानेति । प्रजापतिशब्दो भविष्यद्वृत्त्या यजमानं गोचरयती-

---

१ क. ख. ण. तदनन्तभावि° । २ घ. ण. हिर° । ३ ख. घ. °ख्यत्य मु° । ४ ख. ङ. च. छ. ज. °थं चेत्ये° । ५ ग. च. झ. तद्वद्यो° ।

त्याह—वृत्रेति । इन्द्रादयो देवा विरोचनादयश्चासुरा इत्याशङ्क्यं वारयति—तस्यैवेति । यजमानेषु प्राणेषु देवत्वमसुरत्वं च विरुद्धं न सिध्यतीति शङ्कते—कथमिति । तेषु तदुभयमौपाधिकं साधयति—उच्यत इति । शास्त्रानपेक्षयोर्ज्ञानकर्मणोरुत्तादकमाह—प्रत्यक्षेति । संनिधानासंनिधानाभ्यां प्रमाणद्वयोक्तिः । तेष्वेवासुषु रमणं नामाऽऽत्मभरित्वम् ।

यस्माच्च दृष्टप्रयोजनज्ञानकर्मभाविता असुराः, ततस्तस्मात्कानीयसाः कनीयांस एव कानीयसाः स्वार्थेऽणि वृद्धिः कनीयांसोऽल्पा एव देवाः । ज्यायसा असुरा ज्यायांसोऽसुराः । स्वाभाविकी हि कर्मज्ञानप्रवृत्तिर्महत्तरा प्राणानां शास्त्रजनितायाः कर्मज्ञानप्रवृत्तेः । दृष्टप्रयोजनत्वात् । अत एव कनीयस्त्वं देवानां शास्त्रजनितप्रवृत्तेरल्पत्वात् । अत्यन्तयत्नसाध्या हि सा ।

एव इत्यादिवाक्यद्वयं व्याचष्टे—यस्माच्चेति । देवानामल्पत्वं प्रपञ्चयति—स्वाभाविकी हीति । महत्तरत्वे हेतुर्दृष्टप्रयोजनत्वादिति । असुराणां बहुत्वं प्रपञ्चयति—शास्त्रजनितेति । असुराणां बाहुल्यमिति शेषः । तदेव साधयति—अत्यन्तेति ।

ते देवाश्चासुराश्च प्रजापतिशरीरस्था एषु लोकेषु निमित्तभूतेषु स्वाभाविकेतरकर्मज्ञानसाध्येष्वस्पर्धन्त स्पर्धां कृतवन्तः । देवानां च प्राबल्याभिभवौ स्पर्धा कदाचिच्छास्त्रजनितकर्मज्ञानभावनारूपा वृत्तिः प्राणानामुद्भवति । यदा चोद्भवति तदा दृष्टप्रयोजना प्रत्यक्षानुमानजनितकर्मज्ञानभावनारूपा । तेषामेव प्राणानां वृत्तिरासुर्यभिभूयते । स देवानां जयोऽसुराणां पराजयः । कदाचित्तद्विपर्ययेण देवानां वृत्तिरभिभूयत आसुर्या उद्भवः । सोऽसुराणां जयो देवानां पराजयः । एवं देवानां जये धर्मभूयस्त्वादुत्कर्ष आ प्रजापतित्वप्राप्तेः । असुरजयेऽधर्मभूयस्त्वादपकर्ष आ स्थावरत्वप्राप्तेः । उभयसाम्ये मनुष्यत्वप्राप्तिः । त एवं कनीयस्त्वादभिभूयमाना असुरैर्देवा बाहुल्यादसुराणां किं कृतवन्त इत्युच्यते—ते देवा असुरैरभिभूयमाना ह किलोचुरुक्तवन्तः । कथम् । हन्तेदानीमस्मिन्यज्ञे ज्योतिष्टोम उद्गीथेनोद्गीथकर्मपदार्थकर्तृस्वरूपाश्रयणेनात्ययामातिगच्छामः । असुरानभिभूय स्वं देवभावं शास्त्रप्रकाशितं प्रतिपद्यामह इत्युक्तवन्तोऽन्योन्यम् । उद्गीथकर्मपदार्थकर्तृस्वरूपाश्रयणं च ज्ञानकर्मभ्याम् । कर्म वक्ष्यमाणं मन्त्र-

१ क्र. °यं प्रकृत्य व्या° । घ. °यं सप्रसङ्गं व्या° । ण. °यं सप्रसङ्गाद्व्याच° ।

जपलक्षणं विधित्स्यमानं तदेतानि जेपेदिति । ज्ञानं त्विदमेव निरूप्यमाणम् ।

उभयेषां देवासुराणां मिथः संघर्षं दर्शयति—ते देवाश्चेति । कथं ब्रह्मादीनां स्थावरान्तानां भोगस्थानानां स्पर्धानिमित्तत्वमित्याशङ्क्य तेषां शास्त्रीयेतरज्ञानकर्मसाध्यत्वात्तयोश्च देवासुरजयाधीनत्वात्तस्य च स्पर्धापूर्वकत्वात्परम्परया लोकानां तन्निमित्तत्वमित्यभिप्रेत्य विशिनष्टि—स्वाभाविकेति । का पुनरेषां स्पर्धा नामेत्याशङ्क्याऽऽह—देवानां चेति । तामेव सफलां विवृणोति—कदाचिदित्यादिना । अधिकैतरसुरपराजये देवजये च प्रयतितव्यमित्यनुग्रहबुद्ध्या जयफलमाह—एवमिति । आकाङ्क्षापूर्वकमनन्तरवाक्यमादाय व्याकरोति—त एवमित्यादिना। योऽयमुद्गीथो नाम कर्माङ्गभूतः पदार्थस्तत्कर्तुः प्राणस्य स्वरूपाश्रयणमेव कथं सिध्यतीत्याशङ्क्याऽऽह—उद्गीथेति । किं तत्कर्म किं वा ज्ञानं तदाह—कर्मेति तदेतान्यसतो मा सद्गमयेत्यादीनि यजूंषि जपेदिति विधित्स्यमानानीति योजना ।

नन्विदमभ्यारोहजपविधिशेषोऽर्थवादो न ज्ञाननिरूपणपरम् । न च एवं वेदेति वचनात् । उद्गीथप्रस्तावे पुराकल्पश्रवणादुद्गीथविधिपरमिति चेत् । न । अप्रकरणात् । उद्गीथस्य चान्यत्र विहितत्वात् विद्याप्रकरणत्वाच्चास्य ।

द्वया हेत्यादि न ज्ञाननिरूपणपरं जपविधिशेषत्वेनार्थवादत्वात्तत्कृतोऽत्र ज्ञानस्य निरूप्यमाणत्वमित्याक्षिपति—नन्विति । आभिमुख्येनाऽऽरोहति देवभावमनेनेत्यभ्यारोहो मन्त्रजपस्तद्विधिशेषोऽर्थवादो द्वया हेत्यादिवाक्यमित्यर्थः । उपास्तिविधिश्रवणात्तत्परं वाक्यं न जपविधिशेष इति दूषयति—नेति । मा भूज्जपविधिशेषस्तथाऽप्युद्गायेत्यौद्गात्रस्य कर्मणः संनिधाने पुरातनकल्पनाप्रकारस्य द्वया हेत्यादिना श्रवणात्तद्विधिशेषोऽर्थवादोऽयमिति शङ्कते—उद्गीथेति । नेदं वाक्यं ज्ञानं चोद्गीथविधिशेषस्तत्प्रकरणस्थत्वाभावेन संनिध्यभावादिति दूषयति—नाप्रकरणादिति । उद्गीथस्तर्हि क्व विधीयते न खल्वविहितमङ्गं भवति तत्राऽऽह—उद्गीथस्य चेति । अन्यत्रेति कर्मकाण्डोक्तिः । अथोद्गायेत्युद्गीथविधिरपीह प्रतीयते तत्कथं संनिधिरपोद्यते तत्राऽऽह—विद्येति । उद्गीथविधिरिह प्रतीयमानः प्राणस्योद्गातृदृष्टयोपासनविधिरन्यथा प्रकरणविरोधादित्यर्थः ।

अभ्यारोहजपस्य चानित्यत्वात् । एवंविधप्रयोज्यत्वात् । विज्ञानस्य च नित्यवच्छ्रवणात् । "तद्धैतल्लोकजिदेव" इति च श्रुतेः । प्राणस्य

१ क. ख. ञ. °ति । तान्येता° । २ च. ज. झ. 'शेषार्थ° । ३ च. रातनक° । ४ झ. ञ. ज. °येदित्यौ° । ५ ज. येदित्युं° । ६ ञ. °त्यते । ७ ख, च, ज, झ. तदेव° ।

वागादीनां च शुद्ध्यशुद्धिवचनात्। न ह्यनुपास्यत्वे प्राणस्य शुद्धि-वचनं वागादीनां च संहोपन्यस्तानामशुद्धिवचनं वागादिनिन्द्या मुख्यप्राणस्तुतिश्चाभिप्रेतोपपद्यते। मृत्युमतिक्रान्तो दीप्यत इत्यादि फलवचनं च। प्राणस्वरूपापरिच्छेदे हि फलं तद्वद्वागाद्यन्यादिभावः।

अपविधिशेषत्वमुद्गीथविधिशेषत्वं वा ज्ञानस्य नास्तीत्युक्तम्। इदानीं जपवि-धिशेषत्वाद्वारे युक्तयन्तरमाह—अभ्यारोहेति। अनित्यत्वं साधयति—एवमिति। प्राणविज्ञानवदनुद्देयो जपो न तद्विज्ञानात्पागस्ति[1]। तेनासौ पश्चाद्भावी प्रागेव सिद्धं विज्ञानं प्रयोजयतीत्यर्थः। तस्यापि प्राचीनत्वं कथमित्याशङ्क्याऽऽह—वि-ज्ञानस्य चेति। य एवं विद्वान्पौर्णमासीं यजत इतिवद्य एवं वेदेति विज्ञानं श्रु-तिर्मृ। न हि यजादि पौर्णमासीप्रयोजकम्। तस्या एव तत्प्रयोजकत्वात्। यथा प्राणविद्यप्रयोज्यो जपो न विज्ञानप्रयोजकः। तस्य स्वप्रयोजकत्वेन प्रागेव सिद्धेरावश्यकत्वादित्यर्थः। फलवत्त्वाच्च प्राणविज्ञानं स्वतन्त्रं विधिरिसत-मित्याह—फलेति। प्राणोपास्तेर्विधिरक्षितत्वे हेत्वन्तरमाह—प्राणस्येति। 'यद्धि स्तूयते तद्विधीयते' इति न्यायमाश्रित्योक्तमेव प्रपञ्चयति—न हीति। इतश्च प्राणोपास्तिरस्य विधिरित्याह—मृत्युमिति। फलवचनं प्राणस्यानुपास्यत्वे नो-पपद्यत इति संबन्धः। उक्तमेव व्यनक्ति—प्राणेति। मृत्युमोक्षणानन्तरं वागादीनां वदन्यादित्वं फलं तद्व्यात्मपरिच्छेदं हित्वोपास्तितुराधिदैविकप्राणस्वरूपाप-त्तेरुपपद्यते। तस्मात्तद्विधितिरस्कारेणात्र प्राणोपास्तिरित्यर्थः।

ननु वाग्यं प्राणस्योपास्यं न तु विशुद्ध्यादिगुणवत्तेति। ननु स्याच्छुद्ध्यादेः। न स्यादुपास्यत्वे स्तुत्यर्थत्वोपपत्तेः। न। अविपरी-तार्थप्रतिपत्तेः श्रेयःप्राप्त्युपपत्तेर्लोकवत्। यो ह्यविपरीतमर्थं प्रति-पद्यते लोके स इष्टं प्राप्नोत्यनिष्टाद्वा निवर्तते न विपरीतार्थप्रतिपत्त्या। तथेहापि श्रौतशब्दजनितार्थप्रतिपत्तौ श्रेयःप्राप्तिरुपपन्ना न विपर्यये।

उक्तन्यायेन प्राणोपास्तिमुपेत्य प्राणस्येवेमां शुद्ध्यादिगुणवत्तामाक्षिपति—नन्व-त्रिधी। यथा प्राणस्योपास्तिः शास्त्रदृष्टत्वादिष्टा तथास्य गुणतत्संबन्धः श्रुतत्वादे-स्तथ्यस्योपास्तावुपास्ये च गुणवादे प्राप्ते प्रामाणिकप्राप्तेरविशेषादिति सिद्धान्ती ब्रूते—

---

१ क. ग. ङ. च. ज. झ. °पत्तिर्हि°। २ ङ. च. °गादीनामन्वा°। ३ घ. ञ. ण. एवं विधिरिति। ४ क. ख. घ. ञ. °स्ति तत्रासौ। ५ घ. °तन्त्रं मन्त्रवि°। ञ. °तन्त्रमत्र वि°। ६ ञ. °स्तुतेति। ७ क. ख. अतश्च। ८ ग. घ. च. ञ. शुद्ध्यादि°। ९ घ. ण. °त्वेऽपि शु°।

न्विति । प्राणस्योपास्यत्वे विशुद्ध्यादिगुणवादस्य स्तुत्यर्थत्वेनार्थवादत्वसंभवाच्च यथोक्ता देवता स्यादिति पूर्ववाद्याह—न स्यादिति । विशुद्ध्यादिगुणवादस्यार्थवादत्वेऽपि नाभूतार्थवादत्वमिति परिहरति—नेति । विशुद्ध्यादिगुणविशिष्टप्राणदृष्टेरत्र फलप्राप्तिः श्रुता न तु ज्ञानस्य मिथ्यार्थत्वे युक्ता सम्यग्ज्ञानादेव पुरुषार्थोपपत्तेः संभवादतः स्तुतिरपि यथार्थैवेत्यर्थः । लोकदृष्टान्तं व्याचष्टे—यो ह्येति । इत्येते वेदार्थवादार्थान्विकोक्तिः ।

न चोपासनार्थश्रुतशब्दोत्थविज्ञानविषयस्यायथार्थत्वे प्रमाणमस्ति । न च तद्विज्ञानस्यापवादः श्रूयते । ततः श्रेयःप्राप्तिदर्शनाद्यथार्थतां प्रतिपद्यामहे । विपर्यये चानर्थप्राप्तिदर्शनात् । यो हि विपरीतमर्थं प्रतिपद्यते लोके पुरुषं स्थाणुरित्यमित्रं मित्रमिति वा सोऽनर्थं प्राप्नुवन्दृश्यते ।

ननु विशुद्ध्यादिगुणवतीं देवतां वदन्ति वाक्यान्युपासनाविध्यर्थत्वाच्च स्वार्थे प्रामाण्यं प्रतिपद्यन्ते तत्राऽऽह—न चेति । अन्यपराणामपि वाक्यानां मानान्तरसंवादविसंवादयोस्ततोः स्वार्थे प्रामाण्यमनुभवानुसारिणिरेवधार्यमित्यर्थः । ननु प्राणस्य विशुद्ध्यादिवादो न स्वार्थे मानमन्यपरत्वादादित्ययूपादिवाक्यवदत आह—न चेति । आदित्ययूपादिवाक्यार्थज्ञानस्य प्रत्यक्षादिनाऽपबाधवद्विशुद्ध्यादिगुणविज्ञानस्य नापवादः श्रुतस्तस्माद्विशुद्ध्यादिवादस्य स्वार्थे मानत्वमभ्युपेयमित्यर्थः । विशुद्ध्यादिगुणप्राणविज्ञानात्फलश्रवणात्तद्वादस्य यथार्थत्वमेवेत्युपसंहरति—तस्मा इति । लोकवद्वेदेऽपि सम्यग्ज्ञानादिष्टप्राप्तिरनिष्टपरिहार इत्यन्वयमुखेनोक्तमर्थं व्यतिरेकमुखेना (णापि) समर्थयते—विपर्यये चेत्यादिना ।

आत्मेश्वरदेवतादीनामप्ययथार्थानामेव चेद्ग्रहणं श्रुतिरीऽनर्थप्राप्त्यर्थं शास्त्रमिति ध्रुवं प्राप्नुयाल्लोकवदेव, न चैतदिष्टम् । तस्माद्यथाभूतानेवाऽऽत्मेश्वरदेवतादीन्ग्राहयत्युपासनार्थं शास्त्रम् । नामादौ ब्रह्मदृष्टिदर्शनादयुक्तमिति चेत्स्फुटं नामादेरब्रह्मत्वं तत्र ब्रह्मदृष्टिं स्थाण्वादाविव पुरुषदृष्टिं विपरीतां ग्राहयच्छास्त्रं दृश्यते । तस्माद्यथार्थमेव शास्त्रतः प्रतिपत्तेः श्रेय इत्ययुक्तमिति चेत् । न । प्रतिमादावज्ञेदशास्त्रापत्तेः । नामादावब्रह्मणि ब्रह्मदृष्टिं विपरीतां ग्राहयति शास्त्रं स्थाण्वादाविव पुरुषदृष्टिमिति नैतत्साध्ववोचः । कस्मात् । भेदेन हि ब्रह्मणो नामादिवस्तुप्रतिपन्नस्य नामादौ विधीयते ब्रह्मदृष्टिः प्रतिमादाविव विष्णुदृष्टिः ।

---

१ ब. °त्वेऽपि हु° । २ ब. अ. ण. °ति । हु° । ३ अ. ण. °दृतेति । ४ ब. च. °स्यात्तयात्वे । ५ ग. ङ. च. छ. ज. थ. °भात्तथा°] ६ ग. घ. ङ. छ. झ. प्रापछो° । ७ ख. ट. ठ. ड. °ल्लि प्र° । ८ ग. ङ. छ. स्थाणावि° ।

शास्त्रस्यानर्थार्थत्वमिष्टमिति शङ्कां निराचष्टे-न चेति । अपौरुषेयस्यातंभावितत्वदोषस्याशेषपुरुषार्थहेतोः शास्त्रस्यानर्थार्थत्वमेष्टुमशक्यमित्यर्थः । शास्त्रस्य यथाभूतार्थत्वं निगमयति-तस्मादिति । उपासनार्थं ज्ञानार्थं चेति शेषः । शास्त्राद्यथार्थप्रतिपत्तेः श्रेयःप्राप्तिरित्यत्र व्यभिचारं चोदयति-नामादाविति । तदेव स्फुटयति-स्फुटमिति । अत्रलक्षणे ब्रह्मदृष्टिरतस्मिंस्तद्बुद्धित्वान्मिथ्या धीः सा च यावन्नाम्नो गतमित्यादिश्रुत्या फलवती ततः शास्त्राद्यथार्थप्रतिपत्तेरेव फलमित्ययुक्तमित्यर्थः । भेदाग्रहपूर्वकोऽन्यस्यान्यात्मतावभासो मिथ्याज्ञानमत्र तु भेदे भासमानेऽन्यत्रान्यदृष्टिर्विधीयते । यथा विष्णोर्भेदे प्रतिमायां गृह्यमाणे तत्र विष्णुदृष्टिः क्रियते तच्चेदं मिथ्यानमित्याह-नेति । नञर्थं स्पष्टयति-नामादाविति । प्रश्नपूर्वकं हेतुं व्याचष्टे-कस्मादिति ।

आलम्बनत्वेन हि नामादेप्रतिपत्तिः प्रतिमादिवदेव न तु नामादेव ब्रह्मेति । यथा स्थाणावनिर्ज्ञाते न स्थाणुरिति पुरुष एवायमिति प्रतिपद्यते विपरीतम् । न तु तथा नामादौ ब्रह्मदृष्टिर्विपरीता । ब्रह्मदृष्टिरेव केवला नास्ति ब्रह्मेति चेत् । एतेन प्रतिमाब्राह्मणादिषु विष्ण्वादिदेवपित्रादिदृष्टीनां तुल्यता । न । ऋगादिषु पृथिव्यादिदृष्टिदर्शनात् । विद्यमानपृथिव्यादिवस्तुदृष्टीनामेवर्गादिविषये क्षेपदर्शनात् । तस्मात्तत्सामान्याच्चामादिषु ब्रह्मादिदृष्टीनां विद्यमानब्रह्मादिविषयत्वसिद्धिः ।

प्रतिमादौ विष्णुदृष्टिं प्रत्यालम्बनत्वमेव न विष्णुतादात्म्यं नामादेस्तु ब्रह्मतादात्म्यं श्रुतमिति वैषम्यमाशङ्क्याऽऽह-आलम्बनत्वेनेति । उक्तमर्थं वैधर्म्यदृष्टान्तेन स्पष्टयति-यथेति । कर्ममीमांसको ब्रह्मविद्वेषं प्रकटयन्प्रत्यवतिष्ठते-ब्रह्मेति । केवला तद्दृष्टिरेव नाम्नि चोद्यते चोदनावशाच्च फलं सेत्स्यति ब्रह्म तु नास्तीमानाभावादित्यर्थः । अथ यथा देवानां प्रतिमादिषूपास्यमानानामन्यत्र सत्त्वं यथा च वस्वाद्यात्मनां पितॄणां ब्राह्मणादिदेहे तर्प्यमाणानामन्यत्र सत्त्वं तथा ब्रह्मणोऽपि नामादावुपास्यत्वादन्यत्र सत्त्वं भविष्यतीत्याशङ्क्याऽऽह-एतेनेति । नामादौ ब्रह्मदर्शनेनेति यावत् । दृष्टान्तासिद्धेर्न क्वापि ब्रह्मास्तीति भावः । सत्यज्ञानादिलक्षणं ब्रह्म नास्तीत्ययुक्तम् ' सदेव सोम्येदम् ' इत्यादिश्रुतेरित्याह-नेति । किंच ब्रह्मदृष्टिः सत्यार्था शास्त्रीयदृष्टित्वादियमेवर्गग्निः सामेतिदृष्टिवदित्याह-ऋगादिष्विति । तदेव स्पष्टयति-विद्यमानेति । ताभिर्दृष्टिभिः सामान्यं दृष्टित्वं तस्मादिति यावत् ।

एतेन प्रतिमाब्राह्मणादिषु विष्ण्वादिदेवपित्रादिबुद्धीनां च सत्यव-

---

१ ख. घ. झ. ञ. 'नर्थ° । २ क. ख. घ. ङ. छ. ज. झ. °भाव° । ३ झ. °षय आक्षे° । ४ क. °शेच्छन्ति° । ५ घ. ण. °माया वि° । ६ क. ख. ञ. °वसौम्ये°,

स्तुविषयत्वासिद्धिः । मुख्यापेक्षत्वाच्च गौणत्वस्य । पञ्चाग्न्यादिषु चाग्नित्वादेर्गौणत्वान्मुख्याग्न्यादिसद्भाववन्नामादिषु ब्रह्मत्वस्य गौणत्वान्मुख्यब्रह्मसद्भावोपपत्तिः क्रियार्थैश्चाविशेषाद्विधानानाम् । यथा च दर्शपौर्णमासादिक्रियेयंफला विशिष्टातिकर्तव्यताकेवंक्रमप्रयुक्ताङ्गा चेत्येतदलौकिकं वस्तु प्रत्यक्षाद्यविषयं तथाभूतं च वेदवाक्यैरेव ज्ञाप्यते । तथा परमात्मेश्वरदेवतादिवत्स्थूलादिधर्मकमशनाद्यतीतं चेत्येवमादिविशिष्टमिति वेदवाक्यैरेव ज्ञाप्यत इत्यलौकिकत्वात्तथाभूतमेव भवितुमर्हतीति । न च क्रियार्थैर्वाक्यैर्ज्ञानवाक्यानां बुद्ध्युत्पादकत्वे विशेषोऽस्ति । न चानिश्चिता विपर्यस्ता वा परमात्मादिवस्तुविषया बुद्धिरुत्पद्यते ।

यत्तु दृष्टान्तासिद्धिरिति तत्राऽऽह—एतेनेति । ब्रह्मदृष्टेः सत्यार्थत्ववचनेति यावत् । ब्रह्मास्तित्वे हेत्वन्तरमाह—मुख्यापेक्षत्वादिति । उक्तमेव विवृणोति—पञ्चेति । पञ्चाग्नयो द्युपर्जन्यपृथिवीपुरुषयोषितः । आदिपदं वाग्वेन्वादिग्रहार्थम् । ननु वेदान्तवेद्यं ब्रह्मेष्यते न च तेभ्यस्तद्धीः सिध्यति तेषां विधिवैधुर्येणाप्रामाण्यात्तत्कुतो ब्रह्मसिद्धिरत आह—क्रियार्थैश्चेति । विमतं स्वार्थे प्रमाणपञ्चातज्ञापकत्वात्तंमतवत् । अतो वेदान्तशास्त्रादेव ब्रह्मसिद्धिरित्यर्थः सिद्धसाध्यार्थभेदेन वैषम्यादविशिष्टत्वमनिष्टमित्याशङ्क्योक्तं विवृणोति-यथा चेति । विशिष्टत्वं स्वरूपोपकारित्वं फलोपकारित्वं च । पञ्चमोक्तं प्रकारं परामृष्टुमेवमित्यादिष्टम् । अलौकिकत्वं साधयति—प्रत्यक्षादीति । किंच वेदान्तानामप्रामाण्यं बुद्ध्यनुत्पत्तेर्वा संशयाद्युत्पत्तेर्वा नाऽऽद्य इत्याह—न चेति । न द्वितीय इत्याह—न चानिश्चितेति । कोटिद्वयास्पर्शित्वादबाधाच्चेत्यर्थः ।

अनुष्ठेयाभावादयुक्तमिति चेत् । क्रियार्थैर्वाक्यैरूर्ध्वंशा भावनानुष्ठेया ज्ञाप्यतेऽलौकिक्यापि । न तथा परमात्मेश्वरादिविज्ञानेऽनुष्ठेयं किंचिदस्ति । अतः क्रियार्थैः साधर्म्यमित्ययुक्तमिति चेत् । न । ज्ञानस्य तथाभूतार्थविषयत्वात् । न ह्यनुष्ठेयस्य ऊर्ध्वंशस्य भावनाख्यस्यानुष्ठेयत्वात्तथात्वं किं तर्हि प्रमाणसमधिगतत्वात् । न च तद्विषयाया बुद्धेरनुष्ठेयविषयत्वात्तथार्थत्वं किं तर्हि वेदवाक्यजनितत्वादेव ।

---

१ ख. ग. घ. च. छ. ज. झ. °र्शपूर्ण° । २ ग. °क्रियैवंफ° । ३ ग. घ. छ ज. झ. °र्हति । ४ घ. ण. ण्यात्कु° । ५ च. ण. °न्तवशादे° । ६ ण. °देनैव वै° । ७ ण. °राभृशति—एवमिति । आदिष्टमलौ° । ८ ग. छ. °थात्वं ।

क्रियार्थैर्वाक्यैर्विधार्थानां वाक्यानां साधर्म्यमुक्तमाक्षिपति—अनुष्ठेयात । साधर्म्यस्यायुक्तत्वमेव व्यनक्ति—क्रियार्थैरिति । वाक्योत्थबुद्धेर्यथार्थत्वेऽपि विध्यभावेऽपि वाक्यप्रामाण्यज्ञापकत्वेनाविरुद्धमिति परिहरति—न ज्ञानस्येति । अनुष्ठेयनिष्ठत्वमन्तरेण कृतो वस्तुनि प्रयोगप्रत्ययपोस्तथार्थत्वमित्याशङ्क्य तयोर्विषयतयार्थत्वे तदपेक्षास्वप्रामाण्यार्थत्वं वेति विकल्प्याऽऽद्यं दूषयति—न ह्रीति । तदुभयविषयस्य कर्तव्यार्थस्य तथार्थत्वं न कर्तव्यत्वापेक्षं किंतु मानगम्यत्वादन्यथा विप्रलम्भकविधिवाक्येऽपि तथात्वापत्तेरित्यर्थः । द्वितीयं प्रत्याह—न चेति । बुद्धिग्रहणं प्रयोगोपलक्षणार्थम् । कर्तव्यतार्थविषयप्रयोगादेर्नानुष्ठेयविषयत्वान्मानत्वं किंतु प्रमाकरणत्वात्तज्ज्वन्यत्वाच्चान्यथोक्तादिप्रसक्तिरतिप्रसक्तेरतोऽनुष्ठेयनिष्ठत्वं मानत्वेऽनुपयुक्तमित्यर्थः ।

वेदवाक्याधिगतस्यं वस्तुनस्तथात्वे सत्यनुष्ठेयत्वविशिष्टं चेदनुतिष्ठॅति नो चेदनुष्ठेयत्वविशिष्टँ नानुतिष्ठति । अननुष्ठेयत्वे वाक्यप्रमाणत्वानुपपत्तिरिति चेत् । न ह्यनुष्ठेयेऽसंधि पदानां संहतिरुपपद्यते अनुष्ठेयत्वे तु सति तादर्थ्येन पदानि संहन्यन्ते । तत्रानुष्ठेयनिष्ठं वाक्यं प्रमाणं भवतीदमनेनैवं कर्तव्यमिति । न त्विदमनेनैवँमित्येवंप्रकाराणां पदशतानामपि वाक्यत्वमस्ति । ' कुर्यात्क्रियेत कर्तव्यं भवेत्स्यादिति पंञ्चमम् ' इत्येवमादीनामन्यतमेऽसत्यतः परमात्मेश्वरादीनामवाक्यप्रमाणत्वम् । पदार्थत्वे च प्रमाणान्तराविषयत्वम् । अतोऽसदेवादिति चेत् । न । अस्ति मेरुर्वर्णचतुष्टयोपेत इत्येवमाद्यननुष्ठेयेऽपि वाक्यदर्शनात् । न च मेरुर्वर्णचतुष्टयोपेत इत्येवमादिवाक्यश्रवणे मेर्वादावनुष्ठेयत्वबुद्धिरुत्पद्यते । तथाऽस्तिपदसहितानां परमात्मेश्वरादिप्रतिपादकवाक्यपदानां विशेषणविध्याभावेन संहतिः केन वार्यते ।

कुतस्तर्हि कार्याकार्यधियावित्याशङ्क्याऽऽह—वेदेति । वैदिकस्यार्थस्याबाधेनं तथार्थत्वे सिद्धे समीहितसाधनत्वविशिष्टं चेदस्तु तदा कर्तव्यमिति धियाऽनुतिष्ठतिं । तच्चेदनिष्टसाधनत्वविशिष्टं तदा न कार्यमिति धिया नानुतिष्ठति—अतो मानात्तस्यानुष्ठाननानुष्ठानहेतू कार्याकार्यधियावित्यर्थः । तथाऽपि ब्रह्मणो वाक्यार्थत्वं पदार्थत्वं वा नाऽऽद्य इत्याह—अननुष्ठेयत्व इति । तस्माकार्यत्वेऽपि

---

१ क. ण. °थात्वार्थ त° । २ क. ख. घ. थात्वं । ३ ञ. ण. °तेऽर्थ° । ४ ग. घ. ज. झ. °ति न चे° । ५ घ. ज. °ष्टं तदा ना° । ६ ग. घ. ङ. ज. °ष्ठेये तु । ७ घ. °नेवं कर्तव्यमि° । ८ क. ग. घ. ङ. छ. झ. ञ. °दित्ये° । ९ च. °मादावन° । १० ग. °र्वादिष्वसु । ११ ञ. ण. °न यथा । १२ क. ख. °तो मानाच्चास्या° । ण. °तो न मा° ।

वाक्यार्थत्वं किं न स्यादित्याशङ्क्याऽऽह—न हीति । उभयत्रासतीति च्छेदः । द्वितीयं दूषयति—पदार्थत्वे चेति । ब्रह्मणः शास्त्रार्थत्वमेवादित्युच्यते कार्यास्पृष्टेऽर्थे वाक्यप्रामाण्यं दृष्टान्तेन साधयति—नेत्यादिना । शुक्लकृष्णलोहितमिश्रलक्षणं वर्णचतुष्टयं तद्विशिष्टो मेरुरस्तीत्यादिप्रयोगे मेर्वादावकार्येऽपि सम्यग्धीदर्शनात्तत्त्वमसिवाक्यादपि कार्यास्पृष्टे ब्रह्मणि सम्यग्ज्ञानसिद्धिरित्यर्थः । दृष्टान्तेऽपि कार्यधीरेव वाक्यादुदेतीत्याशङ्क्याऽऽह—न चेति । ननु तत्र किंवापदाधीना पदसंहतिर्युक्ता वेदान्तेषु पुनस्तदभावात्पदसंहत्ययोगात्कुतो वाक्यप्रमाणकत्वं ब्रह्मणः संभवति तत्राऽऽह—तथेति ।

मेर्वादिज्ञानवत्परमात्मज्ञाने प्रयोजनाभावादयुक्तामिति चेत् । न "ब्रह्मविदाप्नोति परम्" "भिद्यते हृदयग्रन्थिः" इति फलश्रवणात् । संसारबीजाविद्यादिदोषनिवृत्तिदर्शनाच्च । अनन्यशेषत्वाच्च तज्ज्ञानस्य जुह्वामिव फलश्रुतेरर्थवादत्वानुपपत्तिः । प्रतिषिद्धानिष्टफलसंबन्धश्च वेदादेव विज्ञायते । न चानुष्ठेयः सः । न च प्रतिषिद्धविषये प्रवृत्तक्रियस्याकरणादन्यदनुष्ठेयमस्ति । अकर्तव्यताज्ञाननिष्ठतैव हि परमार्थतः प्रतिषेधविधीनां स्यात् ।

विमतफलं सिद्धार्थज्ञानत्वात्तंमतवदित्यनुमानात्तत्त्वमादेः सिद्धार्थत्वायुक्तं मानत्वमिति शङ्कते—मेर्वादीति । श्रुतिविरोधेनानुमानं धुनीते—नेत्यादिना । विद्वदनुभवविरोधाच्च नैवमित्याह—संसारेति । फलश्रुतेरर्थवादत्वेनामानत्वादनुमानाबाधकेत्याशङ्क्याऽऽह—अनन्येति । वर्णमयीत्वाधिकरणन्यायेन जुह्वां फलश्रुतेरर्थवादत्वं युक्तम् । ब्रह्मविद्योऽन्यशेषत्वप्रापकाभावात्तत्फलश्रुतेरर्थवादत्वासिद्धिरिति । अन्यथा शारीरकानारम्भः स्यादित्यर्थः । श्रुत्यनुभवाभ्यां वाक्योत्थज्ञानस्य फलवत्त्वदृष्टेर्युक्ता कार्यास्पृष्टेऽर्थे तत्त्वमस्यादेर्मानतेत्युक्तं संप्रति शास्त्रस्य कार्यपरत्वानियमे हेत्वन्तरमाह—प्रतिषिद्धेति । यद्यपि फलञ्जभक्षणादेरधःशास्त्रस्य च संबन्धो न फलञ्जं भक्षयेदित्यादिवाक्यात्प्रतीयते तथाऽपि तस्यानुष्ठेयत्वाद्वाक्यस्यानुष्ठेयनिष्ठत्वासिद्धिरित्याशङ्क्याऽऽह—न चेति । संबन्धस्यामार्थत्वान्नानुष्ठेयतेत्यर्थः । अभक्षणादि कार्यमिति विधिपरत्वमेव निषेधवाक्यस्य किं न स्यादित्याशङ्क्याऽऽह—न चेति । तस्यापि कार्यार्थत्वे विधिनिषेधभेदभङ्गात्तस्य च स्वसंबन्ध्यमार्थबोधने मुख्यस्वार्थान्तरे वृत्तौ लक्षणापाताच्चनिषिद्धविषये रागादिना प्रवृत्तक्रियावतो निषेधशास्त्रार्थधीसंकुचितस्य निषेधश्रुतेरकरणात्पसक्तक्रियानिवृत्त्युपलक्षितादौदासीन्यादन्यदनुष्ठेयं न प्रतिभातीत्यर्थः । भावविषयं कर्तव्यत्वं

१ क. स. °संगति° । २ घ. ञ. °द्धिरन्य° । ३ क. °वयोक्तस्त° । ४ घ. ङ. णु इ स्वार्थे । ५ ख. °व क्षा° । ६ क. स. °वलक्षणेन म° ।

विधीनामर्थोऽभावविषयं तु निषेधानामिति विशेषमाशङ्क्याऽऽह—अकर्तव्यतेति। अभावस्य भावार्थत्वाभावात्कर्तव्यताविषयत्वासिद्धिरिति हिशब्दार्थः।

क्षुधार्तस्य प्रतिषेधज्ञानसंस्कृतस्याभक्ष्येऽभोज्ये वा प्रत्युपस्थिते कलञ्जाभिशस्तान्नादाविदं भक्ष्यमदो भोज्यमिति वा ज्ञानमुत्पन्नं तद्विषयया प्रतिषेधज्ञानस्मृत्या बाध्यते। मृगतृष्णिकायामिव पेयज्ञानं तद्विषययाथात्म्यविज्ञानेन तस्मिन्बाधिते स्वाभाविकविपरीतज्ञानेऽनर्थकरी तद्भक्षणभोजनप्रवृत्तिर्न भवति। विपरीतज्ञाननिमित्तायाः प्रवृत्तेर्निवृत्तिरेव न पुनर्यत्नः कार्यस्तदभावे। तस्मात्प्रतिषेधविधीनां वस्तुयाथात्म्यज्ञाननिष्ठतैव न पुरुषव्यापारनिष्ठतागन्धोऽप्यस्ति। तथेहापि परमात्मादियाथात्म्यज्ञानविधीनां तावन्मात्रपर्यवसानतैव स्यात्। तथा तद्विज्ञानसंस्कृतस्य तद्विपरीतार्थज्ञाननिमित्तानां प्रवृत्तीनामनर्थार्थत्वेन ज्ञायमानत्वात्। परमात्मादियाथात्म्यज्ञानस्मृत्या स्वाभाविके तन्निमित्तविज्ञाने बाधितेऽभावः स्यात्।

प्रतिषेधज्ञानवतोऽपि कलञ्जभक्षणादिज्ञानदर्शनात्तन्निवृत्तेर्नियोगाधीनत्वात्तन्निष्ठमेव वाक्यमेष्टव्यमिति चेन्नेत्याह—क्षुधार्तस्येति। विषलिप्तबाणहतस्य पशोर्मांसं कलञ्जं ब्रह्मवध्याभिशापयुक्तस्यान्नपानादि तस्मिन्नभक्ष्येऽभोज्ये च प्राप्ते यद्भ्रमज्ञानं क्षुत्क्षामस्योत्पन्नं तन्निषेधधीसंस्कृतस्य तद्धीस्मृत्या बाध्यमित्यत्र लौकिकं दृष्टान्तमाह—मृगतृष्णिकायामिति। तथाऽपि प्रवृत्त्यभावसिद्धये विधिरर्थवानिति चेन्नेत्याह—तस्मिन्निति। तदभावः प्रवृत्त्यभावो न विधिजन्यप्रयत्नसाध्यो निमित्ताभावेनैव सिद्धेरित्यर्थः। दृष्टान्तमुपसंहरति—तस्मादिति। दार्ष्टान्तिकमाह—तथेति। न केवलं तत्त्वमस्यादिवाक्यानां सिद्धवस्तुमात्रपर्यवसानता किंतु सर्वकर्मनिवर्तकत्वमपि सिध्यतीत्याह—तथेति। अकर्तृभोक्तृब्रह्माहमितिज्ञानसंस्कृतस्य प्रवृत्तीनामभावः स्यादिति संबन्धः। तस्माद्ब्रह्मभावाद्विपरीतोऽर्थो यस्य कर्तृत्वादिज्ञानस्य तन्निमित्तानामनर्थार्थत्वेन ज्ञायमानत्वादिति हेतुः। कदा पुनस्तासामभावः स्यादत आह—परमात्मादीति। भ्रान्तिप्रमभक्ष्यभोज्यादिज्ञानेन निवृत्तिनिष्ठतया निषेधवाक्यस्य मानत्वक्षुत्त्वमादेरपि प्रत्यगज्ञानोत्थत्वात्तन्निवर्तकत्वेन मानत्वोपपत्तेरिति समुदायार्थः।

ननु कलञ्जादिभक्षणादेरनर्थार्थत्वं वस्तुयाथात्म्यज्ञानस्मृत्या स्वाभाविके तद्भक्ष्यत्वादिविपरीतज्ञाने निवर्तिते तद्भक्षणाद्यनर्थप्रवृत्त्यभाववदप्रतिषेधविषयत्वाच्छास्त्रविहितप्रवृत्त्यभावो न युक्त इति। चेत्। न। विपरी-

१ ख. °जाद्य°। २ भ. °मिवोदकज्ञा°। ३ ण. °कस्य स्वमन्न°। ४ घ. ण. °नाद्यभोज्यं त°। ५ क. ख. ञ. °क्ष्यम्°। ६ क, ख. म, घ, ङ, च. °र्तृत्वेन व°। ञ. ट. °र्तृत्वे व°।

तज्ज्ञाननिमित्तत्वानर्थार्थत्वाभ्यां तुल्यत्वात्। कलञ्जभक्षणादिप्रवृत्तेर्मिथ्याज्ञाननिमित्तत्वमनर्थार्थत्वं च यथा तथा शास्त्रविहितप्रवृत्तीनामपि । तस्मात्परमात्मयाथात्म्यविज्ञानवतः शास्त्रविहितप्रवृत्तीनामपि मिथ्याज्ञाननिमित्तत्वेनानर्थार्थत्वेन च तुल्यत्वात्परमात्मज्ञानेन विपरीतज्ञाने निवर्तिते युक्त एवाभावः ।

दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यमाशङ्क्यते—नन्विति । तस्य निषिद्धत्वादनर्थार्थत्वमेव वदन्स्तुयाथात्म्यं तज्ज्ञानेन निषेधे कृते तत्संस्कारद्वारा संपादितस्मृत्या शास्त्रीयज्ञाननिपरीतज्ञाने बाधिते तत्कार्यप्रवृत्त्यभावो निमित्ताभावे नैमित्तिकाभावन्यायेन युक्तो न तथाऽग्निहोत्रादिप्रवृत्त्यभावो युक्तः । ब्रह्मविदाऽग्निहोत्रादि न कर्तव्यमिति निषेधानुपलम्भादित्यर्थः । तत्त्वमस्यादिवाक्येनार्थान्निषिद्धमग्निहोत्रादीति मन्वानः साम्यमाह—नेत्यादिना । शास्त्रीयप्रवृत्तीनां गर्भवासादिहेतुत्वादनर्थार्थत्वमहं कर्तेत्याद्यभिमानकृतत्वेन विपरीतज्ञाननिमित्तत्वम् । एतदेव दृष्टान्तावष्टम्भेन स्पष्टयति—कलञ्जेति ।

ननु तत्र युक्तो नित्यानां तु केवलशास्त्रनिमित्तत्वादनर्थार्थत्वाभावाच्चाभावो न युक्त इति चेत् । न । अविद्यारागद्वेषादिदोषवतो विहितत्वात् । यथा स्वर्गकामादिदोषवतो दर्शपौर्णमासादीनि काम्यानि कर्माणि विहितानि तथा सर्वानर्थबीजाविद्यादिदोषवतस्तज्जनितेष्टानिष्टप्राप्तिपरिहाररागद्वेषादिदोषवतश्च तत्प्रेरिताविशेषप्रवृत्तेरिष्टानिष्टप्राप्तिपरिहारार्थिनो नित्यानि कर्माणि विधीयन्ते न केवलं शास्त्रनिमित्तान्येव ।

काम्यानामज्ञानहेतुत्वानर्थार्थत्वाभ्यां विदुषस्तेषु प्रवृत्त्यभावो युक्तो नित्यानां तु शास्त्रमात्रप्रयुक्तानुष्ठानत्वान्नाज्ञानकृतत्वं प्रत्यवायाख्यानर्थध्वंसित्वाच्च नानर्थकरत्वमतस्तेषु प्रवृत्त्यभावो युक्तो न भवतीति शङ्क्यते—नन्विति । नित्यानां शास्त्रमात्रकृतानुष्ठानत्वमसिद्धमिति परिहरति—नेत्यादिना । तदेव प्राञ्चयति—यथेति । अविद्यादीत्यादिशब्देनास्मितादिक्लेशचतुष्टयोक्तिः । तैरविद्यादिभिर्जनितेष्टप्राप्तौ तादृगनिष्टप्राप्तौ च क्रमेण रागद्वेषवतः पुरुषस्येष्टप्राप्तिमनिष्टपरिहारं च वाञ्छतस्ताभ्यामेव रागद्वेषाभ्यामिष्टं मे भूयादनिष्टं मा भूदित्यविशेषकामनाभिप्रेरिताविशेषप्रवृत्तियुक्तस्य नित्यानि विधीयन्ते । स्वर्गकामः पशुकाम इति विशेषार्थिनः काम्यानि । तुल्यं तूभयेषां केवलशास्त्रनिमित्तत्वमित्यर्थः ।

---

१ ख. घ. °ज्ञानेन । २ ख. ग. घ. ङ. च. ज. झ. °र्शपूर्ण° । ३ ग. ङ. च. °द्वे° । ४ छ. °स्रविहितान्ये° । ५ ख. घ, °कत्व° । ६ ख. °ष्टनिवृत्तौ च । ७ ण. °नाभिः प्रे° ।

न चाग्निहोत्रदर्शपूर्णमासचातुर्मास्यपशुबन्धसोमानां कर्मणां स्वतः काम्यनित्यत्वविवेकोऽस्ति । कर्तृगतेन हि स्वर्गादिकामदोषेण कामार्थता । तथाऽविद्यादिदोषवतः स्वभावप्राप्तेष्टानिष्टप्राप्तिपरिहारार्थिनस्तदर्थान्येव नित्यानीति युक्तं तं प्रति विहितत्वात् । न परमात्मयाथात्म्यविज्ञानवतः शमोपायव्यतिरेकेण किंचित्कर्म विहितमुपलभ्यते । कर्मनिमित्तदेवतादि भवसाधनविज्ञानोपमर्देन ह्यात्मज्ञानं विधीयते ।

किंच काम्यानां दुष्टत्वं ब्रुवता नित्यानामपि तदिष्टमुत्पत्तिविनियोगप्रयोगाधिकारविधिरूपे विशेषाभावादित्याह—न चेति । कथं तर्हि काम्यनित्यविभागस्तत्राऽऽह—कर्तृगतेनेति । स्वर्गकामः पशुकाम इति विशेषार्थिनः काम्यविधिरिष्टं मे स्यादनिष्टं मा भूदित्यविशेषकामप्रेरितावशेषितप्रवृत्तिमतो नित्यविधिरित्युक्तमित्यर्थः । नन्वविद्यादिदोषवतो नित्यानि कर्माणीत्ययुक्तं परमात्मज्ञानवतोऽपि यावज्जीवश्रुतेस्तेषामनुष्ठेयत्वादित्याशङ्क्य श्रुतेरविरक्तविषयत्वान्नैवमित्याह—न परमात्मेति ।

[1] योगारूढस्य तस्यैव शमः कारणमुच्यते '

इति स्मृतेर्ज्ञानपरिपाके कारणं कर्मोपशम एव प्रतीयते न तथा कर्मविधिरित्यर्थः । न केवलं विहितं नोपलभ्यते चेत्याह—कर्मनिमित्तेति । यदा नास्ति त्वं संसारी किंत्वकर्तृभोक्तृ ब्रह्मासीति श्रुत्या ज्ञाप्यते तदा देवतायाः संप्रदानत्वं करणत्वं व्रीह्यादेरित्येतत्सर्वमुपमृदितं भवति । तत्कथमकर्त्रादिज्ञानवतः सेभवति कर्मविधिरित्यर्थः ।

न चोपमर्दितक्रियाकारकादिविज्ञानस्य कर्मप्रवृत्तिरुपपद्यते । विशिष्टक्रियासाधनादिज्ञानपूर्वकत्वात्क्रियाप्रवृत्तेः । न हि देशकालाद्यनवच्छिन्नास्थूलाद्वयादिब्रह्मप्रत्ययधारिणः कर्मावसरोऽस्ति । भोजनादिप्रवृत्त्यवसरवत्स्यादिति चेत् । न अविद्यादिकेवलदोषनिमित्तत्वाद्भोजनादिप्रवृत्तेरावश्यकत्वानुपपत्तेः ।

उपमृदितमपि वासनावशादुद्भविष्यति । ततश्च विदुषोऽपि कर्मविधिः स्यादित्याशङ्क्याऽऽह-न चेति । वासनावशादुद्भूतस्याऽऽभासत्वादात्मस्मृत्या पुनः पुनर्बाधाच्च विदुषो न कर्मप्रवृत्तिरित्यर्थः । किंचानवच्छिन्नं ब्रह्मास्मीति स्मरतस्तदात्मकस्य देशादिसापेक्षं कर्म निरवकाशमित्याह-नहीति । विदुषो भिक्षाटनादिवत्कर्मावसरः स्यादिति शङ्कते-भोजनादीति । अपरोक्षज्ञानवतो वा परोक्षज्ञानवतो वा भोजनादिप्रवृत्तिः । नाऽऽद्यः । अनभ्युपगमात्तमेतीतेर्बाधितानुवृत्तिमात्रत्वादग्निहोत्रादेरबा-

---

१ ग. °म्यत्वानि । २ क. ख. °काम्यादौ° । ३ ख. °रिति युक्त° । घ. °रित्य° । ४ घ. ण. °त्मज्ञा° । घ. °प्रत्तेर्बा° ।

क्षाभिमाननिमित्तस्य तथात्वानुपपत्तेरित्यभिप्रेत्याऽऽह—नेति । न द्वितीयः । परोक्षज्ञानिनः शास्त्रानपेक्षक्षुत्पिपासादिदोषकृतत्वात्तत्प्रवृत्तेरिष्टत्वादित्याह—अविद्यादीति ।

न तु तथाऽनियतं कदाचित्क्रियते कदाचिन्न क्रियते चेति नित्यं कर्मोपपद्यते । केवलदोषनिमित्तत्वात्तु भोजनादिकर्मणोऽनियतत्वं स्यात् । दोषोद्भवाभिभवयोरनियतत्वात्कामानामिव काम्येषु । शास्त्रनिमित्तकालाद्यपेक्षत्वाच्च नित्यानामनियतत्वानुपपत्तिः । दोषनिमित्तत्वे सत्यपि यथा काम्याग्निहोत्रस्य शास्त्रविहितत्वात्सायंप्रातःकालाद्यपेक्षत्वमेवम् ।

अग्निहोत्राद्यपि तथा स्यादिति चेन्नेत्याह—न त्विति । भोजनादिप्रवृत्तेरावश्यकत्वानुपपत्तिं विवृणोति—केवलेति । न तु तथेत्यादि प्रपञ्चयति—शास्त्रनिमित्तेति । तर्हि शास्त्रविहितकालाद्यपेक्षत्वान्नित्यानामदोषप्रभवत्वं भवेदित्याशङ्क्याऽऽह—दोषेति । एवं दोषकृतत्वेऽपि नित्यानां शास्त्रसापेक्षत्वात्कालाद्यपेक्षत्वमविरुद्धमित्याह—एवमिति ।

तद्भोजनादिप्रवृत्तौ नियमवत्स्यादिति चेत् । न । नियमस्याक्रियात्वात्क्रियायाश्चाप्रयोजकत्वान्नासौ ज्ञानस्यापवादकरः ।

भोजनादेर्दोषकृतत्वेऽपि——

'चातुर्वर्ण्यं चरेद्भैक्षं यतीनां तु चतुर्गुणम् ।

इत्यादिनियमवद्विदुषोऽग्निहोत्रादिनियमोऽपि स्यादिति शङ्कते—तद्भोजनादीति । विदुषो नास्ति भोजनादिनियमोऽतिक्रान्तविधित्वात् । न चैतावता यथेष्टचेष्टापत्तिरधर्माधीनाऽविवेककृता हि सा । न च तौ विदुषो विद्येते अतोऽविद्यावस्थायामप्यसती यथेष्टचेष्टा विद्यादशायां कुतः स्यात् । संस्कारस्याप्यभावात् । बाधितानुवृत्तेश्च । अग्निहोत्रादेस्त्वनाभासत्वान्न बाधितानुवृत्तिरित्याह—नेति । किंचाविदुषां विविदिषूणामेष नियमः । तेषां विधिनिषेधगोचरत्वात् । न च तेषामप्येष ज्ञानोदयपरिपन्थी । तस्यान्यनिवृत्तिरूपस्य स्वयंक्रियात्वाभावात् । नापि स क्रियामाक्षिपन्ब्रह्मविद्यां प्रतिक्षिपति । अन्यनिवृत्त्यात्मनस्तदाक्षेपकत्वासिद्धेरित्याह—नियमस्यति ।

तस्मात्परमात्मयाथात्म्यज्ञानविधेरपि तद्विपरीतस्थूलद्वैतादिज्ञाननिवर्तकत्वात्सामर्थ्यात्सर्वकर्मप्रतिषेधविध्यर्थत्वं संपद्यते । कर्मप्रवृत्त्यभावस्य तुल्यत्वाद्यथा प्रतिषेधविषये । तस्मात्प्रतिषेधविधिवच्च वस्तुप्रतिपादनं तत्परत्वं च सिद्धं शास्त्रस्य ॥ १ ॥

---

१ क. ख. °क्षकत्वा° । २ च. °त्वात्तु नि° । घ. ज. °त्वान्नित्या° । ३ च. ण. °त्वे घ. स° । ४ क ख. ञ. न तौ । ५ ग. °नं वस्तुपर° ।

कर्मसु रागादिमतोऽधिकाराद्विरक्तस्य ज्ञानाधिकाराज्ज्ञानिनो हेत्वभावादेव कर्माभावात्तस्य भोजनाद्यतुल्यत्वात्तत्त्वमादेः सर्वव्यापारोपरमात्मकज्ञानहेतोर्निवर्तकत्वेन प्रामाण्यं प्रतिपादितमुपसंहरति—तस्मादिति । तस्य विधिरुत्पादकं वाक्यम् । तस्य निषेधवाक्यवत्तत्त्वज्ञानहेतोस्तद्विरोधिमिथ्याज्ञानध्वंसित्वादशेषव्यापारनिवर्तकत्वेन कूटस्थवस्तुनिष्ठस्य युक्तं प्रामाण्यम् । मिथ्याज्ञानध्वंसे हेत्वाभावे फलाभावश्चैतेन सर्वकर्मनिवृत्तेरित्यर्थः । तत्पदोपात्तं हेतुमेव स्पष्टयति—कर्मप्रवृत्तीति यथा प्रतिषेध्ये भक्षणादौ प्रतिषेधशास्त्रवशात्प्रवृत्त्यभावस्तथा तत्त्वमस्यादिवाक्यसामर्थ्यात्कर्मस्वपि प्रवृत्त्यभावस्य तुल्यत्वात्प्रामाण्यमपि तुल्यमित्यर्थः । प्रतिषेधशास्त्रसाम्ये तत्त्वमस्यादिशास्त्रस्योच्यमाने तथैव निवृत्तिनिष्ठत्वं स्यान्न वस्तुप्रतिपादकत्वमित्याशङ्क्याऽऽह—तस्मादिति । प्रतिषेधो हि प्रसक्तक्रियां निवर्तयंस्तदुपलक्षितौदासीन्यात्मके वस्तुनि पर्यवस्यति । तथा तत्त्वमस्यादिवाक्यस्यापि वस्तुप्रतिपादकत्वमविरुद्धमित्यर्थः । वेदान्तानां सिद्धे प्रामाण्यवदर्थवादादीनामन्यपराणामपि संवादविसंवादयोरभावे स्वार्थे मानत्वंसिद्धौ सिद्धा विशुद्ध्यादिगुणवती प्राणदेवतेति चकारार्थः ॥ १ ॥

ते ह वाचमूचुस्त्वं न उद्गायेति तथेति तेभ्यो वागुदगायत् । यो वाचि भोगस्तं देवेभ्य आगायद्यत्कल्याणं वदति तदात्मने । विदुरनेन वै न उद्गात्राऽऽत्येष्यन्तीति तमभिद्रुत्य पाप्मनाऽबिध्यन्स यः स पाप्मा यदेवेदमप्रतिरूपं वदति स एव स पाप्मा ॥ २ ॥

ते देवा हैवं विनिश्चित्य वाचं वागभिमानिनीं देवतामूचुरुक्तवन्तः । त्वं नोऽस्मभ्यमुद्गायौद्गात्रं कर्म कुरुष्व वाग्देवतानिर्वर्त्यमौद्गात्रं कर्म इष्टवन्तः । तामेव चैं देवतां जपमन्त्राभिधेयामसतो मा सदूमयेति । अत्र चोपासनायाः कर्मणश्च कर्तृत्वेन वागादय एव विवक्ष्यन्ते । कस्मात् । यस्मात्परमार्थतस्तत्कर्तृकस्तद्विषय एव च सर्वो ज्ञानकर्मसंव्यवहारः । वक्ष्यति हि " ध्यायतीव लेलायतीव " इत्यात्मकर्तृकत्वाभावं विस्तरतः षष्ठे । इहापि चाध्यायान्त उपसंहरिष्यत्यव्याकृ-

---

१ घ. ञ. ण. °षेधा हि । २ घ. ञ. ण. °तंयन्तस्त° । ३ घ. ञ. ण. °स्यन्ति । त° । ४ घ. ण. °सिद्धेः सि° । ५ ग. घ. ङ. च. ज. झ. °वं नि° । ६ ङ. च. वाचं दे° ।

तादिक्रियाकारकफलजातम् "त्रयं वा इदं रूपं कर्म" इत्यविद्याविषयम् । अव्याकृतात्तु यत्परं परमात्माख्यं विद्याविषयमनामरूपकर्मात्मकं नेति नेतीतीतरप्रत्याख्यानेनोपसंहरिष्यति पृथक् । यस्तु वागादिसमाहारोपाधिपरिकल्पितः संसार्यात्मा तं च वागादिसमाहारपक्षपातिनमेव दर्शयिष्यत्येतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यतीति । तस्माद्युक्ता वागादीनामेव ज्ञानकर्मकर्तृत्वफलप्राप्तिविवक्षा ।

ज्ञानमिह परीक्ष्यमाणमित्येतत्प्रसङ्गागतं विचार परिसमाप्य ते ह वाचमित्यादि व्याचष्टे—ते देवा इति । अचेतनाया वाचो नियोज्यत्वं वारयति—वागभिमानिनीमिति । नियोक्तॄणां देवानामभिप्रायमाह—वाग्देवतेति । नन्वौद्गात्रं कर्म जपमन्त्रप्रकाश्या देवता निर्वर्तयिष्यति ननु वाग्देवतेति तत्राऽऽह—तामेवेति । अतस्तो मा सद्गमयेति जपमन्त्राभिधेयां दृष्टवन्त इति पूर्वेण संबन्धः । वागाद्याश्रयं कर्तृत्वादि दर्शयतोऽर्थवादस्य प्रासङ्गिकं तात्पर्यमाह—अत्र चेति । आत्माश्रये कर्तृत्वादाववभासमाने तस्य वागाद्याश्रयत्वमयुक्तमित्याह—कस्मादिति । परस्य जीवस्य वा कर्तृत्वादि विवक्षितमिति विकल्प्याऽऽद्यं दूषयति—यस्मादिति । विचारदशायां वागादिसंघातस्य क्रियादिशक्तिमत्त्वात्कर्तृत्वादिस्तदाश्रयो यस्मात्प्रतीतस्तस्मात्परस्याऽऽत्मनः स्वतस्तच्छक्तिशून्यस्य न तदाश्रयत्वमित्यर्थः । किंचाविद्याश्रयः सर्वो व्यवहारो न तद्धीने परस्मिन्नवतरतीत्याह—तद्विषय इति । "कर्तृशास्त्रार्थवत्त्वात्" इति न्यायेन कर्तृत्वमात्मनोऽङ्गीकर्तव्यमित्याशङ्क्य 'यथा च तक्षोभयथा' इति न्यायादौपाधिकं तस्मिन्कर्तृत्वमित्यभिप्रेत्याऽऽह—वक्ष्यति हीति । यदुक्तमविद्याविषयः सर्वो व्यवहार इति तत्र वाक्यशेषमनुकूलयति—इहापीति । इतश्च परस्मिन्नात्मनि कर्तृत्वादिव्यवहारो नास्तीत्याह—अव्याकृतादस्तीति । अनामरूपकर्मात्मकमित्यस्मादुपरिष्टात्तत्पदमध्याहर्तव्यं पृथगविद्याविषयात्क्रियाकारकफलजातादिति शेषः । मा भूत्परमात्मा कर्तृत्वाद्याश्रयो जीवस्तु स्यादिति द्वितीयमाशङ्क्याऽऽह—यस्त्विति । जीवशब्दवाच्यस्य विशिष्टस्य कल्पितत्वान्न तात्त्विकं कर्तृत्वादिकं किंतु तद्द्वारा स्वरूपे समारोपितमिति भावः । आत्मनि तात्त्विककर्तृत्वाद्यभावे फलितमर्थवादतात्पर्यमुपसंहरति—तस्मादिति ।

तथेति तथाऽस्त्विति देवैरुक्ता वाक्तेभ्योऽर्थिभ्योऽर्थायोद्गायदुद्गानं कृतवती । कः पुनरसौ देवेभ्योऽर्थायोद्गानकर्मणा वाचां निर्वर्तितः कार्यविशेष इति । उच्यते—यो वाचि निमित्तभूतायां वागादिसमुदायस्य य

१ ण. °ध्याहार्यं पृ° । २ छ. °दुद्गीतं कृ° ।

उपकारो निष्पद्यते वदनादिव्यापारेण स एव। सर्वेषां ह्यमौ वाग्वद-नाभिनिर्वृत्तो भोगः फलम्। तं भोगं सा त्रिषु पवमानेषु कृत्वाऽवशि-ष्टेषु नवसु स्तोत्रेषु वाचनिकमार्त्विज्यं फलं यत्कल्याणं शोभनं वदति वर्णानभिनिर्वर्तयति तदात्मने मह्यमेव। तद्धयसाधारणं वाग्देवतायाः कर्म यत्सम्यग्वर्णानामुच्चारणमतस्तदेव विशेष्यते यत्कल्याणं वदतीति। यत्तु वदनकार्यं सर्वसंघातोपकारात्मकं तद्याजमानमेव।

तात्पर्यमर्थवादस्योक्त्वा नियुक्तया वाग्देवतया यत्कृतं तदुपन्यस्यति—तथेत्या-दिना। उद्गातृत्वं जपमन्त्रप्रकाश्यत्वं चाऽऽत्मनोऽङ्गीकृत्य वागुद्गाने प्रवृत्ता चेत्तया कश्चिदुपकारो देवानामुद्गानेन निर्वर्तनीयः स च नास्तीति शङ्कते—कः पुनरिति। वदनादिव्यापारे सति यः सुखविशेषः संघातस्य निष्पद्यते स एव कार्यविशेष इत्याह—उच्यत इति। यो वाचीति प्रतीकमादाय व्याख्यायते कथं पुनर्वाचो वचनं चक्षुषो दर्शनमित्यादिना निष्पन्नं फलं सर्वसाधारणमित्याशङ्क्यानुभवमनु-सृत्याऽऽह—सर्वेषामिति। किंच देवार्थमुद्गायन्त्या वाचः स्वार्थमपि किंचिदु-द्गानमस्ति। तथा च ज्योतिष्टोमे द्वादश स्तोत्राणि तत्र त्रिषु पवमानाख्येषु स्तोत्रेषु याजमानं फलमुद्गानेन कृत्वा शिष्टेषु नवसु स्तोत्रेषु यत्कल्याणवदनसामर्थ्यं तदा-त्मने स्वार्थमेवाऽऽगायदित्याह—तं भोगमिति। ऋत्विजां क्रीतत्वान्न फलसंबन्धः संभवतीत्याशङ्क्याऽऽह—वाचनिकमिति। 'अथाऽऽत्मनेऽन्नाद्यमागायेत्' इति श्रुतमित्यर्थः। कल्याणवदनसामर्थ्यस्य स्वार्थत्वं समर्थयते—तद्धीति। कल्याणवदनं वाचोऽसाधारणं चेत्कस्तर्हि यो वाचीत्यादेर्विषयस्तत्राऽऽह—यत्त्विति।

तत्र कल्याणवदनात्मसंबन्धासङ्गावसरं देवताया रन्ध्रं प्रतिलभ्य ते विदुरसुराः कथमनेनोद्गात्रा नोऽस्मान्स्वाभाविकं ज्ञानं कर्म चाभिभूया[1]-दित्य शास्त्रजनितकर्मज्ञानरूपेण ज्योतिषोद्गात्रात्मनाऽत्येष्यन्त्यतिगमि-ष्यन्तीत्येवं विज्ञाय तमुद्गातारमभिद्रुत्याभिगम्य स्वेनाऽऽसङ्गलक्षणेन पाप्मनाऽविध्यंस्ताडितवन्तः। संयोजितवन्त इत्यर्थः। स यः स पाप्मा प्रजापतेः पूर्वजन्मावस्थस्य वाचि क्षिप्तः स एष प्रत्यक्षी क्रियते। कोऽसौ। यदेवेदमप्रतिरूपमननुरूपं शास्त्रप्रतिषिद्धं वदति येन प्रयुक्तोऽसभ्यवी-भत्सानृतादीनिच्छन्नपि वदति। अनेन कार्येणाप्रतिरूपवदनेनानुगम्य-मानः प्रजापतेः कार्यभूतासु प्रजासु वाचि वर्तते। स एवाप्रतिरूपवद-

---

१ ग. घ. °र्वेषामसौ। २ क. ख. झ. °मानिकम°। ३ क. ख. रन्धमेव प्र°। ४ ख. जक°।

नेनानुमितः स प्रजापतेर्वाचि गतः पाप्मा कारणानुविधायि हि कार्यमिति ॥ २ ॥

वाग्देवतायामसुराणामवकाशं दर्शयति—तत्रेति । स्वार्थे परार्थे चोद्गाने सतीति यावत् । कल्याणवदनस्याऽऽत्मना वाचैव संबन्धे योऽयमासङ्गोऽभिनिवेशः स एवावसरो देवतायास्तमवसरं प्राप्येत्यर्थः । अवसरमेव व्याकरोति—**रन्ध्रमिति** । अस्मानतीत्येति संबन्धः । कोऽसावसुरात्ययस्तं व्याचष्टे—**स्वाभाविकमिति** । तत्रोपायमुपन्यस्यति—**शास्त्रेति** । असुरानभिभूय केनाऽऽत्मना देवाः स्थास्यन्तीति विवक्षायामाह—**ज्योतिषेति** । प्रजापतेर्वाचि पाप्मा क्षिप्तोऽसुरैरिति कुतोऽवगम्यते तत्राऽऽह—**स यः स पाप्मेति** । प्रतिषिद्धवदनमेव पाप्मेत्ययुक्तमदुष्टस्य क्रियातिरिक्तत्वाङ्गीकारादित्याशङ्क्याऽऽह—**येनेति** । असभ्यं सभानर्हं स्त्रीवर्जनादि । बीभत्सं भयानकं प्रेतादिवर्णनम् । अनृतमयथादृष्टवचनम् । आदिशब्दात्पिशुनत्वं गृह्यते । किमत्र प्रजापतेर्वाचि पाप्मसत्त्वे मानमुक्तं भवतीत्याशङ्क्याह स एव स पाप्मेति व्याकरोति—**अनेनेति** । प्राजापत्यासु प्रजासु प्रतिपन्नेनानृतत्यवदनादिना लिङ्गेन तद्वाचि पाप्माऽनुमीयते । विमतं पाप्मपूर्वकं प्रतिकूलवीर्यविषयत्वाद्दुःखवद्यः स पाप्मा प्रजावाच्यनुमितः स एव प्रजापतिवाचि पाप्मानं गमयति । विमतं कारणपूर्वकं कार्यत्वाद्घटवत् । न च प्रजागतं दुरितं प्राजापत्यं तद्विना हेत्वन्तरादेव स्यात्कारणानुविधायित्वात्कार्यस्य । न च तत्कारणेऽपि परस्मिन्प्रसङ्गः ' अपापविद्धम् ' इति श्रुतेः । न च ' न ह वै देवान्पापं गच्छति ' इति श्रुतेर्न सूत्रेऽपि पापवेधस्तस्य फलावस्थत्वेऽपि यजमानावस्थस्य तद्भावादित्यर्थः । आद्यसकाराभ्यां कारणस्थं पाप्मानमनूद्य तस्यैव कार्यस्थत्वमुच्यते । उत्तराभ्यां तु कार्यस्थं पाप्मानमनूद्य तस्यैव कारणस्थत्वमिति विभागः ॥ २ ॥

> अथ ह प्राणमूचुस्त्वं न उद्गायेति तथेति तेभ्यः प्राण उदगायद्यः प्राणे भोगस्तं देवेभ्य आगायद्यत्कल्याणं जिघ्रति तदात्मने । विदुरनेन वै न उद्गात्राऽऽत्येष्यन्तीति तमभिदुत्य पाप्मनाऽविध्यत्स यः स पाप्मा यदेवेदमप्रतिरूपं जिघ्रति स एव स पाप्मा ॥ ३ ॥
>
> अथ ह चक्षुरूचुस्त्वं न उद्गायेति तथेति तेभ्यश्चक्षु-

१ ग. झ. °पतिवाचि । २ ग. ङ. छ. ज. झ. °चि पा° । ३ ञ. ण. °वदनम् ।

रुदगायत् । यश्चक्षुषि भोगस्तं देवेभ्य आगायद्यत्कल्याणं पश्यति तदात्मने । ते विदुरनेन वै न उद्गात्राऽत्येष्यन्तीति तमभिद्रुत्य पाप्मनाऽविध्यन्स यः स पाप्मा यदेवेदमप्रतिरूपं पश्यति स एव स पाप्मा ॥ ४ ॥

अथ ह श्रोत्रमूचुस्त्वं न उद्गायेति तथेति तेभ्यः श्रोत्रमुदगायद्यः श्रोत्रे भोगस्तं देवेभ्य आगायद्यत्कल्याणꣳ शृणाति तदात्मने । तं विदुरनेन वै न उद्गात्राऽत्येष्यन्तीति तमभिद्रुत्य पाप्मनाऽविध्यन्स यः स पाप्मा यदेवेदमप्रतिरूपꣳ शृणोति स एव स पाप्मा ॥ ५ ॥

अथ ह मन ऊचुस्त्वं न उद्गायेति तथेति तेभ्यो मन उदगायद्या मनसि भोगस्तं देवेभ्य आगायद्यत्कल्याणꣳ संकल्पयति तदात्मने । ते विदुरनेन वै न उद्गात्राऽत्येष्यन्तीति तमभिद्रुत्य पाप्मनाऽविध्यन्स यः स पाप्मा यदेवेदमप्रतिरूपꣳ संकल्पयति स एव स पाप्मैवꣳ खल्वेता देवताः पाप्मभिरुपासृजन्नेवमेनाः पाप्मनाऽविध्यन् ॥ ६ ॥

तथैव घ्राणादिदेवता उद्गीथनिर्वर्तकत्वाज्जपमन्त्रप्रकाश्या उपास्याश्चेति क्रमेण परीक्षितवन्तः । देवानां चैतन्निश्चितमासीत् । वागादिदेवताः क्रमेण परीक्ष्यमाणाः कल्याणविषयविशेषात्मसंबन्धासङ्गहेतोरसुरापाप्मसंसर्गादुद्गथनिर्वर्तनासमर्थाः । अतोऽनभिधेया असतो मा सद्गमयेत्यनुपास्याश्चाशुद्धत्वादितराव्यापकत्वाच्चेति । एवमु खल्वनुक्ता अप्येतास्त्वगादिदेवताः कल्याणाकल्याणकार्यदर्शनादेवं वागादिवदेवैना

१ ग. छ. °व प्राणा° । २ घ. ज. °तोश्वासु° । ३ ग. घ. ङ. च. ज. °र्तनेऽस° । ४ ङ. च. °ताः क्रमेण परीक्ष्यमाणाः क° । ५ च. °ल्याण° ।

पाप्मनाऽविध्यन्पाप्मना विद्धवन्त इति यदुक्तं तत्पाप्मभिरुपासृजन्पाप्मभिः संसर्गं कृतवन्त इत्येतत् । वागादिदेवता उपासीना अपि मृत्यवतिगमनायाशरणाः सन्तो देवाः क्रमेण ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥

वाग्देवताया जपमन्त्रप्रकाशत्वमुपास्यत्वं च नेति निर्धार्यावशिष्टपर्यायचतुष्टयस्य तात्पर्यमाह—तथैवेति । परीक्षाफलनिर्णयमाह—देवानां चेति । अनुपास्यत्वे हेत्वन्तरमाह—इतरेति । इतरः कार्यकारणसंघातस्तस्मिन्नव्यापकत्वं परिच्छिन्नत्वमतश्चानुपास्यत्वं जपमन्त्रप्रकाशत्वं चेत्यर्थः । उक्तैरिन्द्रियैरनुक्तेन्द्रियाण्युपलक्षणीयानीति विवक्षित्वोपसंहरति—एवमिति । वागादिवत्त्वगादिषु कल्पकाभावान्न पाप्मवेधोऽस्तीत्याशङ्क्याऽऽह—कल्या गेति । पाप्मभिरुपासृजन्पाप्मनाऽविध्यन्नित्ययोरस्ति पौनरुक्त्यमित्याशङ्क्य व्याख्यानव्याख्येयभावान्नैवमित्याह—इति यदुक्तमिति । संतति मुख्यप्राणस्य मन्त्रप्रकाशत्वमुपास्यत्वं च वक्तुमुत्तरवाक्यमुपादाय व्याकरोति—वागादीति । क्रमेणोपासीना इति संबन्धः ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥

अथ हेममासन्यं प्राणमूचुस्त्वं न उद्गायेति तथेति तेभ्य एष प्राण उदगायत्तं विदुरनेन वै न उद्गात्राऽऽत्येष्यन्तीति तदभिद्रुत्य पाप्मनाऽविध्यत्सन्स यथाऽश्मानमृत्वा लोष्टो विध्वꣳसतैवꣳहैव विध्वꣳसमाना विष्वञ्चो विनेशुस्तस्तो देवा अभवन्पराऽसुरा भवत्यात्मना पराऽस्य द्विषन्भ्रातृव्यो भवति य एवं वेद ॥ ७ ॥

अथानन्तरं हेममित्यभिनयप्रदर्शनम् । आसन्यमास्ये भवमासन्यं मुखान्तर्बिलस्थं प्राणमूचुस्त्वं न उद्गायेति । तथेत्येवं शरणमुपगतेभ्यः स एष प्राणो मुख्य उदगायदित्यादि पूर्ववत् । पाप्मनाऽविध्यत्सन्वेधनं कर्तुमिष्टवन्तस्ते च दोषासंसर्गिणं सन्तं मुख्यं प्राणम् । स्वेनाऽऽसङ्गदोषेण वागादिषु लब्धप्रसरास्तदभ्यासानुवृत्त्या संश्लिष्यमाणा विनेशुर्विनष्टा विध्वस्ताः ।

---

१ ञ. °र्थकर° । २ झ. ञ °त्व चेति व° । ३ ञ. ण. °त्तरं वा° । ४ ख. ग. ङ. °र्शनार्थम् । ५ ख. ङ. छ. ज. झ. °रणो° । ६ क. ग. च. झ. °संलक्ष्यमा° ।

वागादिषु नैराश्यानन्तर्यमथ शब्दार्थः । विवक्षितार्थज्ञापकोऽसाधारणो देहतद्वयवव्यापारोऽभिनयः । दोषासंसर्गिणं दोषेण संसृष्टं कर्तुमिच्छा कुतो जातेत्याशङ्क्याऽऽह—**स्वेनेति** । तदभ्यासानुवृत्त्या तस्य पाप्मसंसर्गकरणस्याभ्यासवशादिति यावत् ।

कथमिवेति दृष्टान्त उच्यते—स यथा स दृष्टान्तो यथा **लोकेऽश्मानं पाषाणमृत्वा गत्वा प्राप्य लोष्टः** पांसुपिण्डः पाषाणचूर्णनायाश्मनि निक्षिप्तः **स्वयं विध्वंसेत** विस्रंसेत विचूर्णी भवेत्, **एवं हैव यथाऽयं दृष्टान्त एवमेव विध्वंसमाना** विशेषेण ध्वंसमाना **विष्वञ्चो** नानागतयो **विनेशुर्विनष्टा यतस्ततस्तस्मादसुरावेशाद्दैवत्वप्रतिबन्धभूतेभ्यः स्वाभाविकासङ्गजनितपाप्मभ्यो** वियोगादसंसर्गधर्मिमुख्यप्राणाश्रयबलाद्देवा **वागादयः प्रकृता अभवन्** । **किमभवन्** । **स्वं देवतारूपमग्न्याद्यात्मकं वक्ष्यमाणम्** । **पूर्वमप्यग्न्याद्यात्मान एव सन्तः स्वाभाविकेन पाप्मना तिरस्कृतविज्ञानाः पिण्डमात्राभिमाना आसन्** । **ते तत्पाप्मवियोगाद्बुद्ध्वित्वा पिण्डमात्राभिमानं शास्त्रसमर्पितवागाद्यन्याद्यात्माभिमाना बभूवुरित्यर्थः । किंच ते** प्रतिपक्षभूता **असुराः पराऽभवन्नित्यनुवर्तते । पराभूता विनष्टा इत्यर्थः** ।

उक्तमर्थं दृष्टान्तेन स्पष्टयति—**कथमिवेत्यादिना** । असुरनाशेनाऽऽसङ्गजनितपाप्मवियोगे हेतुमाह—**असंसर्गेति** । वक्ष्यमाणं सोऽग्निरभवदित्यादिनेति शेषः । वागादीनां स्थितानां नष्टानां च कुतोऽग्न्यादिरूपत्वमित्याशङ्क्याऽऽह—**पूर्वमपीति** । न तर्हि तेषां परिच्छेदाभिमानः स्यादित्याशङ्क्याऽऽह—**स्वाभाविकेनेति** । परिच्छेदाभिमानादग्न्याद्यात्माभिमानस्य बलवत्त्वं सूचयति—**शास्त्रेति** । न केवलमेवोक्तानामेवासुरागमसंसर्गधर्मिप्राणाश्रयादिनाशः किंतु तत्तुल्यजातीयानामपीत्यभिप्रेत्याऽऽह—**किंचेति** ।

यथा पुराकल्पेन वर्णितः पूर्वयजमानोऽतिक्रान्तकालिक एतामेवाऽऽख्यायिकारूपां श्रुतिं दृष्ट्वा तेनैव क्रमेण वागादिदेवताः परीक्ष्य ताश्चापोह्याऽऽसङ्गपाप्मास्पददोषवत्त्वेनादोषास्पदं मुख्यं प्राणमात्मत्वेनोपगम्य वागाद्याध्यात्मिकपिण्डमात्रपरिच्छिन्नात्माभिमानं हित्वा वैराजपिण्डाभिमानं वागाद्यग्न्याद्यात्मविषयं वर्तमानप्रजापतित्वं शास्त्रप्र-

१ स. घ. °तोऽजायते° । २ च. °ति चेद्दृष्ट्वा° । ३ ग. घ. °त्वा प्रा° । ४ क. ग. ञ. ञ. पांशुपि° । ५ ङ. सन्तोऽपि स्वा° । ६ ग. ङ. ो च प्र° । ७ ञ. ण. °मप्राप्ताना° । ८ च. ज. °रीक्षिता° ।

काशितं प्रतिपन्नस्तथैवायं यजमानस्तेनैव विधिना भवति प्रजापति-स्वरूपेणाऽऽत्मना परा चास्य प्रजापतित्वप्रतिपक्षभूतः पाप्मा द्विषन्भ्रातृव्यो भवति । यतोऽद्वेष्टाऽपि भवति कश्चिद्भ्रातृव्यो भरतादितुल्यो यस्त्विन्द्रियविषयामङ्गजनितः पाप्मा भ्रातृव्यो द्वेष्टा च । पारमार्थिकात्मस्वरूपतिरस्करणहेतुत्वात् । स चैं पराभवति विशीर्यते लोष्टवत्प्राणपरिष्वङ्गात् । कस्यैतत्फलमित्याह–य एवं वेद । यथोक्तं प्राणमात्मत्वेन प्रतिपद्यते पूर्वयजमानवदित्यर्थः ॥ ७ ॥

वागादीनामग्न्यादिभावापत्तिवचनेन तत्संहतस्य यजमानस्य देवताप्राप्तिरासुरपाप्मध्वंसश्च फलमित्युक्तं तत्र पूर्वकल्पीययजमानस्यातिशयशालित्वाद्यथोक्तफलवत्त्वेऽपि नेदानींतनस्येवमित्याशङ्क्य भवतीत्यादिश्रुतिप्रवतारयति–यथेति । पूर्वकल्पनाप्रकारेण पूर्वजन्मस्थो यजमानः शास्त्रप्रकाशितं वर्तमानप्रजापतित्वं प्रतिपन्नो यथेति संबन्धः । पूर्वयजमान इत्यस्य व्याख्याऽतिक्रान्तकालिक इति । पुराकल्पमेव दर्शयति–एतामिति । तेनेति । श्रुत्युक्तेनेत्येतत् । तेनैव विधिना श्रुतिप्रकाशितेन क्रमेण मुख्यं प्राणमात्मत्वेनोपगम्येति शेषः । सपत्नो भ्रातृव्यस्तस्य द्विषन्निति कुतो विशेषणमर्थसिद्धत्वाद्द्वेषस्येत्याशङ्क्याऽऽह–यत इति । तस्य द्वेष्टृत्वनियमे हेतुमाह पारमार्थिकेति । अपरिच्छिन्नदेवतात्वमत्र पारमार्थिकमात्मस्वरूपं विवक्षितं तत्तिरस्करणकारणत्वादुक्तपाप्मनो विशेषणमर्थवादिति शेषः । यदाग्नेयोऽष्टाकपाल इतिवद्य एवं वेदेति प्रसिद्धार्थोपबन्धेऽपि विधिपरं वाक्यमतश्चैवं विद्यादिति विधि (ब) क्षितमित्यभिप्रेत्याऽऽह–यथोक्तमिति ॥ ७ ॥

फलमुपसंहृत्याधुनाऽऽख्यायिकारूपमेवाऽऽश्रित्याऽऽह । कस्माच्च हेतोर्वागादीन्मुक्त्वा मुख्य एव प्राण आत्मत्वेनाऽऽश्रयितव्य इति तदुपपत्तिनिरूपणाय यस्मादयं वागादीनां पिण्डादीनां च साधारण आत्मेत्येवमर्थमाख्यायिकया दर्शयन्त्याह श्रुतिः—

ते होचुः क नु सोऽभूद्यो न इत्थमसक्तेत्ययमास्येऽन्तरिति सोऽयास्य आङ्गिरसोऽङ्गानां हि रसः ॥ ८ ॥

ते प्रजापतिप्राणा मुख्येन प्राणेन परिप्रापितदेवस्वरूपा होचुरुक्तवन्तः फलावस्थाः । किमित्याह[1] । क न्विति वितर्के । क नु कस्मिन्न सोऽभूत् ।

---

१ झ. च. पाप्मा प । २ ब. °र्दीन्हित्वा मु° । ३ख. °ह श्रुतिः । क । ग. च. °ह । न्वि° ।

कः। यो नोऽस्मानित्थमेवमसक्त सञ्जितवान्देवभावमात्मत्वेनोपगामितवान्। स्मरन्ति हि लोके केनचिदुपकृता उपकारिणं लोकवदेव स्मरन्तो विचारयमाणाः कार्यकरणसंघात आत्मन्येवोपलब्धवन्तः।

फलवत्प्रधानोपास्तेरुक्तत्वात्ते होचुरित्याद्युत्तरवाक्यं गुणोपास्तिपरमित्याह—**फलमिति**। फलवन्तं प्रधानविधिमुक्त्वा संप्रत्याख्यायिकामेवाऽऽश्रित्य गुणविशिष्टं प्राणोपासनमाहानन्तरश्रुतिरित्यर्थः। शङ्कोत्तरत्वेन चोत्तरग्रन्थमवतारयति—**कस्माच्चेति**। विशुद्धत्वस्योक्तत्वाद्धेत्वन्तरं जिज्ञास्यमिति द्योतयितुं चशब्दः। करणानां कार्यस्य तदवयवानां च प्राणो यस्मादात्मा व्यापकस्तस्मात्स एवाऽऽश्रयितव्य इत्युपपत्तिनिरूपणार्थं तस्य व्यापकत्वमित्येतदर्थमाख्यायिकया दर्शयन्ती श्रुतिर्हेत्वन्तरमाहेति योजना। तच्छब्दस्तस्मादर्थे। प्राणस्याऽऽत्मत्वादि व्यक्तीकर्तुमाख्यायिकाश्रुतिं विभजते—**ते प्रजापतीति**। वागादयश्चेत्प्राणमाश्रित्य फलावस्थास्तर्हि किमिति प्राणं स्मरन्ति प्राप्तफलत्वादित्याशङ्क्याऽऽह—**स्मरन्ति हीति**। विचारफलमुपलब्धिं कथयति—**लोकवदिति**।

कथम्, अयमास्येऽन्तरिति, आस्ये मुखे य आकाशस्तस्मिन्नन्तरयं प्रत्यक्षो वर्तत इति। सर्वो हि लोको विचार्याध्यवस्यति। तथा देवाः। यस्मादयमन्तराकाशे वागाद्यात्मत्वेन विशेषमनाश्रित्य वर्तमान उपलब्धो देवैः, तस्मात्स प्राणोऽयास्यो विशेषानाश्रयाच्चासक्त सञ्जितवान्वागादीन्। अत एवाऽऽङ्गिरस आत्मा कार्यकरणानाम्। कथमाङ्गिरसः। प्रसिद्धं ह्येतदङ्गानां कार्यकरणलक्षणानां रसः सार आत्मेत्यर्थः। कथं पुनरङ्गिरसत्वं तदपाये शोषप्राप्तेरिति वक्ष्यामः। यस्माच्चायमङ्गिरसत्वाद्विशेषानाश्रितत्वाच्च कार्यकरणानां साधारण आत्मा विशुद्धश्च तस्माद्वागादीनपास्य प्राण एवाऽऽत्मत्वेनाऽऽश्रयितव्य इति वाक्यार्थः। आत्मा ह्यात्मत्वेनोपगन्तव्योऽविपरीतबोधाच्छ्रेयःप्राप्तेर्विपर्यये चानिष्टप्राप्तिदर्शनात्॥ ८॥

तामेवोपलब्धिमाकाङ्क्षाद्वारेण विवृणोति—**कथमिति**। दृष्टान्तं स्पष्टयति—**सर्वो हीति**। तथा देवा विचार्य प्राणमास्यान्तराकाशस्थं निर्धारितवन्त इत्याह—**तथेति**।

---

१ घ. ङ. छ. ज झ °भावायाऽऽत्म°। २ ख. घ ङ. च. ज. °र्यकार°। ३ ख. ञ. ण. °त्याशङ्क्याऽऽह। ४ ङ. झ. °श्रयत्वाच्चा°। ५ ग. ञ °र्यकार°। ६ ग. ङ. ज. °र्यकार°। ७ ख. °न राङ्गिर°। ८ ग. °ङ्गसारत्वं। ९ ख. °यमाङ्गिर°। १० क. °नाश्रयत्वा°। ११ ज. °र्यकार°।

किमनया कथया सिद्धतित्याशङ्क्याऽऽह—यस्मादिति । उपलब्धिसिद्धेऽर्थे युक्तिं समुच्चिनोति—विशेषतीति । सर्वेषु वागादीनविशेषेणाङ्गित्वादिभावेन प्राणः सङ्गिरतान् । न चाप्यध्यस्थः साधारणं कर्म निर्वर्तयति । अतो युक्तितोऽप्ययमास्यान्तराकाशे वर्तमानः सिद्ध इत्यर्थः । असाधारणत्ववदाङ्गिरसत्वं गुणान्तरं दर्शयति—अत एवेति । सर्वसाधारणत्वादिति यावत् । तथाऽपि कुतोऽस्याङ्गिरसत्वं साधारणेऽपि नभसि तदनुपलब्धेरित्याशङ्क्य परिहरति—कथमित्यादिना । अङ्गेषु चरमधातोः सारत्वप्रसिद्धेर्वं प्राणस्य तथात्वमिति मत्वा समाधत्ते—कथं पुनरित्यादिना । कस्माच्च हेतोरित्यादिचोद्यपरिहारमुपसंहरति—यस्माच्चेति । वाक्यार्थं प्रश्नपूर्वकं प्रपञ्चयति—आत्मा ह्येति ॥ ८ ॥

स वा एषा देवता दूनांम दूरꣳ ह्यस्या मृत्युर्दूरꣳ ह वा अस्मान्मृत्युर्भवति य एवं वेद । ९ ॥

स्यान्मतं प्राणस्य विशुद्धिर्सिद्धेति । ननु परिहृतमेतद्वागादीनां कल्याणवदन यावाङ्गिरसत्वात्प्राणस्याङ्गित्वसम्पदत्वाभावेन । बाढम् । किंत्वाङ्गिरसत्वेन वागादीनामात्मसंस्तुत्या वागादिद्वारेण शवस्पृष्टितत्स्पृष्टेरिवाशुद्धता शङ्क्यत इत्याह मुख्य एव प्राणः । कुतः, सा वा एषा देवता दूनांम यं प्राणं प्राप्ताइज्ञानं व लोष्टवद्विध्वस्ता असुरास्तं परामृशतिं मेति । सेवषा यंयं वर्तमानयजमानशरीरस्था देवैर्निर्धारिताऽयमास्येऽन्तरिति । देवता चैं सा स्यात उपामनक्रियायाः कर्मभावेन गुणभूतत्वात् । यस्मा-सा दूनांम दूरित्येवं ख्याता । नामशब्दः ख्यापनपर्यायः तस्मात्प्रसिद्धाऽस्या विशुद्धिर्दूनांमत्वात् । कुतः पुनर्दूनांमत्वमित्याह—दूरं दूरे हि यस्मादस्याः प्राणदेवताया मृत्युरासङ्गलक्षणः पाप्माऽसंश्लेषधर्मि वा प्राणस्य समीपस्थस्यापि दूरता मृत्योस्तस्माद्दूरित्येवं ख्यातिरेव प्राणस्य विशुद्धिर्ज्ञापिका । विदुषः फलमुच्यते—दूरं ह वा अस्मान्मृत्युर्भवति । अस्मादेवंविदो य एवं वेद तस्मादेवमिति प्रकृतं विशुद्धिगुणोपेतं प्राणमुपास्त इत्यर्थः । उपासनं नामोपास्यार्थवादे यथा देवतादिस्वरूपं श्रुत्या ज्ञाप्यते तथा मनसोपगम्याऽऽसनं चिन्तनं लौकिकप्रत्ययाव्यवधानेन यावत्तद्देवतादिस्वरूपा-

---

१ ण. °ह । तस्मा° । २ ण °त्याशङ्क्य स । ३ घ. ङ. °स्पृशस्तत्स्पृष्टेरि° । ४ घ. छ. ज. °ति श्रुतिः । से° । ख °ति स । ५ क. ग. ड. घ. झ. च. स्या° । ६ ख. °द्धिख्यापिकाऽऽख्यायिका । च. °द्धिख्यापिका । ७ ख. छ. °दिरू° ।

त्माभिमानाभिव्यक्तिरिति लौकिकात्माभिमानवत् । "देवो भूत्वा देवा-
नप्येति" "किंदेवतोऽस्यां प्राच्यां दिश्यसि" इत्येवमादिश्रुतिभ्यः ॥९॥

प्राणस्य शुद्धत्वाद्व्यापकत्वाच्चोपास्यत्वमुक्तं तस्य शुद्धत्वं वागादिवदसिद्धमि-
त्याशङ्कते—स्यान्मतमिति । शङ्कामाक्षिप्य समाधत्ते—नान्वित्यादिना । शवेन
स्पृष्टिर्यस्यास्ति तेन स्पृष्टोऽपरस्तस्याशुद्धतावदशुद्धवागादिसंबन्धादशुद्धत्वाशङ्का
प्राणस्योन्मिषतीत्यर्थः । तात्पर्यं दर्शयन्नुत्तरवाक्यमुत्तरत्वेनावतारयति—आहेति ।
नन्वत्र प्राणो नोच्यते स्त्रीलिङ्गेनार्थान्तरोक्तिप्रतीतेरित्याशङ्कयाऽऽह यं प्राण-
मिति । तस्यामूर्तस्य परोक्षत्वादपरोक्षवाचो च कथमेतच्छब्दो युज्यते तत्राऽऽह—
सैवेति । कथं प्राणे देवताशब्दो न हि तस्य तच्छब्दत्वं प्रसिद्धमित्याशङ्कयाऽऽह—देवता चेति । यागे हि देवता कारकत्वेन गुणभूता प्रसिद्धा । तथा
प्राणोऽपि द्रव्याद्यन्यत्वे सति विहितक्रियागुणत्वाद्देवतेत्यर्थः । प्राणोपास्तेर्द्विविधं
फलं पापहानिर्देवताभावश्च तत्र पापहानेरेव प्रधानफलस्यात्र श्रवणाद्दुर्गुणविशिष्ट-
प्राणोपास्तिरिह विवक्षितेति वाक्यार्थमाह—यस्मादिति । न तावत्प्राणदेवतायां
मुख्यत्वं निरूढं तत्र तच्छब्दप्रसिद्धेरदर्शनान्नापि यौगिकं प्राणस्य प्रत्यग्वृत्तेर्दूर-
त्वाभावादित्याक्षिपति—कुतः पुनरिति । परिहरति—आहेति । कथं पाप्मसं-
विदो वर्धमानस्य ततो दूरत्वमित्याशङ्कयाऽऽह—असंश्लेषेति । उपास्ते सदा
मामवतीति श्रवत् । ब्रह्मज्ञानादिवं प्राणतत्त्वज्ञानात्फलसिद्धिसंभवे किं सदा तद्भा-
वनयेत्याशङ्कय भावनापर्यायोपासनशब्दार्थमाह—उपासनं नामेति । दीर्घका-
लादरनैरन्तर्यसत्कारविशेषणत्रयं विवक्षित्वाऽऽह—लौकिकेति । तस्य मर्यादां दर्श-
यति—यावदिति । मनुष्योऽहमितिवद्देवोऽहमिति यस्य जीवत एवाभिमानाभिव्य-
क्तिस्तस्यैव देहपाताद्ऊर्ध्वं तद्भावः फलतीत्यत्र प्रमाणमाह—देवो भूत्वेति । का
देवता त्वं तवेति किंदेवतोऽसीति तद्भावो भातीत्यर्थः ॥ ९ ॥

सा वा एषा देवता दूरं ह वा अस्मान्मृत्युर्भवतीत्युक्तम् । कथं पुन-
रेवंविदो दूरं मृत्युर्भवतीति । उच्यते । एवंवित्त्वविरोधात् । इन्द्रिय-
विषयसंसर्गासक्तो हि पाप्मा प्राणात्माभिमानिनो हि विरुध्यते ।
वागादिविशेषात्माभिमानहेतुत्वात्स्वाभाविकाज्ञानहेतुत्वाच्च । शास्त्रज-
नितो हि प्राणात्माभिमानस्तस्मादेवंविदः पाप्मा दूरं भवतीति युक्तं
विरोधात्तदेतत्प्रदर्शयति—

स (सा) वा एषा देवतैतासां देवतानां पाप्मानं
मृत्युमपहत्य यत्राऽऽसां दिशामन्तस्तद्गमयांचकार

---

१ घ. ण. °ची क° । ख. घ. ञ. ण. °वत्प्राग° ।

तदासां पाप्मनो विन्यदधात्तस्मान्न जनमियान्नान्त-
मियान्नेत्पाप्मानं मृत्युमन्ववायानीति ॥ १० ॥

सा वा एषा देवतेत्युक्तार्थम्। एतासां वागादीनां देवतानां पाप्मानं मृत्युं स्वाभाविकाज्ञानप्रयुक्तेन्द्रियविषयसंसर्गासङ्गजनितेन हि पाप्मना सर्वा म्रियते स ह्यतो मृत्युस्तं प्राणात्माभिमानरूपाभ्यो देवताभ्योऽपच्छि-द्यापहृत्य प्राणात्माभिमानमात्रतयैव प्राणोऽपहन्तेत्युच्यते। विरोधादेव तु पाप्मैवंविदो दूरंगमो भवति। किं पुनश्चकार देवतानां पाप्मानं मृत्युमपहत्येति, उच्यते—यत्र यस्मिन्नासां प्राच्यादीनां दिशामन्तोऽव-सानं तत्तत्र गमयांचकार गमनं कृतवानित्येतत्।

कण्डिकान्तरमवतार्य वृत्तं कीर्तयति—सा वा इति। नित्यानुष्ठानात्पापक्षया-धर्मात्पापक्षयश्रुतेः। न चेदमुपासनं नित्यं नैमित्तिकं वा देवतात्मत्वकामिनो विद्या-नात्कथं पाप्मभेवंविदो दूरे भवतीत्याक्षिपति—कथं पुनरिति। विरोधिनिमित्ते पूर्वध्वंसमावश्यकं मन्वानः समाधत्ते—उच्यत इति। उक्तमेव व्यनक्ति—इन्द्रि-येति। इन्द्रियाणां विषयेषु संसर्गे योऽभिनिवेशस्तेन जनितः पाप्मा परिच्छेदा-भिमानोऽपरिच्छिन्ने प्राणात्मन्यात्माभिमानवतो विरुध्यते परिच्छेदापरिच्छेदयो-र्विरोधस्य प्रसिद्धत्वादित्यर्थः। विरोधं साधयति—वागादीति। पाप्मनो वागा-दिविशेषवत्यात्मनि विशिष्टेऽभिमानहेतुत्वादाधिदैविकापरिच्छिन्नाभिमाने ध्वंसो युज्यते। दृश्यते हि चण्डालभाण्डावलम्बिनो जलस्य गङ्गाद्यविशेषभावापत्तावप-पेयत्वनिवृत्तिः।

"अशुच्यपि पयः प्राप्य गङ्गां याति पवित्रताम्"

इति न्यायादित्यर्थः। यच्चैसर्गिकाज्ञानजन्यं तदागन्तुकप्रमाणज्ञानेन निवर्तते यथा रज्जुसर्पादिज्ञानं नैसर्गिकाज्ञानजन्यश्च पाप्मा तेन प्रामाणिकप्राणविज्ञानेन तद्ध्वस्तिरित्याह—स्वाभाविकेति। नन्वभिमानयोर्विरोधाविशेषाद्बाध्यबाधक-त्वव्यवस्थायोगाद्द्वयोरपि मिथो बाधः स्यात्तत्राऽऽह—शास्त्रजनितो हीति। उक्तमेव पापध्वंसरूपं विद्याफलं प्रपञ्चयितुमुत्तरवाक्यमित्याह—स्वाभाविकेति। मृत्युमपहत्य यत्राऽऽसां दिशामन्तस्तद्गमयांचकारेति संबन्धः। कथं पाप्मा मृत्यु-रुच्यते तत्राऽऽह—तदेतादिति। अपहत्येत्यत्र पूर्ववदन्वयः। प्राणदेवता चेत्पाप्मानं हन्ति सदैव किं न हन्यादित्याशङ्क्याऽऽह—प्राणात्मेति। भवतु प्राणो वागा-दीनां पाप्मनोऽपहन्ता विदुषस्तु किमायातमित्याशङ्क्याऽऽह—विरोधादेवेति।

ननु नास्ति दिशामन्तः कथमन्तं गमितवानिति। उच्यते—औप-

१ स. ङ. °गतो। २ घ. ण. °स्य ति°। ३ क. ञ. हि चाण्डा°।

विज्ञानवज्जनावधिनिमित्तकल्पितत्वादिशां तद्विरोधिजनाध्युषित एव देशो दिशामन्तो देशान्तोऽरण्यमिति यद्वदित्यदोषः। तत्र गमयित्वाऽऽसां देवतानां पाप्मन इति द्वितीयाबहुवचनं विन्यदधाद्विविधं न्यग्भावेनादधात्स्थापितवती प्राणदेवता प्राणात्माभिमानगन्धेष्वन्त्यजनेष्विति सामर्थ्यादिन्द्रियसंगर्गजो हि स इति प्राण्याश्रयताऽवगम्यते। तस्मात्तमन्त्ये जनं नेयान्न गच्छत्संभाषणदर्शनादिभिर्न संसृजेत्। तत्संसर्गे पाप्मना संसर्गः स्यात्पाप्माश्रयो हि सः। तज्जनविवासं चान्तं दिगन्तशब्दवाच्यं नेयाज्जनशून्यमपि जनमपि तद्देशाधियुक्तमित्यभिप्रायः। नेदिति परिहारार्थे निपातः। इत्थं जनसंसर्गे पाप्मानं मृत्युमन्ववायानीति। अत्र अव अपार्नेत्यनुगच्छेयमित्येवं भीतो न जनमन्तं चेयादिति पूर्वेण संबन्धः॥ १०॥

अनन्ताकाशदेशत्वादिशामपि तावधित्वाऽऽशङ्क्य तावत्यपि दोषवत्त्वमिति शङ्कते—नन्विति। शास्त्रीयज्ञानकर्मसंस्कृतो जनो ब्रह्मदेहः प्रसिद्धस्तापि तदधिष्ठितत्वेन पाप्मदेशत्वात्तत्राप्यन्त्यजाधिष्ठितत्वस्य प्रसिद्धत्वात्तं जनं तदधिष्ठितं च देशमवधिं कृत्वा तेनैव निमित्तेन दिशां कल्पितत्वेनानन्तत्वाभावात्पूर्वोक्तजनातिरिक्तजनस्य तदधिष्ठितदेशस्य चान्ततोऽनिर्देश्यत्वाद्दिशो दिशामन्त इत्युक्तेश्चकाचिदनुपपत्तिरिति परिहरति—उच्यत इति। किमित्यन्त्यजनेष्वित्यधिकारापः क्रियते तत्राऽऽह—इति सामर्थ्यादिति। इन्द्रियसंसर्गे पाप्मावस्थानानुपपत्तेरित्यर्थः तामेवानुपपत्तिं साधयति—इन्द्रियेति। ननु यथोक्तो दिशामन्तस्तथा च पाप्मसंसर्गोऽस्तु तथाऽपि किमायातमित्याशङ्क्य तस्य निषेधस्त्याज्यत्वमित्याह—तस्मादिति। निषेधद्वयस्य तात्पर्यमाह—जनशून्यमपीति। प्राणोपासनाप्रकरणे निषेधश्रुतेस्तदुपासकेनैवायं निषेधोऽनुष्ठेयो न सर्वैरित्याशङ्क्याऽऽह—नेदित्यादिना। इत्थं श्रुत्युक्तं निषेधं न चेद्देहं कुर्यां ततः पाप्मानमनुगच्छेयं निषेधातिक्रमादिति सर्वस्य भयं जायते न प्राणोपासकस्यैव। अतः सर्वोऽपि पापाद्भीतो नोभयं गच्छेदाक्यं हि प्रकरणाद्बलवदित्यर्थः॥ १०॥

सा वा एषा देवतैतासां देवतानां पाप्मानं
मृत्युपहत्यायैनां मृत्युमत्यवहत्॥ ११॥

सा वा एषा देवता, तदेतत्प्राणात्मज्ञानकर्मफलं वागादीनामन्या-

---

१ छ. झ. °न्तोऽर । २ स. छ. पाप्मन. । ३ ग. घ. °यार्थो निं° । ४ स. घ ञ. ण. त्रेत्या° । ५ ञ. ण. तद्वा° । ६ क. ङ. °तो न भ° । ७ ङ. °यैता मृ° ।

द्यात्मत्वमुच्यते । अथैना मृत्युमत्यवहत् । यस्मादाध्यात्मिकपरिच्छेदकरः पाप्मा मृत्युः प्राणात्मविज्ञानेनापहतस्तस्मात्स प्राणोऽपहन्ता पाप्मनो मृत्योः । तस्मात्स एव प्राण एना वागादिदेवताः प्रकृतं पाप्मानं न मृत्युमतीत्यावहत्प्रापयत्स्वं स्वमपरिच्छिन्नमग्न्यादिदेवतात्मरूपम् ॥ ११ ॥

विविधमुपास्तिफलं पापहानिर्देवतात्मभावश्च । तत्र पापहानिमुपदिशता प्रासङ्गिकः साधारणो निषेधो दर्शितः । संप्रति देवतात्मभावं वक्तुमुत्तरवाक्यमिति प्रतीकोपादानपूर्वकमाह—सा वा एषेति । अथशब्दार्थद्योतितमर्थं कथयति—यस्मादिति । पाप्मापहन्तृत्वमनूद्यावशिष्टं भागं व्याचष्टे—तस्मात्स एवेति । ॥ ११ ॥

स वै वाचमेव प्रथमामत्यवहत्सा यदा मृत्युमत्यमुच्यत सोऽग्निरभवत्सोऽयमग्निः परेण मृत्युमतिक्रान्तो दीप्यते ॥ १२ ॥

स वै वाचमेव प्रथमामत्यवहत् । स प्राणो वाचमेव प्रथमां प्रधानामित्येतत् । उद्गीथकर्मणीतरकरणापेक्षया साधकतमत्वं प्राधान्यं तस्याः । तां प्रथमामत्यवहद्वहनं कृतवान् । तस्याः पुनर्मृत्युमतीत्योढायाः किं रूपमित्युच्यते—सा वाग्यदा यस्मिन्काले पाप्मानं मृत्युमत्यमुच्यतातीत्यामुच्यत मोचिता स्वयमेव तदा सोऽग्निरभवत्सा वाक्पूर्ववमप्यग्निरेव सती मृत्युवियोगेऽप्यग्निरेवाभवत् । एतावांस्तु विशेषो मृत्युवियोगे । सोऽयमतिक्रान्तोऽग्निः परेण मृत्युं परस्तान्मृत्योर्दीप्यते । प्राङ्मोक्षान्मृत्युप्रतिबद्धोऽध्यात्मवागात्मना नेदानीमिव दीप्तिमानासीदिदानीं तु मृत्युं परेण दीप्यते मृत्युवियोगात् ॥ १२ ॥

सामान्योक्तमर्थं विशेषेण प्रपञ्चयति—स वै वाचमित्यादिना । कथं वाचः प्राथम्यं तदाह—उद्गीथेति वाचो मृत्युमतिक्रान्ताया रूपं प्रश्नपूर्वकं प्रदर्शयति—तस्या इति । अनग्नेरग्नित्वविरोधं धुनोति—सा वागिति । पूर्वमपि वाचोऽग्नित्वेनोपासनालभ्यं तदग्नित्वमित्याशङ्क्याऽऽह—एतावानिति । उक्तं विशेषं विशदयति—प्रागिति ॥ १२ ॥

---

१ च. अथैता । २ ग. घ. ङ. छ. ज. एता । ३ ग च. ङ. °तारू° । ४ च. °र्मणि चैत° । ५ ग. च. °योगादप्य° । ६ ग. च. छ. ज. झ. °ध्यात्मं वा° ।

अथ प्राणमत्यवहत्स यदा मृत्युमत्यमुच्यत स वायु-
रभवत्सोऽयं वायुः परेण मृत्युमतिक्रान्तः पवते ॥ १३ ॥

तथा प्राणो घ्राणं वायुरभवत् । स तु पवते मृत्युं परेणातिक्रान्तः । सर्वमन्यदुक्तार्थम् ॥ १३ ॥

॥ १३ ॥

अथ चक्षुरत्यवहत्तद्यदा मृत्युमत्यमुच्यत स आदि-
त्योऽभवत्सोऽसावादित्यः परेण मृत्युमतिक्रान्तस्त-
पति ॥ १४ ॥

तथा चक्षुरादित्योऽभवत्स तु तपति ॥ १४ ॥

॥ १४ ॥

अथ श्रोत्रमत्यवहत्तद्यदा मृत्युमत्यमुच्यत दिशोऽभवंस्ता
इमा दिशः परेण मृत्युमतिक्रान्ताः ॥ १५ ॥

तथा श्रोत्रं दिशोऽभवंत् । दिशः प्राच्यादिविभागेनावस्थिताः ॥१५॥

॥ १५ ॥

अथ मनोऽत्यवहत्तदा मृत्युमत्यमुच्यत स चन्द्रमा
अभवत्सोऽसौ चन्द्रः परेण मृत्युमतिक्रान्तो भात्ये-
वꣳ ह वा एनमेषा देवता मृत्युमतिवहति य एवं
वेद ॥ १६ ॥

मनश्चन्द्रमा भाति । यथा पूर्वयजमानं वागाद्यग्न्यादिभावेन मृत्यु-मत्यवहत् । एवमेनं वर्तमानयजमानमपि ह वा एषा प्राणदेवताँ मृत्यु-मतिवहति वागाद्यग्न्यादिभावेनैनं यो वागादिपञ्चकविशिष्टं प्राणं वेद । " तं यथा यथोपासते (स्ते) तदेव भवति " इति ॥ १६ ॥

वागादीनामग्न्यादिदेवतात्वप्राप्तावुपासकस्य किमायातं न हि तदेव तस्य फल-मित्याशङ्क्याऽऽह—यथेति । देवतात्वप्रतिबन्धकाँल्पाप्मनः सर्वानपोह्योक्तवर्त्मना

---

१ क. छ. झ. 'था घाणः प्राणा वा° । २ ग. घ. च. घराणो । ३ क. ख. च. छ. °वन् । दि° । ४ क. ख. घ. ङ. च. छ. ज झ. °ताऽति° । ५ क. ग. घ. छ. ज. झ. °नैव यो । ६ ण. °त्वप्राप्तिप्र° । ७ ख. ण. कात्पाप्म° ।

वागादीनामुपास्तकोपाधिभूतानामग्न्यादिदेवताप्यैव सोऽपि सदा प्राणमात्मत्वेन ध्यायन्भावनाबलाद्वैराज्यं पदं पूर्वयजमानवदाप्नोतीति भावः । कस्येदं फलमित्याकाङ्क्षायामुपासकं विशिनष्टि—यो वागादीति । उक्तोपासनस्य प्रागुक्तं फलमनुगुणमित्यत्रं मानमाह—तं यथेति ॥ १६ ॥

अथाऽऽत्मनेऽन्नाद्यमागायद्यद्धि किंचान्नमद्यतेऽनेनैव तदद्यत इह प्रतितिष्ठति ॥ १७ ॥

अथाऽऽत्मने । यथा वागादिभिरात्मार्थमागानं कृतं तथा मुख्योऽपि प्राणः सर्वप्राणसाधारणं प्राजापत्यफलमागानं कृत्वा त्रिषु पवमानेष्वथानन्तरं शिष्टेषु नवसु स्तोत्रेष्वात्मन आत्मार्थमन्नाद्यमन्नं च तदाद्यं चान्नाद्यमागायत् । कर्तुः कामसंयोगो वाचनिक इत्युक्तम् । कथं पुनस्तदन्नाद्यं प्राणेनाऽऽत्मार्थमागीतमिति गम्यत इत्यत्र हेतुमाह । यत्किंचेति सामान्यान्नमात्रपरामर्शार्थः हीति हेतौ । यस्माल्लोके प्राणिभिर्यत्किंचिदन्नमद्यते भक्ष्यते तदनेनैव प्राणेनैव । अन इति प्राणस्याऽऽख्या प्रसिद्धा । अनःशब्दः सान्तः शकटवाची, यस्त्वन्यः स्वरान्तः स प्राणपर्यायः । प्राणेनैव तदद्यत इत्यर्थः । किंच न केवलं प्राणेनाद्यत एवान्नाद्यं तस्मिञ्छरीराकारपरिणतेऽन्नाद्य इह प्रतितिष्ठति प्राणस्तस्मात्प्राणेनाऽऽत्मनः प्रतिष्ठार्थमागीतमन्नाद्यम् । यद्यपि प्राणेनाद्यादनं तदपि प्राणस्य प्रतिष्ठार्थमेवेति न वागादिष्विव कल्याणासङ्गजपाप्मसंभवः प्राणेऽपि ॥ १७ ॥

उपास्यस्य प्राणस्य कार्यकरणसंघातस्य विधारकत्वं नाम गुणान्तरं वक्तुमुत्तरवाक्यं तदादाय व्याकरोति—अथेत्यादिना । कथमुद्गातुर्विक्रीतस्य फलसंबन्धस्तत्राऽऽह—कर्तुरिति । अन्नागानमार्त्विज्यमित्यत्र प्रश्नपूर्वकं वाक्यशेषमनुकूलयति—कथमित्यादिना । तमेव हेतुमाह—यस्मादिति । प्राणेनैव तदद्यत इति संबन्धः । यस्मादित्यस्य तस्मादित्यादिर्भाष्येणान्वयः । अनितेर्धातोरनशब्देऽत्प्राणपर्यायस्तर्हि कथं शकटे तच्छब्दप्रयोगस्तत्राऽऽह—अनःशब्द इति । इतश्च प्राणस्य स्वार्थमन्नागानं युक्तमित्याह—किंचेति । प्राणेन वागादिवदात्मार्थमन्नमागीतं चेत्तर्हि तस्यापि पाप्मवेधः स्यादित्याशङ्क्याऽऽह—यदपीति । इहान्ने

---

१ ण. °नाप्ययो° । २ ख. ज. ण. तदा । ३ अ ण. °त्र प्रमाणमा° । ४ क. ग. छ. झ. °पत्यं फ° । ५ ग. छ. °षु स्तो° । ६ ख. ण. °र्यकार° । ७ अ. ण. °तवि° । ८ अ. ण. °तरं वा° । ९ ण. °दिति भा° ।

देहाकारपरिणते प्राणस्तिष्ठति तनुसारिणश्च वागादयः स्थितिभाजोऽतः स्थित्यर्थं प्राणस्यान्नमिति न पाप्मवेधस्तस्मिन्नस्तीत्यर्थः ॥ १७ ॥

ते देवा अब्रुवन्नेतावद्वा इदꣳ सर्वं यदन्नं तदात्मन आगासीरनु नोऽस्मिन्नन्न आभजस्वेति वै माऽभिसंविशतेति तथेति तꣳ समन्तं परिण्याविशन्त । तस्माद्यदनेनान्नमत्ति तेनैतास्तृप्यन्त्येवꣳ ह वा एनꣳ स्वा अभिसंविशन्ति भर्ता स्वानाꣳ श्रेष्ठः पुर एता भवत्यन्नादोऽधिपतिर्य एवं वेद य उ हैवंविदꣳ स्वेषु प्रति प्रतिबुभूषति न हैवाल भार्येभ्यो भवत्यथ य एवैतमनुभवति यो वैवमनु भार्यान्बुभूर्षति स हैवालं भार्येभ्यो भवति ॥ १८ ॥

ते देवा इति । नन्ववधारणमयुक्तं प्राणेनैव तदद्यत इति । वागादीनामप्यन्ननिमित्तोपकारदर्शनात् । नेष दोषः । प्राणद्वारत्वात्तदुपकारस्य । कथं प्राणद्वारकोऽन्नकृतो वागादीनामुपकार इत्येतमर्थं प्रदर्शयन्नाह—ते वागादयो देवाः स्वविषयद्योतनाद्देवा अब्रुवन्नुक्तवन्तो मुख्यं प्राणमिदमेतावन्नातोऽधिकमस्ति । वा इति स्मरणार्थः । इदं तत्सर्वमेतावदेव, किं, यदन्नं प्राणस्थितिकरमद्यते लोके तत्सर्वमात्मन आत्मार्थमागासीरागीतवानस्याऽऽगानेनाऽऽत्मसात्कृतमित्यर्थः । वयं चान्नमन्तरेण स्थातुं नोत्सहामहे । अतोऽनु पश्चान्नोऽस्मानस्मिन्नन्न आत्मार्थे तवान्न आभजस्वाऽऽभाजयस्व । णिचोऽश्रवणं छान्दसम् । अस्मांश्चान्नभागिनः कुरु । इतर आह—ते यूयं यद्यन्नार्थिनो वै मा मामभिसंविशत समन्ततो मामाभिमुख्येन निविशतेत्येवमुक्तवति प्राणे तथेत्येवमिति तं प्राणं परिसमन्तं परिसमन्तान्न्यविशन्त निश्चयेनाविशन्त तं प्राणं परिवेष्ट्य निविष्टवन्त इत्यर्थः । तथा निविष्टानां प्राणानुज्ञया तेषां प्राणेनैवाद्यमानं प्राणस्थितिकरं सदन्नं तृप्तिकरं भवति न स्वातन्त्र्येणान्नसंबन्धो वागादीनाम् । तस्माद्युक्तमेवावधारणमनेनैव तदद्यत इति ।

---

१ छ. ज. °त्सर्वं किं यदन्नं लोके तत्सर्वं° ।

भर्ता श्रेष्ठः पुरो गन्तेत्यादिगुणविधानार्थं वाक्यान्तरमाहृत्ते—ते देवा इति । तस्य विवक्षितमर्थं वक्तुमादावाक्षिपति—नन्विति । अयुक्तत्वे हेतुमाह—वागादीनामिति । अवधारणानुपपत्तिं दूषयति—नैष दोष इति । यथा प्राणस्योपकारोऽन्नकृतो न वागादिद्वारकस्तथा तेषामपि नासौ प्राणद्वारको विशेषाभावादिति शङ्कते—कथमिति । वाक्येन परिहरति—एतमर्थमिति । आह विशेषमिति शेषः । तेषां देवत्वं साधयति—स्वविषयेति । तत्र प्रसिद्धिं प्रमाणयितुं वैशब्द इत्याह—वा इति । स्मरणार्थ इति । तत्प्रसिद्धस्यार्थस्यति शेषः । वाक्यार्थमाह—इदं तदिति । एतावत्त्वमेव व्याचष्टे तत्सर्वमिति । किमिदं प्राणार्थमन्नागानं नाम तदाह—आगाननेनेति । का पुनरेतावता भवतां क्षतिस्तत्राऽऽह—वयं चेति अन्नमन्तरेण ममापि स्थातुमशक्तेरेवमर्थं तदागीतामिति चेत्तत्राऽऽह—अत इति आभजस्वेति श्रूयमाणे कथमन्यथा व्याख्यायते तत्राऽऽह—णिच इति । तत्रैवान्नस्वामित्वमस्माकमपि तत्र प्रवेशमात्रं स्थित्यर्थमपेक्षतामिति वाक्यार्थमाह—अस्मांश्चेति । वैशब्दो यद्यर्थे प्रयुक्तः प्राणं परिवेष्ट्य तदनुज्ञया वागादीनामन्नार्थिनामवस्थानं चेत्तेषामपि प्राणवदन्नसंबन्धः स्यादित्याशङ्क्याऽऽह—तथेति । त्यक्तप्राणस्यान्नबलाद्वागादिस्थित्यनुपलब्धेरित्यर्थः । वागादीनामन्नजन्योपकारस्य प्राणद्वारत्वे सिद्धे फलितमाह—तस्मादिति ।

तदेवं चाऽऽह—तस्माद्यस्मात्प्राणाश्रयतयैव प्राणानुज्ञयाऽभिसंनिविष्टा वागादिदेवतास्तस्माद्यदन्नमनेन प्राणेनात्ति लोकस्तेनान्नेनैता वागाद्यास्तृप्यन्ति । वागाद्याश्रयं प्राणं यो वेद वागादयश्चैनं पञ्च प्रणाश्रया इति तमप्येवमेव ह वै स्वा ज्ञातय अभिसंविशन्ति वागादय इव प्राणम् । ज्ञातीनामाश्रयणीयो भवतीत्यभिप्रायः । अभिसंनिविष्टानां च स्वानां प्राणवदेव वागादीनां स्वान्नेन भर्ता भवति । तथा श्रेष्ठः पुरोग्रत एता गन्ता भवति वागादीनामिव प्राणः । तथाऽन्नादोऽनामयावीत्यर्थः अधिपतिरधिष्ठाय च पालयिता स्वतन्त्रः पतिः प्राणवदेव वागादीनां य एवं प्राणं वेद तस्यैतद्यथोक्तं फलं भवति । किंच य उ हैवंविदं प्राणविदं प्रति स्वेषु ज्ञातीनां मध्ये प्रतिः प्रतिकूलो बुभूषति प्रतिस्पर्धीभवितुमिच्छति सोऽसुरा इव प्राणप्रतिस्पर्धिनो न हैवालं न पर्याप्तो भार्येभ्यो भरणीयेभ्यो भवति भर्तुमित्यर्थः । अथ पुनर्य एव ज्ञातीनां मध्य एतमेवंविदं वागादय इव प्राणमन्वनुगतो भवति यो वैतमेवंवि-

१ ण. °ति । प्रसि° । २ ख. घ. °गादीनां स्थि° । ३ ग. छ. ज. °देवाऽऽह । ४ ख. घ. ङ. छ. ज. झ. °श्च प्रा° । ५ ख. च. °ता स्वानां प° । ६ ग. ङ. च. °ति यश्च वै° ।

दमन्वेवानुवर्तयन्नेवाऽऽत्मीयान्भार्यान्बुभूषंति भर्तुमिच्छति यथैव वागादयः प्राणानुवृत्त्याऽऽत्मबुभूषव आसन् । स हैवालं पर्याप्तो भार्येभ्यो भरणीयेभ्यो भवति भर्तुं नेतरः स्वतन्त्रः । सर्वमेतत्प्राणगुणविज्ञानफलमुक्तम् ॥ १८ ॥

तेषामन्नकृतोपकारस्य प्राणद्वारकत्वे वाक्यशेषं संवादयति—तदेवेति । विद्याफलं दर्शयन्गुणजातमुपदिशति—वागादीति । वेदनमेव व्याचष्टे—वागादयश्चेति । स च प्राणोऽहमस्मीति वेदेति चकारार्थः । अनाममावी व्याधिरहितो दीर्घायुरिति यावत् । स्तौति प्राणविद्यां स्तोतुं तद्विद्यावद्द्वेषिणो दोषमाह—किंचेति । इदानीं प्राणविदं प्रत्यनुरागे लाभं दर्शयति—अथेत्यादिना । ते देवा अब्रुवन्नित्यादौ गुणविधिर्विवक्षितो न विशिष्टविधिर्गुणफलस्यैवात्र श्रवणादित्याह—सर्वमेतादिति ॥ १८ ॥

कार्यकरणानामात्मत्वप्रतिपादनाय न प्राणस्याऽऽङ्गिरसत्वमुपन्यस्तं सोऽयास्य आङ्गिरस इति । अस्माद्धेतोरयमाङ्गिरस इत्याङ्गिरसत्वे हेतुर्नोक्तस्तद्धेतुसिद्ध्यर्थमारभ्यते । तद्धेतुसिद्ध्यायत्तं हि कार्यकरणात्मत्वं प्राणस्य । अनन्तरे च वागादीनां प्राणाधीनतोक्ता । सा च कथमुपपादनीयेत्याह—

> सोऽयास्य आङ्गिरसोऽङ्गानां[२] हि रसः प्राणो वा अङ्गानां[३] रसः प्राणो हि वा अङ्गानां[४] रसस्तस्माद्यस्मात्कस्माच्चाङ्गात्प्राण उत्क्रामति तदेव तच्छुष्यत्येष हि वा अङ्गानां[५] रसः ॥ १९ ॥

सोऽयास्य आङ्गिरस इत्यादि यथोपन्यस्तमेवोपादीयत उत्तरार्थम् । प्राणो वा अङ्गानां रस इत्येवमन्तं वाक्यं यथाव्याख्यातार्थमेव पुनः स्मारयति । कथं, प्राणो वा अङ्गानां रस इति" प्राणो हि । हिशब्दः प्रसिद्धौ । अङ्गानां रसः । प्रसिद्धमेतत्प्राणस्याङ्गरसत्वं न वागादीनाम् । तस्माद्युक्तं प्राणो वा इति स्मारणम् । कथं पुनः प्रसिद्धत्वमित्यत आह । तस्माच्छब्द उपसंहारार्थ उपरित्वेन संबध्यते । यस्माद्यतोऽवयवात्कस्मादनुक्तविशेषात् । यस्मात्कस्माद्यतः कुतश्चिच्चाङ्गाच्छरीरावयवादवि-

---

१ ख. छ. ज. °र्यकार° । २ घ. °र्यमिदमा° । ३ ख. ग. ज °र्यकार° । ४ ग. च. °थमित्युप° । ५ ख. घ. च. ज. झ. °स्याऽऽङ्गिर° । ६ घ. च. ज. °रिहेतुत्वे° । ७ ख, ग, ङ. च. छ. °शेषणात् ।

शोषितात्प्राण उत्क्रामत्यपसर्पति तदेव तदङ्गं शुष्यति नीरसं भवति शोषमुपैति। तस्मादेष हि वा अङ्गानां रस इत्युपसंहारः। अतः कार्यकरणानामात्मा प्राण इत्येतत्सिद्धम्। आत्मापाये हि शोषो मरणं स्यात्तस्मात्तेन जीवन्ति प्राणिनः सर्वे। तस्मादपास्य वागादीन्प्राण एवोपास्य इति समुदायार्थः॥ १९॥

उत्तरग्रन्थस्य व्यवहितेन संबन्धं वक्तुं व्यवहितमनुवदति—कार्यकरणानामिति। अनन्तरग्रन्थमवतारयति—अस्मादिति। किमित्याङ्गिरसत्वसाधको हेतुः साधनीयस्तत्राऽऽह—तद्धेत्विति। संप्रत्यव्यवहितं संबन्धं दर्शयति—अनन्तरं चेति। प्रकारान्तरं बुभुत्स्यमानामिति सूचयितुं चशब्दः। तर्हि यदुपपादनीयं तदुच्यतां किमित्युक्तस्य पुनरुक्तिरित्याशङ्क्याऽऽह—उत्तरार्थमिति। प्रतिज्ञानुवादो वक्ष्यमाणहेतोरुपयोगीत्यर्थः। यथोपन्यस्तमेवेत्यादि प्रपञ्चयति—प्राणो वा इति। उक्तार्थनिर्णयहेतुं पृच्छति—कथमिति। तत्र प्रसिद्धिं हेतुं कुर्वन्परिहरति—प्राणो हीति। प्रसिद्धिमेव प्रकटयति—प्रसिद्धमिति। स्मारणं प्रसिद्धस्याऽऽङ्गिरसत्वस्येति शेषः प्रसिद्धिरसिद्धेति शङ्कते—कथमिति। तामन्वयव्यतिरेकाभ्यां साधयति—अत आहेति। पदार्थमुक्त्वा वाक्यार्थमाह—यस्मात्कस्मादिति। उक्तेन व्यतिरेकेणानुक्तमन्वयं समुच्चेतुं चशब्दः। तस्माच्छब्दस्यापरिमाणेन संबन्धमुक्तं स्फुटयति—तस्मादिति। अन्वयव्यतिरेकाभ्यामङ्गिरसत्वे प्राणस्य सिद्धे फलितमाह—अत इति। उक्तन्यायादङ्गिरसत्वे सिद्धेऽपि कथमात्मत्वं सिध्येदित्याशङ्क्याऽऽह—आत्मेति। अस्तु प्राणः संघातस्याऽऽत्मा तथाऽपि किं स्यात्तदाह—तस्मादिति। भवतु प्राणाधीनं संघातस्य जीवनं तथाऽपि कथं तस्यैवोपास्यत्वमित्याशङ्क्याऽऽह—तस्मादपास्येति॥ १९॥

एष उ। न केवलं कार्यकरणयोरेवाऽऽत्मा प्राणो रूपकर्मभूतयोः किं तर्हि ऋग्यजुःसाम्नां नामभूतानामात्मेति सर्वात्मकतया प्राणं स्तुवन्महीं करोत्युपास्यत्वाय—

एष उ एव बृहस्पतिर्वाग्वै बृहती तस्या एष पतिस्तस्माद्बृहस्पतिः॥ २०॥

एष उ प्रकृत एव आङ्गिरसो बृहस्पतिः। कथं बृहस्पतिरिति।

---

१ ख. ङ. ज. °र्यकार°। २ ख. °र्यकार°। ३ घ. °ज्ञातानु°। ४ ण. हेतु कु°। ५ ख. घ. ज. °र्यकार°।

उच्यते-वाग्वै बृहती बृहतीछन्दः षट्त्रिंशदक्षरा अनुष्टुप्च वाक्। कथम्। "वाग्वा अनुष्टुप्" इति श्रुतेः। सा च वागनुष्टुब्बृहत्यां छन्दस्यन्तर्भवति। अतो युक्तं वाग्वै बृहतीति प्रसिद्धवद्वक्तुम्। बृहत्यां च सर्वा ऋचोऽन्तर्भवन्ति। प्राणसंस्तुतत्वात्। "प्राणो बृहती प्राण ऋच इत्येव विद्यात्" इति श्रुत्यन्तरात्। वागात्मत्वाच्चर्चां प्राणेऽन्तर्भावः। तत्कथमित्याह-तस्या वाचो बृहत्या ऋच एष प्राणः पतिः। तस्या निवर्तकत्वात्। कौष्ठ्याभिप्रेरितमारुतनिर्वर्त्या हि ऋक्। पालनाद्वा वाचः पतिः। प्राणेन हि पाल्यते वाक्। अप्राणस्य शब्दोच्चारणसामर्थ्याभावात्। तस्माद् बृहस्पतिर्ऋचां प्राण आत्मेत्यर्थः॥ २०॥

बृहस्पत्यादिधर्मकं प्राणोपासनं वक्तुं वाक्यान्तरमवतारयति-एष इति। तस्य विधान्तरेण तात्पर्यमाह-न केवलमिति। कार्यं स्थूलशरीरं प्रत्यक्षतो रूप्यमाणं रूपात्मकं करणं च ज्ञानक्रियाशक्तिमत्कर्मभूतं तयोरात्मा प्राण इत्युक्त्वा नामरूपयोरपि तथेति वक्तुं कण्डिकाचतुष्टयमित्यर्थः। किमिति प्राणस्याऽऽत्मत्वेन सर्वात्मत्वोक्त्या स्तुतिरित्याशङ्क्याऽऽह-उपास्यत्वायेति। उशब्दोऽप्यर्थो बृहस्पतिशब्दादुपरि संबध्यते। 'बृहस्पतिर्देवानां पुरोहित आसीत्' इति श्रुतेर्देवपुरोहितो बृहस्पतिरुच्यते तत्कथं प्राणस्य बृहस्पतित्वमिति शङ्कते-कथमिति। देवपुरोहितं व्यावर्तयितुमुत्तरवाक्येनो (णो) त्तरमाह-उच्यत इति। प्रसिद्धवचनं कथमित्याशङ्क्याऽऽह-बृहतीछन्द इति। सप्त हि गायत्र्यादीनि प्रधानानि च्छन्दांसि तेषां मध्यमं छन्दो बृहतीत्युच्यते। सा च बृहती षट्त्रिंशदक्षरा प्रसिद्धेत्यर्थः। भवतु यथोक्ता बृहती तथाऽपि कथम् 'वाग्वै बृहती' इत्युक्तं तत्राऽऽह-अनुष्टुप् चेति। द्वात्रिंशदक्षरा तावदनुष्टुबिष्टा, सा चाष्टाक्षरैश्चतुर्भिः पादैः षट्त्रिंशदक्षरायाः बृहत्यामन्तर्भवत्यवान्तरसंख्यायाः महासंख्यायामन्तर्भावादित्याह-सा चेति। वागनुष्टुभोरनुष्टुब्बृहत्योश्चोक्तमैक्यमुपजीव्य फलितमाह-अत इति। भवतु वागात्मिका बृहती तथाऽपि तत्पतित्वेन प्राणस्य कथमृक्पतित्वमित्याशङ्क्याऽऽह-बृहत्यां चेति। सर्वात्मकप्राणरूपेण बृहत्याः स्तुतत्वात्तत्र सर्वासामृचामन्तर्भावः संभवति, तस्मात्प्राणस्यैव बृहस्पतित्वे सिद्धमृक्पतित्वमित्यर्थः। प्राणरूपेण स्तुता बृहतीत्यत्र प्रमाणमाह-प्राणो बृहतीति। तथाऽपि प्राणस्य विवक्षितमृगात्मत्वं कथं सिध्यतीत्याशङ्क्याऽऽह-प्राण इति। तस्य तदात्मत्वे हेत्वन्तरमाह-वागात्मत्वादिति। तासां तदात्मत्वेऽपि कथं प्राणेऽन्तर्भावो न हि घटो मृदात्मा पटेऽन्तर्भवतीति शङ्कते-तत्कथमिति।

---

१ म. °रा। द्वात्रिंशदक्षराऽनु°। २ ण. °वानान्त°। ३ ण. °त्मकत्वं। ४ ण. °पि न प्रा°।

प्राणस्य वाङ्निष्पादकत्वात्तद्भूतानामृचां कारणे प्राणे युक्तोऽन्तर्भाव इत्याह—आहेत्यादिना । प्राणस्य तन्निर्वर्तकत्वेऽपि न तस्मिन्वाचोऽन्तर्भावो न हि घटस्य कुलालेऽन्तर्भाव इत्याशङ्क्याऽऽह—कौष्ठ्येति । कोष्ठनिष्ठेनाग्निना प्रेरितस्तद्गतो वायुरूर्ध्वं गच्छन्कण्ठादिभिरभिहन्यमानो वर्णतया व्यज्यते तदात्मिका च वाङ् निर्णीता देवताधिकरण ऋक्च वागात्मिकोक्ता तद्युक्तं तस्याः प्राणेऽन्तर्भूतत्वमित्यर्थः । ऋगात्मत्वं प्राणस्य प्रकारान्तरेण साधयति—पालनाद्वेति । सत्तामदत्वे सति स्थापकत्वं तादात्म्यव्याप्तमित्यभिप्रेत्योपसंहरति—तस्मादिति ॥ २० ॥

एष उ एव ब्रह्मणस्पतिर्वाग्वै ब्रह्म तस्या एष पतिस्तस्माद् ब्रह्मणस्पतिः ॥ २१ ॥

तथा यजुषाम् । कथम्, ब्रह्म एष उ एव ब्रह्मणस्पतिः । वाग्वै ब्रह्म ब्रह्म यजुस्तच्च वाग्विशेष एव । तस्या वाचो यजुषो ब्रह्मण एष पतिस्तस्माद् ब्रह्मणस्पतिः पूर्ववत् । कथं पुनरेतदवगम्यते बृहतीब्रह्मणोर्ऋग्यजुष्ट्वं न पुनरन्यार्थत्वमिति । उच्यते—वाचोऽन्ते सामसामानाधिकरण्यनिर्देशाद्वाग्वै साभेति । तथा च वाग्वै बृहती वाग्वै ब्रह्मेति च वाक्समानाधिकरणयोर्ऋग्यजुष्ट्वं युक्तम् । परिशेषाच्च । साम्न्यभिहिते ऋग्यजुषी एव परिशिष्टे । वाग्विशेषत्वाच्च वाग्विशेषौ हि ऋग्यजुषी । तस्मात्तयोर्वाचा समानाधिकरणता युक्ता । आदेशेषप्रसङ्गाच्च । सामोद्गीथ इति च स्पष्टं विशेषाभिधानत्वम् । तथा बृहतीब्रह्मशब्दयोरपि विशेषाभिधानत्वं युक्तम् । अन्यथाऽनिर्धारितविशेषयोरानर्थक्यापत्तेश्च विशेषाभिधानस्य वाङ्मात्रत्वे चोभयत्र पौनरुक्त्यात् । ऋग्यजुःसामोद्गीथशब्दानां च श्रुतिष्वेवंक्रमदर्शनात् ॥ २१ ॥

यजुषामात्मेति पूर्वेण संबन्धः । नियतपादाक्षरामृचां प्राणत्वे कुतस्तद्विपरीतानां यजुषां तत्त्वमिति शङ्कित्वा परिहरति—कथमिति । तथाऽपि कथं प्राणो यजुषामात्मेत्याशङ्क्याऽऽह—वाग्वै ब्रह्मेति । निर्वर्तकत्वं पालयितृत्वं चात्रापि तुल्यमित्याह—पूर्ववदिति । रूढिमाश्रित्य शङ्कते—कथं पुनरिति । वाक्यशेषविरोधान्नात्र रूढिः संभवतीति परिहरति—उच्यत इति । वाग्वै सामेत्यन्ते वाचः सामसामानाधिकरण्येन निर्देशाद्वेदाधिकारोऽयमिति योजना । तथाऽपि कथमृक्त्वं यजुष्ट्वं वा बृहतीब्रह्मणोरिति तत्राऽऽह—तथा चेति । परिशेषमेव दर्शयति—साम्नीति । इतश्च वाक्समानाधिकृतयोर्बृहतीब्रह्मणोर्ऋग्यजुष्ट्वमेष्टव्यं

१ क. ग छ. °शेषे हि । ख. ङ. च. °शेषो हि ।

मित्याह—वाग्विशेषत्वाच्चेति। तत्रैव हेत्वन्तरमाह—अविशेषेति। प्रसङ्गमेव व्यतिरेकमुखेन(ण) विवृणोति—सामेति। द्वितीयश्चकारोऽवधारणार्थः। किंच वाग्वै बृहती वाग्वै ब्रह्मेति वाक्याभ्यां बृहतीब्रह्मणोर्वागात्मत्वं सिद्धं न च तयोर्वाङ्मात्रत्वं वाक्यद्वयेऽपि वाग्वै वागिति पौनरुक्त्यप्रसङ्गात्तस्माद्बृहतीब्रह्मणोरिष्टव्यमृग्यजुष्टत्वमित्याह—वाङ्मात्रत्वे चेति। तत्रैव स्थानमाश्रित्य हेत्वन्तरमाह—ऋगिति ॥ २१ ॥

एष उ एव साम वाग्वै साम्नैष सा चामश्चेति तत्साम्नः सामत्वम्। यद्वेव समः प्लुषिणा समो मशकेन समो नागेन सम एभिस्त्रिभिर्लोकैः समोऽनेन सर्वेण तस्माद्वेव साम्नाश्नुते साम्नः सायुज्यꣳ सलोकतां य एवमेतत्साम वेद ॥ २२ ॥

एष उ एव साम। कथमित्याह—वाग्वै सा यत्किंचित्स्त्रीशब्दाभिधेयं सा वाक्। सर्वस्त्रीशब्दाभिधेयवस्तुविषयो हि सर्वनामसाशब्दः। तथाऽम एष प्राणः सर्वपुंशब्दाभिधेयवस्तुविषयोऽमःशब्दः। " केन मे पौंस्नानि नामान्याप्नोतीति प्राणेनेति ब्रूयात्केन मे स्त्रीनामानीति वाचा " इति श्रुत्यन्तरात्। वाकप्राणाभिधानभूतोऽयं सामशब्दः। तथा प्राणनिर्वर्त्यस्वरादिसमुदायमात्रं गीतिः सामशब्देनाभिधीयते। अतो न प्राणवाग्व्यतिरेकेण सामनामास्ति किंचित्स्वरवर्णादेश्च प्राणनिर्वर्त्यत्वात्प्राणतन्त्रत्वाच्च। एष उ एव प्राणः साम यस्मात्साम सामेति वाकप्राणात्मकं सा चामश्चेति तत्तस्मात्साम्नो गीतिरूपस्य स्वरादिसमुदायस्य सामत्वं तत्प्रगीतं भुवि।

ऋग्यजुष्टवं प्राणस्य प्रतिपाद्य तस्यैव सामत्वं साधयति—एष इत्यादिना। तदेव स्पष्टयति—सर्वेति। साशब्दो हि सर्वनाम तथा च यः स्त्रीलिङ्गः सर्वः शब्दस्तेनाभिधेयं वस्तु वागित्यर्थः। अमः प्राण इत्युक्तमुपपादयति—सर्वपुंशब्देति। पुंलिङ्गेन सर्वेण शब्देनाभिधेयं वस्तु प्राण इत्यर्थः। तत्र श्रुत्यन्तरं प्रमाणयति—केनेति। आचार्यस्य शिष्यं प्रत्येतद्वाक्यम्। पौंस्नानि पुंसो वाचकानि। तथाऽपि कस्य सामशब्दवाच्यत्वमित्याशङ्क्य फलितमाह—वागिति। वाग्विसर्जनः प्राणः सामशब्दाभिधेय इत्यवचनानिर्देशादित्यर्थः। ननु गीतिषु सामाख्येति

---

१ ख. ङ. 'योऽमश्च°। २ ग. च. °देस्तु प्रा°। ३ क. °णः। य°। ४ छ. °त्प्रगतं। ५ ख. च. °तं विख्यातं भु°। ६ ख. घ. ञ. सर्वश्च°। ७ ख. ण. °र्जनप्रा°।

न्यायादिशिष्टा काचिद्गीतिः सामेत्युच्यते तत्कुतो वागुपसर्जनस्य प्राणस्य साम-त्वमत आह—तथेति । प्राणस्य सामत्वे सतीति यावत् । प्रगीते मन्त्रवाक्ये साम-शब्दस्य वृद्धैरिष्टत्वादस्ति प्रागादिव्यतिरेकेण सामेत्याशङ्क्याऽऽह—स्वरेति । आदिपदेन पदवाक्यादिग्रहः । वागुपसर्जने प्राणे मुख्यः सामशब्दस्तत्संबन्धादि-तरत्र गौणो मञ्चादिशब्दवदित्यर्थः । ऊक्तेऽर्थे तत्साम्नः सामत्वमिति वाक्यं योजयति—यस्मादिति । इदं सामेदं सामेति यत्स्तूयतेऽहरहः ते तद्वाक्प्राणात्मकमेवो-च्यते सा चामश्चेति व्युत्पत्तेर्यस्मादेवं तस्मात्प्रसिद्धस्य साम्नो यत्सामत्वं तन्मुख्य-सामनिर्वर्त्यत्वाद्गौणमेव सदध्येतृव्यवहारे प्रसिद्धमिति योजना ।

यदु एव समस्तुल्यः सर्वेण वक्ष्यमाणेन प्रकारेण तस्माद्वा सामेत्य-नेन संबन्धः । वाशब्दः सामशब्दलाभनिमित्तप्रकारान्तरनिर्देशसाम-र्थ्यलभ्यः । केन पुनः प्रकारेण प्राणस्य तुल्यत्वमित्युच्यते—समः प्लुषिणा पुत्तिकाशरीरेण समो मशकेन मशकशरीरेण समो नागेन हस्ति-शरीरेण सम एभिस्त्रिभिर्लोकैस्त्रैलोक्यशरीरेण प्राजापत्येन समोऽ-नेन जगद्रूपेण हैरण्यगर्भेण पुत्तिकादिशरीरेषु गोत्वादिवत्कात्स्न्येन परिसमाप्त इति समत्वं प्राणस्य । न पुनः शरीरमात्रपरिमाणत्वेनामू-र्तत्वात्सर्वगतत्वाच्च । न च घटप्रासादादिप्रदीपवत्सङ्कोचविकासितया शरीरेषु तावन्मात्रं समत्वम् । " त एते सर्व एव समाः सर्वेऽनन्ताः ", इति श्रुतेः । सर्वगतस्य तु शरीरेषु शरीरपरिमाणवृत्तिलाभो न विरुध्यते । एवं समत्वात्साम्नाख्यं प्राणं वेद यः श्रुतिप्रसारितमहत्त्वं तस्यैतत्फ-लमश्नुते व्याप्नोति साम्नः प्राणस्य सायुज्यं सयुग्भावं समानदेहेन्द्रि-याभिमानित्वं सालोक्यं समानलोकतां वा भावनाविशेषतो य एवमे-तद्यथोक्तं साम प्राणं वेद । आ प्राणात्माभिमानाभिव्यक्तेरुपास्त इत्यर्थः ॥ २२ ॥

प्रकारान्तरेण प्राणस्य सामत्वमुपासनार्थमुपन्यस्यति—यदित्यादिना । प्रकारान्त-रद्योती वाशब्दोऽत्र न श्रूयत इत्याशङ्क्याऽऽह—वाशब्द इति । निमित्तान्तरमेव प्रश्नपूर्वकं प्रकटयति—केनेत्यादिना । ननु प्राणस्य तत्तच्छरीरपरिमाणत्वे परिच्छि-न्नत्वादानन्त्यानुपपत्तेः तत्कथमस्य विरुद्धेषु शरीरेषु समत्वमित्याशङ्क्याऽऽह पुत्ति-

---

१ ण. गोण संज्ञादि° । २ घ ञ. °णा मन्त्रादि° । ३ क ख. ञ. °ब्दः समः । छ. पुत्रिका° । ५ छ ञ पुत्रि° । ६ ग. च. °माणतैवा । ७ च. °प्रकाशित° । ८ घ. ञ. °भिधानं । ९ ख. ग. च. °मानतां सा° । ञ. मानितां सा° । १० ख. °णात्मताभिव्य° । ११ क. °न्तरावयो° । १२ ञ. पुत्रिका° ।

कादीति । तमशब्दस्य यथाश्रुतार्थत्वं किं न स्यादित्याशङ्क्याऽऽह—न पुनरिति । आधिदैविकेन रूपेणामूर्तत्वं सर्वगतत्वं च द्रष्टव्यम् । ननु प्रदीपो घटे संकुचति प्रासादे च विकसति तथा प्राणोऽपि मशकादिशरीरेषु संकोचमिभादिदेहेषु विकासं चाऽऽपद्यतामिति तमत्वासिद्धिरित्याशङ्क्याऽऽह—न चेति । प्राणस्य सर्वगतत्वे तमत्वश्रुतिविरोधमाशङ्क्याऽऽह—सर्वगतस्येति । खण्डादिषु गोत्ववच्छरीरेषु सर्वत्र स्थितस्य प्राणस्य तत्तच्छरीरपरिमाणाधा वृत्तेर्लाभः संभवति सर्वगतस्यैव नभसस्तत्र तत्र कूपकुम्भाद्यवच्छेदोपलम्भादित्यर्थः । फलश्रुतिमवतार्य व्याकरोति—एवमिति । फलविकल्पे हेतुमाह—भावनेति । वेदनं व्याकरोति—आ प्राणेति । इदं च फलं मध्यमदीपन्यायेनोभयतः संबद्धमवधेयम् ॥ २२ ॥

एष उ वा उद्गीथः प्राणो वा उत्प्राणे ह्येद[१] सर्वमुत्तब्धं
वागेव गीथोच्च गीथा चेति स उद्गीथः ॥ २३ ॥

एष उ वा उद्गीथः । उद्गीथो नाम सामावयवो भक्तिविशेषो नोद्गानम् । सामाधिकारात् । कथमुद्गीथः प्राणः । प्राणो वा उत्प्राणेन हि यस्मादिदं सर्वं जगदुत्तब्धमूर्ध्वं स्तब्धमुत्तम्भितं विधृतमित्यर्थः । उत्तब्धार्थावद्योतकोऽयमुच्छब्दः प्राणगुणाभिधायकः । तस्मादुत्प्राणो वागेव गीथा शब्दविशेषत्वादुद्गीथभक्तेः । गायतेः शब्दार्थत्वात्सा वागेव न ह्युद्गीथभक्तेः शब्दव्यतिरेकेण किंचिद्रूपमुपलभ्यते तस्मादुक्तमवधारणं वागेव गीथेति । उच्च प्राणो गीथा च प्राणतन्त्रा वागित्युभयमेकेन शब्देनाभिधीयते स उद्गीथः ॥ २३ ॥

प्रस्तावादिशब्दवदुद्गीथशब्दस्यापि भक्तिविशेषे रूढत्वादुद्गीथेनात्यपापेत्यत्र चौद्गात्रे कर्मणि प्रयुक्तत्वात्कथमुद्गीथः प्राण इत्याशङ्क्याऽऽह—उद्गीथो नामेति । नन्वदस्योभयतः संबन्धः । सामशब्दितस्य प्राणस्य प्रकृतत्वादिति हेतुमाह—सामाधिकारादिति । न तावदुद्गीथशब्दस्य प्राणे रूढिस्तस्य तस्मिन्वृद्धप्रयोगादर्शनान्नापि योगोऽवयववृत्तेरदृष्टेरिति शङ्कते—कथमिति । योगवृत्तिमुपेत्य परिहरति—प्राण इति । उच्छब्दो नास्यार्थस्य वाचको निपातत्वादित्याशङ्क्याऽऽह—उत्तब्धेति । तथाऽपि कथं प्राणो वा उदित्युक्तं तत्राऽऽह—प्राणेति । ' वायुर्वै गौतम तत्सूत्रम् ' इत्यादिश्रुतेरित्यर्थः । उद्गीथभक्तेः शब्दविशेषत्वेऽपि गीथा

---

१ ब्र. °म्भादावव° । २ च. नोद्गात्रम् । ३ घ. °ब्धमु° । ४ स. °ब्धार्थयो° । ५ ग. छ. ज. झ. °क्तेः । गीथा गा° । ६ स. °चिवृत्ते° । ७ ग. च. °मुपलभ्यते । ङ. झ. °मुपलस्य° ।

वागिति कथमुच्यते तत्राऽऽह—गायतेरिति। अर्थावधारणं दर्शयति—न हीति। तथाऽपि कथं प्राणस्योद्गीथत्वमित्याशङ्क्य वागुपलक्षणस्य तस्य तथात्वं कथयति—उच्चेति ॥ २३ ॥

उक्तार्थदार्ढ्यायाऽऽख्यायिकाऽऽरभ्यते—

तद्धापि ब्रह्मदत्तश्चैकितानेयो राजानं भक्षयन्नुवाचार्यं त्वस्य राजा मूर्धानं विपातयताद्यदितोऽयास्य आङ्गिरसोऽन्येनोदगायदिति वाचा च ह्येव स प्राणेन चोदगायदिति ॥ २४ ॥

तद्धापि तत्रैतस्मिन्नुक्तेऽर्थे ह्याख्यायिकाऽपि श्रूयते ह स्म ब्रह्मदत्तो नामतः। चिकितानस्यापत्यं चैकितानस्तदपत्यं युवा चैकितानेयो राजानं यज्ञे सोमं भक्षयन्नुवाच किमयं चक्षसस्थो मया भक्ष्यमाणो राजा त्वस्य तस्य ममानृतवादिनो मूर्धानं शिरो विपातयतादिस्पष्टं पातयतु। तोरयं तातङादेश आशिषि लोङ्विपातयतादिति। यद्यहमनृतवादी स्यामित्यर्थः। कथं पुनरनृतवादित्वप्राप्तिरिति। उच्यते—यद्यदीतोऽस्मात्प्रकृतात्प्राणाद्वाक्संयुक्तादयास्यो मुख्यप्राणाभिधायकेनायास्याङ्गिरसशब्देनाभिधीयते विश्वसृजां पूर्वर्षीणां सत्र उद्गाता सोऽन्येन देवतान्तरेण वाक्प्राणव्यतिरिक्तेनोदगायदुद्गानं कृतवान्। ततोऽहमनृतवादी स्यां तस्य मम देवताविपरीतप्रतिपत्तुर्मूर्धानं विपातयत्वित्येवं शपथं चकारेति विज्ञाने प्रत्ययदार्ढ्यं कर्तव्यतां दर्शयति। तमिममाख्यायिकानिर्धारितमर्थं स्वेन वचसोपसंहरति श्रुतिः—वाचा च प्राणप्रधानया प्राणेन च स्वस्याऽऽत्मभूतेन सोऽयास्य आङ्गिरस उद्गातोदगायदित्येषोऽर्थो निर्धारितः शपथेन ॥ २४ ॥

तद्धापीत्यादिवाक्यस्य प्रकृतानुपयोगमाशङ्क्याऽऽह—उक्तार्थेति। उद्गीथदेवता प्राणो न वागादिरित्येकार्थः। 'जीवति तु वंश्ये युवा' (पा० सू० ४। १। १६३) इति स्मरणादिञादौ वंश्ये जीवति पौत्रप्रभृतेर्यदपत्यं तद्युवसंज्ञकमिति द्रष्टव्यम्। क्रियापदनिष्पत्तिप्रकारं सूचयति—तोरिति। तुप्रत्ययस्यायमाशिषि विषये तातङादेशः 'तुह्योस्तातङाशिष्यन्यतरस्याम्' (पा० सू० ७। १। ३५) इति स्मरणादित्यर्थः। मूर्धपातपापकं दर्शयति—यदीति। अनृतवादित्वस्य

---

१ घ. ञ. ण. अव°। २ ख. °कृतप्राणा°। ३ ग. ङ. च. °यिकया निं°। ४ ख. °वातो निं°। ५ क. ख. ञ. ण. °त्युक्तोऽर्थः। ६ ख. घ. ण. °भूति यद्°।

प्रापकाभावादप्राप्तिरिति शङ्कते—कथं पुनरिति । उद्गानस्य बुद्ध्यादिसंनिधानात्तद्देवता प्रजापत्यादिलक्षणा किं तास्मिन्देवता किंवा वर्णस्वरादिसंनिधानात्तद्देवतैव तत्र देवतेति विप्रतिपत्तेरनृतवादित्वे शङ्कते ब्रह्मदत्तशपथेन निर्णयं चकारेत्याह—उच्यत इति । प्राणाद्वाक्संयुक्तादन्येनायास्यो यद्युद्गायादिति संबन्धः नन्वयास्याङ्गिरसशब्दवाच्यो मुख्यप्राणो देवतात्वान्नोद्गाता भवितुमुत्सहते तत्राऽऽह—मुख्येति । उक्तार्थदार्ढ्यायेत्युक्तमुपसंहरति—इति विज्ञान इति । उक्तरीत्या शपथक्रियया प्राण एवोद्गीथदेवतेत्यस्मिन्विज्ञाने प्रत्ययो विश्वासस्तस्य यद्दार्ढ्यं तस्य कर्तव्यमाख्यायिकया दर्शयति श्रुतिरिति यावत् । आख्यायिकार्थस्यैव वाचेत्यादिनोक्तेः पौनरुक्त्यमित्याशङ्क्याऽऽह—तामिमामिति । शपथस्य स्वातन्त्र्येणाप्रामाण्येऽपि श्रुतिमूलतया प्रामाण्यं सिध्यतीति भावः ॥ २४ ॥

तस्य हैतस्य साम्नो यः स्वं वेद भवति हास्य स्वं तस्य वै स्वर एव स्वं तस्मादार्त्विज्यं करिष्यन्वाचि स्वरमिच्छेत तया वाचा स्वरसंपन्नयाऽऽर्त्विज्यं कुर्यात्तस्माद्यज्ञे स्वरवन्तं दिदृक्षन्त एव । अथो यस्य स्वं भवति भवति हास्य स्वं य एवमेतत्साम्नः स्वं वेद ॥ २५ ॥

तस्य हैतस्य । तस्येति प्रकृतं प्राणमभिसंबध्नाति । हैतस्येति मुख्यं व्यपदिशत्यभिनयेन । साम्नः सामशब्दवाच्यस्य प्राणस्य यः स्वं धनं वेद तस्य ह किं स्यात् । भवति हास्य स्वम् । फलेन प्रलोभ्याभिमुखीकृत्य शुश्रूषव आह—तस्य वै साम्नः स्वर एव स्वम् । स्वर इति कण्ठगतं माधुर्यं तदेवास्य स्वं विभूषणम् । तेन हि भूषितमृद्धिमल्लक्ष्यत उद्गानम् । यस्मादेवं तस्मादार्त्विज्यमृत्विक्कर्मोद्गानं करिष्यन्वाचि विषये वाचि वागाश्रितं स्वरमिच्छेत साम्नो धनवत्तां स्वरेण चिकीर्षुरुद्गाता । इदं तु प्रासङ्गिकं विधीयते साम्नः सोस्वर्येण स्वरवत्त्वप्रत्यये कर्तव्य इच्छामात्रेण सौस्वर्यं न भवतीति दन्तधावनतैलपानादिसामर्थ्यात्कर्तव्यमित्यर्थः । तयैवं संस्कृतया वाचा स्वरसंपन्नयाऽऽर्त्विज्यं कुर्यात् । तस्माद्यस्मात्साम्नः स्वभूतः स्वरस्तेन स्वेन भूषितं साम । अतो यज्ञे

१ क. ख. °ता तत्रो° । २ ख. ग. ङ. °तस्येति । ३ ग. ङ. च. °स्वं भ° ।

स्वरवन्तमुद्गातारं दिदृक्षन्त एव द्रष्टुमिच्छन्त एव धनिनमिव लौकिकाः प्रसिद्धं हि लोकेऽथो अपि यस्य स्वं धनं भवति तं धनिनं दिदृक्षन्त इति। सिद्धस्य गुणविज्ञानफलसंबन्धस्योपसंहारः क्रियते—भवति हास्य स्वं य एवमेतत्साम्नः स्वं वेदेति ॥ २५ ॥

उद्गीथदेवता प्राण एवेति निर्धार्य स्वसुवर्णप्रतिष्ठागुणविधानार्थमुत्तरकाण्डिकात्रयमवतारयति-तस्येत्यादिना। किमित्यादौ फलमभिलप्यते तत्राऽऽह-फलेनेति। सौस्वर्यं साम्नो भूषणमित्यत्रानुभवमनुकूलयति-तेन हीति। कथं तर्हि कण्ठगतं माधुर्यं संवादनीयमित्याशङ्क्याऽऽह—यस्मादिति। प्राणोऽहं मनैव गीतिभावमापन्नस्य सौस्वर्यं धनमिति प्रकृते प्राणविज्ञाने गुणविधिर्विवक्षितश्चेत्किमित्युद्गातुरन्यः कर्तव्यमुपदिश्यत इत्याशङ्क्य दृष्टफलतयेत्याह—इदं त्विति। अथेच्छायां कर्तव्यत्वेन विहितायां तावन्मात्रे सिद्धेऽपि कथं सौस्वर्यं सिध्येन्नहि स्वर्गकामनामात्रेण स्वर्गः सिध्यत्यत आह—साम्न इति। तस्य सुस्वरत्वेन तच्छब्दितस्य प्राणस्योपासकात्मकस्य स्वरवत्त्वप्रत्यये कर्मणि सति विहितेच्छामात्रेण साम्नः सौस्वर्यं न भवतीत्यस्मात्सामर्थ्यादिन्द्रधावनादि कर्तव्यमित्येतदत्र विवक्षितमिति योजना। सौस्वर्यस्य सामभूषणत्वे गमकमाह—तस्मादिति। दृष्टान्तमनन्तरवाक्यावष्टम्भेन स्पष्टयति—प्रसिद्धं हीति। भवति हास्य स्वमिति प्रागेवोक्तत्वादनर्थिका पुनरुक्तिरित्याशङ्क्याऽऽह—सिद्धस्येति ॥ २५ ॥

तस्य हैतस्य साम्नो यः सुवर्णं वेद भवति हास्य
सुवर्णं तस्य वै स्वर एव सुवर्णं भवति हास्य
सुवर्णं य एवमेतत्साम्नः सुवर्णं वेद ॥ २६ ॥

अथान्यो गुणः सुवर्णवत्तालक्षणो विधीयते। असावपि सौस्वर्यमेव। एतावान्विशेषः पूर्वं कण्ठगतमाधुर्यमिदं तु लाक्षणिकं सुवर्णशब्दवाच्यं, तस्य हैतस्य साम्नो यः सुवर्णं वेद भवति हास्य सुवर्णम्। सुवर्णशब्दसामान्यात्स्वरसुवर्णयोः। लौकिकमेव सुवर्णं गुणविज्ञानफलं भवतीत्यर्थः। तस्य वै स्वर एव सुवर्णम्। भवति हास्य य एवमेतत्साम्नः सुवर्णं वेदेति पूर्ववत्सर्वम् ॥ २६ ॥

साम्नो गुणान्तरमवतारयति—अथेति। तर्हि पुनरुक्तिः स्यात्तत्राऽऽह—एतावानिति। लाक्षणिकं कण्ठ्योऽयं वर्णो दन्त्योऽयमिति लक्षणज्ञानपूर्वकं सुष्ठु वर्णोच्चारणं मनैव सामशब्दितप्राणभूतस्य धनमिति यावत्। लाक्षणिकसौस्वर्यगु-

१ घ. °न्यत्कर्त°। २ क. ग. ङ. तथाऽन्यो°। ३ ख. °वस्वल°। ४ ग. च. °म्, श°। ५ ख. ण. तथेति।

णवत्प्राणविज्ञानवतो यथोक्तफललाभे हेतुमाह—सुवर्णशब्देति । वाक्यार्थमाह—लौकिकमेवेति । फलेन प्रलोभ्याभिमुखीकृत्य किं तत्सुवर्णमिति शुश्रूषवे ब्रूते—तस्येति । गुणविज्ञानफलमुपसंहरति—भवतीति । साम्नस्तच्छब्दवाच्यस्य प्राणस्य स्वरूपभूतस्येति यावत् ॥ २६ ॥

तस्य हैतस्य साम्नो यः प्रतिष्ठां वेद प्रति ह तिष्ठति
तस्य वै वागेव वाचि हि खल्वेष एतत्प्राणः प्रतिष्ठितो
गीयतेऽन्न इत्यु हैक आहुः ॥ २७ ॥

तथा प्रतिष्ठागुणं विधित्सन्नाह—तस्य हैतस्य साम्नो यः प्रतिष्ठां वेद । प्रतितिष्ठत्यस्यामिति प्रतिष्ठा वाक्तां प्रतिष्ठां साम्नो गुणं यो वेद स प्रतितिष्ठति ह । " तं यथा यथोपासते " इति श्रुतेस्तद्गुणत्वं युक्तम् । पूर्ववत्फलेन प्रलोभिताय का प्रतिष्ठेति शुश्रूषव आह—तस्य वै साम्नो वागेव । वागिति जिह्वामूलीयादीना स्थानानामाख्या । सैव प्रतिष्ठा । तदाह—वाचि हि जिह्वामूलीयादिषु हि यस्मात्प्रतिष्ठितः सन्नेष प्राण एतद्गानं गीयते गीतिभावमापद्यते तस्मात्साम्नः प्रतिष्ठा वाक् । अन्ने प्रतिष्ठितो गीयत इत्यु हैकेऽन्य आहुः । इह प्रतितिष्ठतीति युक्तम् । अनिन्दितत्वादेकीयपक्षस्य विकल्पेन प्रतिष्ठागुणविज्ञानं कुर्यादाहोस्वा प्रतिष्ठाऽन्नं वेति ॥ २७ ॥

उपास्यस्य प्रतिष्ठागुणत्वेऽपि कथमुपासकस्य तद्गुणत्वं तत्राऽऽह—तं यथेति । आदिपदादुरःशिरःकण्ठदन्तौष्ठनासिकातालूनि गृह्यन्ते । किमिमानि स्थानानि वागित्युच्यन्ते तत्राऽऽह—वाचि हीति । पक्षान्तरमाह—अन्न इति । अन्नशब्देन तत्परिणामो देहो गृह्यते । एकीयपक्षे युक्तिमाह—इहेति । कथं तर्हि प्रतिष्ठागुणस्य प्राणस्य विज्ञानं कर्तव्यमत आह—अनिन्दितत्वादिति ॥ २७ ॥

अथातः पवमानानामेवाभ्यारोहः स वै खलु
प्रस्तोता साम प्रस्तौति स यत्र प्रस्तुयात्तदे-
तानि जपेत् । असतो मा सद्गमय तमसो मा

---

१ घ. छ. झ. °ष्ठा तां प्र° । २ क. ध. °णवत्त्वं यु° । ३ ख. ग. ङ. प्रलो° । ४ ग. घ. च. छ. ज. °ष्ठा° । ५ क. घ. छ. °तीत्युक्त° । ग. घ. झ. °तीति युक्त° । ६ ख. घ. ङ. ण. °दन्तोष्ठ° । ७ घ. ज. °च्यते त° ।

ज्योतिर्गमय मृत्योर्माऽमृतं गमयेति स यदाहासतो मा सद्गमयेति मृत्युर्वा असत्सदमृतं मृत्योर्माऽमृतं गमयामृतं मा कुर्वित्येवैतदाह तमसो मा ज्योतिर्गमयेति मृत्युर्वै तमो ज्योतिरमृतं मृत्योर्माऽमृतं गमयामृतं मा कुर्वित्येवैतदाह मृत्योर्माऽमृतं गमयेति नात्र तिरोहितमिवास्ति । अथ यानीतराणि स्तात्राणि तेष्वात्मनेऽन्नाद्यमागायेत्तस्मादु तेषु वरं वृणीत यं कामं कामयेत तꣳ स एष एवंविदुद्गाताऽऽत्मने वा यजमानाय वा यं कामं कामयते तमागायति तद्धैतल्लोकजिदेव न हैवालोकयताया आशाऽस्ति य एवमेतत्साम वेद ॥२८॥

इति प्रथमाध्यायस्य तृतीयं ब्राह्मणम् ॥ ३ ॥

एवं प्राणविज्ञानवतो जपकर्म विधित्स्यते । यद्विज्ञानवतो जपकर्मण्यधिकारस्तद्विज्ञानमुक्तम् । अथानन्तरं यस्माच्चैवं विदुषा प्रयुज्यमानं देवभावायाभ्यारोहफलं जपकर्म, अतस्तस्मात्तद्विधीयत इह । तस्य चोद्गीथसंबन्धात्सर्वत्र प्राप्तौ पवमानानामिति वचनात् पवमानेषु त्रिष्वपि कर्तव्यतायां प्राप्तायां पुनः कालसंकोचं करोति । स वै खलु प्रस्तोता साम प्रस्तौति । स प्रस्तोता यत्र यस्मिन्काले साम प्रस्तुयात्प्रारभेत तस्मिन्काल एतानि जपेत् । अस्य च जपकर्मण आख्याऽऽभ्यारोहं इति । आभिमुख्येनाऽऽरोहत्यनेन जपकर्मणैवंविदेवभावमात्मानमित्यभ्यारोहः । एतानीति बहुवचनात्त्रीणि यजूंषि । द्वितीयानिर्देशाद्ब्राह्मणोत्पन्नत्वाच्च यथापठित एव स्वरः प्रयोक्तव्यो न माम्त्रः । याजमानं जपकर्म ।

अथातः पवमानानामित्यादिवाक्यमवतारयति—एवमिति । तत्राथशब्दं व्याचष्टे—यद्विज्ञानवत इति । अतःशब्दार्थमाह—यस्माच्चेति । इहेति प्राणविदुक्तिः । कदा तर्हि जपकर्म कर्तव्यं तत्राऽऽह—तस्येति । उद्गीथेनात्ययाम त्वं न उद्गायेति च प्रकरणादुद्गीथेन संबन्धाज्जपस्य सर्वत्रोद्गानकाले प्राप्तौ पवमानाना-

१ झ. विधीयते । २ क. घ. छ. ज. झ °रोहः । अ ।

मेवेति वचनात्कालनियमसिद्धिरित्यर्थः । स वै खल्वित्यादिवाक्यतात्पर्यमाह-पवमानेष्विति । ननु कर्तव्यत्वेनाभ्यारोहः श्रूयते जपकर्म विधित्सितमिति चोच्यते किं केन संगतमित्याशङ्क्याऽऽह-अस्य चेति । अभ्यारोहशब्दस्य न तत्र रूढिर्वृद्धप्रयोगाभावादित्याशङ्क्याऽऽह-आभिमुख्येनेति । यजुर्मन्त्राक्षराणापनियतपादाक्षरत्वादसतो मा सद्गमयेत्यारभ्यैको वा द्वौ वा मन्त्राबित्याशङ्क्याऽऽह-एतानीति । यद्यमी यजुषा मन्त्रास्तर्हि मान्त्रेण स्वरेण वैभाषिकग्रन्थोक्तेन भाव्यमित्याशङ्क्याऽऽह-द्वितीयेति । यत्र स्वरो विवक्षितस्तत्र तृतीयानिर्देशो दृश्यते । ' उच्चैर्ऋचा क्रियत उच्चैः साम्नोपांशु यजुषा ' इति । प्रकृते तु द्वितीयानिर्देशाज्जपकर्ममात्रं प्रतीयते मन्त्रस्तु स्वरो न प्रतिभातीत्यर्थः । केन तर्हि स्वरेण प्रयोगो मन्त्राणामिति चेत्तत्राऽऽह-ब्राह्मणेति । भवतु शातपथेन स्वरेण मन्त्राणां प्रयोगस्तथाऽपि किमार्त्विज्यं किंवा याजमानं जपकर्मेति वीक्षायामाह-याजमानमिति ।

एतानि तानि यजूंषि-' असतो मा सद्गमय ' ' तमसो मा ज्योतिर्गमय ' ' मृत्योर्माऽमृतं गमय ' इति । मन्त्राणामर्थस्तिरोहितो भवतीति स्वयमेव व्याचष्टे ब्राह्मणं मन्त्रार्थम् स मन्त्रो यदाह यदुक्तवान्[1]रोऽसावथ इत्युच्यते ' असतो मा सद्गमय ' इति । मृत्युर्वा असत्स्वाभाविककर्मविज्ञानं मृत्युरित्युच्येते । असदत्यन्ताधोभावहेतुत्वात् । सदमृतं सच्छास्त्रीयकर्मविज्ञानं । अमरणहेतुत्वादमृतम् । तस्मादसतो मा मा कर्मणो ज्ञानाच्च सच्छास्त्रीयकर्मविज्ञाने गमय देवभावसाधनात्मभावमापादयेत्यर्थः । तत्र वाक्यार्थमाह-अमृतं मा कुर्वित्येवैतदाहेति । तथा तमसो मा ज्योतिर्गमयेति । मृत्युर्वै तमः सर्वं ह्यज्ञानमावरणात्मकत्वात्तमस्तदेव च मरणहेतुत्वान्मृत्युः । ज्योतिरमृतं पूर्वोक्तविपरीतं दैवं स्वरूपम । प्रकाशात्मकत्वाज्ज्ञानं ज्योतिस्तदेवामृतमविनाशात्मकत्वात्तस्मात्तमसो मा ज्योतिर्गमयेति । पूर्ववन्मृत्योर्माऽमृतं गमयेत्यादि । अमृतं मा कुर्वित्येवैतदाह । दैवं प्राजापत्यं फलभावमापादयेत्यर्थः । पूर्वो मन्त्रोऽसाधनस्वभावात्साधनभावमापादयेति ।

---

१ क. घ. °ति विवक्षा° । २ ख. घ. छ. ज. झ. °न्को ऽस्यार्थ । ३ क. ख. ग. घ. ङ. ज. झ. °त्युच्यते । ४ क. °तोऽसत्कर्मणोऽज्ञानाच्चमा मां स° । ५ ख. ग. घ. ङ. पूर्वम° । ६ ग. °दयति ।

द्वितीयस्तु साधनभावादप्यज्ञानरूपात्साध्यभावमापादयतीति। मृत्योर्मांऽमृतं गमयेति पूर्वयोरेव मन्त्रयोः समुच्चितोऽर्थस्तृतीयेन मन्त्रेणोच्यत इति प्रसिद्धार्थतैव। नात्र तृतीये मन्त्रे तिरोहितमन्तर्हितमिवार्थरूपं पूर्वयोरिव मन्त्रयोरस्ति यथाश्रुत एवार्थः।

व्याचिख्यासितयजुषां स्वरूपं दर्शयति—एतानीति। मन्त्रार्थशब्देन पदार्थो वाक्यार्थस्तत्फलं चेति त्रयमुच्यते। लौकिकं तमो व्यावर्तयति—सर्वं हीति। पूर्वोक्तपदेन व्याख्यातं तमो गृह्यते। वैपरीत्ये हेतुमाह—प्रकाशात्मकत्वादिति। ज्ञानं तेन साध्यमिति यावत्। पदार्थोक्तिसमाप्ताविति शब्दः। उत्तरवाक्याभ्यां वाक्यार्थस्तत्फलं चेति द्वयं क्रमेणोच्यत इत्याह—पूर्ववदिति। फलवाक्यमादाय पूर्वस्माद्विशेषं दर्शयति—अमृतमिति। प्रथमद्वितीयमन्त्रयोरर्थभेदापत्तेरिति पुनरुक्तिमाशङ्क्यावान्तरभेदमाह—पूर्वो मन्त्र इति। तथाऽपि तृतीये मन्त्रे पुनरुक्तिस्तदवस्थेत्याशङ्क्याऽऽह—पूर्वयोरिति।

याजमानमुद्गानं कृत्वा पवमानेषु त्रिष्वथानन्तरं यानीतराणि शिष्टानि स्तोत्राणि तेष्वात्मनेऽन्नाद्यमागायेत्। प्राणविदुद्गाता प्राणभूतः प्राणवदेव यस्मात्स एष उद्गातैवं यथोक्तं वेत्तीयतः प्राणवदेव तं कामं साधयितुं समर्थस्तस्माद्यजमानस्तेषु स्तोत्रेषु प्रयुज्यमानेषु वरं वृणीत यं कामं कामयेत तं कामं वरं वृणीत प्रार्थयेत। यस्मात्स एष एवंविदुद्गातेति तस्माच्छब्दात्प्रागेव संबध्यते। आत्मने वा यजमानाय वा यं कामं कामयत इच्छत्युद्गाता तमागायत्यागानेन साधयति।

वृत्तमनूद्योत्तरवाक्यमवतार्य व्याचष्टे—याजमानमिति। यथा प्राणास्त्रिषु पवमानेषु साधारणमागानं कृत्वा शिष्टेषु स्तोत्रेषु स्वार्थमागानमकरोत्तथेत्याह—प्राणविदिति। तद्विदोऽपि तद्वदागाने योग्यतामाह—प्राणभूत इति। हेतुवाक्यमादौ योजयति—यस्मादिति। प्रतिज्ञावाक्यं व्याचष्टे—तस्मादिति। किमिति व्यत्यासेन वाक्यद्वयव्याख्यानमित्याशङ्क्यार्थाच्चेति न्यायेन पाठक्रममनादृत्य परिहरति—यस्मादित्यादिना। स एष एवंविदुद्गाताऽऽत्मने यजमानाय वा यं कामं कामयते तमागानेन साधयति यस्मादिति हेतुग्रन्थस्तस्मादिति प्रतिज्ञाग्रन्थात्प्रागेव संबध्यत इति योजना।

---

१ ग. °दयति। २ ग. °र्थतयैव ना°। ३ ञ ण. °तीत्य पु°। ४ क. ख. घ. ञ. पूर्वम°। ५ ग. झ. °भ वृ°। ६ क. ख. ग. घ. ङ. छ. झ. °गाने°। ७ ञ. ण. °द्वयं व्या°। ८ ञ. ण. °ख्यातमि°।

एवं तावज्ज्ञानकर्मभ्यां प्राणात्मापत्तिरित्युक्तम् । तत्र नास्त्याशङ्कासंभवः । अतः कर्मापाये प्राणापत्तिर्भवति वा न वेत्याशङ्क्यते तदाशङ्कानिवृत्त्यर्थमाह—तद्धैतल्लोकजिदेवेति । तद्ध तदेतत्प्राणदर्शनं कर्मवियुक्तं केवलमपि लोकजिदेवेति लोकसाधनमेव । न ह एवालोक्यताया अलोकार्हत्वायाऽऽशोऽऽशंसनं प्रार्थनं नैवास्ति ह । न हि प्राणात्मन्युत्पन्नात्माभिमानस्य तत्प्राप्त्याशंसनं संभवति । न हि ग्रामस्थः कदा ग्रामं प्राप्नुयामित्यरण्यस्थ इवाऽऽशास्ते । असंनिकृष्टविषये ह्यनात्मन्याशंसनं न तत्स्वात्मनि संभवति तस्मान्नाऽऽशाऽस्ति कदाचित्प्राणात्मभावं न प्रपद्येयमिति ।

वृत्तं कीर्तयति—एवं तावदिति । तत्र कर्मसमुच्चिते ज्ञाने देवयानौ शङ्कासंभवो नास्ति मिथः सहकृतयोर्ज्ञानकर्मणोस्तदाप्तिहेतुत्वादित्याह—तत्रेति । समनन्तरं वाक्यमवतारयति—अत इति । समुच्चयात्फलाप्तेर्दृष्टत्वादिति यावत् । न हेत्यादिना पदानि छिन्दन्वाक्यमादाय व्याकरोति—अलोकार्हत्वायेति । तदेव स्फुटयति—न हीति । तत्र दृष्टान्तमाह—न हीति । दृश्यमानमाशंसनं तर्हि कस्मिन्विषये स्यादित्याशङ्क्याऽऽह—असंनिकृष्टेति । प्राणात्मना व्यवस्थितस्य विदुषस्तदात्मभावं कदाचिदहं न प्रपद्येयमित्याशंसनं नास्तीति निगमयति—तस्मादिति ।

कस्यैतत् । य एवमेतत्साम प्राणं यथोक्तं निर्धारितमहिमानं वेदाहमस्मि प्राण इन्द्रियविषयासङ्गैरसुरैः पाप्मभिरधर्षणीयो विशुद्धो वागादिपञ्चकं च मदाश्रयत्वादग्राह्यात्मरूपं स्वाभाविकविज्ञानोत्पेन्द्रियविषयाङ्गजनितासुरपाप्मदोषवियुक्तं सर्वभूतेषु च मदाश्रयान्नाद्योपयोगबन्धेनमात्मा चाहं सर्वभूतानामाङ्गिरसत्वाद्ऋग्यजुःसामोद्गीथभूतायाश्च वाच आत्मा तद्व्यापेस्तन्निवर्तकत्वाच्च मम साम्नो गीतिभावमापद्यमानस्य बाह्यं धनं भूषणं सौस्वर्यं ततोऽप्यान्तरं सौवर्ण्यं लाक्षणिकं सौस्वर्यं गीतिभावमापद्यमानस्य मम कण्ठादिस्थानानि प्रतिष्ठा । एवंगुणोऽहं पुत्तिकादिशरीरेषु कात्स्न्र्येन परिसमाप्तोऽमूर्तत्वात्सर्वगतत्वाच्चेत्या एवमभिमानाभिव्यक्तेर्वेदोपास्त इत्यर्थः ॥२८॥

इति प्रथमाध्यायस्य तृतीयं ब्राह्मणम् ॥ ३ ॥

---

१ ग, ङ. च. °देव ला° । घ. ङ. झ. °शाऽऽशास° । २ ख. ग. च. छ. °स्ति न । ४ क. ग. ङ. च. प्रतिप° । ५ क. ख. प्रतिप° । ६ झ. °सङ्गजैरा° । ७ ग. च. छ. °त्यादाप्रोद° । ८ ग. च. °कज्ञा° । ९ ख घ. च. °पभोग° । १० ख. घ. च. °गसंब° । ११ ख. °न्धमा° । १२ च. °नामङ्गार° । १३ क. ङ. ज. °तोमहतरं । १४ घ. च. झ. °प्यान्तरतरं । १५ ख. झ. सौवर्णं । १६ छ. झ. पुत्रिका° ।

कर्मणसमुच्चितादुपासनात्केवलाच्च प्राणात्मत्वं फलमुक्तं तत्र समुच्चितादुपासनात्पुरुषं जिज्ञासमानस्य वा फलं केवलाच्चोपासनात्तयोरन्यतरस्यान्यस्य वा कस्यचिदिति जिज्ञासमानः शङ्कते—कस्येति । ज्ञानकर्मणोरुभयत्र समभावादुभयोरपि वचनात्फलसिद्धिः। आश्रमान्तरविषयं तु केवलज्ञानस्य लोकजयहेतुत्वमित्यभिप्रेत्याऽऽह—य एवमिति । एवंशब्दस्य प्रकृतपरामर्शित्वात्पूर्वोक्तं सर्वं वेद्यस्वरूपं संक्षिपति—अहमस्मीत्यादिना । तस्य वागादिभ्यो विशेषं दर्शयति—इन्द्रियेति । किमिदानीं प्राणस्यैवोपास्यतया वागादिपञ्चकमुपेक्षितमिति नेत्याह—वागादीति । तस्य प्राणाश्रयत्वेऽपि कुतो देवतात्वमासङ्क्याप्मविद्धत्वादित्याशङ्क्याऽऽह—स्वाभाविकेति । अचक्रतोपकारं प्राणद्वारा वागादौ स्मारयति—सर्वेति । रूपात्मके जगति प्राणस्य स्वरूपमनुसंधत्ते—आत्मा चेति । नामात्मके जगति प्राणस्याऽऽत्मत्वमुक्तं स्मारयति—ऋगिति । सति सामत्वे गीतिभावावस्थायां प्राणस्योक्तं बाह्यमान्तरं च सौस्वर्यं सौवर्ण्यमिति गुणद्वयमनुवदति—ममेति । तस्यैव वैकल्पिकीं प्रतिष्ठामुक्तामनुस्मारयति—गीतीति । य एवमित्यादिनोक्तं परामृशति—एवंगुणोऽहमिति । इत्येवमभिमानाभिव्यक्तिपर्यन्तं यो ध्यायति तस्येदं फलमित्युपसंहरति—इतीति ॥ २८ ॥

इति प्रथमाध्यायस्य तृतीयं ब्राह्मणम् ॥ ३ ॥

(अथ प्रथमाध्यायस्य चतुर्थं ब्राह्मणम्) ।

आत्मैवेदमग्र आसीत्पुरुषविधः सोऽनुवीक्ष्य नान्यदात्मनोऽपश्यत्सोऽहमस्मीत्यग्रे व्याहरत्ततोऽहंनामाभवत्तस्मादप्येतर्ह्यामन्त्रितोऽहमयमित्येवाग्र उक्त्वाऽथान्यन्नाम प्रब्रूते यदस्य भवति स यत्पूर्वोऽस्मात्सर्वस्मात्सर्वान्पाप्मन औषत्तस्मात्पुरुष ओषति ह वै स तं योऽस्मात्पूर्वो बुभूषति य एवं वेद ॥ १ ॥

आत्मैवेदमग्र आसीत्। ज्ञानकर्मभ्यां समुच्चिताभ्यां प्रजापतित्वप्राप्तिर्व्याख्याता । केवलप्राणदर्शनेन च तद्धैतल्लोकजिदेवेत्यादिना । प्रजापतेः फलभूतस्य सृष्टिस्थितिसंहारेषु जगतः स्वातन्त्र्यादिविभूत्युपवर्णनेन ज्ञानकर्मणोर्वैदिकयोः फलोत्कर्षो वर्णयितव्य इत्येवमर्थमारभ्यते । तेन च

---

१ अ. ण. °कऽपि ज° । २ अ. °वर्णमि° ।

कर्मकाण्डविहितज्ञानकर्मस्तुतिः कृता भवेत्सामर्थ्यात्। विवक्षितं त्वेतत्। सर्वमप्येतज्ज्ञानकर्मफलं संसार एव भयारत्यादियुक्तत्वश्रवणात्कार्यकरणलक्षणत्वाच्च स्थूलव्यक्तानित्यविषयत्वाच्चेति । ब्रह्मविद्यायाः केवलाया वक्ष्यमाणाया मोक्षहेतुत्वमित्युत्तरार्थं चेति । न हि संसारविषयात्साध्यसाधनादिभेदलक्षणाद्विरक्तस्याऽऽत्मैकत्वज्ञानाविषयेऽधिकारोऽतृषितस्येव पाने । तस्माज्ज्ञानकर्मफलोत्कर्षापवर्णनमुत्तरार्थम्। तथा च वक्ष्यति–तदेतत्पदनीयमस्य तदेतत्प्रेयः पुत्रादित्यादि ।

ब्राह्मणान्तरमवतार्य पूर्वेण संबन्धं वक्तुं वृत्तं कीर्तयति–आत्मैवेत्यादिना । केवलप्राणदर्शनेन च प्रजापतित्वप्राप्तिर्व्याख्यातेति संबन्धः । इदानीमात्मेत्यादेस्तद्भेदमित्यतः प्राक्तनग्रन्थस्याऽऽपाततस्तात्पर्यमाह––प्रजापतेरिति । आदिपदेन सर्वात्मत्वादि गृह्यते । फलोत्कर्षापवर्णनं कुत्रोपयुज्यते तत्राऽऽह–तेन चेति । कर्मकाण्डपदेन पूर्वग्रन्थोऽपि संगृहीतः । फलातिशयो हेत्वतिशयापेक्षोऽन्यथाऽऽकस्मिकत्वापातादतो ज्ञानकर्मफलभूतसूत्रविभूतिरुच्यमाना ज्ञानकर्मणोर्महत्त्वं दर्शयतीत्याह–सामर्थ्यादिति । आपातिकं तात्पर्यमुक्त्वा परमतात्पर्यमाह–विवक्षितं त्विति । किंच विमतं संसारान्तर्भूतं कार्यकरणात्मत्वादस्मदादिकार्यकरणवदित्याह–कार्येति । प्राजापत्यपदस्य संसारान्तर्भूतत्वे हेत्वन्तरमाह–स्थूलेति । साधयति–व्यक्तेति । अनित्यत्वाद्दृश्यत्वाच्च प्रजापतित्वं संसारान्तर्गतमित्याह–अनित्येति । इतिशब्दो विवक्षितार्थसमाप्त्यर्थः । किमित्येतावद्विवक्षितमुपवर्ण्यते तत्राऽऽह–ब्रह्मविद्याया इति । तच्चेदं विवक्षितार्थवचनमेकाकिन्या विद्याया वक्ष्यमाणाया मुक्तिहेतुत्वमित्युत्तरार्थमिति द्रष्टव्यम् । यदा हि कर्मज्ञानफलं प्रजापतित्वं संसार इत्युच्यते तदा तत्पर्यन्तात्सर्वस्मात्तस्माद्विरक्तस्य वक्ष्यमाणविद्यायामधिकारः सेत्स्यतीत्यर्थः । अथ यस्य कस्यचिदर्थितामात्रेण तत्राधिकारसंभवाद्वैराग्यं न मृग्यमित्याशङ्क्याऽऽह–न होति । उभयत्रापि विषयशब्दः पूर्वेण समानाधिकरणः । विवक्षितमर्थमुपसंहरति–तस्मादिति । वैराग्यमन्तरेण ज्ञानानधिकाराज्ज्ञानादिफलस्य प्रजापतित्वस्योत्कर्षवतः संसारत्ववचनं ततो विरक्तस्य वक्ष्यमाणविद्यायामधिकारार्थम् । विरक्तस्य विद्याधिकारे मोक्षादपि वैराग्यं स्यादित्याशङ्क्याऽऽह–तथा चेति । ननु मोक्षार्थं विद्यायां प्रवर्तितव्यं मोक्षश्चापुरुषार्थत्वान्न प्रेक्षावता प्रार्थ्यते तत्राऽऽह–तदेतदिति ।

---

१ ग. घ. झ. °वं चेत°। २ ग. ज. झ. °र्यकार°। ३ ग. °त्मता मृ° । ४ क. °र्यकार°। ख. °र्यकार°। क. °दा तावत्प°। °ण. °स्माद्वि°।

आत्मैवाऽऽत्मेति प्रजापतिः प्रथमोऽण्डजः शरीर्यभिधीयते। वैदिकेज्ञानर्मफलभूतः स एव किमिदं शरीरभेदजातं तेन प्रजापतिशरीरेणाविभक्तमात्मैवाऽऽसीदग्रे प्राक्शरीरान्तरोत्पत्तेः। स च पुरुषविधः पुरुषप्रकारः शिर.पाण्यादिलक्षणो विराट् स एवं प्रथमः संभूतोऽनुवीक्ष्यान्वालोचनं कृत्वा कोऽहं किंलक्षणो वाऽऽस्मीति नान्यद्वस्त्वन्तरमात्मनः प्राणपिण्डात्मकात्कार्यकरणरूपान्नापश्यन्न ददर्श। केवलं त्वात्मानमेव सर्वात्मानमपश्यत्। तथा पूर्वजन्मश्रौतविज्ञानसंस्कृतः सोऽहं प्रजापतिः सर्वात्माऽहमस्मीत्यग्रे व्याहरद्व्याहृतवान्।

आपातिकमनापातिकं च तात्पर्यमुक्त्वा प्रतीकमादायाक्षराणि व्याकरोति—आत्मैवेति। तस्याश्वमेधाधिकारे प्रकृतत्वं सूचयति—अण्डज इति। पूर्वस्मिन्नपि ब्राह्मणे तस्य प्रस्तुतत्वमस्तीत्याह—वैदिकेति। स एवाऽऽसीदिति संबन्धः। स्थित्यवस्थायामपि प्रजापतिरेव समष्टिदेहस्तत्तद्व्यष्ट्यात्मना तिष्ठतीति विशेषासिद्धिरित्याशङ्क्याऽऽह—तेनेति। आत्मशब्देन परस्यापि ग्रहसंभवे किमिति विराडेवोपादीयत इत्याशङ्क्य वाक्यशेषादित्याह—स चेति। वक्ष्यमाणमन्वालोचनादि विराडात्मकर्तृकमेवेत्याह—स एवेति। स्वरूपधर्मविषयौ द्वौ विमर्शौ। नान्यदिति वाक्यमादायाक्षराणि व्याचष्टे—वस्त्वन्तरमिति। दर्शनशक्त्यभावादेव वस्त्वन्तरं प्रजापतिर्न दृष्टवानित्याशङ्क्याऽऽह—केवलं त्विति। सोऽहमित्यादि व्याचष्टे—तथेति। यथा सर्वात्मा प्रजापतिरहमिति पूर्वस्मिञ्जन्मनि श्रौतेन विज्ञानेन संस्कृतो विराडात्मा तथेदानीमपि फलावस्थः सोऽहं प्रजापतिरस्मीति प्रथमं व्याहृतवानिति योजना।

ततस्तस्माद्यतः पूर्वज्ञानसंस्कारादात्मानमेवाहमित्यभ्यधादग्रे तस्मादहंनामाभवत्तस्योपनिषदहमिति श्रुतिप्रदर्शितमेव नाम वक्ष्यति। तस्माद्यस्मात्कारणे प्रजापतावेवं वृत्तं तस्मात्तत्कार्यभूतेषु प्राणिष्वेतर्ह्येतस्मिन्नपि काल आमन्त्रितः कस्त्वमित्युक्तः सन्नहमयमित्येवाग्र उक्त्वा कारणात्माभिधानेनाऽऽत्मानमभिधायाग्रे पुनर्विशेषनामजिज्ञासवेऽथानन्तरं विशेषपिण्डाभिधानं देवदत्तो यज्ञदत्तो वेति ब्रूते कथयति यन्नामास्य विशेषपिण्डस्य मातापितृकृतं भवति।

व्याहरणफलमाह—तत इति। किमिति प्रजापतेरहमिति नामोच्यते साधारणं

१ ख. घ. छ. ज. °थमजोऽण्ड°। २ ख. च. °कर्मज्ञानफ°। ३ च. °व च प्र°। ४ झ. °थमजः सं°। ५ ख. ग. ज. झ. °र्यकार°। ६ ख. ग. घ. ङ. च. ञ. °लं चाऽऽत्मा°। ७ क. घ ण. °लं चति। ८ ख. ग. ङ. च. °ति हि श्रु°। ९ क. झ. °स्मात्का°। १० ख. ग. ङ. च. °दत्त इति वा प्र°।

हीदं सर्वेषामित्याशङ्क्योपासनार्थमित्याह—तस्येति । आध्यात्मिकस्य चाक्षुषस्य पुरुषस्याहमिति रहस्यं नामेति यतो वक्ष्यत्यतः श्रुतिसिद्धमेवैतन्नामास्य ध्यानार्थमिहोक्तमित्यर्थः । प्रजापतेरहंनामत्वे लोकप्रसिद्धिं प्रमाणयितुमुत्तरं वाक्यमित्याह—तस्मादिति ।

स च प्रजापतिरतिक्रान्तजन्मनि सम्यक्कर्मज्ञानभावनानुष्ठानैः साधकावस्थायां यद्यस्मात्कर्मज्ञानभावनानुष्ठानैः प्रजापतित्वं प्रतिपित्सूनां पूर्वः प्रथमः सन्नस्मात्प्रजापतित्वप्रतिपित्सुसमुदायात्सर्वस्मादादावौषद्दहत्किमासङ्गाज्ञानलक्षणान्सर्वान्पाप्मनः प्रजापतित्वप्रतिबन्धकारणभूतान् । यस्मादेवं तस्मात्पुरुषः पूर्वमौषदिति पुरुषः ।

उपासनार्थं प्रजापतेरहंनामोक्त्वा पुरुषनामनिर्वचनं करोति—स चेत्यादिना । पूर्वस्मिञ्जन्मनि साधकावस्थायां कर्माद्यनुष्ठानैरहमहमिकया प्रजापतित्वप्रेप्सूनां मध्ये पूर्वो यः सम्यक्कर्माद्यनुष्ठानैः सर्वं प्रतिबन्धकं यस्मादद्दहत्तस्मात्स प्रजापतिः पुरुष इति योजना । उक्तमेव स्फुटयति—प्रथमः सन्निति । सर्वस्मादस्मात्प्रजापतित्वप्रतिपित्सुसमुदायात्प्रथमः सन्नौषदिति संबन्धः । आकाङ्क्षापूर्वकं दाह्यं दर्शयति—किमित्यादिना । पूर्वं प्रजापतित्वप्रतिबन्धकप्रध्वंसित्वे सिद्धमर्थमाह—यस्मादिति ।

यथाऽयं प्रजापतिरोषित्वा प्रतिबन्धकान्पाप्मनः सर्वान्पुरुषः प्रजापतिरभवदेवमन्योऽपि ज्ञानकर्मभावनानुष्ठानवह्निना केवलं ज्ञानबलाद्वौषति भस्मी करोति ह वै स तं कं योऽस्माद्विदुषः प्रथमः प्रजापतिर्बुभूषति भवितुमिच्छति तामित्यर्थः । तं दर्शयति—य एवं वेदेति । सामर्थ्याज्ज्ञानभावनाप्रकर्षवान् । नन्वनर्थाय प्राजापत्यप्रतिपित्सैवंविदा चेद्दह्यते । नैष दोषः । ज्ञानभावनोत्कर्षाभावात्प्रथमं प्रजापतित्वप्रतिपत्त्यभावमात्रत्वाद्दाहस्य । उत्कृष्टसाधनः प्रथमं प्रजापतित्वं प्राप्नुवन्न्यूनसाधनो न प्राप्नोतीति स तं दहतीत्युच्यते न पुनः प्रत्यक्षमुत्कृष्टसाधनेनेतरो दह्यते । यथा लोक आजिसृतां यः प्रथममाजिमुपसर्पति तेनेतरे दग्धा इवापहृतसामर्थ्या भवन्ति तद्वत् ॥ १ ॥

पुरुषगुणोपासकस्य फलमाह—यथेति । अयं प्रजापतिरिति भविष्यद्वृत्त्या साधकोक्तिः, पुरुषः प्रजापतिरिति फलावस्थः स कथ्यते । कोऽसावोषतीत्यपे-

---

१ ग. च. °पतिः पूर्वज° । २ ग. घ. ङ. ज. झ. °नैः प्राजापत्यप्रति° । ३ ख. ङ. च. झ. °स्मादौष° । ४ क. च. छ. ञ. °र्वान्ति पुरु° । ५ क. ख. घ. ङ. च. छ. ज. झ. °तित्वं बुभू° । अयं पाठस्तु लेखकप्रमादादिति प्रतिभाति । भवतेरकर्मकत्वात् । ६ ख. च. °व प्रतिहत° ।

क्षायामाह—तं दर्शयतीति । पुरुषगुणः प्रजापतिरहमस्मीति विद्यात्सोऽन्यानोषतीत्यर्थः । विद्यासाम्ये कथमेषा व्यवस्थेत्याशङ्क्याऽऽह—सामर्थ्यादिति । हेतुसाम्ये दाहकत्वानुपपत्तेस्तत्सकर्षवानितरान्दहतीत्यर्थः । प्रतिबद्धं दाहमादाय चोदयति—नन्विति । तथा च तत्प्रेप्सायोगात्तदुपास्त्यसिद्धिरित्यर्थः । विवक्षितं दाहं दर्शयन्नुत्तरमाह—नैष दोष इति । तदेव स्पष्टयति—उत्कृष्टेति । प्राप्नुवन्भवतीति शेषः । औपचारिकं दाहं दृष्टान्तेन साधयति—यथेति । आजिर्मर्यादा तां सरन्ति धावन्तीत्याजिसृतस्तेषामिति यावत् ॥ १ ॥

यदिदं तुष्टूषित कर्मकाण्डविहितज्ञानकर्मफलं प्राजापत्यलक्षणं नैव तत्संसारविषयमत्यक्रामदिति तमर्थं प्रदर्शयिष्यन्नाह—

सोऽबिभेत्तस्मादेकाकी बिभेति सहायमीक्षा चक्रे यन्मदन्यन्नास्ति कस्मान्न बिभेमीति तत एवास्य भयं वीयाय कस्माद्ध्यभेष्यदद्वितीयाद्वै भयं भवति ॥ २ ॥

सोऽबिभेत्स प्रजापतिर्योऽयं प्रथमः शरीरी पुरुषविधो व्याख्यातः सोऽबिभेद्भीतवानस्मदादिवदेवेत्याह । यस्मादयं पुरुषविधः शरीरकरणवानात्मनाशविपरीतदर्शनवत्त्वादबिभेत्तस्मात्तत्सामान्यादर्थत्वेऽप्येकाकी बिभेति । किंचास्मदादिवदेव भयहेतुविपरीतदर्शनापनोदकारणं यथाभूतात्मदर्शनं सोऽयं प्रजापतिरीक्षामीक्षणं चक्रे कृतवान्ह कथमित्याह—यद्यस्मान्मत्तोऽन्यदात्मव्यतिरेकेण वस्त्वन्तरं प्रतिद्वंद्वीभूतं नास्ति तस्मिन्नात्मविनाशहेतुभावे कस्मान्न बिभेमीति ।

ज्ञानकर्मफलं सौत्रं पदमुत्कृष्टत्वान्मुक्तिस्तदन्यमुक्त्यभावात्तद्धेतुसम्यग्दर्शनसिद्धये प्रवृत्तिरनर्थिकेत्याशङ्क्य सोऽबिभेदित्यस्य तात्पर्यमाह—यदिदमिति । तुष्टूषितं स्तोतुमभिप्रेतमिति यावत् । आह विवक्षितार्थसिद्ध्यर्थं हेतुं भयभाक्त्वमिति शेषः । ज्ञानकर्मफलं त्रैलोक्यात्मकसूत्रत्वमुत्कृष्टमपि संसारान्तर्भूतमेव न कैवल्यमिति वक्तुमुत्तरं वाक्यमित्यर्थः । अहमेकाकी कोऽपि मा हनिष्यतीत्यात्मनाशविषयविपरीतज्ञानवत्त्वात्प्रजापतिर्भीतवानित्यत्र किं प्रमाणमित्याशङ्क्य कार्यगतेन भयलिङ्गेन कारणेन कारणे प्रजापतौ तदनुमेयमित्याह—यस्मादिति । तत्सामान्यादेकाकित्वाविशेषादिति यावत् । प्रजापतेः संसारान्तर्भूतत्वे हेत्वन्तरमाह—किंचेति । यथाऽस्मदादिर्मी रज्जुस्थाण्वादौ सर्पपुरुषादिभ्रमजनितभयनि-

---

१ क. °स्फुटयति । २ °द्यतनोऽप्ये° । ३ ग. घ. छ. ज. ज झ. °तार्थद° । ४ च. °रं प्रसिद्धं प्र° ।

वृत्तये विचारेण तत्त्वज्ञानं संपाद्यते तथा प्रजापतिरपि भयस्य तद्धेतोश्च विपरीतधियो ध्वस्तेर्हेतुं तत्त्वज्ञानं विचार्य संपादितवानित्यर्थः। परमार्थदर्शनमेव प्रश्नपूर्वकं विशदयति—कथमित्यादिना। तस्मिन्नित्यत्र तस्मादित्यादौ पठितव्यम्।

तत एव यथाभूतात्मदर्शनादस्य प्रजापतेर्भयं वीयाय विस्पष्टमपगतवत्। तस्य प्रजापतेर्यद्भयं तत्केवलाविद्यानिमित्तमेव परमार्थदर्शनेऽनुपपन्नमित्याह—कस्माद्ध्यभेष्यत्किमित्यसौ भीतवान्परमार्थनिरूपणायां भयमनुपपन्नमेवेत्यभिप्रायः। यस्माद्द्वितीयाद्वस्त्वन्तराद्वै भयं भवति। द्वितीयं च वस्त्वन्तरमविद्याप्रत्युपस्थापितमेव। नह्यदृश्यमानं द्वितीयं भयजन्मनो हेतुः। "तत्र को मोहः कः शोक एकत्वमनुपश्यतः" इति मन्त्रवर्णात्। यच्चैकत्वदर्शनेन भयमपनुनोदापनोदितं तद्युक्तम्। कस्मात् द्वितीयाद्वस्त्वन्तराद्वै भयं भवति तदेकत्वदर्शनेन द्वितीयदर्शनमपनीतमिति नास्ति यतः।

मच्छब्दोपलक्षितं प्रत्यक्चैतन्यमद्वितीयब्रह्मस्वरूपेण ज्ञात्वा सहेतुं भीतिं प्रजापतिरक्षिपदित्युक्तमिदानीं तत्त्वज्ञानफलमाह—तत इति। कस्माद्भीत्यादेरुत्तरस्य पूर्वेण पौनरुक्त्यमित्याशङ्क्य विदुषो हेत्वभावान्न भयमित्युक्तसमर्थनार्थत्वादुत्तरस्य नैवमित्याह—तस्येत्यादिना। अनुपपत्तौ हेतुमाह—यस्मादिति। परमार्थदर्शनेऽपि वस्त्वन्तरात्किमिति भयं न भवतीत्याशङ्क्याऽऽह—द्वितीयं चेति। अन्वयव्यतिरेकाभ्यां द्वैतस्याविद्याप्रत्युपस्थापितत्वेऽपि कुतस्तदुत्थद्वैतदर्शनं भयकारणं न भवतीत्याशङ्क्याऽऽह—न हीति। तत्त्वज्ञाने सत्यज्ञानयोगात्तदुत्थं द्वैतं तद्दर्शनं चायुक्तमित्यतो हेत्वभावाद्भयानुपपत्तिरित्यर्थः। अद्वैतज्ञाने भयनिवृत्तिरित्यत्र मन्त्रं संवादयति—तत्रेति। विराडैक्यदर्शनेनैव प्रजापतेर्भयमपनीतं नाद्वैतदर्शनेनेत्यभिप्रेत्यैवमपि यन्मन्त्रान्तरास्तीत्यादि शक्यं व्याख्यातुमित्याशङ्क्याङ्गीकुर्वन्नाह—यच्चेति। तदेव प्रश्नद्वारा प्रकटयति—कस्मादित्यादिना।

अत्र चोदयन्ति—कुतः प्रजातेरेकत्वदर्शनं जातं को वाऽस्मा उपदिदेश। अथानुपदिष्टमेव प्रादुरभूत्। अस्मदादेरपि तथा प्रसङ्गः। अथ जन्मान्तरकृतसंस्कारहेतुकम्। एकत्वदर्शनानर्थक्यप्रसङ्गः।

---

१ क. ञ. °हेतुत°। २ ग. झ. °न्महे°। ङ. छ. °न्मने हे°। ३ ग. ङ. च. झ. °नोद° त°। ४ ञ ण. °ह्मस्वरू°। ५ क. ख. घ. ज. °तिराक्षिपतीत्यु°। ६ घ. ण. °र्शने न°। ७ ख. घ. ज. °दुत्थद्वै°। ८ घ. °नेन भ°।

यथा प्रजापतेरतिक्रान्तजन्मावस्थस्यैकत्वदर्शनं विद्यमानमप्यविद्याबन्धकारणं नापनिन्ये। यतोऽविद्यासंयुक्त एवायं जातोऽविभेत्। एवं सर्वेषामेकत्वदर्शनानर्थक्यं प्राप्नोति। अन्त्यमेव निवर्तकमिति चेन्। न। पूर्ववत्पुनः प्रसङ्गेनानैकान्त्यात्। तस्मादनर्थकमेवैकत्वदर्शनमिति।

प्रथमव्याख्यानानुसारेण चोद्यमुत्थापयति—अत्रेति। प्रजापतेर्ब्रह्मात्मैक्यज्ञानाद्भीतिध्वस्तिरुक्ता न च तस्य तज्ज्ञानं युक्तं हेत्वभावादित्याह—कुत इति। यस्मादस्माकमैक्यधीस्तस्मादेव तस्यापि स्यादित्याशङ्क्याऽऽह—को वेति। न हि तस्य शास्त्रश्रवणमाचार्याभावान्नापि संन्यासस्तस्य त्रैवर्णिकविषयत्वान्नापि शमाद्यैश्वर्यासक्तत्वादतोऽस्मासु प्रसिद्धश्रवणादिविद्याहेत्वभावान्न प्रजापतेरैक्यधीर्युक्तेत्यर्थः। उपदेशानपेक्षमेव प्रजापतेरैक्यज्ञानं प्रादुर्भूतमिति शङ्कते—अथेति। अतिप्रसक्त्या प्रत्याह—अस्मदादेरिति। प्रजापतेर्यजमानावस्थायामाचार्यस्य सत्त्वाच्छ्रवणाद्यावृत्तेरैक्यज्ञानोदयानत्संस्कारोत्थं तथाविधमेव तज्ज्ञानं फलावस्थायामपि स्यादिति चोदयति—अथेति। दूषयति—एकत्वेति। अज्ञानध्वंसित्वेनार्थवत्त्वमित्याशङ्क्याऽऽह—यथेति। तत्र गमकमाह—यत इति। दार्ष्टान्तिकमाह—एवमिति। नन्वस्मिन्नेव जन्मनि प्रजापतेरैक्यधीरनपेक्षा जायते 'ज्ञानमप्रतिघं यस्य' इति स्मृतेः। न च तदुत्पत्त्यनन्तरमेव सहेतुं बन्धं निरुणद्धि भयारत्यादिफलेन प्रारब्धकर्मणा प्रतिबन्धादतो मरणकालिकं मदज्ञानध्वंसीति शङ्कते—अन्त्यमेवेति। प्रवृत्तफलस्य कर्मणः स्वोपपादकाज्ञानलेशादिज्ञानशक्तिप्रतिबन्धकत्वेऽपि जन्मान्तरादिसर्वसंसारहेत्वज्ञानध्वंसिज्ञानसामर्थ्यप्रतिबन्धकत्वे मानाभावान्मध्ये जातं ज्ञानमनिवर्तकमित्यशक्यं वक्तुमन्त्यस्य च ज्ञानस्य निवर्तकत्वे नान्त्यत्वं हेतुः। यजमानान्तरस्यान्त्ये ज्ञाने तद्ध्वंसित्वादृष्टेरन्त्यत्वस्याज्ञानध्वंसित्वेनानियमात्। न च यजमानान्तरे प्रजापतौ चान्त्यं ज्ञानं ज्ञानत्वादज्ञानध्वंसि पूर्वज्ञानेषु बन्धहेत्वज्ञानध्वंसित्वादृष्टेर्ज्ञानत्वहेतोरनैकान्त्यात्। न चान्त्यमैक्यज्ञानमैक्यज्ञानत्वादज्ञानध्वंसीति युक्तम्। उपान्त्यतादृग्ज्ञानत्वेऽपि तदयोगादुपान्त्ये हेतोरनैकान्त्यादित्यभिप्रेत्य दूषयति—नेत्यादिना। वस्तुकारणाभावात्तदन्तरेण चोत्पत्तावतिप्रसङ्गात्संस्काराधीनत्वेऽपि विशेषाभावादन्त्यस्य च ज्ञानस्याज्ञानध्वंसित्वासिद्धेरयुक्तं प्रजापतेरैकत्वदर्शनमित्युपसंहरति—तस्मादिति।

---

१ घ. ज 'विद्यां ब'। २ क. °यं चातो'। ३ ख. च. °ति चेत्। ४ घ. ण. °मादिसृष्ट्याद्यं'। ५ क. घ. ञ. ण. °कालीनं त'। ६ घ. ण. °लेशनाशिज्ञा'। ७ घ. °त्यज्ञा'। ८ ण. °नत्वा'। ९ ण. °पान्त्यहे'।

नैष दोषः । उत्कृष्टहेतूद्भवत्वाल्लोकवत् । यथा पुण्यकर्मोद्भवैर्विविक्तैः कार्यकरणैः संयुक्ते जन्मनि सति प्रज्ञामेधास्मृतिवैशारद्यं दृष्टं तथा प्रजापतेर्धर्मज्ञानवैराग्यैश्वर्यविपरीतहेतुसर्वपाप्मदाहाद्विशुद्धैः कार्यकरणैः संयुक्तमुत्कृष्टं जन्म तदुद्भवं चानुपदिष्टमेवं युक्तमेकत्वदर्शनं प्रजापतेः । तथा च स्मृतिः--

" ज्ञानमप्रतिघं यस्य वैराग्यं च जगत्पतेः ।
ऐश्वर्यं चैव धर्मश्च सहसिद्धं चतुष्टयम् " ॥ इति ।

प्रजापतेः सुषुप्तप्रतिबुद्धवत्प्रकृष्टादृष्टोत्थकार्यकरणवत्त्वात्पूर्वकल्पीयपदपदार्थवाक्यस्मरणवतः स्मृतिविपरिवर्तिनो वाक्याद्विचार्यमाणादृष्टसहकृतात्तत्त्वज्ञानं स्यालोके विशिष्टादृष्टोत्थकार्यकरणानां प्रज्ञाद्यतिशयदर्शनात्तेन च ज्ञानेन जन्मान्तरहेत्वविद्याक्षयेऽप्यारब्धं कर्म तज्ज भयारण्याद्यविद्यालेशतो भविष्यतीति परिहरति--नैष दोष इति । संगृहीतमर्थं समर्थयते--यथेत्यादिना । धर्मादिचतुष्टयाद्विपरीतमधर्मादिचतुष्टयं तत्र हेतोः सर्वस्य पाप्मनो ज्ञानाद्यतिशयेन नाशादिति यावत् । उत्कृष्टत्वं प्रकृष्टज्ञानादिशालित्वम् । उक्तजन्मफलमाह--तदुद्भवे चेति । तस्य ज्ञानादिवैशारद्ये पौराणिकीं स्मृतिमुदाहरति--तथा चेति । अप्रतिघमप्रतिबद्धं निरङ्कुशमिति यावत्तत्पदत्रयेकं संबध्यते यस्यैतच्चतुष्टयं सहसिद्धं सं निरवर्ततेति संबन्धः ।

सहसिद्धत्वे भयानुपपत्तिरिति चेत । न ह्यादित्येन सह तम उदेति । न, अन्यानुपादेष्टार्थत्वात्सहसिद्धवाक्यस्य । श्रद्धातात्पर्यप्राणिपातादीनामहेतुत्वमिति चेत् । स्यान्मतम्--" श्रद्धावाल्लभते ज्ञानं तत्परः संयतेन्द्रियः " " तद्विद्धि प्रणिपातेन " इत्यवमादीनां श्रुतिस्मृतिविहितानां ज्ञानहेतूनामहेतुत्व प्रजापतेरिव जन्मान्तरकृतधर्महेतुत्वे ज्ञानस्येति चेत । न । निमित्तविकल्पसमुच्चयगुणवद्गुणवत्त्वभेदोपपत्तेः ।

सहसिद्धत्वस्मृतेः ' सोऽबिभेत् ' इतिश्रुतिविरुद्धत्वादप्रामाण्यमिति विरोधाधिकरणन्यायेन शङ्कते--सहसिद्धत्व इति । सत्येव सहजे ज्ञाने स्वहेतोर्भयमपि स्यादिति चेन्नेत्याह--न हीति । अन्येनाऽऽचार्येणानुपदिष्टमेव प्रजापतेर्ज्ञानमुदेतीत्येवमर्थपरत्वात्सहसिद्धवाक्यस्य तज्ज्ञानात्पाक्तस्य भयमविरुद्धमूर्ध्वं चाज्ञानले-

---

१ ख. ज °यकार° । २ ख °र्यकार° । ३ ख °मेक° । ४ क. छ. च प्रजापतेः । ५ ख र्यँकार° । ६ ख र्यकार° । ७ ञ. ण. °येऽपि प्रार° ८ ख ण. °रब्धक° । ९ क. ख. घ °त तस्यै° । १० क. ख स ह नि° । घ. सान्निर° । ११ घ. शेषः । १२ ज. °द्धतायां भ° । १३ ग. घ ङ. च ज. °स्य । सहसिद्धशब्देन जन्मत एव ज्ञानित्वं नोच्यते किंत्वाचार्यादिनिरपेक्षत्वमेव सहसिद्धवाक्यस्य । श्र° । १४ ख. ग. ङ. च. °तकर्म° । १५ घ. तत्त्वज्ञाना° ।

शादतो न विरोधः श्रुतिस्मृत्योरिति । समाधत्ते–नेत्यादिना । ज्ञानोत्पत्तेराचार्याद्यनपेक्षत्वे श्रद्धादिविधानानर्थक्यादनेकश्रुतिस्मृतिविरोधः स्यादिति शङ्कते–श्रद्धेति । आदिपदेन शमादिग्रहः । अस्मदादिषु तेषां हेतुत्वमिति चेन्नेत्याह–प्रजापतेरिवेति । चोदितं विरोधं निराकरोति–नेत्यादिना । निमित्तानां विकल्पैः समुच्चयो गुणवत्त्वमगुणवत्त्वमित्यनेन प्रकारेण कार्योत्पत्तौ विशेषसंभवान्न श्रद्धादिविध्यानर्थक्यमित्यर्थः ।

लोके हि नैमित्तिकानां कार्याणां निमित्तभेदोऽनेकधा विकल्प्यते । तथा निमित्तसमुच्चयः । तेषां च विकल्पितानां समुच्चितानां च पुनर्गुणवद्गुणवत्त्वकृतो भेदो भवति । तद्यथा–रूपज्ञान एव तावन्नैमित्तिके कार्ये तमसि विनाऽऽलोकेन चक्षूरूपसंनिकर्षो नक्तंचराणां रूपज्ञाने निमित्तं भवति । मन एव केवलं रूपज्ञाननिमित्तं योगिनामस्माकं तु संनिकर्षालोकाभ्यां सह तथाऽऽदित्यचन्द्राद्यालोकभेदैः समुच्चिता निमित्तभेदा भवन्ति । तथाऽऽलोकविशेषगुणवद्गुणवत्त्वेन भेदाः स्युः ।

संग्रहवाक्यं विवृणोति–लोके हीति । तांश्च सर्वं विकल्पादि यथा ज्ञातुं शक्यं तथैकस्मिन्नेव नैमित्तिके रूपज्ञानाख्यकार्ये दर्शयामीत्याह–तद्यथेति । तत्र विकल्पमुदाहरति–तमसीत्यादिना । समुच्चयं दर्शयति–अस्माकं त्विति । विकल्पितानां समुच्चितानां च निमित्तानां गुणवद्गुणवत्त्वप्रयुक्तं भेदं कथयति–तथेति । आलोकविशेषस्य गुणवत्त्वं बहुलत्वमगुणवत्त्वं मन्दप्रभत्वं चक्षुरादेर्गुणवत्त्वं निर्मलत्वादि तिमिरोपहतत्वादि चागुणवत्त्वमिति भेदः ।

एवमेवाऽऽत्मैकत्वज्ञानेऽपि क्वचिज्जन्मान्तरकृतं कर्म निमित्तं भवति यथा प्रजापतेः । क्वचित्तपो निमित्तम् । " तपसा ब्रह्म विजिज्ञासस्व " इति श्रुतेः । क्वचित् "आचार्यवान्पुरुषो वेद" "श्रद्धावाँल्लभते ज्ञानम्" " तद्विद्धि प्रणिपातेन " " आचार्याद्धैव " " द्रष्टव्यः श्रोतव्यः " इति श्रुतिस्मृतिभ्य एकान्तज्ञानलाभानिमित्तत्वं श्रद्धाप्रभृतीनाम् । अधर्मादिनिमित्तावियोगहेतुत्वात् । वेदान्तश्रवणमननानिदिध्यासनानां च साक्षाज्ज्ञेयविषयत्वात । पापादिप्रतिबन्धक्षये चाऽऽत्ममनसोर्भूतार्थज्ञाननिमित्तस्वाभाव्यात् । तस्मादहेतुत्वं नैं जातु ज्ञानस्य श्रद्धाप्राणिपातादीनामिति ॥ २ ॥

---

१ ग ज. °षां वि° । २ ग ङ. च. ज्ञाननि° । ३ ग. °त्तं म° । ४ ख. ङ. °मयोगिनामस्मा° । ५ ख. ग. घ. छ ज. झ °च्चितो नि° । ६ ख. ग. ङ. छ ज. झ. °भेदो भ° । ७ ख. ग. घ ङ छ. ज. झ. भवति । ८ क °नांख्ये का° । ९ ख. कल्पय । १० घ. ज. °मप्यात्मै । ११ क. °व ह्याज्ञव्यो द्र° । ख. ग. °वज्ञानत्य° । १२ क. छ. झ. ञ ज्ञा° ।

दृष्टान्तं प्रतिपाद्य दार्ष्टान्तिकमाह-एवमिति । तथाऽन्यस्यापि प्रजापतितुल्यस्य वामदेववादेर्जन्मान्तरीयसाधनवशादीश्वरानुग्रहादस्मिञ्जन्मनि स्मृतवाक्यादैक्यज्ञानमुदेतीति शेषः । भृगुस्तत्तुल्यो वाऽधिकारी क्वचिदित्युच्यते । तपोऽन्वयव्यतिरेकाख्यमालोचनम् । श्वेतकेतुप्रभृतिषु ज्ञाननिमित्तानां समुच्चयं दर्शयति-क्वचिदित्यादिना । एकान्तं नियतमावश्यकं ज्ञानोदयलाभे निमित्तत्वमिति यावत् । अथ प्राणिपातादिव्यतिरेकेण न प्रजापतेरपि ज्ञानं संभवति सामर्थ्याभावादत आह-अधर्मादीति । प्राणिपातादेर्ज्ञानोदयप्रतिबन्धकनिवर्तकत्वात्प्रजापतेश्च तन्निवृत्तेर्जन्मान्तरीयसाधनायत्तत्वादाधुनिकप्राणिपातादिना विना स्मृतवाक्यादैक्यधीः संभवतीत्यर्थः । तर्हि श्रवणादिव्यतिरेकेणापि प्रजापतेर्ज्ञानं स्यादित्याशङ्क्याऽऽह-वेदान्तेति । न तैर्विना ज्ञानं कस्यचिदपि स्यात्प्रजापतेस्तु जन्मान्तरीयश्रवणवशादिदानीमनुस्मृतवाक्यात्तदुत्पत्तिरिति शेषः । तर्हि श्रद्धादिकमपि प्रतिबन्धकनिवर्तकत्वेन प्रजापतेरादरणीयं तन्निवृत्तिमन्तरेण ज्ञानोत्पत्त्यनुपपत्तेरित्याशङ्क्याऽऽह- पापादीति । आत्ममनसोर्मिथः संयुक्तयोः संबन्धि यत्पापं तत्कार्यं च रागादि तेन ज्ञानोत्पत्तौ प्रतिबन्धस्य पूर्वोक्तेन न्यायेन क्षये सति प्रजापतेरीश्वरानुग्रहात्स्मृतवाक्यस्य परमार्थज्ञानोत्पत्तौ केवलस्य निमित्तत्वात्तस्याऽऽधुनिकश्रद्धाद्यतिरेकेण ज्ञानोदयेऽपि न तद्वैधिवैयर्थ्यम् । अस्माकं तद्वशादेव तदुत्पत्तेर्वाक्यतात्पर्यादिज्ञानं सर्वेषामेव ज्ञानसाधनपाचार्यादिषु पुनर्विकल्पसमुच्चयावित्यर्थः । अधिकारभेदेन ज्ञानहेतुषु विकल्पेऽपि तेषामस्मासु समुच्चयान्न श्रुतिस्मृतिविरोधोऽस्तीत्युपसंहरति -तस्मादिति ॥ २ ॥

स वै नैव रेमे तस्मादेकाकी न रमते स द्वितीयमैच्छत् । स हैतावानास यथा स्त्रीपुमांसौ संपरिष्वक्तौ स इममेवाऽऽत्मानं द्वेधाऽपातयत्ततः पतिश्च पत्नी चाभवतां तस्मादिदमर्धबृगलमिव स्व इति ह स्माऽऽह याज्ञवल्क्यस्तस्मादयमाकाशः स्त्रिया पूर्यत एव ताꣳ समभवत्ततो मनुष्या अजायन्त ॥ ३ ॥

इतश्च संसारविषय एव प्रजापतित्वं यतः स प्रजापतिर्वै नैव रेमे रतिं नान्वभवदरत्याऽऽविष्टोऽभूदित्यर्थोऽस्मदादिवदेव यत इदानीमपि तस्मादेकाकित्वादिधर्मवत्त्वादेकाकी न रमते रतिं नानुभवति रतिर्नामेष्टार्थसंयोगजा क्रीडा । तत्प्रसङ्गिन इष्टवियोगान्मनस्याकुली-

१ ण. ज्ञानला° । २ ख. °दि तस्याभेदज्ञा° । ३ घ. ण. °हादनुस्मृ° ।

भावोऽरतिरित्युच्यते । स तस्या अरतेरपनोदाय द्वितीयमरत्यपघातसमर्थं स्त्रीविस्त्वैच्छद्गृद्धिमकरोत् । तस्य चैवं स्त्रीविषयं गृध्यतः स्त्रिया परिष्वक्तस्येवाऽऽत्मनो भावो बभूव । स तेन सत्येप्सुत्वादेतावानेतत्परिमाण आस बभूव ह ।

प्रजापतेर्भयाविष्टत्वेन संसारान्तर्भूतत्वमुक्तमिदानीं तत्रैव हेत्वन्तरमाह—इतश्चेति । अरत्याविष्टत्वे प्रजापतेरेकाकित्वं हेतू करोति—यत इति । कार्यस्थारतिः कारणस्थारतेर्लिङ्गमित्यनुमानं सूचयति—इदानीमपीति । आदिपदेन भयाविष्टत्वादिग्रहः । अरतिं प्रतियोगिनिरुक्तिद्वारा निर्वक्ति—रतिर्नामेति । कथं तर्हि यथोक्तारतिनिरसनमित्याशङ्क्य स द्वितीयमैच्छदित्येतद्व्याचष्टे—स तस्या इति । स हेत्यस्य वाक्यस्य पातनिकां करोति—तस्येति । तेन भावेनेति यावत् । कथमभिमानमात्रेण यथोक्तपरिमाणत्वं तत्राऽऽह—सत्येति । निपातोऽवधारणे । तस्यैव पुनरनुवादोऽन्वयार्थः ।

किंपरिमाण इत्याह—यथा लोके स्त्रीपुमांसावरत्यपनोदाय संपरिष्वक्तौ यत्परिमाणौ स्यातां तथा तत्परिमाणो बभूवेत्यर्थः । स तथा तत्परिमाणमेवेममात्मानं द्वेधा द्विप्रकारमपातयत्पातितवान् । इममेवेत्यवधारणं मूलकारणाद्विराजो विशेषणार्थम् । न क्षीरस्य सर्वोपमर्देन दधिभावापत्तिवद्विराट्सर्वोपमर्देनेतावानास । किं तर्ह्यात्मनाऽवस्थितस्यैव विराजः सत्यसंकल्पत्वादात्मव्यतिरिक्तं स्त्रीपुंसपरिष्वक्तपरिमाणं शरीरान्तरं बभूव । स एव च विराट् तथाभूतः स हैतावानासेति सामानाधिकरण्यात् ।

परिमाणमेव प्रश्नपूर्वकं विवृणोति—किमित्यादिना । संप्रति स्त्रीपुंसयोरुत्पत्तिमाह—स तथेति । ननु द्वेधाभावो विराजो वा संसक्तस्त्रीपुंसांगतस्य पिण्डस्य वा । नाऽऽद्यः । सशब्देन विराड्ग्रहायोगात्तस्य कर्मत्वाद्द्वितीये त्वात्मशब्दानुपपत्तिस्तत्राऽऽह—इममिति । तथा च सशब्देन कर्तृतया विराड्ग्रहणमविरुद्धमित्यर्थः । तदेव स्फुटयति—नेत्यादिना । कस्य तर्हि द्विधाकरणमित्याशङ्क्याऽऽह—किं तर्हीति । तच्च द्विधाकरणकर्मेति शेषः । कथं तर्हि तत्राऽऽत्मशब्दः संभवतीत्याशङ्क्याऽऽह—स एव चेति । तथाभूतः संसक्तजायापुंप (स्प) रिमाणोऽभूदिति यावत् ।

---

१ ग. घ. ज. °तिरुच्य° । २ ख. घ. ङ. च. ज. झ. °नोदनाय । ३ ख. घ. च. °मनैच्छद्र° । ४ क. ख. ग. घ. ङ. च. ज. °त्वाद्वेता° । ५ ग. ङ. °व । किं° । ६ घ. ण. °ति । °ह नि° । ७ घ. छ. ज. झ. °नोदनाय । ८ क. ख. च. °राड्भावोप° । ९ ख. घ. छ. ज. झ. °पुंप° । १० घ. °पुंप° । ११ ख. ञ. ण. °रणे क° । घ. °रणं क° ।

ततस्तस्मात्पातनात्पतिश्च पत्नी चाभवतामिति दंपत्योर्निर्वचनं लौकिकयोरत एव तस्माद्यस्मादात्मन एवार्धः पृथग्भूतो येयं स्त्री तस्मादिदं शरीरमात्मनोऽर्धबृगलमर्धं च तद्बृगलं च तदर्धबृगलं विदलंमेंर्धविदलमिवेत्यर्थः । प्राक्रूयद्बृहनात्कस्यार्धबृगलमित्युच्यते स्व आत्मन इति । एवमाह स्मोक्तवान्किल याज्ञल्क्यो यज्ञस्य वल्को वक्ता यज्ञवल्कस्तस्यापत्यं याज्ञवल्क्यो दैवरातिरित्यर्थः । ब्रह्मणो वाऽपत्यं यस्मादयं पुरुषार्ध आकाशः रूयर्धशून्यः पुनरुद्बृहनात्तस्मात्पूर्यते रूयर्धेन पुनः संपुटीकरणेनैवं विदलार्धः । तां स प्रजापतिर्मन्वाख्यः शतरूपाख्यामात्मनो दुहितरं पत्नीत्वेन कल्पितां समभवन्मैथुनमुपगतवान् । ततस्तस्मात्तदुपगमनान्मनुष्या अजायन्तोत्पन्नाः ॥ २ ॥

न केवलं मनुः शतरूपेत्यनयोरेव दंपत्योरिदं निर्वचनं किंतु लोकप्रसिद्धयोः सर्वयोरेव तयोरेतद्द्रष्टव्यं सर्वत्रास्य संभवादित्याह—लौकिकयोरिति । उक्ते निर्वचने लोकानुभवमनुकूलयति—तस्मादिति । प्रागिति सहधर्मचारिणीसंबन्धात्पूर्वमित्यर्थः । आकाङ्क्षाद्वारा षष्ठीमादायानुभवमवलम्ब्य व्याचष्टे—कस्येत्यादिना । बृगलशब्दो विकारार्थः । अनुभवसिद्धेऽर्थे प्रामाणिकसंमतिमाह—एवमिति । द्वेधापातने सत्येको भागः पुरुषोऽपरस्तु स्त्रीत्यत्रैव हेत्वन्तरमह—यस्मादिति । उद्बृहनात्प्रागवस्थायामाकाशः पुरुषार्थः रूपर्धशून्यो यस्मादसंपूर्णो वर्तते तस्मादुद्बृहनेन प्राप्तरूपर्धेन पुनरितरो भागः पूर्यते ययो विदलार्धोऽसंपूर्णः संपुटीकरणेन पुनः संपूर्णः क्रियते तद्वदिति योजना । पूर्वमपि स्वाभाविकयोग्यतावशेन संसर्गोऽभूदनादित्वात्संसारस्येति सूचयितुं पुनरित्युक्तम् । पुरुषार्धस्येतरार्धस्य च मिथः संबन्धान्मनुष्यादिसृष्टिरित्याह—तामित्यादिना ।

सो हेयमीक्षां चक्रे कथं नु माऽऽत्मन एव जनयित्वा संभवति हन्त तिरोऽसानीति सा गौरभवेद्वृषभ इतरस्ताꣳ समेवाभवत्ततो गावोऽजायन्त वडवेतराऽभवदश्ववृष इतरो गर्दभीतरा गर्दभ इतरस्ताꣳ समेवाभवत्तत एकशफमजायताजेतराऽ-

---

१ घ. ङ. °लं द्विद° । २ ग °लमि° । २ घ. ङ. ज. °मर्धं वि° । क. ख. ग ङ. °णैव । ५ घ. °व द्विद° । ६ ग. ङ. छ. ज. ज. झ. °थुन्यमु° । ७ ण ना° । स्वश० । ञ. ना । अ° । ८ ञ °ति । वल्कशब्दो विकारार्थः । द्वे° । ९ घ. °था द्विद° । १० ङ. ठ. °वडवृष° ।

भवद्वस्त इतरोऽविरितरा मेष इतरस्ताꣳ समेवाभवत्ततोऽजावयोऽजायन्तैवमेव यदिदं किंच मिथुनमा पिपीलिकाभ्यस्तत्सर्वमसृजत ॥ ४ ॥

सा शतरूपा हेयं सेयं दुहितृगमने स्मार्तं प्रतिषेधमनुस्मरन्तीक्षांचक्रे । कथं न्विदमकृत्यं यन्मा मामात्मन एव जनयित्वोत्पाद्य संभवत्युपगच्छति । यद्यप्ययं निर्घृणोऽहं हन्तेदानीं तिरोऽमानि जात्यन्तरेण तिरस्कृता भवानीत्येवमीक्षित्वाऽसौ गौरभवत् । उत्पाद्यप्राणिकर्मभिश्चोद्यमानायाः पुनः पुनः सैव मतिः शतरूपाया मनोश्चाभवत् । ततश्च ऋषभ इतरः । तां समेवाभवदित्यादि पूर्ववत् । ततो गावोऽजायन्त । तथा वडवेतराऽभवदश्ववृष इतरः । तथा गर्दभीतरा गर्दभ इतरः । तत्र वडवाश्ववृषादीना संगमात्तत एकशफमेकखुरमश्वाश्वतरगर्दभाख्यं त्रयमजायत । तथाऽजेतराऽभवद्बस्तश्छाग इतरः । तथाऽविरितरा मेष इतरः । तां समेवाभवत तां तामिति वीप्सा । तामजां तामविं चेति सर्वमभवदेवेत्यर्थः । ततोऽजाश्चावयश्चाजावयोऽजायन्त । एवमेव यदिदं किंच यत्किंचेदं मिथुनं स्त्रीपुंसलक्षणं द्वंद्वमा पिपीलिकाभ्यः पिपीलिकाभिः सहानेनैव न्यायेन तत्सर्वमसृजत जगत्सृष्टवान् ॥ ४ ॥

स्मार्तं प्रतिषेधमिति । न सगोत्रा सपिण्डप्रवरा भार्यां विन्देतेत्यादिकमिति यावत् । अकृत्यं हीदं यद्दुहितृगमनं मातृतश्चाऽऽत्मत्वात्पुरुषान्तरवत्तृतश्चाऽऽत्मसमा दिति स्मृतेरिति मत्वाऽऽह—कथमिति । तयोर्जात्यन्तरगमनं कथमित्याशङ्क्याऽऽह—यद्यपीति । शतरूपाया गोभावमजायामपत्नादिभावो मनोर्भवतु तावता यथोक्तदोषपरिहारस्तयोर्वडवादिभावे तु न कारणमस्तीत्याशङ्क्याऽऽह—उत्पाद्येति । ततस्तथा गोमातादनन्तरमिति यावत् । गवां जन्मार्थं मिथः संभवनं ततःशब्दार्थः । तत[5] तेषामुत्पत्तौ सत्यामिति यावत् । कथमद्वैधे वीप्सा विवक्षितेत्याह—तामिति । तामेवाभिनयति—तामजामिति । तां वडवां तां गर्दभीं चेत्यपि द्रष्टव्यम् । ततो मिथः संभवनाद्यथोक्तादिति यावत् । विशेषाणामानन्त्यात्प्रत्येकमुपदेशासंभवं मन्वानः संक्षिप्योपसंहरति—एवमेवेति । तद्विभजते—इदं मिथुनमिति । पशुकर्मप्रयोगो न्यायः ॥ ४ ॥

---

१ ख. घ. ज. ट. ठ. ड. °वद्वस्त । २ ख. घ. च. झ. °वद्वस्त° । ३ क. घ. ङ. छ. ज. झ. °रः । स ता । ४ ख. घ. ङ. च. छ. ज. झ. °पुल° । ५ ण. °हारात्तयो° । ६ ण. ततस्तेषा° ।

सोऽवेदहं वाव सृष्टिरस्म्यहꣳ हीदꣳ सर्वमसृक्षीति ततः
सृष्टिरभवत्सृष्ट्याꣳ हास्यैतस्यां भवति य एवं वेद ॥ ५ ॥

स प्रजापतिः सर्वमिदं जगत्सृष्ट्वाऽवेत्। कथम्। अहं वावाहमेव सृष्टिः सज्यत इति सृष्टं जगदुच्यते सृष्टिरिति। यन्मया सृष्टं जगन्मदभेदत्वादहमेवास्मि न मत्तो व्यतिरिच्यते। कुत एतत्। अहं हि यस्मादिदं सर्वं जगदसृक्षि सृष्टवानस्मि तस्मादित्यर्थः। यस्मात्सृष्टिशब्देनाऽऽत्मानमेवाभ्यधात्प्रजापतिस्ततस्तस्मात्सृष्टिरभवत्सृष्टिनामाभवत्। सृष्ट्यां जगति ह्यस्य प्रजापतेरतस्यामेतस्मिञ्जगंति स प्रजापतिवत्स्रष्टा भवति स्वात्मनोऽनन्यभूतस्य जगतः। कः। य एवं प्रजापतिवद्यथोक्तं स्वात्मनोऽनन्यभूतं जगत्साध्यात्माधिभूताधिदैवं जगदहमस्मीति वेद ॥ ५ ॥

यद्यपि मन्वादिसृष्टिरेवोक्ता तथाऽपि सर्वा सृष्टिरुक्तैवेति सिद्धवत्कृत्याऽऽह-स प्रजापतिरिति। अवगतिं प्रश्नपूर्वकं विशदयति-कथमित्यादिना। कथं सृष्टिरस्मीत्यवधार्यते कर्तृक्रिययोरेकत्वायोगादित्याशङ्क्याऽऽह-सृज्यत इतीति। पदार्थमुक्त्वा वाक्यार्थमाह-यन्मयेति। जगच्छब्दात्परि तच्छब्दमध्याहृत्याहमेव तदस्मीति संबन्धः। तत्र हेतुमाह-मदभेदत्वादिति। एवकारार्थमाह-नेति। मदभेदत्वादित्युक्तमाक्षिप्य समाधत्ते-कुत इत्यादिना। न हि सृष्टं स्रष्टुरर्थान्तरं तस्यैव तेन तेन भावविवदवस्थानादित्यर्थः। ततः सृष्टिरित्यादि व्याचष्टे यस्मादिति। किमर्थं स्रष्टुरेषा विभूतिरुपदिष्टेत्याशङ्क्याऽऽह-सृष्ट्यामिति। जगति भवतीति संबन्धः। वाक्यार्थमाह-प्रजापतिवदिति ॥ ५ ॥

अथेत्यभ्यमन्थत्स मुखाच्च योनेर्हस्ताभ्यां चाग्निमसृजत तस्मादेतदुभयमलोमकमन्तरतोऽलोमका हि योनिरन्तरतः। तद्यदिदमाहुरमुं यजामुं यजेत्येकैकं देवमेतस्यैव सा विसृष्टिरेष उ ह्येव सर्वे देवाः। अथ यत्किंचेदमार्द्रं तद्रेतसोऽसृजत तदु सोम एतावद्वा इदꣳ सर्वमन्नं चैवान्नादश्च सोम एवान्नमग्निरन्नादः सैषा ब्रह्मणोऽतिसृष्टिः। यच्छ्रे-

१ ख. ग घ. ङ. ज. °मवोक्तवान्प्रजा°। २ ख. घ. छ. ज. झ. °ति प्र°। ३ क. °दैवतं ज°। ४ ग. ङ. ज. ट. ठ. ड. °दम°।

यसो देवानसृजताथ यन्मर्त्यः सन्नमृतानसृजत तस्मादतिसृष्टिरतिसृष्ट्या हास्यैतस्यां भवति य एवं वेद ॥ ६ ॥

एवं स प्रजापतिर्जगादिदं मिथुनात्मकं सृष्ट्वा ब्राह्मणादिवर्णानियन्त्रीर्देवताः सिसृक्षुरादौ । अथेति शब्दद्वयमभिनयप्रदर्शनार्थम् । अनेन प्रकारेण मुखे हस्तौ प्रक्षिप्याभ्यमन्थदाभिमुख्येन मन्थनमकरोत् । स मुखं हस्ताभ्यां मथित्वा मुखाच्च योनेर्हस्ताभ्यां च योनिभ्यामग्निं ब्राह्मणजातेरनुग्रहकर्तारमसृजत सृष्टवान् । यस्माद्दाहकस्याग्नेर्योनिरेतदुभयं हस्तौ मुखं च तस्मादुभयमप्येतदलोमकं लोमविवर्जितम् । किं सर्वमेव । न । अन्तरतोऽभ्यन्तरतः । अस्ति हि योन्या सामान्यमुभयस्यास्य । किम् । अलोमका हि योनिरन्तरतः स्त्रीणाम् । तथा ब्राह्मणोऽपि मुखादेव जज्ञे प्रजापतेः । तस्मादेकयोनित्वाज्ज्यैष्ठेनवानुजोऽनुगृह्यतेऽग्निना ब्राह्मणः । तस्माद्ब्राह्मणोऽग्निर्देवत्यो मुखवीर्यश्चेति श्रुतिस्मृतिसिद्धम् ।

ननु सर्वा सृष्टिरुक्तोक्तं च प्रजापतेर्विभूतिसंकीर्तनफलं किमवशिष्यते यदर्थमुत्तरं वाक्यमित्याशङ्क्याऽऽह—एवमिति । आदावभ्यमन्थदिति संबन्धः । अभिनयप्रदर्शनमेव विशदयति—अनेनेति । मुखादेरग्निं प्रति योनित्वे गमकमाह—यस्मादिति । प्रत्यक्षविरोधं शङ्कित्वा दूषयति—किमित्यादिना । हस्तयोर्मुखे च योनिशब्दप्रयोगे निमित्तमाह—अस्ति हीति । प्रजापतेर्मुखादित्थमग्निः सृष्टोऽपि कथं ब्राह्मणमनुगृह्णाति तत्राऽऽह—तथेति । उक्तेऽर्थे श्रुतिस्मृतिसंवादं दर्शयति—तस्मादिति । ' आग्नेयो वै ब्राह्मणः ' इत्याद्या श्रुतिस्तदनुसारिणी च स्मृतिर्द्रष्टव्या ।

तथा बलाश्रयाभ्यां बाहुभ्यां बलभिदादिकं क्षत्रियजातिनियन्तारं क्षत्रियं च । तस्मादिन्द्रं क्षत्रं बाहुवीर्यं चेति श्रुतौ स्मृतौ चावगतम् । तथोरुत ईहाश्रयाद्गत्वादिलक्षणं विशो नियन्तारं विशं च । तस्मात्कृष्यादिपरो वस्वादिदेवत्यश्च वैश्यः । तथा पूषणं पृथ्वीदेवतां शूद्रं च

---

१ ख. ग ङ च. °त् । मुं° । २ ग. ङ. च. छ झ °त्वा स मृ° । ३ ग. °नुग्राहकम° । ४ ख. ग. घ ङ. च. ज. झ. °भव° । ५ क. ख घ. च. °ग्निदैव । ६ ङ. झ. °तिप्रसि° । ७ ग घ च ज. °जातेर्निय° । ८ क ख घ. च. ज. झ. °दिदैव° । ९ क. ग. झ. °थ्वीदैवत शू° ।

पद्भ्यां परिचरणक्षममसृजतेति श्रुतिस्मृतिप्रसिद्धेः। तत्र क्षत्त्रादिदेवतासर्गमिहानुक्तं वक्ष्यमाणमप्युक्तवदुपसंहरति सृष्टिसाकल्यानुकीर्त्यै। यथेयं श्रुतिर्व्यवस्थिता तथा प्रजापतिरेव सर्वं देवा इति निश्चितोऽर्थः। स्रष्टुरनन्यत्वात्सृष्टानाम्। प्रजापतिनैवं तु सृष्टत्वाद्देवानाम्।

'अग्निमसृजत' इत्येतदुपलक्षणार्थमित्यभिप्रेत्य सृष्ट्यन्तरमाह—तथेति। बलमिन्द्रः। आदिशब्देन वरुणादिर्गृह्यते। क्षत्त्रियं चासृजतेत्यनुवर्तते। उक्तमर्थं प्रमाणेन द्रढयति—तस्मादिति। 'ऐन्द्रो राजन्यः' इत्याद्या श्रुतिस्तदनुसारिणी च स्मृतिरवधेया। विशं चासृजतेति पूर्ववत्। इहाश्रयादूरुतो जातत्वं तस्यादेर्ज्येष्ठत्वं च तच्छब्दार्थः। 'पद्भ्यां शूद्रो अजायत' इत्याद्या श्रुतिस्तथाविधा च स्मृतिरनुसर्तव्या। अग्निसर्गस्य वक्ष्यमाणेन्द्रादिसर्गोपलक्षणत्वे सति सृष्टिसाकल्यादेष उ एव सर्वे देवा इत्युपसंहारासिद्धिरिति फालितमाह—तत्रेति। उक्तेन वक्ष्यमाणोपलक्षणं सर्वशब्दः सूचयतीति भावः। किंच सृष्टिरत्र न विवक्षिता किंतु यत्र प्रकारेण सृष्टिश्रुतिः स्थिता तेन प्रकारेण देवतादि सर्वं प्रजापतिरेवेति विवक्षितमित्याह—यथेति। तत्र हेतुमाह—स्रष्टुरिति। तथाऽपि कथं देवतादि सर्वं प्रजापतिमात्रमित्याशङ्क्याऽऽह—प्रजापतिनेति।

अथवा प्रकरणार्थं वचनमस्यैव तत्स्तुत्यभिप्रायेणाविद्वन्मतान्तरनिन्दोपन्यासः। अन्यनिन्दाऽन्यस्तुतये। तत्तत्र कर्मप्रकरणे केवलयाज्ञिका यागकाले यदिदं वच आहुरमुमाग्निं यजामुमिन्द्रं यजेत्यादि नामशस्त्रस्तोत्रकर्मादिभिन्नत्वाद्भिन्नमेवाग्न्यादिदेवमेकैकं मन्यमाना आहुरित्यभिप्रायः। तन्न तथा विद्यात्। यस्मादेतस्यैव प्रजापतेः सा विसृष्टिर्देवभेदः सर्व एष उ ह्येष प्रजापतिरेव प्राणः सर्वे देवाः।

तद्यदिदमित्यादिवाक्यस्य तात्पर्यमाह—अथेति। स्रष्टा प्रजापतिरेव सृष्टं सर्वं कार्यमिति प्रकरणार्थे पूर्वोक्तप्रकारेण व्यवस्थिते सत्यनन्तरं तस्यैव स्तुतिविवक्षया तद्यदिदमित्याद्यविद्वन्मतान्तरस्य निन्दार्थं वचनमित्यर्थः। मतान्तरे निन्दितेऽपि कथं प्रकरणार्थः स्तुतो भवतीत्याशङ्क्याऽऽह—अन्येति। एकैकं देवमित्यस्य तात्पर्यमाह—नामेति। काठकं कालापकमितिवन्नामभेदात्क्रतुषु तत्तद्देवतास्तुतिभेदाद्घटशकटादिवदर्थक्रियाभेदाच्च प्रत्येकं देवानां भिन्नत्वात्कर्मि-

---

१ ख. °सिद्धम्। अत्र। ग. °सिद्धिः। त°। २ क. घ. छ. अत्र। ३ क. छ. °व सृ°। ४ ख घ. अत्रेति। ५ क ख °न्यासो नान्यनिन्दा निन्दार्थैव किंत्वन्यस्तु°। ग. °न्यासा नि निन्दार्थ एव किंत्वन्यस्तु°। ङ. न्यासो न दिन्दार्थः किंत्वन्यस्तु°। च. न्यासो न निन्दा विन्दार्थैव किंत्वन्यस्तु°।

णामेतद्वचनमित्यर्थः । आदिशब्देन रूपादिभेदान्नद्भिन्नत्वं संगृह्णाति । नन्वत्र कर्मिणां निन्दा न प्रतिभाति तन्मतोपन्यासस्यैव प्रतीतेरित्याशङ्क्याऽऽह—तन्नेति । एकस्यैव प्राणस्यानेकविधो देवताभेदः शाकल्यब्राह्मणे वक्ष्यत इति विवक्षित्वा विशिनष्टि—प्राण इति ।

अत्र विप्रतिपद्यन्ते । पर एव हिरण्यगर्भ इत्येके । संसारीत्यपरे । पर एव तु मन्त्रवर्णात् । "इन्द्रं मित्रं वरुणमग्निमाहुः" इति श्रुतेः । "एष ब्रह्मैष इन्द्र एष प्रजापतिरेते सर्वे देवाः" इति च श्रुतेः । स्मृतेश्च—

"एतमेके वदन्त्यग्निं मनुमन्ये प्रजापतिम्" इति ।
"योऽसावतीन्द्रियोऽग्राह्यः सूक्ष्मोऽव्यक्तः सनातनः ।
सर्वभूतमयोऽचिन्त्यः स एव स्वयमुद्बभौ" ॥ इति च ।

अग्न्यादयो देवाः सर्वे प्रजापतिरेवेत्युक्तं संप्रति तत्स्वरूपानिर्देधारयिषया तत्र विप्रतिपत्तिं दर्शयति—अत्रेति । हिरण्यगर्भस्य परत्वमाद्ये द्वितीये कल्पे संसारित्वं विधेयमिति विभागः । तत्र पूर्वपक्षं गृह्णाति—पर एव त्विति । नन्वेकस्यानेकात्मकत्वं मन्त्रवर्णादवगम्यते नतु परमात्मत्वं प्रजापतेरित्याशङ्क्य ब्राह्मणवाक्यमुदाहरति—एष इति । ब्रह्मप्रजापती सूत्रविराजौ । एषशब्दः परमात्मविषयः । स्मृतेश्च पर एव हिरण्यगर्भ इति संबन्धः । तत्रैव वाक्यान्तरं पठति—योऽसाविति । कर्णेन्द्रियाविषयत्वमतीन्द्रियत्वम् । अग्राह्यत्वं ज्ञानेन्द्रियाविषयत्वम् । तत्र हेतुमाह—सूक्ष्मोऽव्यक्त इति । न च तस्यासत्त्वं प्रमात्रादिभावाभावसाक्षित्वेन सदा सत्त्वादित्याह—सनातन इति । ईतश्च तस्य नासत्त्वं सर्वेषामात्मत्वादित्याह—सर्वेति । अन्तःकरणाविषयत्वमाह—अचिन्त्य इति । योऽसौ परमात्मा यथोक्तविशेषणः स एव स्वयं विराडात्मना भूतवानित्याह—स एवेति ।

संसार्येव वा स्यात् । "सवान्पाप्मन ओषत्" इति श्रुतेः । न ह्यसंसारिणः पाप्मदाहप्रसङ्गोऽस्ति । भयारतिसंयोगश्रवणाच्च "अथ यन्मर्त्यः सन्नमृतानसृजत" इति च । हिरण्यगर्भं पश्यंत जायमानम्" इति च मन्त्रवर्णात् । स्मृतेश्च कर्मविपाकप्रक्रियायाम्—

"ब्रह्मा विश्वसृजो धर्मो महानव्यक्तमेव च ।
उत्तमां सात्त्विकीमेतां गतिमाहुर्मनीषिणः" इति ।
अथैवं विरुद्धार्थानुपपत्तेः प्रामाण्यव्याघात इति चेन्न ।

---

१ क. छ. झ. °ति श्रु° । २ ग घ. च. छ. ज. झ. एष । ३ ख. ततश्च । क. ° यतजा ख. ग. ङ. ज. °इयति° जा° । छ. इयन्त° जा°

कल्पनान्तरोपपत्तेरविरोधात् । उपाधिविशेषसंबन्धाद्विशेषकल्पनान्तरमुपपद्यते ।

" आसीनो दूरं व्रजति शयानो याति सर्वतः ।
कस्तं मदामदं देवं मदन्यो ज्ञातुमर्हति " ॥

इत्येवमादिश्रुतिभ्यः ।

मन्त्रब्राह्मणस्मृतिषु परस्य सर्वदेवतात्मत्वदृष्टेरत्र च सूत्रस्य तत्पतीतेस्तस्य परत्वमित्युक्तमिदानीं पूर्वपक्षान्तरमाह—संसार्येवेति । सर्वपाप्मदाहश्रवणमात्रेण कथं प्रजापतेः संसारित्व तत्राऽऽह—न हीति । अन्तस्तद्धर्मोपदेशादित्यत्र परस्यापि सर्वपाप्मोदयाङ्गीकारान्नेदं संसारित्वे लिङ्गमित्याशङ्क्याऽऽह—भयेति । असृजतेति च श्रवणादिति संबन्धः । न केवलं मर्त्यत्वश्रुतेरेव संसारित्वं किंतु जन्मश्रुतेश्चेत्याह—हिरण्यगर्भमिति । यथोक्तहेतूनां संसार्येव स्यादिति प्रतिज्ञयाऽन्वयः कर्मफलदर्शनाधिकारे ब्रह्मेत्याद्यायाः स्मृतेश्च तत्फलभूतस्य प्रजापतेः संसारित्वमेवेत्याह—स्मृतेश्चेति । विराड्ब्रह्मेत्युच्यते । विश्वसृजो मन्वादयः । धर्मस्तदभिमानिनी देवता यमः । महत्प्रकृतेराद्यो विकारः सूत्रम् । अव्यक्तं प्रकृतिरिति भेदः । अस्तु तर्हि द्विविधवाक्यवशात्प्रजापतेः संसारित्वमसंसारित्वं चेत्याशङ्क्याऽऽह—अथेति । तद्द्विविधवाक्यश्रवणानन्तर्यमथशब्दार्थः । एवंशब्दः संसारित्वासंसारित्वप्रकारपरामर्शार्थः । विरोधकृतमप्रामाण्यं निराकरोति—नेत्यादिना । स्वतोऽसंसारित्वं कल्पनया च संसारित्वमिति कल्पनान्तरसंभवाद्द्विविधश्रुतीनामविरोधात्प्रामाण्यसिद्धिरित्यर्थः । कल्पनया संसारित्वमित्येतद्विशदयति—उपाधीति । औपाधिकी परस्य विशेषकल्पनेत्यत्र प्रमाणमाह—आसीन इति । स्वारस्येन कूटस्थोऽप्यात्मा मनसः शीघ्रं दूरगमनदर्शनात्तदुपाधिको दूरं व्रजति । यथा स्वप्ने शयानोऽपि मनसो गतिभ्रान्त्या सर्वत्र यातीव भाति तथा जागरेऽपीत्यर्थः । कल्पितेन हर्षादिविकारेण स्वाभाविकेन तदभावेन च युक्तमात्मानं न कश्चिदपि निश्चेतुं शक्नोतीत्याह—कस्तामिति । आदिपदेन ध्यायतीवेत्यादिश्रुतयो गृह्यन्ते ।

उपाधिवशात्संसारित्वं न परमार्थतः । स्वतोऽसंसार्येव । एवमेकत्वं नानात्वं च हिरण्यगर्भस्य । तथा सर्वजीवानाम् । "तत्त्वमसि" इति श्रुतेः । हिरण्यगर्भस्तूपाधिशुद्ध्यतिशयापेक्षया प्रायशः पर एवेति श्रुतिस्मृतिवादाः प्रवृत्ताः । संसारित्वं तु क्वचिदेव दर्शयन्ति । जीवानां

१ ग. ङ. च. °रोधः । उ° । २ ग. °न्वात्कल्प° । ३ ख. ङ. झ. °द्धिक° । ४ ण. °ति । द्विवि° । ५ ञ. ण. यतीव लेलायती° । ६ ख. ग. घ. ङ. च. छ. ज. झ. °सारी । पु° । ७ ख. ग. च. झ. °गर्भे तृणा° । ८ ग. ञ्च य: ।

तूपाधिगताशुद्धिबाहुल्यात्संसारित्वमेव प्रायशोऽभिलभ्यते व्यावृत्तकृत्स्नोपाधिभेदापेक्षया तु सर्व परत्वेनाभिधीयते श्रुतिस्मृतिवादैः ।

उदाहृतश्रुतीनां तात्पर्यमाह—उपाधीति । किं तर्हि पारमार्थिकं तदाह—स्वत इति । पूर्वेण संबन्धः । हिरण्यगर्भस्य वास्तवमवास्तवं च रूपं निरूपितमुपसंहरति—एवमिति । तस्याप्यस्मदादिवन्न स्वतो ब्रह्मत्वं किंतु संसारित्वमेव स्वाभाविकमित्याशङ्क्य दृष्टान्तस्य साध्यविकलतामाह—तथेति । सर्वजीवानामेकत्वं नानात्वं चेति पूर्वेण संबन्धः । तेषां स्वतो ब्रह्मत्वे प्रमाणमाह—तत्त्वमिति । कस्तर्हि हिरण्यगर्भे विशेषो येनासावस्मदादिभिरुपास्यते तत्राऽऽह—हिरण्यगर्भस्त्विति । ननु श्रुतिस्मृतिवादेषु क्वचित्तस्य संसारित्वमपि प्रदर्श्यते सत्यं तत्तु कल्पितमित्यभिप्रेत्याऽऽह—संसारित्वं त्विति । अस्मदादिषु तुल्यमेतदित्याशङ्क्याऽऽह—जीवानां त्विति । कथं तर्हि 'तत्त्वमसि' 'क्षेत्रज्ञं चापि मां विद्धि' इत्यादिश्रुतिस्मृतिवादाः संगच्छन्ते तत्राऽऽह—व्यावृत्तेति ।

तार्किकैस्तु परित्यक्तागमबलैरस्ति नास्ति कर्ताऽकर्तेत्यादि विरुद्धं बहु तर्कयद्भिराकुलीकृतः शास्त्रार्थः । तेनार्थनिश्चयो दुर्लभः । ये तु केवलशास्त्रानुसारिणः शान्तदर्पास्तेषां प्रत्यक्षविषय इव निश्चितः शास्त्रार्थो देवतादिविषयः ।

स्वमते तत्त्वनिश्चयमुक्त्वा परमते तदभावमाह—तार्किकैस्त्विति । नन्वेकजीववादेऽपि सर्वव्यवस्थानुपपत्तेस्तत्त्वनिश्चयदौर्लभ्यं तुल्यमिति चेन्नेत्याह—ये त्विति । स्वमवत्स्वबोधात्पागशेषव्यवस्थासंभवादूर्ध्वं च तदभावस्येष्टत्वादेकमेव ब्रह्मानाद्यविद्यावशादशेषव्यवहारास्पदमिति पक्षे न काचन दोषकलेति भावः ।

तत्र प्रजापतेरेकस्य देवस्यान्नादिलक्षणो भेदो विवक्षित इति । तत्राग्निरुक्तोऽन्नादोऽन्नाद्यः सोम इदानीमुच्यते । अथ यत्किंचेदं लोक आर्द्रं द्रवात्मकं तद्रेतस आत्मनो बीजादसृजत । "रेतस आपः" इति श्रुतेः । द्रवात्मकश्च सोमः ।

सर्वदेवतात्मकस्य प्रजापतेः स्वतोऽसंसारित्वं कल्पनया वैपरीत्यमिति स्थिते

---

१ घ. ङ. ज झ. °लभ्यते । २ ख. घ. ङ. ज झ. °त्वेनैवाभि° । ३ घ. ण. °ति हि° । ४ घ. ण. °स्यापि जीवत्वादस्म° । ५ ख. ञ ण. °गर्भे त्विति । ६ ण. °दिष्वपि तु । ७ झ. °त्याद्या मवि° । ८ ख. °स्त्रार्थानु° । ९ क. ख. घ. °शादेश व्य° । १० ग. घ. ङ. ज. °स्यान्नाद्यल° । झ. °स्याऽऽद्यल° । ११ क. घ. ङ. च. छ. ज. °क्तोऽन्नाऽऽद्यः । झ. °क्तोऽन्नाऽऽद्यः । १२ ख. °ते । एकस्यैव प्रजापतेर्द्विधोपास्यत्वायाग्निसर्गमुक्त्वाऽन्नसर्गमाह । अथ । १३ क. श्रुतिरवात्म° । १४ झ. °तेः । अवात्म° ।

सत्यथेत्याद्युत्तरग्रन्थस्य तात्पर्यमाह-तत्रेति । विवक्षित इत्युत्तरग्रन्थप्रवृत्तिरिति शेषः । तस्य विषयं परिशिनष्टि-तत्राग्निरिति । अत्राऽऽद्ययोर्निर्धारणार्था सप्तमी । संप्रति प्रतीकमादायाक्षराणि व्याकरोति-अथेति । अन्तुः सर्गानन्तर्यमथशब्दार्थः । रेतसः सकाशादपां सर्गेऽपि सोमशब्दे किमायातमित्याशङ्क्याऽऽह-द्रवात्मकश्चेति । श्रद्धाख्याहुतेः सोमोत्पत्तिश्रवणात्तत्र चैत्योपलब्धेश्चेति भावः

तस्माद्यदार्द्रं प्रजापतिना रेतसः सृष्टं तदु सोम एव । एतावद्वा एतावदेव नातोऽधिकमिदं सर्वम् । किं तत् । अन्नं चैव सोमो द्रवात्मकत्वादाप्यायकश्च । अन्नादश्चाग्निरौष्ण्याद्भक्षत्वाच्च । तत्रैवमवधियते सोम एवान्नं यदद्यते तदेव सोम इत्यर्थः । य एवान्ता स एवाग्निः । अर्थबलाद्धयवधारणम् । अग्निरपि क्वचिद्धूयमानः सोमपक्षस्यैव । सोमोऽपीज्यमानोऽग्नेरन्नत्वात् । एवमग्नीषोमात्मकं जगदात्मत्वेन पश्यन्न केनचिद्दोषेण लिप्यते । प्रजापतिश्च भवति । सैषा ब्रह्मणः प्रजापतेरतिसृष्टिरात्मनोऽप्यतिशया ।

सोमस्य द्रवात्मकत्वे फलितमाह-तस्मादिति । अग्नीषोमयोरन्नाद्ययोः सृष्टावपि जगति स्रष्टव्यान्तरमवशिष्टमस्तीत्याशङ्क्याऽऽह-एतावदिति । आप्यायकः सोमो द्रवात्मकत्वादन्नं चाऽऽप्यायकं प्रसिद्धं तस्मादुपपन्नं सोमस्यान्नत्वमित्याह-द्रवात्मकत्वादिति । सोम एवान्नमग्निरन्नाद इत्यवधारणस्य विवक्षितमर्थमाह-तत्रेति । यथोक्तं वाक्यं सप्तम्यर्थः । यथाश्रुतमवधारणमवधार्य कुतो विधान्तरेण तद्वचाख्यानमित्याशङ्क्याऽऽह-अर्थबलाद्धीति । अन्नादस्य संहर्तृत्वादग्नित्वमन्नस्य च संहरणीयतया सोमत्वमवधारयितुं युक्तमित्यर्थः । नन्वन्नस्य सोमत्वेन न नियमोऽग्नेरपि जलादिना संहारान्न चान्नत्वेन नियमः सोमस्यापि कदाचिदद्यमानत्वेनान्नत्वात्तत्कुतोऽर्थबलमित्याशङ्क्याऽऽह अग्निरपीति । सोऽपि संहार्यश्चेत्सोम एव स च संहर्ता चेदग्निरेवेत्यवधारणसिद्धिरित्यर्थः । प्रजापतेः । सर्वात्मत्वमुपक्रम्य जगतो द्वैधीभावाभिधानं कुतोऽपयुक्तमित्याशङ्क्य च तस्य सूत्रे पर्यवसानात्तस्मिन्नात्मबुद्धयोपासकस्य सर्वदोषराहित्यं फलमत्र विवक्षितमित्याह-एवमिति । अनुग्राहकदेवसृष्टिमुक्त्वा तदुपासकस्य फलोक्त्यर्थमादौ देवसृष्टिं स्तौति-सैषेति ।

---

१ घ. ण. अत्तस° । २ ण. °पि कि° । ३ ञ. °मसर्गे कि° । ४ क. ण. °ह । अबा° । ५ च. °सः सकाशात्सृष्टं । ६ ख. च. ष्यादत्तत्वा° । ७ घ छ. झ. एव चात्ता । ८ ख. ङ. चं. पि हि क° । ९ ञ. ण. °मस्यावात्त । १० ख. ण. °रन्नान्नादयोः । ११ ञ. ण. °तेः °सार्वात्म्यमु । १२ ण. कुतो यु° । १३ क. °सृष्टिं शिष्ट्वा त° । ख. सृष्टि प्रुत्वा त° ।

कां सेत्याह—यच्छ्रेयसः प्रशस्यतरानात्मनः सकाशाद्यस्मादसृजत देवांस्तस्माद्देवसृष्टिरतिसृष्टिः । कथं पुनरात्मनोऽतिशया सृष्टिरित्यत आह—अथ यद्यस्मान्मर्त्यः सन्मरणधर्मा सन्नमृतानमरणधर्मिणो देवान्कर्मज्ञानवह्निना सर्वानात्मनः पाप्मन ओषित्वाऽसृजत, तस्मादियमतिसृष्टिरुत्कृष्टज्ञानस्य फलमित्यर्थः । तस्मादेतामतिसृष्टिं प्रजापतेरात्मभूतां यो वेद स एतस्यामतिसृष्ट्यां प्रजापतिरिव भवति प्रजापतिवदेव स्रष्टा भवति ॥ ६ ॥

'अग्निर्मूर्धा' इत्यादिश्रुतेरन्यादयोऽस्यावयवास्तत्कथं तत्सृष्टिस्ततोऽतिशयवतीत्याशङ्क्याह—कथमिति । प्रजापतेर्यजमानावस्थापेक्षया देवसृष्टेरुत्कृष्टत्ववचनमविरुद्धमिति परिहरति—अत आहेति । देवसृष्टेरतिसृष्टित्वाभावशङ्कानुवादार्थोऽथशब्दः । ज्ञानस्येत्युपलक्षणं कर्मणोऽपीति द्रष्टव्यम् । अतिसृष्ट्यामित्यादि व्याचष्टे—तस्मादिति । देवादिस्रष्टा तदात्मा प्रजापतिरहमेवेत्युपासितुस्तद्भावापत्त्या तत्स्रष्टृत्वं फलतीत्यर्थः ॥ ६ ॥

"तद्धेदं तर्ह्यव्याकृतमासीत्" सर्वं वैदिकं साधनं ज्ञानकर्मलक्षणं कर्त्राद्यनेककारकापेक्षं प्रजापतित्वफलावसानं साध्यमेतावदेव यदेतद्व्याकृतं जगत्संसारः । अथैतस्यैव साध्यसाधनलक्षणस्य व्याकृतस्य जगतो व्याकरणात्प्राग्बीजावस्था या तां निर्दिदिक्षत्यङ्कुरादिकार्यानुमितामिव वृक्षस्य कर्मबीजोऽविद्याक्षेत्रो ह्यसौ संसारवृक्षः समूल उद्धर्तव्य इति तदुद्धरणे हि पुरुषार्थपरिसमाप्तिः । तथा चोक्तम्—"ऊर्ध्वमूलोऽवाक्शाखः" इति काठके । गीतासु च "ऊर्ध्वमूलमधःशाखम्" इति । पुराणे च—"ब्रह्मवृक्षः सनातनः" इति ।

पूर्वोत्तरग्रन्थयोः संबन्धं वक्तुं प्रतीकमादाय वृत्तं कीर्तयति—तद्धेत्यादिना तस्याऽऽदेयत्वार्थं वैदिकमित्युक्तम् । साधनमित्युक्ते मुक्तिसाधनं पुरः स्फुरति तन्निरस्यति—ज्ञानेति । एकरूपस्य मोक्षस्यानेकरूपं न साधनं भवतीति भावः । मुक्तिसाधनं मानवस्तुतन्त्रं तत्त्वज्ञानमिदं तु कारकसाध्यमतोऽपि न तद्धेतुरित्याह—कर्त्रादीति । किंचेदं प्रजापतित्वफलावसानम् । 'मृत्युरस्याऽऽत्मा भवति' इति श्रुतेः ।

---

१ क. ख. घ च. छ. झ. देवान्सैषा तस्मा° । २ ग. ङ. ज. °घर्मणो । ३ घ. छ. ज. झ. °देनाम° । ४ च. ज. झ. °पतेरस्य भ° । ख. °पतेरि° । ५ क. ख. घ. देवतादि° । ६ ग. °मितबीजामि° । ७ ङ. ज. °लो ह्यवा° । झ °लोऽवाक्शा° । ८ ख. ग. ङ. छ. झ. °स पु° । ९ ख. °नं प्रस्फु° ।

न च तदेव कैवल्यं भवतीत्यादिश्रवणादतोऽपि नेदं मुक्त्यर्थमित्याह—**प्रजापतित्वेति**। किंच नित्यसिद्धा मुक्तिरिदं तु साध्यफलमतोऽपि न मुक्तिहेतुरित्याह—**साध्यमिति**। किंच मुक्तिर्व्याकृतादर्थान्तरमन्वेष्टव्या तद्विदितादित्यादिश्रुतेः। इदं तु नामरूपं व्याकृतमतोऽपि न तद्धेतुरित्याह—**एतावदेवेति**। संप्रत्यकृतकण्डिकामवतारयन्प्रवेशवाक्यात्पाक्तनस्य तद्धेदमित्यादेर्वाक्यस्य तात्पर्यमाह—**अथेति**। ज्ञानकर्मफलोक्त्यानन्तर्यमथशब्दार्थः। बीजावस्था सामासप्रत्ययविद्या तस्य निर्देष्टुमिष्टत्वमेव न साक्षान्निर्देश्यत्वमनिर्वाच्यत्वादिति वक्तुं निर्दिदिक्षतीत्युक्तम्[1]। वृक्षस्य बीजावस्थां लोको निर्दिशतीति संबन्धः। यज्ज्ञाने पुमर्थोऽस्तिस्तदेव वाक्यं किमिति प्रत्ययविद्योच्यते तत्राऽऽह—**कर्मेति**। उद्धर्तव्य इति तन्मूलनिरूपणमर्थवादिति शेषः। अथ पुरुषार्थपर्यवसानस्य तदुद्धारोऽपि क्वोपयुज्यते तत्राऽऽह—**तदुद्धरणे हीति**। ननु संसारस्य मूलमेव नास्ति स्वभाववादात्मवानाद्येव वा तन्मूलं नाज्ञातं ब्रह्मेत्याशङ्क्य श्रुतिस्मृतिभ्यां परिहरति—**तथा चेति**। ऊर्ध्वमुत्कृष्टं कारणं कार्यापेक्षया परमव्याकृतं मूलमस्येत्यूर्ध्वमूलो हिरण्यगर्भादियो मूलापेक्षयाऽवाच्यः शाखा इत्यवाक्शाखः। एवम् 'ऊर्ध्वमूलमधःशाखम्' इत्यादिगीता अपि नेतव्याः अस्ति हि संसारस्य मूलम्। 'नेदममूलं भविष्यति' इति श्रुतेस्तच्चाज्ञातं ब्रह्मैवेति श्रुतिस्मृतिप्रसिद्धमिति भावः।

> तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेव व्याक्रियतासौनामाऽयमिदꣳरूप इति तदिदमप्येतर्हि नामरूपाभ्यामेव व्याक्रियतेऽसौनामाऽयमिदꣳरूप इति स एष इह प्रविष्टः। आ नखाग्रेभ्यो यथा क्षुरः क्षुरधानेऽवहितः स्याद्विश्वंभरो वा विश्वंभरकुलाये तं न पश्यन्ति। अकृत्स्नो हि स प्राणन्नेव प्राणो नाम भवति। वदन्वाक्पश्यꣳश्चक्षुः शृण्वञ्श्रोत्रं मन्वानो मनस्तान्यस्यैतानि कर्मनामान्येव। स योऽत एकैकमुपास्ते न स वेदाकृत्स्नो ह्येषोऽत एकैकेन भवत्यात्मेत्येवोपासीतात्र ह्येते सर्व एकं भवन्ति। तदेतत्पदनीयमस्य सर्वस्य यदयमा माऽनेन

[1] ख. 'दिदिक्षती'।

ह्येतत्सर्वं वेद । यथा ह वै पदेनानुविन्देदेवं
कीर्तिꣳ श्लोकं विन्दते य एवं वेद ॥ ७ ॥

तद्धेदं तर्हीति बीजावस्थं जगत्प्रागुत्पत्तेस्तर्हि तस्मिन्काले परोक्षत्वात्सर्वनाम्नाऽप्रत्यक्षाभिधानेनाभिधीयते । भूतकालसंबन्धित्वाद्व्याकृतभाविनो जगतः । सुखग्रहणार्थमीतिह्यप्रयोगो हशब्दः । एवं ह तदाऽऽसीदित्युच्यमाने सुखं तां परोक्षामपि जगतो बीजावस्थां प्रतिपद्यते युधिष्ठिरो ह किल राजाऽऽसीदित्युक्त यद्वत् । इदमिति व्याकृतनामरूपात्मक साध्यसाधनलक्षणं यथावर्णितमभिधीयते । तदिदंशब्दयोः परोक्षप्रत्यक्षावस्थजगद्वाचकयोः सामानाधिकरण्यादेकत्वमेव परोक्षप्रत्यक्षावस्थस्य जगतोऽवगम्यते तदेवेदमिदमेव च तदव्याकृतमासीदिति । अथैवं सति नासत उत्पत्तिर्न सतो विनाशः कार्यस्येत्यवधृतं भवति ।

संप्रति प्रतीकमादाय पदानि व्याचष्टे तद्धेत्यादिना । अप्रत्यक्षाभिधानेन तदिति सर्वनाम्ना बीजावस्थं जगदभिधीयते परोक्षत्वादिति संबन्धः । कथं जगतो बीजावस्थत्वमित्याशङ्क्य तर्हीत्यस्यार्थमाह—प्रागिति । कथं तस्य परोक्षत्वं तत्राऽऽह—भूतेति । निपातार्थमाह—सुखेति । हशब्दार्थमभिनयति—किलेति । यथावर्णितमित्यनर्थत्वेन संसारेऽसारत्वोक्तिः । पदद्वयसामानाधिकरण्यलब्धमर्थमाह—तदिदमिति । एकत्वमभिनयेनोदाहरति—तदेवेति । एकत्वावगतिफलं कथयति—अथेति । सामानाधिकरण्यवशादेकत्वे निश्चिते सत्यनन्तरम्—

‘ नासतो विद्यते भावो नाभावो विद्यते सतः ’ ।

इति स्मृतिरनुसृता भवतीति भावः ।

तदेवं भूतं जगदव्याकृतं सन्नामरूपाभ्यामेव नाम्ना रूपेणैव च व्याक्रियत । व्याक्रियतेति कर्मकर्तृप्रयोगात्तत्स्वयमेवाऽऽत्मैव व्याक्रियत वि आ अक्रियत विस्पष्टं नामरूपविशेषावधारणमर्यादं व्यक्तीभावमापद्यत । सामर्थ्यादाक्षिप्तनियन्तृकर्तृसाधनक्रियानिमित्तम् । असौनामेति सर्वनाम्नाऽविशेषाभिधानेन नाममात्रं व्यपदिशति । देवदत्तो यज्ञदत्त इति वा नामास्येत्यसौनामाऽयम् । तथेदमिति शुक्लकृष्णादीनामविशेषः । इदं शुक्लमिदं कृष्णं वा रूपमस्येतीदंरूपः । तदिदम-

---

१ झ. °दव्यक्तभा° । २ घ. च. ज. ह किल त° । ३ क. ख. ग. ङ. छ. झ. °ताऽ° । ४ ग. °स्येत्येतदव° । ङ. च. °स्येत्येवमव । ५ ख. ग. च. झ. °गात्स्व° । ६ ख. च. वि °।

व्याकृतं वस्त्वेतर्ह्येतस्मिन्नपि काले नामरूपाभ्यामेव व्याक्रियतेऽसौनामाऽयमिदंरूप इति ।

अज्ञातं ब्रह्म जगतो मूलमित्युक्त्वा तद्विवर्तो जगदिति निरूपयति—**तदेवंभूतमिति** । तृतीयामित्थंभावार्थत्वेन व्याचष्टे—**नाम्नेति** । क्रियापदप्रयोगाभिप्रायं तदनुवादपूर्वकमाह—**व्याक्रियतेति** । तत्र पदच्छेदपूर्वकं तद्वाच्यमर्थमाह—**व्याक्रियतेत्यादिना** । स्वयमेवेति कुतो विशेष्यते कारणमन्तरेण कार्योत्पत्तिरयुक्तेत्याशङ्क्यकथाऽऽह—**सामर्थ्यादिति** । निर्हेतुकार्यसिद्ध्यनुपपत्त्याऽऽक्षिप्तो नियन्ता जनयिता कर्ता चोत्पत्ता साधनक्रियाकरणव्यापरस्तन्निमित्तं तदपेक्ष्य व्यक्तिभावमापद्यतेति योजना । नामसामान्यं देवदत्तादिना विशेषनाम्ना संयोज्य सामान्यविशेषवानर्थो नामव्याकरणवाक्ये विवक्षित इत्याह—**असावित्यादिना** । असौशब्दः श्रौतोऽव्ययत्वेन नेयः । रूपसामान्यं शुक्लकृष्णादिना विशेषेण संयोज्योच्यते रूपव्याकरणवाक्येनेत्याह—**तथेत्यादिना** । अव्याकृतमेव व्याकृतात्मना व्यक्तमित्येतत्सुप्तप्रबुद्धदृष्टान्तेन स्पष्टयति—**तादिदमिति** ।

यदर्थः सर्वशास्त्रारम्भो यस्मिन्नविद्यया स्वाभाविक्या कर्तृक्रियाफलाध्यारोपणा कृता यः कारणं सर्वस्य जगतो यदात्मके नामरूपे सलिलादिव स्वच्छान्मलमिव फेनमव्याकृते व्याक्रियेते यश्च ताभ्यां नामरूपाभ्यां विलक्षणः स्वतो नित्यशुद्धबुद्धमुक्तस्वभावः स एषोऽव्याकृते आत्मभूते नामरूपे व्याकुर्वन्ब्रह्मादिस्तम्बपर्यन्तेषु देहेष्विह कर्मफलाश्रयेष्वशनायादिमत्सु प्रविष्टः ।

तद्धेत्यत्र मूलकारणमुक्त्वा तन्नामरूपाभ्यामित्यादिना तत्कार्यमुक्तमिदानीं प्रवेशवाक्यस्थसशब्दापेक्षितमर्थमाह—**यदर्थ इति** । काण्डद्वयात्मनो वेदस्याऽऽरम्भो यस्य परस्य प्रतिपत्त्यर्थो विज्ञायते कर्मकाण्डं हि स्वार्थानुष्ठानाहितचित्तशुद्धिद्वारा तत्त्वज्ञानोपयोगीष्यते ज्ञानकाण्डं तु साक्षादेव तत्रोपयुज्यते ' सर्वे वेदा यत्पदमामनन्ति ' इति च श्रूयते स परोऽत्र प्रविष्टो देहादाविति योजना । सर्वस्याऽऽम्नायस्य ब्रह्मात्मनि समन्वयमुक्त्वा तत्र विरोधसमाधानार्थमाह—**यस्मिन्निति** । अध्यासस्य चतुर्विधरूपतानामन्यतमत्वं वारयति—**अविद्ययेति** । तस्या मिथ्याज्ञानत्वेन सादित्वादनाद्यध्यासहेतुत्वासिद्धिरित्याशङ्क्याऽऽह—**स्वाभाविक्येति** । विद्याप्रागभावत्वमविद्याया व्यावर्तयति—**कर्त्रिति** । न हि तदुपादानत्वमभावत्वे संभवति नचोपादानान्तरमस्तीति भावः । अन्वयस्तु सर्वत्र यच्छब्दस्य पूर्ववद्द्रष्टव्यः । आत्मनि कर्तृत्वाध्यासस्याविद्याकृतत्वोक्त्या समन्वये विरोधः

---

१ ख. घ. °या कारकव्या° । २ ख. ण. °तो व्यत्यय° । ३ ख. घ. ण. °स्तवु° । ४ क. ाक्र येत । य° । ङ. च. ज. झ. °क्रियते । य° ।

समाहितः संपत्यध्यासकारणस्योक्तत्वेऽपि निमित्तोपादानभेदं सांख्यवादमाशङ्क्योक्तमेव कारणं तद्भेदनिराकरणार्थं कथयति—**यः कारणमिति** । श्रुतिस्मृतिवादेषु परस्य तत्कारणत्वं प्रसिद्धमिति भावः । नामरूपात्मकस्य द्वैतस्याविद्याविद्यमानदेहत्वादिद्यापनोद्यत्वं सिध्यतीत्याह—**यदात्मके इति** । व्याकर्तुरात्मनः स्वभावतः शुद्धत्वे दृष्टान्तमाह—**सलिलादिति** । व्याक्रियमाणयोर्नामरूपयोः स्वतोऽशुद्धत्वे दृष्टान्तमाह—**मलमिवेति** । यथा फेनादि जलोत्थं तन्मात्रमेवं तथाऽज्ञातब्रह्मोत्थं जगद्ब्रह्ममात्रं तज्ज्ञानबाध्यं चेति भावः । नित्यशुद्धत्वादिलक्षणमपि वस्तु न स्वतोऽज्ञाननिवर्तकं केवलस्य तत्साधकत्वाद्वाक्योत्थबुद्धिवृत्त्यारूढं तु तथेति मन्वानो ब्रूते—**यश्चेति** । ' आकाशो ह वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म ' इति श्रुतिमाश्रित्याऽऽह—**ताभ्यामिति** । नामरूपात्मकद्वैतासंस्पर्शित्वादेव नित्यशुद्धत्वमशुद्धद्वैतसंबन्धाधीनत्वात्तत्राविद्या प्रयोजिकेत्यभिप्रेत्य तत्संबन्धं निषेधति—**बुद्धेति** । तस्मादेव दुःखाद्यनर्थासंस्पर्शित्वमाह—**मुक्तेति** । विद्यादशायां शुद्धयादिसद्भावेऽपि बन्धावस्थायां नैवमिति चेन्नेत्याह—**स्वभाव इति** । अव्याकृतवाक्योक्तमज्ञातं परमात्मानं परामृशति—**स इति** । तमेव कार्यस्थं प्रत्यञ्चं निर्दिशति—**एष इति** । आत्मा हि स्वतो नित्यशुद्धत्वादिरूपोऽपि स्वाविद्यावष्टम्भान्नामरूपे व्याकरोतीति तत्सर्जनस्याविद्यामयत्वं विवक्षित्वाऽऽह—**अव्याकृते इति** । तयोरात्मना व्याकृतत्वे तदतिरेकेणाभावः फलतीति मत्वा विशिनष्टि—**आत्मेति** । जनिमन्मात्रमिहशब्दार्थं कथयति—**ब्रह्मादीति** । तत्रैव दुःखादिसंबन्धो नाऽऽत्मनीति मन्वानो विशिनष्टि—**कर्मेति** । ब्रह्मात्मैक्ये पदद्वयसामानाधिकरण्याधिगते हेतुमाह—**प्रविष्ट इति** ।

नन्वव्याकृतं स्वयमेव व्याक्रियतेत्युक्तं कथमिदमिदानीमुच्यते परएवं त्वात्माऽव्याकृतं व्याकुर्वन्निह प्रविष्ट इति । नैष दोषः । परस्यापि व्याकृतजगदात्मत्वेन विवक्षितत्वात् । आक्षिप्तानियन्तृकर्तृक्रियानिमित्तं हि जगदव्याकृतं व्याक्रियतेत्यवोचाम । इदंशब्दसामानाधिकरण्याच्चाव्याकृतशब्दस्य ।

परमात्मा स्रष्टा सृष्टे प्रविष्टो जगतीत्यादिष्टमाक्षिपति—**नन्विति** । पूर्वापरविरोधं समाधत्ते—**नेत्यादिना** । व्याक्रियतेति कर्मकर्तृप्रयोगाज्जगत्कर्तुरविवक्षितत्वमुक्तमित्याशङ्क्याऽऽह—**आक्षिप्तेति** । मुच्यते वत्सः स्वयमेवेतिवत्कर्मकर्तरि लकारो व्याकरणसौकर्यापेक्षया सत्येव कर्तरि निर्वहतीति भावः । अव्याकृतशब्दस्य नियन्त्रादियुक्तजगद्बीजत्वे हेत्वन्तरमाह—**इदंशब्देति** ।

---

१ ञ. ण. °वमज्ञा° । २ ञ. ण. °शा वै । ३ ग. घ. ङ. च. ज झ. एवाऽऽत्मा° । ४ छ झ. °स्य ।ऽऽत्म° ।

यथेदं जगन्नियन्त्राद्यनेककारकनिमित्तादिविशेषवद्व्याकृतं तथाऽपरित्यक्तान्यतमविशेषवदेव तदव्याकृतम् । व्याकृताव्याकृतमात्रं तु विशेषः । दृष्टश्च लोके विवक्षातः शब्दप्रयोगो ग्राम आगतो ग्रामः शून्य इति । कदाचिद्ग्रामशब्देन निवासमात्रविवक्षायां ग्रामः शून्य इति शब्दप्रयोगो भवति कदाचिन्निवासिजनविवक्षायां ग्राम आगत इति कदाचिदुभयविवक्षायामपि ग्रामशब्दप्रयोगो भवति ग्रामं च न प्रविशेदिति यथा तद्वदिहापि जगदिदं व्याकृतमव्याकृतं चेत्यभेदविवक्षायामात्मानात्मनोर्भवति व्यपदेशः । तथेदं जगदुत्पत्तिविनाशात्मकमिति केवलजगदव्यपदेशः । तथा महानज आत्माऽस्थूलोऽनणुः स एष नेति नेतीत्यादिकेवलात्मव्यपदेशः ।

कथमुक्तसामानाधिकरण्यमात्रादव्याकृतस्य जगतो नियन्त्रादियुक्तत्वं तत्राऽऽह—यथेति । नियन्त्रादीत्यादिशब्देन कर्तृकरणादिग्रहणम् । निमित्तादीत्यादिपदेनोपादानमुच्यते । विमतं नियन्त्रादिसापेक्षं कार्यत्वात्संप्रतिपन्नवदित्यर्थः । तस्तर्हि-प्रागवस्थे संप्रतितने च जगति विशेषस्तत्राऽऽह—व्याकृतेति । कथं पुनरव्याकृतशब्देन जगद्वाचिना परो गृह्यत एकस्य शब्दस्यानेकार्थत्वायोगादत आह—दृष्टश्चेति । उक्तमेव स्फुटयति—कदाचिदिति । उभयविवक्षया ग्रामशब्दप्रयोगस्य दार्ष्टान्तिकमाह—तद्वदिति । इहेत्यव्याकृतवाक्योक्तिः । निवासमात्रविवक्षया ग्रामशब्दप्रयोगस्य दार्ष्टान्तिकमाह—तथेति । निवासिजनविवक्षया तत्प्रयोगस्यापि दार्ष्टान्तिकं कथयति—तथा महानिति ।

ननु परेण व्याकर्त्रा व्याकृत सर्वतो व्याप्तं सर्वदा जगत्स कथमिह प्रविष्टः परिकल्प्यते । अप्रविष्टो हि देशः परिच्छिन्नेन प्रवेष्टुं शक्यते । यथा पुरुषेण ग्रामादिर्नाऽऽकाशेन किंचिन्नित्यप्रविष्टत्वात् पाषाणसर्पादिवद्धर्मान्तरेणेति चेत् । अथापि स्यान्न पर आत्मा स्वेनैव रूपेण प्रविवेश किं तर्हि तत्स्थ एव धर्मान्तरेणोपजायते तेन प्रविष्ट इत्युपचर्यते । यथा पाषाणे सहजोऽन्तस्थः सर्पो नालिकेरे वा तोयम् । न । "तत्सृष्ट्वा तदेवानुप्राविशत्" इति श्रुतेः । यः स्रष्टा स भावान्तरमनापन्न एव कार्यं सृष्ट्वा पश्चात्प्राविशादिति" हि श्रूयते ।

---

१ ग. घ. च. °ति प्र° । २ क. ड. °दिदमव्याकृतं व्याकृतं चे° । ३ घ °त्सप्रतव° ४ क. ख. ञ °कृतेन । ५ च. स्पष्टयति । ६ ण. °तशब्दोक्तिः । ७ क. °गस्यादि दा° । ८ क. °नमात्रवि° । ९ क. ख. च. ज. °षाणे स° । १० क. नारिकेले । ११ ग घ. ड. ज. झ. °ति श्रु° ।

अव्याकृतवाक्ये परस्य प्रकृतत्वात्तस्य प्रवेशवाक्ये सशब्देन परामृष्टस्य सृष्टे कार्ये प्रवेश उक्तस्तं च प्रकारान्तरेणाऽऽक्षिपति—**नन्विति**। कथमितिसूचितामनुपपत्तिमेव स्पष्टयति—**अप्रविष्टो हीति**। दृष्टान्तावष्टम्भेन प्रवेशवादी शङ्कते—**पाषाणेति**। तदेव विवृणोति—**अथापीत्यादिना**। परस्य परिपूर्णस्य क्वचित्प्रवेशाभावेऽपीति यावत्। तच्छब्दः सृष्टकार्यविषयः। धर्मान्तरं जीवाख्यम्। दृष्टान्तं व्याचष्टे—**यथेति**। पाषाणाद्व्यावृत्यः सर्पादिस्तत्र प्रविष्ट इति शङ्कापोहार्थं सहजविशेषणम्। सर्पादेरश्मादिरूपेण स्थितभूतपञ्चकपरिणामत्वात्तत्र सहजत्वं पाषाणादौ यानि भूतानि स्थितानि तेषां परिणामः सर्पादिस्तद्रूपेण तत्र भूतानामनुप्रवेशवदपरिच्छिन्नस्यापि परस्य जीवाकारेण बुद्ध्यादौ प्रवेशसिद्धिरित्यर्थः। आक्षेप्ता ब्रूते—**नेति**। तदेव स्पष्टयति—**यः स्रष्टेति**।

यथा भुक्त्वा गच्छतीति भुजिगमिक्रिययोः पूर्वापरकालयोरितरेतरविच्छेदोऽविशिष्टश्च कर्ता तद्वदिहापि स्यान्नतु तत्स्थस्यैव भावान्तरोपजनन एतत्संभवति। न च स्थानान्तरेण वियुज्य स्थानान्तरसंयोगलक्षणः प्रवेशो निरवयस्यापरिच्छिन्नस्य दृष्टः।

ननु तक्षणो निर्मिते वेश्मनि ततोऽन्यस्यापि प्रवेशो दृश्यते तथा परेण सृष्टे जगत्यन्यस्य प्रवेशो भविष्यति नेत्याह—**यथेति**। पाषाणसर्पन्यायेन कार्यस्थस्यैव परस्य जीवाख्ये परिणामे तत्सृष्ट्वेत्यादिश्रवणमनुपपन्नमिति व्यतिरेकं दर्शयति—**नत्विति**। अस्तु तर्हि परस्य मार्जारादिवत्पूर्वावस्थात्यागेनावस्थानान्तरसंयोगात्मा प्रवेशो नेत्याह—**न चेति**। निरवयवोऽपरिच्छिन्नश्चात्मा तस्य स्थानान्तरेण वियोगं प्राप्य स्थानान्तरेण सह संयोगलक्षणो यः प्रवेशः स सावयवे परिच्छिन्ने च मार्जारादौ दृष्टप्रवेशसदृशो न भवतीति योजना। वियुज्येति पाठे तु स्फुटैव योजना।

सावयव एव प्रवेशश्रवणादिति चेन्न। "दिव्यो ह्यमूर्तः पुरुषः" "निष्कलं निष्क्रियम्" इत्यादिश्रुतिभ्यः। सर्वव्यपदेश्यधर्मविशेषप्रतिषेधश्रुतिभ्यश्च। प्रतिबिम्बप्रवेशवदिति चेन्न। वस्त्वन्तरेण विप्रकर्षानुपपत्तेः। द्रव्ये गुणप्रवेशवदिति चेत्। न। अनाश्रितत्वात्। नित्यपरतन्त्रस्यैवाऽऽश्रितस्य गुणस्य द्रव्ये प्रवेश उपचर्यते। न तु ब्रह्मणः स्वातन्त्र्यश्रवणात्तथा प्रवेश उपपद्यते।

प्रवेशश्रुत्या निरवयवत्वासिद्धिं शङ्कते—**सावयव इति**। प्रवेशश्रुतेरन्यथोपपत्तेर्वक्ष्यमाणत्वान्नैवमिति परिहरति—**नेत्यादिना**। अमूर्तत्वं निरवयवत्वम्।

१ ग. पूर्वप°। २ घ. ज. °न्तरणाप°। ३ ख. °न्तर°। ४ ञ. ण. °योगमप्रा°। ५ ख. ग. घ. ङ. ज. च।

पुरुषत्वं पूर्णत्वम् । प्रकारान्तरेण प्रवेशोपपत्तिं शङ्कते-**प्रतिबिम्बेति** । आदित्यादौ जलादिना संनिकर्षादिसंभवात्प्रतिबिम्बारूपप्रवेशोपपत्तिः । आत्मनि तु परस्मिन्नसङ्गेऽनवच्छिन्ने केनचिदपि तदभावान्न यथोक्तप्रवेशसिद्धिरित्याह-**न वस्त्वन्तरेणेति** । प्रकारान्तरेण प्रवेशं चोदयति-**द्रव्य इति** । परस्यापि कार्ये प्रवेश इति शेषः । गुणापेक्षया परस्य वैलक्षण्यं दर्शयन्परिहरति-**नेत्यादिना** । स्वातन्त्र्यश्रवणमेष सर्वेश्वर इत्यादि ।

फले बीजवदिति चेन्न । सावयवत्वबुद्धिक्षयोत्पत्तिविनाशादिधर्मवत्त्वप्रसङ्गात् । न चैवं धर्मवत्त्वं ब्रह्मणः "अजोऽजरः" इत्यादिश्रुतिन्यायविरोधात् । अन्य एव संसारी परिच्छिन्न इह प्रविष्ट इति चेन्न । "सेयं देवतैक्षत" इत्यारभ्य "नामरूपे व्याकरवाणि" इति तस्या एव प्रवेशव्याकरणकर्तृत्वश्रुतेः । तथा "तत्सृष्ट्वा तदेवानुप्राविशत्" "स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत" "सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाऽभिवदन्यदास्ते" "त्वं कुमार उत वा कुमारी त्वं जीर्णो दण्डेन वञ्चसि" "पुरश्चक्रे द्विपदः" "रूपं रूपम्" इति च मन्त्रवर्णान्न परादन्यस्य प्रवेशः ।

पनसादिफले बीजस्य प्रवेशवत्कार्ये परस्य प्रवेशः स्यादिति शङ्कित्वा दूषयति-**फल इत्यादिना** । विनाशादीत्यादिशब्देनानात्मत्वादीश्वरत्वादि गृह्यते । प्रसङ्गस्येष्टत्वमाशङ्क्य निराचष्टे-**न चेति** । जन्मादीनां धर्माणां धर्मिणो भिन्नत्वाभिन्नत्वासंभवादिन्यायः । बीजफलयोरवयवावयवित्वं पाषाणसर्पयोराधाराधेयतेत्यपुनरुक्तिः । परस्य सर्वप्रकारप्रवेशासंभवे प्रवेशश्रुतेरालम्बनं वाच्यमित्याशङ्क्य पूर्वपक्षमुपसंहरति-**अन्य एवेति** । जगतो हि परः स्रष्टेति वेदान्तमर्यादा स्रष्टैव च प्रवेष्टा प्रविश्य व्याकरवाणीति प्रवेशव्याकरणयोरेककर्तृत्वश्रुतेस्तस्मात्परस्मादन्यस्य प्रवेशो न युक्तिमानिति सिद्धान्तयति-**नेत्यादिना** । तत्रैव तैत्तिरीयश्रुतिं संवादयति-**तथेति** । ऐतरेयश्रुतिरपि यथोक्तमर्थमुपोद्बलयतीत्याह-**स एवमेवेति** । श्रीनारायणाख्यमन्त्रमप्यत्रानुकूलयति-**सर्वाणीति** । वाक्यान्तरमुदाहरति-**त्वं कुमार इति** । अत्रैव वाक्यशेषत्याऽऽनुगुण्यं दर्शयति-**पुर इति** । उदाहृतश्रुतीनां तात्पर्यमाह-**न परादिति** ।

प्रविष्टानामितरेतरभेदात्परानेकत्वमिति चेत । न । "एको देवो बहुधा संनिविष्टः" "एकः सन्बहुधा विचार" "त्वमेकोऽसि बहूननुप्रविष्टः" "एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा"

१ ख. ग. ङ. च. छ. ज. विचिन्त्य । २ ञ. ण. °न्तसं ।

इत्यादिश्रुतिभ्यः । प्रवेश उपपद्यते नोपपद्यत इति तिष्ठतु तावत्प्रविष्टानां संसारित्वात्तदनन्यत्वाच्च परस्य संसारित्वमिति चेत् । न । अशनायाद्यत्ययश्रुतेः ।

परस्य प्रवेशे प्रविष्टानां मिथो भेदात्तदभिन्नस्य तस्यापि नानात्वमसङ्कीर्तिरिति शङ्कते—प्रविष्टानामिति । न परस्यानेकत्वमेकत्वश्रुतिविरोधादिति परिहरति—नेत्यादिना । विचार मिचवारेति यावत् । परस्य प्रवेशे नानात्वप्रसङ्गं प्रत्याख्याय दोषान्तरं चोद्यति—प्रवेश इति । तेषां संसारित्वेऽपि परस्य किमायातं तदाह—तदनन्यत्वादिति । श्रुत्यवष्टम्भेन दूषयति- नेति ।

सुखित्वदुःखित्वादिदर्शनान्नेति चेत् । न । " न लिप्यते लोकदुःखेन बाह्यः" इति श्रुतेः । प्रत्यक्षादिविरोधादयुक्तमिति चेत् । न । उपाध्यायजनितविशेषविषयत्वात्प्रत्यक्षादेः । " न दृष्टेर्द्रष्टारं पश्येर्विज्ञातारमरे केन विजानीयाद्विज्ञातं विज्ञातृ " इत्यादिश्रुतिभ्यो नाऽऽत्मविषयं विज्ञानं किं तर्हि बुद्ध्याद्युपाध्यात्मप्रतिच्छायाविषयमेव सुखितोऽहं दुःखितोऽहमित्येवमादि प्रत्यक्षविज्ञानम् । अयमहमिति विषयेण विषयिणः सामानाधिकरण्योपचारात् । " नान्यदतोऽस्ति द्रष्टृ " इत्यन्यात्मप्रतिषेधाच्च । देहावयवविशेष्यत्वाच्च सुखदुःखयोर्विषयधर्मत्वम् ।

अनुभवमनुसृत्य शङ्कते—सुखित्वेति । नासंसारित्वमिति शेषः । गूढाभिसंधिरुत्तरमाह—नेति । आगमो हि परस्यासंसारित्वेन मानं त्वयोच्यते स चाध्यक्षविरुद्धो न स्वार्थे मानं न च विपरीतं ज्येष्ठत्वेन बलवत्त्वादिति शङ्कते—प्रत्यक्षादीति । शङ्कितं पूर्ववादिनि स्मारयति—नेति । सिद्धान्ती स्वाभिसंधि- — —धीति । उपाधिरन्तःकरणं तदाश्रयत्वेन जनितो विशेषश्चिदाभासस्तद्ग्रहणादिविषयत्वात्प्रत्यक्षादेराभासत्वान्नाऽऽत्मन्यसंसारित्वागमस्य न विरोधोऽस्तीत्यर्थः । किंच प्रत्यक्षादीनामनात्मविषयत्वादात्मविषयत्वाच्चाऽऽगमस्य भिन्नविषयतया नानयोर्मिथो विरोधोऽस्तीत्याह—नेत्याऽऽत्मनोऽध्यक्षाद्यविषयत्वे श्रुतीरुदाहरति—न दृष्टेरिति । सुख्यहमित्यादिप्रतिभासस्य तर्हि का गतिरित्याशङ्क्य पूर्वोक्तमेव स्मारयति—किं तर्हीति । बुद्ध्यादिरूपविशेषाऽऽत्मप्रतिच्छाया तत्प्रतिबिम्बस्तद्विषयमेव सुख्यहमित्यादिविज्ञानमिति योजना । आत्मनो दुःखि-

---

१ च. इयेनं विज्ञातर्विज्ञातारं विजानीयाद्विज्ञा° । २ झ ञ्त्यनात्म° । ३ ज. झ. शेषत्वा° । ४ घ. ण. °ति । पू° ।

त्वाभावे हेत्वन्तरमाह-अयमिति । अयं देहोऽहमिति दृश्येन द्रष्टुस्तादात्म्याध्यासदर्शनाद्दृश्यविशिष्टस्यैव प्रत्यक्षविषयत्वान्न केवलस्याऽऽत्मनो दुःखादिसंसारोऽस्तीत्यर्थः । किंचास्थूलादिविशेषणमक्षरं प्रक्रम्य तस्यैव प्रत्यगात्मत्वं दर्शयन्ती श्रुतिरात्मनः संसारित्वं वारयतीत्याह-नान्यादिति । किंच पादयोर्दुःखं शिरसि दुःखमिति देहावयवावच्छिन्नत्वेन तत्प्रतीतेस्तद्धर्मत्वनिश्चयान्नाऽऽत्मनि संसारित्वं प्रामाणिकमित्याह देहेति ।

"आत्मनस्तु कामाय" इत्यात्मार्थश्रुतेरयुक्तत्वमिति चेन्न । यत्र वा अन्यदिव स्यादित्यविद्याविषयात्मार्थत्वाभ्युपगमात् । "तत्केन कं पश्येत्" "नेह नानाऽस्ति किंचन" "तत्र को मोहः कः शोक एकत्वमनुपश्यतः" इत्यादिना विद्याविषये तत्प्रतिषेधाच्च नाऽऽत्मधर्मत्वम् ।

श्रुतिवशादात्मनः संसारित्वं शङ्कते-आत्मनस्त्विति । सुखं तावदात्माश्रयमात्मनस्तु कामायेति सुखसाधनस्याऽऽत्मार्थत्वश्रुतेरतस्तदविनाभूतं दुःखमपि तत्रेत्यात्मन्यसंसारित्वमयुक्तमित्यर्थः । अविद्यैकसंसारित्वानुवादेनाऽऽत्मनोऽनतिशयानन्दत्वप्रतिपादकमात्मनस्तु कामायेत्यादिवाक्यमिति मत्वाऽऽह-नेति । तदाविद्यैकसंसारानुवादीत्यत्र गमकमाह-यत्रेति । अनेन हि वाक्येनाविद्यावस्थायामेवाऽऽत्मार्थत्वं सुखादेरभ्युपगम्यते । अतो न तस्याऽऽत्मधर्मत्वमित्यर्थः । आत्मनि संसारित्वस्याप्रतिपाद्यत्वेऽपि गमकमाह-तत्केनेति । आत्मनोऽसंसारित्वे विद्वदनुभवमनुकूलयितुं चशब्दः ।

तार्किकसमयविरोधादयुक्तमिति चेन्न । युक्त्याऽप्यात्मनो दुःखित्वानुपपत्तेः । नहि दुःखेन प्रत्यक्षविषयेणाऽऽत्मनो विशेषत्वं प्रत्यक्षाविषयत्वात् । आकाशस्य शब्दगुणवत्त्ववदात्मनो दुःखित्वमिति चेन्न एकप्रत्ययविषयत्वानुपपत्तेः ।

तर्कशास्त्रप्रामाण्यादात्मनः संसारित्वमिति शङ्कते-तार्किकेति । बुद्ध्यादिचतुर्दशगुणवानात्मेति तार्किकसमयस्तेन विरोधात्तस्यासंसारित्वमयुक्तं तर्काविरुद्धो हि सिद्धान्तो भवतीत्यर्थः । सर्वतर्काविरोधी वा कतिपयतर्काविरोधी वा सिद्धान्तः । नाऽऽद्यः । तार्किकादिसिद्धान्तस्यापि मिथो वैदिकतर्कैश्च विरोधादसिद्धिप्रसङ्गात् द्वितीये तु श्रौततर्काविरोधादात्मासंसारित्वसिद्धान्तोऽपि सिध्येदित्यभिसंधायाऽऽह-न युक्त्याऽपीति । किंच दुःखादिरात्मधर्मो न भवति वेद्यत्वाद्रूपादिवदित्याह-नहीति । प्रत्यक्षाविषयत्वोक्त्या प्रतीचस्तद्विषयदुःखाविशेष्यत्वमयुक्तं प्रत्यक्षाप्रत्यक्षयोः शब्दाकाशयोरिव दुःखात्मनोरपि गुणगुणित्वसंभवादिति शङ्कते-

१ ण. 'र्मवत्तानि'। क. स. ङ. च. छ. झ. 'दि वि'। २ क. 'त्यसं'। ४ क, ञ. 'त्यसं'।

आकाशस्येति । यत्र धर्मधर्मिभावस्तत्रैकज्ञानगम्यत्वं दृष्टं यथा शुक्लो घट इति तद्व्यापकं व्यावर्तमानं दुःखात्मनोर्धर्मधर्मित्वं व्यावर्तयति शब्दाकाशयोरपि गुण-गुणिभावो नास्माकं संमतः शब्दतन्मात्रमाकाशमिति स्थितेरित्याशयेनाऽऽह—नैकेति ।

नहि सुखग्राहकेण प्रत्यक्षविषयेण प्रत्ययेन नित्यानुपेयस्याऽऽत्मनो वियय्यीकरणमुपपद्यते तस्य च विषयीकरण आत्मन एकत्वाद्विषे-ष्यभावप्रसङ्गः । एकस्यैव विषयविषयित्वं दीपवदिति चेन्न । युगपद-संभवादात्मन्यंशानुपपत्तेश्च ।

कथं तदनुपपत्तिस्तत्राऽऽह—न हीति । नित्यानुपेयस्येति जरत्तार्किकमतानु-सारेण सांख्यसमयानुसारेण चोक्तम् । आधुनिकं तार्किकं प्रत्याह—तस्य चेति । सुखादिवदात्मनोऽपि प्रत्यक्षेण वियय्यीकरणे सत्येकस्मिन्देहे तदैक्यसंपतेरात्मान्त-रस्य तत्रायोगादेकत्र भोक्तृद्वयानिष्टेः पुरुषान्तरस्यान्यं प्रत्यप्रत्यक्षत्वाद्दृष्टृभावा-दात्मदृश्यत्वासिद्धिरित्यर्थः । दीपस्य स्वव्यवहारहेतुत्वेन विषयविषयित्ववदेकस्यै-वाऽऽत्मनो दृष्टृदृश्यत्वसिद्धेर्दृष्टृभावो नास्तीति शङ्कते—एकस्यैवेति । आत्मनो विषयविषयित्वं कात्स्न्र्येनांशाभ्यां वा । आद्येऽपि युगपत्क्रमेण वा । नाऽऽद्य इत्याह—न युगपदिति । क्रियायां गुणत्वं कर्तृत्वं तत्र प्राधान्यं कर्मत्वमतो युगपदेक-क्रियां प्रत्येकस्य साकल्येन गुणप्रधानत्वायोगान्नैवमित्यर्थः । न द्वितीयः । एक-भावेऽन्याभावादिति मत्वा कल्पान्तरं प्रत्याह—आत्मनीति । एतेन प्रदीपदृष्टा-न्तोऽपि प्रतिनीतस्तस्यांशाभ्यां तद्भावे प्रकृताननुकूलत्वात् ।

एतेन विज्ञानस्य ग्राह्यग्राहकत्वं प्रत्युक्तम् । प्रत्यक्षानुमानविषययोश्च दुःखात्मनोर्गुणगुणित्वेनानुमानम् । दुःखस्य नित्यमेव प्रत्यक्षविषयत्वा-द्रूपादिसामानाधिकरण्याच्च ।

ननु विज्ञानवादिनो युगपदेकस्य विज्ञानस्य साकल्येन ग्राह्यग्राहकत्वमुपयन्ति तथा तदात्मनोऽपि स्यात्तत्राऽऽह—एतेनेति । एकस्योभयत्वनिरासेनेत्यर्थः । मा भूत्प्रत्यक्षमागमिकं पारिभाषिकं वाऽऽत्मनः संसारित्वम् । आनुमानिकं तु भविष्यति दुःखादि क्वचिदाश्रितं गुणत्वाद्रूपादिवदित्याश्रये सिद्धे परिशेषादात्मनस्तदाश्रय-त्वादित्याशङ्क्याऽऽह—प्रत्यक्षेति । नहि मिथो विरुद्धयोर्गुणगुणित्वमनुभेयं दुःखा-देश्च साभासबुद्धिस्थत्वात्पारिशेष्यासिद्धिरित्यर्थः । साभासान्तःकरणनिष्ठदुःखादी-त्यत्र प्रमाणाभावात्कथं सिद्धसाधनत्वमित्याशङ्क्याह दुःखमहमित्यादिप्रत्यक्षस्य तत्र

---

१ ख. ग ङ. च. झ. °क्षप° । २ ङ. °षयविषय्य° । ३ क. ख. ञ. °यीकारे स° । ४ घ. ण °त्मनो द्र° । ५ ख. घ. चाऽऽत्मनः । ६ क. ञ. ण. °द्रूपव° ।

प्रमाणत्वादुक्तानुमानस्य सिद्धसाध्यतया परिशेषासिद्धिरित्याह-**दुःखस्येति** । यत्र रूपादिमति देहे दाहच्छेदादि दृष्टं तत्रैव तत्कृतदुःखाद्युपलम्भान्नाऽऽत्मनस्तद्धर्त्वमिति हेत्वन्तरमाह-**रूपादीति** ।

मनः संयोगजत्वेऽप्यात्मनि दुःखस्य सावयवत्वविक्रियावत्त्वानित्यत्वप्रसङ्गात् । नह्यविकृत्य संयोगि द्रव्यं गुणः कश्चिदुपयन्नपयन्वा दृष्टः क्वचित् । न च निरयवं विक्रियमाण दृष्टं क्वचिदनित्यगुणाश्रयं वा नित्यम् ।

यत्त्वात्ममनःसंयोगादात्मनि बुद्ध्यादयो नव वैशेषिका गुणा भवन्तीति तद्दूषयति-**मनःसंयागजत्वेऽपीति** । दुःखस्याऽऽत्मनि मनःसंयोगजत्वेऽभ्युपगतेऽपि मनोवदात्मनः संयोगित्वात्सावयवत्वादिप्रसङ्गादात्मत्वमेव न स्यादित्यर्थः । तत्र संयोगित्वेन सक्रियत्वं साधयति-**नहीति** । संप्रति सक्रियत्वेन सावयवत्वं प्रतिपादयति-**न चेति** । यद्वा दुःखाद्यात्मनो विक्रियेति कैश्चिदिष्टत्वात्तस्य सक्रियत्वमविरुद्धमित्याशङ्क्याऽऽह-**न चेति** । आत्मा न परिणामी निरवयवत्वान्नभोवदिति भावः । किंचाऽऽत्मा न गुणी नित्यत्वात्सामान्यवदित्याह-**अनित्येति** । नित्यं पश्याम इति शेषः । वाशब्दो नञनुकर्षणार्थः ।

न चाऽऽकाश आगमवादिभिर्नित्यतयाऽवगम्यते । न चान्यो दृष्टान्तोऽस्ति । विक्रियमाणमपि तत्प्रत्ययानिवृत्तेर्नित्यमेवेति चेन्न । द्रव्यस्यावयवान्यथात्वव्यतिरेकेण विक्रियानुपपत्तेः ।

आकाशे व्यभिचारमाशङ्क्याऽऽह-**न चेति** । आकाशस्य नित्यत्वं चेत् 'आत्मन आकाशः संभूतः' इत्यादिश्रुतिविरोधः स्यादिति सूचयितुमागमवादिभिरित्युक्तम् । परमाण्वादौ व्यभिचारमाशङ्क्याऽऽह-**न चान्य इति** । न तावदणवः सन्ति त्र्यणुकेतरसत्त्वे मानाभावाद्दिशश्चाऽऽकाशेऽन्तर्भवन्ति कालस्तु सर्वे निमेषा जज्ञिर इत्यादिश्रुतेरुत्पत्तिमान्मनोऽप्यन्नमयं श्रुतिप्रसिद्धमतो न क्वचिद्व्यभिचार इति भावः । यस्मिन्विक्रियमाणे तदेवेदमिति बुद्धिर्न विहन्यते तदपि नित्यमिति न्यायेन परिणामवादी शङ्कते-**विक्रियमाणमिति** । तत्प्रत्ययस्तदेवेदमिति प्रत्ययः । विक्रियां वदता द्रव्यस्यावयवान्यथात्वं वाच्यं तदेव तस्यानित्यत्वमत्यन्ताभावस्य प्रामाणिकत्वे दुर्वचत्वादिति परिहरति-**न द्रव्यस्येति** ।

सावयवत्वेऽपि नित्यत्वमिति चेन्न । सावयवस्यावयवसंयोगपूर्वकत्वे

---

१ घ. °त्वम° । २ ग. च. छ. झ. °नित्योऽभ्युपग° । ३ ख. °याऽभ्युपग° । ४ घ. ङ. छ. ज. °स्ति दुःखे । वि° । ५ घ. ण. °रतत्सत्त्वे° ।

सति विभागोपपत्तेः । वज्रादिष्वदर्शनान्नेति चेन्न । अनुमेयत्वात्संयोगपूर्वत्वस्य । तस्मान्नाऽऽत्मना दुःखाद्यनित्यगुणाश्रयत्वोपपत्तिः ।

आत्मनः सक्रियत्वं सावयवत्वं वाऽस्तु तथाऽपि नानित्यत्वमिति स्याद्वादी शङ्कते—सावयवत्वेऽपीति । यत्सावयवं तदवयवसंयोगकृतं यथा पटादि तथा सति संयोगस्य विभागावसानत्वादवयवविभागे द्रव्यनाशोऽवश्यंभावीति दूषयति—न सावयवस्येति । यत्सावयव तदवयवसंयोगपूर्वकमिति न व्याप्तिः । सावयवेष्वेव वज्रादिष्ववयवसंयोगपूर्वकत्वे प्रमाणाभावादिति शङ्कते—वज्रादिष्विति । विमतमवयवसंयोगपूर्वकं सावयवत्वात्पटवदित्यनुमानेन परिहरति—नानुमेयत्वादिति । आत्मनो मनःसंयोगजन्यदुःखादिगुणत्वे सावयवत्वसक्रियत्वानित्यत्वादिप्रसङ्ग प्रतिपाद्य प्रकृतमुपसंहरति—तस्मादिति ।

परस्यादुःखित्वेऽन्यस्य च दुःखिनोऽभावे दुःखोपशमनाय शास्त्रारम्भानर्थक्यमिति चेन्न । अविद्याध्यारोपितदुःखित्वभ्रमापोहार्थत्वात् । आत्मनि प्रकृतमरुप्यापूरणभ्रमापोहवत्कल्पितदुःख्यात्माभ्युपगमाच्च ।

आत्मनोऽनर्थध्वंसार्थशास्त्रारम्भान्यथानुपपत्त्या संसारितेत्यर्थापत्त्या शङ्कते—परस्येति । अविद्याविद्यमानमात्मस्थमनर्थभ्रमं निराकर्तुं तदारम्भः संभवतीत्यन्यथोपपत्त्या समाधत्ते—नाविद्येति । परस्यैवाविद्याकृतसंसारित्वभ्रान्तिध्वंसार्थं शास्त्रमित्येतद्दृष्टान्तेन स्पष्टयति—आत्मनीति । यत्तु परस्यादुःखित्वमन्यस्य च दुःखिनोऽसत्त्वं तत्राऽऽह—कल्पितेति । न तावत्परस्मादन्यो दुःखी 'नान्योऽतोऽस्ति द्रष्टा' इत्यादिश्रुतेः । स पुनरनाद्यनिर्वाच्याज्ञानसंबन्धात्तज्जन्यैर्बुद्ध्यादिभिरैक्याध्यासमापन्नः संसरति । तथा च कल्पिताकारद्वारा दुःखिनः परस्याऽऽत्मनोऽङ्गीकारान्नार्थापत्तेरुत्थानमित्यर्थः ।

जलसूर्यादिप्रतिबिम्बवदात्मप्रवेशश्च प्रतिबिम्बवद्व्याकृते कार्य उपलभ्यत्वम् । प्रागुत्पत्तेरनुपलब्ध आत्मा पश्चात्कार्ये च सृष्टे व्याकृते बुद्धेरन्तरुपलभ्यमानः सूर्यादिप्रतिबिम्बवज्जलादौ कार्यं सृष्ट्वा प्रविष्ट इव लक्ष्यमाणो निर्दिश्यते " स एष इह प्रविष्टः " " तत्सृष्ट्वा तदेवानुप्राविशत् " " स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत " " सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनाऽऽत्मनाऽनुप्रविश्य " इत्येवमादिभिः ।

---

१ ग. °नादिति । २ घ ङ °वैकत्व° । च. झ. °वस्य । ३ ख °स्य विभागस्य । त° । च. वज्रादिषु त° । ४ ख. घ. ण. °णवत्त्वे सा° । ५ ग. ङ. च. °शमाय° । ६ क. ज झ. °दुःखात्मा° । ७ क. घ. ण. °सार्थं शा° । ८ क. ख. घ. ण. °स्य दुः । ९ घ. ण.

परस्य प्रवेशे प्राप्तां दोषपरम्परां पराकृत्य तत्प्रवेशस्वरूपं निरूपयति—जलेति । यथा जले सूर्यादेः प्रतिबिम्बलक्षणः प्रवेशो दृश्यते तथाऽऽत्मनोऽपि सृष्टे कार्ये काल्पनिकः प्रवेश इत्यर्थः। अनवच्छिन्नाद्वयचिद्धातोर्वस्त्वन्तरेण संनिकर्षासंभवान्न प्रतिबिम्बाख्यप्रवेशः संभवतीत्याशङ्क्य वस्त्वन्तरकल्पनया कल्पितसंनिकर्षाद्यादाय प्रतिबिम्बपक्षं साधयति—आत्मेति । तदेव प्रपञ्चयति—प्रागुत्पत्तेरित्यादिना ।

न तु सर्वगतस्य निरवयवस्य दिग्देशकालान्तरापक्रमणप्राप्तिलक्षणः प्रवेशः कदाचिदप्युपपद्यते । न च परादात्मनोऽन्योऽस्ति द्रष्टा "नान्यदतोऽस्ति द्रष्टृ" "नान्यदतोऽस्ति श्रोतृ" इत्यादिश्रुतेरित्यवोचाम । उपलब्ध्यर्थत्वाच्च सृष्टिप्रवेशस्थित्यप्ययवाक्यानाम् । उपलब्धेः पुरुषार्थत्वश्रवणात् । "आत्मानमेवावेत्" "तस्मात्तत्सर्वमभवत्" "ब्रह्मविदाप्नोति परम" "स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति" "आचार्यवान्पुरुषो वेद" "तस्य तावदेव चिरम्" इत्यादिश्रुतिभ्यः । "ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्" "तद्ध्यगम्यं सर्वविद्यानां प्राप्यते ह्यमृतं ततः" इत्यादिस्मृतिभ्यश्च । भेददर्शनापवादाच्च सृष्ट्यादिवाक्यानामात्मैकत्वदर्शनार्थपरत्वोपपत्तिः। तस्मात्कार्यस्योपलभ्यत्वमेव प्रवेश इत्युपचर्यते ।

स्वाभिप्रेतं प्रवेशं प्रतिपाद्य परेष्टं पराचष्टे—न त्विति । कुतश्चिद्दिशो देशात्कालाच्चापक्रमणेन दिगन्तरे देशान्तरे कालान्तरे च प्राप्तिलक्षण इति यावत् । यत्तु परस्मादन्यस्य प्रवेष्टृत्वमिति तत्राऽऽह—न चेति । अथेदं प्रवेशादि वस्तुतो विद्यमानमस्तु किमित्यविद्यं कल्प्यते तत्राऽऽह—उपलब्धीति । आत्मज्ञानार्थत्वेन प्रवेशादीनां कल्पितत्वात्तद्वाक्यानां न स्वार्थे पर्यवसानमित्यर्थः । फलवत्संनिधावफलं तदङ्गमिति न्यायमाश्रित्योक्तमेव प्रपञ्चयति—उपलब्धेरित्यादिना । ततःशब्दो भक्तियोगपरामर्शी । तदित्यात्मज्ञानमुच्यते । तस्यार्थत्वं साधयति—प्राप्यते हीति । सृष्ट्यादिवाक्यानामैक्यज्ञानार्थत्वे हेत्वन्तरमाह—भेदेति कल्पितं प्रवेशं प्रतिपादितमुपसंहरति—तस्मादिति ।

आ नखाग्रेभ्यो नखाग्रमर्यादमात्मनश्चैतन्यमुपलभ्यते । तत्र कथमिव प्रविष्ट इत्याह—यथा लोके क्षुरधाने क्षुरो धीयतेऽस्मिन्निति क्षुर-

---

१ ख. ञ. ण. °निकप्र°। २ क. चिद्वस्तुनो वस्त्व°। ३ घ. च छ. ज झ. °वस्याऽऽत्तनो दि°। ४ क. च. छ. झ. °स्ति ना°। ५ क. ख. घ. च. छ. ज °र्थश्र°। ६ ख. ग. ङ. च. °त्वप्रद°। ७ घ. ण. °विद्यकं क°। ८ ख. ग. च. °र्यादं ह्यात्म°। ९ ख. क्षुरः क्षुर°।

धानं तस्मिन्नापितोपस्कराधाने क्षुरोऽन्तःस्थ उपलभ्यतेऽवहितः प्रवेशितः स्याद्यथा वा विश्वंभरोऽग्निर्विश्वस्य भरणाद्विश्वंभरकुलाये नीडेऽग्निः काष्ठादाववहितः स्यादित्यनुवर्तते तत्र हि स मथ्यमान उपलभ्यते । यथा च क्षुरः क्षुरधानैकदेशेऽवस्थितो यथा चाग्निः काष्ठादौ सर्वतो व्याप्यावस्थित एवं सामान्यतो विशेषतश्च देहं संव्याप्यावस्थित आत्मा । तत्र हि स प्राणनादिक्रियावान्दर्शनादिक्रियावांश्चोपलभ्यते । तस्मात्तत्रैवं प्रविष्टं तमात्मानं प्राणनादिक्रियाविशिष्टं न पश्यन्ति नोपलभन्ते ।

का पुनरस्य प्रवेशस्य मर्यादेत्याशङ्क्य चाऽऽह—**आ नखाग्रेभ्य** इति । संभवति मर्यादान्तरे किमिति प्रवेशस्येयमेव मर्यादेत्याशङ्क्य चाऽऽह—**नखाग्रेति** । दृष्टान्तद्वयमाकाङ्क्षापूर्वकमुत्थापयति—**तत्रेति** । प्रवेशाधारो देहादिः सप्तम्यर्थः । प्रथमोदाहरणप्रतीकोपादानम्—**यथेति** । तद्व्याचष्टे—**लोक इति** । तत्र प्रवेशितत्वं क्षुरस्य कथं सिद्धमत आह—**अन्तःस्थ उपलभ्यत इति** । विश्वंभरशब्दस्याग्निविषयत्वं व्युत्पादयति—**विश्वस्येति** । तस्य तद्भर्तृत्वं महाभूतत्वाज्जाठरत्वाद्वा द्रष्टव्यम् । काष्ठादावग्नेरवहितत्वे युक्तिमाह—**तत्रेति** । दृष्टान्तद्वये विवक्षितमंशमनूद्य दार्ष्टान्तिकमाह—**यथेत्यादिना** । आत्मनो जाग्रत्स्वप्नयोर्देहे द्वयी वृत्तिः स्वापे तु सामान्यवृत्तिरेवेत्यवान्तरविभागमाह—**तत्र हीति** । अवस्थाद्वयं सप्तम्यर्थः । न केवलं विशेषवृत्तिरेव तदोपलब्धा किंतु सामान्यवृत्तिश्चेति चकारार्थः । अवस्थान्तरे सैवेत्यपि तस्यैवार्थः । वाक्यान्तरमवतारयितुं भूमिकामाह—**तस्मादिति** । यस्मादुभयी वृत्तिरात्मनः शरीरे दृश्यते तस्मात्तत्रैव जलसूर्यवद्विद्यया प्रविष्टोऽयमिति योजना । व्याकृताज्जगतः सदाकाशादात्मानं पृथक्कर्तुं तं न पश्यन्तीति वाक्यं तद्व्याचष्टे—**तमात्मानमिति** । विशिष्टं पश्यन्तोऽपि केवलमात्मानं न पश्यन्तीति यावत् । चाक्षुषत्वनिषेधस्येष्टत्वमाशङ्क्य व्याचष्टे—**नोपलभन्त इति** ।

नन्वप्राप्तप्रतिषेधोऽयं तं न पश्यन्तीति दर्शनस्याप्रकृतत्वात् । नैष दोषः । सृष्ट्यादिवाक्यानामात्मैकत्वप्रतिपत्त्यर्थपरत्वात्प्रकृतमेव तस्य दर्शनम् । " रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रति चक्षणाय " इति मन्त्रवर्णात् ।

उक्तनिषेधमाक्षिपति—**नन्विति** । प्रतिषेध्यस्य प्राप्तिं दर्शयन्परिहरति—

---

१ क. ग. च. छ. ज. झ. °भरः कु । २ क. ख. °धानेक° । ३ ग. घ. च. ज. झ. °था वाऽग्निः । ४ घ. °तमर्थम° । ञ. तम° ।

नेत्यादिना । तन्नामरूपाभ्यां स एष इत्यादिवाक्यानां ज्ञानार्थत्वे मानमाह—रूपमिति ।

तत्र प्राणनादिक्रियाविशिष्टस्य दर्शने हेतुमाह—अकृत्स्नोऽसमस्तो हि यस्मात्स प्राणनादिक्रियाविशिष्टः । कुतः पुनरकृत्स्नत्वमिति । उच्यते । प्राणन्नेव प्राणनक्रियामेव कुर्वन्प्राणो नाम प्राणसमाख्यः प्राणाभिधानो भवति । प्राणनक्रियाकर्तृत्वाद्धि प्राणः प्राणितीत्युच्यते नान्यां क्रियां कुर्वन् । यथा लावकः पाचक इति । तस्मात्क्रियान्तरविशिष्टस्यानुपसंहारादकृत्स्नो हि सः ।

विशिष्टस्य दर्शने पि पूर्णस्यादर्शने हेतूक्तिरनन्तरवाक्यमित्याह—तत्रेति । प्रतिज्ञावाक्यार्थे स्थिते सतीति यावत् । तस्मात्तद्दर्शनेऽपि पूर्णस्यादर्शनमिति शेषः । विशिष्टस्यापि पूर्णत्वमात्मत्वादन्यथा प्राणनादिकर्तृत्वायोगादिति शङ्कते—कुत इति । प्राणनादिक्रियाकर्ता प्राणादिभिः संहतत्वात्पूर्णो न भवतीत्युत्तरवाक्यैरुत्तरमाह—उच्यत इति । आत्मनि प्राणशब्दप्रवृत्तिमुपपादयति—प्राणनक्रियाकर्तृत्वादिति । तत्कर्तृत्वादात्मा प्राण उच्यते प्राणितीति व्युत्पत्तेरिति योजना । सदृष्टान्तमेवकारार्थमाह—नान्यामिति एवकारार्थमनूद्य हेत्वर्थमुपसंहरति—तस्मादिति ।

तथा वदन्वदनक्रियां कुर्वन्वक्तीति वाक्पश्यंश्चक्षुश्चष्ट इति चक्षुर्द्रष्टा शृण्वञ्शृणोति श्रोत्रम् । प्राणन्नेव प्राणो वदन्वागित्याभ्यां क्रियाशक्त्युद्भवः प्रदर्शितो भवति, पश्यंश्चक्षुः शृण्वञ्श्रोत्रमित्याभ्यां विज्ञानशक्त्युद्भवः प्रदर्श्यते । नामरूपविषयत्वाद्विज्ञानशक्तेः श्रोत्रचक्षुषी विज्ञानस्य साधने विज्ञानं तु नामरूपसाधनम् । न हि नामरूपव्यतिरिक्तं विज्ञेयमस्ति । तयोश्चोपलम्भे करणं चक्षुःश्रोत्रे । क्रिया च नामरूपसाध्या प्राणसमवायिनी । तस्याः प्राणाश्रयायाः अभिव्यक्तौ वाक्करणम् । तथा पाणिपादपायूपस्थाख्यानि । सर्वेषामुपलक्षणार्थो वाक् । एतदेव हि सर्वं व्याकृतम् । ' त्रयं वा इदं नाम रूपं कर्म ' इति हि वक्ष्यति । मन्वानो मनो मनुत इति ज्ञानशक्तिविकासानां साधारणं करणं मनो मनुतेऽनेनेति पुरुषस्तु कर्ता सन्मन्वानो मन इत्युच्यते ।

---

१ क. ख. ग. ङ. च. छ. झ. °ष्टस्याद° । २ ण. °विक्रियाक° । ३ घ. ज. °वाक्येनोक्त° । ४ क. घ. ङ. च. च. छ. ज. झ. °दन° । ख. °दन्क्रियां । ५ च. छ. ज. झ °ति शृ° । ग. °ति द्रष्टा । ६ ख. ङ. चक्षुः शृ° । ७ ण. °नसा° । ८ क. °लम्भक° । ९ ङ. °रणे च° । १० ख. घ. छ. ज. °काज्ञानां ।

स्वापावस्थायां समस्तकरणोपसंहारेऽपि प्राणस्य व्यापारदर्शनात्प्राधान्यावगमात्प्राणन्नित्यादिवाक्यमादौ व्याख्याय क्रियाशक्तित्वेन प्राणसादृश्याद्वाचो वदन्नित्येतत्पूर्वकमुत्तरवाक्यानि व्याचष्टे—**तथेत्यादिना**। प्राणवदनाभ्यामनुक्तकर्मेन्द्रियव्यापारमुपलक्ष्य वाक्यद्वयतात्पर्यमाह—**प्राणन्नेवेति**। प्राणवाग्द्वयुपाधिद्वारेणाऽऽत्मनीति शेषः। दृष्टिश्रुतिभ्यामनुक्तज्ञानेन्द्रियव्यापारोपलक्षणं कृत्वाऽनन्तरवाक्ययोस्तात्पर्यमाह—**पश्यन्निति**। चक्षुरादयुपाधिद्वारा ऽऽत्मनीति पूर्ववत्। उक्तबुद्धीन्द्रियव्यापाराभ्यामनुक्तं तद्व्यापारमुपलक्ष्याऽऽत्मनः स्पष्टृत्वादिपरिच्छेदो न सिध्यतीति संबन्धं विनोपलक्षणायोगादित्याशङ्क्याऽऽह- **नामरूपेत्यादिना**। प्रकाश्यप्रकाशकातिरिक्तज्ञेयाभावात्तदुपलम्भे च चक्षुःश्रोत्रयोरिव त्वगादेरपि करणत्वादेकार्थत्वरूपसंबन्धादुपलक्षणसंभवादात्मनः स्पष्टृत्वादिसिद्धिरित्यर्थः। तथाऽप्युक्तकर्मेन्द्रियव्यापारेणानुक्तंतद्व्यापारोपलक्षणादात्मनो न गन्तृत्वादिपरिच्छेदः संगच्छते विना संबन्धमुपलक्षणासिद्धेरित्याशङ्क्याऽऽह—**क्रिया चेत्यादिना**। सर्वा क्रिया नामरूपव्यङ्ग्या प्राणाश्रया च तत्र प्राणाश्रयनामविषयोच्चारणक्रियाव्यङ्ग्यत्वं वाचो हस्तादीनां तदाश्रयादानादिव्यङ्ग्यकेन तस्यादेकाश्रयक्रियाव्यङ्ग्यत्वयोगाद्दुपलक्षणसंभवादात्मनो गन्तृत्वादिसिद्धिरित्यर्थः। शक्तिद्वयोद्भवोक्त्या समस्तसंसारस्य प्रतीच्यध्यासोऽत्र विवक्षित इत्याह—**एतदेवेति**। उद्भूतशक्तिद्वयमेतच्छब्दार्थः। उक्तेऽर्थे वाक्यशेषमनुकूलयति—**त्रयमिति**। आत्मा मन्वानः सन्मन इत्युच्यते मनुत इति व्युत्पत्तेरिति वाक्यान्तरं व्याचष्टे—**मन्वान इति**। करणे प्रसिद्धस्य मनःशब्दस्य कथमात्मनि वृत्तेरित्याशङ्क्य व्युत्पत्तिभेदमाह—**ज्ञानशक्तीत्यादिना**।

तान्येतानि प्राणादीन्यस्याऽऽत्मनः कर्मनामानि कर्मजानि नामानि कर्मनामान्येव नतु वस्तुमात्रविषयाणि। अतो न कृत्स्नात्मवस्त्ववद्योतकानि। एवं ह्यसावात्मा प्राणनादिक्रियया तत्तत्क्रियाजनितप्राणादिनामरूपाभ्यां व्याक्रियमाणोऽवद्योत्यमानोऽपि।

आत्मादिशब्देभ्यो विशेषमाह—**तानीति**। कृत्स्नात्मवस्त्ववद्योतकानि न भवन्तीत्येतदेव स्फुटयति—**एवं हीति**। प्राणादीनां कर्मनामत्वे सतीति यावत्। अवद्योत्यमानोऽपि न कृत्स्नो दृष्टः स्यादिति शेषः।

स योऽतोऽस्मात्प्राणनादिक्रियासमुदायादेकैकं प्राणं चक्षुरिति वा विशिष्टमनुपसंहृतेरविशिष्टक्रियात्मकं मनसाऽयमात्मेत्युपास्ते चिन्त-

१ अ. ण. °नुक्त°। २ ख ण. °क्तव्यापा°। ३ घ. °कत्वं त°। ४ इ. ण. °गात्पादाद्यु°। ५ क. °द्भूतं श°। ६ ख. ङ. च. झ. ञ. °प्राणनादि°। ७ ग. ङ. घ. °सक्ति°।

यति न स वेद न स जानाति ब्रह्म । कस्मात् । अकृत्स्नोऽसमस्तो हि यस्मादेष आत्माऽस्मात्प्राणनादिसमुदायात् । अतः प्रविभक्त एकैकेन विशेषणेन विशिष्ट इतरधर्मान्तरानुपसंहाराद्भवति । यावदयमेवं वेद पश्यामि शृणोमि स्पृशामीति वा स्वभावप्रवृत्तिविशिष्टं वेद तावदञ्जसा कृत्स्नमात्मानं न वेद ।

अकृत्स्नदर्शिनोऽप्यात्मदर्शित्वमाशङ्क्याऽऽह—स य इति । आत्मनोपासितुरात्मदर्शनासत्त्वमयुक्तमिति शङ्कित्वा परिहरति—कस्मादित्यादिना । तस्माद्विशिष्टात्मदर्शी न ब्रह्मात्मत्वदर्शीति शेषः । उपास्तिर्ज्ञानमुपास्त इति जानाति न स्वभावादुपासनामित्युक्तत्वात् । तथा च जानन्न जानातीति व्याहतिरित्याशङ्क्याऽऽह—यावदिति । एवं वेदेत्येतदेव विवियते—पश्यामीत्यादिना ।

कथं पुनः पश्यन्वेदेत्याह—आत्मेत्येवाऽऽत्मानमिति । प्राणादीनि विशेषणानि यान्युक्तानि तानि यस्य स आप्नुवंस्तान्यात्मेत्युच्यते । स तथा कृत्स्नविशेषोपसंहारी सन्कृत्स्नो भवति । वस्तुमात्ररूपेण हि प्राणाद्युपाधिविशेषक्रियाजनितानि विशेषणानि व्याप्नोति । तथा च वक्ष्यति—" ध्यायतीव लेलायतीव " इति । तस्मादात्मेत्येवोपासीत । एवं कृत्स्नो ह्यसौ स्वेन वस्तुरूपेण गृह्यमाणो भवति । कस्मात्कृत्स्न इत्याशङ्क्याऽऽह—अत्रास्मिन्नात्मनि हि यस्मान्निरुपाधिके जलसूर्यप्रतिबिम्बभेदा इवाऽऽदित्ये प्राणाद्युपाधिकृता विशेषाः प्राणादिकर्मजनामाभिधेया यथोक्ता ह्येत एकमभिन्नतां भवन्ति प्रतिपद्यन्ते ।

आकाङ्क्षापूर्वकं विद्यासूत्रमवतारयति—कथमिति । तत्र व्याख्येयं पदमादत्ते—आत्मेतीति । तद्व्याचष्टे—प्राणादीनीति । तस्मिन्दृष्टे पूर्वोक्तदोषराहित्यं दर्शयति—स तथेति । तत्तद्विशेषणव्याप्तिद्वारेणेति यावत् । कथं तत्तद्विशेषोपसंहारी तेन तेनाऽऽत्मना तिष्ठन्कृत्स्नः स्यात्तत्राऽऽह—वस्तुमात्रेति । स्वतोऽस्य प्राणनादिसंबन्धे संभवति किमित्युपाधिसंबन्धेनेत्याशङ्क्याऽऽह—तथा चेति । आत्मनि सर्वोपसंहारवति दृष्टे पूर्वोक्तदोषाभावात्तं पश्यन्नेवाऽऽत्मदर्शीत्युपसंहरति—तस्मादिति । यथोक्तात्मोपासने पूर्वोक्तदोषाभावे प्रागुक्तमेव हेतुं स्मारयति—एवमिति । तस्यार्थं स्फोरयति—स्वेनेति । वाङ्मनसातीतेनाकार्यकारणेन प्रत्यग्भूते-

---

१ ख. घ. छ. ज. झ. न जा° । २ घ. आत्मन उपा° । ३ ञ. ण. °त्मद्° । ४ झ. °शेषणोप° । ५ घ. °स्तुमात्ररू° । ६ ख. घ. छ ज. झ. °त्याह । ७ ग. ङ. °कृतवि° । ८ क. ख. ग. ङ. छ. ज. झ. °न्तेऽत आ° । ९ ण. °त्यं संभवतीति वागादिसंबन्धं द्र° । १० ञ. ण. °र्यकर° ।

नेति यावत् । आकाङ्क्षापूर्वकमुत्तरवाक्यमवतार्य व्याकरोति—कस्मादित्यादिना । तस्माद्यथोक्तमात्मानमेवोपासीतेति शेषः । अस्यैव द्योतको द्वितीयो हिशब्दः ।

आत्मेत्येवोपासीतेति नापूर्वविधिः । पक्षे प्राप्तत्वात् । " यत्साक्षादपरोक्षाद्ब्रह्म " " कतम आत्मेति " " योऽयं विज्ञानमयः " इत्येवमाद्यात्मप्रतिपादनपराभिः श्रुतिभिरात्मविषयं विज्ञानमुत्पादितम् । तत्राऽऽत्मस्वरूपविज्ञानेनैव तद्विषयानात्माभिमानबुद्धिः कारकादिक्रियाफलाध्यारोपणात्मिकाऽविद्या निवर्तिता । तस्यां निवर्तितायां कामादिदोषानुपपत्तेरनात्मचिन्तानुपपत्तिः पारिशेष्यादात्मचिन्तैव । तस्मात्तदुपासनमस्मिन्पक्षे न विधातव्यं प्राप्तत्वात् ।

विद्यासूत्रं विधिस्पर्शी विना विवक्षितेऽर्थे व्याख्यायापूर्वविधिरयमिति पक्षं प्रत्याह—आत्मेत्येवेति । अत्यन्ताप्राप्तार्थो ह्यपूर्वविधिर्यथा स्वर्गकामोऽग्निहोत्रं जुहुयादिति । नायं तथा पक्षे प्राप्तत्वादात्मोपासनस्य तस्यैं तत्प्राप्तिश्च पुरुषविशेषापेक्षया विचारावसाने स्पष्टी भविष्यतीत्यर्थः । इदानीमात्मज्ञानस्याविधेयत्वख्यापनार्थं वस्तुस्वभावालोचनया नित्यप्राप्तिमाह—यत्साक्षादिति । उत्पाद्यतामुक्तश्रुतिभिरात्मविज्ञानं किं तावतेत्यत आह—तत्रेति । कारकादीत्यादिपदं तदवान्तरभेदविषयम् । नन्वविद्यायामपनीतायामपि रागद्वेषादिसद्भावाद्वैधी प्रवृत्तिः स्यान्हि विद्वदविदुषोर्व्यवहारे कश्चिद्विशेषः पश्वादिभिश्चाविशेषादिति न्यायादत आह—तस्यामिति । बाधितानुवृत्तिपात्रान्न वैधी प्रवृत्तिरबाधिताभिमानमन्तरेण तदयोगादिति भावः । विदुषः सुषुप्ततुल्यत्वं व्यावर्तयति—पारिशेष्यादिति । श्रौतज्ञानात्पूर्वमपि सर्वासां चित्तवृत्तीनां जन्मनैवाऽऽत्मचैतन्यव्यञ्जकत्वात्प्राप्तमात्मज्ञानं श्रौते तु ज्ञाने नास्त्यनात्मेति स्फुरणमात्मज्ञानमेवेति नित्यप्राप्तिमभिप्रेत्याऽऽह—तस्मादिति । अस्मिन्पक्ष इति नित्यप्राप्तत्वपक्षोक्तिः ।

तिष्ठतु तावत्पाक्षिकयात्मोपासनप्राप्तिर्नित्या वेति । अपूर्वविधिः स्यात् । ज्ञानोपासनयोरेकत्वे सत्यप्राप्तत्वात् । न स वेदेति विज्ञानं प्रस्तुत्याऽऽत्मेत्येवोपासीतेत्यभिधानाद्वेदोपासनशब्दयोरेकार्थताऽवगम्यते "अनेन ह्येतत्सर्वं वेद" "आत्मानमेवावेत्" इत्यादिश्रुतिभ्यश्च विज्ञानमुपासनम् । तस्य चाप्राप्तत्वाद्विध्यर्हत्वम् ।

अपूर्वविधिवादी शङ्कते—तिष्ठतु तावदिति । सर्वेषां स्वभावतो विषयप्र-

---

१ ख. घ 'वयं मतात्पर्यम' । २ क. ख. ग. ङ. छ. ज झ. 'वि । आत्मेत्येवोपासीतेति ना' । ३ घ. ङ. नायमपू' । ४ ण. 'स्य प्राप्ति' । ५ क. ख. 'प्तत्वं । ६ वारयति ।

णानीन्द्रियाणि नाऽऽत्मज्ञानवार्तामपि मृष्यन्ते तदत्यन्तापाप्तत्वादात्मज्ञाने भवत्यपूर्वविधिरिति भावः। विशिष्टस्याधिकारिणः शाब्दज्ञानं शब्दादेव सिद्धमिति कथमप्राप्तिरित्याशङ्क्याऽऽह—ज्ञानेति। न खल्वत्र शाब्दज्ञानं विवक्षितं किंतूपासनम्। उपासनं नाम मानसं कर्म तदेव ज्ञानावृत्तिरूपत्वाज्ज्ञानमित्येकत्वे सत्यप्राप्तत्वाद्विधेयमित्यर्थः। तयोरेकत्वं विवृणोति—नेत्यादिना। अनेन हीत्यादौ वेदशब्दस्यार्थान्तरविषयत्ववच्च स वेदेत्यत्रापि किं न स्यादित्याशङ्क्याऽऽह—अनेनेति। उक्तश्रुतिभ्यो यद्विज्ञानं श्रुतं तदुपासनमेवेति योजना। 'स योऽत एकैकमुपास्ते' इत्युपक्रमात् 'आत्मेत्येवोपासीत' इत्युपसंहाराच्च न स वेदेत्यत्र तावद्वेदशब्दस्योपासनार्थत्वमेष्टव्यमन्यथोपक्रमोपसंहारात्। तथा चार्धवैशसासंभवादुपासनमेव सर्वत्र वेदनं तच्च सर्वथैवाप्राप्तमिति तस्मिन्नपूर्वविधिः स्यादिति भावः।

न च स्वरूपान्वाख्याने पुरुषप्रवृत्तिरुपपद्यते। तस्मादपूर्वविधिरेवायम्। कर्मविधिसामान्याच्च। यथा "यजेत जुहुयात्" इत्यादयः कर्मविधयो न तैरस्य "आत्मेत्येवोपासीत आत्मा वा अरे द्रष्टव्यः" इत्याद्यात्मोपासनविधेर्विशेषोऽवगम्यते। मानसक्रियात्वाच्च विज्ञानस्य। यथा यस्यै देवतायै हविर्गृहीतं स्यात्तां मनसा ध्यायेद्वषट्करिष्यन्नित्याद्या मानसी क्रिया विधीयते, तथा "आत्मेत्येवोपासीत" "मन्तव्यो निदिध्यासितव्यः" इत्याद्या क्रियैव विधीयते ज्ञानात्मिका। तथाऽवोचाम वेदोपासनशब्दयोरेकार्थत्वमिति।

इतश्च तस्मिन्नेष्टव्यो विधिरित्याह—न चेति। अतः प्रवर्तको विधिरुपेय इति शेषः। स चात्यन्तापाप्तविषयत्वान्नियमादिरूपो न भवतीत्याह—तस्मादिति। आत्मोपास्तिर्विधेयेत्यत्र हेत्वन्तरमाह—कर्मविधीति। कर्मात्मज्ञानविध्योः शब्दानुसारेणाविशेषमभिदधाति—यथेत्यादिना। संप्रत्यर्थतोऽप्यविशेषमाह—मानसेति। तदेव दृष्टान्तेन स्पष्टयति—यथेति। यदि क्रिया विधीयते कथं ज्ञानात्मिकेति विशेष्यते तत्राऽऽह—तथेति।

भावनांशत्रयोपपत्तेश्च। यथा हि यजेतेत्यस्यां भावनायां किं केन कथमिति भाव्याद्याकाङ्क्षापनयैकारणमंशत्रयमवगम्यते, तथोपासीतेत्यस्यामपि भावनायां विधीयमानायां किमुपासीत केनोपासीत

---

१ घ ञ. ण. शाब्दं ज्ञा°। २ घ. °शाब्दं ज्ञा°। ३ ग. घ. ङ. झ. °त्ता ध्या°। ४ ग. घ. ङ. ज. °था चावो°। ५ ङ. °त्यस्या भावनायाः किं। ६ ग. च. °यां विधीयमानायां किं। ७ ग. ङ. झ भावनाका°। ख. भावनाया आका°। ८ ग. ङ. °यनका°।

कथमुपासीतित्यस्यामाकाङ्क्षायामात्मानमुपासीत मनसा त्यागब्रह्मचर्यशमदमोपरमतितिक्षादीतिकर्तव्यतायुक्तं इत्यादि शास्त्रेणैव समर्थ्यतेऽशत्रयम् ।

इतश्चाऽऽत्मोपासने विधिरस्तीत्याह—**भावनेति** । वेदान्तेषु भावनापेक्षितां शत्रयोपपत्तिं विशदयितुं दृष्टान्तमाह—**यथेति** । भावनाया विधीयमानत्वे सतीति शेषः । प्रेरणाधर्मकः[1] शब्दव्यापारः स्वज्ञानकरणकः[2] स्तुत्यादिज्ञानेतिकर्तव्यताकः पुरुषप्रयत्नभाव्यनिष्ठः शब्दभावनोच्यते । स्वर्गी यागेन प्रयाजादिभिरुपकृत्य साधयेदिति पुरुषप्रवृत्तिरर्थभावनेति विभागः । दृष्टान्तस्थमर्थं दार्ष्टान्तिके योजयति—**तथेत्यादिना** । त्यागो निषिद्धकाम्यवर्जनम् । उपरमो नित्यनैमित्तिकत्यागः । तितिक्षादीत्यादिपदं समाधानादिसंग्रहार्थमित्यंशत्रयमिति संबन्धः । शास्त्रं शान्तो दान्त इत्यादि । उक्तप्रकारमंशत्रयमन्यदपि सुलभमिति वक्तुमादिपदम् ।

यथा च कृत्स्नस्य दर्शपूर्णमासादिप्रकरणस्य दर्शपूर्णमासादिविध्युद्देशत्वेनोपयोगः । एवमौपनिषदात्मोपासनप्रकरणस्याऽऽत्मोपासनाविध्युद्देशत्वेनोपयोगः । नेति नेत्यस्थूलमेकमेवाद्वितीयमशनायाद्यतीतं इत्येवमादिवाक्यानामुपास्यात्मस्वरूपविशेषसमर्पणेनोपयोगः । फलं च मोक्षोऽविद्यानिवृत्तिर्वा ।

विधियुक्तानां वेदान्तानां कार्यपरत्वेऽपि तद्धीनानां तेषां वस्तुपरतेत्याशङ्क्याऽऽह—**यथा चेति** । विध्युद्देशत्वेन तच्छेषत्वेनेति यावत् । अस्थूलादिवाक्यानामारोपितद्वैतनिषेधेनाद्वयं वस्तु समर्पयतां कथमुपास्तिविधिशेषत्वमित्याशङ्क्याऽऽह—**नेत्यादिना** । ' ब्रह्म वेद ब्रह्मैव भवति ' ' तरति शोकमात्मवित् ' इत्यादीनां फलार्थकत्वेनोपास्तिविध्युपयोगमभिप्रेत्याऽऽह—**फलं चेति** । मोक्षो ब्रह्मप्राप्तिः ।

अपरे वर्णयन्त्युपासनेनाऽऽत्मविषयं विशिष्टं विज्ञानान्तरं भावयेत्तेनाऽऽत्मा ज्ञायतेऽविद्यानिवर्तकं च तदेवं नाऽऽत्मविषयं वेदवाक्यजनितं विज्ञानमिति । एतस्मिन्नर्थे वचनान्यपि—" विज्ञाय प्रज्ञां कुर्वीत " " द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः " " सोऽन्वेष्टव्यः स विजिज्ञासितव्यः " इत्यादीनि ।

आत्मोपासनं विधेयमिति पक्षमुक्त्वा पक्षान्तरमाह—**अपर इति** । तस्यानुपयो-

---

१ ख. °क्तविधिरित्या° । २ क. ख. °मंकश° । ३ अ °कः शाब्द° । ४ घ. स्वलिङ्गाविज्ञा° । ५ क ख. ग. °नकार° । ६ घ ङ छ ज झ. ञ. °वमुप° । ७ ख. ङ. °तमित्ये° । ८ ख. घ. ण. °लार्थक° । ९ घ. ञ. °ह्मणः प्रा° । १० ङ. छ. झ. °व चाऽऽत्म° ।

मपाशङ्क्याऽऽह--तेनेति । शाब्दस्य ज्ञानस्यासंसृष्टापरोक्षात्मविषयत्वाभावमितिशब्देन हेतू करोति । ज्ञानान्तरं वेदान्तेषु विधेयमित्यत्र मानमाह-एतस्मिन्निति ।

न, अर्थान्तराभावात्। न च "आत्मेत्येवोपासीत" इत्यपूर्वविधिः । कस्मात् । आत्मस्वरूपकथनानात्मप्रतिषेधवाक्यजनितविज्ञानव्यतिरेकेणार्थान्तरस्य कर्तव्यस्य मानसस्य बाह्यस्य वाऽभावात् । तत्र हि विधेः साफल्यं यत्र विधिवाक्यश्रवणमात्रजनितविज्ञानव्यतिरेकेण पुरुषप्रवृत्तिर्गम्यते । यथा " दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत " इत्येवमादौ ।

पक्षद्वये प्राप्ते प्रथमपक्षं प्रत्याह-नार्थान्तराभावादिति । तत्र नन्वर्थमेव स्वयं व्याचष्टे-न चेति । शाब्दज्ञानवतो विषयाभावान्न विधिः संभवत्यविद्यातत्कार्यनिवृत्तौ स्वयं फलावस्थत्वाच्चेत्यर्थः । हेतुभागं प्रश्नपूर्वकं विवृणोति-कस्मादित्यादिना । आत्मोपदेशेनानात्मनिषेधद्वारा वाक्योत्थज्ञानातिरेकेणेति यावत् । कर्तव्यान्तराभावेऽपि वाक्यजन्यविज्ञानमेव विधेयं स्यादित्याशङ्क्याऽऽह-तत्र हीति ।

नहि दर्शपूर्णमासविधिवाक्यजनितविज्ञानमेव दर्शपूर्णमासानुष्ठानम्। तच्चाधिकाराद्यपेक्षानुभावि नत " नेति नेति " इत्याद्यात्मप्रतिपादकवाक्यजनितविज्ञानव्यतिरेकेण दर्शपूर्णमासादिवत्पुरुषव्यापारः संभवति । सर्वव्यापारोपशमहेतुत्वात्तद्वाक्यजनितविज्ञानस्य । न ह्युदासीनविज्ञानं प्रवृत्तिजनकमब्रह्मात्मविज्ञाननिवर्तकत्वाच्च " एकमेवाद्वितीयम् " " तत्त्वमसि " इत्येवमादिवाक्यानाम्। न च तन्निवृत्तौ प्रवृत्तिरुपपद्यते विरोधात् ।

दृष्टान्तेऽपि वाक्योत्थज्ञानातिरेकेण पुरुषप्रवृत्तिरसिद्धेत्याशङ्क्याऽऽह--न हीति । तर्ह्यनुष्ठानं तर्हि वाक्यार्थज्ञानाधीनमिति व्यर्थो विधिस्तत्राऽऽह-तच्चेति । अधिकारो विधिपुरुषसंबन्धस्तत्कृतज्ञानापेक्षमनुष्ठानमित्यर्थवान्विधिरित्यर्थः । तर्हि प्रकृतेऽपि वाक्योत्थज्ञानव्यतिरेकेण न पुरुषव्यापारसंभवाद्विधिसाफल्यमित्याशङ्क्याऽऽह-नत्विति । अथ विमतं प्रवर्तकं वैदिकज्ञानत्वाद्विधिवाक्योत्थज्ञानवदित्याशङ्क्य प्रवर्तकविषयत्वमुपाधिरित्याह-नहीति । मिथ्याज्ञानानिवर्तकत्वमुपाध्यन्तरमाह-अब्रह्मेति । वाक्योत्थज्ञानस्य तन्निवर्तकत्वेऽपि प्रवर्तकत्वं किं न स्यादित्याशङ्क्याऽऽह-न चेति ।

---

१ ग. घ. छ. झ. °स्य चाभा° । २ ग. ञ. ण. °अर्थं स्वयमेव व्या° । ३ क. ण. तत्तर्हि । ४ ञ. °र्तकं वैदिकज्ञानवु° ।

वाक्यजनितविज्ञानमात्रान्नाब्रह्मानात्मविज्ञाननिवृत्तिरिति चेन्न । " तत्त्वमसि " " नेति नेति " " आत्मैवेदम् " " एकमेवाद्वितीयम् " " ब्रह्मैवेदममृतम् " " नान्यदतोऽस्ति द्रष्टृ " " तदेव ब्रह्म त्वं विद्धि " इत्यादिवाक्यानां तद्वादित्वात् । द्रष्टव्यविधेर्विषयसमर्पकाण्येतानीति चेन्न । अर्थान्तराभावादित्युक्तोत्तरत्वात् । आत्मवस्तुस्वरूपसमर्पकैरेव वाक्यैस्तत्त्वमसीत्यादिभिः श्रवणकाल एव तद्दर्शनस्य कृतत्वाद्द्रष्टव्यविधेर्नानुष्ठानानन्तरं कर्तव्यमित्युक्तोत्तरमेतत् ।

द्वितीयोपाधेः साधनव्याप्तिं शङ्कते—वाक्येति । ब्रह्मात्मैक्यधीपरवाक्योत्थविज्ञानस्याज्ञानतत्कार्यध्वंसित्वधौव्यान्न साधनव्याप्तिरित्याह—नेत्यादिना । तदादित्वाद्वस्तुपरत्वादिति यावत् । उक्तानां वाक्यानां विध्यपेक्षितार्थसमर्पकत्वेन तच्छेषत्वं शङ्कितमनुभाषते—द्रष्टव्येति । सिद्धान्तोपक्रमेण समाहितमेतदित्याह—नेति । तदेव स्पष्टयति—आत्मेति ।

आत्मस्वरूपान्वाख्यानमात्रेणाऽऽत्मविज्ञाने विधिमन्तरेण न प्रवर्तत इति चेन्न । आत्मवादिवाक्यश्रवणेनाऽऽत्मविज्ञानस्य जनितत्वात्किं भोः कृतस्य करणम् । तच्छ्रवणेऽपि न प्रवर्तत इति चेन्न । अनवस्थाप्रसङ्गात् । यथाऽऽत्मवादिवाक्यार्थश्रवणे विधिमन्तरेण न प्रवर्तते तथा विधिवाक्यार्थश्रवणेऽपि विधिमन्तरेण न प्रवर्तिष्यत इति विध्यन्तरापेक्षा । तथा तदर्थश्रवणेऽपीत्यनवस्था प्रसज्येत ।

परोक्तमुद्भावयति—आत्मस्वरूपेति । कुत्र तर्हि विधिरात्मज्ञाने वा वाक्यश्रवणे वा तदर्थज्ञानस्मृतिसंताने वा चित्तवृत्तिनिरोधे वा नाऽऽद्य इत्याह—नाऽऽत्मवादीति । द्वितीयं शङ्कते—तच्छ्रवणेऽपीति । अनिष्टार्थवादिवाक्यस्यासत्यादिलक्षणस्य विधिं विना श्रवणात्तत्त्वमादेरपि तस्मादृते श्रवणमविरुद्धमित्यभिसंधाय दोषान्तरमाह—नेत्यादिना । तत्त्वमादिश्रवणप्रयोजको विधिरात्मनोऽपि प्रयुङ्क्ते श्रवणमिति चेन्नैवं स खल्वध्ययनविधिरन्यो वाऽऽद्ये तदपेक्षया श्रुतस्य तत्त्वमस्यादेः स्वार्थबोधित्वं कर्मवाक्यवदिति स्वार्थनिष्ठत्वाविशेषो द्वितीये तस्याप्रमाणत्वात्तदीयस्वपरनिर्वाहकत्वं दूरोत्सारितमित्यभिप्रेत्यानवस्थां विवृणोति—यथेत्यादिना ।

---

१ ख. घ. °वेद सर्वमिदं°। २ ख. च. °विद्धि नेदं यदिदमुपासत इत्या°। ३ घ. ज. °रमेतत्। ४ ञ. ण. °मे स°। ५ ख. °वाक्यश्र°। ६ ख. ग. घ. ङ. च ज. झ. °णेऽपि °। ७ घ. °त्त्वमस्यादे°। ८ घ. °त्त्वमस्या°। ९ ण. °त्त्वमादेः।

वाक्यजनितात्मज्ञानस्मृतिसंततेः श्रवणविज्ञानमात्रादर्थान्तरत्वमिति चेन्नार्थप्राप्तत्वात्। यदैवाऽऽत्मप्रतिपादकवाक्यश्रवणादात्मविषयं विज्ञानमुत्पद्यते तदैव तदुत्पद्यमानं तद्विषयं मिथ्याज्ञानं निवर्तयदेवोत्पद्यते। आत्मविषयमिथ्याज्ञाननिवृत्तौ च तत्प्रभवाः स्मृतयो न भवन्ति स्वाभाविक्योऽनात्मवस्तुभेदविषयाः। अनर्थत्वावगतेश्च। आत्मावगतौ हि सत्यामन्यद्वस्त्वनर्थत्वेनावगम्यते। अनित्यदुःखाशुद्ध्यादिबहुदोषवत्त्वादात्मवस्तुनश्च तद्विलक्षणत्वात्।

तृतीयमाशङ्कते—वाक्यजनितेति। ततः सा विधेयेति शेषः। तस्या विधेयत्वं दूषयति—नेति। अर्थप्राप्तिं विवृणोति—यदैवेति। अनात्मस्मृतिहेतुवज्ञाननिवृत्तौ तत्कार्यस्मृत्यनुपपत्तेः स्वभावबलादेवाऽऽत्मस्मृतिरित्युक्तमिदानीमनात्मस्मृतेरनर्थत्वस्यान्वयव्यतिरेकसिद्धत्वाच्चाऽऽत्मस्मृतिः स्वभावप्राप्तेत्याह-अनर्थत्वेति। अनात्मनोऽनर्थत्वनिश्चयाच्च तदीयस्मृत्यनुपपत्तावितरस्मृतिरर्थप्राप्तेत्याह—आत्मावगताविति। आत्मनश्च परमेष्टत्वावगमादर्थप्राप्ता तदीयस्मृतिरित्याह—आत्मवस्तुनश्चेति।

तस्मादनात्मविज्ञानस्मृतीनामात्मावगतेरभावप्राप्तिः। पारिशेष्यादात्मैकत्वविज्ञानस्मृतिसंततेरर्थत एव भावान्न विधेयत्वम्। शोकमोहभयायासादिदुःखदोषनिवर्तकत्वाच्च तत्स्मृतेः। विपरीतज्ञानप्रभवो हि शोकमोहादिदोषः। तथा च "तत्र को मोहः" "विद्वान्न बिभेति कुतश्चन" "अभयं वै जनक प्राप्तोऽसि" "भिद्यते हृदयग्रन्थिः" इत्यादिश्रुतयः।

अर्थप्राप्त्या विधेयत्वाभावमुपसंहरति—तस्मादिति। अनात्मस्मृतिहेतुवज्ञानाभावादित्तच्छब्दार्थः। अर्थतश्चैकरसात्मस्वभावबलादिति यावत्। दृष्टफलत्वाच्चाऽऽत्मस्मृतिर्न विधेयेत्याह—शोकेति। मिथ्याज्ञानमेव सा निवर्तयति न शोकादीत्य शङ्क्याऽऽह—विपरीतेति। आत्मस्मृतेः शोकादिनिवर्तकत्वे मानमाह—तथा चेति।

निरोधस्तर्ह्यर्थान्तरमिति चेत्। अथापि स्याच्चित्तवृत्तिनिरोधस्य वेदवाक्यजनितात्मविज्ञानादर्थान्तरत्वात्। तन्त्रान्तरेषु च कर्तव्यतयाऽवगतत्वाद्विधेयत्वमिति चेन्न। मोक्षसाधनत्वेनानवगमात्। नहि वेदान्तेषु ब्रह्मात्मविज्ञानादन्यत्परमपुरुषार्थसाधनत्वेनावगम्यते। "आत्मानमे-

१ ग. °नस्ताद्वि°। घ. ज. °नस्तु त°। २ क. ग. छ. झ. °कवि°। ३ ग. °याशनायापिपासा°। ४ ख. ग. च. मोहः कः शोको वि°। ५ ख. °दिति तच्छ°।

वावेत्तस्मात्सर्वमभवत् " " ब्रह्मविदाप्नोति परम् " " स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति " आचार्यवान्पुरुषो वेद " " तस्य तावदेव चिरम् " " अभयं हि वै ब्रह्म भवति । य एवं वेद " इत्येवमादिश्रुतिशतेभ्यः ।

चतुर्थमुत्थापयति—निरोधस्तर्हीति । यदि वाक्योत्थज्ञानादेरविधेयत्वं तर्हि चित्तवृत्तिनिरोधो मुक्तिसाधनत्वेन विधीयतां तस्योक्तज्ञानादेरर्थान्तरत्वादित्यर्थः । चोद्यमेव विवृणोति—अथापीति । अर्थान्तरत्वात्तस्य विधेयतेति शेषः । तस्य मुक्तिहेतुत्वेन विधेयत्वे योगशास्त्रं संवादयति—तन्त्रान्तरेष्विति । अथ योगानुशासनमिति निःश्रेयसहेतुः समाधिः सूचितस्तस्य च लक्षणमुक्तं योगश्चित्तवृत्तिनिरोध इति । तन्निरोधावस्थायां चाऽऽत्मनः स्वरूपप्रतिष्ठत्वं कैवल्यमाख्यातं तदा द्रष्टुः स्वरूपेऽवस्थानमित्येवं योगशास्त्रे मुक्तिहेतुत्वेनेष्टो निरोधो विधिरित्यर्थः । योगशास्त्रादपि बलवतीं श्रुतिमाश्रित्योत्तरमाह—नेत्यादिना ।

अनन्यसाधनत्वाच्च निरोधस्य न ह्यात्मविज्ञानैतत्स्मृतिसंतानव्यतिरेकेण चित्तवृत्तिनिरोधस्य साधनमस्ति । अभ्युपगम्येदमुक्तं न तु ब्रह्मविज्ञानव्यतिरेकेणान्यन्मोक्षसाधनमवगम्यते ।

चित्तवृत्तिनिरोधस्य मुक्तिहेतुत्वेऽपि न विधेयत्वं विधिं विना तत्सिद्धेरित्याह—अनन्येति । न तावद्यथाकथंचिन्निरोधो विधेयः सर्वस्यापि तत्संभवाद्विधिवैयर्थ्यान्नापि सर्वात्मना तन्निरोधो विधेयो ज्ञानादेव तत्सिद्धेर्निध्यानर्थक्यादित्यर्थः । नान्यः पन्था विद्यते ज्ञानादेव तु कैवल्यमित्यादिशास्त्रमनुसरन्नेत्यवादं त्यजति—अभ्युपगम्येति । निरोधस्य मुक्तिहेतुत्वमिदमा पराभृष्टम् । योगशास्त्रमपि श्रुतिस्मृतिविरोधे न प्रमाणम् । एतेन योगः प्रत्युक्त इति न्यायादिति भावः ।

आकाङ्क्षाभावाच्च भावनाभावः । यदुक्तं यजेतेत्यादौ किं केन कथमिति भावनाकाङ्क्षायां फलसाधनेतिकर्तव्यताभिराकाङ्क्षापनयनं यथा तद्वदिहाप्यात्मविज्ञानविधावप्युपपद्यत इति । तदसत् एकमेवाद्वितीयं तत्त्वमसि नेति नेत्यनन्तरमबाह्यमयमात्मा ब्रह्मेत्यादिवाक्यार्थविज्ञानसमकालमेव सर्वाकाङ्क्षाविनिवृत्तेः । न च वाक्यार्थविज्ञाने विधिप्रयुक्तः प्रवर्तते । विध्यन्तरप्रयुक्तौ चानवस्थादोषप-

१ ख. च. °चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये । अ° । २ क. ख. ण. त्ततद्वृत्ति° । ३ च. °ज्ञानानुस्मृति° । ४ घ ज. °नवतः स्मृति° । ङ. नस्मृति° । ५ ग. °संततिख्य° । ६ क. ख. ण. °ततद्वृत्ति° । ७ क. ग. घ. छ. झ. ञ. °तेत्येवमादौ । ८ ख. ग. ङ. झ. °वाप्नुप° । ९ क. °मुक्तिः प्र° । १० ग. °प्रवृत्तौ चा° ।

वोचाम । न चैकमेवाद्वितीयं ब्रह्मेत्यादिवाक्येषु विधिरवगम्यते । आत्मस्वरूपान्वाख्यानेनैवावसितत्वात् ।

वेदान्तेषु विधेयाभावोक्त्या विधिर्निरस्तः संप्रत्यंशत्रयवती भावना तेष्वस्तीत्युक्तं दूषयति—आकाङ्क्षेति । तदेव स्फुटयितुमुक्तमनुवदति—यदुक्तमिति । आगमावष्टम्भेन निराचष्टे—तदसादिति । विधिमन्तरेण वाक्यार्थज्ञाने प्रवृत्त्ययोगाद्विधेयमेव ज्ञानं सर्वाकाङ्क्षानिवर्तकमित्याशङ्क्य चाऽऽह—न चेति । यथा कर्मकाण्डे स्वाध्यायविधेरर्थावबोधपर्यन्तत्वेन ज्योतिष्टोमादिविध्यर्थज्ञाने विध्यन्तरं नापेक्षेत तथा ज्ञानकाण्डेऽपि स्यादित्यर्थः । तत्रापि वेदः कृत्स्नोऽधिगन्तव्य इति विध्यन्तरप्रयुक्तमेव वाक्यार्थज्ञानमित्याशङ्क्य चाऽऽह—विध्यन्तरेति । श्रुतहान्यश्रुतकल्पनाप्रसङ्गाच्च न विधिशेषत्वं वेदान्तानामित्याह—न चेति ।

वस्तुस्वरूपान्वाख्यानमात्रत्वादप्रामाण्यमिति चेत् । अथापि स्याद्यथा सोऽरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वमित्येवमादौ वस्तुस्वरूपान्वाख्यानमात्रत्वादप्रामाण्यमेवमात्मार्थवाक्यानामपीति चेन्न । विशेषात् । न वाक्यस्य वस्त्वन्वाख्यानं क्रियान्वाख्यानं वा प्रामाण्याप्रामाण्यकारणं किं तर्हि निश्चितफलवद्विज्ञानोत्पादकत्वम् । तद्यत्रास्ति तत्प्रमाणं वाक्यं यत्र नास्ति तदप्रमाणम् ।

वेदान्ताः स्वार्थे न मानं सिद्धार्थवाक्यत्वात्सोऽरोदीदित्यादिवदित्यनुमानात्तेषां विधिशेषत्वं प्रामाण्यार्थमेष्टव्यमिति शङ्कते—वस्तुस्वरूपेति तदेवानुमानं प्रपञ्चयति—अथापीति । विधेरश्रुतत्वेऽपीति यावत् । फलवन्निश्चितज्ञानाजनकत्वमुपाधिरिति मन्वानः समाधत्ते—न । विशेषादिति । तत्रार्थं स्पष्टयति—न वाक्यस्येति । विशेषं व्याचष्टे—किं तर्हीति । तस्य प्रामाण्यप्रयोजकत्वमन्वयव्यतिरेकाभ्यां दर्शयति—तद्यत्रेति ।

किंच भोः पृच्छामस्त्वात्मात्मस्वरूपान्वाख्यानपरेषु वाक्येषु फलवन्निश्चितं च विज्ञानमुत्पद्यते न वा । उत्पद्यते चेत्कथमप्रामाण्यमिति किंवा न पश्यस्यविद्याशोकमोहभयादिसंसारबीजदोषनिवृत्तिं विज्ञानफलम । न शृणोषि वा किं " तत्र को मोहः कः शोक एकत्वमनुपश्यतः " " मन्त्रविदेवास्मि नाऽऽत्मवित्सोऽहं भगवः शोचामि

१ च. झ. वाऽप्रामाण्यक° । ढ वाऽप्रामाण्ये का° । २ क. ख. ग. ङ. °माण्ये का° । ३ ख. ढ. किंच ।

तं मा भगवाञ्छोकस्य पारं तारयतु " इत्येवमाद्युपनिषद्वाक्यशतानि । एवं विद्यते किं साऽरादीदित्यादिषु निश्चितं फलवच्च विज्ञानम् । न चेद्विद्यतेऽस्त्वप्रामाण्यम् । तदप्रामाण्ये फलवान्निश्चितविज्ञानोत्पादकस्य किमित्यप्रामाण्यं स्यात् । तदप्रामाण्ये च दर्शपूर्णमासादिवाक्येषु को विश्रम्भः ।

सामान्यन्यायं प्रकृते योजयन्पृच्छति—किंचेति । किं तेषु तादृग्ज्ञानमुत्पद्यते न वेति प्रश्नार्थः । द्वितीयेऽनुभवविरोधः स्यादिति मत्वा पक्षान्तरमनूद्य प्रत्याह—उत्पद्यत इति । प्रामाण्ये हेतुसद्भावान्नाप्रामाण्यमित्यर्थः । निश्चितज्ञानजनकत्वेऽपि फलवत्त्वविशेषणमसिद्धमित्याशङ्क्याऽऽह—किंवेति । विद्वदनुभवफलश्रुतिसिद्धं विशेषणमिति भावः । दृष्टान्ते विघटायितुं प्रश्नान्तर प्रस्तौति—एवमिति । वेदान्तेष्वेवेति यावत् । किंवा नेति शेषः । आद्ये साध्यवैकल्यं मत्वा द्वितीयं दूषयति—न चेदिति । तर्हि तदृष्टान्तेन तत्त्वमस्यादेरपि स्यादप्रामाण्यमित्याशङ्क्याऽऽह—तदप्रामाण्य इति । विमत स्वार्थे मान यथोक्तज्ञानजनकत्वादृशादिवाक्यवादिति भावः । विपक्षे दोषमाह—तदप्रामाण्ये चेति ।

ननु दर्शपूर्णमासादिवाक्यानां पुरुषप्रवृत्तिविज्ञानोत्पादकत्वात्प्रामाण्यम् । आत्मविज्ञानवाक्येषु तन्नास्तीति । सत्यमेवम् । नैष दोषः । प्रामाण्यकारणोपपत्तेः । प्रामाण्यकारणं च यथोक्तमेव नान्यत् । अलंकारश्चायं यत्सर्वप्रवृत्तिबीजनिराधफळवद्विज्ञानोत्पादकत्वमात्मप्रतिपादकवाक्यानां नाप्रामाण्यकारणम् ।

प्रवर्तकज्ञानजनकत्वमुपाधिरिति शङ्कते—नन्विति । साधनव्यापिं धुनीते—आत्मेति । प्रवर्तकधीजनकत्वं धर्मिणि नास्तीत्यङ्गी करोति—सत्यमिति । तर्हि यथोक्तोपाधिसद्भावादनुमानानुत्थानमित्याशङ्क्याऽऽह—नैष दोष इति । न हि प्रवर्तकधीजनकत्वं प्रामाण्ये कारणं निषेधवाक्येष्वप्रामाण्यप्रसङ्गात् । न च निवर्तकधीजनकत्वमपि तथा विधावप्रामाण्यप्रसङ्गात् । नोभयं प्रत्येकमुभयकारणत्वाभावेनाप्रामाण्यादिति भावः । वेदान्तेषु प्रवर्तकधीजनकत्वाभावो न केवलमदोषः किंतु गुण इत्याह—अलंकारश्चेति । आत्मानं चेदित्यादिश्रुतेरेतद्बुद्ध्वेत्यादिस्मृतेश्चाऽऽत्मज्ञानं कृतकृत्यतानिदानम् । न च ज्ञानस्य प्रवर्तकत्वे तद्युक्तं

---

१ क. घ. ङ. झ. विद्यन्ते । २ छ. °वत्त्वाद्वि° । ३ च. °ण्ये सत्यपि फ° । ४ क. घ. ज. वा । ५ ख. विस्रम्भः । ६ क. ख. ण. किंचति । ७ क. घ. वेति । ८ च. ढ. सत्यम् । ९ ढ. °नां प्रा° । १० ख. ग. ङ. च. ढ. °माण्ये का° । ११ क. °नचोभयं ।

प्रवृत्तीनां क्लेशाक्षेपकत्वादतो यथोक्तज्ञानजनकत्वं वाक्यानां भूषणमेवेत्यर्थः ।

यत्तूक्तं विज्ञाय प्रज्ञां कुर्वीतेत्यादिवचनानां वाक्यार्थविज्ञानव्यतिरेकेणोपासनार्थत्वमिति । सत्यमेतत् । किंतु नापूर्वविध्यर्थता पक्षे प्राप्तस्य नियमार्थतैव ।

शब्दोत्थं ज्ञानं विधेयमिति प्रतिक्षिप्य पूर्वोक्तपक्षान्तरमनुवदति—**यत्तूक्तमिति** । उपासनार्थत्वमित्यात्मोपासनेन तत्साक्षात्कारं भावयेदित्येवमर्थत्वमित्यर्थः ॥ अभ्युपगमवादेन परिहरति—**सत्यमिति** । यथोक्तेषु वाक्येष्वात्मोपासनं तत्साक्षात्कारमुद्दिश्य विधीयते चेत्यकृतेऽपि वाक्ये तत्संभवान्नापूर्वविधिरिति प्रक्रमो भज्येतेत्याशङ्क्याऽऽह—**किंत्विति** । कथं तर्हि विध्यङ्गीकारवाचोयुक्तिरित्याशङ्क्याऽऽह—**पक्ष इति** । यथा पक्षे प्राप्तस्यावघातस्य व्रीहीनवहन्तीति नियमरूपो विधिरङ्गीकृतस्तथाऽऽत्मोपासनस्यापि पक्षे प्राप्तस्य तदेव कर्तव्यं नानात्मोपासनमिति यो नियमस्तदर्थता प्रकृतवाक्यस्येति न प्रक्रमविरोधोऽस्तीत्यर्थः ।

कथं पुनरुपासनस्य पक्षप्राप्तियावता पारिशेष्यादात्मविज्ञानस्मृतिसंततिर्नित्यैवेत्यभिहितम् । बाढम् । यद्यप्येवं शरीरारम्भकस्य कर्मणो नियतफलत्वात्सम्यग्ज्ञानप्राप्तावप्यवश्यंभाविनी प्रवृत्तिर्वाङ्मनःकायानाम् । लब्धवृत्तेः कर्मणो बलीयस्त्वान्मुक्तेष्वादिप्रवृत्तिवत् । तेन पक्षे प्राप्तं ज्ञानप्रवृत्तिदौर्बल्यम् ।

पाक्षिकीं प्राप्तिमुक्त्वाप्राप्तिमाक्षिपति—**कथमिति** । का पुनरत्रानुपपत्तिरित्याशङ्क्याऽऽह—**यावतेति** । आत्मनि वाक्योत्थे विज्ञाने सत्यनात्मस्मृतिहेतूनां मिथ्याज्ञानादीनामपनीतत्वाद्धेत्वभावे फलाभाव इति न्यायेन तावतामसंभवादात्मस्मृतिसंततिरेव पुनः सदा स्यात्प्रकारान्तरायोगादिति सिद्धान्तिनोक्तत्वान्नाऽऽत्मोपासनस्य पक्षे प्राप्तिरित्यर्थः । तस्य नित्यप्राप्तिमुक्त्वाप्राप्तिमङ्गीकरोति—**बाढमिति** । तर्हि नियमविधिवाचोयुक्तिरयुक्तेत्याशङ्क्याऽऽह—**यद्यपीति** । आत्मनि नित्यापरोक्षसंविदेकताने स्मरणं विस्मरणं वा यद्यपि नोपपद्यते तथाऽपि तयोस्तस्मिन्ननुभवसिद्धत्वान्नियमविधेः सावकाशत्वमित्याशयेनाऽऽह—**शरीरेति** । अथाऽऽरब्धफलस्यापि कर्मणः सम्यग्ज्ञानान्निवृत्तेर्न विदुषो रागादीनां प्रवृत्तिरत आह—**लब्धेति** । यथा मुक्तस्येषुपाषाणादेरप्रतिबन्धाद्यावद्वेगं

---

१ स. ग. च. ढ. वाक्योत्थवि° । २ क. °यतार्थ° । ३ स. च. ढ. °तैवेति । ४ ग. घ. ज. पक्षे प्रा° । ५ स. °ष्यात्किमात्म° । ६ घ. च. ङ. प्राप्तज्ञा° । ७ स. ग. घ. ङ. च. ज. ढ °वृत्तेर्दौर्बं° । ८ घ. वाक्यार्थवि° । ९ ञ. ण. °क्योत्थवि° । १० क. ख. घ. ञ. °भावं न्या° । ११ ण. च । १२ घ. ञ. ण. बन्धे याव° ।

प्रवृत्तिरवश्यंभाविनी तथा प्रवृत्तफलस्य कर्मणो ज्ञानेनोपजीव्यतया ततो बलवत्त्वात्तद्दशादिदुष्टोऽपि यावद्भोगं रागादिप्रवृत्तिप्रौढ्यमित्यर्थः । आरब्धकर्मणाबल्ये फलितमाह—तेनेति । आरब्धस्य कर्मणो यथोक्तेन न्यायेन प्राबल्ये तद्वशात्क्षुधादिदोषो यदोद्भवति तदाऽऽत्मनि विस्मरणादिसंभवात्तज्ज्ञानप्राप्तेः पाक्षिकत्वाद्वश्यंभाविकर्मापेक्षया तद्दार्बल्यं स्यादित्यर्थः ।

तस्माच्छमदमवैराग्यादिसाधनबलावलम्बेनाऽऽत्मविज्ञानस्मृतिसंततिर्निर्यन्तव्या भवति न त्वपूर्वा कर्तव्या प्राप्तत्वादित्यवोचाम । तस्मात्प्राप्तविज्ञानस्मृतिसंताननियमविध्यर्थानि विज्ञाय प्रज्ञां कुर्वीतेत्यादिवाक्यान्यन्यार्थासंभवात् ।

तथाऽपि नियमविध्यङ्गीकारस्य किमायातं तदाह—तस्मादिति । ज्ञानस्य पक्षे प्राप्तत्वं तच्छब्दार्थः । आदिपदं ब्रह्मचर्यशमदमादिसंग्रहार्थम् । विज्ञायेत्यादिवाक्यानां नियमविध्यर्थत्वमुपसंहरति—तस्मादिति । आदिपदेन प्रकृतमपि वाक्यं संगृह्णते । तच्छब्दार्थमेव स्पष्टयति—अन्यार्थेति ।

अनात्मोपासनमिदमितिशब्दप्रयोगात् । यथा प्रियमित्येतदुपासीतेत्यादौ न प्रियादिगुण एवोपास्यः किं तर्हि प्रियादिगुणवत्प्राणाद्येवोपास्यम् । तथेहापीतिपरात्मशब्दप्रयोगादात्मगुणवदनात्मवस्तूपास्यमिति गम्यते । आत्मोपास्यत्ववाक्यवैलक्षण्याच्च । परेण च वक्ष्यत्यात्मानमेव लोकमुपासीतेति । तत्र च वाक्य आत्मैवोपास्यत्वेनाभिप्रेतो द्वितीयाश्रवणादात्मानमेवेति । इह तु न द्वितीया श्रूयत इति. परश्चाऽऽत्मशब्द आत्मेत्येवोपासीतेति । अतो नाऽऽत्मोपास्य आत्मगुणश्चान्य इति त्ववगम्यते । न । वाक्यशेष आत्मनं उपास्यत्वेनावगमात् । अस्यैव वाक्यस्य शेष आत्मैवोपास्यत्वेनावगम्यते । तदेतत्पदनीयमस्य सर्वस्य यदयमात्माऽनन्तरतरं यदयमात्माऽऽत्मानमेवावेदिति ।

शाब्दज्ञानादेव पुरुषसिद्धेस्तस्य तदावृत्तेस्तृतीयज्ञानस्य वा विधेयत्वाभावाद्देदान्ताः शुद्धे सिद्धेऽर्थे मानमित्युक्तमिदानीमितिशब्दप्रयुक्तं चोद्यमुत्थापयति—अनात्मेति । आत्मशब्दादूर्ध्वमितिशब्दप्रयोगादात्मशब्दार्थस्योपास्यत्वेनाविवक्षितत्वादात्मगुणकस्यानात्मनोऽभ्याकृतशब्दितस्य प्रधानस्योपासनमस्मिन्वाक्ये विव-

---

१ स. ङ. च. छ. झ. °लम्बनेना° । २ क. स्फोरयति । ३ घ. ङ. छ. ज. झ. °पास्य आत्मा किं । ४ स. ग. घ. ङ. च. ज. ढ. °णाद्युपा° । ५ ग. °न एवोपा° । ६ स. घ. स्यानेकस्याना° ।

क्षितामित्यर्थः । उक्तमेवार्थं दृष्टान्तेन स्पष्टयति—यथेत्यादिना । अनात्मोपासनमेवात्र विधित्सितमित्यत्र हेत्वन्तरमाह—आत्मेति । तदेव प्रश्नयति—परेणेति । ततो वैलक्षण्यं दर्शयति—इह त्विति । वैलक्षण्यान्तरमाह—इतिपरश्वेति । वैलक्षण्यमाह—अत इति । नात्रानात्मोपासनं विवक्षितमिति परिहरति—नेत्यादिना । हेत्वर्थं स्फुटयति—अस्येवेति ।

प्राविष्टस्य दर्शनप्रतिषेधानुपास्यत्वमिति चेत् । यस्याऽऽत्मनः प्रवेश उक्तस्तस्यैव दर्शनं वार्यते तं न पश्यन्तीति । प्रकृतोपादानात् । तस्मादात्मनोऽनुपास्यत्वमेवेति चेन्न । अकृत्स्नत्वदोषात् । दर्शनप्रतिषेधोऽकृत्स्नत्वदोषाभिप्रायेण नाऽऽत्मोपास्यत्वप्रतिषेधाय । प्राणनादिक्रियाविशिष्टत्वेन विशेषणात् । आत्मनश्चदुपास्यत्वमनभिप्रेतं प्राणनाद्येकैकक्रियाविशिष्टस्याऽऽत्मनोऽकृत्स्नत्ववचनमनर्थकं स्यादकृत्स्नो ह्येषोऽत एकैकेन भवतीति । अतोऽनेकैकविशिष्टस्त्वात्मा कृत्स्नत्वादुपास्य एवेति सिद्धम् ।

आत्मनश्चेदुपास्यत्वं तदा प्रकृतविरोधः स्यादिति शङ्कते—प्राविष्टस्येति । आत्मनो दर्शनप्रतिषेधं प्रकटयति—यस्येति । तस्यैवेति नियमे हेतुमाह—प्रकृतेति । तच्छब्दस्य प्रकृतपरामर्शित्वात्प्राविष्टस्य च प्रकृतत्वात्तस्य तेनोपादानादिति हेत्वर्थः । पूर्वपक्षं निगमयति—तस्मादिति । प्राणनादिविशिष्टस्य परिच्छिन्नत्वात्तस्य दृष्टत्वेऽपि पूर्णस्य न दृष्टेति निषेधश्रुतिपर्यवसानान्नोपक्रमविरोधाऽस्तीति परिहरति—नेत्यादिना । तदेव विशदयति—दर्शनेति । कथमयमभिप्रायः श्रुतेरवगम्यते तत्राऽऽह—प्राणनादीति । प्राणन्नेवेत्यादिना क्रियाविशेषविशिष्टत्वेनाऽऽत्मनो विशेषणात्तस्य दृष्टत्वेऽपि नासौ परिपूर्णो दृष्टः स्यादिति श्रुतेराशयो लक्ष्यते केवलस्य तु तस्योपास्यत्वमभिसंहितमकृत्स्नत्वदोषाभावादित्यर्थः । उक्तमर्थं व्यतिरेकमुखेन साधयति—आत्मनश्चेदिति । तस्यानुपास्यत्वार्थं तद्वचनमर्थवदित्याशङ्क्य तदुपास्यत्वनिषेधस्याऽऽत्मोपास्यत्वे पर्यवसानमभिप्रेत्याऽऽह—अतोऽनेकैकेति ।

यस्त्वात्मशब्दस्येतिपरः प्रयोग आत्मशब्दप्रत्यययोरात्मतत्त्वस्य परमार्थतोऽविषयत्वज्ञापनार्थम् । अन्यथाऽऽत्मानमुपासीतेत्येवमवक्ष्यत् ।

---

१ क. ग. छ. ज. झ. यस्येवाऽऽत्म° । २ क. घ. छ ज. झ. °त्वमिति । ३ क. °स्यपरत्व° । ४ ख. घ. झ. ढ. °धाभिप्रायेण । ५ च. °त्स्नव° । ६ क. छ झ. °तीत्यने° । ७ ख. °तो नैके° । ८ ख. °त्माऽकृ° । ९ क. ख. ञ. °ह । नैके° । १० ग. ङ. छ. झ. °योगः स आ° ।

तथा चार्थादात्मनि शब्दप्रत्ययावनुज्ञातौ स्याताम् । तच्चानिष्टम् । "नेति नेति" "विज्ञातारमरे केन विजानीयात्" "अविज्ञातं विज्ञातृ" "यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह" इत्यादिश्रुतिभ्यः । यत्त्वात्मानमेव लोकमुपासीतेति तदनात्मोपासनप्रसङ्गनिवृत्तिपरत्वान्न वाक्यान्तरम् ।

उपक्रमोपसंहाराभ्यामुपास्यत्वमात्मनो दर्शितमिदानीमितिशब्दप्रयोगादनात्मोपासनमिदमित्युक्तं प्रत्याह—यस्त्विति । प्रयोगशब्दादुपरिष्टात्सशब्दो द्रष्टव्यः । इतिशब्दस्य यथोक्तार्थत्वाभावे दोषमाह—अन्यथेति । न चाऽऽत्मनः स्वातन्त्र्येणानुपास्यत्वार्थमितिशब्दोऽर्थवान्पूर्वापरवाक्याविरोधादिति द्रष्टव्यम् । इतिशब्दमन्तरेण वाक्यप्रयोगे दोषमाह—तथेति । तस्य शब्दप्रत्ययविषयत्वमिष्टमेवेति चेत्तत्राऽऽह—तच्चेति । आत्मोपास्यत्ववाक्यवैलक्षण्यादनात्मोपासनमेतदित्युक्तं तद्दूषयति—यत्त्विति ।

अनिर्ज्ञातत्वसामान्यादात्मा ज्ञातव्योऽनात्मा च । तत्र कस्मादात्मोपासन एव यत्न आस्थीयत आत्मेत्येवोपासीतेति नेतरविज्ञान इति । अत्रोच्यते—तदेतदेव प्रकृतं पदनीयं गमनीयं नान्यदस्य सर्वस्येति निर्धारणार्था षष्ठी । अस्मिन्सर्वस्मिन्नित्यर्थः । यदयमात्मा यदेतदात्मतत्त्वं किं न विज्ञातव्यमेवान्यन्न किं तर्हि ज्ञातव्यत्वेऽपि न पृथग्ज्ञानान्तरमपेक्षत आत्मज्ञानात् । कस्मात् । अनेनाऽऽत्मनाज्ञातेन हि यस्मादेतत्सर्वमनात्मजातमन्यद्यत्तत्सर्वं समस्तं वेद जानाति नन्वन्यज्ञानेनान्यन्न ज्ञायत इति । अस्य परिहारं दुंदुभ्यादिग्रन्थेन वक्ष्यामः ।

आत्मैव ज्ञातव्यो नानात्मेति प्रतिज्ञायामत्र हीत्यादिनो हेतुरुक्तः संप्रति तदेतत्पदनीयमित्यादिवाक्यमोपोह्यं चोद्यमुत्थापयति—अनिर्ज्ञातव्येति । उत्तरमाह—अत्रेति । निर्धारणमेव स्फोरयति—अस्मिन्निति । नान्यदित्युक्त्वादनात्मनो विज्ञातव्यत्वाभावश्चेदनेन हीत्यादिशेषविरोधः स्यादिति शङ्कते—किं नेति । तस्याज्ञेयत्वं निषेधति—नेति । तस्यापि ज्ञातव्यत्वे नान्यदिति वचनमनवकाशमित्याशङ्क्याऽऽह—किं तर्हीति । तस्य सावकाशत्वं दर्शयति—ज्ञातव्यत्वेऽपीति । आत्मनः सकाशादनात्मनोऽर्थान्तरत्वात्तस्याऽऽत्मज्ञानाज्ज्ञातव्यत्वायोगाज्ज्ञातव्यत्वे

---

१ ख. त्मन्यात्मश° । छ. ज. झ. °त्मश° । २ क. ख. ञ्च ण.. °क्तं दूष° । ३ छ. ज. झ. °स्थीयेताऽऽत्मे । ४ क. ख. ज. °त्मज्ञानेन । ५ ख. च. ढ. °न्यत्स° । ङ. °न्यत्सम° । ६ ग. °त्तत्सम° । ७ च. ढ. °दिशब्देन । ८ क. ख. °यात्र । ९ क. ख. °दिहे° । १० क. ख. घ. ञ. ण. °पोद्यं चो° । ११ घ. ण. °दिविशे° ।

ज्ञानान्तरमपेक्षितव्यमेवेति शङ्कते—कस्मादिति । उत्तरवाक्येनोत्तरमाह—अनेनेति । आत्मन्यनात्मजातस्य कल्पितत्वात्तस्य तदतिरिक्तस्वरूपाभावात्तज्ज्ञानेनैव ज्ञातत्वसिद्धेर्नास्ति ज्ञानान्तरापेक्षेत्यर्थः । लोकदृष्टिमाश्रित्यानेनेत्यादिक्यार्थमाक्षिपति—नन्विति । आत्मकार्यत्वादनात्मनस्तस्मिन्नन्तर्भावात्तज्ज्ञानेन ज्ञानमुचितमिति परिहरति—अस्येति ।

कथं पुनरेतत्पदनीयामिति । उच्यते—यथा ह वै लोके पदेन गवादिखुराङ्कितो देशः पदमित्युच्यते तेन पदेन नष्टं विविक्षितं[1] पशुं पदेनान्वेषमाणोऽनुविन्देल्लभेत । एवमात्मनि लब्धे सर्वमनुलभत इत्यर्थः । नन्वात्मनि ज्ञाते सर्वमन्यज्ज्ञायत इति ज्ञाने प्रकृते कथं लाभोऽप्रकृत उच्यत इति । न । ज्ञानलाभयोरेकार्थत्वस्य विवक्षितत्वात् । आत्मनो ह्यलाभोऽज्ञानमेव । तस्माज्ज्ञानमेवाऽऽत्मनो लाभो नानात्मलाभवदप्राप्तप्राप्तिलक्षण आत्मलाभो लब्धृलब्धव्ययोर्भेदाभावात् ।

सत्योपायाभावादात्मतत्त्वस्य पदनीयत्वासिद्धिरिति शङ्कते—कथमिति । असत्यस्यापि श्रुत्याचार्यादेरर्थक्रियाकारित्वसंभवादात्मतत्त्वस्य पदनीयत्वोपपत्तिरित्याह—उच्यत इति । विविक्षितं लब्धुमिष्टम् । अन्वेषणोपायत्वं दर्शयितुं पदेनेति पुनरुक्तिः । अनेनेत्यत्र वेदेति ज्ञानेनोपक्रम्यानुविन्देदिति लाभमुक्त्वा कीर्तिमित्यादिश्रुतौ पुनर्ज्ञानार्थेन विदिनोपसंहारादनुविन्देदिति श्रुतेरुपक्रमोपसंहारविरोधः स्यादिति शङ्कते—नन्विति । शङ्कितं विरोधं निराकरोति—नेति । कथं तयोरैकार्थ्यं ग्रामादौ तदेकत्वाप्रसिद्धेरित्याशङ्क्याऽऽह—आत्मन इति । ग्रामादावप्राप्ते प्राप्तिरेव लाभो न ज्ञानमात्रं तथाऽत्रापि किं न स्यादित्याशङ्क्याऽऽह—नेत्यादिना ।

तत्र ह्यात्मनोऽनात्मा लब्धव्यो भवति तत्राऽऽत्मा लब्धा लब्धव्योऽनात्मा । स चाप्राप्त उत्पाद्यादिक्रियाव्यवहितः कारकविशेषोपादानेन क्रियाविशेषमुत्पाद्य लब्धव्यः । स त्वप्राप्तप्राप्तिलक्षणोऽनित्यो मिथ्याज्ञानजनितकामक्रियाप्रभवत्वात्स्वप्ने पुत्रादिलाभवत् अयं तु तद्विपरीत आत्मा । आत्मत्वादेव नोत्पाद्यादिक्रियाव्यवहितः

---

१ घ. च. ज. ढ. विलिप्सितं । २ ग. च. छ. ज. झ. °तं पदे° । ३ क. ख. ग. ङ. च. छ. ज. झ. ढ. °नान्विष्यमा° । ४ क. च. ढ. °र्वमुपल° । ख. झ. °र्वमुपलभ्यत । ५ क. इति । ६ क. ख. °नि विज्ञा° । ७ झ. °नोऽला° । ८ घ. ञ. विलिप्सितं । ९ ख. घ. ढ. °किं यथा व्य° । १० ख. ग. घ. ङ. च. छ. ज. झ. ढ. °त्पाद्यकि° । ११ क. ङ. च. छ. °त । अतो नि° ।

ज्ञानलाभशब्दयोरर्थभेदस्तर्हि कुत्रेत्याशङ्क्याऽऽह—यत्र हीति । अनात्मनि लब्धृलब्धव्ययोर्ज्ञातृज्ञेययोश्च भेदे क्रियाभेदात्फलभेदसिद्धिरित्यर्थः । नन्वात्मलाभोऽपि ज्ञानाद्भिद्यते लाभत्वादनात्मलाभवदित्याशङ्क्य ज्ञानहेतुमात्रानधीनत्वमुपाधिरित्याह—स चेति । अप्राप्तत्वं व्यक्ती करोति—उत्पाद्येति । तदुपधानमेव साधयति—कारकेति । किंवानात्मलाभोऽविद्याकल्पितः कादाचित्कत्वात्तंपतिवदित्याह—स त्विति । किंवासावविद्याकल्पितोऽप्रामाणिकत्वात्तंपतिन्नवदित्याह—मिथ्येति । प्रकृते विशेषं दर्शयति—अयं त्विति । वैपरीत्यमेव स्फोरयति—आत्मत्वादिति ।

नित्यलब्धस्वरूपत्वेऽपि सत्यविद्यामात्रं व्यवधानम् । यथा गृह्यमाणाया अपि शुक्तिकाया विपर्ययेण रजताभासाया अग्रहणं विपरीतज्ञानव्यवधानमात्रं तथा ग्रहणं ज्ञानमात्रमेव विपरीतज्ञानव्यवधानापोहार्थत्वाज्ज्ञानस्य । एवमिहाप्यात्मनोऽलाभोऽविद्यामात्रव्यवधानम् । तस्माद्विद्यया तदपोहनमात्रमेव लाभो नान्यः कदाचिदप्युपपद्यते । तस्मादात्मलाभे ज्ञानादर्थान्तरसाधनस्याऽऽनर्थक्यं वक्ष्यामः । तस्मान्निराशङ्कमेव ज्ञानलाभयोरेकार्थत्वं विवक्षन्नाह—ज्ञानं प्रकृत्यानुविन्देदिति । विन्दतेर्लाभार्थत्वात् ।

आत्मनस्तर्हि नित्यलब्धत्वाच्च तत्रालब्धत्वबुद्धिः स्यादित्याशङ्क्याऽऽह—नित्येति । आत्मन्यलाभोऽज्ञानं लाभस्तु ज्ञानमित्येतद्दृष्टान्तेन स्पष्टयति—यथेत्यादिना । शुक्तिकायाः स्वरूपेण गृह्यमाणाया अपीति योजना । आत्मलाभोऽविद्यानिवृत्तिरेवेत्यत्रोक्तं वक्ष्यमाणं च गमकं दर्शयति—तस्मादिति । अविरोधमुपसंहरति—तस्मादित्यादिना । ज्ञानयोरेकार्थत्वेऽपि कथमनुविन्देदिति मध्ये प्रयुज्यते तत्राऽऽह—विन्दतेरिति ।

विज्ञानफलमिदमुच्यते—यथाऽयमात्मा नामरूपानुप्रवेशेन [illegible] गत आत्मेत्यादिनामरूपाभ्यां प्राणादिसंहतिं च श्लोकं प्राप्तवानित्येवं यो वेद स कीर्तिं ख्यातिं श्लोकं च संघातमिष्टैः सह विन्दते लभते । यद्वा यथोक्तं वस्तु यो वेद मुमुक्षूणामपेक्षितं कीर्तिशब्दितमैक्यज्ञानं तत्फलं श्लोकशब्दितां मुक्तिमाप्नोतीति मुख्यमेव फलम् ॥ ७ ॥

---

१ घ. ति । आत्मानात्मनोर्लब्धलब्धव्य° । २ क. ख. ञ. ज्ञानज्ञ° । ३ क. ख. °थावक° । ४ घ. °था स्वरूपेण गृ° । ५ ख. घ. ङ. च. छ. ज. झ. ढ. मात्रं व्य° । ६ ख. घ. ज. °हणा° । ७ क. ङ. °चिदुप° । ८ ख. ढ. दिना ना° । ९ ग. घ. ङ. छ. झ. °ते ॥ ७ ॥ कुत° । १० क. ब्दितमु° ।

आदिमध्यावसानानामविरोधमुक्त्वा कीर्तिमित्यादिवाक्यमवतार्य व्याकरोति-गुणेत्यादिना । इतिशब्दादुपरिष्टाद्यथेत्यस्य संबन्धः । ज्ञानस्तुतिश्चात्र विवक्षिता ज्ञानिनामपीदृक्फलस्यानभिलषितत्वादिति द्रष्टव्यम् ॥ ७ ॥

तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्मात्सर्वस्माद-न्तरतरं यदयमात्मा । स योऽन्यमात्मनः प्रियं ब्रुवाणं ब्रूयात्प्रिय[१]रोत्स्यतीतीश्वरो ह तथैव स्यादात्मानमेव प्रियमुपासीत स य आत्मानमेव प्रियमुपास्ते न हास्य प्रियं प्रमायुकं भवति ॥ ८ ॥

कुतश्चाऽऽत्मतत्त्वमेव ज्ञेयमनादृत्यान्यदित्याह-तदेतदात्मतत्त्वं प्रेयः प्रियकरं पुत्रात् । हि पुत्रो लोके प्रियः प्रसिद्धस्तस्मादपि प्रियतर-मिति निरतिशयप्रियत्वं दर्शयति । तथा वित्ताद्धिरण्यरत्नादेस्तथाऽ-न्यस्माद्यद्यल्लोके प्रियत्वेन प्रसिद्धं तस्मात्सर्वस्मादित्यर्थः । तत्कस्मा-दात्मतत्त्वमेवं प्रियतरं न प्राणादीति । उच्यते-अन्तरतरं बाह्यात्पुत्र-वित्तादेः प्राणपिण्डसमुदायो ह्यन्तरोऽभ्यन्तरः संनिकृष्ट आत्मनः तस्मादप्यन्तरादन्तरतरं यदयमात्मा यदेतदात्मतत्त्वम् । यो हि लोके निरतिशयप्रियः स सर्वप्रयत्नेन लब्धव्यो भवति । तथाऽयमात्मा सर्व-लौकिकप्रियेभ्यः प्रियतमः । तस्मात्तल्लाभे महान्यत्न आस्थेय इत्यर्थः । कर्तव्यताप्राप्तमप्यन्यप्रियलाभे यत्नमुज्झित्वा ।

आत्मनः पदनीयत्वे तस्यैवाज्ञातत्वसंभवो हेतुरुक्तोऽधुना तस्यैव हेत्वन्तरत्वेनो-त्तरवाक्यमवतारयति कुतश्चेति[२] । अन्यदनात्मेति यावत् । विरक्तस्य पुत्रे प्री-त्यभावात्कथमात्मनस्तस्मात्प्रियतरत्वमित्याशङ्क्याऽऽह-पुत्रो हीति । प्रियतरमा-त्मतत्त्वमिति शेषः । लोकदृष्टिमेवावष्टभ्याऽऽह-तथेति । वित्तपदेन मानुषवित्त-मेवं वित्तमपि गृह्यते । विशेषाणामानन्त्यात्तत्रैकं पदर्शनमशक्यमित्याशयेना-ऽऽह-तथाऽन्यस्मादिति । पुत्रादौ प्रीतिव्यभिचारेऽपि प्राणादौ तद्व्यभिचारा-दात्मनो न प्रियतमत्वमिति शङ्कते-तत्कस्मादिति । पदान्तरमादाय व्याकुर्वन्-परिहरति-उच्यत इत्यादिना । अन्तरतरत्वे प्रियतमत्वसाधने हेतुरात्मत्वमित्य-

---

१ क. ख. ग. ङ. °त्यान्यानीत्या° । २ ग. °व सर्वस्मात्प्रिय° । ३ क. ख. ण. °ति । इतश्चेति । ४ ख. ञ. °कं वृ° ।

भिप्रेत्य विशेष्यं व्यपदिशति—यदयमिति । आत्मनो निरतिशयप्रेमास्पदत्वेऽपि कुतस्तस्यैव पदनीयत्वमित्याशङ्क्य वाक्यार्थमाह—यो ह्यित्यादिना । पुत्रादिलाभे[1] दारादीनां कर्तव्यत्वेन प्राप्तप्रयत्नाविरोधादात्मलाभे प्रयत्नः सुकरो न भवतीत्याशङ्क्याऽऽह—कर्तव्यतेति ।

कस्मात्पुनरात्मानात्मप्रिययोरन्यतरप्रियहानेनेतरप्रियोपादानप्राप्तावात्मप्रियोपादानेनैवेतरहानं क्रियते न विपर्यय इति । उच्यते—स यः कश्चिदन्यमनात्मविशेषं पुत्रादिकं प्रियतरमात्मनः सकाशाद्ब्रुवाणं ब्रूयादात्मप्रियवादी । किम् । प्रियं तवाभिमतं पुत्रादिलक्षणं रोत्स्यत्यावरणं प्राणसंरोधं प्राप्स्यति विनङ्क्ष्यतीति । स कस्मादेवं ब्रवीति । यस्मादीश्वरः समर्थः पर्याप्तोऽभावेवं वक्तुं ह यस्मात्तस्मात्तथैव स्याद्यत्तेनोक्तं प्राणसंरोधं प्राप्स्यति । यथाभूतवादी हि सः । तस्मात्स ईश्वरो वक्तुम् । ईश्वरशब्दः क्षिप्रवाचीति कैश्चित् । भवेद्यदि प्रसिद्धिः स्यात् । तस्मादुज्झित्वाऽन्यत्प्रियमात्मानमेव प्रियमुपासीत । स य आत्मानमेव प्रियमुपास्त आत्मैव प्रियो नान्योऽस्तीति प्रतिपद्यतेऽन्यल्लौकिकं प्रियमप्यप्रियमेवेति निश्चित्योपास्ते चिन्तयति न हास्यैवंविदः प्रियं प्रमायुकं प्रमरणशीलं भवति[2] । नित्यानुवादमात्रमेतदात्मविदोऽन्यस्य प्रियस्याप्रियस्य चाभावात् । आत्मप्रियग्रहणस्तुत्यर्थं वा प्रियगुणफलविधानार्थं वा मन्दात्मदर्शिनस्ताच्छील्यप्रत्ययोपादानात् ॥ ८ ॥

आत्मनो निरतिशयप्रेमास्पदत्वे युक्तिं पृच्छति—कस्मादिति । आत्मप्रियस्योपादानमनुसंधानमितरस्यानात्मप्रियस्य हानमननुसंधानम् । विपर्ययोऽनात्मनि पुत्रादावभिनिवेशेनाऽऽत्मप्रियस्यानननुसंधानमिति विभागः । युक्तिलेशं दर्शयितुमनन्तरवाक्यमवतारयति—उच्यत इति । यः कश्चिदात्मप्रियवादी स तस्माद्रुवाणं प्रति ब्रूयादिति संबन्धः । वक्तव्यं प्रश्नपूर्वकं प्रकटयति—किमित्यादिना । आत्मप्रियवादिन्येवं वदत्यपि पुत्रादिनाशस्तद्वाक्यार्थो निपतो न लिप्स्यतीत्याशङ्क्य परिहरति—स कस्मादित्यादिना । ह्शब्दोऽवधारणार्थः समर्थपदादुपरि संबध्यते । तस्मादेवं वक्तीति शेषः । उक्तं सामर्थ्यमनूद्य फलितमाह—यस्मादि-

---

१ क. ख. ण. °भे रामादी° । २ झ. °द्वित्रिय° । ३ ख. ग. च. ढ. °ङ्क्ष्यति । ४ ख. घ. च. झ. °सं न भ° । ५ ख. °वतीति । ६ घ. च. ज. °ति ह । नि° । ङ. ढ. °ति । ह नि° । ७ ग. झ. °हणं स्तु° । ८ ख. घ. ञ. ण. °त्याशङ्क्यित्वा प° ।

ति । अथाऽऽत्मप्रियवादिना यथोक्तं सामर्थ्यमेव कथं लब्धमित्याशङ्क्याऽऽह-यथेति । अतोऽन्यदार्तमित्यनात्मनो विनाशित्वादिनाशिनश्च दुःखात्मकत्वात्तत्रापि-मत्वस्य भ्रान्तिमात्रत्वादात्मनस्तद्वैपरीत्यान्मुख्या प्रीतिस्तत्रैवानात्मन्यमुख्येति भावः। पक्षान्तरमनूद्य वृद्धप्रयोगाभावेन दूषयति-ईश्वरशब्द इति[1] । अनात्मन्यमुख्या प्रीतिरिति स्थिते फलितमाह-तस्मादिति । उपास्तिमनूद्य तत्फलं कथयति-स य इति । अनुवादद्योतको हशब्दः प्रियमात्मसुखं तस्यापि लौकिकसुखवन्नाशः सुखत्वादित्याशङ्क्यते तन्निरासार्थमनुवादमात्रमत्र विवक्षितमित्याह--नित्येति । फलश्रुतेर्गत्यन्तरमाह-आत्मप्रियेति । महद्वीदमात्मप्रियग्रहणं यत्तन्निष्ठस्य प्रियं न प्रणश्यति तस्मात्तदनुसंधानं कर्तव्यमिति स्तुत्यर्थं फलकीर्तनमित्यर्थः । पक्षान्त-रमाह-प्रियगुणेति । यो मन्दः तत्त्वात्मदर्शी तस्य प्रियगुणविशिष्टात्मोपासने प्रियं प्राणादि न नश्यतीति फलं विधातुं फलवचनमित्यर्थः। नन्वात्मानं प्रियमुपा-सीनस्य प्रियं प्राणादि विद्यासामर्थ्यान्न नश्यति तथा च मन्दविशेषणं मन्दमि-त्याशङ्क्याऽऽह-ताच्छील्येति । ताच्छील्येऽर्थे विहितस्योकञ्प्रत्ययस्य श्रुत्यो-पादानात्स्वभावहानायोगाच्च प्रमरणशीलत्वाभावेऽपि प्राणादेरात्यन्तिकमप्रमरणम-विवक्षितमित्यर्थः ॥ ८ ॥

तदाहुर्यद्ब्रह्मविद्यया सर्वं भविष्यन्तो मनुष्या मन्यन्ते ।
किमु तद्ब्रह्मावेद्यस्मात्सर्वमभवदिति ॥ ९ ॥

सूत्रिता ब्रह्मविद्याऽऽत्मेत्येवोपासीतेति यदर्थोपनिषत्कृत्स्नाऽपि तस्यै-तस्य सूत्रस्य व्याचिख्यासुः प्रयोजनाभिधित्सयोपोद्घातं[2] करोति-तदिति वक्ष्यमाणमनन्तरवाक्येऽवद्योत्यं वस्त्वाहुर्ब्राह्मणा ब्रह्म विविदिषवो ज-न्मजरामरणप्रबन्धचक्रभ्रमणकृतायासदुःखोदकापारमहोदधिप्लवभूतं गुरुमासाद्य तत्तीरमुत्तितीर्षवो धर्माधर्मसाधनतत्फललक्षणात्साध्यसाध-नरूपान्निर्विण्णास्तद्विलक्षणनित्यनिरतिशयश्रेयः प्रतिपित्सवः किमा-हुरित्याह-यद्ब्रह्मविद्यया ब्रह्म परमात्मा तद्यया वेद्यते सा ब्रह्मविद्या तया ब्रह्मविद्यया सर्वं निरवशेषं भविष्यन्तो भविष्याम इत्येवं मनुष्या यन्मन्यन्ते मनुष्यग्रहणं विशेषतोऽधिकारज्ञापनार्थम्[3] । मनुष्या एव हि विशेषतोऽभ्युदयनिःश्रेयससाधनेऽधिकृता इत्यभिप्रायः । यथा कर्मविषये फलप्राप्तिं ध्रुवां कर्मभ्यो मन्यन्ते तथा

---

१ क. ख. ण. °वैवेति । २ घ. ति । आत्मनि मु° । ३ ख. ञ. °शङ्क्य त° । ४ ख. °घोद्घातं करोति । ५ घ. °वाक्यावं° । ६ ख. ज. निर्विशेषं ।

ब्रह्मविद्यायाः सर्वात्मभावफलप्राप्तिं व्यक्तामेव मन्यन्ते । वेदप्रामाण्यस्योभयत्राविशेषात् ।

तदाहुरित्यादेर्ग्रन्थेन संबन्धं वक्तुं वृत्तं कीर्तयति—सूचितेति । तस्यां प्रमाणमाह—तदर्थेति । तर्हि सूत्रव्याख्यानेनैव सर्वोपनिषदर्थसिद्धेस्तदाहुरित्यादि वृथेत्याशङ्क्याऽऽह—तस्येति । विद्यातुर्यं व्याख्यातुमिच्छन्ती श्रुतिः सूचितविद्याविवक्षितफलोजनामिधानायोपोद्घातं चिकीर्षति । प्रविद्याधर्थं वृद्धो संगृह्य तादर्थ्येनार्थान्तरोपवर्णनस्य तथात्वाच्चिन्त्यं प्रकृतसिद्ध्यर्थमुपोद्घातं प्रचक्षत इति न्यायादित्यर्थः । यद्ब्रह्मविषयेत्यादिवाक्यप्रकारं चोद्यं तच्छब्देनोच्यते प्रकृतसंबन्धासंभवादित्याह—तादितीति । ब्राह्मणमात्रस्य चोद्यकर्तृत्वं व्यावर्तयति—ब्रह्मेति । उत्प्रेक्षया ब्रह्मवेदनेच्छात्वं व्यावर्तयितुं तदेव विशेषणं विभजते—जन्मेति । जन्म च जरा च मरणं च तेषां पवन्ते पवाहे चक्रवदनवरतं भ्रमणेन कृतं यदायासात्मकं दुःखं तदेवोदकं यस्मिन्नपारे संसाराख्ये महोदधौ तत्र प्लवभूतं तरणसाधनमिति यावत् । तत्तीरं तस्य संसारसमुद्रस्य तीरं परं ब्रह्मेत्यर्थः । तेषां विविदिषायाः साफल्यार्थं तत्परमनीके संसारे वैराग्यं दर्शयति—धर्मेति । निर्वेदस्य निरङ्कुशत्वं वारयति—तल्लिङ्गलक्षणेति । उत्तरवाक्यमवतार्य व्याचष्टे—किमित्यादिना । अथ परा यया तदक्षरमधिगम्यत इति श्रुत्वन्तरमित्याऽऽह—तथयेति । मनुष्या यन्मन्वते तत्र विरुद्धं वस्तु नास्तीति शेषः । मनुष्यग्रहणस्य कृत्यमाह—मनुष्येति । ननु देवादीनामपि विद्याधिकारो देवताधिकरणन्यायेन वक्ष्यते तत्कुतो मनुष्याणामेवाधिकारज्ञापनमित्यत आह—मनुष्या इति । विशेषतः सर्वात्मवादेनेति यावत् । तथाऽपि किमिति ते ज्ञानान्मुक्तिं निश्चयवदनुवन्तीत्याशङ्क्याऽऽह—यथेति । उभयत्र कर्मब्रह्मणोरिति यावत् ।

तत्र विप्रतिषिद्धं वस्तु लक्षयतेऽतः पृच्छामः—किमु तद्ब्रह्म यस्य विज्ञानात्सर्वं भविष्यन्तो मनुष्या मन्यन्ते तत्किमवेद यस्माद्विज्ञानात्तद्ब्रह्म सर्वमभवत् । ब्रह्म सर्वमिति श्रूयते । तथ्यंविज्ञायं किंचित्सर्वमभवत्तथाऽन्येषामप्यस्तु किं ब्रह्मविषया । अथ विज्ञाय सर्वमभवद्विज्ञानसाध्यत्वात्कर्मफलेन तुल्यमेवेत्यनित्यत्वप्रसङ्गः सर्वभावस्य ब्रह्मविद्याफलस्य । अनवस्थादोषश्च तदप्यन्यद्विज्ञाय सर्वमभवत्ततः पूर्वमप्यन्यद्विज्ञायेति । न तावदविज्ञाय सर्वमभवत् । शास्त्रार्थवैरूप्य-

---

१ क. °क्तंव्यत्वं । २ क. स. ञ. ण. संबन्धः । ३ ख. ग. घ. ङ. छ. °य यत्किंचि° । ४ ख. छ. °ज्ञाय ततः पूर्वतरमप्यन्यद्विज्ञाये° ।

दोषात् । फलनित्यत्वदोषस्तर्हि, नैकोऽपि दोषोऽर्थविशेषोपपत्तेः ॥९॥

उत्तरवाक्यमुपादत्ते तत्रेति । मनुष्याणां मतं तच्छब्दार्थः । वस्तुशब्देन ज्ञानात्फलमुच्यते । आक्षेपगर्भस्य चोद्यस्य प्रवृत्तौ विरोधप्रतिभासो हेतुरित्यतः—शब्दार्थः । तद्ब्रह्म परिच्छिन्नमपरिच्छिन्नं वेति कुतो ब्रह्मणि चोद्यने तत्राऽऽह—यस्येति । भ्रमान्तरं करोति—तत्किमिति । ब्रह्म स्वात्मानमज्ञात्वादितिरिक्तं वेति प्रश्नस्य प्रसङ्गं दर्शयति—यस्मादिति । सर्वस्य व्यतिरिक्तविषये ज्ञानं प्रतिज्ञं तत्किं विचारेणेत्याशङ्क्याऽऽह—ब्रह्म चेति । तर्हि खल्विदं ब्रह्मेत्यादौ ब्रह्मणः सर्वात्मत्वश्रवणादतिरिक्तविषयाभावादात्मानमेवावेदिति पक्षस्य तात्पर्यतोऽर्थः । किंशब्दस्य प्रश्नार्थत्वमुक्त्वाऽऽक्षेपार्थमाह—तद्यदीति । ब्रह्म हि किंचिदज्ञात्वा सर्वमभवज्ज्ञात्वा वा । नाऽऽद्यो ब्रह्मविद्यानर्थक्यादित्युक्त्वा द्वितीयमनूद्यदति—अथेति । स्वरूपमन्यद्वा ज्ञात्वा ब्रह्मणः सर्वापत्तिरिति विकल्प्योभयत्र साधारणं दूषणमाह—विज्ञानेनेति । द्वितीये दोषान्तरमाह—अनवस्थेति । बहिरेवाऽऽक्षेपं परिहरति—न तावदिति । अज्ञात्वैव ब्रह्मणः सर्वभावोऽस्मदादेस्तु ज्ञानादिति शास्त्रार्थे वैरूप्यम् । न चास्मदादेरपि तदन्तरेण तद्भावः शास्त्रानर्थक्यात् । ज्ञानाद्ब्रह्मणः सर्वभावपक्षे स्वोक्तं दोषमाक्षेप्ता स्मारयति—फलेति । स्वतोऽपरिच्छिन्नं ब्रह्माविद्यातत्कार्यसंबन्धात्परिच्छिन्नवद्भाति तन्निवृत्त्यौपाधिकं सर्वभावस्य साध्यत्वं न चानवस्थाशेषान्तराङ्गीकारान्नापि क्रियाविरोधो विषयत्वमन्तरेण वाक्यीयबुद्धिवृत्तौ स्फुरणादिति परिहरति—नैकोऽपीति । एतेन विद्याविषयत्वमपि परिहृतमित्याह—अर्थेति । यद्यपि ब्रह्मापरिच्छिन्नं निष्प्रपञ्चं तथापि तदाविद्यातत्कार्यसंबन्धतत्त्वस्यार्थविशेषस्य ज्ञानादुपपत्तेर्न तद्विषयत्वमित्यर्थः ॥ ९ ॥

> ब्रह्म वा इदमग्र आसत्तदात्मानमेवावेत् । अहं ब्रह्मास्मीति । तस्मात्तत्सर्वमभवत्तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्तथर्षीणां तथा मनुष्याणां तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदेऽहं मनुरभवꣳ सूर्यश्चेति । तदिदमप्येतर्हि य एवं वेदाहं ब्रह्मास्मीति स इदꣳ सर्वं भवति तस्य ह न देवाश्च नाभूत्या ईशते । आत्मा ह्येषाꣳ स

---

१ क. घ. ञ. ण. °नमवे° । २ ख. °यसा° । ३ ख. °बुद्धौ स्फु°।

भवति अथ योऽन्यां देवतामुपास्तेऽन्योऽसाव-
न्योऽहमस्मीति न स वेद यथा पशुरेवꣳ स
देवानाम्। यथा ह वै बहवः पशवो मनुष्यं
भुञ्ज्युरेवमेकैकः पुरुषो देवान्भुनक्त्येकस्मिन्नेव
पशावादीयमानेऽप्रियं भवति किमु बहुषु तस्मा-
देषां तन्न प्रियं यदेतन्मनुष्या विद्युः ॥ १० ॥

यदि किमपि विज्ञायेव तद्ब्रह्म सर्वमभवत्पृच्छामः किमु तद्ब्र-
ह्मावेद्यस्मात्तत्सर्वमभवदिति। एवं चोदिते सर्वदोषानागन्धितं प्रतिवच-
नमाह—ब्रह्मापरं सर्वभावस्य साध्यत्वोपपत्तेः। न हि परस्य ब्रह्मणः
सर्वभावापत्तिर्विज्ञानसाध्या। विज्ञानसाध्यां च सर्वभावापत्तिमाह—
तस्मात्तत्सर्वमभवदिति। तस्माद्ब्रह्म वा इदमग्र आसीदित्यपरं ब्रह्मेह
भवितुमर्हति। मनुष्याधिकाराद्वा तद्भावी ब्राह्मणः स्यात्। सर्वं भवि-
ष्यन्तो मनुष्या मन्यन्त इति हि मनुष्याः प्रकृतास्तेषां चाभ्युदयनिः-
श्रेयससाधने विशेषतोऽधिकार इत्युक्तम्। न परस्य ब्रह्मणो नाप्यप-
रस्य प्रजापतेः। अतो द्वैतैकत्वापरब्रह्मविद्यया कर्मसहितयाऽपरब्रह्म-
भावमुपसंपन्नो भोज्यादपावृतः सर्वप्राप्त्योच्छिन्नकामकर्मबन्धनः पर-
ब्रह्मभावी ब्रह्मविद्याहेतोर्ब्रह्मेत्यभिधीयते। दृष्टश्च लोके भाविनीं वृत्ति-
माश्रित्य शब्दप्रयोगो यथौदनं पचतीति, शास्त्रे च परिव्राजकः सर्व-
भूताभयदक्षिणामित्यादि, तथेहेति केचिद्ब्रह्म ब्रह्मभावी पुरुषो ब्राह्मण
इति व्याचक्षते।

इदानीं प्रश्नमनूद्य[1] उत्तरत्वेन ब्रह्मेत्यादिश्रुतिमवतारयति—यदीत्यादिना। तत्र वृत्तिकृतां मतानुसारेण ब्रह्मशब्दार्थमाह—ब्रह्मेति। तस्य परिच्छिन्नत्वाज्ज्ञा-
नेन सर्वभावस्य साध्यत्वसंभवादिति हेतुमाह—सर्वभावस्येति। सिद्धान्ते पर्यो-
फहेत्वनुपपत्तिं दोषमाह—न हीति। सा तर्हि विज्ञानसाध्या वा भूदित्यत आह—
विज्ञानेति। हिरण्यगर्भस्य गोपदेशजन्यज्ञानाद्ब्रह्मभावः 'तदहैतत्पश्यन्नृषिर्वामदेव
इति श्रुतेः स्वाभाविकज्ञानवत्त्वात्तस्मात्तत्सर्वमभवदिति चोपदेशाधीनधीसाध्योऽसौ

---

१ ख. च. छ. झ. ढ. °प्योत्तर°। २ च. ढ. °हेतुत्वेन ब्रह्मे°। ३ क. °कैऽपि भा°। ४ क. ङ. °दिस्तथे°। ५ ख. ग. ङ. °थेहापीति। ६ क. ख. ङ. च. ढ. °ह्मभा°। ७ क. °पत्तिदो°।

भूतो न चाऽऽसीदित्यवीचत्कालावच्छेदसिद्धिकाले तस्मिन्मुच्यते[1] । समवर्ततेति च जन्ममात्रं भूयते । कालात्मके वर्तमानस्य स्वाभावपराहतत्वान्मनुष्याणां प्रकृतत्वाच्च नापरं ब्रह्मेह ब्रह्मशब्दमित्यंपरिशेषादूर्ध्वशरीरकारणत्वं हित्वा ब्रह्मेति ब्रह्मभावी पुरुषो निर्दिश्यत इति मत्वंपदाभोक्तिमाभिरत्र वन्यतयाह—मनुष्येति । तदेव प्रपञ्चयति—सर्वमित्यादिना । हेतोकर्त्वं सर्वजगदात्मकमपरं हिरण्यगर्भाख्यं ब्रह्म तस्मिन्विद्या हिरण्यगर्भोऽहमित्यतंब्रह्मोपास्तिरूपया समुच्चितया तद्भावमिहैवोपगतो हिरण्यगर्भपदे बद्धोऽयं ततोऽपि दोषदर्शनाद्विरक्तः सर्वकर्मफलप्राप्त्या निवृत्तकामादिनिर्गंहः साध्यान्तराभावाद्विद्यामेवार्थयमानस्तदृशाद्ब्रह्मभावी जीवोऽस्मिन्वाक्ये ब्रह्मशब्दार्थ इति फलितमाह—अत इति । कथं ब्रह्मभाविनि जीवे ब्रह्मशब्दस्य प्रवृत्तिरित्याशङ्क्याऽऽह—दृष्टश्चेति । अदिशब्देन गृहस्थः सदृशीं भार्यां विन्देतेत्यादि गृह्यते । इहेति प्रकृतवाक्यकथनम् ।

तत्र, सर्वभावापत्तेरनित्यत्वदोषात् । न हि सोऽस्ति लोके परमार्थतो यो निमित्तवशाद्भावान्तरमापद्यते नित्यश्चेति । तथा ब्रह्मविज्ञाननिमित्तकृता चेत्सर्वभावापत्तिर्नित्या चेति विरुद्धम् । अनित्यत्वे च कर्मफलतुल्यतेत्युक्तो दोषः । अविद्याकृतासर्वत्वनिवृत्तिं चेत्सर्वभावापत्तिं ब्रह्मविद्याफलं मन्यसे ब्रह्मभाविपुरुषकल्पना व्यर्थो स्यात् ।

मत्वंपदाभ्यालम्बनं दूषयति—तत्रेति । ब्रह्मशब्देन परस्मादर्थान्तरस्य ग्रहे तस्य सर्वभावापत्तेः साध्यत्वादनित्यत्वापत्तेर्न वन्यतमुचितमित्यर्थः । साध्यस्यापि मोक्षस्य नित्यत्वमाशङ्क्य यत्कृतकं तदनित्यमिति न्यायमाश्रित्याऽऽह—न हीति । सामान्यन्यायं प्रकृते योजयति—तथेति । ननु सर्वभावापत्तेरनित्यत्वं का हानिस्तत्राऽऽह—अनित्यत्वे चेति । किंच जीवस्याब्रह्मत्वं तवाविद्याकृतं पारमार्थिकं वेति विकल्प्याऽऽद्यमनूद्य दूषयति—अविद्याकृतेति ।

प्राग्ब्रह्मविज्ञानादपि सर्वो जन्तुर्ब्रह्मत्वान्नित्यमेव सर्वभावापन्नः परमार्थतोऽविद्यया त्वब्रह्मत्वमसर्वत्वं चाध्यारोपितं यथा शुक्तिकायां रजतं व्योम्नि वा तलमलत्वादि तथेह ब्रह्मण्यध्यारोपितमविद्ययाऽब्रह्मत्वमसर्वत्वं च ब्रह्मविद्यया निवर्तयत इति मन्यसे यदि तदा युक्तं यत्परमार्थत आसीत्परं ब्रह्म ब्रह्मशब्दस्य मुख्यार्थभूतं ब्रह्म वा इदमग्र आसीदित्यस्मिन्वाक्य उच्यत इति वक्तुम् । यथाभूतार्थवादि-

---

१ अ. °ते । हिरण्यगर्भः स । २ स. °त्यर्थेऽप° । ३ ब. अ. °नस्तावदृशो ब्रह्म° । ४ अ. °तभावाद्वस्त्वन्त° । ५ स. ब. ङ. छ. ज झ. र्था । प्रा° । ६ ग. ङ. च. ढ. °भा ब्राप° । ७ झ. °ल्यामलत्वादि । झ. °ल्यमलित्वादि ।

त्वाद्वेदस्य नत्वियं कल्पना युक्ता ब्रह्मशब्दार्थविपरीतो ब्रह्मभावी पुरुषो ब्रह्मेत्युच्यत इति। श्रुतहान्यश्रुतकल्पनाया अन्याय्यत्वात्।

तत्रानुवादभागं विभजते–प्रागित्यादिना। ब्रह्मभाविपुरुषकल्पना व्यर्थेत्युक्तं व्यक्तीं करोति–तदेति। तस्मिन्पक्षे यद्ब्रह्मज्ञानात्पूर्वमपि परमार्थतः परं ब्रह्माऽऽसीत्तदेव प्रकृते वाक्ये ब्रह्मशब्देनोच्यत इति युक्तं वक्तुं तद्धि ब्रह्मशब्दस्य मुख्यमालम्बनमिति योजना। गौर्वाहीक इतिवद्मुख्यार्थोऽपि ब्रह्मशब्दो निर्वहतीत्याशङ्क्याऽऽह–यथेति। निरतिशयमहत्त्वसंपन्नं वस्तु ब्रह्मशब्देन श्रुतमश्रुतस्तु ब्रह्मभावी पुरुषः श्रुतहान्यश्रुतकल्पना न न्यायवती तस्मात्तत्कल्पना न युक्तेति व्यावर्त्यमाह–नत्विति।

महत्तरे प्रयोजनान्तरेऽसत्यविद्याकृतव्यतिरेकेणाब्रह्मत्वमसर्वत्वं च विद्यत एवेति चेन्न। तस्य ब्रह्मविद्ययाऽपोहानुपपत्तेः। नहि[5] क्वचित्कदाचित्[6] साक्षाद्वस्तुधर्मस्यापोढ्री[7] दृष्टा कर्त्री[8] वा ब्रह्मविद्या। अविद्यायास्तु सर्वत्रैव निवर्तिका दृश्यते। तथेहाप्यब्रह्मत्वमसर्वत्वं चाविद्याकृतमेव निवर्त्यतां ब्रह्मविद्यया। नतु पारमार्थिकं वस्तु कर्तुं[9] निवर्तयितुं वाऽर्हति ब्रह्मविद्या। तस्माद्व्यर्थैव श्रुतहान्यश्रुतकल्पना।

अग्निरधीतेऽनुवाकमित्यादौ श्रुतहान्याऽश्रुतोपादानं दृष्टमित्याशङ्क्याऽऽह–**महत्तर इति**। तत्राग्निशब्दस्य मुख्यार्थत्वे सत्यन्विताभिधानानुपपत्त्या वाक्यार्थासिद्धेस्तज्ज्ञाने प्रयोजने श्रुतमपि हित्वाऽश्रुतं गृह्येत[10] प्रकृते त्वसति प्रयोजनविशेषे श्रुतहान्यादिर्न युक्तिमतीत्यर्थः। मनुष्याधिकारं निर्वोढुं ब्रह्मभाविपुरुषकल्पनेत्याशङ्क्य महत्तरविशेषणम्। यद्ब्रह्मविद्ययेति परस्यापि तुल्यमविरुद्धतत्वं तस्य चाविद्याद्वाराऽधिकारित्वमविरुद्धमित्यग्रे स्फुटी भविष्यतीति भावः। द्वितीयं कल्पमुत्थापयति–**अविद्येति**। ब्रह्मविद्यावैयर्थ्यप्रसङ्गान्नैवमिति दूषयति–**न तस्येति**। अनुपपत्तिमेव साधयति–**नहीति**। साक्षाद्वारोपमन्तरेणेति यावत्। वस्तुधर्मस्य परमार्थभूतस्य पदार्थस्येत्यर्थः। विद्यायास्तर्हि कथमर्थवत्त्वं तत्राऽऽह–**अविद्यायास्त्विति**। सर्वत्र शुक्त्यादाविति यावत्। विमतमविद्यात्मकं विद्यानिवर्त्यत्वाद्रजतादिवदित्यभिप्रेत्य दार्ष्टान्तिकमाह–तथेति। विमतं न कारकं

---

१ घ. ञ. विवृणोति। २ घ. °षः। अतः श्रु°। ञ. °षः। अतोऽश्रुतक°। ३ क. °हान्यश्रु°। ४ घ. °न्याऽश्रु°। ५ ख. ञ. ण. °स्मात्क°। ६ क. °हि कदाचि°। ७ ख. ग. °चित्कदाचित्सा°। ८ ग. ङ. °व विनि°। ९ ग. ङ. °र्तुं वा नि°। १० क. °हान्यश्रु°। ११ क. ख. गृह्यते। ण. प्रगृह्यते। १२ क. घ. ञ. ण. °क्तिमानित्य°।

विद्यात्वाच्छुक्तिविद्यावदित्याशयेनाऽऽह—नत्विति । अब्रह्मत्वादेवास्तवत्वायोगादयुक्ता ब्रह्मभाविपुरुषकल्पनेत्युपसंहरति—तस्मादिति ।

ब्रह्मण्यविद्यानुपपत्तिरिति चेन्न । ब्रह्मणि विद्याविधानात् । नहि शुक्तिकायां रजताध्यारोपणेऽसति शुक्तिकात्वं ज्ञाप्यते चक्षुर्गोचरापन्नायामियं शुक्तिका न रजतमिति । तथा सदेवेदं सर्वं ब्रह्मैवेदं सर्वमात्मैवेदं द्वैतमस्त्यब्रह्मेति ब्रह्मण्येकत्वविज्ञानं न विधातव्यं ब्रह्मण्यविद्याध्यारोपणायामसत्याम् । न ब्रूमः शुक्तिकायामिव ब्रह्मण्यतद्धर्माध्यारोपणा किं तर्हि न ब्रह्म स्वात्मन्यतद्धर्माध्यारोपनिमित्तमविद्याकर्तृ चेति ।

ब्रह्मण्यविद्यानिवृत्तिर्विद्याफलमित्यत्र चोद्यति—ब्रह्मणीति । न सर्वज्ञे प्रकाशैकरसे ब्रह्मण्यज्ञानमादित्ये तमोवदुपपन्नमिति भावः । तस्याज्ञातत्वमज्ञत्वं वाऽऽक्षिप्यते नाऽऽद्य इत्याह—न ब्रह्मणीति । नहि तत्त्वमसीति विद्याविधानं विज्ञाते ब्रह्मणि युक्तं पिष्टपेषणसङ्गात् । अतस्तदज्ञातमेष्टव्यमित्यर्थः । ब्रह्मात्मैक्यमज्ञातं शास्त्रेण ज्ञाप्यते तद्विषयं च श्रवणादि विधीयते तेन तस्मिन्नज्ञातत्वमेष्टव्यमित्युक्तमर्थं दृष्टान्तेन साधयति—नहीति । मिथ्याज्ञानस्याज्ञानाव्यतिरेकाद्ब्रह्मण्यविद्याध्यारोपणायां शुक्तौ रूप्यारोपणं दृष्टान्तितमिति द्रष्टव्यम् । कल्पान्तरमालम्बते—न ब्रूम इति ।

भवत्वेवं नाविद्याकर्तृ भ्रान्तं च ब्रह्म । किंतु नैवाब्रह्माविद्याकर्ता चेतनो भ्रान्तोऽन्य इष्यते । " नान्योऽतोऽस्ति विज्ञाता " " नान्योऽतोऽस्ति विज्ञातृ " ' तत्त्वमसि " " आत्मानमवावेत् " " अहं ब्रह्मास्मि " " अन्योऽसावन्योऽहमस्मीति न स वेद " इत्यादिश्रुतिभ्यः । स्मृतिभ्यश्च—" समं सर्वेषु भूतेष " " अहमात्मा गुडाकेश " " शुनि चैव श्वपाके च " यस्तु सर्वाणि भूतानि " " यस्मिन्सर्वाणि भूतानि " इति च मन्त्रवर्णात् ।

ब्रह्माविद्याकर्तृ न भवतीत्यस्य यथाश्रुतो वाऽर्थस्तदन्यस्तदाश्रयोऽस्तीति वा तत्राऽऽद्यमङ्गी करोति—भवत्विति । अनादित्वादविद्यायाः कर्तृवेक्षाभावादिना च द्वारं ब्रह्मणि भ्रान्त्यनभ्युपगमादित्यर्थः । द्वितीयं प्रत्याह—किंत्विति । ब्रह्मणोऽन्यश्चेतनो नास्तीत्यत्र श्रुतिस्मृतीरुदाहरति—नान्योऽतोऽस्तीत्यादिना । ब्रह्मणोऽन्योऽचेतनोऽपि नास्तीत्यत्र मन्त्रद्वयं पठति—यस्त्विति ।

नन्वेवं शास्त्रोपदेशानर्थक्यमिति । बाढमेवमवगतेऽस्त्वेवाऽऽनर्थक्य-

---

१ ख. च. झ ट. °पयित्रवि° । २ ञ. °ष्टपेषणप्र° । ३ ख. °र्थः । तथा ब्र° । ४ क. °क्तौ रोप्या° । ५ क. ण. °णोऽन्यश्चेत° ।

मू । अवगमानर्थक्यमपीति चेन्न । अनवगमनिवृत्तेर्दृष्टत्वात् । तान्निवृत्तेरप्यनुपपत्तिरेकत्व इति चेन्न । दृष्टविरोधात् । दृश्यते ह्येकत्वविज्ञानादेवानवगमनिवृत्तिः । दृश्यमानमप्यनुपपन्नमिति ब्रुवतो दृष्टविरोधः स्यात् । न च दृष्टविरोधः केनचिदप्यभ्युपगम्यते । न च दृष्टेऽनुपपन्नं नाम दृष्टत्वादेव । दर्शनानुपपत्तिरिति चेत्तत्रापीयमेव युक्तिः ।

ब्रह्मणोऽन्यस्याज्ञस्याभावे दोषमाशङ्क्य ते—नन्विति । किमिदमानर्थक्यमवगतेऽनवगते वा चोद्यते तत्राऽऽद्यमङ्गी करोति—बाढमिति । द्वितीये नोपदेशानर्थक्यमवगमार्थत्वादिति द्रष्टव्यम् । उपदेशवदवगमस्यापि स्वप्रकाशे वस्तुनि नोपयोगोऽस्तीति शङ्कते—अवगमेति । अनुभवमनूद्य परिहरति—न । अनवगमेति । सा वस्तुनो भिन्ना चेद्द्वैतहानिरभिन्ना चेज्ज्ञानाधीनत्वात्सिद्धिरिति शङ्कते—तान्निवृत्तेरिति । अनवगमनिवृत्तेर्दृश्यमानतया स्वरूपापलापायोगात्प्रकारान्तरासंभवाच्च पञ्चप्रकारत्वमेष्टव्यमिति मत्वाऽऽह—न दृष्टेति । दृष्टमपि युक्तिविरोधे त्याज्यमित्याशङ्क्याऽऽह—दृश्यमानमिति । दृष्टविरुद्धमपि कुतो नेष्यते तत्राऽऽह—न चेति । अनुपपन्नत्वमङ्गीकृत्योक्तं तदेव नास्तीत्याह न चेति । युक्तिविरोधे दृष्टिराभासी भवतीति शङ्कते—दर्शनेति । दृष्टिविरोधे युक्तेरेवाऽऽभासत्वं स्यादिति परिहरति—तत्रापीति । अनुपपन्नत्वं हि सर्वस्य दृष्टिबलादिष्टं दृष्टस्य त्वनुपपन्नत्वे न किंचिन्निमित्तमस्तीत्यर्थः ।

" पुण्यो वै पुण्येन कर्मणा भवति " " तं विद्याकर्मणी समन्वारभेते " " मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः " इत्येवमादिश्रुतिस्मृतिन्यायेभ्यः परस्माद्विलक्षणोऽन्यः संसार्यवगम्यते । तद्विलक्षणश्च परः " स एष नेति नेति " " अशनायाद्यत्येति " " य आत्माऽऽपहतपाप्मा विजरो विमृत्युः " " एतस्य वा अक्षरस्य प्रशासने " इत्यादिश्रुतिभ्यः । कणादाक्षपादादितर्कशास्त्रेषु च संसारिविलक्षण ईश्वर उपपत्तितः साध्यते । संसारदुःखापनयनार्थित्वप्रवृत्तिदर्शनात्स्फुटमन्यत्वमीश्वरात्संसारिणोऽवगम्यते । " अवाक्यनादरः " " न मे पार्थास्ति " इतिश्रुतिस्मृतिभ्यः । " सोऽन्वेष्टव्यः स विजिज्ञासितव्यः " " तं विदित्वा न लिप्यते " ब्रह्मविदाप्नोति परम् " " एकधैवानुद्रष्टव्यमेतत् " " यो वा एतदक्षरं गार्ग्यविदित्वा " " तमेव धीरो विज्ञाय " " प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते "

---

१ ग. ङ. च. ढ. °दभ्यु° । २ घ. च. ज. ढ. चेन्न तत्रा° । ३ क. च. ज. ढ. °भ्यः । काणा° । ४ ख. ग. ङ. °नयनार्थि° । ५ ग. घ. ङ. च. ढ. °स्तीत्यादिश्रु° ।

इत्यादिकर्मकर्तृनिर्देशाच्च ।

ब्रह्मभाविपुरुषकल्पनां निराकृत्य स्वपक्षे शास्त्रस्यार्थवत्त्वमुक्तं संप्रति प्रकारान्तरेण पूर्वपक्षयति—पुण्य इति । आदिशब्देन ' योऽयं विज्ञानमयः प्राणेषु ' इत्याद्या श्रुतिर्गृह्यते । ' कुरु कर्मैव तस्मात्त्वम् ' इत्याद्या स्मृतिः । न्यायो मिथो विरुद्धयोरेकत्वायोगः । विलक्षणत्वमन्यत्वे हेतुः । जीवस्य परस्मादन्यत्वेऽपि न तस्य ततोऽन्यत्वमित्याशङ्क्याऽऽह—तद्विलक्षणश्चेति । परस्य तद्विलक्षणत्वं श्रुतितो दर्शयित्वा तत्रैवोपपत्तिमाह—कणादेति । क्षित्यादिकमुपलब्धिमत्कर्तृकं कार्यत्वाद्घटवदित्यौद्योपपत्तिः । तयोर्मिथो भेदे हेत्वन्तरमाह—संसारेति । जीवस्य स्वगतदुःखध्वंसे दुःखं मे मा भूदित्यर्थित्वेन प्रवृत्तिर्दृष्टा नेशस्य साऽस्ति दुःखाभावादतो भेदस्तयोरित्यर्थः । इतश्चेश्वरस्य न प्रवृत्तिर्हेतुफलयोरभावादित्याह—अवाक्कीति । मिथो भेदे श्रौतं लिङ्गान्तरमाह—सोऽन्वेष्टव्य इति ।

मुमुक्षोश्च गतिमार्गविशेषदेशोपदेशात् । असति भेदे कस्य कुतो गतिः स्यात्तदभावे च दक्षिणोत्तरमार्गविशेषानुपपत्तिर्गन्तव्यदेशानुपपत्तिश्चेति । भिन्नस्य तु परस्मादात्मनः सर्वमेतदुपपन्नम् । कर्मज्ञानसाधनोपदेशाच्च । भिन्नश्चेद्ब्रह्मणः संसारी स्याद्युक्तस्तं प्रत्यभ्युदयनिःश्रेयससाधनयोः कर्मज्ञानयोरुपदेशो नेश्वरस्याऽऽप्तकामत्वात् । तस्माद्युक्तं ब्रह्मेति ब्रह्मभावी पुरुष उच्यत इति चेन्न । ब्रह्मोपदेशानर्थक्यप्रसङ्गात् । संसारी चेद्ब्रह्मभाव्यब्रह्म सन्विदित्वाऽऽत्मानमेवाहं ब्रह्मास्मीति सर्वमभवत्तस्य संसार्यात्मविज्ञानादेव सर्वात्मभावस्य फलस्य सिद्धत्वात्परब्रह्मोपदेशस्य ध्रुवमानर्थक्यं प्राप्तम् ।

तत्रैव लिङ्गान्तरमाह—मुमुक्षोश्चेति । गतिर्देवयानाद्या तस्या मार्गविशेषोऽर्चिरादिर्देशो गन्तव्यं ब्रह्म तेषामुपदेशास्तेऽर्चिषमभिसंभवन्तीत्यादयस्तथाऽपि कथं भेदसिद्धिस्तत्राऽऽह—असतीति । मा भूद्गतिरित्याशङ्क्याऽऽह—तदभावे चेति । कथं तर्हि गत्यादिकमुपपद्यते तत्राऽऽह—भिन्नस्येति । जीवेश्वरयोर्मिथो भेदे हेत्वन्तरमाह—कर्मेति । भेदे सत्युपपन्ना भवन्तीति शेषः । तदेव स्फुटयति—भिन्नश्चेदिति । तद्भेदे प्रामाणिकेऽपि कथं ब्रह्मभाविपुरुषकल्पनेत्याशङ्क्योप-

१ ङ. च. °शान्मुमु° । २ क. °ह—काणा° । ३ घ. °द्घटादिव° । ४ ण. °दित्युप° । ५ ञ. °त्याक्षुप° । ६ क. ख. छ. ज. झ. ढ. °शेषोप° । च. °शेषगन्तव्यदे° । ७ क. ख. ग. ङ. छ. ज. झ. ट. °शाच्च । भि । ८ ख. ञ. °दिदेशो ।

संहरति-तस्मादिति । ब्रह्मभाविनो जीवस्य ब्रह्मशब्दवाच्यत्वे ब्रह्मोपदेशस्याऽऽनर्थक्यप्रसङ्गान्नैवमिति दूषयति—नेत्यादिना । प्रसङ्गमेव प्रकटयति—संसारी चेदिति ।

तद्विज्ञानस्य क्वचित्पुरुषार्थसाधनेऽविनियोगात्संसारिण एवाहं ब्रह्मास्मीति ब्रह्मत्वसंपादनार्थ उपदेश इति चेत् । अनिर्ज्ञाते हि ब्रह्मस्वरूपे किं संपादयेदहं ब्रह्मास्मीति । निर्ज्ञातलक्षणे हि ब्रह्मणि शक्या संपत्कर्तुम् । " नायमात्मा ब्रह्म " " यत्साक्षादपरोक्षाद्ब्रह्म " " य आत्मा " " तत्सत्यं स आत्मा " " ब्रह्मविदाप्नोति परम् " इति प्रकृत्य " तस्माद्वा एतस्मादात्मनः " इति सहस्राशो ब्रह्मात्मशब्दयोः सामानाधिकरण्यादेकार्थत्वमेवेत्यवगम्यते । अन्यस्य ह्यन्यत्वे संपत्क्रियते नैकत्वे । " इदं सर्वं यदयमात्मा " इति च प्रकृतस्यैव द्रष्टव्यस्याऽऽत्मन एकत्वं दर्शयति । तस्मान्नाऽऽत्मनो ब्रह्मत्वसंपदुपपत्तिः ।

विधिशेषत्वेन ब्रह्मोपदेशोऽर्थवानिति चेत्तत्र किं कर्मविधिशेषत्वेनोपास्तिविधिशेषत्वेन वा तदर्थवत्त्वमिति विकल्प्याऽऽद्यं दूषयति—तद्विज्ञानस्येति । अविनियोगाद्विनियोजकश्रुत्याद्यभावादिति शेषः । कल्पान्तरमादत्ते—संसारिण इति । उपदेशस्य ज्ञानार्थत्वात्तदनपेक्षत्वाच्च संपत्तेस्तस्य कथं तादर्थ्यमित्याशङ्क्याऽऽह—अनिर्ज्ञाते हीति । व्यतिरेकमुक्त्वाऽन्वयमाचष्टे—निर्ज्ञातेति । पदयोः सामानाधिकरण्येन जीवब्रह्मणोरभेदावगमान्न संपत्पक्षः संभवतीति समाधत्ते—नेत्यादिना । कथमेकत्वे गम्यमानेऽपि संपदोऽनुपपत्तिरित्याशङ्क्याऽऽह—अन्यस्य हीति । एकत्वे हेत्वन्तरमाह—इदमिति । एकत्वे फलितमाह—तस्मादिति ।

न चाप्यन्यत्प्रयोजनं ब्रह्मोपदेशस्य गम्यते " ब्रह्म वेद ब्रह्मैव भवति " अभयं वै जनक प्राप्तोऽसि " " अभयं हि वै ब्रह्म भवति " इति च तदापत्तिश्रवणात । संपत्तिश्चेत्तदापत्तिर्न स्यात् । नह्यन्यस्यान्यभाव उपपद्यते । वचनात्संपत्तेरपि तद्भावापत्तिः स्यादिति चेन्न । संपत्तेः प्रत्ययमात्रत्वात् । विज्ञानस्य च मिथ्याज्ञाननिवर्तकत्वव्यतिरेकेणाकारकत्वमित्यवोचाम । न च वचनं वस्तुनः सामर्थ्यजन-

---

१ क. °ज्ञानमेव° । २ ग. ङ. च. ढ. °ति च स° । ३ ग. ङ. च. ढ. °ण्यादैकार्थ्यमे° । ४ ग. ङ. °तस्य द्र° । ५ क. ख. ण. °यमन्वाच° । ६ ङ. °शस्यावग° । ७ क. ज. वै ब्र° । ग. घ. ङ. छ. झ. वै ब्रह्माभ° । ८ क. °पत्तिज्ञापकं स्या° ।

कम्। ज्ञापकं हि शास्त्रं न कारकमिति स्थितिः। स एष इह इत्यादिवाक्येषु च परस्यैव प्रवेश इति स्थितम्। तस्माद्ब्रह्मेति न ब्रह्मभाविपुरुषकल्पना साध्वी।

किंच संपत्तिपक्षे तदापत्तिः फलमन्यद्वेति विकल्प्य द्वितीयं प्रत्याह—न चेति। आद्यं दूषयति—संपत्तिश्चेदिति। तं यथा यथेत्यादिवाक्यमाश्रित्य शङ्कते—वचनादिति। संपत्तेरमानत्वान्न तद्बलादन्यस्यान्यत्वमित्याह—नेति। तस्या मानत्वेऽप्येवं मानस्याकारकत्वात्। न च सूत्राद्युपासनादप्यन्यस्यान्यत्वं स्थितस्य नष्टस्य वाऽनुपपत्तेः। श्रुतिश्च न पूर्वसिद्धसूत्रादिभावाभिधायिनी तत्सादृश्याप्त्या तद्भावोपचारादतो ब्रह्मभावः स्वतः सिद्धो न सांपादिक इत्याह—विज्ञानस्येति। अथान्यस्यान्यभावे यथोक्तं वचनमेव शक्त्याधायकमित्याशङ्क्याऽऽह—न चेति। ब्रह्मोपदेशानर्थक्यप्रसङ्गान्न ब्रह्मभाविपुरुषकल्पनेत्युक्त्वा तत्रैव हेत्वन्तराह—स एष इति।

इष्टार्थबाधनाच्च। सैन्धवघनवदनन्तरमबाह्यमेकरसं ब्रह्मेति विज्ञानं सर्वस्यामुपनिषदि प्रतिपिपादयिषितोऽर्थः काण्डद्वयेऽप्यन्तेऽवधारणादवगम्यत इत्यनुशासनमेतावदरे खल्वमृतत्वमिति। तथा सर्वशाखोपनिषत्सु च ब्रह्मैकत्वविज्ञानं निश्चितोऽर्थः। तत्र यदि संसारी ब्रह्मणोऽन्य आत्मानमेवावेदिति कल्प्येत, इष्टस्यार्थस्य बाधनं स्यात् तथा च शास्त्रमुपक्रमोपसंहारयोर्विरोधादसमञ्जसं कल्पितं स्यात्। व्यपदेशानुपपत्तेश्च। यदि चाऽऽत्मानमेवावेदिति संसारी कल्प्येत, ब्रह्मविद्येति व्यपदेशो न स्यात्। आत्मानमेवावेदिति संसारिण एव वेद्यत्वोपपत्तेः।

ब्रह्मोपदेशस्य संपच्छेषत्वे दोषान्तरमाह—इष्टार्थेति। तदेव विवृण्वन्निष्टमर्थमाचष्टे—सैन्धवेति। यथोक्तं वस्तु तात्पर्यगम्यमस्यामुपनिषदीत्यत्र हेतुमाह—काण्डद्वयेऽपीति। मधुकाण्डावसानगतमवधारणं दर्शयति—इत्यनुशासनमिति। मुनिकाण्डान्ते व्यवस्थितमुदाहरति—एतावदिति। न केवलमुपदेशस्य संपच्छेषत्वे बृहदारण्यकविरोधः किंतु सर्वोपनिषद्विरोधोऽस्तीत्याह—तथेति। इष्टमर्थमित्थमुक्त्वा तद्बाधनं निगमयति—तत्रेति। ननु बृहदारण्यके ब्रह्मकाण्डिकायां जीवपरयोर्भेदोऽभिप्रेत उपसंहारे त्वभेद इति व्यवस्थायां तद्विरोधः शक्यः समाधातुमित्यत आह—तथा चेति। ब्रह्मभाविपुरुषकल्पनाया-

---

१ ख. ग. च. ढ. °द्ब्रह्म वा इति। २ ग. ङ °ल्पनेह सा°। ३ घ. अन्य°। ४ ग. °वद्विज्ञानघनोऽन°। ५ ग. ङ च. ढ. °त्वज्ञा°। ६ क. ग. छ. ढ. कल्पेत। ७ क. ग. ल्पेत। ८ क. ख. °वग°।

मुपदेशानर्थक्यमिष्टार्थबाधश्चेत्युक्तमिदानीं ब्रह्मेत्यादिवाक्ये ब्रह्मशब्देन परस्याग्रहणे तद्विद्यायां ब्रह्मविद्येति संज्ञानुपपत्तिं दोषान्तरमाह—व्यपदेशानुपपत्तेश्चेति ।

आत्मेति वेदितुरन्यदुच्यत इति चेन्न । अहं ब्रह्मास्मीति विशेषणात् । अन्यश्चेद्वेद्यः स्यादयमसाविति वा विशेष्येत नत्वहमस्मीति । अहमस्मीति विशेषणादात्मानमेवावोदिति चावधारणान्निश्चितमात्मैव ब्रह्मेत्यवगम्यते । तथा च सत्युपपन्नो ब्रह्मविद्याव्यपदेशो नान्यथा । संसारिविद्या ह्यन्यथा स्यात् । न च ब्रह्मत्वाब्रह्मत्वे ह्येकस्योपपन्ने परमार्थतस्तमःप्रकाशाविव भानोर्विरुद्धत्वात् ।

अथोक्तब्रह्मशब्दार्थाद्धेतुजातादन्यस्तदात्मानमित्यत्राऽऽत्मशब्देन परो गृह्यते तद्विद्या च ब्रह्मविद्येति संज्ञासिद्धिरिति शङ्कते—आत्मेति । वाक्यशेषविरोधादेवमित्याह—नाहमिति । तदेव प्रपञ्चयति—अन्यश्चेति । ययोक्तावगमे फलितमाह—तथा च सतीति । अत्यन्तभेदे व्यपदेशानुपपत्तिं विशदयति—संसारीति । जीवब्रह्मणोर्भेदाभेदोपगमादभेदेन ब्रह्मविद्येति व्यपदेशः सेत्स्यतीत्याशङ्क्याऽऽह—न चेति ।

न चोभयनिमित्तत्वे ब्रह्मविद्येति निश्चितो व्यपदेशो युक्तस्तदा ब्रह्मविद्या संसारिविद्या च स्यात् । न च वस्तुनोऽर्धजरतीयत्वं कल्पयितुं युक्तं तत्त्वज्ञानविवक्षायाम् । श्रोतुः संशयो हि तथा स्यात् । निश्चितं च ज्ञानं पुरुषार्थसाधनमिष्यते " यस्य स्याद्धा न विचिकित्साऽस्ति " " संशयात्मा विनश्यति " इति श्रुतिस्मृतिभ्याम् । अतो न संशयितो वाक्यार्थो वाच्यः परहितार्थिना ।

स्यातां वा ब्रह्मात्मनोर्भेदाभेदौ तथाऽपि भिन्नाभिन्नविद्यायां ब्रह्मविद्येति नियतो व्यपदेशो न स्यादित्याह—न चेति । निमित्तं विषयः । भिन्नाभिन्नविषया विद्या ब्रह्मविषयाऽपि भवत्येवेति व्यपदेशसिद्धिमाशङ्क्याऽऽह—तदेति । उभयात्मकत्वाद्वस्तुनस्तद्विद्याऽपि तथेति विकल्पोपपत्तिमाशङ्क्याऽऽह—न चेति । अस्तु तर्हि वस्तु ब्रह्म वाऽब्रह्म वा वैकल्पिकमित्याशङ्क्याऽऽह—श्रोतुरिति । संशयितमपि ज्ञानं वाक्यादुत्पद्यते चेत्तावतैव पुरुषार्थः श्रोतुः सिध्यतीत्याशङ्क्याऽऽह—निश्चितं चेति । श्रोतुर्निश्चितज्ञानस्य फलवत्त्वेऽपि वक्तुः संशयितमर्थं वदतो न काचन हानिरित्याशङ्क्याऽऽह—अत इति । निश्चितस्यैव

---

१ क. ञ °थायां ब्र° । २ क. °पत्तिदो° । ३ क. घ ङ. च. छ. ज. ढ. वेत्तुर° । ४ क. ख. °ति वि° । ५ ङ. ढ. °ति च वि° । ६ ख. ङ. °धान्मैव । ७ ख. °नं शास्त्राद्° । ८ घ. °रित्यत आह ।

ज्ञानस्य पुमर्थसाधनत्वं न संशयितस्येत्यतःशब्दार्थः ।

ब्रह्मणि साधकत्वकल्पनाऽस्मदादिष्विवापेशला तदात्मानमेवावेत्त-स्मात्तत्सर्वमभवदिति चेन्न । शास्त्रोपालम्भात् । न ह्यस्मत्कल्पनेयं शास्त्रकृता तु तस्माच्छास्त्रस्यायमुपालम्भः । न च ब्रह्मणि इष्टं चिकीर्षुणा शास्त्रार्थविपरीतकल्पनया स्वार्थपरित्यागः कार्यः ।

जीवपरयोरत्यन्तभेदस्य भेदाभेदयोश्चायोगात्परमेव ब्रह्म ब्रह्मशब्दवाच्यं न जीवस्तद्भावीत्युक्तं संप्रत्यत्यन्ताभेदपक्षे दोषमाशङ्क्य—ब्रह्मणीति । तदात्मानमेवावेदिति ज्ञातृत्वं ब्रह्मण्युच्यते तदयुक्तं तस्य ज्ञानमूर्तित्वादत एव न तत्कर्मत्वमपि । न च स्वकर्तृकर्मकज्ञानान्मुक्तिः परस्य क्रियाकारकफलविलक्षणत्वादतो न परं ब्रह्म ब्रह्मशब्दितमित्यर्थः । शास्त्रं ब्रह्मणि साधकत्वादि दर्शयति तच्चापौरुषेयमदोषाच्चोपलम्भार्हं तथा च तस्मिन्नाविधं साधकत्वाद्यविरुद्धमिति समाधत्ते—न शास्त्रेति । स चायुक्तस्तस्यापौरुषेयत्वेनाशंकितदोषत्वादिति शेषः । ननु ब्रह्मणो नित्यमुक्तत्वपरीक्षणार्थं शास्त्रमप्युपालभ्यते नेत्याह—न चेति । शास्त्राद्धि ब्रह्मणो नित्यमुक्तत्वं गम्यते साधकत्वादिति च तस्य तेनैवोच्यते न चार्धजरतीयमुचितं तथा च वास्तवं नित्यमुक्तत्वं कल्पितमितरदित्यास्थेयम् । यदि तस्य नित्यमुक्तत्वार्थं सर्वथैव साधकत्वादि नेष्यते तदा स्वार्थपरित्यागः स्यात्साधकत्वादिना विनाऽभ्युदयनिःश्रेयसयोरसंभवात् । न च ब्रह्मणोऽन्यश्चेतनोऽचेतनो वाऽस्ति 'नान्योऽतोऽस्ति द्रष्टा' 'ब्रह्मैवेदं सर्वम्' इत्यादिश्रुतेस्तस्माद्यथोक्ता व्यवस्थाऽऽस्थेयेत्यर्थः ।

न चैतावत्येवाक्षमा युक्ता भवतः । सर्वं हि नानात्वं ब्रह्मणि कल्पितमेव "एकधैवानुद्रष्टव्यम्" "नेह नानाऽस्ति किंचन" "यत्र हि द्वैतमिव भवति" "एकमेवाद्वितीयम्" इत्यादिवाक्यशतेभ्यः । सर्वो हि लोकव्यवहारो ब्रह्मण्येव कल्पितो न परमार्थः सन्नित्येतल्पमिदमुच्यत इयमेव कल्पनाऽपेशलेति ।

किंच सर्वस्यापि संसारस्य ब्रह्मण्यविद्ययाऽध्यासात्तदन्तर्भूतं साधकत्वाद्यपि तत्राध्यस्तमित्यभ्युपगमे काऽनुपपत्तिरित्याह—न चेति । तस्य तस्मिन्कल्पितत्वं

---

१ ख. ङ. ज्ञातार्थस्य । २ क. च. छ. ढ. °दितीति । ३ख. घ. च. छ. ज. चेत्तन्न । ४ घ. °तृकस्वक° । ५ ख. ङ. °र्मज्ञा° । ६ क. ख. ञ. °क्तिः । क्ति° । ७ घ. ञ. °दोषं नोप° । ८ घ. ञ. °विद्यकं सा° । ९ ण. °परिरक्ष° । १० ग. घ. °ल्पितं साधकत्वमित्या° । ११ ग. ङ. च. ढ. °व धरिक° । १२ ख. ग. छ झ. ढ. °त्यल्प° ।

कुतोऽवगतमित्याशङ्क्याऽऽह–एकधेति । उक्तश्रुतितात्पर्यं संकलयति–सर्वो हीति । सर्वस्य द्वैतव्यवहारस्य ब्रह्मणि कल्पितत्वे प्रकृतचोद्यस्याऽऽभासत्वं फलतीत्याह–इत्यल्पामिति ।

तस्माद्यत्प्रविष्टं स्रष्टृ ब्रह्म तद्ब्रह्म । वशब्दोऽवधारणार्थः । इदं शरीरस्थं यद्गृह्यतेऽग्र वाक्प्रतिबोधादपि ब्रह्मवाऽऽमीत्सर्वं चेदम् । किंत्वप्रतिबोधाद्ब्रह्मास्म्यसर्वं चेत्यात्मन्यध्यारोपात्कर्ताऽहं क्रियावान्फलानां च भोक्ता सुखी दुःखी संसारीति चाध्यारोपयति । परमार्थतस्तु ब्रह्मैव तद्विलक्षणं सर्वं च तत्कथंचिदाचार्येण दयालुना प्रतिबोधितं नासि संसारीत्यात्मानमेवावेत्स्वाभाविकम । अविद्याध्यारोपितविशेषवर्जितमित्येवशब्दस्यार्थः ।

परपक्षं निराकृत्य स्वपक्षं दर्शयति–तस्मादिति । तद्व्यतिरेकेण जगन्नास्तीति सूचयति –वैशब्द इति । तत्पदार्थमुक्त्वा त्वंपदार्थं कथयति––इदमिति । तयोर्वस्तुतो भेदं शङ्कित्वा पदान्तरं व्याचष्टे–प्राणिति । तस्यापरिच्छिन्नत्वमाह–सर्वं चेति । कथं तर्हि विपरीतधीरित्याशङ्क्याऽऽह–किंत्विति । यथाप्रतिभासं कर्तृत्वादेर्वास्तवत्वमाशङ्क्य शास्त्रविरोधान्नेत्याह–परमार्थतस्त्विति । तद्विलक्षणमध्यस्तसमस्तसंसाररहितमिति यावत् । किंतु तद्ब्रह्मेति चोद्यं परिहृत्य किं तदवेदिति चोद्यान्तरं प्रत्याह–तत्कथंचिदिति । पूर्ववाक्योक्तविद्याविशिष्टमधिकारित्वेन व्यवस्थितं ब्रह्म नासि संसारीत्याचार्येण दयावता कथंचिद्बोधितमात्मानमेवावेदिति संबन्धः । आत्मैव प्रमेयस्तज्ज्ञानमेव प्रमाणमित्येवमर्थत्वमेवकारस्य विवक्षन्नाह–अविद्येति ।

ब्रूहि कोऽसावात्मा स्वाभाविको यमात्मानं विदित्वद्ब्रह्म । ननु न स्मरस्यात्मानं दर्शितो ह्यसौ य इह प्रविश्य प्राणेत्यपानिति व्यानित्युदानिति समानितीति । नन्वसौ गारसावश्व इत्येवमसौ व्यपदिश्येतें भवतां नाऽऽत्मानं प्रत्यक्षं दर्शयसि । एवं तर्हि द्रष्टा श्रोता मन्ता विज्ञाता स आत्मेति ।

प्रकृतमात्मशब्दार्थं विविच्य वक्तुं पृच्छति–ब्रूहीति । स एष इह प्रविष्ट इत्यत्राऽऽत्मनो दर्शित्वात्प्राणनादिलिङ्ग[illegible]स्य त्वंपदेवानुसंधातुं शक्यत्वान्नास्ति वक्तव्यमित्याह–नन्विति । आत्म[illegible]वितुं पृच्छतस्तत्परोक्षवचनमनुत्तरमिति शङ्कते–नन्वसाविति । अ[illegible]त्यक्षयितुमिच्छति तर्हि प्रत्यक्षमेव

१ ङ. °ष्टु. त° । २ ग. झ. °ह्म वे[illegible] । ३ क. ञ. °स्तसं° । ४ क. ण. °त ब्रह्मे° ५ ङ. °ते ना° । ६ ख. घ. ङ. च. छ. ज. झ. °ता न प्र° । ७ ख. ढ. °त्मपदार्थ° ।

तं दर्शयामीत्याह—एवं तर्हीति ।

नन्वत्रापि दर्शनादिक्रियाकर्तुः स्वरूपं न प्रत्यक्षं दर्शयसि । नहि गमिरेव गन्तुः स्वरूपं छिदिर्वा छेत्तुः । एवं तर्हि दृष्टेर्द्रष्टा श्रुतेः श्रोता मतेर्मन्ता विज्ञातेर्विज्ञाता स आत्मेति ।

नेदं प्रतिज्ञानरूपं प्रतिवचनमिति चोदयति—नन्वत्रेति । प्रत्यक्षत्वाद्दर्शनादिक्रियायास्तत्कर्तुः स्वरूपमपि तथेत्याशङ्क्याऽऽह—नहीति । यदि दर्शनादिक्रियाकर्तृस्वरूपोक्तिमात्रेण जिज्ञासा नोपशाम्यति तर्हि दृष्ट्यादिसाक्षित्वेनाऽऽत्मोक्त्या तुष्यतु भवानित्याह—एवं तर्हि दृष्टेरिति ।

नन्वत्र को विशेषो द्रष्टरि यदि दृष्टेर्द्रष्टा यदि वा घटस्य द्रष्टा सर्वथाऽपि द्रष्टैव द्रष्टव्य एव तु भवान्विशेषमाह दृष्टेर्द्रष्टेति द्रष्टा तु यदि दृष्टेर्यदि वा घटस्य द्रष्टा द्रष्टैव । न, विशेषोपपत्तेः । अस्त्यत्र विशेषो यो दृष्टेर्द्रष्टा स दृष्टिश्चेद्भवति नित्यमेव पश्यति दृष्टिं न कदाचिदपि दृष्टिर्न दृश्यते द्रष्टा तत्र द्रष्टुर्दृष्ट्या नित्यया भवितव्यम् । अनित्या चेद्द्रष्टुर्दृष्टिस्तत्र दृश्या या दृष्टिः सा कदाचिन्न दृश्येतापि यथाऽनित्यया दृष्ट्या घटादि वस्तु । न च तद्वद्दृष्टेर्द्रष्टा कदाचिदापे न पश्यति दृष्टिम् ।

पूर्वस्मात्प्रतिवचनादस्मिन्प्रतिवचने द्रष्टृविषयो विशेषो नास्तीति शङ्कते—नन्विति । विशेषाभावं विशदयति—यदीत्यादिना । घटस्य द्रष्टा दृष्टेर्द्रष्टेति विशेषे प्रतीयमाने तदभावोक्तिर्व्याहतेत्याशङ्क्याऽऽह—द्रष्टव्य एवेति । तथा द्रष्टर्यपि विशेषो भविष्यतीत्याशङ्क्याऽऽह—द्रष्टा त्विति । वृत्तिमदन्तःकरणावच्छिन्नः सविकारो घटद्रष्टा कूटस्थचिन्मात्रस्वभावः सन्निधिसत्तामात्रेण बुद्धितद्वृत्तीनां द्रष्टेति विशेषमङ्गीकृत्य परिहरति—नेत्यादिना । एतदेव स्फुटयति—अस्तीति । सप्तमी द्रष्टारमविकरोति । दृष्टेर्द्रष्टुस्तावदन्वयव्यतिरेकाभ्यां विशेषं विशदयति—यो दृष्टेरिति । भवतु दृष्टिसद्भावे द्रष्टुः सदा तद्द्रष्टृत्वं तथाऽपि कथं कूटस्थद्रष्टृत्वमित्याशङ्क्याऽऽह—तत्रेति । नित्यत्वमुपपादयति—अनित्या चेदिति । उक्तपक्षपरामर्शार्था सप्तमी । कादाचित्के द्रष्टृदृश्यत्वे दृष्टान्तमाह—यथेति । घटादिवद्दृष्टिरपि कदाचिदेव द्रष्टा दृश्यते न सर्वदेत्यनिष्टापत्त्यभावमाशङ्क्याऽऽह—न चेति । विकारिणश्चित्तस्याद्रष्टृत्वं कथं द्रष्टृत्वमन्यथाद्रष्टृत्वं च दृष्टं तत्साक्षिणो व्यावर्तमानं तस्य निर्विकारत्वं गमयतीति भावः ।

किं द्वे दृष्टी द्रष्टुर्नित्याऽदृश्याऽनित्या दृश्येति । बाढम् । प्रसिद्धा

१ ण. प्रत्यक्षानु° । २ ण. °स्य द्र° । ३ ढ. वर्त्यमा° ।

तावदनित्या दृष्टिरन्धानन्धत्वदर्शनात् । नित्यैव चेत्सर्वोऽनन्ध एव स्यात् । द्रष्टुस्तु नित्या दृष्टिः "नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते" इति श्रुतेरनुमानाच्च । अन्धस्यापि घटाद्याभासविषया स्वप्ने दृष्टिरुपलभ्यते । सा तर्हीतरदृष्टिनाशे न नश्यति सा द्रष्टुर्दृष्टिस्तयाऽविपरिलुप्तया नित्यया दृष्ट्या स्वरूपभूतया स्वयंज्योतिःसमाख्ययेतरामनित्यां दृष्टिं स्वप्नबुद्धान्तयोर्वासनाप्रत्ययरूपां नित्यमेव पश्यन्दृष्टेर्द्रष्टा भवति । एवं च सति दृष्टिरेव स्वरूपमस्याग्न्यौष्ण्यवन्न काणादानामिव दृष्टिव्यतिरिक्तोऽन्यश्चेतनो द्रष्टा ।

दृष्टिद्वयं प्रमाणाभावादश्लिष्टमिति शङ्कते—किमिति । तदुभयमङ्गीकरोति—बाढमिति । तत्रानित्यां दृष्टिमनुभवेन साधयति—प्रसिद्धेति । उक्तमर्थं युक्त्या व्यक्तीकरोति—नित्यैवेति । संप्रति नित्यां दृष्टिं श्रुत्या समर्थयते—द्रष्टुरिति । तत्रैवोपपत्तिमाह—अनुमानाच्चेति । तदेव विवृणोति—अन्धस्यापीति । जागरिते चक्षुरादिहीनस्यापि पुंसः स्वप्ने वासनामयघटादिविषया दृष्टिरुपलब्धा या च सा तस्मिन्काले चक्षुरादिजनितदृश्यभावेऽपि स्वयमविनश्यन्त्यनुभूयते सा द्रष्टुः स्वभावभूतार्थदृष्टिर्नित्यैष्टव्या । विमतं नित्यमव्यभिचारित्वात्परेष्टात्मवादीति प्रयोगोपपत्तिरित्यर्थः । नन्वात्मा दृष्टिस्तदभावश्चेत्कथं दृष्टेर्द्रष्टेत्युक्तमत आह—तथेति । नित्यत्वे हेतुः—अविपरिलुप्तयेति । नित्यद्वयं परिहर्तुं स्वरूपभूतयेत्युक्तम् । तस्या दृष्टयन्तरापेक्षां वारयति—स्वयमिति । उक्तमविपरिलुप्तत्वं व्यनक्ति—इतरामिति । आत्मा दृष्टेर्द्रष्टेति स्थिते फलितमाह—एवं चेति । अन्यश्चेतनोऽचेतनो वेति शेषः ।

तद्ब्रह्माऽऽत्मानमेव नित्यदृग्रूपमध्यारोपितानित्यदृष्ट्यादिवर्जितमेवावेद्विदितवत् । ननु विप्रतिषिद्धम् । "न विज्ञातेर्विज्ञातारं विजानीयाः" । इति श्रुतेर्विज्ञातुर्विज्ञानम् । न, एवं विज्ञानान्न विप्रतिषेधः । एवं दृष्टेर्द्रष्टेति विज्ञायत एव । अन्यज्ञानानपेक्षत्वाच्च । न च द्रष्टर्नित्यैव दृष्टिरित्येवं विज्ञाते द्रष्टृविषयां दृष्टिमन्यामाकाङ्क्षते । निवर्तते हि द्रष्टुर्विषयदृष्ट्याकाङ्क्षा तदसंभवादेव । नह्यविद्यमाने विषय आकाङ्क्षा कस्यचिदुपजायते । न च दृष्ट्वा दृष्टिर्द्रष्टारं विषयीकर्तुमुत्सहते । यतस्तामाकाङ्क्षेत । नच स्वरूपविषयाकाङ्क्षा स्वस्यैव । तस्मादज्ञानाध्यारोपणनिवृत्तिरेवाऽऽत्मानमेवावेदित्युक्तं नाऽऽत्मनो विषयीकरणम् ।

---

१ च. ढ. °शे सति न । २ क. °ति द्र° । ३ ग. स्वप्नान्तबु° । ४ घ ङ. ज °दादीना° । ५ क. घ. ङ. च छ. ज. झ. ढ. °क्कोऽन्योऽचेत° । ६ ढ. °स्वल्पभू° । ७ घ. ञ. ण. °ता दृ° । ८ ण. °त्यैवेष्ट° । ९ घ. ण. °नो वे° । १० ङ. च. ढ. °तमवे° ।

नित्यदृष्टिस्वभावमात्मपदार्थं पा[illegible] श्रुत्यक्षराणि योजयति—तद्ब्रह्मेति। वाक्यशेषविरोधं चोदयति—नन्विति [illegible] कर्मत्वेनाऽऽत्मनो ज्ञानं विरुध्यते किं वा साक्षित्वेनेति वाच्यं नाऽऽद्योऽनभ्युपगमा[illegible]याह—नेति। न द्वितीय इत्याह—एवमिति। तदेव स्पष्टयति—एवं दृष्टेरिति। तर्हि तद्विषयं ज्ञानान्तरमपेक्षितव्यमिति कुतो विरोधो न प्रसरतीत्याशङ्क्याऽऽह—अन्यज्ञानेति। न विप्रतिषेध इति पूर्वेण संबन्धः। संगृहीतमर्थं विवृणोति—नचेति। नित्यैव स्वरूपभूतेति शेषः। विज्ञातृत्वं वाक्यीयबुद्धिवृत्तिव्याप्यत्वम्। अन्यां दृष्टिं स्फुरणलक्षणाम्। आत्मविषयस्फुरणाकाङ्क्षाभावं प्रतिपादयति—निवर्तते हीति। आत्मनि स्फुरणरूपे स्फुरणस्यान्यस्यासंभवेऽपि कुतस्तदाकाङ्क्षोपशान्तिरित्याशङ्क्याऽऽह—नहीति। किंच द्रष्टरि दृश्याऽदृश्या वा दृष्टिरपेक्ष्यते नाऽऽद्य इत्याह—नचेति। आदित्यप्रकाशस्य रूपादेस्तत्प्रकाशकत्वाभावादिति भावः। न द्वितीय इत्याह—नचेति। आत्मनो वृत्तिव्याप्यत्वेऽपि स्फुरणव्याप्यत्वाङ्गीकरणान्न वाक्यशेषविरोधोऽस्तीत्युपसंहरति—तस्मादिति।

तत्कथमवेदित्याह—अहं दृष्टेर्द्रष्टाऽऽत्मा ब्रह्मास्मि भवामीति। ब्रह्मेति यत्साक्षादपरोक्षात्सर्वान्तर आत्माऽज्ञानायाद्यतोतो नेति नेत्यस्थूलमनण्वित्येवमादिलक्षणं तदेवाहमस्मि नान्यः संसारी यथा भवानाहेति। तस्मादेवं विज्ञानात्तद्ब्रह्म सर्वमभवत्। अब्रह्माध्यारोपणापगमात्तत्कार्यस्यासर्वत्वस्य निवृत्त्या सर्वमभवत्। तस्माद्युक्तमेव मनुष्या मन्यन्ते यद्ब्रह्मविद्यया सर्वं भविष्याम इति। यत्पृष्टं किमु तद्ब्रह्मावेद्यस्मात्तत्सर्वमभवादिति तन्निर्णीतं ब्रह्म वा इदमग्र आसीत्तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात्तत्सर्वमभवादिति।

वाक्यान्तरमाकाङ्क्षापूर्वकमादत्ते—तत्कथमिति। तदक्षराणि व्याचष्टे—दृष्टेरिति। इतिपदमवेदित्यनेन संबध्यते। ब्रह्मशब्दं व्याचष्टे—ब्रह्मेतीति। ब्रह्मांहंपदार्थयोर्मिथो विशेषणविशेष्यभावमभिप्रेत्य वाक्यार्थमाह—तदेवेति। आचार्योपदिष्टेऽर्थे स्वस्य निश्चयं दर्शयति—यथेति। इतिशब्दो वाक्यार्थज्ञानसमाप्त्यर्थः। इदानीं फलवाक्यं व्याचष्टे—तस्मादिति। सर्वभावमेव व्याकरोति—अब्रह्मेति। ब्रह्मैवाविद्यया संसरति विद्यया च मुच्यत इति पक्षस्य निर्दोषत्वमुपसंहरति—तस्माद्युक्तमिति। वृत्तं कीर्तयति—यत्पृष्टमिति।

---

१ घ. ञ °त्वं चात्र वा°। २ क. ख. घ. ढ. ण °पेक्षत। ३ ख. ग. ङ. निवृत्तौ। ४ क. ख. ङ. ज. झ. ट. °वेत्तस्मा°। ५ ढ. °पदयो°।

तत्तत्र यो यो देवानां मध्ये प्रत्यबुध्यत प्रतिबुद्धवानात्मानं यथोक्तेन विधिना स एव प्रतिबुद्ध आत्मा तद्ब्रह्माभवत्तथर्षीणां तथा मनुष्याणां च मध्ये । देवानामित्यादि लोकदृष्ट्यपेक्षया न ब्रह्मत्वबुद्ध्योच्यते । पुरः पुरुष आविशदिति सर्वत्र ब्रह्मैवानुप्राविष्टमित्यवोचाम । अतः शरीरायुपाधिजनितलोकदृष्ट्यपेक्षया देवानामित्याद्युच्यते । परमार्थतस्तु तत्र तत्र ब्रह्मैवाग्र आसीत्प्राक्प्रतिबोधाद्देवादिशरीरेष्वन्यथैव विभाव्यमानम् । तदात्मानमेवावेत्तथैव च सर्वमभवत् ।

यथाऽग्निहोत्रादि मनुष्यत्वादिजातिमन्तमार्थित्वादिविशेषवन्तं चाधिकारिणमपेक्षते न तथा ज्ञानमिति वक्तुं तद्यो यो देवानामित्यादिवाक्यं तदक्षराणि व्याचष्टे—तत्तत्रेति । यथोक्तेन विधिनाऽन्वयादिकृतपदार्थपरिशोधनादिनेत्यर्थः । ज्ञानादेव मुक्तिर्न साधनान्तरादित्येवकारार्थः । विवक्षितमधिकार्यनियमं प्रकटयति—तथेत्यादिना । यो यः प्रत्यबुध्यत स एव तदभवदिति पूर्वेण संबन्धः । ब्रह्मैवाविद्यया संसरति मुच्यते च विद्ययेत्युक्तत्वाद्देवादीनां विद्याविद्याभ्यां बन्धमोक्षोक्तिस्तद्विरुद्धेत्याशङ्क्याऽऽह—देवानामित्यादीति । तत्त्वदृष्ट्यैव भेदवचने का हानिरित्याशङ्क्याऽऽह—पुर इति । आविद्यकं भेदमनूद्य तत्तदात्मना स्थितब्रह्मचैतन्यस्यैव विद्याविद्याभ्यां बन्धमोक्षोक्तिर्न पूर्वापरविरोधोऽस्तीति फलितमाह—अत इति । अविद्यादृष्टिमनूद्य तत्त्वदृष्टिमन्वाचष्टे—परमार्थतस्त्विति । प्रबोधात्पागपि तत्र तत्र देवादिशरीरेषु परमार्थतो ब्रह्मैवाऽऽसीच्चौपदेशिकं ज्ञानमनर्थकमित्याशङ्क्याऽऽह—अन्यथैवेति । नानाजीववादस्य तु नावकाशः पक्षमविरोधादित्याशयेनाऽऽह—तादिति । तथेवेत्युत्पन्नज्ञानानुसारित्वपरामर्शः ।

अस्या ब्रह्मविद्यायाः सर्वभावापत्तिः फलमित्येतन्याय्यस्य द्रढिम्ने मन्त्रानुदाहरति श्रुतिः । कथम् । तद्ब्रह्मैतदात्मानमेवाहमस्मीति पश्यन्नेतस्मादेव ब्रह्मणो दर्शनाद्दृषिर्वामदेवाख्यः प्रतिपेदे ह प्रतिपन्नवान्किल । स एतस्मिन्ब्रह्मात्मदर्शनेऽवस्थित एतान्मन्त्रान्ददर्श—अहं मनुरभवं सूर्यश्चेत्यादीन् । तदेतद्ब्रह्म पश्यन्निति ब्रह्मविद्या परामृश्यते । अहं मनुरभवं सूर्यश्चेत्यादिना सर्वभावापत्तिं ब्रह्मविद्याफलं परामृ-

---

१ ग. °बुद्धात्मा । २ घ ङ. छ. ञ. °वद्ब्रह्माध्यारोषणापगमात्तत्कार्यस्यासर्वत्वस्य निवृत्त्या सर्वमभवत्त° । ३ क. °ख. घ. ङ. छ ज झ ढ. °वादीना° । ४ क. घ. छ. झ. °वान्तः प्र° । ५ झ. °वादीना° । ६ ख. घ. ढ. °वादीना° । ७ ञ. ण. °विद्यं भे° । ८ क. ख. घ. ञ. ढ. °त्र दे° । ९ ग. °वाहं ब्रह्मास्मी° । १० ढ. °श्वेतीत्या° ।

शति । पश्यन्सर्वात्मभावं फलं प्रतिपद्य इत्यस्मा प्रयोगाद्ब्रह्मविद्यासहायसाधनसाध्यं मोक्षं दर्शयति । भुञ्जानस्तृप्यतीति यद्वत् ।

तद्वैतदित्यादिवाक्यमवतार्य व्याकरोति—अस्या इति । मन्त्रोदाहरणश्रुतिमेव प्रश्नद्वारा व्याचष्टे—कथमित्यादिना । ज्ञानान्मुक्तिरित्यस्यार्थवादोऽयमिति द्योतयितुं किलेत्युक्तम् । आदिपदं समस्तवामदेवसूक्तग्रहणार्थम् । तत्रावान्तरविभागमाह—वदेतादिति । शतृप्रत्ययप्रयोगप्राप्तमर्थं कथयति—पश्यन्निति । "लक्षणहेत्वोः क्रियायाः" (पा० सू० ३ । २ । १२६) इति हेतौ शतृप्रत्ययविधानाच्चैरन्तर्ये च सति हेतुत्वसंभवात्प्रकृते च प्रत्ययबलाद्ब्रह्मविद्यामोक्षयोर्नैरन्तर्यप्रतीतेस्तया साधनान्तरानपेक्षया लब्धं मोक्षं दर्शयति श्रुतिरित्यर्थः । अत्रोदाहरणमाह—भुञ्जान इति । भुजिक्रियामात्रसाध्या हि तृप्तिरत्र प्रतीयते तथा पश्यन्नित्यादावपि ब्रह्मविद्यामात्रसाध्या मुक्तिर्भातीत्यर्थः ।

सेयं ब्रह्मविद्यया सर्वभावापत्तिरासान्महतां देवादीनां वीर्यानिशयाज्ञेदानीमेदंयुगीनानां विशेषतो मनुष्याणामल्पवीर्यत्वादिति स्यात्कस्यचिद्बुद्धिस्तद्व्युत्थापनायाऽऽह—तदिदं प्रकृतं ब्रह्म यत्सर्वभूतानुप्रविष्टं दृष्टिक्रियादिलिङ्गमेतर्ह्येतस्मिन्नपि वर्तमानकाले यः कश्चिद्व्यावृत्तबाह्योत्सुक्य आत्मानमेवैवं वेदाहं ब्रह्मास्मीति अपोह्योपाधिजनितभ्रान्तिविज्ञानाध्यारोपितान्विशेषान्संसारधर्मानागन्धितमनन्तरमबाह्यं ब्रह्मैवाहमस्मि केवलमिति । सोऽविद्याकृतासर्वत्वनिवृत्तेर्ब्रह्मविज्ञानादिदं सर्वं भवति नाहि महावीर्येषु वामदेवादिषु हीनवीर्येषु वा वार्तमानिकेषु मनुष्येषु ब्रह्मणो विशेषस्तद्विज्ञानस्य वाऽस्ति ।

तद्वैतदित्यादि व्याख्याय तदितमित्याद्यवतारयितुं शङ्कते—सेयमिति । ऐदंयुगीनानां कलिकालवर्तिनामिति यावत् । उत्तरवाक्यमुत्तरत्वेनावतार्य व्याकरोति—तद्व्युत्थापनायेति । तस्य तात्स्थ्यं वारयति—यत्सर्वभूतेति । प्रविष्टे प्रमाणमुक्तं स्मारयति—दृष्टीति । व्यावृत्तं बाह्येषु विषयेषूत्सुकं साभिलाषं मनो यस्य स तथोक्तः । एवंशब्दार्थमेवाऽऽह—अहमिति । तदेवं ज्ञानं विवृणोति—अपोह्येति । यद्वा मनुष्योऽहमित्यादिज्ञाने परिपन्थिनि कथं ब्रह्माहमिति ज्ञानमित्याशङ्क्याऽऽह—अपोह्येति । अहमित्यात्मज्ञानं सदा सिद्धमिति न तदर्थं प्रयति-

---

१ क. ख. ढ. °स्तिस्तत्र । २ घ. ञ. ण. °स्तिर्विभातीं । ३ घ. छ. ज. झ. °विद्यायाः स° । ४ क. °पि च व° । ग. °पि क्व° । ५ ख. ङ. छ. ज. झ. °माने का° । ६ छ. ढ. वा दे° । ७ घ. छ. ज. चास्ति । ८ क. ख. ञ. ङ. शङ्कयति । ज. शङ्कां कथयति । से° । ९ क. ण. °त्तरं वा° ।

तव्यमित्याशङ्क्याऽऽह—संसारेति । केवलमित्यद्वितीयत्वमुच्यते । ज्ञानमुक्त्वा तत्फलमाह—सोऽविद्येति । यत्तु देवादीनां महावीर्यत्वाद्ब्रह्मविद्यया मुक्तिः सिध्यति नास्मदादीनामल्पवीर्यत्वादिति तत्राऽऽह—नहीति ।

वार्तमानिकेषु पुरुषेषु तु ब्रह्मविद्याफलेऽनैकान्तिकता शङ्क्यत इत्यत आह—तस्य ह ब्रह्मविज्ञातुर्यथोक्तेन विधिना देवा महावीर्याश्चनाप्यभूत्या अभवनाय ब्रह्मसर्वभावस्य नेशते न पर्याप्ताः किमुतान्ये ।

श्रेयांसि बहुविघ्नानीति प्रसिद्धिमाश्रित्य शङ्कते—वार्तमानिकेष्विति । कङ्क्षेत्तरत्वेनोत्तरवाक्यमादाय व्याकरोति—अत आहेत्यादिना । यथोक्तेनान्वयादिना प्रकारेण ब्रह्मविज्ञातुरिति संबन्धः । अपिशब्दार्थं कथयति—किमुतेति । अल्पवीर्यास्तत्र विघ्नकरणे पर्याप्ता नेति किमुत वाच्यमिति योजना ।

ब्रह्मविद्याफलप्राप्तौ विघ्नकरणे देवादय ईशत इति का शङ्केति । उच्यते—देवादीन्प्रति ऋणवत्त्वान्मर्त्यानाम् । "ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः" इति हि जायमानमेवर्णवन्तं पुरुषं दर्शयति श्रुतिः । पशुनिदर्शनाच्चाथो अयं वा इत्यादिलोकश्रुतेश्चाऽऽत्मनो वृत्तिपरिपिपालयिषयाऽधमर्णानिव देवाः परतन्त्रान्मनुष्यान्प्रत्यमृतत्वप्राप्तिं प्रति विघ्नं कुर्युरिति न्याय्यैवैषा शङ्का ।

अप्राप्तप्रतिषेधायोगमभिप्रेत्य चोदयति—ब्रह्मविद्येति । शङ्कानिमित्तं दर्शयन्नुत्तरमाह—उच्यत इति । अधमर्णानिवोत्तमर्णा देवादयो मर्त्यान्प्रति विघ्नं कुर्वन्तीति शेषः । कथं देवादीन्प्रति मर्त्यानामृणित्वं तत्राऽऽह—ब्रह्मचर्येणेति यथा पशुरेवं स देवानामिति मनुष्याणां पशुसादृश्यश्रवणाच्च तेषां पारतन्त्र्यादेवादयस्तान्प्रति विघ्नं कुर्वन्तीत्याह—पशुवदिति । 'अथो अयं वा आत्मा सर्वेषां भूतानां लोकः' इति च तेषां सर्वप्राणिभोग्यश्रुतेश्च सर्वे तद्विघ्नकरा भवन्तीत्याह—अथो इति । लोकश्रुत्यभिप्रेतमर्थं प्रकटयति—आत्मन इति । यथाऽधमर्णा अप्युत्तमर्णा विघ्नमाचरन्ति तथा देवादयः स्वस्थितिपरिरक्षणार्थं परतन्त्रान्कर्मिणः प्रत्यमृतत्वप्राप्तिमुद्दिश्य विघ्नं कुर्वन्तीति तेषां तान्प्रति विघ्नकर्तृत्वशङ्का सावकाशैवेत्यर्थः ।

स्वपशून्स्वशरीराणीव च रक्षन्ति देवाः । महत्तरां हि वृत्तिं कर्माधीनां दर्शयिष्यति देवादीनां बहुपशुसमतयैकैकस्य पुरुषस्य । "तस्मा-

---

१ ग. ङ. च. ढ. °क्तेनैव वि° । २ घ. ढ. ण. °त्तरं वा° । ३ घ. ञ. ण. °र्यास्तु तत्र । ४ च. ङ. °व चर्ण° । ५ ग. °र्णत्रयव° । ६ क. घ. च. छ. °प्राप्तिवि° । ७ ग. °प्तिं वि° । ८ च. ञ. °र्णान्मनुष्यान्प्रत्यु° ।

देषां तन्न प्रियं यदेतन्मनुष्या विदुः" इति हि वक्ष्यति। "यथा ह वै स्वाय लोकायारिष्टिमिच्छेदेवं हैवंविदे सर्वाणि भूतान्यरिष्टिमिच्छन्ति' इति च ब्रह्मवित्त्वे पारार्थ्यनिवृत्तेर्न स्वलोकत्वं पशुत्वं चेत्यभिप्रायोऽप्रियारिष्टिवचनाभ्यामवगम्यते तस्माद्ब्रह्मविदो ब्रह्मविद्याफलप्राप्तिं प्रति कुर्युरेव विघ्नं देवाः। प्रभाववन्तश्च हि ते।

पशुनिदर्शनेन विवक्षितमर्थं विवृणोति—स्वपशूनिति। पशुस्थानीयानां मनुष्याणां देवादिभी रक्ष्यत्वे हेतुमाह—महत्तरामिति। इतश्च देवादीनां मनुष्यान्प्रति विघ्नकर्तृत्वममृतत्वप्राप्तौ संभावितमित्याह—तस्मादिति। ततश्च तेषां तान्प्रति विघ्नकर्तृत्वं भातीत्याह—यथेति। स्वलोको देहः। एवंवित्त्वं सर्वभूतभोज्योऽहमिति कल्पनावत्त्वम्। क्रियापदानुषङ्गार्थश्चकारः। ब्रह्मवित्त्वेऽपि मनुष्याणां देवादिभारत-त्र्यविघातात्किमिति ते विघ्नमाचरन्तीत्याशङ्क्याऽऽह—ब्रह्मवित्त्व इति। देवादीनां मनुष्यान्प्रति विघ्नकर्तृत्वे शङ्कामुपादितामुपसंहरति—तस्मादिति। न केवलमुक्तहेतुबलादेव किंतु सामर्थ्यादित्याह—प्रभाववन्तश्चेति।

नन्वेवं सत्यन्यास्वपि कर्मफलप्राप्तिषु देवानां विघ्नकरणं पेयपानसमम्। हन्त तर्ह्यविश्रम्भोऽभ्युदयनिःश्रेयससाधनानुष्ठानेषु। तथेश्वरस्याचिन्त्यशक्तित्वाद्विघ्नकरणे प्रभुत्वम्। तथा कालकर्ममन्त्रौषधितपसामेषां हि फलसंपत्तिविपत्तिहेतुत्वं शास्त्रे लोके च प्रसिद्धम्। अतोऽप्यनाश्वासः शास्त्रार्थानुष्ठाने।

सामर्थ्याच्चेद्विद्याफलप्राप्तौ तेषां विघ्नकरणं तर्हि कर्मफलप्राप्तावपि स्यादित्यतिप्रसङ्गं शङ्कते—नन्विति। भवतु तेषां सर्वत्र विघ्नाचरणमित्यत आह—हन्तेति। अविश्रम्भो विश्वासाभावः। सामर्थ्याद्विघ्नकर्तृत्वेऽतिप्रसक्त्यन्तरमाह—तथेति। अतिप्रसङ्गान्तरमाह—तथा कालेति। विघ्नकरणे प्रभुत्वमिति पूर्वेण संबन्धः। ईश्वरादीनां यथोक्तकार्यकरत्वे प्रमाणमाह—एषां हीति। एष ह्येव साधु कर्म कारयति। कर्म हैव तदूचतुरित्यादिवाक्यं शास्त्रशब्दार्थः। देवादीनां विघ्नकर्तृत्ववदीश्वरादीनामपि तत्संभवाद्वेदार्थानुष्ठाने विश्वासाभावात्तदप्रामाण्यं प्राप्तमिति फलितमाह—अतोऽपीति।

न, सर्वपदार्थानां नियतनिमित्तोपादानाज्जगद्वैचित्र्यदर्शनाच्च। स्वभावपक्षे च तदुभयानुपपत्तेः। सुखदुःखादिफलनिमित्तं कर्मेत्येत-

---

१ ग. °देवमेवं°। २ ग. छ. प्रतापवन्त°। ३ घ. ण °ति तत्कर्तृ°। ४ ण. °ति ह्येवो लो°। ५ च. ढ. °रणेनासहमानत्वं चेत्। ह°। ६ ख. ग. ङ. ज. °विश्रम्भो°। ७ ण. °विश्रम्भो।

स्मिन्पक्षे स्थिते वेदस्मृतिन्यायलोकपरिगृहीते देवेश्वरकालास्तावन्न कर्मफलविपर्यासकर्तारः । कर्मणां काङ्क्षितकारकत्वात् । कर्म हि शुभाशुभं पुरुषाणां देवकालेश्वरादिकारकमनपेक्ष्य नाऽऽत्मानं प्रति लभते । लब्धात्मकमपि फलदानेऽसमर्थम् । क्रियाया हि कारकाद्यनेकनिमित्तोपादानस्वाभाव्यात् । तस्मात्क्रियानुगुणा हि देवेश्वरादय इति कर्मसु तावन्न फलप्राप्तिं प्रत्यविलम्भः ।

किमिदमवैदिकस्य चोद्यं किंवा वैदिकस्येति विकल्प्याऽऽद्यं दूषयति—नेत्यादिना । दृष्ट्याद्युत्पिपादयिषया दुग्धाद्यादानदर्शनात्प्राणिनां सुखदुःखादितारतम्यदृष्टेः स्वभाववादे च नियतनिमित्तादानवैचित्र्यदर्शनयोरनुपपत्तेस्तदयोगात्कर्मफलं जगदेष्टव्यमित्यर्थः । द्वितीयं प्रत्याह—सुखेति । ' कर्म हैव ' इत्याद्या श्रुतिः । ' कर्मणा बध्यते जन्तुः ' इत्याद्या स्मृतिः । जगद्वैचित्र्यानुपपत्तिश्च न्यायः । कथमेतावता देवादीनां कर्मफले विघ्नकर्तृत्वाभावस्तत्राऽऽह—कर्मणामिति । कथं हेतुसिद्धिरित्याशङ्क्य कर्मणः स्वोत्पत्तौ देवाद्यपेक्षां व्यतिरेकमुखेन (ण) दर्शयति—कर्म हीति । स्वफलेऽपि तस्य तत्सापेक्षत्वमस्तीत्याह—लब्धेति । निष्पन्नमपि कर्म पूर्वोक्तं कारकमनपेक्ष्य स्वफलदाने शक्तं न भवतीत्यर्थः । कर्मणः स्वोत्पत्तौ स्वफले च कारकसापेक्षत्वे हेतुमाह—क्रियाया हीति । काङ्क्षादीनामनेकेषां निमित्तानामुपादानेन स्वभावो निष्पद्यते यस्याः सा तथोक्ता तस्या भाव कारकाद्यनेकनिमित्तोपादानस्वाभाव्यं तस्मादुभयत्र परतन्त्रं कर्मेत्यर्थः । देवादीनां कर्मापेक्षितकारकत्वे फलितमाह—तस्मादिति ।

कर्मणामप्येषां वशानुगत्वं क्वचित्स्वसामर्थ्यस्याप्रणोद्यत्वात् । कर्मकालदैवद्रव्यादिस्वभावानां गुणप्रधानभावस्त्वनियतो दुर्विज्ञेयश्चेति तत्कृतो मोहो लोकस्य । कर्मैव कारकं नान्यत्फलप्राप्ताविति कोचित् । दैवमेवेत्यपरे । काल इत्येके । द्रव्यादिस्वभाव इति केचित् । सर्व एते संहता एवेत्यपरे । तत्र कर्मणः प्राधान्यमङ्गीकृत्य वेदस्मृतिवादाः " पुण्यो वै पुण्येन कर्मणा भवति पापः पापेन " इत्यादयः । यद्येषां स्वविषये कस्यचित्प्राधान्योद्भव इतरेषां तत्कालीनप्राधान्यशक्तिस्तम्भस्तथाऽपि न कर्मणः फलप्राप्तिं प्रत्यनैकान्तिकत्वम् । शास्त्रन्यायनिर्धारितत्वात्कर्मप्राधान्यस्य ।

---

१ ग. च. छ. ज. झ. कर्मणा । २ च. ढ. देवकालेश्व° । ३ ख. ग. ङ. ज. °विघ्न° भः । ४ घ. ञ. °मित्तोपादा° । ५ घ. ञ. कर्मणेति । ६ण. कर्मेति । घ. ञ. ण. विशदयति । ७ च. ङ. इत्यन्ये । ८ च. छ. ढ. °र्मप्रा° ।

इतोऽपि कर्मफले नाविप्रम्भोऽस्तीत्याह—**कर्मणामिति** । एषां देवादीनां क्वचिद्विघ्नलक्षणे कार्ये कर्मणां वशवर्तित्वमेष्टव्यं प्राणिकर्मापेक्षामन्तरेण विघ्नकरणेऽतिप्रसङ्गादतोऽन्यत्रापि सर्वत्र तेषां तदपेक्षा वाच्येत्यर्थः । तत्र तेषां कर्मवशवर्तित्वे हेत्वन्तरमाह—**स्वसामर्थ्यस्येति** । विघ्नलक्षणं हि कार्यं दुःखमुत्पादयति । न च दुःखमृते पापादुपपद्यते । दुःखविषये पापसामर्थ्यस्य शास्त्राधिगम्यत्वात्तस्मात्प्राणिनामदृष्टवशादेव देवादयो विघ्नकारणमित्यर्थः । देवादीनां कर्मपारतन्त्र्ये कर्म तत्परतन्त्रं न स्यात्प्रधानगुणभावावैपरीत्यायोगादित्याशङ्क्याऽऽह—**कर्मेति** । इतश्च नामीषां नियतो गुणप्रधानभावोऽस्तीत्याह—**दुर्विज्ञेयश्चेति** । इतिशब्दो हेत्वर्थः । यतो गुणप्रधानकृतो मतिविभ्रमो लोकस्योपलभ्यते तस्मादसौ दुर्विज्ञेयो न नियतोऽस्तीति योजना । मतिविभ्रमे कादिविप्रतिपत्तिं हेतुमाह—**कर्मवेत्यादिना** । कथं तर्हि निश्चयस्तत्राऽऽह—**तत्रेति** । वेदवादानुदाहरति—**पुण्यो वा इति** । आदिशब्देन 'धर्मरज्ज्वा बद्धोऽदूर्ध्वम्' इत्यादयः स्मृतिवादा गृह्यन्ते । सूर्योदयदाहसेचनादौ कालज्वलनसलिलादेः प्राधान्यप्रसिद्धेर्न कर्मैव प्रधानमित्याशङ्क्याऽऽह—**यद्यपीति** । अनैकान्तिकत्वमप्रधानत्वम् । तत्र हेतुमाह—**शास्त्रेति** । श्रुतिस्मृतिलक्षणं शास्त्रमुदाहृतम् । जगद्वैचित्र्यानुपपत्तिन्यायः ।

न, अविद्यापगममात्रत्वाद्ब्रह्मप्राप्तिफलस्य । **यदुक्तं ब्रह्मप्राप्तिफलं प्रति देवा विघ्नं कुर्युरिति तत्र न देवानां विघ्नकरणे सामर्थ्यम् । कस्मात् । विद्याकालानन्तरितत्वाद्ब्रह्मप्राप्तिफलस्य । कथम् । यथा लोके द्रष्टुश्चक्षुष आलोकेन संयोगो यत्कालस्तत्काल एव रूपाभिव्यक्तिः । एवमात्मविषयं विज्ञानं यत्कालं तत्काल एव तद्विषयाज्ञानतिरोभावः स्यात् । अतो ब्रह्मविद्यायां सत्यामविद्याकार्यानुपपत्तेः प्रदीप इव तमःकार्यस्य तत्केन कस्य विघ्नं कुर्युर्देवाः । यत्राऽऽत्मत्वमेव देवानां ब्रह्मविदः ।**

कर्मफले देवादीनां विघ्नकर्तृत्वं प्रसङ्गागतं निराकृत्य विद्याफले तेषां तदाशङ्कितं निराकरोति—**नाविद्येति** । तत्र नञर्थमुक्तानुवादपूर्वकं विशदयति—**यदुक्तमिति** । तत्र प्रश्नपूर्वकं पूर्वोक्तं हेतुं स्फुटयति—**कस्मादिति** । आत्मनो ब्रह्मत्वप्राप्तिरूपाया मुक्तेरज्ञानध्वंसमात्रत्वात्तस्याश्च ज्ञानेन तुल्यकालत्वात्तस्मिन्सति तस्य फलस्याऽऽवश्यकत्वाद्देवादीनां विघ्नाचरणे नावकाश इत्यर्थः । उक्तमेवार्थमाकाङ्क्षापूर्वकं दृष्टान्तेन समर्थयते—**कथमित्यादिना** । ब्रह्मविद्या

---

१ घ. ञ. ण. °विश्रम्भो । २ ख. °पायुत्पद्य° । ३ ख. ढ. पत्तिर्हे° । ४ च. °यस्थाति के क° । ५ ख. छ. ज. झ. ढ. °स्य के क° । ६ घ. °त्के क° ।

तत्फलयोः समानकालत्वे फलितमाह–अत इति । देवादीनां ब्रह्मविद्याफले विघ्नकर्तृत्वाभावे हेत्वन्तरमाह–यत्रेति । यस्यां विद्यायां सत्यां ब्रह्मविदो देवादीनामात्मत्वमेव तस्यां सत्यां कथं ते तस्य विघ्नमाचरेयुः । स्वविषये तेषां प्रतिकूल्याचरणानुपपत्तेरित्यर्थः ।

तदेतदाह–आत्मा स्वरूपं ध्येयं यत्तत्सर्वशास्त्रैर्विज्ञेयं ब्रह्म हि यस्मादेषां देवानां स ब्रह्मविद्भवति । ब्रह्मविद्यासमकालमेवाविद्यामात्रव्यवधानापगमाच्छुक्तिकाया इव रजताभासायाः शुक्तिकात्वमित्यवोचाम । अतो नाऽऽत्मनः प्रतिकूलत्वे देवानां प्रयत्नः संभवति । यस्य ह्यनात्मभूतं फलं देशकालनिमित्तान्तरितं तत्रानात्मविषये सफलः प्रयत्नो विघ्नाचरणाय देवादीनाम् । न त्विह विद्यासमकाल आत्मभूते देशकालनिमित्तानन्तरितेऽवसरानुपपत्तेः ।

उक्तेऽर्थे समनन्तरवाक्यमुत्थाप्य व्याचष्टे–तदेतदाहेति । कथं ब्रह्मविद्यासमकालमेव ब्रह्मविद्देवादीनामात्मा भवति तत्राऽऽह––अविद्यामात्रेति । यथेदं रजतमिति रजताकारायाः शुक्तिकायाः शुक्तिकात्वमविद्यामात्रव्यवहितं तथा ब्रह्मविदोऽपि सर्वात्मत्वे तन्मात्रव्यवधानात्तस्याश्च विद्योदये नान्तरीकत्वेन निवृत्तेर्युक्तं विद्यातत्फलयोः समानकालत्वम् । उक्तं चैतत्प्रतिवचनदशायामित्यर्थः । उक्तस्य हेतोरपेक्षितं वदन्ब्रह्मविदो देवाद्यात्मत्वे फलितमाह–अत इति । कैवल्ये तेषां विघ्नाकर्तृत्वे कुत्र तत्कर्तृतेत्याशङ्क्याऽऽह–यस्य हीति । तेषां निरङ्कुशप्रसरत्वं वारयति–न त्विति । सफलः प्रयत्न इति पूर्वेण संबन्धः । तस्य निरवकाशत्वादिति हेतुमाह–अवसरेति ।

एवं तर्हि विद्याप्रत्ययसंतत्यभावाद्विपरीतप्रत्ययतत्कार्ययोश्च दर्शनादन्त्य एवाऽऽत्मप्रत्ययोऽविद्यानिवर्तको न तु पूर्व इति । न प्रथमेनानैकान्तिकत्वात् । यदि हि प्रथम आत्मविषयः प्रत्ययोऽविद्यां न निवर्तयति तथाऽन्त्योऽपि तुल्यविषयत्वात् ।

ज्ञानस्यानन्तरफलत्वात्तत्फले देवादीनां न विघ्नकर्तृतेत्युक्तमुपेत्य स्वयूथ्यः शङ्कते–एवं तर्हीति । ज्ञानस्यानन्तरफलत्वे न तदज्ञानं निवर्तयेदज्ञानमिव तत्त्वज्ञानमपि ब्रह्मास्मीति ज्ञानसंतत्यभावात् । न चाऽऽद्यमेव ज्ञानमज्ञानध्वंसि प्रागिवोर्ध्वमपि सर्गादेस्तत्कार्यस्य च दृष्टत्वात् । अतो देहपातकालीनं ज्ञानमज्ञानं निवर्तयतीति कुतो जीवन्मुक्तिरित्यर्थः । अन्त्यज्ञानस्याज्ञाननिवर्तकत्वं तत्संततेर्वा प्रथमे तस्यान्त्यत्वादात्मविषयत्वाद्वा तद्ध्वंसितेति विकल्प्योभयत्र दृष्टान्ताभावं मत्वा द्वितीये दोषान्तरमाह–न प्रथमेनेति । तदेवानुमानेन स्फोरयति–यदि हीति ।

१ग. घ. ङ. झ. °वाना° । २ घ. स्फटयति ।

एवं तर्हि संततोऽविद्यानिवर्तको न विच्छिन्न इति । न जीवनादौ सति संतत्यनुपपत्तेः । नहि जीवनादिहेतुके प्रत्यये सति विद्याप्रत्यय-संततिरुपपद्यते विरोधात् । अथ जीवनादिप्रत्ययातिरस्करणेनैवाऽऽमरणान्ताद्विद्यासंततिरिति चेन्न । प्रत्ययेयत्तासंतानानवधारणाच्छास्त्रार्थानवधारणदोषात् । इयतां प्रत्ययानां संततिरविद्याया निवर्तिकेत्यनवधारणाच्छास्त्रार्थो नावधियेत । तच्चानिष्टम् ।

कल्पान्तरं शङ्कयति—एवं तर्हीति । अविच्छिन्ना ज्ञानसंततिरज्ञानं निवर्तयतीत्येतद्दूषयति—नेत्यादिना । जीवनादिहेतुकः प्रत्ययो बुभुक्षितोऽहं मोक्ष्येऽहमित्यादिलक्षणः । तस्य बुभुक्षाद्युपप्लुतस्य ब्रह्मास्मीत्यविच्छिन्नप्रत्ययसंततेश्च विरुद्धतया यौगपद्यायोगे हेतुमाह—विरोधादिति । प्रत्ययसंततिमुपपादयन्नाशङ्क्ते—अथेति । उक्तरीत्या प्रत्ययसंततिमुपेत्य दूषयति—नेत्यादिना । तमेव दोषं विशदयति—इयतामिति शास्त्रार्थो ज्ञानसंततिरज्ञानं निवर्तयतीत्येवमात्मकः ।

संततिमात्रत्वेऽवधारित एवेति चेत्, न । आद्यन्तयोरविशेषात् । प्रथमा विद्याप्रत्ययसंततिर्मरणकालान्ता वेति विशेषाभावादाद्यन्तयोः प्रत्यययोः पूर्वोक्तौ दोषौ प्रसज्येयाताम् । एवं तर्ह्यनिवर्तक एवेति चेन्न 'तस्मात्तत्सर्वमभवत्' इति श्रुतेः । "भिद्यते हृदयग्रन्थिः" तत्र को मोहः" इत्यादिश्रुतिभ्यश्च ।

आत्मेत्येवोपासीतेति श्रुतेरात्मज्ञानसंततिमात्रसद्भावे ततो विद्याद्वाराऽविद्याध्वस्तिरिति शास्त्रार्थनिश्चयासिद्धिरित्याह—संततीति । आत्मधीसंततेः सत्त्वेऽपि न साऽऽत्मविषयत्वाद्विद्याद्वाराऽविद्यां निवर्तयति । आद्यद्वित्रिक्षणस्थात्मधीसंततौ व्यभिचारादिति परिहरति—नाऽऽद्यन्तयोरिति । पूर्वस्मिन्प्रत्यये नाविद्यानिवर्तकत्वमन्त्ये तु तथेत्युक्ते तस्यान्यत्वात्तथात्वं चेद्दृष्टान्ताभावः । आत्मविषयत्वात्तथात्वे प्रथमप्रत्यये व्यभिचारः स्यादित्युक्तौ दोषौ । आद्या संततिर्नाविद्याध्वंसिनी । अन्त्या तु तथेत्यङ्गीकारेऽपि विशेषाभावादन्त्यत्वात्तस्या निवर्तकत्वे दृष्टान्ताभावः । आत्मविषयत्वात्तद्भावे त्वनैकान्तिकत्वमित्येतावेव दोषौ स्यातामित्युक्तं विवृणोति—प्रथमेति । अन्त्यप्रत्ययस्य तत्संततेश्चाविद्यानिवर्तकत्वासंभवे प्रथमस्यापि रागाद्यनुवृत्त्या तद्योगाज्ज्ञानमज्ञाननिवर्तकमेवेति चोदयति—एवं तर्हीति श्रुतिविरोधेन परिहरति—न तस्मादिति ।

---

१ ग. च. ढ. °तुकप्र° । २ ख. ग घ. ङ. च. ढ. ण. °णान्तविद्या° । झ. °णान्त विद्या° । ३ ग. घ. ञ. झ. °द्यानि° । ४ क. घ. ञ. ण. °योगं हे° । ५ च. ज. झ. स्मात्स° । ६ ढ. °ततेर्यभि° । ७ ञ. ढ. °ति । त° ।

अर्थवाद इति चेन्न । सर्वशाखोपनिषदामर्थवादत्वप्रसङ्गात् । एतावन्मात्रार्थत्वोपक्षीणा हि सर्वशाखोपनिषदः । प्रत्यक्षप्रमितात्मविषयत्वादस्त्येवेति चेन्न । उक्तपरिहारत्वात् । अविद्याशोकमोहभयादिदोषनिवृत्तेः प्रत्यक्षत्वादिति चोक्तः परिहारः । तस्मादाद्योऽन्यः संततोऽसंततश्चेत्यचोद्यमेतत् । अविद्यादिदोषनिवृत्तिफलावसानत्वाद्विद्यायाः । य एवाविद्यादिदोषनिवृत्तिफलकृत्प्रत्यय आद्योऽन्यः संततोऽसंततो वा स एव विद्येत्यभ्युपगमान्न चोद्यस्यावतारगन्धोऽप्यस्ति ।

तासामर्थवादत्वेनाविवक्षितत्वं शङ्कते—अर्थवाद इति चेदिति । अतिप्रसङ्गेन दूषयति—न सर्वेति । यथोक्तश्रुतीनामर्थवादत्वेऽपि कथं सर्वशाखोपनिषदां तत्त्वप्रसक्तिरित्याशङ्क्याऽऽह—एतावदिति । एतावन्मात्रार्थत्वमात्मज्ञानात्तदज्ञाननिवृत्तिरित्येतावन्मात्रस्यार्थस्य सद्भावः । अहंधीगम्ये प्रतीचि तासां प्रवृत्तेः संवादविसंवादाभ्यां मानत्वायोगादस्त्येवार्थवादतेति प्रसङ्गस्येष्टत्वं शङ्कते—प्रत्यक्षेति । प्रमातुरहंधीगम्यता नाऽऽत्मनस्तत्साक्षिणस्तस्य वेदान्ता ब्रह्मत्वं बोधयन्तीति न संवादादिशङ्क्येत्याह—नाक्तेति । विद्वदनुभवमाश्रित्यापि फलश्रुतेरर्थवादत्वं समाहितमित्याह—अविद्येति । आत्मज्ञानस्य तदज्ञाननिवर्तकत्वे स्थिते परमतस्य निरवकाशत्वं फलतीत्याह—तस्मादिति । चोद्यस्यानवकाशत्वमेव विशदयति—अविद्यादीति ।

यत्तूक्तं विपरीतप्रत्ययतत्कार्ययोश्च दर्शनादिति । न । तच्छेषस्थितिहेतुत्वात् । येन कर्मणा शरीरमारब्धं तद्विपरीतप्रत्ययदोषनिमित्तत्वात्तस्य तथाभूतस्यैव विपरीतप्रत्ययदोषसंयुक्तस्य फलदाने सामर्थ्यमिति यावच्छरीरपातस्तावत्फलोपभोगाङ्गतया विपरीतप्रत्ययं रागादिदोषं च तावन्मात्रमाक्षिपत्येव । मुक्तेषुवत्प्रवृत्तफलत्वात्तद्धेतुकस्य कर्मणः ।

ज्ञानसंततेरन्त्यज्ञानस्य वाऽज्ञानध्वंसित्वात्सिद्धेराद्यमेव ज्ञानं तथेत्युक्तं संप्रति परोक्षमनुवदति—यत्तूक्तमिति । दर्शनाच्चाऽऽद्यं ज्ञानमज्ञानध्वंसीति शेषः । प्रारब्धकर्मशेषस्य विद्वद्देहस्थितिहेतुत्वादिदृशाऽपि यावदारब्धक्षयं रागाद्याभासाविरोधात्तत्क्षये च देहाभासत्वगदाभासयोरभावान्नाऽऽद्यज्ञानस्याज्ञाननिवर्तकत्वानुपपत्तिरित्युत्तरमाह—न तच्छेषेति । तदेव प्रपञ्चयति—येनेत्यादिना । यच्छब्दस्याऽऽक्षिपतीत्यनेन संबन्धः । आक्षेपकत्वमनियमं साधयति—विपरीतेति । मिथ्याज्ञानेन रागादिदोषेण च निमित्तेन प्रवृत्तत्वादिति यावत् । तथाभूतस्येत्यस्य विवरणं विप-

---

१ क. स. ग. ङ. छ ज. झ. °दस्त्वेवं° । २ च. ढ. °दित्युक्त एव प° । ३ क. चोक्त एव प° । ४ ष. तत्प्रस° । ५ च. °निष्पन्नत्वात्तथा° । ज. °निष्पत्तिहेतुत्वा° । झ. °निष्पत्तित्वा° ।

रीतप्रत्ययेत्यादि । कर्मैव षष्ठ्या विशेष्यते । तावन्मात्रं प्रतिभासमात्रशरीरम् । प्रारब्धकर्मणोऽप्यज्ञानजन्यत्वेन ज्ञाननिवर्त्यत्वान्न ज्ञानिनस्ततो देहाभासादि संभवतीत्याशङ्क्याऽऽह—मुक्तेषुवदिति । यथा प्रवृत्तवेगस्येष्वादेर्वेगक्षयादेक्षप्रतिबद्धस्य क्षयस्तथा भोगादेवाऽऽरब्धक्षयो भोगेन त्वितरे क्षपयित्वा संपद्यत इति न्यायान्न ज्ञानादित्यर्थः । तद्धेतुकस्य विपरीतप्रत्ययादिप्रतिभासकार्यजनकस्येति यावत् ।

तेन तस्य निवर्तिका विद्याऽविरोधात् । किं तर्हि स्वाश्रयादेव स्वात्मविरोध्यविद्याकार्यं यदुत्पित्सु तन्निरुणद्ध्यनागतत्वादतीतं हीतरत् ।

ननु ज्ञानमनारब्धकर्मवदारब्धमपि कर्म कर्मत्वाविशेषान्निवर्तयिष्यति नेत्याह—तेनेति । अविद्यालेशेन सहाऽऽरब्धस्य कर्मणो विद्या निवर्तिका न भवतीत्यत्र हेतुमाह—अविरोधादिति । नहि ज्ञानादारब्धं कर्म क्षीयते तदविरोधित्वादविद्यालेशाच्च तदवस्थितेरन्यथा जीवन्मुक्तिशास्त्राविरोधादिति भावः । आरब्धस्य कर्मणो ज्ञाननिवर्त्यत्वे ज्ञानं कर्मनिवर्तकमिति कथं प्रसिद्धिरित्याह—किं तर्हीति । प्रसिद्धिविषयमाह—स्वाश्रयादिति । ज्ञानविरोधि यदज्ञानकार्यमनारब्धं कर्म ज्ञानाश्रयप्रमात्राद्याश्रयादज्ञानात्फलात्मना जन्माभिमुखं तन्निवर्तकं ज्ञानमिति प्रसिद्धिरविरुद्धेत्यर्थः । विमतं न ज्ञाननिवर्त्यं कर्मत्वादारब्धकर्मवदित्यनुमानादनारब्धमपि कर्म न ज्ञाननिरस्यमित्याशङ्क्याऽऽह—अनागतत्वादिति । अनारब्धं कर्म फलरूपेणाप्रवृत्तत्वात्प्रवृत्तेन निवर्त्यम् । आरब्धं तु कर्म फलरूपेण जातत्वात्तद्भोगादृते न निवृत्तिमर्हति । अनुमानं त्वागमापबाधितत्वमप्रमाणमित्यर्थः ।

किंच नच्च विपरीतप्रत्ययो विद्यावत उत्पद्यते । निर्विषयत्वात् । अनवधृतविषयविशेषस्वरूपं हि सामान्यमात्रमाश्रित्य विपरीतप्रत्ययं उत्पद्यमान उत्पद्यते । यथा शुक्तिकायां रजतमिति । स च विषयविशेषावधारणवतोऽशेषविपरीतप्रत्ययाश्रयस्योपमर्दितत्वान्न पूर्ववत्संभवति । शुक्तिकादौ सम्यक्प्रत्ययोत्पत्तौ पुनरदर्शनात् ।

नन्वनारब्धकर्मनिवृत्तावपि विदुषश्चेदारब्धकर्म न निवर्तते तथा च यथापूर्वं विपरीतप्रत्ययादिप्रवृत्तेर्विद्वद्विद्वद्विशेषो न स्यादत आह—किंचेति । हेतुसिद्ध्यर्थं विपरीतप्रत्ययविषयं विशदयति—अनवधृतेति । संप्रति विद्वद्विषये विषयाभावाद्विपरीतप्रत्ययस्यानुत्पत्तिमुपन्यस्यति—स चेति । आश्रयस्यागृहीतविशेषस्य सामान्यमात्रस्याऽऽलम्बनस्येति यावत् । आश्रयस्येति पाठेऽप्ययमेवार्थः ।

---

१ ख. ढ. विशिष्य° । २ ख. ढ. °त्ययोऽवभासमा° । ३ ख. ङ. च. °याश्रय° ४ घ. ण. °रब्धं क° । ५ घ. °स्य ज्ञातज्ञा° । ण. °स्य ज्ञानसा° ।

विदुषो विपरीतप्रत्ययादिप्रतिभासेऽपि न यथापूर्वं तत्सत्त्वं यस्य तु यथापूर्वं संसारित्वमित्यादिन्यायविरोधादिति मत्वोक्तम्—**न पूर्ववदिति** । तत्रानुभवं प्रमाणयति—**शुक्तिकादाविति** ।

क्वचित्तु विद्यायाः पूर्वोत्पन्नविपरीतप्रत्ययजनितसंस्कारेभ्यो विपरीतप्रत्ययावभासाः स्मृतयो जायमाना विपरीतप्रत्ययभ्रान्तिमकस्मात्कुर्वन्ति । यथा विज्ञातदिग्विभागस्याप्यकस्माद्दिग्विपर्ययविभ्रमः ।

यथाऽज्ञानवतो विपरीतप्रत्ययभावोऽनुभूयते तथा तद्वतोऽपि क्वचिद्विपरीतप्रत्ययो दृश्यते । तथा च कथं तवानुभवविरोधो न प्रसरेदित्याशङ्क्य परोक्षज्ञानवति विपरीतप्रत्ययसत्त्वेऽपि नापरोक्षज्ञानवति तद्दार्ढ्यमित्यभिप्रेत्याऽऽह—**क्वचित्त्विति** । परोक्षज्ञानाधारः सप्तम्यर्थः । पञ्चमी त्वपरोक्षज्ञानार्था । अकस्मादित्यज्ञानातिरिक्तकल्पनासामग्र्यभावोक्तिः ।

सम्यग्ज्ञानवतोऽपि चेत्पूर्ववद्विपरीतप्रत्यय उत्पद्यते सम्यग्ज्ञानेऽप्यविश्रम्भाच्छास्त्रार्थविज्ञानादौ प्रवृत्तिरसमञ्जसा स्यात्सर्वं च प्रमाणमप्रमाणं संपद्येत । प्रमाणाप्रमाणयोर्विशेषानुपपत्तेः । एतेन सम्यग्ज्ञानानन्तरमेव शरीरपाताभावः कस्मादित्येतत्परिहृतम् ।

विदुषो मिथ्याज्ञानाभावमुक्त्वा विपक्षे दोषमाह—**सम्यगिति** । तत्पूर्वकमनुष्ठानमादिशब्दार्थः । सम्यग्ज्ञानाविश्रम्भे[4] दोषान्तरमाह—**सर्वं चेति** । ज्ञानादज्ञानध्वंसे तदुत्थमिथ्याज्ञानस्य सविषयस्य बाधितत्वान्न विदुषो रागादिरित्युपपाद्य ज्ञानान्मोक्षे तज्जन्मप्रारब्धेन शरीरं स्थितिहेत्वभावात्पतेदिति सद्योमुक्तिपक्षं प्रत्याह—**एतेनेति** । प्रवृत्तफलस्य कर्मणो भोगादृते क्षयो नास्तीत्युक्तेन न्यायेनेति यावत् ।

ज्ञानोत्पत्तेः प्रागूर्ध्वं तत्कालजन्मान्तरसंचितानां च कर्मणामप्रवृत्तफलानां विनाशः सिद्धो भवति फलप्राप्तिविघ्ननिषेधश्रुतेरेव । " क्षीयन्ते चास्य कर्माणि " "तस्य तावदेव चिरम्" " सर्वे पाप्मानः प्रदूयन्ते " " तं विदित्वा न लिप्यते कर्मणा पापकेन " " एवम् हैव ते न तरतः " " नैनं कृताकृते तपतः " " एतं ह वाव न तपति " " न बिभेति कुतश्चन " इत्यादिश्रुतिभ्यश्च । " ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते " इत्यादिस्मृतिभ्यश्च ।

आरब्धकर्मणा देहस्थितिमुक्त्वेतरेषां ज्ञाननिवर्त्यत्वमुपसंहरति—**ज्ञानोत्पत्तेरिति** । तस्य ह न देवाश्चनेति विदुषो विद्याफलप्राप्तौ विघ्ननिषेधश्रुत्यनुपपत्त्या

१ क. ख. °दिग्भाग° । २ ख. ग. ङ. च. ज. ड. °विभ्रमा° । ३ च. ड. °र्थज्ञा° । ४ ञ. ण °विश्रम्भे । ५ क. घ. ञ. ड. °रीरस्थि° । ६ ख. ड. °तः कृताकृते तरति । नैं° । ७ घ. °धकश्रु° ।

यथोक्तोऽर्थो भातीत्यर्थः । न केवलं श्रुतार्थापत्त्या यथोक्तार्थसिद्धिः किंतु श्रुतिस्मृतिभ्यामपीत्याह–क्षीयन्ते चेत्यादिना ।

यत्तु ऋणैः प्रतिबध्यत इति । तन्न । अविद्याविषयत्वात् । अविद्यावान्ह्यृणी । तस्य कर्तृत्वाद्युपपत्तेः । यत्र वा अन्यदिव स्यात्तत्रान्योऽन्यत्पश्येदिति हि वक्ष्यति । अनन्यत्सद्वस्त्वात्मारूढं यत्राविद्यायां सत्यामन्यदिव स्यात्तिमिरकृतद्वितीयचन्द्रवत्तत्राविद्याकृतानेककारकापेक्षं दर्शनादिकर्म तत्कृतं फलं च दर्शयति–तत्रान्योऽन्यत्पश्येदित्यादिना । यत्र पुनर्विद्यायां सत्यामविद्याकृतानेकत्वभ्रमप्रहाणं तत्केन कं पश्येदिति कर्मासंभवं दर्शयति । तस्मादविद्यावद्विषय एव ऋणित्वं कर्मसंभवान्नेतरत्र ।

जीवन्मुक्तिं साधयता ज्ञानफले प्रतिबन्धाभाव उक्त इदानीं पूर्वोक्तं शङ्कानीजमपनुदति–यस्त्विति । ऋणित्वं हि विदुषोऽविदुषो वेति विकल्प्याऽऽद्यं दूषयन्द्वितीयपक्षं करोति–तत्रेत्यादिना । ऋणित्वस्येति शेषः । तदेव स्फुटयति–अविद्यावानिति । अविदुषोऽस्ति कर्तृत्वादीत्यत्र मानमाह–यत्रेति । वक्ष्यमाणवाक्यार्थं प्रकृतोपयोगित्वेन कथयति–अनन्यदिति । ऋणित्वं विदुषो नेत्युक्तं व्यक्तीकर्तुं तस्य नास्ति कर्तृत्वादीत्यत्रापि प्रमाणमाह–यत्र पुनरिति । विद्यायां सत्यामविद्यायास्तत्कृतानेकत्वभ्रमस्य च प्रहाणं तत्र संपद्यते तत्र तस्मादेव कारणात्तत्केनेत्यादिना कर्मादेरसंभवं दर्शयतीति योजना । प्रमाणसिद्धमर्थं निगमयति–तस्मादिति ।

एतच्चोत्तरत्र व्याचिख्यासिष्यमाणैरेव वाक्यैर्विस्तरेण प्रदर्शयिष्यामः तद्यथेहैव तावत्–अथ यः कश्चिदब्रह्मविदन्यामात्मनो व्यतिरिक्तां यां काञ्चिद्देवतामुपास्ते स्तुतिनमस्कारयागबल्युपहारप्रणिधानध्यानादिनोपास्ते तस्या गुणभावमुपगम्याऽऽस्ते । अन्योऽसावनात्मा मत्तः पृथगन्योऽहमस्म्यधिकृतो मयाऽस्मा ऋणिवत्प्रतिकर्तव्यमित्येवंप्रत्ययः सन्नुपास्ते न स इत्थंप्रत्ययो वेद विजानाति तत्त्वं न स केवलमेवंभूतोऽविद्वानविद्यादोषवानेव किं तर्हि यथा पशुर्गवादिर्वाहनदोहनाद्युपकारैरुपभुज्यत एवं स इज्याद्यनेकोपकारैरुपभोक्तव्यत्वादेकैकेन देवादीनाम् । अतः पशुरिव सर्वार्थेषु कर्मस्वधिकृत इत्यर्थः ।

---

१ घ. ङ. च. झ. ट °वामृणी । २ ख. ङ. °ना श्रुतिः । य° । ३ क. ख. घ. ङ. च. छ. ज. झ. ट. °हाणात्तत्के° । ४ ङ. च. ट. चर्णित्वं । ५ छ. ज. कर्मासं° । ६ क. ख. स्फुटयते । ञ. ण. स्फुट्यते ।

अविद्याविषयमूर्णित्वमित्येतत्पञ्चपञ्चाविद्यासूत्रमवतारयति—एतच्चेति । तद्ऊर्णित्वमविद्याविषयं यथा स्फुटं भवति तथाऽथ योऽन्यामित्यादावनन्तरग्रन्थ एव कथ्यते प्रथममित्यर्थः । पदक्षराणि व्याकरोति—अथेत्यादिना । विद्यासूत्रानन्तर्यमविद्यासूत्रस्या (स्था) थशब्दार्थः । यागो गन्धपुष्पादिना पूजा । बल्युपहारो नैवेद्यसमर्पणम् । पणिबानमेकाग्र्यम् । ध्यानं तत्रैवानन्तरितप्रत्ययप्रवाहकरणम् । आदिपदं प्रदक्षिणादिग्रहणार्थम् । भेददर्शनमत्रोपासनं न शास्त्रीयमित्यभिप्रेत्येतदेव विवृणोति—अन्योऽसाविति । तस्य मूलमाह—न स इति । वाक्यान्तरमवतार्य व्याचष्टे—न स केवलमिति । सोऽविद्वानेवमुक्तदृष्टान्तवशात्पशुरिवदेवानां भवति तेषां मध्ये तस्यैकैकेन बहुभिरुपकारैर्भोग्यत्वादिति योजना । पशुसाम्ये सिद्धमर्थं कथयति—अत इति ।

एतस्य ह्यविदुषो वर्णाश्रमादिभेदविभागवतोऽधिकृतस्य कर्मणो विद्यसहितस्य केवलस्य च शास्त्रोक्तस्य कार्यं मनुष्यत्वादिको ब्रह्मान्उत्कर्षः । शास्त्रोक्तविपरीतस्य च स्वाभाविकस्य कार्यं मनुष्यत्वादिकत एव स्थावरान्तोऽपकर्षः । यथा चैतत्तथाऽथ त्रयो वाव लोका इत्यादिना वक्ष्यामः कृत्स्नेनैवाध्यायशेषेण । विद्यायाश्च कार्यं सर्वात्मभावापत्तिरित्येतत्संक्षेपतो दर्शितम् । सर्वा ह्येषमुपनिषद्विद्याविभागप्रदर्शनेनैवोपक्षीणा । यथा चैषोऽर्थः कृत्स्नस्य शास्त्रस्य तथा प्रदर्शयिष्यामः ।

अथानेनाविद्यासूत्रेण किं कृतं भवतीत्यपेक्षायामविद्यायाः संसारहेतुत्वं सूचितमिति वक्तुमविद्याकार्यं कर्मफलं तावत्पश्यति—एतस्येत्यादिना । कर्मसहायभूता विद्या देवताध्यानात्मिका शास्त्रीयवत्स्वाभाविककर्मणोऽपि दैविध्यं सूचयितुं चशब्दः । तत्र तु सहकारिणी विद्या नमस्कारदर्शनादिरूपेति भेदः । कथं यथोक्तं कर्मफलमविद्यावतः स्यादित्याशङ्क्याऽऽह—यथा चेति । सूत्रद्वैविध्यसिद्ध्यर्थं विद्यासूत्रार्थमनुक्रामति—विद्यायाश्चेति । सूत्रान्तराशङ्कां वारयति—सर्वा हीति । कथमेतदवगम्यते तत्राऽऽह—यथेति ।

यस्मादेवं तस्मादविद्यावन्तं पुरुषं प्रति देवा ईशत एव विघ्नं कर्तुमनुग्रहं चेत्येतद्दर्शयति—यथा ह वै लोके बहवो गोऽश्वादयः पशवो मनुष्यं स्वामिनमात्मनोऽधिष्ठातारं भुञ्ज्युः पालयेयुरेवं बहुपशुस्थानीय

---

१ घ. ज. ण. °ग्रहार्थं° । २ क. ढ. ण. °नमात्रो° । ३ क. ग. °दिवि° । ४ क. च. छ. °तो ह्यधि° । ५ घ. °क्षिप्याऽऽह—ए° । ६ ग. °रूपैवेति । ७ ख. घ. ढ. °वतां स्या° । ८ च. ङ. गोअश्वा° ।

एकैकोऽविद्वान्पुरुषो देवान्देवानिति पित्राद्युपलक्षणार्थं भुनक्ति पालयतीति । इम इन्द्रादयोऽन्ये मत्तो ममेशितारो भृत्य इवाहमेषां स्तुतिनमस्कारेज्यादिनाऽऽराधनं कृत्वाऽभ्युदयं निःश्रेयसं च तत्प्रत्तं फलं प्राप्स्यामीत्येवमभिसंधिः ।

मनुष्याणामविद्यावतां देवपशुत्वे स्थिते फलितमाह—यस्मादिति । तत्र प्रमाणत्वेनोत्तरं वाक्यमुत्थापयति—एतदिति । किमिदमविद्यावतो देवादिपालनमित्याशङ्क्य वाक्यतात्पर्यमाह—इम इन्द्रादय इति । अभिसंधिरविद्यावतः पुरुषस्येति शेषः ।

तत्र लोके बहुपशुमतो यथैकस्मिन्नेव पशावादीयमाने व्याघ्रादिनाऽपहियमाणे महदप्रियं भवति तथा बहुपशुस्थानीय एकस्मिन्पुरुषे पशुभावाद्व्युत्तिष्ठत्यप्रियं भवतीति किं चित्रं देवाना बहुपश्वपहरण इव कुटुम्बिनः । तस्मादेषा देवानां तन्न प्रियं किं तद्यदेतद्ब्रह्मात्मतत्त्वं, कथंचन मनुष्या विद्युर्विजानीयुः । तथा च स्मरणमनुगीतासु भगवतो व्यासस्य—

" क्रियावद्भिर्हि कौन्तेय देवलोकः समावृतः ।
न चैतदिष्टं देवाना मर्त्यैरुपरि वर्तनम् " ॥ इति ।

एकस्मिन्नेवेत्यादिवाक्यमादाय व्याचष्टे—तत्रेति । मनुष्याणां पशुभावाद्व्युत्थानमप्रियं देवानामिति स्थिते तदुपायमपि तत्त्वज्ञानं तेषां देवा विद्विषन्तीत्याह—तस्मादिति । तत्त्वविद्यायां दौर्लभ्यत्वं (भ्यं) कथंचनेत्युक्तम् । मनुष्याणामुत्कर्षं देवा न मृष्यन्तीत्यत्र प्रमाणमाह—तथा चेति । तेषां ब्रह्मविद्यया कैवल्यप्राप्तिः सुतरामनिष्टेति भावः ।

अतो देवाः पशूनिव व्याघ्रादिभ्यो ब्रह्मविज्ञानाद्विघ्नमाचिकीर्षन्ति अस्मदुपभोग्यत्वान्मा व्युत्तिष्ठेयुरिति । यं तु मुमोचयिषन्ते तं श्रद्धादिभिर्योक्ष्यन्ति विपरीतमश्रद्धादिभिः । तस्मान्मुमुक्षुर्देवाराधनपरः श्रद्धाभक्तिपरः प्रणेयोऽप्रमादी स्याद्विद्याप्राप्तिं प्रति विद्यां प्रतीति वा काकवेतत्प्रदर्शितं भवति देवाप्रियवाक्येन ॥ १० ॥

देवादीनां मनुष्येषु ब्रह्मज्ञानस्याप्रियत्वेऽपि किं स्यादित्याशङ्क्याऽऽह—अत इति । तेषां विघ्नमाचरतामभिप्रायमाह—अस्मादिति । तर्हि देवादिभिरुपहतानां मनुष्याणां मुमुक्षैव न संपद्येतेत्याशङ्क्याऽऽह—यं त्विति । उक्तं हि—

---

१ स. ग. ङ. च. ढ. °वानि° । २ ग. घ. ज. °वाहं तथा । ३ क. झ. °त्प्रदत्तं । ४. ञ. °ति । ज्ञत्वेत्° । ५ घ. ज. °ब्रह्मणस्तत्त्वं । क. °द्युजानी° ।

" न देवा दण्डमादाय रक्षन्ति पशुपालवत् ।
यं हि रक्षितुमिच्छन्ति बुद्ध्या संयोजयन्ति तम् " ॥ इति ।

तर्हि किमिति सर्वानेव देवा नानुगृह्णन्तीत्याशङ्क्याऽऽह—विपरीतमिति । देवतापराङ्मुखमनुमोचयिषितमिति यावत् । संपाते देवाप्रियवाक्येन (ण) ध्वनितमर्थमाह—तस्मादिति । आवेदनमनुष्येषु देवादीनां स्वातन्त्र्यं तच्छब्दार्थः । श्रद्धादिप्रधानस्तदाराधनपरः सन्देवादीनां प्रियः स्यात्तद्विपक्षस्य मुमुक्षावैफल्यादित्यर्थः । तत्प्रीतिविषयश्च तत्प्रसादात्तदैवराग्यः सर्वाणि कर्माणि संन्यस्य विद्यापोषकश्रवणादिकं प्रत्येकाग्रमनाः स्यादित्याह—अप्रमादीति । श्रवणादिकमनुतिष्ठन्नपि वर्णाश्रमाचारपरो भवेदन्यथा विद्यालक्षणे फले प्रतिबन्धसंभवादित्याशयेनाऽऽह—विद्यां प्रतीति । भयादिनिमित्ता ध्वनेर्विकृतिः काकुरुच्यते । यथाऽऽह—' काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेः ' इति । तया काक्वा काण्वश्रुतेः स्वरकम्पेन (ण) भयमुपलक्ष्य देवादिभजने कल्प्यते तात्पर्यमित्याह—काक्वेति ।

सूत्रितः शास्त्रार्थ आत्मेत्येवोपासीतेति । तस्य च व्याचिख्यासितस्य सार्थवादेन तदाहुर्यद्ब्रह्मविद्ययेत्यादिना संबन्धप्रयोजने अभिहिते । अविद्यायाश्च संसाराधिकारकारणत्वमुक्तमथ योऽन्यां देवतामुपास्त इत्यादिना । तत्राविद्वान्नणौ पशुवद्देवादिकर्मैकतंत्र्यतया परतन्त्र इत्युक्तं किं पुनर्देवादिकर्मैकतंत्र्यत्वे निमित्तं वर्णा आश्रमाश्च तत्र के वर्णा इत्यत इदमारभ्यते । यन्निमित्तसंबन्धेषु कर्मस्वयं परतन्त्र एवाधिकृतः संसारीत्येतस्यैवार्थस्य प्रदर्शनायाग्निसर्गानन्तरमिन्द्रादिसर्गो नोक्तः । अग्नेस्तु सर्गः प्रजापतेः सृष्टिपरिपूरणाय प्रदर्शितः । अयं चेन्द्रादिसर्गस्तत्रैव द्रष्टव्यस्तच्छेषत्वात् । इह तु स एवाभिधीयतेऽविदुषः कर्माधिकारहेतुप्रदर्शनाय ।

ब्रह्मकाण्डकामित्थं व्याख्याय ब्रह्म वा इदमित्यादिवाक्यस्यार्थवादेन संबन्धं वक्तुं वृत्तं कीर्तयति—सूत्रित इति । शास्त्रार्थशब्दो ब्रह्मविद्याविषयः । तदाहुरित्यादिनोक्तमनुवदति—तस्य चेति । अर्थवादस्तथा यो देवानामित्यादिः । संबन्धो ज्ञातस्य सर्वापत्तिफलेन ताभ्यस्तावनत्वपरिकारेणाऽऽत्मताविषयत्वमेकत्वेन

---

१ घ. °ङ्मुखं न मुमोचयिषन्तीति । २ क. ट. °तया । ३ ण. °ख्य वे° । ४ क. ख, ग, ङ. छ. ज. ञ. °बन्धेषु । ५ च. ससरतीत्ये° । झ. ट. संसरत्ये° । ६ सर्वभावाय° ।

विषयविषयित्वमिति विभागः । अविद्यासूत्रे वृत्तं कथयति—अविद्यायाश्चेति । संसारस्याधिकारः प्रवृत्तिरुत्पत्तिरिति यावत् । यथा पशुरित्यादिनोक्तमनुभाषते—तत्रेति । अविद्याधिकारः सप्तम्यर्थः । तत्राविद्याकार्यं प्रपञ्चयितुमध्यासशेषप्रवृत्तिरिति मन्वानोऽविद्याविवर्तत्वादुर्वर्ण्यसृष्टिप्रकटनार्थं तदेतद्ब्रह्मेत्यस्यास्याकृतं वाक्यमित्याकाङ्क्षापूर्वकमाह—किं पुनरिति । ब्रह्म वा इदमित्यादिवाक्यमिदमा परामृश्यते । वर्णानेव विशिनष्टि—यस्मिन्निमित्तेति । यैर्निमित्तैर्ब्राह्मणत्वादिभिः संबन्धेषु कर्मस्वयमविद्वानधिकृतः पशुरिव संसरतीति पशुनिदर्शनश्रुतौ प्रसिद्धं तानि निमित्तानि दर्शयितुमुत्तरं वाक्यं प्रवृत्तमित्यर्थः । अथेत्यभ्यमन्थदित्यत्रानुग्राहकदेवतासर्गं प्रकम्याग्नेरेव सृष्टिरुक्ता नेन्द्रादीनामत्र त्वविद्यां प्रस्तुत्य तेषां सोच्यते तत्र कः श्रुतेरभिप्रायस्तत्राऽऽह—एतस्येति । पूर्वमग्निसर्गानन्तरमिन्द्रादिसर्गो वाच्योऽपि नोक्तः । फलाभावात् । इह त्वविदुषस्तत्कार्यवर्णाद्यभिमानिनः कर्माधिकृतिरित्येतस्यार्थस्य प्रदर्शनार्थं तदाविद्यत्वविवक्षया स व्युत्पाद्यत इत्यर्थः । अग्निसर्गोऽपि तर्हि तद्वदत्रैव वाच्यो विशेषाभावादित्याशङ्क्याऽऽह—अग्नेस्त्विति । प्रजापतेः सृष्टिपूर्तये चेदमिसृष्टिस्तत्रोक्तेन्द्रादिसर्गोऽपि तत्रैव वाच्योऽन्यथा तदपूर्तेरित्याशङ्क्याऽऽह—अयं चेति । तर्हि तत्रोक्तस्य कस्मादत्रोक्तिः पुनरुक्तेरित्याशङ्क्यैतस्यैवार्थस्येत्यत्रोक्तं स्मारयति—इह त्विति ।

> ब्रह्म वा इदमग्र आसीदेकमेव तदेकꣳ सन्न व्यभवत् । तच्छ्रेयोरूपमत्यसृजत क्षत्रं यान्येतानि देवत्रा क्षत्राणीन्द्रो वरुणः सोमो रुद्रः पर्जन्यो यमो मृत्युरीशान इति । तस्मात्क्षत्रात्परं नास्ति तस्माद्ब्राह्मणः क्षत्रियमधस्तादुपास्ते राजसूये क्षत्र एव तद्यशो दधाति सैषा क्षत्रस्य योनिर्यद्ब्रह्म । तस्माद्यद्यपि राजा परमतां गच्छति ब्रह्मैवान्तत उपनिश्रयति स्वां योनिं य उ एनꣳ हिनस्ति स्वाꣳ स योनिमृच्छति स पापीयान्भवति यथा श्रेयाꣳसꣳ हिꣳसित्वा ॥ ११ ॥

ब्रह्म वा इदमग्र आसीद्यदग्निं सृष्ट्वाऽग्निरूपापन्नं ब्रह्म ब्राह्मण-

---

१ क. ख. ङ. ण. °बन्धेषु । घ. °बन्धो येषां तेषु । २ क. घ. ञ. ण. °शङ्क्य त° ।

जात्यभिमानाद्ब्रह्मेत्यभिधीयते । वा इदं क्षत्रादिजातं ब्रह्मैवाभिन्नमासीदेकमेव । नाऽऽसीत्क्षत्रादिभेदः तद्ब्रह्मैकं क्षत्रादिपरिपालयित्रादिशून्यं सन्न व्यभवन्न विभूतवत्कर्मणे नालमासीदित्यर्थः । ततस्तद्ब्रह्म ब्राह्मणोऽस्मि ममेत्थं कर्तव्यमिति ब्राह्मणजातिनिमित्तं कर्म चिकीर्ष्वात्मनः कर्मकर्तृत्वविभूत्यै श्रेयोरूपं प्रशस्तरूपमत्यसृजतातिशयेनासृजत सृष्टवत् । किं पुनस्तद्यत्सृष्टं, क्षत्रं क्षत्रियजातिः, तद्व्यक्तिभेदेन प्रदर्शयति—यान्येतानि प्रसिद्धानि लोके देवत्रा देवेषु क्षत्राणीति । जात्याख्यायां पक्षे बहुवचनस्मरणाद्व्यक्तिबहुत्वाद्वा भेदोपचारेण बहुवचनम् ।

संगतिमुक्त्वा वाक्यमादाय व्याचष्टे—ब्रह्मेति । अग्रे क्षत्रादिसर्गात्पूर्वमिति यावत् । वैशब्दस्यावधारणार्थत्वं वदन्वाक्यार्थोक्तिपूर्वकमेकमित्यस्यार्थमाह—इदमिति । द्वितीयमेवकारं व्याचष्टे—नाऽऽसीदिति । कथं तर्हि तस्य कर्मानुष्ठानसामर्थ्यसिद्धिरित्याशङ्क्य समनन्तरवाक्यं व्याचष्टे—तत इति । तदेव सृष्टमाकाङ्क्षाद्वारा स्पष्टयति—किं पुनरिति । एका चेत्क्षत्रजातिः सृष्टा कथं तर्हि यान्येतानीति बहूक्तिरित्याशङ्क्याऽऽह—तद्व्यक्तिभेदेनेति । क्षत्रजातेरेकत्वात्कथं क्षत्राणीति बहुवचनमित्याशङ्क्य ‘ जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम् ’ (पा० सू० १ । २ । ५८) इति स्मृतिमाश्रित्याऽऽह—जातीति । बहूक्तेर्गत्यन्तरमाह—व्यक्तीति । तासां बहुत्वाज्जातेश्च तदभेदात्तत्रापि भेदमुपचर्य बहूक्तिरित्यर्थः । क्षत्राणीति बहुवचनमिति संबन्धः ।

कानि पुनस्तानीत्याह तत्राभिषिक्ता एव विशेषतो निर्दिश्यन्ते इन्द्रो देवानां राजा । वरुणो यादसाम् । सोमो ब्राह्मणानाम् । रुद्रः पशूनाम् । पर्जन्यो विद्युदादीनाम् । यमः पितॄणाम् । मृत्यु रोगादीनाम् । ईशानो मासामित्येवमादीनि देवेषु क्षत्राणि । तदन्विन्द्रादिक्षत्रदेवताधिष्ठितानि मनुष्यक्षत्राणि सोमसूर्यवंश्यानि मनुष्यक्षत्राणि सृष्टान्येव द्रष्टव्यानि । तदर्थ एव हि देवक्षत्रसर्गः प्रस्तुतः ।

तेषां विशेषतो ग्रहणं क्षत्रस्योत्तमत्वं ख्यापयितुमिति मन्वानः तन्नाह—कानि पुनरित्यादिना । ननु किमिति देवेषु क्षत्रसृष्टिरुच्यते ब्राह्मणस्य कर्मानुष्ठानसामर्थ्यसिद्ध्यर्थं मनुष्येष्वेव तत्सृष्टिरुपदेष्टव्येत्याशङ्क्याऽऽह—तदन्विति । तथाऽपि विवक्षिता सृष्टिर्मुख्यतो वक्तव्येत्याशङ्क्योपोद्घातोऽयमित्याह—तदयं इति

---

१ ग. घ. ढ. °मानवद्ब्रह्म° । २ क. च. ढ. °निर्वर्त्य क° ।

यस्माद्ब्रह्मणाऽतिशयेन सृष्टं क्षत्त्रं तस्मात्क्षत्त्रात्परं नास्ति ब्राह्मजातेरपि नियन्तृ । तस्माद्ब्राह्मणः कारणभूतोऽपि क्षत्त्रियस्य क्षत्त्रियमधस्ताद्व्यवस्थितः सन्नुपरि स्थितमुपास्ते । क्व । राजसूये । क्षत्त्र एव तदात्मीयं यशः ख्यातिरूपं ब्रह्मेति दधाति स्थापयति । राजसूयाभिषिक्तेनाऽऽसन्द्यां स्थितेन राज्ञाऽऽमन्त्रितो ब्रह्मन्निति ऋत्विक् पुनस्तं प्रत्याह त्वं राजन्ब्रह्मासीति । तदेतदभिधीयते क्षत्त्र एव तद्यशो दधातीति ।

तस्मादित्यादि व्याचष्टे-यस्मादिति । क्षत्त्रस्य नियन्तृत्ववदुत्कर्षे हेत्वन्तरमाह-तस्मादिति । ब्रह्मेति प्रसिद्धे ब्राह्मण्याख्यामिति यावत् । उक्तमेव प्रपञ्चयति-राजसूयेति । आसन्द्यां मञ्चिकायाम् ।

सैषा प्रकृता क्षत्त्रस्य योनिरेव यद्ब्रह्म । तस्माद्यद्यपि राजा परमतां राजसूयाभिषेकगुणं गच्छत्यग्रोति ब्रह्मैव ब्राह्मणजातिमेवान्ततोऽन्ते कर्मपरिसमाप्तावुपनिश्रयत्याश्रयति स्वां योनिं पुरोहितं पुरो निधत्त इत्यर्थः । यस्तु पुनर्बलाभिमानात्स्वां योनिं ब्राह्मणजातिं ब्राह्मणं य उ एनं हिनस्ति हिंसति न्यग्भावेन पश्यति स्वामात्मीयामेव स योनिमृच्छति स्वं प्रसवं विच्छिनत्ति विनाशयति । स एतत्कृत्वा पापीयान्पापतरो भवति । पूर्वमपि क्षत्त्रियः पाप एव क्रूरत्वादात्मप्रसवहिंसया सुतराम् । यथा लोके श्रेयांसं प्रशस्ततरं हिंसित्वा परिभूय पापतरो भवति तद्वत् ॥ ११ ॥

क्षत्त्रे स्वकीयं यशः समर्पयतो ब्राह्मणस्य निष्कर्षमाशङ्क्याऽऽह-सैषेति । तयोर्ब्राह्मणत्वस्य तुल्यत्वात्कुतोऽवान्तरभेदः क्षत्त्रमापे कतुकाले ब्राह्मण्यं प्राप्नोतीत्याशङ्क्याऽऽह-तस्मादिति । क्षत्त्रस्य ब्रह्माभिभवे दोषश्रवणाच्च तस्य तदपेक्षया तद्गुणत्वमित्याह-यस्त्विति । प्रमादादपीति वैकुण्ठशब्दः । य उ एनं हिनस्तीति प्रतीकग्रहणं यस्तु पुनरित्यादि व्याख्यानमिति भेदः । ईयसुनस्तरबर्थस्य प्रयोगे हेतुमाह-पूर्वमपीति । ब्राह्मणाभिभवे पापीयस्त्वमित्येतदुदाहरणेन बुद्धावारोपयति-यथेति ॥ ११ ॥

स नैव व्यभवत्स विशमसृजत यान्येतानि देवजातानि गणश आख्यायन्ते वसवो रुद्रा आदित्या विश्वे देवा मरुत इति ॥ १२ ॥ क्षत्त्रे सृष्टेऽपि स नैव व्यभवत्कर्मणे ब्रह्म तथा न व्यभवद्वित्तोपार्ज-

---

१ ङ. ज. झ. °स्माद्ब्रह्मणाति° । २ च. ढ. क्षत्त्रस्य । ३ क. ढ. °ह्मणाख्य° । ४ ढ. °च्छा प्राप्नो° । ५ ग. घ. ज. °तत्कर्म कृत्वा । ६ ख. ञ. ढ. वक्तुंश° ।

यितुरभावात् । स विशमसृजत कर्मसाधनवित्तोपार्जनाय । कः पुनरसौ विट् । यान्येतानि देवजातानि स्वार्थे निष्ठा, य एते देवजातिभेदा इत्यर्थः । गणशो गणं गणमाख्यायन्ते कथ्यन्ते । गणप्राया हि विशः । प्रायेण संहता हि वित्तोपार्जने समर्था नैकैकशः । वसवोऽष्टसंख्यो गणस्तथैकादश रुद्रा द्वादशाऽऽदित्या विश्वे देवास्त्रयोदश विश्वाया अपत्यानि सर्वे वा देवा मरुतः सप्त सप्त गणाः ॥ १२ ॥

कर्तुर्ब्राह्मणस्य नियन्तुश्च क्षत्रियस्य सृष्टत्वात्किमुत्तरेणेत्याशङ्क्याऽऽह—क्षत्त्रं इति । तद्व्याचष्टे—कर्मण इति । ब्रह्म ब्राह्मणोऽस्मीत्यभिमानी पुरुषः । तथा क्षत्त्रसर्गात्पूर्वमिवेति यावत् । कथं तर्हि लौकिकसामर्थ्यसंपादनद्वारा कर्मानुष्ठानमत आह—स विशमिति । देवजातानीत्यत्र तकारो निष्ठा । गणं गणं कृत्वा किमित्याख्यानं विशामित्याशङ्क्याऽऽह—गणेति । विशां समुदायप्रधानत्वमद्यापि प्रत्यक्षमित्याह—प्रायेणेति ॥ १२ ॥

स नैव व्यभवत्स शौद्रं वर्णमसृजत पूषणमियं वै ।
पूषेयꣳ हीदꣳ सर्वं पुष्यति यदिदं किंच ॥ १३ ॥

स परिचारकाभावात्पुनरपि नैव व्यभवत्स शौद्रं वर्णमसृजत शूद्र एव शौद्रः स्वार्थेऽणि वृद्धिः । कः पुनरसौ शूद्रो वर्णो यः सृष्टः पूषणं पुष्यतीति पूषा । कः पुनरसौ पूषेति विशेषतस्तान्निर्दिशति—इयं पृथिवी पूषा । स्वयमेव निर्वचनमाह—इयं हीदं सर्वं पुष्यति यदिदं किंच ॥ १३ ॥

कर्तृपालयितृधनार्जयितॄणां सृष्टत्वाकृतं वर्णान्तरसृष्टयेत्याशङ्क्याऽऽह—त परिचारकेति । शौद्रं वर्णमसृजतेत्यत्रौकारो वृद्धिः । पुष्यतीति पूषेत्युक्तत्वात्पुष्यत्यनयकाशत्वमाशङ्क्याऽऽह—विशेषत इति । पूषशब्दस्यार्थान्तरे प्रसिद्धत्वात्कथं पृथिव्यां वृत्तिरित्याशङ्क्याऽऽह—स्वयमेवेति ॥ १३ ॥

स नैव व्यभवत्तच्छ्रेयोरूपमत्यसृजत धर्मं तदेतत्क्षत्त्रस्य क्षत्त्रं यद्धर्मस्तस्माद्धर्मात्परं नास्त्यथो अबलीयान्बलीयाꣳसमाशꣳसते धर्मेण यथा राज्ञैवं यो

---

१ घ. ङ. च. छ. ज. झ. ढ °वा वृ° । २ क. ग. घ. ङ. च. छ. ज. झ. °र्थे वृ° । ३ ग. घ. झ. शौद्रो । ४ क. सृष्टस्तं दर्शयन्नाह—पू° । ५ क. ख. ढ. °ति पुष्णाति य° झ. °ति पुष्णातीति य° ।

वै स धर्मः सत्यं वै तत्तस्मात्सत्यं वदन्तमाहुर्धर्मं वदतीति धर्मं वा वदन्तꣳ सत्यं वदतीत्येतद्धचेवैतदुभयं भवति ॥ १४ ॥

स चतुरः सृष्ट्वाऽपि वर्णान्नैव व्यभवदुग्रत्वात्क्षत्रस्यानियताशङ्कया तच्छ्रेयोरूपमत्यसृजत किं तद्धर्मं तदेतच्छ्रेयोरूपं सृष्टं क्षत्रस्य क्षत्रं क्षत्रस्यापि नियन्तृ । उग्रादप्युग्रम् । यद्धर्मो यो धर्मस्तस्मात्क्षत्रस्यापि नियन्तृत्वाद्धर्मात्परं नास्ति । तेन हि नियम्यन्ते सर्वे । तत्कथमिति । उच्यते—अथो अप्यबलीयान्दुर्बलतरो बलीयांसमात्मनो बलवत्तरमाप्याशंसते कामयते जेतुं धर्मेण बलेन । यथा लोके राज्ञां सर्वबलवत्तमेनापि कुटुम्बिक एवं तस्मात्सिद्धं धर्मस्य सर्वबलवत्तरत्वात्सर्वनियन्तृत्वम् । यो वै स धर्मो व्यवहारलक्षणो लौकिकैर्व्यवह्रियमाणः । सत्यं वै तत्सत्यमिति यथाशास्त्रार्थता स एवानुष्ठीयमानो धर्मनामा भवति । शास्त्रार्थत्वेन ज्ञायमानस्तु सत्यं भवति । यस्मादेवं तस्मात्सत्यं यथाशास्त्रं वदन्तं व्यवहारकाल आहुः समीपस्था उभयविवेकज्ञा धर्मं वदतीति प्रसिद्धं लौकिकं न्यायं वदतीति तथा विपर्ययेण धर्मं वा लौकिकं व्यवहारं वदन्तमाहुः सत्यं वदँति । शास्त्रादनपेतं वदतीति । एतद्यदुक्तमुभयं ज्ञायमानमनुष्ठीयमानं चैतद्धर्म एव भवति । तस्मात्स धर्मो ज्ञानानुष्ठानलक्षणः शास्त्रज्ञानितरांश्च सर्वानेव नियमयति । तस्मात्स क्षत्रस्यापि क्षत्रमतस्तदभिमानोऽविद्वांस्तद्विशेषानुष्ठानाय ब्रह्मक्षत्रविट्शूद्रविशेषमभिमन्यते तानि च निसर्गत एव कर्माधिकारनिमित्तानि ॥ १४ ॥

ननु चातुर्वर्ण्ये सृष्टे तावतैव कर्मानुष्ठानसिद्धेरलं धर्मसृष्ट्येत्यत आह—स चतुर इति । अनियताशङ्कया नियामकाभावे तस्यानियतत्वसंभावनयेति यावत् । तच्छब्दः सृष्टव्यविषयः । कुतो धर्मस्य सर्वनियन्तृत्वं क्षत्रस्यैव तत्प्रसिद्धेरित्याह—तत्कथमिति । अनुभवमनुसृत्य परिहरति—उच्यत इत्यादिना । तदेवोदाहरति—यथेति । राज्ञा स्पर्धमान इति शेषः । धर्मस्योत्कृष्टत्वेन नियन्तृत्वे सत्यभिमतं

---

१ क. ढ. °रोऽपि ब° । २ ख. 'के काश्चिद्राज्ञा । ३ च. °ज्ञा बलेनाल्पबलीयांसं जेतुमाशंसत ए । ४ ग. वै ध° । ५ ख. घ. ङ. च. ज. झ. ढ. °णः स स° । ६ ख. ग. झ. °र्थतः स° । ७ ढ. °दतीति । ८ ग. ङ. च. छ. झ. ढ. °णः सच्छास्त्र° ।

हेत्वन्तरमाह—**यो वा इति** । कथं धर्मस्य सत्यत्वं स हि पुरुषधर्मो वचनधर्मः सत्यत्वमित्यवान्तरभेदादित्याशङ्क्याऽऽह—**स एवेति** । यथोक्ते विवेके लोकप्रसिद्धिं प्रमाणयति—**यस्मादिति** । उभयशब्दो धर्मसत्यविषयो धर्मं वदतीत्येतदेव विभजते—**प्रसिद्धमिति** । यथा शास्त्रानुसारेण वदन्तं धर्मं वदतीति वदन्ति तथा पूर्वोक्तवदनवैपरीत्येन धर्मं वदन्तं सत्यं वदतीत्याहुरिति योजना । धर्ममेव व्याचष्टे—**लौकिकमिति** । सत्यं वदतीत्येतदेव स्फुटयति—**शास्त्रादिति** कार्यकारणभावेनानयोरेकत्वमुपसंहरति—**एतदिति** । शास्त्रार्थसंशये शिष्टव्यवहारान्निश्चयो यथा यववराहादिशब्देषु धर्मसंशये तु शास्त्रार्थवशान्निर्णयो यथा चैत्यवन्दनादिष्वुदासेनाग्निहोत्रादौ । अतो हेतुहेतुमद्भावादुभयोरैक्यमिति भावः । धर्मस्य सत्यादभेदे फलितमाह—**तस्मादिति** । तस्य सर्वनियन्तृत्वेऽपि प्रकृते किमायातं तदाह—**तस्मात्स इति** । तर्हि यथोक्तधर्मवशादेव कर्मानुष्ठानसिद्धेर्वर्णाश्रमाभिमानस्याकिंचित्करत्वमित्याशङ्क्याऽऽह—**अत इति** । धार्मिकत्वाद्यभिमानो ब्राह्मण्याद्यभिमानं पुरोधायानुष्ठापकश्चेत्तदभिमानोऽपि तथैवाभिमानान्तरं पुरस्कृत्यानुष्ठापयेदित्याशङ्क्याऽऽह—**तानि चेति** । न खल्वविदुषो धार्मिकस्य ब्राह्मण्यादिषु निमित्तेषु सत्सु कर्मप्रवृत्तौ निमित्तान्तरमपेक्ष्यते प्रमाणाभावादित्यर्थः ॥ १४ ॥

तदेतद्ब्रह्म क्षत्रं विट्शूद्रस्तदग्निनैव देवेषु ब्रह्माभवद्ब्राह्मणो मनुष्येषु क्षत्रियेण क्षत्रियो वैश्येन वैश्यः शूद्रेण शूद्रस्तस्मादग्नावेव देवेषु लोकमिच्छन्ते ब्राह्मणे मनुष्येष्वेताभ्यां हि रूपाभ्यां ब्रह्माभवत् । अथ यो ह वा अस्माल्लोकात्स्वं लोकमदृष्ट्वा प्रैति स एनमविदितो न भुनक्ति यथा वेदो वाऽननुक्तोऽन्यद्वा कर्माकृतं यदिह वा अप्येनेवंविन्महत्पुण्यं कर्म करोति तद्धास्यान्ततः क्षीयत एवाऽऽत्मानमेव लोकमुपासीत स य आत्मानमेव लोकमुपास्ते न हास्य कर्म क्षीयते । अस्माद्ध्येवाऽऽत्मनो यद्यत्कामयते तत्तत्सृजते ॥ १५ ॥

तदेतच्चातुर्वर्ण्यं सृष्टं ब्रह्म क्षत्रं विट्शूद्र इत्युत्तरार्थ उपसंहारः ।

---

१ क. ख. ड. ण °ति त° ।

यत्तत्सृष्टं ब्रह्म तदग्निनैव नान्येन रूपेण देवेषु ब्रह्म ब्राह्मणजातिरभव_ द्ब्राह्मणो ब्राह्मणस्वरूपेण मनुष्येषु ब्रह्माभवदितरेषु वर्णेषु विकारान्तरं प्राप्य क्षत्रियेण क्षत्रियोऽभवदिन्द्रादिदेवताधिष्ठितो वैश्येन वैश्यः शूद्रेण शूद्रः। यस्मात्क्षत्रादिषु विकारापन्नमग्नौ ब्राह्मण एवं चाविकृतं सृष्टं ब्रह्म तस्मादग्नावेव देवेषु देवानां मध्ये लोकं कर्मफलमिच्छेन्त्यग्निसंबद्धं कर्म कृत्वेत्यर्थः। तदर्थमेव हि तद्ब्रह्म कर्माधिकरणत्वेनाग्निरूपेण व्यवस्थितम्। तस्मात्तस्मिन्नग्नौ कर्म कृत्वा तत्फलं प्रार्थयन्त इत्येतदुपपन्नम्।

पुनरुक्तिवैयर्थ्यमाशङ्क्याह-उत्तरार्थं इति। पूर्वत्र देवेषु दर्शितस्य वर्णविभागस्य मनुष्येषूत्तरग्रन्थेन योजनार्थ इति यावत्। सृष्टवर्णचतुष्टयानिविष्टमवान्तरविभागमभिधातुमारभते-यत्तदिति। नान्येन देवान्तररूपेण क्षत्रादिविकारमन्तरेणेति यावत्। विकारान्तरमग्निब्राह्मणलक्षणम्। क्षत्रियेणेत्यत्र विवक्षितमर्थमाह-इन्द्रादिदेवताधिष्ठित इति। वैश्येनेति वस्वाद्यधिष्ठितत्वमुच्यते। शूद्रेणेति पूषाधिष्ठितत्वम्। अग्न्यादिभावमापन्नस्य क्षत्रादिभावो न तु क्षत्रादिभावमापन्नस्याग्न्यादिभाव इत्येतावन्मात्रेण ब्रह्मणो विकृतत्वाविकृतत्वमग्निब्राह्मणस्तुत्यर्थमुक्तमित्यभिप्रेत्य तस्मादित्यादि व्याचष्टे-यस्मादिति। यथोक्तपार्थनाया न्याय्यत्वं सा ति-तदर्थमेवेति। कर्मफलदानार्थमिति यावत्।

ब्राह्मणे मनुष्येषु मनुष्याणां पुनर्मध्ये कर्मफलेच्छायां नाग्न्यादिनिमित्तक्रि पेक्षा किं तर्हि जातिमात्रस्वरूपप्रतिलम्भेनैव पुरुषार्थसिद्धिः। त्र तु देवाधीना पुरुषार्थसिद्धिस्तत्रैवाग्न्यादिसंबद्धक्रियापेक्षा। श्रुतेश्च

> ' जप्येनैव तु संसिध्येद्ब्राह्मणो नात्र संशयः।
> कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते " इति।

पारिव्राज्यदर्शनाच्च। तस्माद्ब्राह्मणत्व एव मनुष्येषु लोकं कर्मफलमिच्छन्ति। यस्मादेताभ्यां हि ब्राह्मणाग्निरूपाभ्यां कर्मकर्त्रधिकरणरूपाभ्यां स्रष्टृ ब्रह्म साक्षादभवत्।

---

१ च. ढ. न ष्वादिदेवत्वैश्येनाधिष्ठितः सन्मनुष्यवै°। २ च. ढ. °ण पूषरूपेण देवशूद्रेणाधिष्ठितः सन्म ष्यशू°। ३ ग. एंवावि°। ४ घ. ङ. ज. °व वाऽवि°। ५ घ. °र्तं। ६ . . ञ. ण. °रस्वरू°। ७ घ. च. ढ °छान्ते। य°।

मनुष्याणां मध्ये कमपि मनुष्यमवलम्ब्य कर्मफलभोगापेक्षायामधिकरणसंप-दानभावेनावस्थितामिन्द्रादिनिमित्तक्रियापेक्षा नास्ति किंतु ब्राह्मणजातिपाप्तिमात्रेण तत्संबद्धं जप्यादि कर्मावश्यंभावीति तन्मात्रेण पुरुषार्थः सिध्यतीति प्रतीकग्रह-णपूर्वकमाह—मनुष्याणामिति । कुत्र तर्हि यथोक्तक्रियापेक्षेति तत्राऽऽह—यत्र त्विति । देवानां मध्येऽग्निसंबद्धमेव कर्म कृत्वा पुरुषार्थलाभो मनुष्याणां मध्ये तु ब्राह्मण्यपयुक्तजप्यादिमात्रेण तत्प्राप्तिरित्यत्र प्रमाणमाह—स्मृतेश्चेति । जप्य-ग्रहणं जातिमात्रपयुक्तकर्मोपलक्षणार्थम् । अन्यदग्निसंबद्धं कर्म । कोऽयं ब्राह्मणो नाम तत्राऽऽह—मैत्र इति । सर्वेषु भूतेष्वभयपदो विशिष्टजातिमानिति यावत् । ननु यथोक्तस्मृतेर्ब्राह्मण्यपतिलम्भमात्रादभ्युदयलाभेऽपि कुतस्ततो निःश्रेयससि-द्धिस्तत्राऽऽह—पारिव्राज्येति । ब्राह्मणा व्युत्थायाथ भिक्षाचर्यं चरन्तीति ब्राह्म-णस्य पारिव्राज्यं श्रूयते । तच्च संन्यासाद्ब्रह्मगः स्थानमिति ब्रह्मलोकसाधनं मन्यते । अतश्च ब्राह्मणजातिनिमित्तं लोकमिच्छन्तीति युक्तमित्यर्थः । ब्राह्मणे मनुष्येष्वित्यस्यार्थमुपसंहरति—तस्मादिति । हेतुवाक्यमादाय व्याचष्टे—यस्मा-दिति । हिशब्दार्थो यस्मादित्युक्तः । यत्स्रष्टृ ब्रह्म तदेताभ्यां यस्मात्साक्षादभव-त्तस्मादग्नावेवेत्यादि युक्तमिति योजना ।

अत्र तु परमात्मलोकमग्नौ ब्राह्मणे चेच्छन्तीति केचित् । तदसत् - अविद्याधिकारे कर्माधिकारार्थं वर्णविभागस्य प्रस्तुतत्वात्परेण च विशेषणात् । यदि ह्यत्र लोकशब्देन परं एवाऽऽत्मोच्येत परेण विशे-षणमनर्थकं स्यात्स्वं लोकमदृष्ट्वेति । स्वलोकव्यतिरिक्तश्चेदन्यधी-नतया प्रार्थ्यमानः प्रकृतो लोकस्ततः स्वामिति युक्तं विशेषणं प्रकृ-तपरलोकनिवृत्त्यर्थत्वात् । स्वत्वेन चाव्यभिचारात्परमात्मलोकस्य अविद्याकृतानां च स्वत्वव्यभिचारात् । ब्रवीति च कर्मकृतानां व्यभि-चारं क्षीयत एवेति ।

अग्नौ हुत्वा ब्राह्मणे च दत्त्वा परमात्मलक्षणं लोकमाप्तुमिच्छन्तीति भर्तृप-पञ्चव्याख्यानमनुवदति—अत्रेति । सप्तमी तस्मादित्यादिवाक्यविषया । प्रक्रमा-लोचनायां कर्मफलमिह लोकशब्दार्थो न परमात्मा प्रैक्रमभङ्गप्रसङ्गादिति दूष-यति—तदसदिति । कर्माधिकारार्थं कर्मसु प्रवृत्तिसिद्ध्यर्थमिति यावत् । वाक्य-शेषगतविशेषणवशादपि कर्मफलस्यैवात्र लोकशब्दवाच्यत्वमित्याह—परेण चेति । तदेव प्रपञ्चयति- यदि हीति । परपक्षे स्वमिति विशेषणं व्यावर्त्या-

१ घ. °ध्येऽवरम° । २ घ. पेक्ष्यत इति । ञ ण. पेक्षितेति । ३ क. ञ ण. ब्राह्मगो । ४ घ. ङ. ज. °कमेवाग्नौ । ५ ग. ङ. च. ढ. °च्छन्त इति । च. ढ. °न्देनेश्वर° । ७ घ. ज. °रमात्मो° । ८ घ. °रूयाम° । ९ ख. ढ. प्रकृतम° ।

भावान्न घटते चेत्स्वपक्षेऽपि कथं तदुपपत्तिरित्याशङ्क्याऽऽह-स्वलोकेति । परशब्दोऽनात्मविषयः । ननु प्रकृते वाक्ये लोकशब्देन परमात्मा नोच्यते चेदुत्तरवाक्येऽपि तेन नासावुच्येत विशेषाभावादित्याशङ्क्य विशेषणसामर्थ्यान्नैवमित्याह-स्वत्वेन चेति । कर्मफलविषयत्वेनापि विशेषणस्य नेतुं शक्यत्वान्न विशेषसिद्धिरित्याशङ्क्याऽऽह-अविद्येति । तेषां स्वरूपव्यभिचारे वाक्यशेषं प्रमाणयति-ब्रवीति चेति ।

ब्रह्मणा सृष्टा वर्णाः कर्मार्थम् । तच्च कर्म धर्माख्यं सर्वानेव कर्तव्यतया नियन्तृ पुरुषार्थसाधनं च । तस्मात्तेनैव चेत्कर्मणा स्वो लोकः परमात्माख्योऽविदितोऽपि प्राप्यते किं तस्यैव पदनीयत्वेन क्रियत इत्यत आह-अथेति पूर्वपक्षनिवृत्त्यर्थः । यः कश्चिद्ध वा अस्मात्सांसारिकात्पिण्डग्रहणलक्षणादविद्याकामकर्महेतुकादन्यधीनकर्माभिमानतया वा ब्राह्मणजातिमात्रकर्माभिमानतया वाऽऽगन्तुकादस्वभूताल्लोकात्स्वं लोकमात्माख्यमात्मत्वेनाव्यभिचारित्वादृष्ट्वाऽहं ब्रह्मास्मीति प्रैति म्रियते । स यद्यपि स्वो लोकोऽविदितोऽविद्यया व्यवहितोऽस्वइवाज्ञात एनं संख्यापूरण इव लौकिक आत्मानं न भुनक्ति न पालयति शोकमोहभयादिदोषापनयेन ।

उत्तरवाक्यव्यावर्त्यं पूर्वपक्षमाह-ब्रह्मणेति । तत्पुनरचेतनमकिंचित्करमित्याशङ्क्याऽऽह-तच्चेति । सर्वैरेव वर्णैः स्वस्य कर्तव्यतया तान्प्रति नियन्तृ भूत्वेति योजना । तस्य पुमर्थोपायत्वप्रसिद्धिमादाय फलितमाह-तस्मादिति । अविदितोऽपीति च्छेदः । देवतागुणैर्न कर्म मुक्तिहेतुरिति पक्षं प्रतिक्षेप्तुपुत्तरं वाक्यमुत्थापयति-अत आहेति । ज्ञानादेव मुक्तिर्न कर्मणेत्यागमप्रसिद्धमिति निपातयोरर्थः । तत्र निमित्तमुपादानं चेति द्वयं संक्षिपति-अविद्येति । निमित्तं विवृणोति-अन्यधीनेति । आत्माख्यस्य लोकस्य सत्त्वे हेतुमाह-आत्मत्वेनेति । अहं ब्रह्मास्मीत्यदृष्ट्वेति संबन्धः । यः परमात्मानमविदित्वैव म्रियते तमेनं परमात्मा न पालयतीति योजना । परमात्मनः स्वरूपत्वादविदितस्यापि पालयितृत्वं स्यादित्याशङ्क्याऽऽह-स यद्यपीति । लोकशब्दादुपरिष्टात्तथाऽपीति द्रष्टव्यम् । अविदित इत्यस्य व्याख्यानमविद्ययेत्यादि । परमात्माख्यो लोको

---

१ घ. °टत इति चे°। २ ख. ढ 'षणासि°। ३ ग. घ ङ. छ. ज. झ. 'ति प°। ४ ख. ग. घ. च ज. झ. ढ °क्षनि°। ५ ग. °त्यर्थम्। यः। ६ ख. च. ढ. °श्चिज्जीवा ह वा। ७ घ. च. ज. °मानित°। ८ क. घ. च. छ. ज °मानित°। ९ क. ख. °स्वरूपभू°। १० क. ख. ग. घ. च. ज. झ. ढ. °त्मा न। ११ ख. ढ. °गुणं क°। १२ घ. °णवत्कर्म। १३ क. थ. °त्तरवा°।

नाज्ञातो भुनक्तीत्यत्र कर्मफलभूतं लोकं वैधर्म्यदृष्टान्ततया दर्शयति--अस्व-इतेति। अज्ञातस्यापालयितृत्वे साधर्म्यदृष्टान्तमाह-संरुध्येति। यथा लौकिको दशमो दशमोऽस्मीत्यज्ञातो न शोकादिनिवर्तनेनाऽऽत्मानं भुनक्ति तथा परमात्माऽपीत्यर्थः।

यथा चं लोके वेदोऽननुक्तोऽनधीत कर्माद्यवबोधकत्वेन न भुनक्त्यन्यद्वा लौकिकं कृष्यादि कर्माकृतं स्वात्मनाऽनभिव्याप्तितमात्मीयफलप्रदानेन न भुनक्त्येवमात्मा स्वो लोकः स्वेनैव नित्यात्मस्वरूपेणानभिव्याप्तितोऽविद्यादिप्रहाणेन न भुनक्त्येव।

तत्रैव श्रुत्युक्तं दृष्टान्तद्वयं व्याचष्टे-यथाँ चेत्यादिना। अविद्यादीत्यादिशब्देन तदुत्थं सर्वं संगृह्यते।

ननु किं स्वलोकदर्शननिमित्तपरिपालनेन कर्मणः फलप्राप्तिप्रौढ्यादिष्टफलनिमित्तस्य च कर्मणो बाहुल्यात्तन्निमित्तं पालनमक्षयं भविष्यति। तन्न कृतस्यँ क्षयवत्त्वादित्येतदाह यदिह वै संसारेऽनुतवत्काश्चिन्महात्माऽप्यनेवंवित्स्वं लोकं यथोक्तेन विधिनाऽविद्वान्महद्बह्वश्वमेधादि पुण्यं कर्मेष्टफलमेव नैरन्तर्येण करोत्यनेनैवाऽऽनन्त्यं मम भविष्यतीति। तत्कर्म हास्याविद्यावतोऽविद्याजनितकामहेतुत्वात्स्वप्नदर्शनविभ्रमोद्भूतविभूतिवदन्ततोऽन्ते फलोपभोगस्य क्षीयत एव तत्कारणयोरविद्याकामयोश्चलत्वात्कृतक्षयप्रौढ्योपपत्तेस्तस्मान्न पुण्यकर्मफलपालनानन्त्याशाऽस्त्येव।

यदिहेत्यादिवाक्यार्थोक्तं चोद्यमुत्थापयति-नन्विति। नन्वनिष्टफलनिमित्तस्यापि कर्मणः फलप्राप्तिप्रौढ्यात्कथं कर्मणो मोक्षः सेत्स्यति तत्राऽऽह-इष्टेति। बाहुल्यमश्वमेधादिकर्मणो महत्तरत्वं तद्धि दुरितमभिभूय मोक्षमेव संपादयिष्यतीत्यर्थः। यत्कृतकं तदनित्यमिति न्यायमाश्रित्य परिहरति--तत्रेत्यादिना। सप्तम्यर्थः संसार इति निपातार्थं सूचयति--अद्भुतवदिति। अनेवंवित्त्वं व्याकरोति-स्वं लोकमिति। यथोक्तो विधिरन्वयव्यतिरेकादिः। पुण्यकर्मच्छेदेषु दुरितप्रसक्तिं निवारयति-नैरन्तर्येणेति। तथा पुण्यं संचिन्वतोऽभिप्रायमाह-अनेनेति। प्रक्रान्तयच्छब्दापेक्षितं कथयति-तत्कर्मेति। प्रागुक्तन्यायद्योती हेति

---

१ घ. ज. वा। २ ग. °व्यनवबोधनेन। घ. ज. °व्यर्थवि°। ३ ङ छ. °धनत्वेन। ४ घ. °था वेत्या°। ५ ख. °मित्तपा°। घ. °भित्तपरिपा°। ६ घ. ङ. ज. °तकस्य। ७ ग. स्य कर्मणः क्ष°। ८ ङ. च. ढ. °मोद्भवि°। ९ क. ख. घ. ञ. ढ. ण. °पोद्यं चो° घ. ण. °सारः। इहेति। ढ. सारः। इह नि°।

निपातः । कारणरूपेण कार्यस्य ध्रुवत्वमाशङ्क्याऽऽह-तत्कारणयोरिति ।

अत आत्मानमेव स्व लोकमात्मानमिति स्वं लोकमित्यस्मिन्नर्थे स्वं लोकमिति प्रकृतत्वादिह च स्वशब्दस्याप्रयोगादुपासीत । स य आत्मानमेव लोकमुपास्ते तस्य किमित्युच्यते-न ह्यस्य कर्म क्षीयते । कर्माभावादेवेति नित्यानुवादः । यथाऽविदुषः कर्मक्षयलक्षणं संसारदुःखं संततमेव न तथा तदस्य विद्यत इत्यर्थः । मिथिलायां प्रदीप्तायां न मे दह्यति किंचनेति यद्वत् ।

मुक्तेरनित्यत्वदोषसमाधिस्तर्हि केन प्रकारेण स्यादित्याशङ्क्याऽऽह-अत इति । आत्मशब्दार्थमाह-स्व लोकमिति । तदेव स्फुटयति-आत्मानमिति । आत्मशब्दस्य प्रकृतस्वलोकविषयत्वे हेत्वन्तरमाह-इह चेति । प्रयोगे तु पुनरुक्तिभयादर्थान्तरविषयत्वमपि स्यादित्यर्थः । विद्याफलमाकाङ्क्षाद्वारा निक्षिपति-स य इति । कर्मफलस्य क्षयित्वमुक्त्वा कर्मणोऽक्षयत्वं वदतो व्याहतिमाशङ्क्याऽऽह-कर्मेति । वाक्यस्य विवक्षितमर्थं वैधर्म्यदृष्टान्तेन व्याचष्टे-यथेति । अविदुष इति च्छेदः । कर्मक्षयेऽपि वा विदुषो दुःखाभावे दृष्टान्तमाह-मिथिलायामिति ।

स्वात्मलोकोपासकस्य विदुषो विद्यासंयोगात्कर्मैव न क्षीयत इत्यपरे वर्णयन्ति । लोकशब्दार्थं च कर्मसमवायिनं द्विधा परिकल्पयन्ति किल, एको व्याकृतावस्थः कर्माश्रयो लोको हिरण्यगर्भाख्यस्तं कर्मसमवायिन लोकं व्याकृतं परिच्छिन्नं य उपास्ते तस्य किल परिच्छिन्नकर्मात्मदर्शिनः कर्म क्षीयते । तमेव कर्मसमवायिनं लोकमव्याकृतावस्थं कारणरूपमापाद्य यस्तूपास्ते तस्यापरिच्छिन्नकर्मात्मदर्शित्वात्तस्य कर्म न क्षीयत इति ।

आत्मानमित्यादि केवलज्ञानान्मुक्तिरित्येवंपरतया व्याख्यातं संप्रति तत्र भर्तृप्रपञ्चव्याख्यामुत्थापयति-स्वात्मेति । आत्मलोकोपासकस्य कर्माभावे कथं तदक्षयवाचोयुक्तिरित्याशङ्क्य कर्माभावस्यासिद्धिमभिसंधाय कर्मसाध्यं लोकं व्याकृताव्याकृतरूपेण भिनत्ति-लोकशब्दार्थं चेति । औत्प्रेक्षिकी कल्पना न तु श्रौतीति वक्तुं किलेत्युक्तम् । तत्राऽऽद्यं लोकशब्दार्थमनूद्य तदुपासकस्य दोषमाह-एक इति । परिच्छिन्नः कर्मात्मा तत्साध्यो व्याकृतावस्थो लोकस्तस्मिन्नहंग्रहोपासकस्येति यावत् । किलशब्दस्तु पूर्ववत् । द्वितीयं लोकशब्दार्थमनूद्य

१ स. घ. ङ. ण. °न्तेनाऽऽच° । २ क. स. छ. ज. झ. °को हिर° । ३ क. छ. झ स्य च क° । ४ घ. °ख्यानमु° । ५ स. ढ. ण. °च्छिन्नक° ।

तदुपासकस्य लाभं दर्शयति- तमेवेति । यथा कुण्डलादेरन्तर्बहिरन्वेषणे सुवर्णातिरिक्तरूपानुपलम्भात्तद्रूपेणास्य नित्यत्वं तथा कर्मसाध्यं हिरण्यगर्भादिलोकं कार्यत्वादव्याकृतं कारणमेवेत्यङ्गीकृत्य यस्तस्मिन्नहंबुद्धचोपास्ते तस्यापरिच्छिन्नकर्मसाध्यलोकात्मोपासकत्वाद्ब्रह्मवित्त्वं कर्मित्वं च घटते तस्य खल्वात्मैव कर्म तेन तस्य तन्न क्षीयते । यः पुनरद्वैतावस्थामुपास्ते तस्याऽऽत्मैव कर्म भवतीति हि मैत्रेयप्रश्नैरुक्तमित्यर्थः ।

भवतीयं शोभना कल्पना न तु श्रौती । स्वलोकशब्देन प्रकृतस्य परमात्मनोऽभिहितत्वात् । स्वं लोकमिति प्रस्तुत्य स्वशब्दप्रक्षेपेण पुनस्तस्यैव प्रतिनिर्देशादात्मानमेव लोकमुपासीतेति । तत्र कर्मसमवायिलोककल्पनाया अनवसर एव ।

आत्मानमित्यादिसमुच्चयपरमिति प्राप्तं पक्षं प्रत्याह—भवतीति । श्रौतत्वाभावे हेतुमाह—स्वलोकेति । स्वं लोकमद्राक्षीत्यत्र स्वलोकशब्देन परस्य प्रकृतस्याऽऽत्मानमेवेत्यत्र प्रकृतहानाप्रकृतप्रक्रियापरिहारार्थमुक्तत्वान्नात्र लोकद्वैविध्यकल्पना युक्तेत्यर्थः । लोकशब्देनात्र परमात्मपरिग्रहे हेत्वन्तरमाह—स्वं लोकमितीति । यथा लोकस्य स्वशब्दार्थो विशेषणं तथाऽऽत्मानमित्यत्र स्वशब्दपर्यायात्मशब्दार्थस्तस्य विशेषणं दृश्यते न च कर्मफलस्य मुख्यमात्मत्वमतो लोकशब्दोऽत्र परमात्मैवेत्यर्थः । प्रकरणाद्विशेषणाच्च सिद्धमर्थं दर्शयति—तत्रेति ।

परेण च केवलविद्याविषयेण विशेषणात्किं प्रजया करिष्यामो येषां नोऽयमात्माऽयं लोक इति । पुत्रकर्मापरविद्याकृतेभ्यो हि लोकेभ्यो विशिनष्ट्ययमात्मा नो लोक इति । " न हास्य केनचन कर्मणा लोको मीयत एषोऽस्य परमो लोकः " इति च । तैः सविशेषणैरस्यैकवाक्यता युक्ता । इहापि स्वं लोकमिति विशेषणदर्शनात् ।

परस्यैव लोकशब्दार्थत्वे हेत्वन्तरमाह—परेणेति । उक्तमेव प्रपञ्चयति—पुत्रेति । अथ परेषु वाक्येषु परमात्मा लोकशब्दार्थः प्रकृते तु कर्मफलमिति व्यवस्थेति चेन्नैवमेकवाक्यत्वसंभवे तद्भेदस्यान्याय्यत्वादित्याह—तैरिति । एकवाक्यत्वसंभावनामेव दर्शयति—इहापीति । यथोत्तरत्राऽऽत्मादिशब्दे लोको विशेषितस्तथाऽऽत्मानमित्यत्राप्यात्मशब्देन विशेष्यते । पूर्ववाक्ये च स्वं लोकमद्राक्षीति स्वशब्देनाऽऽत्मवाचिना तस्य विशेषणं दृश्यते । तथा च पूर्वापरालोनापमेकवाक्यत्वसिद्धिरित्यर्थः ।

अस्मात्कामयत इत्ययुक्तमिति चेदिह स्वो लोकः परमात्मा तदु-

ब . १ण. °कशब्दस्य । २ ख. घ. ज. च. क° । ३ ख. ढ. ण. °वनमे° ।

पासनात्स एव भवतीति स्थिते यद्यत्कामयते तत्तदस्मादात्मनः सृजत इति तदात्मप्राप्तिव्यतिरेकेण फलवचनमयुक्तमिति चेन्न । स्वलोकोपासनस्तुतिपरत्वात् । स्वस्मादेव लोकात्सर्वमिष्टं संपद्यत इत्यर्थो नान्यदतः प्रार्थनीयमानकामत्वात् " आत्मतः प्राण आत्मत आशा " इत्यादि श्रुत्यन्तरं यथा । सर्वात्मभावप्रदर्शनार्थो वा पूर्ववत् ।

प्रकरणे परस्य लोकशब्दार्थत्वमयुक्तं लिङ्गविरोधादिति चोदयति—अस्मादिति । तदेव विवृणोति—इहेत्यादिना । अर्थवादस्थं लिङ्गं न प्रकरणाद्बलवदिति मत्वा समाधत्ते—नेत्यादिना । स्मृतिमेव स्पष्टयति—स्वस्मादेवेति । लोकाज्ज्ञातादिति शेषः । यथा छान्दोग्ये स्तुत्यर्थमात्मनः स्रष्टृत्वमुच्यते तथाऽत्राप्यात्मलोकं स्तोतुमेतत्फलवचनमित्याह—आत्मन इति । भवतु वा मा वा भूदस्माद्धचेवेत्यादिरर्थवादस्तथाऽपि तस्य सर्वात्मत्वप्रदर्शनार्थत्वाद्युक्तमत्र लोकशब्देन परमात्मग्रहणमित्याह—सर्वात्मेति । तस्मात्तत्सर्वमभवदिति वाक्यं दृष्टान्तयति—पूर्ववदिति ।

यदि हि पर एवाऽऽत्मा संपद्यते तदा युक्तोऽस्माद्धचेवाऽऽत्मन इत्यात्मशब्दप्रयोगः स्वस्मादेव प्रकृतादात्मनो लोकादित्येवमर्थः । अन्यथाऽव्याकृतावस्थात्कर्मणो लोकादिति सविशेषणमवक्ष्यत्प्रकृतपरमात्मलोकव्यावृत्तये व्याकृतावस्थाव्यावृत्तये च । न ह्यस्मिन्प्रकृते विशेषितेऽश्रुतान्तरालावस्था प्रतिपत्तुं शक्यते ॥ १५ ॥

किंचाऽऽत्मशब्दस्य त्रिवापरिच्छेदशून्यार्थवाचितायां यच्चाऽऽप्नोतीत्यादिन्यायेन सिद्धत्वात्तत्समानाधिकरणलोकशब्दस्यापि तदर्थत्वात्परस्यैवात्र लोकत्वमित्याह—यदि हीति । किंच यदि लोकशब्देन परं हित्वाऽर्थान्तरमुच्यते तदा सविशेषणं वाक्यं स्यादन्यथा स्वं लोकमिति प्रकृतपरमात्मलोकस्य स्वत्पक्षेऽनन्तरोक्तब्रह्मलोकस्य च व्यावृत्ययोगात् । न चात्र सविशेषं वाक्यं दृष्टमतः स्वं लोकमिति प्रकृतः परमात्मैवात्रापि लोक इत्याह—अन्यथेति । विशेषणं विनैवास्मादित्यत्र परापराभ्यामर्थान्तरं किं न स्यादित्याशङ्क्याऽऽह—न हीति । स्वं लोकमिति प्रकृते परमात्मन्यात्मानमेवेति विशेषिते चाव्याकृताख्या परापराभ्यामन्तरालावस्था न प्रतिपत्तुं शक्यते तस्याः श्रुतत्वाभावादित्यर्थः ॥ १५ ॥

अथो अयं वा आत्मा । अत्राविद्वान्वर्णाश्रमाद्यभिमानो धर्मेण नियम्यमानो देवादिकर्मकर्तव्यतया पशुवत्परतन्त्र इत्युक्तम् । कानि

---

१ घ. ङ. ज. झ. °न्यतः । २ क. ख. ग. ङ. छ. ज. झ. °रेण य° । ३ ख. ढ. त ४ . छ. झ. °ये व्यक्ताव° । ५ घ. ञ. ण. °क्तव्यक्तब्र° ।

पुनस्तानि कर्माणि यत्कर्तव्यतया पशुवत्परतन्त्रो भवति । के वा ते देवादयो येषां कर्मभिः पशुवदुपकरोतीति तदुभयं प्रपञ्चयति—

अथो अयं वा आत्मा सर्वेषां भूतानां लोकः स यज्जुहोति यद्यजते तेन देवानां लोकोऽथ यदनुब्रूते तेन ऋषीणामथ यत्पितृभ्यो निपृणाति यत्प्रजामिच्छते तेन पितॄणामथ यन्मनुष्यान्वासयते यदेभ्योऽशनं ददाति तेन मनुष्याणामथ यत्पशुभ्यस्तृणोदकं विन्दति तेन पशूनां यदस्य गृहेषु श्वापदा वयाꣳस्या पिपीलिकाभ्य उपजीवन्ति तेन तेषां लोको यथा ह वै स्वाय लोकायारिष्टिमिच्छेदेवꣳ हैवंविदे सर्वाणि भूतान्यरिष्टिमिच्छन्ति तद्वा एतद्विदितं मीमाꣳसितम् ॥ १६ ॥

अथो इत्ययं वाक्योपन्यासार्थः । अयं यः प्रकृतो गृही कर्माधिकृतोऽविद्वाञ्छरीरेन्द्रियसंघातादिविशिष्टः पिण्ड आत्मेत्युच्यते । सर्वेषां देवादीनां पिपीलिकान्तानां भूतानां लोको भोग्य आत्मेत्यर्थः सर्वेषां वर्णाश्रमादिविहितैः कर्मभिरुपकारित्वात् ।

कण्डिकान्तरमवतार्य वृत्तमनूद्याऽऽकाङ्क्षापूर्वकं तात्पर्यमाह—अथो इत्यादिना । अत्रेत्यविद्यावस्था पूर्वग्रन्थो वा गृह्यते । अपिपर्यायस्याथोशब्दस्यासंगतिमाशङ्क्य व्याकरोति—अथो इतीति । परस्यापि प्रकृतत्वोक्ततो विशिनष्टि—गृहीति । गृहित्वे हेतुरविद्वानित्यादिः । इतरव्युदासार्थं कर्माधिकृत इत्युक्तम् । कथमुक्तस्याऽऽत्मनः सर्वभोग्यतेत्याशङ्क्याऽऽह—सर्वेषामिति ।

कः पुनः कर्मविशेषैरुपकुर्वन्केषां भूतविशेषाणां लोक इत्युच्यते—स गृही यज्जुहोति यद्यजते । यागो देवतामुद्दिश्य स्वत्वपरित्यागः । स एवाऽऽसेचनावधिको होमस्तेन होमयागलक्षणेन कर्मणाऽवश्यकर्तव्यत्वेन देवानां पशुवत्परतन्त्रत्वेन प्रतिबद्ध इति लोकोऽथ यदनुब्रूते स्वाध्यायमधीतेऽहरहस्तेन ऋषीणां लोकोऽथ यत्पितृभ्यो

१ क. ग. छ. झ ढ. °या पर° । २ ग. घ. च. छ. ज. ट. ड. निमृणा° । ङ. निसृणा° । ३ क. ग. घ. छ ङ. पितॄणा° । ४ ग. ङ. च. ढ. °घातवि° । ख. °त्वाद्विशि° । ६ क. ण. °दिरित° ।

निर्घृणाति प्रयच्छति पिण्डोदकादि । यच्च प्रजामिच्छते प्रजार्थमुद्यमं करोतीच्छा चोत्पत्त्युपलक्षणार्था प्रजा चोत्पादयतीत्यर्थः । तेन कर्मणाऽवश्यकर्तव्यत्वेन पितॄणां लोकः पितृणां भोग्यत्वेन परतन्त्रो लोकः । अथ यन्मनुष्यान्वासयते भक्ष्योदकादिदाने गृहे यच्च तेभ्यो वसद्भ्योऽवसद्भ्यो वाऽतिथिभ्योऽशनं ददाति तेन मनुष्याणाम् । अथ यत्पशुभ्यस्तृणोदकं विन्दति लम्भयति तेन पशूनाम् । यदस्य गृहेषु श्वापदा वयांसि च पिपीलिकाभिः सह कणबलिभाण्डक्षालनादुपजीवन्ति तेन तेषां लोकः ।

तदेव प्रश्नद्वारा प्रकटयति—कैः पुनरिति । यजादिजुहोत्योस्त्यागार्थत्वेनाविशेषात्पुनरुक्तमाशङ्क्य यजादिचोदनाद्रव्यदेवताक्रियासमुदाये कृतार्थत्वादिति न्यायेनाऽऽह—याग इति । आदेश्चेति पक्षेतः । उक्तं च—जुहोतिरासेचनावधिकः स्यादिति ।

यस्मादयमेतानि कर्माणि कुर्वन्नपकरोति देवादिभ्यस्तस्माद्यथा ह वै लोके स्वाय लोकाय स्वस्मै देहायारिष्टिमविनाशं स्वत्वभावाप्रच्युतिमिच्छेत्स्वत्वभावप्रच्युतिभयात्पोषणरक्षणादिभिः सर्वतः परिपालयेदेवं हैवंविदं सर्वभूतभोग्योऽहमनेन प्रकारेण मयाऽवश्यमृणिवत्प्रतिकर्तव्यात्मत्वमात्मानं परिकल्पितवते सर्वाणि भूतानि देवादीनि यथोक्तान्यरिष्टिमविनाशमिच्छन्ति स्वत्वाप्रच्युत्यै सर्वतः संरक्षन्ति कटम्बिन इव पशवस्तस्मादेषा तन्न प्रियमित्युक्तम् । तद्वा एतत्तदेतद्यथोक्तानां कर्मणामृणवदवश्यकर्तव्यत्वं पञ्चमहायज्ञप्रकरणे विदितं कर्तव्यतया संभावितं विचारितं चावदानप्रकरणे ॥ १६ ॥

यथोक्तहोमादिभिर्देवादीनत्यन्तकेवलो गृहिणो विद्यया प्रतिबन्धसंभवात्तदपकारित्वव्यावृत्तिरित्याशङ्क्याऽऽह—यस्मादिति । पूर्वेषामथशब्दानामभिप्रेतमर्थमनूद्य समनन्तरवाक्यमवतार्य तदर्थमाह—तस्मादिति । देवादीनां कर्माधिकारिणि कर्तृत्वादिपरिपालनमेव परिरक्षणमिति विवक्षित्वा पूर्वोक्तं स्मारयति—

---

१ ग. घ च झ. निर्मृणा° । २ ग. झ. °च्छति प्र ३ क. ख. ग. घ. ङ. छ. झ. ढ. पितॄणां । ४ ख. ग. ङ. °णा भो° । ५ ग. घ ङ. च छ. ज. झ. ढ. भोज्यत्वे° । ६ ग. घ. ज. वे स्वा° । ७ च ढ. °णभक्ष° । ८ ग. घ ङ छ. ज. झ. °भोज्योऽह° । ९ ख. च, छ. ढ. °मिति युक्तं ।

तस्मादिति । यथोक्तं कर्म कुर्वन्यद्यपि देवादीन्प्रत्युपकरोति तथाऽपि न तत्कर्तृत्वमावश्यकं मानाभावादित्याशङ्क्याऽऽह–तद्वा इति । भूतयज्ञो मनुष्ययज्ञः पितृयज्ञो देवयज्ञो ब्रह्मयज्ञश्चेत्येवं पञ्च महायज्ञाः । ननु श्रुतमपि विचारं विना नानुष्ठेयं न हि रुदरोदनादि श्रुतमित्येवानुष्ठीयते तत्राऽऽह–मीमांसितमिति । तदेतदवदयते यद्यजते स यदग्नौ जुहोतीत्याद्यवदानप्रकरणम् । ऋणं ह वाव जायते जायमानो योऽस्तीत्यादिनाऽर्थवादेनेति शेषः ॥ १६ ॥

आत्मैवेदमग्र आसीत् । ब्रह्म विद्वांश्चेत्तस्मात्पशुभावात्कर्तव्यता-बन्धनरूपात्प्रतिमुच्यते । केनायं कारितः कर्मबन्धनाधिकारेऽवश इव प्रवर्तते न पुनस्तद्विमोक्षणापाये विद्याधिकार इति । ननूक्तं देवा रक्षन्तीति । बाढम् । कर्माधिकारस्वगोचरारूढानेव तेऽपि रक्षन्ति । अन्यथाऽकृताभ्यागमकृतनाशप्रसङ्गात् । न तु सामान्यं पुरुषमात्रं विशिष्टाधिकारानारूढम् । तस्माद्भवितव्यं तेन येन प्रेरितोऽवश एव बहिर्मुखो भवति स्वस्माल्लोकात् । नन्वविद्या साऽविद्यावान्हि बहिर्मुखीभूतः प्रवर्तते साऽपि नेव प्रवर्तिका । वस्तुस्वरूपावरणात्मिका हि सा । प्रवर्तकबीजत्वं तु प्रतिपद्यतेऽन्धत्वमिव गर्तादिपतनप्रवृत्तिहेतुः । एवं तर्ह्युच्यतां किं यत्प्रवृत्तिहेतुरिति । तदिहाभिधीयते एषणाकामः सः, " स्वाभाविकयाऽविद्यायां वर्तमाना बालाः पराचः कामाननुयन्ति " इति काठकश्रुतौ । स्मृतौ च–" काम एष क्रोध एषः " इत्यादि । मानवे च सर्वा प्रवृत्तिः कामहेतुकेवेति । स एषोऽर्थः सविस्तरः प्रदर्श्यते इहाऽऽध्यायपरिसमाप्तेः ।

वाक्यान्तरमादाय व्याख्यातुं पातनिकां करोति–आत्मैवेत्यादिना । कर्मैव बन्धनं तत्राधिकारोऽनुष्ठानं तस्मिन्निति यावत् । विद्याधिकारस्तदुपाये श्रवणादौ प्रवृत्तिस्तत्रेत्यर्थः । यथोक्ताधिकारिणो देवादिभी रक्षणं प्रवृत्तिमार्गे नियमेन प्रवर्तकमिति शङ्कते–नन्विति । उक्तमङ्गी करोति–बाढमिति । तर्हि प्रवर्तकान्तरं न वक्तव्यं तत्राऽऽह–कर्माधिकारेति । कर्मस्वधिकारेण स्वगोचरस्थं

---

१ ख. ङ. °त्येते प° । घ ञ त्येवमते प° । ण. °त्येवैते प° । २ घ ण. °नाम-प्यर्थ° । ३ क. घ. च छ. ज. झ °मान्यपु° । ४ ख. ग झ. °र्मुखो भ° । ५ ख. ग. °विद्या-याऽविदानेव हि ब° । ६ ग. किं तद्यत्प्र° । च. ढ कि तत्प्र° । ७ क. ग छ. पराञ्चः । ८ ग. च. ढ. °ति हि काठके । स्मृ° । ९ ग. घ. ङ °महेतु° । १० ग घ ङ छ. ज. झ. एवार्थः ।

प्राप्तानेव देवादयोऽपि रक्षन्ति न सर्वाश्रमसाधारणं ब्रह्मचारिणमवोऽय कर्ममार्गे प्रवृत्तौ देवादिरक्षणस्याहेतुत्वाद्ब्रह्मचारिणो निवृत्तिं त्यक्त्वा प्रवृत्तिपक्षपाते कारणं वाच्यमित्यर्थः । मनुष्यमात्रं कर्मण्येव ते बलात्प्रवर्तयन्ति तेषामचिन्त्यशक्तित्वादित्याशङ्क्याऽऽह–अन्यथेति । स्वगोचरारूढानेवेत्येवकारस्य व्यावर्त्यं कीर्तयति–न त्विति । विशिष्टाधिकारो गृहस्थानुष्ठेयकर्मसु गृहस्थत्वेन स्वामित्वं तेन देवगोचरतामप्राप्तमित्यर्थः । देवादिरक्षणस्याकारणत्वे फलितमाह––तस्मादिति । प्रत्यगविद्या यथोक्ताधिकारिणो नियमेन प्रवृत्त्यनुरागे हेतुरिति शङ्कते- नन्विति । तदेव स्फुटयति–अविद्यावानिति । तस्याः स्वरूपेण प्रवर्तकत्वं दूषयति–साऽपीति । अविद्यायास्तर्हि प्रवृत्त्यन्वयव्यतिरेकौ कथमित्याशङ्क्य कारणकारणत्वेनेत्याह–प्रवर्तकेति । सत्यन्यस्मिन्कारणेऽकारणमेवाविद्याप्रवृत्तेरिति चेत्तत्राऽऽह–एवं तर्हीति । उत्तरवाक्यमुत्तरत्वेनावतार्य तस्मिन्विवक्षितं प्रवर्तकं संक्षिपति–तदिहाभिधीयत इति । तत्रार्थतः श्रुत्यन्तरं संवादयति–स्वाभाविक्यामिति । तत्रैव भगवतः संमतिमाह–स्मृतौ चेति । 'अथ केन प्रयुक्तोऽयम्' इत्यादिप्रश्नस्योत्तरम्–

'काम एष क्रोध एष रजोगुणसमुद्भवः' इत्यादि ।

'अकामतः क्रिया काचिद्दृश्यते नेह कस्यचित् ।

यद्यद्धि कुरुते जन्तुस्तत्तत्कामस्य चेष्टितम्' ॥

इति वाक्यमाश्रित्याऽऽह–मानवे चेति । दर्शितमिति शेषः । उक्तेऽर्थे तृतीयाध्यायशेषमपि प्रमाणयति–स एषोऽर्थ इति ।

आत्मैवेदमग्र आसीदेक एव सोऽकामयत जाया मे स्यादथ प्रजायेयाथ वित्तं मे स्यादथ कर्म कुर्वीयेत्येतावान्वै कामो नेच्छꣳश्चनातो भूयो विन्देत्तस्मादप्येतर्ह्येकाकी कामयते जाया मे स्यादथ प्रजायेयाथ वित्तं मे स्यादथ कर्म कुर्वीयेति स यावदप्येतेषामेकैमेकं न प्राप्नोत्यकृत्स्न एव तावन्मन्यते तस्यो कृत्स्नता मन एवास्याऽऽत्मा वाग्जाया प्राणः प्रजा चक्षुर्मानुषं वित्तं चक्षुषा हि तद्विन्दन्ते श्रोत्रं दैवꣳ श्रोत्रेण हि तच्छृणोत्यात्मैवास्य कर्माऽऽत्मना हि कर्म करोति स एष पाङ्क्तो यज्ञः पाङ्क्तः

१ ख. ढ. °विद्वानि° । २ ख. ढ. °ति । एवति द्° । ३ घ. एवेति ।

पशुः पाङ्क्तः पुरुषः पाङ्क्तमिदꣳ सर्वं यदिदं किंच
तदिदं सर्वमाप्नोति य एवं वेद ॥ १७ ॥

इति प्रथमाध्याये चतुर्थं ब्राह्मणम् ॥ ४ ॥

आत्मैवेदमग्र आसीत् । आत्मैव स्वाभाविकोऽविद्वान्कार्यकरणसंघातलक्षणो वर्ण्यग्रे प्राग्दारसंबन्धादात्मेत्यभिधीयते । तस्मादात्मनः पृथग्भूतं काम्यमानं जायादिभेदरूपं नाऽऽसीत्म एवैक आसीज्जायाद्येषणाबीजभूताविद्यावानेक एवाऽऽसीत् । स्वाभाविकया स्वात्मनि कर्त्रादिकारककियाफलात्मकताध्यारोपलक्षणयाऽविद्यावासनया वासितः सोऽकामयत कामितवान् ।

एवं तात्पर्यमुक्त्वा प्रतीकमादाय पदानि व्याकरोति—आत्मैवेत्यादिना । वर्णी द्विजत्वद्योतको ब्रह्मचारीति यावत् । कथ तर्हि हेत्वभावे तस्य कामित्वमपि स्यादित्याशङ्क्याऽऽह—जायादीति । सशब्दं व्याकुर्वन्नुत्तरवाक्यमादायावशिष्टं व्याचष्टे—स्वाभाविकयेति ।

कथं जाया कर्माधिकारहेतुभूता मे मम कर्तुः स्यात्तया विनाऽहमनधिकृत एव कर्मण्यतः कर्माधिकारसंपत्तये भवेज्जाया । अथाहं प्रजायेय प्रजारूपेणाहमेवोत्पद्येय । अथ वित्तं मे स्यात्कर्मसाधनं गवादिलक्षणथाहमभ्युदयनिःश्रेयससाधनं कर्म कुर्वीय येनाहमनृणी भूत्वा देवादीनां लोकान्प्राप्नुयां तत्कर्म कुर्वीय ।

कामनाप्रकारं प्रश्नपूर्वकं प्रकटयति—कथमिति । कर्माधिकारहेतुत्वं तस्या साधयति—तयेति । प्रजां प्रति जायाया हेतुत्वद्योतकोऽथशब्दः । प्रजाया मानुषवित्तान्तर्भावमभ्युपेत्य द्वितीयोऽथशब्दः । तृतीयस्तु वित्तस्य कर्मानुष्ठानहेतुत्वविवक्षयेति विभागः । कर्मानुष्ठानफलमाह—येनेति ।

काम्यानि च पुत्रवित्तस्वर्गादिसाधनान्येतावान्वै काम एतावद्धि विषयपरिच्छिन्न इत्यर्थः । एतावानेव हि कामयितव्यो विषयो यदुत जायापुत्रवित्तकर्माणि साधनलक्षणैषणा । लोकाश्च त्रयो मनुष्यलोकः पितृलोको देवलोक इति फलभूताः साधनैषणायाश्चास्याः । तदर्था हि

१ ण °ति । क्किं नि° । २ क. °स्याः । एत° ।

जायापुत्रवित्तकर्मलक्षणा साधनैषणा । तस्मात्सैवैकैषणाया लोकैषणा सैवं सत्यैषणा साधनापेक्षेति द्विधाऽतोऽवधारयिष्यत्युभे ह्येते एषणे एवेति ।

तर्हि नित्यनैमित्तिककर्मणामेवानुष्ठानं नेत्याह-काम्यानि चेति । क्रियापदमनुकृष्टं चशब्दः । कामशब्दस्य यथाश्रुतमर्थं गृहीत्वेतावानित्यादिवाक्यस्याभिप्रायमाह-साधनलक्षणेति । अस्याः साधनैषणायाः फलभूता इति संबन्धः । द्वयोरेषणात्वमुक्त्वा लोकैषणां परिशिनष्टि-तदर्था होति । कथं तर्हि साधनैषणोक्तिरित्याशङ्क्याऽऽह-सैवकेति । एतेन वाक्यशेषोऽप्यनुगुणो भवतीत्याह-अत इति ।

फलार्थत्वात्सर्वारम्भस्य लोकैषणाऽर्थप्राप्तोक्तेवेत्येतावान्वा एतावानेव काम इत्यवधीयते । भोजनेऽभिहिते तृप्तिर्न हि पृथगभिधेया । तदर्थत्वाद्भोजनस्य ते एते एषणे साध्यसाधनलक्षणे कामो येन प्रयुक्तोऽविद्वानवश एव कोशकारवदात्मानं वेष्टयति कर्ममार्ग एवाऽऽत्मानं प्राणदृष्ट्याहिमुखीभूतो न स्वं लोकं प्रतिजानाति । तथा च तैत्तिरीयके- " अग्निमुग्धो हैव धूमतान्तः स्वं लोकं न प्रतिजानाति " इति ।

साधनवत्फलमपि काममात्रं चेत्कथं तर्हि श्रुत्या साधनमात्रमभिधायेतावानवधीयते तत्राऽऽह-फलार्थत्वादिति । उक्ते साधने साध्यमार्थिकमित्यत्र दृष्टान्तमाह-भोजन इति । साधनोक्तौ साध्यस्यार्थादुक्तेरेतावानिति । द्वयोरनुवादेऽपि कथमेषणात्वे कामशब्दस्तत्र प्रयुज्यते न हि तौ पर्यायौ न च तद्वाच्यत्वे तयोरनर्थकतेत्याशङ्क्य पर्यायत्वमेषणाकामशब्दयोरुपेत्याऽऽह-ते एते इति । वेष्टनमेव स्पष्टयति-कर्ममार्ग इति । अग्निमुग्धोऽग्निरेव होमादिद्वारेण मम श्रेयःसाधनं नाऽऽत्मज्ञानमित्यभिमानवान्धूमतान्तो धूमेन ग्लानिमापन्नो धूमता वा ममान्ते देहावसाने भवतीति मन्यमानस्ते धूममभिसंभवन्तीति श्रुतेः । स्वं लोकमात्मानम् ।

कथं पुनरेतावत्त्वमवधार्यते कामानामनन्तत्वादनन्ता हि कामा इत्येतदाशङ्क्य च हेतुमाह-यस्मान्नेच्छंश्चनेच्छन्नप्यतोऽस्मात्फलसाधनलक्षणाद्भूयोऽधिकतरं न विन्देन्न लभेत । न हि लोके फलसाधनव्यतिरिक्तं दृष्टमदृष्टं वा लब्धव्यमस्ति लब्धव्यविषयो हि कामस्तस्य चैतद्व्यतिरेकेणाभावाद्युक्तं वक्तुमेतावान्वै काम इति । एतदुक्तं

---

१ क. °त्सैकैवैष° । ख. °त्सैकैष° । २ ग. घ ङ. च छ ज. झ ढ. सकैव । ३ तत्र किं नि° । ४ क. °ष्टि । एत° । ५ घ तत्र । ६ क. ख. ञ. ण सैकेति । ७ घ. च. °ति प्रजा । ८ घ ञ. °णार्थे का° । ९ ख. घ. ञ. ढ. °र्थते° । १० ख. ग क. स्तस्यै वैत° ।

भवति–दृष्टार्थमदृष्टार्थं वा साध्यसाधनलक्षणमविद्यावत्पुरुषाधिकारविषयमेषणाद्वयं कामोऽतोऽस्माद्द्विदुषा व्युत्थातव्यमिति ।

वाक्यान्तरमुत्थाप्य व्याचष्टे––कथमित्यादिना । तस्मादेतावत्त्वमवधार्यते तेषामिति शेषः । उक्तमेवार्थं लोकदृष्टिमवष्टभ्य स्पष्टयति–न हीति । लब्धव्यान्तराभावेऽपि कामयितव्यान्तरं स्यादित्याशङ्क्याऽऽह–लब्धव्येति । एतद्व्यतिरेकेण साध्यसाधनातिरेकेणेति यावत् । तयोर्द्वयोरपि कामत्वविवक्षायामपि श्रुतेरभिप्रायमाह–एतदुक्तमिति । कामस्यानर्थत्वात्साध्यसाधनयोश्च तावन्मात्रत्वात्तयोर्दोषपुरुषार्थताविश्वासं त्यक्त्वा स्वमूलामतुल्याभ्यस्तिसृभ्योऽप्येषणाभ्यो व्युत्थानं संन्यासात्मकं कृत्वा काङ्क्षितमोक्षहेतुं ज्ञानमुद्दिश्य श्रवणाद्यावर्तयेदित्यर्थः ।

यस्मादेवमविद्वानात्मा कामी पूर्वं कामयामास तथा पूर्वतरोऽप्येषा लोकस्थितिः । प्रजापतेश्चैवमेष सर्ग आसीत्सोऽविभेदविद्यया ततः कामप्रयुक्त एकाकयरममाणोऽरंत्युपघाताय स्त्रियमैच्छत्तां समभवत्ततः सर्गोऽयमासीदिति ह्युक्तम् । तस्मात्तत्सृष्टावेतर्ह्यतस्मिन्नपि काल एकाकी सन्प्राग्दारक्रियातः कामयते जाया मे स्यादथ प्रजायेयाथ वित्तं मे स्यादथ कर्म कुर्वीयेत्युक्तार्थं वाक्यम् । स एवं कामायमानः संपादयंश्च जायादीन्यावत्सैषणास्तान्स एतेषां यथोक्तानां जायादीनामेकैकमपि न प्राप्नोत्यकृत्स्नोऽसंपूर्णोऽहमित्येव तावदात्मानं मन्यते । पारिशेष्यात्समस्तानवैतान्संपादयति यदा तदा तस्य कृत्स्नता ।

तस्मादपीत्यादि व्याचष्टे–यस्मादिति । प्राकृतत्वनिरेषा न बुद्धिपूर्वकारिणामिदं वृत्तमित्याशङ्क्याऽऽह–प्रजापतेश्चेति । तत्र हेतुत्वेन पूर्वोक्तं स्मारयति–सोऽविभेदित्यादिना । तत्रैव कार्यलिङ्गकमनुमानं सूचयति–तस्मादिति । स यावदित्यादिवाक्यमादाय व्याचष्टे–स एवमिति । पूर्वः सशब्दो वाक्यप्रदर्शनार्थः । द्वितीयस्तु व्याख्यानमध्यपातीत्यविरोधः । अर्थसिद्धमर्थमाह––पारिशेष्यादिति ।

यदा तु न शक्नोति कृत्स्नतां संपादयितुं तदाऽस्य कृत्स्नत्वसंपादनायाऽऽह–तस्यो तस्याकृत्स्नत्वाभिमानिनः कृत्स्नतेयमेवं भवति । कथम् । अयं कार्यकरणसंघातः प्रविभज्यते तत्र मनोनुवृत्ति हीतरत्सर्वं

---

१ घ. ङ. च. छ. झ. ञ. ढ. पूर्वः । २ ग. ङ. च. झ. °रत्यप° । ३ ग. घ. ङ. च. छ. ज. झ. ढ. °त्स ए° । ४ ख. ग. ङ. च. छ. ज. झ. ढ. °त्येवं ता° । ५ क. ख. छ. ज. झ. °तुं तदाऽस्याकृत्स्नत्वं त° । ६ ग. घ. ज. °यैकार° ।

कार्यकरणजातमिति मनः प्रधानत्वादात्मेवाऽऽत्मा यथा जायादीनां कुटुम्बपतिरात्मैव तदनुकारित्वाज्जायादिचतुष्टयस्य । एवमिहापि मन आत्मा परिकल्पते कृत्स्नतायै । तथा वाग्जाया मनोनुवृत्तित्वसामान्याद्वाचः । वागिति शब्दश्चोदनादिलक्षणो मनसा श्रोत्रद्वारेण गृह्यतेऽवधार्यते प्रयुज्यते चेति मनसो जायेव वाक् ।

तस्यो कृत्स्नतेत्येतदवतार्य व्याकरोति—यदेत्यादिना । अकृत्स्नत्वाभिमानिनो विरुद्धं कृत्स्नत्वमित्याह—कथमिति । विरोधमन्तरेण कात्स्न्यार्थं विभागं दर्शयति—अयमिति । विभागे प्रस्तुते मनसो यजमानत्वकल्पनायां निमित्तमाह—तत्रेति । उक्तमेव व्यनक्ति—यथेति । तथा मनसो यजमानत्वकल्पनावदित्यर्थः । वाचि जायात्वकल्पनायां निमित्तमाह—मन इति । वाचो वाचोनुवृत्तित्वं स्वरूपकथपुरःसरं स्फोरयति—वागितीति ।

ताभ्यां च वाङ्मनसाभ्या जायापतिस्थानीयाभ्यां प्रसूयते प्राणः कर्मार्थमिति प्राणः प्रजेव । तत्र प्राणचेष्टादिलक्षणं कर्म चक्षुर्दृष्टवित्तसाध्यं भवतीति चक्षुर्मानुषं वित्तम् । तद्विविधं वित्तं मानुषमितरच्चातो विशिनष्टीतरावित्तनिवृत्त्यर्थं मानुषमिति । गवादि हि मनुष्यसंबन्धिवित्तं चक्षुर्ग्राह्यं कर्मसाधनं तस्मात्तत्स्थानीयम् । तेन संबन्धाच्चक्षुर्मानुषं वित्तम् । चक्षुषा हि यस्मात्तन्मानुषं वित्तं विन्दते गवाद्युपलभत इत्यर्थः ।

प्राणस्य प्रजात्वकल्पनां साधयति—ताभ्यां चेति । कथं पुनश्चक्षुर्मानुषं वित्तमित्युच्यते पशुहिरण्यादि तथेत्याशङ्क्याऽऽह—तत्रेति । आत्मादित्रये सिद्धे सतीति यावत् । आदिपदेन कायचेष्टा गृह्यते । मानुषमिति विशेषणस्यार्थवत्त्वं समर्थयते—तद्द्विविधमिति । संप्रति चक्षुषो मानुषवित्तत्वं प्रपञ्चयति—गवादीति । तत्पदपरामृष्टमेवार्थं व्याचष्टे—तेन संबन्धादिति । तत्स्थानीयं मानुषवित्तस्थानीयं तेन मानुषेण वित्तेनेत्येतत् । संबन्धमेव साधयति—चक्षुषा हीति । तस्माच्चक्षुर्मानुषं वित्तमिति शेषः ।

किं पुनरितरद्वित्तं श्रोत्रं दैवं देवविषयत्वाद्विज्ञानस्य । विज्ञानं दैवं वित्तं तदिह श्रोत्रमेव संपत्तिविषयम् । कस्मात् । श्रोत्रेण हि यस्माच्छ्रुतं दैवं वित्तं विज्ञानं शृणोति । अतः श्रोत्राधीनत्वाद्विज्ञानस्य श्रोत्रमेव तदिति । किं पुनरेतैरात्मादिवित्तान्तैरिह निर्वर्त्यं कर्मेत्युच्यते—आ-

१ ख. ज. °र्थकार° । २ क. च. ढ. श्रोत्रादिद्वा° । ३ क. °त्याशङ्क्याऽऽह ।

त्मैवाऽऽत्मेति शरीरमुच्यते । कथं पुनरात्मा कर्मस्थानीयोऽस्य कर्महेतुत्वात् । कथं कर्महेतुत्वम् । आत्मना हि शरीरेण यतः कर्म करोति । तस्याकृत्स्नत्वाभिमानिन एवं कृत्स्नता संपन्ना । यथा बाह्यजायादिलक्षणैवम् । तस्मात्स एष पाङ्क्तः पञ्चभिर्निर्वृत्तः पाङ्क्तो यज्ञो दर्शनमात्रनिर्वृत्तोऽकर्मिणोऽपि ।

आकाङ्क्षापूर्वकमुत्तरवाक्यमुपादत्ते—किं पुनरिति । तद्व्याचष्टे—देवेति तत्र हेतुमाह—कस्मादित्यादिना । यजमानादिनिर्वर्त्यं कर्म प्रश्नपूर्वकं विशदयति—किं पुनरित्यादिना । इहेति संपत्तिपक्षोक्तिः । शरीरस्य कर्मत्वमप्रसिद्धमिति शङ्कित्वा परिहरति—कथं पुनरिति । अस्येति यजमानोक्तिः । हिशब्दार्थो यत इत्यनूद्यते । तस्यो कृत्स्नतयुक्तमुपसंहरति—तस्येति । उक्तरीत्या कृत्स्नत्वे फलितमाह—तस्मादिति ।

कथं पुनरस्य पञ्चत्वसंपत्तिमात्रेण यज्ञत्वम्। उच्यते—यस्माद्बाह्योऽपि यज्ञः पशुपुरुषसाध्यः । स च पशुः पुरुषश्च पाङ्क्त एव । यथोक्तमनआदिपञ्चत्वयोगात् । तदाह—पाङ्क्तः पशुर्गवादिः पाङ्क्तः पुरुष, पशुत्वेऽप्यधिकृतत्वेनाऽस्य विशेषः पुरुषस्येति पृथक्पुरुषग्रहणम् । किं बहुना पाङ्क्तमिदं सर्वं कर्मसाधनं फलं च यदिदं किंच यत्किंचिदिदं सर्वमेवं पाङ्क्तं यज्ञमात्मानं यः संपादयति स तदिदं सर्वं जगदात्मत्वेनाऽऽप्नोति य एवं वेद ॥ १७ ॥

इति बृहदारण्यकभाष्ये प्रथमाध्याये चतुर्थं ब्राह्मणम् ॥ ४ ॥

अस्येति दर्शनोक्तिः । पशोः पुरुषस्य च पाङ्क्तत्वं तच्छब्दार्थः । पुरुषस्य पशुत्वाविशेषात्पृथग्ग्रहणमयुक्तमित्याशङ्क्याऽऽह—पशुत्वेऽपीति । न केवलं पशुपुरुषयोरेव पाङ्क्तत्वं किंतु सर्वस्येत्याह—किं बहुनेति । तस्मादाध्यात्मिकस्य दर्शनस्य यज्ञत्वं पञ्चत्वयोगादविरुद्धमिति शेषः । संपत्तिफलं व्याकरोति—एवमिति । व्याख्यातार्थवाक्यमनूद्य ब्राह्मणमुपसंहरति—य एवं वेदेति । साध्यं साधनं च पाङ्क्तं सूत्रात्मना ज्ञात्वा तच्चाऽऽत्मत्वेनानुसंदधानस्य तदाप्तिरेव फलं तत्कतुन्यायादित्यर्थः ॥ १७ ॥

इति बृहदारण्यकभाष्यटीकायां प्रथमाध्याये चतुर्थं ब्राह्मणम् ॥ ४ ॥

---

१ ख. ग. घ. ङ. छ. झ. बाह्या जा° । २ घ. ञ. ण. °त्तिशब्दोक्तिः । ३ च. छ. °त्वमित्युच्य° । ४ ख. ग. ङ. °त्वेन वि° ।

(अथ प्रथमाध्यायस्य पञ्चमं ब्राह्मणम्) ।

यत्सप्तान्नानि मेधया तपसाऽजनयत्पिता । एकमस्य साधारणं द्वे देवानभाजयत् । त्रीण्यात्मनेऽकुरुत पशुभ्य एकं प्रायच्छत् । तस्मिन्सर्वं प्रतिष्ठितं यच्च प्राणिति यच्च न । कस्मात्तानि न क्षीयन्तेऽद्यमानानि सर्वदा । यो वैतामक्षितिं वेद सोऽन्नमत्ति प्रतीकेन । स देवानपिगच्छति स ऊर्जमुपजीवतीति श्लोकाः ॥ १ ॥

यत्सप्तान्नानि मेधया । अविद्या प्रस्तुता । तत्राविद्वानन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति सवर्णाश्रमाभिमानः कर्मकर्तव्यतया नियतो जुहोत्यादिकर्मभिः कामप्रयुक्तो देवादीनामुपकुर्वन्सर्वेषां भूतानां लोक इत्युक्तम् । यथा च स्वकर्मभिरेकैकेन सर्वैर्भूतैरसौ लोको भोज्यत्वेन सृष्टः । एवमसावपि जुहोत्यादिपाङ्क्तकर्मभिः सर्वाणि भूतानि सर्वं च जगदात्मभोज्यत्वेनासृजत । एवमेकैकः स्वकर्मविद्यानिरूप्येण सर्वस्य जगतो भोक्ता भोज्यं च सर्वस्य सर्वः कर्ता कार्यं चेत्यर्थः । एतदेव च विद्याप्रकरणे मधुविद्यायां वक्ष्यामः । सर्वं सर्वस्य कार्यं मध्वित्यात्मैकत्वविज्ञानार्थम् । यदसौ जुहोतीत्यादिना पाङ्क्तेन काम्येन कर्मणाऽऽत्मभोज्यत्वेन जगदसृजत विज्ञानेन च तज्जगत्सर्वं सप्तधा प्रविभज्यमानं कार्यकारणत्वेन सप्तान्नान्युच्यन्ते भोज्यत्वात्तेनासौ पिता तेषामन्नानाम् । एतेषामन्नानां सूत्रभूताः संक्षेपतः प्रकाशकत्वादिमे मन्त्राः ॥ १ ॥

ब्राह्मणान्तरमवतार्य संगतिं वक्तुं वृत्तं कीर्तयति—यत्सप्तान्नानीत्यादिना । तत्रेत्यतिक्रान्तब्राह्मणोक्तिः । उपास्तिशब्दितं भेददर्शनमविद्याकार्यमनेनानूद्य न स वेदेति तद्धेतुरविद्या पूर्वत्र प्रस्तुतेति योजना । अथो अयमित्यत्रोक्तमनुवदति—सवर्णाश्रमाभिमान इति । आत्मैवेदमग्र आसीदित्यादावुक्तं स्मारयति—कामप्रयुक्त इति । वृत्तमनूद्योत्तरग्रन्थमवतारयितुमपेक्षितं पूरयति—यथा चेति ।

१ ङ. च. छ. झ. ढ. °होत्या° । २ च. ढ. °दिपा° । ३ घ. ज. °धा वि° । ४ घ. घ. छ. झ. °र्यकर° ।

गृहिणो जगतश्च परस्परं स्वकर्मोपार्जितत्वमेष्टव्यमन्यथाऽन्योन्यमुपकारकत्वायोगादित्यर्थः । ननु सूत्रस्यैव जगत्कर्तृत्वं ज्ञानक्रियातिशयवत्त्वान्नेतरेषां तदभावादत आह—एवमिति । पूर्वकल्पीयविहितप्रतिषिद्धज्ञानकर्मानुष्ठाता सर्वो जन्तुरुत्तरसर्गस्य पितृत्वेनात्र विवक्षितो न तु प्रजातिरेवेत्युक्तमर्थं संक्षिप्याऽऽह—सर्वस्येति । सर्वस्य मिथो हेतुहेतुमत्त्वे प्रमाणमाह—एतदेवेति । सर्वस्यान्योन्यकार्यकारणत्वोक्त्या कल्पितत्ववचनं कुत्रोपयुज्यते तत्राऽऽह—आत्मैकत्वेति । एवं भूमिकां कृत्वोत्तरब्राह्मणतात्पर्यमाह—यदसाविति । उच्यन्ते ध्यानार्थमिति शेषः । अन्यत्वे हेतुः—भोज्यत्वादिति । तेन ज्ञानकर्मभ्यां जनकत्वेनेति यावत् । ब्राह्मणभवतारं मन्त्रभवतारयति—एतेषामिति ॥ १ ॥

यत्समान्नानि मेधया तपसाऽजनयत्पितेति मेधया हि तपसाऽजनयत्पिता । एकमस्य साधारणमितीदमेवास्य तत्साधारणमन्नं यदिदमद्यते । स य एतदुपास्ते न स पाप्मनो व्यावर्तते मिश्रꣳ ह्येतत् । द्वे देवानभाजयदिति हुतं च प्रहुतं च तस्माद्देवेभ्यो जुह्वति च प्र च जुह्वत्यथो आहुर्दर्शपूर्णमासाविति । तस्मान्नेष्टियाजुकः स्यात् । पशुभ्य एकं प्रायच्छदिति तत्पयः । पयो ह्येवाग्रे मनुष्याश्च पशवश्चोपजीवन्ति तस्मात्कुमारं जातं घृतं वैवाग्रे प्रतिलेहयन्ति स्तनं वाऽनुधापयन्त्यथ वत्सं जातमाहुरतृणाद इति । तस्मिन्सर्वं प्रतिष्ठितं यच्च प्राणिति यच्च नेति पयसि ह्येदꣳ सर्वं प्रतिष्ठितं यच्च प्राणिति यच्च न । तद्यदिदमाहुः संवत्सरं पयसा जुह्वदप पुनर्मृत्युं जयतीति न तथा विद्याद्यदहरेव जुहोति तदहः पुनर्मृत्युमप जयत्येवं विद्वान्सर्वꣳ हि देवेभ्योऽन्नाद्यं प्रयच्छति । कस्मात्तानि न क्षीयन्तेऽद्य-

---

१ ख. ढ. °यत्रान्ने° । २ ण. °ष्ठानात्सर्वो° । ३ ख ढ. ण. °न्योन्यं का° । ४ क. ग. ञ. प्रजु° । ५ क. °र्शपौर्ण° । ६ ब. ड. ज ट ड. प्रलिले° ।

मानानि सर्वदेति पुरुषो वा अक्षितिः स हीदमन्नं पुनः पुनर्जनयते। यो वैतामक्षितिं वेदेति पुरुषो वा अक्षितिः स हीदमन्नं धिया धिया जनयते कर्मभिर्यद्धैतन्न कुर्यात्क्षीयेत हि सोऽन्नमत्ति प्रतीकेनेति मुखं प्रतीकं मुखेनेत्येतत्। स देवानपिगच्छति स ऊर्जमुपजीवतीति प्रशंसा ॥ २ ॥

यत्सप्तान्नानि यदजनयादिति क्रियाविशेषणं मेधया प्रज्ञया विज्ञानेन तपसा च कर्मणा ज्ञानकर्मणी एव हि मेधातपःशब्दवाच्ये तयोः प्रकृतत्वान्नेतरे मेधातपसी अप्रकरणात्। पाङ्क्तं हि कर्म जायादिसाधनं य एवं वेदेति चानन्तरमेव ज्ञानं प्रकृतम्। तस्मान्न प्रसिद्धयोर्मेधातपसोराशङ्का कार्या। अतो यानि सप्तान्नानि ज्ञानकर्मभ्यां जनितवान्पिता तानि प्रकाशयिष्याम इति वाक्यशेषः। तत्र मन्त्राणामर्थास्तिरोहितत्वात्प्रायेण दुर्विज्ञेयो भवतीति तदर्थव्याख्यानाय ब्राह्मणं प्रवर्तते। तत्र यत्सप्तान्नानि मेधया तपसाऽजनयत्पितेत्यस्य कोऽर्थ उच्यत इति हिशब्देनैव व्याचष्टे प्रसिद्धार्थावद्योतकेन प्रसिद्धो ह्यस्य मन्त्रस्यार्थ इत्यर्थः। यदजनयादिति चानुवादस्वरूपेण मन्त्रेण प्रसिद्धार्थतैव प्रकाशिता अतो ब्राह्मणमविशङ्क्यैवाऽऽह-मेधया हि तपसाऽजनयत्पितेति।

तत्राऽऽद्यमन्त्रभागमादाय व्याचष्टे-यत्सप्तान्नानीति। अजनयदिति क्रियाया विशेषणं यदिति पदम्। तथा च तद्युक्तं पितृत्वादिति शेषः। ग्रन्थार्थधारणशक्तिर्मेधा। कृच्छ्रचान्द्रायणादि तपः। ते कस्मादत्र न गृह्येते तत्राऽऽह-ज्ञानकर्मणी इति। तयोः प्रकृतत्वं प्रकटयति-पाङ्क्तं हीति। इतरयोरप्रकृतत्वं हेतूकृतमनूद्य फलितमाह-तस्मादिति। ज्ञानकर्मणोः प्रकृतत्वमुक्तं हेतुमादाय वाक्यं पूरयति-अत इति। यत्सप्तान्नानीत्यादिमन्त्रभागं व्याख्याय ब्राह्मणवाक्यसमुदायतात्पर्यमाह-तत्रेति। मन्त्रब्राह्मणात्मको ग्रन्थः सप्तम्यर्थः। मेधया हीत्यादिब्राह्मणमाकाङ्क्षापूर्वकमुत्थापयति-तत्र यदिति। प्रकृतमन्त्रसमुदायः सप्तम्या परामृश्यते। व्याख्यानमेव संगृह्णाति-प्रसिद्धो हीति। न केवलं हिशब्दान्मन्त्रस्य

१ घ. ज. °द्धमेधा°। २ घ. ण. हेतुम°।

प्रसिद्धार्थत्वं किंतु मन्त्रस्वरूपालोचनायामपि तत्सिध्यतीत्याह—यदिति । मन्त्रार्थस्य प्रसिद्धत्वे मन्त्रस्यानुगुणत्वं हेतूकृत्य फलितमाह—अत इति ।

ननु कथं प्रसिद्धताऽस्यार्थस्येति । उच्यते—जायादिकर्मान्वितानां लोकफलसाधनानां पितृत्वं तावत्प्रत्यक्षमेव । अभिहितं च जाया मे स्यादित्यादिना । तत्र च दैवं वित्तं विद्या कर्म पुत्रश्च फलभूतानां लोकानां साधनं स्रष्टृत्वं प्रतीत्यभिहितम् । वक्ष्यमाणं च प्रसिद्धमेव । तस्माद्युक्तं वक्तुं मेधयेत्यादि ।

तत्प्रसिद्धिमुपपादयितुं पृच्छति—नन्विति । साध्यसाधनात्मके जगति यस्मिन्पुत्रमविद्यावतो भावि तत्प्रत्यक्षत्वात्प्रसिद्धमनुभूयते हि जायादि संपादयन्नविद्वानित्याह—उच्यत इति । श्रुत्या च प्रागुक्तत्वात्प्रसिद्धमेतदित्याह—अभिहितं चेति । यच्च मेधातपोभ्यां मन्त्रब्राह्मणयोरुक्तं तदपि प्रसिद्धमेव विद्याकर्मपुत्राणामभावे लोकत्रयोत्पत्त्यनुपपत्तेरित्याह—तत्र चेति । पूर्वोत्तरग्रन्थः सप्तम्यर्थः । पुत्रेणैवायं लोको जय्य इत्यादौ वक्ष्यमाणत्वाच्चार्थस्य प्रसिद्धतेत्याह—वक्ष्यमाणं चेति । मन्त्रार्थस्येत्थं प्रसिद्धत्वे मन्त्रस्य प्रसिद्धार्थविषयं ब्राह्मणमुपपन्नमित्युपसंहरति—तस्मादिति ।

एषणा हि फलविषया प्रसिद्धैव च लोके । एषणा च जायादीन्युक्तमेतावान्वै काम इत्यनेनं । ब्रह्मविद्याविषये च सर्वैकत्वात्कामानुपपत्तेः । एतेनाशास्त्रीयप्रज्ञातपोभ्यां स्वाभाविकाभ्यां जगत्स्रष्टृत्वमुक्तमेव भवति ।

प्रकारान्तरेण मन्त्रार्थस्य प्रसिद्धत्वमाह—एषणा हीति । फलविषयत्वं तस्याः स्वानुभवसिद्धमिति वक्तुं हिशब्दः । तस्यां लोकप्रसिद्धत्वेऽपि कथं मन्त्रार्थस्य प्रसिद्धत्वमत आह—एषणा चेति । जायाद्यात्मकस्य कामस्य संसारारम्भकत्वव्यामोक्षेऽपि कामः संसारमारभेत कामित्वाविशेषादित्यतिप्रसङ्गमाशङ्क्याऽऽह—ब्रह्मविद्येति । तस्या विषयो मोक्षः । तस्मिन्नद्वितीयत्वाद्रागादिपारिपन्थिनि कामापरपर्यायो रागो नावकल्पते । नहि मिथ्याज्ञाननिदानो रागः सम्यग्ज्ञानाधिगम्ये मोक्षे संभवति । श्रद्धा तु तत्र भवति तत्त्वबोधाधीनतया संसारविरागिणी तत्र संसारानुषक्तिर्मुक्ताविति यावत् । शास्त्रीयस्य जायादेः संसारहेतुत्वे कर्मादिरशास्त्रीयस्य कथं तद्धेतुत्वमित्याशङ्क्याऽऽह—एतेनेति । अविद्योत्थस्य

१ च. ढ. °ताऽर्थं° । २ च. ढ. °नेनैव ब्र° । ३ च. ज. ढ. °गत्सृष्टत्व° । ४ ख. घ. ङ. °स्वाश्च लो° । ५ ख. ढ. °शेषत्वादि° ।

कामस्य संसारहेतुत्वोपदर्शनेनेति यावत्। स्वाभाविकाभ्यामविद्याधीनकामप्रयुक्ताभ्यामित्यर्थः।

स्थावरान्तस्य चानिष्टफलस्य कर्मविज्ञाननिमित्तत्वात् विवक्षितस्तु शास्त्रीय एव साध्यसाधनभावो ब्रह्मविद्याविधित्सया तद्वैराग्यस्य विवक्षितत्वात्। सर्वो ह्ययं व्यक्ताव्यक्तलक्षणः संसारोऽशुद्धोऽनित्यः साध्यसाधनरूपो दुःखोऽविद्याविषय इत्येतस्माद्विरक्तस्य ब्रह्मविद्याऽऽरब्धव्येति।

इतश्च तयोर्जगत्सृष्टिप्रयोजकत्वमेष्टव्यमित्याह—स्थावरान्तस्येति। यत्सप्तान्नानीत्यादिमन्त्रपदस्य मेधया हीत्यादिब्राह्मणस्य चाक्षरोत्थमर्थमुक्त्वा तात्पर्यार्थमाह—विवक्षितस्त्विति। शास्त्रपरवश्यस्य शास्त्रवशादेव साध्यसाधनभावादशास्त्रीयादैमुख्यसंभवान्न तस्यात्र विवक्षितत्वमित्यर्थः। शास्त्रीयस्य साध्यसाधनभावस्य विवक्षितत्वे हेतुमाह—ब्रह्मेति। तदेव प्रपञ्चयति—सर्वो हीति। दुःखवर्तीति दुःखस्यद्धेतुरिति यावत्। प्रकृतमन्त्रब्राह्मणव्याख्यासमाप्ताविति शब्दो विवक्षितार्थपदर्शनसमाप्तौ वा।

तत्राज्ञानां विभागेन विनियोग उच्यते एकमस्य साधारणमिति मन्त्रपदं तस्य व्याख्यानमिदमेवास्य तत्साधारणमन्नमित्युक्तमस्य भोक्तृसमुदायस्य, किं तद्यदिदमद्यते भुज्यते सर्वैः प्राणिभिरहन्यहनि तत्साधारणं सर्वभोक्तृर्थमकल्पयत्पिता सृष्ट्वाऽन्नम्।

मन्त्रब्राह्मणयोः श्रुत्यर्थाभ्यामर्थमुक्त्वा समनन्तरग्रन्थमवतारयति—तत्रेति। सप्तविधेऽन्ने सृष्टे सतीति यावत्। व्याख्यानमेव विवृणोति—अस्येत्यादिना।

स य एतत्साधारणं सर्वप्राणभृत्स्थितिकरं भुज्यमानमन्नमुपास्ते तत्परो भवतीत्यर्थः। उपासनं हि नाम तात्पर्यं दृष्टं लोके गुरुमुपास्ते राजानमुपास्त इत्यादौ। तस्माच्छरीरास्थित्यर्थान्नोपभोगप्रधानो नाहङ्कार्यकर्मप्रधान इत्यर्थः। स एवंभूतो न पाप्मनोऽधर्माद्व्यावर्तते न विजुगुप्सत इत्येतत्। तथा च मन्त्रवर्णः—" मोघमन्नं विन्दते " इत्यादिः। स्मृतिरपि—' नाऽऽत्मार्थं पाचयेदन्नम् " " अप्रदायैभ्यो यो भुङ्क्ते केवलं स्वयं सः " " अन्नादे भ्रूणहा मार्ष्टि " इत्यादिः।

साधारणमन्नमसाधारणीकुर्वतो दोषं दर्शयति—स य इति। तत्परो भवती-

---

१ च. ढ °निर्मितत्वा°। २ ग. ङ. छ. ज. झ. °पयोग°।

त्युक्तं विवृणोति–उपासनं हीति । ब्राह्मणोक्तेऽर्थे मन्त्रं प्रमाणयति––ब्रह्म चेति । मोघं विफलं देवाद्यनुपभोग्यमन्नं यदि ज्ञानदुर्बलो लभते तदा स वध एव तस्येति साधारणान्नस्यासाधारणीकरणं निन्दितमित्यर्थः । तत्रैव स्मृतीरुदाहरति–स्मृतिरपीति । 'न वृथा घातयेत्पशुम् । न चैकः स्वयमश्नीयाद्विविधं न निर्वपेत् ' इति पादत्रयं द्रष्टव्यम् । ' इष्टान्भोगान्हि वो देवा दास्यन्ते यज्ञभाविताः । तैर्दत्तान् ' इति शेषः । ' अनेवा अभिशंसति । स्तेनः प्रमुक्तो राजनि यावन्नानृतसंकरः ' इत्युत्तरं पादत्रयम् । तत्राऽऽद्यपादस्यार्थो भ्रूणहा श्रेष्ठब्राह्मणघातकः । यथाऽऽहुः–वरिष्ठब्रह्महा चैव भ्रूणहेत्यभिधीयते ' इति । स्वस्यान्नभक्षके स्वपापं मार्ष्टि शोधयतीत्यन्नदातुः पापक्षयोक्तेरितरस्यासाधारणीकृत्य भुञ्जानस्य पापितेति ।

" अदत्त्वा तु य एतेभ्यः पूर्वं भुङ्क्तेऽविचक्षणः ।
स भुञ्जानो न जानाति श्वगृध्रैर्जग्धिमात्मनः " ॥

इत्यादिवाक्यमादिशब्दार्थः ।

कस्मात्पुनः पाप्मनो न व्यावर्तते । मिश्रं ह्येतत्सर्वेषां हि स्वं तदप्रविभक्तं यत्प्राणिभिर्भुज्यते । सर्वभोज्यत्वादेव यो मुखे प्रक्षिप्यमाणोऽपि ग्रासः परस्य पीडाकरो दृश्यते ममेदं स्यादिति हि सर्वेषां तत्राऽऽशा प्रतिबद्धा । तस्मान्न परमपीडायित्वा ग्रसितुमपि शक्यते । " दुष्कृतं हि मनुष्याणाम् " इत्यादिस्मरणाच्च ।

आकाङ्क्षापूर्वकं हेतुमवतार्य व्याकरोति–कस्मादित्यादिना । सर्वभोज्यत्वं साधयति–यो मुख इति । परस्य श्वमार्जारादेरिति यावत् । पीडाकरत्वे हेतुमाह–ममेदमिति । प्रागुक्तदृष्टिफलमाचष्टे–तस्मादिति । साधारणमन्नमसाधारणीकुर्वाणस्य पापानिवृत्तिरित्यत्र हेत्वन्तरमाह–दुष्कृतं हीति । यदा हि मनुष्याणां दुष्कृतमन्नमाश्रित्य तिष्ठति तदा तदसाधारणीकुर्वतो महत्तरं पापं भवतीत्यर्थः ।

गृहिणा वैश्वदेवाख्यमन्नं यदहन्यहनि निरू(रु)प्यत इति केचित् । तन्न । सर्वभोक्तृसाधारणत्वं वैश्वदेवाख्यस्यान्नस्य न सर्वप्राणभृद्भुज्यमानान्नवत्प्रत्यक्षम् । नापि यदिदमद्यत इति तद्विषयं वचनमनुकूलम् । सर्वप्राणभृद्भुज्यमानान्नान्तःपातित्वाच्च वैश्वदेवाख्यस्य युक्तं श्वचाण्डालाद्यद्यस्यान्नस्य ग्रहणं वैश्वदेवव्यतिरेकेणापि

१ ख. ढ. प्रयुक्तो । २ घ. यावन्नृ° । ३ घ. °संगरः । ४ क. °त्रयं द्रष्टव्यम् । ५ ख. ङ. °णामन्नमाश्रित्य तिष्ठते । यो हि यस्यान्नमश्नाति स तस्याश्नाति किल्बिषम् ' इ° ।

श्वचाण्डालाद्यान्नदर्शनात्तत्र युक्तं यदिदमद्यत इति वचनम् ।

एकमस्येत्यादिमन्त्रब्राह्मणयोः स्वपक्षार्थमुक्त्वा भर्तृपक्षमाह-गृहिणोति यदन्नं गृहिणा प्रत्यहमग्नौ वैश्वदेवाख्यं निर्वर्त्यते तत्साधारणमिति भर्तृपक्षोक्तमित्यर्थः । साधारणपदानुपपत्तेर्न युक्तमिदं व्याख्यानमिति दूषयति-तन्नेति वैश्वदेवस्य साधारणत्वमप्रामाणिकमित्युक्तमिदानीं तस्याप्रत्यक्षत्वादिदमा परामर्शश्च न युक्तिमानित्याह-नापीति । इतश्च साधारणशब्देन सर्वमाप्यन्नं ग्राह्यमित्याह-सर्वेति । वैश्वदेवग्रहेऽपीतरग्रहः स्यादिति चेन्नेत्याह-वैश्वदेवेति । यत्तु परपक्षे यदिदमद्यत इति वचो नानुकूलमिति तन्नास्मत्पक्षेऽस्तीत्याह-तत्रेति । प्रत्यक्षं साधारणान्नं सप्तम्यर्थः ।

यदि हि तन्न गृह्येत साधारणशब्देन पित्राऽसृष्टत्वाविनियुक्तत्वे तस्य प्रसज्येयाताम् । इष्यते हि तत्सृष्टत्वं तद्विनियुक्तत्वं च सर्वस्यान्नजातस्य । न च वैश्वदेवाख्यं शास्त्रोक्तं कर्म कुर्वतः पाप्मनोऽविनिवृत्तिर्युक्ता । न च तस्य प्रतिषेधोऽस्ति । न च मत्स्यबन्धनादिकर्मवत्स्वभावजुगुप्सितमेताच्छिष्टानिवर्त्यत्वादकरणे च प्रत्यवायश्रवणाद्वितरत्र च प्रत्यवायोपपत्तेः । " अहमन्नमन्नमदन्तमद्मि " इति मन्त्रवर्णात् ।

विपक्षे दोषमाह-यदि हीति । प्रसङ्गस्येष्टत्वं निराचष्टे-इष्यते हीति । परपक्षे वाक्यशेषविरोधं दोषान्तरमाह-न चेति । श्येनादितुल्यत्वं तस्य व्यावर्तयति-न च तस्येति । अनिषिद्धस्यापि तस्य स्वभावजुगुप्सितत्वात्तदनुष्ठायिनः पापानिवृत्तिरित्याशङ्क्याऽऽह-न चेति ।

' अवश्यं याति तिर्यक्त्वं जग्ध्वा चैवाहुतं हविः ' ।

इत्यकरणे वैश्वदेवस्य प्रत्यवायश्रवणाच्च तदनुष्ठायिनो न पाप्मलेशोऽस्तीत्याह-अकरणे चेति । सर्वसाधारणान्नग्रहे तु तत्परस्य निन्दावचनमुपपद्यते येन तदेव ग्राह्यमित्याह-इतरत्रेति । तत्रैव श्रुत्यन्तरं संवादयति-अहमिति । अर्थिभ्योऽविभज्यान्नमदत्त्वा स्वयमेव भुञ्जानं नरमहमन्नमेव भक्षयामि तमनर्थभाजं करोमीत्यर्थः ।

द्वे देवानभाजयदिति मन्त्रपदं ये द्वे अन्ने सृष्ट्वा देवानभाजयत् । के ते द्वे इत्युच्येते-हुतं च प्रहुतं च । हुतमित्यग्नौ हवनम् । प्रहुतं हुत्वा बलिहरणम् । यस्माद्द्वे एते अन्ने हुतप्रहुते देवानभाजयत्पिता

---

१ घ. ङ. ज. झ. श्वचण्डा° । २ क. ञ °पक्षमु° । ३ घ. त्वाचो । ४ ष. °ल्त्वमि° । ५ ख. ग. झ. ढ. °प्सितं तच्छि° । ६ घ. ञ. ण. °प्मवेघोऽस्ती° । ७ ख. घ. च. छ. ज. झ. ढ. °त्युच्यते । ८ ख. ङ. °त्वा च ब° ।

तस्मादेतर्ह्यपि गृहिणः काले देवेभ्यो जुह्वति देवेभ्य इदमन्नमस्माभिर्दीयमानमिति मन्वाना जुह्वीतं प्रजुह्वति हुत्वा बलिहरणं च कुर्वत इत्यर्थः। अथो अप्यन्य आहुर्द्वे अन्ने पित्रा देवेभ्यः प्रत्ते न हुतप्रहुते किं तर्हि दर्शपूर्णमासाविति। द्वित्वश्रवणाविशेषादत्यन्तप्रसिद्धत्वाच्च हुतप्रहुते इति प्रथमः पक्षः।

मन्त्रान्तरमाशायाऽऽकाङ्क्षाद्वारा ब्राह्मणमुत्थाप्य व्याचष्टे—द्वे देवानित्यादिना। हुतप्रहुतयोर्देवान्नत्वे संभवतितनमनुष्ठानमनुकूलयति—यस्मादिति। पक्षान्तरमुपन्यस्य व्याकरोति—अथो इति। यदि दर्शपूर्णमासौ देवान्ने कथं तर्हि हुतप्रहुते इति पक्षस्य प्राप्तिस्तत्राऽऽह—द्वित्वेति।

यद्यपि द्वित्वं हुतप्रहुतयोः संभवति तथाऽपि श्रौतयोरेव तु दर्शपूर्णमासयोर्देवान्नत्वं प्रसिद्धतरं मन्त्रप्रकाशितत्वात्। गुणप्रधानप्राप्तौ च प्रधाने प्रथमतराऽवगतिः। दर्शपूर्णमासयोश्च प्राधान्यं हुतप्रहुतापेक्षया। तस्मात्तयोरेव ग्रहणं युक्तं द्वे देवानभाजयदिति।

तर्हि द्वे देवानिति श्रुतद्वित्वस्य हुतप्रहुतयोरपि संभवान्न प्रथमपक्षस्य पूर्वपक्षत्वमत आह—यद्यपीति। प्रसिद्धतरत्वे हेतुमाह—मन्त्रेति। 'अग्नये जुष्टं निर्वपाम्यग्निरिदं हविरजुषत' इत्यादिमन्त्रेषु दर्शपूर्णमासयोर्देवान्नत्वस्य प्रतिपन्नत्वादिति यावत्। इतश्च दर्शपूर्णमासयोरेव देवान्नत्वमिति वक्तुं सामान्यन्यायमाह—गुणेति। गुणप्रधानयोरेकत्र साधारणशब्दात्प्राप्तौ सत्यां प्रथमतरा प्रधाने भवत्ययमर्थो गौणमुख्ययोर्मुख्ये कार्यसंप्रत्यय इति न्यायादित्यर्थः। अस्त्वेवं प्रस्तुते किं जातं तदाह—दर्शपूर्णमासयोश्चेति। तयोर्निरपेक्षश्रुतिदृष्टतया सापेक्षस्मृतिसिद्धहुताद्यपेक्षया प्राधान्यं सिद्धं तथा च प्रधानयोस्तयोरितरयोश्च गुणयोरेकत्र प्राप्तौ प्रधानयोरेव द्वे देवानिति मन्त्रेण ग्रहो युक्तमित्यर्थः।

यस्माद्देवार्थमेते पित्रा प्रकल्पते दर्शपूर्णमासाख्ये अज तस्मात्तयोर्देवार्थत्वाविघाताय नाष्टयाजुक इष्टियजनशीलः इष्टिशब्देन हि लक्षणया इष्टयः ज्ञातपर्यायं प्रसिद्धिस्वाच्छीलप्रत्ययप्रयोगात्तास्वाष्टियजनप्रधानो न स्यादित्यर्थः।

दर्शपूर्णमासयोर्देवान्नत्वेन संभवन्तमितरेषामप्यनुकूलयति—यस्मादिति। इष्टियजनशीलो न स्यादिति संबन्धः। ननु तद्यजनशीलत्वाभावे कुतो दर्शपूर्ण-

---

१ क. °न्यान: प्र च जु°। २ क घ. ङ ज. झ ञ °ति च प°। ३ ख छ. प्र च जु°। ४ छ ज. °ति प्रजुह्वति च। ५ क. °त्वा च व°। ६ ङ. °ण कु°। ७ क. °दन्यत्र प्र°। ८ ङ. घ. ङ. ज. झ. °यीय°। ९ ग. °सिद्धास्ता°।

मासयोर्देवार्थत्वं नहि तावन्निषध्यौ तदर्थावित्याशङ्क्याऽऽह-इष्टिशब्देनेति। किं पुनरस्मिन्वाक्ये काम्येष्टिविषयत्वमिष्टिशब्दस्येत्यत्र नियामकं तत्र किलशब्दसूचितां पाठकप्रसिद्धिमाह-शातपर्थीति। काम्येष्टीनामनुष्ठाननिषेधे स्वर्गकामवाक्यविरोधः स्यादित्याशङ्क्याऽऽह-तात्छील्येति। तत्र विहितस्योक्तप्रत्ययस्यात्र प्रयोगात्काम्येष्टिभक्षणप्रधानत्वमिह निषिध्यते तच्च देवप्रधानयोर्दर्शपूर्णमासयोरवश्यानुष्ठेयत्वसिद्धयर्थं न तु ताः स्वतो निषिध्यन्ते तत्र स्वर्गकामवाक्यविरोधोऽस्तीत्यर्थः।

पशुभ्य एकं प्रायच्छदिति यत्पशुभ्य एकं प्रायच्छत्पिता किं पुनस्तदन्नं तत्पयः। कथं पुनरवगम्यते पशवोऽस्यान्नस्य स्वामिन इत्यत आह-पयो ह्यग्रे प्रथमं यस्मान्मनुष्याश्च पशवश्च पय एवोपजीवन्तीति। उचितं हि तेषां तदन्नमन्यथा कथं तदेवाग्रे नियमेनोपजीवेयुः।

पशुनविषयं मन्त्रपदमादाय प्रश्नपूर्वकं तदर्थं कथयति-पशुभ्य इति। पशूनां पयोऽन्नमित्येतदुपपादयितुं पृच्छति-कथं पुनरिति। पयो ह्यग्रे प्रथमं यस्मादित्यनेन प्रतीकमुपादाय व्याकरोति-अग्र इति। 'पशवो द्विपादश्चतुष्पादश्च' इति श्रुतिमाश्रित्य मनुष्याश्चेत्युक्तम्। उचितं हीत्यत्र हिशब्दस्यार्थं यस्मादित्युपक्रमात्। औचित्यं व्यतिरेकद्वारा साधयति-अन्यथेति।

कथमग्रे तदेवोपजीवन्तीति। उच्यते-मनुष्याश्च पशवश्च यस्मात्तेनैवान्नेन वर्तन्तेऽद्यत्वेऽपि यथा पित्राऽऽदौ विनियोगः कृतस्तस्मात्कुमारं बालं जातं घृतं वा त्रवर्णिका जातकर्मणि जातरूपसंयुक्तं प्रीतिलेहयन्ति प्राशयन्ति स्तनं वाऽनधापयन्त पश्चात्पाययन्ति। यथासंभवमन्येषा स्तनमेवाग्रे धापयन्त मनुष्यान्योऽन्येषा पशूनाम्। अथ वत्सं जातमाहुः किंयत्समाणा वत्स इत्यं पृष्टाः सन्तोऽतृणाद इति। नाद्यापि तृणमत्त्यतीव बालः पयैतवाद्यापि वतत इत्यर्थः।

निर्णयेन प्रथमं पशूनां तदन्नं निश्चित्य मनुष्यान्निर्णेतुमिति शङ्कते-कथमिति। मनुष्यावयवे वा प्रश्नस्तात्पर्यस्यावयवे वेति पृच्छति-उच्यत इति। तत्राऽऽद्यमनुवदन्नुत्तरमेव प्रत्यभिनयति-मनुष्याश्चेति। चकारो मनुष्यमात्रसंग्रहार्थः। तेनैव पयसैवेति यावत्। पयं वेति वाशब्दो वक्ष्यमाणविकल्पद्योतकः। जातरूपं हेम त्रवर्णिकाभ्योऽन्येषां जातकर्मानाधीयतामनधिकृतत्वात् स्तनमेव जातं कुमारं प्रथमं पाययन्तीत्याह-यथासंभवमिति। यद्वा तेषां जातकर्मनिवृत्तानां जातं कुमारं

१ ख. ग. घ. ङ. ञ ढ शुभ्य. प्रा। २ ण. स्नदित्यर्थं। ३ ख. ड. ढ. ंस्तया तस्मा। ४ व. म. संप्रयु। ५ ब. ड. ञ ञ. प्रलिल। ६ ख. ढ. ण. ंमाद्यमा।

घृतं वा स्तनं वा प्रथमं पाययन्तीति यावत्। पशुविषयं प्रश्नं पशवश्चेति पूर्वि-तप्रमाणानं प्रत्याह—स्तनमेवेति। पशूनां जातं दत्तमिति संबन्धः। पशूनां पयोऽन्नमित्यत्र लोकप्रसिद्धिं प्रमाणयति—अथेति। द्विपात्सु विकारविच्छेदार्थोऽथशब्दः। प्रतिवचनं व्याचष्टे—नाद्यापीति।

यच्चाग्रे जातकर्मादौ घृतमुपजीवन्ति यच्चेतरे पय एव तत्सर्वथाऽपि पय एवोपजीवन्ति। घृतस्यापि पयोविकारत्वात्पयस्त्वमेव। कस्मात्पुनः सप्तमं सप्तश्वन्नं चतुर्थत्वेन व्याख्यायते। कर्मसाधनत्वात्। कर्म हि पयःसाधनं पयसाग्निहोत्रादि। तच्च कर्म साधनं वित्तसाध्यं वक्ष्यमाणस्यान्नत्रयस्य साध्यस्य। यथा दर्शपूर्णमासौ पूर्वोक्तावन्नं। अतः कर्मपक्षत्वात्कर्मणा सह पिण्डोक्त्योपदेशः।

ननु येषामग्रे घृतोपजीवित्यमुपलभ्यते पयसो नोपजीवन्ति घृतस्य सोमेदादेतः पश्चन्नत्वं पयसो भागासिद्धमत आह—यच्चेति। ननु घृतमुपजीवन्तोऽपि पय एवोपजीवन्तीत्ययुक्तं तद्भेदस्योक्तत्वादत्राऽऽह—घृतस्यापीति। मन्त्रपाठक्रममति-क्रम्य पश्चन्ने व्याख्याते प्रत्यवतिष्ठते—कस्मादिति। द्वे देवानभाजयदिति व्याख्याते साधने साधनत्वाविशेषात्पयोऽपि बुद्धिस्थमित्यर्थक्रममाश्रित्य परि-हरति—कर्मेति। तदेव स्पष्टयति—कर्म हीति। यद्यपि पयोरूपं साधनमाश्रित्य कर्म प्रवृत्तं तथाऽपि दर्शपूर्णमासानन्तर्यं कथं पयसः सिध्यति तत्राऽऽह—तच्चेति। वित्तेन पयसा साध्यं कर्मान्नत्रयस्य साधनमित्यत्र दृष्टान्तमाह—यथेति। पूर्वोक्तौ दर्शपूर्णमासौ द्वे देवान्ने वक्ष्यमाणस्यान्नत्रयस्य यथा साधनं तथा पयसोऽप्य-ग्निहोत्रादिद्वारा तत्साधनत्वात्कर्मकाण्डेनिर्दिष्टत्व तद्व्याख्यानानन्तर्यं पयोव्याख्या-नस्य युक्तमित्यर्थः।

साधनत्वाविशेषादर्थसंबन्धादानन्तर्यमकारणमिति च। व्याख्याने प्रतिपत्तिसौकर्याच्च। सुखं हि नैरन्तर्येण व्याख्यातुं शक्यन्तेऽन्नानि व्याख्यातानि च सुखं प्रतीयन्ते।

पाठक्रमस्तर्हि कथमित्याशङ्क्याऽर्थक्रमेण तद्भावमभिप्रेत्याऽऽह—साधनत्वेति। आनन्तर्यं पाठक्रमः। अकारणत्वमविवक्षितत्वम्। पाठक्रमादर्थक्रमस्य बलीय-स्त्वात्तेनेतरस्यैव वाक्यत्वमित्येतत्प्रथमे तन्त्रे स्थितमभिप्रेत्याऽऽह—इति चेति। पश्चन्नस्य चतुर्थत्वेन व्याख्याने हेत्वन्तरमाह—व्याख्यान इति। व्याख्यानसौ-कर्यं साधयति—सुखं हीति। प्रतिपत्तिसौकर्यं प्रकटयति—व्याख्यातानीति।

---

१ घ. ञ. ण. °दतश्च प°। २ घ. °ह्यत्रेदं। ३ क च द्र. °ख्यानप्र°। ४ ख. ग. °वयतेऽन्ना°। ५ स. ढ. ण. °स्य च वा°। ६ स. घ. द्र. °ख्याने सो°। ७ घ. ञ. °ति। पञ्चन्नस्य च प्र°।

चत्वारि साधनानि त्रीणि साध्यानीति विभज्योक्तौ वक्तुश्रोतोः सौकर्येण धीर्भवति ततश्च पाठक्रमातिक्रमः श्रेयानित्यर्थः ।

तस्मिन्सर्वं प्रतिष्ठितं यच्च प्राणिति यच्च नेत्यस्य कोऽर्थ इत्युच्यते—तस्मिन्पश्वन्ने पयसि सर्वमध्यात्माधिभूताधिदैवलक्षणं कृत्स्नं जगत्प्रतिष्ठितं यच्च प्राणिति प्राणचेष्टावद्यच्च न स्थावरं शैलादि । तत्र हिशब्देनैव प्रसिद्धावद्योतकेन व्याख्यातम् ।

पञ्चम्यस्य सर्वाधिष्ठानविषयं मन्त्रमवतार्य प्रश्नपूर्वकं तदीयं ब्राह्मणं व्याचष्टे—**तस्मिन्नित्यादिना** । मन्त्राद्भेदो ब्राह्मणे न प्रतिभातीत्याशङ्क्याऽऽह—**तत्रेति** । **पयसि हीति** ब्राह्मणे हिशब्दस्य प्रसिद्धावद्योतकत्वमस्ति । तेन हेतुना हिशब्देन **तस्मिन्नित्यादिकं** मन्त्रपदं व्याख्यातमिति योजना ।

कथं पयोद्रव्यस्य सर्वप्रतिष्ठात्वम् । कारणत्वोपपत्तेः । कारणत्वं चाग्निहोत्रादिकर्मसमवायित्वमग्निहोत्राद्याहुतिपरिणामात्मकं च जगत्कृत्स्नमिति श्रुतिस्मृतिवादाः शतशो व्यवस्थिताः । अतो युक्तमेव हिशब्देन व्याख्यानम् ।

मन्त्रार्थस्य लोकप्रसिद्ध्यभावान्न प्रसिद्धावद्योतिना हिशब्देन व्याख्यानं युक्तमिति शङ्कते—**कथमिति** । कार्यं कारणे प्रतिष्ठितमिति न्यायेन वैदिकीं प्रसिद्धिमादाय समाधत्ते—**कारणत्वेति** । पयसो द्रवद्रव्यमात्रस्य कुतः सर्वजगत्कारणत्वमित्याशङ्क्याऽऽह—**कारणत्वं चेति** । तत्समवायित्वेऽपि कुतो जगतः कारणतेत्याशङ्क्याऽऽह—**अग्निहोत्रादीति** । 'ते वा एते आहुती हुते उत्क्रामतस्ते अन्तरिक्षमाविशतः' इत्यादयः श्रुतिवादा द्युपर्जन्यव्रीह्यादिक्रमेणाग्निहोत्राहुत्योर्गर्भाकारमाप्तिं दर्शयन्ति ।

'अग्नौ प्रास्ताऽऽहुतिः सम्यगादित्यमुपतिष्ठते ।
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः' ॥

इत्यादयः स्मृतिवादाः । पयसि हीत्यादि ब्राह्मणमुपसंहरति—**अत इति** । पयसः सर्वजगदाधारत्वस्य श्रुतिस्मृतिप्रसिद्धत्वादिति यावत् ।

यत्तद्ब्राह्मणान्तरेऽभिदमाहुः—संवत्सरं पयसा जुहवदप पुनर्मृत्युं जयतीति । संवत्सरेण किल त्रीणि षष्टिशतान्यहनां सप्त च

---

१ ग. घ. ङ. च छ ज झ. °वरशं° । २ क च °त्र च हि° । ३ च. ढ. °ब्देन प्र° । ४ घ ञ. ण. °दिम° । ५ ख च. छ. झ ढ °ति हि श्रु° । ६ क. घ. ज. व्याख्यातुम् । ङ. छ. झ व्याख्यातम् । ७ घ. ण. °गत्कार° । ८ ढ. °रे त्विद° । ९ क. ग. घ. ङ. तान्यज्ञां तषु चाऽऽहु° ।

शतानि विंशतिश्चेति याजुष्मतीरिष्टका अभिसंपद्यमानाः संवत्सरस्य चाहोरात्राणि । संवत्सरमाग्निं प्रजापतिमाप्नुवन्ति ।

सर्वं पयसि प्रतिष्ठितमिति विधित्सितदर्शनस्तुतये शाखान्तरीयमतं निन्दितुमुद्भावयति—यत्तदिति । न केवलेन कर्मणा मृत्युजयः किंतु दर्शनसहितेनेति दर्शयितुमग्निहोत्राहुतिषु संख्यां कथयति—संवत्सरेणेति । उक्ताहुतिसंख्यायां संवत्सरावच्छिन्नायामग्निहोत्रविदां संपतिपत्स्यर्थं किलेत्युक्तम् । ननु प्रत्यहं सायं प्रातश्चेत्याहुती द्वे विद्येते तत्कथमाहुतीनां षष्ट्यधिकानि त्रीणि शतानि संवत्सरेण भवन्ति तत्राऽऽह—सप्त चेति । प्रत्येकमहोरात्रावच्छिन्नाहुतिप्रयोगाणामेकस्मिन्संवत्सरे पूर्वोक्ता संख्या तत्रैव प्रयोगार्थानां विंशत्यधिका सप्तशतरूपा संख्येति सिद्धमित्यर्थः । आहुतीनां संख्यामुक्त्वा तासु याजुष्मतीनामिष्टकानां दृष्टिमाह—याजुष्मतीरिति । तासामपि षष्ट्यधिकानि त्रीणि शतानि संख्यया भवन्ति । तथा च प्रत्यहमाहुतीरभिनिष्पद्यमानाः संख्यासामान्येन याजुष्मतीरिष्टकाश्चिन्तयेदित्यर्थः । आहुतिमयीनामिष्टकानां संवत्सरावयवाहोरात्रेषु संख्यासामान्येनैव दृष्टिमन्वाचष्टे—संवत्सरस्येति । तान्यपि षष्ट्यधिकानि त्रीणि शतानि प्रसिद्धानि । तथा च तेषु यथोक्तेष्विष्टकादृष्टिः श्लिष्टेत्यर्थः । चित्येऽग्नौ संवत्सरात्मप्रजापतिदृष्टिमाह—संवत्सरमिति । यः संवत्सरः प्रजापतिस्तं चित्यमग्निं विद्वांसः संपादयन्ति । अहोरात्रेष्टकाद्वारा तयोः संख्यासामान्यादित्यर्थः ।

एवं कृत्वा संवत्सरं जुह्वदपजयति पुनर्मृत्युमितः प्रेत्य देवेषु संभूतः पुनर्न म्रियत इत्यर्थः ।

दृष्टिमनूद्य फलं दर्शयति—एवमिति । उक्तसंख्यासामान्येनाग्निहोत्राहुतीरन्यवयवभूतयाजुष्मतीसंज्ञकेष्टकाः संपाद्य तद्रूपेणाऽऽहुतीर्ध्यायन्नाहुतीमयीश्चेष्टकाः संवत्सरावयवाहोरात्राणि तेनैव संपाद्य पुरुषनाडीस्थसंख्यासामान्येन तन्नाडीस्तान्येवाहोरात्राण्यापाद्य तद्रूपेणाऽऽहुतीरिष्टका नाडीश्चानुसंदधानो नाड्यहोरात्रयाजुष्मतीद्वारा पुरुषसंवत्सरचित्यानां सर्वत्वमापाद्याहमग्निः संवत्सरात्मा प्रजापतिरेवेति ध्यायन्नग्निहोत्रं पञ्चमं संवत्सरं जुह्वद्विद्यया सहितहोमवशात्प्रजापतिं संवत्सरात्मकं प्राप्य मृत्युमपजयतीत्यर्थः ।

इत्येवं ब्राह्मणवादा आद्रियेत तथा विद्यान्न तथा द्रष्टव्यम् । यदहरेव जुहोति तदहः पुनर्मृत्युमपजयति न संवत्सराभ्यासमपेक्षत एवं विद्वान्सन् । यदुक्तं पयसि हीदं सर्वं प्रतिष्ठितं पयआहुतिविपरिणामात्मक-

---

१ घ. ङ. मृत्युं जयति किं° । २ क. घ. ञ. ण. °साम्या° । ३ घ. ण. °मन्वयमा° ।

त्वात्सर्वस्येति । तदेकेनैवाहा जगदात्मत्वं प्रतिपद्यते । तदुच्यतेऽपजयति पुनर्मृत्युं पुनर्मरणं सकृन्मृत्वा विद्वाञ्छरीरेण वियुज्य सर्वात्मा भवति न पुनर्मरणाय परिच्छिन्नं शरीरं गृह्णातीत्यर्थः ।

एकीयमतमुपसंहृत्य तन्निन्दापूर्वकं मतान्तरमाह--इत्येवमित्यादिना । एवं विद्वानित्युक्तं व्यक्तीकरोति-यदुक्तमिति । तत्तथैव विद्वानेकाहोत्रावच्छिन्नाहुतिमात्रेण जगद्रूपं प्रजापतिं प्राप्य मृत्युमपजयतीत्याह-तदेकेनेति । उक्तेऽर्थे श्रुतिमवतार्य व्याचष्टे-तदुच्यत इति ।

कः पुनर्हेतुः सर्वात्माप्त्या मृत्युमपजयतीति । उच्यते-सर्वं समस्तं हि यस्माद्देवेभ्यः सर्वेभ्योऽन्नाद्यमन्नमेव तदाद्यं च सायंप्रातराहुतिप्रक्षेपेण प्रयच्छति । तद्युक्तं सर्वमाहुतिमयमात्मानं कृत्वा सर्वदेवान्नरूपेण सर्वदेवरूपात्मभाव गत्वा सर्वदेवमयो भूत्वा पुनर्न म्रियत इति । अथैतदप्युक्तं ब्राह्मणेन-ब्रह्म वै स्वयंभु तपोऽतप्यत तदैक्षत न वै तपस्यानन्त्यमस्ति हन्ताहं भूतेष्वात्मानं जहवानि भूतानि चाऽऽत्मनीति तत्सर्वेषु भूतेष्वात्मान हुत्वा भूतानि चाऽऽत्मनि सर्वेषां भूतानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं पर्यादिति ।

सर्वं हीत्यादिहेतुवाक्यमाकाङ्क्षापूर्वकमुत्थाप्य व्याकरोति-कः पुनरित्यादिना । यथोक्तदर्शनवशादेकयवाऽऽहुत्या मृत्युमपजयतीत्यत्र ब्राह्मणान्तरं संवादयति-अथेति । यथा संवत्सरमित्याद्युक्तं तथा यदहरेवेत्याद्यपि ब्राह्मणान्तरे सूचितमित्यर्थः । ब्रह्म हिरण्यगर्भभावी जीवः स्वयंभु परस्यैव तदात्मनाऽवस्थानात्तपोऽतप्यत कर्मान्वातिष्ठत् । यत्कृतकं तदनित्यमिति न्यायेन कर्मनिन्दापकारमाह-तदैक्षतेति । कर्मसहायभूतामुपासनामुपादर्शयति-हन्तेति । उपासनामनूद्य समुच्चयफलं कथयति-तत्सर्वेष्विति । श्रैष्ठ्येऽपि राजकुमारवदस्वातन्त्र्यमाशङ्क्याऽऽह-स्वाराज्यमिति । अधिष्ठाय पालयितृत्वमाधिपत्यम् ।

कस्मात्तानि न क्षीयन्तेऽद्यमानानि सर्वदेति । यदा पित्राऽन्नानि सृष्ट्वा सप्त पृथक्पृथग्भोक्तृभ्यः प्रत्तानि तदाप्रभृत्येव तैर्भोक्तृभिरद्यमानानि । तन्निमित्तत्वात्तेषां स्थितेः । सर्वदा नैरन्तर्येण कृतक्षयोपपत्तेश्च युक्तस्तेषां क्षयः । न च तानि क्षीयमाणानि जगतोऽविभ्रष्टं-

---

१ क. घ छ ज. °ज्य स म° । २ च. ष्या पुनर्मृत्यु । ३ च. ढ. सर्वदेवं° । ४ ग. ङ. च. ढ. °यंभूस्तपो° । ५ घ ज ढ. °पसाऽऽन° । ६ ग. च ढ. °वानीति भू° । ७ च. ढ. °र्यतीति । ८ ख. ञ. ढ. °यभूः प° । ९ ख. ग. च. ज ढ. °थग्भो । १० ख. ग. ङ. छ. झ. °ष्टस्वरू° ।

रूपेणेवावस्थानदर्शनात् । भवितव्यं चाक्षयकारणेन । तस्मात्कस्मात्पुनस्तानि न क्षीयन्त इति प्रश्नः ।

पश्चमे व्याख्यात प्रश्नरूपं मन्वानस्तदादत्ते—कस्मादिति । ननु चत्वार्यन्नानि व्याख्यातानि त्रीणि व्याचिख्यासितानि तेष्वव्याख्यातेषु कस्मादित्यादिप्रश्नः कस्मादित्याशङ्क्य साधनेषूक्तेषु साध्यानामपि तेषामर्थादुक्तत्वमस्तीत्यभिप्रेत्य प्रश्नप्रवृत्तिं मन्वानो व्याचष्टे—यदेति । सर्वदेत्यस्य व्याख्या नैरन्तर्येणेति । अन्नानां सदा भोक्तृभिरद्यमानत्वे हेतुमाह—अन्नभित्तित्वादिति । भोक्तृणा स्थितेरन्नभित्तित्वात्तैः सदाऽद्यमानानि तानि घटपूर्णकुसूलवन्नन्ति क्षीणानीत्यर्थः । किंच ज्ञानकर्मफलत्वादन्नाना परलोकं तन्नित्यमिति न्यायेन क्षयः संभवतीत्याह—क्षतेति । अस्तु तर्हि तेषा क्षयो नेत्याह—न चेति । भवतु तर्हि स्वभावादेव सप्तान्नात्मकस्य जगतोऽक्षीणत्वं नेत्याह—भवितव्यं चेति । स्वभाववादस्यापि प्रसङ्गित्वादित्यर्थः । प्रश्नं निगमयति—तस्मादिति ।

तस्येदं प्रतिवचनम्—पुरुषो वा अक्षितिर्यथाऽयं. पूर्वमन्नानां स्रष्टाऽऽसीत्पिता मेधया जायादिसंबन्धेन च पाङ्क्तकर्मणा भोक्ता च तथा येभ्यो दत्तान्यन्नानि तेऽपि तेषामन्नाना भोक्तारोऽपि सन्तः पितर एव मेधया तपसा च यतो जनयन्ति तान्यन्नानि । तदेतदभिधीयते पुरुषो वै योऽन्नानां भोक्ता सोऽक्षितिरक्षयकर्तुः । कथमस्याक्षितित्वमित्युच्यते—स हि यस्मादिदं भुज्यमानं सप्तावयवं कार्यकरणलक्षणं क्रियाफलात्मकं पुनः पुनर्भूत्वा भूयो जनयत उत्पादयति क्रिया क्रिया तत्तत्कालभाविन्या तया तया प्रज्ञया कर्मभिश्च वाङ्मनःकायचेष्टितैर्यदि ह यद्येतत्सप्तावयवमन्नमुक्तं क्षणमात्रमात्मे न कर्यात्प्रज्ञया कर्मभिश्च ततो विच्छिद्येत भुज्यमानत्वात्सातत्येन क्षीयेत ह तस्माद्यथेवायं पुरुषो भोक्ताऽन्नाना नैरन्तर्येण यथाप्रज्ञं यथाकर्म च करोत्यपि । तस्मात्पुरुषोऽक्षितिः सातत्येन कर्तृत्वात् । तस्माद्भुज्यमानान्यप्यन्नानि न क्षीयन्त इत्यर्थः ।

प्रतिवचनमादाय व्याचष्टे—तस्येत्यादिना । तेषां पितृत्वे हेतुमाह—मेधयेति । भोगकालेऽपि विहितप्रतिषिद्धज्ञानकर्मसंभवात्प्रवाहरूपेणान्नाक्षयः संभवतीत्यर्थः । अत्र प्रतिज्ञाभागमुपादायाक्षराणि व्याचष्टे—तदेतदिति । हेतुभागमुत्थाप्य विभजते—

१ क. ग. छ. °बद्धन । २ घ. च. ज. ढ. कथं तस्या । ३ क. ङ. ज. °र्यकार° । ४ क. घ. ड. छ. झ. °दि य° । ५ ख. ग. च. ङ. यदेत° । ६ ख. इ. हेतुः ।

कथमित्यादिना । तस्मात्तदक्षयः संभवति प्रवाहात्मनेति शेषः । उक्तहेतुं व्यतिरेकद्वारोपपादयितुं यद्धैतादेत्यादि वाक्यं तद्व्याचष्टे—यदिति । अन्वयव्यतिरेकसिद्धं हेतुं निगमयति—तस्मादिति । तथा यथाप्रज्ञमिति पठितव्यम् । साध्यं निगमयति—तस्मादिति । अक्षयहेतौ सिद्धे फलितमाह—तस्माद्भुज्यमानानीति ।

अतः प्रज्ञाक्रियालक्षणप्रबन्धारूढः सर्वो लोकः साध्यसाधनलक्षणः क्रियाफलात्मकः संहतानेकप्राणिकर्मवासनासंतानावष्टब्धत्वात्क्षणिकोऽशुद्धोऽसारो नदीस्रोतः प्रदीपसंतानकल्पः कदलीस्तम्भवदसारः फेनमायामरीच्यम्भ स्वप्नादिसमस्तदात्मगतदृष्टीनामविकीर्यमाणो नित्यः सारवानिव लक्ष्यते । तदेतद्वैराग्यार्थमुच्यते—धिया धिया जनयते कर्मभिश्चद्धैतन्न कुर्यात्क्षीयेत हेति । विरक्तानां ह्यस्माद्ब्रह्मविद्याऽऽरब्धव्या चतुर्थाश्रमेण (णे) ति ।

धिया धियेत्यादिश्रुतेः स हीदमित्यत्रोक्तं परिहारं प्रपञ्चयन्त्याः सप्तविधान्नस्य कार्यत्वात्प्रतिक्षणध्वंसित्वेऽपि पुनः पुनः क्रियमाणत्वात्प्रवाहात्मना तदचलं मन्दाः पश्यन्तीत्यस्मिन्नर्थे तात्पर्यमाह—अत इति । प्रज्ञाक्रियाभ्यां हेतुभ्यां लक्ष्यते व्यावर्त्यते निष्पाद्यते यः प्रबन्धः समुदायस्तदारूढ तदात्मकः सर्वो लोकश्चेतनाचेतनात्मको द्वैतप्रपञ्चः साध्यत्वेन साधनत्वेन च वर्तमानो ज्ञानकर्मफलभूतः क्षणिकोऽपि नित्य इव लक्ष्यते । तत्र हेतुः—संहतेति । संहतानां मिथः सहायत्वेन स्थितानामनेकेषां प्राणिनामनन्तानि कर्माणि वासनाश्च तत्संतानेनावष्टब्धत्वाद्दृढीकृतत्वादिति यावत् । प्रातीतिकमेव संसारस्य स्थैर्यं न तात्त्विकमिति वक्तुं विशिनष्टि- नदीति । असारोऽपि सारवद्भातीत्यत्र दृष्टान्तमाह—कदलीति । अशुद्धोऽपि शुद्धवद्भातीत्यत्रोदाहरणमाह—मायेत्यादिना । अनेकोदाहरणं संसारस्यानेकरूपत्वद्योतनार्थम् । केषा पुनरेष संसारोऽन्यथा भातीत्यपेक्षायां संसाराय पराग्दृशामिति न्यायेनाऽऽह—तदात्मेति । किमिति प्रतिक्षणप्रध्वंसि जगदिति श्रुत्योच्यते तत्राऽऽह—तदेतदिति । वैराग्यमपि कुत्रोपयुज्यते तत्राऽऽह—विरक्तानां हीति । इति वैराग्यमर्थवदिति शेषः ।

यो वै तामक्षितिं वेदेति वक्ष्यमाणान्यपि त्रीण्यन्नान्यस्मिन्नवसरे व्याख्यातान्येवेति कृत्वा तेषां याथात्म्यविज्ञानफलमुपसंहियते—यो वैतामक्षितिमक्षयहेतुं यथोक्तं वेद पुरुषो वा अक्षितिः स हीदमन्नं धिया

---

१ ण. उक्त ह° । २ ख. ढ. °द्वारा प्रसाधाय° । ३ क. ख. घ. ङ. छ. ज. झ. ङ. °याफलल° । ४ ख. ग. ङ. च. छ. झ. ढ. °तानोपष्ट° । ५ च. °ना हि यस्मा° । ग. ज. °नां यस्मा° । ६ घ. °भ्यांफलेन च ल । ७ ढ. ण. °दि । अ° । ८ घ. ढ. °ध्वं° ।

धिया जनयते कर्मभिर्यद्धैतन्न कुर्यात्क्षीयेत हेति । सोऽन्नमत्ति प्रतीकेनेत्यस्यार्थ उच्यते-मुखं मुख्यत्वं प्राधान्यमित्येतत् । प्राधान्येनैवान्नानां पितुः पुरुषस्याक्षितित्वं यो वेद सोऽन्नमत्ति नान्नं प्रति गुणभूतः सन्यथाऽज्ञो न तथा विद्वानन्नानामात्मभूतो भोक्तैव भवति न भोज्यतामापद्यते । स देवानपिगच्छति स ऊर्जमुपजीवति देवानपिगच्छति देवात्मभावं प्रतिपद्यत ऊर्जममृतं चोपजीवतीति यदुक्तं सा प्रशंसा नापूर्वार्थोऽन्योऽस्ति ॥ २ ॥

पुरुषोऽन्नानामक्षयहेतुरित्युपपाद्य तज्ज्ञानमनूद्य तत्फलमाह-यो वैतामित्यादिना । यथोक्तमनुवदति-पुरुष इति । फलविधिं मन्त्रपदमुपादाय तदीयं ब्राह्मणमवतार्य व्याकरोति-सोऽन्नमित्यादिना । यथोक्तोपासनवतो यथोक्तं फलम् । प्राधान्यनैव सोऽन्नमत्तीति संबन्धः । विदुषोऽन्नं प्रति गुणत्वाभावे हेतुमाह-अन्नानामिति । उक्तमर्थं प्रतिगृह्णाति-भोक्तैवेति । प्रशस्तिसिद्धये-प्रपञ्चयति-स देवानित्यादिना ॥ २ ॥

त्रीण्यात्मनेऽकुरुतेति मनो वाचं प्राणं तान्यात्मनेऽकुरुतान्यत्रमना अभूवं नादर्शमन्यत्रमना अभूवं नाश्रौषमिति मनसा ह्येव पश्यति मनसा शृणोति । कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव तस्मादपि पृष्ठत उपस्पृष्टो मनसा विजानाति यः कश्च शब्दो वागेव सा । एषा ह्यन्तमायत्तैषा हि न प्राणोऽपानो व्यान उदानः समानोऽन इत्येतत्सर्वं प्राण एवैतन्मयो वा अयमात्मा वाङ्मयो मनोमयः प्राणमयः ॥ ३ ॥

पाङ्क्तस्य कर्मणः फलभूतानि यानि त्रीण्यन्नान्युपक्षिप्तानि तानि कार्यत्वाद्विस्तीर्णविषयत्वाच्च पूर्वेभ्योऽन्नेभ्यः पृथगुत्कृष्टानि तेषां व्याख्यानायेयं उत्तरो ग्रन्थ आ ब्राह्मणपरिसमाप्तेः । त्रीण्यात्मनेऽकुरुतेति । कोऽस्यार्थ इत्युच्यते । मनोवाक्प्राणा एतानि त्रीण्यन्नानि तानि मनो वाचं प्राणं चाऽऽत्मन आत्मार्थमकुरुत कृतवान्सृष्टवानादौ पिता ।

---

१ ख. घ. ना जाया पुत्रो वित्तद्वय कर्म चतैः पञ्चभिर्निर्वर्त्यत्वात्पितुः । २ ख. ग. ङ. च. छ. ज. झ. ढ. पूर्वोऽर्थो । ३ क. °क्षये ह° । ४ क. ण. °सनाव° । ५ क. ख. ञ. ढ. ण. °लमपास्तिप्रा° । ६ ख. ढ °र्थं संगृ° । ७ °र्थमुत° । ८ च. ढ. °त्तरग्र° । ९ ग. घ. ज. झ. मना वाक्प्राण ए° ।

साधनात्मकमन्त्रचतुष्टयमन्नाक्षयकारणमाक्षेतित्वगुणप्रक्षेपेण पुरुषोपासनस्य फलं चोक्तमिदानीमा ब्राह्मणसमाप्तेरुत्तरग्रन्थस्य तात्पर्यमाह—पाङ्क्तस्येत्यादिना । ब्राह्मणशेषस्य तात्पर्यमुक्त्वा मन्त्रभेदमनूद्याऽऽकाङ्क्षाद्वारा ब्राह्मणमुत्थाप्य व्याचष्टे—त्रीणीत्यादिना । ज्ञानकर्मभ्यां सप्तान्नानि सृष्ट्वा चत्वारि भोक्तृभ्यो विभज्य त्रीण्यात्मार्थं कल्पादौ पिता कल्पितवानित्यर्थः ।

तेषां मनसोऽस्तित्वं स्वरूपं च प्रति संशय इत्यत आह—अस्ति तावन्मनः श्रोत्रादिबाह्यकरणव्यतिरिक्तम् । यत एवं प्रसिद्धं बाह्यकरणविषयात्मसंबन्धे सत्यप्यभिमुखीभूतं विषयं न गृह्णाति किं दृष्टवानसीदं रूपमित्युक्तो वदत्यन्यत्र मे गतं मन आसीत्सोऽहमन्यत्रमना आसं नादर्शम् । तथेदं श्रुतवानसि मदीयं वच इत्युक्तोऽन्यत्रमना अभूवं नाश्रौषं न श्रुतवानस्मीति । तस्माद्यस्यासंनिधौ रूपादिग्रहणसमर्थस्यापि सतश्चक्षुरादेः स्वस्वविषयसंबन्धे रूपशब्दादिज्ञानं न भवति । यस्य च भावे भवति तदन्यदस्ति मनो नामान्तःकरणं सर्वकरणविषययोगीत्यवगम्यते । तस्मात्सर्वो हि लोको मनसा ह्येव पश्यति मनसा शृणोति तद्वयग्रत्वे दर्शनाद्यभावात् ।

अन्यत्रेत्यादि वाक्यमुपादत्ते—तेषामिति । षष्ठी निर्धारणार्था । तत्र मनसोऽस्तित्वमादौ साधयति—अस्ति तावदिति । आत्मेन्द्रियार्थसंनिधेः सत्यपि कदाचिदेवार्थधीर्जायमाना हेत्वन्तरमाक्षिपति न चादृष्टादि सदिति युक्तं तस्य दृष्टसंपादित्वात्तस्मादर्थादिसंनिधेः ज्ञानकादाचित्कत्वानुपपत्तिर्मनःसाधिकेत्यर्थः । लोकप्रसिद्धिरपि तत्र प्रमाणमित्याह—यत इति । अतोऽस्ति बाह्यकरणाद्व्यतिरिक्तं विषयग्राहि करणमिति शेषः । तामेव प्रसिद्धिमुदाहरणनिष्ठतयोदाहरति—किं दृष्टवानित्यादिना । तत्रैवान्वयव्यतिरेकावुपन्यस्यति—तस्मादिति । यथोक्तार्थापत्तिलोकप्रसिद्धिवशादिति यावत् । विमतं मनआद्यतिरिक्तापेक्षं तस्मिन्सत्यपि कादाचित्कत्वाद्घटवदित्यनुमानं तच्छब्दार्थः । तस्मादनुमानोदन्यदस्ति मनो

---

१ ख. ढ °द्यानीं चाऽऽ ब्रा° । २ ख. ग. ङ. छ. ज. झ. °मनाः सन्नाद्° । ३ च. छ. झ. ढ. °रादेश्च स्वबि° । घ. ञ. °रादेश्च वि° । ४ ग. ङ. °देः स्वबि° । ५ क. । ख. °षवोपयो° । ६ क. ञ. संवादि° । ७ घ. ण. °णाद्वयति° । ८ ञ. °मात्मन्यति° । ९ क. ञ. °नादिमानाद्° । ञ, ण. °नादिमानात्तद्° ।

नामेति संबन्धः । रूपादिग्रहणसमर्थस्यापि सत इति प्रमातोच्यते । अन्तःकरणस्य चक्षुरादिभ्यो वैलक्षण्यमाह—सर्वेति । समन्तरवाक्यं फलितार्थविषयत्वेनाऽऽदृत्य तस्मादिति । तच्छब्देनोक्तं हेतुं स्पष्टयति—तद्व्यग्रत्व इति ।

अस्तित्वे सिद्धे मनसः स्वरूपार्थमिदमुच्यत—कामः स्त्रीव्यतिकराभिलाषादिः । संकल्पः प्रत्युपस्थितविषयविकल्पनं शुक्लनीलादिभेदेन । विचिकित्सा संशयज्ञानम् । श्रद्धाऽदृष्टार्थेषु कर्मस्वास्तिक्यबुद्धिर्देवतादिषु च । अश्रद्धा तद्विपरीता बुद्धिः । धृतिर्धारणं देहाद्यवसाद उत्तम्भनम् । अधृतिस्तद्विपर्ययः । ह्रीर्लज्जा । धीः प्रज्ञा । भीरयमित्येतदेवमादिकं सर्वं मन एव । मनसोऽन्तःकरणस्य रूपाण्येतानि । मनोऽस्तित्वं प्रत्यन्यच्च कारणमुच्यते । तस्मान्मनो नामास्त्यन्तःकरणम् । यस्माच्चक्षुषो ह्यगोचरे पङ्गतोऽप्युपस्पृष्टः केनचिद्धस्तस्यायं स्पर्शो जानो(जन्तो)रयमिति विवेकेन प्रतिपद्यते । यदि विवेकहेतुर्मनो नाम नास्तिं तर्हि त्वङ्मात्रेण कुतो विवेकप्रतिपत्तिः स्यात् । यत्तद्विवेकप्रतिपत्तिकारणं तन्मनः ।

कामादिवाक्यमवतार्यं व्याकुर्वन्मनसः स्वरूपं प्रति संशयं निरस्यति—अस्तित्व इति । अश्रद्धादिवदकामादिरपि विवक्षितोऽत्रेति मत्वा मनोबुद्ध्योरेकत्वमुपेत्योपसंहरति—इत्येतादिति । द्वैतप्रवृत्त्युन्मुखं मनो भोक्तृकर्मवशाज्ज्ञानार्थाकारेण विवर्तत इत्यभिप्रेत्यानन्तरवाक्यमवतारयति—मनोऽस्तित्वमिति । तदेवान्यत्कारणं स्फोरयति—यस्मादिति । तस्मादस्ति विवेककारणमन्तःकरणमिति संबन्धः । चक्षुरसंप्रयोगाच्चेन स्पर्शविशेषादर्शनेऽपि संप्रयुक्तया त्वचा विनाऽपि मनो विशेषदर्शनं स्यादित्याशङ्क्याऽऽह—यदीति । त्वङ्मात्रस्य स्पर्शमात्रग्राहित्वेन विवेचकत्वायोगादित्यर्थः । विवेचकैं कारणान्तरे सत्यपि कुतो मनःसिद्धिस्तत्राऽऽह—यत्तदिति ।

अस्ति तावन्मनः स्वरूपं च तस्याधिगतम् । त्रीण्यज्ञानीह फलभूतानि कर्मणां मनोवाक्प्राणाख्यान्यध्यात्ममाधिभूतमाधिदैवं च व्याचिख्यासितानि । तत्राऽऽध्यात्मिकानां वाङ्मनःप्राणानां मनो व्याख्यातम् । अथेदानीं वाग्वक्तव्येत्यारम्भः—यः कश्च लोके शब्दो ध्वनिस्तालवादिव्यङ्ग्यः प्राणिभिर्वर्णादिलक्षण इतरो वा वादिप्रेषादिनिमित्तः सर्वो ध्वनिर्वागेव सा ।

---

१ क. घ. °न्तरं वा° । २ ख. ढ. °नाऽऽह—त° । ३ क. ख. ग. ङ. झ. ढ. °स्ति व° । ४ घ. ञ ढ. ण. °के कर° ।

वृत्तं कीर्तयति-अस्ति तावदिति । उत्तरग्रन्थमवतारयितुं भूमिकां करोति-ब्रूमीति । एवं भूमिकामारचय्याऽऽध्यात्मिकवाग्व्याख्यानार्थं यः कश्चेत्यादि वाक्यमादाय व्याकरोति-अथेत्यादिना । शब्दपर्यायो ध्वनिर्द्विविधो वर्णात्मकोऽवर्णात्मकश्च । तत्राऽऽद्यो व्यवहर्तृभिस्तालवादिस्थानव्यङ्ग्यो द्वितीयो मेघादिकृतः । स सर्वोऽपि प्रकृता वागेवेत्यर्थः ।

इदं तावद्वाचः स्वरूपमुक्तम् । अथ तस्याः कार्यमुच्यते--एषा वाग्घि यस्मादन्तमभिधेयावसानमभिधेयनिर्णयमायत्ताऽनुगता । एषा पुनः स्वयं नाभिधेयवत्प्रकाश्याऽभिधेयप्रकाशिकैव । प्रकाशात्मकत्वात्प्रदीपादिवत् । न हि प्रदीपादिप्रकाशः प्रकाशान्तरेण प्रकाश्यते तद्वद्वाक्प्रकाशिकैव स्वयं न प्रकाश्येत्यनवस्थां श्रुतिः परिहरत्येषा हि न प्रकाश्या प्रकाशकत्वमेव वाचः कार्यमित्यर्थः ।

प्रकाशकमात्रं वागित्युक्त्वा तत्र प्रमाणमाह-इदं तावदिति । तस्मादभिधेयनिर्णायकत्वान्नासावपह्नवार्हेति शेषः । वाचोऽपि प्रकाश्यत्वात्कथं प्रकाशकमात्रं वागित्युक्तमित्याशङ्क्याऽऽह-एषेति । दृष्टान्तं समर्थयते-न हीति । प्रकाशान्तरेण सजातीयेनेति शेषः । प्रकाशिकाऽपि वाक्प्रकाश्या चेत्तत्रापि प्रकाशकान्तरमपेक्ष्यमित्यनवस्था स्यात्तन्निरासार्थमेषा हि नेति श्रुतिः प्रकाशकमात्रं वागित्याह । स्वपरनिर्वाहकस्तुशब्दः । तस्मात्प्रकाशकत्वं कार्यं यत्र दृश्यते तत्र वाचः स्वरूपमनुगतमेवेत्याह-तद्वदित्यादिना ।

अथ प्राण उच्यते-प्राणो मुखनासिकासंचार्यो हृदयवृत्तिः प्रणयनात्प्राणः । अपनयनान्मूत्रपुरीषादेरपानोऽधोवृत्तिरानाभिस्थानः । व्यानो व्यायमनकर्मा व्यानः प्राणापानयोः संधिर्वीर्यवत्कर्महेतुश्च । उदान उत्कर्षोर्ध्वगमनादिहेतुरापादतलमस्तकस्थान ऊर्ध्ववृत्तिः । समानः समं नयनाद्भुक्तस्य पीतस्य च कोष्ठस्थानोऽन्नपक्ता । अन इत्येषां वृत्तिविशेषाणां सामान्यभूता सामान्यदेहचेष्टाभिसंबन्धिनी वृत्तिः । एवं यथोक्तं प्राणादिवृत्तिजातमेतत्सर्वं प्राण एव ।

आध्यात्मिकप्राणविषयं वाक्यमवतार्य व्याकरोति-यथेति । मुखादौ संचार्यो संचरणार्हो हृदयसंबन्धिनी या वायुवृत्तिः, तत्र प्राणशब्दप्रवृत्तौ निमित्तमाह-प्रणयनादिति । पुरतो निःसरणादिति यावत् । हृदयादधोदेशे वृत्तिरस्येत्यधोवृत्तिरानाभिस्थानो हृदयादारभ्य नाभिपर्यन्तं वर्तमान इति यावत् । व्यायमनं प्राणापानयोर्नियमनं कर्मास्येति यथोक्तः । वीर्यवत्कर्मारण्यामग्न्युत्पा-

---

१ घ. ङ. हि नेति । २ क. °शमा° । ३ क. °शमा° । ४ क, घ. ञ. °शमा° । ५ ञ °द्यादिर्मं° । ६ क° ञ° क° °र्तं । व्या° ।

दनादि । उत्कर्षो देहे पुष्टिः । आदिपदेनोत्क्रान्तिरुक्ता । प्राणशब्देनानशब्दस्य पुनरुक्तिमाशङ्क्याऽऽह–अन इत्येषामिति ।

प्राण इति वृत्तिमानाध्यात्मिकोऽन उक्तः । कर्म चास्य वृत्तिभेदप्रदर्शनेनैव व्याख्यातम् । व्याख्यातान्याध्यात्मिकानि मनोवाक्प्राणाख्यान्यन्नान्येतन्मय एतद्विकारः प्राजापत्यैरेतैर्वाङ्मनःप्राणैरारब्धः । कोऽसावयं कार्यकरणसंघात आत्मा पिण्ड आत्मस्वरूपत्वेनाभिमतोऽविवेकिभिः । अविशेषणैतन्मय इत्युक्तस्य विशेषेण वाङ्मयो मनोमयः प्राणमय इति स्फुटीकरणम् ॥ ३ ॥

तथाऽपि तृतीयस्य प्राणशब्दस्य ताभ्यां पुनरुक्तिरित्याशङ्क्याऽऽह–**प्राण इतीति** । साधारणासाधारणवृत्तिमान्प्राण इत्यर्थः । मनसो दर्शनादेर्वाचोऽभिधेयप्रकाशनवच्च प्राणस्यापि कार्यं वक्तव्यमित्याशङ्क्याऽऽह––**कर्मेति** । एतन्मय इत्यत्र मयटो विकारार्थत्वं वृत्तसंकीर्तनपूर्वकं कथयति–**व्याख्यातानीति** । आध्यात्मिकानां वागादीनामनारम्भकत्वं वारयति–**प्राजापत्यैरिति** । आरब्धस्वरूपं प्रश्नपूर्वकमनन्तरवाक्येन (ण) निर्धारयति–**कोसाविति** । कार्यकरणसंघाते कथमात्मशब्दप्रवृत्तिरित्याशङ्क्याऽऽह––**आत्मस्वरूपत्वेनेति** । वाङ्मय इत्यादिवाक्यस्य पूर्वेण पौनरुक्त्यमाशङ्क्याऽऽह–**अविशेषेणेति** ॥ ३ ॥

तेषामेव प्राजापत्यानामन्नानामाधिभौतिको विस्तारोऽभिधीयते–

त्रयो लोका एत एव वागेवायं लोको मनोऽन्तरिक्षलोकः
प्राणोऽसौ लोकः ॥ ४ ॥

त्रयो लोका भूर्भुवःस्वरित्याख्या एत एव वाङ्मनःप्राणास्तत्रविशेषो वागेवायं लोको मनोऽन्तरिक्षलोकः प्राणोऽसौ लोकः ॥४॥

वागादीनामाध्यात्मिकविभूतिप्रदर्शनानन्तरमाधिभौतिकविभूतिप्रदर्शनार्थपुत्तरग्रन्थमवतारयति–**तेषामेवेति** । तत्रेत्युक्तं सामान्यं परामृशति ॥ ४ ॥

त्रयो वेदा एत एव वागेवर्ग्वेदो मनो यजुर्वेदः प्राणः
सामवेदः ॥ ५ ॥

---

१ ख. ढ °र्षो हेतुपु° । २ क. ग. °र्यकार° । ३ क. ग घ. ङ. छ. ज. झ. ढ विषेषणं । ४ क इत्यपि प्राणस्फु° । ५ छ °ति प्राणस्फु° । ६ क. ख. ञ ट. ण °नामार° ७ ख. °र्यकार° । ८ ङ. च. °त्यान्ना° । ९ च. ढ °स्व इत्या° ।

देवाः पितरो मनुष्या एत एव वागेव देवा मनः पितरः
प्राणो मनुष्याः ॥ ६ ॥
पिता माता प्रजेत एव मन एव पिता वाङ्माता
प्राणः प्रजा ॥ ७ ॥

तथा ऋषो वेदा इत्यादीनि वाक्यानि ऋज्वर्थानि ॥ ५ ॥ ६ ॥ ७ ॥

त्रिलोकीवाक्यवदुत्तरं वाक्यं विज्ञातादिवाक्यात्पाक्तनं नेतव्यमित्याह—तथेति ॥ ५ ॥ ६ ॥ ७ ॥

विज्ञातं विजिज्ञास्यमविज्ञातमेत एव यत्किंच विज्ञातं
वाचस्तद्रूपं वाग्घि विज्ञाता वागेनं तद्भूत्वाऽवति ॥ ८ ॥

विज्ञातं विजिज्ञास्यमविज्ञातमेत एव तत्र विशेषो यत्किंच विज्ञातं विस्पष्टं ज्ञातं वाचस्तद्रूपम् । तत्र स्वयमेव हेतुमाह—वाग्घि विज्ञाता प्रकाशात्मकत्वात्कथमविज्ञाता भवेद्याऽन्यानपि विज्ञापयति वाचैव सम्राड्बन्धुः प्रज्ञायत इति हि वक्ष्यति । वाग्विशेषविद इदं फलमुच्यते—वागेवैनं यथोक्तवाग्विभूतिविदं तद्विज्ञातं भूत्वाऽवति पालयति विज्ञातरूपेणैवास्याऽन्नं भोज्यतां प्रतिपद्यत इत्यर्थः ॥ ८ ॥

विज्ञानादिवाक्यमादाय तद्गतं विशेष दर्शयति—विज्ञातमिति । विज्ञातं सर्वं वाचो रूपमिति प्रतिज्ञातोऽर्थः सप्तम्यर्थः । प्रकाशकत्वेऽपि कथं वाचो विज्ञातत्वमित्याशङ्क्याऽऽह—कथमिति । प्रकाशात्मकत्वमेव कुतो वाचः सिद्धमित्याशङ्क्याऽऽह—वाचेति । वाग्विशेषस्तद्विभूतिः ॥ ८ ॥

यत्किंच विजिज्ञास्यं मनसस्तद्रूपं मनो हि विजिज्ञास्यं
मन एनं तद्भूत्वाऽवति ॥ ९ ॥

तथा यत्किंच विजिज्ञास्यं विस्पष्टं ज्ञातुमिष्टं विजिज्ञास्यं तत्सर्वं मनसो रूपं मनो हि यस्मात्संदिह्यमानाकारत्वाद्विजिज्ञास्यम् । पूर्ववन्मनोविभूतिविदः फलं मन एनं तद्विजिज्ञास्यं भूत्वाऽवति विजिज्ञास्यस्वरूपेणैवान्नत्वमापद्यते ॥ ९ ॥

---

१ घ. ज. वाचा वै स° । २ ख ग ङ. छ. झ. ढ °ति प्रतिपा° । ३ क. घ. ञ. ण. °त्याह । ४ क. ग. च. °त्किचाविस्पष्टं विस्प° । झ °त्किचावशिष्टं विस्प° । ५ ङ. च, °वेशिष्टं विस्प° । ६ च. ढ. °स्यरू° ।

संदिह्यमानाकारत्वात्संकल्पविकल्पात्मकत्वादिति यावत् । तस्मात्सर्वं विजिज्ञास्यं मनोरूपमिति संबन्धः पूर्ववद्वाग्भिविदो यथा फलमुक्तं तद्वदिति यावत् ॥ ९ ॥

यत्किंचाविज्ञातं प्राणस्य तद्रूपं प्राणो ह्यविज्ञातः प्राण एनं तद्भूत्वाऽवति ॥ १० ॥

तथा यत्किंचाविज्ञातं विज्ञानागोचरं न च संदिह्यमानं प्राणस्य तद्रूपं प्राणो ह्यविज्ञातोऽविज्ञातरूपो हि यस्मात्प्राणोऽनिरुक्तश्रुतेः । विज्ञातविजिज्ञास्याविज्ञातभेदेन वाङ्मनःप्राणविभागे स्थिते त्रयो लोका इत्यादयो वाचनिका एव । सर्वत्र विज्ञातादिरूपदर्शनाद्वचनादेवं नियमः स्मर्तव्यः । प्राण एनं तद्भूत्वाऽवत्यविज्ञातरूपेणैवास्य प्राणोऽन्नं भवतीत्यर्थः । शिष्यपुत्रादिभिः संदिह्यमानाविज्ञातोपकारकाः अप्याचार्यपित्रादयो दृश्यन्ते । तथा मनःप्राणयोरपि संदिह्यमानाविज्ञातयोरन्नत्वोपपत्तिः ॥ १० ॥

अनिरुक्तश्रुतेरविज्ञातरूपो यस्मात्प्राणस्तस्मादविज्ञातं सर्वं प्राणस्य रूपमिति योजना । विज्ञातादिरूपातिरेकेण लोकवेदाद्यभावाद्विज्ञातादिरूपत्वाभिधानेनैव वागादीनां लोकाद्यात्मत्वे सिद्धे किमर्थं त्रयो लोका इत्यादिवाक्यमित्याशङ्क्य तथैव ध्यानार्थमित्याह—विज्ञातेति । भूरादिष्वेकैकस्य विज्ञातादित्रयदृष्टेर्वागादेश्च व्यवस्थितत्वात्कुतो विज्ञातादेर्वागाद्यात्मैकत्वं नियन्तुं शक्यमित्याशङ्क्याऽऽह—सर्वत्रेति । प्राणविभूतिविदः संप्रति फलं कथयति—प्राण इति । लोके विज्ञातस्यैव भोज्यत्वोऽलम्भादविज्ञातादिरूपेण प्राणादेर्न भोज्यत्वोपपत्तिरित्याशङ्क्याऽऽह—शिष्येति । शिष्यैरविवेकिभिः संदिह्यमानोपकारा अपि गुरवस्तेषां भोज्यतामापद्यमाना दृश्यन्ते पुत्रादिभिश्चातिबालैरविज्ञातोपकाराः पित्रादयस्तेषां भोज्यत्वमापद्यन्ते तथा प्रकृतेऽपि संभवतीत्यर्थः ॥ १० ॥

व्याख्यातो वाङ्मनःप्राणानामाधिभौतिको विस्तारोऽथायमाधिदैविकार्थ आरम्भः—

तस्यै वाचः पृथिवी शरीरं ज्योतीरूपमयमग्निस्तद्यावत्येव वाक्तावती पृथिवी तावानयमग्निः ॥ ११ ॥

तस्यै तस्या वाचः प्रजापतेरन्नत्वेन प्रस्तुतायाः पृथिवी शरीरं बाह्य

---

१ क. °व तस्य नि° । २ क. °कारा आचा° । च. °कारा अ° । ३ ख. ग. °का आचा° । ४ घ. °त्मत्वसिद्धेः कि° । ञ. °त्मकत्वे । ५ ञ. °त्मत्वं । ६ ढ. °रा गु° । ७ घ, ङ. °ज्यतामा° ।

आधारो ज्योतीरूपं प्रकाशात्मकं करणं पृथिव्या आधेयभूतमयं पार्थिवोऽग्निः । द्विरूपा हि प्रजापतेर्वाक्कार्यमाधारोऽप्रकाशः करणं चाऽऽधेयं प्रकाशस्तदुभयं पृथिव्यग्नी वागेव प्रजापतेः । तत्तत्र यावत्येव यावत्परिमाणेवाध्यात्माधिभूतभेदभिन्ना सती वाग्भवति तत्र सर्वत्राऽऽधारत्वेन पृथिवी व्यवस्थिता तावत्येव भवति कार्यभूता तावानयमग्निराधेयः करणरूपो ज्योतीरूपेण पृथिवीमनुप्रविष्टस्तावानेव भवति समानमुत्तरम् ॥ ११ ॥

वृत्तमनूद्य तस्यै वाचः पृथिवीत्याद्यवतारयति–व्याख्यात इति । आधिदैविकार्थतद्विभूतिप्रदर्शनार्थ इति यावत् । सप्तनन्तरसंदर्भस्य तात्पर्यमुक्त्वा वाक्याक्षराणि योजयति–तस्या इति । कथमाधाराधेयभावो वाचो निर्दिश्यते तत्राऽऽह–द्विरूपा हीति । उक्तमर्थं संक्षिप्य निगमयति–तदुभयमिति । अध्यात्ममधिभूतं च या वाक्परिच्छिन्ना तस्यास्तुल्यपरिमाणत्वमाधिदैविकवागंशत्वादंशांशिनोश्च तादात्म्यात्तया सह दर्शयति–तत्तत्रेति । तावानयमग्निरिति प्रतीकमादाय व्याकरोति–आधेय इति । समानमुत्तरमित्यस्यायमर्थोऽध्यात्ममधिभूतं च मनःप्राणयोराधिदैविकमनःप्राणात्मत्वात्तादात्म्याभिप्रायेण तुल्यपरिमाणत्वमुच्यते । तथा च वाचा समानं प्राणादावुत्तरवाक्ये कथ्यमानं समानपरिमाणत्वमिति ॥ १२ ॥

> अथैतस्य मनसो द्यौः शरीरं ज्योतीरूपमसावादित्यस्तद्यावदेव मनस्तावती द्यौस्तावानसावादित्यस्तौ मिथुनꣳ समैतां ततः प्राणोऽजायत स इन्द्रः स एषोऽसपत्नो द्वितीयो वै सपत्नो नास्य सपत्नो भवति य एवं वेद ॥ १२ ॥

अथैतस्य प्राजापत्यान्नोक्तस्यैव मनसो द्यौर्लोकः शरीरं कार्यमाधारो ज्योतीरूपं करणमाधेयोऽसावादित्यः । तत्तत्र यावत्परिमाणमेवाध्यात्ममधिभूतं वा मनस्तावती तावद्विस्तारा तावत्परिमाणा मनसो ज्योतीरूपस्य करणस्याऽऽधारत्वेन व्यवस्थिता द्यौस्तावानसावादित्यो ज्योतीरूपं करणमाधेयं तावन्यादित्यौ वाङ्मनसे आधिदैविके मातापितरौ मिथुनं मैथुन्यमितरेतरसंसर्गं समैतां समगच्छेतान् । मनसाऽऽदि-

---

१ ख. घ. ङ. च. ज. ट °काशकः क । २ घ. च ज. ढ. °वती भ° । ३ ख. ङ. °स्यार्थो° । ४ क. ग. ङ. घ. छ. ज. झ ढ. 'ता संग° ।

त्येन प्रसूतं पित्रा वाचाऽभिना मात्रा प्रकाशितं कर्म करिष्यामीत्यन्तरा रोदस्योः । ततस्तयोरेव संगमनात्प्राणो वायुरजायत परिस्पन्दाय कर्मणे । यो जातः स इन्द्रः परमेश्वरो न केवलमिन्द्र एवासपत्नोऽविद्यमानः सपत्नो यस्य कः पुनः सपत्नो नाम द्वितीयो वै प्रतिपक्षत्वेनोपगतः स द्वितीयः सपत्न इत्युच्यते । तेन द्वितीयत्वेऽपि सति वाङ्मनसे न सपत्नत्वं भजेते प्राणं प्रति गुणभावोपगते एव हि ते अध्यात्ममिव । तत्र प्रासङ्गिकासपत्नविज्ञानफलमिदं नास्य विदुषः सपत्नः प्रतिमक्षो भवति य एवं यथोक्तं प्राणमसपत्नं वेद ॥ १२ ॥

आधिदैविकवाग्विभूतिव्याख्यानानन्तर्यमथशब्दार्थः । मनसो द्वैरूप्यमुक्त्वा व्याप्तिमभिधत्ते—तत्रेति । मन एवास्याऽऽत्मा वाग्जाया प्राणः प्रजेत्यध्यात्मं मन एष पिता वाङ्मातेत्ता प्राणः प्रजेत्यधिभूतं च वाङ्मनसयोः प्राणस्य प्रजात्वमुक्तं तथाऽधिदैवेऽपि तस्य तत्प्रजात्वं वाच्यमित्यभिप्रेत्याऽऽह—तावितिं । कथमादित्यस्य मनसः प्राणं प्रति पितृत्वं वाचो वाऽग्नेर्मातृत्वं तत्राऽऽह—मनसेति । सावित्रं पाकमाग्नेयं च प्रकाशभृते कार्यसिद्ध्यदर्शनात्तयोः सिद्धं जनकत्वमित्यर्थः । कर्मशब्देन कार्यमुच्यते तत्करिष्यामीति प्रत्येकमभिसंधिपूर्वकमादित्याग्न्योर्द्यावापृथिव्योरन्तराले संगतिरासीदित्याह—कर्मेति । संगतिकार्यमभिप्रायानुसारि दर्शयति—तत इति । वायोरिन्द्रत्वासपत्नत्वगुणविशिष्टस्योपासनमभिप्रेत्याऽऽह—यो जात इति । द्वितीयस्य सपत्नत्वे वागादेरपि तथात्वं स्यादित्याशङ्क्याऽऽह—प्रतिपक्षत्वेनेति । यथोक्तसपत्नव्याख्यानफलमाह—तेनेति । असपत्नगुणकप्राणोपासने फलवाक्यं प्रमाणयति—तत्रेति । प्राग्रस्यासपत्नत्वे सिद्धे सतीति यावत् । प्रासङ्गिकत्वं प्रजोत्पत्तिप्रसङ्गादागतत्वम् ॥ १२ ॥

अथैतस्य प्राणस्याऽऽपः शरीरं ज्योतीरूपमसौ चन्द्रस्तद्यावानेव प्राणस्तावत्य आपस्तावानसौ चन्द्रस्त एवे सर्व एव समाः सर्वेऽनन्ताः स यो हैतानन्तवत उपास्तेऽन्तवन्तꣳ स लोकं जयत्यथ यो हैताननन्तानुपास्तेऽनन्तꣳ स लोकं जयति ॥ १३ ॥

अथैतस्य प्रकृतस्य प्राजापत्यान्नस्य प्राणस्य न प्रजोक्तस्यानन्तरनिर्दिष्टस्याऽऽपः शरीरं कार्यं करणाधारः पूर्ववज्ज्योतीरूपमसौ चन्द्रस्तत्र यावानेव प्राणो यावत्परिमाणोऽध्यात्मादिभेदेषु तावद्व्या-

१ ग. ङ. छ. ज. झ. °स्य वाङ्मनःप्र° । २ च. ढ. कार्यमाधा° ।

क्षिमत्य आपस्तावत्परिमाणास्तावानसौ चन्द्रोऽवाधेयस्तास्वप्स्वनुप्रविष्टः करणभूतोऽध्यात्ममधिभूतं च तावद्व्याप्तिमानेव । तान्येतानि पित्रा पाङ्क्तेन कर्मणा सृष्टानि त्रीण्यन्नानि वाङ्मनःप्राणाख्यानि । अध्यात्ममधिभूतं च जगत्समस्तमेतैर्व्याप्तं नैतेभ्योऽन्यदतिरिक्तं किंचिदस्ति कार्यात्मकं करणात्मकं वा । समस्तानि त्वेतानि प्रजापतिस्त एते वाङ्मनःप्राणा सर्व एव समास्तुल्या व्याप्तिमन्तो यावत्प्राणिगोचरं साध्यात्माधिभूतं व्याप्य व्यवस्थिता अत एवानन्ता यावत्संसारभाविनो हि ते । कार्यकरणप्रत्याख्यानेन संसारोऽवगम्यते । कार्यकरणात्मका हि त इत्युक्तम् । स यः कश्चिद्धैतान्प्रजापतेरात्मभूतानन्तवतः परिच्छिन्नानध्यात्मरूपेण वाऽधिभूतरूपेण वोपास्ते स च तदुपासनानुरूपमेव फलमन्तवन्तं लोकं जयति परिच्छिन्न एव जायते नैतेषामात्मभूतो भवतीत्यर्थः । अथ पुनर्यो हैताननन्तान्सर्वात्मकान्सर्वप्राण्यात्मभूतानपरिच्छिन्नानुपास्त सोऽनन्तमेव लोकं जयति ॥ १३ ॥

आधिदैविकयोर्वाङ्मनसयोर्विभूतिनिर्देशानन्तर्यमर्थेत्युक्तम् । नन्वेतस्मेत्येतच्छब्देन प्रजात्वेनोक्तस्य भागस्य किमिति न ग्रहणं तत्राऽऽह—न प्रजेति । अन्नत्वस्य समप्रधानत्वेन प्रकृतत्वादेतच्छब्देन प्रधानपरामर्शोपपत्तौ नाप्रधानं परामृश्यत इत्यर्थः । पूर्ववद्वाचो मनसश्च पृथिवी द्यौश्च शरीरं यथा तथेत्यर्थः । द्वैरूप्ये प्राणस्यौके व्याप्तिमवशिष्टा व्याचष्टे—तत्रेति । तावानित्यादि प्रतीकमादाय व्याचष्टे—चन्द्र इति । वाङ्मनःप्राणानामाधिदैविकरूपेणोपासनं विधातुं वृत्तं कीर्तयति—तानीति । एवेभ्योऽतिरिक्तमविष्ठानमस्तीत्याशङ्क्याऽऽह—समस्तानीति । सोपस्करं वृत्तमनूद्य वाक्यमादाय व्याचष्टे—त एत इति । तुल्यां व्याप्तिमेव व्यनक्ति—यावदिति । तावदत्रेषं जगद्व्याप्नोति योजना । तुल्यव्याप्तिमत्त्वमुपजीव्याऽऽह—अत एवेति । तेषां यावत्संसारभावित्वमभिव्यनक्ति—न हीति । कार्यकरणयोर्यावत्संसारभावित्वेऽपि प्राणानां किमायातमत आह—कार्येति । तेषु परिच्छिन्नत्वेन ध्याने दोषमाह—स य इति । एवं पातनिकां कृत्वा विवक्षितमुपासनमुपदिशति—अथेति ॥ १३ ॥

---

१ क. ख. ङ. चन्द्र आधे । २ ख. ग. घ. ङ. छ. ज. झ. °प्राणाः । अ° । ३ क. झ. ढ. कं. कार° । ४ घ. ज. च । ५ ग. ङ. च. ढ. °स्तुल्यव्या° । ६ क. ञ. स्मरेत्येत्य । ७ ग ञ. °तित्वमु ।

पिता पाङ्क्तेन कर्मणा सप्तान्नानि सृष्ट्वा त्रीण्यन्नान्यात्मार्थमकरोदित्युक्तं तान्येतानि पाङ्क्तकर्मफलभूतानि व्याख्यातानि । तत्र कथं पुनः पाङ्क्तस्य कर्मणः फलमेतानीति । उच्यते । यस्मात्तेष्वपि त्रिष्वन्नेषु पाङ्क्तताऽवगम्यते । वित्तकर्मणोरपि तत्र संभवात् । तत्र पृथिव्यग्नी माता । दिवादित्यौ पिता । योऽयमनयोरन्तरा प्राणः स प्रजाति व्याख्यातम् । तत्र वित्तकर्मणी संभावयितव्ये इत्यारम्भः—

स एष संवत्सरः प्रजापतिः षोडशकलस्तस्य रात्रय एव पञ्चदश कला ध्रुवैवास्य षोडशी कला सा रात्रिभिरेवाऽऽ च पूर्यतेऽप च क्षीयते सोऽमावास्याꣳ रात्रिमेतया षोडश्या कलया सर्वमिदं प्राणभृदनुप्राविश्य ततः प्रातर्जायते तस्मादेताꣳ रात्रिं प्राणभृतः प्राणं न विच्छिन्द्यादपि कृकलासस्यैतस्या एव देवताया अपचित्यै ॥ १४ ॥

स एष संवत्सरो योऽयं त्र्यन्नात्मा प्रजापतिः प्रकृतः स एष संवत्सरात्मना विशेषतो निर्दिश्यते । षोडशकलः षोडश कला अवयवा अस्य सोऽयं षोडशकलः संवत्सरः संवत्सरात्मा कालरूपः । तस्य च कालात्मनः प्रजापते रात्रय एवाहोरात्राणि तिथय इत्यर्थः । पञ्चदश कलाः । ध्रुवैव नित्यैव व्यवस्थिताऽस्य प्रजापतेः षोडशी षोडशानां पूरणी कला सा रात्रिभिरेव तिथिभिः कलोक्ताभिरापूर्यते चापक्षीयते च । प्रतिपदाद्याभिर्हि चन्द्रमाः प्रजापतिः शुक्लपक्ष आपूर्यते कलाभिरुपचीयमानाभिर्वर्धते यावत्संपूर्णमण्डलः पौर्णमास्याम् । ताभिरेवापचीयमानाभिः कलाभिरपक्षीयते कृष्णपक्षे यावद्ध्रुवैका कला व्यवस्थिताऽमावास्यायाम् ।

अन्नत्रये फलवद्ध्यानविषये व्याख्याते वक्तव्याभावात्किमुत्तरग्रन्थेनेत्याशङ्क्य वृत्तं कीर्तयति—पितेति। तेषां तत्फलत्वे प्रमाणाभावमादाय शङ्कते—तत्रेति। प्रकृतं व्याख्यानं सप्तम्यर्थः । कार्यलिङ्गकमनुमानं प्रमाणयन्नुत्तरमाह—उच्यत इति । अनुमानमेव स्फुटयितुमन्नेषु पाङ्क्तत्वावगतिं दर्शयति—यस्मादिति ।

---

१ घ. प्रस्तुतव्या° । ञ. प्रस्तुतं ।

तस्मात्तत्कारणमपि तादृशमिति शेषः । कथं पुनस्तत्र पाङ्क्तत्ववीरित्याशङ्क्याऽऽह—वित्तेति । आत्मा जाया प्रजेति त्रयं संग्रहीतुमपिशब्दः । उक्तं हेतुं व्यक्तीकुर्वन्नुक्तं स्मारयति—तत्रेति । अन्नत्रयं सप्तम्यर्थः । तथाऽपि कथं पाङ्क्तत्वमित्याशङ्क्यानन्तरमन्थमवतारयति—तत्र वित्तेति । सप्तमी पूर्ववत् । अवतारितं ग्रन्थं व्याचष्टे—योऽयमित्यादिना । कथं प्रजापतेस्त्रिविधैरापूर्यमाणत्वमपक्षीयमाणत्वं च तत्राऽऽह—प्रतिपदाद्यामिरिति । वृद्धेर्मर्यादां दर्शयति—यावदिति । अपक्षयस्य मर्यादामाह—यावदमुष्येति ।

स प्रजापतिः कालात्माऽमावास्याममावास्यायां रात्रिं रात्रौ या व्यवस्थिता ध्रुवा कलोक्तैतया षोडश्या कलया सर्वमिदं प्राणभृत्प्राणिजातमनुप्रविश्य यदपः पिबति यच्चौषधीरश्नाति तत्सर्वमेवौषध्यात्मना सर्वं व्याप्यामावास्यां रात्रिमवस्थाय ततोऽपरेद्युः प्रातर्जायते द्वितीयया कलया संयुक्तः । एवं पाङ्क्तात्मकोऽसौ प्रजापतिः । दिवादित्यौ मनः पिता । पृथिव्यग्नी वाग्जाया माता । तयोश्च प्राणः प्रजा । चान्द्रमस्यस्तिथयः कला वित्तमुपचयापचयधर्मित्वाद्वित्तवत्त्वात्तासां च कलानां कालावयवानां जगत्परिणामहेतुत्वं कर्म । एवमेष कृत्स्नः प्रजापतिर्जाया मे स्यादथ प्रजायेयाथ वित्तं मे स्यादथ कर्म कुर्वीयेत्येषणानुरूप एव पाङ्क्तस्य कर्मणः फलभूतः संवृत्तः । कारणानुविधायि हि कार्यमिति लोकेऽपि स्थितिः ।

अवशिष्टाममावास्यायां निविष्टां कलां प्रपञ्चयन्द्वितीयकलोत्पत्तिं शुक्लप्रतिपदि दर्शयति—स प्रजापतिरिति । प्राणिजातमेव विशिनष्टि—यदप इति । स्थावरं जङ्गमं चेत्यर्थः । ओषध्यात्मनेत्युपलक्षणं जलात्मनेत्यपि द्रष्टव्यम् । कलभूते प्रजापतौ पाङ्क्तत्वं वक्तुमुपक्रान्तं तदद्यापि नोक्तमित्याशङ्क्याऽऽह—एवमिति । तदेव पाङ्क्तत्वं व्यनक्ति—द्विवेति । कलानां वित्तवद्वित्तत्वे हेतुमाह—उपचयेति । पाङ्क्तत्वनिर्देशेन लब्धमर्थमाह—एवमेष इति । संप्रति कृत्स्नस्य प्रजापतेरुपक्रमानुसारित्वं दर्शयति—जायेति । भवतु प्रजापतेरुक्तरीत्या पाङ्क्तत्वं तथाऽपि कथं पाङ्क्तकर्मफलत्वं तत्राऽऽह—कारणेति ।

यस्मादेष चन्द्र एतां रात्रिं सर्वप्राणिजातमनुप्रविष्टो ध्रुवया कलया वर्तते तस्माद्धेतोरेतामममावास्यां रात्रिं प्राणभृतः प्राणिनः प्राणं न विच्छिन्द्यात्प्राणिनं न प्रमापयेदित्येतदपि कृत्स्नकलासस्य । कृत्स्नकलासो

१ ख. घ. ञ. ट. ण. °ट्टगिति । २ ख. ट. °यम° । ३ ख. °वद्रासां । ४ घ. ङ. छ. ज. °सा । आसां । ५ घ. ट. °गद्विपरि° । ६ क. ञ. ट. °वास्यां नि° । ७ ख. ण. °स्थानि° । ८ क. ट. °कनीत्वा । ९ ट. °कभूउत्वं । १० घ. ड. °चन्द्रमा ।

हि पापात्मा स्वभावेनैव हिंस्यते प्राणिभिर्दृष्टोऽप्यमङ्गल इति कृत्वा। ननु प्रतिषिद्धैव प्राणिहिंसा न हिंस्यात्सर्वा भूतान्यन्यत्र तीर्थेभ्य इति। बाढं प्रतिषिद्धा तथाऽपि नामावास्याया अन्यत्र प्रतिप्रसवार्थं वचनं हिंसायाः कुकलासविषये वा किं तर्ह्येतस्याः सोमदेवताया अपचित्यै पूजार्थम् ॥ १४ ॥

पाङ्क्तकर्मफलत्वं प्रजापतेरुक्त्वा प्रासङ्गिकमर्थमाह—यस्मादिति। अपि कुकलासस्येति कुतो विशेषोक्तिरित्याशङ्क्याऽऽह—कुकलासो हीति। कुतस्तस्य पापात्मत्वं तत्राऽऽह—दृष्टोऽपीति। विशेषनिषेधस्य शेषानुज्ञानपरत्वाद्विरोधः सामान्यशास्त्रेण स्यादिति शङ्कते—नन्विति। तीर्थशब्दः शास्त्रविहितमदेशविषयः। साधारण्येन सर्वत्र निषिद्धाऽपि हिंसा विशेषतोऽमावास्यायां निषिध्यमाना सोमदेवतापूजार्था। ततः शेषानुज्ञाभावान्न सामान्योक्तिविरोधोऽस्तीति परिहरति—बाढमिति ॥ १४ ॥

यो वै स संवत्सरः प्रजापतिः षोडशकलोऽयमेव स योऽय-
मेवंवित्पुरुषस्तस्य वित्तमेव पञ्चदश कला आत्मैवास्य
षोडशी कला स वित्तेनैवाऽऽ च पूर्यतेऽप च क्षीयते तदे-
तन्नभ्यं यदयमात्मा प्रधिर्वित्तं तस्माद्यद्यपि सर्वज्यानिं
जीयत आत्मना चेज्जीवति प्रधिनाऽगादित्येवाऽऽहुः ॥ १५ ॥

यो वै परोक्षाभिहितः संवत्सरः प्रजापतिः षोडशकलः स नैवा-त्यन्तं परोक्षो मन्तव्यो यस्मादयमेव स प्रत्यक्ष उपलभ्यते। कोऽसावयं यो यथोक्तं त्र्यन्नात्मकं प्रजापतिमात्मभूतं वेत्ति स एवंवित्पुरुषः केन सामान्येन प्रजापतिरिति तदुच्यते—तस्येवंविदः पुरुषस्य गवादिवित्तमेव पञ्चदश कला उपचयापचयधर्मित्वाच्चद्वित्तसाध्यं च कर्म। तस्य कृत्स्नताया आत्मैव पिण्ड एवास्य विदुषः षोडशी कला ध्रुवस्थानीया स चन्द्रवद्वित्तेनैवाऽऽपूर्यते चापक्षीयते च। तदेतल्लोके

---

१ क. °साऽहिंसन्सर्वभू°। २ च. छ ज. झ. °त्सर्वभू°। ख. °त्सर्वाणि भू°। ३ च. °दित्याहुः। ४ क. ग. ङ. च. छ. झ. वै स प°। ५ ङ. छ. ज. झ. °थोक्तमन्ना°। ६ घ. ञ. झ. साम्येन। ७ ख. °त्वाद्वि°। ८ ख. घ. छ. च. ज. ट. °षः षोडशानां पूरणो षो°।

प्रसिद्धम् । तदेतन्नभ्यं नाभ्ये हितं नभ्यं नाभिं वाऽहतीति । किं तद्यदयं योऽयमात्मा पिण्डः प्राधिर्वित्तं परिवारस्थानीयं बाह्यं चक्रस्येवारनेम्यादि । तस्माद्यद्यपि सर्वज्यानं सर्वस्वापहरणं जीयते हीयते ग्लानिं प्राप्नोत्यात्मना चक्रनाभिस्थानीयेन चेद्यदि जीवति प्राधिना बाह्येन परिवारेणार्यमगात्क्षीणोऽयं यथा चक्रमरनेमिविमुक्तमेवमाहुर्जीवंश्चेदरनेमिस्थानीयेन वित्तेन पुनरुपचीयत इत्यभिप्रायः ॥ १५ ॥

यत्पूर्वमाधिदैविकत्र्यन्नात्मकप्रजापत्युपासनमुक्तं तदहमास्मि प्रजापतिरित्यहंग्रहेण कर्तव्यमित्याह—यो वा इति । प्रत्यक्षमुपलभ्यमानं प्रजापतिं प्रश्नद्वारा प्रकटयति—कोऽसाविति । तस्य प्रजापतित्वमप्रसिद्धमित्याशङ्क्य परिहरति—केनेत्यादिना । कलानां जगद्द्वैपरीणामहेतुत्वं कर्मेत्युक्तं वित्तेऽपि कर्महेतुत्वमस्ति तेन तत्र कलाशब्दप्रवृत्तिरुचितेत्याह—वित्तेति । तथा चन्द्रमाः कलाभिः शुक्लकृष्णपक्षयोरापूर्यतेऽपक्षीयते च तथा स विद्वान्वित्तेनवोपचीयमानेनाऽऽपूर्यतेऽपचीयमानेन चापक्षीयते । एतच्च लोकप्रसिद्धत्वान्न प्रतिपादनसापेक्षमित्याह—स चन्द्रवादिति । आत्मैव ध्रुवा कलेत्युक्तं तदेव रथचक्रदृष्टान्तेन स्पष्टयति—तदेतादिति । नाभिचक्रपिण्डका तत्स्थानीयं वा नभ्यं तदेव प्रश्नद्वारा स्फोरयति—किं तादिति । शरीरस्य चक्रपिण्डकास्थानीयत्वमुक्तं परिवारादर्शनादित्याशङ्क्याऽऽह—प्राधिरिति । शरीरस्य रथचक्रपिण्डकास्थानीयत्वे फलितमाह—तस्मादिति । पदार्थमुक्त्वा वाक्यार्थमाह—जीवंश्चादिति ॥ १५ ॥

एवं पाङ्क्तेन दैववित्तविद्यासंयुक्तेन कर्मणा त्र्यन्नात्मकः प्रजापतिर्भवतीति व्याख्यातमनन्तरं च जायादिवित्तं परिवारस्थानीयमित्युक्तम् । तत्र पुत्रकर्मापरविद्यानां लोकप्राप्तिसाधनत्वमात्रं सामान्येनावगतं न पुत्रादीनां लोकप्राप्तिफलं प्रति विशेषसंबन्धनियमः । सोऽयं पुत्रादीनां साधनानां साध्यविशेषसंबन्धो वक्तव्य इत्युत्तरकण्डिका प्रणीयते—

अथ त्रयो वाव लोका मनुष्यलोकः पितृ-
लोको देवलोक इति सोऽयं मनुष्यलोकः
पुत्रेणैव जय्यो नान्येन कर्मणा कर्मणा पितृ-

---

१ घ. ज. चार्हति । ङ. च. ड वाऽर्हति । २ ख. ड °ह्यं वित्तं च° । ३ घ. च.ज. °निं सर्वहानिं स । ४ घ ञ प्राप्तोऽप्यात्म° । ५ क ख छ. °प्नोतीत्या° । ६ ग. ङ. च. छ. ज. झ. °यमागा° । ७ ख. घ. च. ज. ढ. °वियुक्त° । ८ ण. °विकान्ना° । ९ ख. ढ. °यं न° । १० ग. झ. °माऽन्ना° । ११ घ. ञ. त्र्यन्नात्मा । १२ ख. छ. ढ. °त्तरा क° ।

लोको विद्यया देवलोको देवलोको वै
लोकानाꣳ श्रेष्ठस्तस्मादविद्यां प्रशꣳसन्ति ॥ १६ ॥

अथेति वाक्योपन्यासार्थः । त्रयो वावेत्यवधारणार्थः । त्रय एव शास्त्रोक्तसाधनार्हा लोका न न्यूना नाधिका वा । के त इत्युच्यते—मनुष्यलोकः पितृलोको देवलोक इति । तेषां सोऽयं मनुष्यलोकः पुत्रेणैव साधनेन जय्यो जेतव्यः साध्यो यथा च पुत्रेण जेतव्यस्तथोत्तरत्र वक्ष्यामो नान्येन कर्मणा विद्यया वेति वाक्यशेषः । कर्मणाऽग्निहोत्रादिलक्षणेन केवलेन पितृलोको जेतव्यो न पुत्रेण नापि कर्मणा । देवलोको वै लोकानां त्रयाणां श्रेष्ठः प्रशस्यतमः । तस्मात्साधनत्वाद्विद्या प्रशंसन्ति ॥ १६ ॥

अत्रत्रयात्मनि प्रजापतावृग्ग्रहोपासनस्य सकलस्योक्तत्वाद्वक्तव्याभावादुत्तरग्रन्थवैयर्थ्यमित्याशङ्क्य तद्विषयं वक्तुं वृत्तमनुवदति—एवमिति । साधनोक्त्यैव फलमुक्तं तयोर्मिथोबद्धत्वान्नाजामित्यं च फलं प्रागेव दर्शितं तत्किमुत्तरग्रन्थेनेत्याशङ्क्य सामान्येन तत्प्रतीतावपीदमस्येति विशेषो नोक्तस्तदुक्त्यर्थमुत्तरा श्रुतिरित्याह—तत्रेति । पूर्वग्रन्थः सप्तम्यर्थः । निगमो न्यवगत इति संबन्धः । उपन्यासः प्रारम्भः । वावशब्दस्यावधारणरूपमर्थं विवृणोति—त्रय एवेति । तदेव लोकत्रयं प्रश्नद्वारा स्फोरयति—के त इत्यादिना । जय्यो नाम पुत्रेण मनुष्यलोकस्यातिक्रम इति केचित्तान्प्रत्याह—साध्य इति । पुत्रेणास्य साध्यत्वमसिद्धमित्याशङ्क्याऽऽह—यथा चेति । द्विविधो हि मनुष्यलोकजयः कर्तव्यशेषानुष्ठानं भोगश्च । तत्राऽऽद्यमाश्रित्यान्ययोगव्यवच्छेदैवकारार्थं दर्शयति—नान्येनेति । द्वितीये त्वयोगव्यवच्छेदस्तदर्थो ज्योतिषैनं लोकं जयतीति साधनान्तरेणापि मनुष्यलोकजयश्रुतेरिति भावः । पूर्ववाक्यस्थमेवकारमुत्तरवाक्ययोरनुषक्तमुपेत्य वाक्यद्वयं व्याचष्टे—कर्मणेत्यादिना । साधनद्वयापेक्षया फलद्वारकमुत्कर्षं विद्यायां दर्शयति—देवलोक इति ।

अथातः संप्रत्तिर्यदा प्रैष्यन्मन्यतेऽथ पुत्रमाह त्वं
ब्रह्म त्वं यज्ञस्त्वं लोक इति स पुत्रः प्रत्याहाहं
ब्रह्माहं यज्ञोऽहं लोक इति यद्वै किंचानूक्तं तस्य

१ अ. °नोक्तौ च फ° । २ ख. घ. °व प्रद° । ३ घ. ञ. ण. °नाक्ति विनत्यतस्त° ।

सर्वस्य ब्रह्मेत्येकता । ये वै के च यज्ञास्तेषाꣳ
सर्वेषां यज्ञ इत्येकता ये वै के च लोकास्तेषाꣳ
सर्वेषां लोक इत्येकतैतावद्वा इदꣳ सर्वमेतन्मा
सर्वꣳ सन्नयमितोऽभुनजदिति तस्मात्पुत्रमनुशिष्टं
लोक्यमाहुस्तस्मादेनमनुशासति स यदैवंविदस्मा-
ल्लोकात्प्रैत्यथैभिरेव प्राणैः सह पुत्रमाविशति ।
स यद्यनेन किंचिदक्ष्णयाऽकृतं भवति तस्मादे-
नꣳ सर्वस्मात्पुत्रो मुञ्चति तस्मात्पुत्रो नाम स
पुत्रेणैवास्मिँल्लोके प्रतितिष्ठत्यथैनमेते दैवाः प्राणा
अमृता आविशन्ति ॥ १७ ॥

एवं साध्यलोकत्रयफलभेदेन विनियुक्तानि पुत्रकर्मविद्याख्यानि त्रीणि साधनानि । जाया तु पुत्रकर्मार्थत्वान्न पृथक्साधनमिति पृथङ्नाभिहिता । वित्तं च कर्मसाधनत्वान्न पृथक्साधनम् । विद्याकर्मणोर्लोकजयहेतुत्वं स्वात्मप्रतिलाभेनैव भवतीति प्रसिद्धम् । पुत्रस्य त्वक्रियात्मकत्वात्केन प्रकारेण लोकजयहेतुत्वमिति न ज्ञायतेऽतस्तद्वक्तव्यमित्यथानन्तरमारभ्यते । संप्रत्तिः संप्रदानम् । संप्रत्तिरिति वक्ष्यमाणस्य कर्मणो नामधेयम् । पुत्रे हि स्वात्मव्यापारसंप्रदानं करोत्यनेन प्रकारेण पिता तेन संप्रत्तिसंज्ञकमिदं कर्म । तत्कस्मिन्काले कर्तव्यमित्याह—स पिता यदा यस्मिन्काले प्रेष्यन्मरिष्यन्मरिष्यामीत्यरिष्टादिदर्शनेन मन्यतेऽथ तदा पुत्रमाहूयाऽऽह—त्वं ब्रह्म त्वं यज्ञस्त्वं लोक इति । स एवमुक्तः पुत्रः प्रत्याह स तु पूर्वमेवानुशिष्टो जानाति मयैतत्कर्तव्यमिति तेनाऽऽहाहं ब्रह्माहं यज्ञोऽहं लोक इति । एतद्वाक्यत्रयम् ।

वृत्तमनुवदति—एवमिति । पुत्रादिवज्जायावित्तयोरपि प्रकृतत्वात्फलविशेषे विनियोगो वक्तव्य इत्याशङ्क्याऽऽह—जाया त्विति । न पृथक्पुत्रकर्मभ्यामिति शेषः । न पृथक्साधनं कर्मणः सकाशादिति द्रष्टव्यम् । भवत्वेवं साधनत्रयनियमस्तथाऽपि विद्याकर्मणी हित्वा समनन्तरमन्थे किमिति पुत्रनिरूपणमित्याश-

१ च. ड. °ण सर्वो° । २ घ. ढ. °तुरिति । ३ ख ग घ. °रिष्या° । ४ ख ढ ण °ऋषवि° ।

ख्यायाऽऽह—विद्याकर्मणोरिति । यथोक्ते चोद्ये पुत्रस्य लोकहेतुत्वज्ञापनार्थं संप्रतिवाक्यमित्याह—अत इति । अथात इति पददयं व्याख्याय संप्रतिपदं व्याचष्टे—संप्रत्तिरिति । किमिदं संप्रदानं नाम तदाह—संप्रत्तिरितीति । तदेव कर्म विशदयति—पुत्रे हीति । अनेन प्रकारेणेति वक्ष्यमाणप्रकारोक्तिः । अरिष्टादीत्यादिपदेन दुःस्वप्नादिसंग्रहः । मत्याह वाक्यत्रयमिति संबन्धः । पुत्रस्याहं ब्रह्मेत्यादिप्रतिवचने हेतुमाह—स त्विति । मया कार्यं यदध्ययनादि तदेवावशिष्टं त्वया कार्यमिति पुत्रस्य प्रागनुशिष्टताभावे प्रतिवचनानुपपत्तिरित्यर्थः ।

एतस्यार्थस्तिरोहित इति मन्वाना श्रुतिर्व्याख्यानाय प्रवर्तते-यद्वै किंच यत्किंचावशिष्टमनूक्तमधीतमनधीतं च तस्य सर्वस्यैव ब्रह्मेत्येतस्मिन्पद एकतैकत्वं योऽध्ययनव्यापारो मम कर्तव्य आसीदेतावन्तं कालं वेदविषयः स इत ऊर्ध्वं त्वं ब्रह्म त्वत्कर्तृकोऽस्त्वित्यर्थः । तथा ये वै के च यज्ञा अनुष्ठेयाः सन्तो मयाऽनुष्ठिताश्चाननुष्ठिताश्च तेषां सर्वेषां यज्ञ इत्येतस्मिन्पद एकतैकत्वं मत्कर्तृका यज्ञा य आसंस्त इत ऊर्ध्वं त्वं यज्ञस्त्वत्कर्तृका भवन्त्वित्यर्थः । ये वै के च लोका मया जेतव्याः सन्तो जिता अजिताश्च तेषां सर्वेषां लोक इत्येतस्मिन्पद एकता । इत ऊर्ध्वं त्वं लोकस्त्वया जेयास्ते । इत ऊर्ध्वं मयाऽध्ययनयज्ञलोकजयकर्तव्यक्रतुस्त्वयि समर्पितोऽहं तु मुक्तोऽस्मि कर्तव्यताबन्धनविषयात्क्रतोः । स च सर्वं तथैव प्रतिपन्नवान्पुत्रोऽनुशिष्टत्वात् ।

यद्वै किंचेत्यादिवाक्यानां पुत्रानुमन्त्रणवाक्यैरर्थभेदाभावात्पुनरुक्तिरित्याशङ्क्याऽऽह—एतस्येति । यद्वै किंचेत्यादिवाक्ये वाक्यार्थमाह—योऽध्ययनेति । त्वं ब्रह्मेतिवाक्यवत्त्वं यज्ञ इति वाक्यमपि शक्यं व्याख्यातुमित्याह—तथेति । ब्राह्मणार्थं संगृह्णाति—मत्कर्तृका इति । त्वं लोक इत्यस्य व्याख्यानं ये वै के चेत्यादि । तत्र पदार्थानुक्त्वा वाक्यार्थमाह—इत इति । किमिति त्वत्कर्तृकमध्ययनादि मयि समर्प्यते त्वयैव किं नानुष्ठीयते तत्राऽऽह—इत ऊर्ध्वमिति । कर्तव्यतैव बन्धनं तद्विषयः क्रतुः संकल्पस्तस्मादिति यावत् । स पुत्र इत्यादेस्तात्पर्यमाह—स त्वेति ।

तत्रेमं पितुरभिप्रायं मन्वानाऽऽचष्टे श्रुतिरेतावदेतत्परिमाणं वा इदं सर्वं यद्गृहिणा कर्तव्यं यदुत वेदा अध्येतव्या यज्ञा यष्टव्या लोकाश्च जेतव्या एतन्मा सर्वं सन्नयं सर्वं हीमं भारं मदधीनं मन्योऽपच्छि-

---

१ ख. ङ. °ज्ञाना° । २ क. ख. ञ ट. °ष्टत्वभा° । ३ क. ख. घ. ङ. च. छ. झ, ञ. °कर्त्वं । ४ ख. ङ. ञ °र्तव्यः क° । ५ ग. मत्वाऽऽच° । ६ ख. ग, घ. ङ, च. छ, झ, ट. °तत्सर्वं । ७ ङ. झ. ङ. °त्योऽवच्छि° ।

द्याऽऽत्मनि निधायेतोऽस्माल्लोकान्मां मामभुनजत्पालयिष्यतीति लृडर्थे लङ् छन्दसि कालनियमाभावात्। यस्मादेवं संपन्नः पुत्रः पितरमस्माल्लोकात्कर्तव्यतावन्धनतो मोचयिष्यति तस्मात्पुत्रमनुशिष्टं लोकयं लोकाहितं पितराहुर्ब्राह्मणाः। अत एव ह्येनं पुत्रमनुशासति लोक्योऽयं नः स्यादिति पितरः।

तत्रेति यथोक्तानुशासनोक्तिः। एतन्मा सर्वमित्यादि प्रतीकादाय व्याचष्टे—सर्वं हीति। अनद्यतने भूतेऽर्थे विहितस्य लङो भविष्यदर्थत्वं कथमित्याशङ्क्याऽऽह—छन्दसीति। पुत्रानुशासनस्य फलवत्त्वमाह—यस्मादित्यादिना।

स पिता यदा यस्मिन्काल एवंवित्पुत्रसमर्पितकर्तव्यताकतुरस्माल्लोकात्प्रैति म्रियतेऽथ तदैभिरेव प्रकृतैर्वाङ्मनःप्राणैः पुत्रमाविशति पुत्रं व्याप्नोति। अध्यात्मपरिच्छेदहत्वपगमात्पितुर्वाङ्मनःप्राणाः स्वेनाऽऽधिदैविकेन रूपेण पृथिव्यग्न्याद्यात्मना भिन्नघटप्रदीपप्रकाशवत्सर्वमाविशन्ति। तैः प्राणैः सह पिताऽप्याविशति वाङ्मनःप्राणात्मनाविर्भावात्पितुः। अहमस्म्यनन्ता वाङ्मनःप्राणा अध्यात्मादिभेदविस्तारा इत्येवं भावितो हि पिता। तस्मात्तत्प्राणानुवृत्तित्वं पितुर्भवतीति युक्तमुक्तमेभिरेव प्राणैः सह पुत्रमाविशतीति। सर्वेषां ह्यतावात्मा भवति पुत्रस्य च। एतदुक्तं भवति—यस्य पितरेवमनुशिष्टः पुत्रो भवति सोऽस्मिन्नेव लोके वर्तते पुत्ररूपेण नैव मृतो मन्तव्य इत्यर्थः। तथा च श्रुत्यन्तरे—"सोऽस्यायमितर आत्मा पुण्येभ्यः कर्मभ्यः प्रतिधीयते" इति।

कृतसंप्रतिपत्तिकः तर्पितः किं करोतीत्यपेक्षायामाह—स पितेति। कोऽयं प्रवेशो न हि विशिष्टस्य केवलस्य वा बिले सर्पवत्प्रवेशः संभवत्यत आह—अध्यात्मेति। हेतुर्निरूप्याज्ञानादिः। वागादिष्वाविष्टेष्वपि कुतोऽन्यान्तरस्य पितुराविरूचीरित्याशङ्क्याऽऽह—वागिति। तद्भावित्वमेव स्फोरयति—अहमिति। भावनाफलमाह—तस्मादिति। पुत्रविशेषणात्परिच्छिन्नत्वं पितुस्तदवस्थमित्याशङ्क्याऽऽह—सर्वेषां हीति। मृतस्य पितुरितो लोकाद्व्यावृत्तस्य कथं यथोक्तरूपत्वमि-

१ ग. ङ. च. ज. ढ. °न्मामं। २ ङ. °धनान्नाचं। ३ ख. घ. ङ. ज. नश्वतो। ४ च. °ह्मणास्तस्मादुक्तहेतोरवाऽऽयतना अप्येन। ५ च. ढ. क्योऽयमस्माकं स्या°। ६ क. ख. घ. ञ. ट. ण. °तत्सर्व°। ७ ख. घ. ढ. भूतार्थे। ८ क. ख. ङ. छ. °वितत्वा°। ९ ख. °वंभावनो हि। १० ख. ग. ङ. °स्मात्मा°। ११ ढ. °कः पिता। १२ ण. स पिता।

त्याशङ्क्याऽऽह—एतदुक्तमिति । पुत्ररूपेणात्र स्थितिमेव विभजते—नैवेति । मृतोऽपि पिताऽनुशिष्टपुत्रात्मनाऽत्र वर्तते नास्मादित्यन्तं व्यावृत्तः फलरूपेण च परत्रेति भावः । उक्तेऽर्थे ऐतरेयश्रुतिं संवादयति—तथा चेति । षष्ठीपथमाभ्यां पितापुत्रा उच्येते ।

अथेदानीं पुत्रनिर्वचनमाह—स पुत्रो यदि कदाचिदनेन पित्राऽऽक्षणया कोणच्छिद्रतोऽन्तराऽकृतं भवति कर्तव्यम् । तस्मात्कर्तव्यतारूपात्पित्राऽकृतात्सर्वस्माल्लोकप्राप्तिप्रतिबन्धरूपात्पुत्रो मुञ्चति मोचयति तत्सर्वं स्वयमनुतिष्ठन्पूरयित्वा । तस्मात्पूरणेन त्रायते स पितरं यस्मात्तस्मात्पुत्रो नाम । इदं तत्पुत्रस्य पुत्रत्वं यत्पितृच्छिद्रं पूरयित्वा त्रायते । स पितैवंविधेन पुत्रेण मृतोऽपि सन्नमृतोऽस्मिन्नेव लोके प्रतितिष्ठत्येवमसौ पिता पुत्रेणेमं मनुष्यलोकं जयति । न तथा विद्याकर्मभ्यां देवलोकपितृलोकौ स्वरूपलाभमात्रेण । न हि विद्याकर्मणी स्वरूपलाभव्यतिरेकेण पुत्रवद्व्यापारान्तरापेक्षया लोकजयहेतुत्वं प्रतिपद्येते । अथ कृतमंप्रात्तिकं पितरमेनमंते वागादयः प्राणा देवा हैरण्यगर्भा अमृता अमरणधर्माण आविशन्ति ॥ १७ ॥

स यदीत्यादिवाक्यमवतार्य व्याकरोति—अथेत्यादिना । अकृतमकृतादिति च च्छेदः । तस्मादिति प्रतीकमादाय व्याकरोति—पूरणेनेति । तदेव प्रपञ्चयति—इदं तदिति । पुत्रवैशिष्ट्यं निगमयति—स पितेति । पुत्रणैतल्लोकजयमुपसंहरति—एवमिति । यथोक्तात्पुत्राद्विद्याकर्मणोर्विशेषमाह—न तथेति । कथं तर्हि ताभ्यां पिता तौ जयति तत्राऽऽह—स्वरूपेति । तदेव स्फुटयति—न हीति । अनुशिष्टपुत्रेणैतल्लोकजयिनं पितरमधिकृत्यैनमित्यादि वाक्यं तद्व्याकरोति—अथेति । पुत्रप्रकरणविच्छेदार्थोऽथशब्दः ॥ १७ ॥

पृथिव्यै चैनमग्नेश्च दैवी वागाविशति सा वै दैवी वाग्यया
यद्यदेव वदति तत्तद्भवति ॥ १८ ॥

कथमिति वक्ष्यति—पृथिव्यै चैनमित्यादि । एवं पुत्रकर्मापरविद्यानां मनुष्यलोकपितृलोकदेवलोकसाध्यार्थता प्रदर्शिता श्रुत्या स्वयमेवात्र केचिद्वावदूकाः श्रुत्युक्तविशेषार्थानभिज्ञाः सन्तः पुत्रादिसाधनानां मोक्षार्थतां वदन्ति । तेषां मुखापिधानं श्रुत्यैवं कृतं जाया मे स्यादि-

१ क. ढ 'न्वनरू' । २ च. ज. ढ °पक्ष ला° । ३ क. घ. ञ ढ. ण °ति च्छे' । ४ क. स्पष्टयति । ५ घ. ज. °साध्यता ।

त्यादि पाङ्क्तं काम्यं कर्मेत्युपक्रमेण पुत्रादीनां च साध्यविशेषावेनि-योगोपसंहारेण च। तस्माद्ब्राह्मणश्रुतिरविद्वद्विषया न परमात्मविद्वि-षयेति सिद्धम्। वक्ष्यति च—किं प्रजया करिष्यामो येषां नोऽयमा-त्माऽयं लोक इति।

आवेशयकारबुभुत्सायामुत्तरवाक्यप्रवृत्तिं प्रतिजानीते—कथमित्यादिना। पृथिव्यै चेत्यादिवाक्यस्य व्यावर्त्यं पक्षं वृत्तानुवादपूर्वकमुत्थापयति—एवमिति। अत्रेति वैदिकान्निर्धारयितुं तत्रेति। बहुवदनशीलत्वे हेतुः—श्रुत्युक्तेति। मोक्षा-र्थतामृणापाकरणश्रुतिस्मृतिभ्यां वदन्तीति शेषः। मीमांसकपक्षं प्रकृतश्रुतिविरो-धेन दूषयति—तेषामिति। कथमित्याशङ्क्य श्रुतेरादिमध्यावसानालोचनया पुत्रादेः तत्तारफलत्वावगमान्न मुक्तिफलतेत्याह—जायेत्यादिना। पुत्रादीनां चेति चकारादेतावान्वै काम इति मध्यसंग्रहः। यदुक्तमृणापाकरणश्रुतिस्मृतिभ्यां पुत्रा-देर्मुक्तिफलतेति तत्राऽऽह—तस्मादिति। पुत्रादेः श्रुतं तत्तारफलत्वं परामृश्य तच्छब्दः। श्रुतिशब्दः स्मृतेरुपलक्षणार्थः। श्रुतिस्मृत्योरविरुद्धविषयत्वे वाक्यशेष-मनुकूलयति—वक्ष्यति चेति।

केचित्तु पितृलोकदेवलोकजयोऽपि पितृलोकदेवलोकाभ्यां व्यावृ-त्तिरेव। तस्मात्पुत्रकर्मापरविद्याभिः समुच्चित्यानुष्ठिताभिश्चित्त्य एतेभ्यो लोकेभ्यो व्यावृत्तः परमात्मविज्ञानेन मोक्षमधिगच्छतीति परम्परया मोक्षार्थान्येव पुत्रादिसाधनानीच्छन्ति। तेषामपि मुखापिधानायेयमेव श्रुतिरुत्तरा कृतसंप्रत्तिकस्य पुत्रिणः कर्मिणश्चयन्नात्मविद्याविदः फल-प्रदर्शनाय प्रवृत्ताः।

मीमांसकपक्षं निराकृत्य भर्तृप्रपञ्चपक्षमुत्थापयति—केचित्त्विति। मनुष्य-लोकजयस्ततो व्यावृत्तिर्यथेत्यपेर्थः। पुत्रादिसाधनाधीनतया लोकत्रयव्यावृत्तावपि कथं मोक्षः संपद्यते न हि पुत्रादीन्येव मुक्तिसाधनानि विरक्तत्वविरोधादित्याश-ङ्क्याऽऽह—तस्मादिति। पृथिव्यै चेत्याद्योत्तरा श्रुतिरेव मीमांसकमतवद्भर्तृप्र-पञ्चमतमपि निराकरोतीति दूषयति—तेषामिति। कथं सा तन्मतं निराकरोती-त्याशङ्क्य श्रुतिं विशिनष्टि—कृतेति[1]।

न चेदमेव फलं मोक्षफलमिति शक्यं वक्तुम्। त्र्यन्नसंबन्धान्मेधातिथेः[2]कार्यत्वाच्चान्नानां पुनः पुनर्जनयत इति दर्शनात्। यद्धैतन्न कुर्या-

---

१ क ग. घ. ङ. च. छ. झ. ञ. ढ. °विद्याविष°। २ ख. श्रुतम्। ३ घ. °दिकं पक्षं निर्धा°। ञ ण °दिकं निर्धा°। ४ घ. च. ज.' °च्छन्तीति। ते°। ५ ग. °र्मिणोऽन्ना°। ६ ग. घ. ङ ज झ °लद्°। ७ घ. ञ. °ति। अन्ना°। ८ घ. ङ. च. ज. °क्ष इति। ९ ग. °म् अन्न°। १० क' °पःकर्मत्वा°।

तीति हेति च क्षयश्रवणाच्छरीरं ज्योतीरूपमिति च कार्यकरणसंघातोपपत्तेश्चयं वा इदमिति च नामरूपकर्मात्मकत्वेनोपसंहाराच्च । न चेदमेव साधनत्रयं संहतं सत्कस्यचिन्मोक्षार्थं कस्यचित्स्वर्गात्मफलमित्यस्मादेव वाक्यादवगन्तुं शक्यं पुत्रादिसाधनानां स्वर्गात्मफलेदानीमेवोपक्षीणत्वाद्वाक्यस्य ।

स्वर्गात्मोपादानदुस्त्यजत्वादिवचनविरुद्धं परमतमित्यपयुक्तं तदौत्तरेव मुक्तित्वादित्याशङ्क्याऽऽह—न चेति । तथाऽपि कथं यथोक्तं फलं मोक्षो न भवति तत्राऽऽह—नेदमिति । स्वर्गात्मनो ज्ञानकर्मजन्यत्वे हेतुमाह—पुनः पुनरिति । मुक्तावेरमुक्तित्वे हेत्वन्तरमाह—यद्धेति । कार्यकरणवैलक्षण्यश्रुतेरपि तूष्णीभावो न मुक्तिरित्याह—शरीरमिति । अविद्यातदुत्थद्वैतस्य स्वात्मकत्वेनोपसंहारात्तदात्मतूष्णीभावो बन्धान्तर्भूतो न मुक्तिरिति युक्त्यन्तरमाह त्रयमिति । सन्यविरक्तस्यात्मनस्तूष्णीभिफलमपि कर्मादिविरक्तस्य विदुषो मुक्तिफलमिति व्यवस्थितिर्नेत्याह—न चेदमिति । न हि पृथिव्यै वेत्यादिवाक्यस्यैकस्य तच्छ्रुतस्यानेकार्थत्वं विद्यते हि तथा वाक्यमिति न्यायादित्यर्थः ।

पृथिव्यै पृथिव्याग्नेनमग्नेश्च दैव्यधिदैवात्मिका वागेनं कृतसंपत्तिं कर्माविशति । सर्वेषां हि वाच उपादानभूता दैवी वाक्पृथिव्यग्निलक्षणा । सा ह्याध्यात्मिकासङ्गादिदोषैर्निरुद्धा । विदुषस्तद्दोषापगम आवरणभङ्गे इवोदकं प्रदीपप्रकाशवच्च व्याप्नोति । तदेतदुच्यते पृथिव्या अग्नेश्चैनं दैवी वागाविशतीति । सा च दैवी वागनृतादिदोषरहिता सती यया वाचा दैव्या यद्यदेवाऽऽत्मने परस्मै वा वदति तत्तदमोघमेवाऽप्रतिबद्धाऽस्य वाग्भवतीत्यर्थः ॥ १८ ॥

पृथिव्यै वेत्यादिवाक्यावष्टम्भेन पक्षद्वयं प्रतिक्षिप्य पदक्षराणि व्याचष्टे—पृथिव्या इति । एनमित्युक्तमनूद्य व्याकरोति—एनमिति । कथं पुनः तूष्णीम्भूता वागुपरतकर्माविशति तत्राऽऽह—सर्वेषां हीति । तर्हि तयोरभेदादविदुषोऽपि स्यादेव वागिति विदुषि विशेषो नास्तीत्याशङ्क्याऽऽह—सा हीति । दैव्यां वाचि

---

१ ज. °र्यकार° । २ ग. छ झ. °चिद्ब्रा° । ३ ज. यन्तव्यं पु° । ४ ग. झ. °ज्ञान° । ५ च. ढ. °लेप्रद° । ६ ख. ढ °मित्युक्तं । ७ ख. ढ. °दात्तिरे° । ८ घ. °ति । नेवा° । ९ क. °र्यकार° । १० ढ. °णत्वश्र° । ११ ख. ढ. °त्रातिः फ° । १२ क. °मैं पितरं क° । १३ च. °द्वाऽवि° । १४ ग. वे ।

दोषविगममुत्तरवाक्येन (ण) सोपपादयति—सा चेति । विद्वद्वाचः स्वरूपं संक्षिपति—अमोघेति ॥ १८ ॥

दिवश्चैनमादित्याच्च देवं मन आविशति तद्वै देव मना येनाऽऽनन्द्येव भवत्यथो न शोचति ॥ १९ ॥

तथा दिवश्चैनमादित्याच्च देवं मन आविशति । तच्च देव मनः स्वभावनिर्मलत्वात् । येन मनसाऽसावानन्द्येव भवति सुख्येव भवत्यथो अपि न शोचति शोकादिनिमित्तासंयोगात् ॥ १९ ॥

वाचि दर्शितन्यायं मनस्यतिदिशति—तथेति । यन्मनः स्वभावनिर्मलत्वेन दैवमित्युक्तं तदेव विशिनष्टि—येनेति । असाविति विद्वदुक्तिः । येन मनसा विद्वान् शोचत्यपि तद्धि स्वभावात्तद्दैवमिति पूर्वेण संबन्धः ॥ १९ ॥

अद्भ्यश्चैनं चन्द्रमसश्च दैवः प्राण आविशति स वै देवः प्राणो यः संचरंश्चासंचरंश्च न व्यथतेऽथो न रिष्यति सं एवंवित्सर्वेषां भूतानामात्मा भवति यथैषा देवतैवꣳ स यथैतां देवतां सर्वाणि भूतान्यवन्त्येवꣳ हैवंविदꣳ सर्वाणि भूतान्यवन्ति । यदु किंचेमाः प्रजाः शोचन्त्यमेवाऽऽसां तद्भवति पुण्यमेवामुं गच्छति न ह वै देवान्पापं गच्छति ॥ २० ॥

तथाऽद्भ्यश्चैनं चन्द्रमसश्च देवः प्राण आविशति । स वै देवः प्राणः किंलक्षण इत्युच्यते—यः संचरन्प्राणिभेदेष्वसंचरन्समष्टिव्यष्टिरूपेणाथवा संचरञ्जङ्गमेष्वसंचरन्स्थावरेषु न व्यथते न दुःखनिमित्तेन भयेन युज्यते । अथो अपि न रिष्यति न विनश्यति न हिंसामापद्यते । स यो यथोक्तमेवं वेत्ति व्यन्नात्मदर्शनं सं सर्वेषां भूतानामात्मा भवति सर्वेषां भूतानां प्राणो भवति सर्वेषां भूतानां मनो भवति सर्वेषां भूतानां वाग्भवतीत्येवं सर्वभूतात्मतया सर्वज्ञो भवतीत्यर्थः । सर्वत्रुच्च । यथैषा पूर्वसिद्धा हिरण्यगर्भदेवतैवमेव नास्य सर्वज्ञत्वे सर्व-

---

१ घ. ज. शोकनि°. २ ङ. 'त्तासङ्गया° । ३ घ ढ. ण. °र्शितं न्या° । ४ ङ. ञ. य ए° । ५ ग. ङ. ज. झ. वेत्यन्ना° । ६ ग ङ च. सर्वे° । ७ क. ग घ च. छ. ज. झ. ति वा° । ८ ग. °वैकर्तृत्वे वा ।

कृत्वे वा क्वचित्प्रतिघातेः । स इति दार्ष्टान्तिकनिर्देशः । किंच यथैतां हिरण्यगर्भदेवतामिज्यादिभिः सर्वाणि भूतान्यवन्ति पालयन्ति पूजयन्त्येवं हैवंविदं सर्वाणि भूतान्यवन्तीज्यादिलक्षणां पूजां सततं प्रयुञ्जत इत्यर्थः ।

मैनस्वुकं न्यायं प्राणेऽतिदिशति—तथेति । तमेव देवं प्राणं प्रश्नपूर्वकं प्रकटयति—स वा इति । स एवंविदित्यादि व्याचष्टे—स य इति । विदिरत्र लाभार्थः । न केवलं यथोक्तमेव विद्याफलं किंतु फलान्तरमप्यस्तीत्याह—किंचेति ।

अथेदमाङ्क्ष्यते—सर्वप्राणिनामात्मा भवतीत्युक्ते तस्य च सर्वप्राणिकार्यकरणात्मत्वे सर्वप्राणिसुखदुःखैः संबध्येतेति । तन्न । अपरिच्छिन्नबुद्धित्वात् । परिच्छिन्नात्मबुद्धीनां ह्याकाशादौ दुःखसंबन्धो दृष्टोऽनेनाहमाकृष्ट इति । अस्य तु सर्वात्मनो य आकृश्यते यश्चाऽऽकाशति तयोरात्मत्वबुद्धिविशेषाभावान्न तान्निमित्तं दुःखमुपपद्यते । मरणदुःखवच्च निमित्ताभावात् । यथा हि कस्मिंश्चिन्मृते कस्यचिद्दुःखमुत्पद्यते ममासौ पुत्रो भ्राता चेति पुत्रादिनिमित्तम् । तन्निमित्ताभावे तन्मरणदर्शिनोऽपि नैव दुःखमपजायते । तथेश्वरस्याप्यपरिच्छिन्नात्मनो ममैतवतादिदुःखनिमित्तमिथ्याज्ञानादिदोषाभावान्नैव दुःखमुपजायते । तदेतदुच्यते—यद् किंच यत्किंचेमाः प्रजाः शोचन्त्यमैव सहैव प्रजाभिस्तच्छोकादिनिमित्तं दुःखं संयुक्तं भवत्यासां प्रजानां परिच्छिन्नबुद्धिजनितत्वात् । सर्वात्मनस्तु केन सह किं संयुक्तं भवेद्वियुक्तं वा । अयं तु प्राजापत्ये पदे वर्तमान पुण्यमेव शुभमेव फलमभिप्रेतं पुण्यमिति निरतिशयं हि तेन पुण्यं कृतं तेन तत्फलमेव गच्छति न ह वै देवान्पापं गच्छति पापफलस्यावसराभावात्पापफले दुःखं न गच्छतीत्यर्थः ॥ २० ॥

सर्वभूतात्मत्वे तद्दोषयोगात्प्राजापत्यं पदमनादेयमित्युत्तरार्कव्याख्यानाय शङ्कामाह—अथेति । सर्वप्राणिसुखदुःखैरित्यस्मादूर्ध्वं सशब्दोऽध्याहर्तव्यः । सर्वात्मके विदुषि चैकैकभूतनिष्ठदुःखयोगो नास्तीत्युत्तरमाह—तन्नेति । तदेव प्रा-

---

१ क. ख. ग. ङ. च. छ. ज. झ. ढ. °तः । किंच स । क. ख. ग. ङ. च. छ. ज. झ. ढ. °ति दृष्टान्तनि° । ३ क. ख. ग. ङ. च. छ. ज. झ. ढ. °श. । य° । ४ ज. °र्यकार° । ५ क °त्मकत्वे । ६ क. ख. ग. च. छ. झ ढ. °बध्यत इति । ७ ज. °न्वो युक्तोऽन° । ८ क. ग. ढ. °मता° । ९ क. घ. ञ. ण. °ष्टदोषया° ।

श्रयति—परिच्छिद्येति । अपरिच्छिन्नवीर्यत्वेऽपि तूष्णीत्मके विदुषि सर्वभूतात्मभावाच्चदुःखादियोगः स्यादेवेत्याशङ्क्य जठरकुहरविपरिवर्तिकिमिविषयैरस्याङ्गमर्दसर्वात्मकतेऽपि संबन्धाभेदमित्यभिप्रेत्याऽऽह—मरणेति । नोपपद्यते विदुषो दुःखमिति पूर्वेण संबन्धः । दृष्टान्तं विवृणोति—यथेति । भेदस्य स्वहस्ताद्यभिमानवतस्तदुःखादियोगवद्विदुषः तूष्णात्मनः स्वांशभूतसर्वभूतात्मभावाभिमानिनस्तदुःखादियोगः स्यादित्याशङ्क्य दार्ष्टान्तिकमाह—तथेति । ममैतद्वतादीत्यादिदेहेनाहंतामहणं तदेव दुःखनिमित्तं मिथ्याज्ञानम् । आदिशब्देन रागादिग्रहः । उक्तेऽर्थे श्रुतिमेव पर्यं व्याचष्टे—तदेनदिति । मृत्युमेव गच्छतीति संबन्धः । क्रतुरूपेण वर्तमानस्य कथं कर्मसंबन्धः स्यादित्याशङ्क्याऽऽह—फलमिति । क्रतुमेव व्यनक्ति—निरतिशयं हीति ॥ २० ॥

त एते सर्व एव समाः सर्वेऽनन्ता इत्यविशेषेण वाङ्मनःप्राणानामुपासनमुक्तं नान्यमतगतो विशेष उक्तः । किमेवमेव प्रतिपत्तव्यं किं वा विचार्यमाणे कश्चिद्विशेषो व्रतमुपासनं प्रति प्रतिपत्तुं शक्यत इत्युच्यते ।

> अथातो व्रतमीमाꣳसा प्रजापतिर्ह कर्माणि सस्रजे तानि सृष्टान्यन्योन्येनारुपर्धन्त वदिष्याम्येवाहमिति वाग्वदते द्रक्ष्याम्यहमिति चक्षुः श्रोष्याम्यहमिति श्रोत्रमेवमन्यानि कर्माणि यथाकर्म तानि मृत्युः श्रमो भूत्वोपयेमे ताभ्याप्नोत्तान्याप्त्वा मृत्युरवारुन्ध तस्माच्छ्राम्यत्येव वाक्श्राम्यति चक्षुः श्राम्यति श्रोत्रमथेममेव नाऽऽप्नोद्योऽयं मध्यमः प्राणस्तानि ज्ञातुं दध्रिरे । अयं वै नः श्रेष्ठो यः संचरꣳश्चासंचरꣳश्च न व्यथतेऽथो न रिष्यति हन्तास्येव सर्वे रूपमसामेति त एतस्यैव सर्वे रूपमभवꣳस्तस्मादेत एतेनाऽऽख्यायन्ते प्राणा इति तेन ह वाव तत्कुलमाचक्षते

---

१ घ. ङ. ञ. °र्तिकृमि° । २ घ. ञ. °वाग्वैव° । ३ ण. °मता° । ४ च. ढ. °णानां चोपास्यत्वमुक्तं । ५ घ. ज. °पास्यत्वमु° । ६ ग. घ ढ. °तिप° । ७ ख. च. ढ इत्यतोऽवान° । ८ ख. च. °माख्यायते ।

यस्मिन्कुले भवति य एवं वेद य उ हैवंविदा स्पर्धतेऽनुशुष्यत्यनुशुष्य ह्यैवान्ततो म्रियत इत्यध्यात्मम् ॥ २१ ॥

अथातोऽनन्तरं व्रतमीमांसोपासनकर्मविचारणे इत्यर्थः । एष प्राणानां कर्म व्रतत्वेन धारयितव्यमिति मीमांसा प्रवर्तते । तत्र प्रजापतिर्ह इशब्दः किलार्थे प्रजापतिः किल प्रजाः सृष्ट्वा कर्माणि करणानि वागादीनि कर्मार्थानि हि तानीति कर्माणीत्युच्यन्ते ससृजे सृष्टवान्वागादीनि करणानीत्यर्थः । तानि पुनः सृष्टान्यन्योन्येतरेतरमस्पर्धन्त स्पर्धां संघर्षं चक्रुः । कथम् । वक्ष्याम्यहमेव स्वव्यापाराद्व्यदनादनुपरतेवाहं स्यामिति वाग्व्रतं दधे धृतवती । यद्यन्योऽपि मत्समोऽस्ति स्वव्यापारादनुपरन्तुं शक्तः सोऽपि दर्शयत्वात्मना वार्यमिति । यथा द्रक्ष्याम्यहमिति चक्षुः श्रोष्याम्यहमिति श्रोत्रमेवमन्यानि कर्माणि करणानि यथाकर्म यद्यस्य कर्म यथाकर्म तानि करणानि मृत्युर्मारकः श्रमः श्रमरूपी भूत्वोपयेमे संजग्राह ।

अथेत्यादिवाक्यस्य पक्ष्यमाणेनासंबन्धादानर्थक्यमाशङ्क्य व्यवहितोपासनानुवादेन तदङ्गव्रतविधानार्थमुत्तर वाक्यमिति यानर्थक्यं परिहरति—त एत इत्यादिना । व्रतमित्यवश्यानुष्ठेयं कर्मोच्यते । जिज्ञास्यायाः सत्त्वमतःशब्दार्थः । उपासनोक्त्यानन्तर्यमथशब्दार्थं कथयति—अनन्तरमिति । विचारणामेव स्फोरयति—एषामिति । प्रवृत्तायां मीमांसायां प्राणव्रतमग्रत्वेन धारणीयमिति निर्धारणार्थमाख्यायिका प्रवर्तयति—तत्रेत्यादिना । कथं वागादिषु करणेषु कर्मशब्दप्रवृत्तिरित्याशङ्क्याऽऽह—कर्मार्थानीति । तदीयसूत्रेऽवयवमुपदर्शयितुं भूमिकां करोति—तानीति । तत्पर्यायकारं मन्त्रपूर्वं प्रकटयति—कथमित्यादिना । यथाकर्म स्वीयं स्वीयं व्यापारमनुसृत्य व्रतं दधिरे वागादीनि करणानीत्यर्थः ।

कथम् । तानि करणानि स्वव्यापारे प्रवृत्तान्याप्नोच्छ्रमरूपेणाऽऽत्मानं दर्शितवानाप्त्वा च तान्यवारुन्धावरोधं कृतवान्मृत्युः स्वकर्मभ्यः प्रच्यावितवानित्यर्थः । स्मादद्यत्वेऽपि वदन स्वकर्मणि प्रवृत्ता वाक्प्राम्यत्येव श्रमरूपिणा मृत्युना संयुक्ता प्रच्यवते । तथा श्राम्यति

१ क. ख. ङ. च. छ. ज ठ. ड °प्यहं । २ क ख °तस्योपासनस्य मी° । घ. च. ज. ढ. °तस्य मी° । ङ. °तस्य मीमांसा व्रतमी° । ३ च ढ. प्रजास्रष्टा क° । ४ घ. ज. यद्न्योऽ° । ५ क. छ °न्यान्यपि क° । ६ ग. ङ. °नि च य° । ७ ख. थ. ङ. च. छ. ज. झ. ढ. °यस्य । ८ घ. ङ. ज °ह स्वकर्मभ्यः प्रच्यावितवानित्यर्थः । क° ।

चक्षुः । आभ्याति श्रोत्रम् । अथेममेव मुख्यं प्राणं नाऽऽप्नोन्न प्राप्तवान्मृत्युः श्रमरूपी योऽयं मध्यमः प्राणस्तम् । तेनाद्यत्वेऽप्यश्रान्त एव स्वकर्मणि प्रवर्तते तानीतराणि करणानि तं ज्ञातुं दधिरे धृतवन्ति मनः । अयं वै नोऽस्माकं मध्ये श्रेष्ठः प्रशस्यतमोऽत्यधिको यस्माद्यः संचरंश्चासंचरंश्च न व्यथतेऽथो न रिष्यति हन्तेदानीमस्यैव प्राणस्य सर्वे वयं रूपमसाम प्राणमात्मत्वेन प्रतिपद्येमहि । एवं विनिश्चित्य त एतस्यैव सर्वे रूपमभवन्प्राणरूपमेवाऽऽत्मत्वेन प्रतिपन्नाः प्राणव्रतमेव दधिरेऽस्माद्व्रतानि न मृत्योर्वारणाय पर्याप्तानीति ।

प्रजापतेर्वागादिषु श्रमद्वारा स्वकर्मपच्युतिरासीदित्यत्र कार्यलिङ्गकमनुमानं प्रमाणयति–तस्मादिति । वागादीनां श्रमव्रतत्वनिर्धारणानन्तर्यमथशब्दार्थः । प्राजापत्ये प्राणे मृत्युग्रस्तत्वाभावे कार्यलिङ्गकमनुमानं सूचयति–तेनेति । प्रवर्तते प्राण इति संबन्धः । तथाऽपि कथं प्राणस्यैव व्रतं धार्यमित्यपेक्षायामाह–तानीति । ज्ञानार्थमनुसंधानप्रकारमेव दर्शयति अयमिति । तस्य श्रेष्ठत्वे फलितमाह–हन्तेति । इतिशब्दं व्याकरोति–एवं विनिश्चित्येति । अस्माकं वागादीनां व्रतानि मृत्योर्वारणाय न पर्याप्तानीति विनिश्चित्य दधिरे प्राणव्रतमेवेति संबन्धः ।

यस्मात्प्राणेन रूपेण रूपवन्तीतराणि करणानि चलनात्मना स्वेन च प्रकाशात्मना । न हि प्राणादन्यत्र चलनात्मकत्वोपपत्तिः । चलनव्यापारपूर्वकाण्येव हि सर्वदा स्वव्यापारेषु लक्ष्यन्ते । तस्मादेते वागादय एतेन प्राणाभिधानेनाऽऽख्यायन्तेऽभिधीयन्ते प्राणा इत्येवम् । य एवं प्राणात्मतां सर्वकरणानां वेत्ति प्राणशब्दाभिधेयत्वं च तेन ह वाव तेनैव विदुषा तत्कुलमाचक्षते लौकिकाः । यस्मिन्कुले स विद्वाञ्जातो भवति तत्कुलं विद्वान्नाम्नैव प्रथितं भवत्यमुष्येदं कुलमिति । यथा तापत्य इति । य एवं यथोक्तं वेद वागादीनां प्राणरूपतां प्राणात्मत्वं च तस्येतत्फलम् । किंच यः कश्चिदु हैवंविदा प्राणात्मदर्शिना स्पर्धते तत्प्रतिपक्षी सन्नोऽस्मिन्नेव शरीरेऽनुशुष्यति शोषमुपगच्छति । अनुशुष्य हैव शोषं गत्वैवान्ततोऽन्ते म्रियते न सहसाऽनुपद्रुतो म्रियत इत्येवमुक्त-

---

१ क. ग. °व. क° । २ घ. च. च. ज. ढ. °णि स प्र° । ३ क. प्रजापतेः । ४ घ. ज. °त्प्राणरू° । ५ क. °माख्यातमाच° । ख. ग ङ. °माख्यायत आच° । ६ क. °णस्वरू° । ७ ख, ग. ङ. छ, झ, ते प्रति° । ८ ख. ङ. च, ढ. °तो म्रि° ।

मध्यात्मं प्राणात्मदर्शनमित्युक्तोपसंहारोऽधिदैवंतप्रदर्शनार्थः ॥ २१ ॥

प्राणरूपत्वमुक्त्वा करणानां तच्चात्मत्वमाह –यस्मादिति । यस्मादित्यस्य तस्मादिति व्यवहितेन संबन्धः । प्राणरूपं चलनात्मत्वमिति कुतो निश्चीयते तत्राऽऽह–न हीति । तर्हि करणेषु प्रकाशात्मकत्वमेव न चलनात्मत्वमित्याशङ्क्याऽऽह–चलनेति । संपति विद्याफलमाह–य एवमिति । तदेव स्पष्टयति–यस्मिन्निति । तपती तपंसुता तस्या वंशस्तापत्यः । कस्येदं फलमित्युक्ते पूर्वोक्तमेव स्फुटयति–य एवमित्यादिना । न केवलं विद्याया यथोक्तमेव फलं किंतु फलान्तरमप्यस्तीत्याह–किंचेति । प्राणविदा सह स्पर्धा न कर्तव्येति भावः । इत्यध्यात्ममित्यस्याऽऽनर्थक्यमाशङ्क्याऽऽह–इत्येवमिति ॥ २१ ॥

> अथाधिदैवतं ज्वलिष्याम्येवाहमित्यग्निर्दध्रे तप्स्या-
> म्यहमित्यादित्यो भास्याम्यहमिति चन्द्रमा एव-
> मन्या देवता यथादैवतꣳ स यथैषां प्राणानां
> मध्यमः प्राण एवमेतासां देवतानां वायुर्श्लोचन्ति
> ह्यन्या देवता न वायुः सैषाऽनस्तमिता देवता
> यद्वायुः ॥ २२ ॥

अथानन्तरमधिदैवतं देवताविषयं दर्शनमुच्यते । कस्य देवताविशेषस्य व्रतधारणं श्रेय इति मीमांस्यते । अध्यात्मवत्सर्वं ज्वलिष्याम्येवाहमित्यग्निर्दध्रे । तप्स्याम्यहमित्यादित्यः । भास्याम्यहमिति चन्द्रमाः । एवमन्या देवता यथादैवतम् । सोऽध्यात्मं वागादीनामेषां प्राणानां मध्ये मध्यमः प्राणो मृत्युनाऽनाप्तः । स्वकर्मणो न प्रच्यावितः स्वेन पाणव्रतेनाश्रमव्रतो यथैवमेतासामग्न्यादीनां देवतानां वायुरपि । श्लोचन्त्यस्तं यन्ति स्वकर्मभ्य उपरमन्ते यथाऽध्यात्मं वागादयोऽन्या देवता अग्न्याद्या न वायुरस्तं याति यथा मध्यमः प्राणोऽतः सैषाऽनस्तमिता देवता यद्वायुर्योऽयं वायुः । एवमध्यात्ममधिदैवं च मीमांसित्वा निर्धारितं प्राणवाग्व्यात्मनोर्व्रतमभ्यमिति ॥२२॥

---

१ क. ग. °वप्र° । २ ढ. स्फुटयति । ३ ग. ज. °दैवं ज्व° । ४ क. ढ. °ता विद्युदादिरूपा य° । ५ क. घ. च. ज. झ. °म् । स दृष्टान्तोऽध्या° । ख. छ. ढ. °म् । स दृष्टान्तः सोऽध्या° । ६ घ. च. °वित इति स्वे° । ७ क. ख. घ. ङ. च. छ. ज. झ. ढ. °तं वाग्व्यात्मनो व्रत° ।

अध्यात्मदर्शनमुक्त्वाऽधिदैवतदर्शनं वक्तुमान्तरवाक्यमवतारयति—अथेति। तर्हि ज्वलिष्यामीत्यादि किमर्थमित्याशङ्क्य ऽऽह—कस्येति। यदिष्यमित्यादावुक्तं व्याख्यानमिहापि द्रष्टव्यमित्याह—आत्मवादिति। यथादैवतं स्वं देवता-व्यापारमतिक्रम्यान्या देवता विद्युदाद्या दधिरे व मित्यर्थः। स यथेत्यादि व्याचष्टे—सोऽध्यात्मामिति। वायु पि मत्युनाऽऽप्तः स्वकर्मणो न प्रच्यावितः स्वेन वायुव्रतेनाभ्यव्रत इति शेषः। तदेव साधयति—श्लोचन्तीति। वाक्यार्थ-मुक्तमर्थमुपसंहरति—एवमिति ॥ २२ ॥

अथैष श्लोको भवति यतश्चोदेति सूर्योऽस्तं
यत्र च गच्छतीति प्राणाद्वा एष उदेति
प्राणेऽस्तमेति तं देवाश्चक्रिरे धर्मꣳ स
एवाद्य स उ श्व इति यद्वा एतेऽमुर्ह्यघ्रियन्त
तदेवाप्यग्ना कुर्वन्ति। तस्मादेकमेव व्रतं
चरेत्प्राण्याच्चापान्याच्च नेन्मा पाप्मा मृत्यु-
राप्नुवादिति यद्यं चरेत्समाप्तिमेवैनेनो
एतस्यै देवतायै सायुज्यꣳ सलोकतां
जयति ॥ २३ ॥

इति प्रथमाध्याये पञ्चम ब्राह्मणम् ॥ ५ ॥

अथैतस्येवार्थस्य प्रकाशक एष श्लोको मन्त्रो भवति। यतश्च यस्माद्वायोरुदेत्युद्गच्छति सूर्योऽध्यात्मं च चक्षुरात्मना प्राणादस्तं च यत्र वायौ प्राणे च गच्छत्यपरसंध्यासमये स्वापसमये च पुरुषस्य तं देवास्तं धर्मं देवाश्चक्रिरे धृतवन्तो वागादयोऽग्न्यादयश्च प्राणव्रतं वायु-व्रतं च पुरा विचार्य च स एवायमद्यानीं श्वोऽपि भविष्यत्यपि कालेऽनु-वर्ततेऽनुवर्तिष्यते च देवैरित्यभिप्रायः। तत्रेमं मन्त्रं संक्षेपतो व्याचष्टे ब्राह्मणम्। प्राणाद्वा एष सूर्य उदेति प्राणेऽस्तमेति।

ब्राह्मणार्थदार्ढ्यार्थं मन्त्रमर्थतो व्याकरोति—अथेत्यादिना। सूर्योऽधिदैवं मुदयकाले वायोरुद्गच्छति। तत्र चापरसंध्यासमयेऽस्तं गच्छति। स एव चाध्यात्मं प्रबोधसमये चक्षुरात्मना प्राणादुदेति पुरुषस्य स्वापसमये च तस्मिन्ने-

---

१ क. घ. ञ. °ष्ट स दृष्टान्ताऽध्या°। २ क. घ. ञ. ण. °वित इति स्वे°। ३ ख. ग. घ. ङ. च. छ. ज. ट. °द्यच्चरे°। ४ ग. घ. ज. चक्षु°। ५ च. °स्तं य°। ६ ग. ज.

[illegible] दिमागः । शाकेरस्योत्तरार्धे प्राणादिब्राह्मणस्यवहितं [illegible] अथमंत्रयते–तं देवा इति । धारणस्य पक्षान्तरत्वात्तयोर्मध्ये [illegible] । त्रय एवेति धर्मस्कन्धाः । त्रयेति सप्तमी संपूर्णमन्त्रमधिकरोति । इमं मन्त्रमिति पूर्वार्धोक्तिः ।

तं देवाश्चाभिरक्षन्ति मा एवाद्य मा उ श्व इत्यस्य कोऽर्थ इत्युच्यते । [illegible] ते तस्मिन्पूर्वमस्मिन्काले वागादयोऽन्यादयश्च प्राणव्रतं वायुव्रतं वाग्व्रतमन्नव्रतं चक्षुर्व्रतं श्रोत्रव्रतं मनोव्रतं तदेवाद्यापि कुर्वन्त्यनुवर्तन्तेऽनुवर्तिष्यन्ते च व्रतं तैरन्यत्र वागादिव्रतमन्यादिव्रतं च तद्व्रतमेव । तेषामस्तमनकाले [illegible] चत्वौ प्राणश्चानिर्मोक्तदर्शनात् ।

उत्तरार्धस्य [illegible] व्याचष्टे तस्मिन्नित्यादिना । तैरनुवर्तनेन मीमांसितं तेऽनुगच्छन्तीत्यर्थः । विशेषणस्यार्थवत्त्वं साधयति–यस्मिन्निति ।

अथैतदन्यत्रोक्तम्–" यदा वै पुरुषः स्वपिति प्राणं तर्हि वाग्प्येवि प्राणं मनः प्राणं चक्षुः प्राणं श्रोत्रं यदा प्रबुध्यते प्राणादेवाधि पुनर्जायन्त इत्यध्यात्ममथाधिदैवं यदा वा अग्निरनुगच्छति वायुं तह्यनूद्वाति तस्मादेनमुदवासीदित्याहुर्वायुं ह्यनूद्वाति यदादित्योऽस्तमेवि वायुं तर्हि प्रविशति वायुं चन्द्रमा वायो दिशः प्रतिष्ठिता वायोरेवाधि पुनर्जायन्ते " इति ।

उक्तं हेतुमग्निरहस्यमाश्रित्य विशदयति–अथेति । यथाऽत्रेत्युपमार्थोऽथशब्दः अनुगच्छति शाम्यतीत्येतत् । वायुपनु तदधीन एव तस्मिन्काल उद्वात्यस्तमेति । उदवासीदस्तं गत इत्यर्थः । इतिशब्दोऽग्निरहस्यवाक्यसमाप्त्यर्थः ।

यस्मादेतदेव व्रतं वागादिष्वन्यादिषु चानुगतं यदेतद्वायोश्च प्राणस्य च परिस्पन्दात्मकत्वं मैत्रेर्देवैरनुवर्त्यमानं व्रतं तस्मादन्योऽप्येकमेव व्रतं चरेत् । किं तत्प्राण्यात्प्राणनव्यापारं कुर्यादपान्यादपानेनव्यापारं च । न हि प्राणापानव्यापारस्य प्राणापाननलक्षणस्योपरमोऽस्ति । तस्मात्तदेवैकं व्रतं चरेद्धित्वेन्द्रियान्तरव्यापारं नेन्मा मां पाप्मा मृत्युः श्रमरूप्याप्नुवदाप्नुयात् । नेच्छब्दः परिभये । यद्यहमस्माद्व्रतात्प्र-

---

१ ख. ढ. °कस्यापरा° । २ ख घ ढ ण °न व° । ३ क ख ग. ङ. ज. ढ. °तं तयोर्° । ४ घ. ङ. छ. ज. झ. निर्मुक्ति° । ५ ख. ढ ण °र्धव्रा° । ६ घ. °युं तर्ह्यनू° ७ ण. °मार्थेऽथ° । ८ अ. ण. °ग्निविषयवा° । ९ क °स्यविषयवा° । १० ग. °णव्या° ११ घ. घ. छ. ज. ढ. °नव्या° । १२ क. ख. घ. ङ. छ. झ. ढ. प्राणव्या° ।

च्युतः स्यां ग्रस्त एवाहं मृत्युनेत्येवं त्रस्तो धारयेत्प्राणव्रतमित्यभिप्रायः। यदि कदाचिदुं चरेत्प्रारभेत प्राणव्रतं समापिपयिषेत्समापयितुमिच्छेद्यदि ह्यस्माद्व्रतादुपरमेत्प्राणः परिभूतः स्याद्देवाश्च । तस्मात्समापयेदेव ।

अध्यात्मं प्राणव्रतमधिदैवं च वायुव्रतमित्येकमेव व्रतं धार्यमिति मन्त्रब्राह्मणाभ्यां प्रतिपाद्य तस्मादिति व्याचष्टे—यस्मादिति । न हि वागादयोऽन्यादृशो वा परिस्पन्दविरहिणः स्थातुमर्हन्ति तेन प्राणादिव्रतं तैरनुवर्त्यत एवेत्यर्थः। एकमेवेति नियमे प्राणव्यापारस्याभग्नत्वं हेतुमाह—नह्रीति । तदनुपरमे फलितमाह—तस्मादिति । ननु प्राणनाद्यभावे जीवनासंभवात्तस्याऽऽर्थिकत्वात्तदनुष्ठानमविवेयमित्याशङ्क्येवकारलभ्यं नियमं दर्शयति—हित्वेति । नेदित्यादिवाक्यस्याक्षरार्थमुक्त्वा तात्पर्यार्थमाह—यद्यहमिति । प्राणव्रतस्य सकृदनुष्ठानमाशङ्क्य सर्वेन्द्रियव्यापारनिवृत्तिरूपं संन्यासमाचरणमनुवर्तयेदित्याह—यदीति । विपक्षे दोषमाह—यदि ह्रीति । प्राणादिपरिभवपरिहारार्थं नियम निगमयति—तस्मादिति ।

तेन उ तेनानेन व्रतेन प्राणात्मप्रतिपत्त्या सर्वभूतेषु वागादयोऽन्यादृशश्च मदात्मका एवाहं प्राण आत्मा सर्वपरिस्पन्दकृदेवं तेनानेन व्रतचारणेनैतस्या एव प्राणदेवतायाः सायुज्य सयुग्भावमेकात्मत्वं सलोकतां समानलोकतां चैकस्थानत्वं विज्ञानमान्यापेक्षमेतज्जयति प्राप्नोतीति ॥ २३ ॥

इति बृहदारण्यकभाष्ये प्रथमाध्याये पञ्चमं ब्राह्मणम् ॥ ५ ॥

विद्याफलं वक्तुं भूमिकां करोति—तेनेति । व्रतमेव विशिनष्टि—प्राणेति । प्रतिपत्तिमेव प्रकटयति—सर्वभूतेष्विति । संपत्तिं विद्याफलं कथयति—एवमिति । कथमेकस्मिन्नेव विज्ञाने फलविकल्पः स्यादित्याशङ्क्य विज्ञानप्रकर्षापेक्षं सायुज्यं तन्निकर्षापेक्षं च सालोक्यमित्याह—विज्ञानेति ॥ २३ ॥

इति बृहदारण्यकभाष्यटीकायां प्रथमाध्याये पञ्चमं ब्राह्मणम् ॥ ५ ॥

(अथ प्रथमाध्यायस्य षष्ठं ब्राह्मणम्)।

त्रयं वा इदं नाम रूपं कर्म तेषां नाम्नां वागि-

---

१ क. ख. ग. घ ङ. च. ज. °दुच्चरं° । २ क. °देवतं च. । ३ ख. ग. तेन । ४ ख. छ. झ. °त्मकत्वं । ५ ख. ग. ङ. झ °प्नोति ।

त्येतदेषामुक्थमथो हि सर्वाणि नामान्युत्तिष्ठन्ति ।
एतदेषाꣳ सामैतद्धि सर्वैर्नामभिः सममेतदेषां ब्रह्मै-
तद्धि सर्वाणि नामानि बिभर्ति ॥ १ ॥

यदेतदविद्याविषयत्वेन प्रस्तुतं साध्यसाधनलक्षणं व्याकृतं जगत्प्राणात्मप्राप्त्यन्तोत्कर्षवदपि फलम् । या चैतस्य व्याकरणात्प्रागवस्थाऽव्याकृतशब्दवाच्या वृक्षबीजवत्सर्वमेतत्त्रयम् । किं तत्त्रयमित्युच्यते । नाम रूपं कर्म चेत्यनात्मैव नाऽऽत्मा यत्साक्षादपरोक्षाद्ब्रह्म । तस्मादस्माद्विरज्येतेत्येवमर्थस्त्वयं वा इत्याद्यारम्भः । न ह्यस्मादनात्मनोऽव्यावृत्तचित्तस्याऽऽत्मानमेव लोकमहं ब्रह्मास्मीत्युपासितुं बुद्धिः प्रवर्तते । बाह्यप्रत्यगात्मप्रवृत्त्योर्विरोधात् । तथा च काठके—

‘ पराञ्चि खानि व्यतृणत्स्वयंभू-
स्तस्मात्पराङ्पश्यति नान्तरात्मन् ।
काश्चिद्धीरः प्रत्यगात्मानमैक्ष-
दावृत्तचक्षुरमृतत्वमिच्छन् ” इत्यादि ।

प्रपञ्चितस्याविद्याकार्यस्य संक्षेपेणोपसंहारार्थं ब्राह्मणान्तरमवतारयति—तदेतदिति । फलमपि ज्ञानकर्मणोरुक्तविशेषणवद्यदेतत्प्रस्तुतमिति संबन्धः । अव्याकृतप्रक्रियायामुक्तं स्मारयति—या चेति । व्याकृताव्याकृतस्य जगतः संगृहीतं रूपमाह—सर्वमिति । वाङ्मनःप्राणाख्यं त्रयमिति शङ्कां प्रत्याह—किं तदित्यादिना । किमर्थः पुनरयमुपसंहार इत्याशङ्क्याऽऽह—अनात्मैवेति । आत्मशब्दार्थमाह—यत्साक्षादिति । अनात्मत्वेन जगतो हेयत्वं तच्छब्देन परामृश्यते । वैराग्यमपि किमर्थमित्याशङ्क्याऽऽह—न हीति । अविरक्तोऽपि कुतूहलितया तत्राधिकारी स्यादित्याशङ्क्याऽऽह—बाह्येति । अनात्मवेदनमप्यात्मानं प्रत्याययिष्यत्यात्मनः सर्वात्मत्वात्कुतो विरोध इत्याशङ्क्याऽऽह—तथेति । कथं तर्हि प्रत्यगात्मवीस्तत्राऽऽह—क श्चिदिति ।

कथं पुनरस्य व्याकृताव्याकृतस्य क्रियाकारकफलात्मनः संसारस्य नामरूपकर्मात्मकतैव न पुनरात्मत्वमित्येतत्संभावयितुं शक्यत इति

---

१ ग. °स्यादेतस्मा° । २ क. ख. ढ. °था का° । ३ ग ढ. °त्यादिः क. । ४ ख. ङ. हेयता । ५ क. ञ. ढ. °प्रमाण° ।

अत्रोच्यते—तेषां नाम्नां यथाऽन्यस्तानां वागिति शब्दसामान्यमुच्यते यः कश्च शब्दो वागेव सेत्युक्तत्वाद्वागित्येतस्य शब्दस्य योऽर्थः शब्दसामान्यमात्रमेतदेषां नामविशेषाणामुक्थं कारणमुषादानं सैन्धवलवणकणानामिव सैन्धवाचलस्तदाहातो ह्यस्मान्नाममसामान्यात्सर्वाणि नामानि यज्ञदत्तो देवदत्त इत्येवमादिप्रविभागान्युत्तिष्ठन्त्युत्पद्यन्ते प्रविभज्यन्ते लवणाचलादिव लवणकणाः। कार्यं च कारणेनाव्यतिरिक्तम्। तथा विशेषाणा च सामान्येऽन्तर्भावात्।

उपसंहारस्येत्थं सफलत्वेऽपि सर्वस्य जगतो नामादिमात्रत्वं प्रमाणाभावादयुक्तमिति शङ्कते—कथमिति। अनुमानेन तमाशयं दर्शयति—अत्रेति। तत्र तत्कार्यत्वहेतुकमनुमानमाह—तेषामिति। नामेत्येतदुक्थमिति संबन्धः। इन्द्रियव्यापारुत्यर्थं वाक्यदार्थमाह—शब्देति। संगृहीतमर्थं विवृणोति—यः कश्चेत्यादिना। उक्थत्वमुपपादयितुमुत्तरं वाक्यमित्याह—तदाहेति। कार्यकारणभावेऽपि किमायातमत आह—कार्यं चेति। सर्वे नामविशेषास्तन्मात्रात्तत्त्वतो न भिद्यन्ते तत्कार्यत्वाद्यद्यत्कार्यं तत्तो न भिद्यते यथा मृदो घट इत्यर्थः। सर्वे नामविशेषास्तत्सामान्ये कल्पिताः मृत्पिण्डकल्पनाविच्छेदादुच्छेदमनुविद्धसर्पादिवदित्यनुमानान्तरमाह—तथेति। कार्याणां कारणेऽन्तर्भाववदिति यावत्।

कथं सामान्यविशेषभावं इति। एतच्छब्दसामान्यमेषां नामविशेषाणां सामानाधिकरण्यात्सामानाधिकरण्यं सामान्यमित्यर्थः। एतद्धि यस्मात्सर्वैर्नामभिरात्मविशेषैः समम्। किंचाऽऽत्मलाभाविशेषाच्च नामविशेषाणाम्। यस्य च यस्मादात्मलाभो भवति स तेनाप्रविभक्तो दृष्टो यथा घटादीनां मृदा। नामविशेषाणामात्मलाभो वाच इत्युच्यते यत एतदेषा वाकशब्दवाच्यं वस्तु ब्रह्माऽऽत्मा। ततो ह्यात्मलाभो नाम्नां शब्दव्यतिरिक्तस्वरूपानुपपत्तेः। तत्प्रतिपादयत्येतच्छब्दसामान्यं हि यस्माच्छब्दविशेषान्सर्वाणि नामानि बिभर्ति धारयति स्वरूपप्रदानेन। एवं कार्यकारणत्वोपपत्तेः सामान्यविशेषोपपत्तेरात्मप्रदानोपपत्तेश्च नामविशेषाणां शब्दमात्रता सिद्धा। एवमुत्तरयोरपि सर्वं योज्यं यथोक्तम् ॥ १ ॥

---

१ क. ण. उक्तम्। २ घ. ङ. °कथम्। ३ ख. छ. °न्नात्वात्। ४ ख. ङ. °तो तत्त्वतो। ५ ख. ढ. °वत्। ६ ग. च. भावः। ए°। ७ ख. घ °त्सामा°। ८ ग. °मनाम। सा। ९ क. ङ. च. छ. झ. ढ. °नापि। १० ख °दादि तथा। क°। ११ क. च. वाच्य।

उक्तमेव प्रश्नपूर्वकं प्रपञ्चयति—कथमित्यादिना । सामत्वं साधयति—एतद्धीति । इतश्च नामविशेषा नाममात्रेऽन्तर्भवन्तीत्याह—किंचेति । नामविशेषाणां नाममात्रादात्मलाभात्तस्मादविशेषात्तत्रैवान्तर्भाव इत्यक्षरार्थः । सर्वे नामविशेषास्तत्सामान्यान्न पृथग्वस्तुतः सन्ति तेनाऽऽत्मवत्त्वाद्ये येनाऽऽत्मवन्तस्ते ततोऽन्ये वस्तुतो न सन्ति यथा मृदाऽऽत्मवन्तो घटादयो वस्तुतस्ततोऽन्ये न सन्तीत्युक्तेऽनुमाने व्याप्तिं साधयति—यस्य चेति । हेतुसमर्थनार्थमुत्तरं वाक्यमुत्थापयति—कथमित्यादिना । अतः शब्दमात्रात्तद्विशेषाणामात्मलाभो भवतीति शेषः । तत्रैव युक्तिमाह—ततो हीति । तत्रैव वाक्यमवतार्य व्याचष्टे—तदित्यादिना । तस्मात्तन्मात्रात्तद्विशेषाणामात्मलाभ इति वाक्यशेषः । प्रथमकण्डिकया सिद्धमर्थमुपसंहरति—एवमिति । उपपत्तित्रयमुत्तरवाक्यद्वयेऽपि तुल्यमित्यादिशति—एवमुत्तरयोरिति ॥ १ ॥

अथ रूपाणां चक्षुरित्येतदेषामुकथमतो हि सर्वाणि रूपाण्युत्तिष्ठन्त्येतदेषाꣳ सामैतद्धि सर्वै रूपैः सममेतदेषां ब्रह्मैतद्धि सर्वाणि रूपाणि बिभर्ति ॥ २ ॥

अथेदानीं रूपाणां सितासितप्रभृतीनां चक्षुरिति चक्षुर्विषयसामान्यं चक्षुःशब्दाभिधेयं रूपसामान्यं प्रकाश्यमात्रमभिधीयते । अतो हि सर्वाणि रूपाण्युत्तिष्ठन्त्येतदेषां सामैतद्धि सर्वै रूपैः सममेतदेषां ब्रह्मैतद्धि सर्वाणि रूपाणि बिभर्ति ॥ २ ॥

तत्र व्याख्यानसापेक्षाणि पदानि व्याकरोति—अथेत्यादिना । नामव्याख्यानान्वर्थमथशब्दार्थः । चक्षुरुकथमिति संबन्धः । चक्षुरिति चक्षुःशब्दाभिधेयं चक्षुर्विषयसामान्यमभिधीयते तच्च रूपसामान्यं तदपि प्रकाश्यमात्रमिति योजना ॥ २ ॥

अथ कर्मणामात्मेत्येतदेषामुकथमतो हि सर्वाणि कर्माण्युत्तिष्ठन्त्येतदेषाꣳ सामैतद्धि सर्वैः कर्मभिः सममेतदेषां ब्रह्मैतद्धि सर्वाणि कर्माणि बिभर्ति तदेतत्त्रयꣳ सदेकमयमात्माऽऽत्मो एकः सन्नेतत्त्रयं तदेतदमृतꣳ सत्येन च्छन्नं प्राणो वा अमृतं नामरूपे सत्यं ताभ्यामयं प्राणश्छन्नः ॥ ३ ॥

---

१ ख. ढ. °लाभो भवतीति । २ क. ख घ ङ. च. छ. झ. ढ °मान्यमात्रं प्र° । ३ झ. °यत एतदेषामुकथम् । अ° ।

इति प्रथमाध्याये षष्ठं ब्राह्मणम् ॥ ६ ॥
इति बृहदारण्यकोपनिषदि प्रथमोऽध्यायः ॥ १ ॥
बृहदारण्यकक्रमेण तृतीयोऽध्यायः ॥ ३ ॥

अथेदानीं सर्वकर्मविशेषाणां मननदर्शनात्मकानां चलनात्मकानां च क्रियासामान्यमात्रेऽन्तर्भाव उच्यते । कथं, सर्वेषां कर्मविशेषाणामात्मा शरीरं सामान्यमात्माऽऽत्मनः कर्माऽऽत्मेत्युच्यते । आत्मना हि शरीरेण कर्म करोतीत्युक्तम् । शरीरे च सर्वं कर्माभिव्यज्यते । अतस्तात्स्थ्यात्तच्छब्दं कर्म कर्मसामान्यमात्रं सर्वेषामुक्थमित्यादि पूर्ववत् ।

रूपप्रकरणानन्तर्यमथेत्युच्यते । क्रियाविशेषाणां क्रियामात्रेऽन्तर्भावं प्रश्नद्वारा स्फोरयति—कथमित्यादिना । आत्मशब्देनात्र शरीरनिर्वर्त्यग्रहणे पुरुषविधब्राह्मणशेषमनुकूलयति—आत्मना हीति । तत्रैवोपपत्तिमाह— शरीरे चेति । तथाऽपि कथमात्मशब्दः शरीरनिर्वर्त्ये कर्म ब्रूयादित्याशङ्क्य लक्षणयेत्याह—अत इति ।

तदेतद्यथोक्तं नाम रूपं कर्म त्रयमितरेतराश्रयमितरेतरात्मिकाऽत्मिकारणमितरेतरप्रलयं संहतं त्रिदण्डविष्टम्भवत्सदेकम् । केनाऽऽत्मनैकत्वमित्युच्यते । अयमात्माऽयं पिण्डः कार्यकरणात्मसंघातस्तथाऽन्नमये व्याख्यात एतन्मयो वा अयमात्मेत्यादिना । एतावद्वीदं सर्वं व्याकृतमव्याकृतं च यदुत नाम रूपं कर्मेत्यात्मा उ एकोऽयं कार्यकरणसंघातः सन्नध्यात्माधिभूताधिदैवभावेन व्यवस्थितमेतदेव अयं नाम रूपं कर्मेति ।

संक्षेपस्यापि संक्षेपान्तरमाह—तदेतदिति । तदेतत्त्रयं त्रिदण्डविष्टम्भवत्संहतं सदेकमिति संबन्धः । कथं पुनस्त्रयमात्मा आह—इतरेतराश्रयमिति । रूपं विषयमाश्रित्य नामकर्मणी विज्ञानः स्वातन्त्र्येण निर्विषययोस्तयोः सिद्धयदर्शनान्नामकर्मणी चाऽऽश्रित्य रूपं सिध्यति । न हि ते हित्वा किंचित्कुत्रचन इत्यर्थः ।

---

१ घ. छ झ. त्माऽऽत्म । २ ङ. °रीरमात्म° । ३ ज. कमत्यु° । ४ ख. ढ. °शब्देन शं° । घ. शब्देना । श° । ५ स. घ. ङ. च छ ज झ ढ. रूपक° । ६ घ. ज. °तं सहत्रिद° । ७ घ. °वद° । ८ घ. ज. °योऽऽत्मा° । ९ ख घ. °त्मा पि° । १० क. ग. झ. र्यकार° । ११ ग. ज. °र्यकार° ।

वाक्येन वाच्यस्य तेनेतरस्य ताभ्यां च क्रियात्मिकाभ्यां तयोरेवादर्शनाद्व्यतिरेकमभिप्रेत्याऽऽह—इतरेतरेति । सति नाम्नि रूपसंहारदर्शनाद्रूपे च सति नामसंहारदर्शनात् सतोश्च तयोः कर्मणस्तृतीयस्य सति तयोरुपसंहारोपलम्भादितरेतरप्रलयमित्याह—इतरेतरप्रलयमिति । त्रयाणामेकत्वं विरुद्धमिति शङ्कित्वा परिहरति—केनेत्यादिना । कथं कार्यकरणसंघातात्मना त्रयाणामेकत्वं तत्राऽऽह—तथेति । नामरूपकर्मणां कार्यकरणसंघातमात्रत्वेऽपि तेषां व्यतिरिक्तं संघातादन्यत्स्यादित्याशङ्क्याऽऽह—एतावदिति । नामादित्रयस्य संघातमात्रत्वे कथं व्यवहारासांकर्यमित्याशङ्क्याऽऽह—आत्मेति संघातोऽयमात्मशब्दितः स्वयमेकोऽपि सन्नध्यात्मादिभेदेन स्थितं त्रयमेव भवतीति व्यवहारासांकर्यमित्यर्थः ।

तदेतद्वक्ष्यमाणम् । अनृतं सत्येन च्छन्नमित्यतस्य वाक्यस्यार्थमाह—प्राणो वा अमृतं कार्यात्मकोऽन्तरुपलम्भक आत्मभूतोऽमृतोऽविनाशी । नामरूपे सत्यं कार्यतिरेकि शरीरावस्थं क्रियात्मकस्तु प्राणस्तयोरुपलम्भको बाह्याभ्यां शरीरात्मकाभ्यामुपजनापायधर्मिभ्यां सत्याभ्यां छन्नोऽप्रकाशीकृतः । एतदेव संसारमोक्षतत्त्वमविद्याविषयं प्रदर्शितम् । अत ऊर्ध्वं विद्याविषय आत्माऽधिगन्तव्य इति चतुर्थं आरभ्यते ॥ ३ ॥

इति बृहदारण्यकभाष्ये प्रथमाध्याये षष्ठं ब्राह्मणम् ॥ ६ ॥

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीशंकरभगवतः कृतौ बृहदारण्यकभाष्ये प्रथमोऽध्यायः ॥ १ ॥

एकस्मिन्नपि संघाते कारणरूपेणावान्तरविभागमाह—तदेतदिति । आत्मभूतत्वस्वोपाधित्वेन स्थित इति यावत् । अविनाशी स्थूलदेहे गच्छत्यपि यावन्मोक्षं न गच्छतीत्यर्थः । सच्च त्यच्च सत्यं भूतपञ्चकं तदात्मके नामरूपे इत्याह—नामेति । कारणयाथात्म्यं कथयति—क्रियात्मकस्त्विति । पञ्चीकृतपञ्चमहाभूतात्मकं तत्कार्यं सर्वं सच्च त्यच्चेति व्युत्पत्तेः सत्यं वैराजं शरीरं कार्यमपञ्चीकृतपञ्चमहाभूततत्कार्यात्मककरणरूपसप्तदशकालिङ्गस्य सूत्राख्यस्याऽऽयतनं तस्यैवाऽऽच्छादकं तत्त्वतोऽनात्मापि स्थूलदेहच्छन्नत्वाद्दुर्विज्ञानं तेनापिच्छन्नं प्रत्यग्वस्तु सुतरामिति तज्ज्ञानेऽवहितैर्भाव्यमिति भावः । इदानीमविद्याकार्य-

---

१ ख. ढ. ण. °तोऽपि व्य° । २ क. ग. म्भनकर्मांऽऽत्म° । ३ घ. ज. °त्मकश° । ४ क. °सत्त्व° । ङ. °सत्यत्वमविद्यादिविष° । ढ. °सत्तत्त्व° । ५ ञ. ण. तत्तत्त्व° ।

प्रपञ्चमुपसंहरति—एतदिति । अविद्याविषयविवरणस्य वक्ष्यमाणोपयोगमुपसंहरति—अत इति । प्रपञ्चिते सत्यविद्याविषये ततो विरक्तस्याऽऽत्मानं विविदिषोत्पन्नापनार्थं चतुर्थमुक्तः संदर्भो भविष्यति । तस्मादविद्याविषयविवरणमुपयोगीति भावः ॥ ३ ॥

इति बृहदारण्यकभाष्यटीकायां षष्ठं ब्राह्मणम् ॥ ६ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगुद्धानन्दपूज्यपादशिष्येण भगवदानन्दज्ञानेन कृतायां बृहदारण्यकोपनिषद्भाष्यटीकायां प्रथमोऽध्यायः ॥ १ ॥

अथ द्वितीयाध्यायस्य प्रथमं ब्राह्मणम् ।

आत्मेत्येवोपासीत तदन्वेषणे च सर्वमन्विष्टं स्यात्तदेव चाऽऽप्तमतस्त्वं सर्वस्मात्प्रेयस्त्वादन्वेष्टव्यम् । आत्मानमेवावेदहं ब्रह्मास्मीत्यात्मतत्त्वमेकं विद्याविषयः । यस्तु भेददृष्टिविषयः सोऽन्योऽसावन्योऽहमस्मीति न स वेदेत्यविद्याविषयः ।

तृतीयेऽध्याये सूचितविद्याविद्ययोरविद्या प्रपञ्चिता, संप्रति विद्यां प्रपञ्चयितुं चतुर्थमध्यायमारभमाणो वृत्तं कीर्तयति—आत्मेति । किमित्यर्थान्तरेषु सत्स्वात्मतत्त्वमेवानुसंधातव्यं तत्राऽऽह—तदन्वेषणे चेति । तस्यैवान्वेष्टव्यत्वे परमेष्वास्पदत्वेन परमानन्दत्वं हेत्वन्तरमाह—तदेवेति । आत्मतत्त्वज्ञानस्य सर्वापत्तिफलत्वाच्च तदेवान्वेष्टव्यमित्याह—आत्मानमिति । उक्तया परिपाट्या सिद्धमर्थं संगृह्णाति—आत्मतत्त्वमिति । उक्तमर्थान्तरमनुवदति—यस्त्विति । सोऽविद्याविषय इति संबन्धः । कथं भेददृष्टिविषयस्याविषयत्वं तत्राऽऽह—अन्योऽसाविति । यो भेददृष्टिपरः स न वेदेत्यविद्या तद्दृष्टिमूलं सूचिता तेन तद्विषयो भेददृष्टिविषय इत्यर्थः ।

" एकधैवानुद्रष्टव्यम् " " मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति " इत्येवमादिभिः प्रविभक्तौ विद्याविद्याविषयौ सर्वोपनिषत्सु । तत्र चाविद्याविषयः सर्व एव साधनादिभेदविशेषविनियोगेन व्याख्यात आ तृतीयाध्यायपरिसमाप्तेः । स च व्याख्यातोऽविद्याविषयः सर्व एव द्विप्रकारः । अन्तः प्राण उपष्टम्भको गृहस्थेव स्तम्भादिलक्षणः प्रकाशकोऽमृतः । बाह्यश्च कार्यलक्षणोऽप्रकाशक उपजनापायधर्मकस्तृणकृशमृत्तिकासमो गृहस्थेव सत्यशब्दवाच्यो मर्त्यः । तेषामुतशब्दवाच्यः प्राणश्छन्न इति चोपसंहृतम् ।

---

१ ख, घ. ङ, °वार्षिक° । २ ख. ण. °नुद्रवति । ३ क. ग. °त्र च योऽवि° । ४ क. ग. स सर्व ।

कथं यथोक्ता विद्याविद्याविषयावसंकीर्णावेवसातुं शक्येते तत्राऽऽह—एकधेति। सप्ताग्नब्राह्मणे वृत्तमर्थं कथयति—तत्र चेति। विद्याविद्याविषयसारिविभावत्। आदिपदं साध्यसाधनान्तरभेदसंग्रहार्थम्। यथोक्तो भेद एव विशेषः। तस्मिन्निनियोगो व्यवस्थापनं तेनत्यर्थः। उपसंहारब्राह्मणान्ते वृत्तमनुभाषते—स चेति। अथवोक्तो विद्याविद्याविषयौ कथमसंकीर्णौ मन्तव्यावित्याशङ्क्याऽऽह—एकधेति। तत्रोत्तरग्रन्थस्य विषयपरिशेषार्थं पुरुषविधब्राह्मणशेषमारभ्योक्तं दर्शयति—तत्र चेति। तर्हि समाप्तत्वाद्विद्या विषयस्य कथमविदुषो गार्ग्यस्य प्रवृत्तिरित्याशङ्क्य तदर्थमवान्तरविभागमनुवदति—स चेति। तावेव प्रकारौ दर्शयन्नादौ सूक्ष्मं शरीरमुपन्यस्यति—अन्तरिति। तस्य बाह्यकरणद्वारा स्थूलेषु विषयेषु प्रकाशकत्वममृतत्वं च व्युत्पादितम्। द्वितीयं प्रकारमाचक्षाणः स्थूलं शरीरं दर्शयति—बाह्यश्चेति। तस्य कयाऽपि विधया सूक्ष्मदेहं प्रत्यप्रकाशकत्वादप्रकाशकत्वम्। आगमापायित्वेनावहेयत्वं सूचयति—उपजनेति। यथा गृहस्य तृणादि बहिरङ्गं तथा सूक्ष्मस्य देहस्य स्थूलो देहस्तथाऽपि तृणादिं विना गृहस्य व्यवहारायोग्यत्ववत्तस्यापि स्थूलदेहं विना न तद्योग्यत्वमिति मत्वाऽऽह—तृणेति। तस्य पूर्वप्रकरणान्ते नामरूपे सत्त्यमित्यत्र प्रस्तुतत्वमस्तीत्याह—सत्येति। सर्वथा बाधवैधुर्यं सत्यत्वमिति शङ्कां निरसितुं विशिनष्टि—मर्त्य इति। तस्य कार्यं दर्शयति—तेनेति।

स एव च प्राणो बाह्याधारभेदेष्वनेकधा विस्तृतः। प्राण एको देव इत्युच्यते। तस्यैव बाह्यः पिण्ड एकः साधारणो विराड्वैश्वानर आत्मा पुरुषविधः प्रजापतिः को हिरण्यगर्भ इत्यादिभिः पिण्डप्रधानैः शब्दैराख्यायते सूर्यादिप्रविभक्तकरणः। एकं नानेकं च ब्रह्मैतावदेव मातः परमस्ति प्रत्येकं च शरीरभेदेषु परिसमाप्तं चेतनावत्कर्तृ भोक्तृ चेत्यविद्याविषयमेवाऽऽत्मत्वेनोपगतो गार्ग्यो ब्राह्मणो वक्तोपस्थाप्यते। तद्विपरीतात्मदृगजातशत्रुः श्रोता।

वृत्तमनूद्याजातशत्रुब्राह्मणमवतारयति—स एवेति। आदित्यचन्द्रादयो बाह्याधारभेदा अनेकधात्वमतिष्ठा मूर्वेत्यादिवक्ष्यमाणगुणवशाद्द्रष्टव्यम्। कथं तर्हि तस्यैकत्वं तत्राऽऽह—प्राण इति। प्राणस्य नानात्वमेकत्वं चोक्तं तत्रैकत्वं विवृणोति—तस्यैवेति। प्राणस्यैव स्वभावभूतोऽनात्मलक्षणः पिण्डः समष्टिरूपो हिरण्यगर्भादिशब्दैरुपाधिविषयैस्तत्र तत्र श्रुतिस्मृत्योरुच्यते। स च "अग्नि-

१ ख. ढ. °वगन्तुं श°। २ क. °दिना वि°। ३ घ. °र्वब्राह्मणा°। ४ ग. घ. ङ. ज. °धानश। ५ ख. ढ °विशेषस्त°।

मूर्धा चक्षुषी चन्द्रसूर्यौ " इत्यादिश्रुतेः सूर्यादिभिः पविभक्तैः करणैरुपेतो भवतीत्यर्थः । यद्ब्रह्म समस्तं व्यस्तं च तदिदं हिरण्यगर्भमात्रमेव न तस्मादधिकमस्तीति हिरण्यगर्भं स्तौति-एकं चेति । एकत्वं विशदीकृत्य प्राणस्य नानात्वं विशदयति-प्रत्येकं चेति । गोत्वादिसामान्यतुल्यतां व्यावर्तयति-चेतनाश्चेति । केवलभोक्तृत्वपक्षं वारयति-कर्त्रीति । वक्ता पूर्वपक्षवादीति यावत् । तस्मादसुरूपाद्ब्रह्मणो विपरीतं मुरूपं ब्रह्म तस्मिन्नात्मदृष्टी राजा श्रोता सिद्धान्तवादीत्यर्थः ।

एवं हि यतः । पूर्वपक्षसिद्धान्ताख्यायिकारूपेण समर्प्यमाणोऽर्थः श्रोतुश्चित्तस्य वशमेति । विपर्यये हि तर्कशास्त्रवत्केवलार्थानुगमवाक्यैः समर्प्यमाणो दुर्विज्ञेयः स्यादत्यन्तसूक्ष्मत्वाद्ब्रह्मणः । तथा च काठके-" श्रवणायापि बहुभिर्यो न लभ्यः " इत्यादिवाक्यैः सुसंस्कृतदेवबुद्धिगम्यत्वं सामान्यमात्रबुद्ध्यगम्यत्वं च सप्रपञ्चं दर्शितम् । आचार्यवान्पुरुषो वेद " " आचार्याद्धैव विद्या " इति च च्छान्दोग्ये । " उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः " इति च गीतासु । इहापि च शाकल्ययाज्ञवल्क्यसंवादेनातिगह्वरत्वं महता संरम्भेण ब्रह्मणो वक्ष्यतीति । तस्माच्छिष्ट एवाऽऽख्यायिकारूपेण पूर्वपक्षसिद्धान्तरूपमापाद्य वस्तुसमर्पणार्थ आरम्भ ।

किमिति वक्तृश्रोतृरूपाख्यायिका प्रणीयते तत्राऽऽह--एवं हीति । एवंशब्दार्थमेव स्फुटयति--पूर्वपक्षेति । अतो भवितव्यमाख्यायिकयेति शेषः । आख्यायिकानङ्गीकारे दोषमाह-विपर्यये हीति । यथा तर्कशास्त्रेण समर्प्यमाणोऽर्थो ज्ञातुं न शक्यत औत्पेक्षिकतर्कणां निरङ्कुशत्वात्तथा केवलमर्थोऽनुपन्यस्यते प्रश्नप्रतिवचनभावरहितैर्वाक्यैस्तैः समर्प्यमाणोऽपि दुर्विज्ञेयोऽर्थः स्यादतश्चाख्यायिका नानुश्रीयते तेन सा सुखप्रतिपत्त्यर्थमनुसर्तव्येत्यर्थः । कुतो दुर्विज्ञेयत्वं तत्राऽऽह--अत्यन्तेति । यथोक्तस्य वस्तुनो दुर्विज्ञेयत्वे श्रुतिस्मृतिसिद्धत्वं दर्शयति--यथा चेति । सुसंस्कृता परिशुद्धा देवबुद्धिः सात्त्विकी बुद्धिः । सामान्यमात्रबुद्धिस्तामसी राजसी च बुद्धिः । आतिगह्वरत्वमत्यन्तगम्भीरत्वम् । संरम्भस्तात्पर्यम् । ब्रह्मणो दुर्विज्ञेयत्वे फलितमाह--तस्मादिति ।

आचारविध्युपदेशार्थश्च । एवमाचारवतोर्वक्तृश्रोत्रोराख्यायिकानुगतोऽर्थोऽवगम्यते । केवलतर्कबुद्धिनिषेधार्था चाऽऽख्यायिका ।

---

१ ख. ढ °गर्भादिमा° । २ क छ दुर्ज्ञेय. । ३ घ बुद्ध्या त्वग° । ङ. °बुद्धेरग° । ४ ग छ. °त्वं प्रद° । ५ ख घ ङ च ज ढ वान् । आ° । ६ ङ. °क्ष्यतीति । ७ अ. ज. °तद्गतः सा° । ८ ग. °गताय- ग° । ९ ख. ङ. च. ढ. °र्थो ग° ।

नैषा तर्केण मतिरापनेया । न तर्कशास्त्रदग्धायेति[1] श्रुतिस्मृतिभ्याम्[2]। श्रद्धा च ब्रह्मविज्ञाने परमं साधनमित्याख्यायिकार्थः । तथा हि गार्ग्यजातशत्र्वोरतीव श्रद्धालुता दृश्यत आख्यायिकायाम् । "श्रद्धावाल्लभते ज्ञानम्" इति[3] च स्मृतिः ।

आख्यायिकायाः सुखावतिपरत्वपर्यन्तत्वमुक्त्वाऽर्थान्तरमाह—आचारेति । अतश्चमादधमेन प्रणिपातोपसदनादिद्वारा विद्या ग्राह्या । अथवात्युत्तमेन तत्त्वातिरेकेण श्रद्धादिमात्रेण सा लभ्येत्याचारप्रकारज्ञापनार्थश्चायमारम्भ इत्यर्थः । आख्यायिकाया यथोक्तेऽर्थेऽन्वितत्वं दर्शयति—एवमिति । वक्तृश्रोतृधर्मेषु यथोक्ताचारवता श्रोत्रा विद्या लब्धव्या । वक्त्रा च तादृशेन सोपदेष्टव्येत्येषोऽर्थोऽस्यामाख्यायिकायामनुगतो गम्यते । तस्माद्वाक्यविवेकं दर्शयितुमेषाऽऽख्यायिका युक्तेत्यर्थः । आगमानुसारिगुरुसंप्रदायादेव तत्त्वबोधो लभ्यते । यस्तु केवलस्तर्कस्तदुत्थानैषा बुद्धिः सिध्यति । तथा च केवलार्कनयुक्ता तत्त्वबुद्धिरितिसंभावनानिषेधार्थाऽऽख्यायिकेति पक्षान्तरमाह—केवलेति । केवलेन तर्केण तत्त्वबुद्धिर्न सिध्यतीत्यत्र श्रुतिस्मृती दर्शयति—नैषेति । मतिं इत्यादिति शेषः । प्रकारान्तरेणाऽऽख्यायिकामवतार्य तत्राऽऽख्यायिकानुगुण्यं दर्शयति—तथा हीति । श्रद्धा ब्रह्मज्ञाने परमं साधनमित्यत्र प्रमाणतोऽपि संमतिमाह—श्रद्धावानिति ।

ॐ ॥ दृप्तबालाकिर्हानूचानो गार्ग्य आस स
होवाचाजातशत्रुं काश्यं ब्रह्म ते ब्रवाणीति स
होवाचाजातशत्रुः सहस्रमेतस्यां वाचि दद्मो
जनको जनक इति वै जना धावन्तीति ॥ १ ॥

तत्र पूर्वपक्षवाद्यविद्याविषयब्रह्मविद्दृप्तबालाकिर्दृप्तो गर्वितोऽस्म्यहं ब्रह्मवित्त्वादेव बलाकाया अपत्यं बालाकिर्दृप्तश्चासौ बालाकिश्चेति दृप्तबालाकिर्हशब्द ऐतिह्यार्थ आख्यायिकायामनूचानोऽनुवचनसमर्थो वक्ता वाग्मी गार्ग्यो गोत्रत आस बभूव क्वचित्कालविशेषे स होवाचाजातशत्रुमजातशत्रुनामानं काश्यं काशिराजमभिगम्य ब्रह्म

---

१ ग. घ. ङ च. ज ढ 'ति च श्रु'। २ ग ङ. च छ. झ 'द्धा वा ब्र'। ३ ख ग. झ. 'ति स्मृ'। ४ ख. ग. ङ ढ. स्मृतेः। ५ झ. ह्मवेत्त्वादे'। ६ क. 'वित्त्वादे' ७ क. 'किञ्च दृ'। ८ ज. झ. 'र्ह हश'। ९ ग. च. ढ. 'कास्वनु'। १० घ. छ. ज. झ 'वा अहं'।

ते ब्रवाणीति ब्रह्म ते तुभ्यं ब्रवाणि कथयानि । स एवमुक्तोऽजातशत्रुरुवाच सहस्रं गवां दद्म एतस्यां वाचि यां मां प्रत्यवोचो ब्रह्म ते ब्रवाणीति तावन्मात्रमेव गोसहस्रप्रदाने निमित्तमित्यभिप्रायः । साक्षाद्ब्रह्मकथनमेव निमित्तं कस्मान्नापेक्ष्यते सहस्रदाने ब्रह्म ते ब्रवाणीति । इयमेव तु वाङ्निमित्तमपेक्ष्यत इत्युच्यते । यतः श्रुतिरेव राज्ञोऽभिप्रायमाह-जनको दाता जनकः श्रोतेति चैतस्मिन्वाक्यद्वये पदद्वयमभ्यस्यते जनको जनक इति । वैशब्दः प्रसिद्धावद्योनतार्थः । जनको दित्सुर्जनकः शुश्रूषुरिति ब्रह्म शुश्रूषवो विवक्षवः प्रतिजिघृक्षवश्च जना धावन्त्यभिगच्छन्ति । तस्मात्तत्सर्वं मय्यपि संभावितवानसीति ॥ १ ॥

आख्यायिकार्थं बहुधा स्थिते तदक्षराणि व्याचष्टे-तत्रेत्यादिना । पूर्वपक्षवादित्वे हेतुमाह-अविद्याविषयेति । गर्वितत्वे हेतुमाह-असम्यगिति । इयमेव तु वाङ्निमित्तमित्यत्रापि कस्मादित्यनुषज्यते । अतो ब्रह्म ते ब्रवाणीति वागेव सहस्रदाने निमित्तमिति शेषः । श्रुतिं व्याचष्टे-जनक इति । प्रसिद्धं जनकस्य दातृत्वादि तद्द्योतको वैनिपात इति यावत् । वाक्यार्थमाह-जनको दित्सुरित्यादिना । संभावितवानसीति प्रागुक्तं वाङ्मात्रं सहस्रदाने निमित्तमिति शेषः । तस्मान्मुख्यप्रसिद्ध्यतिक्रमणादिति यावत् । तत्सर्वं दातृत्वादिकमित्यर्थः । इतिशब्दोऽभिप्रायसमाप्त्यर्थः ॥ १ ॥

स होवाच गार्ग्यो य एवासावादित्ये पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवादिष्ठा अतिष्ठाः सर्वेषां भूतानां मूर्धा राजेति वा अहमेतमुपास इति स य एतमेवमुपास्तेऽतिष्ठाः सर्वेषां भूतानां मूर्धा राजा भवति ॥ २ ॥

एवं राजानं शुश्रूषुमिमुखीभूतं स होवाच गार्ग्यः । य एवासावादित्ये चक्षुषि चैकोऽभिमानी चक्षुर्द्वारेणेह हृदि प्रविष्टोऽहं भोक्ता कर्ता चेत्यवस्थितः । एतमेवाहं ब्रह्म पश्याम्यस्मिन्कार्यकरणसंघात उपास्ते । तस्मात्तमहं पुरुषं ब्रह्म तुभ्यं ब्रवीम्युपास्स्वेति । स एवमुक्तः प्रत्युवा-

---

१ क. ख. ढ यो । २ ख. ग. च. झ. ढ. °स्रप्रदा° । ३ च. ढ. °नको हि जु° । ४ ख. घ. ङ. °त्सर्वमप्यभिसं° । ५ च. ढ स्वीकृत्य तं । ६ ज. ञ. °र्धकार° ।

चाजातशत्रुर्मा मा मेति हस्तेन विनिवारयन् । एतस्मिन्ब्रह्मणि विज्ञेये मा संवदिष्ठाः । मा मेत्याबाधनार्थं द्विर्वचनम् । एवं समाने विज्ञानविषये आवयोरस्मानविज्ञानवत इव दर्शयता बाधिताः स्यामोऽतो मा संवदिष्ठा मा संवादं कार्षीरस्मिन्ब्रह्मणि । अन्यच्चेज्जानासि तद्ब्रह्म वक्तुमर्हसि न तु ज्ञायत एव । अथ चेन्मन्यसे जानीषे त्वं ब्रह्ममात्रं न तु तद्विशेषणोपासनफलानीति । तन्न मन्तव्यं यतः सर्वमेतदहं जाने यद्ब्रवीषि कथम्, अतिष्ठा अतीत्य भूतानि तिष्ठतीत्यतिष्ठाः । सर्वेषां च भूतानां मूर्धा शिरो राजेति वै राजा दीप्तिगुणोपेतत्वादेतैर्विशेषणैर्विशिष्टमेतद्ब्रह्मास्मिन्कार्यकरणसंघाते कर्तृ भोक्तृ चेत्यहमेतमुपास इति फलमप्येवं विशिष्टोपासकस्य । स य एतमेवमुपास्तेऽतिष्ठाः सर्वेषां भूतानां मूर्धा राजा भवति । यथागुणोपासनमेव हि फलम् । "तं यथा यथोपासते तदेव भवति" इति श्रुतेः ॥ २ ॥

हृदि प्रविष्टो भोक्ताऽहमित्यादि प्रत्यक्षं प्रमाणयति—अहमिति । दृष्टिफलं नैरन्तर्याभ्यासं दर्शयति—उपास इति । तावता मम किमायातं तदाह—तस्मादिति । मा मेति प्रतीकमादरार्थाभ्यासस्यार्थमाह—मा मेतीति । विनिवारयन्प्रत्युवाचेति संबन्धः । एकस्य माङो निवारकत्वमपरस्य संवादेन संगतिरिति विभागे संभवति कुतो द्विर्वचनमित्याशङ्क्याऽऽह—मा मेत्याबाधनार्थमिति । तदेव स्फुटयति—एवमिति । त्वदुक्तेन प्रकारेण यो विज्ञानविषयोऽर्थस्तस्मिन्नावयोर्विज्ञानसाम्यादेव समानेऽपि विज्ञानवत्त्वे सत्यस्मानविज्ञानवत इव स्वीकृत्य तमेवार्थमस्मान्प्रत्युपदेशेन ज्ञापयता भवता वयं बाधिताः स्याम इति योजना । तथाऽपि गार्ग्यस्य कथमीषद्बाधनं तत्राऽऽह—अत इति । अतिष्ठाः सर्वेषामित्यादि वाक्यं शङ्कद्वाराऽवतार्य व्याकरोति—अथेत्यादिना । एतं पुरुषमिति शेषः । इतिशब्दो गुणोपास्तिसमाप्त्यर्थः । पूर्वोक्तरीत्या विभिर्गुणैर्विशिष्टं ब्रह्मतदुपासकस्य फलमपि जानामीत्युक्त्वा फलवाक्यमुपादत्ते—स य इति । किमिति यथोक्तं फलमुच्यते तत्राऽऽह—यथेति ॥ २ ॥

स होवाच गार्ग्यो य एवासौ चन्द्रे पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संव-

---

१ ख. घ. ङ. च. ज. ढ. °र्मा मे° । २ ग. च. छ. झ. ढ. °मानवि° । ३ क. ख °ष एवाऽऽव° । ४ क. छ. °नज्ञा° । ५ ङ. °दं कर्तुमर्हस्यस्मि° । ६ च. झ. ढ. °षां भू° । ७ ग. र्थकार° । ८ क. ख. हि च फ° । ९ क. च. मेति ।

दिष्ठा बृहन्पाण्डरवासाः सोमो राजेति वा अहमेतमु-
पास इति स य एतमेवमुपास्तेऽहरहर्ह सुतः प्रसुतो
भवति नास्यान्नं क्षीयते ॥ ३ ॥

संवादेनाऽऽदित्यब्रह्मणि प्रत्यारूयातेऽजातशत्रुणा चन्द्रमसि ब्रह्मान्तरं प्रतिपेदे गार्ग्यः । य एवासौ चन्द्रे मनसि चैकः पुरुषो भोक्ता कर्ता चेति पूर्ववद्विशेषणम् । बृहन्महान्पाण्डरं शुक्लं वासो यस्य सोऽयं पाण्डरवासा अप्शरीरत्वात्प्राणस्य । यश्चान्नभूतोऽभिधूयते लवात्मको यज्ञे तमेकीकृत्यैतमेवाहं ब्रह्मोपास्ते यथोक्तगुणं य उपास्ते तस्याहरहैः सुतः सोमोऽभिषुतो भवति यज्ञे प्रसुतश्च विकारेष्वन्नं चास्य न क्षीयतेऽन्नात्मकोपासकस्य ॥ ३ ॥

मनसि चेति चकाराद्बुद्धौ चेत्यर्थः । य एकः पुरुषस्तमेवाहं ब्रह्मोपास्ते त्वं चेत्थमुपास्स्वेत्युक्ते मा मेत्यादिना प्रत्युवाचेत्याह—इति पूर्ववादिति । मानुमण्डलतो द्विगुणं चन्द्रमण्डलमिति प्रसिद्धिमाश्रित्याऽऽह—महानिति । कथं पाण्डरं वासश्चन्द्राभिमानिनः प्राणस्य संभवतीत्याशङ्क्याऽऽह—अप्शरीरत्वादिति । पुरुषो हि शरीरेण वाससेव वेष्टितो भवति पाण्डरत्वं चापां प्रसिद्धमापो वासः प्राणस्येति च श्रुतिरतो युक्तं प्राणस्य पाण्डरवासस्त्वमित्यर्थः । न केवलं सोमशब्देन चन्द्रमा गृह्यते किंतु लताऽपि समाननामधर्मत्वादित्याह—यश्चेति । तं चन्द्रमसं लतात्मकं बुद्धिनिष्ठं च पुरुषमेकीकृत्याहंग्रहेणोपास्तिरित्यर्थः । संपत्त्युपास्तिफलमाह—यथोक्तेति । यज्ञशब्देन प्रकृतिरुक्ता । विकारशब्देन विकृतयो गृह्यन्ते । यथोक्तोपासकस्य प्रकृतिविकृत्यनुष्ठानसामर्थ्यं लीलया लभ्यमित्यर्थः । अन्नाक्षयस्योपासनानुसारित्वादुपपन्नत्वमभिप्रेत्योपासकं विशिनष्टि—अन्नात्मकेति ॥ ३ ॥

स होवाच गार्ग्यो य एवासौ विद्युति

---

१ ख. °दित्ये ब्र° । २ च. ब्रह्म प्र° । ३ छ. °षणे । बृ° । ४ च. °त्वाच्चन्द्राभिमानिनः । प्राण° । ५ च. °स्य । सोमो राजा चन्द्रः । य° । ६ च. °त्मकः सोमवल्लुचात्मक-प्रकृत्यात्मके य° । ढ. °त्मकः । सोमवल्लुचात्मकोऽस्योपासकस्य प्रकृत्यात्मके य° । ७ क. ख. ग. घ. ङ. छ. ज. झ. °हः सो । ८ क. ख. ग. घ. ङ. छ. ज. झ. °तो य° । ९ च. ढ. °सुतः प्रकृष्टं सुतरां सुतो भवति विकारे । उभयविधयज्ञानुष्ठानसामर्थ्यं भवतीत्यर्थः । अन्नं । १० क. ख. ञ. ढ. ण. °र्थः । ए° । ११ च. ञ. ण. लीलाल° । १२ ख. ढ. °वास्त्वो° । १३ क. घ. ञ. ढ. ण. °त्मेति ।

पुरुष एतमेवाहं ब्रह्मोपास इति स होवा-
चाजातशत्रुर्मा मैतस्मिन्संवदिष्ठास्तेजस्वीति
वा अहमेतमुपास इति स य एतमेवमु-
पास्ते तेजस्वी ह भवति तेजस्विनी हास्य
प्रजा भवति ॥ ४ ॥

अथा विद्युति त्वचि हृदये चैका देवता तेजस्वीति विशेषणं तस्या-स्तत्फलं तेजस्वी ह भवति । तेजस्विनी हास्य प्रजा भवति । विद्युवां बहुत्वस्याङ्गीकरणादात्मनि प्रजायां च फलबाहुल्यम् ॥ ४ ॥

संवाददोषेण चन्द्रे ब्रह्मण्यपि प्रत्याख्याते ब्रह्मान्तरमाह—तथेति । कथमेक-मुपासनमनेकफलमित्याशङ्क्याऽऽह—विद्युतामिति ॥ ४ ॥

स होवाच गार्ग्यो य एवायमाकाशे पुरुष एतमे-
वाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैत-
स्मिन्संवदिष्ठाः पूर्णमप्रवर्तीति वा अहमेतमुपास
इति स य एतमेवमुपास्ते पूर्यते प्रजया पशुभिर्मा-
स्यास्माल्लोकात्प्रजोद्वर्तते ॥ ५ ॥

तथाऽऽकाशे हृद्याकाशे चैका पूर्णमप्रवर्ति चेति विशेषणद्वयं पूर्ण त्वविशेषणफलमिदं पूर्यते प्रजया पशुभिरप्रवर्तिविशेषणफलं नास्या-स्मात्लोकात्प्रजोद्वर्तव इति प्रजा संतानाविच्छित्तिः ॥ ५ ॥

अप्रवर्तित्वमप्रवर्तकत्वमक्रियावत्त्वं वा ॥ ५ ॥

स होवाच गार्ग्यो य एवायं वायौ पुरुष एतमेवाहं
ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संव-
दिष्ठा इन्द्रो वैकुण्ठोऽपराजिता सेनेति वा अहमे-
तमुपास इति स य एतमेवमुपास्ते जिष्णुर्हापराजि-

---

१ च. ढ. हृदि चै° । २ घ. ङ. ण. चन्द्रब्र° । ३ ण. °मित्यत आह । ४ घ. ञ. °त्याह । ५ ल. हृदि । चै° । ६ क. ग. ङ. ज्ञ. °कोशेऽपि चै° । ७ च ज्ञ. ढ °का देवता चै° । ८ क. ख. ग. घ. ङ. ङ. ज. झ. °ते ह प्र° । ९ च ढ. °ढ प्रवर्तयति स्वयं वा न प्रवर्तत इत्यप्रवर्ति यत्तत्पुण्यफलं मा° ।

ष्णुर्भवत्यन्यतस्त्यजायी ॥ ६ ॥

तथा वायौ प्राणे हृदि चैका विशेषणमिन्द्रः परमेश्वरो वैकुण्ठोऽप्रसह्यो न परैर्जितपूर्वोऽपराजिता सेना मरुतां गुणत्वप्रसिद्धेरुपासनफलमपि । जिष्णुर्हि जयनशीलोऽपराजिष्णुर्न च परैर्जितस्वभावो भवति । अन्यतस्त्यजाप्यन्यतस्त्यानां सपत्नानां जयनशीलो भवति ॥ ६ ॥

कथमेकस्मिन्वायावपराजिता सेनेति मुधः संभवति तत्राऽऽह—मरुतामिति । विशेषणत्रयस्य फलत्रयं क्रमेण व्युत्पादयति—जिष्णुरित्यादिना । अन्यतस्त्यानामन्यतो मातृतो जातानाम् ॥ ६ ॥

स होवाच गार्ग्यो य एवायमग्नौ पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा विषासहिरिति वा अहमेतमुपास इति स य एतमेवमुपास्ते विषासहिर्ह भवति विषासहिर्हास्य प्रजा भवति ॥ ७ ॥

अग्नौ वाचि हृदि चैका विशेषणं विषासहिर्मर्षयिता परेषाम् । अग्निबाहुल्यात्फलबाहुल्यं पूर्ववत् ॥ ७ ॥

यद्धविर्विष्यते क्षिप्यते तत्सर्वं भस्मीकरणेन सहते तेनाग्निर्विषासहिः । यथा पर्वं विद्युतां बाहुल्यादात्मनि प्रजायां च फलबाहुल्यमुक्तं तथाऽत्राप्यग्नीनां बहुत्वादुपासकस्याऽऽत्मनि प्रजायां च दीप्ताग्नित्वं सिध्यतीत्याह—अग्नीति ॥ ७ ॥

स होवाच गार्ग्यो य एवायमप्सु पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठाः प्रतिरूप इति वा अहमेतमुपास इति स य एतमेवमुपास्ते प्रतिरूपꣳ हैवैनमपगच्छति नाप्रतिरूपमथो प्रतिरूपोऽस्माज्जायते ॥ ८ ॥

---

१ च. ढ. °का देवता तस्य वि° । झ. °का देवता वि° । ख. ढ. °तो जा° । २ च. ढ. °का देवता तस्या वि° ।

अप्सु रेतसि हृदि चैका विशेषणं प्रतिरूपोऽनुरूपः श्रुतिस्मृत्यप्रतिकूल इत्यर्थः । फलं प्रतिरूपं श्रुतिस्मृतिशास्त्रानुरूपमेवैनमुपगच्छति प्राप्नोति न विपरीतमन्यच्चास्मात्तथाविध एवोपजायते ॥ ८ ॥

प्रतिरूपत्वं प्रतिकूलत्वमित्येतद्व्यावर्तयति—अनुरूप इति । अन्यच्च फलमिति संबन्धः । अस्मादुपासितुरित्यर्थः । तथाविधः श्रुतिस्मृत्यनुकूल इति यावत् ॥ ८ ॥

स होवाच गार्ग्यो य एवायमादर्शे पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवादिष्ठा रोचिष्णुरिति वा अहमेतमुपास इति स य एतमेवमुपास्ते रोचिष्णुर्ह भवति रोचिष्णुर्हास्य प्रजा भवत्यथो यैः संनिगच्छति सर्वांस्तानतिरोचते ॥ ९ ॥

आदर्शे प्रसादस्वभावे चान्यत्र खड्गादौ हार्दे च सत्त्वशुद्धिस्वाभाव्ये चैका विशेषणं रोचिष्णुर्दीप्तिस्वभावः फलं च तदेव रोचनाधारबाहुल्यात्फलबाहुल्यम् ॥ ९ ॥

हार्दे चेत्येतदेव स्पष्टयति—सत्त्वेति । सर्वत्रैकेति विशेषणस्य देवतेति विशेष्यतया संबध्यते । तदेव रोचिष्णुत्वमित्यर्थः ॥ ९ ॥

स होवाच गार्ग्यो य एवायं यन्तं पश्चाच्छब्दोऽनूदेत्येतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवादिष्ठा असुरिति वा अहमेतमुपास इति स य एतमेवमुपास्ते सर्वꣳ हैवास्मिँल्लोक आयुरेति नैनं पुरा कालात्प्राणो जहाति ॥ १० ॥

यन्तं गच्छन्तं य एवायं शब्दः पश्चात्पृष्ठतोऽनूदेत्यध्यात्मं च जीवनहेतुः प्राणस्तमेकीकृत्याऽऽहासुः प्राणो जीवनहेतुरिति गुणस्य फलं

१ च. ढ. °का देवता तस्या वि° । २ च. ढ. °का देवता तस्या वि° । ३ क. °त्त्वात्तु फल° । ४ क. ग. घ. ज. °न्दः पृष्ठ° ।

सर्वमायुरस्मिँल्लोक एतीति । यथोपात्तं कर्मणाऽऽयुः कर्मफल-परिच्छिन्नकालात्पुरा पूर्वं रोगादिभिः पीड्यमानमप्येनं प्राणो न जहाति ॥ १० ॥

आहैवमेवाहमित्यादीति शेषः । तस्य गुणवदुपासनस्येत्यर्थः । सर्वमायुरित्येव-मुपपादयति—यथोपात्तमिति ॥ १० ॥

स होवाच गार्ग्यो य एवायं दिक्षु पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मेवास्मिन्सं वदिष्ठा द्वितीयोऽनपग इति वा अहमेतमुपास इवि स य एतमेवमुपास्ते द्वितीयवान्ह भवति नास्माद्-भ्रश्च्यते ॥ ११ ॥

दिक्षु कर्णयोर्हृदि चैकोऽश्विनौ देवावविमुक्तस्वभावौ गुणस्तस्य द्वितीयवत्त्वमनपमंत्वमवियुक्तता चान्योन्यं दिशामश्विनोश्चैवंधर्मि-त्वात्तदेव च फलमुपासकस्य गणाविच्छेदो द्वितीयवत्त्वं च ॥ ११ ॥

का पुनरत्रैका देवता तत्राऽऽह—अश्विनाविति । तस्य देवस्येति यावत् । यथोक्तं गुणद्वयमुपपादयति—दिशामिति । द्वितीयवत्त्वं साधुभृत्यादिपरि-वृतत्वम् ॥ ११ ॥

स होवाच गार्ग्यो य एवायं छायामयः पुरुष एत-मेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैत-स्मिन्संवदिष्ठा मृत्युरिति वा अहमेतमुपास इवि स य एतमेवमुपास्ते सर्वꣳ हैवास्मिँल्लोक आयुरेवि नैनं पुरा कालान्मृत्युरागच्छति ॥ १२ ॥

छायायां वाऽयं तमस्यध्यात्मे चाऽऽवरणात्मकेऽज्ञाने हृदि चैका देवता विशेषणं मृत्युः फलं सर्वं पूर्ववन्मृत्योरनागमनेन रोगादिपी-डाभावो विशेषः ॥ १२ ॥

शब्दब्रह्मोपासकस्येव तमोब्रह्मोपासकस्यापि फलमित्याह—फलमिति । फलभे-दावे कथमुपासनभेदः स्यादित्याशङ्क्याऽऽह—मृत्योरिति ॥ १२ ॥

---

१ च. ढ. °का देवताऽश्वि° । २ स. च. झ. ढ. °मतत्व° । ३ ङ. छ. झ. °ध्यात्म चा° । ४ च. ढ. °ता तस्या वि° । ५ स. मृत्युर्मृत्व्यतितरणं फ° । ढ. मृत्युर्मृतितरणं फ° । ६ ब. च. ढ. °कं च वे° । ७ क. ञ. °गमै ते° ।

स होवाच गार्ग्यो य एवायमात्मनि पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मेतस्मिन्संदिष्ठा आत्मन्वीति वा अहमेतमुपास इति स य एतमेवमुपास्त आत्मन्वी ह भवत्यात्मन्विनी हास्य प्रजा भवति स ह तूष्णीमास गार्ग्यः ॥ १३ ॥

आत्मनि प्रजापतौ बुद्धौ च हृदि चैकोऽऽत्मन्यात्मवानिति विशेषणं फलमात्मन्वी ह भवत्यात्मवान्भवति । आत्मन्विनी हास्य प्रजा भवति बुद्धिबहुलत्वात्प्रजायां संपादनमिति विशेषः । स्वयं परिज्ञातत्वेनैवं क्रमेण प्रत्याख्याने सति स गार्ग्यः क्षीणब्रह्मविज्ञानोऽप्रतिमासमानोत्तरस्तूष्णीमवाङ्मिशरा आस ॥ १३ ॥

व्यस्तानि ब्रह्माण्युपन्यस्य समस्तं ब्रह्मोपदिशति—प्रजापताविति । आत्मवत्त्वं वश्यात्मकत्वम् । फलस्याऽऽत्मगामित्वान्न प्रजायां तदभिधानमुचितमित्यात्मकत्वाऽऽह—बुद्धीति ॥ १३ ॥

स होवाचाजातशत्रुरेतावद्भू३ इत्येतावद्धीति नैतावता विदितं भवतीति स होवाच गार्ग्य उप त्वा यानीति ॥ १४ ॥

तं तथाभूतमालक्ष्य गार्ग्यं स होवाचाजातशत्रुरेतावद्भू३ इति । किमेतावद्ब्रह्म निर्ज्ञातमाहोस्विदधिकमप्यस्तीतीतर आहैतावद्धीति । नैतावता विदितेन ब्रह्म विदितं भवतीत्याहाजातशत्रुः किमर्थं मर्विलोऽसि ब्रह्म ते ब्रवाणीति । किमेतावद्विदितं विदितमेव न भवतीत्युच्यते । न फलवद्विज्ञानश्रवणात् । न चार्थवादत्वमेव वाक्यानामवगन्तुं शक्यम् । अपूर्वविधानपराणि हि वाक्यानि प्रत्युपासनोपदेशं लक्ष्यन्तेऽतिष्ठाः सर्वेषां भूतानामित्यादीनि । तदनुरूपाणि च फलानि सर्वत्र श्रूयन्ते विभक्तानि । अर्थवादत्व एतदसमञ्जसम् । कथं तर्हि

---

१ स. ग. च. छ. ढ. °द्धौ ह° । २ च. ढ. °का देवता तस्वा विशेषणमात्म° झ. °का देवताऽऽत्म° । ३ स. °त्मन्वीति । ४ च. ढ. °वणफ° । ५ ग. ङ. च. छ. झ. ढ. °ह्त्वा° । ६ च. ङ. छ. ज. झ. °नम् । स्व° । ७ ग. च. °ति । स्व° । ८ ग. ङ. च. °ज्ञ विज्ञात° । ९ क. ग. च. °स्तीति । १० च. ङ. °वता विदि° । ११ ङ. °वादे त्वेत° ।

नैतावता विदितं भवतीति । नैष दोषोऽधिकृतापेक्षत्वात् । ब्रह्मोपदेशार्थं हि शुश्रूषवेऽजातशत्रवेऽमुख्यब्रह्मविद्गार्ग्यः प्रवृत्तः स युक्त एव मुख्यब्रह्मविदाऽजातशत्रुणाऽमुख्यब्रह्मविद्गार्ग्यो वक्तुं यन्मुख्ये ब्रह्म वक्तुं प्रवृत्तस्त्वं तन्न जानीष इति । यद्यमुख्यब्रह्मविज्ञानमपि प्रत्याख्यायेत तदैतावतेति न ब्रूयान्न किंचिज्ज्ञातं त्वयेत्येवं ब्रूयात्तस्माद्भवत्येतावन्त्यविद्याविषये ब्रह्माणि । एतावद्विज्ञानद्वारत्वाच्च परब्रह्मविज्ञानस्य युक्तमेव वक्तुं नैतावता विदितं भवतीति । अविद्याविषये विज्ञेयत्वं नामरूपकर्मात्मकत्वं चैषां तृतीयेऽध्याये प्रदर्शितम् । तस्मान्नैतावता विदितं भवतीति ब्रुवताऽधिकं ब्रह्म ज्ञातव्यमस्तीति दर्शितं भवति । तच्चानुपसन्नाय न वक्तव्यमित्याचारविधिज्ञो गार्ग्यः स्वयमेवाऽऽहोप त्वा यानीत्युपगच्छानीति त्वा यथाऽन्यः शिष्यो गुरुम् ॥ १४ ॥

विचारार्था प्लुतिरिति कथयति—किमेतावदिति । वाक्यार्थं चोद्यसमाधिभ्यां स्फुटयति—किमित्यादिना । आदित्यादेरविदित्वनिषेधं प्रतिज्ञाय हेतुमाह—न फलवदिति । नैतानि वाक्यानि फलवद्विज्ञानपराण्यर्थवादत्वपदित्याशङ्क्याऽऽह—न चेति । फलवत्त्वाच्चापूर्वविधिपराण्येतानि वाक्यानीत्याह—तदनुरूपाणीति । अर्थवादत्वेऽपि तेषामपूर्वार्थत्वं किं न स्यादित्याशङ्क्याऽऽह—अर्थवादत्व इति । वाक्यानां फलवद्विज्ञानपरत्वमुपेत्य निषेधवाक्यस्य गतिं पृच्छति—कथं तर्हीति । तस्याऽऽनर्थक्यं परिहरति—नैष दोष इति । अधिकृतापेक्षत्वादेतन्निषेधस्येत्युक्तं स्फुटयति—ब्रह्मेति । नैवावेत्यविशेषेणामुख्यब्रह्मज्ञानमपि निषिद्धमिति चेन्नेत्याह—यदीति । किंच निष्कामेन (ण) चेदेतान्युपासनान्यनुष्ठीयन्ते तदेतेषां ब्रह्मज्ञानार्थत्वादमुख्यब्रह्मज्ञानिनिषेधमन्तरेण निषेधोऽनुपपत्तिरित्याह—एतावद्विज्ञानेति । आदित्यादिकमेव मुख्यं ब्रह्मेति निषेधानर्थक्यं तदवस्थमित्याशङ्क्याऽऽह—अविद्येति । आदित्यादेर्मुख्यब्रह्मत्वासंभवान्निषेधस्योपपन्नत्वात्तस्यामर्थ्यमुपन्यस्यति—तस्मादिति । उपगमनवाक्यमुत्थाप्य व्याचष्टे—तच्चेति ।

" अब्राह्मणाद्ध्ययनमापत्काले विधीयते ।
अनुव्रज्या च शुश्रूषा यावदध्ययनं गुरोः ॥
सा ब्राह्मणे गुरौ शिष्यो वासमात्यन्तिकं वसेत् " ॥

इत्यादीन्याचारविधिशास्त्राणि ॥ १४ ॥

---

१ च. ढ. °धोऽस्त्वधि° । २ ग. °शाय शु° । ३ घ. ज. °त वै गार्ग्यस्तदै° । ४ ढ °वदिति । ५ घ. छ. °रवस्त्वाच्च । ६ ज. °च्च परत्वाच्च प° । ७ ङ. च. ढ. °तीयाध्या° । ८ च. ढ. °ति वदता° । ९ च. ढ. °ति प्रइ° । १० ग. °च्छामि त्वां घ. ङ च. ज. झ. °च्छानि त्वां । ११ °च्छाम्यति । ११ घ. ञ. °पत्तेरि° । १२ घ. ञ. ढ. ण. एतद्वि° ।

स होवाचाजातशत्रुः प्रतिलोमं चैतद्यद्ब्राह्मणः क्षत्रियमुपेयाद्ब्रह्म मे वक्ष्यतीति व्येव त्वा ज्ञपयिष्यामीति तं पाणावादायोत्तस्थौ तौ ह पुरुषꣳ सुप्तमाजग्मतुस्तमेतैर्नामभिरामन्त्रयांचक्रे बृहन्पाण्डरवासः सोम राजन्निति स नोत्तस्थौ तं पाणिनाऽऽपेषं बोधयांचकार स होत्तस्थौ ॥ १५ ॥

स होवाचाजातशत्रुः प्रतिलोमं विपरीतं चैतत्किं तद्यद्ब्राह्मण उत्तमवर्ण आचार्यत्वेऽधिकृतः सन्क्षत्रियमाचार्यस्वभावमुपेयादुपगच्छेच्छिष्यवृत्त्या ब्रह्म मे वक्ष्यतीत्येतदाचारविधिशास्त्रेषु निषिद्धम् । तस्मात्तिष्ठ त्वमाचार्य एव सन् । विज्ञप्रयिष्याम्येव त्वामहम् । यस्मिन्विदिते ब्रह्म विदितं भवति यत्तन्मुख्यं ब्रह्म वेद्यम् । तं गार्ग्यं सलञ्जमालक्ष्य विश्रम्भजननाय पाणौ हस्त आदाय गृहीत्वोत्तस्था उत्थितवान् । तौ ह गार्ग्याजातशत्रू पुरुषं सुप्तं राजगृहप्रदेशे क्वचिदाजग्मतुरागतौ । तं च पुरुषं सुप्तं प्राप्य तेनामभिर्बृहन्पाण्डरवासः सोम राजन्नित्येतैरामन्त्रयांचक्रे । एवमामन्त्र्यमाणोऽपि स सुप्तो नोत्तस्थौ । तमप्रतिबुध्यमानं पाणिनाऽऽपेषमापिष्याऽऽपिष्य बोधयांचकार प्रतिबोधितवान् । तेन स होत्तस्थौ । तस्मादयो गार्ग्येणाभिप्रेतो नासावस्मिञ्छरीरे कर्ता भोक्ता ब्रह्मेति ।

आदित्यादिब्रह्मभ्यो विशेषमाह—यस्मिन्निति । पाणेस्तव व्यानियमाणत्वेन संबोधनार्थं प्रयुक्तनामाश्रवणादापेषणाच्चोत्थानात्तस्याभोक्तृत्वं सिध्यतीति फलितमाह—तस्मादिति ।

कथं पुनरिदमवगम्यते सुप्तपुरुषगमनतत्संबोधनानुत्थानैर्गार्ग्याभिमतस्य ब्रह्मणोऽब्रह्मत्वं ज्ञापितमिति । जागरितकाले यो गार्ग्याभिप्रेतः पुरुषः कर्ता भोक्ता ब्रह्म संनिहितः करणेषु यथा तथाऽजातशत्रुभिप्रेतोऽपि तत्स्वामी भृत्येष्विव राजा संनिहित एव । किंतु

---

१ ग. च. ढ. विरुज्यम् । २ क. स. ग. घ. ङ. च. ज. झ. विज्ञाप° । ३ ढ. °त्र ह किल पु° । ४ च. ढ. ततः । ५ ग. च. ढ. °स्माच्च स यो गा° । ६ ग. च. ढ. °तोऽस्मि° । ७ क. स. सुषुप्तं । ८ ग. ङ. च. ढ. °मित्र° । ९ ब. ज. °क्ता च ब्र° । १० च. ढ. °त्रारभि° ।

भृत्यस्वामिनोर्गार्ग्यजातशत्र्वभिप्रेत्योर्यद्विवेकावधारणकारणं तत्संकीर्णत्वादनवधारितविशेषम्। यद्द्रष्टृत्वमेव भोक्तुर्न दृश्यत्वं यच्चाभोक्तुर्दृश्यत्वमेव न तु द्रष्टृत्वं तच्चोभयमिह संकीर्णत्वाद्विविच्य दर्शयितुमशक्यमिति सुप्तपुरुषगमनम्।

तौ ह सुप्तमित्यादितुप्तपुरुषगत्युक्तिमाक्षिपति—कथमिति। गार्ग्यकाश्याभिमतयोरुभयोरपि जागरिते करणेषु संनिधानाविशेषाच्चैव किमिति विवेको न दर्शित इत्यर्थः। जागरिते करणेषु द्वयोः संनिधानेऽपि तांकर्याद्दुष्करं विवेचनमिति परिहरति—जाग्रदिति। ब्रह्मशब्दादूर्ध्वं तमशब्दमध्याहृत्य योजना। तर्हि स्वामिभृत्यन्यायेन तयोर्विवेकोऽपि सुकरः स्यादिशङ्क्याऽऽह—किंत्विति। किं तद्विवेकावधारणकारणं तदाह—यद्द्रष्टृत्वमिति। कथं तदनवधारितविशेषमिति तदाह—तच्चेति। इहेति जागरितोक्तिः।

ननु सुप्तेऽपि पुरुषे विशिष्टैर्नामभिरामन्त्रितो भोक्तैव प्रतिपत्स्यते नाभोक्तेति नैव निर्णयः स्यादिति। न निर्धारितविशेषत्वाद्गार्ग्यांभिप्रेतस्य। यो हि सत्येन च्छन्नः प्राणः आत्मामृतो वाग्मादिधनस्वामितो निम्लोचत्सु यस्याऽऽपः शरीरं पाण्डरवासा यश्चासपत्नत्वाद्बृहन्यश्च सोमो राजा षोडशकलः स स्वव्यापारारूढो यथानिर्दिष्टो एतानस्तमितस्वभाव आस्ते। न चान्यस्य कस्यचिद्व्यापारस्तस्मिन्काले गार्ग्येणाभिप्रेयते तद्विरोधिनः। तस्मात्स्वनामभिरामन्त्रितेन प्रतिबोद्धव्यं न च प्रत्यबुध्यत तस्मात्पारिशेष्याद्गार्ग्याभिप्रेतस्याभोक्तृत्वं ब्रह्मणः।

यद्यपि जागरितं हित्वा सुप्ते पुरुषे विवेकार्थं तयोरुपगतिस्तत्र च भोक्तैव संबोधितः स्वनामभिस्तच्छब्दं श्रोष्यति नाचेतनस्तथाऽपि नेष्टविवेकसिद्धिर्गार्ग्यकाश्याभीष्टात्मनोरित्यविसंशयादिति शङ्कते—नन्विति। संशयं निराकरोति—नेत्यादिना। विशेषावधारणमेव निश्चययति—यो हीत्यादिना। स्वव्यापारस्तु मूलशरीरादिः। यथानिर्दिष्टो यथोक्तैर्विशेषैरुपलक्षणं स्वरूपमतिक्रम्य वर्तमानः। प्राणस्योक्तविशेषणवतः। स्वापेऽवस्थानेऽपि तस्य तदा भोगाभावस्तत्र भोक्तृत्वस्याभ्युपगमादित्याशङ्क्याऽऽह—न चेति। तस्यैव भोक्तृत्वे फलितमाह—तस्मादिति। अस्तु तस्य प्राणशब्दश्रवणं तत्राऽऽह—न चेति। पारिशेष्यसिद्धमर्थमाह—तस्मादिति।

---

१ ग. ङ. ॰यितुं न श॰। २ क. ख. छ. झ. सुषुप्त॰। ३ ढ. ॰ति चेत्तद्वा॰। ४ ग. ङ. च. ॰स्यात्। न। ५ ख. ढ. ॰ति चेत्। न। ६ ङ. ॰भिमत॰। ७ क. ख. छ. ढ. प्राज्ञात्मा॰। ८ घ. ञ. ट. सुषुप्ते। ९ क. ख. ढ. यो।

भोक्तृस्वभावश्चेद्भुञ्जीतैव स्वं विषयं प्राप्तम् । न हि दग्धृस्वभावः प्रकाशयितृस्वभावः सन्वह्निस्तृणोलपादिं दाह्यं स्वविषयं प्राप्तं न दहति प्रकाश्यं वा न प्रकाशयति । न चेद्दहति प्रकाशयति वा प्राप्तं स्वं विषयं नासौ वह्निरदग्धा प्रकाशयिता वेति निश्चीयते । तथाऽसौ प्राप्तशब्दादिविषयोपलब्धृस्वभावश्चेद्वाग्यामिप्रेतः प्राणो बृहन्पाण्डरवास इत्येवमादिशब्दं स्वं विषयमुपलभेत । यथा प्राप्तं तृणोलपादि वह्निर्दहत्प्रकाशयेच्चाग्न्यभिचारेण तद्वत् । तस्मात्प्राप्तानां शब्दादीनामप्रतिबोधाद्भोक्तृस्वभाव इति निश्चीयते । न हि यस्य यः स्वभावो निश्चितः स तं व्यभिचरति कदाचिदपि । अतः सिद्धं प्राणस्याभोक्तृत्वम् ।

प्राणस्याभोक्तृत्वं व्यतिरेकद्वारा साधयति—भोक्तृस्वभावश्चेदिति । न च भुङ्क्ते तस्मादभोक्तेति शेषः । उक्तमर्थं दृष्टान्तेन स्पष्टयति—न हीत्यादिना । उलपं वाडतृणम् । विपक्षे दोषमाह—न चेदिति । उक्तमर्थं संक्षिप्याऽऽह—यथेत्यादिना । प्राणस्याभोक्तृत्वमुपसंहरति—तस्मादिति । यद्यपि प्राणः स्वापे शब्दादीन्न प्रतिबुध्यते तथाऽपि भोक्तृस्वभावो भविष्यति नेत्याह—न हीति । संबोधनशब्दाश्रवणमतःशब्दार्थः ।

संबोधनार्थनामाविशेषेण संबन्धाग्रहणादप्रतिबोध इति चेत् । स्यादेतत् । यथा बहुष्वासीनेषु स्वनामविशेषेण संबन्धाग्रहणान्नामायं संबोधयतीति शृण्वन्नपि संबोध्यमानो विशेषतो न प्रतिपद्यते, तथेमानि वृहन्निस्त्वेवमादीनि मम नामानीत्यगृहीतसंबन्धत्वात्प्राणो न गृह्णाति संबोधनार्थं शब्दं न त्वविज्ञातृत्वादेवेति चेत् । न । देवताभ्युपगमेऽग्रहणानुपपत्तेः । यस्य हि चन्द्रार्काग्न्यभिमानिनी देवताऽध्यात्मं प्राणो भोक्ताऽभ्युपगम्यते तस्य तया संव्यवहाराय विशेषनाम्ना संबन्धोऽवश्यं ग्रहीतव्योऽन्यथाऽऽहानादिविषये संव्यवहारोऽनुपपन्नः स्यात् ।

तस्य स्वनामाग्रहणं संबन्धाग्रहणकृतं नानात्मत्वकृतमिति शङ्कते—संबो-

---

१ छ. झ. ढ. °व स्ववि° । २ क. °दिकं दा° । ३ ख. ग. च. ढ. °ह्यं स्वं वि° । ४ ख. ग. घ. ङ. छ. ज. झ. °न्दं स्ववि° । ५ घ. °य उप° । ६ च. झ. ढ. °बोधनाद् । ७ घ. ङ. ज. झ. °शेषसं° । ८ झ. °दबोध इ° । ९ ङ. झ. °शेषसं° । १० क. ख. ग. च. छ. ज. झ. ढ. °पयेत । त° । ११ ख. ग. घ. च. छ. ज. ढ. °न्द्राभि° । १२ ख. ढ. °ध्यात्मप्रा° ।

जनार्थेति । शङ्कतेव विवृणोति—स्यादेतदित्यादिना । देवतायाः संबन्धाग्रहणमयुक्तं सर्वज्ञत्वादित्युत्तरमाह—न दृष्टेति । तदेव प्रपञ्चयति—यस्य ह्रीत्यादिना । अर्थेति ग्रहणकर्तृनिर्देशः । अवश्यमिति सूचितामनुपपत्तिमाह—अन्यथेति । आदिपदेन यागस्तुतिनमस्कारादि गृह्यते । संव्यवहारोऽभिज्ञानोपन्यासादिः ।

व्यतिरिक्तपक्षेऽप्यप्रतिपत्तेरयुक्तमिति चेत् । यस्य च प्राणव्यतिरिक्तो भोक्ता तस्यापि बृहन्नित्यादिनामभिः संबोधने बृहत्त्वादिनाम्नां तद्वाचित्वात्प्रतिपत्तिर्युक्ता । न च कदापि बृहत्त्वादिशब्दैः संबोधितः प्रतिपद्यमानो दृश्यते । तस्मादकारणमभोक्तृत्वे संबोधनाप्रतिपत्तिरिति चेत् । न । तद्वतस्तावन्मात्राभिमानानुपपत्तेः । यस्य प्राणव्यतिरिक्तो भोक्ता स प्राणादिकरणवान्प्राणी तस्य न प्राणदेवतामात्रेऽभिमानो यथा हस्ते । तस्मात्प्राणनामसंबोधने कृत्स्नाभिमानिनो युक्तैवाप्रतिपत्तिः । न तु प्राणस्यासाधारणनामसंयोगे ।

संबोधननामाग्रहस्तत्कृतानात्मत्वदोषश्च त्वदिष्टात्मनोऽपि तुल्य इति शङ्कते—व्यतिरिक्तेति । संगृह्णाति चोद्यं विवृणोति—यस्य चेति । तदा सुषुप्तिदशायां प्रतिपत्तिर्युक्तेति संबन्धः । तद्विषयत्वादित्यतिरिक्तात्मविषयत्वादिति यावत् । अस्त्येवातिरिक्तस्याऽऽत्मनः संबोधनशब्दश्रवणादिति चेन्नेत्याह—न च कदाचिदिति । त्वदिष्टात्मनः संबोधनशब्दाप्रतित्वापि भोक्तृत्वाङ्गीकारस्वच्छन्दार्थः । अभोक्तृत्वे प्राणस्येति शेषः । यथा हस्तः पादोऽङ्गुलिरित्यादिनामोक्तो वैश्वो नोत्तिष्ठति सर्वदेहाभिमानित्वेन तन्मात्राभिमानित्वादेवं काश्येष्टात्मनः सर्वकार्यकरणाभिमानित्वादङ्गुलिस्थानीयप्राणमात्रे तदभावात्तन्नामाग्रहणं न त्वचेतनत्वादिति परिहरति—न तद्वत इति । तदेव स्फुटयति—यस्येति । प्राणमात्रे प्राणादिकरणवतोऽभिमानाभावे फलितमाह—तस्मादिति । चन्द्रस्यापि प्राणैकदेशत्वात्तन्नामभिः संबोधने कृत्स्नाभिमानी स नोत्तिष्ठति । अत्राप्यङ्गुल्यादिदृष्टान्तोपपत्तेरित्याशङ्क्याऽऽह—न त्विति । गोत्ववत्तस्य सर्ववस्तुषु समाप्तेरहमिति सर्वनामाभिमानसंभवाच्चन्द्रनामोक्तावपि नाप्रतिपत्तिर्युक्तेत्यर्थः ।

देवतात्मत्वानाभिमानाच्चाऽऽत्मनः । स्वनामप्रयोगेऽप्यप्रतिपत्तिदर्शनादयुक्तमिति चेत् । सुषुप्तस्य यल्लौकिकं देवदत्तादि नाम तेनापि संबोध्यमानः कदाचिन्न प्रतिपद्यते सुषुप्तस्तथा भोक्ताऽपि सन्प्राणो न

---

१ घ. ङ. °कत्वमि° । २ क. ख. ढ. °त्मदो° । ३ घ. ञ. ण. °त्वादति° । ४ ख. ड. नामप्र° । ५ ग. च. सुप्त° । ६ ग. च. ढ. सुप्त° ।

प्रतिपद्यत इति चेत्। न। आत्मप्राणयोः सुप्तात्मविशेषोपपत्तेः। सुषुप्तत्वात्प्राणग्रस्ततयोपरतकरण आत्मा स्वनाम प्रयुज्यमानमपि न प्रतिपद्यते। न तु तदनुग्रस्य प्राणस्य भोक्तृत्व उपरतकरणत्वं संबोधनाग्रहणं वा युक्तम्।

बाधवच्चिदात्मनोऽपि पूर्वंतथा सर्वात्माभिमानसिद्धेर्बोधाबोधा तुल्यावित्याशङ्क्याऽऽह—देवतेति। विशिष्टस्याऽऽत्मनो देवतायामात्मत्वाभिमानाभावादितरस्य च कूटस्थस्याभिमात्रत्वेन तदयोगाच्च तुल्यतेत्यर्थः। प्रकारान्तरेण प्राणस्याभोक्तृत्वं वारयन्नाशङ्क्ते—स्वनामेति। अयुक्तं प्राणेतरस्य भोक्तृत्वमिति शेषः। तदेव विवृणोति—सुषुप्तस्येति। विशेषं दर्शयन्नुत्तरमाह—नाऽऽत्मेति। काश्याभीष्टात्मनः सुप्तत्वविशेषप्रयुक्तं फलमाह—सुषुप्तत्वादिति। प्राणस्यापि संहृतकरणत्वात्स्वनामाग्रहणमित्याशङ्क्य तस्यासुप्तत्वकृतं कार्यं कथयति—न त्विति। न हि करणस्वामिनि व्याप्रियमाणे करणोपरमः संभवति तस्य चानुपरतकरणस्य स्वनामाग्रहणमयुक्तमित्यर्थः।

अप्रसिद्धनामभिः संबोधनमयुक्तमिति चेत्। सन्ति हि प्राणविषयाणि प्रसिद्धानि प्राणादिनामानि। तान्यपोह्याप्रसिद्धबृहत्त्वादिनामभिः संबोधनमयुक्तं लौकिकन्यायापोहात्। तस्माद्भोक्तुरेव मतः प्राणस्याप्रतिपत्तिरिति चेन्न। देवताप्रत्याख्यानार्थत्वात्। केवलसंबोधनमात्राप्रतिपत्त्येवासुप्तस्याऽऽध्यात्मिकस्य प्राणस्याभोक्तृत्वे सिद्धे यच्चन्द्रदेवताविषयैर्नामभिः संबोधनं तच्चन्द्रदेवता प्राणोऽस्मिञ्छरीरे भोक्तेति गार्ग्यस्य विशेषप्रतिपत्तिनिराकरणार्थम्। न हि तल्लौकिकनाम्ना संबोधने शक्यं कर्तुम्।

प्राणनामत्वेनाप्रसिद्धनामभिः संबोधनात्तुल्यानं नानात्मत्वादिति शङ्क्ते—अप्रसिद्धेति। तदेव स्पष्टयति—सन्ति हीति। प्रसिद्धमनूद्याप्रसिद्धं विधयमिति लौकिको न्यायः। अप्रसिद्धसंज्ञाभिः संबोधनस्यायुक्तत्वे फलितमाह—तस्मादिति। चन्द्रदेवताऽस्मिन्देहे कर्त्री भोक्त्री चाऽऽत्मेति गार्ग्यामिप्रायनिषेधे देवतानामग्रहस्य तात्पर्यात्तद्ग्रहोऽर्थवानिति परिहरति—न देवतेति। तदेव प्रपञ्चयति—केवलेति। प्राणादिनामभिः संबोधनेऽपि तन्निराकरणं कर्तुं शक्यमित्याशङ्क्याऽऽह—न हीति। लौकिकनाम्ना देवताविषयत्वाभावादित्यर्थः।

---

१ घ. सुप्तात्सुषुप्त°। २ क. ग. ङ. छ. झ. ट. सुप्त°। ३ क. ख. ग. छ. °त्मा स्व मा°। ४ म. च. युज्यते। ठ. युज्येत। नन्वप्र°। ५ ञ. °र्णरूपत°। ६ ञ. ञ. °र्वामि°। ७ ञ. °माने सिद्धे बोधा°। ८ ञ. ञ. सुप्त°। ९ च. ठ. °पत्तेरेवा°। १० ख. घ. ङ. ट. °र्त्वं सिद्ध°। ११ घ. ञ. °ख्यान।

प्राणप्रस्त्वात्स्यामेव प्राणप्रस्तत्वात्करणान्तराणां प्रवृत्त्यनुपपत्तेर्भोक्तृत्वाशङ्कानुपपत्तिः। देवतान्तराभावाच्च। नन्वस्तिष्ठा इत्याद्यात्मन्यन्तर्यन्तेन ग्रन्थेन गुणवद्देवतामेदस्य दर्शितत्वादिति चेन्न। तस्य प्राण एवैकत्वाभ्युपगमात्सर्वश्रुतिष्वरनाभिनिदर्शनेन। सरसेन च्छन्नः प्राणो वा अमृतमिति च प्राणबाह्यस्याभ्यस्थानभ्युपगमाद्वोक्तुः। एष उ ह्येव सर्वे देवाः कतम एको देव इति प्राण इति च। सर्वदेवानां प्राण एवैकत्वोपपादनाच्च।

प्राणस्याभोक्तृत्वेऽपीन्द्रियाणां भोक्तृत्वमिति केचित्तान्प्रत्याह—प्राणेति। प्राणकरणचन्द्रदेवतानामभोक्तृत्वेऽपि देवतान्तरमत्र भोक्तृ स्यादित्याशङ्क्याऽऽह—देवतान्तराभावाच्चेति। भोक्तृत्वाशङ्कानुपपत्तिरिति पूर्वेण संबन्धः। तत्रोपक्रमविरोधं शङ्कते—नन्विति। दर्शितत्वाद्देवतान्तराभावो नास्तीति शेषः। स्वतन्त्रो देवतामेदो नास्तीति समाधत्ते—न तस्येति। देवतामेदस्यैक्ये युक्तिमाह—अरनामीति। न देवतान्तरस्य भोक्तृत्वं गार्ग्यस्य स्वपक्षविरोधादिति शेषः। सर्वमुक्तिष्वित्युक्तं ताः संक्षेपतो दर्शयति—एष इति। कति देवा याज्ञवल्क्येत्यादिना संक्षेपविस्तराभ्यां सर्वेषां देवानां प्राणात्मन्येवैकत्वमुपपाद्यते। अतो न देवतामेदोऽस्तीत्याह—सर्वदेवानामिति। प्राणात्पृथग्भूतस्य देवस्याऽऽत्मातिरेके सत्यसत्त्वात्तेन प्राणान्वयाभावः सर्वदेवतामेदस्येति वक्तुं चशब्दः।

तथा करणभेदेष्वनाशङ्का। देहभेदेष्विव स्मृतिज्ञानेच्छादिप्रतिसंधानानुपपत्तेः। न ह्यन्यदृष्टमन्यः स्मरति जानातीच्छति प्रतिसंदधाति वा। तस्माच्च करणभेदविषये भोक्तृत्वाशङ्का विज्ञानमात्रविषया वा कदाचिदप्युपपद्यते।

करणानामभोक्तृत्वे हेत्वन्तरमाह—तथेति। देवतामेदेष्विवेति यावत्। अनाशङ्क्य भोक्तृत्वस्येति शेषः। तत्रोदाहरणान्तरमाह—देहभेदेष्विवेति। न हि हस्तादिषु प्रत्येकं भोक्तृत्वं शङ्क्यते। तथा श्रोत्रनेत्रादिष्वपि न भोक्तृत्वाशङ्का युक्ता। नन्वस्मृतिरूपज्ञानस्येच्छाया योऽहं रूपमदार्क्षं न शब्दं शृणोमीत्यादिसंधानस्य चायोगादित्यर्थः। अनुपपत्तिमेव स्फुटयति—न हीति। क्षणिकविज्ञानस्य निराश्रयस्य भोक्तृत्वाशङ्कायामपि मतिसंधानानुपपत्तिमेवादेव प्रत्युक्तेत्याह—विज्ञानेति।

ननु संघात एवास्तु भोक्ता किं व्यतिरिक्तकल्पनयेति। नैं। आपेक्षिकविशेषदर्शनात्। यदि हि प्राणशरीरसंघातमात्रो भोक्ता स्यात्संघात-

---

१ क. ख. छ. ट. °नेन प्रा°। २ क. ग. ङ. च. छ. ज. झ. °न गु। ३ ख. ट. त्वाच्चक्रमिति। क. ग. छ. °त्वाद्युक्तमिति। च. ज. झ. °त्वात्। न त°। ४ च. °वया भो°।

मात्राविशेषात्सदाऽऽविष्टस्यानाविष्टस्य च प्रतिबोधे विशेषो न स्यात् । संघातव्यतिरिक्ते तु पुत्रभोक्तरि संघातसंबन्धविशेषानेकत्वात्सेषणाऽपेषणकृतवेदनायाः सुखदुःखमोहमध्यमाधमोत्तमकर्मफलभेदोपपत्तेश्च विशेषो युक्तो न तु संघातमात्रे संबन्धकर्मफलभेदानुपपत्तेर्विशेषो युक्तः ।

प्राणादीनामनात्मत्वमुक्त्वा स्थूलदेहस्य तदुक्तुं पूर्वपक्षयति—नन्विति । संघातो भूतचतुष्टयसमाहारः स्थूलो देह इति यावत् । गौरोऽहं पश्यामीत्यादिप्रत्यक्षेण तस्याऽऽत्मत्वबुद्धेरिति भावः । प्रमाणाभावादतिरिक्तकल्पना न युक्तेत्याह—किं व्यतिरिक्तेति । संघातस्याऽऽत्मत्वं दूषयति—नाऽऽपेषण इति । विशेषदर्शनं व्यतिरेकद्वारा विशदयति—यदि हीति । प्राणेन सहितं स्थूलं शरीरमेव संघातस्तन्मात्रो यदि भोक्ता स्यादिति योजना । स्वत्पक्षेऽपि कर्त्रेषणापेषणयोरुत्थाने विशेषः स्यादित्याशङ्क्याऽऽह—संघातेति । तस्य संघातेन संबन्धविशेषाः स्वकर्मारम्भत्वात्भोग्यत्वस्वप्राणपरिपाल्यत्वादयस्तेषामनेकत्वात्सेषणापेषणयोरिन्द्रियोद्भवाभिभवकृतवेदनायाः स्फुटत्वात्मको विशेषो युक्तः सुखदुःखमोहानामुत्तममध्यमाधमकर्मफलानां कर्मोद्भवाभिभवकृतविशेषसंभवाच्च यथोक्तो विशेषः संभवतीत्यर्थः । परपक्षेऽपि तथैव विशेषः स्यादित्याशङ्क्याऽऽह—न त्विति । न हि तत्र स्वकर्मारम्भत्वादयः संबन्धविशेषाः कर्मफलभेदो वा युज्यते । संघातवादिनाऽतीन्द्रियकर्मानङ्गीकारात् । अतः संघातमात्रे भोक्तरि प्रतिबोधे विशेषाप्रसिद्धिरित्यर्थः ।

तथा शब्दादिपटुमान्द्यादिकृतश्च । अस्ति चायं विशेषो यस्मात्स्पर्शमात्रेणाप्रतिबुध्यमानं पुरुषं सुप्तं पाणिनाऽऽपेषमापिष्याऽऽपिष्य बोधयाचकाराजातशत्रुः । तस्माच्च आपेषणेन प्रतिबुद्धे ज्वलन्निव स्फुरन्निव कृतश्चिदागत इव पिण्डं च पूर्वविपरीतं बोधचेष्टाकारविशेषादिमत्त्वेनाऽऽपादयन्सोऽन्योऽस्ति भार्म्याभिमतब्रह्मभ्यो व्यतिरिक्त इति सिद्धम् ।

शब्दस्पर्शादीनां पटुत्वमतिपटुत्वं मान्द्यमतिमान्द्यमित्येवमादिना कृतो विशेषो बोधे दृश्यते सोऽपि संघातवादे न सिध्यतीत्याह—तथेति । अयुक्त इति यावत् । चकारो विशेषानुकर्षणार्थः । मा तर्हि प्रतिबोधे विशेषो भूदित्याशङ्क्याऽऽह—अस्ति चेति । विशेषदर्शनफलमाह—तस्मादिति । आदिशब्देन गुणादि गृह्यते । अन्यः संघातादिति शेषः ।

संहतत्वाच्च पारार्थ्योपपत्तिः प्राणस्य । गृहस्य स्तम्भादिवच्छरी-

---

१ ख. ढ. °षात्तदा° । २ ङ. °बुद्धो ज्व° । ३ क. °त्याशयेनाऽऽह । ४ क. ढ. °कर्षार्थः । ५ ग. ङ. च. छ. ज. ढ. °हस्त° ।

रस्यान्तरुपष्टम्भकः प्राणः शरीरादिभिः संहत इत्यवोचाम । अरनेमिवच्च । नाभिस्थानीय एतस्मिन्सर्वमिति च । तस्माद्गृहादिवत्स्वावयवसमुदायैर्जातीयव्यतिरिक्तार्थं संहन्यत इत्येवमवगच्छाम ।

देहादेरनात्मत्वमुक्त्वा प्राणस्यानात्मत्वे हेत्वन्तरमाह—संहतत्वाच्चेति । हेतुं साधयति—गृहस्येति । यथा नेमिरराश्च मिथः संहन्यन्ते तथैव प्राणस्य संहतिरित्याह—अरनेमिवच्चेति । किंच प्राणे नाभिस्थानीये सर्वं तमर्पितमिति श्रूयते तद्युक्तं तस्य संहतत्वमित्याह—नाभीति । संहतत्वफलमाह—तस्मादिति ।

स्तम्भकुड्यतृणकाष्ठादिगृहावयवानां स्वात्मजन्मोपचयापचयविनाशनामाकृतिकार्यधर्मनिरपेक्षलब्धसत्तादितद्विषयद्रष्टृश्रोतृमन्तृविज्ञात्रर्थत्वं दृष्ट्वा मन्यामहे तत्संघातस्य च तथा प्राणाद्यवयवानां तत्संघातस्य च स्वात्मजन्मोपचयापचयविनाशनामाकृतिकार्यधर्मनिरपेक्षलब्धसत्तादितद्विषयद्रष्टृश्रोतृमन्तृविज्ञात्रर्थत्वं भवितुमर्हतीति ।

प्राणस्य गृहादिवत्पारार्थ्येऽपि संहतत्वेशितृत्वमेषितव्यं गृहादेस्तथा दर्शनादित्याङ्कयाऽऽह—स्तम्भेति । स्वात्मनां स्तम्भादीनां जन्म चोपचयश्चापचयश्च विनाशश्च नाम चाऽऽकृतिश्च कार्यं चेत्येते धर्मास्तन्निरपेक्षतया लब्धा सत्ता स्फुरणं च येन स च तेषु स्तम्भादिषु विषयेषु द्रष्टा च श्रोता च मन्ता च विज्ञाता च तदर्थत्वं तेषां तत्संघातस्य च दृष्ट्वा प्राणादीनामपि तथात्वं भवितुमर्हतीति मन्यामह इति संबन्धः । प्राणादिः स्वातिरिक्तदृष्टृशेषः संहतत्वाद्गृहादिवदित्यनुमानात्तत्तार्थ्यं तत्पतिश्च प्राणादिविक्रियानपेक्षतया सिद्धो द्रष्टा निर्विकारो युक्तस्तस्य विकारवत्त्वे हेत्वभावादिति भावः ।

देवताचेतनावत्त्वे समत्वादगुणभावानुपगम इति चेत् । प्राणस्य विशिष्टैर्नामभिरामन्त्रणदर्शनाच्चेतनावत्त्वमभ्युपगतम् । चेतनावत्त्वे च पारार्थ्योपगमः समत्वादनुपपन्न इति चेन्न । निरुपाधिकस्य केवलस्य विजिज्ञापयिषितत्वात् ।

प्राणदेवतापारार्थ्यानुमानं व्याप्त्यन्तरविरुद्धमिति शङ्कते—देवतेति । प्राणदेवतापक्षेचेतनत्वमेव कथमभ्युपगतं तत्राऽऽह—प्राणस्येति । तथाऽपि पक्षेऽनुमाने कथं व्याप्त्यन्तरविरोधस्तत्राऽऽह—चेतनावत्त्वे चेति । यो येन समः स

---

१ ग. ङ. च. ढ. °नीये तं । २ घ. ङ. ज. झ. °द्यात्मजा° । ३ ग. °यत्सजा° । ४ क. ख. घ. ङ. छ. ञ. झ. ढ. °गच्छेमहि । स्त° । ५ क. ग. घ. ङ. छ. ञ. झ. °पक्षय° । ६ क. ग. घ. ङ. छ. ञ. झ. °पक्षय° । ७ घ. ञ. ञ. °पक्षय° । ८ घ. ङ. ञ. ञां प्रती° । ९ घ. ञ. ञो हि वे° ।

तच्छेषो न भवति । यथा दीपो दीपान्तरेण तुल्यो न तच्छेष इति व्याप्तिविरोधः स्यादित्यर्थः । नायं विरोधः समाधातव्यः शेषशेषिभावस्यात्रापतिपाद्यत्वादिति परिहरति—न निरुपाधिकस्येति ।

क्रियाकारकफलात्मकता ह्यात्मनो नामरूपोपाधिजनिताऽविद्याध्यारोपिता । तन्निमित्तो लोकस्य क्रियाकारकफलाभिमानलक्षणः संसारः स निरुपाधिकात्मस्वरूपविद्यया निवर्तयितव्य इति तत्स्वरूपविजिज्ञापयिषयोपनिषदारम्भः । ब्रह्म ते ब्रवाणि नैतावता विदितं भवतीति चोपक्रम्यैतावदरे खल्वमृतत्वमिति चोपसंहारात् । न चाताऽन्यदन्तराले विवक्षितमुक्तं वाऽस्ति । तस्मादनवसरः ममत्वाद्गुणभावानुपगम इति चोद्यस्य ।

तदेव स्फुटयति—क्रियेत्यादिना । उपनिषदारम्भो निरुपाधिकं स्वरूपं ज्ञापयितुमित्यत्र गमकमाह—ब्रह्मेति । द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं चेत्यादिदर्शनादस्यामुपनिषदि सोपाधिकमपि ब्रह्म विवक्षितमित्याशङ्क्याऽऽह—न चेति । द्वित्ववादस्य कल्पितविषयत्वान्नेति नेतीति निर्विशेषवस्तुसमर्पणादतोऽन्यदार्तमिति चोक्तेरत्र निरुपाधिकमेव ब्रह्म प्रतिपाद्यमिति भावः । शेषशेषिभावस्यापतिपाद्यत्वे फलितमाह—तस्मादिति ।

विशेषवतो हि सोपाधिकस्य संव्यवहारार्थो गुणगुणिभावो न विपरीतस्य । निरुपाख्यो हि विजिज्ञापयिषितः सर्वस्यामुपनिषदि । स एष नेति नेतीत्युपसंहारात् । तस्मादादित्यादिब्रह्मभ्य एतेभ्योऽविज्ञानमयेभ्यो विलक्षणोऽन्योऽस्ति विज्ञानमय इत्येतत्सिद्धम् ॥ १५ ॥

किमर्थं तर्हि शेषशेषिभावस्तत्र तत्रोक्तस्तत्राऽऽह—विशेषवतो हीति । सोपाधिकस्य शेषशेषिभावो विवक्षितस्तत्र च स्वामिभृत्यन्यायेन विशेषसंभवादासिद्धं समत्वमित्यर्थः । न विपरीतस्य निरुपाधिकस्य शेषशेषित्वमस्तीत्यत्र हेतुमाह—निरुपाख्यो हीति । शेषशेषित्वाद्यशेषशून्य इत्यर्थः । पाणिपेषवाक्यविचारार्थं संक्षिप्योपसंहरति—आदित्यादीति ॥ १५ ॥

स होवाचाजातशत्रुर्यत्रैष एतत्सुप्तोऽभूद्य एष
विज्ञानमयः पुरुषः कैष तदाऽभूत्कुत एतदागादिति तद्ध न मेने गार्ग्यः ॥ १६ ॥

---

१ ग. घ. ङ. च. ज. ट. °तीत्युप° । २ घ. ञ ण. °यत्वान्ने° । ३ ग. घ. ङ. च. छ. ज. झ. °पाख्यस्य । ४ ग. ङ. °त् । आदि° । ५ क. ख ट. न च वि° । ६ ट. णः 'षणवा° ।

स एवमजातशत्रुर्व्यतिरिक्तात्मास्तित्वं प्रतिपाद्य गार्ग्यमुवाच । यत्र यस्मिन्काल एव विज्ञानमयः पुरुष एतत्स्वपनं सुप्तोऽभूत्प्राक्पाणिपेषप्रतिबोधात । विज्ञायतेऽनेनेत्यन्तःकरणं बुद्धिरुच्यते तन्मयस्तत्प्रायो विज्ञानमयः । किं पुनस्तत्प्रायत्वम् । तस्मिन्नुपलभ्यत्वं तेन चोपलभ्यत्वमुपलब्धृत्वं च । कथं पुनर्मयटोऽनेकार्थत्वे प्रायार्थतैवावगम्यते । स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमय इत्येवमादौ प्रायार्थ एव प्रयोगदर्शनात्परविज्ञानविकारत्वस्याप्रसिद्धत्वाच्च एष विज्ञानमय इति च प्रसिद्धवदनुवादादवयवोपमार्थयोश्चात्रासंभवात्पारिशेष्यात्प्रायार्थतैव । तस्मात्संकल्पविकल्पाद्या मकमन्तःकरणं तन्मय इत्येतत् । पुरुषः पुरि शयनात् ।

वृत्तमनूद्यानन्तरग्रन्थमवतार्य व्याचष्टे—स एवमित्यादिना । एतत्स्वपनं यथा भवति तथेति यावत् । यत्रेत्युक्तं कालं विशिनष्टि—प्रागिति । तदा कोऽभूदिति संबन्धः । विज्ञानमय इत्यत्र विज्ञानं परं ब्रह्म तद्विकारो जीवस्तेन विकारार्थे मयडिति केचित्तान्निराकरोति—विज्ञानमिति । अन्तःकरणप्रायत्वमात्मनो न प्रकल्प्यते तस्यासङ्गस्य तेनासंबन्धादित्याक्षिपति—किं पुनरिति । असङ्गस्याप्यविद्यं बुद्ध्यादिसंबन्धमुपेत्य परिहरति—तस्मिन्निति । तत्साक्षित्वाच्च तत्प्रायत्वमित्याह—उपलब्धृत्वं चेति । नियामकाभावं शङ्कित्वा परिहरति—कथमित्यादिना । एकस्मिन्नेव वाक्ये पृथिवीमय इत्यादौ प्रायार्थत्वोपलम्भाद्विज्ञानमय इत्यत्रापि तदर्थत्वमेव मयटो निश्चितमित्युक्तमिदानीं जीवस्य परमात्मरूपविज्ञानविकारत्वस्य श्रुतिस्मृत्योरप्रसिद्धत्वाच्च प्रायार्थत्वमेवेत्याह—परेति । अप्रसिद्धमपि विज्ञानविकारत्वं श्रुतिर्वशादिष्यतामित्याशङ्क्याऽऽह—य एष इति । य एष विज्ञानमय इत्यत्र विज्ञानमयस्यैव इति प्रसिद्धवदनुवादादप्रसिद्धविज्ञानविकारत्वं सर्वनामश्रुतिविरुद्धमित्यर्थः । जीवो ब्रह्मावयवस्तत्तदृशो वा तदर्थो मयडित्याशङ्क्याऽऽह—अवयवेति । ब्रह्मणो निरवयवत्वश्रुतेस्तस्यैव जीवरूपेण प्रवेशश्रवणाच्च प्रकृते वाक्ये मयटोऽवयवार्थयोगान्निर्विषयत्वासंभवाच्च पारिशेष्यात्पूर्वोक्ता प्रायार्थतैव तस्य प्रत्येतव्येत्यर्थः । विज्ञानमयपदार्थमुपसंहरति—तस्मादिति ।

कथं तदाऽभूदिति प्रश्नः स्वभावविजिज्ञापयिषया । प्राक्प्रतिबोधात्क्रियाकारकफलविपरीतस्वभाव आत्मेति कार्याभावेन विदर्शयिषितम् । न हि प्राक्प्रतिबोधात्कर्मादिकार्यं सुखादि किंचन गम्यते । तस्मादकर्म-

१ घ. च. च. ढ. 'ग बोध° । २ घ. प्राचुर्यार्थ° । ३ क. ठ. ण. °चित्तान्नि° । ४ ण. °विषलादि° ।

प्रयुक्तत्वात्तथास्वाभाव्यमेवाऽऽत्मनोऽवगम्यते यस्मिन्स्वाभाव्येऽभूत् । यतश्च स्वाभाव्यात्प्रच्युतः संसारी स्वभावविलक्षण इत्येतद्विवक्षया पृच्छति गार्ग्यं प्रतिभानरहितं बुद्धिव्युत्पादनाय । क्वैष तदाऽभूत्कुत एतदागादित्येतदुभयं गार्ग्येणैव प्रष्टव्यमासीत्तथाऽपि गार्ग्येण न पृष्टमिति नोदास्तेऽजातशत्रुर्बोधयितव्य एवेति प्रवर्तते । ज्ञापयिष्याम्येवेति प्रतिज्ञातत्वात् । एवमसौ व्युत्पाद्यमानोऽपि गार्ग्यो यत्रैष आत्माऽभूत्प्राक्प्रतिबोधाद्यतश्चैतदागमनमागात्तदुभयं न व्युत्पेदे वक्तुं वा प्रष्टुं वा गार्ग्यो ह न मेने ज्ञातवान् ॥ १६ ॥

यत्रेत्यादि व्याख्याय वाक्यशेषमवतार्य तात्पर्यमाह—क्वैष इति । स्वरूपज्ञापनार्थं प्रश्नप्रवृत्तिरित्येतत्प्रकटयति—प्रागिति । कार्याभावेनेत्युक्तं व्यनक्ति—न हीति । तस्मादित्यस्यार्थमाह—अक्रमप्रयुक्तत्वादिति । किं तथास्वाभाव्यमिति तदाह—यस्मिन्निति । द्वितीयपदार्थं संक्षिपति—यतश्चेति । उक्तेऽर्थे प्रश्नद्वयमुत्थापयति—एतदिति । तथास्वाभाव्यमेवेति संबन्धः । एतदित्यधिकरणमपादानं च गृह्यते । किमिति तं प्रत्युभय पृच्छ्यते स्वकीयां प्रतिज्ञां निर्वोढुमित्यभिप्रेत्याऽऽह—बुद्धीति । ननु शिष्यत्वाद्गार्ग्येणैव प्रष्टव्यं स चेदज्ञत्वान्न पृच्छति तर्हि राज्ञस्तस्मिन्नौदासीन्यमेव युक्तं तत्राऽऽह—इत्येतदुभयमिति । तदु हेत्यादि व्याकरोति—एवमिति । एतदागमनं यथा भवति तथेति यावत् । तत्र क्रियापदयोर्यथाक्रमं वक्तुं प्रष्टुं वेत्याभ्यां संबन्धः ॥ १६ ॥

स होवाचाजातशत्रुर्यत्रैष एतत्पुरुषोऽभूद्य एष विज्ञानमयः पुरुषस्तदेषां प्राणानां विज्ञानेन विज्ञानमादाय य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते तानि यदा गृह्णात्यथ हैतत्पुरुषः स्वपिति नाम तद्गृहीत एव प्राणो भवति गृहीता वाग्गृहीतं चक्षुर्गृहीतꣳ श्रोत्रं गृहीतं मनः ॥ १७ ॥

स होवाचाजातशत्रुर्विवक्षितार्थसमर्पणाय । यत्रैष एतत्पुरुषोऽभूद्य

---

१ ध. ङ. च. ज. °तः स सं° । २ क. ख. ध च. छ. ज. ढ °ते । ज्ञप° । ३ ध. ञ. ण. °त्यस्यैवार्थ° । ४ घ. ञ. ण. °कीयप्र° ।

एष विज्ञानमयः पुरुषः कैष तदाऽभूत्कुत एतदागादिति यदपृच्छाम तच्छृणूच्यमानं यत्रैष एतत्सुप्तोऽभूत्तत्तदा तस्मिन्काले एषां वागादीनां प्राणानां विज्ञानेनान्तःकरणगताभिव्यक्तिविशेषविज्ञानेनोपाधिस्वभावजनितेनाऽऽदाय विज्ञानं वागादीनां स्वस्वविषयगतसामर्थ्यं गृहीत्वा य एषोऽन्तर्मध्ये हृदये हृदयस्याऽऽकाशो य आकाशशब्देन पर एव स्व आत्मोच्यते तस्मिन्स्व आत्मन्याकाशे शेते स्वाभाविकेऽसांसारिके न केवल आकाश एव श्रुत्यन्तरसामर्थ्यात्समता सौम्य तदा संपन्नो भवतीति । लिङ्गोपाधिसंबन्धकृतं विशेषात्मस्वरूपमुत्सृज्याविशेष स्वाभाविक आत्मन्येव केवले वर्तत इत्यभिप्रायः ।

कूटस्थचिदेकरसोऽयमात्मा तत्र क्रियाकारकफलव्यवहारो वस्तुतो नास्तीति विवक्षितोऽर्थस्तस्य प्रकटीकरणार्थं प्रस्तुतं प्रश्नद्वयमनुवदति—यत्रेति । उपाधिरन्तःकरणं तस्य स्वभावस्तदुपादानमज्ञानं तेन जनितमन्तःकरणगतमभिव्यक्तं विशेषविज्ञान चैतन्याभासलक्षणं तेन करणेनेत्यर्थः । वागादीनां स्वस्वविषयगतं प्रतिनियतं प्रकाशनसामर्थ्यं विज्ञानमित्यर्थः । य एषोऽन्तरिति प्रतीकमादाय व्याचष्टे—मध्य इति । आकाशशब्दस्य भूताकाशविषयत्वमाशङ्क्याऽऽकाशोऽर्थान्तरत्वादिव्यपदेशादिति न्यायेनाऽऽह—आकाशशब्देनेति । सद्रूपे ब्रह्मण्येव सुषुप्तस्य शयनं भूताकाशे तु न भवतीत्यत्र च्छान्दोग्यश्रुतिसंमतिमाह—श्रुत्यन्तरेति । कीदृगत्र शयनं विवक्षितमित्याशङ्क्याऽऽह—लिङ्गेति । स्वापाधिकारे स्वाभाविकत्वमविद्यामात्रसंमिश्रितत्वं ' सति संपद्य न विदुः ' इत्यादिश्रुतेरिति दृष्टव्यम् ।

यदा शरीरेन्द्रियाध्यक्षतामुत्सृजति तदाऽसौ स्वात्मनि वर्तत इति कथमवगम्यते । नामप्रसिद्ध्या । काऽसौ नामप्रसिद्धिरित्याह—तानि वागादेर्विज्ञानानि यदा यस्मिन्काले गृह्णात्यादत्तेऽथ तदा हैतत्पुरुषः स्वपिति नाम । एतन्नामास्य पुरुषस्य तदा प्रसिद्धं भवति गौणमेवास्य नाम भवति स्वमेवाऽऽत्मानमपीत्यपिगच्छतीति स्वपितीत्युच्यते सत्यं स्वपितीतिनामप्रसिद्ध्याऽऽत्मनः संसारधर्मविलक्षणं रूपमवगम्यते न त्वत्र युक्तिरस्तीत्याशङ्क्याऽऽह—तत्तत्र स्वापकाले गृहीत एव प्राणो भवति । प्राण इति घ्राणेन्द्रियं वागादिप्रकरणात् । वागादिसंबन्धे हि सति तदुपाधित्वादस्य ससारधर्मित्वं लक्ष्यते । वागादयश्चोपसंहृता एव तदा तेन । कथम् । गृहीता वाग्गृहीतं चक्षुर्गृ-

---

१ ग. °पृच्छं त° । २ ख. सौम्य । ३ छ ज. झ. केवलं । ४ क. घ. ञ. ण. °नां स्वं स्वं वि° । ५ क. ख. ढ. °शनं विज्ञानसामर्थ्यमि° । ६ घ ञ. स्वपनं । ७ घ. ञ. ण °मिश्रत्वं । ८ क. घ. ङ. ज. झ. °गादिविज्ञा° । ख. °गादीनि विज्ञा । ९ ख. ङ °ग्रणरू° ।

हीतं श्रोत्रं गृहीतं मनः । तस्मादुपसंहृतेषु वागादिषु क्रियाकारकफलात्मतामापन्नात्स्वात्मस्थ एवाऽऽत्मा भवतीत्यवगम्यते ॥ १७ ॥

तानि यदेत्यादिवाक्यमाकाङ्क्षापूर्वकमादत्ते—यदेत्यादिना । विज्ञानानि तत्साधनानीत्येतत् । पुरुष इति प्रथमा षष्ठ्यर्थेऽनो वक्ष्यति—अस्य पुरुषस्येति । अश्वकर्णादिनाम्नो विशेषमाह—गौणमेवेति । गौणत्वं व्युत्पादयति—स्वमेवेति । नाम्नोऽर्थव्यभिचारस्यापि दृष्टत्वान्न तद्बलात्स्वापे स्वरूपावस्थानमिति शङ्कामनूद्य तद्गृहीत एवेत्यादि वाक्यमुत्थाप्य व्याचष्टे—सत्यमित्यादिना । का पुनरात्मनः स्वापावस्थायामसंसारिस्वरूपेऽवस्थानमित्यत्र युक्तिरिहोक्ता भवति तत्राऽऽह—वागादीति । तदा सुषुप्त्यवस्थायां तेनाऽऽत्मना चैतन्याभासेन हेतुनेत्यर्थः । स्वापे करणोपसंहारं विवृणोति—कथमित्यादिना । तदुपसंहारफलं कथयति—तस्मादिति ॥ १७ ॥

स यत्रैतत्स्वप्न्यया चरति ते हास्य लोकास्तदुतेव महाराजो भवत्युतेव महाब्राह्मण उतेवोच्चावचं निगच्छति स यथा महाराजो जानपदान्गृहीत्वा स्वे जनपदे यथाकामं परिवर्तेतैवमेवैष एतत्प्राणान्गृहीत्वा स्वे शरीरे यथाकामं परिवर्तते ॥ १८ ॥

ननु दर्शनलक्षणायां स्वप्नावस्थायां कार्यकरणविधोगेऽपि संसारधर्मित्वमस्य दृश्यते । यथा च जागरिते सुखी दुःखी बन्धुवियुक्तः शोचति मुह्यते च । तस्माच्छोकमोहधर्मवानेवायं नास्य शोकमोहादयः सुखदुःखादयश्च कार्यकरणसंयोगजनितभ्रान्त्याऽध्यारोपिता इति । न मृषात्वात्तु । स प्रकृत आत्मा यत्र यस्मिन्काले दर्शनलक्षणया स्वप्न्यया स्वप्नवृत्त्या चरति वर्तते तदा ते हास्य लोकाः कर्मफलानि । के ते । तत्तत्रोतापि महाराज इव भवति । सोऽयं महाराजत्वमिवास्य लोको न महाराजत्वमेव जागरित इव । तथा महाब्राह्मण इवोताप्युच्चावचमुच्चं च देवत्वाद्यवचं च तिर्यक्त्वाद्युच्चावचमिवावचमिव च निगच्छति ।

---

१ म. च. ढ. °त्मकता° । २ ख. ढ. °पे पुरुषेऽव° । ३ ख. ज. °र्यकार° । ४ घ. ज. ज. °र्यकार° । ५ क. ग. च. °भ्रान्त्यध्या° । ६ क. °त्वात्स्वप्नस्य । स ।

अन्वयव्यतिरेकाभ्यां रागाद्युपाधिकमात्मन. संसारित्वमुक्तं तत्र व्यतिरेकासिद्धिमाशङ्कते—नन्विति । व्यतिरेकासिद्धौ फलितमाह—तस्मादिति । स्वप्नस्य रज्जुसर्पवन्मिथ्यात्वे वस्तुधर्मत्वाभावान्नाऽऽत्मनः संसारित्वमित्युत्तरमाह—न मृषात्वादिति । तदुपपादयन्नादौ स यत्रेत्यादीन्यक्षराणि योजयति—स प्रकृत इत्यादिना ।

मृषैव महाराजत्वादयोऽस्य लोका इवशब्दप्रयोगाच्चाभिचारदर्शनाच्च । तस्मान्न बन्धुवियोगादिजनितशोकमोहादिभिः स्वप्ने संबध्यत एव । ननु च यथा जागरिते जाग्रत्कालाभिचारिणो लोका एवं स्वप्नेऽपि तेऽस्य महाराजत्वादयो लोकाः स्वप्नकालभाविनः स्वप्नकालाभिचारिण आत्मभूता एव न त्वविद्याध्यारोपिता इति । ननु च जाग्रत्कार्यकरणात्मत्वं देवतात्मत्वं चाविद्याध्यारोपितं न परमार्थत इति व्यतिरिक्तविज्ञानमयात्मप्रदर्शनेन प्रदर्शितम् । तत्कथं दृष्टान्तत्वेन स्वप्नलोकस्य मृत इवोज्जीविष्यन्प्रादुर्भविष्यति । सत्यं विज्ञानमयेव्यतिरिक्ते कार्यकरणदेवतात्मत्वप्रदर्शनमविद्याध्यारोपितं शुक्तिकायामिव रजतत्वदर्शनमित्येतात्सिध्यति व्यतिरिक्तात्मास्तित्वंप्रदर्शनन्यायेनैव न तु तद्विशुद्धिपरतयैव न्याय उक्त इत्यसन्नपि दृष्टान्तो जाग्रत्कार्यकरणदेवतात्मत्वदर्शनलक्षणः पुनरुद्भाव्यते । सर्वो हि न्यायः किंचिद्विशेषमपेक्षमाणोऽपुनरुक्तो भवति ।

अथात्र स्वप्नस्वभावो निर्दिश्यते न तस्य मिथ्यात्वं कथ्यते तत्राऽऽह—मृषेवेति । स्वप्ने दृष्टानां महाराजत्वादीनां जाग्रत्यनुवृत्तिराहित्य व्यभिचारदर्शनम् । स्वप्नस्य मिथ्यात्वे सिद्धमर्थमाह तस्मादिति । विमता लोका न मिथ्या तत्कालव्यभिचारित्वाज्जाग्रल्लोकवदिति शङ्कते—ननु च यथेति । साध्यवैकल्यं वक्तुं सिद्धान्ती पाणिपेषवाक्योक्तं स्मारयति—ननु चेति । जाग्रल्लोकस्य मिथ्यात्वे फलितमाह—तत्कथमिति । प्रादुर्भावे जाग्रल्लोकस्य कर्तृत्वं प्राकरणिकमेष्टव्यम् । तत्र पूर्ववादी दृष्टान्तं साधयति—सत्यमित्यादिना । अन्वयव्यतिरेकाख्यो न्यायः । देहद्वयस्याऽऽत्मनश्च विवेकमात्रं प्रागुक्तं न तु प्राधान्येनाऽऽत्मनः शुद्धिरुक्तेति विभागमङ्गीकृत्य वस्तुतोऽसन्तमपि दृष्टान्तं सन्तं कृत्वा तेन स्वप्नसत्य-

---

१ घ. ञ. ण. °सर्पादिव° । २ ग. घ. ङ. छ. ज झ. °पि° तस्य । ३ ग. घ. च ज. ढ. °त्मकत्वं । ४ क. ग. छ °र्थ इ° । ५ ख. ग. ङ. च. ढ. °त्मद° । ६ क. ख. °न द° । ७ ग. च. ज. ढ. °त्मद° । ८ ग. ङ. च. ढ. °त्वद° । ९ ख. °रत्वे न्या° । १० ख ङ. °रुक्तो भ° । ११ ख. ढ. ण. °षणवा° ।

त्वमाशङ्क्य तन्निरासेनाऽऽत्यन्तिकी शुद्धिरात्मनः स्वमवाक्येनोच्यते तथा च जाग्रतोऽपि तथा मिथ्यात्वात्मैकरसः शुद्धः स्यादित्याशयवानाह–इत्यसन्नपीति । पाणिपेषवाक्ये जाग्रन्मिथ्यात्वोक्त्याऽर्थादुक्ता शुद्धिरत्रापि सैवोच्यते चेत्पुनरुक्तिरित्याशङ्क्याऽऽह–सर्वो हीति । यत्किंचित्सामान्यात्पौनरुक्त्यं सर्वत्र तुल्यम् । अवान्तरभेदादपौनरुक्त्यं प्रकृतेऽपि समं पूर्ववत्र शुद्धिद्वारस्याऽऽर्थिकत्वादिह वाचनिकत्वादिदिति भावः ।

न तावत्स्वप्नेऽनुभूतमहाराजत्वादयो लोका आत्मभूताः । आत्मनोऽन्यस्य जाग्रत्प्रतिबिम्बभूतस्य लोकस्य दर्शनात् । महाराज एव तावद्व्यस्तसुप्तासु प्रकृतिषु पर्यङ्के शयानः स्वप्नान्पश्यन्नुपसंहृतकरणः पुनरुपगतप्रकृतिं महाराजमिवाऽऽत्मानं जागरित इव पश्यति यात्रागतं भुञ्जानमिवं च भोगान् । न च तस्य महाराजस्य पर्यङ्के शयनाद्द्वितीयोऽन्यः प्रकृत्युपेतो विषये पर्यटन्नहनि लोके प्रसिद्धोऽस्ति यमसौ सुप्तः पश्यति । न चोपसंहृतकरणस्य रूपादिमतो दर्शनमुपपद्यते । न च देहे देहान्तरस्य तत्तुल्यस्य संभवोऽस्ति । देहस्थस्यैव हि स्वप्नदर्शनम् ।

जाग्रद्दृष्टान्ते स्वप्नसत्यत्वचोद्यसंभवाद्वाच्यस्तस्य समाधिरिति पूर्ववादिमुखेनोक्त्वा समाधिमधुना कथयति–न तावदिति । विमता न द्रष्टुरात्मानो धर्मा वा तद्दृश्यत्वाद्घटादिवदित्यर्थः । किंच स्वप्नदृष्टानां जाग्रद्दृष्टादर्थान्तरत्वेन दृष्टेर्मिथ्यात्वमित्याह–महाराज इति । तेषां जाग्रद्दृष्टादर्थान्तरत्वमसिद्धमित्याशङ्क्याऽऽह–न चेति । प्रमाणसामग्र्यभावाच्च स्वप्नस्य मिथ्यात्वमित्याह–न चेति । योग्यदेशाभावाच्च तन्मिथ्यात्वमित्याह–न चेति । देहाद्बहिरेव स्वप्नदृष्टचङ्गीकाराद्योग्यदेशसिद्धिरित्याशङ्क्याऽऽह–देहस्थस्येति ।

ननु पर्यङ्के शयानः पथि प्रवृत्तमात्मानं पश्यति न बहिः स्वप्नान्पश्यतीत्येतदाह–स महाराजो जानपदाञ्जनपदे भवान्राजोपकरणभूतान्भृत्यानन्यांश्च गृहीत्वोपादाय स्व आत्मीय एव जयादिनोपार्जिते जनपदे यथाकामं यो यः कामोऽस्य यथाकाममिच्छातो यथा परिवर्तते-त्यर्थः । एवमेवैष विज्ञानमय एतदिति क्रियाविशेषणं प्राणान्गृहीत्वा जागरितस्थानेभ्य उपसंहृत्य स्वे शरीरे स्व एव देहे न बहिर्यथाकामं परिवर्तते । कामकर्मभ्यामुद्भासिताः पूर्वानुभूतवस्तुसदृशीर्वासना अनुभवतीत्यर्थः । तस्मात्स्वप्ने मृषाध्यारोपिता एवाऽऽत्मभूतत्वेन लोका

१ क. ख. °था जा° । २ घ. ञ. ण. °त्साम्यात्पौ° । ३ च. ढ. °व भो° । ४ ङ. सुपगतो । ५ क. ख. ढ. ण. °रात्मनो । ६ ख. धर्मास्तद्वद्द° ।

अविद्यमाना एव सन्तस्तथा जागरितेऽपीति प्रत्येतव्यम् । तस्माद्विशुद्धोऽक्रियाकारकफलात्मको विज्ञानमय इत्येतत्सिद्धम् । यस्माद्दृश्यन्ते द्रष्टुर्विषयभूताः क्रियाकारकफलात्मकाःकार्यकरणलक्षणा लोकास्तथा स्वप्नेऽपि । तस्मादन्योऽसौ दृश्येभ्यः स्वप्नजागरितलोकेभ्यो द्रष्टा विज्ञानमयो विशुद्धः ॥ १८ ॥

एतदेव साधयितुं शङ्कयति—नन्विति । तत्र स यथेत्यादिवाक्यमुत्तरत्वेनावतार्य व्याचष्टे—न बहिरित्यादिना । यथाकामं तं तं काममनतिक्रम्येत्यर्थः । एवमिति क्रियाया ग्रहणस्य विशेषणमेतद्ग्रहणं यथा भवति तथेत्यर्थः । परिवर्तनमेव विवृणोति—कामेति । योग्यदेशाभावे सिद्धे सिद्धमर्थं दर्शयति—तस्मादिति । स्वप्नस्य मिथ्यात्वे तद्दृष्टान्तत्वेन जडत्वादिहेतुना जागरितस्यापि तथात्वं शक्यं निश्चेतुमित्याह—तथेति । द्वयोर्मिथ्यात्वे प्रतीचो विशुद्धिः सिद्धेत्युपसंहरति—तस्मादिति । अक्रियाकारकफलात्मक इति विशेषणं समर्थयते—यस्मादिति । जागरितं दृष्टान्तीकृत्य दार्ष्टान्तिकमाह—तथेति । द्रष्टृदृश्यभावे सिद्धे फलितमाह—तस्मादिति । अन्यत्वफलं कथयति—विशुद्ध इति ॥ १९ ॥

दर्शनवृत्तौ स्वप्ने वासनाराशेर्दृश्यत्वादतद्धर्मतेति विशुद्धताऽवगताऽऽत्मनस्तत्र यथाकामं परिवर्तत इति कामवशात्परिवर्तनमुक्तम् । द्रष्टुर्दृश्यसंबन्धश्चास्य स्वाभाविक इत्यशुद्धता शङ्कयतेऽतस्तद्विशुद्ध्यर्थमाह—

> अथ यदा सुषुप्तो भवति यदा न कस्यचन वेद हिता नाम नाड्यो द्वासप्ततिः सहस्राणि हृदयात्पुरीततमभिप्रतिष्ठन्ते ताभिः प्रत्यवसृप्य पुरीतति शेते स यथा कुमारो वा महाराजो वा महाब्राह्मणो वाऽतिष्नीमानन्दस्य गत्वा शयीतैवमेवैष एतच्छेते ॥ १९ ॥

अथ यदा सुषुप्तो भवति यदा स्वप्न्यया चरति तदाऽप्ययं विशुद्ध एव । अथ पुनर्यदा हित्वा दर्शनवृत्तिं स्वप्नं यदा यस्मिन्काले सुषुप्तः सुष्ठु सुप्तः संप्रसादं स्वाभाव्यं गतो भवति सलिलमिवास्यसंबन्धकालुष्यं हित्वा स्वाभाव्येन प्रसीदति । कदा सुषुप्तो भवति । यदा

---

१ क. ख. ग. छ. °णा लौकिकास्त° । २ घ. ङ. शङ्कते । ३ क. ख. ञ. ट. तं भाष्यम° । ४ ण. °ष्टान्तेन । ५ घ. ङ. द्रष्टृदृश° । ६ क. ग. ण. °प्रतिस° ।

यस्मिन्काले न कस्यचन किंचनेत्यर्थो वेद विजानाति । कस्यचन वा शब्दादेः संबन्धि वस्त्वन्तरं किंचन न वेदेत्यध्याहार्यम् । पूर्वं तु न्याय्यं सुप्ते तु विशेषविज्ञानाभावस्य विवक्षितत्वात् ।

वृत्तानुवादपूर्वकमुत्तरश्रुतिनिरस्यामाशङ्क्यमाह—दर्शनवृत्ताविति । तत्रेति स्वमोक्तिः । कामादिसंबन्धश्चकारार्थः । निवर्त्याशङ्कासङ्गावान्निवर्तकानन्तरश्रुतिप्रवृत्तिं प्रतिजानीते—अत इति । स्वमेऽपि शुद्धिरुक्ता किं सुषुप्तिर्ग्रहणेत्याशङ्कयाऽऽह—यदेति । गतो भवति तदा सुतरामस्य शुद्धिः सिध्यतीति शेषः । तमेव सुषुप्तिकालं प्रश्नपूर्वकं प्रकटयति—कदेति । विकल्पं व्यावर्तयति—पूर्वं त्विति ।

एवं तावद्विशेषविज्ञानाभावे सुषुप्तो भवतीत्युक्तम् । केन पुनः क्रमेण सुषुप्तो भवतीत्युच्यते—हिता नाम हिता इत्येवंनाम्न्यो नाड्यः शिरा देहस्यान्नरसविपरिणामभूतास्ताश्च द्वासप्ततिः सहस्राणि द्वे सहस्रे अधिके सप्ततिश्च सहस्राणि तां द्वासप्ततिः सहस्राणि हृदयाद्धृदयं नाम मांसपिण्डस्तस्मान्मांसपिण्डात्पुण्डरीकाकारात्परीततं हृदयपरिवेष्टनमाचक्षते तदुपलक्षितं शरीरमिह परीतच्छब्देनाभिप्रेतं पुरीततमभिप्रतिष्ठन्न इति शरीरं कृत्स्नं व्याप्नुवत्योऽश्वत्थपर्णराजय इव बहिर्मुख्यः प्रवृत्ता इत्यर्थः ।

वृत्तमनूद्य प्रश्नपूर्वकं सुषुप्तिगतिप्रकारं दर्शयति—एवं तावदिति । हितफलप्राप्तिनिमित्तत्वान्नाड्यो हिता उच्यन्ते । तासां देहसंबद्धानामन्वयव्यतिरेकाभ्यामन्नरसविकारत्वमाह—अन्नेति । तासामेव मध्यमसंख्यां कथयति—ताश्चेति । तासां च हृदयसंबन्धिनीनां ततो निर्गत्य देहव्याप्त्या बहिर्मुखत्वमाह हृदयादिति ।

तत्र बुद्धेरन्तःकरणस्य हृदयं स्थानं तत्रस्थबुद्धितन्त्राणि चेतराणि बाह्यानि करणानि । तेन बुद्धिः कर्मवशाच्छ्रोत्रादीनि ताभिर्नाडीभिर्मत्स्यजालवत्कर्णशष्कुल्यादिस्थानेभ्यः प्रसारयति प्रसार्य चाधितिष्ठति जागरितकाले । तां विज्ञानमयोऽभिव्यक्तस्वात्मचैतन्यावभासतया व्याप्नोति । संकोचेनकाले च तस्या अनुसंकुचति । सोऽस्य विज्ञानमयस्य स्वापः । जाग्रद्विकासानुभवो भोगः । बुद्ध्युपाधिस्व-

---

१ क. ख. °कान्त° । २ क ख ढ ण. °श्रुति प्रति° । ३ ज. °द्धिमुक्त्वा किं । ४ घ. ञ. ढ. ण. °ग्रहणेनेत्या° । ५ ञ. °ह । अथ य° । ६ क. ख. °प्ततिस° । ग. घ. ङ. च. छ. ज. ढ. °प्ततिर्द्वे सहस्रे । ७ झ. तानि । ८ क. ख. ग. ङ. च. ज. झ. ढ. °प्ततिस° । ९ क. ख. ग. ङ. च छ ज. झ. ढ. °णि नाडीनां ह° । १० घ. ज. °स्तस्मा° । ११ क. ख. ग. घ ङ. छ. ज. °र्मुखाः प्र° । १२ घ. ञ. °षुप्तग° । १३ क, ग. च. छ. °ब्रु° । १४ ङ. च. झ. ढ. °न्याभा° । १५ ग. च. ढ. °ञ्चका° । १६ क. ग. °द्धिक्षेपानु° ।

भावानुविधायी हि स चन्द्रादिप्रतिबिम्ब इव जलाद्यनुविधायी । तस्मात्तस्या बुद्धेर्जाग्रद्विषयायास्ताभिर्नाडीभिः प्रत्यवसर्पणमनु प्रत्यवसृप्य पुरीतति शरीरे शेते तिष्ठति तप्तमिव लोहपिण्डमविशेषेण संव्याप्याग्निवच्छरीरं संव्याप्य वर्तत इत्यर्थः । स्वाभाविक एव स्वात्मनि वर्तमानोऽपि कर्मानुगतबुद्ध्यनुवर्त्तित्वात्पुरीतति शेत इत्युच्यते । न हि सुषुप्तिकाले शरीरसंबन्धोऽस्ति । तीर्णो हि तदा सर्वाञ्छोकान्हृदयस्येति हि वक्ष्यति ।

ताभिरित्यादि व्याकर्तुं भूमिकां करोति––तत्रेति । शरीरं सप्तम्यर्थः । शरीरं करणानां बुद्धितन्त्रत्वे किं स्यात्तदाह–तेनेति । तथाऽपि जीवस्य किमायातमित्याशङ्क्याऽऽह–तां विज्ञानमय इति । भोगशब्दो जागरविषयः । बुद्धिविकासमनुभवन्नात्मा जागर्तीत्युच्यते तत्संकोचं चानुभवन्स्वपितीत्यत्र हेतुमाह–बुद्धीति । बुद्ध्यनुविधायित्वं परामृश्य ताभिरित्यादि व्याचष्टे–तस्मादिति । प्रत्यवसर्पणं व्याचष्टे–पुरीतति । पदार्थमुक्त्वा वाक्यार्थमाह––तप्तमिवेति । कर्मत्वे देहस्य कर्तृत्वे चाऽऽत्मनो दृष्टान्तद्वयम् । हृदयाकाशे ब्रह्मणि शेते विज्ञानात्मेत्युक्त्वा पुरीतति शयनमाचक्षाणस्य पूर्वापरविरोधः स्यादित्याशङ्क्याऽऽह–स्वाभाविक इति । औपचारिकमिदं वचनमित्यत्र हेतुमाह–न हीति ।

सर्वसंसारदुःखवियुक्तेयमवस्थेत्यत्र दृष्टान्तः––स यथा कुमारो वाऽत्यन्तबालो वा महाराजो वाऽत्यन्तवृद्धप्रकृतिर्यथोक्तकृन्महाब्राह्मणो वाऽत्यन्तपरिपक्वविद्याविनयसंपन्नोऽतिघ्रीमतिशयेन दुःखं हन्तीत्यतिध्न्यानन्दस्यावस्था सुखावस्था तां प्राप्य गत्वा शयीतावतिष्ठेत । एषां च कुमारादीना स्वभावस्थाना सुखं निरतिशयं प्रसिद्धं लोके । विक्रियमाणाना हि तेषां दुःखं न स्वभावस्तेन तेषां स्वाभाविकयवस्था दृष्टान्तत्वेनोपादीयते प्रसिद्धत्वात् । न तषां स्वाप एवाभिप्रेतः । स्वापस्य द्रार्ष्टान्तिकत्वेन विवक्षितत्वाद्विशेषाभावाच्च । विशेषे हि सति दृष्टान्तदार्ष्टान्तिकभेदः स्यात् । तस्मान्न तेषां स्वापो दृष्टान्तः । एवमेव यथाऽयं दृष्टान्त एष विज्ञानमय एतच्छयनं शेत

---

१ च. ढ. °लानु° । २ घ. ङ. ज. °वृत्तत्वा° । ३ ख. घ. च. छ. ज. झ. °सुप्तका° । ४ घ. ञ. ण. °स्यादिति तदा° । ५ ण. °गरितवि° । ६ ग. च. °वस्थोक्ताऽग्र । ढ. °वस्थोक्ता तत्र । ७ ग. ङ. च. ढ. °लो म° । ८ च. ढ. °त्कर्मकृ° । ९ ङ दुःखजवं । १० ग. झ. ढ. हन्ति साऽति° । ११ ख. घ. ङ. छ. ज. °भावाव° । १२ क. घ. च. ज. °वस्ते° । १३ ख. छ. झ. ढ. °कयोर्भेदः ।

इत्येतच्छब्दः क्रियाविशेषणार्थः । एवमयं स्वाभाविके स्व आत्मनि सर्वसंसारधर्मातीतो वर्तते स्वापकाल इति ॥ १९ ॥

इयमवस्थेति प्रकृता सुषुप्तिरुच्यते । उक्तेषु दृष्टान्तेषु विवक्षितमंशं दर्शयति—एषां चेति । दुःखमपि तेषां प्रसिद्धमित्याशङ्क्याऽऽह—विक्रियमाणानां हीति । कुमारादिस्वापस्यैव दृष्टान्तत्वं किं न स्यादित्याशङ्क्याऽऽह—न तेषामिति । तत्स्वापस्य दृष्टान्तत्वमस्मत्स्वापस्य दार्ष्टान्तिकत्वमिति विभागमाशङ्क्याऽऽह—विशेषाभावादिति । क्वैष तदाऽभूदिति प्रश्नस्योत्तरमुपपादितमुपसंहरति—एवमिति ॥ १९ ॥

क्वैष तदाऽभूदित्यस्य प्रश्नस्य प्रतिवचनमुक्तम् । अनेन च प्रश्ननिर्णयेन विज्ञानमयस्य स्वभावतो विशुद्धिरसंसारित्वं चोक्तम् । कुत एतदागादित्यस्य प्रश्नस्यापाकरणार्थ आरम्भः । ननु यस्मिन्ग्रामे नगरे वा यो भवति सोऽन्यत्र गच्छंस्तत एव ग्रामान्नगराद्वा गच्छति नान्यतः । तथा सति क्वैष तदाऽभूदित्येतावानेवास्तु प्रश्नो यत्राभूत्तत एवाऽऽगमनं प्रसिद्धं स्यान्नान्यत इति कुत एतदागादिति प्रश्नो निरर्थक एव । किं श्रुतिरुपालभ्यते भवत । न । किं तर्हि द्वितीयस्य प्रश्नस्यार्थान्तरं श्रोतुमिच्छाम्यत आनर्थक्यं चोदयामि ।

स तथेत्यादेः सेगतिं वक्तुं वृत्तं संकीर्तयति—क्वैष इति । किं पुनराद्यप्रश्ननिर्णयेन फलति त्वंपदार्थशुद्धिरित्याह—अनेनेति । शुद्धिद्वारा ब्रह्मत्वं च तस्योक्तमित्याह—असंसारित्वं चेति । उत्तरग्रन्थस्य तात्पर्यमाह—कुत इति । पूर्वेणोत्तरस्य गतार्थत्वं शङ्कते—नन्विति । स्थित्यवधेरेव निर्धारितत्वादागत्यवधेर्निर्दिधारयिषया प्रश्ने प्रतिवचनं सावकाशमित्याशङ्क्याऽऽह—तथा सतीति । अपौरुषेयी श्रुतिरशेषदोषशून्यत्वादनतिशङ्कनीयेति सिद्धान्ती गूढाभिसंधिराह—किं श्रुतिरिति । न श्रुतिराक्षिप्यते निर्दोषत्वादिति पूर्ववाद्याह—नेति । श्रुतेरनाक्षेप्यत्वे स्वदीयं चोद्यं निरवकाशमित्याह—किं तर्हीति । तस्य सावकाशत्वं पूर्ववादी साधयति—द्वितीयस्येति ।

एवं तर्हि कुत इत्यपादानार्थता न गृह्यते । अपादानार्थत्वे हि पुनरुक्तता नान्यार्थत्वे । अस्तु तर्हि निमित्तार्थः प्रश्नः कुत एतदागात्किंनिमित्तमिहाऽऽगमनमिति । न निमित्तार्थताऽपि प्रतिवचनवैरूप्यात् । आत्मनश्च सर्वस्य जगतोऽग्निविस्फुलिङ्गादिवदुत्पत्तिः प्रतिवचने श्रूयते । न हि विस्फुलिङ्गानां विद्रवणेऽग्निर्निमित्तमपादानमेव तु

---

१ ख. घ. ज. झ. °र्थमार° । २ ख. ग. कथं । ३ घ. ञ. ण. °त्तं की° । ४ क. ख. ढ. फलमिति । घ. फलितं । ५ घ. ञ. ण. °वधिनि° । ६ घ. ञ. ण. °क्षेपे त्व° । झ. कथं ।

सः । तथा परमात्मा विज्ञानमयस्याऽऽत्मनोऽपादानत्वेन श्रूयतेऽस्मादात्मन इत्येतस्मिन्वाक्ये । तस्मात्प्रतिवचनवैलोम्यात्कुत इति प्रश्नस्य निमित्तार्थता न शक्यते वर्णयितुम् ।

पूर्ववादिन्यपादानादर्थान्तरे पञ्चम्याः शुश्रूषमाणे सत्येकदेशी ब्रवीति—एवं तर्हीति । कथमन्यार्थत्वं तदाह—अस्त्विति । तर्हि तस्यामपादानार्थत्वेन पुनरुक्तत्वावस्थायामित्यर्थः । एकदेशिन पूर्ववादी दूषयति—नेति । अपादानार्थतावदित्यपेरर्थः । तदेव स्फुटयति—आत्मनश्चेति । जगतः सर्वस्य चेतनस्याचेतनस्य चेति वक्तुं चशब्दः ।

नन्वपादानपक्षेऽपि पुनरुक्तादोषः स्थित एव । नैष दोषः । प्रश्नाभ्यामात्मनि क्रियाकारकफलात्मतापोहस्य विवक्षितत्वात् । इह हि विद्याविद्याविषयावुपन्यस्तौ । आत्मेत्येवोपासीताऽऽत्मानमेवावेदात्मानमेव लोकमुपासीतेति विद्याविषयः । तथाऽविद्याविषयश्च पाङ्क्तं कर्म तत्फल चान्नत्रयं नामरूपकर्मात्मकमिति । तत्राविद्याविषये वक्तव्यं सर्वमुक्तम् । विद्याविषयस्त्वात्मा केवल उपन्यस्तोऽन निर्णीतः । तन्निर्णयाय च ब्रह्म ते ब्रवाणीति प्रक्रान्तं ज्ञापयिष्यामीति च । अतस्तद्ब्रह्मविद्याविषयभूत ज्ञापयितव्यं याथात्म्यतः । तस्य च याथात्म्यं क्रियाकारकफलभेदशून्यमत्यन्तविशुद्धमद्वैतमित्येतदिहविवक्षितम् । अतस्तदनुरूपा प्रश्नावुत्थाप्येते श्रुत्या कैष तदाऽभूत्कुत एतदागादिति ।

तर्हि भवत्वपादानार्था पञ्चमीत्याशङ्क्य पूर्ववादी पूर्वोक्तं स्मारयति—नन्विति । सर्वाविद्यातज्जनिमुक्तं प्रत्यगद्वय ब्रह्म प्रश्नद्वयव्याजेन प्रतिपिपादयिषितमिति न पुनरुक्तिरिति सिद्धान्ती स्वाभिसंधिमुद्घाटयति—नैष दोष इति । यथोक्तं वस्तु प्रश्नाभ्यां विवक्षितमिति कुतो ज्ञातमित्याशङ्क्य तदुक्तं तार्तीयमर्थमनुवदति—इह हीति । विद्याविषयनिर्णयस्य कर्तव्यत्वमत्र न प्रतिभातीत्याशङ्क्याऽऽह—तन्निर्णयाय चेति । अन्यथा प्रक्रमभङ्गः स्यादिति भावः । किं तद्याथात्म्यं तदाह—तस्य चेति ।

तत्र यत्र भवति तदधिकरणं यद्भवति तदधिकर्तव्यं तयोश्चाधिकरणाधिकर्तव्ययोर्भेदो दृष्टो लोके । तथा यत आगच्छति तदपादानं य आगच्छति स कर्ता तस्मादन्यो दृष्टः । तथाऽऽत्मा क्वाप्यभूदन्यस्मिन्ना-

---

१ ग ङ. च. ढ. त्वेनैव श्रू° । २ क. ख. °चने वै° । ३ घ. ञ. ण. °त्वे षु° । ४ घ. ञ. °डोषोऽस्थि° । ५ ङ. °विद्ययोर्विष° । ६ ग. °षयीभू° । ७ क. ख. ढ । °थान्नस्यं त° ।

न्यः। कुतश्चिदागादन्यस्मादन्यः केनचिद्भिन्नेन साधनान्तरेणेत्येवं लोकवत्प्राप्ता बुद्धिः सा प्रतिवचनेन निवर्तयितव्येति । नायमात्माऽन्योऽन्यत्राभूदन्यो वाऽन्यस्मादागतः साधनान्तरं वाऽऽत्मन्यस्ति । किं तर्हि स्वात्मन्येवाभूत् । " स्वमात्मानमपीतो भवति सता सोम्य तदा संपन्नो भवति प्राज्ञेनाऽऽत्मना संपरिष्वक्तः पर आत्मनि संप्रतिष्ठते " इत्यादिश्रुतिभ्यः । अत एव नान्योऽन्यस्मादागच्छति । तच्छ्रुत्यैव प्रदर्श्यतेऽस्मादात्मन इति । आत्मव्यतिरेकेण वस्त्वन्तराभात् ।

कथं यथोक्तयाथात्म्याख्यानोपयोगित्वं प्रश्नयोरित्याशङ्क्य तयोः श्रौतमर्थमाह—तत्रेति । प्रश्नप्रवृत्तिमुक्त्वा प्रतिवचनप्रवृत्तिमाह—सेति । निवर्तयितव्येति तत्प्रवृत्तिरिति शेषः । संप्रति प्रतिवचनयोस्तात्पर्यमाह—नायमिति । स्वात्मन्येवाभूदित्यत्र प्रमाणमाह—स्वात्मानमिति । सुषुप्तौ स्वात्मन्येव स्थितिरतःशब्दार्थः प्रबोधदशायामात्मन एवाऽऽगमनापादानत्वमित्यत्र मानत्वेनानन्तरश्रुतिमुत्थापयति—तच्छ्रुत्यैवेति । स्थित्यागत्योरात्मन एवावधित्वमित्यत्रोपपत्तिमाह—आत्मेति ।

नन्वस्ति प्राणाद्यात्मव्यतिरिक्तं वस्त्वन्तरं, न । प्राणादेस्तत एव निष्पत्तेः । तत्कथमिति । उच्यते—

> स यथोर्णनाभिस्तन्तुनोच्चरेद्यथाऽग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि व्युच्चरन्ति तस्योपनिषत्सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यम् ॥ २० ॥
>
> इति बृहदारण्यकोपनिषदि द्वितीयाध्यायस्य प्रथमं ब्राह्मणम् ॥ १ ॥

तत्र दृष्टान्तः—स यथा लोक ऊर्णनाभिः । ऊर्णनाभिर्लूताकीट एक एव प्रसिद्धः सन्स्वात्मप्रविभक्तेन तन्तुनोच्चरेदुद्गच्छेत् । न चास्ति तस्योद्गमने स्वतोऽतिरिक्तं कारकान्तरम् । यथा चैकरूपादेकस्मात्पावकाग्नेः क्षुद्रा अल्पा विस्फुलिङ्गाख्या उटयोऽन्यवयवा व्युच्चरन्ति विविधं नाना वोच्चरन्ति यथेमौ दृष्टान्तौ कारकभेदाभावेऽपि प्रवृत्तिं दर्शयतः प्राक्प्रवृत्तेश्च स्वभावत एकत्वमेवास्मादात्मनो विज्ञानमयस्य प्राक्प्रतिबोधात्स्वरूपं तस्मादित्यर्थः । सर्वे प्राणा वागादयः सर्वे लोका भूरादयः

---

१ ख. ज. सौम्य । २ ख. ज. झ. °तिष्ठितः " इ° । ३ ग. ङ. च. ञ. झ. ढ. °ना° । ४ ख. झ. °ष्णान्त° ।

सर्वाणि कर्मफलानि सर्वे देवाः प्राणलोकाधिष्ठातारोऽग्न्यादयः सर्वाणि भूतानि ब्रह्मादिस्तम्बपर्यन्तानि प्राणिजातानि सर्व एत आत्मान इत्यस्मिन्पाठ उपाधिसंपर्कजनितप्रबुध्यमानविशेषात्मान इत्यर्थो व्युच्चरन्ति ।

वस्त्वन्तराभावस्यासिद्धिं शङ्कित्वा दूषयति-नन्वित्यादिना । क्रियावतो मृदा-देर्घटाद्युत्पत्तिदर्शनाद्ब्रह्मणोऽक्रियत्वात्ततो न प्राणाद्युत्पत्तिरिति शङ्कते-तत्कथमिति । तृष्टेर्मायामयत्वमाश्रित्य श्रुत्या परिहरति-उच्यत इति । स्वात्मापविभक्तेनेत्युक्तमन्वयं व्यतिरेकद्वारा स्फोरयति-न चेति । असहायस्य कारणत्वे दृष्टान्तमुक्त्वा कूटस्थस्य तद्भावे दृष्टान्तमाह-यथा चेति । माध्यंदिनश्रुतिमाश्रित्याऽऽह-सर्व एत इति ।

यस्मादात्मनः स्थावरजङ्गमं जगदिदमग्निविस्फुलिङ्गवद्व्युच्चरत्यनिशं यस्मिन्नेव च प्रलीयते जलबुद्बुदवद्यदात्मकं च वर्तते स्थितिकाले तस्यास्याऽऽत्मनो ब्रह्मण उपनिषदुप समीपं निगमयतीत्यभिधायकः शब्द उपनिषदित्युच्यते । शास्त्रप्रामाण्यादेतच्छब्दगतो विशेषोऽवसीयत उपनिगमयितृत्वं नाम । काऽसावुपनिषदित्याह-सत्यस्य सत्यमिति । सा हि सर्वत्र चोपनिषदलौकिकार्थत्वाद्दुर्विज्ञेयार्थेति तदर्थमाचष्टे-प्राणा वै सत्यं तेषामेष सत्यमिति । एतस्यैव वाक्यस्य व्याख्यानायोत्तरं ब्राह्मणद्वयं भविष्यति ।

तस्येत्याद्यवतार्य व्याचष्टे-यस्मादित्यादिना । ननु प्रत्यगभूतस्य ब्रह्मणो वाचकेषु शब्दान्तरेष्वपि सत्सु किमित्येतच्छब्दविषयमादरणं क्रियते तत्राऽऽह-शास्त्रेति । ब्राह्मणवाक्यार्थोऽपि कथं निश्चीयतामित्याशङ्क्याऽऽह-एतस्येति ।

भवतु तावदुपनिषद्व्याख्यानायोत्तरं ब्राह्मणद्वयम् । तस्योपनिषदित्युक्तं तत्र न जानीमः किं प्रकृतस्याऽऽत्मनो विज्ञानमयस्य पाणिपेषणोत्थितस्य संसारिणः शब्दादिभुज इयमुपनिषदाहोस्विदसंसारिणः कस्यचित् । किंचातः । यदि संसारिणस्तदा संसार्येव विज्ञेयः । तद्विज्ञानादेव सर्वप्राप्तिः स एव ब्रह्मशब्दवाच्यस्तद्विद्यैव ब्रह्मविद्येति । अथासंसारिणस्तदा तद्विषया विद्या ब्रह्मविद्या । तस्माच्च ब्रह्मविज्ञानात्सर्वभावापत्तिः । सर्वमेतच्छास्त्रप्रामाण्याद्भविष्यति ।

---

१ ग. ङ. च. ढ. °प्रतिबु° । २ ख. घ. °वरं ज° । ३ ग. भवति । ४ ण. °त्यग्रू-ष्य । ५ क. ख. घ. ञ. ढ. °त्याह ।

उक्तमङ्गीकृत्य विशेषादृष्ट्या संशयानो विचारं प्रस्तौति—भवत्विति। संदिग्धं सप्रयोजनं च विचार्यमिति न्यायेन संदेहमुक्त्वा विचारप्रयोजकं प्रयोजनं पृच्छति—किंचात इति। कस्मिन्पक्षे किं फलतीति पृष्टे प्रथमपक्षमनूद्य तस्मिन्फलमाह—यदीति। यद्विज्ञानान्मुक्तिस्तस्यैव ज्ञेयता न जीवस्येत्याशङ्क्याऽऽह—तद्विज्ञानादिति। ब्रह्मज्ञानादेव सा न संसारिज्ञानादित्याशङ्क्याऽऽह—स एवेति। यद्विद्या ब्रह्मविद्या तदेव ब्रह्म न संसारीत्याशङ्क्याऽऽह—तद्विद्यैवेति। आद्यकल्पीयफलसमाप्ताविति शब्दः। पक्षान्तरमनूद्य तस्मिन्फलमाह—अथेत्यादिना। किमत्र नियामकमित्याशङ्क्य ब्रह्म वा इदमित्यादि शास्त्रमित्याह—सर्वमेतदिति।

किंत्वस्मिन्पक्ष आत्मेत्येवोपासीताऽऽत्मानमेवावेदहं ब्रह्मास्मीति परब्रह्मैकत्वप्रतिपादिकाः श्रुतयः कुप्येरन्। संसारिणश्चान्यस्याभाव उपदेशानर्थक्यात्। यत एवं पण्डितानामप्येतन्महामोहस्थानमनुक्तप्रतिवचनप्रश्नविषयम्। अतो यथाशक्ति ब्रह्मविद्याप्रतिपादकवाक्येषु ब्रह्म विजिज्ञासूनां बुद्धिव्युत्पादनाय विचारयिष्यामः।

ब्रह्मोपनिषत्पक्षे शास्त्रप्रामाण्यात्सर्वं समञ्जसं चेत्तथैवास्तु किं विचारेणेत्याशङ्क्य जीवब्रह्मणोर्भेदोऽभेदो वेति विकल्प्याऽऽद्ये दोषमाह—किंत्विति। अभेदपक्षं दूषयति—संसारिणश्चेति। उपदेशानर्थक्यादभेदपक्षानुपपत्तिरिति शेषः। विशेषानुपलम्भस्य संशयहेतुत्वमनुवदति—यत इति। पक्षद्वये फलप्रतीतिं परामृशति—एवमिति। अन्वयव्यतिरेककौशलं पाण्डित्यम्। एतदित्यैकात्म्योक्तिः। महत्त्वं मोहस्य विचारोत्थनिर्णयं विनाऽनुच्छिन्नत्वम्। तस्य स्थानमालम्बनं केनापि नोक्तं प्रतिवचनं यस्य किं तदैकात्म्यमिति प्रश्नस्य तस्य विषयभूतमिति यावत्। न हि येन केनचिदैकात्म्यं प्रष्टुं प्रतिवक्तुं वा शक्यते। 'श्रवणायापि बहुभिर्यो न लभ्यः' इत्यादिश्रुतेरित्यर्थः। विचारप्रयोजकमुक्त्वा तत्कार्यं विचारमुपसंहरति—अत इति।

न तावदसंसारी परः पाणिपेषणप्रतिबोधिताच्छब्दादिभुजोऽवस्थान्तरविशिष्टादुत्पत्तिश्रुतेः। न प्रशासिताऽशनायादिवर्जितः परो विद्यते। कस्मात्। यस्माद्वयं ज्ञपयिष्यामीति प्रतिज्ञाय सुप्तं पुरुषं पाणिपेषं बोधयित्वा तं शब्दादिभोक्तृत्वविशिष्टं दर्शयित्वा तस्यैव स्वप्नद्वारेण सुषुप्त्याख्यमवस्थान्तरमनूद्य तस्मादेवाऽऽत्मनः सुषुप्त्यवस्थाविशिष्टादभिविस्फुलिङ्गोर्णनाभिदृष्टान्ताभ्यामुत्पत्तिं दर्शयति श्रुतिरेवमेः

१ घ. ढ. °जनं। २ ग. घ. च. छ. झ. ढ. °षप्र°। ३ झ. °झ. विज्ञाप°। ४ ग. घ. ङ. च. छ. ज. झ. ढ. °षुप्ताख्य°। ५ ख. ग. घ. ङ. च. छ. ज. झ. ढ. °षुप्तावे°।

वास्मादित्यादिना । न चान्यो जगदुत्पत्तिकारणमन्तराले श्रुतोऽस्ति । विज्ञानमयस्यैव हि प्रकरणम् ।

संशयादिना विचारकार्यतामवतार्य पूर्वपक्षयति—न तावदिति । जगत्कर्ता हीश्वरो विवक्ष्यते प्रकृते च सुषुप्तिविशिष्टाज्जीवाज्जगज्जन्मोच्यते तस्मादीश्वरो जीवादतिरिक्तो नास्तीत्यर्थः । तदेव प्रपञ्चयति—नेत्यादिना । प्रकृतेऽपि जीवे जगत्कारणत्वमीश्वरस्यैवात्र श्रुतमित्याशङ्क्याऽऽह—न चेति । तत्र प्रकरणविरोधं हेतुमाह—विज्ञानेति ।

समानप्रकरणे च श्रुत्यन्तरे कौषीतकिनामादित्यादिपुरुषान्प्रस्तुत्य स होवाच यो वै बालाक एतेषां पुरुषाणां कर्ता यस्य चैतत्कर्म स वै वेदितव्य इति प्रबुद्धस्यैव विज्ञानमयस्य वेदितव्यतां दर्शयति नार्थान्तरस्य । तथा चाऽऽत्मनस्तु कामाय सर्वं प्रियं भवतीत्युक्त्वा य एवाऽऽत्मा प्रियः प्रसिद्धस्तस्यैव द्रष्टव्यश्रोतव्यमन्तव्यनिदिध्यासितव्यतां दर्शयति । तथा च विद्योपन्यासकाल आत्मेत्येवोपासीत तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्तदात्मानमेवावेदहं ब्रह्मास्मीत्येवमादिवाक्यानामानुलोम्यं स्यात्पराभावे । वक्ष्यति च—" आत्मानं चेद्विजानीयादयमस्मीति पुरुषः " इति ।

श्रुत्यन्तरवशादपि जीव एवात्र जगत्कर्तेत्याह—समानप्रकरणे चेति । श्रुत्यन्तरस्य च जीवविषयत्वं जगद्वाचित्वाधिकरणपूर्वपक्षन्यायेन द्रष्टव्यम् । वाक्यशेषवशादपि जीवस्यैव वेदितव्यत्वं वाक्यान्वयाधिकरणपूर्वपक्षन्यायेन दर्शयति—तथा चेति । जीवातिरिक्तस्य परस्य वेदितव्यस्याभावे पूर्वोत्तरवाक्याना(णा)मानुकूल्यं हेत्वन्तरमाह—तथा चेत्यादिना ।

सर्ववेदान्तेषु च प्रत्यगात्मवेद्यतैव प्रदर्श्यतेऽहमिति न बहिर्वेद्यता शब्दादिवत्प्रदर्श्यतेऽसौ ब्रह्मेति । तथा कौषीतकिनामेव " न वाचं विजिज्ञासीत वक्तारं विद्यात् " इत्यादिना वागादिकरणैर्व्यापृतस्य कर्तुरेव वेदितव्यतां दर्शयति ।

इतश्च जीवस्यैव वेद्यतेत्याह—सर्वेति । तत्रैव हेत्वन्तरमाह—तथेति । स वै वेदितव्य इत्यत्र न स्पष्टं जीवस्य वेदितव्यत्वमिह तु स्पष्टमिति भेदः ।

अवस्थान्तरविशिष्टोऽसंसारीति चेत् । अथापि स्याद्यो जागरिते शब्दादिभुग्विज्ञानमयः स एव सुषुप्ताख्यमवस्थान्तरं गतोऽसंसारी परः

---

१ क. °रोवहे° । २ ख. घ. ङ. च. छ. ज. ढ. °स्य वैत° । ३ ग. ङ. च. प्रतिषु । ४ ख. ङ. एष । ५ ङ. सुप्ता° । ६ झ. °सुप्त्याख्य° ।

प्रशासिताऽन्यः स्यादिति चेत् । न । अदृष्टत्वात् । न ह्येवंधर्मकः पदार्थो दृष्टोऽन्यत्र वैनाशिकासिद्धान्तात् । न हि लोके मौस्तिष्टन्गच्छन्वा गौर्भवति शयानस्त्वश्वादिजात्यन्तरमिति न्यायाच्च । यद्धर्मको यः पदार्थः प्रमाणेनावगतो भवति स देशकालावस्थान्तरेष्वपि तद्धर्मक एव भवति । स चेत्तद्धर्मकत्वं व्यभिचरति सर्वः प्रमाणव्यवहारो लुप्येत । तथा च न्यायविदः सांख्यमीमांसकादयोऽसंसारिणोऽभावं युक्तिशतैः प्रतिपादयन्ति ।

स्वापावस्थाज्जीवाज्जगज्जन्मश्रुतेस्तस्यैव वेद्यत्वदृष्टेश्च जगद्धेतुरीश्वरो वेदान्तवेद्यो नास्तीत्युक्ते सेश्वरवादी चोदयति—अवस्थान्तरेति । चोद्यमेव विवृणोति—अथापीति । उक्तोपपत्तिसत्त्वेऽपीति यावत् । नावस्थाभेदाद्वस्तुभेदस्तथाऽननुभवादपराद्धान्ताच्चेति परिहरति—नादृष्टत्वादिति । अवस्थाभेदाद्वस्तुभेदाभावं दृष्टान्तेन स्पष्टयति—नहीति । तत्रैव हेत्वन्तरमाह—न्यायाच्चेति । जागरादिविशिष्टस्यैव स्वापवैशिष्ट्याच्चस्य संसारित्वान्नेश्वरोऽन्योऽस्तीत्युक्त्वा तदभावे वादिसंमतिमाह—तथा चेति । आदिशब्दो लोकायतादिसमस्तनिरीश्वरवादिसंग्रहार्थः । युक्तिशतैरिति । तस्य देहित्वेऽस्मदादितुल्यत्वात्तदभावे मुक्तवज्जगत्कर्तृत्वापोगाज्जीवानामेवादृष्टद्वारा तत्कर्तृत्वसंभवात्तस्यार्किंचित्करत्वमित्यादिभिरित्यर्थः ।

संसारिणोऽपि जगदुत्पत्तिस्थितिलयक्रियाकर्तृत्वविज्ञानस्याभावादयुक्तमिति चेद्यन्महता प्रपञ्चेन स्थापितं भवता शब्दादिभुक्संसार्येवावस्थान्तरविशिष्टो जगत इह कर्तेति । तदसत् । यतो जगदुत्पत्तिस्थितिलयक्रियाकर्तृत्वविज्ञानशक्तिसाधनाभावः सर्वलोकप्रत्यक्षः संसारिण स कथमस्मदादिः संसारी मनसाऽपि चिन्तयितुमशक्यं पृथिव्यादिविन्यासविशिष्टं जगन्निर्मिनुयादतोऽयुक्तमिति चेत् । न । शास्त्रात् । शास्त्रं संसारिण एवमेवास्मादात्मन इति जगदुत्पत्त्यादि दर्शयति । तस्मात्सर्वं श्रद्धेयमिति स्यादयमेकः पक्षः ।

जीवो जगज्जन्मादिहेतुर्न भवति तत्रासमर्थत्वात्पाषाणवेत्तस्य संसारित्वादिति शङ्कते—संसारिणोऽपीति । ईश्वरस्येवेत्यनेरर्थः । अयुक्तं प्राणादिकर्तृत्वमिति शेषः । संग्रहवाक्यं विवृणोति—यन्महतेत्यादिना । कालात्ययापदेशेन दूषयति—न शास्त्रादिति । निरीश्वरवादमुपसंहरति—तस्मादिति ।

---

१ ख. घ. ङ. ज. सर्वत्र° । २ घ. ज. °वं युक्तं यु° । ३ म. च. °यादिक° । ४ ग. °तृतावि° । क. छ. झ. °तृत्वं वि° । ५ ग. ङ. च. °गतः क° । ६ ग. ङ. घ. °यादिक° । ७ घ. °दादिवत्संसा° । ८ घ. ङ. एवैव° । ९ घ. °वदि ।

" यः सर्वज्ञः सर्वविद्योऽज्ञनायापिपासे अत्येति " " असङ्गो न हि सज्जते " " एतस्य वा अक्षरस्य प्रशासने " " यः सर्वेषु भूतेषु तिष्ठन्नन्तर्याम्यमृतः स यस्तान्पुरुषान्निरुह्यात्यक्रामत् " " स वा एष महानज आत्मा " " एष सेतुर्विधरणः " " सर्वस्य वशी सर्वस्येशानः " " य आत्माऽपहतपाप्मा विजरो विमृत्युः " " तत्तेजोऽसृजत " " आत्मा वा इदमेक एवाग्र आसीत् " " न लिप्यते लोकदुःखेन बाह्यः " इत्यादिश्रुतिशतेभ्यः । स्मृतेश्च " अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते " इति । परोऽस्त्यसंसारी श्रुतिस्मृतिन्यायेभ्यश्च स च कारणं जगतः ।

सेश्वरवादमुत्थापयति—यः सर्वज्ञ इत्यादिना । तान्पृथिव्याद्यभिमानिनः पुरुषान्निरुह्योत्याद्य योऽतिक्रान्तवान्स एष सर्वविशेषशून्य इति यावत् । उदाहृताः श्रुतयः स्मृतयश्च । न्यायस्तु विचित्रं कार्यं विशिष्टज्ञानवत्पूर्वकं प्रासादादौ तथोपलम्भादित्यादिः ।

नन्वेवमेवास्मादात्मन इति संसारिण एवोत्पत्तिं दर्शयतीत्युक्तम् । न । य एषोऽन्तर्हृदय आकाश इति परस्य प्रकृतत्वादात्मन इति युक्तः परस्यैव परामर्शः । कैष तदाऽभूदित्यस्य प्रश्नस्य प्रतिवचनत्वेनाऽऽकाशशब्दवाच्यः पर आत्मोक्तो य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेत इति । " सता सोम्य तदा संपन्नो भवत्यहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्ति प्राज्ञेनाऽऽत्मना संपरिष्वक्तः पर आत्मनि संप्रतिष्ठते " इत्यादिश्रुतिभ्य आकाशशब्दः परं आत्मेति निश्चीयते । दहरोऽस्मिन्नन्तराकाश इति प्रस्तुत्य तस्मिन्नेवाऽऽत्मशब्दप्रयोगाच्च । प्रकृत एव पर आत्मा । तस्माद्युक्तमेवास्मादात्मन इति परमात्मन एव सृष्टिरिति । संसारिणः सृष्टिस्थितिसंहारज्ञानसामर्थ्याभावं चावोचाम ।

प्रकरणमनुसृत्य जीवस्य प्राणादिकारणत्वमुक्तं स्मारयति—नन्विति । नेदं जीवस्य प्रकरणमिति परिहरति—नेत्यादिना । प्रतिवचनस्थाकाशशब्दस्य परविषयत्वमसिद्धमित्याशङ्क्याऽऽह—कैष इति । इतश्चाऽऽकाशशब्दस्य परमात्मविषयतेत्याह—दहरोऽस्मिन्निति । य आत्माऽपहतपाप्मेत्यात्मशब्दप्रयोगः ।

---

१ च. ढ. 'ति । अतः प° २ क. ण. °व्यादिष्वनि° । ३ क. ख. ढ. ण. °ष्टविज्ञा° । ४ ख. ज. झ सौम्य । क. ज. झ. °निष्ठित इ° । ५ ग. ङ. च. ढ. °रमात्मे° ।

प्रतिवचनारस्याऽऽकाशशब्दवाच्यत्वे फलितमाह–प्रकृत एवेति । तस्य प्रकृतत्वे लब्धमर्थमाह–तस्मादिति । इतश्च परस्मादेव प्राणादिसृष्टिरित्याह–संसारिण इति । यन्महता प्रपञ्चेनेत्यादाविति शेषः ।

अत्र चाऽऽत्मेत्येवोपासीताऽऽत्मानमेवावेदहं ब्रह्मास्मीति ब्रह्मविद्या प्रस्तुता । ब्रह्मविषयं च ब्रह्मविज्ञानमिति । ब्रह्म ते ब्रवाणीति ब्रह्म ज्ञापयिष्यामीति प्रारब्धम् । तत्रेदानीमसंसारि ब्रह्म जगतः कारणमज्ञानाद्यतीतं नित्यशुद्धबुद्धमुक्तस्वभावं तद्विपरीतश्च संसारी तस्मादहं ब्रह्मास्मीति न गृह्णीयात् । परं हि देवमीशानं निकृष्टः संसार्यात्मत्वेन स्मरन्कथं न दोषभाक्स्यात् । तस्मान्नाहं ब्रह्मास्मीति युक्तम् ।

अस्तीश्वरो जगत्कारणं ब्रह्म तदेव जीवस्य स्वरूपं तस्येयमुपनिषदिति सिद्धान्तमाशङ्क्य दूषयति–अत्र चेति । तृतीयोऽध्यायः समाप्यर्थः । का पुनः सा ब्रह्मविद्येति तत्राऽऽह–ब्रह्मविषयं चेति । इति ब्रह्मविदां प्रसिद्धमिति शेषः । चतुर्थं ब्रह्मविद्या प्रस्तुतेत्याह–ब्रह्मेति । सत्यमस्ति प्रस्तुता ब्रह्मविद्या सा जीवविद्याऽपि भवति जीवब्रह्मणोरभेदादित्याशङ्क्याऽऽह–तत्रेति । ब्रह्मविद्यायां प्रस्तुतायामिति यावत् । इदानीं न गृह्णीयादिति संबन्धः । मिथो विरुद्धत्वप्रतीत्यवस्थायामित्येतत् । अन्योन्यविरुद्धत्वं तच्छब्दार्थः । विपक्षे दोषमाह–परमिति ।

तस्मात्पुष्पोदकाञ्जलिस्तुतिनमस्कारबल्युपहारस्वाध्यायध्यानयोगादिभिराराधयितव्यः । आराधनेन विदित्वा सर्वेशितृ ब्रह्म भवति । न पुनरसंसारि ब्रह्म संसार्यात्मत्वेन चिन्तयेदग्निमिव शीतत्वेनाऽऽकाशमिव मूर्तिमत्त्वेन । ब्रह्मात्मत्वप्रतिपादैकमपि शास्त्रमर्थवादो भविष्यति । सर्वतर्कशास्त्रलोकन्यायैश्चैवमविरोधः स्यात् ।

कथं तर्हीश्वरे मतिं कुर्यादित्याशङ्क्य स्वामित्वेनेत्याह––तस्मादिति । आदिपदं प्रदक्षिणादिसंग्रहार्थम् । ऐकात्म्यशास्त्रादात्ममतिरेव ब्रह्मणि कर्तव्येत्याशङ्क्याऽऽह–न पुनरिति । का तर्हि शास्त्रगतिस्तत्राऽऽह–ब्रह्मेति । मुख्यार्थत्वसंभवे किमित्यर्थवादेतेत्याशङ्क्याऽऽह–सर्वेति । संसारित्वासंसारित्वादिना मिथो विरुद्धयोर्जीवेश्वरयोः शीतोष्णवदैक्यानुपपत्तिर्न्यायः ।

---

१ घ. ङ. ज. °ह्मज्ञा° । २ ग. घ. ङ. च ज ढ. °वाणि ब्र° । ३ ख. ङ. च. ज. झ. °कृष्टसं° । ४ ण. °र्थं च ब्र° । ५ घ. °ध्यायाध्या° । ङ. °ध्यायाध्ययनध्या° । ज. °ध्यायाध्ययन° । ६ ग. घ. ङ. च. छ. ज. ढ. °षेत । आ° । ७ ङ. °दनपरम° । ८ ख ढ. °णासं° ।

न । मन्त्रब्राह्मणवादेभ्यस्तस्यैव प्रवेशश्रवणात् । पुरश्चक्र इति प्रकृतस्य पुरः पुरुष आविशादिति " रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय " " सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाऽभिवदन्यदास्ते " इति सर्वशास्त्रासु सहस्रशो मन्त्रवादाः सृष्टिकर्तुरेवा-संसारिणः शरीरप्रवेशं दर्शयन्ति । तथा ब्राह्मणवादाः । " तत्सृष्ट्वा तदेवानुप्राविशत् " " स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत " " सेयं देवतैक्षत्तिस्रो देवता अनेन जीवेनाऽत्मनाऽनुप्रविश्य " " एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते " इत्याद्याः । सर्वश्रुतिषु च ब्रह्मण्यात्मशब्दप्रयोगादात्मशब्दस्य च प्रत्यगात्माभिधायकत्वात् " एष सर्वभूतान्तरात्मा " इति च श्रुतेः परमात्मव्यतिरेकेण संसारिणोऽभावात् " एकमेवाद्वितीयम् " " ब्रह्मैवेदम् " " आत्मैवेदम् " इत्यादिश्रुतिभ्यो युक्तमेवाहं ब्रह्मास्मीत्यवधारयितुम् ।

विज्ञानात्मविषयत्व तटस्थेश्वरविषयत्वं चोपनिषदो निवारयन्परिहरति—नेत्यादिना । परस्यैव प्रवेशश्रवणादी मन्त्रब्राह्मणवादानुदाहरति—पुर इत्यादिना । यत्त्वहं ब्रह्मेति न गृह्णीयादिति तत्राऽऽह—सर्वश्रुतिषु चेति ।

यदेवं स्थितः शास्त्रार्थस्तदा परमात्मनः संसारित्वम् । तथा च सति शास्त्रानर्थक्यमसंसारित्वे चोपदेशानर्थक्यं स्पष्टो दोषः प्राप्तः । यदि-तावत्परमात्मा सर्वभूतान्तरात्मा सर्वशरीरसंपर्कजनितदुःखान्यनुभवतीति स्पष्टं परस्य संसारित्वं प्राप्तम् । तथा च परस्यासंसारित्वप्रतिपादिकाः श्रुतयः कुप्येरन्स्मृतयश्च सर्वे च न्यायाः । अथ कथंचित्प्राणिशरीरसंबन्धजैर्दुःखैनं संबध्यत इति शक्यं प्रतिपादयितुं परमात्मनः साध्यपरिहार्याभावादुपदेशानर्थक्यदोषो न शक्यते निवारयितुम् ।

शास्त्रीयमप्येकत्वमनिष्टप्रसङ्गान्न स्वीकर्तव्यमिति शङ्कते—यदेति । परस्य संसारित्वे तदसंसारित्वशास्त्रानर्थक्यं फलितमाह—तथा चेति । संसारिणोऽन्यस्यापि परस्यासंसारित्वेऽसंसारित्वाभिमतोऽन्यसंसारीत्युपदेशानर्थक्यं वं विनैव मुक्तिसिद्धिरिति दोषान्तरमाह—असंसारित्वे चेति । तत्राऽऽद्यं दोषं विवृणोति—यदि तावत्-

---

१ ण. °वेशादित्यत्र म° । २ क. ख. ढ. पुरुष इ° । ३ ग. ङ. च. ढ. °त्मन एव सं° । ४ झ. च शा° । ५ क. ङ. ज. झ. प्रापत् । छ. प्राप । घ. स्यात् । ६ ग. ङ. ढ. °र आत्मा । ७ च. °र्कजानि दुः° । ८ ङ. च सति प° । ९ क. °सिद्धेरि° ।

दिति । 'न लिप्यते लोकदुःखेन बाह्यः' इत्याद्याः श्रुतयः । 'यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते' इत्याद्याः स्मृतयः । कूटस्थासङ्गत्वादयो न्यायाः । द्वितीयं दोषप्रसङ्गमापाद्य प्रकटयति—अथेत्यादिना ।

अत्र केचित्परिहारमाचक्षते । परमात्मा न साक्षाद्भूतेष्वनुप्रविष्टः स्वेन रूपेण किं तर्हि विकारभावमापन्नो विज्ञानात्मत्वं प्रतिपेदे । स च विज्ञानात्मा परस्मादन्योऽनन्यश्च । येनान्यस्तेन संसारित्वसंबन्धी येनानन्यस्तेनाहं ब्रह्मेत्यवधारणार्हः । एवं सर्वमविरुद्धं भविष्यतीति ।

दोषद्वये स्वयूथ्यसमाधिमुत्थापयति—अत्रेति । कथं तर्हि तस्य कार्ये प्रविष्टस्य जीवत्वं तत्राऽऽह—किं तर्हीति । जीवस्य ब्रह्मविकारत्वेऽपि ततो [४]भेदाभावाद्ब्रह्मेति धीरभेदे ब्रह्मणोऽपि संसारित्वेत्याशङ्क्याऽऽह—स चेति । तथाऽपि कथं शङ्कितदोषाभावस्तत्राऽऽह—येनेति । एवमिति भिन्नाभिन्नत्वपरामर्शः । सर्वमित्युपदेशादिनिर्देशः ।

तत्र विज्ञानात्मनो विकारपक्ष एता मतयः । पृथिवीद्रव्यवदनेकद्रव्यसमाहारस्य सावयवस्य परमात्मन एकदेशविपरिणामो विज्ञानात्मा घटादिवत्पूर्वसंस्थानावस्थस्य वा परस्यैकदेशो विक्रियते केशोषरादिवत्सर्व एव वा परः परिणमत्क्षीरादिवत् । तत्र समानजातीयानेकद्रव्यसमूहस्य कश्चिद्द्रव्यविशेषो विज्ञानात्मत्वं प्रतिपद्यते यदा तदा समानजातीयत्वादेकत्वमुपचरितमेव न तु परमार्थतः । तथा च सति सिद्धान्तविरोधः ।

एकदेशिमतं निराकर्तुं विकल्पयति—तत्रेति । एता मतय इत्येते पक्षा वक्ष्यमाणाः संभवन्ति न मत्यन्तरमित्यर्थः । यथा पृथिवीशब्दितं द्रव्यमनेकावयवसमुदायस्तथा भूतभौतिकात्मकानेकद्रव्यसमुदायः सावयवः परमात्मा तस्यैकदेशश्चैतन्यलक्षणस्तद्विकारो जीवः पृथिव्येकदेशमृद्विकारघटशरावादिवदित्येकः कल्पः । यथा भूमेरूषरादिदेशो नखकेशादिर्वा पुरुषस्य विकारस्तथाऽवयविनः परस्यैकदेशविकारो जीव इति द्वितीयः कल्पः । यथा क्षीरं स्वर्णं वा सर्वात्मना दधिरुचकादिरूपेण परिणमते तथा कृत्स्न एव परो जीवभावेन परिणमेदिति कल्पान्तरम् । तत्राऽऽद्यमनूद्य दूषयति—तत्रेत्यादिना । नानाद्रव्याणां समाहारो वा तानि वाऽन्योन्यापेक्षाणि परार्थेन तस्यैक्यं स्यान्नहि बहूनां मुख्यमैक्यं समा-

---

१ घ. ञ. ण. °टस्थत्वास° । २ क. ख. ग घ. ङ. छ. ज. °ह्येतिधा° । ३ ख. °वं सति स° । घ. ढ. °वं च सति स° । ४ घ. ञ. ण. भेदेनाहं । ५ च. छ. ढ. °शोसरा° । ६ क. छ. ज. °मुद्रव्यस्य । ७ क. ख. ढ. °श्च भौ° ।

हारस्य च समुदायापरपर्यायस्य समुदायिभ्यो भेदाभेदाभ्यां दुर्भणत्वेन कल्पितत्वादित्यर्थः। तर्हि ब्रह्मणो मुख्यमैक्यं मा भूत्तत्राऽऽह—तथा चेति। न हि तत्त्वानात्वं कस्यापि संमतमिति भावः।

अथ नित्ययुतसिद्धावयवानुगतोऽवयवी पर आत्मा तस्य तदवस्थस्यैकदेशो विज्ञानात्मा संसारी तदाऽपि सर्वावयवानुगतत्वादवयविन एवावयवगतो दोषो गुणो वेति विज्ञानात्मनः संसारित्वदोषेण पर एवाऽऽत्मा संबध्यत इतीयमप्यनिष्टा कल्पना। क्षीरवत्सर्वपरिणामपक्षे सर्वश्रुतिस्मृतिकोपः। स चानिष्टः।

द्वितीयमनूद्य निराकरोति—अथेत्यादिना। सर्वदैवं पृथगवस्थितेष्ववयवेषु जीवेष्वनुस्यूतश्चेतनोऽवयवी परश्चेत्तर्हि यथा प्रत्यवयवं मलसंसर्गे देहस्य मलिनत्वं तथा परस्य जीवगतैर्दुःखैर्महद्दुःखं स्यादिति प्रथमकल्पनावद्द्वितीयाऽपि कल्पना न युक्तेत्यर्थः। तृतीयं प्रत्याह—क्षीरवादिति। 'न जायते म्रियते वा विपश्चित्' इत्याद्याः श्रुतयः। 'न जायते म्रियते वा कदाचित्' इत्याद्याः स्मृतयः। श्रुत्यादिकोपस्येष्टत्वमाशङ्क्य वैदिक प्रत्याह—स चेति।

"निष्कलं निष्क्रियं शान्तम्" "दिव्यो ह्यमूर्तः पुरुषः सबाह्याभ्यन्तरो ह्यजः" "आकाशवत्सर्वगतश्च नित्यः" "स वा एष महानज आत्माऽजरोऽमरोऽमृतः" "न जायते म्रियते वा कदाचित्" "अव्यक्तोऽयम्" इत्यादिश्रुतिस्मृतिन्यायविरुद्धा एते सर्वे पक्षाः। अचलस्य परमात्मन एकदेशपक्षे विज्ञानात्मनः कर्मफलवद्देशसंसरणानुपपत्तिः। परस्य वा संसारित्वमित्युक्तम्।

श्रुतिस्मृती विवेचयन्पक्षत्रयसाधारणं दूषणमाह—निष्कलमित्यादिना। कूटस्थस्य निरवयवस्य कात्स्न्यैकदेशाभ्यां परिणामासंभवो न्यायः। जीवस्य परमात्मैकदेशत्वे दोषान्तरमाह—अचलस्येति। एकदेशस्यैकदेशिव्यतिरेकेणाभावाज्जीवस्य सर्गादिषु गत्यनुपपत्तिरित्युक्तमन्यथा परस्यापि गतिः स्यान्नहि पटावयवेषु चलत्सु पटो न चलतीत्याह—परस्य चेति। उक्तं यदि तावत्परमात्मेत्यादाविति शेषः।

परस्यैकदेशोऽग्निविस्फुलिङ्गवत्स्फुटितो विज्ञानात्मा संसरतीति चेत्तथाऽपि परस्यावयवस्फुटनेन क्षतप्राप्तिस्तत्संसरणे च परमात्मप्रदे-

---

१ घ. ञ. सर्वत्रैवापृ°। २ क. ण. दैवापृ°। ३ क. ख. छ. °त्माऽमरोऽजरोऽभृ°। ४ क. ज. °रोऽमृ°। ५ ख. घ. ज ढ °लदेश°। ६ ख. घ. ज. झ. °स्य चासं°। ७ क. ञ. ण. °पि स्या°। ८ क. ख. ध. ञ. ढ. ण. °चेति। ९ ग. °नं क्ष°। १० मनः प्र°।

शान्तरावयवव्यूढे छिद्रताप्राप्तिरव्रणत्ववाक्यविरोधश्च। आत्मावयवभूतस्य विज्ञानात्मनः संसरणे परमात्मशून्यप्रदेशाभावादवयवान्तरनोदनव्यूहनाभ्यां हृदयशूलेनेव परमात्मनो दुःखित्वप्राप्तिः।

जीवस्य संसारित्वेऽपि परस्य तन्नास्तीति शङ्कते—परस्येति। परस्य निरवयवत्वश्रुतेरवयवस्फुटनानुपपत्तिं मन्वानो दूषयति—तथाऽपीति। यत्र परस्यावयवः स्फुट्यति तत्र तस्य क्षते प्राप्नोति तदीयावयवसंतरणे च परमात्मनः प्रदेशान्तरेऽवयवानां व्यूहे सत्युपचयः स्यात्तथा च परस्यावयवा यतो निर्गच्छन्ति तत्र छिद्रतापाप्तिर्यत्र च ते गच्छन्ति तत्रोपचयः स्यादित्यकायमव्रणमस्थूलमनण्वह्रस्वमित्यादिवाक्यविरोधो भवेदित्यर्थः। परस्यैकदेशो विज्ञानात्मेति पक्षे दुःखितत्वमपि तस्य दुर्वारमापतेदिति दोषान्तरमाह—आत्मावयवेति।

अग्निविस्फुलिङ्गादिदृष्टान्तश्रुतेर्नैष दोष इति चेन्न। श्रुतेर्ज्ञापकत्वात्। न शास्त्रं पदार्थानन्यथा कर्तुं प्रवृत्तम्। किं तर्हि यथाभूतानामज्ञातानां ज्ञापने। किंचातः। शृण्वतो यद्भवति। यथाभूता मूर्तामूर्तादिपदार्थधर्मा लोके प्रसिद्धास्तद्दृष्टान्तोपादानेन तदविरोध्येव वस्त्वन्तरं ज्ञापयितुं प्रवृत्तं शास्त्रं न लौकिकवस्तुविरोधज्ञापनाय लौकिकमेव दृष्टान्तमुपादत्ते। उपादीयमानोऽपि दृष्टान्तोऽनर्थकः स्याद्दार्ष्टान्तिकासंगतेः। न ह्यग्निः शीत आदित्यो न तपतीति वा दृष्टान्तशतेनापि प्रतिपादयितुं शक्यम्। प्रमाणान्तरेणान्यथाधिगतत्वाद्वस्तुनः।

मृल्लोहविस्फुलिङ्गदृष्टान्तश्रुतिवशात्परस्यावयवा जीवा सिध्यन्तीत्यतो जीवानां परैकदेशत्वे नोक्तो दोषोऽवतरति युक्त्योक्षपा श्रुतेर्बलवत्त्वादिति शङ्कते—अग्निविस्फुलिङ्गादीति। शास्त्रार्थो युक्तिविरुद्धो न सिध्यतीति दूषयति—न श्रुतेरिति। नञर्थं विवृणोति—न शास्त्रमिति। हेतुभागमाकाङ्क्षापूर्वकं विभजते—किं तर्हीति। स्मृत्यादिव्यावृत्त्यर्थमज्ञातानामित्युक्तम्। अस्तु शास्त्रमज्ञातार्थं ज्ञापकं तथाऽपि परस्य नास्ति सावयवत्वमित्यत्र किमायातमिति पृच्छति—किंचात इति। शास्त्रस्य यथोक्तस्वभावत्वे यत्परस्य निरवयवत्वं फलति तदुच्यमानं समाहितेन श्रोतव्यमित्याह—शृण्वति। तत्र प्रथमं लोकविरोधेन

---

१ घ. ङ. ज. °णे च °प। २ ख. ढ. °त्वे प°। ३ घ. ञ ण. °टनानु°। ४ घ. ञ. ण. °पत्तिरिति म°। ५ घ. °त्र यस्या°। ६ ग. ङ. च. ढ. °तेरदो°। ७ ख. ढ. °यावग°। ८ ण °त्वेन य°। ९ ण. °विरुद्धां शा°।

शास्त्रप्रवृत्तिं दर्शयति—यथेति । आदिपदेन भावाभावादि गृह्यते पदार्थेष्वेव मोक्षपारतन्त्र्याद्धर्मस्तेषां लोकप्रसिद्धपदार्थानां दृष्टान्तानामुपन्यासेनेति यावत् । तद्विरोधि लोकप्रसिद्धपदार्थविरोधीत्यर्थः । वस्त्वन्तरं निरवयवादि दार्ष्टान्तिकम् । तद्विरोध्येवेत्येवकारस्य व्यावर्त्यमाह—न लौकिकेति । विपक्षे दोषमाह—उपादीयमानोऽपीति । सामान्येनोक्तमर्थं दृष्टान्तविशेषनिविष्टतया स्पष्टयति—न हीति । अग्नेरुष्णत्वमादित्यस्य तापकत्वमन्यथेत्युच्यते ।

न च प्रमाणं प्रमाणान्तरेण विरुध्यते । प्रमाणान्तराविषयमेव हि प्रमाणान्तरं ज्ञापयति । न च लौकिकपदपदार्थाश्रयणव्यतिरेकेणाऽऽगमेन शक्यमज्ञातं वस्त्वन्तरमवगमयितुम् । तस्मात्प्रसिद्धन्यायमनुसरता न शक्या परमात्मनः सावयवांशांशित्वकल्पना परमार्थतः प्रतिपादयितुम् ।

ननु लौकिकं प्रमाणं लौकिकपदार्थाविरुद्धमेव स्वार्थं समर्पयति वैदिकं पुनरपौरुषेयं तद्विरुद्धमपि स्वार्थं प्रमापयेदलौकिकविषयत्वादत आह—न चेति । ननु श्रुतेरज्ञातज्ञापकत्वे लोकानपेक्षत्वात्तद्विरोधेऽपि का हानिस्तत्राऽऽह—न चेति । लोकावगतसामर्थ्यः शब्दो वेदेऽपि बोधक इति न्यायात्तदनपेक्षा श्रुतिर्नाज्ञातं ज्ञापयितुमलमित्यर्थः । शास्त्रस्य लोकानुसारित्वे सिद्धे फलितमाह—तस्मादिति । प्रसिद्धो न्यायो लौकिको दृष्टान्तः । न हि नित्यस्याऽऽकाशादेः सावयवत्वं परश्च नित्योऽभ्युपगतस्तत्र तस्य सावयवत्वेनांशांशित्वकल्पना वस्तुतः संभवति लोकविरोधादित्यर्थः ।

क्षुद्रा विस्फुलिङ्गा ममैवांश इति च श्रूयते स्मर्यते चेति । चेन्न । एकत्वप्रत्ययार्थपरत्वात् । अग्नेर्हि विस्फुलिङ्गोऽग्निरेवेत्येकत्वप्रत्ययार्हो दृष्टो लोके । तथा चांशोऽशिनैकत्वप्रत्ययार्हः । तत्रैवं सति विज्ञानात्मनः परमात्मविकारांशत्ववाचकाः शब्दाः परमात्मैकत्वप्रत्ययाधित्सवः । उपक्रमोपसंहाराभ्यां च । सर्वासु ह्युपनिषत्सु पूर्वमेकत्वं प्रतिज्ञाय दृष्टान्तैर्हेतुभिश्च परमात्मनो विकारांशादित्वं जगतः प्रतिपाद्य पुनरेकत्वमुपसंहरति । तद्यथेहैव तावदिदं सर्वं यदयमात्मेति प्रतिज्ञायोत्पत्तिस्थितिलयहेतुदृष्टान्तैर्विकारविकारित्वाद्येकत्वप्रत्ययार्हं हेतून्प्रतिपाद्यानन्तरमबाह्यमयमात्मा ब्रह्मेत्युपसंहरिष्यति । तस्मादुपक्रमोपसंहाराभ्यामयमर्थो निश्चीयते परमात्मैकत्वप्रत्ययद्रढिम्न उत्पत्तिस्थितिलयप्रतिपादकानि वाक्यानीति । अन्यथा वाक्यभेदप्रसङ्गाच्च ।

---

१ घ. ञ. ण. °कांसि° । २ क. ख. ढ. °सिद्धार्था° । ३ ख. °दार्थश्रवण° । ४ ख. °मर्थय° । ५ ढ. °कैतु पु° । ६ क. ख. झ. °ति श्रू° । ७ छ. ज. झ. तथांशो° ।

जीवस्य परांशत्वानङ्गीकारे श्रुतिस्मृत्योर्गतिर्वक्तव्येति शङ्कते—क्षुद्रा इति । श्रुत्योर्गतिमाह—नेत्यादिना । विस्फुलिङ्गे दर्शितं न्याये सर्वत्रांशभावेऽतिदिशति—तथा चेति । दृष्टान्ते यथोक्तनीत्या स्थिते दार्ष्टान्तिकमाह—तत्रेति । परमात्मन[1] इह जीवस्यैकत्वविषयं प्रत्ययमाधातुमिच्छन्तीति तथोक्ताः । तेषामेकत्वप्रत्ययावधारहेतुत्वे हेत्वन्तरं संगृह्णाति—उपक्रमेति । एतदेव स्फुटयति—सर्वासु हीति । उक्तमर्थमुदाहरणनिष्ठतया विभजते—तद्यथेति । इहेति प्रकृतोपनिषदुक्तिः । आदिशब्देनांशांशित्वादि गृह्यते । विवृतं संग्रहवाक्यमुपसंहरति—तस्मादिति । तेषां स्वार्थनिष्ठत्वे दोषं वदन्नेकत्वप्रत्ययपार्थत्वे हेत्वन्तरमाह—अन्यथेति ।

सर्वोपनिषत्सु हि विज्ञानात्मनः परमात्मनैकत्वप्रत्ययो विधीयत इत्यविप्रतिपत्तिः सर्वेषामुपनिषद्वादिनाम् । तद्विध्येकवाक्ययोगे च। संभवत्युत्पत्त्यादिवाक्यानां वाक्यान्तरत्वकल्पनायां न प्रमाणमस्ति फलान्तरं च कल्पयितव्यं स्यात् । तस्मादुत्पत्त्यादिश्रुतय आत्मैकत्वप्रतिपादनपराः ।

'संभवत्येकवाक्यत्वे वाक्यभेदश्च नेष्यते' इति न्यायेनोक्तं प्रपञ्चयति—सर्वोपनिषत्स्विति । किंच तेषां स्वार्थनिष्ठत्वे श्रुतफलाभावात्फलान्तरं कल्पनीयम् । न चैकत्वप्रत्ययविषयतया तत्फले निराकाङ्क्षेषु तेषु तत्कल्पना युक्ता । दृष्टे सत्यदृष्टकल्पनानवकाशादित्याह—फलान्तरं चेति । उत्पत्त्यादिश्रुतीनां स्वार्थनिष्ठत्वासंभवे फलितमुपसंहरति—तस्मादिति ।

अत्र च संप्रदायविद आख्यायिकां संप्रचक्षते—कश्चित्किल राजपुत्रो जातमात्र एव मातापितृभ्यामपविद्धो व्याधगृहे संवर्धितः सोऽमुष्य वंश्यतामजानन्व्याधजातिप्रत्ययो व्याधजातिकर्माण्येवानुवर्तते न राजाऽस्मीति राजजातिकर्माण्यनुवर्तते । यदा पुनः कश्चित्परमकारुणिको राजपुत्रस्य राजश्रीप्राप्तियोग्यतां जानन्नमुष्य पुत्रतां बोधयति न त्वं व्याधोऽमुष्य राज्ञः पुत्रः कथंचिद्व्याधगृहमनुप्रविष्ट इति । स एवं बोधितस्त्यक्त्वा व्याधजातिप्रत्ययकर्माणि पितुरेतामहीमात्मनः पदवीमनुवर्तते राजाऽहमस्मीति । तथा किलायं परस्माद्ब्रह्मविस्फुलिङ्गादिवत्तज्जातिरेव विभक्त इह देहेन्द्रियादिगहने प्रविष्टोऽसंसारी सन्देहेन्द्रियादिसंसारधर्ममनुवर्तते देहेन्द्रियसंघातोऽस्मि क्षुद्रः

---

१ ञ. तथेति । २ घ. ञ. ण. °करीत्या । ३ क. ख. ङ. छ. झ. °त्सु वि° । ४ ग. छ. झ. ढ. °मात्मैक° । ५ ण. °यशेषत° । ६ ख. ख. ढ. °षु कल्प° । ७ क. ख. घ. च. छ. ज. ढ. वंशता° । ८ छ झ. °न्द्रियादिसं° । ९ ग ञ. °संहतो° ।

स्थूलः सुखी दुःखीति परमात्मतामजानन्नात्मनः । न त्वमेतदात्मकः परमेव ब्रह्मास्यसंसारीति प्रतिबोधित आचार्येण हित्वैषणात्रयानुवृत्तिं ब्रह्मैवास्मीति प्रतिपद्यते ।

तत्त्वमस्यादिवाक्यैकवाक्यतां तच्छेषः सृष्ट्यादिवाक्यमित्युक्तेऽर्थे द्रविडाचार्यसंमतिमाह—अत्र चेति । तत्र दृष्टान्तरूपामाख्यायिकां भणयति—**कश्चिदिति** । जातमात्रे प्रागवस्थायामेव राजाऽस्मीत्यभिमानाभिव्यक्तेरित्यर्थः । ताम्यां तत्परित्यागे निमित्तविशेषस्यानिश्चितत्वद्योतनार्थं किलेत्युक्तम् । व्याधजातिप्रत्ययस्तत्प्रयुक्तो व्याधोऽस्मीत्यभिमानो यस्य स तथा । व्याधजातिकर्माणि तत्प्रयुक्तानि मांसैकरणादीनि । राजाऽस्मीत्यभिमानपूर्वकं तज्जातिप्रयुक्तानि परिपालनादीनि कर्माणि । अज्ञानं तत्कार्यं चोक्त्वा ज्ञानं तत्फलं च दर्शयति—**यदेत्यादिना** । बोधनप्रकारमभिनयति—**न त्वमिति** । कथं तर्हि शबरवेशमप्रवेशस्तत्राऽऽह—**कथंचिदिति** । राजाऽहमस्मीत्यभिमानपूर्वकमात्मनः पितृपैतामहीं पदवीमनुवर्तत इति संबन्धः । दार्ष्टान्तिकरूपामाख्यायिकामाचष्टे—**तथेति** । जीवस्य परमाद्विभागे निमित्तमज्ञानं तत्कार्यं च प्रसिद्धमिति द्योतयितुं किलेत्युक्तम् । तज्जातिस्तत्स्वभावो वस्तुतः परमात्मैवेति यावत् । इहेत्यपरोक्षानुभवगम्यतोक्तिः । गहनं गम्भीरं वनम् । संसारधर्मानुवर्तने हेतुमाह—**परमात्मतामिति** । उक्ताविद्यातत्कार्यविरोधिनीं ब्रह्मात्मविद्यां लम्भयति—**न त्वमिति** ।

अत्र राजपुत्रस्य राजप्रत्ययवद्ब्रह्मप्रत्ययो दृढो भवति विस्फुलिङ्गवदेव त्वं परस्माद्ब्रह्मणो भ्रष्ट इत्युक्ते । विस्फुलिङ्गस्य प्रागग्नेर्भ्रंशादन्यैकत्वदर्शनात् । तस्मादैकत्वप्रत्ययदार्ढ्याय सुवर्णमणिलोहाग्निविस्फुलिङ्गदृष्टान्ता नानात्वादिभेदप्रतिपादनपराः । सैन्धवघनवत्प्रज्ञप्त्येकरसनैरन्तर्यावधारणादेकधैवानुद्रष्टव्यमिति च । यदि च ब्रह्मणश्चित्रपटवद्वृक्षसमुद्रादिवच्चोत्पत्त्याद्यनेकधर्मविचित्रता विजिग्राहयिषितैकरसं सैन्धवघनवदनन्तरमबाह्यमिति नोपसमहरिष्यदेकधैवानुद्रष्टव्यमिति च न प्रायोक्ष्यत । य इह नानेव पश्यतीति निन्दावचनं च ।

राजपुत्रस्य राजाऽस्मीति प्रत्ययवद्वाक्यादेवाविकारिणि ब्रह्मास्मीति प्रत्ययश्चेत्कुतं विस्फुलिङ्गादिदृष्टान्तश्रुत्येत्याशङ्क्याऽऽह—**अत्रेति** । तथाऽपि कथं ब्रह्मप्रत्ययदार्ढ्यं तत्राऽऽह—**विस्फुलिङ्गस्येति** । दृष्टान्तेऽनेकत्वदर्शनं तस्मादिति परा-

---

१ ख. झ. °त्ति च ब्रू° । २ घ. प्रमाण° । ३ घ. च. °श्चित्किलेति । ४ क. सविक्र° । ५ ग. ङ. च. ढ °रमात्मदे° । ६ क. ग. घ. ङ. छ. ज. झ. °ज्ञप्त्यैक° । ७ क. ख. ग. घ. च. ज. झ. ढ. °न्तर्यमात्र° । ८ ख. ग. च. छ. ढ. °श्रुत्। व ।

मृष्टम् । उत्पत्त्यादिभेदे नास्ति शास्त्रतात्पर्यमित्यत्र हेत्वन्तरमाह—सैन्धवेति । चकारोऽवधारणादिति पदमनुकर्षति । संगृहीतमर्थं विवृणोति—यदि चेत्यादिना । निन्दावचनं च न प्रायोक्ष्यतेति संबन्धः ।

तस्मादेकरूपैकत्वप्रत्ययदार्ढ्यायैव सर्ववेदान्तेषूत्पत्तिस्थितिलयादिकल्पना न तत्प्रत्ययकरणाय । न च निरवयवस्य परमात्मनोऽसंसारिणः संसार्येकदेशकल्पना न्याय्या स्वतोऽदेशत्वात्परमात्मनः । अदेशस्य परस्यैकदेशसंसारित्वकल्पनायां पर एव संसारीति कल्पितं भवेत् ।

एकत्वस्यावधारणफलमाह—तस्मादिति । एकत्वस्य भेदसहत्वं वारयितुमेकरूपविशेषणम् । आदिशब्देन प्रवेशनियमने गृह्येते । न तत्प्रत्ययकरणायेत्यत्र तच्छब्देनोत्पत्त्यादिभेदो विवक्षितः । किंच परस्यैकदेशो विज्ञानात्मेत्यत्र तदेकदेशः स्वाभाविको वा स्यादौपाधिको वेति विकल्प्याऽऽद्यं दूषयति—चेति । विपक्षे दोषमाह—अदेशस्येति ।

अथ परोपाधिकृत एकदेशः परस्य घटकरकाद्याकाशवत् । न । तदा तत्र विवेकिनां परमात्मैकदेशः पृथक्संव्यवहारभागिति बुद्धिरुत्पद्यते । अविवेकिनां विवेकिनां चोपचरिता बुद्धिर्दृष्टेति चेत् । न । अविवेकिनां मिथ्याबुद्धित्वात् । विवेकिनां च संव्यवहारमात्रालम्बनार्थत्वात् ।

द्वितीयमुत्थापयति—अथेति । एकदेशस्यौपाधिकत्वपक्षे परस्मिन्विवेकवतां तदस्वत्वबुद्धिभाजां तदेकदेशो वस्तुतः पृथग्भूत्वा व्यवहारालम्बनमिति नैव बुद्धिर्जायत औपाधिकस्य स्फटिकलौहित्यवन्मिथ्यात्वादित्युत्तरमाह—न तदेति । ननु जीवे कर्ताऽहं भोक्ताऽहमिति परिच्छिन्नधीः सर्वेषामुपलभ्यते । सा च तस्य वस्तुतोऽपरिच्छिन्नब्रह्मभावत्वान्मिथ्योपचरिता । तस्मादुभयेषामुक्तात्मबुद्धिदर्शनात्परमात्मैकदेशत्वं जीवस्य दुर्वारमिति चोदयति—अविवेकिनामिति । तत्राविवेकिनां यथोक्ता बुद्धिरुपचरिता न भवत्यतस्मिंस्तद्बुद्धित्वेनाविद्यात्वादिति परिहरति—नेत्यादिना । तथाऽपि विवेकिनामीदृशी धीरुपचरितेति चेत्तत्राऽऽह—विवेकिनां चेति । तेषां संव्यवहारोऽभिज्ञाभिवदनात्मकस्तावन्मात्रस्याऽऽलम्बनमाभासभूतोऽर्थस्तद्विषयत्वात्तद्बुद्धेरपि मिथ्याबुद्धित्वादुपचरितत्वासिद्धिरित्यर्थः ।

यथा कृष्णो रक्तश्चाऽऽकाश इति विवेकिनामपि कदाचित्कृष्णता रक्तता चाऽऽकाशस्य संव्यवहारमात्रालम्बनार्थत्वं प्रतिपद्यत इति न

---

१ ढ. °क्ष्यदिति । २ घ ञ. ण °न्धः । एकस्या° । ३ घ. च. °रिकत्व° । ४ घ. ञ. °णश्रवणफ° । ५ ख. ख. °त्रावल° । ६ ख. घ. °रावल° । ७ ख. ढ. °त्वादुबु° । ८ ख. °त्रावल° ।

परमार्थतः कृष्णो रक्तो वाऽऽकाशो भवितुमर्हति । अतो न पण्डितैर्ब्रह्मस्वरूपप्रतिपत्तिविषये ब्रह्मणोऽशांश्येकदेशैकदेशिविकारविकारित्वकल्पना कार्या । सर्वकल्पनापनयनार्थसारपरत्वात्सर्वोपनिषदाम् । अतो हित्वा सर्वकल्पनामाकाशस्येव निर्विशेषता प्रतिपत्तव्या । " आकाशवत्सर्वगतश्च नित्यः " " न लिप्यते लोकदुःखेन बाह्यः " इत्यादिश्रुतिशतेभ्यः ।

विवेकिनामविवेकिनां चाऽऽत्मनि पोरोच्छन्नधीरुपलब्धेत्येतावता न तस्य वस्तुतो ब्रह्मांशत्वादि सिध्यतीत्येतद्दृष्टान्तेन साधयति—यथेति । अविवेकिनामित्येवेत्यर्थः । ब्रह्मणि वस्तुतोऽशादिकल्पना न कर्तव्येति दार्ष्टान्तिकमुपसंहरति—अत इति । अंशांशिनोर्विशदीकरणमेकदेशैकदेशीति । अतःशब्दोपात्तमेव हेतुं स्फुटयति—सर्वकल्पनेति । सर्वासां कल्पनानामपनयनमेवार्थः सारत्वेनाभीष्टस्तत्परत्वादुपनिषदां तदेकतमधिगम्ये ब्रह्मणि न कदाचिदपि कल्पनाऽस्तीत्यर्थः । उपनिषदां निर्विकल्पकवस्तुपरत्वे फलितमाह—अतो हित्वेति ।

नाऽऽत्मानं ब्रह्मविलक्षणं कल्पयेदुष्णात्मक इवाग्नौ शीतैकदेशं प्रकाशात्मके वा सवितरि तमएकदेशं सर्वकल्पनापनयनार्थसारपरत्वात्सर्वोपनिषदाम् । तस्मान्नामरूपोपाधिनिमित्ता एवाऽऽत्मन्यसंसारधर्मिणि सर्वे व्यवहाराः " रूपं रूपं प्रतिरूपो बभूव " " सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाऽभिवदन्यदास्ते " इत्येवमादिमन्त्रवर्णेभ्यः । न स्वत आत्मनः संसारित्वमलक्तकाद्युपाधिसंयोगजनितरक्तस्फटिकादिबुद्धिवद्भ्रान्तमेव न परमार्थतः ।

ब्रह्मणो निर्विशेषत्वेऽप्यात्मनस्तदेकदेशस्य सविशेषत्वं किं न स्यादित्याशङ्क्याऽऽह—नाऽऽत्मानमिति । आत्मा निर्विशेषश्चेत्कथं तस्मिन्व्यवहारप्रपञ्चमित्याशङ्क्याऽऽह—तस्मादिति आत्मनि सर्वो व्यवहारो नामरूपोपाधिप्रयुक्त इत्यत्र प्रमाणमाह—रूपं रूपमिति । असंसारधर्मिणीत्युक्तं विशेषणं विशदयति—न स्वत इति ।

" ध्यायतीव लेलायतीव " " न कर्मणा वर्धते नो कनीयान् " " न कर्मणा लिप्यते पापकेन " " समं सर्वेषु भूतेषु तिष्ठन्तम् " " शुनि चैव श्वपाके च " इत्यादिश्रुतिस्मृतिन्यायेभ्यः परमात्मनोऽसंसारित्वमेव । अत एकदेशो विकारः शक्तिर्वा विज्ञानात्माऽन्यो वेति

---

१ घ. च. ङ. °शतत्कल्प° । २ ङ. °रित्वाद्यत । ढ. °रिण ए° । ३ ग. च. °तेक° । ४ ग. घ. ङ. च. ज. ढ. °ति क° ।

विकल्पयितुं निरवयवत्वाभ्युपगमे विशेषतो न शक्यते। अंशादिश्रुति-स्मृतिवादाश्चैकत्वार्था न तु भेदप्रतिपादका विवक्षितार्थैकवाक्यया-दित्यवोचाम।

ज्ञात्वा संसारित्वमात्मनीत्यत्र मानमाह—ध्यायतीति। कूटस्थत्वात्तद्भ्रम्वा-दिर्न्यायः। परमात्मनः सांशत्वपक्षो निराकृतः। ननु तस्य निरंशत्वेऽपि कुतो जीवस्य तन्मात्रत्वं तदेकदेशत्वादिसंभवादत आह—एकदेश इति। कथं तर्हि 'पादोऽस्य विश्वा भूतानि' 'ममैवांशो जीवलोके' 'अंशो नानाव्यपदेशात्' 'सर्वे एत आत्मानो व्युच्चरन्ति' इति श्रुतिस्मृतिवादास्तत्राऽऽह—अंशादीति।

सर्वोपनिषदां परमात्मैकत्वज्ञापनपरत्वेऽथ किमर्थं तत्प्रतिकूलोऽर्थो विज्ञानात्मभेदः परिकल्प्यत इति। कर्मकाण्डप्रामाण्यविरोधपरिहा-रादेरुक्तः। कर्मप्रतिपादकानि हि वाक्यान्यनेककियाकारकफलभो-क्तृकर्माण्यवाणि। विज्ञानात्मभेदाभावे ह्यसंसारिण एव परमात्मन एकत्वे कस्यमिष्टफलासु क्रियासु प्रवर्तयेयुरनिष्टफलाभ्यो वा क्रियाभ्यो निवर्तयेयुः।

स्वाभाविकाभ्यां जीवेश्वरयोरंशांशित्वादिकल्पनां निराकृत्य वेदान्तानामैकात्म्यपरत्वे स्थिते सति हेत्वसिद्धिः फलतीत्याह—सर्वोपनिषदामिति। एकात्म्यपरत्वस्य प्रति-पादनहेतुर्भवतीत्यवधारणशब्दार्थः। प्रकृतं ज्ञानं तत्पदेन परामृश्यते। इत्यहेत्वमेव तत्प्र-तिषेधः। किमर्थमिति प्रश्नं मन्वानो हेतिनां मतमुत्थापयति—कर्मकाण्डेति। वेदान्तानामैकात्म्यपरत्वेऽपि कथं तत्प्रामाण्यविरोधपरिहारोऽऽह—कर्मेति। तथाऽपि कथं विरोधावकाशः स्यादित्याशङ्क्याऽऽह—विज्ञानात्मेति।

कस्य वा बन्धस्य मोक्षायोपनिषदारभ्यते। अपि च परमाद्वैकात्म्यवादिपक्षे कथं परमात्मैकत्वोपदेशः कथं वा तदुपदेशाद्ब्रह्मैवाहमस्मीति बन्धस्य हि बन्धनाशायोपदेशस्तदभाव उपनिषच्छास्त्रं निर्विषयमेव।

केवलज्ञानपक्षे कर्मकाण्डविरोधमुक्त्वा तत्रैव ज्ञानकाण्डविरोधमाह—अस्य वेति। अस्य नित्यमुक्तत्वादन्यस्य स्वतः परतो वा बन्धस्याभावान्निष्प्रयोजनत्वा-त्तथा चाधिकारानुपपत्तेरनुपनिषदारभ्यातिद्धिरित्यर्थः। कर्मकाण्डस्य कार्यकारणान्तरस्य च प्रामाण्यादुपपत्तिर्विद्यात्मादिभेदं कल्पयतीत्यर्थापत्तिरूपमुक्तं तत्र हिरण्यगर्भा-र्थापत्तिं पक्षयति—अपि चेति। का पुनरुपदेशस्यानुपपत्तिस्तत्राऽऽह—बन्ध-स्येति। तदभाव इत्यत्र तच्छब्दो बन्धमधिकरोति। निर्विषयं निरधिकारम्। किंच यदर्थापत्तिरूपमुक्तया विधयोत्तिष्ठति तर्हि भेदस्य दुर्निरूपत्वात्कथं कर्म-

---

१ ब. ज. °फलोपभो°। २ घ. ङ. °येयुः पुनर°। ३ घ. ण. °ल्पना नि°। ४ ज. च। ५ ग. च. कस्मा उपदे°। ६ म. च. ढ. कस्य चोप°। ७ ग. घ. ङ. च. ज. ढ. नाशब्दाभो°। ८ ज. ढ. ण. चेति। ९ क. ज. ढ. °त्पर्या°।

काण्डं प्रमाणमिति यद्ब्रह्मवादिना कर्मवादी चोद्यते तद्ब्रह्मवादस्य कर्मवादेन तुल्यम्। ब्रह्मवादेऽपि शिष्यशासित्रादिभेदाभावे कथमुपनिषत्प्रमाण्यमित्याक्षेप्तुं शक्यत्वाद्यथोपनिषदां प्रतीयमानं शिष्यशासित्रादिभेदमाश्रित्य प्रामाण्यमिति परिहारः स कर्मकाण्डस्यापि समानः।

एवं तर्ह्युपनिषद्ब्रह्मवादिपक्षस्य कर्मकाण्डवादिपक्षेण चोद्यपरिहार्ययोः समानः पन्थाः। येन भेदाभावे कर्मकाण्डं निरालम्बनमात्मानं न लभते प्रमाणं प्रति तथोपनिषदपि। एवं तर्हि यस्य प्रामाण्ये स्वार्थविघातो नास्ति तस्यैव कर्मकाण्डस्यास्तु प्रामाण्यम्। उपनिषदां तु प्रामाण्यकल्पनायां स्वार्थविघातो भवेदिति मा भूत्प्रामाण्यम्। न हि कर्मकाण्डं प्रमाणं सदप्रमाणं भवितुमर्हति न हि प्रदीपः प्रकाश्यं प्रकाशमानं न प्रकाशयति चेति।

तत्रापि पौरुषेयभेदमादाय प्रामाण्यस्य सुप्रतिपन्नत्वाच्च च भेदप्रतीतिरभ्रान्तिर्बाधाभावादित्यभिप्रेत्याऽऽह—एवं तर्हीति। चोद्यसाम्यं विवृणोति—येनेति। यदि चोद्यसाम्यात्परिहारस्यापि साम्यमिति शेषः। ननु कर्मकाण्डं भेदपरं ब्रह्मकाण्डमभेदपरं प्रतिभाति न च वस्तुनि विकल्पः संभवत्यतोऽन्यतरस्यापामाण्यमेव आह—एवं तर्हीति। तुल्यमुपनिषदामपि स्वार्थविघातकत्वमित्याशङ्क्याऽऽह—उपनिषदामिति। स्वार्थः शब्दशक्तिवशात्प्रतीयमानः सृष्ट्यादिभेदः। यच्चोक्तं कर्मकाण्डस्य व्यावहारिकं प्रामाण्यं न तात्त्विकं तात्त्विकं तु काण्डान्तरस्येति तत्राऽऽह—न हीति। यद्धि प्रामाण्यस्य व्यावहारिकत्वं तदेव तस्य तात्त्विकत्वं न हि प्रमाणं तत्त्वं च नाऽऽवेदयति व्याघाताद्इत्यभिप्रेत्य दृष्टान्तमाह—न हीति। स्वार्थविघात्तात्कर्मकाण्डाविरोधाच्चोपनिषदामप्रामाण्यमित्युक्तमुपसंहर्तुमितिशब्दः।

प्रत्यक्षादिप्रमाणविप्रतिषेधाच्च। न केवलमुपनिषदो ब्रह्मैकत्वं प्रतिपादयन्त्यः स्वार्थविघातं कर्मकाण्डप्रामाण्यविघातं च कुर्वन्ति प्रत्यक्षादिनिश्चितभेदप्रतिपत्त्यर्थप्रमाणैश्च विरुध्यन्ते। तस्मादप्रामाण्यमेवोपनिषदाम्। अन्यार्थता वाऽस्तु न त्वेव ब्रह्मैकत्वप्रतिपत्त्यर्थता।

उपनिषदप्रामाण्ये हेत्वन्तरमाह—प्रत्यक्षादीति। प्रत्यक्षादीनि निश्चितानि भेदप्रतिपत्त्यर्थानि प्रमाणानि तैरिति विग्रहः। अध्ययनविध्युपादापितानां कृत्स्नानामप्रामाण्यमित्याशङ्क्याऽऽह—अन्यार्थता वेति।

---

१ म. घ. ङ. च. °णं च भ°। २ घ. ञ. °तिकं भे°। ३ घ. °ण्यस्योपप°। ४ घ. ञ. °काण्डे त्वभे°। ५ क. ण. स्वार्थाभिघाता°। ६ घ. ङ. च. ज. झ. ढ. °विभिनेश्च°। ७ क. ल. घ. ढ. ङ. झ. ढ. °त्यर्थैः प्र°। ८ घ. ङ. छ. ज. झ. त्वेवं। ९ ख. घ. ढ. °वदामप्रा°। १० घ. °भ्युपपादिता°। ११ क. ढ. °पाद्यानां।

न । उक्तोत्तरत्वात् । प्रमाणस्य हि प्रमाणत्वमप्रमाणत्वं वा प्रमोत्पादनानुत्पादननिमित्तम् । अन्यथा चेत्स्तम्भादीनां प्रामाण्यप्रसङ्गाच्छब्दादौ प्रमेये । किंचातः । यदि तावदुपनिषदो ब्रह्मैकत्वप्रतिपत्तिप्रमां कुर्वन्ति कथमप्रमाणं भवेयुः । न कुर्वन्त्येवेति चेद्यथाऽग्निः शीतमिति स भवानेवं वदन्वक्तव्य उपनिषत्प्रामाण्यप्रतिषेधार्थं भवतो वाक्यमुपनिषत्प्रामाण्यप्रतिषेधं किं न करोत्येवाग्निर्वा रूपप्रकाशम् । अथ करोति यदि करोति भवतु तदा प्रतिषेधार्थं प्रमाणं भवद्वाक्यमग्निश्च रूपप्रकाशको भवेत् । प्रतिषेधवाक्यप्रामाण्ये भवत्येवोपनिषदां प्रामाण्यम् । अत्र भवन्तो ब्रुवन्तु कः परिहार इति ।

सिद्धान्तयति—नेत्यादिना । तदेव स्फुटयितुं सामान्यन्यायमाह—प्रमाणस्येति । स्वार्थे प्रमोत्पादकत्वाभावेऽपि प्रामाण्यमिच्छन्तं प्रत्याह—अन्यथेति । यथोक्तप्रयोजकप्रयुक्तं प्रामाण्यमप्रामाण्यं वेत्येतस्मिन्पक्षे किं फलतीति पृच्छति—किंचेति । तत्र किमुपनिषदः स्वार्थं बोधयन्ति न वेति विकल्प्याऽऽद्यमनूद्य दूषयति—यदि तावदिति । द्वितीयमुत्थाप्य निराकरोति—नेत्यादिना । अग्निर्यथा शीतं न करोति तथोपनिषदोऽपि ब्रह्मैकत्वे प्रमां न कुर्वन्तीति वदन्तं प्रति प्रतिवदति—अहो न युक्तोऽनुभवविरोधादित्याशङ्क्याऽऽह—यदीति । तर्हि स्वार्थे प्रमिणिमनकत्वाद्वाक्यस्य प्रामाण्यं स्यादित्याशङ्क्याऽऽह—प्रतिषेधेति । उपनिषदप्रामाण्ये भवद्वाक्यास्यापि प्रामाण्यं तत्प्रामाण्ये तूपनिषत्प्रामाण्यं दुर्वारमिति साम्ये प्राप्ते व्यवस्थापकः समाधिर्वक्तव्य इत्याह—अत्रेति ।

नन्वत्र प्रत्यक्षाद्वाक्यं उपनिषत्प्रामाण्यप्रतितेर्धार्थप्रतिपत्तिरग्नेश्च रूपप्रकाशनप्रत्तिः प्रमा कस्तर्हि भवतः प्रद्वेषो ब्रह्मैकत्वप्रत्यये प्रमां प्रत्यक्षं कुर्वतीषूपनिषत्सूपलभ्यमानासु । प्रतिषेधानुपपत्तेः । क्लेशमोहादिनिवृत्तिश्च प्रत्यक्षं फलं ब्रह्मैकत्वप्रतिपत्तिपारम्पर्यजनितमित्यवोचाम तस्मादुक्तोत्तरत्वादुपनिषदं प्रत्यप्रामाण्यशङ्का तावन्नास्ति ।

उक्तमेवार्थं चोद्यसमाधिभ्यां विशदयति—नन्वित्यादिना । प्रतिषेधमङ्गीकृत्योक्ता यथोक्तोपनिषदुपलम्भे सति तस्य निरवकाशत्वात्प्रद्वेषानुपपत्तिरित्याह—यदि-

१ घ. ज. °णं च भ । २ ग. च. °म् । य° । ३ ख. घ. ङ. ज. ढ. °णं च म्र° । ४ ख. ग. ढ. °व्यं चेत्ये° । ५ क °बन्धी म्र° । ख. ढ ण. °बन्धी म्र° । ६ घ. ञ. ण. °त्वान्मद्वा° । ७ ख. घ. ङ. छ. ज. °धार्था प्र° । ८ ग. समा । ९ घ. च झ. ढ. °त्ययम्र° । १० ख. ग. च. ड. °त्यक्षां कु । ११ छ. झ. °म । एवमुक्तो° । १२ ख. घ. च. ढ. °स्मादुक्तमुक्तो° ।

षेधेति । उपनिषदुत्थाया धियो वैफल्यात्तात्पर्यमानतेत्याशङ्क्याऽऽह—श्लोकेति । एकत्वमतिपत्तिस्तावदापातेन जायते सा च विचारं प्रयुज्य मननादिद्वारा दृढी भवति । सा पुनरशेषं शोकादिकमपनयतीति पारम्पर्यजनितं फलमिति द्रष्टव्यम् । स्वार्थे प्रमाजनकत्वादुपनिषदां प्रामाण्यमित्युक्तमुपसंहरति—तस्मादिति ।

यच्चोक्तं स्वार्थविघातकरत्वादप्रामाण्यमिति । तदपि न । तदर्थप्रतिपत्तेर्बाधकाभावात् । न ह्युपनिषद्भ्यो ब्रह्मैकमेवाद्वितीयं नेह नेति प्रतिपत्तिरस्ति । यथाऽग्निरुष्णः शीतश्चेत्यस्माद्वाक्यादिरुद्धार्थद्वयप्रतिपत्तिः । अभ्युपगम्य चैतदवोचाम । न तु वाक्यप्रामाण्यसमय एष न्यायो यदुतैकस्य वाक्यस्यानेकार्थत्वम् । सति चानेकार्थत्वे स्वार्थस्य स्यात्तद्विघातकृच्च विरुद्धोऽन्योऽर्थः । न त्वेतद्वाक्यप्रमाणकानां विरुद्धमविरुद्धं चैकं वाक्यमनेकमर्थं प्रतिपादयतीत्येष समयः । अर्थैकत्वाद्ध्येकवाक्यता ।

प्रामाण्यहेतुतद्भावादुपनिषदां प्रामाण्यं प्रतिपाद्य तदप्रामाण्यं परोक्तमनुवदति—यच्चोक्तमिति । कथं हि तासां स्वार्थविघातकत्वं किं ताभ्यो ब्रह्मैकमेवाद्वितीयं नेह नेति प्रतिपत्तिरुत्पद्यते किंवा काश्चिदुब्रह्मैकत्वप्रतिपत्तिव्याघातोपनिषदस्तन्मतिषेधं कुर्वन्तीति विकल्प्याऽऽद्यं दूषयति—तदपि नेति । तदेव पक्षयति—न हीति । एकस्य वाक्यस्यानेकार्थत्वमङ्गीकृत्य वैधर्म्योदाहरणमुक्तमित्याह—अभ्युपगम्येति । तस्याङ्गीकारवादित्वे हेतुमाह—न त्विति । उक्तमर्थं व्यतिरेकद्वारा विवृणोति—सति चेति । भवत्वेकस्य वाक्यस्यानेकार्थत्वं नेत्याह—न त्विति । कस्तर्हि तेषां समयस्तत्राऽऽह—अर्थैकत्वादिति । तदुक्तं मण्डने ब्रह्मे—अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागः स्यादिति ।

न च. कानिचिदुपनिषद्वाक्यानि ब्रह्मैकत्वप्रतिषेधं कुर्वन्ति । यत्तु लौकिकं वाक्यमग्निरुष्णः शीतश्चेति न तत्रैकवाक्यता तदेकदेशस्य प्रमाणान्तरविषयानुवादित्वात् । अग्निः शीत इत्येतदेकं वाक्यमग्निरुष्ण इति तु प्रमाणान्तरानुभवस्मारकं न तु स्वयमर्थावबोधकम् । अतो नाग्निः शीत इत्यनेनैकवाक्यता प्रमाणान्तरानुभवस्मारणेनैवोपक्षीणत्वात् । यत्तु विरुद्धार्थप्रतिपादकमिदं वाक्यमिति मन्यते तच्छीतोष्णपदाभ्यामग्निपदसामानाधिकरण्यप्रयोगनिमित्तभ्रान्तिर्न त्वेवैकस्य वाक्यस्यानेकार्थत्वं लौकिकस्य वैदिकस्य वा ।

---

१ घ. ज. °कत्वा°। २ घ. ङ. झ. नैवं। ३ घ. ङ. छ. ञ. ट. °श्चेत्यस्मा°। ४ क. च. ज. ट. °नेकार्थ°। ५ ङ. च. ङ. ट. °त्वादेक°। ६ क. ख. ट. ण. °स्त्र प्रति°। ७ क. ख. ट. ण. °रणं युक्त°। ८ क. ख. ञ. ण. °भागे स्या°। ९ घ. ङ. ञ. ट. °वैक°।

द्वितीयं दूषयति—न चेति। एकस्य वाक्यस्यानेकार्थत्वं लोके दृष्टमित्याशङ्क्याऽऽह—यस्त्विति। तदेकदेशस्येत्यादिवाक्यं विवृणोति—अग्निरिति। अनुवादकबोधकभागपोरेकवाक्यत्वाभावं फलितमाह—अत इति। हेत्वर्थमुक्तमेव स्फुटयति—प्रमाणान्तरेति। शीतः शैशिरोऽग्निरित्येतद्बोधकमेव चेद्वाक्यं कथं तर्हि तत्र बोधकस्य विरुद्धार्थधीरित्याशङ्क्याऽऽह—यत्त्विति।

यच्चोक्तं कर्मकाण्डप्रामाण्यविघातकदुपनिषद्वाक्यमिति। तन्न। अन्यार्थत्वात्। ब्रह्मैकत्वप्रतिपादनपरा ह्युपनिषदो नेष्टार्थप्राप्तौ साधनोपदेशं तस्मिन्वा पुरुषनियोगं वारयन्त्यनेकार्थत्वानुपपत्तेरेव। न च कर्मकाण्डवाक्यानां स्वार्थे प्रमा नोत्पद्यते। असाधारणे चेत्स्वार्थे प्रमामुत्पादयति वाक्यं कुतोऽन्येन विरोधः स्यात्।

स्वार्थविघातकत्वादप्रामाण्यमुपनिषदामित्येतन्निराकृत्य चोद्यान्तरमनूद्य निराकरोति—यच्चेत्यादिना। तस्मिन्निति इष्टार्थप्रापकसाधनोक्तिः। ननूपनिषद्वाक्यं ब्रह्मात्मैकत्वं साक्षात्प्रतिपादयदर्थात्कर्मकाण्डप्रामाण्यविघातकमिति चेत्तत्र तदप्रामाण्यमनुत्पत्तिलक्षणं विपर्यासलक्षणं वेति विकल्प्याऽऽद्यमनूद्य दूषयति—न चेति। विदितपदतदर्थसंगतेर्वाक्यार्थन्यायविदस्तदर्थेषु प्रमोत्पत्तिदर्शनादित्यर्थः। स्वार्थे प्रमामुत्पादयदपि वाक्यं मानान्तरविरोधादप्रमाणमित्याशङ्क्याऽऽह—असाधारणे चेदिति। स्वगोचरशून्यत्वात्प्रमाणानामित्यर्थः।

ब्रह्मैकत्वे निर्विषयत्वात्प्रमा नोत्पद्यत एवेति चेत्। न। प्रत्यक्षत्वात्प्रमायाः। "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" "ब्राह्मणो न हन्तव्यः" इत्येवमादिवाक्येभ्यः। प्रत्यक्षा प्रमा जायमाना सा नैव भविष्यति यद्युपनिषदो ब्रह्मैकत्वं बोधयिष्यन्तीत्यनुमानम्। न चानुमानं प्रत्यक्षविरोधे प्रामाण्यं लभते। तस्मादसदेवैतद्दूयते प्रमैव नोत्पद्यत इति।

विषयं नेति प्रमोत्पादकं प्रमाणापहृतविषयत्वादनुष्णाग्निवाक्यवदिति शङ्कते—ब्रह्मेति। प्रत्यक्षविरोधादनुमानमनवकाशमिति परिहरति—नेत्यादिना।

अपि च यथाप्राप्तस्यैवाविद्याप्रत्युपस्थापितस्य क्रियाकारकफलस्याऽऽश्रयणेनेष्टानिष्टप्राप्तिपरिहारोपायसामान्ये प्रवृत्तस्य तद्विशेषमजानतस्तदाचक्षाणा श्रुतिः क्रियाकारकफलभेदस्य लोकप्रसिद्धस्य

---

१ क. ख. ढ. °ब्रह्मैक°। २ ख. घ. ढ. °तन्न त। ३ घ. ञ. ण. °ल्याऽऽद्य वृ°। ४ घ. ञ. ण. °र्वाक्यश्राविणस्त°। ५ घ. ण. °र्थे प्र°। ६ ग. ङ. लभेत। ७ घ. ढ. प्रमा नै वोत्प°। ८ ढ. °तं कर्मकाण्डवाक्यं न। ९ घ. ञ. न तत्प्रमो°।

सत्यतामसत्यतां वा नाऽऽचष्टे न च वारयति । इष्टानिष्टफलप्राप्तिपरिहारोपायविधिपरत्वात् ।

इतश्च कर्मकाण्डस्य नाप्रामाण्यमित्याह यद्द्वितीयं पत्याह—अपि चेति । यथाप्राप्तस्येत्यस्यैव व्याख्यानमविद्याप्रत्युपस्थापितस्येति । साध्यसाधनसंबन्धबोधकस्य कर्मकाण्डस्य न विपर्यासो मिथ्यार्थत्वेऽपि तस्यार्थक्रियाकारित्वसामर्थ्यानपहारात्प्रामाण्योपपत्तेरिति भावः ।

यथा काम्येषु प्रवृत्ता श्रुतिः कामानां मिथ्याज्ञानप्रभवत्वे सत्यपि यथाप्राप्तानेव कामानुपादाय तत्साधनान्येव विधत्ते न तु कामानां मिथ्याज्ञानभवत्वादनर्थरूपत्वं चेति न विदधाति, तथा नित्याग्निहोत्रादिशास्त्रमपि मिथ्याज्ञानप्रभवं क्रियाकारकभेदं यथाप्राप्तमेवाऽऽदायेष्टविशेषप्राप्तिमनिष्टविशेषपरिहारं वा किमपि प्रयोजनं पश्यदग्निहोत्रादीनि कर्माणि विधत्ते नाविद्यागोचरासद्वस्तुविषयमिति न प्रवर्तते । यथा काम्येषु । न च पुरुषा न प्रवर्तेरन्नविद्यावन्तो दृष्टत्वाद्यथा कामिनः ।

ननु कर्मकाण्डस्य मिथ्यार्थत्वे मिथ्याज्ञानप्रभवत्वादनर्थनिष्ठत्वेनाप्रवर्तकत्वादप्रामाण्यमत आह—यथेति । विमतमप्रमाणं मिथ्यार्थत्वाद्विपलम्भकवाक्यवदित्याशङ्क्य व्यभिचारमाह—यथा काम्येष्विति । अग्निहोत्रादिषु काम्येषु कर्मसु मिथ्याज्ञानजनितं मिथ्याभूतं काममुपादाय शास्त्रप्रवृत्तिर्वर्तिष्यतेऽपि तेषु साधनमसदेवाऽऽदाय शास्त्रं प्रवर्तता तथाऽपि बुद्धिमन्तो न प्रवर्तिष्यन्ते वदान्तेभ्यस्तन्मिथ्यात्वावगमादित्याशङ्क्याऽऽह—न चेति ।

विद्यावतामेव कर्माधिकार इति चेन्न । ब्रह्मैकत्वविद्याया कर्माधिकारविरोधस्योक्तत्वात् । एतेन ब्रह्मैकत्वे निर्विषयत्वादुपदेशेन तद्ग्रहणफलाभावदोषपरिहार उक्तो वेदितव्यः ।

अविद्यावतां कर्मसु प्रवृत्तिमाक्षिपति—विद्यावतामेवेति । द्रव्यदेवतादिज्ञानं वा ब्रह्मैकत्वज्ञानं वा कर्मसु प्रवर्तकमिति विकल्प्याऽऽद्यमङ्गीकृत्य द्वितीयं दूषयति—नेत्यादिना । कर्मकाण्डप्रामाण्यानुपपत्तिरित्याद्यामर्थापत्तिं निराकृत्य द्वितीयामर्थापत्तिमतिदेशेन निराकरोति—एतेनेति । कर्मकाण्डस्याङ्गं प्रति सार्थकत्वोपपादनेनेति यावत् ।

---

१ ख ङ. छ. °परत्वाच्चेति । २ ग. ढ. °देशत° । ज. झ. °देशमत° । ३ च. शं त° । ४ ङ. तद्गुण° । ५ ग. °व्यः । यस्य यत्रामिरुचिः स तं पुरुषार्थं पश्यंस्तदनुरूपाणि साधनान्यादत्ते । घु° ।

पुरुषेच्छारागादिवैचित्र्याच्च । अनेका हि पुरुषाणामिच्छा रागादयश्च दोषा विचित्रास्ततश्च बाह्यावषयरागाद्यपहृतचेतसो न शास्त्रं निघर्तयितुं शक्तम् । नापि स्वभावतो बाह्यविषयविरक्तचेतसो विषयेषु प्रवर्तयितुं शक्तम् । किंतु शास्त्रादेतावदेव भवतीदमिष्टसाधनमिदमनिष्टसाधनमिति साध्यसाधनसंबन्धविशेषाभिव्यक्तिः। प्रदीपादिवत्तमसि रूपादिज्ञानम् । न तु शास्त्रं भृत्यानिव बलान्निवर्तयति नियोजयति वा । दृश्यन्ते हि पुरुषा रागादिगौरवाच्छास्त्रमप्यतिक्रामन्तः ।

ननु कर्मकाण्डं संबन्धं बोधयत्प्रवृत्त्यादिपरमतो रागादिवशात्तदयोगाच्छास्त्रीयप्रवृत्त्वादिविषयस्य द्वैतस्य सत्यत्वमन्यथा तद्विषयत्वानुपपत्तिरित्यर्थापत्त्यन्तरमायातमिति तत्राऽऽह—पुरुषेच्छेति । न प्रवृत्तिनिवृत्ती शास्त्रवशादिति शेषः । तदेव स्फटयति—अनेका हीति । शास्त्रस्याकारकत्वात्प्रवर्तकत्वाद्यभावमुक्त्वा तत्रैव युक्त्यन्तरमाह- दृश्यन्ते हीति ।

तस्मात्पुरुषमतिवैचित्र्यमपेक्ष्य साध्यसाधनसंबन्धविशेषाननेकधोपदिशति । तत्र पुरुषाः स्वयमेव यथारुचि साधनविशेषेषु प्रवर्तन्ते शास्त्रं तु सवितृप्रदीपादिवदुदास्त एव । तथा कस्यचित्परोऽपि पुरुषार्थोऽपुरुषार्थवदवभासते यस्य यथाऽवभासः स तथारूपं पुरुषार्थं पश्यति तदनुरूपाणि साधनान्युपादित्सते । तथा चार्थवादोऽपि—त्रयाः प्राजापत्याः प्रजापतौ पितरि ब्रह्मचर्यमूषुरित्यादिः । तस्मान्न ब्रह्मैकत्वं ज्ञापयिष्यन्तो वेदान्ता विधिशास्त्रस्य बाधकाः ।

तर्हि शास्त्रस्य किं कृत्यमित्याशङ्क्याऽऽह—तस्मादिति । तत्र संबन्धविशेषोपदेशे सतीति यावत् । यथारुचि पुरुषाणां प्रवृत्तिश्चेत्परमपुरुषार्थे कैवल्यमुद्दिश्य सम्यग्ज्ञानसिद्धये तदुपायश्रवणादिषु संन्यासपूर्विका प्रवृत्तिर्बुद्धिपूर्वकारिणामुचितेत्याशङ्क्याऽऽह—तथेति । रागादिवैचित्र्यानुसारेणेति यावत् । उक्तं हि—

'अपि वृन्दावने शून्ये नृगाजत्वं स इच्छति ।
नतु निर्विषयं मोक्षं गन्तुमर्हति मोदम' ॥ इत्यादि ।

तर्हि कथं पुरुषार्थविवेकसिद्धिस्तत्राऽऽह—यस्येति । पुरुषार्थदर्शनकार्यमाह—ब्रह्मस्वरूपाणीति । स्वाभिप्रायानुसारेण पुरुषाणां पुरुषार्थमतिप्रवृत्तिरित्यत्र गमकमाह—तथा चेति । कथा दकारत्वे प्रजापतिनाके देवादयः स्वाभिप्रायेण

१ ब. °ण्डं साध्यसाधनसं° । २ ग. च. ढ. त्रयः । ३ क. च. छ. ज ढ. °त्यादि । त° । ४ क. ढ. °त्रवा° । ५ क, ख. °न्ये शृगा° ।

दमार्थमयं जगृहुस्तथा स्वाभिप्रायवशादेव पुरुषाणां पुरुषार्थप्रतिपत्तिरित्यर्थवादतोऽवगतमित्यर्थः । पूर्वोत्तरकाण्डयोरविरोधमुपसंहरति—तस्मादिति । एकस्य वाक्यस्य द्वयर्थत्वायोगादिति यावत् ।

न च विधिशास्त्रमेतावता निर्विषयं स्यात् । नाप्युक्तकारकादिभेदं विधिशास्त्रमुपनिषदां ब्रह्मैकत्वं प्रति प्रामाण्यं निवर्तयति । स्वविषयशूराणि हि प्रमाणानि श्रोत्रादिवत् ।

अर्थाद्बाधकत्वमाशङ्क्याऽऽह—न चेति । एतावतावेदान्तानां ब्रह्मैकत्वज्ञापकत्वमात्रेणेत्यर्थः । वेदान्तानामबाधकत्वेऽपि कर्मकाण्डस्य तत्प्रामाण्यनिवर्तकत्वमस्तीत्याशङ्क्याऽऽह—नापीति ।

तत्र पण्डितंमन्याः केचित्स्वचित्तवशात्सर्वं प्रमाणमितरेतरविरुद्धं मन्यन्ते तथा प्रत्यक्षादिविरोधमपि चोदयन्ति ब्रह्मैकत्वे ।

स्वपक्षे सर्वविरोधनिरासद्वारा स्वार्थे वेदान्तानां प्रामाण्यमुक्तं संप्रति तार्किकपक्षमुत्थापयति—तत्रेति । ऐक्ये शास्त्रगम्ये स्वीक्रियते सतीति यावत् । सर्वं प्रमाणमित्यागमवाक्यं प्रत्यक्षादि चेत्यर्थः । कथमैक्यावेदकमागमवाक्यं प्रत्यक्षादिना विरुध्यते तत्राऽऽह—तथेति । यथा ब्रह्मैकत्वे प्रवृत्तस्य शास्त्रस्य प्रत्यक्षादिविरोधं मन्यन्ते तथा तत्प्रमाण्यति चोदयन्त्यपीति योजना ।

शब्दादयः किल श्रोत्रादिविषया भिन्नाः प्रत्यक्षंत उपलभ्यन्ते ब्रह्मैकत्वं ब्रुवतां प्रत्यक्षविरोधः स्यात् । तथा श्रोत्रादिभिः शब्दाद्युपलब्धारः कर्तारश्च धर्माधर्मयोः प्रतिशरीरं भिन्ना अनुमीयन्ते संसारिणः । तत्र ब्रह्मैकत्वं ब्रुवतामनुमानविरोधश्च । तथा चाऽऽगमविरोधं वदन्ति । ग्रामकामो यजेत । पशुकामो यजेत । स्वर्गकामो यजेतेत्येवमादिवाक्येभ्यो ग्रामपशुस्वर्गादिकामास्तत्साधनाद्यनुष्ठातारश्च भिन्ना न अवगम्यन्ते ।

तत्र प्रत्यक्षविरोधं प्रकटयति—शब्दादय इति । संप्रत्यनुमानविरोधमाह—तथेति । स्वदेहसमवेतचेष्टातुल्यचेष्टा देहान्तरे दृष्टा सा च प्रयत्नवत्पूर्विका विशिष्टचेष्टात्वात्तंततवदित्यनुमानविरुद्धमद्वैतशास्त्रमित्यर्थः । तथैव प्रमाणान्तरविरोधमाह—तथा चेति ।

अत्रोच्यते "ते तु कुतर्कदूषितान्तःकरणा ब्राह्मणादिवर्णापसदा

---

१ घ. ञ. ण. °र्थधीरि° । २ घ. ढ. ण. °था तेऽस्मा° । ३ घ. ज. °क्षमुप° । ४ ग. ज. झ. °थाऽऽग° । ५ क. ख. घ. ङ. छ. झ. ढ. °धं च व° । ६ ख. झ. °शुस्व° । ७ ग. घ. ङ. च. छ. ज. °जेते° । ८ घ. ञ. °द्वमेवाद्वपशा° । ९ ख. °ते । कु° । १० क. ग. ते कु° ।

अनुकल्पनीया आगमार्थविच्छिन्नसंप्रदायपुरुष इति । कथम् । श्रोत्रादिद्वारैः शब्दादिभिः प्रत्यक्षत उपलभ्यमानेभ्यो नानात्वं विरुध्यत इति वदन्तो वक्तव्याः किं शब्दादीनां भेदेनाऽऽकाशैकत्वं विरुध्यत इत्यथ न विरुध्यते न तर्हि प्रत्यक्षविरोधः ।

मानत्रयविरोधान्न ब्रह्मैक्यमिति मा मंस्थाः इत्याह—तें तु कुंतर्केति । इति दूष्यतां तेषामिति शेषः । द्वैतग्राहिप्रमाणाविरुद्धमद्वैतमिति वदतां कथं शोच्यतेति पृच्छति—कथमिति । तत्र ब्रह्मैकत्वे प्रत्यक्षविरोधं परिहरति—श्रोत्रादीति । तथात्वे तदेकत्वाभ्युपगमविरोधः स्यादिति शेषः । यथा सर्वभूतस्थमेकमाकाशमित्यत्र न शब्दादिभेदग्राहिप्रत्यक्षविरोधस्तथैकं ब्रह्मेत्यत्रापि न तद्विरोधोऽस्तीत्याह—अथेति । तस्य कल्पितभेदविषयत्वादिति भावः ।

यच्चोक्तं प्रतिशरीरं शब्दाद्युपलब्धारो धर्माधर्मयोश्च कर्तारो भिन्ना अनुमीयन्ते तथा च ब्रह्मैकत्वेऽनुमानविरोध इति । भिन्नाः कैरनुमीयन्त इति प्रष्टव्याः ।

अनुमानविरोधं परोक्तमनुवदति—यच्चेति । या चेष्टा सा प्रयत्नपूर्विकेत्येवावधा नाऽऽत्मभेदैः स्वप्रयत्नपूर्वकत्वस्यापि संभवादनुपलब्धिविरोधि स्वानुमानस्यैवानुत्थानात्स्वदेहचेष्टायाः स्वप्रयत्नपूर्वकत्ववत्परदेहचेष्टायास्तत्प्रयत्नपूर्वकत्वे चाऽऽत्मानेव स्वपरभेदः[1] सिध्येत्त च नाभ्यक्षात्परस्यानभ्यक्षत्वाभ्यानुमानादन्योन्याश्रयादित्याशयवानाह—भिन्ना इति ।

अथ यदि ब्रूयुः सर्वैरस्माभिरनुमानकुशलैरिति । के यूयमनुमानकुशला इत्येवं पृष्टानां किमुत्तरम् । शरीरेन्द्रियमनआत्मसु च प्रत्येकमनुमानकौशलप्रत्याख्याने शरीरेन्द्रियमनःसाधना आत्मानो वयमनुमानकुशला अनेककारकसाध्यत्वात्क्रियाणामिति चेत् । एवं तर्ह्यनुमानकौशले भवतामनेकत्वप्रसङ्गः ।

दोषान्तराभिधित्सया शंकूयति—अथेति । अस्मदर्थं पृच्छति—के यूयमिति । तत्र हि स्थूलदेहो वा करणजातं वा देहद्वयादन्यो वा । नाऽऽद्यो । वयोरचेतनत्वादनुमातृत्वायोगात् । न तृतीयस्तस्याविकारित्वादिति भावः । किंशब्दस्य प्रश्नार्थतां मत्वा पूर्ववाद्याह—शरीरेति । आत्मा देहादिसहसाधनविशिष्टोऽनुमाता क्रियाणामनेककारकसाध्यत्वादेवं विशिष्टात्मकर्तृकानुमानात्मविदेहात्मभेदधीरित्यर्थः । विशिष्टस्याऽऽत्मनोऽनुमानकर्तृत्वे क्रियाणामनेककारकसाध्यत्वादिति

---

१ क. ख. ढ. °ह । कुं° । २ ज. ते कुं° । ३ घ. ञ. °कः सिध्यति स्व° । ४ ख. ढ. °ञ्चप्यनु° । ५ घ. ङ. ज. °तु प्र° । ६ ढ. शङ्कते ।

[illegible]

[illegible] तर्हीति ।

[illegible] निर्णीते मवाद्भिरवाप्युपगतम् । तत्रानुमानक्रिया । [illegible] करणैरिन्द्रियमनआत्मसाधनैः कारकैरात्मकर्तृका निर्वर्त्यत इत्येतत्सिद्धातम् । तत्र वयमनुमानकुशला इत्येवं वक्तृभिः शरीरेन्द्रियमनःसाधना आत्मानः प्रत्येकं वयमनेक इत्यनुमतं स्यात् । अहो अनुमानकौशलं दर्शितमपुच्छशृङ्गैस्तार्किककलावदैः । यो ह्यात्मानमेव न जानाति स कथं मूढस्तद्गतं भेदमभेदं वा जानीयात् ।

तदेव विवृणोति—अनेकेति । आत्मनो देहादीनां चानुमानकारकाणां प्रत्येकमवान्तरक्रियाऽस्ति वहन्यादिषु तथा दर्शनात्तथा चाऽऽत्मनोऽवान्तरक्रिया किमनेककारकसाध्या किंवा नाऽऽद्येऽप्यात्मातिरिक्तानेककारकसाध्या किंवा तदनतिरिक्तसाध्या वा । नाऽऽद्योऽनवस्थानात् । द्वितीये त्वात्मनोऽनेकत्वापत्तेर्नैरात्म्यं स्यान्न चावान्तरक्रिया नानेककारकसाध्या प्रधानक्रियायामपि तथात्वप्रसङ्गात् । एतेन देहादिष्वपि कारकत्वं प्रत्युक्तमिति भावः । यत्त्वात्माऽऽत्मप्रतियोगिकभेदवान्वस्तुत्वाद्घटवादिति, तत्राऽऽत्मा प्रतिपन्नोऽप्रतिपन्नो वेति विकल्प्य द्वितीयं प्रत्याह—यो हीति ।

तत्र किमनुमिनोति केन वा लिङ्गेन । न ह्यात्मनः स्वतो भेदप्रतिपादकं किंचिल्लिङ्गमस्ति येन लिङ्गेनाऽऽत्मभेदं साधयेत् । यानि लिङ्गान्यात्मभेदसाधनाय नामरूपवन्त्युपन्यस्यन्ति तानि नामरूपगान्युपाधय एवाऽऽत्मनो घटकरकापवरकभूच्छिद्राणीवाऽऽकाशस्य । यदाऽऽकाशस्य भेदलिङ्गं पश्यति तदाऽऽत्मनोऽपि भेदलिङ्गं लभेत सः । न ह्यात्मनः परतो विशेषमभ्युपगच्छद्भिस्तार्किकशतैरपि भेदलिङ्गमात्मनो दर्शयितुं शक्यत्व । स्वतस्तु दूरादपनीतमेवाविषयत्वादात्मनः ।

अप्रतिपन्नत्वपक्षेऽपि भेदेनाभेदेन वा तत्प्रतिपत्तिरुभयथाऽपि नानुमानप्रवृत्तिरित्याह—तत्रेति । इयमाऽऽत्मभेदानुमानानुत्थानमित्याह—केनेति । किंशब्दस्याऽऽक्षेपार्थत्वं स्फुटयति—न हीति । जन्यादीनां पविनिषमादिलिङ्गत्वादात्मभेदः सेत्स्यति चेत्याह—यानीति । आत्मनः सजातीयभेदे लिङ्गाभावं दृष्टान्तेन साधयति—यदेति । किंचोपाधिको वा स्वाभाविको वाऽऽत्मभेदः साध्यते नाऽऽद्यः लिङ्गान्यत्वादित्यभिप्रेत्याह—न हीति । न द्वितीय इत्याह—स्वतस्त्विति ।

---

१ क. ख. ग. ङ. °ओ ग्र हि° । २ क. ख. °तोऽपि वि° । ३ क. ख. ङ. °पार्श्व° । ४ घ. ग्र. °स्मि न° ।

यथेत्वरः आत्मधर्मत्वेनाभ्युपगच्छति तस्य तस्य नामरूपाभ्यामकृताभ्युपगमाभ्यां चाऽऽत्मनोऽन्यत्वाभ्युपगमात्। आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म[1] इति श्रुतेः। नामरूपे व्याकरवाणीति च। उत्पत्तिप्रलयात्मके हि नामरूपे तद्विलक्षणं च ब्रह्म। अतो अनुमानस्यैवाविषयत्वात्कुतोऽनुमानविरोधः। एतेनाऽऽगमविरोधः प्रत्युक्तः।

आत्मा द्रव्यत्वातिरिक्तापरजातीयोऽभावपदविशेषगुणत्वाद्घटवदित्यनुमानान्तरमाशङ्क्यान्तरात्मसिद्धिं दर्शयति—यद्यदिति। ताभ्यामात्मनोऽन्यत्वाभ्युपगमे मानमुपन्यस्यति—आकाश इति। तत्रैवोपपत्तिमाह—उत्पत्तीति। अनुमानाविरोधमुपसंहरति—अत इति। आगमविरोधमुक्तन्यायातिदेशेन निराकरोति—एतेनेति। औपाधिकभेदाश्रयत्वेन व्यवहारस्योपपन्नत्वोपदर्शनेनेति यावत्।

यदुक्तं ब्रह्मैकत्वे यस्मा उपदेशो यस्य चोपदेशग्रहणफलं तदभावादेकत्वोपदेशानर्थक्यमिति। तदपि न। अनेककारकसाध्यत्वात्क्रियाणां कश्चोद्यो भवति। एकस्मिन्ब्रह्मणि निरुपाधिके नोपदेशो नोपदेष्टा न चोपदेशग्रहणफलम्। तस्मादुपनिषदां चाऽऽनर्थक्यमित्येतदभ्युपगतमेव। अथानेककारकविषयानर्थक्यं चोद्यते। न। स्वतोऽभ्युपगमविरोधादात्मवादिनाम्।

प्रत्यक्षानुमानागमैरेतस्याविरोधेऽपि स्वाद्विरोधोऽर्थापत्त्येति चेदत आह—यदुक्तमिति। उपदेशो यस्मै क्रियते यस्य चोपदेशग्रहणमयुक्तं फलं तयोर्ब्रह्मैकत्वे सत्युपदेशानर्थक्यमित्यनुवादोऽयः। किं क्रियायामनेककारकसाध्यत्वादेवं चोद्यते किंवा ब्रह्मणो नित्यमुक्तत्वादिति विकल्प्याऽऽद्यं दूषयति—तदपीति। तासामनेककारकसाध्यत्वस्य प्रत्यु (पर्यु) दस्तत्वादिति भावः। यदि ब्रह्मणो नित्यमुक्तत्वाभिप्रायेणोपदेशानर्थक्यं चोद्यते तत्र नित्यमुक्ते ब्रह्मणि ज्ञातेऽज्ञाते वा तदानर्थक्यं चोद्यत इति विकल्प्याऽऽद्यमङ्गीकरोति—एकस्मिन्निति। द्वितीयमुत्थापयति—अथेति। उपदेशस्तावदनेककारकाणां साध्यतया विषयस्तदानर्थक्यमज्ञाते नित्यमुक्ते ब्रह्मणि चोद्यते नेतिकर्तव्यतांशे औपनिषदोपदेशस्य ज्ञानार्थत्वात्तद्विसंवादज्ञाते ब्रह्मणि [illegible] न स्वत इति।

तस्माच्चार्किकाऽऽगमाभासोपदेश्यत्वं [illegible] शास्त्रगुरुप्रमाणसहितेश्च। "कस्तं मदामदं देवं मदन्यो ज्ञातुमर्हति"

---

१ स. ढ. °यत्तु पर। २ घ. ढ. °णत्वादुच°। ३ च. ज. ञ. °दृष्टादिवि°। ४ ज्ञा °यतीति। ५ ज. ञ. °र्थक्यमेवोद्येनेति। ६ स. ढ. °र्थक्यं चो°।

" देवैरत्रापि विचिकित्सितं पुरा " " नैषा तर्केण मतिरापनेया " वरप्रसादलभ्यत्वश्रुतिस्मृतिवादेभ्यश्च । तदेजति तन्नैजति तद्दूरे तद्वन्तिके " इत्यादिविरुद्धधर्मसंसर्गापत्तिस्वप्रकाशकमन्त्रवर्णेभ्यश्च । गीतासु च " मत्स्थानि सर्वभूतानि " इत्यादि । तस्मात्परब्रह्मव्यतिरेकेण संसारी नाम नान्यद्वस्त्वन्तरमस्ति । तस्मात्सुष्ठूच्यते " ब्रह्म वा इदमग्र आसीत् " " तदात्मानमेवावेत् " अहं ब्रह्मास्मीति " " नान्यदतोऽस्ति द्रष्टृ नान्यदतोऽस्ति श्रोतृ " इत्यादिश्रुतिशतेभ्यः । तस्मात्परस्यैव ब्रह्मणः सत्यस्य सत्यं नामोपनिषत्परा ॥ २० ॥

इति बृहदारण्यकोपनिषद्भाष्ये द्वितीयाध्यायस्य
प्रथमं ब्राह्मणम् ॥ १ ॥

अद्वैते विरोधान्तराभावेऽपि तार्किकतमपविरोधोऽस्तीत्याशङ्क्याऽऽह—तस्मादिति । प्रमाणविरोधाभावस्तच्छब्दार्थः । आर्षमर्वादां भिन्दानाश्चाटा विवक्ष्यन्ते । भटास्तु तेषां मिथ्याभाषिणस्तेषां सर्वेषां राजानस्तार्किकास्तैरप्रवेश्यमनाक्रमणीयमिदं ब्रह्मात्मैकत्वमिति यावत् । शास्त्रादिप्रसादशून्यैरगम्यत्वे प्रमाणमाह—कस्तमिति । देवतादेर्वरप्रसादेन लभ्यमित्यत्र श्रुतिस्मृतिवादाः सन्ति तेभ्यश्च शास्त्रादिप्रसादहीनैरलभ्यं तत्त्वमिति निश्चितमित्यर्थः । शास्त्रादिप्रसादवतामेव तत्त्वं सुगममित्यत्र श्रौतं स्मार्तं च लिङ्गमन्तरं दर्शयति—तदेजतीति । ब्रह्मणोऽद्वितीयत्वे सर्वप्रकारविरोधाभावे फलितमाह—तस्मादिति । संसारिणो ब्रह्मणोऽर्थान्तरत्वाभावे श्रुतीनामानुकूल्यं दर्शयति—तस्मादिति । अद्वैते श्रुतिसिद्धे विचारनिष्पन्नमर्थमुपसंहरति—तस्मात्परस्येति ॥ २० ॥

इति बृहदारण्यकोपनिषद्भाष्यटीकायां द्वितीयाध्यायस्य प्रथमं
ब्राह्मणम् ॥ १ ॥

(अथ द्वितीयाध्यायस्य द्वितीयं ब्राह्मणम्) ।

ब्रह्म ह्यपि[1]प्यामीति प्रस्तुतम् । तत्र यतो जगज्जातं यन्मयं यस्मिंश्च लीयते तदेके ब्रह्मेति[2] ज्ञापितम् । किमात्मकं पुनस्तज्जगज्जायते लीयते च । पञ्चभूतात्मकम् । भूतानि च नामरूपात्मकानि । नामरूपे सत्यमिति[3] युक्तम् । तस्य च सत्यस्य पञ्चभूतात्मकस्य सत्यं

---

१ च. क. च. ज. झ. °भ्यत्वं श्रु° । २ ङ. ञ. °भ्य एव । तं° । ३ घ. ण. °र्थः । ब्राह्मम° । ४ ख. च. °ति विज्ञा° । ५ क. छ. °भित्वपि युक्तं° । ख. °मित्यप्युक्तं° । ङ. ञ. झ. ट. °मित्युक्तं° ।

ब्रह्म। कथं पुनर्भूतानि सत्यमिति मूर्तामूर्तब्राह्मणम्। मूर्तामूर्तभूतात्मकत्वात्कार्यकरणात्मकानि भूतानि प्राणा अपि सत्यम्। तेषां कार्यकरणात्मकानां भूतानां सत्तत्वनिर्दिधारयिषया ब्राह्मणद्वयमारभ्यते सैवोपनिषदुच्यते। कार्यकरणसत्त्वावधारणद्वारेण हि सत्यस्य सत्यं ब्रह्मावधार्यते। अत्रोक्तम्—'प्राणा वै सत्यं तेषामेष सत्यम्' इति। तत्र के प्राणाः कियत्यो वा प्राणविषया उपनिषदः का इति च ब्रह्मोपनिषत्प्रसङ्गेन करणानां प्राणानां स्वरूपमवधारयति। पथिगतकूपारामाद्यवधारणवत्।

वृत्तवर्तिष्यमाणयोः संगतिं वक्तुं वृत्तं कीर्तयति—ब्रह्मेति। ब्रह्म ते ब्रवाणीति पैङ्गल्य उक्त्वा ब्रूयिष्यामीति प्रतिज्ञाय जगतो जन्मादयो यतस्तद्द्वितीये ब्रह्मेति व्याख्यातमित्यर्थः। जन्मादिविषयस्य जगतः स्वरूपं पृच्छति—किमात्मकमिति। विप्रतिपत्तिनिरासार्थं तत्स्वरूपमाह—पञ्चेति। कथं तर्हि नामरूपकर्मात्मकं जगदित्युक्तं तत्राऽऽह—भूतानीति। तत्र गमकमाह—नामरूपे इति। भूतानां सत्यत्वे कथं ब्रह्मणः सत्यत्ववाचोयुक्तिरित्याशङ्क्याऽऽह—तस्येति। तत्सत्यमित्यवधारणाद्भूतेषु भूतेषु तत्सत्त्वासिद्धिरिति शङ्कयित्वा समाधत्ते—कथमित्यादिना। सच्च त्यच्च तत्त्यमिति व्युत्पत्त्या भूतानि सत्यशब्दवाच्यानि विवक्ष्यन्ते चेत्कथं तर्हि कार्यकरणसंघातस्य प्राणानां च सत्यत्वमुक्तं तत्राऽऽह—मूर्तेति। यथोक्तभूतरूपत्वात्कार्यकरणानां तदात्मकानि भूतानि सत्यानीत्यङ्गीकारात्कार्यकरणानां सत्यत्वं प्राणा अपि तदात्मकाः सत्यशब्दवाच्या भवन्तीति प्राणा वै सत्यमित्यविरुद्धमित्यर्थः। एवं पातनिकां कृत्वोत्तरब्राह्मणद्वयस्य विषयमाह—तेषामिति। उपनिषद्व्याख्यानाय ब्राह्मणद्वयमित्युक्तिविरुद्धमेतदित्याशङ्क्याऽऽह—सेयेति। कार्यकरणात्मकानां भूतानां स्वरूपनिर्धारणमेवोपनिषद्व्याख्येत्यत्र हेतुमाह—कार्येति। ब्राह्मणद्वयमेवमवतार्य शिशुब्राह्मणस्यावान्तरसंगतिमाह—अत्रेत्यादिना। उपनिषदः काः, तर्हि कियत्यो वेत्युपसंख्यानस्य व्याख्याकाङ्क्षावामिति शेषः। ब्रह्म चेदवधारयितुमिष्टं तर्हि तदेवावधार्यतां किमिति मध्ये करणस्वरूपमवधार्यते तत्राऽऽह—पथीति।

---

१ ख. ज. झ. ढ. °र्यकार°। २ ख. ज. ढ. °र्यकार°। ३ च. झ. सत्यत्वनि°। ४ ज. °र्यकार°। ५ झ. °सत्यत्वाव°। ६ ग. झ. °च कार°। ७ क. ख. ञ. ढ. °र्यकार°। ८ क. ढ. °र्यकार°। ९ क. ख. ढ. °र्यकार°। १० क. ढ. °र्यकार°।

यो ह वै शिशुꣳ साधानꣳ सप्रत्याधानꣳ सस्थूणꣳ सदामं वेद सप्त हि द्विषतो भ्रातृव्यानवरुणद्धि । अयं वाव शिशुर्योऽयं मध्यमः प्राणस्तस्येदमेवाऽऽधानमिदं प्रत्याधानं प्राणः स्थूणाऽन्नं दाम ॥ १ ॥

'यो ह शिशुं साधानं सप्रत्याधानं सस्थूणं सदामं वेद तस्येदं फलम् । किं तत् । सप्त सप्तसंख्याकान्ह द्विषतो द्वेषकर्तॄन्भ्रातृव्यान्भ्रातृव्या हि द्विविधा भवन्ति द्विषन्तोऽद्विषन्तश्च । तत्र द्विषन्तो ये भ्रातृव्यास्तान्द्विषतो भ्रातृव्यानवरुणद्धि । सप्त ये शीर्षण्याः प्राणा विषयोपलब्धिद्वाराणि तत्प्रभवा विषयरागाः सहजत्वाद्भ्रातृव्याः । ते ह्यस्य स्वात्मस्थां दृष्टिं विषयविषयां कुर्वन्ति तेन ते द्वेष्टारो भ्रातृव्याः । प्रत्यगात्मेक्षणप्रतिषेधकरत्वात् । काठके चोक्तम्— " पराञ्चि खानि व्यतृणत्स्वयंभूस्तस्मात्पराङ् पश्यति नान्तरात्मन् " इत्यादि । तत्र यः शिश्वादीन्वेद तेषां याथात्म्यमवधारयति स एतान्भ्रातृव्यानवरुणद्ध्यपावृणे ति विनाशयति ।

ब्राह्मणतात्पर्यमुक्त्वा तदक्षराणि योजयति—यो हेत्यादिना । विशेषणस्यार्थवत्त्वार्थं भ्रातृव्यान्विनष्टि—भ्रातृव्या हीति । के पुनस्ते भ्रातृव्या विवक्षन्ते तत्राऽऽह—सप्तेति । कथं श्रोत्रादीनां सप्तत्वं द्वारभेदादित्याह—विषयेति । कथं तेषां भ्रातृव्यत्वमित्याशङ्क्य विषयाभिलाषद्वारेणेत्याह—तत्प्रभवा इति । तथाऽपि कथं तेषां द्वेष्टृत्वमत आह—ते हीति । अथेन्द्रियाणि विषयविषयां दृष्टिं कुर्वन्त्येवाऽऽत्मविषयामपि तां करिष्यन्ति तत्र यथोक्तभ्रातृव्यत्वं तेषामिति तत्राऽऽह—प्रत्यगिति । इन्द्रियाणि विषयप्रवणानि तत्रैव दृष्टिहेतवो न प्रत्यगात्मनीत्यत्र प्रमाणमाह—काठके चेति । फलोक्तिमुपसंहरति—तत्रेति । उक्तविशेषणेषु भ्रातृव्येषु सिद्धेष्विति यावत् ।

तस्मै फलश्रवणेनाभिमुखीभूतायाऽऽह—अयं वाव शिशुः । कोऽसौ योऽयं मध्यमः प्राणः शरीरमध्ये यः प्राणो लिङ्गात्मा यः पञ्चधा शरीरमाविष्टो बृहन्पाण्डरवासः सोम राजन्नित्युक्तः । यस्मिन्वाङ्मनःप्रभृतीनि करणानि विषक्तानि षडवीशशङ्कुनिदर्शनात् । स एष शिशुरिव विषयेष्वितरकरणवदँपटुत्वात् । शिशुं साधानमित्युक्तम् । किं पुनस्तस्य शिशोर्वत्सस्थानीयस्य करणात्मन आधानम् ।

---

१ ङ. °गात्मान्वेषण° । २ घ. ञ. ण. व्याकरोति । ३ घ. ढ. °ति । अथ° । ४ घ. °त्येवमात्म° । ५ क. ख. ढ. फलितमु° । ६ च. ढ. °दनासक्तत्वा° ।

तस्येदमेव शरीरमाधानं कार्यात्मकमाधीयतेऽस्मिन्नित्याधानम् । तस्य हि शिशोः प्राणस्येदं शरीरमधिष्ठानम् । अस्मिन्हि करणान्याधिष्ठितानि लब्धात्मकान्युपलब्धिद्वाराणि भवन्ति न तु प्राणमात्रे विषक्तानि । तथा हि दर्शितमजातशत्रुणा । उपसंहृतेषु करणेषु विज्ञानमयो नोपलभ्यते । शरीरदेशव्यूढेषु तु करणेषु विज्ञानमय उपलभमान उपलभ्यते । तच्च दर्शितं पाणिपेषणप्रतिबोधनेन ।

प्राणे वागादीनां विषक्तत्वे हेतुमाह—पड्वीशेति । यथा जात्यो हयश्चतुरोऽपि पादबन्धनकीलान्पर्यायेणोत्पाट्योत्क्रामति तथा प्राणो वागादीनीति निदर्शनवशात्प्राणे विषक्तानि वागादीनि सिद्धानीत्यर्थः । शरीरस्य प्राणं प्रत्याधानत्वं साधयति—तस्य हीति । शरीरस्याधिष्ठानत्वं स्फुटयति अस्मिन्हीति । प्राणमात्रे विषक्तानि करणानि नोपलब्धिद्वाराणीत्यत्र प्रमाणमाह—तथा हीति । देहाधिष्ठाने प्राणे विषक्तानि तान्युपलब्धिद्वाराणीत्यर्थानुभवमनुकूलयति—शरीरेति । तत्रैवाजातशत्रुब्राह्मणसंवादं दर्शयति—तच्चेति । शरीराश्रिते प्राणे वागादिषु विषक्तेषूपलब्धुरुपलभ्यमानत्वमिति यावत् ।

इदं प्रत्याधानं शिरःप्रदेशविशेषेषु प्रति प्रत्याधीयत इति प्रत्याधानम् । प्राणः स्थूणाऽन्नपानजनिता शक्तिः प्राणो बलमिति पर्यायाः । बलावष्टम्भो हि प्राणोऽस्मिञ्शरीरे । स यत्रायमात्माऽबल्यं न्येत्य संमोहमिवेति दर्शनात् । यथा वत्सः स्थूणावष्टम्भ एवं शरीरपक्षपाती वायुः प्राणः स्थूणेति केचित् । अन्नं हि भुक्तं त्रेधा अन्नं दाम परिणमते । यः स्थूलः परिणामः स एतद्द्वयं भूत्वेमामप्येति मूत्रं च पुरीषं च । यो मध्यमो रसः स रसो लोहितादिक्रमेण स्वकार्यं शरीरे सप्तधातुक्रमुपचिनोति । स्वयोन्यन्नागमे हि शरीरमुपचीयतेऽन्नमयत्वात् । विपर्यये ऽपक्षीयते पतति । यस्त्वणिष्ठो रसोऽमृतमूर्ध्वप्रभव इति च कथ्यते स नाभेरूर्ध्वं हृदयदेशमागत्य हृदयाद्विप्रसृतेषु द्वासप्ततिनाडीसहस्रेष्वनुप्रविश्य यत्तत्करणसंघातरूपं लिङ्गं शिशुसंज्ञकं तस्य शरीरे स्थितिकारणं भवति । बलमुपजनयत्स्थूणाख्यं तेनान्नमुभयतः पाशवत्संदामवत्प्राणशरीरयोर्निबन्धनं भवति ॥ १ ॥

१ क. ख. °नि प्रल° । २ क. ग. घ च. छ. ज झ. °द्वारं भ° । ३ क. ख. ज ढ. °ब्धमा° । ४ ग. ङ. च. पर्यायः । ५ घ. ज. °धा विप° । ६ ख. छ. °त्रं पु° । ७ ख. च. तयोर्मध्य° । ८ घ. ज. ढ. रसलो° । ९ ग. च. ढ. °ण स्वं का° । १० ख. घ. ज. ति क. । ११ घ. छ. ढ. °पाशं व° । १२ ख. त्सदाम° ।

प्रत्याधानत्वं शिरसो व्युत्पादयति—अदेहेति । कथमवयवस्य प्राणस्य स्थूणात्वं समर्थयते—यत्रेति । अयं मुमूर्षुरात्मा यस्मिन्काले देहमवष्टभ्यावं नीत्वा संमोहमिव प्रतिपद्यते तदोत्क्रामतीति यत्र दर्शनादिति यावत् । यत्रावष्टम्भोऽस्मिन्देहे प्राण इत्यत्र दृष्टान्तमाह—यथेति । मर्तुमपक्रमणं दर्शयति—शरीरेति । उक्तं हि प्राण इत्युच्छ्वासनिःश्वासकर्मा वायुः शरीरः शरीरपक्षपाती गृह्यते । एतस्यां स्थूणायां शिशुः प्राणः करणदेवता लिङ्गपक्षपाती गृह्यते । स देवः प्राण एतस्मिन्वाक्षे प्राणे वक्ष इति । तद्व्याख्यातुं भूमिकां करोति—अन्नं हीति । त्वगसृङ्मांसमेदोमज्जास्थिशुक्रेभ्यः सप्तभ्यो धातुभ्यो जातं साप्तधातुकम् । तथाऽपि कथमन्नस्य दामत्वं तदाह—तेनेति ॥ १ ॥

इदानीं तस्येव शिशोः प्रत्याधान ऊर्ध्वस्य चक्षुषि काश्चनोपनिषद उच्यन्ते—

> तमेताः सप्ताक्षितय उपतिष्ठन्ते तया इमा अक्षन्लोहिन्यो राजयस्ताभिरेनꣳ रुद्रोऽन्वायत्तोऽथ या अक्षन्नापस्ताभिः पर्जन्यो या कनीनिका तयाऽऽदित्यो यत्कृष्णं तेनाग्नियंच्छुक्लं तेनेन्द्रोऽधरयैनं वर्तन्या पृथिव्यन्वायत्ता द्यौरुत्तरया नास्यान्नं क्षीयते य एवं वेद ॥ २ ॥

तमेताः सप्ताक्षितय उपतिष्ठन्ते । तं करणात्मकं प्राणं शरीरेऽवबन्धनं चक्षुष्यूर्ध्वमेता वक्ष्यमाणाः सप्त सप्तसंख्याका अक्षितयोऽक्षितिहेतुत्वादुपतिष्ठन्ते । यद्यपि मन्त्रकरणे तिष्ठतिरुपपूर्वं आत्मनेपदी भवति । इहापि सप्त देवताभिधानानि मन्त्रस्थानीयानि करणानि तिष्ठतेरतोऽप्याप्यात्मनेपदं न विरुद्धम् । कास्ता अक्षितय इत्युच्यन्ते । तत्तत्र या इमाः प्रसिद्धा अक्षन्नक्षणि लोहिन्यो लोहिता राजयो रेखास्ताभिर्द्वारभूताभिरेनं मध्यमं प्राणं रुद्रोऽन्वायत्तोऽनुगतः । अथ या अक्षन्नक्षण्यापो धूमादिसंयोगेनाभिव्यज्यमानास्ताभिरद्भिर्द्वारभूताभिः पर्जन्यो देवतात्माऽऽन्वायत्तोऽनुगत उपतिष्ठत इत्यर्थः । स चाऽन्नभूतोऽक्षितिः प्राणस्य । " पर्जन्ये वर्षत्यानन्दिनः

१ घ. °ति । शिर इति । २ घ. न. स । ३ ण. रचयति । ४ ग. च. ढ. °रत आत्म° । ५ ग, घ, ङ, च. ज. झ. भिर्द्वा°।

प्राणा सवन्ति " इति श्रुत्यन्तरात्। या कनीनिका इदशक्तिस्तया कनीनिकया द्वारेणाऽऽदित्यो मध्यमं प्राणमुपतिष्ठते। यत्कृष्णं चक्षुषि तेनैनमग्निरुपतिष्ठते। यच्छुक्लं चक्षुषि तेनेन्द्रोऽधरया वर्तन्या पक्ष्मणेनं पृथिव्यन्वायत्ताऽधरत्वसामान्यात्। योऽक्षन्नरयोर्ध्वत्वसामान्यात्। एताः सप्तान्नभूताः प्राणस्थं संततमुपतिष्ठन्त इत्येवं यो वेद तस्यैतत्फलं नास्यान्नं क्षीयते य एवं वेद ॥ २ ॥

यो ह वै श्रिंशुमित्यादौ सुश्रितशिंशादिपदार्थान्व्याख्याय तात्पर्यं दर्शयन्नुत्तरवाक्यमुपादाय व्याकरोति—इदानीमित्यादिना। ननु यत्र मन्त्रेणोपस्थानं क्रियते तत्रैवोपपूर्वस्य तिष्ठतेरात्मनेपदं भवति। उक्तं हि—'उपान्मन्त्रकरणे' [पा० सू० १। ३। २५] इति। दृश्यते चाऽऽदित्यं गायत्र्योपतिष्ठत इति। न चात्र मन्त्रेण किंचित्क्रियते किंत्वक्षाक्षयहेतुत्वात्प्राणस्य सप्ताक्षितय इत्युपनिषदो विवक्षयन्ते तत्राऽऽह—यद्यपीति। मन्त्रेण कस्यचिदनुष्ठानस्य करणे विवक्षिते तिष्ठतिरुपपूर्वो यद्यप्यात्मनेपदी भवति तथाप्यत्र तस्य रुद्रादिदेवतानामानि मन्त्रवदवस्थितानि तैश्च करणान्युपासनानुष्ठानान्यत्र क्रियन्ते। अतस्तिष्ठतेरुपपूर्वस्याऽऽत्मनेपदमविरुद्धमिति योजना। लोहितरेखाभी रुद्रस्य प्राणं प्रत्यनुगतेरन्तरामित्यथशब्दार्थः पर्जन्यस्याक्षद्वारा प्राणाक्षयहेतुत्वे प्रमाणमाह—पर्जन्य इति। कथं पुनरेतेषां प्राणं प्रत्यक्षितित्वं सर्वेषां सिध्यति तत्राऽऽह—एता इति। संप्रत्युपास्तिफलमाह—इत्येवमिति ॥ २ ॥

तदेष श्लोको भवति। अर्वाग्बिलश्चमस ऊर्ध्वबुध्नस्तस्मिन्यशो निहितं विश्वरूपम्। तस्याऽऽसत ऋषयः सप्त तीरे वागष्टमी ब्रह्मणा संविदानेति। अर्वाग्बिलश्चमस ऊर्ध्वबुध्न इतीदं तच्छिर एष ह्यर्वाग्बिलश्चमस ऊर्ध्वबुध्नस्तस्मिन्यशो निहितं विश्वरूपमिति प्राणा वै यशो विश्वरूपं प्राणानेतदाह तस्याऽऽसत ऋषयः सप्त तीर इति प्राणा वा ऋषयः प्राणानेतदाह वागष्टमी तीर इति प्राणा वा ऋषयः प्राणानेतदाह वागष्टमी ब्रह्मणा संविदानेति वाग्ध्यष्टमी ब्रह्मणा संवित्ते ॥ ३ ॥

---

१ ग. घ. छ. ज. ट. °स्य सत°। २ क. ख. ट. °शो निहितं वि°।

तत्तत्रैतस्मिन्नर्थ एष श्लोको मन्त्रो भवति--अर्वाग्बिलश्चमस इत्यादिः। तत्र मन्त्रार्थमाचष्टे श्रुतिः—अर्वाग्बिलश्चमस ऊर्ध्वबुध्न इति। कः पुनरसावर्वाग्बिलश्चमस ऊर्ध्वबुध्नः। इदं तच्छिरश्चमसाकारं हि तत्। कथम्। एष ह्यर्वाग्बिलो मुखस्य बिलरूपत्वाच्छिरसो बुध्नाकारत्वादूर्ध्वबुध्नः। तस्मिन्यशो निहितं विश्वरूपमिति यथा सोमश्चमस एवं तस्मिन्छिरसि विश्वरूपं नानारूपं निहितं स्थितं भवति। किं पुनस्तद्यशः। प्राणा वै यशो विश्वरूपं प्राणाः श्रोत्रादयो वायवश्च मरुतः सप्तधा तेषु प्रभुता यश इत्येतदाह मन्त्रः। शब्दादिज्ञानहेतुत्वात्। तस्याऽऽसत ऋषयः सप्त तीर इति प्राणाः परिस्पन्दात्मकास्त एव च ऋषयः प्राणानेतदाह मन्त्रः। वागष्टमी ब्रह्मणा संविदानेति। ब्रह्मणा संवादं कुर्वत्यष्टमी भवति। तद्धेतुमाह--वाग्ह्यष्टमी ब्रह्मणा संवित्त इति ॥ ३ ॥

रुद्रादिशब्दानां देवताविषयत्वान्मन्त्रस्यापि तद्विषयतेत्याशङ्क्य चक्षुषि रुद्रादिगणस्योक्तादिन्द्रियसंबन्धात्तस्य करणग्रामत्वप्रतीतेस्तद्विषयः श्लोको न प्रसिद्धदेवताविषय इत्यभिप्रेत्याऽऽह—तत्तत्रेति। मन्त्रस्य व्याख्यानसापेक्षत्वं तत्रेत्युच्यते। शिरश्चमसाकारत्वमस्पष्टमित्याशङ्क्य समाधत्ते—कथमित्यादिना। वागष्टमीत्वयुक्तं तस्याः सप्तमत्वेनोक्तत्वान्न चैकस्या द्वित्वमित्याशङ्क्याऽऽह—ब्रह्मणेति। शब्दराशिर्ब्रह्म तेन संवादः संसर्गस्तं गच्छन्ती शब्दराशिमुच्चारयन्ती वागष्टमी स्यादिति यावत्। तथाऽपि सप्तमत्वं विहाय कथमष्टमत्वं तत्राऽऽह—तद्धेतुमिति। वक्तृत्वाद्वक्तृत्वभेदेन द्विधा वागिष्टा तत्र वक्तृत्वेनाष्टमी सप्तमी चाद्यत्वेनेत्यविरोधः रसना तूपलब्धिहेतुरिति भावः ॥ ३ ॥

इमावेव गोतमभरद्वाजावयमेव गोतमोऽयं
भरद्वाज इमावेव विश्वामित्रजमदग्नी अयमेव
विश्वामित्रोऽयं जमदग्निरिमावेव वसिष्ठक-
श्यपावयमेव वसिष्ठोऽयं कश्यपो वागेवात्रि-
र्वाचा ह्यन्नमद्यतेऽत्तिर्ह वै नामैतद्यदत्रिरिति

---

१ ग. च. छ. ढ. °शो निहितं वि°। २ ग. घ. च. ज. ढ °षु विप्र°। ३ ख. घ. ज. °सूतं य°। ४ क ख. ग. घ. ङ. ज. ठ. ढ. °व गौत°। ५ ख. °मभार°। ६ क. ख. ग. घ. ङ. ज. ठ. ढ. °व गौत°। ७ ख. °यं भार°।

सर्वस्यात्ता भवति सर्वमस्यान्नं भवति य एवं वेद ॥ ४ ॥

इति बृहदारण्यकोपनिषदि द्वितीयाध्यायस्य

द्वितीयं ब्राह्मणम् ॥ २ ॥

के पुनस्तस्य चमसस्य तीर आसत ऋषय इति । इमावेव गोतमभरद्वाजौ कर्णावयमेव गोतमोऽयं भरद्वाजो दक्षिणश्चोत्तरश्च विपर्ययेण वा । तथा चक्षुषी उपादिशन्नुवाचेमावेव विश्वामित्रजमदग्नी दक्षिणं विश्वामित्र उत्तरं जमदग्निर्विपर्ययेण वा । इमावेव वसिष्ठकश्यपौ नासिके उपादिशन्नुवाच । दक्षिणः पुटो भवति वसिष्ठः । उत्तर कश्यपः पूर्ववत् । वागेवात्रिरदनक्रियायोगात्सप्तमः । वाचा ह्यन्नमद्यते तस्मादत्तिर्ह वै प्रसिद्धं नामैतदत्तृत्वादत्तिरिति । अत्तिरेव सन्यदत्रिरित्युच्यते परोक्षेण सर्वस्यैतस्यान्नजातस्य प्राणस्याग्निर्वचनविज्ञानादत्ता भवति । अत्तैव भवति नामुष्मिन्नन्नेन पुनः प्रतिपद्यत इत्येतदुक्तं भवति सर्वमस्यान्नं भवतीति । य एवमेतद्यथोक्तं प्राणयाथात्म्यं वेद स एवं मध्यमः प्राणो भूत्वाऽऽधानप्रत्याधानगतो भोक्तैव भवति न भोज्यं भोज्यादुच्यावर्तत इत्यर्थः ॥ ४ ॥

इति बृहदारण्यकोपनिषद्भाष्ये द्वितीयाध्यायस्य

द्वितीयं ब्राह्मणम् ॥ २ ॥

विपर्ययेण वेत्येतत्पूर्ववदित्युच्यते । अत्रिः सप्तम इति संबन्धः । अत्रित्वे हेतुरदनक्रियायोगादिति । हेतुं साधयति—वाचा हीति । साध्यमर्थं निगमयति—तस्मादिति । तर्हि कथमत्रिरिति व्यपदिश्यतेऽत आह—अत्तिरेवेति । प्राणस्य यदन्नजातमेतस्य सर्वस्यात्ता भवत्यत्रिनिर्वचनविज्ञानादिति संबन्धः । सर्वमस्येत्यादिवाक्यमर्थाक्षिप्तं पूर्वकं प्रकटयति—अत्तैवेति । न केवलमत्रिनिर्वचनविज्ञानफलमेतत्फलं किंतु प्राणयाथात्म्यवेदनप्रयुक्तमित्याह—य एवमिति ॥ ४ ॥

इति बृहदारण्यकोपनिषद्भाष्यटीकायां द्वितीयाध्यायस्य

द्वितीयं ब्राह्मणम् ॥ २ ॥

---

१ ख. ग. घ. ङ. छ. ज. झ. ढ. °व गौत°। २ ख. ग. °मभार°। ३ ग. घ. ङ. ज. झ. ढ. °व गौत°। ४ ख. °मोऽयमेव भार°। ५ ग. च. ढ. °टो वसि°। ६ क. ख. ङ. ज. °वद्वा वा°। ७ ज. ञ. झ. °ञे पु°। ८ ग. च. झ. ढ. एव। ९ ख. घ. ञ. ठ. °ते तत्राऽऽह। १० क. °जातं तदेतस्य। ११ घ. ञ. ण. पठति।

(अथ द्वितीयाध्यायस्य तृतीयं ब्राह्मणम्)।

द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं च मर्त्यं
चामृतं च स्थितं च यच्च सच्च त्यं च ॥१॥

तत्र प्राणा वै सत्यमित्युक्तम् । याः प्राणानामुपनिषदस्ता ब्रह्मोपनिषत्प्रसङ्गेन व्याख्याता एते ते प्राणा इति च । ते किमात्मकाः कथं वा तेषां सत्यत्वमिति च वक्तव्यमिति पञ्चभूतानां सत्यानां कार्यकरणात्मकानां स्वरूपावधारणार्थमिदं ब्राह्मणमारभ्यते । यदुपाधिविशेषापनयद्वारेण नेति नेतीति ब्रह्मणः सत्तत्त्वं निर्दिधारयिषितम् । तत्र द्विरूपं ब्रह्म पञ्चभूतजनितकार्यकरणसंबद्धं मूर्तामूर्तारूयं मर्त्यामृतस्वभावं तज्जनितवासनारूपं च सर्वज्ञं सर्वशक्ति सोपारूयं भवति । क्रियाकारकफलात्मकं च सर्वव्यवहारास्पदम् । तदेव ब्रह्म विगतसर्वोपाधिविशेषं सम्यग्दर्शनविषयमजमजरममृतमभयं वाङ्मनसयोरप्यविषयमद्वैतत्वान्नेति नेतीति निर्दिश्यते । तत्र यदपोहद्वारेण नेति नेतीति निर्दिश्यते ब्रह्म ते एते द्वे वाव वावशब्दोऽवधारणार्थः । द्वे एवेत्यर्थः । ब्रह्मणः परमात्मनो रूपे रूप्यते याभ्यामरूपं परं ब्रह्माविद्याध्यारोप्यमाणाभ्याम् । के ते द्वे । मूर्तं चैव मूर्तमेव च तथाऽमूर्तं चामूर्तमेव चेत्यर्थः । अन्तर्णीतस्वात्मविशेषणे मूर्तामूर्ते द्वे एवेत्यवधार्येते कानि पुनस्तानि विशेषणानि मूर्तामूर्तयोरित्युच्यन्ते—मर्त्यं च मर्त्यं मरणधर्म्यमृतं च तद्विपरीतं स्थितं च परिच्छिन्नं गतिपूर्वकं यत्स्थास्नु यच्च यातीति यद्दृश्याप्यपरिच्छिन्नं स्थितविपरीतं सच्च सदित्यन्येभ्यो विशेष्यमाणासाधारणधर्मविशेषवत्त्यं च तद्विपरीतं त्यदित्येव सर्वदा परोक्षाभिधानार्हम् ॥ १ ॥

संबन्धं वक्तुं वृत्तं कीर्तयति—तत्रेति । अजातशत्रुब्राह्मणावतानं तप्तम्यर्थः । उपनिषदो रुद्राद्यभिधानानि । चकारादुक्थमित्यनुषङ्गः । उत्तरब्राह्मणतात्पर्यमाह—ते किमात्मका इति । ब्रह्मणो निर्धारणीयत्वात्किमिति भूतानां सत्तत्त्वं निर्धार्यते

---

१ ख. ग. च. छ. ट. °च ॥ १ ॥ २ ज झ. °र्यकार°। ३ क. सत्त्वं। ज. सत्यत्वं। ४ ख. घ. च. छ. ज. ट. °ह्मरूपं प°। ५ ग. °रूपं परमात्मा ब्र°। ६ क. ग. घ. च. छ. झ. ट. °र्तं चैवामू°। ७ ग. घ. च. छ. छ. झ. °च्यते म°। ८ ख. ग. ङ. च. झ. ञ, °व्रत्। त°। ९ क. सत्त्वं। ण. तत्त्वं।।

तत्राऽऽह—यदुपाधीति । तेषामुपाधिभूतानां स्वरूपावधारणार्थं ब्राह्मणमिति संबन्धः । सत्यस्य सत्यमित्यत्र षष्ठ्यन्तसत्यशब्दितं हयं प्रथमान्तसत्यशब्दितमादेयं तयोराद्यस्वरूपोक्तयर्थमथेत्यतः प्राक्तनं वाक्यं तदुभयमा ब्राह्मणसमाप्तेरादेयनिरूपणार्थमिति समुदायार्थः । सविशेषमेव ब्रह्म न निर्विशेषमिति केचिन्नाभिराकर्तुं विभजते—तत्रेति । ब्राह्मणार्थे पूर्वोक्तरीत्या स्थिते सतीति यावत् । 'द्वे वाव' इत्यादिश्रुतेः सोपाधिकं ब्रह्मरूपं विवृणोति—पञ्चभूतेति । शब्दप्रत्ययविषयत्वं सोपाधिकत्वम् । निरुपाधिकं ब्रह्मरूपं दर्शयति—तदेवेति । एवं भूमिकामारचय्याक्षराणि व्याकरोति—तत्रेत्यादिना । द्वैरूप्ये सतीति यावत् । अमूर्तं चेत्यत्र चकारादेवकारानुषंगिकः । विवक्षितब्रह्मणो रूपद्वयमवधारितं चेन्मर्त्यत्वादीनि वक्ष्यमाणविशेषणान्यवधारणविरोधादयुक्तानीत्याशङ्क्याऽऽह—अन्तर्णीतेति । मूर्तामूर्तयोरन्तर्भावितानि स्वात्मनि यानि विशेषणानि तान्याकाङ्क्षाद्वारा दर्शयति—कानि पुनरित्यादिना । वदतिपूर्वकं स्थास्नु यत्परिच्छिन्नं स्थितमिति योजना । विशेष्यमाणत्वं प्रत्यक्षेणोपलभ्यमानत्वम् ॥ १ ॥

तदेतन्मूर्तं यदन्यद्वायोश्चान्तरिक्षाच्चैतन्मर्त्यमेतत्स्थितमेतत्सत्तस्यैतस्य मूर्तस्यैतस्य मर्त्यस्यैतस्य स्थितस्यैतस्य सत एष रसो य एष तपति सतो ह्येष रसः ॥ २ ॥

तत्र चतुष्टयविशेषणविशिष्टं मूर्तं तथाऽमूर्तं च । तत्र कानि मूर्तविशेषणानि कानि चेतराणीति विभज्यन्ते तदेतन्मूर्तं मूर्छितावयवभिदरेतरानप्रविष्टावयवं घनं संहतमित्यर्थः । किं तद्यदन्यत्कस्माद्व्यद्वायोश्चान्तरिक्षाच्च भूतद्वयात्परिशेषात्पृथिव्यादिभूतत्रयमेतन्मर्त्यं यदेतन्मूर्तारूयं भूतत्रयमिदं मर्त्यं मरणधर्मि । कस्माद्यस्मात्स्थितमेतत् । परिच्छिन्नं अर्थान्तरेण संप्रयुज्यमानं विरुध्यते । यथा घटः स्तम्भकुड्यादिना तथा मूर्तं स्थितं परिच्छिन्नमर्थान्तरसंबन्धि ततोऽर्थान्तरविरोधान्मर्त्यमेतत्सद्विशेष्यमाणासाधारणधर्मवत् । तस्माद्धि परिच्छिन्नं परिच्छिन्नत्वान्मर्त्यमतो मूर्तं मूर्तत्वाद्वा मर्त्यं मर्त्यत्वात्स्थितं स्थितत्वात्सत् । अतोऽन्योन्याव्यभिचाराच्चतुर्णां धर्माणां यथेष्टं विशेषणविशेष्यभावो हेतुहेतुमद्भावश्च दर्शयितव्यः । सर्वथाऽपि तु भूतत्रयं चतुष्टयविशेषणविशिष्टं मूर्तं रूपं ब्रह्मणः । तत्र

१ क. °क्तनीत्या । २ ग. ञ. ण. °षाक्तविवक्षिता । ब्रै° । ३ घ. ञ. ण. °धार्यते । ब्रै° । ४ ण. °णाकृत्य° । ५ ख. ग. ङ. ञ. °ज्यते । त° ।

चतुर्णामेकस्मिन्गृहीते विशेषण इतरद्गृहीतमेव विशेषणमित्याह—तस्यैतस्य मूर्तस्यैतस्य मर्त्यस्यैतस्य स्थितस्यैतस्य सतश्चतुष्टयविशेषणस्य भूतत्रयस्येत्यर्थः । एष रसः सार इत्यर्थः । त्रयाणां हि भूतानां सारिष्ठः सविता । एतत्साराणि त्रीणि भूतानि यत एतत्कृतविभज्यमानरूपविशेषणानि भवन्ति । आधिदैविकस्य कार्यस्यैतद्रूपं यत्सविता यदेतन्मण्डलं तपति । सतो भूतत्रयस्य हि यस्मादेष रस इत्येतद्गृह्यते । मूर्तो ह्येष सविता तपति । सारिष्ठश्च । यत्त्वाधिदैविकं करणं मण्डलस्याभ्यन्तरं तद्वक्ष्यामः ॥ २ ॥

तत्रेति निर्धारणार्था सप्तमी । तत्र प्रत्येकं मूर्तामूर्तचतुष्टयविशेषणवत्त्वे सतीति यावत् । कथं स्थितत्वं मर्त्यत्वं तत्राऽऽह—**परिच्छिन्नं हीति** । तदेव दृष्टान्तेन स्पष्टयति—**यथेत्यादिना** । अतो मर्त्यत्वान्मूर्तमिति शेषः । मूर्तत्वमर्त्वत्वयोरन्योन्यहेतुहेतुमद्भावं द्योतयितुं वाशब्दः । कथं पुनश्चतुर्षु धर्मेषु विशेषणविशेष्यभावो हेतुहेतुमद्भावश्च निश्चेतव्यस्तथाऽऽह—**अन्योन्येति** । रूपरूपिभावस्यापि व्यवस्थाभावमाशङ्क्याऽऽह—**सर्वथाऽपीति** । तस्यैतस्यैष रस इत्येव वक्तव्ये किमिति मूर्तस्येत्यादिना विशेषणचतुष्टयमनूद्यते तत्राऽऽह—**तत्रेति** । सारत्वं साधयति—**त्रयाणां हीति** । तत्र प्रतिज्ञामनूद्य हेतुमाह—**एतदिति** । एतेन सवितृमण्डलेन कृतानि विभज्यमानान्यसंकीर्णानि शुक्लं कृष्णं लोहितमित्येतानि रूपाणि विशेषणानि येषां पृथिव्यप्तेजसां तानि तथा ततो भूतत्रयकार्यमध्ये सवितृमण्डलस्य प्राधान्यमित्यर्थः । य एष तपतीत्यस्यार्थमाह—**आधिदैविकस्येति** । हेतुवाक्यमादाय तस्य तात्पर्यमाह—**सत इति** । मण्डलमेवैतच्छब्दार्थः । मण्डलपरिग्रहे हेतुमाह—**मूर्तो हीति** । मूर्तग्रहणस्योपलक्षणत्वाच्चतुर्णामन्वयो हेत्वर्थः । अतश्च मण्डलात्मा सविता भूतत्रयकार्यमध्ये भवति प्रधानं कार्यकरणयोरेकरूप्यस्यौत्सर्गिकत्वादित्याह—**सारिष्ठश्चेति** । मण्डलं चेदाधिदैविकं कार्यं किं पुनस्तथाविधं करणमिति तदाह—**यत्त्विति** ॥ २ ॥

> अथामूर्तं वायुश्चान्तरिक्षं चैतदमृतमेतत्त्रयं तस्यैतस्यामूर्तस्यैतस्यामृतस्यैतस्य यत एतस्य त्यस्यैष रसो य एष एतस्मिन्मण्डले पुरुषस्त्यस्य ह्येष रस इत्यधिदैवतम् ॥ ३ ॥

---

१ घ. अ °ण्डलाभ्यं° । २ घ. अ. ण. °त्वेऽपि मं° । ३ घ. अ ण. °मेत° । ४ क. घ. °र्वकार° । ५ क. ग. छ. उ. °तत्त्यतस्यै° ।

अथामूर्तमथाधुनाऽमूर्तमुच्यते । वायुश्चान्तरिक्षं च यत्पारिशेषितं भूतद्वयमेतदमृतममूर्तत्वादास्थितमतोऽविरुध्यमानं कर्मणाचिदमृतममरणधर्मवेतद्यात्स्थितावपरीतं व्याप्यपरिच्छिन्नं यस्मादेतदन्यभ्योऽवयवभज्यमानविशेषमतस्तस्य त्यादिति परोक्षाभिधानाहमेव पूर्ववत् । तस्यतस्यामूर्तस्येतस्यामृतस्यैतस्य यत एतस्य त्यस्य चतुष्टयविशेषणस्यामूर्तस्यैष रसः । कोऽसौ । य एष एतस्मिन्मण्डल पुरुषः करणात्मको हिरण्यगर्भः प्राण इत्याभिधीयते । स एषोऽमूर्तस्य भूतद्वयस्य रसः पूर्ववत्सारिष्ठः । एतत्पुरुषसारं चामूर्तं भूतद्वयं हैरण्यगर्भलिङ्गारम्भाय हि भूतद्वयाभिव्यक्तिरव्याकृतात्तस्मात्तादर्थ्यात्सारं भूतद्वयम् । त्यस्य ह्येष रसो यस्माद्यो मण्डलस्थः पुरुषो मण्डलवन्न गृह्यते सारश्च भूतद्वयस्य । तस्मादस्ति मण्डलस्थस्य पुरुषस्य भूतद्वयस्य च साधर्म्यम् । तस्माद्युक्तं प्रासङ्गिकेनोपादान त्यस्य ह्येष रस इति ।

आधिदैविकं मूर्तमभिधाय तादृगेवामूर्तं प्रतीकोपादानपूर्वक स्फुटयति—अथेत्यादिना । अमूर्तमुभयत्र हेतुत्वेन संबध्यते । अपरिच्छिन्नत्वमविरोधे हेतुः । अमूर्तत्वादीनां मिथो विशेषणविशेष्यभावो हेतुहेतुमद्भावश्च यथेष्टं द्रष्टव्य इत्याह—पूर्ववदिति । पुनरुक्तिरपि पूर्ववत् । य एष इत्यादि प्रतीकग्रहण तस्य व्याख्यानं करणात्मक इत्यादि । यथा भूतत्रयस्य मण्डल सारिष्ठमुक्तं तद्वदित्याह—पूर्ववदिति । सारिष्ठत्वमनूद्य हेतुमाह—एतादिति । तादर्थ्याद्भूतद्वयस्य भूतत्रयोपसर्जनस्य स्वयंप्रधानस्य हिरण्यगर्भारम्भार्थत्वादिति यावत् । भूतद्वयं भूतत्रयोपसर्जनमिति शेषः । हेतुमत्तायै व्याचष्टे—त्यस्य ह्येति । पुरुषशब्दादुपरिष्टात्सशब्दो द्रष्टव्यः । अमूर्तत्वादिविशेषणचतुष्टयविशिष्टत्वसाधर्म्यम् । तत्फलमाह—तस्मादिति ।

रसः कारणं हिरण्यगर्भविज्ञानात्मा चेतन इति कैश्चित् । तत्र च किल हिरण्यगर्भविज्ञानात्मनः कर्म वाय्वन्तरिक्षयोः प्रयोक्तृ तत्कर्म वाय्वन्तरिक्षाधारं मदन्येषां भूतानां प्रयोक्तृ भवति । तेन स्वकर्मणा वाय्वन्तरिक्षयोः प्रयोक्तेति तयो रसः कारणमुच्यत इति ।

---

१ क ख. ग. ङ. च. छ. झ. ढ °स्माद्यदे° । २ ख. °तत्तद् । ३ ग. °तस्त्यादि° । ४ च. छ. ज °सः पूर्ववत । को° । ५ ख. ग. ज °यं हिर° । ६ ग. °म्भार्थं हि । ७ घ. ञ. ण. °र्तत्वम्° । ८ ग. तदितरेषां । घ. ञ ज. ढ. सदितरेषां । ९ च. ढ. °रणं स उच्यते । त्र । १० ख. °च्यते । तस्य ।

स्वमतमुक्त्वा भूतपञ्चकवदमाह—रस इति । स्यस्य हीत्यादौ रसशब्देन भूतद्वयकारणमुक्तं न च तच्चेतनादन्यत् । न च जीवः । तथाऽऽप्तत्वात् । नापि परः कूटस्थत्वात् । तस्माच्चेतनः सूत्रक्षेत्रज्ञस्तथेत्यर्थः तोऽपि कथं भूतद्वयकारणमत आह—तत्रेति । परकीयपक्षः तत्रम्यर्थः । तत्कर्मणस्तत्वात्साधारण्यमूर्तपरिणामित्वाभिप्रेत्य किलेत्युक्तम् । यथाऽऽहुः—यो ह्येतस्मिन्मण्डले विज्ञानात्मैव शुक्लविज्ञाकर्मपूर्वप्रज्ञापरिष्कृतो विज्ञानात्मत्वमापद्यते तदेतत्कर्मकृतं विज्ञानात्मनस्तदाख्यन्तरिक्षपरोक्ष भवतीति । ननु हिरण्यगर्भदेहस्य पञ्चभूतात्मकत्वाद्भूतद्वयोत्पत्तावपीतरभूतोत्पत्तिं विना कुतोऽस्य भोगः सिध्यत्यत आह—तत्कर्मेति । वाय्वन्तरिक्षाधारं तद्रूपपरिणतमिति यावत् । वाय्वन्तरिक्षयोर्भूतद्वयोपलक्षणत्वमेतयोरिति शेषः । प्रयोक्ता हिरण्यगर्भविज्ञानात्मा ।

तत्र । मूर्तरसेनातुल्यत्वात् । मूर्तस्य तु भूतत्रयस्य रसो मूर्तमेव मण्डलं दृष्टं भूतत्रयसमानजातीयं न चेतनस्तथाऽमूर्तयोस्तत्समानजातीयेनैवामूर्तरसेन युक्तं भवितुम् । वाक्यप्रवृत्तेस्तुल्यत्वात् । यथा हि मूर्तामूर्ते चतुष्टयधर्मवती विभज्येते तथा रसरसवतोरपि मूर्तामूर्तयोस्तुल्यमेव न्यायेन युक्तो विभागः । नं चार्धवैशसम् । मूर्तरसऽपि मण्डलोपाधिश्चेतनो विवक्ष्यत इति चेत् । अत्यरूपमिदमुच्यते । सर्वत्रैव तु मूर्तामूर्तयोर्ब्रह्मरूपेण विवक्षितत्वात् । पुरुषशब्दोऽचेतनोऽनुपपन्न इति चेत् । न, पक्षपुच्छादिविशिष्टस्यैव लिङ्गस्य पुरुषशब्ददर्शनात् । न वा इत्थं सन्तः प्रक्ष्यामः प्रजाः प्रजनयितुमिमाम्सप्त पुरुषानेकं पुरुषं करवामेति त एतान्सप्त पुरुषानेकं पुरुषमकुर्वन्नित्यादावन्नरसमयादिषु च श्रुत्यन्तरे पुरुषशब्दप्रयोगात् । इत्यधिदैवमित्युक्तोपसंहारोऽध्यात्मविभागोक्त्यर्थः ॥ ३ ॥

निराकरोति—तत्रेति । कथं मूर्तरसेन सह यथोक्तामूर्तरसस्यातुल्यतेत्याशङ्क्याऽऽह—मूर्तस्येति । अमूर्तश्चासौ रसश्चेत्यमूर्तरसस्तेनेति यावत् । अमूर्तरसस्य चेतनत्वे तु रसयोर्वैजात्यं स्यादिति भावः । अस्तु तयोर्वैजात्यं नेत्याह—यथा हीति । मूर्तं मत्वं स्थितं सादिति मूर्तस्य धर्मचतुष्टयममूर्तममूर्तं व्यापि स्यादित्यमूर्तस्य विभजनमसंकीर्णत्वेन प्रदर्शनं यथा रसवतोर्मूर्तामूर्तयोस्तुल्यत्वमुक्तं तथा रसयोरपि तयोस्तुल्यत्वेनैव प्रकारेण प्रदर्शनमुचितं नन्वमूर्तरसश्चेतनो मूर्तरसस्त्वचेतन इति युक्तो विभागोऽर्धजरतीयस्यापामाणिकत्वादित्याह—तथेति । अर्धवैशसं परिहर्तुं

१ ख. ण. °नात्मेत्येतान्निरा° । ग. घ. ज. न त्वध° । २ क. ख. छ. ङ. °ण्डलाधिपश्चे° । ४ क. ख. °रेषु पु° ।

कण्डले--मूर्तरसेऽपीति । अमूर्तरसवन्मूर्तरसशब्देनापि चेतनस्यैव ब्रह्मणो मण्डलाधारस्य ग्रहणमित्येवदुपपादि--अत्यल्पमिति । मण्डलस्य चेतनकार्यत्वा चेतनत्वं सर्वस्य तत्कार्यत्वा तन्मात्रत्वान्नरसोऽचेतनतेति विशेषमानर्थक्यमित्यर्थः । मण्डलाधारस्य चेतनत्वं पुरुषशब्दश्रुतिवशादेवेष्टव्यमिति शङ्कते--पुरुषशब्दश्च इति । अनुपपत्तिं परिहरति--नेत्यादिना । तदेव व्याकरोति--न वा इति । इदं विवक्षाः सन्तो वेद व्यवहारं प्रजनयितुमित्यादेरस्य त्वन्यतोऽपि सिद्धावाजवाक्यनोरूपानिधानान्न पुरुषाकृतं पुरुषं संहृत्य लिङ्गं करणमिति च निश्चित्यायी प्राणाः सन्न पुरुषानुकारिणं पुरुषं लिङ्गाकारं कुर्वन्त इत्यर्थः । लाक्षिकत्वेन लौकिकमेव ब्रह्मत्वं संभूयते । श्रुतस्त्वरं तैत्तिरीयकम् । पुरुषशब्दवृत्तीः इ वा एष पुरुषोऽन्नरसमय इत्यादेः । परकीयं व्याख्यानं पत्याकृत्वाद् प्रकृतं श्रुतिव्याख्यानमनुवर्तयति--इत्यधिदैवतमिति ॥३॥

अथाध्यात्ममिदमेव मूर्तं यदन्यत्प्राणाच्च यश्चायमन्तरात्मन्नाकाशः एतन्मर्त्यमेतत्स्थितमेतत्सत्तस्यैतस्य मूर्तस्यैतस्य मर्त्यस्यैतस्य स्थितस्यैतस्य सत एष रसो यच्चक्षुः सतो ह्येष रसः ॥ ४ ॥

अथाधुनाऽध्यात्मं मूर्तामूर्तयोर्विभाग उच्यते । किं तत्पूर्वमिदमेव । किंचेदं यदन्यत्प्राणाच्च वायोर्यश्चायमन्तरन्तर आत्मन्नात्मन्याकाशः सं शरीरारम्भक यः प्राण एतद्द्वयं वर्जयित्वा यदन्यच्छरीरारम्भकं भूतत्रयमेवन्मर्त्यमित्यादि समानमन्यत्पूर्वेण । एवरूपं सतो ह्येष रसो यच्चक्षुरिति । आध्यात्मिकस्य शरीरारम्भकस्य कार्यस्यैष रसः सारस्तेन हि सारेण सारवादिदं शरीरं समस्तं यथाऽधिदैवतमादित्यमण्डलेन । प्राधान्याच्च । चक्षुषी एव प्रथमे संभवतः संभवत इति । तेजो रसो निरवयतेजोरिति लिङ्गात् । तेजसं हि चक्षुः । एतत्सारमाध्यात्मिकं भूतत्रयम् । सतो ह्येष रस इति मूर्तत्वसारत्वे हेत्वर्थः ॥ ४ ॥

चक्षुषो रसत्वं प्रतिज्ञापूर्वकं प्रकटयति--आध्यात्मिकस्येत्यादिना चक्षुषः सारत्वे शरीरावयवेषु प्राधान्यं हेत्वन्तरमाह--प्राधान्याच्चेति । तत्र प्रमाणमाह--चक्षुषी एवेति । संभवतो जायमानस्य जन्तोश्चक्षुषी एव प्रथमे प्रधाने संभवतो जायते । अथैतद्वै रेतसः सिक्तस्य चक्षुषी एव प्रथमे संभवत इति हि

---

१ घ. ञ. ण. इति श्रुत्यं । २ ग. ढ. °दं स° । ३ ग. ज. झ. प्रथम । ४ क. ख. ग. घ. ङ. ञ. ज. ढ. °वत इ° । ङ. झ °तेजवसार° । ६ क. °श्चदे रे° । घ. ण. श्चद्व । ७ क. ढ. °ति त्रा° ।

ब्राह्मणमित्यर्थः । चक्षुषः सारत्वे हेत्वन्तरमाह—तेज इति । शरीरमात्मस्वामिभोगेन निष्पादकं तत्र सर्वत्र संनिहितमपि तेजो विशेषतश्चक्षुषि स्थितम् । " आदित्यश्चक्षुर्भूत्वाऽक्षिणी प्राविशत् " इति श्रुतेः । अतस्तेजःशब्दपर्यायरसशब्दस्य चक्षुषि प्रवृत्तिरविरुद्धेति भावः । इतश्च तेजःशब्दपर्यायो रसशब्दश्चक्षुषि संभवतीत्याह—तेजसं होति । प्रतिज्ञार्थमुपसंहरति—एतत्सारमिति । हेतुमदनार्षं तस्यार्थमाह—मतो होति । चक्षुषो मूर्तत्वान्मूर्तभूतत्रयकार्यत्वं युक्तं साधर्म्याद्देहावयवेषु प्राधान्याच्च तस्याऽऽध्यात्मिकभूतत्रयसारत्वसिद्धिरित्यर्थः ॥ ४ ॥

अथामूर्तं प्राणश्च यश्चायमन्तरात्मन्नाकाश एतदमृतमेतत्यदेतत्त्यं तस्यैतस्यामूर्तस्यैतस्यामृतस्यैतस्य यत एवस्य त्यस्यैष रसो योऽयं दाक्षिणेऽक्षन्पुरुषस्तस्यास्य ह्येष रसः ॥ ५ ॥

अथाधुनाऽमूर्तमुच्यते । यत्पारशाषितं भूतद्वयं प्राणश्च यश्चायमन्तरात्मन्नाकाश एतदमूर्तम् । अन्यत्पूर्ववत् । एतस्य त्यस्यैष रसः सारो योऽयं दाक्षिणेऽक्षन्पुरुषो दाक्षिणेऽक्षान्नाति विशेषग्रहणं शास्त्रप्रत्यक्षत्वात् । लिङ्गस्य हि दाक्षिणेऽक्षिण विशेषतोऽधिष्ठातृत्वं शास्त्रस्य प्रत्यक्षं सर्वश्रुतिषु तथा प्रयोगदर्शनात् । त्यस्य ह्येष रस इति पूर्ववद्विशेषतोऽग्रहणादमूर्तत्वसारत्व एव हेत्वर्थः ॥ ५ ॥

कुतो विशेषोक्तिरित्याशङ्क्याऽऽह—दाक्षिण इति । शास्त्रस्य तेन वा दाक्षिणेऽक्षणि विशेषस्य प्रत्यक्षत्वादित्यर्थः । द्वितीयव्याख्यानमाश्रित्य हेत्वर्थं स्फुटयति—लिङ्गस्येति । हेतुमदनूद्य तदर्थं कथयति—त्यस्येति । यथा पूर्वत्र चक्षुषि मूर्तादिचतुष्टयदृष्ट्वा तादृग्भूतत्रयसारतोक्ता तथाऽत्रापि लिङ्गात्मन्यमूर्तत्वादिचतुष्टयस्य विशेषेणाग्रहणादमूर्तत्वादिना साधर्म्यात्तथाविधभूतद्वयसारत्वं तस्य शरीरे प्राधान्याच्च तत्सारत्वसिद्धिरित्यर्थः ॥ ५ ॥

तस्य हैतस्य पुरुषस्य रूपम् । यथा माहारजनं वासो यथा पाण्डवाविकं यथेन्द्रगोपो यथाऽग्न्यर्चिर्यथा पुण्डरीकं यथा सकृद्विद्युत्तꣳसकृद्विद्युत्तेव ह वा अस्य श्रीर्भवति य एवं वेदाथात

---

१ ग. ङ, °तत्यत्तस्यं° । २ क. ञ. °रत्वे हे° । ३ ब. ञ. ण. °दिति हेत्वर्थः ।

आदेशो नेति नेति न ह्येतस्मादिति नेत्यन्यत्प-
रमस्त्यथ नामधेयꣳ सत्यस्य सत्यमिति प्राणा
वै सत्यं तेषामेष सत्यम् ॥ ६ ॥
इति बृहदारण्यकोपनिषदि द्वितीयाध्याये
तृतीयं ब्राह्मणम् ॥ ३ ॥

ब्रह्मण उपाधिभूतयोर्मूर्तामूर्तयोः कार्यकरणविभागेनाध्यात्माधि-
दैवतयोर्विभागो व्याख्यातः सत्यशब्दवाच्ययोः । अथेदानीं तस्य हे-
तस्य पुरुषस्यं करणात्मनो लिङ्गस्य रूपं वक्ष्यामो वासनामयं मूर्ता-
मूर्तवासनाविज्ञानमयसंयोगजनितं विचित्रं पटभित्तिचित्रवन्मायेन्द्र-
जालमृगतृष्णिकोपमं सर्वव्यामोहास्पदम् । एतावन्मात्रमेवाऽऽत्मेति
विज्ञानवादिनो वैनाशिका यत्र भ्रान्ताः । एतदेव वासनारूपं पटरूप-
वदात्मनो द्रव्यस्य गुण इति नैयायिका वैशेषिकाश्च संप्रतिपन्नाः ।
इदमात्मार्थं त्रिगुणं स्वतन्त्रं प्रधानाश्रयं पुरुषार्थेन हेतुना प्रवर्तत इति
सांख्याः ।

तस्य हेत्यादेर्वृत्तानुवादपूर्वकं संबन्धमाह—ब्रह्मण इति । विभागो विशेषः ।
तस्याधिदैवं प्रकृतस्यैतस्याध्यात्मं संनिहितस्यामूर्तरसभूतान्तःकरणस्यैव रागादि-
वासनेति वक्तुं तस्येत्यादि वाक्यमित्यर्थः । कथमिदं रूपं लिङ्गस्य प्राप्तमिति त-
दाह—मूर्तेति । मूर्तामूर्तवासनाभिर्विज्ञानमयसंयोगेन च जनितं बुद्धे रूपमिति या-
वत् । नेदमात्मनो रूपं तस्यैकरसस्यानेकरूपत्वानुपपत्तेरिति विशिनष्टि—विचि-
त्रमिति । वास्तवत्वशङ्कां वारयति—मायेति । वैचित्र्यमनुसृत्यानेकोदाहरणम् ।
अन्तःकरणस्यैव रागादिवासनाश्चेत्कथं पुरुषस्तन्मयो दृश्यते तत्राऽऽह—सर्वेति ।
तदेव व्याकुर्वन्विज्ञानवादिनां भ्रान्तिमाह—एतावन्मात्रमिति । बुद्धिमात्रमेवाहं-
वृत्तिविशिष्टं स्वरसभङ्गुरं रागादिकलुषितमात्मा नान्यः स्थायी क्षणिको वेति
यत्र ते भ्रान्तास्तस्य रूपं वक्ष्याम इति संबन्धः । तार्किकाणामपि बौद्धवद्भ्रा-
न्तिमुद्भावयति—एतदेवेति । अन्तःकरणमेवाहंधीग्राह्यं रागादिधर्मकमात्मा तस्य
वासनामयं रूपं पटस्य शौक्ल्यवद्गुणः स च संसार इति यत्र तार्किका भ्रान्ता-
स्तस्य रूपं वक्ष्याम इति पूर्ववत् । सांख्यानां भ्रान्तिमाह—इदमिति । कथमस्य
त्रिगुणत्वादिकं सिध्यति तत्राऽऽह—प्रधानाश्रयमिति । केन प्रकारेणान्तःकरण-
मात्मार्थमिष्यते तत्राऽऽह—पुरुषार्थेनेति । नान्तःकरणमेवाऽऽत्मा किंत्वन्य-

---

१ घ. ज. 'ह्मणो रूपयो' । २ च. 'विरूपयो' । ३ ङ. 'घिरूपभूतयो' । ३ ग. ज. कार' । ४ ज. 'स्य कार' । ५ ण. 'खरसत्वा' । ६ घ. ञ. 'पवत्त्वानु' ।

सर्वगतः सर्वविक्रियाशून्यः स्वप्रकाशस्तस्य भोगापवर्गानुगुण्येन प्रधानात्मकमन्तः-करणं तत्सदृशकं प्रवर्तत इति यत्र कापिला भ्राम्यन्ति तस्य रूपं वक्ष्याम इति संबन्धः ।

औपनिषदंमन्या अपि केचित्प्रक्रियां रचयन्ति—मूर्तामूर्तराशि-रेकः परमात्मराशिरुत्तमस्तावमन्योऽयं मध्यमः किल तृतीयः कर्त्रा भोक्त्रा विज्ञानमयेनाजातक्षत्रप्रतिबोधितेन सह विद्याकर्मपूर्वप्रज्ञास-मुदायः । प्रयोक्ता कर्मराशिः प्रयोज्यः पूर्वोक्तो मूर्तामूर्तभूतराशिः साधनं चेति ।

यत्र विचित्रा विपश्चितां भ्रान्तिस्तदन्तःकरणं तस्य हेत्वपेक्षते नाऽऽत्मेति स्वपक्षमुक्त्वा भर्तृपक्षमुत्थापयति—औपनिषदंमन्या इति । कीदृशी पुनरि-त्युक्तेराशित्रयकल्पनां वदन्नादावधमं राशिं दर्शयति—मूर्तेति । उत्तमराशिमा-चष्टे—परमात्मेति । राशयन्तरमाह—ताभ्यामिति । ताभ्यामाभ्यां त्रीणि वस्तूनि मूर्तामूर्तनीहारजलादिरूपमात्मतत्त्वमिति । परोक्तमाश्रित्य राशित्रयकल्पनामुक्त्वा स्वपक्षमवशेषं विशेषमाह—प्रयोक्तेति । उत्पादकत्वं प्रयोक्तृत्वम् । कर्मग्रहणं विद्यापूर्वप्रज्ञयोरुपलक्षणम्—साधनं ज्ञानकर्मकारणं कार्यकरणजातं तदपि प्रयो-ज्यमित्याह—साधनं चेति । इतिशब्दो राशित्रयकल्पनासमाप्त्यर्थः ।

लभ्यं च तार्किकैः सह संधिं कुर्वन्ति । लिङ्गाश्रयश्चैव कर्मराशि-रित्युक्त्वा पुनस्तत्सदृशकं सांख्यत्वभवात्सर्वः कर्मराशिः पुष्पाश्रय इव गन्धः पुष्पविशेषेऽपि पुटलोलाश्रयी भवति बहुलिङ्गविशेषेऽपि परमात्मैकदेशमाश्रयति । स परमात्मैकदेशः किलाग्नेय अग्निगतेन गु-णेन कर्मणा सगुणो भवति निर्गुणोऽपि सं कर्ता भोक्ता वध्यते मुच्यते च विज्ञानात्मेति वैशेषिकचित्तमप्यनुसरन्ति । स च कर्मराशिर्मूतरा-शेरागन्तुकः स्थती निर्गुण एव परमात्मैकदेशत्वात् । स्वैर उत्थि-ताऽविद्याऽनागन्तुकाऽप्यूषरवदनात्मधर्म इत्यनया कल्पनया सांख्य-चित्तमनुवर्तन्ते ।

परकीयकल्पनान्तरमाह—तत्रेति । राशित्रये कल्पिते सतीति यावत् । संधि-करणमेव स्फोरयति—लिङ्गाश्रयश्चेति । तत इत्युक्तिपरामर्शः । सांख्यत्वभवा-दित्यन्तो वैशेषिकचित्तमप्यनुसरन्तीति संबन्धः । कथं तच्चित्तानुसरणं तदु-पपादयति—कर्मराशिरिति । कथं निर्गुणमात्मानं कर्मराशिराश्रयतीत्याह-

१ ग. घ. ङ. झ. कर्ता भोक्ता वि° । २ ख. घ. ण. °तमह° । ३ ख. झ. °त्र ता° । ४ घ. ङ. °यात्कर्म° । ५ ख. ज. झ. °त्सर्वक° । ६ क. गै. ङ. छ. झ. सन्कर्ता । ७ मुद्रि क° । ७ ज. सर्तं° ।

ङ्क्त्याऽऽह—स परमात्मैकदेश इति । अन्यत इति कार्यकरणात्मकाद्भूतराशेरिति यावत् । यदा भूतराशिनिष्टं कर्मादि तद्द्वाराऽऽत्मन्यागच्छति तदा स कर्तृत्वादितंसारमनुभवतीत्याह—स कर्तेति । स्वतस्तस्य कर्मादिसंबन्धत्वेन संसारित्वं स्यादिति चेन्नेत्याह—स चेति । निर्गुण एव विज्ञानात्मेति शेषः । सांख्यचित्तानुसारार्थमेव परेषां प्रक्रियान्तरमाह—स्वत इति । नैसर्गिकयप्याविद्या परस्मादेवाभिव्यक्ता सती तदेकदेशं विकृत्य तस्मिन्नेवान्तः करणाख्ये तिष्ठतीति वक्तोऽनात्मधर्मोऽविद्येत्युक्त्या सांख्यचित्तमप्यनुसरन्तीत्यर्थः । अविद्या परस्मादुत्पन्ना चेत्तमेवाऽऽश्रयेन्न तदेकदेशमित्याशङ्क्याऽऽह—ऊषरवादिति । यथ पृथिव्या जातोऽप्यूषरदेशस्तदेकदेशमाश्रयत्येवमविद्या परस्माज्जाताऽपि तदेकदेशमाश्रयिष्यतीत्यर्थः ।

सर्वमेतत्तार्किकैः सह सामञ्जस्यकल्पनया रमणीयं पश्यन्ति नोपनिषत्सिद्धान्तं सर्वन्यायविरोधं च पश्यन्ति । कथम् । उक्ता एव तावत्सावयवत्वे परमात्मनः संसारित्वसञ्चरणत्वकर्मफलदेशसंसरणानुपपत्त्यादयो दोषाः । नित्यभेदे च विज्ञानात्मनः परेणैकत्वानुपपत्तिः । लिङ्गमेवेति चेत्परमात्मन उपचरितदेशत्वेन कल्पितं घटकरकभूच्छिद्राकाशादिवत् । तथा लिङ्गवियोगेऽपि परमात्मदेशाश्रयणं वासनायाः ।

तदेतद्दूषयितुमुपक्रमते—सर्वमेतादिति । तार्किकैः सह संधिकरणादिकमेतत्सर्वमधिकृत्य सामञ्जस्येन पूर्वोक्तानां कल्पनानामापातेन रमणीयत्वमनुभवन्तीति यावत् । यथोक्तकल्पनानां श्रुतिन्यायानुसारित्वाभावात्त्याज्यत्वं सूचयति—नेत्यादिना । कर्मद्वयं प्रत्येकं क्रियापदेन संबध्यते । नञश्चोभयत्रान्वयः । कथं यथोक्तकल्पनानामापातरमणीयत्वेन श्रुतिन्यायबाह्यत्वमिति पृच्छति—कथमिति । यदुक्तं परस्यैकदेशो विज्ञानात्मेति तत्र तदेकदेशत्वं वास्तवमवास्तवं वा प्रथमे स परस्मादभिन्नो भिन्नो वेति विकल्प्याऽऽद्यं दूषयति—उक्ता एवेति । आदिशब्देन श्रुतिस्मृतिविरोधो गृह्यते । कल्पान्तरं प्रत्याह—नित्यभेदे चेति । भेदाभेदयोर्विरुद्धत्वादनुपपत्तिश्चकारार्थः । लिङ्गोपाधिरात्मा परस्यांश इति कल्पान्तरं शङ्कते—लिङ्गमेवेति । उपचरितत्वं कल्पितत्वम् । लिङ्गोपाधिना कल्पितः परांशो जीवात्मेत्युक्ते स्वापादौ लिङ्गध्वंसे वासना नाऽऽत्मनि स्याल्लिङ्गाभावे तदधीनजीवात्म-

१ क. सन्कर्तृ° । २ घ. ञ. ण., °बन्धेन । ३ ण. °थिव्या जा° । ४ ग. च. ज. झ. °ल्पनार° । घ. °ल्पनाया । ५ घ. च ज. ज., °णीयत्वं प° । ६ ग. घ. ङ. छ. ज. झ. °मेव चे° । ७ ग. °न परिकल्प्येत घ° । ज. °न परिकल्पेत कटकादिभू° । ८ ख. ङ. °ल्पितघ° । ९ ग. घ. च. ढ. °रकादिभू° । १० ग. °काशव° ।

भावात्ततश्च तद्वियोगेऽपि लिङ्गरथा वासना जीवे तिष्ठतीति प्रक्रियाऽनुपपन्नेति दूषयति—तथेति ।

अविद्यायाश्च स्वत उत्थानमूषरवदित्यादिकल्पनाऽनुपपन्नैव । न च वास्तवदेशव्यतिरेकेण वासनाया वस्त्वन्तरसंचरणं मनसाऽपि कल्पयितुं शक्यम् । न च श्रुतयो गच्छन्ति कामः संकल्पो विचिकित्सा हृदये ह्येव रूपाणि ध्यायतीव लेलायतीव कामा येऽस्य हृदि श्रितास्तीर्णो हि तदा सर्वाञ्शोकान्हृदयस्येत्याद्याः ।

यत्तु परस्मादविद्यायाः समुत्थानमिति तन्निराकरोति—**अविद्यायाश्चेति ।** आदिपदेनानात्मधर्मत्वमविद्यया गृह्यते । परस्मादविद्योत्पत्तौ तस्यैव संसारः स्यात् । तयोरैकाधिकरण्यात् । अतश्चाविद्याया सत्या न मुक्तिर्न च तस्यां नष्टायां तत्सिद्धिः कारणे स्थिते कार्यस्यात्यन्तनाशायोगात्कार्याविद्यानाशे तत्कारणपराभवस्तथा च मोक्षिणोऽभावान्मोक्षासिद्धिः । न चानात्मधर्मोऽविद्या विद्याया अपि तद्धर्मत्वप्रसङ्गात्तयोरेकाश्रयत्वादिति भावः । यत्तु लिङ्गेऽपरमे एद्वता वासनाऽऽत्मन्यस्तीति तत्राऽऽह—**न चेति** । पुटकादौ तु पुष्पाद्यवयवानामेवानुवृत्तिरिति भावः । इतश्च वासनाया जीवाश्रयत्वमसंगतमित्याह—**न चेति** ।

न चाऽऽसां श्रुतीनां श्रुतादर्थान्तरकल्पना न्याय्या । आत्मनः परब्रह्मत्वोपपादनार्थपरत्वादासामेतावन्मात्रार्थोपक्षयत्वाच्च सर्वोपनिषदाम् । तस्माच्छ्रुत्यर्थकल्पनाकुशलाः सर्व एवोपनिषदर्थमन्यथा कुर्वन्ति । तथाऽपि वेदार्थश्चेत्स्यात्कामं भवतु न मे द्वेषः ।

ननु जीवे समवायिकारणे मनःसंयोगादसमवायिकारणात्कार्यमुत्पत्तिरित्युदाहृतश्रुतिषु विवक्षितेन तत्राऽऽह—**न चाऽऽसामिति** । दृश्यमानसंसारमौपाधिकमभिधाय जीवस्य ब्रह्मत्वोपपादने तात्पर्यं श्रुतीनामुपक्रमोपसंहारैकरूप्यादिभ्यो गम्यते तन्नार्थान्तरकल्पनेत्यर्थः । इतश्च यथोक्तश्रुतीनां नार्थान्तरकल्पनेत्याह—**एतावन्मात्रेति** । सर्वासामुपनिषदामेकरसेऽर्थे पर्यवसानं फलवत्त्वादिलिङ्गेभ्यो गम्यते तत्कथमुक्तश्रुतीनामर्थान्तरकल्पनेत्यर्थः । ननूपनिषदामैक्यादर्थान्तरमपि प्रतिपाद्यं व्याख्यातारो वर्णयन्ति तत्कथमर्थान्तरकल्पनानुपपत्तिरत आह—**तस्मादिति** । सर्वोपनिषदामैक्यपरत्वप्रतिभासस्तच्छब्दार्थः । ननु परैरुच्यमानोऽपि वेदार्थो भवत्येव किमित्यसौ द्वेषादेव त्यज्यते तत्राऽऽह—**तथाऽपीति** । न चार्थान्तरस्य वेदार्थत्वं तत्र तात्पर्यलिङ्गाभावादिति भावः ।

न च द्वे वाव ब्रह्मणो रूपे इति राशित्रयपक्षे समञ्जसम् । यदा तु मूर्तामूर्तं तज्जनितवासना मूर्तामूर्तं द्वे रूपे ब्रह्म च रूपि तृतीयं न

१ ध. अ. लिङ्गापगमेऽपि । २ झ. यदि च मू° । ३ ग. च. ज. ढ. °मूर्तं त° । ४ ग. °र्तं एव द्वे ।

चान्याच्चतुर्थमन्तराले तदेतदनुकूलमवधारणं द्वे एत ब्रह्मणो रूपे इति । अन्यथा ब्रह्मकदेशस्य विज्ञानात्मनो रूपे इति कल्पय्यं परमात्मनो वा विज्ञानात्मद्वारेणेति । तदा च रूपे एवेति द्विवचनमसमञ्जसम् । रूपाणीति । वासनाभिः सह बहुवचनं युक्ततरं स्यात् । द्वे च मूर्तामूर्ते वासनाश्च तृतीयमिति ।

लिङ्गवियोगेऽपि पुंसि वासनाऽस्तीत्येतन्निराकृत्य राशित्रयकल्पनां निराकरोति—न चेति । कथं सिद्धान्तेऽपि वावशब्दादिसामञ्जस्यं तत्राऽऽह—यदेति । राशित्रयपक्षे जीवस्य रूपमध्येऽन्तर्भावे निषेध्यकोटिनिवेशः स्याद्रूपिमध्येऽन्तर्भावे श्रुतिः शिक्षतीत्याह—अन्यथेति । भवत्वेवं श्रुतेः शिक्षेति तत्राऽऽह—तदेति । रूपिमध्ये जीवान्तर्भावकल्पनायामिति यावत् ।

अथ मूर्तामूर्ते एव परमात्मनो रूपे वासनास्तु विज्ञानात्मन इति चेत् । तदा विज्ञानात्मद्वारेण विक्रियमाणस्य परमात्मन इतीयं वाचोयुक्तिरनर्थिका स्यात । वासनाया अपि विज्ञानात्मद्वारत्वस्याविशिष्टत्वात् । न च वस्तु वस्त्वन्तरद्वारेण विक्रियत इति मुख्यया वृत्त्या शक्यं कल्पयितुम् । न च विज्ञानात्मनो परमात्मनो वस्त्वन्तरम् । तथा कल्पनायां सिद्धान्तहानात् । तस्माद्वेदार्थमूढानां स्वचित्तप्रभवा एवमादिकल्पना अक्षरबाह्याः । न ह्यक्षरबाह्यो वेदार्थो वेदार्थोपकारी वा । निरपेक्षत्वाद्वेदस्य प्रामाण्यं प्रति । तस्माद्राशित्रयकल्पनाऽसमञ्जसा ।

विषयभेदेनोपकर्मविरोधं चोदयति—अथेति । इत्थं व्यवस्थायां जीवद्वारा विक्रियमाणस्य परस्य रूपे मूर्तामूर्त इत्युक्तिरयुक्ता वासनाकर्मादेरपि तद्द्वारा तत्संबन्धाविशेषादिति दूषयति—तदेति । विज्ञानात्मद्वारा परस्य विक्रियमाणत्वमङ्गीकृत्योक्तं तदेव नास्तीत्याह—न चेति । तथाभूतस्यान्यभूतस्य च विक्रियाया दुरुपपादत्वादित्यर्थः । किंच जीवस्य ब्रह्मणो वस्त्वन्तरत्वमात्यन्तिकमनात्यन्तिकं वा नाऽऽद्य इत्याह—न चेति । न द्वितीयो भेदाभेदनिरासादिति द्रष्टव्यम् । परपक्षदूषणमुपसंहरति—तस्मादिति । एवमादिकल्पना राशित्रयं जीवस्य कामाद्याश्रयत्वमित्याद्याः । अक्षरबाह्यत्वे फलितमाह—न हीति । वेदार्थोपकारित्वाभावे हेतुमाह—निरपेक्षत्वादिति । वेदार्थत्वाद्यभावे सिद्धमर्थं कथयति—तस्मादिति ।

योऽयं दक्षिणऽक्षन्पुरुष इति लिङ्गात्मा प्रस्तुतोऽध्यात्मेऽधिदैवे च

---

१ क. ख. ञ. °वत्येवं । २ क. ख छ. °त् । न तं । ३ क. झ. °रस्या° । ग. च. °ना न स° । छ. °ना चास° । ५ क. ख. घ. ढ. ण. °क्रमवि° । ६ घ. ञ. तत्र संब° ।

य एष एतस्मिन्मण्डले पुरुष इति तस्येति प्रकृतोपादानात्स एवोपादीयते योऽसौ त्वय्यामूर्तस्य रसो न तु विज्ञानमयः । ननु विज्ञानमयस्यैवैतानि रूपाणि कस्माच्च भवन्ति विज्ञानमयस्यापि प्रकृतत्वात्तस्येति च प्रकृतोपादानात् । नैवम् । विज्ञानमयस्यारूपित्वेन विजिज्ञापयिषितत्वात् । यदि हि तस्यैव विज्ञानमयस्यैतानि माहारजनादीनि रूपाणि स्युस्तस्यैव नेति नेतीत्यनाख्येयरूपतयाऽऽदेशो न स्यात् ।

तस्य हेत्यत्र परकीयप्रक्रियां प्रत्याख्याय स्वमते तच्छब्दार्थमाह –योऽयमिति । प्रकृतत्वाल्लिङ्गात्मग्रहे जीवस्यापि पाणिपेषवाक्ये तद्भावात्तस्यैवात्र तच्छब्देन ग्रहः स्यादिति शङ्कते–नन्विति । प्रकृतत्वेऽपि तस्य निर्विशेषब्रह्मत्वेन ज्ञापयितुमिष्टत्वान्न वासनामयं संसाररूपं तत्त्वतो युक्तमिति परिहरति–नैवमिति । इतश्च जीवस्य न वासनारूपिता किंतु चितस्येत्याह–यदि हीति । निषेध्यकोटिप्रवेशादिति भावः ।

नन्वन्यस्यैवासावादेशो न तु विज्ञानमयस्येति । न । षष्ठान्त उपसंहारादिज्ञातारमरे केन विजानीयादिति विज्ञानमयं प्रस्तुत्य स एष नेति नेतीति विज्ञापयिष्यामीति च प्रतिज्ञाया अर्थवत्त्वात् । यदि च विज्ञानमयस्यैवासंव्यवहार्यमात्मस्वरूपं ज्ञापयितुमिष्टं स्यात्प्रध्वस्तसर्वोपाधिविशेषं तत इयं प्रतिज्ञाऽर्थवती स्यात् । येनासौ ज्ञापितो जानात्यात्मानमेवाहं ब्रह्मास्मीति शास्त्रनिष्ठां प्राप्नोति न बिभेति कुतश्चन । अथ पुनरन्यो विज्ञानमयोऽन्यो नेति नेतीति व्यपदिश्यते तदाऽन्यदृष्टो ब्रह्मान्योऽहमस्मीति विपर्ययो गृहीतः स्यान्नाऽऽत्मानमेवावेदहं ब्रह्मास्मीति तस्मात्तस्य हैतस्येति लिङ्गपुरुषस्यैवैतानि रूपाणि ।

नायं जीवस्याऽऽदेशः किंतु ब्रह्मणस्तटस्थस्येति शङ्कयित्वा दूषयति–नन्वित्यादिना । षष्ठावसाने विज्ञातारमरे केनेत्यात्मानमुपक्रम्य स एष नेति नेत्यात्मशब्दात्तस्यैवाऽऽदेशोपसंहारादिहापि तस्यैवाऽऽदेशो न तटस्थस्येत्यर्थः । इतश्च प्रत्यगर्थस्यैवायमादेश इत्याह–विज्ञापयिष्यामीति । तदेव समर्थयते–यदीति ।

---

१ क. ख. च. छ. झ. ढ °दानत्वात्स । २ ख. घ. ज. ढ. °स्यैता° । ३ ग. घ. ङ. च. छ. ज. झ. °कृताभ्यादा° । ४ ख. ग. घ ज. झ. ढ. °मि महा° । ५ ग. ग. घ. ङ. ञ. °ति ज्ञाप° । ६ क. च. ञ. विज्ञाप° । ७ घ. ज °पं विज्ञा° । ८ क. °श्चनेति । अ° । ९ च. °यो हि ने° । १० क. ण. °शो न । ११ घ. ण. °ह । ज्ञ° । १२ क. विज्ञाप° । १३ घ. ञ. °ति चेति । त° । १४ क. ख ढ. °यति । य° ।

कथयेत्यावता प्रतिज्ञार्थवस्त्वं तदाह—येनेति । ज्ञानफलं कथयति—शाक्नोति । अन्वयमुखेनोक्तमर्थं व्यतिरेकमुखेन (ण) साधयति—अथेत्यादिना । विपर्यये गृहीते ब्रह्मकण्डिकाविरोधं दर्शयति—नाऽऽत्मानमिति । तच्छब्देन जीवपरामर्शासंभवे फलितमाह—तस्मादिति ।

सत्यस्य च सत्ये परमात्मस्वरूपे वक्तव्ये निरवशेषं सत्यं वक्तव्यम् । सत्यस्य च विशेषरूपाणि वासनास्तासामिमानि रूपाण्युच्यन्ते । एतस्य पुरुषस्य प्रकृतस्य लिङ्गात्मन एतानि रूपाणि । कानि तानीत्युच्यन्ते—यथा लोके महारजनं हरिद्रा तथा रक्तं माहारजनं यथा वासो लोक एवं रूपादिविषयसंयोगे तादृशं वासनारूपं रञ्जनाकारमुत्पद्यते चित्तस्य । येनासौ पुरुषो रक्त इत्युच्यते वस्त्रादिवत् । यथा च लोके पाण्डवाविकम् । अवेरिदमाविकमूर्णादि । यथा च तत्पाण्डुरं भवति तथाऽन्यद्वासनारूपम् । यथा च लोक इन्द्रगोपोऽत्यन्तरक्तो भवत्येवमन्यत् वासनारूपम् । क्वचिद्विषयविशेषापेक्षया रागस्य तारतम्यं क्वचित्पुरुषचित्तवृत्त्यपेक्षया । यथा च लोकेऽग्न्यर्चिर्भास्वरं भवति तथा क्वचित्कस्यचिद्वासनारूपं भवति । यथा पुण्डरीकं शुक्लं तद्वदपि च वासनारूपं कस्यचिद्भवति । यथा सकृद्विद्युत्तं यथा लोके सकृद्द्योतनं सर्वतः प्रकाशकं भवति यथा ज्ञानप्रकाशविवृद्ध्यपेक्षया कस्यचिद्वासनारूपमुजायते ।

ननु लिङ्गस्य चेदेतानि रूपाणि किमित्युपन्यस्यन्ते परमात्मस्वरूपस्यैव वक्तव्यत्वादत आह—सत्यस्य चेति । इन्द्रगोपोपमानेन कौसुम्भस्य गतत्वान्महारजनं हरिद्रेति व्याख्यातम् । तत्र लोकप्रसिद्धिं दर्शयति—येनेति । ऊर्णादित्यादिपदं कम्बलादिग्रहार्थम् । मनसि वासनावैचित्र्ये किं कारणमिति तदाह—क्वचिदिति । चित्तवृत्तिशब्देन सत्त्वादिगुणपरिणामो विवक्षितः ।

नैषां वासनारूपाणामादिरन्तो मध्यं संख्या वा देशः कालो निमित्तं वाऽवधार्यते । असंख्येयत्वाद्वासनाया वासनाहेतूनां चाऽऽनन्त्यात् । तथा च वक्ष्यति षष्ठ इदंमयोऽदोमय इत्यादि । तस्मान्न स्वरूपसंख्यावधारणार्था दृष्टान्ता यथा माहारजनं वास इत्यादयः किं तर्हि प्रकारप्रदर्शनार्थाः । एवंप्रकाराणि हि वासनारूपाणीति । यत्तु वासनारूपमभिहितमन्ते सकृद्द्योतनमिवेति तत्किल हिरण्य-

१ ग. °योगात्तार्ट° । २ ङ. झ. °था तदापाण्डु° । क. ख. घ. छ. ज. °था चैतदापाण्डु° । ३ ख. च. ढ. °शकवि° ।

गर्भस्याध्याहारात्प्रादुर्भवतस्तडिदुत्सकृदेव व्यक्तिर्भवतीति तंचदीयं वासनारूपं हिरण्यगर्भस्य यो वेद तस्य सकृद्विद्युत्तेव । ह वा इत्यवधारणार्थौ । एवमेवास्य श्रीः ख्यातिर्भवतीत्यर्थः । यथा हिरण्यगर्भस्यैवमेतद्यथोक्तं वासनारूपमन्त्यं यो वेद ।

परिमितदृष्टान्तोक्त्या वासनानामपि परिमितत्वं दृष्टान्तदार्ष्टान्तिकयोः साम्यादित्याशङ्क्याऽऽह-नैषामिति । तत्र वाक्यशेषं संवादयति-तथा चेति । वासनानन्त्यात्तदीयपरिमितिपदर्शने परिमितदृष्टान्तपरिग्रहस्यानात्पर्ये कुत्र तात्पर्यमित्याशङ्क्याऽऽह-तस्मादिति । प्रकारप्रदर्शनमेवाभिनयति--एवंप्रकाराणीति । अन्त्यवासनादिशिष्टसूत्रोपात्तं फलवती तत्प्रकर्षाभिधानपूर्वकमभिद्धाति-यत्त्विति-त्यादिना । व्यक्तिः सर्वस्य वस्तुजातस्येति शेषः । तदीयमित्यस्य व्यक्तीकरणं हिरण्यगर्भस्येति । तदेव स्फुटयति-यथेत्यादिना ।

एवं निरवशेषं सत्यस्य स्वरूपमभिधाय यत्तत्सत्यस्य सत्यमवोचाम तस्यैव स्वरूपावधारणार्थं ब्रह्मण इदमारभ्यते-अथानन्तरं सत्यस्वरूपनिर्देशानन्तरं यत्सत्यस्य सत्यं तदेवावशिष्यते यस्मादतस्तस्मात्सत्यस्य सत्यं स्वरूपं निर्देक्ष्यामः । आदेशो ब्रह्मणः । कः पुनरसौ निर्देश इत्युच्यते-नेति नेतीत्येवं निर्देशः ।

वृत्तमनूद्यानन्तरग्रन्थमवतारयति-एवमित्यादिना । तस्यैव ब्रह्मण इति संबन्धः । कस्मादनन्तरमित्युक्ते तद्दर्शयन्नतःशब्दं चापेक्षितं पूरयन्व्याकरोति-सत्यस्येति ।

ननु कथमाभ्यां नेति नेतीति शब्दाभ्यां सत्यस्य सत्यं निर्दिदिक्षितमिति । उच्यते-सर्वोपाधिविशेषापोहेन यस्मिन्न कश्चिद्विशेषोऽस्ति नाम वा रूपं वा कर्म वा भेदो वा जातिर्वा गुणो वा तद्द्वारेण हि शब्दप्रवृत्तिर्भवति । न चैषां कश्चिद्विशेषो ब्रह्मण्यस्ति । अतो न निर्देष्टुं शक्यत इदं तदिति । गौरसौ स्पन्दते शुक्लो विषाणीति यथा लोके निर्दिश्यते तथा । अध्यारोपितनामरूपकर्मद्वारेण ब्रह्म निर्दिश्यते विज्ञानमानन्दं ब्रह्म विज्ञानघन एव ब्रह्माऽऽत्मेत्येवमादिशब्दैः यदा पुनः स्वरूपमेव निर्दिदिक्षितं भवति निरस्तसर्वोपाधिविशेषं

---

१ क. छ. झ. ढ. °व्यक्ती भव° । ख. ग. तदी° । ३ क. च. ढ. तदस्य । ४ घ. ञ. °नावि° । ५ ख. °त्यस्य स्व° । ६ क. घ. ङ. छ. °त्ये स्वं स्व° । ७ ग. च. ढ. °त्येष नि° । ८ घ. ञ. °तार्य व्याकरोति ।

तदा न केनचिदपि प्रकारेण निर्देष्टुम् । तदाऽयमेवाभ्युपायो यदुत प्राप्तनिर्देशप्रतिषेधद्वारेण नेति नेतीति निर्देशः ।

यथोक्तादेशस्याभावपर्यवसायित्वं मन्वानः शङ्कते—नन्विति । निरवधिकनिषेधासिद्धेस्तदवधित्वेन सत्यस्य सत्यं ब्रह्म निर्देष्टुमिष्टमिति परिहरति—उच्यत इति । ब्रह्मणो विधिमुखेन निर्देशे संभाव्यमाने किमिति निषेधमुखेन तन्निर्दिश्यते तत्राऽऽह—यस्मिन्निति । तद्विधिमुखेन निर्देष्टुमशक्यमिति शेषः । नामरूपाद्यभावेऽपि ब्रह्मणि शब्दप्रवृत्तिमाशङ्क्याऽऽह—तद्द्वारेणेति । जात्यादीनामन्यतमस्य ब्रह्मण्यपि संभवात्तद्द्वारा तत्र शब्दप्रवृत्तिः स्यादिति चेन्नेत्याह—न चेति । उक्तमर्थं वैधर्म्यदृष्टान्तेन स्पष्टयति—गौरिति । तथा जात्याद्यभावान्न ब्रह्मणि शब्दप्रवृत्तिरिति शेषः । कथं तर्हि क्वचिद्विधिमुखेन ब्रह्मोपदिश्यते तत्राऽऽह—अध्यारोपितेति । विज्ञानमानन्दादिवाक्येषु शबले गृहीतशक्तिभिः शब्दैर्लक्ष्यते ब्रह्मेत्यर्थः । ननु लक्षणामुपेक्ष्य साक्षादेव ब्रह्म किमिति न विवक्ष्यते, तत्राऽऽह—यदा पुनरिति । निर्देष्टुं लक्षणामुपेक्ष्य साक्षादेव वक्तुमिति यावत् । तत्र शब्दप्रवृत्तिनिमित्तानां जात्यादीनामभावस्योक्तत्वादित्यर्थः । विधिमुखेन निर्देशासंभवे फलितमाह—तदेति । प्राप्तो निर्देशो यस्य विशेषस्य तत्प्रतिषेधमुखेनेति यावत् ।

इदं च नकारद्वयं वीप्साव्याप्त्यर्थम् । यद्यत्प्राप्तं तत्तन्निषिध्यते तथा च सत्यनिर्दिष्टाशङ्का ब्रह्मणः परिहृता भवति । अन्यथा हि नकारद्वयेन प्रकृतद्वयप्रतिषेधे यदन्यत्प्रकृतात्प्रतिषिद्धद्वयाद्ब्रह्म तन्न निर्दिष्टं कीदृशं तु खल्वित्याशङ्का न निवर्तिष्यते । तथा चानर्थकश्च स निर्देशः पुरुषस्य विविदिषाया अनिवर्तकत्वात् । ब्रह्म ज्ञापयिष्यामीति च वाक्यमपरिसमाप्तार्थं स्यात् । यदा तु सर्वदिक्कालादिविविदिषा निवर्तिता स्यात्सर्वोपाधिनिराकरणद्वारेण तदा सैन्धवघनवदेकरसं प्रज्ञानघनमनन्तरमबाह्यं सत्यस्य सत्यमहं ब्रह्मास्मीति सर्वतो निवर्तते विविदिषाऽऽत्मन्येवावस्थिता प्रज्ञा भवति । तस्माद्वीप्सार्थं नेति नेतीति नकारद्वयम् ।

एवं ब्रह्म निर्दिदिक्षितं चेदेकेनैव नञाऽलं कृतं द्वितीयेनेत्याशङ्क्याऽऽह—इदं चेति । वीप्सया व्याप्तिः सर्वविषयसंग्रहस्तदर्थं नकारद्वयमित्युक्तमेव व्यनक्ति—यद्यदिति । विषयत्वेन प्राप्तं सर्वं न ब्रह्मेत्युक्ते सत्यविषयः प्रत्यगात्मा ब्रह्मेत्येकत्वे शास्त्रपर्यवसानानैराकाङ्क्ष्यं श्रोतुः सिध्यतीत्याह—तथा चेति । इति-

१ ख. ग. नु । २ ङ. °वर्तितत्वा° ।

शब्दस्य प्रकृतपरामर्शित्वात्प्रकृतपूर्वादेरन्यत्वे ब्रह्मणो नकारपर्यवसानं किमिति नेष्यते तत्राऽऽह—अन्यथेति । आशङ्कानिवृत्त्यभावे दोषमाह—तथा चेति । अनर्थकथेति चकारेण समुच्चितं दोषान्तरमाह—ब्रह्मेति । उक्तमर्थमन्वयमुखेन समर्थयते—यदा त्विति । सर्वोपाधिनिरासेन तत्र तत्र विषयवेदनेच्छा यदा निवर्तिता तदा यथोक्तं प्रत्यग्ब्रह्माहमिति निश्चित्याऽऽकाङ्क्षा सर्वतो व्यावर्तते । तेन निर्देशस्य सार्थकत्वं यदा चोक्तरीत्या ब्रह्माऽऽस्मेत्येव प्रज्ञाऽवस्थिता भवति तदा प्रतिज्ञावाक्यमपि परिसमाप्तार्थं स्यादिति योजना । दीप्सापक्षमुपसंहरति—तस्मादिति ।

ननु महता यत्नेन परिकरबन्धं कृत्वा किं युक्तमेव निर्देष्टुं ब्रह्म । पाठमू । कस्मात् । नेह यस्मादितिं नेतिं नेत्येतस्मादितीति व्याप्तव्यप्रकारा नकारद्वयविषया निर्दिश्यन्ते । यथा ग्रामो ग्रामो रमणीय इत्यन्यत्परं निर्देशनं नास्ति । तस्मादयमेव निर्देशो ब्रह्मणः । यदुक्तं तस्योपनिषत्सत्यस्य सत्यमित्येवंप्रकारेण सत्यस्य सत्यं तत्परं ब्रह्म । अतो युक्तमुक्तं नामधेयं ब्रह्मणो नामैव नामधेयमू । किं तत्सत्यस्य सत्यं प्राणा वै सत्यं तेषामेष सत्यमिति ॥ ६ ॥

इति बृहदारण्यकोपनिषद्भाष्ये द्वितीयाध्यायस्य
तृतीयं ब्राह्मणमू ॥ ॥

आदेशस्य प्रकृतानुगुणत्वमाशङ्क्यानन्तरवाक्येन (ण) परिहरति—नन्विस्यादिना । न हीति प्रतीकोपादानमू । यस्मादित्यस्य हिशब्दार्थस्य तस्मादित्यनेन संबन्धः । व्याप्तव्याः संग्राह्या विषयीकर्तव्या ये प्रकारास्ते नकारद्वयस्य विषयाः सन्तो निर्दिश्यन्त इति चेति नेत्येतस्मादित्यनेन ग्रामेणेति योजना । इतिशब्दाभ्यां व्याप्तव्यसर्वप्रकारसंग्रहे दृष्टान्तमाह—यथेति । ग्रामो ग्रामो रमणीय इत्युक्ते राज्यनिविष्टरमणीयसर्वग्रामसंग्रहवत्प्रकृतेऽपीतिशब्दाभ्यां विषयभूतसर्वप्रकारसंग्रहे नकाराभ्यां तन्निषेधसिद्धिरित्यर्थः । यथोक्तनिषेधरूपान्निर्देशादन्यन्निर्देशनं यस्माद्ब्रह्मणो न परमस्ति तस्मादित्युपसंहारः । अथेत्यादि वाक्यं प्रकृतोपसंहारत्वेन व्याचष्टे—यदुक्तमित्यादिना ॥ ६ ॥

इति बृहदारण्यकोपनिषद्भाष्यटीकायां द्वितीयाध्यायस्य
तृतीयं ब्राह्मणमू ॥ ३ ॥

---

१ छ. ढ. न ह्येतस्मा° । २ घ. ङ. छ. °ति नेति नें° । ३ ख. ग. घ. ज. नेतीत्ये° । ४ च. ङ. °स्य वि° । ५ ख. ढ. नेतीत्ये° । ६ घ. ञ. ण °तिस्यां । ७ घ. ञ. ण. ब्रूनि । ८ ञ. ण. °रपरत्वें ।

(अथ द्वितीयाध्यायस्य चतुर्थं ब्राह्मणम्) ।

आत्मेत्येवोपासीत । तदेवैतस्मिन्पदनीयमात्मतत्त्वं यस्मात्प्रेयः पुत्रादेरित्युपन्यस्तस्य वाक्यस्य व्याख्यानविषये संबन्धप्रयोजने अभिहिते तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात्तत्सर्वमभवादिति । एवं प्रत्यगात्मा ब्रह्मविद्याया विषय इत्येतदुपन्यस्तम् । अविद्यायाश्च विषयोऽन्योऽसावन्योऽहमस्मीति न स वेदेत्यारभ्य चातुर्वर्ण्यप्रविभागादिनिमित्तपाङ्क्तकर्मसाध्यसाधनलक्षणो बीजाङ्कुरवद्व्याकृताव्याकृतस्वभावो नामरूपकर्मात्मकः संसारस्तयं वा इदं नाम रूपं कर्मेत्युपसंहृतः शास्त्रीय उत्कर्षलक्षणो ब्रह्मलोकान्तोऽधोभावश्च स्थावरान्तोऽशास्त्रीयः पूर्वमेव प्रदर्शितो द्वया हेत्यादिना ।

संबन्धाभिधित्सया वृत्तं कीर्तयति—आत्मेत्येवेति । किमित्यात्मतत्त्वमेव ज्ञातव्यं तत्राऽऽह—तदेवेति । इत्थं सूचितस्य विद्याविषयस्य वाक्यस्य व्याख्यानमेवं विषयस्तत्र विद्या साधनं साध्या मुक्तिरिति संबन्धो मुक्तिश्च फलमित्येते तदात्मानमित्यादिना दर्शिते इत्याह—इत्युपन्यस्तस्येति । विद्याविषयमुक्तं निगमयति—एवमिति । उक्तमर्थान्तरं स्मारयति—अविद्यायाश्चेति । अन्योऽसावित्याद्यारभ्याविद्याया विषयश्च संसार उपसंहृतस्तयमित्यादिनेति संबन्धः । संसारमेव विशिनष्टि—चातुर्वर्ण्येति । चातुर्वर्ण्यं चातुराश्रम्यमिति प्रविभागादिनिमित्तं यस्य पाङ्क्तस्य कर्मणस्तस्य साध्यसाधनमित्येवमात्मक इति यावत् । तस्यानादित्वं दर्शयति—बीजाङ्कुरवदिति । तमेव त्रिधा संक्षिपति—नामेति । स चोत्कर्षापकर्षाभ्यां द्विधा भिद्यते तत्राऽऽद्यमुदाहरति—शास्त्रीय इति । उत्कृष्टो हि संसाररूपश्चात्मभावः शास्त्रीयज्ञानकर्मलभ्य इत्यर्थः । द्वितीयं कथयति—अधोभावश्चेति । निकृष्टः संसारः स्वाभाविकज्ञानकर्मसाध्य इत्यर्थः ।

एतस्मात्सर्वविद्याविषयाद्विरक्तैकस्य प्रत्यगात्मविषयब्रह्मविद्यायामधिकारः कथं नाम स्यादिति तृतीयेऽध्याय उपसंहृतः समस्तोऽविद्याविषयः । चतुर्थे तु ब्रह्मविद्याविषयं प्रत्यगात्मानं ब्रह्म ते ब्रवाणीति ब्रह्म शपथिष्यामीति च प्रस्तुत्य तद्ब्रह्मैकमद्वयं सर्वविशेषशून्यं क्रियाकारकफलस्वभावसत्यशब्दवाच्याशेषभूतधर्मप्रतिषेधद्वारेण नेति नेतीति ज्ञापितम्

---

१ घ. °तत्सर्वस्मि° । २ ख. ट. °व विद्यावि° । ३ ख. ट. °दि° । ४ क. ख. °क्स्यास्य । ५ ङ. च. छ. ट. °यामेवाधि° । ६ क. ख. °यंचिदपि स्या° । ७ ख. ग. घ. ङ, च, छ. ज. झ. ट. °वाणि ब्र° ।

किंमित्यविद्याविषयो व्याख्यातो न हि स पुरुषस्योपयुज्यते तत्राऽऽह—एतस्मादिति । प्रत्यगात्मैव विषयस्तस्मिन्या ब्रह्मेति विद्या तस्यामिति यावत् । तार्तीयमनूद्य चातुर्थिकमर्थं कथयति—चतुर्थे त्विति ।

अस्या ब्रह्मविद्याया अङ्गत्वेन संन्यासो विधित्सितः । जायापुत्रवित्तादिलक्षणं पाङ्क्तं कर्माविद्याविषयं यस्मान्नाऽऽत्मप्राप्तिसाधनम् । अन्यसाधनं ह्यन्यस्मै फलसाधनाय प्रयुज्यमानं प्रतिकूलं भवति । न हि बुभुक्षापिपासानिवृत्त्यर्थं धावनं गमनं वा साधनम् । मनुष्यलोकपितृलोकदेवलोकसाधनत्वेन हि पुत्रादिसाधनानि श्रुतानि नाऽऽत्मप्राप्तिसाधनत्वेन । विशोषितत्वाच्च । न च ब्रह्मविदो विहितानि काम्यत्वश्रवणादेतावान्वै काम इति । ब्रह्मविदश्चाऽऽप्तकामत्वादाप्तकामस्य कामानुपपत्तेः । येषां नोऽयमात्माऽयं लोक इति च श्रुतेः ।

एवं वृत्तमनूद्योत्तरब्राह्मणतात्पर्यमाह—अस्या इति । किमिति संन्यासो विधित्स्यते कर्मणैव विद्यालाभादित्याशङ्क्याऽऽह—जायेति । अविद्याया विषय एव विषयो यस्येति विग्रहः । तस्मात्संन्यासो विधित्सित इति पूर्वेण संबन्धः । ननु प्रकृतं कर्माविद्याविषयमपि किमित्यात्मज्ञानं तादर्थ्येनानुष्ठीयमानं नोपनयति तत्राऽऽह—अन्येति । तदेव दृष्टान्तेन स्पष्टयति—न हीति । पाङ्क्तस्य कर्मणोऽन्यसाधनत्वमेव कथमधिगतमित्याशङ्क्याऽऽह—मनुष्येति । सोऽयं मनुष्यलोकः पुत्रेणैव जय्यः कर्मणा पितृलोको विद्यया देवलोक इति विशेषितत्वम् । श्रुतत्वमेव विशेषितत्वोक्तिद्वारा स्फुटीकृतमिति चकारेण द्योत्यते । ननु ब्रह्मविद्या स्वफले विहितं कर्मापेक्षते श्रौतसाधनत्वाद्दर्शादिवत्तथा च समुच्चयान्न कर्मसंन्यासासिद्धिरत आह—न चेति । कर्मणां काम्यत्वेऽपि ब्रह्मविदस्तानि किं न स्युरित्याशङ्क्याऽऽह—ब्रह्मविदश्चेति । इतश्च तस्य पुत्रादिसाधनानुपपत्तिरित्याह—येषामिति ।

केचित्तु ब्रह्मविदोऽप्येषणासंबन्धं वर्णयन्ति तैर्बृहदारण्यकं न श्रुतम् । पुत्राद्येषणानामविद्याविषयत्वम् । विद्याविषये च येषां नोऽयमात्माऽयं लोक इत्यतः किं प्रजया करिष्याम इत्येष विभागस्तैर्न श्रुतः श्रुत्या कृतः । सर्वक्रियाकारकफलोपमर्दस्वरूपायां च विद्यायां सत्यां सह कार्येणाविद्याया अनुपपत्तिलक्षणश्च विरोधस्तैर्न विज्ञातो व्यासवाक्यं च तैर्न श्रुतम् । कर्मविद्यास्वरूपयोर्विद्याविद्यात्मकयोः प्रतिकूलवर्तनं विरोधः ।

---

१ ख. ग. छ झ. ङ. °श्चाऽऽत्मका° । २ ख. छ. झ. °द्यात्मका° । ३ ग. ङ. च. झ. ञ. °ति श्रु° । ४ घ. ञ. ण. °लाभसंभवादि° । ख. ञ. ण. °नं न फलय° । ५ झ. °तो भगवद्भिरुच्यास° । ७ झ. °विषयोः ।

" यदिदं वेदवचनं कुरु कर्म त्यजेति च ।
कां गतिं विद्यया यान्ति कां च गच्छन्ति कर्मणा ॥
एतद्वै श्रोतुमिच्छामि तद्भवान्प्रब्रवीतु मे ।
एतावन्योन्यवैरूप्ये वर्तेते प्रतिकूलतः "

इत्येवं पृष्टस्य प्रतिवचनेन—

" कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते ।
तस्मात्कर्म न कुर्वन्ति यतयः पारदर्शिनः " ॥

इत्येवमादिविरोधः प्रदर्शितः ।

समुच्चयपक्षमनुभाष्य श्रुतिविरोधेन दूषयति—कोचित्त्विति । श्रुतिविरोधमेव स्फोरयति—पुत्रादीति । अविद्वद्विषयत्वं श्रुतं तत्प्रकरणे तेषामुपदेशादिति शेषः । किं प्रजया करिष्याम इत्यत आरभ्य तेषां नोऽयमात्माऽयं लोक इति च विद्याविषये श्रुतिरिति योजना । एष विभागः श्रुत्या कृतस्तैः समुच्चयवादिभिर्न श्रुत इति संबन्धः । न केवलं श्रुतिविरोधादेव समुच्चयासिद्धिः किंतु युक्तिविरोधाच्चेत्याह—सर्वेति । द्वितीयश्चकारोऽवधारणार्थो नञा संबध्यते । स्मृतिविरोधाच्च समुच्चयासिद्धिरित्याह—व्यासेति । तत्र प्रथमं पूर्वोक्तं युक्तिविरोधं स्फुटयति—कर्मेति । प्रतिकूलवर्तनं निवर्त्यनिवर्तकभावः । संप्रति स्मृतिविरोधं स्फोरयति—यदिदमिति । प्रसिद्धं वेदवचनं कुरु कर्मेत्यङ्गं प्रति यदिदमुपलभ्यते विवक्तिनं प्रति च त्यजेति तत्र कां गतिमित्यादिः शिष्यस्य व्यासं प्रति प्रश्नस्तस्य बीजमाह—एतावदिति । विद्याकर्मरूप्यावुपायौ परस्परविरुद्धत्वे वर्तेते साभिमानत्वनिरभिमानत्वादिपुरस्कारेण प्रातिकूल्यात्समुच्चयानुपपत्तेर्यथोक्तस्य प्रश्नस्य सावकाशत्वमित्यर्थः । इत्येवं पृष्टस्य भगवतो व्यासस्येति शेषः । विरोधो ज्ञानकर्मणोः समुच्चयस्येति वक्तव्यम् ।

तस्मान्न साधनान्तरसहिता ब्रह्मविद्या पुरुषार्थसाधनं सर्वविरोधात्साधननिरपेक्षैव पुरुषार्थसाधनामिति पारिव्राज्यं सर्वसाधनसंन्यासलक्षणमङ्गत्वेन विधित्स्यते । एतावदेवामृतसाधनामित्यवधारणात्पष्ठसमासौ लिङ्गाच्च कर्मी सन्याज्ञवल्क्यः प्रव्रव्राजेति ।

समुच्चयानुपपत्तिमुपसंहरति—तस्मादिति । कथं तर्हि ब्रह्मविद्या पुरुषार्थसाधनमिति तत्राऽऽह—सर्वविरोधादिति । सर्वस्य क्रियाकारकफलभेदात्मकस्य द्वैतेन्द्रजालस्य ब्रह्मविद्यया विरोधादिति यावत् । एकाकिनी ब्रह्मविद्या मुक्तिहेतु-

---

१ ग. घ. ङ. ज. झ. तु । २ घ. ञ. ण. श्रुतमिति ।

रिति स्थिते फलितमाह—इति पारिव्राज्यमिति । न केवलं संन्यासस्य श्रवणादिपौष्कल्यद्वारेण विद्यापरिपाकाङ्गत्वं श्रुत्यादिबलादवगम्यते किंतु लिङ्गादपीत्याह—एतावदेवेति । तत्रैव लिङ्गमन्तरमाह—षष्ठसमाप्तावितिं । एवञ्चोभयतः संबध्यते । यदि कर्मसहितं ज्ञानं मुक्तिहेतुस्तदा किमिति कर्मणः ततो याज्ञवल्क्यस्य पारिव्राज्यमुच्यते तस्मात्तस्यागस्तदङ्गत्वेन विधित्सित इत्यर्थः ।

मैत्रेय्यै च कर्मसाधनरहितायै साधनत्वेनामृतत्वस्य ब्रह्मविद्योपदेशाद्वित्तनिन्दावचनाच्च । यदि ह्यमृतत्वसाधनं कर्म स्याद्वित्तसाध्यं पाङ्क्तं कर्मेति तन्निन्दावचनमनिष्टं स्यात् । यदि तु परिनिष्ठात्याजयितव्यं कर्म ततो युक्ता तत्साधननिन्दा । कर्माधिकारनिमित्तवर्णाश्रमादिप्रत्ययोपमर्दाच्च ब्रह्म तं परादात्क्षत्रं तं परादादित्यादेः । न हि ब्रह्मक्षत्राद्यात्मप्रत्ययोपमर्दे ब्राह्मणेनेदं कर्तव्यं क्षत्रियेणेदं कर्तव्यमिति विषयाभावादात्मानं लभते विधिः । यस्यैव पुरुषस्योमर्दितः प्रत्ययो ब्रह्मक्षत्राद्यात्मविषयस्तस्य तत्प्रत्ययसंन्यासात्तत्कार्याणां कर्मणां कर्मसाधनानां चार्थप्राप्तश्च संन्यासः । तस्मादात्मज्ञानाङ्गत्वेन संन्यासविधित्सयैवाऽऽख्यायिकेयमारभ्यते ।

तत्रैव लिङ्गमन्तरमाह—मैत्रेय्यै चेति । न हि मैत्रेयी भर्तरि त्यक्तकर्मणि स्वयंकर्माधिकर्तुमर्हति पतिद्वारमन्तरेण भार्यायास्तदनधिकारात् । यथा च तस्यै कर्मशून्यायै मुक्तेः साधनत्वेन विद्योपदेशात्कर्मत्यागस्तदङ्गत्वेन ध्वनित इत्यर्थः । तत्रैव हेत्वन्तरमाह—वित्तेति । किमहं तेन कुर्यामिति वित्तं निन्द्यते । अतश्च तत्साध्यं कर्म ज्ञानसहायत्वेन मुक्तौ नोपकरोतीत्यर्थः । तदेव विवृणोति—यदि हीति । तन्निन्दावचनमित्यत्र तच्छब्देन वित्तमुच्यते । त्वत्पक्षे वा कथं निन्दावचनमिति तत्राऽऽह—यदि त्विति । किंच ब्राह्मणोऽहं क्षत्रियोऽहमित्याद्यभिमानस्य कर्मानुष्ठाननिमित्तस्य निन्द्या सर्वमिदमात्मैवेति प्रत्यये श्रुतेस्तात्पर्यदर्शनाद्विद्याङ्गत्वेन संन्यासो विधित्सित इत्याह—कर्माधिकारेति । ननु जाग्रदि विधौ कर्मानुष्ठानमशक्यमपहारयितुमत आह—न हीति । ननु वर्णाश्रमाभिमानवतः संन्यासोऽपीष्यते स कथं तदभावे तत्राऽऽह—यस्येवेति । अर्थप्राप्तमेत्यवधारणार्थश्चकारः । प्रयोजकज्ञानवतो वैधसंन्यासाभ्युपगमादविरोध इति भावः । आत्मज्ञानाङ्गत्वं संन्यासस्य श्रुतिस्मृतिन्यायसिद्धं चेत्किमर्थमियमाख्यायिका प्रणीयते तत्राऽऽह—तस्मादिति । विध्यपेक्षितार्थवादसिद्ध्यर्थमाख्यायिकेति भावः ।

१ ग. ज. °त्यादि । न । घ. ङ °त्यादिना । न । २ क. ख. ढ. °ति नि° । ३ घ. ञ. °वे संभवेत्तत्राऽऽ° ।

मैत्रेयीति होवाच याज्ञवल्क्य उद्यास्यन्वा
अरेऽहमस्मात्स्थानादस्मि हन्त तेऽनया
कात्यायन्यान्तं करवाणीति ॥ १ ॥

मैत्रेयीति होवाच याज्ञवल्क्यो मैत्रेयीं[1] स्वभार्यामामन्त्रितवान्याज्ञवल्क्यो नामर्षिः । उद्यास्यन्नूर्ध्वं यास्यन्पारिव्राज्याख्यमाश्रमान्तरं वा अरे इति संबोधनमहमस्मादाहंस्थास्थानादाश्रमादूर्ध्वं गन्तुमिच्छन्नस्मि भवामि । अतो हन्तानुमतिं प्रार्थयामि ते तव । किंचान्यत्ते तवानया द्वितीयया भार्यया कात्यायन्याऽन्तं विच्छेदं करवाणि । पतिद्वारेण युवयोर्मया संबध्यमानयोर्मयः संबन्ध आसीत्तस्य संबन्धस्य विच्छेदं करवाणि द्रव्यविभागं कृत्वा वित्तेन संविभज्य युवां गमिष्यामि ॥ १ ॥

भार्यायामन्यं किं कृतवानिति तदाह—उद्यास्यन्निति । वैशब्दोऽवधारणार्थः । आश्रमान्तरं यास्यन्नेवाहमस्मीति संबन्धः । यथोक्तेच्छानन्तरं भार्यायाः कर्तव्यं दर्शयति—अत इति । सति भार्यादौ संन्यासस्य तदनुज्ञापूर्वकत्वनियमादिति भावः । कर्तव्यान्तरं कथयति—किंचेति । आवयोर्विच्छेदः स्वाभाविकोऽस्ति किं तत्र कर्तव्यमित्याशङ्क्याऽऽह—पतिद्वारेणेति त्वयि प्रव्रजिते स्वयमेवाऽऽवयोर्विच्छेदो भविष्यतीत्याशङ्क्याऽऽह—द्रव्येति । वित्ते तु न स्त्रीस्वातन्त्र्यमिति भावः ॥ १ ॥

सा होवाच मैत्रेयी । यन्नु म इयं भगोः सर्वा
पृथिवी वित्तेन पूर्णा स्यात्कथं तेनामृता स्या-
मिति नेति होवाच याज्ञवल्क्यो यथैवोपकरण-
वतां जीवितं तथैव ते जीवितꣳ स्यादमृतत्वस्य
तु नाऽऽशाऽस्ति वित्तेनेति ॥ २ ॥

सैवमुक्ता होवाच यद्यपि त्विति वितर्के मे ममेयं पृथिवी भगो भगवन्सर्वा सागरमपि क्षिप्त्वा वित्तेन धनेन पूर्णा स्यात्कथं न कथंचनेत्याक्षेपार्थः प्रश्नार्थो वा तेन पृथिवी पूर्णवित्तसाध्येन कर्मणाऽभिहोत्रादिनाऽमृता किं स्यामिति व्यवहितेन संबन्धः । प्रत्युवाच याज्ञव-

---

१ च. ढ. °त्रेयीं । २ क. ख. °यीं स्वां भा° । ३ ञ. ण. भार्यया । ४ क. ख. ग. ङ. च. छ. ज. झ. ढ. °नेति शे° ।

ल्क्यः कथमिति यंत्राक्षेपार्थमनुमोदनं नेति होवाच याज्ञवल्क्य इति । प्रश्नश्चेत्प्रतिवचनार्थं नैव स्या अमृता किं तर्हि यथैव लोक उपकरणवतां साधनवतां जीवितं सुखोपायभोगसंपन्नं तथैव तद्वदेव तव जीवितं स्यादमृतत्वस्य तु नाऽऽशा मनसाऽप्यस्ति वित्तेन चित्तसाध्येन कर्मणेति ॥ २ ॥

मैत्रेयी मोक्षमेवापेक्षमाणा भर्तार प्रत्यानुकूल्यमात्मनो दर्शयति—सेवामिति । कर्मसाध्यस्य गृहप्राप्तादादिवन्नित्यत्वानुपपत्तिराक्षेपानिदानम् । कथंशब्दस्य प्रश्नार्थत्वपक्षे वाक्यं योजनीयम् । वित्तसाध्यस्य कर्मणोऽमृतत्वसाधनत्वमात्रास्तित्वे तत्प्रकारप्रश्नस्य निरवकाशत्वादित्यर्थः । मुनिरपि भार्याहृदयाभिज्ञः संतुष्टः तत्राक्षेपं प्रश्नं च प्रतिषेधतीत्याह—प्रत्युवाचेति । वित्तेन ममामृतत्वाभावे तदकिंचित्करमेवेयमित्याशङ्क्याऽऽह—किं तर्हीति ॥ २ ॥

सा होवाच मैत्रेयी येनाहं नामृता स्यां किमहं
तेन कुर्यां यदेव भगवान्वेद तदेव मे ब्रूहीति ॥ ३ ॥

सा होवाच मैत्रेयी । एवमुक्ता प्रत्युवाच मैत्रेयी यद्येवं[1] येनाहं नामृता स्यां किमहं तेन वित्तेन कुर्यां यदेव भगवान्केवलममृतत्वसाधनं वेद तदेवामृतत्वसाधनं मे मह्यं ब्रूहि ॥ ३ ॥

वित्तस्यामृतत्वसाधनत्वाभावमाधिगम्य तस्मिन्नास्थां त्यक्त्वा मुक्तिसाधनमेवाऽऽत्मज्ञानमात्मार्थं दातुं पतिं नियुञ्जाना ब्रूते—सा होति ॥ ३ ॥

स होवाच याज्ञवल्क्यः प्रिया वतारे नः सती प्रियं
भाषस एह्यास्स्व व्याख्यास्यामि ते व्याचक्षाणस्य
तु मे निदिध्यासस्वेति ॥ ४ ॥

स होवाच याज्ञवल्क्यः । एवं चित्तसाध्येऽमृतत्वसाधने प्रत्याख्याते याज्ञवल्क्यः स्वाभिप्रायसंपत्तौ तुष्ट आह । स होवाच प्रियेष्टा वतेत्यनुकम्प्याऽऽह । अरे मैत्रेयि नोऽस्माकं पूर्वमपि प्रिया सती भवेन्तीदानीं

---

१ क. ख. ग. ङ. च. छ. ज. झ. ढ. यादि क्षे° । २ ख. ग. °खोपभो° । ३ ग. ते। ४ ण. °मनादे° । घ. ञ. °भवसेय° । ५ घ. ङ. च. छ. ज. झ. ढ. °वं नाहं येनामृ° । ६ क. च. ढ. °न वित्तसाध्येन कर्मणा कु° । ७ घ. ण. °न्नाऽऽशां त्य° । ८ ग. च. ढ. °नि ब्रवीतु भगवानिति ॥ ४ ॥ ९ क. ख. ग. घ. झ. ढ. °वतीदा° ।

चित्तानुकूलं भाषसे । अत एह्यास्स्वोपविश व्याख्यास्यामि यत्ते तवेष्टममृतत्वसाधनमात्मज्ञानं कथयिष्यामि । व्याचक्षाणस्य तु मे मम व्याख्यानं कुर्वतो निदिध्यासस्व वाक्यान्यर्थतो निश्चयेन ध्यातुमिच्छेति ॥ ४ ॥

भार्यापेक्षितं मोक्षोपायं विवक्षुस्तामादौ स्तौति—स होत्यादिना । वित्तेन साध्यं कर्म तस्मिन्नमृतत्वसाधने शङ्कित्वे किमहं तेन कुर्यामिति भार्यायाऽपि प्रत्याख्याते सतीति यावत् । स्वाभिप्रायो न कर्म मुक्तिहेतुरिति तस्य भार्याद्वाराऽपि संपत्तौ सत्यामित्यर्थः ॥ ४ ॥

स होवाच न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति । न वा अरे जायायै कामाय जाया प्रिया भवत्यात्मनस्तु कामाय जाया प्रिया भवति । न वा अरे पुत्राणां कामाय पुत्राः प्रिया भवन्त्यात्मनस्तु कामाय पुत्राः प्रिया भवन्ति । न वा अरे वित्तस्य कामाय वित्तं प्रियं भवत्यात्मनस्तु कामाय वित्तं प्रियं भवति । न वा अरे ब्रह्मणः कामाय ब्रह्म प्रियं भवत्यात्मनस्तु कामाय ब्रह्म प्रियं भवति । न वा अरे क्षत्रस्य कामाय क्षत्रं प्रियं भवत्यात्मनस्तु कामाय क्षत्रं प्रियं भवति । न वा अरे लोकानां कामाय लोकाः प्रिया भवन्त्यात्मनस्तु कामाय लोकाः प्रिया भवन्ति । न वा अरे देवानां कामाय देवाः प्रिया भवन्त्यात्मनस्तु कामाय देवाः प्रिया भवन्ति । न वा अरे भूतानां कामाय भूतानि प्रियाणि भवन्त्यात्मनस्तु कामाय भूतानि प्रियाणि भवन्ति । न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवति । आत्मा

वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासि-
तव्यो मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेन
मत्या विज्ञानेनेदꣳ सर्वं विदितम् ॥ ५ ॥

स होवाचामृतत्वसाधनं वैराग्यमुपदिदिक्षुर्जायापतिपुत्रादिभ्यो विरा-
गमुत्पादयति तत्संन्यासाय । न वै । वैशब्दः प्रसिद्धस्मरणार्थः प्रसि-
द्धमेवैतल्लोके । पत्युर्भर्तुः कामाय प्रयोजनाय जायायाः पतिः प्रियो न
भवति किं तर्ह्यात्मनस्तु कामाय प्रयोजनायैव भार्यायाः पतिः प्रियो
भवति । तथा न वा अरे जायाया इत्यादि समानमन्यत् । न वा अरे
पुत्राणाम् । न वा अरे वित्तस्य । न वा अरे ब्रह्मणः । न वा अरे क्ष-
त्रस्य । न वा अरे लोकानाम् । न वा अरे देवानाम् । न वा अरे भू-
तानाम् । न वा अरे सर्वस्य । पूर्वं पूर्वं यथासन्नं प्रीतिसाधने वचनम् ।
तत्र तत्रेष्टतरत्वाद्वैराग्यस्य सर्वग्रहणमुक्तानुक्तार्थम् । तस्माल्लोकप्रसि-
द्धमेतदात्मैव प्रियो नान्यत् । तदेतत्प्रेयः पुत्रादित्युपन्यस्तं तस्यैतद्व्य-
क्तिस्थानीयं प्रपञ्चितम् । तस्मादात्मप्रीतिसाधनत्वाद्धेय्यन्यत्र प्रीतिरा-
त्मन्येव मुख्या । तस्मादात्मा वा अरे द्रष्टव्यो दर्शनार्हो दर्शनविषय-
मापादयितव्यः श्रोतव्यः पूर्वमाचार्यत आगमतश्च । पश्चान्मन्तव्यस्त-
र्कतः । ततो निदिध्यासितव्यो निश्चयेन ध्यातव्यः । एवं ह्यसौ दृष्टो
भवति श्रवणमननानिदिध्यासनसाधनैर्निर्वर्तितैः । यदैकत्वमेतान्युपग-
तानि तदा सम्यग्दर्शनं ब्रह्मैकत्वविषयं प्रसीदति नान्यथा श्रवणमात्रेण-
ण । यद्ब्रह्मक्षत्रादि कर्मनिमित्तं वर्णाश्रमादिलक्षणमात्मन्यविद्याध्यारो-
पितप्रत्ययविषयं क्रियाकारकफलात्मकमविद्याप्रत्ययविषयं रज्ज्वामिव
सर्पप्रत्ययस्तदुपमर्दनार्थमाह—आत्मनि खल्वरे मैत्रेयि दृष्टे श्रुते मते
विज्ञात इदं सर्वं विदितं विज्ञातं भवति ॥ ५ ॥

---

१ च. °वाच याज्ञवल्क्योऽम्° । २ च. ढ. °भ्यो वैराग्यमु° । ३ ग. घ. ङ. च. छ. ज. झ. °मेत° । ४ स. °पञ्चनम् । ५ ग. घ. च. छ. ज. झ. °र्शन° । ६ क. ख. ग. घ. छ. ज. °विषयाऽध्या° । ७ क. ख. ग. ङ. च. छ. झ. ट. °रोपणप्र° । ८ क. च ङ. छ. ज. झ. °मर्थं° । ९ क. ख. ङ. छ. झ. °तं म° ।

अमृतत्वसाधनमात्मज्ञानं विवक्षितं चेदात्मा वा अरे द्रष्टव्य इत्यादि वक्तव्यं किमिति न वा अरे पत्युरित्यादि वाक्यमित्याशङ्क्याऽऽह—जायेति। उवाच जायादीनामात्मार्थत्वेन प्रियत्वमात्मनश्चानौपाधिकप्रियत्वेन परमानन्दत्वमिति शेषः। प्रतीकमादाय व्याचष्टे—न वा इति। किं तन्निपातेन स्मार्यते तदाह—प्रसिद्धमिति। यथोक्ते क्रमे नियामकमाह—पूर्वं पूर्वमिति। यद्यदासन्नं प्रीतिसाधनं तत्तदनतिक्रम्य तस्मिन्विषये पूर्वं पूर्वं वचनमिति योजना। तत्र हेतुमाह—तत्रेति। न वा अरे सर्वस्येत्ययुक्तं पत्यादीनामुक्तत्वादंशेन पुनरुक्तिप्रसङ्गादित्याशङ्क्याऽऽह—सर्वग्रहणमिति। उक्तवदनुक्तानामपि ग्रहणं कर्तव्यं न च सर्वे विशेषतो ग्रहीतुं शक्यन्ते तेन सामान्यार्थं सर्वपदमित्यर्थः। सर्वपर्यायेषु सिद्धमर्थमुपसंहरति—तस्मादिति। ननु तृतीये प्रियत्वमात्मन आख्यातं तदेवात्रापि कथ्यते चेत्पुनरुक्तिः स्यात्तत्राऽऽह—तदेतदिति। अंशोपन्यासविवरणाभ्यां प्रीतिरात्मन्येवेत्ययुक्तं पुत्रादावपि तद्दर्शनादत आह—तस्मादिति। आत्मनो निरतिशयप्रीत्यास्पदत्वेन परमानन्दत्वमभिधायोत्तरवाक्यमादाय व्याचष्टे—तस्मादित्यादिना। कथं पुनरिदं दर्शनमुत्पद्यते तत्राऽऽह—श्रोतव्य इति। श्रवणादीनामन्यतमेनाऽऽत्मज्ञानलाभात्किमिति सर्वेषामध्ययनमित्याशङ्क्याऽऽह—एवं हीति। विध्यनुसारित्वमेवंशब्दार्थः। श्रुतत्वादिविशेषादिकल्पहेत्वभावाच्च सर्वेरेवाऽऽत्मज्ञानं जायते चेत्तेषां समप्रधानत्वमाग्नेयादिवदापतेदित्याशङ्क्याऽऽह—यदेति। श्रवणस्य प्रमाणविचारत्वेन प्रधानत्वादाङ्गित्वं मननानिदिध्यासनयोस्तु तत्कार्यप्रतिबन्धप्रध्वंसित्वादङ्गत्वमित्यङ्गाङ्गिभावेन यदा श्रवणादीन्यसकृदनुष्ठानेन समुच्चितानि तदा सामग्रीपौष्कल्यात्तत्त्वज्ञानं फलशिरस्कं सिध्यति। मनन्नाद्यभावे श्रवणमात्रेण नैव तदुत्पद्यते। मननादिना प्रतिबन्धाप्रध्वंसे वाक्यस्य फलवज्ज्ञानजनकत्वायोगादित्यर्थः। परामर्शवाक्यस्य तात्पर्यमाह—यदित्यादिना। कर्मनिमित्तं ब्रह्मक्षत्रादि तदेव वर्णाश्रमावस्थादिरूपमात्मन्यविद्ययाऽध्यारोपितस्य प्रत्ययो मिथ्याज्ञानं तस्य विषयतया स्थितं क्रियाद्यात्मकं तदुपमर्दनार्थमाहेति संबन्धः। अविद्याध्यारोपितप्रत्ययमित्येतदेव व्याकरोति—अविद्येति। अविद्याजनितप्रत्ययविषयत्वे दृष्टान्तमाह—रज्ज्वामिति।

ब्रह्म तं परादाद्योऽन्यत्राऽऽत्मनो ब्रह्म वेद क्षत्रं तं परादाद्योऽन्यत्राऽऽत्मनः क्षत्रं वेद लोकास्तं परादु-

---

१ घ. ञ. ण. °त्मनो व्याख्या°। २ घ. ञ. अथाप्युप°। ३ क. ख. ट. ध्वंसिवा°। ४ ख. °विद्यारो°। ५ क. ढ. °याऽऽरो°।

योऽन्यत्राऽऽत्मनो लोकान्वेद देवास्तं परादुर्योऽन्यत्राऽऽत्मनो देवान्वेद भूतानि तं परादुर्योऽन्यत्राऽऽत्मनो भूतानि वेद सर्वं तं परादाद्योऽन्यत्राऽऽत्मनः सर्वं वेदेदं ब्रह्मेदं क्षत्रमिमे लोका इमे देवा इमानि भूतानीदꣳ सर्वं यदयमात्मा ॥ ६ ॥

ननु कथमन्यस्मिन्विदितेऽन्यद्विदितं भवति । नैष दोषः । न ह्यात्मव्यतिरेकेणान्यत्किंचिदस्ति । यद्यस्ति न तद्विदितं स्यान्न त्वेन्यदस्त्यात्मैव तु सर्वम् । तस्मात्सर्वमात्मनि विदिते विदितं स्यात् । कथं पुनरात्मैव सर्वमित्येतच्छावयति । ब्रह्म ब्राह्मणजातिस्तं पुरुषं परादात्परादध्यात्पराकुर्यात् । कं, योऽन्यत्राऽऽत्मन आत्मस्वरूपव्यतिरेकेणाऽऽत्मैव न भवतीयं ब्राह्मणजातिरिति तां यो वेद तं परादध्यात्सा ब्राह्मणजातिरनात्मस्वरूपेण मां पश्यतीति । परमात्मा हि सर्वेषामात्मा । तथा क्षत्रं क्षत्रियजातिस्तथा लोका देवा भूतानि सर्वमिदं ब्रह्मेति यान्यनुक्रान्तानि तानि सर्वाण्यात्मैव यदयमात्मा योऽयमात्मा द्रष्टव्यः श्रोतव्य इति प्रकृतः । यस्मादात्मनो जायत आत्मन्येव लीयत आत्ममयं च स्थितिकाल आत्मव्यतिरेकेणाग्रहणादात्मैव सर्वम् ॥६॥

आत्मनि विदिते सर्वं विदितमित्युक्तमाक्षिपति—नान्विति । दृष्टि (ष्ट) विरोधं निराचष्टे—नैष दोष इति । आत्मनि ज्ञाते ज्ञातमेव सर्वं ततोऽर्थान्तरस्याभावादित्युक्तमेव स्फुटयति—यदीत्यादिना । आकाङ्क्षापूर्वकमुत्तरवाक्यमुदाहृत्य व्याचष्टे—कथमित्यादिना । पुरुषं विशेषतो ज्ञातुं प्रश्नमुपन्यस्य प्रतीकं गृहीत्वा व्याकरोति—कमित्यादिना । पराकरणे पुरुषस्यापराधित्वं दर्शयति—अनात्मेति । परमात्मातिरेकेण दृश्यमानामपि ब्राह्मणजातिं स्वस्वरूपेण पश्यन्कथमपराधी स्यादित्याशङ्क्याऽऽह—परमात्मेति । इदं ब्रह्मेत्युत्तरवाक्यानुवादस्तस्य व्याख्यानं यान्यनुक्रान्तानीत्यादि । आत्मैव सर्वमित्येतत्प्रतिपादयति—यस्मादित्यादिना । स्थितिकाले तिष्ठति तस्मादात्मैव सर्वं तद्व्यतिरेकेणाग्रहणादिति योजना ॥ ६ ॥

स यथा दुन्दुभेर्हन्यमानस्य न बाह्याञ्शब्दा-

---

१ ग. च. छ. झ. ढ. °त्वस्त्या° । २ ग. घ. ज. °मात्मैव हि । ३ क. घ. ङ. छ. ज. झ. यावन्त्यत्र प्रक्रान्तानि यान्यनुक्तानि ता° । च. ढ. यावन्त्यत्र प्रकृतानि यान्यनुक्तानि ता° । ४ च. ढ. °केण ग्रहणाभावादा° । ५ ण. यावन्त्यनु° ।

ऊशकनुयाद्ग्रहणाय दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघा-
तस्य वा शब्दो गृहीतः ॥ ७ ॥

कथं पुनरिदानीमिदं सर्वमात्मैवेति ग्रहीतुं शक्यते । चिन्मात्रानु-
गमात्सर्वत्र चित्स्वरूपतैवेति गम्यते । तत्र दृष्टान्त उच्यते । यत्स्वरू-
पव्यतिरेकेणाग्रहणं यस्य तस्य तदात्मत्वमेव लोके दृष्टम् । स यथा
स इति दृष्टान्तो लोके यथा दुन्दुभर्भेर्यादेर्हन्यमानस्य ताड्यमानस्य
दण्डादिना न बाह्याञ्छब्दान्बहिर्भूताञ्छब्दविशेषान्दुन्दुभिशब्दसामा-
न्यान्निष्कृष्टान्दुन्दुभिशब्दविशेषान्न शकनुयाद्ग्रहणाय ग्रहीतुम् । दुन्दु-
भेस्तु ग्रहणेन दुन्दुभिशब्दसामान्यविशेषत्वेन दुन्दुभिशब्दा एत इति
शब्दविशेषा गृहीता भवन्ति । दुन्दुभिशब्दसामान्यव्यतिरेकेणाभावा-
त्तेषाम । दुन्दुभ्याघातस्य वा दुन्दुभेराहननमाघातो दुन्दुभ्याघातविशि-
ष्टस्य शब्दसामान्यस्य ग्रहणे तद्वता विशेषा गृहीता भवन्ति । न तु
त एव निर्भिद्य ग्रहीतुं शक्यन्ते विशेषरूपेणाभावात्तेषाम् । तथा प्रज्ञा-
नव्यतिरेकेण स्वप्नजागरितयोर्न कश्चिद्वस्तुविशेषो गृह्यते । तस्मा-
त्प्रज्ञानव्यतिरेकेणाभावो युक्तस्तेषाम् ॥ ७ ॥

स्थित्यवस्थायां सर्वस्याऽऽत्ममात्रत्वं ज्ञातुमशक्यं ज्ञापकाभावादित्याक्षिपति—
कथं पुनरिति । घटः स्फुरतीत्यादिप्रत्ययमाश्रित्य परिहरति—चिन्मात्रेति ।
स यथा दुन्दुभेरित्यादि वाक्यमवतारयति—तत्रेति । सर्वत्र चिदतिरेकेणासत्त्वं
सप्तम्यर्थः। दृष्टान्ते विवक्षितं संक्षिपति—यत्स्वरूपेति । दुन्दुभिदृष्टान्तमादायाक्षराणि
व्याचष्टे—स यथेत्यादिना । शब्दविशेषानेव विशदयति—दुन्दुभीति । कथं
तर्हि दुन्दुभिशब्दविशेषाणां ग्रहणं तदाह—दुन्दुभेस्त्विति । दुन्दुभिशब्दसामा-
न्यस्येति यावत् । उक्तेऽर्थे दुन्दुभ्याघातस्येत्यादिवाक्यमुत्थाप्य व्याचष्टे—दुन्दु-
भ्याघातस्येति । वाशब्दार्थमाह—तद्वता विशेषा इति । उक्तमर्थं व्यतिरेक-
मुखेन विशदयति—न त्विति । विवक्षितं दार्ष्टान्तिकमाचष्टे—तथेति । तत्रैव
वस्तुविशेषग्रहणसंभावनामभिप्रेत्य स्वप्नजागरितयोरित्युक्तम् ॥ ७ ॥

स यथा शङ्खस्य ध्मायमानस्य न बाह्याञ्छब्दा-
ञ्शकनुयाद्ग्रहणाय शङ्खस्य तु ग्रहणेन शङ्ख-
ध्मस्य वा शब्दो गृहीतः ॥ ८ ॥

---

१ ग. °केण न ग्र° । २ ग. घ. ज. °न्तो यथा लोके दु° । ३ क. ख. ग. ङ. छ. झ. श° । ४ ग. ङ. विभज्य । ५ झ. °नघनव्य° । ६ ज. ढ. °नघनव्य° ।

तथा स यथा शङ्खस्य ध्मायमानस्य शब्देन संयोज्यमानस्याऽऽपूर्यमाणस्य न बाह्याञ्छब्दाञ्शक्नुयादित्येवमादि पूर्ववत् ॥ ८ ॥

तथा दुन्दुभिदृष्टान्तवदिति यावत् । शङ्खस्य तु ग्रहणेनेत्यादिवाक्यमादिशब्दार्थः । दुन्दुभेस्तु ग्रहणेनेत्यादिवाक्यं दृष्टान्तयति-पूर्ववदिति ॥ ८ ॥

स यथा वीणायै वाद्यमानायै न बाह्याञ्शब्दाञ्शक्नुयाद्ग्रहणाय वीणायै तु ग्रहणेन वीणावादस्य वा शब्दो गृहीतः ॥ ९ ॥

तथा वीणायै वाद्यमानायै वीणाया वाद्यमानायाः । अनेकदृष्टान्तोपादानमिह सामान्यबहुत्वख्यापनार्थम् । अनेके हि विलक्षणाश्चेतनाचेतनरूपाः सामान्यविशेषाः तेषां पारम्पर्यगत्या यथैकस्मिन्महासामान्येऽन्तर्भावः प्रज्ञानघने कथं नाम प्रदर्शयितव्य इति दुन्दुभिशङ्खवीणाशब्दसामान्यविशेषाणां यथा शब्दत्वेऽन्तर्भावः । एवं स्थितिकाले तावत्सामान्यविशेषाव्यतिरेकाद्ब्रह्मैकत्वं शक्यमवगन्तुम् ॥ ९ ॥

तथेति दृष्टान्तद्वयपरामर्शः । एकेनैव दृष्टान्तेन विवक्षितार्थसिद्धौ किमित्यनेकदृष्टान्तोपादानमित्याशङ्क्याऽऽह-अनेकेति । इहेति जगदुच्यते श्रुतिर्वा । सामान्यबहुत्वमेव स्फुटयति-अनेके हीति । तेषां स्वस्वसामान्येऽन्तर्भावेऽपि कुतो ब्रह्मणि पर्यवसानमित्याशङ्क्याऽऽह-तेषामिति । कथमित्यस्मात्पूर्वं तथेत्यध्याहारः । इति मन्यते श्रुतिरिति शेषः । विमतं नाऽऽत्मातिरेकि तदतिरेकेणागृह्यमाणत्वाद्यद्यदतिरेकेणागृह्यमाणं तत्तदतिरेकि न भवति यथा दुन्दुभ्यादिशब्दास्तत्सामान्यातिरेकेणागृह्यमाणास्तदतिरेकेण न सन्तीत्यनुमानं विवक्षन्नाह-दुन्दुभीति । शब्दत्वेऽन्तर्भावस्तथा प्रज्ञानघने सर्वं जगदन्तर्भवतीति शेषः । दृष्टान्तत्रयमवष्टभ्य निष्टङ्कितमर्थमुपसंहरति-एवमिति ॥ ९ ॥

स यथाऽऽर्द्रेधाग्नेरभ्याहितात्पृथग्धूमा विनिश्चरन्त्येवं वा अरेऽस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानान्यस्यैवैतानि निःश्वसितानि ॥ १० ॥

---

१ क. ङ. च. छ. ज. झ. ढ. °र्भावस्तथा प्र° । क. ग. छ. ज. °त्वे । ए° । २ क. च, ढ. °नि सर्वाणि नः° ।

एवमुत्पत्तिकाले प्रागुत्पत्तेर्ब्रह्मेवेति शक्यमवगन्तुम् । यथाऽग्नेर्विस्फुलिङ्गधूमाङ्गारार्चिषां प्राग्विभागादग्निरेवेति भवत्यग्न्येकत्वमेवं जगन्नामरूपविकृतं प्रागुत्पत्तेः प्रज्ञानघन एवेति युक्तं ग्रहीतुमित्येतदुच्यते । मयथाऽऽर्द्रेधाग्नेरार्द्रेरधोभिरिद्धोऽग्निस्तस्मादभ्याहितात्पृथग्धूमाः पृथग्नामाप्रकारं धूमग्रहणं विस्फुलिङ्गादिप्रदर्शनार्थं धूमविस्फुलिङ्गादयो विनिश्चरन्ति विनिर्गच्छन्ति । एवं यथाऽयं दृष्टान्तः । अरे मैत्रेय्यस्य परमात्मनः प्रकृतस्य महतो भूतस्य निःश्वसितमेतन्निःश्वसितमिव निःश्वसितम् । यथाऽप्रयत्नेनैव पुरुषनिःश्वासो भवत्येवं वा अरे । किं तन्निः श्वसितमिव ततो जातमित्युच्यते यद्ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरसश्चतुर्विधं मन्त्रजातमितिहास इत्युर्वशीपुरूरवसोः संवादादिरुर्वशी हाप्सरा इत्यादि ब्राह्मणमेव । पुराणमसद्वा इदमग्र आसीदित्यादि । विद्या देवजनविद्या वेदः सोऽयमित्याद्या । उपनिषदः प्रियमित्येतदुपासीतेत्याद्याः । श्लोका ब्राह्मणप्रभवा मन्त्रास्तदेते श्लोका इत्यादयः । सूत्राणि वस्तुसंग्रहवाक्यानि वेदे यथाऽऽत्मेत्येवोपासीतेत्यादीनि । अनुव्याख्यानानि मन्त्रविवरणानि । व्याख्यानान्यर्थवादाः अथवा वस्तुसंग्रहवाक्यविवरणान्यनुव्याख्यानानि । यथा चतुर्थाध्याय आत्मेत्येवोपासीतेत्यस्य यथा वाऽन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुरेवमित्यस्यायमेवाध्यायशेषः । मन्त्रविवरणानि व्याख्यानानि । एवमष्टविधं ब्राह्मणम् ।

स यथाऽऽर्द्रेधाग्नेरित्यादिवाक्यस्य तात्पर्यमाह—एवमित्यादिना । स्थितिकालवदित्येवंशब्दार्थः । तत्र वाक्यमवतार्य व्याचष्टे—इत्येतादिति । महतोऽनवच्छिन्नस्य भूतस्य परमार्थस्येति यावत् । निःश्वसितमिवेत्युक्तं व्यनक्ति—यथेति अरे मैत्रेयि ततो जातमिति शेषः । तदेवाऽऽकाङ्क्षापूर्वकं विशदयति—किं तादित्यादिना । इतिहास इति ब्राह्मणमेवेति संबन्धः । संवादादिरित्यादिपदेन प्राणसंवादादिग्रहणम् । असद्वा इदमग्र आसीदित्यादीत्यत्राऽऽदिशब्देनासदेवेदमग्र आसीदिति गृह्यते । देवजनविद्या नृत्यगीतादिशास्त्रम् । वेदः सोऽयं वेदाद्बहिर्न भवतीत्यर्थः । इत्याद्या विद्येति संबन्धः । आदिशब्दः शिल्पशास्त्रसंग्रहार्थः । प्रियमित्येतदुपासीतेत्याद्या इत्यत्राऽऽदिशब्दः सत्यस्य सत्यमित्युपनिषत्संग्रहार्थः ।

---

१ घ. ङ. °कारा धू° । २ क. ख. ग. ङ. च. छ. झ. ढ. °निर्ग° । ३ घ. च. °त्येनदु° । ४ ख. छ. ज. °था चान्यो° । ५ क. ख. ञ. ढ. ण. संबन्धः । ६ घ. ण. °दित्यादि ग्र° । ७ घ. °त्येनद्° ।

तदेते श्लोका इत्यादिम इत्यत्राऽऽदिशब्देन तदप्येष श्लोको भवति । असन्नेव स भवतीत्यादि गृह्यते । इत्यादीनीत्यादिपदमथ योऽन्यां देवतामुपास्ते ब्रह्मवेदाप्नोति परमित्यादि ग्रहीतुम् । अर्थवादेषु व्याख्यानपदप्रवृत्तौ हेत्वभावं शङ्कित्वा पक्षान्तरमाह—अथवेति । इतिहासादिशब्दव्याख्यानपमुसंहरति—एवमिति । ब्राह्मणमितिहासादिपदवेदनीयमिति शेषः ।

एवं मन्त्रब्राह्मणयोरेव ग्रहणम् । नियतरचनावतो विद्यमानस्यैव वेदस्याभिव्यक्तिः पुरुषनिःश्वासवन्न च पुरुषबुद्धिप्रयत्नपूर्वकः । अतः प्रमाणं निरपेक्ष एव स्वार्थे तस्माद्यत्तनाक्तं तत्तथैव प्रतिपत्तव्यमात्मनः श्रेय इच्छद्भिर्ज्ञानं वा कर्म वेति । नामप्रकाशवशा हि रूपस्य विक्रियाव्यवस्था । नामरूपयोरेव हि परमात्मोपाधिभूतयोर्व्याक्रियमाणयोः सलिलफेनवत्तत्त्वान्यत्वेनानिर्वक्तव्ययोः सर्वावस्थयोः संसारत्वमित्यतो नाम्न एव निःश्वसितत्वमुक्तम् । तद्वचनेनेतरस्य निःश्वसितत्वसिद्धेः । अथवा सर्वस्य द्वैतजातस्याविद्याविषयत्वमुक्तं ब्रह्मैतं परादादिदं सर्वं यदयमात्मेति । तत्र वेदस्याप्रामाण्यमाशङ्क्य तदाशङ्कानिवृत्त्यर्थमिदमुक्तं पुरुषनिःश्वासवदप्रयत्नोत्थितत्वात्प्रमाणं वेदो न यथाऽन्यो ग्रन्थ इति ॥ १० ॥

ऋगादिशब्दानामितिहासादिशब्दानां च प्रसिद्धार्थत्यागे को हेतुरित्याशङ्क्य निःश्वसितश्रुतिरितिहासादिशब्दानां प्रसिद्धार्थत्यागे हेतुः पारिशेष्यस्त्वन्यत्रेत्याभिप्रेत्याऽऽह—एवं मन्त्रेति । ननु प्रथमे काण्डे वेदस्य नित्यत्वेन प्रामाण्यं स्थापितं तदनित्यत्वे तद्धानिरित्यत आह—नियतेति । नियतेत्यादौ वेदो विशेष्यते । कल्पान्तेऽन्तर्हितान्वेदानित्यादिवाक्यान्नियतरचनावत्त्वं वेदस्य गम्यते । अनादिनिधनो इत्यादेश्च सदातनत्वं तस्य निश्चीयते । न च कृतकत्वादप्रामाण्यं प्रत्यक्षादौ व्यभिचारात् । न च पौरुषेयत्वादनपेक्षत्वहेत्वभावादप्रामाण्यम् । बुद्धिपूर्वप्रणीतत्वाभावेन तत्सिद्धेः । न चोन्मत्तवाक्यसादृश्यमबाधितार्थत्वादिति भावः सिद्धे वेदस्य प्रामाण्ये फलितमाह—तस्मादिति । नामप्रपञ्चसृष्टिरवान्तरोपादिष्टा न रूपप्रपञ्चसृष्टिः सा चोपदेष्टव्या सृष्टिपरिपूर्तेरन्यथाऽनुपपत्तेरित्याशङ्क्याऽऽह—नामेति । यद्यपि नामतन्त्रा रूपसृष्टिरिति नामसृष्टिवचनेन रूपसृष्टिरर्थादुक्ता तथाऽपि सर्वसंसारसृष्टेर्नोक्ता नामरूपयोरेव संसारत्वे प्राक्तसृष्टेः संसारो न स्यादित्याशङ्क्याऽऽह—नामरूपयोरिति । सर्वावस्थयोर्व्यक्ताव्यक्तावस्थयोरिति

१ झ. °नं कर्म चेति । २ ख. च. छ. ढ. °शाद्धि रू° । ३ ख. °याव° । घ. ज. °शम् चेत । त° । ५ ख. घ. ढ. विशिष्य° । ६ क. ख. °नात्यादे° । ७ ण. सना त° ।

यावत् । नामरूपञ्चस्यैवात्र सर्गोक्तिमुपपादितामुपसंहरति—इतीति । अतःशब्दार्थं स्फुटयति—तद्वचनेनेति । निःश्वसितश्रुतिं विद्यान्तरेणावतारयति—अथवेत्यादिना । मिथ्यात्वेऽपि प्रतिबिम्बवत्प्रामाण्यसंभवादुन्मत्तादिवाक्यानां च मिथ्याज्ञानाधीनप्रयत्नजन्यत्वेनाप्रामाण्यादद्वैतस्य तदभावाद्विषयाव्यभिचाराच्च नाप्रामाण्यमित्याह—तदाशङ्केति । अन्यो ग्रन्थो बुद्धादिवर्णितः स्वर्गकामश्चैत्यं वन्देतेत्यादिः ॥ १० ॥

स यथा सर्वासामपाꣳ समुद्र एकायनमेवꣳ सर्वेषाꣳ स्पर्शानां त्वगेकायनमेवꣳ सर्वेषां गन्धानां नासिके एकायनमेवꣳ सर्वेषांꣳ रसानां जिह्वैकायनमेवꣳ सर्वेषाꣳ रूपाणां चक्षुरेकायनमेवꣳ सर्वेषाꣳ शब्दानाꣳ श्रोत्रमेकायनमेवꣳ सर्वेषाꣳ संकल्पानां मन एकायनमेवꣳ सर्वासां विद्यानाꣳ हृदयमेकायनमेवꣳ सर्वेषां कर्मणाꣳ हस्तावेकायनमेꣳ सर्वेषामानन्दानामुपस्थ एकायनमेवꣳ सर्वेषां विसर्गाणां पायुरेकायनमेवꣳ सर्वेषावध्वना पादावेकायनमेवꣳ सर्वेषां वेदानां वागेकायनꣳ ॥ ११ ॥

किंचान्यन्न केवलं स्थित्युत्पत्तिकालयोरेव प्रज्ञानव्यतिरेकेणाभावाज्जगतो ब्रह्मत्वं प्रलयकाले च जलबुद्बुदफेनादीनामिव सालिलव्यतिरेकेणाभावः । एवं प्रज्ञानव्यतिरेकेण तत्कार्याणां नामरूपकर्मणां तस्मिन्नेव लीयमानानामभावः । तस्मादेकमेव ब्रह्म प्रज्ञानघनमेकरसं प्रतिपत्तव्यमित्यत आह । प्रलयप्रदर्शनाय दृष्टान्तः स इति दृष्टान्तो यथा येन प्रकारेण सर्वासां नदीवापीतडागादिगतानामपां समुद्रोऽब्धिरेकायनमेकगमनमेकप्रलयोऽविभागप्राप्तिरित्यर्थः । यथाऽयं दृष्टान्त एवं सर्वेषां स्पर्शानां मृदुकर्कशकठिनपिच्छिलादीनां वायोरात्मभूतानां त्वगेकायनं त्वगिति त्वग्विषयं स्पर्शसामान्यमात्रं

---

१ क. ख. ग. ङ. छ. ज. ट. ठ. ढ. °र्वेषाꣳ रसानां जिह्वैकायनमेवꣳ सर्वेषां गन्धाना नासिके एकायनमेꣳ सर्वेषाꣳ रू° । २ क. ज. °नघनव्य° । ३ च. °नघनव्य° । ४ ग. घ. ङ. च. ज. झ. ढ. °स्मिँछीय° । ५ ख. ङ. च. ज. झ. ढ. °यद° । ६ झ. ढ. °ति य° ।

तस्मिन्प्रविष्टाः स्पर्शविशेषा आप इव समुद्रं तद्व्यतिरेकेणाभावभूता भवन्ति । तस्यैव हि ते संस्थानमात्रा आसन् ।

स यथा सर्वासामपामित्यादिसमनन्तरग्रन्थमुत्थापयति—किंचान्यादिति। तदेव व्याकरोति—न केवलमिति । प्रलयकाले च प्रज्ञानव्यतिरेकेणाभावाज्जगतो ब्रह्मत्वमिति संबन्धः । उक्तमर्थं दृष्टान्तेन स्पष्टयति—जलेति । तथाऽपि प्रज्ञानमेवैकमेवं स्याच्च ब्रह्मेत्याशङ्क्याऽऽह—तस्मादिति । सत्यज्ञानादिवाक्याद्ब्रह्मणस्तन्मात्रत्वादित्यर्थः । यथोक्तं ब्रह्म चेत्प्रतिपत्तव्यं किमिति तर्हि स यथेत्यादि वाक्यमित्याशङ्क्य तच्छेषत्वेन प्रलयं दर्शयितुं दृष्टान्तवचनमेतादित्याह—अंत आहेति । प्रलीयतेऽस्मिन्निति प्रलय एकश्चासौ प्रलयश्चेत्येकप्रलयः । तडागादिगतानामपां कुतः समुद्रे लयो न हि तासां तेन संगतिरित्याशङ्क्याऽऽह—अविभागेति । अत्र हि समुद्रशब्देन जलसामान्यमुच्यते । तद्व्यतिरेकेण च जलविशेषाणामभावो विवक्षितस्तेषां तत्संस्थानमात्रत्वादतश्चाऽऽसामस्मिन्नविभागस्य प्राप्तिरिति समुद्रेऽविभागप्राप्तिरित्यर्थः । पिच्छिलादीनामित्यादिशब्देनानुक्तस्पर्शविशेषाः सर्वे गृह्यन्ते । विषयाणामिन्द्रियकार्यत्वाभावात्कुतः स्पर्शानां त्वचि विलयः स्यादित्याशङ्क्याऽऽह—त्वगिति । स्पर्शविशेषाणां स्पर्शसामान्येऽन्तर्भावं प्रपञ्चयति—तास्मिन्निति ।

तथा तदपि स्पर्शसामान्यमात्रं त्वक्शब्दवाच्यं मनःसंकल्पे मनोविषयसामान्यमात्रे त्वग्विषय इव स्पर्शविशेषाः प्रविष्टं तद्व्यतिरेकेणाभावभूतं भवति । एवं मनोविषयोऽपि बुद्धिविषयसामान्यमात्रे प्रविष्टस्तद्व्यतिरेकेणाभावभूतो भवति । विज्ञानमात्रमेव भूत्वा प्रज्ञानघने परे ब्रह्मण्याप इव समुद्रे प्रलीयते । एवं परम्पराक्रमेण शब्दादौ सह ग्राहकेण प्रलीने प्रधानघन उपाध्यभावात्सैन्धवघनवदज्ञानघनमेकरसमनन्तमपारं निरन्तरं ब्रह्म व्यवतिष्ठते । तस्मादात्मैवैकमद्वयमिति प्रतिपत्तव्यम् ।

तथाऽपि समस्तस्य जगतो ब्रह्मव्यतिरेकेणाभावाद्ब्रह्मत्वमित्येतत्कथं प्रतिज्ञातमित्याशङ्क्य परम्परया ब्रह्मणि सर्वप्रविलयं दर्शयितुं क्रममनुक्रामति—तथेति । मनसि सति विषयविषयिभावस्य दर्शनादसति चादर्शनान्मनःस्पन्दितमात्रं विषयजातमिति तस्य तद्विषयमात्रे प्रविष्टस्य तदतिरेकेणासत्त्वमित्यर्थः । संकल्पविकल्पात्म-

---

१ ग. °ज्ञानैक्यं न्या° । २ घ. °वैकं स्या° । ३ घ. ण. इत्यत । ४ घ. °वोऽभिप्रेत° । ५ क. ख. च. छ. ज. झ. ढ. °न्तरय° । ६ स. °रञ्जनं ब्र° । ७ घ. ण. °प्रल° ।

कपनःस्पन्दितद्वैतस्य संकल्पात्मके मनस्यन्तर्भावात्तस्य च संकल्पस्याध्यवसायात्मकत्वदर्शनादध्यवसायात्मिकायां च बुद्धौ तद्विषयस्य पूर्ववदनुप्रवेशान्मनोविषयसामान्यस्य बुद्धिविषयसामान्ये प्रविष्टस्य तद्व्यतिरेकेणासत्त्वमित्याह—एवमिति। सर्वं जगदुक्तेन न्यायेन बुद्धिमात्रं भूत्वा तद्यच्छेच्छान्त आत्मनीति श्रुत्या ब्रह्मणि पर्यवस्यतीत्याह—विज्ञानमात्रमिति । ननु जगदिदं विलीयमानं शक्तिशेषमेव विलीयते । तत्त्वज्ञानादृते तस्य निःशेषनाशानाश्रयणात् । तथा च कुतो ब्रह्मैकरसस्य प्रतिपत्तिरत आह—एवमिति । शक्तिशेषलयेऽपि तस्या दुर्निरूपत्वाद्ब्रह्मैकरसस्य धीरविरुद्धेति भावः। एकायनप्रक्रियातात्पर्यमुपसंहरति—तस्मादिति। घ्राणविषयसामान्यमित्यादावेकायनमिति सर्वत्र संबन्धः ।

तथा सर्वेषां गन्धाना पृथिवीविशेषाणां नासिके घ्राणविषयसामान्यम् । तथा सर्वेषां रसानामब्विशेषाणां जिह्वेन्द्रियविषयसामान्यम् तथा सर्वेषां रूपाणा तेजोविशेषाणां चक्षुश्चक्षुर्विषयसामान्यम् । तथा शब्दाना श्रोत्रविषयसामान्यं पूर्ववत् । तथा क्षोत्रादिविषयसामान्यानां मनोविषयसामान्ये संकल्पे । मनोविषयसामान्यस्यापि बुद्धिविषयसामान्ये विज्ञानमात्रे । विज्ञानमात्रं भूत्वा परस्मिन्प्रज्ञानघने प्रलीयते तथा कर्मेन्द्रियाणां विषया वदनादानगमनविसर्गानन्दविशेषास्तत्तत्क्रियासामान्येष्वेव प्रविष्टा न विभागयोग्या भवन्ति समुद्र इवाब्धिशेषाः । तानि च सामान्यानि प्राणमात्रं प्राणश्च प्रज्ञानमात्रमेव । "यो वै प्राणः सा प्रज्ञा या वै प्रज्ञा स प्राणः" इति कौषीतकिनोऽधीयते ।

कथं पुनरत्र प्रतिपर्यायं ब्रह्मणि पर्यवसानं तत्राऽऽह—तथेति । यथा सर्वेषु पर्यायेषु ब्रह्मणि पर्यवसानं तथोच्यत इति यावत् । पूर्ववदिति त्वग्विषयसामान्यवदित्यर्थः । संकल्पे लय इति शेषः । विज्ञानमात्र इत्यत्रापि तथैव । एवं सर्वेषां कर्मणामित्यादेरर्थमाह—तथा कर्मेन्द्रियाणामिति । क्रियासामान्यानां सूत्रात्मसंस्थानभेदत्वमभ्युपेत्याऽऽह—तानि चेति । क्रियाज्ञानशक्त्योश्चिदुपाधिभूतयोश्चिदभेदाद्भेदाद्भेदमभिप्रेत्य प्राणश्चेत्यादि भाष्यम् । तत्र तयोरन्योन्याभेदे मानमाह—यो वा इति ।

ननु सर्वत्र विषयस्यैव प्रलयोऽभिहितो न तु करणस्य तत्र कोऽभिप्रायः इति । वाढम् । किंतु विषयसमानजातीयं करणं मन्यते श्रुतिर्न

१ क. च. ज. झ. ढ. °श्रुर्वि° । २ क. ङ. ज. झ. °स्तत्क्रि° । ३ क. °भाज्या भ° । ४ ज. झ. °भागर्हा भ° । ढ. °भागर्हा भ° । ४ ख. झ. °नवनमा° ।

तु जात्यन्तरम् । विषयस्यैव स्वात्मग्राहकत्वेन संस्थानान्तरं करणं नाम यथा रूपविशेषस्यैव संस्थानं प्रदीपः करणं सर्वरूपप्रकाशन एवं सर्वविषयविशेषाणामेव स्वात्मविशेषप्रकाशकत्वेन संस्थानान्तराणि करणानि प्रदीपवत् । तस्मान्न करणानां पृथक्प्रलये यत्नः कार्यो विषयसामान्यात्मकत्वाद्विषयप्रलयेनैव प्रलयः सिद्धो भवति करणानामिति ॥ ११ ॥

श्रुतिमुखात्करणलयो न प्रतिभाति स्वयं च व्याख्यायते तत्र को हेतुरिति पृच्छति—नन्विति । श्रुत्या करणलयस्यानुक्तत्वमङ्गी करोति—वाढमिति । पृष्टमभिप्रायं प्रकटयति—किंत्विति । करणस्य विषयसाजात्यं विवृणोति—विषयस्यैवेति । किमत्र प्रमाणमित्याशङ्क्यानुमानमिति सूचयति—प्रदीपवदिति । चक्षुस्तैजसं रूपादिषु मध्ये रूपस्यैव व्यञ्जकद्रव्यत्वात्संप्रतिपन्नवदित्यादीन्यनुमानानि शास्त्रप्रकाशिकायामधिगन्तव्यानि । करणानां विषयसाजात्ये फलितमाह तस्मादिति । पृथग्विषयप्रलयादिति शेषः । एकावनप्रक्रियासमाप्तिद्योतकः शब्दः ११

तत्रेदं सर्वं यदयमात्मेति प्रतिज्ञातं तत्र हेतुराभिहित आत्मसामान्यत्वमात्मजत्वमात्मप्रलयत्वं च । तस्मादुत्पत्तिस्थितिप्रलयकालेषु प्रज्ञानव्यतिरेकेणाभावात्प्रज्ञान ब्रह्मैवाऽऽत्मैवेदं सर्वमिति प्रतिज्ञातं यत्तत्तर्कतः साधितम् । स्वाभाविकोऽयं प्रलय इति पौराणिका वदन्ति । यस्तु बुद्धिपूर्वकः प्रलयो ब्रह्मविदां ब्रह्मविद्यानिमित्तोऽयमात्यन्तिक इत्याचक्षते । अविद्यानिरोधद्वारेण यो भवति तदर्थोऽयं विशेषारम्भः—

> स यथा सैन्धवखिल्य उदके प्रास्त उदकमेवानुविलीयेत न हास्योद्ग्रहणायेव स्यात् । यतो यतस्त्वाददीत लवणमेवैवं वा अर इदं महदभूतमनन्तमपारं विज्ञानघन एव । एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानु विनश्यति न प्रेत्य संज्ञाऽस्तीत्यरे ब्रवीमीति होवाच याज्ञवल्क्यः ॥ १२ ॥

तत्र दृष्टान्त उपादीयते स यथेति । सैन्धवखिल्यः सिन्धोर्विकारः सैन्धवः सिन्धुशब्देनोदकमभिधीयते स्यन्दनात्सिन्धुरुदकं तद्विकारस्तत्र भवो वा सैन्धवः सैन्धवश्चासौ खिल्यश्चेति सैन्धवखिल्यः खिल एव

---

१ घ. °ति । श्रुत्यभि° । २ ग. °नान्यस्मत्कृतशा । ३ ख. ढ. °सामान्ये फ° । ४ ग. छ. ब्रह्माऽऽत्मै° । ५ क. ख. ग. घ. च. झ. ढ. °न्यवश्चा° ।

खिल्यः स्वार्थे यत्प्रत्यय उदके मिन्धौ स्वयोनौ प्रास्तः प्रक्षिप्त उदकमेव विलीयमानमनुविलीयेत । यत्तद्भौमतेजससंपर्काठिन्यप्राप्तिः खिल्यस्य स्वयोनिसंपर्कादपगच्छति तदुदकस्य विलयनं तदनु सैन्धवखिल्यो विलीयत इत्युच्यत । तदेतदाहोदकमेवानुविलीयेतेति । न ह नेवास्य खिल्यस्योद्ग्रहणायोद्ग्रह्य पूर्ववद्ग्रहणाय ग्रहीतुं नैव समर्थः । कस्मात् । यतो यतो यस्माद्यस्माद्देशात्तदुदकमाददीत गृहीत्वा स्वादयेल्लवणास्वादमेव तदुदकं न तु खिल्यभावः ।

स तथा सैन्धवखिल्य इत्यादेः संबन्धं वक्तुं वृत्तं कीर्तयति—तत्रेत्यादिना । पूर्वः संदर्भस्तत्रेत्युच्यते । प्रतिज्ञातेऽर्थे पूर्वोक्त हेतुमनूद्य साध्यसिद्धिं फलं दर्शयति—तस्मादिति । उक्तहेतोर्यथोक्त ब्रह्मैव सर्वमिदं जगदिति यत्प्रतिज्ञातमिदं सर्वं यदयमात्मेति तत्पूर्वोक्तदृष्टान्तप्रबन्धरूपतर्कवशात्साधितमिति योजना । उत्तरवाक्यस्य विषयपरिशेषार्थमुक्तप्रलये पौराणिकसंमतिमाह—स्वाभाविक इति । कार्याणां प्रकृतावाश्रितत्वं स्वाभाविकत्वम् । प्रलयान्तरेऽपि तेषां संमतिं संगिरते—यास्त्वति । द्वितीयप्रलयमाधिकृत्यानन्तरग्रन्थमवतारयति—अविद्येति । तत्रेत्यात्यन्तिकप्रलयोक्तिः । उदक विलीयमानमित्ययुक्तं काठिन्यविलयेऽपि तल्लयादर्शनदित्याशङ्क्याऽऽह—यत्तदिति । न हेति प्रतीकमादाय व्याचष्टे—नैवेति । अन्वयप्रदर्शनार्थं नैवेति पुनरुक्तम् ।

यथाऽयं दृष्टान्त एवमेव वा अरे मैत्रेयीदं परमात्माख्यं महद्भूतम् । यस्मान्महतो भूतादावद्यया परिच्छिन्ना सती कार्यकरणोपाधिसंबन्धखिल्यभावमापन्नाऽसि मर्त्या जन्ममरणाशनायापिपासादिसंसारधर्मवत्यासि नामरूपैकात्मिकाऽमुष्यान्वयोऽहमिति स खिल्यभावस्तव कार्यकरणभूतोपाधिसंपर्कभ्रान्तिजनितो महति भूते स्वयोनौ महासमुद्रस्थानीये परमात्मन्यजरेऽभये शुद्धे सैन्धवघनवदेकरसे प्रज्ञानघनेऽनन्तरेऽपारे निरन्तरेऽविद्याजनितभ्रान्तिभेदवर्जिते प्रवेशितः । तस्मिन्प्रविष्ठे स्वयोनिग्रस्ते खिल्यभावेऽविद्याकृते भेदभावे प्रणाशित इदमेकमद्वैतं महद्भूतं महच्च तद्भूतं च महद्भूतं सर्वमहत्तरत्वादाका-

---

१ क. च ञ. ढ. °मनजस स । २ घ. ञ °सिद्धिफ° । ३ घ. ञ. ण. °मुक्ते प्र° । ४ घ. ञ ण °तावत्रासित° । ५ ढ °एव वा एवमेवारे । ग. एवं वा । ६ ङ °मेवारे । ७ क ख. छ. झ. °व त्वरे । ८ च. झ ट. °र्थकार° । ९ झ. नापि° । १० ग, झ. °पक-म्भिम° । ११ ग, °रणोपा° ।

शादिकारणत्वाच्च भूतं त्रिष्वपि कालेषु स्वरूपाव्यभिचारात्मवदेव परिनिष्पन्नमिति त्रैकालिको निष्ठाप्रत्ययः ।

महद्भूतमेकमद्वैतमित्युत्तरत्र संबन्धः । अस्यार्थस्य सर्वोपनिषत्प्रसिद्धत्वमदृश्यत्वादिविशेषणार्थो वैशब्दः । इदं महद्भूतमित्यत्रेदंशब्दार्थं विशदयति-यस्मादित्यादिना । तदिदं परमात्माख्यं महद्भूतमिति पूर्वेण संबन्धः । खिल्यभावापत्तिकार्यं कथयति-मर्त्येत्यादिना । कोऽसौ खिल्यभावोऽभिप्रेतस्तत्राऽऽह-नामरूपेति । कार्यकरणसंघाते तादात्म्याभिमानद्वारा जात्याद्यभिमानोऽत्र खिल्यभाव इत्यर्थः । इति शब्देनाभिमानो लक्ष्यते । यथोक्ते खिल्यभावे सति कुतो भूतस्य महत्त्वमित्याशङ्क्याऽऽह-स खिल्यभाव इति । खिल्यभावः स्वशब्दार्थः । परस्य परिशुद्धस्वार्थमजरादिविशेषणानि । केन रूपेणैकरस्यं तदाह-प्रज्ञानेति । तस्यापरिच्छिन्नत्वमाह-अनन्त इति । तस्य सापेक्षत्वं वारयति-अपार इति । प्रतिभासपाने भेदे कर्म यथोक्ते तत्त्वमित्याशङ्क्याऽऽह-अविद्येति । भवतु यथोक्ते तत्त्वे खिल्यभावस्य प्रवेशस्तथाऽपि किं स्यादित्यत आह-तस्मिन्निति । महत्त्वं साधयति-सर्वेति । भूतत्वमुपपादयति-त्रिष्वपीति ।

अथवा भूतशब्दः परमार्थवाची महच्चं पारमार्थिकं चेत्यर्थः । लौकिकं तु यद्यपि महद्भवति स्वप्नमायाकृतं हिमवदादिपर्वतोपमं न परमार्थवस्तु अतो विशिनष्टीदं चं महच्च तद्भूतं चेति । अनन्तं नास्यान्तो विद्यत इत्यनन्तम् । कदाचिदापेक्षिकं स्यादित्यतो विशिनष्ट्यपारमिति । विज्ञप्तिर्विज्ञानं विज्ञानं च तद्घनश्चेति विज्ञानघनः । घनशब्दो जात्यन्तरप्रतिषेधार्थः । यथा सुवर्णघनोऽयोघन इति । एवशब्दोऽवधारणार्थः । नान्यज्जात्यन्तरमन्तराले विद्यत इत्यर्थः ।

महदित्युक्ते पारमार्थिकं चेति विशेषणं किमर्थमित्याशङ्क्याऽऽह-लौकिकमिति जाग्रत्कालीनं परिदृश्यमानं हिमवदादि महद्यद्यपि भवति तथाऽपि स्वप्नमायादिसमत्वान्न तत्परमार्थवस्तु । न हि दृश्यं जडमिन्द्रजालादेर्विशिष्यतेऽतो लौकिकान्महतो ब्रह्म व्यावर्तयितुं विशेषणमित्यर्थः । आपेक्षिकं स्यादानन्त्यमिति शेषः । अवधारणरूपमर्थमेव स्फोरयति-नान्यमिति ।

यदीदमेकमद्वैतं परमार्थतः । स्वच्छं संसारदुःखासंपृक्तम् । किंनिमित्तोऽयं खिल्यभाव आत्मनो जातो मृतः सुखी दुःख्यहं ममेत्ये-

---

१ घ. निष्ठितमि° । २ घ. °ति । आविद्यकवि° । ३ ख. ढ. °वः सश° । ४ ग. झ. °च्च तत्पार° । ५ घ, ङ. च. छ. ज. झ. ढ तु । ६ ख ज. ढ. ण. °र्विशेष्य° । ७ च. ङ. °संयुक्त° ।

त्येवमादिलक्षणोऽनेकसंसारधर्मोपद्रव इति । उच्यते । एतेभ्यो भूतेभ्यो यान्येतानि कार्यकरणविषयाकारपरिणतानि नामरूपात्मकानि सलिलफेनबुद्बुदोपमानि स्वच्छस्य परमात्मनः सलिलोपमस्य । येषां विषयपर्यन्तानां प्रज्ञानघने ब्रह्मणि परमार्थविवेकज्ञानेन प्रविलापनमुक्तं नदीसमुद्रवत् । एतेभ्यो हेतुभूतेभ्यो भूतेभ्यः सत्यशब्दवाच्येभ्यः समुत्थाय सैन्धवाखिल्यवत् । यथाऽद्भ्यः सूर्यचन्द्रादिप्रतिबिम्बो यथा वा स्फटिकस्यालक्तकाद्युपाधिभ्यो रक्तादिभाव एवं कार्यकरणभूतभूतोपाधिभ्यो विशेषात्माखिल्यभावेन समुत्थाय सम्यगुत्थाय येभ्य भूतेभ्य उत्थितस्तानि यदा कार्यकरणविषयाकारपरिणतानि भूतान्यात्मनो विशेषात्माखिल्यहेतुभूतानि शास्त्राचार्योपदेशेन ब्रह्मविद्यया नदीसमुद्रवत्प्राविलापितानि विनश्यन्ति । सलिलफेनबुद्बुदादिवत्तेषु विनश्यत्स्वेवैष विशेषात्माखिल्यभावो विनश्यति । यथोदकालक्तकादिहेत्वपनये सूर्यचन्द्रस्फटिकादिप्रतिबिम्बो विनश्यति चन्द्रादिस्वरूपमेव परमार्थतो व्यवतिष्ठते तद्वत्प्रज्ञानघनमनन्तमपारं स्वच्छं व्यवतिष्ठते ।

एतेभ्यो भूतेभ्यः समुत्थायेत्यादिसमनन्तरवाक्यव्यावर्त्यामाशङ्कामाह—यदीदमिति । वस्तुतः शुद्धत्वे किं सिध्यति तदाह—संसारेति । तर्हि तस्मिन्निमित्ताभावान्न तस्य खिल्यत्वमिति मत्वाऽऽह—किंनिमित्त इति । खिल्यभावमेव विशिनष्टि—जात इति । अनेकः संसाररूपो धर्मोऽशनायापिपासादिस्तेनोपद्रुतो दूषित इति यावत् । खिल्यभावे निमित्तं दर्शयन्नुत्तरमाह—उच्यत इति । एतच्छब्दार्थं व्याकरोति—यानीति । स्वच्छस्य परमात्मनः कार्यकरणविषयाकारपरिणतानीति संबन्धः । तानि व्यवहारासिद्ध्यर्थं विशिनष्टि—नामरूपात्मकानीति । तेषामतिदुर्बलत्वं सूचयति—सलिलेति । स्वच्छत्वे दृष्टान्तमाह—सलिलोपमस्येति । तेषां प्रत्यक्षत्वेऽपि प्रकृतत्वाभावे कथमेतच्छब्देन परामर्शः स्यादित्याशङ्क्याऽऽह—येषामिति । उक्तमेकायनप्रकियायामिति शेषः । ब्रह्मणि प्रज्ञानघने भूतानां प्रलये दृष्टान्तमाह—नदीति । हेतौ पञ्चमीति दर्शयति—हेतुभूतेभ्य इति । पूर्वस्मिन्ब्राह्मणे षष्ठ्यन्तसत्यशब्दवाच्यतया तेषां प्रकृतत्वमाह—सत्येति । यथा सैन्धवः सान्खिल्यः सिन्धोस्तेजःसंबन्धमपेक्ष्योद्गच्छति तथा भूतेभ्यः खिल्यभावो भवतीत्याह—सैन्धवेति । समुत्थानमेव विवृणोति—यथेत्यादिना । तान्येवेत्यादि व्याचष्टे—येभ्य इति । खिल्यहेतुभूतानि तत्र हेतुत्वोपे-

---

१ झ. सूर्यादि° । २ ग ञ. °र्थकार° । ३ घ. ङ. च. ज. झ. ढ. °लिल फे° । ४ क. ख. °इयत्सु स एष । च. ढ. °इयन्सु वि° । झ. °इयत्स्वेवै° । ५ च. ढ. °षात्मा खि° । ६ ग. घ. ङ. च. ज. झ. ढ. °ये चन्द्रसूर्यस्फ° । ७ घ. ण. °ति । एवं पृ° । ८ घ. ञ. ण. °हेतूनि ।

शानीति यावत् । ब्रह्मविद्योत्पत्तौ हेतुमाह—शास्त्रेति । तत्फलं सदृष्टान्तमाचष्टे—नदीति । यथा सलिले फेनादयो विनश्यन्ति तथा तेषु भूतेषु विनश्यत्सु सत्स्वनु पश्चात्स्वित्यभावो नश्यतीत्याह—सलिलेति । किं पुनर्भूतानां स्वित्यभावस्य च विनाशे सत्यवशिष्यते तत्राऽऽह—यथेति ।

न तत्र प्रेत्य विशेषसंज्ञाऽस्ति कार्यकरणसंघातेभ्यो विमुक्तस्येत्येवमेव मैत्रेयि ब्रवीमि नास्ति विशेषसंज्ञेत्यहमसावमुष्य पुत्रो ममदं क्षेत्रं धनं सुखी दुःखीत्येवमादिलक्षणाऽविद्याकृतत्वात्तस्या अविद्यायाश्च ब्रह्मविद्यया निरन्वयतो नाशितत्वात्कुतो विशेषसंज्ञासंभवो ब्रह्मविदश्चैतन्यस्वभावावस्थितस्य । शरीरावस्थितस्यापि विशेषसंज्ञा नोपपद्यते किमुत कार्यकरणविमुक्तस्य सर्वत इति होवाचोक्तवान्किल परमार्थदर्शनं मैत्रेय्यै भार्यायै याज्ञवल्क्यः ॥ १२ ॥

तत्रेति कैवल्योक्तिः । उक्तमेव वाक्यार्थं स्फुटयति नास्तीति । ब्रह्मविदोऽशरीरस्य विशेषसंज्ञाभावं कैमुतिकन्यायेन कथयति—शरीरावस्थितस्येति । सुषुप्तस्येति यावत् । सर्वतः कार्यकरणविमुक्तस्येति संबन्धः ॥ १२ ॥

सा होवाच मैत्रेय्यत्रैव मा भगवानमूमुहन्न प्रेत्य संज्ञाऽस्तीति स होवाच न वा अरेऽहं मोहं ब्रवीम्यलं वा अर इदं विज्ञानाय ॥ १३ ॥

एवं प्रतिबोधिता सा ह किलोवाचोक्तवती मैत्रेयी । अत्रैवतस्मिन्नेवंकस्मिन्वस्तुनि ब्रह्मणि विरुद्धधर्मवत्त्वमाचक्षाणेन भगवता मम मोहः कृतस्तदाह । अत्रैव मा भगवान्पूजावानमूमुहन्मोहं कृतवान् । कथं तेन विरुद्धधर्मवत्त्वमुक्तमित्युच्यते पूर्वं विज्ञानघन एवेति प्रतिज्ञाय पुनर्न प्रेत्य संज्ञाऽस्तीति । कथं विज्ञानघन एव कथं वा न प्रेत्य संज्ञाऽस्तीति । न ह्युष्णः शीतश्चाग्निरेवंको भवति । अतो मूढाऽस्म्यत्र । स होवाच याज्ञवल्क्यो न वा अरे मैत्रेय्यहं ब्रवीमि मोहनं वाक्यं न ब्रवीमीत्यर्थः । ननु कथं विरुद्धधर्मत्वमवोचो विज्ञानघन सज्ञाभावं

---

१ घ ञ. ण. तदाह । २ झ यंकार° । ३ क झ. °ते किं पुनः का° । ४ क. ख. ञ. ढ. ण. °वतो मु° । ५ क. ख. ञ ढ ण. शेष° । ६ क °च याज्ञवल्क्या न । ७ घ. ङ. छ ज. झ. °र्मत्वमा° । ८ घ. ज. °र्मत्वमु° ।

च न मयेदमेकस्मिन्धर्मिण्यभिहितम् । त्वयैवेदं विरुद्धधर्मत्वेनैकं वस्तु परिगृहीतं भ्रान्त्या न तु मयोक्तम् । मया त्विदमुक्तं यस्त्वविद्याऽत्यपस्थापितः कार्यकरणसंबन्ध्यात्मनः खिल्यभावस्तस्मिन्विद्यया नाशिते तन्निमित्ता या विशेषसंज्ञा शारीरादिसंबन्धिन्यन्यत्वदर्शनलक्षणा सा कार्यकरणसंघातापाये प्रविलापिते नश्यति हेत्वभावादुदकाद्याधारनाशादिव चन्द्रादिप्रतिबिम्बस्तन्निमित्तश्च प्रकाशादिः । न पुनः परमार्थचन्द्रादित्यस्वरूपनाशवदसंसारिब्रह्मस्वरूपस्य विज्ञानघनस्य नाशः । तद्विज्ञानघन इत्युक्तं स आत्मा सर्वस्य जगतः परमार्थतो भूतनाशान्न विनाशी । विनाशी त्वविद्याकृतखिल्यभावो वाचाऽऽरम्भणं विकारो नामधेयमिति श्रुत्यन्तरात् । अयं तु पारमार्थिकोऽविनाशी वा अरेऽयमात्मा । अतोऽलं पर्याप्तं वा अर इदं महद्भूतमनन्तमपारं यथाव्याख्यातं विज्ञानाय विज्ञातम् । न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यतेऽविनाशित्वादिति हि वक्ष्यति ॥ १२ ॥

उक्तं परमार्थदर्शनमेव व्यक्तीकर्तुं चोदयति—एवमिति । येन याज्ञवल्क्येनोक्तमात्रम् । इति वदता विरुद्धधर्मवत्त्वमुक्तमिति शेषः । एवं वदनेऽपि कुतो विरुद्धधर्मवत्त्वोक्तिस्तत्राऽऽह—कथमिति । एकस्यैव विज्ञानघनत्वे संसारित्वे च कुतो विरोधवीरित्याशङ्क्याऽऽह—न हीति । विरोधबुद्धिफलमाह—अत इति । अनेत्युक्तविषयपरामर्शः । न वा इति प्रतिज्ञां गृहीत्वा व्याकरोति—अर इति । मोहनं वाक्यं ब्रवीत्येव भवानिति शङ्कते—नन्विति । समाधत्ते—न मयेति । कथं तर्हि मयैकस्मिन्नेव वस्तुनि विरुद्धधर्मवत्त्वबुद्धिरित्याशङ्क्याऽऽह—त्वयैवेति । त्वया तर्हि किमुक्तमिति तत्राऽऽह—मया त्विति । खिल्यभावस्य विनाशे मत्यगात्मस्वरूपमेव विनश्यतीत्याशङ्क्याऽऽह—न पुनरिति । ब्रह्मस्वरूपस्यानाशे विज्ञानघनस्य किमायातमित्याशङ्क्याऽऽह—तदिति । विज्ञानघनस्य मत्यैक्यं दर्शयति—आत्मेति । कथं तर्हि तस्यैवानुविनश्यतीति तत्राऽऽह—भूतनाशेति । खिल्यभावस्याविद्याकृतत्वे प्रमाणमाह—वाचाऽऽरम्भणमिति । खिल्यभावमात्म-

१ च. ढ. च । २ ग. °धैकार° । ३ क. °रूपव° । ४ ग. घ. ज. °कृतः खि° । ५ घ. ञ. °र्मत्वमु° । ६ क. ख. ढ. ण °धर्मोक्ति° । ७ क. ख. ञ. ढ. विरुद्धधी° । ८ क. °शयेनाऽऽह । ९ घ. ण. °ति । स आ । १० क. ख. ढ. °वत्परमात्म° ।

त्यगात्मनोऽपि विनाशित्वं स्यादिति चेन्नेत्याह—अयं त्विति । परमार्थिकत्वे प्रमाणमाह—अविनाशीति । अविनाशित्वफलमाह—अत इति । पर्याप्तं विज्ञातुमिति संबन्धः । इदमित्यादिपदानां गतार्थत्वादव्याख्येयत्वं सूचयति—यथेति । विज्ञानघन एवेत्यत्र वाक्यशेषं प्रमाणयति—न हीति ॥ १३ ॥

यत्र हि द्वैतमिव भवति तदितर इतरं[1] जिघ्रति तदितर इतरं[2] पश्यति तदितर इतरं[3] शृणोति तदितर इतरमभिवदति तदितर इतरं मनुते तदितर इतरं विजानाति यत्र वा अस्य सर्वमात्मैवाभूत्तत्केन कं[4] जिघ्रेत्तत्केन कं[5] पश्येत्तत्केन कं[6] शृणुयात्तत्केन कमभिवदेत्तत्केन कं मन्वीत तत्केन कं विजानीयात् । येनेदं[7] सर्वं विजानाति तं केन विजानीयाद्विज्ञातारमरे केन विजानीयादिति ॥ १४ ॥

इति बृहदारण्यकोपनिषदि द्वितीयाध्याये
चतुर्थं ब्राह्मणम् ॥ ४ ॥

कथं तर्हि प्रेत्य संज्ञा नास्तीत्युच्यते । शृणु । यत्र यस्मिन्नविद्याकल्पिते कार्यकरणसंघातोपाधिजनिते विशेषात्मनि खिल्यभावे हि यस्माद्द्वैतमिव परमार्थतोऽद्वैते ब्रह्मणि द्वैतमिव भिन्नमिव वस्त्वन्तरमात्मन उपलक्ष्यते । ननु द्वैतेनोपमीयमानत्वाद्द्वैतस्य पारमार्थिकत्वमिति । न । वाचाऽऽरम्भणं विकारो नामधेयमिति श्रुत्यन्तरादेकमेवाद्वितीयमात्मैवेदं सर्वमिति च । तत्तत्र यस्माद्द्वैतमिव तस्मादेवेतरोऽसौ परमात्मनः खिल्यभूत आत्माऽपरमार्थश्चन्द्रादेरिवोदकचन्द्रादिप्रतिविम्ब इतरो[11] घ्रातेतरेण घ्राणेनेतरं घ्रातव्यं जिघ्रति । इतर इतरमिति कारकप्रदर्शनार्थं[12] जिघ्रतीति क्रियाफलयोरभिधानम् । यथा छिनत्तीति यथोद्यम्योद्यम्य निपातनं छेद्यस्य च द्वैधी-

---

१ क. च. ढ. °रं पश्यति । २ क. च. ढ. °रं जिघ्रति । ३ च ढ. °रनाभिवदति । ४ च. ढ. °रं शृणोति । ५ ग. च. °त्र त्वस्य । ६ च. कं पश्येत्त° । ७ च. कं जिघ्रेत्त° । ८ च. ढ. कमभिवदेत्त° । ९ च. ढ. °कं शृणुयात्त° । १० ज. °यंकारं । ११ ख. झ. °र्थतश्च° । १२ क. ख. ग. ङ. च. छ. ज. ढ. °रो द्रष्टतरेण चक्षुरादिकरणेनेतरद्दृष्टव्यं रूपादिकं पश्यति । १३ क. ख. ग. च. छ. ज. ठ. °र्थं पश्यती° ।

भाव उभयं छिनत्तीत्येकेनैव शब्देनाभिधीयते क्रियावसानत्वात्क्रिया-व्यतिरेकेण च तत्फलस्यानुपलम्भात् । इतरो घ्राणेतरेण घ्राणेनेतरं घ्रातव्यं जिघ्रति तथा सर्वं पूर्ववद्विजानाति । इयमविद्यावदवस्था ।

आत्मनो विज्ञानघनत्वं प्रामाणिकं चेत्तर्हि निषेधवाक्यमयुक्तमिति शङ्कते—कथमिति । अविद्याकृतविशेषविज्ञानाभावाभिप्रायेण निषेधवाक्योपपत्तिरित्युत्तरमाह—शृण्विति । यस्मिन्नुक्तलक्षणे खिल्यभावे सति यस्माद्यथोक्ते ब्रह्मणि द्वैतमिव द्वैतमुपलक्ष्यते तस्मात्तस्मिन्सतीतर इतरं जिघ्रतीति संबन्धः । द्वैतमिवेत्युक्तमनूद्य व्याचष्टे—भिन्नमिवेति । इवशब्दस्योपमार्थत्वमुपेत्य शङ्कते—नन्विति । द्वैतेन द्वैतस्योपमीयमानत्वाद्दृष्टान्तस्य दार्ष्टान्तिकस्य च तस्य वस्तुत्वं स्यादुपमानोपमेययोश्चन्द्रमुखयोर्वस्तुत्वोपलम्भादित्यर्थः । द्वैतमपश्चस्य मिथ्यात्ववादिश्रुतिविरोधान्न तस्य सत्यतेति परिहरति—न वाचाऽऽरम्भणमिति । तत्र तस्मिन्खिल्यभावे सतीति यावत् । स्वप्नादिद्वैतमिव जागरितेऽपि द्वैतं यस्मादालक्ष्यते तस्मात्परमात्मनः सकाशादितरोऽसावात्मा खिल्यभूतोऽपरमार्थः सन्नितरं जिघ्रतीति योजना । परस्मादितरस्मिन्नात्मन्यपरमार्थे खिल्यभूते दृष्टान्तमाह—चन्द्रादेरिवेति । इतरशब्दमनूद्य तस्यार्थमाह—इतरो घ्रातेति । अविद्यादशायां सर्वाण्यपि कारकाणि सन्ति कर्तृकर्मनिर्देशस्य सर्वकारकोपलक्षणत्वादित्याह—इतर इति । क्रियाफलयोरेकशब्दत्वे दृष्टान्तं विवृणोति—यथेति । दृष्टान्तेऽपि विप्रतिपत्तिमाशङ्क्याव्यन्तरोक्तं हेतुमेव स्पष्टयति—क्रियेति । अतश्च जिघ्रतीत्यत्रापि क्रियाफलयोरेकशब्दत्वमविरुद्धमिति शेषः । उक्तं वाक्यार्थमनूद्य वाक्यान्तरेष्वतिदिशति—इतर इति । तथेतरो दृष्टेतरेण चक्षुषेतरं द्रष्टव्यं पश्यतीत्यादि द्रष्टव्यमिति शेषः । उत्तरेष्वपि वाक्येषु पूर्ववाक्यवत्कर्तृकर्मनिर्देशस्य सर्वकारकोपलक्षणत्वं क्रियापदस्य च क्रियातत्फलाभिधायित्वं तुल्यमित्याह—सर्वमिति । यत्र हीत्यादिवाक्यार्थमुपसंहरति—इयमिति ।

यत्र तु ब्रह्मविद्ययाऽविद्या नाशमुपगमिता तत्राऽऽत्मव्यतिरेकेणान्यस्याभावः । यत्र वा अस्य ब्रह्मविदः सर्वं नामरूपाद्यात्मन्येव प्रविलापितमात्मैव संवृत्तं यत्रैवमात्मैवाभूत्तत्तत्र केन करणेन कं घ्रातव्यं

---

१ ग. ङ. °याफलाव° । घ. °याया: फलाव° । २ ज. °सानात्कि° । ३ झ. °रो द्रष्टतरेण चक्षुरादिकरणेनेतरं द्रष्टव्यं रूपादिकं पश्यति । ४ ख ग. घ ङ. च. छ. ज. ढ. °रं जि° । च. तथेतर इत्यादिसर्वं पूर्ववत् । इ° । ६ क. ख. ङ. °पि तद्द्वैतं । ७ क. ख. ढ. °र्थतः स° । ८ क. ख. ढ. °ह—द्रष्टेति । ९ क. ख. ङ. च. छ. ज. झ. ढ. कं द्रष्टव्य कथा जिवेद्वि° ।

को जिघ्रेत्तथा पश्येद्विजानीयात्। सर्वत्र हि कारकसाध्या क्रिया। अतः कारकाभावेऽनुपपत्तिः क्रियायाः क्रियाभावे च फलाभावः। तस्मादविद्यायामेव सत्यां क्रियाकारकफलव्यवहारो न ब्रह्मविदः। आत्मत्वादेव सर्वस्य नाऽऽत्मव्यतिरेकेण कारकं क्रियाफलं वाऽस्ति। नचानात्मा सन्सर्वमात्मैव भवति कस्यचित्। तस्मादविद्ययैवानात्मत्वं परिकल्पितं न तु परमार्थत आत्मव्यतिरेकेणास्ति किंचित्। तस्मात्परमार्थात्मैकत्वप्रत्यये क्रियाकारकफलप्रत्ययानुपपत्तिः। अतो विरोधाद्ब्रह्मविदः क्रियाणां तत्साधनानां चात्यन्तमेव निवृत्तिः। केन किमिति क्षेपार्थं वचनं प्रकारान्तरानुपपत्तिदर्शनार्थम्। केनचिदपि प्रकारेण क्रियाकरणादिकारकानुपपत्तेः। केनचित्कंचित्काश्चित्कथंचिन्न जिघ्रेदेवेत्यर्थः।

यत्र वा अस्येत्यादिवाक्यस्य तात्पर्यमाह—यत्र त्विति। उक्तेऽर्थे वाक्याक्षराणि व्याचष्टे—यत्रेति। तमेवार्थं संक्षिपति—यत्रैवमिति। सर्वं कर्तृकरणादीति शेषः। तत्केनेत्यादि व्याकरोति—तत्तत्रेति। किंशब्दस्याऽऽक्षेपार्थं कथयति—सर्वत्र हीति। ब्रह्मविदोऽपि कारकद्वारा क्रियादि स्वी क्रियतामित्याशङ्क्याऽऽह—आत्मत्वादिति। सर्वस्याऽऽत्मत्वासिद्धिमाशङ्क्य सर्वमात्मैवाभूदिति श्रुत्या समाधत्ते—न चेति। कथं तर्हि सर्वमात्मव्यतिरेकेण भातीत्याशङ्क्याऽऽह—तस्मादिति। भेदभानस्याविद्याकृतत्वे फलितमाह—तस्मात्परमार्थेति। तद्धेतोरज्ञानस्यापनीतत्वादिति शेषः। एकत्वप्रत्ययादज्ञाननिवृत्तिद्वारा क्रियादिप्रत्यये निवृत्तेऽपि क्रियादि स्यान्नेत्याह—अत इति। करणप्रमाणयोरभावे कार्यस्य विरुद्धत्वादिति यावत्। ननु किंशब्दे प्रश्नार्थे प्रतीयमाने कथं क्रियातत्साधनयोरत्यन्तनिवृत्तिर्विदुषो विवक्ष्यते तत्राऽऽह—केनेति। किंशब्दस्य प्रागेव क्षेपार्थत्वमुक्तं तेन च क्षेपार्थं वचो विदुषः सर्वप्रकारक्रियाकारकाद्यसंभवप्रदर्शनार्थमित्यत्यन्तमेव क्रियादिनिवृत्तिर्विदुषो युक्तेत्यर्थः। सर्वप्रकारानुपपत्तिमेवाभिनयति—केनचिदिति।

यत्राप्यविद्यावस्थायामन्योऽन्यं पश्यति तत्रादि येनेदं सर्वं विजानाति तं केन विजानीयाद्येन विजानाति तस्य करणस्य विज्ञेये विनियुक्तत्वात्। ज्ञातुश्च ज्ञेय एव हि जिज्ञासा नाऽऽत्मनि। न चाग्नेरिवाऽऽत्माऽऽत्मनो विषयो न चाविषयेऽज्ञातुर्ज्ञानमुपपद्यते। तस्माद्येनेदं

---

१ ग. ज. °त्तिप्रद। २ क. ख. ज. ढ. °म्। न कं°। ३च. ङ. ज. °ण क°। ४ क. ख ग. घ. ङ. °चित्किंचि°। क. ख. ग. ङ. च. छ. ज. झ. ढ. °न पश्येयेद्°। ६ घ. ण. °या हि स्वी°। ७ घ. ण. °दजातस्या°। ८ क. ख. ढ. ण. °गेवाऽऽक्षे°। ९ क. ख. ढ, तच्चाऽऽक्षे°। १० घ. ज. हि विजि°। ११ घ. च. ज. °ये विज्ञा°।

विजानाति तं विज्ञातारं केन करणेन को वाऽन्यो विजानीयात् । यदा तु पुनः परमार्थविवेकिनो ब्रह्मविदो विज्ञातैव केवलोऽद्वयो वर्तते तं विज्ञातारमरे केन विजानीयादिति ॥ १४ ॥

इति बृहदारण्यकोपनिषद्भाष्ये द्वितीयाध्यायस्य चतुर्थं ब्राह्मणम् ॥ ४ ॥

कैवल्यावस्थामारभ्याय संज्ञाभाववचनमित्युक्त्वा तत्रैव किं पुनर्न्यायं वक्तुमविद्यावस्थायामपि साक्षिणो ज्ञानाविषयत्वमाह—यत्रापीति । येन कूटस्थबोधेन व्याप्तो लोकः सर्वं जानाति तं साक्षिणं केन करणेन को वा ज्ञाता जानीयादित्यत्र हेतुमाह—येनेति । येन चक्षुरादिना लोको जानाति तस्य विषयग्रहणेनैवोपक्षीणत्वान्न साक्षिणि प्रवृत्तिरित्यर्थः । आत्मनोऽसंदिग्धभावत्वाच्च प्रमेयत्वासिद्धिरित्याह—ज्ञातुश्चेति । किंचाऽऽत्मा स्वेनैव ज्ञायते ज्ञात्रन्तरेण वा । नाऽऽद्य इत्याह—न चेति । न द्वितीय इत्याह—न चाविषय इति । ज्ञात्रन्तरस्याभावात्तस्याविषयोऽयमात्मा कुतस्तेन ज्ञातुं शक्यते । न हि ज्ञात्रन्तरमस्ति नान्योऽतोऽस्ति द्रष्टेत्यादिश्रुतेरित्यर्थः । आत्मनि प्रमातृप्रमाणयोरभावे ज्ञानाविषयत्वं फलतीत्याह—तस्मादिति । विज्ञातारमित्यादिवाक्यस्यार्थं प्रपञ्चयति—यदा त्विति । तदेवं स्वरूपापेक्षं विज्ञानघनत्वं विशेषविज्ञानापेक्षं तु संज्ञाभाववचनमित्यविरोध इति ॥ १४ ॥

इति बृहदारण्यकभाष्यटीकायां द्वितीयाध्याये चतुर्थं ब्राह्मणम् ॥ ४ ॥

(अथ द्वितीयाध्यायस्य पञ्चमं ब्राह्मणम्) ।

यत्केवलं कर्मनिरपेक्षममृतत्वसाधनं तद्वक्तव्यमिति मैत्रेयीब्राह्मणमारब्धम् । तच्चाऽऽत्मज्ञानं सर्वसंन्यासाङ्गविशिष्टम् । आत्मनि च विज्ञाते सर्वमिदं विज्ञातं भवति । आत्मा च प्रियः सर्वस्मात् । तस्मादात्मा द्रष्टव्यः स च श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति च दर्शनप्रकारा उक्ताः । तत्र श्रोतव्य आचार्यागमाभ्याम् । मन्तव्यस्तर्कतः । तत्र च तर्क उक्त आत्मैवेदं सर्वमिति प्रतिज्ञातस्य हेतुवचनमात्मैकसामान्यत्वमात्मैकोद्भवत्वमात्मैकप्रलयत्वं च । तत्रायं हेतुरसिद्ध इत्याशङ्क्यत आत्मैकसामान्योद्भवप्रलयाख्यस्तदाशङ्कानिवृत्त्यर्थमेतद्ब्राह्मणमारभ्यते ।

पूर्वोत्तरब्राह्मणयोः संगतिं वक्तुं वृत्तं कीर्तयति—यत्केवलमिति । कैवल्यं व्याचष्टे—कर्मनिरपेक्षामिति । तच्चाऽऽत्मज्ञानमुक्तमिति संबन्धः । ततो निरा-

---

१ क. °त्रेयिब्रा° । २ क. °त्र च ो° ।

काङ्क्षत्वं सिद्धमिति चकारार्थः। आत्मज्ञानं संन्यासिनामेवेति नियन्तुं विशिनष्टि-सर्वेति। ननु कुतस्ततो नैराकाङ्क्ष्यं सत्यपि तस्मिन्विज्ञेयान्तरसंभवादत आह-आत्मनि चेति। न वा अरे पत्युरित्यादावुक्तं स्मारयति-आत्मा चेति। तस्य निरतिशयप्रेमास्पदत्वेन परमानन्दत्वे फलितमाह तस्मादिति। स चेद्दर्शनार्हस्तर्हि तद्दर्शने कानि साधनानीत्याशङ्क्याऽऽह-स चेति। दर्शनप्रकारा दर्शनस्योपायप्रभेदाः। श्रवणमननयोः स्वरूपविशेषं दर्शयति-तत्रेति। कोऽसौ तर्को येनाऽऽत्मा मन्तव्यो भवति तत्राऽऽह-तत्र चेति। दुन्दुभ्यादिग्रन्थः सप्तम्यर्थः। उक्तमेव तर्कं संगृह्णाति-आत्मैवेति। प्रधानादिवादमादाय हेत्वसिद्धिशङ्कायां तन्निराकरणार्थमिदं ब्राह्मणमिति संगतिं संगिरते-तत्रायामिति।

यस्मात्परस्परोपकार्योपकारकभूतं जगत्सर्वं पृथिव्यादि। यच्च लोके परस्परकार्योपकारकभूतं तदेककारणपूर्वकमेकसामान्यात्मकमेकप्रलयं च दृष्टम्। तस्मादिदमपि पृथिव्यादिलक्षणं जगत्परस्परोपकार्योपकारकत्वाँत्तथाभूतं भवितुमर्हति। एष ह्यर्थोऽस्मिन्ब्राह्मणे प्रकाश्यते। अथवाऽऽत्मैवेदं सर्वमिति प्रतिज्ञातस्याऽऽत्मोत्पत्तिस्थितिलयत्वं हेतुमुक्त्वा पुनरागमप्रधानेन मधुब्राह्मणेन प्रतिज्ञातस्यार्थस्य निगमनं क्रियते। तथा हि नैयायिकैरुक्तं हेत्वपदेशात्प्रतिज्ञायाः पुनर्वचनं निगमनमिति। अन्यैर्व्याख्यातमा दुन्दुभिदृष्टान्ताच्छ्रोतव्यार्थमागमवचनं प्राङ्मधुब्राह्मणान्मन्तव्यार्थमुपपत्तिप्रदर्शनेन मधुब्राह्मणेन तु निदिध्यासनविधिरुच्यत इति। सर्वथाऽपि तु यथाऽऽगमेनावधारितं तर्कतस्तथैव मन्तव्यम्। यथा तर्कतो मतस्य तर्कागमाभ्यां निश्चितस्य तथैव निदिध्यासनं क्रियत इति पृथङ्निदिध्यासनविधिरनर्थक एव। तस्मात्पृथक्प्रकरणविभागोऽनर्थक इत्यस्मदभिप्रायः श्रवणमननिदिध्यासनानामिति। सर्वथाऽपि त्वध्यायद्वयस्यार्थोऽस्मिन्ब्राह्मण उपसंह्रियते।

कथं हेत्वसिसिद्धशङ्कोद्धियते तत्राऽऽह-यस्मादिति। तस्मात्तथाभूतं भवितुमर्हतीत्युत्तरत्र संबन्धः। अन्योन्योपकार्योपकारकभूतं जगदेकचैतन्यानुविद्धमेकप्रकृतिकं चेत्यत्र व्याप्तिमाह-यच्चेति। दृष्टं स्वमादीति शेषः। दृष्टान्ते सिद्धमर्थं दार्ष्टान्तिके योजयति-तस्मादिति। तच्छब्दार्थं स्फुटयति-परस्परेति। तथाभूतमित्येककारणपूर्वकादि गृह्यते। विमतमेककारणकं परस्परोपकार्योपकार-

१ क. °रूपे वि°। २ घ °पतो वि°। ३ क. ख. च. छ. ज. ढ. °स्परकार्यकारणत्वा°। ४ च. ढ. °त्वाच्च तथा°। ५ ग. ङ. च. ज. झ. °थावत्तर्क°। ६ क. ख. घ. ञ. ण. °र्वकत्वादि।

कमूलत्वात्स्वप्नवदित्युक्तं हेत्वसिद्धेः । न हि सर्वं जगत्परस्परोपकार्योपकारकभूतमित्याशङ्क्याऽऽह—एष हीति हेत्वसिद्धिशङ्कां परिहर्तुं ब्राह्मणमिति संगतिमुक्त्वा प्रकारान्तरेण तामाह—अथवेति । प्रतिज्ञाहेतू क्रमेणोक्त्वा हेतुसहितस्य प्रतिज्ञार्थस्य पुनर्वचनं निगमनमित्यत्र तार्किकसंमतिमाह—तथा होति । भर्तृप्रपञ्चानां ब्राह्मणारम्भप्रकारमनुवदति—अन्यैरिति । द्रष्टव्यादिवाक्यादारभ्याऽऽन्दुन्दुभिदृष्टान्तादागमवचनं श्रोतव्य इत्युक्तश्रवणनिरूपणार्थम् । दुन्दुभिदृष्टान्तादारभ्य मधुब्राह्मणात्प्रागुपपत्तिप्रदर्शनेन मन्तव्य इत्युक्तमननिरूपणार्थमागमवचनम् । निदिध्यासनं व्याख्यातुं पुनरेतद्ब्राह्मणमित्यर्थः । एतद्दूषयति—सर्वथाऽपीति । श्रवणादेर्विधेयत्वेऽविधेयत्वेऽपीति यावत् । अन्वयव्यतिरेकाभ्यां श्रवणे प्रवृत्तस्य तत्पौष्कल्ये सत्यर्थलब्धं मननं न विधिमपेक्षते । यथा तर्कतो मतं तत्त्वं तथा तस्य तर्कागमाभ्यां निश्चितस्योभयसामर्थ्यादेव निदिध्यासनसिद्धौ तदपि विध्यनपेक्षमेवेत्यर्थः । त्रयाणां विध्यनपेक्षत्वे फलितमाह—तस्मादिति । इति परकीयव्याख्यानमयुक्तमिति शेषः । सिद्धान्तेऽपि श्रवणादिविध्यभ्युपगमात्कथं परकीयं प्रस्थानं प्रत्याख्यातमित्याशङ्क्याऽऽह—सर्वथाऽपि त्विति । तद्विध्यभ्युपगमेऽपीति यावत् ।

इयं पृथिवी सर्वेषां भूतानां मध्वस्यै पृथिव्यै
सर्वाणि भूतानि मधु यश्चायमस्यां पृथिव्यां
तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मꣳ
शारीरस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स
योऽयमात्मेदममृतमिदं ब्रह्मेदꣳ सर्वम् ॥ १ ॥

इयं पृथिवी प्रसिद्धा सर्वेषां भूतानां मधु सर्वेषां ब्रह्मादिस्तम्बपर्यन्तानां भूतानां प्राणिनां मधु कार्यं मध्विव मधु यथैकेन मध्वपूपोऽनेकैर्मधुकरैर्निर्वर्तितः एवमियं पृथिवी सर्वभूतैर्निर्वर्तिता । तथा सर्वाणि भूतानि पृथिव्यै पृथिव्या अस्या मधु कार्यम् । किंच यश्चायं पुरुषोऽस्यां पृथिव्यां तेजोमयश्चिन्मात्रप्रकाशमयोऽमृतमयोऽमरणधर्मा पुरुषो यश्चायमध्यात्मं शारीरः शरीरे भवः पूर्ववत्तेजोमयोऽमृतमयः पुरुषः । स च लिङ्गाभिमानी । स च सर्वेषां भूतानामुपकारकरणन-

---

१ क. ख. घ. ढ. °त्वेऽपी° । २ क. ण. तर्कस्य । ३ क. ख. ढ. °पेक्षितमे° । ४ क. ख. ढ. ण. °पेक्षितत्वे । ५ घ. ञ. ण. °त्कथमित्थ प° । ६ च. °थैकं मध्वने° । ७ घ. °र्तितम° । ८ च. . °भतैर्नि° । ९ घ छ. ज. झ. ढ. °कारात्कर° । १० गत्क °त्र

खेन मधु । सर्वाणि च भूतान्यस्य मधु । चशब्दसामर्थ्यात् । एवमेतच्चतुष्टयं तावदेकं सर्वभूतकार्यं सर्वाणि च भूतान्यस्य कार्यम् । अतोऽस्यैककारणपूर्वकता । यस्मादेकस्मात्कारणादेतज्जातं तदेवैकं परमार्थतो ब्रह्मेतरत्कार्यं वाचाऽऽरम्भणं विकारो नामधेयमात्रमित्येष मधुपर्यायाणां सर्वेषामर्थः संक्षेपतः । अयमेव स योऽयं प्रतिज्ञात इदं सर्वं यदयमात्मेति । इदममृतं यन्मैत्रेय्या अमृतत्वसाधनमुक्तमात्मविज्ञानमिदं तदमृतम् । इदं ब्रह्म यद्ब्रह्मा ते ब्रवाणि ज्ञपयिष्यामीत्यध्यायादौ प्रकृतं यद्विषया च विद्या ब्रह्मविद्येत्युच्यत इदं सर्वं यस्माद्ब्रह्मणो विज्ञानात्सर्वं भवति ॥ १ ॥

एवं संगतिं ब्राह्मणस्योक्त्वा तदक्षराणि व्याकरोति--इयमित्यादिना । मधुकृतो मधिव मधिवति तद्विवृणोति-यथेति । न केवलमुक्तं मधुद्वयमेव किंतु मध्वन्तरं चास्तीत्याह-किंचेति । पुरुषशब्दस्य क्षेत्रविषयत्वं वारयति--स चेति । तस्य पृथिवीवन्मधुत्वमाह-स च सर्वेषामिति । सर्वेषां च भूतानां तैजसे मधुत्वे दर्शयति-सर्वाणि चेति । नन्वाद्यमेव मधुद्वयं श्रुतमश्रुतं तु मधुद्वयमशक्यं कल्पयितुं कल्पकाभावादत आह-चशब्देति । प्रथमपर्यायार्थमुपसंहरति-एवमिति । पृथिवी सर्वाणि भूतानि पार्थिवः पुरुषः शारीरश्चेति चतुष्टयमेकं मधुवि शेषः । मधुशब्दार्थमाह-सर्वेति । अस्येति पृथिव्यादेरिति यावत् । परस्परमुपकार्योपकारकभावे फलितमाह-अत इति । अस्येति सर्वं जगदुच्यते । उक्तं च यस्मात्परस्परोपकार्योपकारकभूतमित्यादि । भवत्वनेन न्यायेन मधुपर्यायेषु सर्वेषु कारणोपदेशो ब्रह्मोपदेशस्तु कथमित्याशङ्क्याऽऽह-यस्मादिति । स प्रकृत आत्मैवायं चतुर्धोक्तो भेद इति योजना । इदमिति चतुष्टयकल्पनाधिष्ठानविषयं ज्ञानं परामृशति । इदं ब्रह्मेत्यत्र चतुष्टयाधिष्ठानमिदंशब्दार्थः । तृतीये च तस्य प्रकृतत्वं दर्शयति-यद्विषयेति । इदं सर्वमित्यत्र ब्रह्मज्ञानमिदमित्युक्तम् । सर्वं सर्वात्मसाधनमिति यावत् । तदेव स्पष्टयति--यस्मादिति ॥ १ ॥

इमा आपः सर्वेषां भूतानां मध्वासामपाꣳ
सर्वाणि भूतानि मधु यश्चायमास्वप्सु तेजो-
मयोऽमृतमयः पुरुषो यश्चायमध्यात्मꣳ रैत-

---

१ ग. °तज्जगज्जा° । २ ख. °यमितीत्ये° । ३ च. ढ °मितीत्ये° । ४ ख. ढ. °ष. का° । ५ ध. कार्यकर° ।

सस्तेजोमयोऽमृतमय, पुरुषोऽयमेव स योऽ-
यमात्मेदममृतमिदं ब्रह्मेदꣳ सर्वम् ॥ २ ॥

तथाऽऽपः । अध्यात्मं रेतस्यपां विशेषतोऽवस्थानम् ॥ २ ॥

यथा पृथिवी मधुत्वेन व्याख्याता तथाऽऽपोऽपि व्याख्येया इत्याह—तथेति । रैतस इति विशेषणस्यार्थमाह—अध्यात्मामिति । 'आपो रेतो भूत्वा शिश्नं प्राविशन्' इति हि श्रुत्यन्तरम् ॥ २ ॥

अयमग्निः सर्वेषां भूतानां मध्वस्याग्नेः सर्वाणि
भूतानि मधु यश्चायमस्मिन्नग्नौ तेजोमयोऽमृत-
मयः पुरुषो यश्चायमध्यात्मं वाङ्मयस्तेजो-
मयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेद-
ममृतमिदं ब्रह्मेदꣳ सर्वम् ॥ ३ ॥

तथाऽग्निः । वाङ्मयस्याग्नेर्विशेषतोऽवस्थानम् ॥ ३ ॥

पृथिव्यामप्सु चोक्तं न्यायमग्नावतिदिशति—तथेति । वाङ्मय इत्यस्यार्थमाह—वाचीति । अग्निर्वाग्भूत्वा मुखं प्राविशदिति हि श्रूयते ॥ ३ ॥

अयं वायुः सर्वेषां भूतानां मध्वस्य वायोः सर्वाणि
भूतानि मधु यश्चायमस्मिन्वायौ तेजोमयोऽमृतमयः
पुरुषो यश्चायमध्यात्मं प्राणस्तेजोमयोऽमृतमयः
पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदꣳ
सर्वम् ॥ ४ ॥

तथा वायुः । अध्यात्मं प्राणो भूतानां शरीरारम्भकत्वेनोपकारा-न्मधुत्वं तदन्तर्गतानां तेजोमयादीनां करणत्वेनोपकारान्मधुत्वम् । तथा चोक्तं "तस्यैव वाचः पृथिवी शरीरं ज्योतीरूपमयमग्निः" इति ॥ ४ ॥

अग्नावुक्तं न्यायं वायौ योजयति—तथेति । 'वायुः प्राणो भूत्वा नासिके प्राविशत्' इति श्रुत्यन्तरमाश्रित्याऽऽह—अध्यात्ममिति । पृथिव्यादीनां तदन्तर्वर्तिनां च पुरुषाणामेकवाक्योपात्तानामेकरूपं मधुत्वमिति शङ्कां परिहरन्नवान्तरविभागमाह—भूतानामिति । पृथिव्यादीनां कार्यत्वं तेजोमयादीनां करणत्वमित्यत्र समान्नाधिकारस्थमतिमाह—तथा चोक्तमिति ॥ ४ ॥

अयमादित्यः सर्वेषां भूतानां मध्वस्याऽऽदित्यस्य
सर्वाणि भूतानि मधु यश्चायमस्मिन्नादित्ये तेजो-
मयोऽमृतमयः पुरुषो यश्चायमध्यात्मं चाक्षुषस्तेजो-
मयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृत-
मिदं ब्रह्मेदꣳ सर्वम् ॥ ५ ॥

तथाऽऽदित्यो मधु । चाक्षुषोऽध्यात्मम् ॥ ५ ॥

यद्यप्यादित्यस्तृतीये भूतेऽन्तर्भवति तथाऽपि देवताभेदमाश्रित्याऽऽवृत्तं न्यायं तस्मिन्नतिदिशति—तथेति । ' आदित्यश्चक्षुर्भूत्वाऽक्षिणी प्राविशत् ' इति श्रुतिमाश्रित्याऽऽह—चाक्षुष इति ॥ ५ ॥

इमा दिशः सर्वेषां भूतानां मध्वासां दिशाꣳ
सर्वाणि भूतानि मधु यश्चायमासु दिक्षु तेजो-
मयोऽमृतमयः पुरुषो यश्चायमध्यात्मꣳ श्रौत्रः
प्रातिश्रुत्कस्तेजोमयोऽमृतमयः पुरुषोऽयमेव
स योऽयमात्मेदममृतमिदं ब्रह्मेदꣳ सर्वम् ॥ ६॥

तथा दिशो मधु । दिशां यद्यपि श्रोत्रमध्यात्मं शब्दप्रतिश्रवणवेलायां तु विशेषतः संनिहितो भवतीत्यध्यात्मं प्रातिश्रुत्कः प्रतिश्रुत्कायां प्रतिश्रवणवेलायां भवः प्रातिश्रुत्कः ॥ ६ ॥

आदित्यगतं न्यायं दिक्षु संपादयति—तथेति । ' दिशः श्रोत्रं भूत्वा कर्णौ प्राविशन् ' इति श्रुतेः श्रोत्रमेव दिगामध्यात्मं तथा चाध्यात्मं श्रौत्र इत्येव वक्तव्ये कथं प्रातिश्रुत्क इति विशेषणमित्याशङ्क्याऽऽह—दिशामिति । तथाऽपीत्यस्मिन्नर्थे तुशब्दः ॥ ६ ॥

अयं चन्द्रः सर्वेषां भूतानां मध्वस्य चन्द्रस्य
सर्वाणि भूतानि मधु यश्चायमस्मिꣳश्चन्द्रे ते-
जोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं मान-

---

१ क. ख. ग ङ. च छ ज ढ °त्वं तथाऽपि शं° । २ ख ग. च. छ. झ ढ. शब्दः प्र° । ३ च. ढ. °र्यां वि° ।

सस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमा-
त्मेदममृतमिदं ब्रह्मेद॰ सर्वम् ॥ ७ ॥

तथा चन्द्रः । अध्यात्मं मानसः ॥ ७ ॥

दिक्षु व्यवस्थितं न्यायं चन्द्रे दर्शयति-तथेति । 'चन्द्रमा 'मनो भूत्वा हृदयं प्राविशत्' इति श्रुतिमनुसृत्याऽऽह-अध्यात्ममिति ॥ ७ ॥

इयं विद्युत्सर्वेषां भूतानां मध्वस्यै विद्युतः सर्वाणि
भूतानि मधु यश्चायमस्यां विद्युति तेजोमयोऽमृत-
मयः पुरुषो यश्चायमध्यात्मं तैजसस्तेजोमयोऽमृत-
मयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मे-
दं॰ सर्वम् ॥ ८ ॥

तथा विद्युत् । त्वक्तेजसि भवस्तैजसोऽध्यात्मम् ॥ ८ ॥

चन्द्रवद्विद्युतोऽपि मधुत्वमाह-तथेति । अध्यात्मं तैजस इत्यस्यार्थमाह-त्वगिति ॥ ८ ॥

अय॰ स्तनयित्नुः सर्वेषां भूतानां मध्वस्य स्तन-
यित्नोः सर्वाणि भूतानि मधु यश्चायमस्मिन्स्तन-
यित्नौ तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्म॰
शाब्दः सौवरस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स
योऽयमात्मेदममृतमिदं ब्रह्मेद॰ सर्वम् ॥ ९ ॥

तथा स्तनयित्नुः । शब्दे भवः शाब्दोऽध्यात्मं यद्यपि तथाऽपि स्वरे विशेषतो भवतीति सौवरोऽध्यात्मम् ॥ ९ ॥

पर्जन्योऽपि विद्युदादिवत्सर्वेषां भूतानां मधु भवतीत्याह-तथेति । अध्यात्मं शाब्दः सौवर इत्यस्यार्थमाह-शब्दे भव इति । यद्यप्यध्यात्मं शब्दे भव इति व्युत्पत्त्या शाब्दः पुरुषस्तथाऽपि स्वरे विशेषतो भवतीत्यध्यात्मं सौवरः पुरुष इति योजना ॥ ९ ॥

अयमाकाशः सर्वेषां भूतानां मध्वस्याऽऽकाशस्य
सर्वाणि भूतानि मधु यश्चायमस्मिन्नाकाशे तेजो-

१ ग. °ध्वस्या वि° ।

मयोऽमृतमयः पुरुषो यश्चायमध्यात्मꣳ हृद्याका-
शस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमा-
त्मेदममृतमिदं ब्रह्मेदꣳ सर्वम् ॥ १० ॥

तथाऽऽकाशः । अध्यात्मं हृद्याकाशः ॥ १० ॥

स्तनयित्नावुक्तं न्यायमाकाशेऽतिदिशति—तथेति ॥ १० ॥

आकाशान्ताः पृथिव्यादयो भूतगणा देवतागणाश्च कार्यकरण-संघातात्मान उपकुर्वन्तो मधु भवन्ति प्रति शरीरिणमित्युक्तम् । येन ते प्रयुक्ताः शरीरिभिः संबध्यमाना मधुत्वेनोपकुर्वन्ति तद्वक्तव्यमि-तीदमारभ्यते—

अयं धर्मः सर्वेषां भूतानां मध्वस्य धर्मस्य सर्वाणि
भूतानि मधु यश्चायमस्मिन्धर्मे तेजोऽमृतमयः
पुरुषो यश्चायमध्यात्मं धार्मस्तेजोमयोऽमृतमयः
पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदꣳ
सर्वम् ॥ ११ ॥

अयं धर्मोऽयमित्यप्रत्यक्षोऽपि धर्मः कार्येण तत्प्रयुक्तेन प्रत्यक्षेण व्यपदिश्यतेऽयं धर्म इति प्रत्यक्षवत् । धर्मश्च व्याख्यातः श्रुतिस्मृति-लक्षणः क्षत्त्रादीनामपि नियन्ता जगतो वैचित्र्यकृत्पृथिव्यादीनां परि-णामहेतुत्वात्प्राणिभिरनुष्ठीयमानरूपश्च । तेन चायं धर्म इति प्रत्यक्षेण व्यपदेशः । सत्यधर्मयोश्चाभेदेन निर्देशः कृतः शास्त्राचारलक्षणयोरिह तु भेदेन व्यपदेश एकत्वे सत्यपि । दृष्टादृष्टभेदरूपेण कार्यारम्भकत्वात् । यस्त्वदृष्टोऽपूर्वाख्यो धर्मः स सामान्यविशेषात्मनाऽदृष्टेन रूपेण कार्य-मारभते सामान्यरूपेण पृथिव्यादीनां प्रयोक्ता भवति विशेषरूपेण चाध्यात्मं कार्यकरणसंघातस्य । तत्र पृथिव्यादीनां प्रयोक्तरि यश्चा-यमस्मिन्धर्मे तेजोमयस्तथाऽध्यात्मं कार्यकरणसंघातकर्तरि धर्मे भवो धार्मः ॥ ११ ॥

१ क. ख. ग. ङ. च. छ. ज. झ. ढ. हृदयाका° । २ ग. ज. °र्यकार° । ३ घ. ङ. च. ज. झ. ढ. °तात्मनोप° । ४ ख. ग. येनैते । ५ ग. घ. ज. झ. °नश्च । ६ ख. च. ढ. °द्गुरू° । ७ च. ढ. °र्यकार° ।

पर्यायान्तरं वृत्तमनूद्योत्थापयति–आकाशान्ता इति । प्रति शरीरिणं सर्वेषां शरीरिणां प्रत्येकमिति यावत् । धर्मस्य शास्त्रैकगम्यत्वेन परोक्षत्वादयमिति निर्देशानर्हत्वमाशङ्क्याऽऽह–अयमिति । यद्यपि धर्मोऽप्रत्यक्षोऽयमिति निर्देशानर्हस्तथाऽपि पृथिव्यादिधर्मकार्यस्य प्रत्यक्षत्वात्तेन कारणस्याभेदौपचारिकमादाय प्रत्यक्षघटादिवदयं धर्म इति व्यपदेशोपपत्तिरित्यर्थः । कोऽसौ धर्मो यस्य प्रत्यक्षत्वेन व्यपदेशस्तत्राऽऽह–धर्मश्चेति । व्याख्यातस्तच्छ्रोरूपमत्यसृजत धर्ममित्यादाविति शेषः । तर्हि तस्य प्रत्यक्षत्वान्न चोदनालक्षणत्वमित्याशङ्क्य गौणत्वमुख्यत्वाभ्यामविरोधमभिप्रेत्याऽऽह–श्रुतीति । तस्मिन्नेव कार्यलिङ्गकमनुमानं सूचयति––क्षत्त्रादीनामिति । तत्रैवानुमानान्तरं विवक्षित्वोक्तम्––जगत इति । जगद्वैचित्र्यकारित्वे हेतुमाह––पृथिव्यादीनामिति । धर्मस्य प्रत्यक्षेण व्यपदेशे हेत्वन्तरमाह––प्राणिभिरिति । तेनानुष्ठीयमानाचारेण प्रत्यक्षेण धर्मस्य लक्ष्यमाणत्वेनेति यावत् । ननु तृतीयेऽध्याये यो वै स धर्मः सत्यं वै तदिति सत्यधर्मयोरभेदवचनात्तयोर्भेदेनात्र पर्यायद्वयोपादानमनुपपन्नमत आह––सत्येति । कथमेकत्वे सति भेदेनोक्तिरित्याशङ्क्याऽऽह––दृष्टेति । अदृष्टेन रूपेण कार्यारम्भकत्वं प्रकटयति–यस्त्विति । सामान्यात्मनाऽऽरम्भकत्वमुदाहरति––सामान्यरूपेणेति । विशेषात्मना कार्यारम्भकत्वं व्यनक्ति––विशेषेति । धर्मस्य द्वौ भेदावुक्तौ तयोर्मध्ये प्रथममधिकृत्य यश्चेत्यादि वाक्यमित्याह–तत्रेति । द्वितीयं विषयीकृत्य यश्चायमध्यात्ममित्यादि प्रवृत्तमित्याह–तथेति ॥ ११ ॥

इदꣳ सत्यꣳ सर्वेषां भूतानां मध्वस्य सत्यस्य सर्वाणि भूतानि मधु यश्चायमस्मिन्सत्ये तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मꣳ सात्यस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स सोऽयमात्मेदममृतमिदं ब्रह्मेदꣳ सर्वम् ॥ १२ ॥

तथा दृष्टेनानुष्ठीयमानेनाऽऽचाररूपेण सत्यारूयो भवति स एव धर्मः सोऽपि द्विप्रकार एव सामान्यविशेषात्मरूपेण । सामान्यरूपः पृथिव्यादिसमवेतो विशेषरूपः कार्यकरणसंघातसमवेतः । तत्र पृथिव्यादिसमवेते वर्तमानक्रियारूपे सत्ये तथाऽध्यात्मं कार्यकरणसंघातस-

---

१ घ. ञ. ण. °व्यादेर्म° । २ घ. ञ °क्षवद्व्यप° । ण. °क्षव्य° । ३ ञ. ढ. र्यकार° । ४ च ञ. ढ. °र्यकार° ।

भवेते सत्ये भवः सात्यः। सत्येन वायुरावातीति श्रुत्यन्तरात् ॥ १२ ॥

इदं सत्यमित्यस्मिन्पर्याये सत्यशब्दार्थमाह-तथा दृष्टेनेति । सोऽपीत्यपि-शब्दो धर्मोदाहरणार्थः । द्वयोरपि प्रकारयोर्विनियोगं विभजते-समान्यरूप इति । उभयत्र समवेतशब्दस्तत्र तत्र कारणत्वेनानुगेत्यर्थः । यश्चायमस्मिन्नि-त्यादिवाक्यस्य विषयमाह-तत्रेति । सत्ये यश्चेत्यादि वाक्यमिति शेषः । यश्चा-यमध्यात्ममित्यादिवाक्यस्य विषयमाह-तथाऽध्यात्ममिति । सत्यस्य पृथि-व्यादौ कार्यकरणसंघाते च कारणत्व प्रमाणमाह-सत्येनेति ॥ २२ ॥

इदं मानुषꣳ सर्वेषां भूतानां मध्वस्य मानुषस्य
सर्वाणि भूतानि मधु यश्चायमस्मिन्मानुषे तेजो-
मयोऽमृतमयः पुरुषो यश्चायमध्यात्मं मानुष-
स्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमा-
त्मेदममृतमिदं ब्रह्मेदꣳ सर्वम् ॥ १३ ॥

धर्मसत्याभ्यां प्रयुक्तोऽयं कार्यकरणसंघातविशेषः। स येन जाति-विशेषेण संयुक्तो भवति स जातिविशेषो मानुषादिः। तत्र मानुषादि-जातिविशिष्टा एव सर्वे प्राणिनिकायाः परस्परोपकार्योपकारकभा-वेन वर्तमाना दृश्यन्ते। अतो मानुषादिजातिरपि सर्वेषां भूतानां मधु। तत्र मानुषादिजातिरपि बाह्याऽऽध्यात्मिकी चेत्युभयथा निर्देशभाग्भ-वति ॥ १३ ॥

इदं मानुषमित्यत्र मानुषग्रहणं सर्वजात्युपलक्षणमित्यभिप्रेत्याऽऽह-धर्मस-त्याभ्यामिति । कथं पुनरेषा जातिः सर्वेषां भूतानां मधु भवति तत्राऽऽह-तत्रेति । भोगभूमिः सप्तम्यर्थः । यश्चायमस्मिन्नित्यादिवाक्यद्वयस्य विषयभेदं दर्शयति-तत्रेति । व्यवहारभूमाविति यावत् । धर्मादिवदित्यपेरर्थः । निर्देष्टुः स्वशरीरनिष्ठा जातिराध्यात्मिकी शरीरान्तराश्रिता तु बाह्येति भेदः । वस्तुतस्तु तत्र नोभयथात्वमित्यभिप्रेत्य निर्देशभागित्युक्तम् ॥ १३ ॥

अयमात्मा सर्वेषां भूतानां मध्वस्याऽऽत्मनः सर्वाणि
भूतानि मधु यश्चायमस्मिन्नात्मनि तेजोमयोऽमृतमयः
पुरुषो यश्चायमात्मा तेजोमयोऽमृतमयः पुरुषोऽयमेव
स योऽयमात्मेदममृतमिदं ब्रह्मेदꣳ सर्वम् ॥ १४ ॥

---

१ क. ख. ज. ढ. ण. °गतार्थः। २ च. ढ. लक्ष्यन्ते। ३ ख. घ ढ. °निविष्टा जा°।

यस्तु कार्यकरणसंघातो मानुषादिजातिविशिष्टः सोऽयमात्मा सर्वेषां भूतानां मधु । नन्वयं शारीरशब्देन निर्दिष्टः पृथिवीपर्याय एव । न । पार्थिवांशस्यैव तत्र ग्रहणात् । इदं तु सर्वात्मा प्रत्यस्तमिताध्यात्माधिभूतादिसर्वविशेषः सर्वभूतदेवनागणविशिष्टः कार्यकरणसंघातः सोऽयमात्मेत्युच्यते । तस्मिन्नस्मिन्नात्मनि तेजोमयोऽमृतमयः पुरुषोऽमूर्तरस सर्वात्मको निर्दिश्यते । एकदेशेन तु पृथिव्यादिषु निर्दिष्टोऽत्राध्यात्मविशेषाभावात्स न निर्दिश्यते । यस्तु परिशिष्टो विज्ञानमयो यदर्थोऽयं देहलिङ्गसंघात आत्मा स यश्चायमात्मेत्युच्यते ॥ १४ ॥

अन्तिमं पर्यायमवतारयति—यस्मिन्निति । आत्मनः शारीरेण गतत्वात्पुनरुक्तिरनुपयुक्तेति शङ्कते—नन्विति । अवयवावयविविषयत्वेन पर्यायद्वयमपुनरुक्तमिति परिहरति—नेत्यादिना । परमात्मानं व्यावर्तयति—सर्वभूतेति । चेतनं व्यवच्छिनत्ति—कार्येति । यश्चायमस्मिन्नित्यादिवाक्यस्य विषयमाह—तस्मिन्निति । यश्चायमध्यात्ममिति किमिति नोक्तमित्याशङ्क्याऽऽह—एकदेशेनेति । अत्रेत्यन्त्यपर्यायोक्तिः । यश्चायमात्मेत्यस्यार्थमाह—यस्मिन्निति ॥ १४ ॥

स वा अयमात्मा सर्वेषां भूतानामधिपतिः सर्वेषां भूतानाꣳ राजा तद्यथा रथनाभौ च रथनेमौ चाराः सर्वे समर्पिता एवमेवास्मिन्नात्मनि सर्वाणि भूतानि सर्वे देवाः सर्वे लोकाः सर्वे प्राणाः सर्व एत आत्मानः समर्पिताः ॥ १५ ॥

यस्मिन्नात्मनि परिशिष्टो विज्ञानमयोऽन्त्ये पर्याये प्रवेशितः सोऽयमात्मा । तस्मिन्नविद्याकृतकार्यकरणसंघातोपाधिविशिष्टे ब्रह्मविद्यया परमार्थात्मनि प्रवेशिते स एवमुक्तोऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघनभूतः सर्वेषां भूतानामयमात्मा सर्वैरुपास्यः सर्वेषां भूतानामधिपतिः सर्वभूतानां स्वतन्त्रो न कुमारामात्यवार्किं तर्हि सर्वेषां भूतानां राजा । राजत्वविशेषणमधिपतिरिति भवति कश्चिद्राजोचितवृत्तिमाश्रित्य राजा न त्वधिपतिरतो विशिनष्ट्यधिपतिरिति । एवं सर्वभूतात्मा विद्वान्ब्रह्मविन्मुक्तो भवति यदुक्तं ब्रह्मविद्यया सर्वं भविष्यन्तो मनु-

१ च. °र्यकार° । २ ख. ङ. °धिदेवादि° । ३ क. घ. च छ. ज. झ. ढ. °ताधिदेवादि° । ४ क. छ. ढ. °तागुण° । ५ ज. ट °र्यकार° । ६ क. ख. ढ. °न्तिमप° । ७ घ. ञ. °मिन्यादि कि° । ८ क. ग. ङ. ज. ट. ठ. ड. सर्व । ९ च. °र्यकार° । १० च. ढ. °तः स वै स एवायमात्माऽव्यवहितपूर्वपर्याये तेजोमय इत्यादिना निर्दिष्टो विज्ञानात्मा विद्वान्सर्वे° ।

ष्या मन्यन्ते किमु तद्ब्रह्मावेद्यस्मात्तत्सर्वमभवदितीदं तद्व्याख्यातम् । एवमात्मानमेव सर्वात्मत्वेनाऽऽचार्यागमाभ्यां श्रुत्वा मत्वा तर्कतो विज्ञाय साक्षादेवं यथा मधुब्राह्मणे दर्शितं तथा । तस्माद्ब्रह्मविज्ञाना-देवंलक्षणात्पूर्वमपि ब्रह्मैव सदविद्ययाऽब्रह्मऽऽसीत्सर्वमेव च सदसर्व-मासीत्तां त्वविद्यामस्माद्विज्ञानात्तिरस्कृत्य ब्रह्मविद्ब्रह्मैव सन्ब्रह्माभव-त्सर्वः स सर्वमभवत् ।

स वा अयमात्मेत्यस्यार्थमाह—यस्मिन्निति । पारिशिष्टः पूर्वपर्यायेष्वनुपदि-ष्टोऽन्ये च पर्याये यश्चायमात्मेत्युक्तो विज्ञानमयो यस्मिन्नात्मनि खिल्यदृष्टान्तव-च्चेता प्रवेशितस्तेन परेणाऽऽत्मना तादात्म्यं गतो विद्वानत्राऽऽत्मशब्दार्थः । उक्त-मात्मशब्दार्थमनूद्य सर्वेषामित्यादि व्याचष्टे—तस्मिन्निति । अविद्यया कृतः कार्यकरणसंघात एवोपाधिस्तेन विशिष्टे जीवे तस्मिन्परमार्थात्मनि ब्रह्मणि ब्रह्म-विद्यया प्रवेशिते स एवायमात्मा यथोक्तविशेषणः सर्वेषां भूतानाम-धिपतिरिति संबन्धः । व्याख्येयं पदमादाय तस्य वाच्यमर्थमाह—सर्वेषामिति । तस्यैव विवक्षितोऽर्थः सर्वैरुपास्य इत्युक्तः । स्वातन्त्र्यं व्यतिरेकद्वारा स्फोरयति—नेत्यादिना । सर्वेषां भूतानां राजेत्येतावतैव यथोक्तार्थसिद्धौ किमित्यधिपतिरिति विशेषणमित्याशङ्क्याऽऽह—राजत्वेति । राजत्वजात्यनाक्रान्तोऽपि कश्चित्तदुचि-तपरिपालनादिव्यवहारवानित्युपलब्धं न पुनस्तस्य स्वातन्त्र्यं राजपरतन्त्रत्वात्तस्मा-त्ततो व्यवच्छेदार्थमधिपतिरिति विशेषणमित्यर्थः । राजाऽधिपतिरित्युभयोरपि मिथो विशेषणविशेष्यत्वमभिप्रेत्य वाक्यार्थं निगमयति—एवमिति । उक्तस्य विद्याफलस्य तृतीयेनैकवाक्यत्वमाह—यदुक्तमिति । तदेव व्याख्यातं स्फोरयति—एवमिति । भैत्रेयीब्राह्मणोक्तक्रमेणेति यावत् । एवमित्यस्यार्थं कथयति—यथे-ति । मधुब्राह्मणे पूर्वब्राह्मणे चोक्तक्रमेणाऽऽत्मनि श्रवणादित्रयं संपाद्य विद्वान्ब्र-ह्माभवदिति संबन्धः । ननु मोक्षावस्थायामेव विदुषो ब्रह्मत्वापरिच्छिन्नत्वं न प्रा-च्यामविद्यादशायामित्याशङ्क्याऽऽह—तस्मादिति । समानाधिकरणं पञ्चमीत्रयम् । एवंलक्षणोऽहं ब्रह्मास्मीति श्रवणादिकृतात्तत्त्वसाक्षात्कारादिति यावत् । अब्रह्म-त्वादिधीध्वस्तिस्तर्हि कथमित्याशङ्क्याऽऽह—तां त्विति ।

---

१ च °देव य°। २ ख. ग. ङ. च छ. ज. झ. ढ. °णेन द्°। ३ कं. °तं तस्मा°। ४ क. ख. ङ. छ. °त्सर्वं सत्सर्वम°। झ. °त्सर्वं स सर्वम°। ५ क. ख. ढ. °येऽयमा°। ६ घ. ञ. ण. °ते सति स। ७ घ. ण. °ह्मत्वमप°। ८ घ. ञ. ण. °त्वं च न। ९ क. ख. ञ. ढ °णा °। १० क. ख. ञ. ढ. °तत्साक्षा°।

परिसमाप्तः शास्त्रार्थो यदर्थः प्रस्तुतः । तस्मिन्नेतस्मिन्सर्वात्मभूते ब्रह्मविदि सर्वात्मनि सर्वं जगत्समर्पितमित्येतस्मिन्नर्थे दृष्टान्त उपादीयते—तथथा रथनाभौ च रथनेमौ चाराः सर्वे समर्पिता इति प्रसिद्धोऽर्थः । एवमेवास्मिन्नात्मनि परमात्मभूते ब्रह्मविदि सर्वाणि भूतानि ब्रह्मादिस्तम्बपर्यन्तानि सर्वे देवा अग्न्यादयः सर्वे लोका भूरादयः सर्वे प्राणा वागादयः सर्व एत आत्मानो जलचन्द्रवत्प्रतिशरीरानुप्रवेशिनोऽविद्याकल्पिताः । सर्वं जगदस्मिन्समर्पितम् । यदुक्तं ब्रह्मविद्वामदेवः प्रतिपेदेऽहं मनुरभवं सूर्यश्चेति । स एष सर्वात्मभावो व्याख्यातः । स एष विद्वान्ब्रह्मवित्सर्वोपाधिः सर्वात्मा सर्वो भवति । निरुपाधिर्निरुपाख्योऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघनोऽजोऽजरोऽमृतोऽभयोऽचलो नेति नेत्यस्थूलोऽनणुरित्येवंविशेषणो भवति ।

वृत्तमनूद्योत्तरग्रन्थमवतारयति—परिसमाप्त इति । यस्य शास्त्रस्यार्थो विषयप्रयोजनाख्यो ब्रह्मकाण्डिकायां चतुर्थादौ च प्रस्तुतस्तस्यार्थो यथोक्तन्यायेन निर्धारित इत्यनुवादार्थः । सर्वात्मभूतत्वं सर्पादिवत्कल्पितानां सर्वेषामात्मभावेन स्थितत्वम् । सर्वं ब्रह्म तद्रूपत्वं सर्वात्मत्वम् । सर्व एत आत्मान इति कुतो भेदोक्तिरात्मैकत्वस्य शास्त्रीयत्वादित्याशङ्क्याऽऽह—जलचन्द्रवदिति । दार्ष्टान्तिकभागस्य संपिण्डितमर्थमाह—सर्वमिति । उक्तस्य सर्वात्मभावस्य तृतीयेनैकवाक्यत्वं निर्दिशति—यदुक्तमिति । सर्वात्मभावे विदुषः सप्रपञ्चत्वं स्यादित्याशङ्क्याऽऽह—स एष इति । सर्वेण कल्पितेन दृश्येन सहितमधिष्ठानभूतं ब्रह्म प्रत्यग्भावेन पश्यन्विद्वान्सर्वोपाधिस्तत्तद्रूपेण स्थितः सर्वो भवति । तदेवं कल्पितं सप्रपञ्चत्वमविद्वद्दृष्ट्या विदुषोऽभीष्टमित्यर्थः । विद्वद्दृष्ट्या तस्य निष्प्रपञ्चत्वं दर्शयति—निरुपाधिरिति । निरुपाख्यत्वं शब्दप्रत्ययागोचरत्वं ब्रह्मणः सप्रपञ्चत्वमविद्याकृतं निष्प्रपञ्चत्वं तात्त्विकमित्यागमार्थाविरोध उक्तः ।

तमेतमर्थमजानन्तस्तार्किकाः [१]केचित्पण्डितंमन्याश्चाऽऽगमविदः शास्त्रार्थं विरुद्धं मन्यमाना विकल्पयन्तो मोहमगाधमुपयान्ति । तमेतमर्थमेतौ मन्त्रावनुवदतः—" अनेजदेकं मनसो जवीयस्तदेजति तन्नैजति " इति । तथा च तैत्तिरीयके—" यस्मात्परं नापरमस्ति किंचित् ।

१ घ. °दि सर्वात्मनि स° । २ फ. च. छ. सर्वं । ३ ख. ग. घ. ङ. छ ज. °रोऽमरोऽमृ°, ४ ग. घ. ङ. च. छ. झ. ट. केचन पण्डि° । ५ ङ. ज. °पयन्ति ।

एतत्साम गायन्नास्ते । अहमन्नमहमन्नमहमन्नम् " इत्यादि । तथा च च्छान्दोग्ये-"जक्षत्क्रीडन्रममाणः स यदि पितृलोककामः सर्वगन्धः सर्वरसः सर्वज्ञः सर्वेवित्" इत्यादि । आथर्वणे च-"दूरात्सुदूरे तदिहान्तिके चं" । कठवल्लीष्वपि-" अणोरणीयान्महतो महीयान् " " कस्तं मदामदं देवम् " "तद्धावतोऽन्यानत्येति तिष्ठंत् " इति च । तथा गीतासु-" अहं क्रतुरहं यज्ञः " " पिताऽहमस्य जगतः " "नाऽऽदत्ते कस्यचित्पापम् " " समं सर्वेषु भूतषु " " अविभक्तं विभक्तेषु " " ग्रसिष्णु प्रभविष्णु च " इत्येवमाद्यागमार्थं विरुद्धमिव प्रतिभाँन्तं मन्यमानाः स्वचित्तसामर्थ्यादर्थनिर्णयाय विकल्पयन्तोऽस्त्यात्मा नास्त्यात्मा कर्ताऽकर्ता मुक्तो बद्धः क्षणिको विज्ञानमात्रं शून्यं चेत्येवं विकल्पयन्तो न पारमधिगच्छन्त्यविद्याया विरुद्धधर्मदर्शित्वात्सर्वत्र । तस्मात्तत्र य एव श्रुत्याचार्यदर्शितमार्गानुसारिणस्त एवाविद्यायाः पारमधिगच्छन्ति । त एव चास्मान्मोहसमुद्रादगाधादुत्तरिष्यन्ति नेतरे स्वबुद्धिकौशलानुसारिणः ॥ १५ ॥

कथं तर्हि तार्किका मीमांसकाश्च शास्त्रार्थं विरुद्धं पश्यन्तो ब्रह्मास्ति नास्तीत्यादि विकल्पयन्तो मोमुह्यन्ते तत्राऽऽह-तमेतमिति । वादिव्यामोहस्याज्ञानं मूलमुक्त्वा प्रकृते ब्रह्मणो द्वैरूप्ये प्रमाणमाह-तामित्यादिना । तैत्तिरीयश्रुतावादिशब्देनाहमन्नमन्नमदन्तमद्मीत्यादि गृह्यते । छान्दोग्यश्रुतावादिशब्देन सत्यकामः सत्यसंकल्पो विजरो विमृत्युरित्यादि गृहीतम् । श्रुतिसिद्धे द्वैरूप्ये स्मृतिमपि संपादयति-तथेति । पूर्वोक्तप्रकारेणाऽऽगमार्थविरोधसमाधाने विद्यमानेऽपि तदज्ञानाद्वादिर्विभ्रान्तिरित्युपसंहरति-इत्येवमादीति । विकल्पमेव स्फुटयति-अस्तीति । सर्वत्र श्रुतिस्मृतिष्वात्मनीति यावत् । के तर्हि पारमविद्यायाः समधिगच्छन्ति तत्राऽऽह-तस्मादीति । ब्रह्मज्ञानफलमाह-त एवेति ॥ १५ ॥

परिसमाप्ता ब्रह्मविद्याऽमृतत्वसाधनभूता । यां मैत्रेयी पृष्टवती भर्तारं यदेव भगवानमृतत्वसाधनं वेद तदेव मे ब्रूहीति । एतस्या ब्रह्मविद्यायाः स्तुत्यर्थेयमाख्यायिकाऽऽनीता तस्या आख्यायिकायाः संक्षेपतोऽर्थप्रकाशनार्थावेतौ मन्त्रौ भवतः । एवं हि मन्त्रब्राह्मणाभ्यां स्तुत-

---

१ क. ज. झ. °रात्सदू° । २ घ. ज. चेति । ३ ग. घ. ज. °द्धत् । त° । ४ घ. छ. ञ. झ. ढ. °भात म° । ५ क. ञ ण. °मार्ये वि° । ६ घ. ञ. ण. °दिभा° । ७ क. ख. ग. ढ. पारं ब्रह्मवि° । ण. पारं ब्रह्मावि° । ८ झ. °क्षेपेणार्थ° ।

त्वादमृतत्वसर्वप्राप्तिसाधनत्वं ब्रह्मविद्यायाः प्रकटीकृतं राजमार्गमुपनीतं भवति। यथाऽऽदित्य उद्यञ्शार्वरं तमोऽपनयतीति तद्वत्। अपि चैवं स्तुता ब्रह्मविद्या येन्द्रराजरक्षिता सा दुष्प्राप्या देवैरपि। यस्मादश्विभ्यामपि देवभिषग्भ्यामिन्द्ररक्षिता विद्या महताऽऽयासेन प्राप्ता। ब्राह्मणस्य शिरश्छित्त्वाऽऽहृत्यं शिरः प्रतिसंधाय तस्मिन्निन्द्रेण छिन्ने पुनः स्वशिर एव प्रतिसंधाय तेन ब्राह्मणस्य स्वशिरसैवोक्ताऽशेषा ब्रह्मविद्या श्रुता। तस्मात्ततः परतरं किंचित्पुरुषार्थसाधनं न भूतं न भावि वा कुत एव वर्तमानमिति नातः परा स्तुतिरस्ति।

तद्यथेत्यादिवाक्यार्थं विस्तरेणोक्त्वा वृत्तं कीर्तयति—**परिसमाप्तेति**। ब्रह्मविद्या परिसमाप्ता चेत्किमुत्तरग्रन्थेनेत्याशङ्क्याऽऽह—**एतस्या इति**। **इषमिति** प्रवर्ग्यप्रकरणस्थामाख्यायिकां परामृशति आनीतेदं वै तन्मध्वित्यादिना ब्राह्मणेनेति शेषः। तदेतदृषिरित्यादेस्तात्पर्यमाह—**तस्या इति**। तद्वां नरेत्यादिरेको मन्त्रः। आथर्वणाश्वेत्यादिरपरः। मन्त्रब्राह्मणाभ्यां वक्ष्यमाणरीत्या ब्रह्मविद्यायाः स्तुतत्वे किं सिध्यतीत्याशङ्क्याऽऽह—**एवं हीति**। तस्या मुक्तिसाधनत्वं दृष्टान्तेन स्फुटयति—**यथेति**। केन प्रकारेण ब्रह्मविद्यायाः स्तुतत्वं तदाह—**अपि चेति**। अपिशब्दः स्तावकब्राह्मणसंभावनार्थः। मन्त्रद्वयसमुच्चयार्थश्चशब्दः। एवं शब्दसूचितं स्तुतिप्रकारमेव प्रकटयति—**येन्द्रेति**। तस्या दुष्प्राप्यत्वे हेतुमाह—**यस्मादिति**। महान्तमायासं स्फुटयति—**ब्राह्मणस्येति**। कृतार्थेनापीन्द्रेण रक्षितत्वे विद्याया दौर्लभ्ये च फलितमाह—**तस्मादिति**।

अपि चैवं स्तूयते ब्रह्मविद्या। सर्वपुरुषार्थानां कर्म हि साधनमिति लोके प्रसिद्धम्। तच्च कर्म वित्तसाध्यं तेनाऽऽशाऽपि नास्त्यमृतत्वस्य तदिदममृतत्वं केवलयाऽऽत्मविद्यया कर्मनिरपेक्षया प्राप्यते। यस्मात्कर्मप्रकरणे वक्तुं प्राप्ताऽपि सती प्रवर्ग्यप्रकरणे कर्मप्रकरणादुच्चीर्य कर्मणा विरुद्धत्वात्केवलसंन्यासमहिताऽभिहिताऽमृतत्वसाधनाय। तस्माज्ज्ञातः परं पुरुषार्थसाधनमस्ति। अपि चैवं स्तुता ब्रह्मविद्या। सर्वो हि लोको द्वन्द्वारामः "स वै नैव रेमे तस्मादेकाकी न रमते"

---

१ ख. °सर्वाप्त्यादिसा°। २ क. °प्राप्त्यादिसा°। ३ घ. ज °मार्गं उप°। ४ घ. ज. °न्द्र°। ५ ग. अ. दुष्प्रापा। ६ ख. च. ज. ढ. °त्त्वाऽश्वस्य शि°। ङ. छ. °त्त्वाऽश्वशि° ७ घ. ङ. तत्राऽऽह। ८ घ. अ. ण. इन्द्रेति। ९ क. ख. ढ. ण. °प्रापत्वे। १० क. °स्य। यदि°। ११ घ. ङ. ज. °बलं सं°। १२ ख. परतरं।

इति श्रुतेः । याज्ञवल्क्यो लोकसाधारणोऽपि सन्नात्मज्ञानबलाद्भार्यापुत्रवित्तादिसंसाररतिं परित्यज्य प्रज्ञानतृप्त आत्मरतिर्बभूव । अपि चैवं स्तुता ब्रह्मविद्या । यस्माद्याज्ञवल्क्येन संसारमार्गाद्व्युत्तिष्ठताऽपि प्रियायै भार्यायै प्रीत्यर्थमेवाभिहिता । प्रियं भाषस एह्यास्स्वेति लिङ्गात् ।

न केवलमुक्तेनैव प्रकारेण विद्या स्तूयते किंतु प्रकारान्तरेणापीत्याह-अपि चेति । तदेव प्रकारान्तरं प्रकटयति-सर्वति । केवलयेत्यस्य व्याख्यानं कर्मनिरपेक्षयेति । तत्र हेतुमाह-यस्मादिति । किमिति कर्मप्रकरणे प्राप्ताऽपि प्रकरणान्तरे कथ्यते तत्राऽऽह-कर्मणेति । प्रसिद्धं पुमर्थोपायं कर्म त्यक्त्वा विद्यायामेवाऽऽदरे तदधिकृता समधिगतेति फलितमाह-तस्मादिति । प्रकारान्तरेण ब्रह्मविद्यायाः स्तुतिं दर्शयति-अपि चेति । अनात्मरतिं त्यक्त्वाऽऽत्मन्येव रतिहेतुत्वान्महतीयं विद्येत्यर्थः । विद्यान्तरेण तस्याः स्तुतिमाह-अपि चैवमिति । कथं ब्रह्मविद्या भार्यायै प्रीत्यर्थमेवोक्तेति गम्यते तत्राऽऽह-प्रियमिति ।

इदं वै तन्मध दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच ।
तदेतदृषिः पश्यन्नवोचत् । तद्वां नरा सनये
दंस उग्रमाविष्कृणोमि तन्यतुर्न वृष्टिम् । द-
ध्यङ् ह यन्मध्वाथर्वणो वामश्वस्य शीर्ष्णा प्र
यदीमुवाचेति ॥ १६ ॥

तत्रेयं स्तुत्यर्थाऽऽख्यायिकेत्यवोचाम । का पुनः साऽऽख्यायिकेति । उच्यते-इदमित्यनन्तरनिर्दिष्टं व्यपदिशति बुद्धेः संनिहितत्वात् । वैशब्दः स्मरणार्थः । तदित्याख्यायिकानिर्वृत्तं प्रकरणान्तराभिहितं परोक्षं वैशब्देन स्मारयन्निह व्यपदिशति । यत्तत्प्रवर्ग्यप्रकरणे सूचितं नाऽऽविष्कृतं मध तदिदं मध्विहानन्तरं निर्दिष्टमियं पृथिवीत्यादिना । कथं तत्र प्रकरणान्तरे सूचितं दध्यङ् ह वा आभ्यामाथर्वणो मधु नाम ब्राह्मणमुवाच ।

आख्यायिकायाः स्तुत्यर्थत्वं मतिपाद्य वृत्तमनूद्याऽऽकाङ्क्षापूर्वकं तामवतार्य व्याकरोति-तत्रेत्यादिना । ब्रह्मविद्या सप्तम्यर्थः । पदार्थमुक्त्वा वाक्यार्थमाह-यदिति । दध्वङ्ङित्यादि व्याकुर्वन्नाकाङ्क्षापूर्वकं प्रवर्ग्यप्रकरणस्थामाख्यायिकामनुकीर्तयति-कथमित्यादिना । आभ्यामश्विभ्यामिति यावत् ।

---

१ क. घ. च. °त । अत्रे° । २ क. ख. ढ हेतुः । ३ झ. °ब्दः स्मार° । ४ क. घ. झ. ण. °ति । अत्रे° ।

तदेनयोः प्रियं धाम तदेवैनयोरेतेनोपगच्छति । स होवाचेन्द्रेण वा उक्तोऽस्म्येतच्चेदन्यस्मा अनुब्रूयास्तत एव ते शिरश्छिन्द्यामिति । तस्माद्वे बिभेमि यद्वै मे स शिरो न च्छिन्द्यात्तद्वा उपनय इति । तौ होचतुरावां त्वा तस्माच्छ्रास्यावहै इति । कथं मा श्रास्यथ इति । यदा नावुपनेष्यसे । अथ ते शिरश्छित्त्वाऽन्यत्राऽऽहृत्योपनिधास्यावः । यथाऽश्वस्य शिर आहृत्य तत्ते प्रतिधास्यावः । तेन नावनुवक्ष्यसि । स यदा नावनुवक्ष्यमि । अथ ते तादिन्द्रः शिरश्छेत्स्यति । अथ ते स्वं शिर आहृत्य तत्ते प्रतिधास्याव इति । तथेति तौ होपानिन्ये । तौ यदोपानिन्ये । अथास्य शिरश्छित्त्वाऽन्यत्रोपनिदधतः । अथाश्वस्य शिर आहृत्य तद्धास्य प्रतिदधतुः । तेन हाऽऽभ्यामनूवाच । स यदाऽऽभ्यामनूवाचाथास्य तादिन्द्रः शिरश्चिच्छेद । अथास्य स्वं शिर आहृत्य तद्धास्य प्रतिदधतारिति । यावत्त प्रवर्ग्यकर्माङ्गभूतं मधु तावदेव तत्राभिहितं न तु कृत्स्नमात्मज्ञानाख्यम् । तत्र याऽऽख्यायिकाऽभिहिता सेह स्तुत्यर्था प्रदर्श्यते । इदं वै तन्मधु दध्यङ्ङाथर्वणोऽनेन प्रपञ्चेनाश्विभ्यामुवाच ।

केन कारणेनोवाचेत्यपेक्षायामाह–तदेनयोरिति । एनयोरश्विनोस्तन्मधु प्रीत्यास्पदमासीत्तद्भक्ताभ्यां प्रार्थितो ब्राह्मणस्तदुवाचेत्यर्थः । यदश्विभ्यां मधु प्रार्थितं तदेनेन वक्ष्यमाणेन प्रकारेण प्रयच्छन्नेवैनयोरश्विनोराचार्यत्वेन ब्राह्मणः समीपगमनं कृतवानित्याह–तदेवेति । आचार्यत्वानन्तरं ब्राह्मणस्य वचनं दर्शयति–स होवाचेति । एतच्छब्दो मध्वनुभवविषयः । यद्यर्थो यच्छब्दः । तच्छब्दस्तर्ह्यर्थः । वां युवामुपनेष्ये शिष्यत्वेन स्वी करिष्यामीति यावत् । तौ देवभिषजावश्विनौ शिरश्छेदनिमित्तं मरणं पश्यन्नर्थः । नावावामुपनेष्यसे शिष्यत्वेन स्वी करिष्यसि यदेति यावत् । अथशब्दस्तदेत्यर्थः । ब्राह्मणस्यानुज्ञानन्तर्यमथेत्युक्तम् । मधुप्रवचनानन्तर्यं तृतीयस्याथशब्दस्यार्थः । यदश्वस्य शिरो ब्राह्मणे निबद्धं तस्य च्छेदनानन्तर्यं चतुर्थस्याथशब्दस्यार्थः । तर्हि समस्तमपि मधु प्रवर्ग्यप्रकरणे प्रदर्शितमेवेति कृतमनेन ब्राह्मणेनेत्याशङ्क्याऽऽह–यावत्त्विति । प्रवर्ग्यप्रकरणे स्थिताऽऽख्यायिका किमर्थमत्राऽऽनीतेत्याशङ्क्य तस्या ब्रह्मविद्यायाः स्तुत्यर्थेयमाख्यायिकेत्यत्रोक्तमुपसंहरति–तत्रेति । ब्राह्मणभागव्याख्यां निगमयति–इदमिति ।

---

१ ख. दर्शिता । २ क. ख. ढ °न प्रकारेणोवा° । ञ. °न क्रमणोवा° । ३ घ. ञ. ण. °त्यर्थे । वां । ४ घ. ञ. °त्यर्थे । ब्रा° ।

तदेतद्दर्शयन्तदेतत्कर्म ऋषिर्मन्त्रः पश्यन्नुपलभमानोऽवोचदुक्तवान् । कथम् । तद्दंस इति व्यवहितेन संबन्धः । दंस इति कर्मणो नामधेयम् । तच्च दंसः किंविशिष्टम् । उग्रं क्रूरम् । वां युवयोः । हे नरा नराकारावश्विनौ । तच्च कर्म किंनिमित्तम् । सनये लाभाय । लाभलुब्धो हि लोकेऽपि क्रूरं कर्माऽऽचरति तथैवानुपलभ्येते यथा लोके तदाविः प्रकाशं कृणोमि करोमि यद्वहासि भवद्भ्यां कृतम् । किमिवेत्युच्यते । तन्यतुः पर्जन्यो नेव । नकारस्तूपरिष्टादुपचार उपमार्थीयो वेदे न प्रतिषेधार्थः । यथाऽश्वं न । अश्वमिवेति यद्वत् । तन्यतुरिव वृष्टिं यथा पर्जन्यो वृष्टिं प्रकाशयति स्तनयित्न्वादिशब्दैस्तद्वदहं युवयोः क्रूरं कर्माऽऽविष्कृणोमीति संबन्धः । नन्वाश्विनोः स्तुत्यर्थौ कथमिमौ मन्त्रौ स्यातां निन्दावचनौ हीमौ । नैष दोषः । स्तुतिरेवैषा न निन्दावचनौ । यस्मादीदृशमप्यतिक्रूरं कर्म कुर्वतोर्युवयोर्न लोम चन मीयत इति । न चान्यत्किंचिद्धीयत एवेति स्तुतावेतौ भवतः । निन्दां प्रशंसां हि लौकिकाः स्मरन्ति । तथा प्रशंसारूपा च निन्दा लोके प्रसिद्धा । दध्यङ्नामाऽऽथर्वणः । हेत्यनर्थको निपातः । यन्मधु कक्ष्यमात्मज्ञानलक्षणमाथर्वणो वां युवाभ्यामश्वस्य शीर्ष्णा शिरसा प्र यदीमुवाच यत्प्रोवाच मधु । ईमित्यनर्थको निपातः ॥ १६ ॥

यदामित्यादिमन्त्रमुत्थाप्य व्याचष्टे—तदेतादिति । कथं लाभायापि क्रूरकर्मानुष्ठानमत आह—लाभेति । ननु प्रतिषेधे मुख्यो नकारः कथमिवार्थे व्याख्यायते तत्राऽऽह—नकारस्त्विति । वेदे पदादुपरिष्टाद्यो नकारः श्रुतः स खलूपचारः सन्नुपमार्थोऽपि संभवति न निषेधार्थ एवेत्यर्थः । तत्रोदाहरणमाह—यथेति । अश्वं न गूढमश्विनेत्यत्र नकारो यथोपमार्थीयस्तथा प्रकृतेऽपीत्यर्थः । तदेव स्पष्टयति—अश्वमिवेति । यद्वदिति । उपमार्थीये नकारे सति वाक्यस्वरूपमनूद्य तदर्थं कथयति—तन्यतुरित्यादिना । विद्यास्तुतिद्वारा तद्वन्तावश्विनावत्र न स्तूयेते किंतु क्रूरकर्मकारित्वेन निन्द्येते तदाँ चाऽऽख्यायिका विद्यास्तुत्यर्थेत्ययुक्तमिति शङ्कते—नन्विति । आख्यायिकाया विद्यास्तुत्यर्थत्वमविरुद्धमिति परिहरति—नैष इति । लोमप्रमाणमपि न हीयत इति यस्मात्तस्माद्विद्यास्तुत्या तद्वतोः स्तुतिरेवात्र विवक्षितेति योजना । यद्यपि क्रूरकर्मकारिणोरश्विनोर्न दृष्टहानिस्तथाऽप्यदृष्टहानिः स्यादेवेत्याशङ्क्य कैमुतिकन्यायेनाऽऽह—न चेति । कथं

---

१ च. ढ. °मन्त्रस्तद्द्रष्टा वा प° । २ च. ढ. लोकेऽपि । ३ ख. हि । ४ ग. घ. ङ. च. छ. ज. झ. ट. °चन । ५ क. हीयत । ६ क. ख. ङ. तद्वन्तावा° । ७ ख. ढ. °दाख्याया° ।

पुनर्निन्दायां दृश्यमानायां स्तुतिरिष्यते तत्राऽऽह—निन्दामिति । नहि निन्दा निन्द्यं निन्दितुमपि तु विधेयं स्तोतुमिति न्यायादित्यर्थः । यथा निन्दा न निन्द्यं निन्दितुमेव यथा स्तुतिरपि स्तुत्यं स्तोतुमेव न भवति किंतु निन्दितुमपि । तथा च नानयोर्व्यवस्थित्वमित्याह—तथेति । तद्वामित्यादिमन्त्रस्य पूर्वार्धं व्याख्याऽऽख्यायिकायाः स्तुत्यर्थत्वविरोधं चोद्धृत्योत्तरार्धं व्याचष्टे—दध्यङ्नामेति । यत्कक्ष्यं ज्ञानाख्यं मधु तदाथर्वणो युवाभ्यामश्वस्य शिरसः प्रोवाच । यच्चासौ मधु युवाभ्यामुक्तवांस्तदहमाविष्कृणोमीति संबन्धः ॥ १६ ॥

इदं वै तन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच । तदेतदृषिः पश्यन्नवोचत् । आथर्वणायाश्विना दधीचेऽस्य शिरः प्रत्यैरयतम् । स वां मधु प्रवोचदृता यन्त्वाष्ट्रं यद्दस्रावपि कक्ष्यं वामिति ॥ १७ ॥

इदं वै तन्मधित्यादि पूर्ववन्मन्त्रान्तरप्रदर्शनार्थम् । तथाऽन्यो मन्त्रस्तामेवाऽऽख्यायिकामनुसरति स्म । आथर्वणो दध्यङ्नामाऽऽथर्वणोऽन्यो विद्यत इत्यतो विशिनष्टि दध्यङ्नामाऽऽथर्वणस्तस्मै दधीच आथर्वणाय हेऽश्विनाविति मन्त्रदृशो वचनम् । अश्व्यमश्वस्य स्वभूतं शिरो ब्राह्मणस्य शिरसि छिन्नेऽश्वस्य शिरश्छित्त्वदृशमतिक्रूरं कर्म कृत्वाऽश्व्यं शिरो ब्राह्मणं प्रत्यैरयतं गमितवन्तौ युवाम् । स चाऽऽथर्वणो वां युवाभ्यां तन्मधु प्रवोचद्यत्पूर्वं प्रतिज्ञातं वक्ष्यामीति । स किमर्थमेवं जीवितसंदेहमारुह्य प्रवोचदित्युच्यते ऋतायन्यत्पूर्वं प्रतिज्ञातं सत्यं तत्परिपालयितुमिच्छन् । जीविताद्पि हि सत्यधर्मपरिपालना गुरुतरेत्येतस्य लिङ्गमेतत् । किं तन्मधु प्रवोचदित्युच्यते । त्वाष्ट्रं त्वष्टाऽऽदित्यस्तस्य संबन्धि यज्ञस्य शिरश्छिन्नं त्वष्टाऽभवत्तत्प्रतिसंधानार्थं प्रवर्ग्यं कर्म । तत्र प्रवर्ग्यकर्माङ्गभूतं यद्विज्ञानं तत्त्वाष्ट्रं मधु यज्ञस्य शिरश्छेदनप्रतिसंधानादिविषयं दर्शनं तत्त्वाष्ट्रं यन्मधु हे दस्रौ दस्राविति परबलानामुपक्षपयितारौ शत्रूणां वा हिंसितारौ । अपि च न केवलं त्वाष्ट्रमेव मधु कर्मसंबन्धि युवाभ्यामवोचदपि च कक्ष्यं गोप्यं रहस्यं परमात्मसंबन्धि यद्विज्ञानं मधु मधुब्राह्मणेनोक्तमध्यायद्वयप्र-

---

१ क. ग. घ. ङ. ज झ. ढ. °ध प्रावो°। २ क. ग. घ. ङ. च. ज. झ. ढ. °द्य प्रावो°। ३ क. ग. घ. ङ. ज. झ. ढ. °धु प्रावो°। ४ क. ख. ङ. छ. झ. ढ. °नं त्वाष्ट्रं।

काशितं तच्च वां युवाभ्यां प्रवोचदित्यनुवर्तते ॥ १७ ॥

समानार्थत्वे किमिति पुनरुच्यते तत्राऽऽह मन्त्रान्तरेति । तुल्यार्थस्य ब्राह्मणस्य तात्पर्यमाह—तथेति । विशेषणकृत्यं दर्शयन्व्याकरोति—दध्यङ्नामेति । पथमप्रभृत्यमित्यादि पदार्थवचनमश्वस्येत्यादौ छित्त्वेत्यस्य कर्मोक्तिरश्व्यं शिर इत्यत्र त्वन्वयार्थमुक्तमिति विभाग । प्रेक्षापूर्वकारिणामीदृशी प्रवृत्तिरयुक्तेति शङ्कित्वा समाधत्ते—स किमर्थमिति । ऋतायन्नित्यत्रार्थसिद्धमर्थं कथयति—जीविताद्पीति । " यज्ञस्य शिरोऽच्छियं ते देवा अश्विनावब्रुवन्भिषजौ वै स्थ इदं यज्ञस्य शिरः प्रतिधत्तम् " इत्यादिश्रुतिमन्तरेणाश्व्याऽऽह—यज्ञस्येत्यादिना । प्रवर्ग्यकर्मण्येवं प्रवृत्तेऽपि प्रकृते विज्ञाने किमायातं तदाह तत्रेति । उक्तमेव संगृह्णाति—यज्ञस्येति । यद्यथोक्तं दर्शनं तत्त्वाख्यं मधु यच्च तन्मधु तेऽश्वावोचदिति संबन्धः । अध्यायद्वयप्रकाशितं तृतीयचतुर्थाभ्यामध्यायाभ्यां प्रकटितमिति यावत् ॥ १७ ॥

इदं वै तन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच ।
तदेतदृषिः पश्यन्नवोचत् । पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः । पुरः स पक्षी भूत्वा पुरः पुरुष आविशादिति । स वा अयं पुरुष. सर्वासु पूर्षु पुरिशयो नैनेन किंचनानावृतं नैनेन किंचनासंवृतम् ॥ १८ ॥

इदं वै तन्मधिवति पूर्ववत् । उक्तौ द्वौ मन्त्रौ प्रवर्ग्यसंबन्ध्याख्यायिकोपसंहर्तारौ । द्वयोः प्रवर्ग्यकर्मार्थयोरध्याययोरर्थं आख्यायिकाभूताभ्यां मन्त्राभ्यां प्रकाशितः । ब्रह्मविद्यार्थयोस्त्वध्याययोरर्थं उत्तराभ्यामृग्भ्यां प्रकाशयितव्य इत्यतः प्रवर्तते । यत्कक्ष्यं च मधूक्तवानाथर्वणो युवाभ्यामित्युक्तम् । किं पुनस्तन्मधित्युच्यते । पुरश्चक्रे पुरः पुराणि शरीराणि यत इयमव्याकृतव्याकरणप्रक्रिया स परमेश्वरो नामरूपे अव्याकृते व्याकुर्वाणः प्रथमं भूरादीँल्लोकान्सृष्ट्वा चक्रे कृतवान्द्विपदो द्विपादुपलक्षितानि मनुष्यशरीराणि पक्षिशरीराणि । तथा

---

१ क. ख. घ ङ. च. झ. ढ. °भ्या प्रावो° । २ घ. ञ. ण. इत्यन्ते । ३ण. र्थंभि° । ४ ञ. ढ. भावः । ५ ख. ढ. °त उवेवाश्विव° । ६ ख. ढ. °वद्भिघ° । ७ क. घ. ञ. °दि । प्र° । ८ घ. ञ. तत्राऽऽह° । ९ क. ख. घ. ञ. ढ. ण. तत्प्रावो° । १० घ. ज °योरध्या° । ११ क. घ. च. छ. ज. झ. °णि । त° ।

पुरः शरीराणि चक्रे चतुष्पदश्चतुष्पादुपलक्षितानि पशुशरीराणि। पुरः पुरस्तात्स ईश्वरः पक्षी लिङ्गशरीरं भू वा पुरः शरीराणि पुरुष आविशदित्यस्यार्थमाचष्टे श्रुतिः। स वा अयं पुरुषः सर्वासु पूर्षु सर्वशरीरेषु पुरिशयः पुरि शेत इति पुरिशयः सन्पुरुष इत्युच्यते। नैनेनानेन किंचन किंचिदप्यनावृतमनाच्छादितम्। तथा नैनेन किंचनासंवृतमन्तरननुप्रवेशितं बाह्यभूतेनान्तर्भूतेन च नानावृतम्। एवं स एव नामरूपात्मनाऽन्तर्बहिर्भावेन कार्यकरणरूपेण व्यवस्थितः। पुरश्चक्र इत्यादिमन्त्रः संक्षेपत आत्मैकत्वमाचष्ट इत्यर्थः ॥ १८ ॥

उक्तमन्त्राभ्यां वक्ष्यमाणमन्त्रयोरपुनरुक्तत्वार्थवत्त्वं वक्तुं वृत्तं कीर्तयति—उक्ताविति। आख्यायिकाविशेषणपाठं संकोचं परिहरति—द्वयोरिति। उत्तरमन्त्रद्वयप्रवृत्तिं प्रतिजानीते—ब्रह्मेति। संभत्यवान्तरसंगतिमाहः—यत्कक्ष्यं चेति। हिरण्यगर्भकर्तृकं शरीरनिर्माणमत्र नोच्यते किंतु प्रकरणबलादीश्वरकर्तृकमित्याह—यत इति। शरीरसृष्ट्यपेक्षया लोकसृष्टिः प्राग्भवं पुरस्ताद्देहसृष्ट्यनन्तरं प्रवेशात्पूर्वमिति यावत्। स हि सर्वेषु शरीरेषु वर्तमानः पुरि शेत इति व्युत्पत्त्या पुरिशयः सन्पुरुषो भवतीत्युक्त्वा प्रकारान्तरेण पुरुषत्वं व्युत्पादयति—नेत्यादिना। वाक्यद्वयस्यैकार्थत्वमाशङ्क्य सर्वं जगदोतप्रोतत्वेनाऽऽत्मव्याप्तमित्यर्थविशेषमाश्रित्याऽऽह—बाह्यभूतेनेति। पूर्णत्वे सत्यात्मनः 'दिव्यो ह्यमूर्तः' इत्यादिश्रुतिमाश्रित्य फलितमाह—एवमिति। मन्त्रब्राह्मणयोरर्थवैभवमाशङ्क्याऽऽह—पुरइति ॥ १८ ॥

इदं वै तन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच। तदेतदृषिः पश्यन्नवोचत्। रूपꣳ रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय। इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दशेति। अयं वै हरयोऽयं वै दश च सहस्राणि बह्वानि चानन्तानि च तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूरित्यनुशासनम् ॥ १९ ॥

इति बृहदारण्यकोपनिषदि द्वितीयाध्याये पञ्चमं ब्राह्मणम् ॥ ५ ॥

---

१ घ. ङ. च. ज. झ. ढ. °ष उच्य°। २ ज. °र्थकार°। ३ क. °रुषार्थ व्यु°। क. ञ. वैपरीत्य°।

इदं वै तन्मध्वित्यादि पूर्ववत् । रूपं रूपं प्रतिरूपो बभूव । रूपं रूपं प्रति प्रतिरूपो रूपान्तरं बभूवेत्यर्थः । प्रतिरूपोऽनुरूपो वा यादृक्संस्थानौ मातापितरौ तत्संस्थानस्तदनुरूप एव पुत्रो जायते । नहि चतुष्पदो द्विपोज्जायते द्विपदो वा चतुष्पात् । स एव हि परमेश्वरो नामरूपे व्याकुर्वाणो रूपं रूपं प्रतिरूपो बभूव । किमर्थं पुनः प्रतिरूपमागमनं तस्येत्युच्यते । तदस्याऽऽत्मनो रूपं प्रतिचक्षणाय प्रतिख्यापनाय । यदि हि नामरूपे न व्याक्रियेते तदाऽस्याऽऽत्मनो निरुपाधिकं रूपं प्रज्ञानघनाख्यं न प्रतिख्यायेत । यदा पुनः कार्यकरणात्मना नामरूपे व्याकृते भवतस्तदाऽस्य रूपं प्रतिख्यायेत । इन्द्रः परमेश्वरो मायाभिः प्रज्ञाभिर्नामरूपेभूतकृतामिथ्याभिमानैर्वा न तु परमार्थतः पुरुरूपो बहुरूप ईयते गम्यत एकरूप एव प्रज्ञानघनः सन्नविद्याप्रज्ञाभिः । कस्मात्पुनः कारणात् । युक्ता रथ इव वाजिनः स्वविषयप्रकाशनाय हि यस्मादस्य हरयो हरणादिन्द्रियाणि शता शतानि दश च प्राणिभेदबाहुल्याच्छतानि दश च भवन्ति । तस्मादिन्द्रियाविषयबाहुल्यात्तत्प्रकाशनायैव च युक्तानि तानि नाऽऽत्मप्रकाशनाय । " पराञ्चि खानि व्यतृणत्स्वयंभूः " इति हि काठके तस्मात्तैरेव विषयस्वरूपैरीयते न प्रज्ञानघनैकरसेन स्वरूपेण ।

प्राचीनमेव ब्राह्मणमनूद्य मन्त्रान्तरमवतारयति—इदमिति । प्रतिशब्दस्तन्त्रेणोच्चरितः । रूपं रूपमुपाधिभेदं प्रति प्रतिरूपो रूपान्तरं प्रतिबिम्बं बभूवेत्येतत्प्रतिरूपो बभूवेत्यत्र विवक्षितमिति योजना । अनुरूपो वेत्युक्तं विवृणोति—यादृगित्यादिना । उक्तमर्थमनुभवारूढं करोति—नहीति । रूपान्तरभवने कर्त्रन्तरं वारयति—स एव हीति । प्रतिख्यापनाय शास्त्राचार्यादिभेदेन तत्त्वप्रकाशनायेत्यर्थः । तदेव व्यतिरेकेणान्वयेन च स्फुटयति—यदि हीत्यादिना । मायाभिः प्रज्ञाभिरिति परपक्षमुक्त्वा स्वपक्षमाह—मायाभिरिति । मिथ्याधीहेतुभूतानाद्यानिर्वाच्यदण्डापमानाज्ञानवशादेव बहुरूपो भाति । प्रकारभेदात्तु बहूक्तिरिति वाक्यार्थमाह—एकरूप एवेति । अविद्याप्रज्ञाभिर्बहुरूपो गम्यत इति पूर्वेण संब-

---

१ क. ख. °पाद्या ज्ञा° । २ ग. प्रत्याख्या° । ३ ग. झ. °र्यकार° । ४ ख. घ. च. ट. °पे अव्याकृते व्या° । ५ ब. °पक्रु° । ६ क. ख. °ततत्कृत° । ७ ख. ग. °व यु° । ८ ख. च. ट. °न रू° । ब. ङ. छ. ज. झ. °न ग्वन रू° । ९ घ. °णोच्चारि° । १० ख. ट. °बिम्बरूप व° ।

न्धः। परस्य बहुत्वप्राप्तौ निमित्तं प्रश्नपूर्वकं निवेदयति—कस्मादित्यादिना। यथा रथे युक्ता वाजिनो रथिनं स्वगोचरं देशं प्रापयितुं प्रवर्तन्ते तथाऽस्य प्रतीचो रथस्थानीये शरीरे युक्ता हरयः स्वविषयप्रकाशनाय तस्मात्प्रवर्तन्ते तस्मादिन्द्रियाणां च बहुत्वात्तद्वदैश्वरेण बहुत्वो भातीति योजना। हरिशब्दस्येन्द्रियेषु प्रवृत्तौ निमित्तमाह—हरणादिति। प्रतीचो विषयान्प्रतीति शेषः। इन्द्रियबाहुल्ये हेतुमाह—प्राणीति। इन्द्रियविषयबाहुल्यात्प्रत्यगात्मा बहुरूप इति शेषः। नन्वात्मानं प्रकाशयितुमिन्द्रियाणि प्रवृत्तानि न तु रूपादिकमेव तत्कथं तद्विषयवशादात्मनोऽन्यथा प्रथेत्याशङ्क्याऽऽह—तत्प्रकाशनायेति। तस्मादिन्द्रियविषयबाहुल्यादित्युक्तमुपसंहरति—तस्मादिति। यद्वा यथोक्तश्रुतिदर्शन उपपत्त्यर्थमाह—तस्मादिति। यस्मादिन्द्रियाणि पराञ्चि विषये प्रवृत्तानि तस्मात्तैरिन्द्रियैर्विषयस्वरूपेणैवायं प्रत्यगात्मा गम्यते न तु स्वात्माधारणेन रूपेणेत्यर्थः।

एवं तर्ह्ययमन्यः परमेश्वरोऽन्ये हरय इत्येवं प्राप्त उच्यते—अयं वै हरयोऽयं वै दश च सहस्राणि बहूनि चानन्तानि च। प्राणिभेदस्याऽऽनन्त्यात्। किं बहुना तदेतद्ब्रह्म य आत्माऽपूर्वं नास्य कारणं पूर्वं विद्यत इत्यपूर्वम्। नास्यापरं कार्यं विद्यत इत्यनपरम्। नास्य आत्यन्तरमन्तराले विद्यत इत्यनन्तरम्। तथा बहिरस्य न विद्यत इत्यबाह्यम्। किं पुनस्तन्निरन्तरं ब्रह्मायमात्मा। कोऽसौ यः प्रत्यगात्मा द्रष्टा श्रोता मन्ता बोद्धा विज्ञाता सर्वानुभूः सर्वात्मना सर्वमनुभवतीति सर्वानुभूरित्येतदनुशासनं सर्ववेदान्तोपदेशः। एष सर्ववेदान्तानामुपसंहृतोऽर्थः। एतदमृतमभयं परिसमाप्तश्च शास्त्रार्थः॥ १९॥

इति बृहदारण्यकोपनिषद्भाष्ये द्वितीयाध्यायस्य
पञ्चमं ब्राह्मणम्॥ ५॥

युक्ता हीति तेनैवसम्बन्धमाश्रित्य शङ्कते—एवं तर्हीति। अयमित्यादिवाक्येन परिहरति—अयमिति। तत्तदिन्द्रियादिरूपेणाऽऽत्मन एवाविद्यया भानात्तेनैवस्य च कल्पितत्वान्नाद्वैतहानिरित्यर्थः इन्द्रियानन्त्ये हेतुमाह—प्राणिभेदस्येति। वाक्यार्थमाक्षिप्यार्थमित्थं गतेन संदर्भेण भूमिकामारचय्य तत्परं वाक्यमवतार्य व्याकरोति—किं बहुनेत्यादिना। न केवलमध्यायद्वयस्यैवार्थोऽयं संक्षिप्योपसंहृत

---

१ घ. ञ. ण. °त्प्रयतन्ते। २ ख. ग च. ढ. °बृह्मायमात्मा°। ३ क. ख. ग. ङ, च, छ झ. ढ. °म्। अवाक्यं त°। ४ घ. ञ. °वन्योक्तिमा°। ५ घ. ञ. ट. एवमिति।

किंतु सर्ववेदान्तानामित्याह—एष इति । तस्योभयविधपुरुषार्थरूपत्वमाह—एतदिति । वक्तव्यान्तरपरिशेषशङ्कां परिहरति—परिसमाप्तश्चेति ॥ १९ ॥

इति बृहदारण्यकोपनिषद्भाष्यटीकायां द्वितीयाध्याये पञ्चमं ब्राह्मणम् ॥ ५ ॥

(अथ द्वितीयाध्यायस्य षष्ठं ब्राह्मणम्) ।

अथ वꣳशः पौतिमाष्यो गौपवनाद्गौपवनः पौतिमाष्यात्पौतिमाष्यो गौपवनाद्गौपवनः कौशिकात्कौशिकः कौण्डिन्यात्कौण्डिन्यः शाण्डिल्याच्छाण्डिल्यः कौशिकाच्च गौतमाच्च गौतमः ॥ १ ॥ आग्निवेश्यादाग्निवेश्यः शाण्डिलाच्चानभिम्लाताच्चानभिम्लात आनभिम्लातादानभिम्लात आनभिम्लातादानभिम्लातो गौतमाद्गौतमः सैतवप्राचीनयोग्याभ्याꣳ सैतवप्राचीनयोग्यौ पाराशर्यात्पाराशर्यो भारद्वाजाद्भारद्वाजो भारद्वाजाच्च गौतमाच्च गौतमो भारद्वाजाद्भारद्वाजः पाराशर्यात्पाराशर्यो बैजवापायनाद्बैजवापायनः कौशिकायनेः कौशिकायनिः ॥ २ ॥

घृतकौशिकाद्घृतकौशिकः पाराशर्यायणात्पाराशर्यायणः पाराशर्यात्पाराशर्यो जातूकर्ण्याज्जातूकर्ण्य आसुरायणाच्च यास्काच्चाऽऽसुरायणश्चैवणेश्चैवणिरौपजन्धनेरौपजन्धनिरासुरेरासुरिर्भारद्वाद्भारद्वाज आत्रेयादात्रेयो माण्टेर्माण्टिर्गौतमाद्गौतमो गौतमाद्गौतमो वात्स्याद्वात्स्यः शाण्डिल्याच्छाण्डिल्यः कैशोर्यात्काप्यात्कैशोर्यः काप्यः कुमारहारितात्कुमारहारितो गालवाद्गालवो विद-

---

१ छ. ठ. ड. °पचन्ध° । २ छ. ट. ढ. °पचन्घ° । ३ ग. °र्यात्कैशोर्यः काप्यात्काप्यः । ४ ग. ङ. छ. °हारीता° । ५ ग छ ठ. ढ. °हारीतो ।

भीकौण्डिन्याद्दिदभीकौण्डिन्यो वत्समपातो वाभ्र-
वाद्वत्सनपाद्बाभ्रवः पथः सौभरात्पन्थाः सौभरोऽ-
यास्यादाङ्गिरसादयास्य आङ्गिरस आभूतेस्त्वा-
ष्ट्रादाभूतिस्त्वाष्ट्रो विश्वरूपात्त्वाष्ट्राद्विश्वरूपस्त्वा-
ष्ट्रोऽश्विभ्यामश्विनौ दधीच आथर्वणाद्ध्यङ्ङाथ-
र्वणोऽथर्वणो दैवादथर्वा दैवो मृत्योः प्राध्वꣳसना-
न्मृत्युः प्राध्वꣳसनः प्रध्वꣳसनात्प्रध्वꣳसन एकर्षे-
रेकर्षिर्विप्रचित्तेर्विप्रचित्तिर्व्यष्टेर्व्यष्टिः सनारोः स-
नारुः सनातनात्सनातनः सनगात्सनगः परमेष्ठिनः
परमेष्ठी ब्रह्मणो ब्रह्म स्वयंभु ब्रह्मणे नमः ॥ २ ॥

इति बृहदारण्यकोपनिषदि द्वितीयाध्याये
षष्ठं ब्राह्मणम् ॥ ६ ॥

इति बृहदारण्यकोपनिषदि द्वितीयोऽध्यायः ॥ २ ॥
बृहदारण्यकक्रमेण चतुर्थोऽध्यायः ॥ ४ ॥

अथेदानीं ब्रह्मविद्यार्थस्य मधुकाण्डस्य वंशः स्तुत्यर्थो ब्रह्मविद्या-
यायाः । मन्त्रश्चायं स्वाध्यायार्थो जपार्थश्च । तत्र वंश इव वंशो यथा
वेणुवंशः पर्वणः पर्वणो हि भिद्यते तद्वदग्रात्प्रभृत्या मूलप्राप्तेरयं वंशः।
अध्यायचतुष्टयस्याऽऽचार्यपरम्पराक्रमो वंश इत्युच्यते । तत्र प्रथ-
मान्तः शिष्यः पञ्चम्यन्त आचार्यः । परमेष्ठी विराट् । ब्रह्मणो हिर-
ण्यगर्भात् । ततः परमाचार्यपरम्परा नास्ति । यत्पुनर्ब्रह्म तन्नित्यं स्व-
यंभु तस्मै ब्रह्मणे स्वयंभुवे नमः ॥ १ ॥ २ ॥ ३ ॥

---

१ क. ग. °क ऋषेरे°। २ क. ग. °क ऋषिर्वि°। ३ घ. च ढ. वेणु पवशः प°।
४ ग. छ. °णुवंशः। ५ ग. घ. ज. °णो भि°। ६ ख. तथाऽग्रा°।

इति बृहदारण्यकोपनिषद्भाष्ये द्वितीयाध्यायस्य
षष्ठं ब्राह्मणम् ॥ ६ ॥

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य
श्रीमच्छंकरभगवतः कृतौ बृहदारण्यकोपनिषद्भाष्ये
द्वितीयोऽध्यायः ॥ २ ॥

ब्रह्मविद्यां संक्षेपविस्तराभ्यां प्रतिपाद्य वंशब्राह्मणतात्पर्यमाह—अथेति । महाभगपरिवृढीवा हि ब्रह्मविद्या येन सा महाभागधेयेति स्तुतिः । ब्राह्मणस्यार्थान्तरमाह—ब्रह्मब्रह्मेति । स्वाध्यायः स्वाधीनोच्चारणक्षमत्वे सत्यध्यापनं जपस्तु मत्वइषावृत्तिरिति भेदः । यथोक्तनीत्या ब्राह्मणारम्भे स्थिते वंशशब्दार्थमाह—तत्रेति । तदेव स्फुटयति—यथेति । शिष्यावसानोपलक्षणोभूतात्पौतिमाष्यादारभ्य यदादित्यैदाख्यब्राह्मणमूलपर्यन्तोऽयं वंशः पर्वणः पर्वणो भिद्यत इति संबन्धः । वंशशब्देन निष्पन्नमर्थमाह—अध्यायचतुष्टयस्येति । अथात्र शिष्याचार्यवाचकशब्दाभावे कुतो व्यवस्थेति तत्राऽऽह—तत्रेति । परमेष्ठिब्रह्मशब्दयोरेकार्थत्वमाशङ्क्याऽऽह—परमेष्ठीति । कुतस्तर्हि ब्रह्मणो विद्याप्राप्तिस्तत्राऽऽह—तत इति । स्वयंप्रतिभातवेदो हिरण्यगर्भो नाऽऽचार्यान्तरमपेक्षते । ईश्वरानुगृहीतस्य तस्य बुद्धाद्यविर्भावहेतादेव विद्यालाभसंभवादित्यर्थः । कुतस्तर्हि वेदो जायते तत्राऽऽह—यत्पुनरिति । परस्यैव ब्रह्मणो वेदरूपेणावस्थानात्तस्य नित्यत्वान्न हेत्वपेक्षेत्यर्थः। आद्यावन्ते च कवयश्चन्ता ब्रह्माः प्रचारिणो भवन्तीति द्योतयितुमन्ते ब्रह्मणे नम इत्युक्तम् । तदाचष्टे—तस्मा इति ॥ १ ॥ २ ॥ ३ ॥

इति बृहदारण्यकोपनिषद्भाष्यटीकायां द्वितीयाध्यायस्य
षष्ठं ब्राह्मणम् ॥ ६ ॥

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमच्छुद्धानन्दभगवत्पूज्यपादशिष्येण
श्रीमदानन्दज्ञानेन कृतायां बृहदारण्यकोपनिषद्भाष्यटीकायां
द्वितीयोऽध्यायः ॥ २ ॥

---

१ घ. ञ. ण. °कृत्या । २ घ. ञ. ण. °क्षणभृ° । ३ क. ख. ङ. ण. °स्थ बु° ।

(अथ तृतीयाध्यायस्य प्रथमं ब्राह्मणम्) ।

जनको ह वैदेह इत्यादि याज्ञवल्क्यीयं काण्डमारभ्यते । उपपत्तिप्रधानत्वादतिक्रान्तेन मधुकाण्डेन समानार्थत्वेऽपि सति न पुनरुक्तता । मधुकाण्डं ह्यागमप्रधानम् । आगमोपपत्ती ह्यात्मैकत्वप्रकाशनाय प्रभवे शक्नुतः करतलगतबिल्वमिव दर्शयितुम् । श्रोतव्यो मन्तव्य इति युक्तम् । तस्मादागमार्थस्यैव परीक्षापूर्वकं निर्धारणाय याज्ञवल्क्यीयं काण्डमुपपत्तिप्रधानमारभ्यते । आख्यायिका तु विज्ञानस्तुत्यर्थोपायविधिपरा वा । प्रसिद्धो ह्युपायो विद्वद्भिः शास्त्रेषु च दृष्टो दानम् । दानेन ह्यपनमन्ते प्राणिनः । प्रभूतं हिरण्यं गोसहस्रदानं चेहोपलभ्यते । तस्मादन्यपरेणापि शास्त्रेण विद्याप्राप्त्युपायदानप्रदर्शनार्थाऽऽख्यायिकाऽऽरब्धा । अपि च तद्विद्यसंयोगस्तेभ्य सह वादकरणं विद्याप्राप्त्युपायो न्यायविद्यायां दृष्टः । तच्चास्मिन्नध्याये प्रायस्येन प्रदृश्यते प्रत्यक्षा च विद्वत्संयोगे प्रज्ञावृद्धिः । तस्माद्विद्याप्राप्त्युपायप्रदर्शनार्थं वाऽऽख्यायिका ।

मधुकाण्डे त्वाष्ट्रं कर्म्म चेति मधुदृयं व्याख्यातं संप्रति काण्डान्तरारम्भं प्रतिजानीते—जनक इति । ननु पूर्वस्मिन्नध्यायद्वये व्याख्यातमेव तत्त्वमुपरत्वादि वक्ष्यते तथा च पुनरुक्तेरलं मुनिकाण्डेनेति तत्राऽऽह—उपपत्तीति । तत्त्वमुपपत्तिप्रधानत्वं मधुकाण्डस्यापीति चेन्नेत्याह—मधुकाण्डं ह्रीति । ननु श्रवणादागमादेव तत्त्वज्ञानं सेत्स्यते किमुपपत्त्या तत्प्रधानेन काण्डेन चेति तत्राऽऽह—आगमेति । करणत्वेनाऽऽगमात्तत्त्वज्ञानहेतुरुपपत्तिरुपकरणतया पदार्थपरिशोधनद्वारा तत्रेतुरित्यत्र गमकमाह—श्रोतव्य इति । करणोपकरणभावेनागमोपपत्त्योस्तत्त्वज्ञानहेतुत्वे सिद्धे फलितमुपसंहरति—तस्मादिति । यथोक्तरीत्या काण्डारम्भेऽपि किमित्याख्यायिका प्रणीयते तत्राऽऽह—आख्यायिका त्विति । विद्यानर्थता ह्येषाऽत्र प्रयुज्यमाना दृश्यते । तथा च विज्ञानं महाभागधेयमिति स्तुतिरत्र विवक्षितेत्यर्थः । विद्याग्रहणे दानाख्योपायप्रकारज्ञापनपरा वाऽऽख्यायिकेत्यर्थान्तरमाह—उपायेति । कथं पुनर्दानस्य विद्याग्रहणोपायत्वं तत्राऽऽह—प्रसिद्धो ह्रीति ।

" गुरुशुश्रूषया विद्या पुष्कलेन धनेन वा "

इत्यादौ दानाख्यो विद्याग्रहणोपायो यस्मात्प्रसिद्धस्तस्मात्तस्य स्तुत्यापरत्वे वाक्ये वक्तव्यमित्यर्थः । ' दाने तपसि प्रतिष्ठितम् ' इत्यादिश्रुतिषु विद्याग्रह-

---

१ च. छ. °मभार्थम् । २ क. ख. ङ. °ज्ञाने हे° । ३ च. ज्ञानाऽऽह ।

प्रयोजनवत्त्वात्तस्माच्च तस्योपायत्वे विवदितव्यमित्याह—विद्वद्भिरिति । उपपन्नं च दानस्य विद्याग्रहणोपायत्वमित्याह—दाननेति । भवतु दानं विद्याग्रहणोपायत्वेऽपि कथं तावताऽऽख्यायिका तत्प्रदर्शनपरेत्याशङ्क्याऽऽह—प्रभूतमिति । ननु समुदितेषु ब्राह्मणेषु ब्रह्मिष्ठतमं निर्धारयितुं राजा प्रवृत्तस्तत्कथमन्यपरेण ग्रन्थेन विद्याग्रहणोपायविधानायाऽऽख्यायिकाऽऽरभ्यते तत्राऽऽह—तस्मादिति । उपक्रम्य यथोक्तस्तच्छब्दार्थः । इतश्चाऽऽख्यायिका विद्यापाप्त्युपायप्रदर्शनपरेत्याह—अपि चेति । तस्मिन्वेद्येऽर्थे विद्या येषां ते तद्विद्यास्तैः सह संबन्धश्च तैरेव प्रश्नप्रतिवचनद्वारा वादकरणं च विद्यायोपायत्वाय इत्यत्र गमकमाह—न्यायविदामयामिति । तत्त्वनिर्णयफलां हि वीतरागकथामिच्छन्ति । तद्विद्यसंयोगादेर्विद्यापाप्त्युपायत्वेऽपि कथं प्रकृते तत्प्रदर्शनपरत्वमत आह—तच्चेति । तद्विद्यसंयोगादीति यावत् । न केवलं तर्कशास्त्रवशादेव तद्विद्यसंयोगे पज्ञावृद्धिः किंतु स्वानुभववशादपीत्याह—प्रत्यक्षा चेति । आख्यायिकातात्पर्यमुपसंहरति—तस्मादिति ।

ॐ जनको ह वैदेहो बहुदक्षिणेन यज्ञेनेजे तत्र ह कुरुपञ्चालानां ब्राह्मणा अभिसमेता बभूवुस्तस्य ह जनकस्य वैदेहस्य विजिज्ञासा बभूव कःस्विदेषां ब्राह्मणानामनूचानतम इति स ह गवां सहस्रमवरुरोध दश दश पादा एकैकस्याः शृङ्गयोरावद्धा बभूवुः ॥ १ ॥

जनको नाम ह किल सम्राड्राजा बभूव विदेहानां तत्र भवो वैदेहः । स च बहुदक्षिणेन यज्ञेन शाखान्तरप्रसिद्धो वा बहुदक्षिणो नाम यज्ञोऽश्वमेधो वा दक्षिणाबाहुल्याद्बहुदक्षिण इहोच्यते तेनेजेऽयजत् । तत्र तस्मिन्यज्ञे निमन्त्रिता दर्शनकामा वा कुरूणां देशानां पञ्चालानां च ब्राह्मणास्तेषु हि विदुषां बाहुल्यं प्रसिद्धमभिसमेता अभिसंगता बभूवुः । तत्र महान्तं विद्वत्समुदायं दृष्ट्वा तस्य ह किल जनकस्य वैदेहस्य यजमानस्य को नु खल्वत्र ब्रह्मिष्ठ इति विशेषेण ज्ञातुमिच्छा विजिज्ञासा बभूव । कथं, कः स्वित्को नु खल्वेषां ब्राह्मणानामनूचानतमः सर्व इमेऽनूचानाः, कःस्विदेषामतिशयेनानूचान इति । स

१ क. °प्राप्त्युपा° । २ ग. विदहेषु । ३ क. घ. ङ. ज. झ. °ष्ठवाऽथ त° । ४ ज. °चाना एव कः ।

हानूचानतमविषयोत्पन्नजिज्ञासः संस्तद्विज्ञानोपायार्थं गवां सहस्रं स्थ-मवयसामवरुरोध गोष्ठेऽवरोधं कारयामास । किंविशिष्टास्ता गावोऽ-वरुद्धा इत्युच्यते । पलचतुर्थभागः पादः सुवर्णस्य । दश दश पादा एकैकस्मिञ्शृङ्गे ॥ १ ॥

राजसूयाभिषिक्तः सार्वभौमो राजा सम्राडित्युच्यते । बहुदक्षिणेन यज्ञेनाव-जदिति संबन्धः । अश्वमेधे दक्षिणाबाहुल्यमश्वमेधप्रकरणे स्थितम् । ब्राह्मणा अभिसंगता बभूवुरिति संबन्धः । कुरुपञ्चालानामिति कुरो विशेषणं ब्रह्माऽऽह-तेषु हीति । तत्र यज्ञशालायामिति यावत् । विजिज्ञासामेवाऽऽकाङ्क्षापूर्विकां व्युत्पादयति—कथमित्यादिना । अनूचानत्वमनुवचनसमर्थत्वम् । एवं मन्येऽति-शयेनानूचानोऽनूचानतमः स कः स्यादिति योजना । एकस्य सप्तस्य चत्वारो भागास्तेषामेको भागः पाद इत्युच्यते । प्रत्येकं शृङ्गयोर्दश दश पादाः सन्त्येव-मिति शङ्का निराकर्तुं विभजते—पञ्चेति । एकैकस्मिञ्शृङ्गे आवद्धा बभूवुरिति पूर्वेण संबन्धः ॥ १ ॥

तान्होवाच ब्राह्मणा भगवन्तो यो वो ब्रह्मिष्ठः स एता गा उदजतामिति । ते ह ब्राह्मणा न दधृषुरथ ह याज्ञवल्क्यः स्वमेव ब्रह्मचारिणमुवाचैतां सो-म्योदज सामश्रवा३ इति ता होदाचकार ते ह ब्राह्मणाश्चुक्रुधुः कथं नो ब्रह्मिष्ठो ब्रवीतीत्यथ ह जनकस्य वैदेहस्य होताऽश्वला बभूव स हैनं प्र-पच्छ त्वं नु खलु नो याज्ञवल्क्य ब्रह्मिष्ठोऽसी३ इति स होवाच नमो वयं ब्रह्मिष्ठाय कुर्मो गोका-मा एव वयꣳ स्म इति तꣳ ह तत एव प्रष्टुं दध्रे होताऽश्वलः ॥ २ ॥

गां एवमवरुध्य ब्राह्मणांस्तान्होवाच । हे ब्राह्मणा भगवन्त एवमा-मन्त्र्य यो वो युष्माकं ब्रह्मिष्ठः सर्वे यूयं ब्राह्मणोऽतिशयेन युष्माकं ब्रह्मा यः स एता गा उदजतामुत्कालयतु स्वगृहं प्रति । ते ह ब्राह्मणाः

---

१ क. ख. ग. घ. च. छ. ज. ढ. °तुर्भा° । २ ग. °ङ्गयोः शृङ्गाग्रयो° । ३ क. ख. ज. ठ ठ. ड. ढ °ताः सौम्यो । ४ क. ख. ग. घ. क. छ. ज ठ. ठ. ड. ढ °ो ब्रवी° । ५ ग. स ।

व दधुः । ह किलैवमुक्ता ब्राह्मणा ब्रह्मिष्ठतामात्मनः प्रतिज्ञातुं न दधुर्न प्रतिज्ञातवन्तः तूष्णीं बभूवुः । अथगत्यभूतेषु ब्राह्मणेष्वथ ह याज्ञवल्क्यः स्वमात्मीयमेव ब्रह्मचारिणमन्तेवासिनमुवाचेता गा हे[1] सोम्योदजोदुमयास्मद्गृहान्प्रति हे सामश्रवः सामाविधिं हि शृणोत्यतोऽर्थाच्चतुर्वेदो याज्ञवल्क्यः । ता गा होदाचकारोत्कालितवानाचार्यगृहं प्रति । याज्ञवल्क्येन ब्रह्मिष्ठपणस्वीकरणेनाऽऽत्मनो ब्रह्मिष्ठता प्रतिज्ञातेति ते ह क्रुद्धयः क्रुद्धवन्तो ब्राह्मणाः । तेषां क्रोधाभिप्रायमाचष्टे—कथं नोऽस्माकमेकैकशोऽमानां ब्रह्मिष्ठोऽस्मीति ब्रवीतेति । अथ हैवं क्रुद्धेषु ब्राह्मणेषु जनकस्य यजमानस्य होतर्त्विगश्वलो नाम बभूवाऽऽस[2]त् । स एनं याज्ञवल्क्यं ब्रह्मिष्ठाभिमानी राजाश्रयत्वाच्च धृष्टो याज्ञवल्क्यं पप्रच्छ पृष्टवान् । कथं, त्वं नु खलु नो याज्ञवल्क्य ब्रह्मिष्ठोऽसी[3] इति । स्खलितमार्षत्वार्था । स होवाच याज्ञवल्क्यो नमस्कुर्मो वयं ब्रह्मिष्ठाय । इदानीं नोकामाः स्मो वयमिति तं ब्रह्मिष्ठप्रतिज्ञं सन्तं तत एव ब्रह्मिष्ठपणस्वीकरणात्प्रतु दद्रे धृतवान्मनो होताऽश्वलः ॥ २ ॥

ब्राह्मणा वेदाध्ययनसंपन्नास्तदर्थनिष्ठा इति यावत् । उत्कालयतूद्गमयतु । यतो याज्ञवल्क्यश्चतुर्वेदविदः सकाशादूनसचारी सामविधिं शृणोति ऋक्षु चाध्यारूढं सामगीयते विष्वेव च वेदेष्वन्तर्भूतोऽथर्ववेदस्तस्मादर्थाद्यजुर्वेदिनो मुनेः शिष्यस्य सामवेदाध्ययनानुपपत्तेर्वेदचतुष्टयविशिष्टो मुनिरित्याह—अत इति । निमित्तनिवेदनपूर्वकं ब्राह्मणानां तम्यानां क्रोधमार्षि दर्शयति—याज्ञवल्क्येनेति । क्रोधानन्तर्यबोधनार्थं क्रुद्धेष्वित्युक्तम् । अभद्रप्रश्नस्य प्राथम्ये हेतुः—राज्ञेति । याज्ञवल्क्यमित्यनुवादोऽन्वयप्रदर्शनार्थः । प्रश्नमेव प्रश्नपूर्वकं विशदयति—कथमित्यादिना । अनौचित्यं प्रसविदो लिङ्गमिति सूचयति—स हेति । किमिति तर्हि स्वयं प्रति मायो ब्रह्मिष्ठपणभूता नीवास्तत्राऽऽह—इदानीमिति । न खल्वस्य ब्राह्मणी प्रतिज्ञा प्रतिभातीत्याशङ्क्याऽऽह—तत एवेति ॥ २ ॥

याज्ञवल्क्येति होवाच यदिद[4]ꣳ सर्वं मृत्यु-
नाऽऽप्त[5]ꣳ सर्वं मृत्युनाऽभिपन्नं[6] केन यजमानो

---

[1] ङ. छ. ब. ञ. हे सौम्यो° । २ ब. छ. च. ढ. °ओत्सी° । ३ क. ख. च. ङ. छ. ढ. °सि भवी° । ४. °ति प्रतीतीति । ५ क. ख. ग. च. ङ. छ. ञ. झ. °र्थं याज्ञवल्क्येति होवाच इदं । ५ ब. च. ङ. ञ. °नीं तु गो° । ६ ख. च. ञ. ढ. ञ. °गृहान्प्रति ।

मृत्योरात्तिमति मुच्यत इति होत्रर्त्विजाऽग्निना
वाचा वाग्वै यज्ञस्य तद्येयं वाक्सोऽयमग्निः स
होता स मुक्तिः सात्तिमुक्तिः ॥ ३ ॥

याज्ञवल्क्येति होवाच तत्र मधुकाण्डे पाङ्क्तेन कर्मणा दर्शनसमुच्चितेन यजमानस्य मृत्योरत्ययो व्याख्यात उद्गीथप्रकरणं संक्षेपतस्तस्यैव परीक्षाविषयोऽयमिति तद्वादर्शनविशेषार्थोऽयं विस्तर आरभ्यते । यदिदं साधनजातमस्य कर्मण ऋत्विगग्न्यादि मृत्युना कर्मलक्षणेन स्वाभाविकासङ्गसहितनाऽऽप्तं व्याप्तं न केवलं व्याप्तमभिपन्नं च मृत्युना वशीकृतं च । केन दर्शनलक्षणेन साधनेन यजमानो मृत्योरात्तिमिति मृत्युगोचरत्वमतिक्रम्य मुच्यते स्वतन्त्रो मृत्योरवैशो भवतीत्यर्थः । ननूद्गीथ एवाभिहितं येनातिमुच्यते मुख्यप्राणात्मदर्शनेनेति । बाढमुक्तं योऽनुक्तो विशेषस्तत्र तदर्थोऽयमारम्भ इत्यदोषः ।

तत्र प्रथमं मुनेराभिमुख्यमापादयितुं संबोधयति—याज्ञवल्क्येति । उक्तरीत्याऽधस्तप्रश्ने प्रस्तुते तस्योद्गीथाधिकारेण संगतिमाह—तत्रेति । मधुकाण्डे पूर्वत्र व्याख्याते यदुद्गीथप्रकरणं तस्मिन्नासङ्गप्राप्तो मृत्योरत्ययः समुच्चितेन कर्मणा संक्षेपतो व्याख्यात इति संबन्धः । तस्यैवोद्गीथदर्शनस्येति यावत् । परीक्षाविषयो विचारभूमिरयं प्रश्नप्रतिवचनरूपो ग्रन्थ इत्यर्थः । तच्छब्दः समनन्तरनिर्दिष्टग्रन्थविषयः । दर्शनमुद्गीथोपासनं तस्य विशेषो वागादेरन्याद्यात्मत्वविज्ञानं तत्सिद्ध्यर्थोऽयं प्रक्रमः । एवमवान्तरसंगतिमुक्त्वा प्रश्नाक्षराणि व्याचष्टे—यदिदमिति । मृत्युनाऽऽप्तमित्यनेन मृत्युनाऽभिपन्नमित्यस्य गतार्थत्वमाशङ्क्याऽऽह—न केवलमिति । कर्मणो मृत्युत्वात्तेन मृत्योरत्ययायोगात्तदत्ययसाधनं किंचिद्दर्शनमेव वाच्यमित्याशयेन पृच्छति—केनेति । दर्शनविषयं प्रश्नमाक्षिपति—तन्विति । येन मुख्यप्राणात्मदर्शनेनातिमुच्यते तदुद्गीथप्रक्रियायामेवोक्तं तथा च मृत्योरत्ययोपायस्य विज्ञानस्य निर्ज्ञातत्वात्केनेतिप्रश्नानुपपत्तिरिति योजना । तस्यैव परीक्षाविषयोऽयमित्यादावुक्तमादाय परिहरति—बाढमिति । उद्गीथप्रकरणे वागादेरन्याद्यात्मत्वदर्शनरूपो यो विशेषो वक्तव्योऽपि नोक्तस्तदुक्त्यर्थोऽयं प्रश्नप्रतिवचनरूपो ग्रन्थ इति कृत्वा केनेत्यादिप्रश्नोपपत्तिरित्यर्थः ।

---

१ ग. घ. ज. °ऽऽप्तं मृ° । २ क. ख. ग. च. छ. ज. ढ. °मतीत्य मृ° । ३ क. ख. ङ. च. छ. ज ढ. °वश्यो भ° । ४ च. ढ. नन्वेतदुद्गी° । ५ घ. ञ. ण. °ल्वयेतीति ।

होत्रर्त्विजाऽग्निना वाचेत्याह याज्ञवल्क्यः । एतस्यार्थं व्याचष्टे । कः पुनर्होता येन मृत्युमतिक्रामतीति । उच्यते—वाग्वै यज्ञस्य यजमानस्य " यज्ञो वै यजमानः " इति श्रुतेः । यज्ञस्य यजमानस्य यो वाक्चैव होताऽधियज्ञे । कथं तत्तत्र येयं वाग्यज्ञस्य यजमानस्य सोऽयं प्रसिद्धोऽग्निरधिदैवतम् । तदेतत्प्रयाजप्रकरणे व्याख्यातम् । " स चाग्निर्होताऽग्निर्वै होता " इति श्रुतेः । यदेतद्यज्ञस्य साधनद्वयं होतार्त्विगधियज्ञमध्यात्मं च वागेतदुभयं साधनद्वयं परिच्छिन्नं मृत्युनाऽऽप्तं स्वाभाविकज्ञानासङ्गप्रयुक्तेन कर्मणा मृत्युना प्रतिक्षणमन्यथात्वमापद्यमानं वशीकृतम् । तदनेनाधिदैवतरूपेणाग्निना दृश्यमानं यजमानस्य यज्ञस्य मृत्योरतिमुक्तये भवति । तदेतदाह—स मुक्तिः स होताऽग्निर्मुक्तिरग्निस्वरूपदर्शनमेव मुक्तिः । यदैव साधनद्वयमग्निरूपेण पश्यति तदानीमेव हि स्वाभाविकादासङ्गान्मृत्योर्विमुच्यत आध्यात्मिकात्परिच्छिन्नरूपादाधिभौतिकाच्च । तस्मात्स होताऽग्निरूपेण दृष्टो मुक्तिर्मुक्तिसाधनं यजमानस्य ।

कीदृक्पुनर्दर्शनं मृत्युजयसाधनं होतेत्यादावुक्तमित्याशङ्क्याऽऽह—एतस्येति । व्याचष्टे वाग्वै यज्ञस्येत्यादिनेति शेषः । व्याख्यानमेव विशदयितुं पृच्छति—कः पुनरिति । दर्शनविषयं दर्शयन्नुत्तरमाह—उच्यत इति । यज्ञशब्दस्य यजमाने वृद्धप्रयोगो नास्तीत्याशङ्क्याऽऽह—यज्ञ इवेति । यजमानस्य या वागध्यात्मं सैवाधियज्ञे होताऽस्तु तथाऽपि कथं तयोर्देवतात्मना दर्शनमित्याह—कथमिति । तयोरग्न्यात्मना दर्शनमुत्तरवाक्यावष्टम्भेन व्याचष्टे—तत्तत्रेति । कथं पुनर्वाग्न्योरेकत्वं तदाह—तदेतदिति । तयोरेकत्वेऽपि कुतो होतुस्तदैक्यमित्याशङ्क्याऽऽह—स चेति । स मुक्तिरित्येतदवतारयितुं भूमिकां करोति—यदेतदिति । न केवलमेतदुभयं मृत्युना संस्पृष्टमेव किंतु तेन वशीकृतं चेत्याह—स्वाभाविकेति । मृत्युनाऽऽप्तं मृत्युनाऽभिपन्नमित्यनयोरर्थमनूद्य होत्रेत्यादेरर्थमनुवदति—तदनेनेति । साधनद्वयं तच्छब्दार्थः । यजमानग्रहणं होतुरुपलक्षणम् । उक्तेऽर्थे समनन्तरवाक्यमवतार्य व्याकरोति—तदेतदाहेति । मुक्तिशब्दस्तत्साधनविषयः । पदार्थमुक्त्वा वाक्यार्थमाह—अग्निस्वरूपेति । वाचो होतुश्चाग्निस्वरूपेण दर्शनमेव मुक्तिहेतुरिति यावत् । उक्तमर्थं प्रपञ्चयति—यदैवेति । स मुक्तिरित्यस्यार्थमुपसंहरति—तस्मादिति ।

---

१ च. ढ. याऽध्यात्मं वा । २ क. ग. घ. झ. तदग्न । ३ च. झ. ढ. होतार्त्वि । ४ क. ख. ङ. छ. ढ. °मापाद्य° । ५ क. ग. च. °स्य मृ° । ६ ख. घ. ढ. संसृष्ट° । ७ ख, ढ. °ब्दस्तु साध ।

साऽतिमुक्तिः । यैव च मुक्तिः साऽतिमुक्तिरतिमुक्तिसाधनमित्यर्थः । साधनद्वयस्य परिच्छिन्नस्य याऽधिदेवतारूपेणापरिच्छिन्नेनाग्निरूपेण दृष्टिः सा मुक्तिः । याऽसौ मुक्तिरधिदेवतादृष्टिः सैवाध्यात्माग्निभूतपरिच्छेदविषयासङ्गास्पदं मृत्युमतिक्रम्याधिदेवतात्वस्याग्निभावस्य प्राप्तिर्या फलभूता साऽतिमुक्तिरित्युच्यते । तस्या अतिमुक्तेर्मुक्तिरेव साधनमिति कृत्वा साऽतिमुक्तिरित्याह । यजमानस्य त्वतिमुक्तिर्वागादीनामग्न्यादिभाव इत्युद्गीथप्रकरणे व्याख्यातं । तत्र सामान्ये मुख्यप्राणदर्शनमात्रं मुक्तिसाधनमुक्तं न तद्विशेषो वागादीनामग्न्यादिदर्शनमिहं विशेषो वर्ण्यते । मृत्युप्राप्त्यतिमुक्तिस्तु सैव फलभूता योद्गीथब्राह्मणेन व्याख्याता मृत्युमतिक्रान्तो दीप्यत इत्याद्या ॥ २ ॥

वाक्यान्तरं समुत्थाप्य व्याचष्टे—साऽतिमुक्तिरिति । मुक्त्यतिमुक्त्योरसंकीर्णत्वं दर्शयति—साधनद्वयस्येति । प्राप्तिरतिमुक्तिरिति सबन्धः । तामेव संगृह्णाति—या फलभूतेति । फलभूतायामग्न्यादिदेवताप्राप्तौ कथमतिमुक्तिशब्दोपपत्तिरित्याशङ्क्याऽऽह—तस्या इति । ननु वागादीनामग्न्यादिभावोऽत्र श्रूयते यजमानस्य तु न किंचिदुच्यते तत्राऽऽह—यजमानस्येति । तर्हि तेनैव गतार्थत्वादनर्थकमिदं ब्राह्मणमित्याशङ्क्य बाढमित्यादिनोक्तं स्मारयति—तत्रेति । दर्शनवत्फलेऽपि विशेषः स्यादित्याशङ्क्याऽऽह—मृत्युप्राप्तीति ॥ ३ ॥

याज्ञवल्क्येति होवाच यदिदꣳ सर्वमहोरात्राभ्यामाप्तꣳ सर्वमहोरात्राभ्यामभिपन्नं केन यजमानोऽहोरात्रयोरतिमुच्यत इत्युध्वर्युणर्त्विजा चक्षुषाऽऽदित्येन चक्षुर्वै यज्ञस्याध्वर्युस्तद्यदिदं चक्षुः सोऽसावादित्यः सोऽध्वर्युः स मुक्तिः साऽतिमुक्तिः ॥ ४ ॥

याज्ञवल्क्येति होवाच । स्वाभाविकादज्ञानामङ्गप्रयुक्तात्कर्मलक्षणान्मृत्योरतिमुक्तिर्व्याख्याता तस्य कर्मणः सामङ्गस्य मृत्योराश्रयभूतानां दर्शपूर्णमासादिकर्मसाधनानां यो विपरिणामहेतुः कालस्तस्मात्कालात्पृथगतिमुक्तिर्वक्तव्येतीदमारभ्यते क्रियानुष्ठानव्यतिरे-

१ च. ढ. °व मु° । २ स. च. झ. ढ °धिदैवतरू° । ३ झ °धिदैवतद्दृ° । ४ घ. ज. सामान्यं । ५ घ. ङ. °शेषस्तद्विशेषाणां वा° । ६ च. ढ. °ह तद्विशे° । ७ ग. घ. ज. मृत्व्याप्त्य° । ८ ग. °णे व्या° । ९ घ. ञ. ण. °न्तरमु° । १० घ. मृत्व्याप्तिं° ।

केणापि प्रागूर्ध्वं च क्रियायाः साधनविपरिणामहेतुत्वेन व्यापारदर्शनात्कालस्य । तस्मात्पृथक्कालादातिमुक्तिर्वक्तव्येत्यत आह-यदिदं सर्वमहोरात्राभ्यामाप्तं स च कालो द्विरूपोऽहोरात्रादिलक्षणस्तिथ्यादिलक्षणश्च । तत्राहोरात्रादिलक्षणात्तावदतिमुक्तिमाह-अहं रात्र्यां हि सर्वं जायते वर्धते विनश्यति च । तथा यज्ञसाधनं च । यज्ञस्य यजमानस्य चक्षुरध्वर्युश्च शिष्टान्यक्षराणि पूर्ववन्नयानि । यजमानस्य चक्षुरध्वर्युश्च साधनद्वयमध्यात्माधिभूतपरिच्छेदं हित्वाऽधिदैवतात्मना दृष्टं यत्स मुक्तिः सोऽध्वर्यगादित्यभावेन दृष्टो मुक्तिः सैव मुक्तिरेवातिमुक्तिरिति पूर्ववदादित्यात्मभावमापन्नस्य हि नाहोरात्रे संभवतः ॥ ४ ॥

प्रश्नान्तरमवतार्य तात्पर्यमाह-याज्ञवल्क्येति । अभ्रयभूतानि कानि तानीत्याशङ्क्याऽऽह-दर्शपूर्णमासादीति । प्रतिक्षणमन्यथात्वं विपरिणामः । अन्यादिसाधनान्याश्रित्य काम्यं कर्म मृत्युशब्दिरुपन्यस्यते तेषां साधनानां विपरिणामहेतुत्वात्कालो मृत्युस्ततोऽतिमुक्तिर्वक्तव्येत्युत्तरग्रन्थारम्भ इत्यर्थः । कर्मणो मुक्तिरुक्ता चेत्कालादपि सोक्तैव तस्य कर्मानन्तर्भावेन मृत्युत्वादित्याशङ्क्याऽऽह-पृथगिति । कर्मानपेक्षतया कालस्य मृत्युत्वं व्युत्पादयति-क्रियेति । कालस्य पृथङ्मृत्युत्वे सिद्धे फलितमाह-तस्मादिति । उत्तरग्रन्थस्थप्रश्नयोर्विषयं भेत्तुं कालं भिनत्ति-स चेति । आदित्यश्चन्द्रश्च कर्मभेदाद्द्वैविध्यमत्रेयम् । कालस्य द्वैरूप्ये सत्याद्यकण्डिकाविषयमाह-तत्रेति । अहोरात्रयोर्मृत्युत्वे सिद्धे ताभ्यामतिमुक्तिर्वक्तव्या तदेव कथमित्याशङ्क्याऽऽह-अहोरात्राभ्यामिति । यज्ञसाधनं च तथा ताभ्यां जायते वर्धते क्षयति वेति सम्बन्धः । प्रतिवचनव्याख्याने यज्ञशब्दार्थमाह-यजमानस्येति । स मुक्तिरित्यस्य तात्पर्यार्थमाह- जमानस्येत्यादिना । तस्यैवाक्षरार्थं कथयति-सोऽध्वर्यरिति । यथा कर्मेत्याऽऽदित्यात्मत्वेऽपि कथमहो रात्रलक्षणान्मृत्योरतिमुक्तिरत आह-आदित्येति । 'नोदेता नास्तमेता' इत्यादिश्रुतेरादित्ये वस्तुतो नाहोरात्रे स्तः । तथा च तदात्मनि विदुष्यपि न ते संभवत इत्यर्थः ॥ ४ ॥

याज्ञवल्क्येति होवाच यदिदꣳ सर्वं पूर्वपक्षापरपक्षाभ्यामाप्तꣳ सर्वं पूर्वपक्षापरपक्षाभ्यामत्मिपन्नं केन यजमानः पूर्वपक्षापरपक्षयोरातिमतिमुच्यत इत्युद्गात्रर्त्विजा वायुना प्राणेन

---

१ ख. घ. ञ. ट. °न्थस्य प्र° । २ ङ. ण. °त्पर्यमा° । ३ क. ढ. °क्तनीत्या° ।

प्राणो वै यज्ञस्योद्गाता तद्योऽयं प्राणः स वायुः स उद्गाता स मुक्तिः साऽतिमुक्तिः ॥ ५ ॥

इदानीं तिथ्यादिलक्षणादतिमुक्तिरुच्यते—यदिदं सर्वमहोरात्रयोरविशिष्टयोरादित्यः कर्ता न प्रतिपदादीनां तिथीनां । तासां तु वृद्धिक्षयोपगमनेन प्रतिपत्प्रभृतीनां चन्द्रमाः कर्ता । अतस्तदापत्त्या पूर्वपक्षापरपक्षात्यय आदित्यापत्त्याऽहोरात्राव्ययवत् । तत्र यजमानस्य प्राणो वायुः स एवोद्गातरुद्गाथब्राह्मणऽवगतं वाचा च ह्येव स प्राणेन चोदगायादिति च निर्धारितम् । अथेतस्य प्राणस्याऽऽपः शरीरं ज्योतीरूपमसौ चन्द्र इति च । प्राणवायचन्द्रमसामेकत्वाच्चन्द्रमसा वायुना चोपसंहारे न काश्चिद्विशेष एवंमन्यमाना श्रुतिर्वायनाऽधिदैवतरूपेणोपसंहरति । आप च वायुनिमित्ता हि वृद्धिक्षयौ चन्द्रमसः । तेन तिथ्यादिलक्षणस्य कालस्य कर्तृरूपि कारयिता वायुः । अतो वायुरूपापन्नस्तिथ्यादिकालादनानां भवतीत्युपपन्नतरं भवति । तेन श्रुत्यन्तरे चन्द्ररूपेण दृष्टिमुक्तिरतिमुक्तिश्च । इह तु काण्वानां साधनद्वयस्य तत्कारणरूपेण वाय्वात्मना दृष्टिमुक्तिरतिमुक्तिश्चेति न श्रुत्योर्विरोधः ॥ ५ ॥

काण्डकान्तरस्य तात्पर्यमाह—इदानीमिति । नन्वहोरात्रादिलक्षणे काले तिथ्यादिलक्षणस्य क उत्थानमित्याशङ्क्याऽऽह—अतिमुक्तावुक्तायां तिथ्यादिलक्षणादपि कालादतावुक्तेति कुतः पृथगारम्भेणेति तत्राऽऽह—अहोरात्रयोरिति । अविशिष्टयोर्वृद्धिक्षयशून्ययोरिति यावत् । कथं तर्हि तिथ्यादिलक्षणात्कालादतिमुक्तिरत आह—अतस्तदापत्त्येति । चन्द्रप्राप्त्या तिथ्याद्यत्ययो माध्यंदिनश्रुत्योच्यते काण्वश्रुत्या तु वायुभावापत्त्या तदत्यय उक्तः । तथा च श्रुत्योर्विरोधे कः समाधिरित्याशङ्क्याऽऽह—तत्रेति । काण्वश्रुताविति यावत् । उद्गातुरपि प्राणात्मकवायुरूपत्वं श्रुतिद्वयानुसारेण दर्शयति—स एवेति । न केवलमुद्गातुः प्राणत्वं प्रतिज्ञामात्रेण प्रतिपन्नं किंतु विचार्य निर्धारितं चेत्याह—वाचेति । प्राणचन्द्रमसोश्चैकत्वं तत्राधिकारे निर्धारितमित्याह—अथेति । उक्तया रीत्या प्राणादीनामेकत्वे श्रुत्योरविरोधं फलितमाह—प्राणेति । मनोलक्षणोश्चन्द्रमसा प्राणोद्गात्रोश्च वायुनोपास्यत्वेनोपसंग्रहे मृत्युतरणे विशेषो नास्तीति श्रुत्योर्विकल्पेनोपपत्तिरित्यर्थः । उपसंहरति प्राणमुद्गातारं च तद्रूपेणोपास्यतया संगृह्णाति काण्वश्रुतिरित्यर्थः । इतश्च काण्वश्रुतिरुपपन्नेत्याह—अपि चेति । वायुः सूत्रात्मा तन्निमित्तौ

१ च. ढ. °कत्वे चन्द्र° । २ ख. घ. ङ. छ. ज. °विदेवतारू° । ३ घ. च. ज. °लाती° ।

स्यावयवस्य चन्द्रमसो वृद्धिहानी । सूत्राधीना हि चन्द्रादेर्जगतश्चेष्टेत्यर्थः । पृथग्ग्रहणादिहेतुत्वे फलितमाह—तेनेति । कर्तुश्चन्द्रस्येत्यर्थः । वायोश्चन्द्रमसि कारित्वेऽपि प्रकृते किमायातं तदाह—अत्र इति । उदितानुदितहोमवद्विकल्पमुपेत्याधिरोहमुपसंहरति—तेनेति । श्रुत्यन्तरं माध्यंदिनश्रुतिः । साधनद्वयस्येत्युभयत्र संबध्यते । ब्रह्मणोऽग्नौ मनसो ब्रह्मणश्चेत्यर्थः । उत्तरत्र प्राणस्योद्गातुश्चेत्यर्थः । ब्रह्मन्ब्रह्मन्द्विषयः ॥ ५ ॥

याज्ञवल्क्येति होवाच यदिदमन्तरिक्षमनारम्बण-
मिव केनाऽऽक्रमेण यजमानः स्वर्गं लोकमाक्र-
मत इति ब्रह्मणर्त्विजा मनसा चन्द्रेण मनो
वै यज्ञस्य ब्रह्मा तद्यदिदं मनः सोऽसौ चन्द्रः
स ब्रह्मा स मुक्तिः साऽतिमुक्तिरित्यतिमोक्षा
अथ संपदः ॥ ६ ॥

मृत्योः कालादतिमुक्तिर्व्याख्याता यजमानस्य सोऽतिमुच्यमानः केनावलम्बेन परिच्छेदविषयं मृत्युमतीत्य फलं प्राप्नोत्यतिमुच्यत इत्युच्यते । यदिदं प्रसिद्धमन्तरिक्षमाकाशोऽनारम्बणमनालम्बनमिवशब्दाद्वस्तुतो तत्राऽऽलम्बनं तत्तु न ज्ञायत इत्यभिप्रायः । यत्तु तदज्ञायमानमालम्बनं तत्सर्वनाम्ना केनेति पृच्छ्यते । अन्यथा फलप्राप्तेरसंभवात् । केनावलम्बेनाऽऽक्रमेण यजमानः कर्मफलं प्रतिपद्यमानोऽतिमुच्यते किं साधनमिति प्रश्नविषयः । केनाऽऽक्रमेण यजमानः स्वर्गं लोकमाक्रमत इति स्वर्गं लोकं फलं प्राप्नोत्यतिमुच्यत इत्यर्थः । ब्रह्मणर्त्विजा मनसा चन्द्रेणेत्यक्षरन्यासः पूर्ववत् । तत्राध्यात्मं यज्ञस्य यजमानस्य यदिदं प्रसिद्धं मनः सोऽसौ चन्द्रोऽधिदैवम् । मनोऽध्यात्मं चन्द्रमा अधिदैवमिति हि प्रसिद्धम् । स एव चन्द्रमा ब्रह्मर्त्विक्केनाधिभूतं ब्रह्मणः परिच्छिन्नं रूपमध्यात्मं च मनस एतदुभयमपरिच्छिन्नेन चन्द्रमसो रूपेण पश्यति । तेन चन्द्रमसा मनसाऽवलम्बनेन कर्मफलं स्वर्गं लोकं प्राप्नोत्यतिमुच्यत इत्यभिप्रायः । इतीत्युपसंहारार्थं वचनम् । इत्येवंप्रकारा मृत्योरतिमोक्षाः । सर्वाणि हि दर्शनप्रकाराणि यज्ञाङ्गविषयाण्यस्मिन्नवसर उक्तानीति कृत्वोपसंहार इत्यतिमोक्षाः । एवंप्रकारा अतिमोक्षा इत्यर्थः ।

---

१ क. ङ. तदलं । २ घ. ज. ञ्च न ज्ञा° ।

यदिदमन्तरिक्षमित्यादि प्रश्नान्तरं वृत्तानुवादपूर्वकमुपादत्ते—वृत्त्योरिति । व्याख्यानव्याख्येयभावेन क्रियापदे नेतव्ये । इत्येतत्प्रश्नरूपमुच्यते तत्तत्प्रश्नाकर्त्रेत्ति [णे]ति यावत् । तद्व्याचष्टे—यदिदमिति । केनेति प्रश्नस्य विषयमाह—यत्त्विति । प्रश्नविषयं प्रपञ्चयति—अन्यथेति । आलम्बनमन्तरेणेति यावत् । प्रश्नार्थ संक्षिप्योपसंहरति—केनेति । अक्षरन्यासोऽक्षराणामर्थेषु वृत्तिरिति यावत् । मनो वै यज्ञस्येत्यादेरर्थमाह—तत्रेति । व्यवहारभूमिः तत्तत्प्रयोजनमित्यर्थः । वाग्वा ऋचामित्यादेरर्थमाह—तेनेति । तृतीयाभ्यां संबध्यते । दर्शनफलमाह—तेनेति । वागादीनामवाग्व्यादिभावेन दर्शनमुक्तं त्वगादीनां तु वाय्वादिभावेन दर्शनं तत्कथं वक्तव्यशेषे तत्तूपसंहारोपपत्तिरित्याशङ्क्याऽऽह—सर्वाणीति । वागादावुक्तन्यायस्य त्वगादावतिदेशोऽत्र विवक्षित इत्याह—एवंप्रकारा इति ।

अथ संपदः । अथाधुना सपद उच्यन्ते । संपन्नाम केनचित्तत्साधन्येनाग्निहोत्रादीनां कर्मणां फलवतां तत्फलाय संपादनं संपत्फलस्यैव वा सर्वात्साहेन फलसाधनानुष्ठाने प्रयततां केनचिद्गुण्येनासंभवः । तदिदानीमाहिताग्निः सन्यत्किंचित्कर्माग्निहोत्रादीनां यथासंभवमादायाऽऽलम्बनीकृत्य कर्मफलविद्वत्तायां सत्यां यत्कर्मफलकामो भवति तदेव संपादयति । अन्यथा राजसूयाश्वमेधपुरुषमेधसर्वमेधलक्षणानामविदुषां त्रैवर्णिकानामप्यसंभवस्तेषां तत्पाठः स्वाध्यायार्थ एव केवलः स्यात् । यदि तत्फलप्राप्त्युपायः कश्चन न स्यात् । तस्मात्तेषां संपदेव तत्फलप्राप्तिरस्मात्संपदामपि फलवत्त्वमत संपद आरभ्यन्ते ॥ ६ ॥

अथशब्दो [ऽ]नन्तरमभेदकथनानन्तर्यार्थः । केयं संपन्नामेति पृच्छति—संपन्नामेति । उत्तरमाह—केनचिदिति । महां फलवतामग्निहोत्रादिकर्मणां कर्मत्वादिना सामान्येनाल्पीयः सु कर्मसु विवक्षितफलसिद्ध्यर्थं संपत्तिः संपदुच्यते । यथाशक्त्यग्निहोत्रादिनिर्वर्तनेनाधनेत्यादि यथा निर्वर्त्यत इति ध्यानं संपादनमर्थः । यदा फलस्यैव देवलोकादेरुज्ज्वलत्वादिसामान्येनाऽऽज्याद्याहुतिषु संपादनं संपदित्याह—फलस्येति । संपदनुष्ठानावसरमादर्शयति—सर्वात्साहेनेति । अत्यन्तबोऽनुष्ठानस्य यदेति शेषः । कर्मिणामेव संपदनुष्ठानेऽधिकार इति दर्शयितुमाह—ताग्निः सन्नित्युक्तम् अग्निहोत्रादीनामिति निर्धारणे षष्ठी । यथासंभवं यथाविधानानुरूपमिति यावत् । आदायेत्यस्य व्याख्यानमालम्बनीकृत्येति । न केवलं कर्मित्वमेव संपदनुष्ठातुरपेक्ष्यते किंतु तत्फलविद्यावत्त्वमपीत्याह—कर्मेति । तदेव कर्मफलमेवेत्यर्थः । कर्माण्येव फलवन्ति न संपदस्तत्कथं तासां कार्यत्वमित्या-

१ क. °ति । द्वितीं° । २ ख. घ. ङ. ढ. °कानां केषाम° ।

शङ्क्याऽऽह—अन्यथेति । विहिताध्ययनस्यार्थज्ञानानुष्ठानादिपरम्परया फलवत्त्वमिष्टम् । न चाश्वमेधादिषु सर्वेषामनुष्ठानसंभवः कर्मस्वधिकृतानामपि त्रैवर्णिकानां केषांचिदनुष्ठानासंभवात्तेषां तदध्ययनार्थवत्त्वानुपपत्त्या संपदामपि फलवत्त्वमेष्टव्यमित्यर्थः । महतोऽश्वमेधादिफलस्य कथमल्पीयस्या संपदा प्राप्तिरित्याशङ्क्य शास्त्रप्रामाण्यादित्यभिप्रेत्याऽऽह—यदिति । तदा तत्पाठः स्वाध्यायार्थं एवेति पूर्वेण संबन्धः । अध्ययनस्य फलवत्त्वे वक्तव्ये फलितमाह—तस्मादिति । तेषां राजसूयादीनामिति यावत् । ब्राह्मणादीनां राजसूयाद्यध्ययनसामर्थ्यात्तेषां संपदैव तत्फलप्राप्तावपि किं सिध्यति तदाह—तस्मात्संपदामिति । कर्मणामिवेति दृष्टान्तार्थोऽपिशब्दः । तासां फलवत्त्वे फलितमाह—अत इति ॥ ६ ॥

याज्ञवल्क्येति होवाच कतिभिरयमद्यर्ग्भिर्होताऽस्मिन्यज्ञे करिष्यतीति तिसृभिरिति कतमास्ता-स्तिस्र इति पुरोनुवाक्या च याज्या च शस्यैव तृतीया किं ताभिर्जयतीति यत्किंचेदं प्राणभृदिति ॥ ७ ॥

याज्ञवल्क्येति होवाचाभिमुखीकरणाय । कतिभिरयमद्यर्ग्भिर्होताऽस्मिन्यज्ञे कतिभिः कतिसंख्याभिर्ऋग्जातिभिरयं होतर्त्विगस्मिन्यज्ञे करिष्यति शस्त्रं शंसत्याहेतरस्तंसंख्याभिर्ऋग्जातिभिरित्युक्तवन्तं प्रत्याहेतरः कतमास्तास्तिस्र इति । संख्येयाविषयोऽयं प्रश्नः पूर्वस्तु संख्याविषयः । पुरोनुवाक्या च प्राग्यागकालाद्याः प्रयुज्यन्त ऋचः सग्र्जातिः पुरोनुवाक्येत्युच्यते । यागार्थं याः प्रयुज्यन्त ऋचः सग्र्जातिर्याज्या । शस्त्रार्थं याः प्रयुज्यन्त ऋचः सग्र्जातिः शस्या । सर्वास्तु याः काश्चनर्चस्ताः स्तोत्रिया वा अन्या वा सर्वा एतास्वेव तिसृषु ऋग्जातिष्वन्तर्भवन्ति । किं ताभिर्जयतीति यत्किंचेदं प्राणभृदिति अतश्च संख्यासामान्याद्यत्किंचित्प्राणभृज्जातं तत्सर्वं जयति तत्सर्वं फलजातं संपादयति संख्यादिसामान्येन ॥ ७ ॥

संपदामारम्भमुपपाद्य प्रश्नवाक्यमुत्थापयति—याज्ञवल्क्येति । प्रतीकमादाय व्याचष्टे—कतिभिरित्यादिना । कतिभिः कतमा इति प्रश्नयोर्विषयभेदं दर्शयति—संख्येयेति । स्तोत्रिय नामान्याऽपि काचिदृग्जातिरस्तीत्याशङ्क्याऽऽह—सर्वास्त्विति । अन्या वेति शस्त्रजातिग्रहः । विषयभेदात्सर्वशब्दापुनरुक्तिः । अतश्च संपत्तिकरणादित्यर्थः । संख्यासामान्यमाश्रित्याविशेषादिति यावत् । प्राण-

१ क. ख. ण. °त्तिकार° ।

भुञ्जातं लोकत्रयं विवक्षितम् ॥ ७ ॥

याज्ञवल्क्येति होवाच कत्ययमध्वर्युरस्मिन्यज्ञ आहुतीर्होष्यतीति तिस्र इति कतमास्ता इति या हुता उज्ज्वलन्ति या हुता अतिनेदन्ते या हुता अधिशेरते किं ताभिजयतीति या हुता उज्ज्वलन्ति देवलोकमेव ताभिर्जयति दीप्यत इव हि देवलोको या हुता अतिनेदन्ते पितृलोकमेव ताभिर्जयत्यतीव हि पितृलोको या हुता अधिशेरते मनुष्यलोकमेव ताभिर्जयत्यध इव हि मनुष्यलोकः ॥ ८ ॥

याज्ञवल्क्येति होवाचेति पूर्ववत् । कत्ययमध्वर्युरस्मिन्यज्ञ आहुतीर्होष्यतीति कत्याहुतिप्रकारास्तिस्र इति कतमास्तास्तिस्र इति पूर्ववत् । इतर आह या हुता उज्ज्वलन्ति समिदाज्याहुतयः । या हुता अतिनेदन्तेऽतीव शब्दं कुर्वन्ति मांसाद्याहुतयः । या हुता अधिशेरतेऽध्यधो गत्वा भूमेरधिशेरते पयःसोमाहुतयः । किं ताभिर्जयतीति ताभिरेवं निर्वर्तिताभिराहुतिभिः किं जयतीति । या आहुतयो हुता उज्ज्वलन्त्युज्ज्वलनयुक्ता आहुतयो निर्वर्तिताः फलं च देवलोकारूप्यमुज्ज्वलमेव तेन सामान्येन या मयेता उज्ज्वलन्त्य आहुतयो निर्वर्त्यमानास्ता एताः साक्षाद्देवलोकस्य कर्मफलस्य रूपं देवलोकारूप्यं फलमेव मया निर्वर्त्यत इत्येवं संपादयति । या हुता अतिनेदन्त आहुतयः पितृलोकमेव ताभिर्जयति कुत्सितशब्दकर्तृत्वसामान्येन । पितृलोकसंबद्धायां हि संयमन्यां पुर्यां वैवस्वतेन यात्यमानानां हा हताः स्म मुञ्च मञ्चेति शब्दो भवति । तथाऽवदानाहुतयस्तेन पितृलोकसामान्यात्पितृलोक एव मया निर्वर्त्यत इति संपादयति । या हुता अधिशेरते मनुष्यलोकमेव ताभिर्जयति भूम्युपरिभवबन्धसामान्यादध इव ह्यध एव हि मनुष्यलोक उपरितनान्माध्याल्लोकान-

१ ख. ढ. रधः शे । २ क. घ. छ ढ. न पाठ्य ३ ग. य. ज 'था वदना' ।

पेक्ष्याथवाऽधोगमनमपेक्ष्यातो मनुष्यलोक एव मया निर्वर्त्यत इति संपादयति पयःसोमाहुतिनिर्वर्तनकाले ॥ ८ ॥

प्रथमः संख्याविषयो द्वितीयस्तु संख्येयविषयः प्रश्न इति विभाग लक्षयति—पूर्ववदिति । तेन सामान्येनोज्ज्वलत्वेनेति यावत् । उक्तमर्थं संक्षिप्याऽऽह—देवलोकाख्यमिति । कथं सोमाद्याहुतीनां पितृलोकेन सह यथोक्तं सामान्यमत आह—पितृलोकेति अधोगमनमपेक्ष्येति । अस्ति हि सोमाद्याहुतीनामधस्तादूर्ध्वगमनमस्ति च मनुष्यलोकस्य पापचरस्य तादृग्गमनं तदपेक्ष्येत्यर्थः । अतः सामान्यादिति यावत् ॥ ८ ॥

याज्ञवल्क्येति होवाच कतिभिरयमद्य ब्रह्मा यज्ञं दक्षिणतो देवताभिर्गोपायतीत्येकयेति कतमा सैकेति मन एवेत्यनन्तं वै मनोऽनन्ता विश्वे देवा अनन्तमेव स तेन लोकं जयति ॥ ९ ॥

याज्ञवल्क्येति होवाचेति पूर्ववत् । अथर्त्विग्ब्रह्मा दक्षिणतो ब्रह्मासने स्थित्वा यज्ञं गोपायति । कतिभिर्देवताभिर्गोपायतीति प्रातिपदिकमेतद्बहुवचनम् । एकया हि देवतया गोपायत्यसौ । एवं ज्ञाते बहुवचनेन प्रश्नो नोपपद्यते स्वयं जानतस्तस्मात्पूर्वयोः कण्डिकयोः प्रश्नप्रतिवचनेषु कतिभिः कति तिसृभिस्तिस्र इति प्रसङ्गं दृष्ट्वेहापि बहुवचनेनैव प्रश्नोपक्रमः क्रियते । अथवा प्रतिवादिव्यामोहार्थं बहुवचनम् । इतर आह एकयेत्येका सा देवता यथा दक्षिणतः स्थित्वा ब्रह्माऽऽसने यज्ञं गोपायति । कतमा सैकेति । मन एवेति मनः सा देवता । मनसा हि ब्रह्मा ध्यायियते ध्याननेव । "तस्य यज्ञस्य मनश्च वाक्च वर्तनी तयोरन्यतरां मनसा संस्करोति ब्रह्मा" इति श्रुत्यन्तरात् । तेन मन एव देवता तया मनसा हि गोपायति ब्रह्मा यज्ञम् । तच्च मनो वृत्तिभेदेनानन्तम् । वैशब्दः प्रसिद्धावद्योतनार्थः । प्रसिद्धं मनस आनन्त्यम् । तदानन्त्याभिमानिनो देवाः । अनन्ता वै विश्वे देवाः । सर्वे देवा यत्रैकं भवन्तीत्यादिश्रुत्यन्तरात् । तेनाऽऽनन्त्यसामान्यादनन्तमेव स तेन लोकं जयति ॥ ९ ॥

---

१ च. द. °सिद्ध्यर्थं । २ क. °तकः । प्र° ।

दक्षिणत आहवनीयस्येति शेषः । प्रातङ्किकं बहुवचनमित्युक्तं प्रकटयति—एकया हीति । जल्पकथा प्रस्तुतेति हृदि निधाय बहूक्तेर्गत्यन्तरमाह—अथवेति । मनसो देवतात्वं साधयति—मनसेति । वर्तनी वर्त्मनी वयोर्वाङ्मनसयोर्वर्त्मनोरन्यतरां वाचं मनसा मौनेन ब्रह्मा संस्करोति वाग्विसर्गे प्रायश्चित्तविधानादिति श्रुत्यन्तरस्यार्थः । तथाऽपि कथं तत्पदः तिस्रिस्वाऽऽह—तत्रेति । देवाः सर्वे यस्मिन्मनस्येकं भवन्त्यभिन्नत्वं प्रतिपद्यन्ते तस्मिन्भिन्नदेवदृष्ट्या भवत्यनन्तलोकमिति श्रुत्यन्तरस्यार्थः । अनन्तमेवेत्यादि व्याचष्टे—तेनेति । उक्तेन प्रकारेणेति यावत् । तेन मनसि भिन्नदेवदृष्ट्यासेत्यर्थः । स इत्युपासकोक्तिः ॥ ९ ॥

याज्ञवल्क्येति होवाच कतमयमयोद्गातास्मिन्यज्ञे स्तोत्रिया: स्तोष्यतीति तिस्र इति कतमास्तास्तिस्र इति पुरोनुवाक्या च याज्या च शस्यैव तृतीया कतमास्ता या अध्यात्ममिति प्राण एव पुरोनुवाक्याऽपानो याज्या व्यानः शस्या किं वाभिजयतीति पृथिवीलोकमेव पुरोनुवाक्यया जयत्यन्तरिक्षलोकं याज्यया द्युलोकꣳ शस्यया ततो ह होताऽश्वल उपरराम ॥ १० ॥

इति बृहदारण्यकोपनिषदि तृतीयाध्याये
प्रथमं ब्राह्मणम् ॥ १ ॥

याज्ञवल्क्येति होवाचेति पूर्ववत् । कति स्तोत्रियाः स्तोष्यतीत्ययमुद्गाता । स्तोत्रिया नाम ऋक्सामसमुदायः कतिपयानामृचाम् । स्तोत्रिया वा शस्या वा याः काश्चन ऋचस्ताः सर्वास्तिस्र एवेत्याह । ताश्च व्याख्याताः पुरोनुवाक्या च याज्या च शस्यैव तृतीयेति । तत्र पूर्वमुक्तं यत्किंचेदं प्राणभृत्सर्वं जयतीति तत्तेन सामान्येनेत्युच्यते—कतमास्तास्तिस्र ऋचो या अध्यात्मं भवन्तीति । प्राण एव पुरोनुवाक्या । पशब्दस्यामाम्यात् । अपानो याज्या । आनन्तर्यात् । अपानेन हि प्रत्तं हविर्देवता ग्रसन्ति । यागश्च प्रदानम् । व्यानः शस्या " अप्राणन्नपानन्नृचमाभिव्याहरति " इति श्रुत्यन्तरात् । किं

---

१ क ख. घ. ञ. ट. ण °न्विश्वदे° । २ क. ख. घ. ञ. ट. ण विश्वदे° ।

ताभिर्जयतीति व्याख्यातम् । तत्र विशेषसंबन्धसामान्यमनुक्तमिहोच्यते सर्वमन्यद्व्याख्यातम् । लोकसंबन्धसामान्येन पृथिवीलोकमेव पुरोनुवाक्यया जयत्यन्तरिक्षलोकं याज्यया मध्यमत्वसामान्यात् । द्युलोकं शस्ययोर्ध्वत्वसामान्यात् । ततो ह तस्मादात्मनः प्रश्ननिर्णयादसौ होताऽश्वल उपरराम नायमस्मद्वोचर इति ॥ १० ॥

इति बृहदारण्यकोपनिषद्भाष्ये तृतीयाध्यायस्य
प्रथमं मधुब्राह्मणम् ॥ १ ॥

पूर्ववदित्यभिमुखीकरणायेत्यर्थः । प्रतिवचनमुपादत्ते—स्तोत्रिया वेति । प्रगीतमृग्जातं स्तोत्रमप्रगीतं शस्त्रम् । कतमास्तास्तिस्र इत्यादेस्तात्पर्यमाह—ताभ्येति । प्रश्नान्तरं वृत्तमनुद्योपादत्ते—तत्रेति । यज्ञाधिकारः तत्रम्यर्थः । पुरोनुवाक्यादिना लोकत्रयजलक्षणं फलं केन सामान्येनेत्यपेक्षायां संख्याविशेषेत्युक्तं स्मारयति—तदिति । अधियज्ञे त्रयमुक्तं स्मारयित्वाऽध्यात्मविशेषं दर्शयितुमुत्तरो ग्रन्थ इत्याह—उच्यत इति । प्राणादौ पुरोनुवाक्यादौ च पृथिव्यादिलोकदृष्टिरिति प्रश्नपूर्वकमाह—कतमा इति । अपाने याज्याहष्टौ हेत्वन्तरमाह—अपानेन हीति । हस्ताद्यादानव्यापारेणेति यावत् । प्राणापानव्यापारव्यतिरेकेण शस्त्रप्रयोगस्य श्रुत्यन्तरे सिद्धत्वाद्व्याने शस्यादृष्टिरित्याह—अप्राणन्निति । तत्र पुरोनुवाक्यादिषु चेति यावत् । इहेत्यनन्तरवाक्योक्तिः । सर्वमन्यदिति संख्यासामान्योक्तिः । किं तद्विशेषसंबन्धसामान्यं तदाह—लोकेति । पृथिवीलक्षणेन लोकेन सह प्रथमत्वेन संबन्धसामान्यं पुरोनुवाक्यायामस्ति तेन तया पृथिवीलोकमेव प्रथमेनीत्यर्थः । अश्वलस्य तूष्णींभावं भजतोऽभिप्रायमाह—नायमिति ॥ १० ॥

इति बृहदारण्यकोपनिषद्भाष्यटीकायां तृतीयाध्यायस्य
प्रथमं मधुब्राह्मणम् ॥ १ ॥

(अथ तृतीयाध्यायस्य द्वितीयं ब्राह्मणम्) ।

आख्यायिकासंबन्धः प्रसिद्ध एव । मृत्योरतिमुक्तिर्व्याख्याता कालक्षणाकर्मलक्षणाच्च । कः पुनरसौ मृत्युर्यस्मादतिमुक्तिर्व्याख्याता । स च स्वाभाविकाज्ञानमहाप्रदोऽध्यात्माधिभूताविषयपरिच्छिन्नो

---

१ क. ख. ग. ङ. च. छ. झ ढ. ध्यत्वं । २ क. ञ. ण. ध्यात्मत्व ।

ग्रहातिग्रहलक्षणो मृत्युः । तस्मात्परिच्छिन्नरूपान्मृत्योरतिमुक्तस्य रूपाण्यग्न्यादित्यादीन्युद्गीथप्रकरणे व्याख्यातानि । अश्वलप्रश्ने च तद्गतो विशेषः कश्चित् । तच्चैतत्कर्मणां ज्ञानसहितानां फलम् । एतस्मात्साध्यसाधनरूपात्संसारान्मोक्षः कर्तव्य इत्यतो बन्धनरूपस्य मृत्योः स्वरूपमुच्यते । बद्धस्य हि मोक्षः कर्तव्यः ।

ब्राह्मणान्तरमवतारयन्नाख्यायिका किमर्थेति शङ्कमानं प्रत्याह—आख्यायिकेति । याज्ञवल्क्यो हि विद्याप्रकर्षवशादत्र पूजाभागी लक्ष्यते नाऽर्तभागस्तथा विद्यामान्द्यादतो विद्यास्तुत्यर्थेयमाख्यायिकेत्यर्थः । इदानीं ब्राह्मणार्थं वक्तुं वृत्तं कीर्तयति—मृत्योरिति । मृत्युस्वरूपं पृच्छति—कः पुनरसाविति । तत्स्वरूपनिरूपणार्थं ब्राह्मणमुत्थापयति—स चेति । मृत्युरिति संबन्धः । स्वाभाविकं नैसर्गिकमनादिसिद्धमज्ञानं तस्मादासङ्गः स आत्मदेमिवाऽऽत्मदं यस्य स तथेति विग्रहः । तस्य विषयमुक्त्वा व्याप्तिमाह—अध्यात्मेति । तस्य स्वरूपमाह—ग्रहेति । यथोक्तमृत्युव्याप्तिमग्न्यादीनां कथयति—तस्मादिति । तान्यपि ग्रहातिग्रहगृहीतान्येवार्थेन्द्रियसंसर्गित्वादित्यर्थः । तद्गतो विशेषोऽग्न्यादिगतो दृष्टिभेद इति यावत् । कश्चिद्व्याख्यात इति संबन्धः । सूत्रस्यापि मृत्युग्रस्तत्वमभिप्रेत्याऽऽह—तच्चेति । अग्न्यादित्याद्यात्मकं सौत्रं पदमिति यावत् । फलं यथोक्तमृत्युग्रस्तमिति शेषः । किमिति मृत्योर्बन्धनरूपस्य स्वरूपमुच्यते तत्राऽऽह—एतस्मादिति । ननु मोक्षे कर्तव्ये बन्धरूपोपवर्णनमनुपयुक्तमित्याशङ्क्याऽऽह—बद्धस्य हीति ।

यद्प्यतिमुक्तस्य स्वरूपमुक्तं तत्रापि ग्रहातिग्रहाभ्यामविनिर्मुक्त एव मृत्यूरूपाभ्यामुक्तम् । तथा चोक्तमशनाया हि मृत्युरेष एव मृत्युरिति । आदित्यस्थं पुरुषमङ्गीकृत्याऽऽहको मृत्युर्बहना इति च । तदात्मभावापन्नो हि मृत्योरात्मनिमुच्यत इत्युच्यते न च तत्र ग्रातिग्रहौ मृत्युरूपौ न स्तः । अथैतस्य मनसा योऽशरीरं ध्यायन्विद्वमसावादित्यः । मनश्च ग्रहः स कायेनातिग्राहेण गृहीत इति वक्ष्यति प्राणो वै ग्रहः सोऽपानेनातिग्राहेणेति वाग्वै ग्रहः स नाम्नाऽतिग्राहेणेति च । तथा व्यञ्जनविभागे व्याख्यातस्माभिः । सुविचारितं चैतद्यदेव प्रवृत्तिकारणं तदेव निवृत्तिकारणं न भवतीति ।

अग्न्यादीनां यथोक्तमृत्युव्याप्तिमुक्तां व्यक्तीं करोति—यदर्पीति । अविनि-

---

१ ख. घ. ज. ढ च्छिन्नान्मृ° । २ ख बन्धस्य । ३ ढ. °निर्धारणा° । ४ क. ख. ञ. ट. ण. °सङ्गस्तस्याऽऽत्म° । ५ क. ख. ञ. ण °दमेवाऽऽ° । ६ क. ख. ञ. बन्धस्य । ७ घ. ङ. च. °कस्व° । ८ ग. ङ. झ. °था चान्न° ।

मुक्त एवातिमुक्तोऽपीति शेषः । तथाऽपि कथं सूत्रस्य यथोक्तमृत्युव्याप्तिस्तत्राऽऽह—तथा चेति । तथाऽपि कथमन्यादीनां मृत्युव्याप्तिर्न हि तत्र प्रमाणमस्ति तत्राऽऽह—एक इति । बहवा इति च्छान्दसम् । तथाऽपि विदुषो मृत्योरतिमुक्तस्य न तदाप्तिरित्याशङ्क्याऽऽह—तदात्मेति । सौम्ये पदे मृत्युव्याप्तिं प्रकारान्तरेण प्रकटयति—न चेति । मनसि कार्यकरणरूपेण दिवश्चाऽऽदित्यस्य चैक्यवस्तु तथाऽपि कथं ग्रहातिग्रहगृहीतत्वं सूत्रस्येत्याशङ्क्याऽऽह—ग्रहश्चेति । वामादेर्वसुकन्यादेश्च ग्रहत्वेऽतिग्रहत्वे च हिरण्यगर्भे किमायातमित्याशङ्क्याऽऽह—तेषेति । कर्मफलस्य सँसारत्वाच्च तत्फलं सौम्यं पदं मृत्युग्रस्तमेवेत्याह—सुविचारितं चेति । यदेव कर्मबन्धव्यक्तिप्रयोजकं तदेव बन्धनिवृत्तेर्न कारणमतः कर्मफलं हैरण्यगर्भं पदं बन्धनमेवेत्यर्थः ।

केचित्तु सर्वमेव निवृत्तिकारणं मन्यन्ते । अतः कारणात्पूर्वस्मात्पूर्वस्मान्मृत्योर्मुच्यत. उत्तरमुत्तरं प्रतिपद्यमानो व्यावृत्त्यर्थमेव प्रतिपद्यते न तु तादर्थ्यमित्यत आ हैरण्यगर्भात्सर्वं मृत्युदैवतक्षये तु परमार्थतो मृत्योरात्मनिमुच्यंते । अतश्चाऽऽपेक्षिकी गौणी मुक्तिरन्तराले ।

स्वयमुक्त्वा परान्दूषयति—केचित्त्विति । सर्वमेव कर्मेति शेषः । स्वर्गकामवाक्ये देहात्मत्वनिवृत्तिर्गोदोहनवाक्ये स्वतन्त्राधिकारनिवृत्तिर्नित्यनैमित्तिकविधिवाक्यार्थान्तरोपदेशेन स्वाभाविकप्रवृत्तिनिरोधो निषेधेषु साक्षादेव नैसर्गिकप्रवृत्तयो निरुध्यन्ते तदेवं सर्वमेव कर्मकाण्डं निवृत्तिद्वारेण मोक्षपरमित्यर्थः । ननु शास्त्रीयात्कर्मणो हेतोरुत्तरमुत्तरं कार्यकरणसंघातमतिशयवन्तमाऽऽरब्धात्मनिपद्यमानः संघातात्पूर्वस्मान्मुच्यते तत्कुतो निवृत्तिपरत्वे कर्मकाण्डस्येत्याशङ्क्याऽऽह—अतः कारणादिति । यद्यदुत्तरमुत्तरं सातिशयं फलं जाजापत्यं पदं तदपि प्रासादारोहणक्रमेण व्यावृत्तिद्वारा मोक्षमवतारयितुं न तु तत्रैव प्राजापत्ये पदे श्रुतेस्तात्पर्यं तस्यापि निरतिशयफलत्वाभावादित्यर्थः । फलितमाह—इत्यत इति । यस्मात्पूर्वं पूर्वं परित्यजन्नुत्तरमुत्तरं प्रतिपद्यमानस्तत्तन्निवृत्तिद्वारा मुक्त्यर्थमेव तत्तत्पतिपद्यते न तु तत्तत्पदाप्त्यर्थमेव वाक्यं पर्यवसितं यस्मात्तत्त्वेनाफलत्वात् । तस्माद्दैवतक्षयपर्यन्तं सर्वोऽपि फलविशेषो मृत्युग्रस्तत्वात्प्रासादारोहणन्यायेन मोक्षार्थोऽवतिष्ठते हिरण्यगर्भपदाप्त्या दैवतक्षये तु वस्तुतो मृत्योरात्मनिमुच्यते परमात्मरूपेण स्थितो मुक्तो भवति । तथा मनुष्यभावाद्दुर्धर्षवीर्यत्व परमात्मभावान्मध्ये या तत्तत्पदप्राप्तिः सा खल्वापेक्षिकी सती गौणी मुक्तिर्मुख्या तु पूर्वोक्तैवेत्यर्थः ।

सर्वमेतदेवमबाहदारण्यकम् । ननु सर्वैकत्वं मोक्षः "तस्मात्तत्सर्वम-

---

१ ण. तथा चेति । २ घ. ज °च्यत इत्युच्यतेऽत° । च. °च्यत इत्यत° । ३ घ. ङ. ण. °यितुमेव न । ४ घ. °तदा° ।

भवत्" इति श्रुतेः। बाढं भवत्येतदपि, न तु "ग्रामकामो यजेत पशुकामो यजेत" इत्यादिश्रुतीनां तादर्थ्यम्। यदि ह्यद्वैतार्थत्वमेवाऽऽसां ग्रामपशुस्वर्गार्थत्वं नास्तीति ग्रामपशुस्वर्गादयो न गृह्येरन्गृह्यन्ते तु कर्मफलवच्चित्र्यविशेषाः। यदि च वैदिकानां कर्मणां तादर्थ्यमेव संभार एव नाभविष्यत्।

सर्वमेतदपेक्षानपेक्षाऽऽसीत् न तु बृहदारण्यकस्य श्रुत्यन्तरस्य वाऽर्थ इति दूषयति—सर्वमेतदिति। सर्वैकत्वलक्षणा मोक्षो बृहदारण्यकार्थ एवास्माभिरुच्यते तत्कथमस्यदुक्तबृहदारण्यकमिति शङ्कते—नन्विति। अङ्गीकरोति—बाढमिति। अङ्गीकृतमेव विशदयति—भवतीति। एतत्सर्वैकत्वमारण्यकार्थो भवत्यीति योजना। कथं तर्हि सर्वमेतद्बृहदारण्यकमित्युक्तं तत्राऽऽह—न त्विति। स्वदुक्तरीत्या कर्मश्रुतीनां यथोक्तापेक्षार्थत्वं न घटते तेन सर्वमेवदौपनिषदिकं न श्रौतमित्युक्तमित्यर्थः। कर्मश्रुतीनां मोक्षार्थत्वाभावं **तथा हीति**। तस्मात्ता सां न मोक्षार्थतेति शेषः। किंच **संसारस्वापवर्गप्रपंचहेतुकत्वो च विधिनिषेधाधीनौ** तयोश्चेत्थदुक्तरीत्या **मोक्षार्थत्वं वदा ह्यन्यभावात्संसार एव न स्यादित्याह**—यदि चेति।

अथ तादर्थ्येऽप्यनुनिष्पादितपदार्थस्वभावः संसार इति चेत्। यथा रूपदर्शनार्थ आलोके सर्वोऽपि तत्रस्थः प्रकाश्यत एव। न प्रमाणानुपपत्तेः। अद्वैतार्थत्वे वैदिकानां कर्मणां विद्यासहितानामन्यस्यानुनिष्पादितत्वे प्रमाणानुपपत्तिः। न प्रत्यक्षं नानुमानमत एव च नाऽऽगमः। उभयमेकेन वाक्येन प्रदर्श्यत इति चेत्कुल्याप्रणयनालोकादिवत्। तन्नैवं वाक्यधर्मानुपपत्तेः। नैकवनकयगतस्वार्थस्य प्रवृत्तिनिवृत्तिसाधनत्वमवगन्तुं शक्यते। कुल्याप्रणयनालोकादावर्थस्य प्रत्यक्षत्वाददृष्टः।

विधिनिषेधयोर्निवृत्तिद्वारा मुक्त्यर्थत्वेऽपि विद्यादिज्ञानानुनिष्पादितो यः कर्मपदार्थस्तस्यायं स्वभावो यदुत कर्तारमनर्थेन संयुनक्तीति चोदयति—अथेति। मोक्षार्थमपि कर्मकाण्डं संसारार्थं भवतीति सदृष्टान्तमाह—यथेति। प्रमाणभावेन परिहरति—नेति। तदेव व्यनक्ति—अद्वैतार्थत्व इति। अन्यस्य बन्धस्येति यावत्। अनुपपत्तिं स्फोरयति—न प्रत्यक्षमिति। कर्मश्रुतिवाक्यस्यावान्तरतात्पर्यं यथाश्रुतेऽर्थे गृह्यते निवृत्तिद्वारा मुक्तौ तु महातात्पर्यमित्यङ्गीकृत्य शङ्कते—उभयमिति। क्षुद्राः सन्तिः कुल्यास्तासां प्रणयनं शाल्यर्थं पानी-

१ क ख. ञ. ढ. चार्थं। २ घ. ज. था रू°। ३ घ ञ. ण. °तीत्यत्र दृ°। ४ ग्रा. °क्यस्येदमवा°।

यार्थमाचमनविधार्थं च प्रतिषेधश्च प्रामादकोऽर्थं कृतो गमनादिहेतुरपि भवति वृक्षमूले च शयनमनेकार्थं तथा कर्मकाण्डमनेकार्थमित्युपपद्यते **कुल्येति**। [illegible] यथाश्रुतेनाविरोधे सतीति नान्यत्र तात्पर्यं कल्पयं कल्पका- [illegible] यदुक्तयो दित्यानेकार्थत्वलक्षणो धर्मो वाक्यस्यैकस्योपपद्यतेऽथैक- [illegible] स्यादिति परिहरति—**तन्नवमिति**। वाक्यस्यानेकार्थत्वा- [illegible] वाक्यस्यानेकार्थत्वं स्यादित्याशङ्क्याऽऽह—**न चेति** [illegible] दृष्टान्तं विघटयति—**कुल्येति**।

यदप्युच्यते मन्त्रा अस्मिन्नर्थे दृष्टा इति। अयमेव तु तावदर्थः प्रमाणागम्यः। मन्त्राः पुनः किमस्मिन्नर्थ आहोस्विदन्यस्मिन्नर्थं इति मृग्यमेतत्। तस्माद्ग्रहातिग्रहलक्षणो मृत्युर्बन्धस्तस्मान्मोक्षो वक्तव्य इत्यत इदमारभ्यते।

विद्यां चाविद्यां चेत्यादयो मन्त्राः समुच्चयपरा दृष्टाः समुच्चयश्च कर्मकाण्डस्य निवृत्तिद्वारा मोक्षार्थत्वमित्यस्मिन्नर्थे सिध्यतीति शङ्कते—यदपीति। कर्मकाण्डस्योक्तरीत्या मोक्षार्थत्वे नास्ति प्रमाणमिति परिहरति—अयमेवेति। मन्त्राणां समुच्चयपरत्वात्तस्य च यथोक्तार्थाक्षेपकत्वात्कुतोऽस्यार्थस्य प्रमाणागम्यतेत्याशङ्क्याऽऽह—मन्त्राः पुनरिति। तेषां न समुच्चयपरतेत्यग्रे व्यक्ती भविष्यतीत्यर्थः परमतासंभवे स्वमतमुपसंहरति—तस्मादिति। बन्धनिरूपणमनुपयोगीत्याशङ्क्याऽऽह—तस्मान्मोक्ष इति।

न च जानीमो विषयसंधाविवान्तरालेऽवस्थानमधंजरतीयं कौशलम्। यत्तु मृत्योरतिमुच्यत इत्युक्त्वा ग्रहातिग्रहावुच्येतं तत्त्वर्थसंबन्धात्सर्वोऽयं साध्यसाधनलक्षणो बन्धः। ग्रहातिग्रहाविनिर्मोकात्। निगडे हि निक्षिप्ते निगडितस्य मोक्षाय यत्नः कर्तव्यो भवति। तस्मात्तादर्थ्येनाऽऽरम्भः।

यत्तु कर्मकाण्डं बन्धाय मुक्तये वा न भवति किंत्वन्तरावस्थानकारणमिति तद्दूषयति—न चेति। यथा न जागर्ति न स्वपितीति विषयग्रहणच्छिद्रेऽन्तरालेऽवस्थानं दुर्घटं यथा चार्धं कुक्कुट्याः पाकार्थत्वं च प्रसवायेति कौशलं नोपलभ्यते तथा कर्मकाण्डं न बन्धाय नापि साक्षान्मोक्षायेति व्याख्यानं कर्तुं न जानीम इत्यर्थः। यत्तु श्रुतिरेवोत्तरोत्तरपदप्राप्त्यभिधानव्याजेन मोक्षे पुरुषमवतारयतीति तत्राऽऽह—यत्त्विति। मृत्योरतिमेतीत्य मुच्यत इत्युक्त्वा यदेतद्ग्रहातिग्रहवचनं तदयं सर्वः साध्यसाधनलक्षणो बन्ध इत्यनेनाभिप्रायेणोच्यते

१ ग. ण. °चनायने°। २ ख छ. °ग्यते। तस्मा°। ३ ग. घ. ङ. तदर्थ°। ४ घ, ण. °हणाय च्छि°। ५ ख, ढ. °मातिमु°।

तस्यार्थेन मृत्युसदार्थेनान्वयदर्शनादिति योजना । अर्थसंबन्धादित्युक्तं स्फुटयति—ग्रहातिग्रहाविनिर्मोक्षादिति । एषा हि श्रुतिर्बन्धनेव प्रतिपादयति न तु मोक्षे पुरुषप्रवृत्तिरपीति भावः । ननु पुरुषस्यापेक्षितो मोक्षः प्रतिपाद्यतां किमित्यनर्थात्मा बन्धः प्रतिपाद्यो तत्राऽऽह—निगडे हीति । बन्धज्ञानं विना ततो विश्लेषायोगान्मुमुक्षोः सप्रयोजकबन्धज्ञानार्थेनानन्तरब्राह्मणप्रवृत्तिरित्युपसंहरति—तस्मादिति ।

अथ हैनं जारत्कारव आर्तभागः पप्रच्छ याज्ञवल्क्येति होवाच कति ग्रहाः कत्यतिग्रहा इति । अष्टौ ग्रहा अष्टावतिग्रहा इति ये तेऽष्टा ग्रहा अष्टावतिग्रहाः कतमे त इति ॥ १ ॥

अथ हैनं हशब्द ऐतिह्यार्थः । अथानन्तरमश्वल उपरते प्रकृतं याज्ञवल्क्यं जरत्कारुगोत्रो जारत्कारव ऋतभागस्यापत्यमार्तभागः पप्रच्छ याज्ञवल्क्येति होवाचेत्यभिमुखीकरणाय । पूर्ववत्प्रश्नः कति ग्रहाः कत्यतिग्रहा इति । इतिशब्दो वाक्यपरिसमाप्त्यर्थः । तत्र निर्ज्ञातेषु वा ग्रहातिग्रहेषु प्रश्नः स्यादनिर्ज्ञातेषु वा । यदि तावद्ग्रहा अतिग्रहाश्च निर्ज्ञातास्तदा तद्गतस्यापि गुणस्य संख्याया निर्ज्ञातत्वात्कति ग्रहाः कत्यतिग्रहा इति संख्याविषयः प्रश्नो नोपपद्यते । अथानिर्ज्ञातास्तदा संख्येयविषयप्रश्न इति के ग्रहाः केऽतिग्रहा इति प्रष्टव्यं न तु कति ग्रहाः कत्यतिग्रहा इति प्रश्नः । अपि च निर्ज्ञातसामान्यकेषु विशेषविज्ञानाय प्रश्नो भवति यथा कतमेऽत्र कठाः कतमेऽत्र कालापा इति । न चात्र ग्रहातिग्रहा नाम पदार्थाः केचन लोके प्रसिद्धाः । येन विशेषार्थः प्रश्नः स्यात् । ननु चातिमुच्यत इत्युक्तं ग्रहगृहीतस्य हि मोक्षः स मुक्तिः साऽतिमुक्तिरिति हि द्विरुक्तम् । तस्मात्प्राप्ता ग्रहा अतिग्रहाश्च । ननु तत्रापि चत्वारो ग्रहा अतिग्रहाश्च निर्ज्ञाता वाक्चक्षुःप्राणमनांसि तत्र कतीति प्रश्नो नोपपद्यते निर्ज्ञातत्वात् । न । अनवधारणार्थत्वात् । न हि चत्वार एव तत्र विवक्षितामिह तु ग्रहातिग्रहादर्शनेऽष्टत्वगुणविवक्षया कतीति प्रश्न उपपद्यत एव । तस्मात्स मुक्तिः साऽतिमुक्तिरिति मुक्त्यतिमुक्ता द्विरुक्ते ग्रहातिग्रहा अपि सिद्धाः । अतः कतिसंख्याका ग्रहाः कति वाऽतिग्रहा इति पृच्छति । इतर

१ ख. ढ. ज्ञा प्र । २ ग. ज्ञपना । ३ ण 'त्वनोत्तर' । ४ ख. च छ. ढ. चतुष्टयं । ५ ग. °पि प्रसि° । ६ झ. °तिसंख्याका अति° ।

आह-अष्टौ ग्रहा अष्टावतिग्रहा इति । ये तेऽष्टौ ग्रहा अभिहिताः कतमे ते नियमेन ग्रहीतव्या इति ॥ १ ॥

कति ग्रहा इत्यादिः प्रथमः संख्याविषयः प्रश्नः कतमे त इति द्वितीयः संख्येयविषय इत्याह-पूर्ववदिति । संप्रति प्रश्नमाक्षिपति-तत्रेत्यादिना आद्यं प्रश्नमाक्षिप्य द्वितीयमाक्षिपति-अपि चेति । विशेषतश्चाज्ञातेष्विति चशब्दार्थः । मुक्त्यतिमुक्तिपदार्थद्वयप्रतियोगिनौ बन्धनाख्यौ ग्रहातिग्रहौ सामान्येन प्राप्तौ प्रश्नस्तु विशेषबुभुत्सायामिति मत्वा चोदयति-ननु चेति । तथाऽपि प्रश्नद्वयमनुपपन्नमित्याक्षेपा ब्रूते-ननु तत्रेति । वाग्वै यज्ञस्य होतेत्यादाविति यावत् । निर्ज्ञातत्वाद्विशेषस्येति शेषः । अतिमोक्षोपदेशेन त्वगादेरपि सूचितत्वादेषु चतुष्टयस्यानिर्धारणाद्विशेषेण प्रैषन्तेषु वागादिषु विशेषबुभुत्सायां संख्यादिविषयत्वे प्रश्नस्योपपन्नार्थत्वान्नाऽऽक्षेपोपपत्तिरिति समाधत्ते-नानवधारणार्थत्वादिति । तदेव स्पष्टयति-न हीति । तत्र पूर्वब्राह्मणे वागादिष्विति यावत् । फलितां प्रथमप्रश्नोपपत्तिं कथयति-इह त्विति । ननु ग्रहाणामेव पूर्वत्रोपदेशातिदेशाभ्यां प्रतिपन्नत्वात्तेषु विशेषबुभुत्सायां कति ग्रहा इति प्रश्नेऽप्यतिग्रहाणामप्रतिपन्नत्वात्कथं कत्यतिग्रहा इति प्रश्नः स्यादत आह-तस्मादिति । पूर्वस्माद्ब्राह्मणादिति यावत् । वागादयो वक्तव्यादयश्च चत्वारो ग्रहाश्चातिग्रहाश्च यद्यपि विशेषतो निर्ज्ञातास्तथाऽप्यतिदेशप्राप्ताश्चत्वारो विशेषतो न ज्ञायन्ते । तेन तेषु विशेषतो ज्ञानसिद्धये प्रश्न इत्यभिप्रेत्य विभजते-नियमेनेति ॥ १ ॥

प्राणो वै ग्रहः सोऽपानेनातिग्राहेण गृहीतोऽपानेन हि गन्धाञ्जिघ्रति ॥ २ ॥

तत्राऽऽह । प्राणो वै ग्रहः प्राण इति घ्राणमुच्यते । प्रकरणात् । वायुसहितः सः । अपानेनेति गन्धेनेत्येतत् । अपानसचिवत्वादपानो गन्ध उच्यते । अपानोपहृतं हि गन्धं घ्राणेन सर्वो लोको जिघ्रति । तदेतदुच्यतेऽपानेन हि गन्धाञ्जिघ्रतीति ॥ २ ॥

द्वितीये प्रश्ने परिहारमुत्थापयति-तत्राऽऽहेति । घ्राणशब्दस्य घ्राणविषयत्वे पूर्वोत्तरग्रन्थयोर्वागादीनां प्रकृतत्वं हेतुमाह-प्रकरणादिति । तस्य गन्धेन गृहीतत्वसिद्ध्यर्थं विशिनष्टि-वायुसहित इति । अपानशब्दस्य गन्धविषयत्वे गन्धस्यापानेनाविनाभावं हेतुमाह-अपानेति । तत्रैव हेत्वन्तरमाह-अपानोपहृतं हीति । अपशब्दोऽपानशब्दार्थः । उक्तेऽर्थे वाक्यं पातयति-तदेतदिति ॥२॥

---

१ घ. °मोक्षातिदे° । २ क. ख. ङ. °तुष्कस्या° । ३ घ. ज. ञ. प्रतिषु° । ४ ख. ङ. अपानश्चा° ।

वाग्वै ग्रहः स नाम्नाऽतिग्राहेण गृहीतो वाचा हि नामान्यभिवदति ॥ ३ ॥
जिह्वा वै ग्रहः स रसेनातिग्राहेण गृहीतो जिह्वया हि रसान्विजानाति ॥ ४ ॥
चक्षुर्वै ग्रहः स रूपेणातिग्राहेण गृहीतश्चक्षुषा हि रूपाणि पश्यति ॥ ५ ॥
श्रोत्रं वै ग्रहः स शब्देनातिग्राहेण गृहीतः श्रोत्रेण हि शब्दाञ्शृणोति ॥ ६ ॥
मनो वै ग्रहः स कामेनातिग्राहेण गृहीतो मनसा हि कामान्कामयते ॥ ७ ॥
हस्तौ वै ग्रहः स कर्मणाऽतिग्राहेण गृहीतो हस्ताभ्यां हि कर्म करोति ॥ ८ ॥
त्वग्वै ग्रहः स स्पर्शेनातिग्राहेण गृहीतस्त्वचा हि स्पर्शान्वेदयत इत्येतेऽष्टौ ग्रहा अष्टावतिग्रहाः ॥ ९ ॥

वाग्वै ग्रहः । वाचा ह्यध्यात्मपरिच्छिन्नयाऽऽसङ्गविषयास्पदयाऽसत्यानृततासभ्यबीभत्सादिवचनेषु व्यापृतया गृहीतो लोकोऽपहृतस्तेन । वाग्ग्रहः स नाम्नाऽतिग्राहेण गृहीतः स वागाख्यो ग्रहो नाम्ना वक्तव्येन विषयेणातिग्रहेणातिग्राहेणेति दैर्घ्यं छान्दसं नाम वक्तव्यार्था हि वाक्तेन वक्तव्येनार्थेन तादर्थ्येन प्रयुक्ता वाक्तेन वशीकृता तेन तत्कार्यमकृत्वा नैव तस्या मोक्षः । अतो नाम्नाऽतिग्राहेण गृहीता वागित्युच्यते । वक्तव्यासङ्गेन हि प्रवृत्ता सर्वानर्थैर्युज्यते । समानमन्यत् । इत्येते त्वक्पर्यन्ता अष्टौ ग्रहाः स्पर्शपर्यन्ताश्चैतेऽष्टावतिग्रहा इति ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥

वाचो ग्रहत्वमुपपादयति—वाचा हीति । आसङ्गस्य विषयः शब्दादिरेवाऽऽस्पदं यस्या वाचस्तयेति विग्रहः । तत्तिद्वषयमध्यात्मपरिच्छिन्नयेति विशेषणम् । असत्यं परपीडाकरं मिथ्यावचनं यदेव स्वदृष्टमात्मविरोध्यनृतं विपरीतं वा । आदिपदेनेष्टानिष्टोक्तिग्रहः । वाचि प्रकृतायां स नाम्नेति कथमुच्यते तत्राऽऽह—

१ घ. °तादि । २ घ. °सं व° ।

स वागाख्य इति । वक्तव्येन वाचो वशीकृतत्वं साधयति—वक्तव्यार्थेति । तादर्थ्येन वचनकरणत्वेनेति यावत् । वचनार्थे वाचो वक्तव्येन वशीकृतत्वे फलितमाह—तेनेति । तत्कार्यं वचनं मोक्षश्वासाधारणे देवतात्मनि पर्यवसानम् । वक्तव्यार्थोक्तिं विना वाचोऽपर्यवसाने सिद्धमर्थमाह—अत इति । वाचोऽतिग्रहगृहीतत्वमनुभवेन साधयति—वक्तव्येति । वाचा हीत्यादेरपानेन हीत्यादिना तुल्यार्थत्वादव्याख्येयत्वमाह—समानमिति । घ्राणं वाग्जिह्वा चक्षुः श्रोत्रं मनो हस्तौ त्वगित्युक्तान्ग्रहान्निगमयति—इत्येत इति । गन्धो नाम रसो रूपं शब्दः कामः कर्म स्पर्श इत्यतिग्रहानपि निगमयति—स्पर्शपर्यन्ताश्चेति ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥

याज्ञवल्क्येति होवाच यदिदꣳ सर्वं मृत्योरन्नं का-
स्वित्सा देवता यस्या मृत्युरन्नमित्यग्निर्वै मृत्युः सोऽ-
पामन्नमप पुनर्मृत्युं जयति ॥ १० ॥

उपसंहृतेषु ग्रहातिग्रहेष्वाह पुनः—याज्ञवल्क्येति होवाच । यदिदं सर्वं मृत्योरन्नं यदिदं व्याकृतं सर्वं मृत्योरन्नं सर्वं जायते विपद्यते च ग्रहातिग्रहलक्षणेन मृत्युना ग्रस्तम् । कास्वित्का नु स्यात्सा देवता यस्या देवताया मृत्युरप्यन्नं भवेत् । "मृत्युर्यस्योपसेचनम्" इति श्रुत्यन्तरात् अयमभिप्रायः । प्रष्टुर्यदि मृत्योर्मृत्युं वक्ष्यत्यनवस्था स्यात् । अथ न वक्ष्यत्यस्माद्ग्रहातिग्रहलक्षणान्मृत्योर्मोक्षो नोपपद्यते ग्रहातिग्रहमृत्युविनाशे हि मोक्षः स्यात् । स यदि मृत्योरपि मृत्युः स्याद्भवेद्ग्रहातिग्रहलक्षणस्य मृत्योर्विनाशः । अतो दुर्वचनं प्रश्नं मन्वानः पृच्छति कास्वित्सा देवतेति । अस्ति तावन्मृत्योर्मृत्युः । नन्वनवस्था स्यान्तस्याप्यन्यो मृत्युरिति । नानवस्था । सर्वमृत्योर्मृत्वन्तरानुपपत्तेः । कथं पुनरवगम्यतेऽस्ति मृत्योर्मृत्युरिति । दृष्टत्वात् । अग्निमन्नादत्वेन दृष्टो मृत्युर्विनाशकत्वात् । सोऽद्भिर्भक्ष्यते सोऽग्निरप मन्नं जहाति । गृह्यते तस्मान्मृत्योर्मृत्युरिति तत्र सर्वं ग्रहातिग्रहजातं भक्ष्यते मृत्योर्मृत्युना । तस्मिन्बन्धने नाशिते मृत्युना भक्षिते संसारान्मोक्ष उपपन्नो भवति बन्धनं हि ग्रहातिग्रहलक्षणयुक्तं तस्माच्च मोक्ष उपपद्यत इत्येतत्प्रसाधितम् । अतो बन्धमोक्षाय पुरुषप्रयासः सफलो भवत्यतोऽपजयति पुनर्मृत्युम् ॥ १० ॥

१ घ ञ. ण. °नार्थं वा° । २ ख. °ते च सो° । ३ च. ढ. °नमद्भिरद्यमानत्वात्° । °, ग

प्रतीकमादाय व्याचष्टे—यदिदमिति । यदिदं व्याकृतं जगत्सर्वं मृत्योरन्नमिति योजना । तस्य तदन्नत्वं साधयति—सर्वमिति । मृत्योरन्नत्वसंभावनायां श्रुत्यन्तरं संवादयति—मृत्युरिति । मृत्योर्मृत्युमधिकृत्य प्रश्नस्य करटदन्तनिरूपणवदप्रयोजनत्वमाशङ्क्याऽऽह—अयमिति । सत्येव ग्रहातिग्रहलक्षणे मृत्यौ मोक्षो भविष्यतीति चेन्नेत्याह—ग्रहेति । अस्तु तर्हि ग्रहातिग्रहनाशे मुक्तिरित्यत आह—स यदीति । न च मृत्योर्मृत्युरस्त्यनवस्थानादित्युक्तमिति भावः । पक्षेऽनवस्थानात्पक्षे चामुक्तेरित्यतःशब्दार्थः । अस्तिपक्षं परिगृह्णाति—अस्ति तावदिति । मृत्योर्मृत्युर्ब्रह्मात्मसाक्षात्कारो विवक्षितस्तस्याप्यन्यो मृत्युरस्ति चेदनवस्था नास्ति चेत्तदेवज्ञानस्यापि स्थितेरमुक्तिरिति शङ्कते—नन्विति । तत्रास्तिपक्षं परिगृह्य परिहरति—नानवस्थेति । यथोक्तस्य मृत्योः स्वपरविरोधित्वान्न किंचिदवद्यमित्यर्थः । उक्तं पक्षं प्रश्नद्वारा प्रमाणारूढं करोति—कथमिति । दृष्टत्वं स्पष्टयति—अग्निस्तावदिति । दृष्टत्वफलमाचष्टे—गृह्णातीति । तस्य कार्यं कथयति—तेनेति । अथ पुनर्मृत्युं जयतीत्यस्य पातनिकां करोति—तस्मिन्निति । उक्तमेव व्यक्तीकरोति—बन्धनं हीति । प्रसाधितं मृत्योरपि मृत्युरस्तीति प्रदर्शनेनेति शेषः । मोक्षोपपत्तौ फलितमाह—अत इति । पुरुषप्रयासः शमादिपूर्वकश्रवणादिः । तत्फलस्य ज्ञानस्य फलं दर्शयन्वाक्यं योजयति—अत इति । ज्ञानं पञ्चम्यर्थः ॥ १० ॥

याज्ञवल्क्येति होवाच यत्रायं पुरुषो म्रियत उदस्मात्प्राणाः क्रामन्त्याहो न नेति नेति होवाच याज्ञवल्क्योऽत्रैव समवनीयन्ते स उच्छ्वयत्याध्मायत्याध्मातो मृतः शेते ॥ ११ ॥

परेण मृत्युना मृत्यौ भक्षिते परात्मदर्शनेन योऽसौ मुक्तो विद्वान्सोऽयं पुरुषो यत्र यस्मिन्काले म्रियते उद्ध्वमस्माद्ब्रह्मवेदं म्रियमाणात्प्राणा वागादयो ग्रहा नामादयश्च गृह्यन्ते कामनारूपा अन्तस्थाः प्रयोजकाः क्रामन्त्युर्ध्वमुत्क्रामन्त्याहोस्विन्नेति । नेति होवाच याज्ञवल्क्यो नोत्क्रामन्त्यत्रैवास्मिन्नेव परमाऽऽत्मनाऽविभागं गच्छन्ति विदुषि कार्याणि करणानि च स्वयोना परब्रह्मसतत्त्वे समवनीयन्त एकीभावेन समवसृज्यन्ते प्रलीयन्त इत्यर्थः । ऊर्मय इव समुद्रे । तथा च श्रुत्यन्तरं कलाशब्दवाच्यानां प्राणानां परस्मिन्नात्मनि प्रलयं

१ च. ढ. °मार्थद° । २ क. ख. ग. छ. ढ. °स्थाः सप्र° ।

दर्शयति-एवमेवास्य परिद्रष्टुरिमाः षोडश कलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्तीति । इति परेणाऽऽत्मनाऽविभागं गच्छन्तीति दर्शितम् । न तर्हि मृतो नहि मृतश्चायं यस्मात्स उच्छ्वयत्युच्छ्वनतां प्रतिपद्यत आध्मायति बाह्येन वायुना पूर्यते हृतिवदाध्मातो मृतः शेते निश्चेष्टः । बन्धननाशे मुक्तस्य न क्वचिद्गमनमिति वाक्यार्थः ॥ ११ ॥

सम्यग्ज्ञानस्यापि पुनर्मृत्युं जयतीत्युक्तं फलं विशदीकर्तुं प्रश्नान्तरमुत्थापयति-परेणेति । परेण मृत्युना परमात्मदर्शनेनेति संबन्धः । ग्रहातिग्रहलक्षणो बन्धः तन्निमित्तौ । ग्रहशब्देन प्रयोज्यराशिर्गृहीतः । नामादीनां स्थूलानां बहिष्ठत्वेन स्वरसतस्त्यक्तत्वात्कथं तदुत्क्रान्तिः पृच्छ्यते तत्राऽऽह-वासनारूपा इति । तेषामनुत्क्रान्तौ मुक्त्यसंभवं सूचयति-प्रयोजका इति । उत्क्रान्तिपक्षे ध्रुवं जन्म मृतस्य चेति न्यायात्पुनरुत्पत्तिः स्यादनुत्क्रान्तिपक्षे मरणमसिद्धिर्विरुध्येतेति भावः । द्वितीयं पक्षं परिहरति नेति हावाचेत्यादिना । कार्याणि करणानि च सर्वाणि परेणाऽऽत्मना सहाविभागं गच्छन्ति सत्यस्मिन्नेव विदुषि संभवनीयन्त इति संबन्धः । तेषां विदुषि विलये हेतुमाह-स्वयोनाविति । विद्वानेव हि पूर्वमविद्यया तेषां योनिरासीत्तस्मिन्विद्यादशायां तद्बलादविद्यायामपनीतायां परिपूर्णे तत्त्वे तेषां पर्यवसानं संभवतीत्यर्थः । कारणे कार्याणां प्रविलये दृष्टान्तमाह ऊर्मय इति । प्राणादीनां कारणसंसर्गाख्यो लयश्चेत्पुनरुत्पत्तिः स्यादित्याशङ्क्य ज्ञाने सत्यज्ञानध्वंसान्नैवमित्यभिप्रेत्याऽऽह-तथा चेति । सविषयाण्येकादशेन्द्रियाणि वायवश्च पञ्चेति षोडश कलाश्चासां स्वातन्त्र्यमाश्रयान्तरं च वारयति पुरुषायणा इति । तासां निवृत्तिश्च पुरुषव्यतिरेकेण न स्तीति सूचयति-पुरुषं प्राप्येति । प्राणाश्चोत्क्रामन्ति तर्हि मृतो न भवतीति प्रतिनियतेर्वं शङ्क्य परिहरति-न तर्हीत्यादिना । इतिशब्दो भस्त्राविषयः । मद्यं वाक्यं प्रत्यक्षासिद्धदेहमरणानुवादकमित्यभिप्रेत्याऽऽह-बन्धनेति ॥ १२ ॥

याज्ञवल्क्येति होवाच यत्रायं पुरुषो म्रियते किमेनं न जहातीति नामेत्यनन्तं वै नामानन्ता विश्वे देवा अनन्तमेव स तेन लोकं जयति ॥ १३ ॥

---

१ क. घ. च. ज. ढ. °ति प° । झ. °ति । न । २ घ. ढ. ज. °तोऽतः । ३ क. ख. ञ. ढ. °ति । सप्र° । ४ ख. ञ. ढ. सत्यस्मि° । ५ ण. °तस्यां विद्या° । ६ ख. ञ ढ. ण. °रोधे शङ्क्ये प° ।

मुक्तस्य किं प्राणा एव समवनीयन्त आहोस्वित्तत्प्रयोजकमपि सर्वम्। अथ प्राणा एव न तत्प्रयोजकं सर्वं, प्रयोजके विद्यमाने पुनः प्राणानां प्रसङ्गः। अथ सर्वमेव कामकर्मादि, ततो मोक्ष उपपद्यत इत्येवमर्थ उत्तरः प्रश्नः। याज्ञवल्क्येति होवाच यत्रायं पुरुषो म्रियते किमेनं न जहातीति। आहुरो नामेति सर्वं समवनीयत इत्यर्थः। नाममात्रं तु न लीयत आकृतिसंबन्धात्। नित्यं हि नाम। अनन्तं वै नाम। नित्यत्वमेवाऽऽनन्त्यं नाम्नः। तदानन्त्याधिष्ठिता अनन्ता वै विश्वे देवा अनन्तमेव स तेन लोकं जयति। तन्नामानन्त्याधिष्ठितान्विश्वान्देवानात्मत्वेनोपेत्य तेनाऽऽनन्त्यदर्शननानन्तमेव लोकं जयति ॥ १२ ॥

प्राणा नोत्क्रामन्तीति विशेषणमाश्रित्य प्रश्नान्तरमादत्ते—मुक्तस्येति। पक्षद्वयेऽपि प्रयोजनं कथयति—अथेत्यादिना। यत्पुनरक्षेत्राद्यभूत्तदधुना नाममात्रादशेषमित्युक्ते नावशिष्टं किंचिदिति यथाऽऽगमस्तथाऽत्रापि नाममात्रं म्रियमाणं विद्वांसं न जहातीत्युक्ते न किंचिदवशिष्टमिति दृष्टिः स्यादिति प्रत्युक्तितात्पर्यमाह—सर्वमिति। यथाश्रुतमर्थमाश्रित्य प्रत्युक्तिं व्याचष्टे—नाममात्रं खल्विति। विदुषो नामनित्यत्वे हेत्वन्तरमुत्तरवाक्यावष्टम्भेन दर्शयति—नित्यं हीति। अनन्तशब्दान्नाम्नो व्यक्तिमात्रत्वे प्रतिभाति कुतो नित्यमेतत्याशङ्क्याऽऽह—नित्यत्वमेवेति। व्यक्तिभेदस्य प्रसिद्धत्वान्न तद्वक्तव्यं ब्रह्मविदः स्वदृष्ट्या नामापि न शिष्यते परदृष्ट्या तदवशेषोक्तिः शुको मुक्त इत्यादिव्यपदेशदर्शनादतो नामनित्यत्वं व्यावहारिकमिति भावः। ब्रह्मास्मीति दर्शनेन विश्वान्देवानात्मत्वेनोपगम्यानन्तं लोकं जयतीति सिद्धानुवादो ब्रह्मविद्यां स्तोतुमित्यभिप्रेत्यानन्तरवाक्यमादत्ते तदानन्त्येति। तदव्याचष्टे—तन्नामानन्त्येति ॥ १२ ॥

याज्ञवल्क्येति होवाच यत्रास्य पुरुषस्य मृतस्याग्निं वाग्प्येति वातं प्राणश्चक्षुरादित्यं मनश्चन्द्रं दिशः श्रोत्रं पृथिवीꣳ शरीरमाकाशमात्मौषधीर्लोमानि वनस्पतीन्केशा अप्सु लोहितं च रेतश्च निधीयते क्वायं तदा पुरुषो भवतीत्याहर सोम्य हस्तमार्तभागाऽऽवामेवैतस्य वेदिष्यावो न नावेतत्सजन इति।

---

१ ब. ण. °शेषितमि°। २ क. ब. ञ. °शब्दो नाम्नो। ३ ढ. ण. °चुर्य प्र°। ४ ख, सौम्य।

तौ होत्क्रम्य मन्त्रयांचक्राते तौ ह यदूचतुः कर्म हैव तदूचतुरथ यत्प्र. शशंसतुः . र्म हैव तत्प्रशशंसतुः पुण्यो वै पुण्येन कर्मणा भवति पापः पापेनेति ततो ह जारत्कारव आर्तभाग उपरराम ॥ १२ ॥

इति बृहदारण्यकोपनिषद्भाष्ये तृतीयाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥

ग्रहातिग्रहरूपं बन्धनमुक्तं मृत्युरूपं तस्य च मृत्योर्मृत्युसद्भावान्मोक्षश्चोपपद्यते । स च मोक्षो ग्रहातिग्रहरूपाणामिहैव प्रलयः प्रदीपनिर्वाणवत् । यत्तद्ग्रहातिग्राह्यं बन्धनं मृत्युरूपं तस्य यत्प्रयोजकं तत्स्वरूपनिर्धारणार्थमिदमारभ्यते । याज्ञवल्क्य इति होवाच । अत्र केचिद्वर्णयन्ति ग्रहातिग्रहस्य सप्रयोजकस्य विनाशेऽपि किल न मुच्यते । नामावशिष्टोऽविद्ययोषरस्थानीयया स्वात्मप्रभवया परमात्मनः परिच्छिन्नो भोज्याच्च जगतो व्यावृत्त उच्छिन्नकामकर्मान्तराले व्यवतिष्ठते । तस्य परमात्मैकत्वदर्शनेन द्वैतदर्शनमपनेतव्यमित्यतः परं परमात्मदर्शनमारब्धव्यमित्येवमपवर्गाख्यमन्तरालावस्थां परिकल्योत्तरग्रन्थसंबन्धं कुर्वन्ति ।

यत्रास्येत्यादेस्तात्पर्यं वृत्तानुवादपूर्वकं कथयति—**ग्रहातिग्रहरूपमित्यादिना**। किमेनमित्यादिवाक्यस्य स्वव्याख्यामुक्त्वा यत्रत्यादेस्तात्पर्यं चोक्तम् । इदानीं मर्तृप्रपञ्चप्रस्थानमुत्थापयति—**अत्रेति** । किमेनमित्यादाविति यावत् । समुच्चयानुष्ठानाद्देहयोः सप्रयोजकयोर्नाशेऽपि पुंसो मुक्तिर्न चेत्तर्हि तस्य बद्धत्वायोगात्कामतो दशामवलम्बतामित्याशङ्क्याऽऽह—**नामावशिष्ट इति** । क्षितेरूषरवदवस्थितात्माविद्यया परस्मात्परिच्छिन्नश्चेदात्मा तर्हि बन्धपक्षस्थैव स्यान्नतु भोज्याज्जगतो व्यावृत्तिरित्याशङ्क्याऽऽह—**उच्छिन्नेति** । सर्वस्य कर्मादिफलस्य सूत्रात्मनः समुच्चयासादितस्य भोगादप्राप्तार्थाभावात्कामासिद्ध्या कर्माभावात्प्रयोजकशरीरो-

---

१ छ. यद्व° । २ ढ. °स्य प्र° । ३ ख. ढ. °स्य कामादि° ।

च्छित्तिरित्यर्थः किमेनमित्यादावन्तराले वस्थस्य विद्याधिकारिणो निर्धारणात्तदपेक्षितविद्याशेषत्वेनोषस्तप्रश्नादेरारम्भं संभावयति—तस्येति । इतिशब्दो वर्णयन्तीत्यनेन संबध्यते । तर्हि यत्रोषस्तप्रश्नादौ ब्रह्मविद्योच्यते तस्यैवाऽऽरम्भो युक्त यत्रास्येत्यादिस्तु वृथेत्याशङ्क्य फलविद्याप्राप्तिशेषत्वेन निवर्त्यमृत्युपपोजकनिर्धारणार्थो यत्रेत्यादिरित्याशयेत्याऽऽह—एवमिति ।

तत्र वक्तव्यं विशीर्णेषु करणेषु विदुषस्य परमात्मदर्शनश्रवणमनननिदिध्यासनानि कथमिति । ममवनीतप्राणस्य हि नाममात्रावशिष्टस्येति तैरुच्यते । मृतः शेत इति ह्युक्तम् । न मनोरथेनाप्येतदुपपादयितुं शक्यते । अथ जीवन्नेवाविद्यामात्रावशिष्टो भोज्यादपावृत्त इति परिकल्प्यते तंत्तु किंनिमित्तमिति वक्तव्यम् । ममस्तद्वैतैकत्वात्मप्राप्तिनिमित्तमिति यद्युच्यते तत्पूर्वमेव निराकृतम् । कर्मसहितेन द्वैतैकत्वात्मदर्शनेन संपन्ना विद्वान्मृत. मनवनीतप्राणो जगदात्मत्वं हिरण्यगर्भत्वरूपं वा प्राप्याय दमनवनीतप्राणो भोज्यार्जनेन व्यवहृता विरक्तः परमात्मदर्शनाभिमुखः स्यात् ।

हिरण्यगर्भादन्याऽन्या वा विद्याधिकारिप्रयोजनस्य जीवतो वा विद्याधिकारे विवक्षितत्वयेति पृच्छति—तत्रेति तत्राऽऽद्यमाक्षिपति—विशीर्णेष्विति। आद्यं स्फुटयितुं तृतीयामुत्थापयति—ममवनीतेति । नाममात्रावशिष्टस्याधिकारो विद्यायामिति शेषः । ममवनीतप्राणस्तव श्रुतेः संवादयति— मृत इति । कथमेतावता यत्नेनाक्षेपनिरासेनाऽऽह—न मनोरथेनेति । उक्तमेवाऽऽह—तप्राणस्य श्रवणाद्यधिकारित्वमेवकृच्छब्दार्थः । द्वितीयं शङ्कते—अथेति । अपावृत्तो विद्याधिकारीति शेषः । जीवतो भोज्यार्जनाय संसर्गे सत्यग्निहोत्रं विना दुःशकमिति मत्वा पृच्छति—तंत्विति । अपावृत्त कालो भवति प्राप्ते निवर्तन इति पतिद्वेषपरविद्यार्थं कर्मसहितता हि एवगर्भभवप्राप्तेरेव निवृत्तिकारणमिति शङ्कते—समस्तेति । अत्रविद्या मुच्चैः कर्मेति हिरण्यगर्भभोगप्रापकं न भोग्यार्जनिवृत्तिसाधनमिति तृतीयं व्यत्थादिनेति परिहरति—तत्पूर्वमेवेति । उक्तमेव व्यक्तीकुर्वन्विभजते—कर्मसहितेनेति ।

न चोभयमेकप्रयत्ननिष्पाद्येन साधनेन लभ्यम् । हिरण्यगर्भप्राप्तिसाधनं चेन्न ततो व्यावृत्तिसाधनम् । परमात्माभिमुखीकरणस्य भोज्याद्यावृत्ते सा नं चेन्न हि एवगर्भप्राप्तिसाधनम् । न हि यद्गतिसाधनं

---

१ ब. ढ. मात्रव । २ ङ °भव नामावि° । ३ घ. ङ ज. तत्र । ४ क. घ. छ. ज. यच्च्यते । ५ ङ. ङ छ. °वे वा व्या° । ६ क. ख. घ. ढ. ण. भोग्याद्या° । ७ घ. तत्रति । ८ ण. °या समुच्चितेन कर्मणा हे° । ९ ण. °व तान्विवृ° ।

तद्गतिनिवृत्तेरपि । अथ मृत्वा हिरण्यगर्भं प्राप्य ततः समवनीतप्राणो नामावशिष्टः परमात्मज्ञानेऽधिक्रियते । ततोऽस्मदाद्यर्थं परमात्मज्ञानोपदेशोऽनर्थकः स्यात् । सर्वेषां हि ब्रह्मविद्या पुरुषार्थायोपदिश्यते " तद्यो यो देवानाम् " इत्याद्यया श्रुत्या । तस्मादत्यन्तनिकृष्टा शास्त्रबाह्यैवेयं कल्पना । प्रकृतं तु वर्तयिष्यामः ।

अथैकमेव समुच्चितं कर्मोभयार्थं किं न स्यादत आह—न चेति । उभयार्थत्वाभावं समर्थयते—हिरण्यगर्भेत्यादिना । समुच्चित कर्म नोभयार्थमित्यत्र दृष्टान्तमाह—न हीति । हिरण्यगर्भो विद्याधिकारीति पक्षं निक्षिपति—अथेति । दूषयति—तत इति । ननु महानुभावानामस्मद्विशिष्टानामेव ब्रह्मविद्योपदिश्यमाना मोक्षं फलतीति नास्माकमित्यागङ्क्याह—सर्वेषामिति । न च त्वन्मतेऽपि यद्द्वारा श्रवणादि कृत्वा विद्योदयस्तद्द्वारैव विदात्मनो मुक्तिसिद्धौ कृतमितरत्र श्रवणादिनेति वाच्यम् । द्वारभेदस्यानुष्ठातृविभागाधीनप्रवृत्तिप्रयुक्तप्रयोजनवद्विद्योदयस्य च कल्पनिकत्वेन यथाप्रतीति व्यवस्थोपपत्तेः । वस्तुतो निर्विशेषे चिन्मात्रे नाविद्याविद्ये बन्धमोक्षौ चेत्यभिप्रेत्य परपक्षनिराकरणमुपसंहृत्य श्रुतिव्याख्यानं प्रस्तौति—तस्मादिति ।

तत्र केन प्रयुक्तं ग्रहातिग्रहलक्षणं बन्धनमित्येतन्निर्दिधारयिषयाऽऽह—यत्रास्य पुरुषस्यासम्यग्दर्शिनः शिरःपाण्यादिमतो मृतस्य वागग्निमप्येति वातं प्राणोऽप्येति चक्षुरादित्यमप्येतीति सर्वत्र संबध्यते । मनश्चन्द्रं दिशः श्रोत्रं पृथिवीं शरीरमाकाशमात्मेत्यत्राऽऽत्माधिष्ठानं हृदयाकाशमुच्यते । स आकाशमप्येति । ओषधीरपियन्ति लोमानि । वनस्पतीनपियन्ति केशाः । अप्सु लोहितं च रेतश्च निधीयते इति पुनरादानलिङ्गम् । सर्वत्र हि वागादिशब्देन देवताः परिगृह्यन्ते न तु करणान्यवाक्कामन्ति प्राङ्मोक्षात् । तत्र देवताभिरनधिष्ठितानि करणानि व्यस्तदात्राद्युपमानानि विदेहश्च कर्ता पुरुषोऽस्वतन्त्रः किमाश्रितो भवतीति पृच्छ्यते—कार्यं तदा पुरुषो भवतीति । किमाश्रितस्तदा पुरुषो भवतीति । यमाश्रयमाश्रित्य पुनः कार्यकरणसंघातमुपादत्ते यन्न ग्रहातिग्रहलक्षणं बन्धनं प्रयुज्यत तत्किमिति प्रश्नः ।

कर्तव्ये श्रुतिव्याख्याने यत्रेत्याद्याकाङ्क्षापूर्वकमवतारयति—तत्रेति । तत्र पुरुषशब्देन विद्वानुक्तोऽनन्तरवाक्ये तत्संनिवेरित्याशङ्क्य वक्ष्यमाणकर्माश्रयत्वलिङ्गेन नेत्याह—संनिवेरित्यभिप्रेत्याऽऽह—असम्यग्दर्शिन इति । संनिवेशावे

१ ख. ग. ङ. च. छ. ज. झ. ट. °न्तरुक्ता । २ घ. त्र. ण. °क्तीत्यै° । ३ स. ध. °त्ते । निवे°ते ।

लिङ्गान्तरमाह–निधीयत इति । तस्य हि पुनरादानयोग्यद्रव्यनिधाने प्रयोग-दर्शनादिहापि पुनरादानं लोहितोदरभान्यतः प्रसिद्धः संसारिणोऽयं सर्व इत्यर्थः । अविदुषो वागादिर्धलयाभावाद्वाङ्मनसि दर्शनादिति न्यायात्तस्य यावश्रुतेर्विद्वानेनं पुरुषस्तदीयकलाविलयस्य श्रुतिप्रसिद्ध आदित्याशङ्क्याऽऽह–सर्वत्र हीति । अन्याद्यंशानां वागादिशब्दितानामपक्रमणेऽपि करणानां तदभावे तद्-धिष्ठानस्य देहस्यापि भावेन भोगसंभवाच्च पञ्चावत्तीयोऽग्नीत्यादिशङ्कयाऽऽह–तत्रेति । देवतांशेषूपसंहरतीति यावत् । तेषां तामिरनधिष्ठितत्वे सत्यर्थक्रियाक्षम-त्वं फलतीत्याह–न्यञ्चतीति । करणानामधिष्ठातृहीनानां भोगहेतुत्वाभावेऽपि कथ-माश्रयप्रश्नो भोक्तुः स्यादित्याशङ्क्याऽऽह–विदेहश्चेति । प्रश्नं विवृणोति–यमाश्रयमिति ।

अत्रोच्यते–स्वभावयदृच्छाकालकर्मदेवविज्ञानमात्रशून्यानि वादि-भिः परिकल्पितानि । अतोऽनेकविप्रतिपत्तिस्थानत्वान्नैव जल्पन्यायेन वस्तुनिर्णयः । अत्र वस्तुनिर्णयं चेदिच्छस्याहर्त सौम्य हस्तमावयोर्भाग ह आवामेवैतस्य त्वत्पृष्टस्य वेदितव्य यत्तद्वादिष्यावो निरूपयिष्यावः । कस्मात । न नावावयोरेतद्वस्तु मजने जनसमुदाये निर्णेतं शक्यते । अत एकान्तं गमिष्यावो विचारणाय ।

आहरेत्यादिपरिहारमवतारयति–अत्रेति । मीमांसका लोकायता ज्योतिर्विदो वैदिका देवताकाण्डीया विज्ञानवादिनो माध्यमिकाश्चेत्यनेके विप्रतिपत्तारः । जल्पन्यायेन परस्परप्रचलितभावपर्यन्तेन विचारणेति यावत् । अत्रेति पक्षोक्तिः ।

तौ हेत्यादि श्रुतिवचनम् । तौ याज्ञवल्क्यार्तभागावेकान्तं गत्वा किं चक्रतुरित्युच्यते–तौ ह्येत्कम्य मजनादेशान्मन्त्रयांचक्राते । आदौ लौकिकवादिपक्षाणामेकैके परिगृह्य विचारितवन्तौ तौ ह विचार्य यदूचतुरपोह्य पूर्वपक्षान्मर्वानेव तच्छृणु । कर्म हैवाऽऽश्रयं पुनः पुनः कार्यकरणोपादानहेतुं तत्तत्रोचतुरुक्तवन्तौ । न केवलं कालकर्मदैव-श्वरेष्वभ्युपगतेषु हेतुषु यत्प्रशशंसतुस्तौ कर्म हैव तत्प्रशशंसतः । यस्मान्नधारितमेतत्कर्मप्रयुक्तं ग्रहातिग्रहादिकार्यकरणोपादानं पुनः पुनस्तस्मात्पुण्यो वै शास्त्रविहितेन पुण्येन कर्मणा भवति तद्विपरीतन

१ घ. ञ ण. इतीति । २ क ख ढ °मिद्धम । ३ घ द्विविलं° । ४ ण °भावो वाङ्म° । ५ ज. ण °दित्यादित्या° । ६ ञ. °वनवि । ७ ख. ङ च ज सौम्य ८ घ. ञ प्रभृतिषु ° । ९ ग °वेष्व ।

विपरीतो भवति पापः पापेनेत्येवं याज्ञवल्क्येन प्रश्नेषु निर्णीतेषु ततोऽशक्यप्रकम्प्यत्वाद्याज्ञवल्क्यस्य ह जारत्कारव आर्तभाग उपरराम ॥ १२ ॥

इति बृहदारण्यकोपनिषद्भाष्ये तृतीयाध्याये
द्वितीयमार्तभागब्राह्मणम् ॥ २ ॥

ननु पृष्टोऽर्तभागो याज्ञवल्क्यश्च प्रतिवक्तेति द्वाविहोपलभ्येते तथा च तौ हेत्यादिवचनं युक्तं तृतीयस्यात्राभावादत आह-तौ हेत्यादिना । तत्रेत्येकान्ते स्थित्वा विवागवस्थायामिति यावत् । न केवलं कर्म कारणमूचतुः किंतु तदेव कालादिषु हेतुष्वप्युपगमेषु सत्सु प्रशंसतु । अतः प्रशंसावचनात्कर्मणः प्राधान्यं गम्यते नतु कालादीनां महत्त्वं तेषां कर्मस्वरूपपरिपाकौ कारकतया गुणभावेनं फलके ऽपि तत्प्राधान्येनैव तद्धेतुत्वमंगीकृत्येत्याह-न केवलमिति । पुण्यो वै पुण्येनेत्यादि व्याचष्टे-यस्मादित्यादिना ॥ २ ॥

इति बृहदारण्यकोपनिषद्भाष्यटीकायां तृतीयाध्याये
द्वितीयमार्तभागब्राह्मणम् ॥ २ ॥

(अथ तृतीयाध्यायस्य तृतीयं ब्राह्मणम्) ।

अथ हैनं भुज्युर्लाह्यायनिः पप्रच्छ । ग्रहातिग्रहलक्षणं बन्धनमुक्तम् । यस्मात्प्रयोजकान्मुक्तो मुच्यत येन वा बद्धः संसरति स मृत्युः । तस्माच्च मोक्ष उपपद्यते यस्मान्मृत्योर्मृत्युरस्ति । मुक्तस्य च न गतिः क्वचित् । सर्वोत्मादा नामात्रावशेष. प्रदीपनिर्वाणवदिति चावधृतम् । तत्र संसरतां मुच्यमानानां च कार्यकरणानां स्वकारणसंसर्गे समाने मुक्तानामत्यन्तमेव पुनरनुपादानम् । संसरतां तु पुनः पुनरुपादानं येन प्रयुक्तानां भवति तत्कर्मेत्यवधारितं विचारणापूर्वकम् । तत्क्षये च नामावशेषेण सर्वोत्मादो मोक्ष । तच्च पुण्यपापाख्यं कर्म । पुण्यो वै पुण्येन कर्मणा भवति पापः पापेनेत्यवधारितत्वात् । एतत्कृतः संसारः ।

ब्राह्मणान्तरमवतार्य वृत्तं कीर्तयति-अथेत्यादिना । उक्तमेव तस्य मृत्युत्वं व्यक्तीकरोति-यस्मादिति । अग्निर्वै मृत्युरित्यादावुक्तं स्मारयति-तस्मादिति । यत्रायमित्यादावुक्तमनुवदति-मुक्तस्य चेति । यत्रास्येत्यादौ निर्णीतमनुभाषते-तत्रेति । पूर्वब्राह्मणस्थो ग्रन्थः सम्यग्यर्थः । तस्य चावधारितमित्यनेन संबन्धः ।

---

१ ग. घ. ङ. च. छ. ज. झ. ढ. नामावं । २ क. ग. झ. रणपूं ।

संतरतां मुच्यमानानां च यानि कार्यकरणानि तेषामिति वैयधिकरण्यम् । अनुपादानमुपादानमित्युभयत्र कार्यकरणानामिति संबन्धः । कर्मणो भावाभावाभ्यां बन्धमोक्षावुक्तौ तत्राभावद्वारा कर्मणो मोक्षहेतुत्वं स्फुटयति—तत्क्षये चेति । तस्य भावद्वारा बन्धहेतुत्वं प्रकटयति—तच्चेति ।

तत्रापुण्येन स्थावरजङ्गमेषु स्वभावदुःखबहुलेषु नरकतिर्यक्प्रेतादिषु च दुःखमनुभवति पुनः पुनर्जायमानो म्रियमाणश्चेत्ययंतद्राजेश्वरसर्वलोकप्रसिद्धम् । यंतु शास्त्रीयं पुण्यो वै पुण्येन कर्मणा भवति तत्रैवाऽऽदरः क्रियत इह श्रुत्या । पुण्यमेव च कर्म सर्वपुरुषार्थसाधनमिति सर्वे श्रुतिस्मृतिवादाः । मोक्षस्यापि पुरुषार्थत्वात्तत्साध्यता प्राप्ता । यावद्यावत्पुण्योत्कर्षस्तावत्तावत्फलोत्कर्षप्राप्तिः । तस्मादुत्तमेन पुण्योत्कर्षेण मोक्षो भविष्यतीत्याशङ्का स्यात् । सा निवर्तयितव्या ज्ञानसहितस्य च प्रकृष्टस्य कर्मण एतावती गतिः । व्याकृतनामरूपात्मकत्वात्कर्मणस्तत्फलस्य च न स्वकार्ये नित्येऽव्याकृतधर्मिण्यनामरूपात्मके क्रियाकारकफलस्वभाववर्जिते कर्मणो व्यापारोऽस्ति । यत्र च व्यापारः स संसार एवेत्यस्यार्थस्य प्रदर्शनाय ब्राह्मणमारभ्यते ।

पुण्यपापयोरुभयोरपि संसारफलत्वाविशेषात्पुण्यफलवत्पापफलमप्यत्र वक्तव्यमन्यथा ततो विरागायोगादित्याशङ्क्य वर्तिष्यमाणस्य तात्पर्यं वक्तुं भूमिकां करोति—तत्रेति । पुण्येष्वपुण्येषु च निर्धारणार्था सप्तमी । स्वभावदुःखबहुलेष्वित्युभयतः संबध्यते तर्हि पुण्यफलमपि सर्वलोकप्रसिद्धत्वान्नात्र वक्तव्यमित्याशङ्क्याऽऽह—यंत्विति । शास्त्रीयं सुखानुभवमिति शेषः । इहेति ब्राह्मणोक्तिः । शास्त्रीयं कर्म सर्वमपि संसारफलमेवेति वक्तुं ब्राह्मणमित्युक्त्वा शङ्कोत्तरत्वेनापि तदवतारयति—पुण्यमेवेत्यादिना । मोक्षस्य पुण्यसाध्यत्वं विधान्तरेण साधयति—यावद्यावदिति । कथं तस्या निवर्तनमित्याशङ्क्याऽऽह—ज्ञानसहितस्येति । समुच्चितमपि कर्म संसारफलमेवेत्यत्र हेतुमाह—व्याकृतेति । मोक्षेऽपि स्वर्गादाविव पुरुषार्थत्वाविशेषात्कर्मणो व्यापारः स्यादित्याशङ्क्याऽऽह—न त्विति । अकार्यत्वमुत्पत्तिहीनत्वम् । नित्यत्वं नाशशून्यत्वम् । अव्याकृतधर्मित्वं व्याकृतनामरूपराहित्यम् । 'अशब्दमस्पर्शम्' इत्यादिश्रुतिमाश्रित्याऽऽह—अनामेति । 'निष्कलं निष्क्रियम्' इत्यादिश्रुतिमाश्रित्याऽऽह—क्रियेति । चतुर्विधक्रियाफलविलक्षणे मोक्षे कर्मणो व्यापारो न संभवतीति भावः । नन्वा स्थाणोरा च

---

१ च ढ. जमागवं । २ क ग. च. छ. यस्तु । ३ क. च. शास्त्रीयः । ४ घ ज. झ 'प्राप्तेः । त° । ५ ख. ढ. °णायां स° । ६ त्र. यस्त्विति । ७ क. ख. त्र. ढ. °स्त्रीयः स° । ८ क ख. घ. ङ. °वति ।

प्रजातेः सर्वत्र कर्मव्यापारात्कथं मोक्षे प्रजापतिभावलक्षणे तद्व्यापारो नास्ति तत्राऽऽह—यत्र चेति । कर्मफलस्य सर्वस्य संसारत्वमेवेति कुतः सिध्यति तत्राऽऽह-इत्यस्येति ।

यत्तु कैश्चिदुच्यते विद्यासहितं कर्म निरभिसंधि विषदध्यादिवत्कार्यान्तरमारभत इति । तन्न । अनारभ्यत्वान्मोक्षस्य । बन्धननाश एव हि मोक्षो न कार्यभूतः । बन्धनं चाविद्येत्यवोचाम अविद्यायाश्च न कर्मणा नाश उपपद्यते । दृष्टविषयत्वाच्च कर्मसामर्थ्यस्य । उत्पत्त्याप्तिविकारसंस्कारा हि कर्मसामर्थ्यस्य विषयाः । उत्पादयितुं प्रापयितुं विकर्तुं संस्कर्तुं च सामर्थ्यं कर्मणो नातो व्यतिरिक्तविषयोऽस्ति कर्मसामर्थ्यस्य । लोकेऽप्रसिद्धत्वात् । न च मोक्ष एषां पदार्थानामन्यतमः । अविद्यामात्रव्यवहित इत्यवोचाम ।

विद्यासहितमपि कर्म संसारफलं विद्येव मोक्षार्थेतिस्वपक्षशुद्ध्यर्थं विचारयन्पूर्वपक्षयति—यत्त्विति । यथा केवलं विषदध्यादि मरणज्वरादिकरमपि मन्त्रशर्करादियुक्तं जीवनपुष्ट्याद्यारभते स्वतो बन्धफलमपि कर्म फलाभिलाषमन्तरेणानुष्ठितं विद्यासमुच्चितं मोक्षाय क्षममित्यर्थः । मुक्तेः साध्यत्वाङ्गीकारे समुच्चितकर्मसाध्यत्वं स्यान्न तु तस्याः साध्यत्व धीमात्रायत्तत्वादित्युत्तरमाह-तन्नेति । हेतुमेव साधयति—बन्धनेति । किं तद्बन्धनं तदाह—बन्धनं चेति । अविद्यानाशोऽपि कर्मारभ्या भविष्यतीति चेन्नेत्याह—अविद्यायाश्चेति । मोक्षो न कर्मसाध्योऽविद्यास्तमयत्वाद्रज्ज्वविद्यास्तमयवादित्यर्थः । तत्रैव हेत्वन्तरमाह—दृष्टविषयत्वाच्चेति । न कर्मसाध्या मुक्तिरिति शेषः । तदेव स्पष्टयति—उत्पत्तीति । उक्तमेव कर्मसामर्थ्यविषयमन्वयव्यतिरेकाभ्यां साधयति—उत्पादयितुमिति । अप्रसिद्धत्वादिति च्छेदः । उत्पत्त्यादीनामन्यतमत्वान्मोक्षस्यापि कर्मसामर्थ्यविषयता स्यादिति चेन्नेत्याह—न चेति । नित्यत्वादात्मत्वात्कूटस्थत्वान्नित्यशुद्धत्वान्निर्गुणत्वाच्चेत्यर्थः । आत्मभूतो यथोक्तो मोक्षस्तर्हि किमिति सर्वेषां न प्रथत इत्याशङ्क्याऽऽह—अविद्येति ।

बाढम् । भवतु केवलस्यैव कर्मण एवंस्वभावता । विद्यासंयुक्तस्य तु निरभिसंधेर्भवत्यन्यथा स्वभाव । दृष्टं ह्यन्यशक्तित्वेन निर्ज्ञातानामपि पदार्थानां विषदध्यादीनां विद्यामन्त्रशर्करादिसंयुक्तानामन्यविषये सामर्थ्यम् । तथा कर्मणोऽप्यस्त्विति चेत् । न । प्रमाणाभावात् ।

---

१ च. °घि मन्त्रशर्करादियुक्तवि° । ढ. °घि विद्यामन्त्रशर्करादियुक्तवि° । २ ढ °प्रसिद्ध्य° । ३ ख. च ढ. °त । नहि । ग. °त् । न च क° ।

तत्र हि कर्मण उक्तविषयव्यतिरेकेण विषयान्तरे सामर्थ्यास्तित्वे प्रमाणं न प्रत्यक्षं नानुमानं नोपमानं नार्थापत्तिर्न शब्दोऽस्ति ।

उक्तं कर्मसामर्थ्यं पूर्ववाद्यङ्गी करोति—**बाढमिति** । अङ्गीकारमेव स्फोरयति—**भवत्विति** । एवंस्वभावतोत्पादनादौ समर्थता । का तर्हि विप्रतिपत्तिस्तत्राऽऽह—**विद्यासंयुक्तस्येति** । अन्यथा स्वभावश्चतुर्विधक्रियाफलविलक्षणेऽपि मोक्षे समर्थतेति यावत् । उत्पत्त्यादौ समर्थस्य कर्मणो विद्यासंयुक्तस्य तद्विलक्षणेऽपि मोक्षे सामर्थ्यमस्तीत्यत्र दृष्टान्तमाह—**दृष्टं हीति** । उक्तदृष्टान्तवशात्कर्मणोऽपि केवलस्य संसारफलस्य विद्यासंयोगान्मुक्तिफलत्वमपि स्यादित्याह—**तथेति** । समाधत्ते—**नेत्यादिना** ।

ननु फलान्तराभावे चोदनान्यथानुपपत्तिः प्रमाणमिति । न हि नित्यानां कर्मणा विश्वजिन्न्यायेन फलं कल्प्यते । नापि श्रुतं फलमस्ति । चोद्यन्ते च तानि । पारिशेष्यान्मोक्षस्तेषां फलमिति गम्यते । अन्यथा हि पुरुषा न प्रवर्तेरन् ।

अतीन्द्रियत्वात्कर्मणो मुक्तिसाधनत्वे प्रत्यक्षाद्यसंभवेऽप्यर्थापत्तिरस्तीति शङ्कते—**नन्विति** । नित्येषु कर्मसु मोक्षातिरिक्तस्य फलस्य श्रुतस्याभावे सति तदुपलभ्यमानचोदनाया मोक्षफलत्वं विनाऽनुपपत्तिस्तेषां तत्साधनत्वे मानमित्यर्थः । **ननु विश्वजितः यजेतेत्यत्र यागकर्तव्यतारूपो नियोगोऽवगम्यत तस्य नियोज्यसापेक्षत्वात्स स्वर्गः स्यात्सर्वान्प्रत्यविशिष्टत्वादिति न्यायेन स्वर्गकामो नियोज्योऽङ्गीक्रियत तस्मिन्नित्येष्वपि कर्मसु भविष्यति स्वर्गो नियोज्यविशेषणमत आह—न हीति । जीवन्मुह्यादिति जीवनविशिष्टस्य नियोज्यस्य लाभान्न नित्येषु स्वर्गो नियोज्यविशेषणमित्यर्थः । ननु जीवनविशिष्टोऽपि फलाभावे न नियोज्यः स्यात्तथा च कर्मणा पितृलोक इति श्रुतं फलं तेषु कल्पयिष्यते नेत्याह—नापीति । नित्यविधिप्रकरणे पितृलोकवाक्यस्याश्रवणादित्यर्थः । तर्हि फलाभावाच्चोदनैव मा भूदिति चेन्नेत्याह—चोद्यन्ते चेति । तथाऽपि फलान्तरं कल्प्यतामित्याशङ्क्य कल्पकाभावान्नैवमित्यभिप्रेत्याऽऽह—पारिशेष्यादिति । मुक्तेर्यत्कल्पकं तदेव फलान्तरस्यापि किं न स्यादित्याशङ्क्य तस्य निरतिशयफलविषयत्वान्मुक्तिकल्पकत्वमेवेत्यभिप्रेत्याऽऽह—अन्यथेति ।

ननु विश्वजिन्न्याय एवाऽऽयातो मोक्षस्य फलस्य कल्पितत्वात् । मोक्षे वाऽन्यस्मिन्वा फलेऽकल्पिते पुरुषा न प्रवर्तेरन्निति मोक्षः फलं कल्प्यते श्रुतार्थापत्त्या यथा विश्वजिति । नन्वेवं सति कथमुच्यते

१ प. ज. ञ. ट. न प्रवर्तेरन्निति ।

विश्वजिदन्यायो न भवतीति । फलं च कल्प्यते विश्वजिदन्यायश्च न भवतीति विप्रतिषिद्धमभिधीयते । मोक्षः फलमेव न भवतीति चेत् । न । प्रतिज्ञाहानात् । कर्म कार्यान्तरं विषहद्ध्यादिवदारभत इति हि प्रतिज्ञातम् । स चेन्मोक्षः कर्मणः कार्यं फलमेव न भवतीति सा प्रतिज्ञा हीयेत । कर्मकार्यत्वे च मोक्षस्य स्वर्गादिफलेभ्यो विशेषो वक्तव्यः ।

अनुपपत्त्या चेन्नियोज्यलाभाय नित्येषु फलं कल्प्यते कथं तर्हि विश्वजिन्न्यायो न प्राप्नोतीति सिद्धान्ती प्रत्याह—नान्विति । उक्तमेव विवृणोति—मोक्षे वेति । अकल्पिते सतीति च्छेदः । श्रुतार्थापत्त्या विधेः श्रुतस्य प्रवर्तकत्वानुपपत्त्येति यावत् । विश्वजितीव नित्येषु मोक्षे फले कल्प्यमाने सति फलितमाह—नन्वेवमिति । कथमित्युक्तामनुपपत्तिमेव स्फुटयति फलं चेति । फलकल्पनायां विश्वजिन्न्यायोऽवतरति मोक्षस्तु स्वरूपस्थितित्वेनानुत्पाद्यत्वात्फलमेव न भवतीति शङ्कते—मोक्ष इति । निग्रहमुद्भावयन्नुत्तरमाह—नेति । प्रतिज्ञाहानिं प्रकटयति—कर्मेत्यादिना । कर्मकार्यत्वं मुक्तेरुपेत्योक्तं तदेवायुक्तमित्याह—कर्मकार्यत्वे चेति ।

अथ कर्मकार्यं न भवति नित्यानां कर्मणां फलं मोक्ष इत्यस्या वचनव्यक्तेः कोऽर्थ इति वक्तव्यम् । न च कार्यफलयोर्भेदमात्रेण विशेषः शक्य कल्पयितुम् । अफलं च मोक्षं नित्यैः कर्मभिः क्रियते नित्यानां कर्मणां फलं न कार्यमिति चपोऽर्थो विवक्षितो ऽभिधीयत यथाऽग्निहोत्रं जुहोतीति ।

फलत्वेऽपि कर्मकार्यत्वं न मुक्तेरस्तीत्युक्तं दोषं परिहर्तुं चोदयति—अथेति । प्रतिज्ञाविरोधेन परिहरति—नित्यानामिति । फलत्वमङ्गीकृत्य कार्यत्वेऽनङ्गीकृते कथं व्याघात इत्याशङ्क्य चोदयति—न चेति । विशेषोऽर्थगत इति शेषः । फलत्वमङ्गीकृत्य कार्यत्वानङ्गीकारे व्याघातमुक्त्वा वैयधिकरण्यं व्युत्पादयति—अफलं चेति । आद्यं व्याघातं दृष्टान्तेन स्पष्टयति—नित्यानामिति ।

ज्ञानवदिति चेत् । यथा ज्ञानस्य कार्यं मोक्षो ज्ञानेनाक्रियमाणोऽप्युच्यते तद्वत्कर्मकार्यत्वमिति चेत् । न । अज्ञाननिवर्तकत्वाज्ज्ञानस्य । अज्ञानव्यवधाननिवर्तकत्वाज्ज्ञानस्य मोक्षो ज्ञानकार्यमित्युपचर्यते । न तु कर्मणा निवर्तयितव्यमज्ञानम् न चाज्ञानव्यतिरेकेण मोक्षस्य व्यवधानान्तरं कल्पयितुं शक्यम् । नित्यत्वान्मोक्षस्य साधकस्वरूपाव्यतिरेकाच्च । यत्कर्मणा निवर्त्येत ।

---

१ क. ख. च. छ झ. ढ. भवति । २ ग. घ छ ज हायते । ३ घ. ण. मोक्षफ° । ४ ण. °त्वेऽपि कर्मका° ।

दृष्टान्तेन व्याघातं परिहरन्नाशङ्क्ते—ज्ञानवदिति चेदिति । तदेव स्फुटयति—यथेति । दृष्टान्तं विघटयति—नेति । ज्ञानस्य मोक्षव्यवधिभूताज्ञाननिवर्तकत्वान्मोक्षस्तेनाक्रियमाणोऽपि तत्कार्यमिति व्यपदेशभाग्भवतीत्यर्थः । तदेव स्फुटयति—अज्ञानेति । दार्ष्टान्तिकं निराचष्टे—न त्विति । यत्कर्मणा निवर्त्यते तन्मोक्षस्य व्यवधानान्तरं कल्पयितुं न तु शक्यमिति संबन्धः । व्यवधानध्वंसे कर्मणोऽप्यवश्यंभावे मुक्तावेव तत्प्रवेशः स्यादिति चेन्नेत्याह—नित्यत्वादिति ।

अज्ञानमेव निवर्तयतीति चेत् । न । विलक्षणत्वात् । अनभिव्यक्तिरज्ञानमभिव्यक्तिलक्षणेन ज्ञानेन विरुध्यते । कर्म तु नाज्ञानेन विरुध्यते तेन ज्ञानविलक्षणं कर्म । यदि ज्ञानाभावो यदि संशयज्ञानं यदि विपरीतज्ञानं वोच्यतेऽज्ञानमिति सर्वं हि तज्ज्ञानेनैव निवर्त्यते । न तु कर्मणाऽन्यतमेनापि विरोधाभावात् ।

नित्यकर्मनिवर्त्यं व्यवधानान्तरं मा भूदज्ञानमेव तन्निवर्त्यं भविष्यति तथा च मोक्षस्य कर्मकार्यत्वं शक्यमुपपादयितुमिति शङ्क्ते—अज्ञानमेवेति । कर्मणो ज्ञानाद्विलक्षणत्वान्नाज्ञाननिवर्तकत्वमित्युत्तरमाह—न । विलक्षणत्वादिति । वैलक्षण्यमेव प्रकटयति—अनभिव्यक्तिरिति । इतश्च ज्ञानानिवर्त्यमेवाज्ञानमित्याह—यदीति । अन्यतमेन नित्यादिना व्यस्तेन समस्तेन वा श्रौतेन स्मार्तेन वेत्यर्थः । कर्माज्ञानयोरविरोधो हेत्वर्थः ।

अथादृष्टं कर्मणामज्ञाननिवर्तकत्वं कल्प्यमिति चेत् । न । ज्ञानेनाज्ञाननिवृत्तौ गम्यमानायामदृष्टनिवृत्तिकल्पनानुवृत्तिकल्पनानुपपत्तेः । यथाऽवघातेन व्रीहीणां तुषनिवृत्तौ गम्यमानायामग्निहोत्रादिनित्यकर्मकार्योऽदृष्टा न कल्प्यते तुषनिवृत्तिः । तद्वदज्ञाननिवृत्तिरपि नित्यकर्मकार्याऽदृष्टा न कल्प्यते । ज्ञानेन विरुद्धत्वं चासकृत्कर्मणामवोचाम । यदविरुद्धं ज्ञानं कर्मभिस्तद्देवलोकप्राप्तिनिमित्तमित्युक्तम् । " विद्यया देवलोकः " इति श्रुतेः ।

अज्ञाननिवर्तकत्वं कर्मणो नान्वयव्यतिरेकसिद्धं किंत्वदृष्टमेव कल्प्यमिति शङ्कते—अथेति । दृष्टे सत्यदृष्टकल्पना न न्याय्येति परिहरति—न ज्ञानेनेति । उक्तमर्थं दृष्टान्तेन बुद्धावारोपयति—यथेत्यादिना । अदृष्टेति च्छेदः । अस्तु ज्ञानादज्ञानध्वंसः किंतु कर्मसमुच्चितादित्याशङ्क्याऽऽह—ज्ञानेनेति । ननु कर्म-

---

१ ख. स्पष्टयति । २ च. ञ. ण. °ति । क° । ३ क. ग °निवर्त्येत । ४ च. ढ. °दृष्टमपि क° । ५ क. ग. ङ. च ज-ढ- °र्या न । ६ ख- °राहेय° ।

भिरविरुद्धमपि हिरण्यगर्भादिविज्ञानमस्ति तथा च समुच्चितं ज्ञानमज्ञानविध्वंसि भविष्यति नेत्याह—यद्विरुद्धमिति ।

किंचान्यत्कल्प्ये च फले नित्यानां कर्मणां श्रुतानां यत्कर्मभिर्विरुध्यते । द्रव्यगुणकर्मणां कार्यमेव न भवति किं तत्कल्प्यताम् । यस्मिन्कर्मणः सामर्थ्यमेव न दृष्टम् । किंवा यस्मिन्दृष्टं सामर्थ्यं यच्च कर्मणां फलमविरुद्धं तत्कल्प्यतामिति पुरुषप्रवृत्तिजननायावश्यं चेत्कर्मफलं कल्पयितव्यम् । कर्माविरुद्धविषय एव श्रुतार्थापत्तेः क्षीणत्वान्नित्यो मोक्षः फलं कल्पयितुं न शक्यस्तद्व्यवधानाज्ज्ञाननिवृत्तिर्वा । अविरुद्धत्वादृष्टसामर्थ्यविषयत्वाच्चेति ।

नित्यानां कर्मणां समुच्चितानामसमुच्चितानां च स्वरूपस्थितौ मोक्षे तत्प्रतिबन्धकाज्ञानध्वस्तौ वा नादृष्टं सामर्थ्यं कल्प्यमित्युक्तमिदानीं तत्कल्पनामङ्गीकृत्यापि दूषयति—किंचेति । कर्मणां नास्ति मोक्षे सामर्थ्यमित्येतदुक्तादेव कारणान्न भवति । किंत्वन्यच्च कारणं तत्रास्तीत्यर्थः । तदेव दर्शयितुं विचारयति—कल्प्ये चेति । विरोधमभिनयति—द्रव्येति । कार्यत्वाभावं समर्थयते—यस्मान्नेति । पक्षान्तरमाह—किंवेति । सामर्थ्यविषयं विशदयति—यच्चेति कथमिह निर्णयस्तत्राऽऽह—पुरुषेति । कल्पयितव्यं फलमिति संबन्धः । उत्पत्त्यादीनामन्यतमो हि कर्मभिरविरुद्धो विषयः । तत्रैव नित्यकर्मचोदनानुपरक्तचेरुपशान्तत्वान्नित्यकर्मफलत्वेन मोक्षस्तद्व्यवधानाज्ञाननिवृत्तिर्वा न शक्यते कल्पयितुम् । कर्माज्ञानयोर्विरोधाभावाद्दृष्टं सामर्थ्यं यस्मिन्नुत्पत्त्यादौ तद्विषयत्वाच्च कर्मणस्तद्विलक्षणे मोक्षे न व्यापारः । तथा च नित्यकर्मविधिवशात्पुरुषप्रवृत्तिसंपादनाय फलं चेत्कल्पयितव्यं तर्हि तदुत्पत्त्यादीनामन्यतमभेव तदविरुद्धं कल्पयितव्यमित्यर्थः । इतिशब्दः श्रुतार्थापत्तिपरिहारसमाप्त्यर्थः ।

पारिशेष्यन्यायान्मोक्ष एव कल्पयितव्य इति चेत् सर्वेषां हि कर्मणां सर्वं फलम् । न चान्यदितरकर्मफलव्यतिरेकेण फलं कल्पनायोग्यमस्ति । परिशिष्टश्च मोक्षः । स चेष्टो वेदविदां फलम् । तस्मात्स एव कल्पयितव्य इति चेत् । न । कर्मफलत्वकल्पनानामानन्त्यात्पारिशेष्यन्यायानुपपत्तेः ।

मोक्ष एव नित्यानां कर्मणां फलत्वेन कल्पयितव्यः पारिशेष्यन्यायादिति शङ्कते—पारिशेष्येति । पारिशेष्यन्यायमेव विशदयति—सर्वेषामिति । सर्वं

१ ख. ङ. ढ. °च । २ क. ग. ङ. छ. झ. ढ. °त्वाद्दृष्ट° । ण. °ति । न केवलं क° । ४ ण. °णाद्भव° । ५ ख. ञ. ढ. चेति । ६ ञ, ण. चेद्भवता कल्प° ।

स्वर्गपशुपुत्रादीति यावत । तथाऽपि मोक्षादन्यदेव नित्यकर्मफलं न स्यात्तत्राऽऽह—न चेति । मोक्षस्यापीतरकर्मफलनिवेशमाशङ्क्याऽऽह—परिशिष्टश्चेति । तस्य फलत्वमेव कथं सिद्धं तत्राऽऽह—स चेति । परिशेषायातमर्थं निगमयति—तस्मादिति । पारिशेष्यासिद्धया दूषयति—नेति ।

नहि पुरुषेच्छाविषयाणां कर्मफलानामेतावत्त्वं नाम केनचिदसर्वज्ञेनावधृतं तत्साधनानां[1] वा पुरुषेच्छानां[2] वाऽनियतदेशकालानिमित्तत्वात्पुरुषेच्छाविषयसाधनानां च पुरुषेष्टफलप्रयुक्तत्वात् । प्रतिप्राणिचेच्छावैचित्र्यात्फलानां तत्साधनानां चाऽऽनन्त्यसिद्धिः । तदानन्त्याच्चाशक्यमेतावत्त्वं पुरुषैर्ज्ञातुम् । अज्ञाते च साधनफलैतावत्त्वे कथं मोक्षस्य परिशेषसिद्धिरिति ।

कर्मफलस्यकस्यानन्त्यमुक्तं व्यनक्ति—नहीति । फलवत्फलसाधनानां फलविषयेच्छानां चाऽऽनन्त्यं कथयति—तत्साधनानामिति । तदानन्त्ये हेतुमाह—अनियतेति । इच्छाद्यानन्त्ये हेत्वन्तरमाह—पुरुषेति । एतावत्त्वं नाम नास्तीत्युभयत्र संबन्धः । पुरुषस्येष्टं फलं शोभनाध्यासविषयभूतं तत्र विषयिणां शोभनाध्यासेन प्रयुक्तत्वादिति हेत्वर्थः । इच्छाद्यानन्त्यं प्राणिभेदेषु दर्शयित्वा तदानान्त्यमेकैकस्मिन्नपि प्राणिनि दर्शयति—प्रतिप्राणि चेति । इच्छाद्यानन्त्ये फलितमाह—तदानन्त्याच्चेति । साधनादिष्वेतावत्त्वाज्ञानेऽपि किं स्यात्तदाह—अज्ञाते चेति । इतिशब्दः पारिशेष्यानुपपत्तिसमाप्त्यर्थः ।

कर्मफलजातिपारिशेष्यमिति चेत् । सत्यपीच्छाविषयाणां तत्साधनानां चाऽऽनन्त्ये कर्मफलजातित्वं नाम सर्वेषां तुल्यम् । मोक्षस्वकर्मफलत्वात्परिशिष्टः स्यात् । तस्मात्परिशेषात्म एव युक्तः कल्पयितुमिति चेत् । न । तस्यापि नित्यकर्मफलत्वाभ्युपगमे कर्मफलसमानजातीयत्वोपपत्तेः परिशेषानुपपत्तिः । तस्मादन्यथाऽप्युपपत्तेः क्षीणा श्रुतार्थापत्तिः । उत्पत्त्यादिविकारसंस्काराणामन्यतमेनापि नित्यानां कर्मणां फलमुपपद्यत इति क्षीणा श्रुतार्थापत्तिः ।

प्रकारान्तरेण पारिशेष्यं शङ्कते—कर्मेति । तामेव शङ्कां विशदयति—सत्यपीति । तथाऽपि कथं मोक्षस्य परिशिष्टत्वं तदाह—मोक्षस्त्विति । परिशेषफलमाह—तस्मादिति । शङ्कितं परिशेषं दूषयति—नेत्यादिना । अर्थाप-

---

१ स. °नां पु° । २ क. स. घ. छ. ज. °नां चानि° । ३ घ. ञ. ण. स्यादिति चेत्त° । ४ स. ङ °तमादपि ।

त्तिपरिशेषौ पराकृत्यार्थापत्तिपराकरणं प्रपञ्चयितुं प्रस्तौति-**तस्मादिति** । अन्यथाऽप्युपपत्तिं प्रकटयति—**उत्पत्तीति** ।

चतुर्णामन्यतम एव मोक्ष इति चेत् । न तावदुत्पाद्यो नित्यत्वात् । अत एवाविकार्योऽसंस्कार्यश्चात एवामाधनद्रव्यात्मकत्वाच्च साधनात्मकं हि द्रव्यं संस्क्रियते यथा पात्राज्यादि प्रोक्षणादिना । न च संस्क्रियमाणः संस्कारनिर्वर्त्यो वा यूपादिवत् । पारिशेष्यादाप्यः स्यात् । नाऽऽप्योऽप्यात्मस्वभावत्वादेकत्वाच्च ।

नित्यानामुत्पत्त्यादिफलत्वेऽपि मोक्षस्य तत्फलत्वं सिध्यतीति शङ्कते—**चतुर्णामिति** । तत्र मोक्षस्योत्पाद्यत्वं दूषयति—**न तावदिति** । उभयत्रातःशब्दो नित्यत्वपरामर्शी । असंस्कार्यत्वे हेत्वन्तरमाह-**असाधनेति** । तदेव व्यतिरेकमुखेन विवृणोति—**साधनात्मकं हीति** । इतश्च मोक्षस्यासंस्क्रियमाणत्वमित्याह—**न चेति** । यथा यूपस्तक्षणाष्टास्त्रीकरणाभ्यञ्जनादिना संस्क्रियते यथा चाऽऽहवनीयः संस्कारेण निष्पाद्यते न तथा मोक्षो नित्यशुद्धत्वान्निर्गुणत्वाच्चेत्यर्थः । पक्षान्तरमनुभाष्य दूषयति—**पारिशेष्यादित्यादिना** ।

इतरैः कर्मभिर्वैलक्षण्यान्नित्यानां कर्मणां तत्फलेनापि विलक्षणेन भवितव्यमिति चेत् । न । कर्मत्वसामान्यलक्षणात्सलक्षणं कस्मात्फलं न भवतीतरकर्मफलैः । निमित्तवैलक्षण्यादिति चेत् । न । क्षामवत्यादिभिः समानत्वात् ।

एकत्वं पूर्णत्वं साधनवैलक्षण्यं फलवैलक्षण्यं कल्पयतीति शङ्कते—**इतरैरिति** । हेतुवैलक्षण्यासिद्धौ कल्पकाभावात्फलवैलक्षण्यासिद्धिरिति दूषयति—**न कर्मत्वेति** । निमित्तकृतहेतुवैलक्षण्यवशात्फलवैलक्षण्यासिद्धिरिति शङ्कते—**निमित्तेति** । निमित्तवैलक्षण्यं फलवैलक्षण्यस्यानिमित्तमिति परिहरति—**न क्षामवत्यादिभिरिति** ।

यथा हि गृहदाहादौ निमित्ते क्षामवत्यांदीष्टिर्यथा भिन्ने जुहोति स्कन्ने जुहोतीत्येवमादौ नैमित्तिकेषु कर्मसु न मोक्षः फलं कल्प्यते । तैश्चाविशेषान्नैमित्तिकत्वेन जीवनादिनिमित्ते च श्रवणात् । तथा नित्यानामपि न मोक्षः फलम् ।

तदेव प्रपञ्चयति—**यथा हीति** । यस्याऽऽहिताग्नेरग्निर्गृहान्दहेदग्नये क्षामवते पुरोडाशमष्टाकपालं निर्वपेदित्यत्र दहेदिति विधिविभक्त्या प्रसिद्धार्थयच्छब्दोपहितया गृहदाहाख्यनिमित्तपरामर्शेनाग्नये क्षामवते पुरोडाशमित्यादिना क्षामवती

१ च. ढ. 'क्षणेक्षणा' । २ ग. घ. ङ. च. छ. ज. झ. ढ. 'त्याद्येष्टि' ।

विधीयते । यस्योभयं हविरार्तिमार्च्छेत्स ऐन्द्रं पञ्चशरावमोदनं निर्वपेदित्यत्र चाऽऽर्च्छेदिति विधिविभक्त्या निर्वपेदिति विधास्यमाननिर्वापनिमित्तं हविरार्तिमनूद्य निर्वापो विधीयते । भिन्ने जुहोति स्कन्ने जुहोत्यथ यस्य पुरोडाशौ क्षीयेतां यज्ञं वरुणो गृह्णाति यदा तद्धविस्तिष्ठेताथ तदेव हविर्निर्वपेद्यज्ञो हि यज्ञस्य प्रायश्चित्तमिति च भेदनादिनिमित्तं प्रायश्चित्तमुक्तं न च तन्मुक्तिफलं यथा निमित्तभेदेऽपि न नित्यं कर्म मुक्तिफलमित्यर्थः । क्षामवत्यादितुल्यत्वं नित्यकर्मणां कुतो लब्धमित्याशङ्क्याऽऽह—तैश्चेति । क्षामवत्यादिभिरिति । अविशेषे हेतुर्नैमित्तिकत्वेनेति । तदेव कथमिति चेत्तत्राऽऽह—जीवनादीति । दार्ष्टान्तिकं स्पष्टयति—तथेति ।

आलोकस्य सर्वेषां रूपदर्शनसाधनत्व उलूकादय आलोकेन रूपं न पश्यन्तीत्युलूकादिचक्षुषो वैलक्षण्यादितरलोकचक्षुर्भिर्न रसादिविषयत्वं परिकल्प्यते रसादिविषये सामर्थ्यस्याहृष्टत्वात् । सुदूरमपि गत्वा यद्विषये दृष्टं सामर्थ्यं तत्रैव कश्चिद्विशेषः कल्पयितव्यः ।

नित्यं कर्म कर्मान्तराद्विलक्षणमपि न मोक्षफलमित्यत्र दृष्टान्तमाह **आलोकस्येति** । चक्षुरन्तरैरुलूकादिचक्षुषो वैलक्षण्येऽपि न रसादिविषयत्वमित्यत्र हेतुमाह—**रसादीति** । वैलक्षण्यं तर्हि कुत्रोपयुज्यते तत्राऽऽह—**सुदूरमपीति** । मनुष्यान्विहायोलूकादौ गत्वाऽपीति यावत् । यद्विषये रूपादावित्यर्थः । विशेषो दूरसूक्ष्मादिरतिशयः ।

यत्पुनरुक्तं विद्यामन्त्रशकंरादिसंयुक्तविषदध्यादिवन्नित्यानि कार्यान्तरमारभन्त इति । आरभ्यतां विशिष्टं कार्यं तदिष्टत्वादविरोधः । निरभिसंधेः कर्मणो विद्योसंयुक्तस्य विशिष्टकार्यान्तरारम्भे न कश्चिद्विरोधः । देवयाज्यात्मयाजिनोरात्मयाजिनो विशेषश्रवणाद्देवयाजिनः श्रेयानात्मयाजीत्यादौ यदेव विद्यया करोतीत्यादौ च ।

दार्ष्टान्तिकं पूर्ववादानुवादपूर्वकमाचष्टे—**यत्पुनरित्यादिना** । तत्रेति यावत् । तदेव विवृणोति—**निरभिसंधेरिति** । विद्यासंयुक्तं कर्म विशिष्टकार्यकरमित्यत्र शतपथश्रुतिं प्रमाणयति—**देवयाजीति** । तदाहुरित्युपक्रम्य देवयाजिनः श्रेयानित्यादौ काम्यकर्तुर्देवयाजिनः सकाशादात्मशुद्ध्यर्थं कर्म कुर्वन्नात्मयाजी श्रेयानित्यात्मयाजिनो विशेषश्रवणात्सर्वक्रतुयाजिनामात्मयाजी विशिष्यत इति

---

१ घ. °दा न त°। २ घ. ण. °द्धविः संतिष्ठे°। ३ अ. कुतो यु°। ४ ख. °ष्यादीन्वि°। ५ ग. °नि कर्माणि का°। ६ ख. घ. ङ. च. छ. ज. झ. ट. °याजी श्रे°। ७ क ख. घ. अ. ट. ण. °याजी श्रे°।

स्मृतेश्च विशिष्टस्य कर्मणो विशिष्टकार्यारम्भकत्वमविरुद्धमित्यर्थः । छान्दोग्येऽपि विद्यासंयुक्तस्य कर्मणो विशिष्टकार्यारम्भकत्वं दृष्टमित्याह—यदेवेति ।

यस्तु परमात्मदर्शनविषये मनुनोक्त आत्मयाजिशब्दः समं पश्यन्नात्मयाजीत्यत्र समं पश्यन्नात्मयाजी भवतीत्यर्थः । अथवा भूतपूर्वगत्या ।

नन्वात्मयाजिशब्दो नित्यकर्मानुष्ठायिविषयो न भवति ।

'सर्वभूतेषु चाऽऽत्मानं सर्वभूतानि चाऽऽत्मनि ।
संपश्यन्नात्मयाजी वै स्वाराज्यमधिगच्छति ॥'

इत्यत्र परमात्मदर्शनविषये तस्य प्रयुक्तत्वादत आह—यस्त्विति । यदि समं पश्यन्भवेत्तदा परेणाऽऽत्मनैकीभूतः स्वराड् भवतीत्यात्मज्ञानस्तुतिरत्र विवक्षिता । महती हियं ब्रह्मविद्या यद्ब्रह्मविदेवाऽऽत्मयाजी भवति । नहि तस्य तदनुष्ठानं पृथगपेक्षते । ब्रह्मवित्पुण्यकृदिति च वक्ष्यतीत्यर्थः । परदर्शनवत्यात्मयाजिशब्दस्य गत्यन्तरमाह—अथवेति । भूता या पूर्वस्थितिस्तामपेक्ष्याऽऽत्मयाजिशब्दो विदुषीत्यर्थः ।

आत्मयाज्यात्मसंस्कारार्थं नित्यानि कर्माणि करोति "इदं मेऽनेनाङ्गं संस्क्रियते" इति श्रुतेः । तथा गार्भैर्होमैरित्यादिप्रकरणे कार्यकरणसंस्कारार्थत्वं नित्यानां कर्मणां दर्शयति । संस्कृतश्च य आत्मयाजी तैः कर्मभिः समं द्रष्टुं समर्थो भवति । तस्येह वा जन्मान्तरे वा सममात्मदर्शनमुत्पद्यते समं पश्यन्स्वाराज्यमधिगच्छतीत्येषोऽर्थः । आत्मयाजिशब्दस्तु भूतपूर्वगत्या प्रयुज्यते । ज्ञानयुक्तानां नित्यानां कर्मणां ज्ञानोत्पत्तिसाधनत्वप्रदर्शनार्थम् ।

तदेव प्रपञ्चयति—आत्मेति । तेषां तत्संस्कारार्थत्वे प्रमाणमाह—इदमिति । तत्रैव स्मृतिं प्रमाणयति—तथेति । गर्भसंबन्धिभिर्होमैर्मौञ्जीनिबन्धनादिभिश्च वैजिकमेनः शमयतीत्यस्मिन्प्रकरणे नित्यकर्मणां संस्कारार्थत्वं निश्चितमित्यर्थः । संस्कारोऽपि कुत्रोपयुज्यते तत्राऽऽह—संस्कृतश्चेति । यो हि नित्यकर्मानुष्ठायी स तदनुष्ठानजनितापूर्ववशात्परिशुद्धबुद्धिः सम्यग्धीयोग्यो भवति ।

'महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः,

इति स्मृतेरित्यर्थः । कदा पुनरेषा सम्यग्धीरुत्पद्यते तत्राऽऽह—तस्येति । उत्पन्नस्य सम्यग्ज्ञानस्य फलमाह—सममिति । कथं पुनः सम्यग्ज्ञानव-

---

१ घ. ङ. छ. झ. इदनेन° । २ ख. ङ छ. °नप्रयु° ।

त्यात्मयाजिशब्द इत्याशङ्क्य पूर्वोक्तं स्मारयति—आत्मेति किमिहोह भूतपूर्वगतिराश्रितेति तत्राऽऽह—ज्ञानयुक्तानामिति । ऐहिकैरामुष्मिकैर्वा कर्मभिः शुद्धबुद्धेः श्रवणादिवशादैक्यज्ञानं मुक्तिफलमुदेति । कर्म तु विद्यासंयुक्तमपि संसारफलमेवेति भावः ।

किंचान्यत्—

" ब्रह्मा विश्वसृजो धर्मो महानव्यक्तमेव च ।
उत्तमां सात्त्विकीमेतां गतिमाहुर्मनीषिणः ॥ "

इति च देवसार्ष्टिव्यतिरेकेण भूताप्ययं दर्शयति । भूतान्यष्येति पञ्च वै । भूतान्यत्येतीति पाठं ये कुर्वन्ति तेषां वेदविषये परिच्छिन्नबुद्धित्वाद्दोषः ।

तत्रैव हेत्वन्तरमाह—किंचेति । विद्यायुक्तमपि कर्म बन्धायैवेत्यत्र न केवलमुक्तमेव कारणं किंत्वन्यच्च तदुपपादकमस्तीत्यर्थः । तदेव दर्शयति—ब्रह्मेति । सात्त्विकीं सत्त्वगुणप्रसूतज्ञानसमुच्चितकर्मफलभूतामिति यावत् । अत्र हि विद्यायुक्तमपि कर्म संसारफलमेवेति सूच्यते ।

' एष सर्वः समुद्दिष्टस्त्रिप्रकारस्य कर्मणः ।
त्रिविधस्त्रिविधः कर्मसंसार. सार्वभौतिकः " ॥

इत्युपसंहारादिति चकारार्थः किंच—

' प्रवृत्तं कर्म संसेव्य देवानामेति सार्ष्टिताम् ' ।

इति कर्मफलभूतदेवतासहशैश्वर्यप्राप्तिमुक्त्वा तदतिरेकेण—

इति भूतेष्वप्ययवचनान्न समुच्चयस्य मुक्तिफलतेत्याह—देवसार्ष्टीति ।

निवृत्तं सेवमानस्तु भूतान्यष्ये (त्ये) ति पञ्च वै ' ।

इति पाठान्मुक्तिरेव समुच्चयानुष्ठानाद्विवक्षितेति चेत्त्याह—भूतानीति । ज्ञानमेव मुक्तिहेतुरिति प्रतिपादकोपनिषद्विरोधान्नायं पाठः साधीयानित्यर्थः ।

न चार्थवादत्वमध्यायस्य ब्रह्मान्तकर्मविपाकार्थस्य तद्व्यतिरिक्तात्मज्ञानार्थस्य च कर्मकाण्डोपनिषद्भ्यां तुल्यार्थत्वदर्शनात् । विहिताकरणप्रतिषिद्धकर्मणां च स्थावरश्वसूकरादिफलदर्शनात् । वान्ताश्यादिप्रेतदर्शनाच्च ।

ननु विग्रहवती देवतैव नास्ति मन्त्रमयी हि सा देवता शब्दप्रत्ययालम्बनवती

१ क. ख. ञ. ट. °नपयु° । २ क. ख °रिखिन्न° । ३ ञ °विघः कर्मसंभूतसं° । ४ क. घ. छ. ञ ट. °श्वशूक° ।

ब्रह्मा विधसृज इत्यादेरर्थवादत्वान्न तद्बलेन नित्यकर्मणां मुक्तिसाधत्वं निराकर्तुं शक्यमत आह—न चेति । ज्ञानार्थस्य संपरपन्नात्मयाजीत्यादेरिति शेषः । किंच—

" अकुर्वन्विहितं कर्म निन्दितं च समाचरन् ।
प्रसज्जंश्चेन्द्रियार्थेषु नरः पतनमृच्छति ॥
शारीरजैः कर्मदोषैर्याति स्थावरतां नरः ।
वाचिकैः पक्षिमृगतां मानसैरन्त्यजातिताम् ॥
श्वसूकरखरोष्ट्राणां गोजाविमृगपक्षिणाम् ।
चण्डालपुल्कसानां च ब्रह्महा योनिमृच्छति " ॥

इत्यादिवाक्यैः प्रतिपादितफलानां प्रत्यक्षेणापि दर्शनाद्यथा तत्र नाभूतार्थवादत्वं तथा यथोक्ताध्यायस्यापि नाभूतार्थवादतेत्याह—विहितेति । किंच वङ्गादिदेशे छर्दिताश्यादिभेतानां प्रत्यक्षत्वादध्ययनरहितानामपि स्त्रीशूद्रादीनां वेदोच्चारणदर्शनेन ब्रह्मग्रहसद्भावावगमाच्च न ब्रह्मादिवाक्यस्यार्थवादतेत्याह—वाप्तेति—

न च श्रुतिस्मृतिविहितप्रतिषिद्धव्यतिरकेण विहितानि वा प्रतिषिद्धानि वा कर्माणि केनचिदवगन्तुं शक्यन्ते । येषामकरणादनुष्ठानाच्च प्रेतश्वसूकस्थावरादीनि कर्मफलानि प्रत्यक्षानुमानाभ्यामुपलभ्यन्ते । न चैषामकर्मफलत्वं केनचिदभ्युपगम्यते । तस्माद्विहिताकरणप्रतिषिद्धसेवानां यथैते कर्मविपाकाः प्रेततिर्यक्स्थावरादयस्तथोत्कृष्टेष्वपि ब्रह्मान्तेषु कर्मविपाकत्वं वेदितव्यम् । तस्मात्स आत्मनो वपामुदखिदत्सोऽरोदीदित्यादिवन्नाभूतार्थवादत्वम् ।

ननु स्थावरादीनां श्रौतस्मार्तकर्मफलत्वाभावान्न तद्दर्शनेन वचनानां भूतार्थत्वं शक्यं कल्पयितुमत आह—न चेति । सेवादिदृष्टकारणसाम्येऽपि फलवैषम्योपलम्भादवश्यमतीन्द्रियं कारणं वाच्यम् । न च तत्र श्रुतिस्मृती विहायान्यन्मानमस्ति । तथा च श्रौतस्मार्तकर्मकृतान्येव स्थावरादीनि फलानीत्यर्थः । संनिहितासंनिहितेषु स्थावरादिषु प्रत्यक्षानुमानयोर्यथायोगं प्रवृत्तिरुन्नेया । स्थावराणां जीवशून्यत्वादकर्मफलत्वामिति केचित्तान्प्रत्याह—न चैषामिति अस्मदादिवदेव वृक्षादीनां वृद्ध्यादिदर्शनात्सजीवत्वप्रसिद्धेस्तस्मात्पश्यन्ति पादपा इत्यादिप्रयोगाच्च तेषां कर्मफलत्वसिद्धिरित्यर्थः । स्थावरादीनां कर्मफलत्वे सिद्धे फलितमाह—तस्मादिति । ब्रह्मादीनां पुण्यकर्मफलत्वेऽपि प्रकृते किं स्यात्तदाह—तस्मादिति ।

---

१ क. घ. ण. श्वशूक° । २ क. घ. छ. ञ. ट. °श्वशूक° । ३ ग. घ. ज. झ. °त्वं तौभेद° । ४ ख. च. ढ. °वादित्व° ।

तत्राप्यभूतार्थवादत्वं मा भूदिति चेत् । भवत्वेवम् । न चैतावताऽस्य न्यायस्य बाधो भवति । न चास्मत्पक्षो वा दुष्यति । न च ब्रह्मा विश्वसृज इत्यादीनां काम्यकर्मफलत्वं शक्य वक्तुम् तेषां देवसार्ष्टितायाः फलस्योक्तत्वात् । तस्मात्साभिसंधीनां नित्यानां कर्मणां सर्वमेधाश्वमेधादीनां च ब्रह्मत्वादीनि फलानि ।

कर्मविपाकप्रकरणस्याभूतार्थवादत्वाभावे दृष्टान्तेऽपि तन्न स्यादिति शङ्कते—तत्रापीति । अङ्गी करोति—भवत्विति । कथं तर्हि वैधर्म्यदृष्टान्तसिद्धिरत आह—न चेति । वैधर्म्यदृष्टान्ताभावमात्रेण कर्मविपाकाध्यायस्य नाभूतार्थवादतेत्यस्य न्यायस्य नैव बाधः साधर्म्यदृष्टान्तादपि तत्सिद्धेरित्यर्थः । ननु ' प्रजापतिरात्मनो वपामुदाखिदत् ' इत्यादीनामभूतार्थवादत्वाभावे कथमर्थवादाधिकरणं घटिष्यते तत्राऽऽह—न चेति । तदघटनायामपि नास्मत्पक्षक्षतिस्तवैव तदभूतार्थवादत्वं त्यजतस्तद्विरोधादित्यर्थः । ननु कर्मविपाकप्रकरणस्यार्थवादत्वाभावेऽपि ब्रह्मादीनां काम्यकर्मफलत्वान्न ज्ञानसंयुक्तनित्यकर्मफलत्वं ततो मोक्ष एव तत्फलमित्यत आह न चेति । तेषां काम्यानां कर्मणामिति यावत् । देवसार्ष्टिताया देवैरिन्द्रादिभिः समानैश्वर्यप्राप्तेरित्यर्थः । उक्तत्वात् । ' प्रवृत्त कर्म संसेव्य देवानामेति सार्ष्टिताम् ' इत्यत्रेति शेषः । ननु विद्यासयुक्तानां नित्यानां कर्मणां फलं ब्रह्मादिभावश्चेत्कथं तानि ज्ञानोत्पत्त्यर्थान्यास्थीयन्ते तत्राऽऽह तस्मादिति । कर्मणां मुक्तिफलत्वाभावस्तच्छब्दार्थः । साभिसंधीनां देवताभावे फलेऽनुरागवतामिति यावत् ।

येषां पुनर्नित्यानि निरभिसंधीन्यात्मसंस्कारार्थानि तेषां ज्ञानोत्पत्त्यर्थानि तानि । " ब्राह्मीयं क्रियते तनुः " इति स्मरणात् । तेषामादुपकारकत्वान्मोक्षसाधनान्यपि कर्माणि भवन्तीति न विरुध्यते । यथा चायमर्थः षष्ठे जनकाख्यायिकासमाप्तौ वक्ष्यामः । यत्तु विषदध्यादिवदित्युक्तं तत्र प्रत्यक्षानुमानविषयत्वादविरोधः । यस्त्वत्यन्तशब्दगम्योऽर्थस्तत्र वाक्यस्याभावे तदर्थप्रतिपादकस्य न शक्यं कल्पयितुं विषदध्यादिसाधर्म्यम् ।

नित्यानि कर्माणि श्रौतानि स्मार्तानि चाग्निहोत्रसंध्योपासनप्रभृतीनि निरभिसंधीनि फलाभिलाषविकलानि परमेश्वरार्पणबुद्ध्या क्रियमाणानि । आत्मशब्दो मनोविषयः । कर्मणां चित्तशुद्धिद्वारा ज्ञानोत्पत्त्यर्थत्वे प्रमाणमाह—ब्राह्मीति । कथं तर्हि कर्मणां मोक्षसाधनत्वं केचिदाचक्षते तत्राऽऽह- तेषामिति । संस्कृतबु-

१ च. ढ. °वादित्व । २ घ. ज. °रार्थ क्रियन्त ते° । ३ क. ख. ङ. च. छ. झ. ढ. ञ क्रियन्ते त° । ४ क. इत्यादिस्म° । ५ च. ढ. खिले ।

द्धीनामिति यावत् । कर्मणां परम्परया मोक्षसाधनत्वं कथं सिद्धवदुच्यते तत्राऽऽह—**यथा चेति** । अयमर्थस्तथेति शेषः । निरस्तमप्यधिकविवक्षया पुनरनुवदति—**यत्त्विति** । विषादेर्मन्त्रादिसहितस्य जीवनादिहेतुत्वं प्रत्यक्षादिसिद्धमतो दृष्टान्ते कार्यारम्भकत्वे विरोधो नास्तीत्याह—**तत्रेति** । कर्मणो विद्यासंयुक्तस्य कार्यान्तरारम्भकत्वलक्षणोऽर्थः शब्देनैव गम्यते । न च तत्र मानान्तरमस्ति । न च समुच्चितस्य कर्मणो मोक्षारम्भकत्वप्रतिपादकं वाक्यमुपलभ्यते तदभावे कर्मणि विद्यायुक्तेऽपि विषदध्यादिसाधर्म्यं कल्पयितुं न शक्यमित्याह—**यस्त्विति** । कर्मसाध्यत्वे च मोक्षस्यानित्यता स्यादिति भावः ।

न च प्रमाणान्तरविरुद्धार्थविषये श्रुतेः प्रामाण्यं कल्प्यते यथा शीतोऽग्निः क्लेदयतीति । श्रुते तु तादर्थ्ये वाक्यस्य प्रमाणान्तरस्याऽऽभासत्वम् । यथा खद्योतोऽग्निरिति तलमलिनमतन्तरिक्षमिति बालानां यत्प्रत्यक्षमपि तद्विषयप्रमाणान्तरस्यं यथार्थत्वे निश्चिते निश्चितार्थमपि बालप्रत्यक्षमाभासी भवति ।

'अपाम सोममृता अभूम' इत्यादिश्रुतेर्मोक्षस्य कर्मसाध्यस्यापि नित्यत्वमिति चेन्नेत्याह—**न चेति** । यत्कृतकं तदनित्यमित्यनुमानानुगृहीतं तद्यथेहेत्यादिवाक्यं तद्विरोधेनार्थवादश्रुतेः स्वार्थेऽप्रामाण्यमित्यर्थः । प्रमाणान्तरविरुद्धेऽर्थे प्रामाण्यं श्रुतेर्नोच्यते चेद्द्वैतश्रुतेरपि कथं प्रत्यक्षादिविरुद्धे स्वार्थे प्रामाण्यमित्याशङ्क्याऽऽह—**श्रुतेस्त्विति** । तत्त्वमस्यादिवाक्यस्य षड्विधतात्पर्यलिङ्गैः सद्द्वैतपरत्वे निर्धारिते सद्भेदविषयस्य प्रत्यक्षादेराभासत्वं भवतीत्यर्थः । तदेव दृष्टान्तेन साधयति—**यथेत्यादिना** । यद्विवेकिनां यथोक्तं प्रत्यक्षं तद्यद्यपि प्रथमभावित्वेन प्रबलं निश्चितार्थं च तथाऽपि तस्मिन्नेवाऽऽकाशादौ विषये प्रवृत्तस्याऽऽप्तवाक्यादेर्मानान्तरस्य यथार्थत्वे सति तद्विरुद्धं पूर्वोक्तमविवेकिप्रत्यक्षमप्याभासी भवति । तथेदं द्वैतविषयं प्रत्यक्षाद्यद्वैतागमविरोधे भवत्याभास इत्यर्थः ।

तस्माद्वेदप्रामाण्यस्याव्यभिचारात्तादर्थ्ये सति वाक्यस्य तथात्वं स्यात् । न तु पुरुषमतिकौशलम् । नहि पुरुषमतिकौशलात्सविता रूपं न प्रकाशयति । तथा वेदवाक्यान्यपि नान्यार्थानि भवन्ति । तस्मान्न मोक्षार्थानि कर्माणीति सिद्धम् । अतः कर्मफलानां संसारत्वप्रदर्शनायैव ब्राह्मणमारभ्यते ।

ननु तात्पर्यं नाम पुरुषस्य मनोधर्मस्तद्वशाच्चेद्द्वैतश्रुतेर्यथार्थत्वं तर्हि प्रतिपुरुषमन्यथैव तात्पर्यदर्शनात्तद्वशादन्यथैव श्रुत्यर्थः स्यादित्याशङ्क्य दार्ष्टान्तिकं निग-

१ घ. ज. °ति म° । २ ग. ङ. च. छ. ढ. °स्य तया° । ३ ग. च. झ. ट. °श्चिता° । ४ घ. ण. °तर्नश्यते । ५ ज. °नाश्यते ।

मवनुत्तरमाह—तस्मादित्यादिना । तादर्थ्यमर्थपरत्वं तथात्वं याथार्थ्यं शब्दधर्मस्तात्पर्यं तच्च षड्विधलिङ्गगम्यं तथा च शब्दस्य पुरुषाभिप्रायवशान्नान्यथार्थत्वमित्यर्थः । उक्तमर्थं दृष्टान्तेन स्पष्टयति—नहीति । विचारार्थमुपसंहरति—तस्मादिति । विद्यासंयुक्तस्यापि कर्मणो मोक्षारम्भकत्वासंभवस्तच्छब्दार्थः । मा भूत्कर्मणां मोक्षार्थत्वं किं तावतेत्याशङ्क्य ब्राह्मणारम्भं निगमयति—अत इति ।

> अथ हैनं भुज्युर्लाह्यायनिः पप्रच्छ याज्ञवल्क्येति होवाच । मद्रेषु चरकाः पर्यव्रजाम ते पतञ्चलस्य काप्यस्य गृहानैम तस्याऽऽसीद्दुहिता गन्धर्वगृहीता तमपृच्छाम कोऽसीति सोऽब्रवीत्सुधन्वाऽऽङ्गिरस इति तं यदा लोकानामन्तानपृच्छामाथैनमब्रूम क्व पारिक्षिता अभवन्निति क्व पारिक्षिता अभवन्स त्वा पृच्छामि याज्ञवल्क्य क्व पारिक्षिता अभवन्निति ॥ १ ॥

अथानन्तरमुपरते जारत्कारवे भुज्युरिति नामतो लह्यस्यापत्यं लाह्यस्तदपत्यं लाह्यायनिः पप्रच्छ याज्ञवल्क्येति होवाच । आदावुक्तमश्वमेधदर्शनं समष्टिव्यष्टिफलश्चाश्वमेधकृतुः । ज्ञानसमुच्चितो वा केवलज्ञानसंपादितो वा सर्वकर्मणां परा काष्ठा । भ्रूणहत्याश्वमेधाभ्यां न परं पुण्यपापयोरिति हि स्मरन्ति । तेन हि समष्टिं व्यष्टीश्च प्राप्नोति तत्र व्यष्टयो निर्ज्ञाता अण्डान्तरविषया अश्वमेधयागफलभूता. । मृत्युरस्याऽऽत्मा भवत्येतासां देवतानामेको भवतीत्युक्तम् ।

ब्राह्मणारम्भमेवं प्रतिपाद्य तदक्षराणि व्याकरोति—अथेति । याज्ञवल्क्यमभिमुखीकृत्य भुज्युः स्वस्य पूर्वनिर्वृत्तां कथां कथयंस्तामवतारयितुमश्वमेधस्वरूपं तत्फलं च विभज्य दर्शयति—आदाविति । क्रतुरुक इति पूर्वेण संबन्धः । क्रतोर्द्वैविध्यमाह—ज्ञानेति । अश्वमेधस्य द्विधा विभक्तस्य सर्वकर्मोत्कर्षमुद्गिरति—सर्वकर्मणामिति । तस्य पुण्यश्रेष्ठत्वे मानमाह—भ्रूणहत्येति । समष्टिव्यष्टिफल-

---

१ घ. °ह्यस्य युवापत्यं लाह्या° । २ क. ग. घ. ङ. ज °मष्टीव्यंष्ठी° । ट. °माष्टिव्य° । ३ ग. च छ. ट अन्तरण्डवि° । ४ घ ण. °स्तामेवाव° ।

श्रेत्युक्तं स्पष्टयति—तेनेति । अश्वमेधेन सहकारिकामनाभेदेन समष्टिं समनुगतरूपां व्यष्टीश्च व्यावृत्तरूपा देवताः प्राप्नोतीत्यर्थः । काः पुनर्व्यष्टयो विवक्षयन्ते तत्राऽऽह—तत्रेति । अग्निरादित्यो वायुरित्याद्या व्यष्टयो देवताः सोऽग्निरभवदित्यादावण्डान्तर्वर्तिन्योऽश्वमेधफलभूता दर्शिताः इत्यर्थः । का तर्हि समष्टिर्देवतेत्युक्ते तत्रैवोक्तं स्मारयति—मृत्युरिति ।

मृत्युश्चाशनायालक्षणो बुद्ध्यात्मा समष्टिः प्रथमजो वायुः सूत्रं सत्यं हिरण्यगर्भः । तस्य व्याकृतो विषयो यदात्मकं सर्वं द्वैतैकत्वं यः सर्वभूतान्तरात्मा लिङ्गमभूर्तरसो यदाश्रितानि सर्वभूतकर्माणि यः कर्मणां कर्मसंबद्धानां च विज्ञानानां परा गतिः परं फलम् । तस्य कियान्गोचरः कियती व्याप्तिः सर्वतः परिमण्डलीभूता सा वक्तव्या । तस्यामुक्तायां सर्वः संसारो बन्धगोचर उक्तो भवति । तस्य च समष्टिव्यष्ट्यात्मदर्शनस्यालौकिकत्वप्रदर्शनार्थमाख्यायिकामात्मनो वृत्तां प्रकुरुते । तेन च प्रतिवादिबुद्धिं व्यामोहयिष्यामीति मन्यते ।

तामेव समष्टिरूपां देवतां प्रपञ्चयितुमिदं ब्राह्मणमिति वक्तुं पातनिकां करोति—**मृत्युश्चेति** । प्राणात्मकबुद्धिधर्मोऽशनाया कथं मृत्योर्लक्षणं तत्राऽऽह—**बुद्ध्यात्मेति** । तर्हि बुद्धेर्व्यष्टित्वान्मृत्युरपि तथा स्यादित्याशङ्क्याऽऽह—**समष्टिरिति** । प्रागेव व्यष्ट्युत्पत्तेरुत्पन्नत्वेन समष्टित्वं साधयति—**प्रथमज इति** । सर्वाश्रयत्वं दर्शयति—**सूत्रमिति** । तत्र वायुर्वै गौतमेत्यादि वाक्यं प्रमाणमिति सूचयति—**वायुरिति** । तथाऽपि कथं प्रथमजत्वं भूतानां प्रथममुत्पत्तेरित्याशङ्क्याऽऽह—**सत्यमिति** । हिरण्यगर्भस्योक्तलक्षणत्वेऽपि किमायातं मृत्योरित्याशङ्क्याऽऽह—**हिरण्यगर्भ इति** । जगदेव समष्टिव्यष्टिरूपं न सूत्रमित्याशङ्क्याऽऽह—**यदात्मकमिति** । द्वैतं व्यष्टिरूपमेकत्वं समष्टिरूपं तत्सर्वं यदात्मकं तस्येति संबन्धः । तस्योक्तप्रमाणत्वं प्रकटयति—**यः सर्वेति** । विज्ञानात्मानं व्यावर्तयति—**लिङ्गमिति** । ‘ त्यस्य लोक रसः ’ इति श्रुतिमनुसृत्याऽऽह—**अमूर्तेति** । तस्य साधनाश्रयत्वं दर्शयति—**यदाश्रितानीति**। तस्यैव फलाश्रयत्वमाह—**यः कर्मणामिति** । परा गतिरित्यस्यैव व्याख्यानं परं फलयेति । एवं भूमिकामारचय्यानन्तरब्राह्मणमवतारयति—**तस्येति** । प्रश्नमेव प्रकटयति—**कियतीति** । सर्वतः परितो मण्डलभावमासाद्य स्थितेति यावत् । ननु किमिति सा वक्तव्या तस्यामुक्तायामपि वक्तव्यसंसारावशेषादाकाङ्क्षाविश्रान्त्यभावादत आह—**तस्यामिति** । इयान्बन्धो

१ क. घ. ञ. ण. समष्टीः । २ क. घ. ञ. ण. °रूपा व्य° । ३ ख. घ. ङ छ ज. झ. ढ. °बन्धाना । ४ घ. ञ. ण. °न्तरं ब्रा° ।

नाधिको न्यूनो वेत्यन्यव्यवच्छेदेन ब्रह्मपरिमाणपरिच्छेदार्थं कर्मफलव्याप्तिरत्रोच्यते तत्परिच्छेदश्च वैराग्यद्वारा मुक्तिहेतुरिति भावः । ब्राह्मणस्यैवं प्रवृत्तावपि किमिति भुज्युः स्वस्य पूर्वनिवृत्तां कथामाहेत्याशङ्क्याऽऽह—**तस्य चेति** । समष्टिव्यष्ट्यात्मदर्शनस्यालौकिकत्वप्रदर्शनेन वा किं स्यात्तदाह—**तेन चेति** । इति मन्यते भुज्युरिति शेषः । जल्पे परपराजयेनाऽऽत्मजयस्येष्टत्वादित्यर्थः ।

मद्रेषु मद्रा नाम जनपदास्तेषु चरका अध्ययनार्थं व्रतचरणाच्चरका अध्वर्यवो वा पर्यव्रजाम पर्यटितवन्तस्ते पतञ्चलस्य ते वयं पर्यटन्तः पतञ्चलस्य नामतः काप्यस्य कपिगोत्रस्य गृहानैम गतवन्तः । तस्याऽऽसीद्दुहिता गन्धर्वगृहीता गन्धर्वेणामानुषेण सत्त्वेन केनचिदाविष्टा गन्धर्वो वा धिष्ण्योऽग्निर्ऋत्विग्देवता विशिष्टविज्ञानत्वादवसीयते । नहि सत्त्वमात्रस्येदृशं विज्ञानमुपपद्यते । तं सर्वे वयं परिवारिताः सन्तोऽपृच्छाम कोऽसीति कस्त्वमसि किंनामा किंसतत्त्वः । सोऽब्रवीद्गन्धर्वः सुधन्वा नामत आङ्गिरसो गोत्रतः । तं यदा यस्मिन्काले लोकानामन्तान्पर्यवमानान्यपृच्छामाथेनं गन्धर्वमब्रूम भुवनकोशपरिमाणज्ञानाय प्रवृत्तेषु सर्वेष्वात्मानं श्लाघयन्तः पृष्ठवन्तो वयं कथं क्व पारिक्षिता अभवन्निति । स च गन्धर्वः सर्वमस्मभ्यमब्रवीत् । तेन दिव्येभ्यो मया लब्धं ज्ञानं तत्त्व नास्त्यतो निगृहीतोऽसीत्यभिप्रायः सोऽहं विद्यासंपन्नो लब्धागमो गन्धर्वात्त्वा त्वां पृच्छामि याज्ञवल्क्य क्व पारिक्षिता अभवंस्तत्त्वं किं जानासि हे याज्ञवल्क्य कथय पृच्छामि क्व पारिक्षिता अभवन्निति ॥ २ ॥

धिष्ण्यत्वमग्नेरुपास्यत्वम् । ' अग्निर्वै देवानां होता ' इति श्रुतिमाश्रित्याऽऽह—**ऋत्विगिति** । यथोक्तगन्धर्वशब्दार्थसंग्रहे लिङ्गमाह—**विशिष्टेति** । तस्यान्यथासिद्धिं दूषयति—**नहीति** । अथैनमित्यादेरर्थं विवृणोति—**भुवनेति** । भवत्वेवं गन्धर्वं प्रति भवतः प्रश्नस्तथाऽपि किमायातं तदाह—**स चेति** । तेन गन्धर्ववचनेनेति यावत् । दिव्येभ्यो गन्धर्वेभ्यः सकाशादित्येतत् । एतज्ज्ञानाभावे त्वज्ञानप्रतिभा ब्रह्मिष्ठत्वप्रतिज्ञाहानिश्चेत्याह—**अत इति** । प्रष्टुरभिप्रायमुक्त्वा प्रश्नाक्षराणि व्याचष्टे—**सोहमिति** । प्रथमा तावत्क्व पारिक्षिता अभवन्नित्युक्तिर्गन्धर्वप्रश्नार्था । द्वितीया तदनुरूपप्रतिवचनार्था । यो हि क्व पारिक्षिता अभवन्निति प्रश्नो गन्धर्वं प्रति कृतस्तस्य प्रत्युक्तिं सर्वो सोऽस्मभ्यमब्रवीदिति तत्र विवक्ष्यते तृतीया तु मुनिं प्रति प्रश्नार्थेति विभागः ॥ १ ॥

स होवाचोवाच वै सोऽगच्छन्वै ते तद्यत्राश्वमेधया-
जिनो गच्छन्तीति क्व न्वश्वमेधयाजिनो गच्छ-
न्तीति द्वात्रिꣳशतं वै देवरथाहन्यान्ययं लोकस्त-
ꣳसमन्तं पृथिवी द्विस्तावत्पर्येति तांꣳ समन्तं पृथिवी
द्विस्तावत्समुद्रः पर्येति तद्यावतीः क्षुरस्य धारा या-
वद्वा मक्षिकायाः पत्रं तावानन्तरेणाऽऽकाशस्ता-
निन्द्रः सुपर्णो भूत्वा वायवे प्रायच्छत्तान्वायुरात्मनि
धित्वा तत्रागमयद्यत्राश्वमेधयाजिनोऽभवन्नित्येव-
मिव वै स वायुमेव प्रशशꣳस तस्माद्वायुरेव व्यष्टि-
र्वायुः समष्टिरेष पुनर्मृत्युं जयति य एवं वेद ततो
ह भुज्युर्लाह्यायनिरुपरराम ॥ २ ॥

इति बृहदारण्यकोपनिषदि तृतीयाध्याये
तृतीयं ब्राह्मणम् ॥ ३ ॥

स होवाच याज्ञवल्क्य उवाच वै सः । वैशब्दः स्मरणार्थः । उ-
वाच वै स गन्धर्वस्तुभ्यम् । अगच्छन्वै ते पारिक्षितास्तत्तत्र क्व यत्र
यस्मिन्नश्वमेधयाजिनो गच्छन्तीति निर्णीते प्रश्न आह—क्व नु कस्मि-
न्नश्वमेधयाजिनो गच्छन्तीति । तेषां गतिविवक्षया भुवनकोशपरिमा-
णमाह—द्वात्रिंशतं वै द्वे अधिके त्रिंशद्द्वात्रिंशतं वै देवरथाहन्यानि
देव आदित्यस्तस्य रथो देवरथस्तस्य रथस्य गत्याऽहना यावत्परि-
च्छिद्यते देशपरिमाणं तद्देवरथाहन्यं तद्द्वात्रिंशद्गुणितं देवरथाहन्यानि
तावत्परिमाणोऽयं लोको लोकालोकगिरिणा परिक्षिप्तः । यत्र वैराजं
शरीरं यत्र च कर्मफलोपभोगः प्राणिनां स एष लोक एतावाँल्लोको-
ऽतः परमलोकस्तं लोकं समन्तं समन्ततो लोकविस्तारादद्विगुणपरि-
माणविस्तारेण परिमाणेन तं लोकं परिक्षिप्ता पर्येति पृथिवी । तां
पृथिवीं तथैव समन्तं द्विस्तावद्द्विगुणेन परिमाणेन समुद्रः पर्येति यं
घनोदमाचक्षते पौराणिकाः ।

अज्ञानादिनिग्रहं परिहरन्नुत्तरमाह—स होवाचेति । स्मरणार्थो गन्धर्वाख्यस्य

ज्ञानस्येति शेषः । किमुवाचेत्यपेक्षायामाह—अगच्छन्निति । अहोरात्रमादित्यरथगत्या यावान्पन्था मितस्तावान्देशो द्वात्रिंशद्मुणितस्तत्किरणव्याप्तः । स च चन्द्ररश्मिव्याप्तेन देशेन साकं पृथिवीत्युच्यते ।

' रविचन्द्रमसोर्यावन्मयूखैरवभास्यते ।
सप्तसमुद्रसरिच्छैला तावती पृथिवी स्मृता ' ॥

इति स्मृतेरित्याह—द्वात्रिंशतामित्यादिना । अयं लोक इत्यस्यार्थमाह—तावदिति । तत्र लोकभागं विभजते—यत्रेति । उक्तं लोकमनूद्यावशिष्टस्यालोकत्वमाह—एतावानिति[1] । तमिति प्रतीकमादाय व्याचष्टे—लोकमित्यादिना । अन्वयं दर्शयितुं तं लोकमिति पुनरुक्तिः । तत्र पौराणिकसंमतिमाह—यं घनोदमिति । उक्तं हि—

' अण्डस्यास्य समन्तात्तु संनिविष्टोऽमृतोदधिः ।
समन्तादूघनतोयेन धार्यमाणः स तिष्ठति ' ॥ इति ।

तत्राण्डकपालयोर्विवरपरिमाणमुच्यते । येन विवरेण मार्गेण बहिर्निर्गच्छन्तो व्याप्नुवन्त्यश्वमेधयाजिनः । तत्र यावती यावत्परिमाणा क्षुरस्य धाराऽग्रं यावद्वा सौक्ष्म्येण युक्तं मक्षिकायाः पत्रं तावांस्तावत्परिमाणोऽन्तरेण मध्येऽण्डकपालयोराकाशश्छिद्रं तेनाऽऽकाशेनेत्येतत् । तान्पारिक्षितानश्वमे[2]धयाजिनः प्राप्तानिन्द्रः परमेश्वरो योऽश्वमेधेऽग्निश्चितः सुपर्णो यद्विषयं दर्शनमुक्तं तस्य प्राची दिक्शिर इत्यादिना सुपर्णः पक्षी भूत्वा पक्षपुच्छाद्यात्मकः सुपर्णो भूत्वा वायवे प्रायच्छन्मूर्तत्वान्नास्त्यात्मनो गतिस्तत्रेति । तान्पारिक्षितान्वायुरात्मनि धित्वा स्थापयित्वा स्वात्मभूतान्कृत्वा तत्र तस्मिन्नगमयत् । कव यत्र पूर्वेऽतिक्रान्ताः पारिक्षिता अश्वमेधयाजिनोऽभवन्निति । एवमिव वा एवमेव स गन्धर्वो वायुमेव प्रशशंस पारिक्षितानां गतिम् ।

तद्यावतीत्यादेस्तात्पर्यमाह—तत्रेति । लोकादिपरिमाणे यथोक्तरीत्या स्थिते सतीति यावत् । कपालविवरस्यानुपयुक्तत्वात्किं तत्परिमाणचिन्तयेत्याशङ्क्याऽऽह—येनेति । व्यवहारभूमिः सप्तम्यर्थः । परमात्मानं व्यावर्तयति—योऽश्वमेध इति । सुपर्णशब्दस्य श्येनसादृश्यमाश्रित्य चित्येऽग्नौ प्रवृत्तिं दर्शयति—यद्विषयमिति । उक्तार्थं पदमनुवदति—सुपर्ण इति । भूत्वेत्यस्यार्थमाह—पक्षेति । ननु चित्योऽग्निरण्डाद्बहिरश्वमेधयाजिनो गृहीत्वा स्वयमेव गच्छतु किमिति तान्वायवे प्रयच्छति

१ अ. °रात्रेणाऽऽदि° । २ क. ख. घ. ढ. ण. °वी स्मृतेर्यु° । ३ क. ख. ढ. °ति । प्र° । ४ घ. ङ. झ. तत्तत्र । ५ क. ग. घ. च. छ. ज. झ. ट. °ध्ये क° । ६ अ. °र्णः क्षुरस्य ।

तत्राऽऽह—मूर्तत्वादिति । आत्मनश्चित्यस्याग्नेरिति यावत् । तत्रेत्यण्डाद्याद्यदेशोक्तिः । इति युक्तं वायवे प्रदानमिति शेषः । आख्यायिकासमाप्ताविति शब्दः । परितो दुरितं क्षीयते येन स परिक्षिद्दश्वमेधस्तद्याजिनः पारिक्षितास्तेषां गातिं गायुमिति संबन्धः ।

समाप्ताऽऽख्यायिका । आख्यायिकानिर्वृत्तं त्वर्थमाख्यायिकातोऽपसृत्य स्वेन श्रुतिरूपेणैवाऽऽचष्टेऽस्मभ्यम् । यस्माद्वायुः स्थावरजङ्गमानां भूतानामन्तरात्मा बहिश्च स एव तस्मादध्यात्माधिभूताधिदैवभावेन विविधा याऽष्टिर्व्याप्तिः स वायुरेव । तथा समष्टिः केवलेन सूत्रात्मना वायुरेव । एवं वायुमात्मानं समष्टिव्यष्टिरूपात्मकत्वेनोपगच्छति य एवं वेद । तस्य किं फलमित्याह—अप पुनर्मृत्युं जयति सकृन्मृत्वा पुनर्न म्रियते । तत आत्मनः प्रश्ननिर्णयाद्भुज्युर्लाह्यायनिरुपराम ॥ २ ॥

इति बृहदारण्यकोपनिषद्भाष्ये तृतीयाध्यायस्य तृतीयं ब्राह्मणम् ॥ ३ ॥

मुनिवचने वर्तमाने कथमाख्यायिकासमाप्तिस्तत्राऽऽह—**समाप्तेति** । वायुप्रशंसायां हेतुमाह—**यस्मादिति** । किं पुनर्यथोक्तवायुतत्त्वविज्ञानफलं तदाह—**एवमिति** ॥ २ ॥

इति बृहदारण्यकोपनिषद्भाष्यटीकायां तृतीयाध्यायस्य तृतीयं भुज्युब्राह्मणम् ॥ ३ ॥

(अथ तृतीयाध्यायस्य चतुर्थं ब्राह्मणम्) ।

अथ हैनमुपस्तश्चाकायणः पप्रच्छ । पुण्यपापप्रयुक्तैर्ग्रहातिग्रहैर्गृहीतः पुनः पुनर्ग्रहातिग्रहांस्त्यजन्नुपाददत्संसरतीत्युक्तम् । पुण्यस्य च पर उत्कर्षो व्याख्यातो व्याकृतविषयः समष्टिव्यष्टिरूपो द्वैतैकत्वात्मप्राप्तिः । यस्तु ग्रहातिग्रहैर्ग्रस्तः संसरति सोऽस्ति वा नास्त्यस्तित्वे च किंलक्षण इत्यात्मन एव विवेकाधिगमायोषस्तप्रश्न आरभ्यते । तस्य च निरुपाधिस्वरूपस्य क्रियाकारकविनिर्मुक्तस्वभावस्याधिगमाद्यथोक्ताद्बन्धनाद्विमुच्यते सप्रघोजकात् । आख्यायिकासंबन्धस्तु प्रसिद्धः ।

---

१ क. °का । नान्निवृँ° । ग. ङ छ ढ °का । नि° । २ च. ढ °त्य श्रुतिः स्वमुखेनेवा° । ३ क. छ. °रूपदै° । ४ ग. °क्षण. स इ° । ५ क. घ. ङ. च छ. ज झ ढ. °कावण° ।

अथ हैनमुषस्तश्चाक्रायणः पप्रच्छ याज्ञवल्क्येति होवाच यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरस्तं मे व्याचक्ष्वेत्येष त आत्मा सर्वान्तरः कतमो याज्ञवल्क्य सर्वान्तरो यः प्राणेन प्राणिति स त आत्मा सर्वान्तरो योऽपानेनापानीति स त आत्मा सर्वान्तरो यो व्यानेन व्यानीति स त आत्मा सर्वान्तरो य उदानेनोदानिति स त आत्मा सर्वान्तर एष त आत्मा सर्वान्तरः ॥ १ ॥

अथ हैनं प्रकृतं याज्ञवल्क्यमुषस्ता नामतश्चक्रस्यापत्यं चाक्रायण पप्रच्छ । यद्ब्रह्म साक्षादव्यवहितं केनचिद्द्रष्टुरपरोक्षादगौणम् । न श्रोत्रब्रह्मादिवत् । किं तत् । य आत्मा । आत्मशब्देन प्रत्यगात्मोच्यते । तत्राऽऽत्मशब्दस्य प्रसिद्धत्वात् । सर्वस्याभ्यन्तरः सर्वान्तरः । यद्यः—शब्दाभ्यां प्रसिद्ध आत्मा ब्रह्मेति । तमात्मानं मे मह्यं व्याचक्ष्वेति । विस्पष्टं शृङ्गे गृहीत्वा यथा गां दर्शयति तथाऽऽचक्ष्व सोऽयमित्येवं कथयस्वेत्यर्थः ।

ब्राह्मणान्तरमवतारयति—अथेति । तस्यापुनरुक्तमर्थं वक्तुमार्तभागपक्षे वृत्तं कीर्तयति—पुण्येति । भुज्युप्रश्नान्ते सिद्धमर्थमनुद्रवति—पुण्यस्य चेति । नामरूपाभ्यां व्याकृतं जगद्धिरण्यगर्भात्मकं तद्विषयमुत्कर्षं विजिज्ञासिषु—ममष्टीति कथयथोक्तात्कर्षस्य पुण्यकर्मफलत्वं तत्राऽऽह—द्वेतति । संप्रत्यनन्तरब्राह्मणस्य विषयं दर्शयति—यस्त्विति । माध्यमिकानामन्येषां चाऽऽद्यो विवादः किंलक्षणो देहादीनामन्यतमस्तेभ्यो विलक्षणो वेति यावत् । इत्येवं विमृश्याऽऽत्मनो देहादिभ्यो विवेकेनाधिगमायेदं ब्राह्मणमित्याह—इत्यात्मन इति । विवेकाधिगमस्य भेदज्ञानत्वेनानर्थकरत्वमाशङ्क्य कहोलप्रश्नतात्पर्यं संगृह्णाति—तस्य चेति । ब्राह्मणसंबन्धमुक्त्वाऽऽख्यायिकासंबन्धमाह—आख्यायिकेति । विद्यास्तुत्यर्था सुखावबोधार्था चाऽऽख्यायिकेत्यर्थः । भुज्युप्रश्ननिर्णयानन्तर्यमथशब्दार्थः । संबोधनमात्मनिमुखीकरणार्थम् । द्रष्टुरव्यवहितमित्युक्ते घटादिव्यवधानं गौणमिति शङ्क्य तन्निराकर्तुमपरोक्षादित्युक्तम् । मुख्यमेव द्रष्टुरव्यवहितं स्वरूपं ब्रह्म । तथा च

१ क. ख. ग ङ. च छ ज ट ठ ड ढ पानिति । २ क. ख. ग. ङ. च छ. ज. ट ठ ड. ढ व्यानिति । ३ च. छ. ढ र्थं. । इत्येवं । ४ ख. घ ञ. र्थो वाऽऽख्या ।

द्रष्टृधीनसिद्धत्वाभावात्स्वतोऽपरोक्षमित्यर्थः । श्रोत्रं ब्रह्म मनो ब्रह्मेत्यादि यथा गौणं न तथा गौणं दृष्टुरव्यवहितं ब्रह्माद्वितीयत्वादित्याह—न श्रोत्रेति । उक्तमव्यवधानमाकाङ्क्षाद्वाराऽनन्तरवाक्येन साधयति किं तादित्यादिना । तस्य परिच्छिन्नत्वशङ्कां वारयति—सर्वस्येति । सर्वनामभ्यां प्रत्यग्ब्रह्मविशेष्यं समर्प्यत इतरैस्तु क्षब्दैर्विशेषणानीति विभागमभिप्रेत्याऽऽह—यद्यःशब्दाभ्यामिति । इतिरुच्यत इत्यनेन संबध्यते । इतिशब्दो द्वितीयः प्रश्नसमाप्त्यर्थः । तमेव प्रश्नं विवृणोति—विस्पष्टमिति ।

एवमुक्तः प्रत्याह याज्ञवल्क्यः—एष ते तवाऽऽत्मा सर्वान्तरः सर्वस्याभ्यन्तरः । सर्वविशेषणोपलक्षणार्थं सर्वान्तरग्रहणम् । यत्साक्षाद्व्यवहितमपरोक्षादगौणं ब्रह्म बृहत्तममात्मा सर्वस्य सर्वस्याभ्यन्तर एतैर्गुणैः समस्तैरुक्त एषः । कोऽसौ तवाऽऽत्मा योऽयं कार्यकरणसंघातस्तवं येनाऽऽत्मनाऽऽत्मवान्स एष तवाऽऽत्मा । तव कार्यकरणसंघातस्येत्यर्थः । तत्र पिण्डस्तस्याभ्यन्तरे लिङ्गात्मा करणसंघातस्तृतीयो यश्च संदिह्यमानस्तेषु कतमो ममाऽऽत्मा सर्वान्तरस्त्वया विवक्षित इत्युक्त इतर आह—यः प्राणेन मुखनासिकासंचारिणा प्राणिति प्राणचेष्टां करोति येन प्राणः प्रणीयत इत्यर्थः । स ते तव कार्यकरणसंघातस्याऽऽत्मा विज्ञानमयः । समानमन्यत् । योऽपानेनापानीति । यो व्यानेन व्यानीतीति च्छान्दसं दैर्घ्यम् । सर्वाः कार्यकरणसंघातगताः प्राणनादिचेष्टा दारुयन्त्रस्येव येन क्रियन्ते । नाहि चेतनावदनधिष्ठितस्य दारुयन्त्रस्येव प्राणनादिचेष्टा विद्यन्ते । तस्माद्विज्ञानमयेनाधिष्ठितं विलक्षणेन दारुयन्त्रवत्प्राणनादिचेष्टां प्रतिपद्यते । तस्मात्सोऽस्ति कार्यकरणसंघातविलक्षणो यश्चेष्टयति ॥ १ ॥

एवमर्थं वाक्यार्थान्वययोगे पृष्टे तत्प्रदर्शनार्थं प्रत्युक्तिमवतारयति—एवमुक्त इति । सर्वान्तर इति विशेषोक्त्या प्रश्नस्य विशेषान्तराणामनास्थामाशङ्क्याऽऽह—सर्वविशेषणेति । एष सर्वान्तर इति भागस्यार्थं विवृणोति—यत्साक्षादिति । एष शब्दार्थं प्रश्नपूर्वकमाह—कोऽसाविति । आत्मशब्दार्थं विवृणोति—योऽयमिति । येनेत्यत्र स शब्दो द्रष्टव्यः । षष्ठ्यर्थं स्पष्टयति—तवेति ।

---

१ ब. अ. °सिद्धित्वा° । २ घ. च. छ. झ. ढ. °ह्म वृद्धतम° । ३ क. ख. ङ. ज. °नस्या° । ४ ज. °र्यकार° । ५ क ग. च. छ. ज. ढ. °व स य° । ६ च. अ. झ. °ति च्छा° । ७ क. तदर्थे । ८ ढ. ण. °क्यान्व° । ९ ख, ढ. °ति इत्येव° । १० घ, °शेष-प्राक्त्या । ११ अ. ग. स्पष्टयति ।

प्रश्नान्तरमुत्थाप्य प्रतिवक्ति—तत्रेत्यादिना । सर्वान्तरस्त्वाऽऽत्मेत्युक्ते सतीति यावत् । तृतीयो मातृसाक्षी पणीयते प्राणनविशिष्टः क्रियत इति यावत् । कथमेतावता सदेहोऽपाकृत इत्याशङ्क्य विवक्षितमनुमानं वक्तुं व्याप्तिमाह—सर्वा इति । या खल्वचेतनप्रवृत्तिः सा चेतनाधिष्ठानपूर्विका यथा रथादिप्रवृत्तिरित्यर्थः । येन क्रियन्ते सोऽस्तीति संबन्धः । दृष्टान्तस्य साध्यवैकल्यं परिहरति—नहीति । संप्रत्यनुमानमारचयति—तस्मादिति । विमता चेष्टा चेतनाधिष्ठानपूर्विकाऽचेतनप्रवृत्तित्वाद्रथादिचेष्टावदित्यर्थः । प्रतिपद्यते प्राणादीति शेषः । अनुमानफलमाह—तस्मात्सोऽस्तीति । चेष्टयति कार्यकरणसंघातमिति शेषः ॥ १ ॥

स होवाचोषस्तश्चाक्रायणं यथा विब्रूयादसौ गौरसावश्व इत्येवमेवैतद्व्यपदिष्टं भवति यदेव साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरस्तं मे व्याचक्ष्वेत्येष त आत्मा सर्वान्तरः कतमो याज्ञवल्क्य सर्वान्तरः । न दृष्टेर्द्रष्टारं पश्येर्न श्रुतेः श्रोतारꣳ शृणुया न मतेर्मन्तारं मन्वीथा न विज्ञातेर्विज्ञातारं विजानीयाः। एष त आत्मा सर्वान्तरोऽतोऽन्यदार्तं ततो होषस्तश्चाक्रायण उपरराम ॥२॥

इति बृहदारण्यकोपनिषदि तृतीयाध्यायस्य
चतुर्थं ब्राह्मणम् ॥ ४ ॥

स होवाचोषस्तश्चाक्रायणो यथा कश्चिदन्यथा प्रतिज्ञाय पूर्वं पुनर्विप्रतिपन्नो ब्रूयादन्यथाऽसौ गौरसावश्वो यश्चलति धावतीति वा पूर्वं प्रत्यक्षं दर्शयामीति प्रतिज्ञाय पश्याच्चलनादिलिङ्गैर्व्यपदिशत्येवमेवैतद्ब्रह्म प्राणनादिलिङ्गैर्व्यपदिष्टं भवति त्वया । किं बहुना त्यक्त्वा गोतृष्णानिमित्तं व्याजं यदेव साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरस्तं मे व्याचक्ष्वेति । इतर आह—यथा मया प्रथमं प्रतिज्ञातस्तथैवाऽऽत्मैव (त्मा वि)लक्षण इति तां प्रतिज्ञामनुवर्त एव । तत्तथैव यथोक्तं मया ।

प्रश्नप्रतिवचनयोरननुरूपत्वमाशङ्कते—स होवाचेति । दृष्टान्तमेव स्पष्टयति—असावित्यादिना । प्रत्यक्षं गामश्वं वा दर्शयामीति पूर्वं प्रतिज्ञाय पश्चाद्यश्चल-

१ घ. ज. °ति । किं । २ ड. °ज्ञात तथाऽऽ° । ३ घ. ज. ट °स्तथा तथाऽऽ° ।

त्यसौ गौर्यो वा यावति सोऽश्व इति चलनादिलिङ्गैर्यथा गवादि व्यपदिश्यत्येवमेव ब्रह्म प्रत्यक्षं दर्शयामीति मत्प्रश्नानुसारेण प्रतिज्ञाय प्राणनादिलिङ्गैस्तदृष्यपदिश-रतते प्रतिज्ञाहानिरनवधेयवचनता च स्यादित्यर्थः । प्रतिज्ञाप्रश्नावनुसृत्यौ बुद्धि-पूर्वकारिणीति फलितमाह—किं बहुनेति । प्रत्युक्तितात्पर्यमाह—यथेति । प्रतिज्ञा-नुवर्तनमेवाभिनयति—तत्तथेति ।

यत्पुनरुक्तं तमात्मान घटादिवद्विषयी कुर्विति तदशक्यत्वान्न क्रि-यते । कस्मात्पुनस्तदशक्यमिति । आह । वस्तुस्वाभाव्यात् । किं पुन-स्तद्वस्तुस्वाभाव्यम । दृष्ट्यादिद्रष्टृत्वम् । दृष्टेर्द्रष्टा ह्यात्मा । दृष्टिरिति द्विविधा भवति लौकिकी पारमार्थिकी चेति । तत्र लौकिकी चक्षुः-संयुक्तान्तःकरणवृत्तिः । सा क्रियत इति जायते विनश्यति च । या त्वात्मनो दृष्टिरग्न्युष्णप्रकाशादिवत्सा च द्रष्टुः स्वरूपत्वान्न जायते न विनश्यति च । सा क्रियमाणयोपाधिभूतया संसृष्टेवेति व्यपदिश्यते द्रष्टेति भेदवच्च द्रष्टा दृष्टिरिति च । याऽसौ लौकिकी दृष्टिश्चक्षु-र्द्वारा रूपोपरक्ता जायमानेव नित्ययाऽऽत्मदृष्ट्या संसृष्टेव तत्प्रति-च्छाया तया व्याप्तैव जायते तथा विनश्यति च तेनोपचर्यते द्रष्टा सदा पश्यन्नपि पश्यति न पश्यति चेति । न तु पुनर्द्रष्टुर्दृष्टेः कदा-चिदप्यन्यथात्वम । तथा च वक्ष्यति षष्ठे—ध्यायतीव लेलायतीव । नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यत इति च ।

कतमो याज्ञवल्क्येत्यादिप्रश्नस्य तात्पर्यमाह—यत्पुनरिति । न दृष्टेरित्यादिवा-क्यस्य तात्पर्यं वदन्नुत्तरमाह—तदशक्यत्वादिति । आत्मनो वस्तुत्वाद्घटादिव-द्विषयीकरणं नाशक्यमिति शङ्कते—कस्मादिति । वस्तुस्वरूपमनूद्य परिहरति—आहेति । घटादेरपि तर्हि वस्तुस्वाभाव्यान्मा भूद्विषयीकरणमिति मन्वानः शङ्कते—किं पुनरिति । दृष्ट्यादिसाक्षित्वं वस्तुस्वाभाव्यं ततश्चाविषयत्वं न चैवं वस्तु-स्वाभाव्यं घटादेरस्तीत्युत्तरमाह—दृष्ट्यादीति । दृष्ट्यादिसाक्षिणोऽपि दृष्टिविषय-त्वं किं न स्यादित्याशङ्क्याऽऽह—दृष्टेरिति । यथा प्रदीपो लौकिकज्ञानेन प्र-काश्यो न स्वप्रकाशकं ज्ञानं प्रकाशयति तथा दृष्टिसाक्षी दृष्ट्या न प्रकाश्यत इत्यर्थः । दृष्टेर्दृष्टेव नास्तीति सौगतास्तान्प्रत्याह—दृष्टिरिति । लौकिकीं व्याचष्टे—तत्रेति । पारमार्थिकीं दृष्टिं व्याकरोति—या त्विति । नन्वात्मा

१ ग घ ज झ ञ ट । २ ग ट ठ °की या ५° । ड. °की दृष्टिश्चक्षुः° । ३ च. ढ. सप्रयु° ।

नित्यदृष्टिस्वभावश्चेत्कथं द्रष्टेत्यादिव्यपदेशः सिध्यति तत्राऽऽह—सा क्रियमाणा-र्येति । साक्षपबुद्धिनद्वृत्तिगतं कर्तृत्वं क्रियात्वं चाऽऽध्यात्मिकं नित्यदृग्रूपे व्यव-हिपत इत्यर्थः । आत्मनो नित्यदृष्टिस्वभावत्वे कथं पश्यति न पश्यति चेति[1] का-दाचित्को व्यवहार इत्याशङ्क्याऽऽह—याऽसाविति । या बहुविशेषणा लौ-किकी दृष्टिरसौ तत्प्रतिच्छायेति संबन्धः । तथा च या तत्प्रतिच्छाया तया व्या-प्तेवेति यावत् । किमित्यौपचारिको व्यपदेशो मुख्यस्तु किं न स्यादित्याशङ्क्या-ऽऽह—न त्विति । दृष्टेर्वस्तुतो न विक्रियावत्त्वमित्यत्र वाक्यशेषमनुकूलयति—तथा चेति ।

तमिममर्थमाह—लौकिक्या दृष्टेः कर्मभूताया द्रष्टारं स्वकीयया नि-त्यया दृष्ट्या व्याप्तारं न पश्येः । याऽसौ लौकिकी दृष्टिः कर्मभूता सा रूपोपरक्ता रूपाभिव्यञ्जिका नाऽऽत्मानं स्वात्मनो व्याप्तारं प्रत्यक्षं व्याप्नोति । तस्मात्तं प्रत्यगात्मानं दृष्टेर्द्रष्टारं न पश्येः । तथा श्रुतेः श्रोतारं न शृणुया । तथा मतेर्मनोवृत्तेः केवलाया व्याप्तारं न म-न्वीथाः । तथा विज्ञातेः केवलाया बुद्धिवृत्तेर्व्याप्तारं न विजानीयाः । एष वस्तुनः स्वभावोऽतो नैव दर्शयितुं शक्यते गवादिवत्[2] ।

उक्तेऽर्थे न दृष्टेरित्यादिश्रुतिमवतार्य व्याचष्टे—तमिममित्यादिना । उक्तमेव प्रपञ्चयति—याऽसाविति । न दृष्टेरित्यादिवाक्यार्थं निगमयति—तस्मादिति । उक्तन्यायमुत्तरवाक्येष्वतिदिशति—तथेति । उक्तं वस्तुस्वाभाव्यमुपसंहृत्य फलि-तमाह—एष इति ।

न दृष्टेर्द्रष्टारमित्यत्राक्षराण्यन्यथा व्याचक्षते कंचित् । न दृष्टेर्द्रष्टारं दृष्टेः कर्तारं दृष्टिभेदमकृत्वा दृष्टिमात्रस्य कर्तारं न पश्येरिति । दृष्टे-रिति कर्मणि षष्ठी । सा दृष्टिः क्रियमाणा घटवत्कर्म भवति । द्रष्टा-रमिति तृजन्तेन द्रष्टृदृष्टिकर्तृत्वमाचष्टे । तेनासौ दृष्टेर्द्रष्टा दृष्टेः क-र्तेति व्याख्यातॄणामभिप्रायः ।

न दृष्टेरित्यत्र स्वपक्षमुक्त्वा भर्तृप्रपञ्चपक्षमाह—न दृष्टेरिति । कथमक्षराणा-मन्यथा व्याख्येत्याशङ्क्य तदिष्टमक्षरार्थमाह—दृष्टेरिति । इतिशब्दो व्यवच्छेद इत्यनेन संबध्यते । एवं व्याकुर्वतामभिप्रायमाह—दृष्टेरितीति । कर्मणि षष्ठीमेव स्फुटयति—सा दृष्टिरिति । षष्ठीं व्याख्याय द्वितीयां व्याचष्टे—द्रष्टारमितीति पदार्थमुक्त्वा वाक्यार्थमाह—तेनेति ।

---

१ क. °ति क्वाचि° । २ क. तया त° । ३ ख. ञ. ढ °था त° । ४ क. ख. ढ. °च्छायया व्या° । ५ च. ढ. °त्यद्द° । ६ ङ. घटादिव° ।

तत्र दृष्टेरिति षष्ठ्यन्तेन दृष्टिग्रहणं निरर्थकमिति दोषं न पश्यन्ति पश्यतां वा पुनरुक्तमसारः प्रमादपाठ इति वा नाऽऽदरः । कथं पुनराधिक्यं तृजन्तेनैव दृष्टिकर्तृत्वस्य सिद्धत्वाद्दृष्टेरिति निरर्थकम् । तदा द्रष्टारं न पश्येरित्येतावदेव वक्तव्यम् । यस्माद्धातोः परस्तृच्छ्रूयते तद्धात्वर्थकर्तरि हि तृच्स्मर्यते । गन्तारं भेत्तारं वा नयतीत्येतावानेव हि शब्दः प्रयुज्यते । न तु गतेर्गन्तार भिदेर्भेत्तारमित्यसत्यर्थविशेषे प्रयोक्तव्यः । न चार्थवादत्वेन हातव्यं सत्यां गतौ । न च प्रमादपाठः सर्वेषामविगानात् । तस्माद्व्याख्यातृणामेव बुद्धिदौर्बल्यं नाध्येतृप्रमादः ।

उक्तां परकीयव्याख्यां दूषयति—तत्रेति । दृष्टिकर्तृत्वविवक्षायां तृजन्तेनैव तत्सिद्धेः षष्ठी निरर्थिकेत्यर्थः । कथं पुनर्व्याख्यातारो यथोक्तं दोषं न पश्यन्ति तत्राऽऽह—पश्यतां वेति । षष्ठीनैरर्थक्यं प्रागुक्तमाकाङ्क्षाद्वारा समर्थयते—कथमित्यादिना । कियत्तर्हीहार्थवदित्याशङ्क्याऽऽह—तदेति । तत्र हेतुमाह—यस्मादिति । क्रिया धात्वर्थः । कर्ता प्रत्ययार्थः । तथा चैकेनैव पदेनोभयलाभात्पृथक्क्रियाग्रहणमनर्थकमित्यर्थः । दृष्टेरित्यस्यानर्थकत्वं दृष्टान्तेन साधयति—गन्तारमित्यादिना । अर्थवादत्वेन तर्हीदमुपात्तमित्याशङ्क्याऽऽह—न चेति । विधिशेषत्वाभावादस्मदुक्तैकगत्या चार्थवत्त्वसंभवादित्यर्थः । अथ परपक्षे निरर्थकमेवेदं पदं प्रमादात्पठितमिति चेन्नेत्याह—न चेति । सर्वेषां काण्वमाध्यंदिनानामिति यावत् । कथं तर्हीदं पदमनर्थकमिति परेषां प्रतीतिस्तत्राऽऽह—तस्मादिति

यथा त्वस्माभिर्व्याख्यातं लौकिकदृष्टेर्विविच्य नित्यदृष्टिविशिष्ट आत्मा प्रदर्शयितव्यस्तथाँ कर्तृकर्मविशेषणत्वेन दृष्टिशब्दस्य द्विः प्रयोग उपपद्यत आत्मस्वरूपनिर्धारणाय । नहि द्रष्टुर्दृष्टेरिति च प्रदेशान्तरवाक्येनैवैकवाक्यतोपपन्ना भवति । तथा च "चक्षूंषि पश्यति" "श्रोत्रमिदं श्रुतम्" इति श्रुत्यन्तरेणैकवाक्यतोपपन्ना । न्यायाच्च । एवमेव ह्यात्मनो नित्यत्वमुपपद्यते विक्रियाभावे विक्रियावच्च नित्यमिति च विप्रतिषिद्धम् । "ध्यायतीव लेलायतीव'

---

१ ख. च । २ घ. ज झ नयेन्ये° । ३ च ढ °ध्येतृणा प्र° । ४ क. ख. ण. चेति । ५ ञ. °धिविशे° । ६ ग. °क्तनीत्या । घ. ञ. ण °क्तरीत्या । ७ च. ढ. °था च क° । ८ क. ख म घ. ङ. च छ. ढ. कर्मकर्तृवि° । ९ ग. घ. ज. झ. °नैक° । १० क ग. ङ. छ. ज. झ. ढ. °था चक्षू° ।

" नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते " " एष नित्यो महिमा ब्राह्मणस्य " इति च श्रुत्यक्षराण्यन्यथा न गच्छन्ति ।

कथं पुनर्भवतामपि दृशेर्द्विरुपादानमुपपद्यते तत्राऽऽह—यथा त्विति । प्रदर्शयितव्यपदादुपरिष्टाद्दर्शितशब्दो द्रष्टव्यः । कर्तृकर्मविशेषणत्वेन साक्षिसाक्ष्यसमर्पकत्वेनेति यावत् । तत्समर्पणमिति कुत्रोपयुज्यते तत्राऽऽह—आत्मेति । दृष्टत्वादिसाक्ष्यात्मा न तद्विषय इति तत्स्वरूपनिश्चयार्थं साक्ष्यादिसमर्पणमित्यर्थः । आत्मा नित्यदृष्टिस्वभावो न दृश्यायां दृष्टेर्विषय इत्येष चेन्न दृष्टेरित्यादिवाक्यस्यार्थस्तदा नहीत्यादिनाऽस्यैकवाक्यत्वं सिध्यति । तस्माद्यथोक्तार्थत्वमेव न दृष्टेरित्यादिवाक्यस्येत्याह—नहीति । आत्मा कूटस्थदृष्टिरित्यत्र तलवकारश्रुतिं संवादयति—तथा चेति । तस्य कूटस्थदृष्टित्वे हेत्वन्तरमाह—न्यायाच्चेति । तमेवं न्यायं विशदयति—एवमेवेति । विपक्षे दोषमाह—विक्रियावच्चेति । इतश्चाऽऽत्मनो नास्ति विक्रियावत्त्वमित्याह—ध्यायतीवेति । अन्यथा विक्रियावत्त्वे सतीति यावत् ।

ननु द्रष्टा श्रोता मन्ता विज्ञातेत्येवमादीन्यप्यक्षराण्यात्मनोऽविक्रियत्वे न गच्छन्तीति । न । यथाप्राप्तलौकिकवाक्यानुवादित्वात्तेषाम् । नाऽऽत्मतत्त्वनिर्धारणार्थानि तानि । न दृष्टेर्द्रष्टारमित्येवमादीनामन्यार्थासंभवाद्यथोक्तार्थपरत्वमवगम्यते । तस्मादनवबोधादेव हि विशेषणं परित्यक्तं दृष्टेरिति । एष ते तवाऽऽत्मा सर्वैरुक्तैर्विशेषणैर्विशिष्टः । अत एतस्मादात्मनोऽन्यदार्तं कार्यं वा शरीरं करणात्मकं वा लिङ्गम् । एतदेवैकमनार्तमविनाशि कूटस्थम् । ततो होषस्तश्चाक्रायण उपरराम ॥ २ ॥

इति बृहदारण्यकोपनिषद्भाष्ये तृतीयाध्यायस्य
चतुर्थं ब्राह्मणम् ॥ ४ ॥

अविक्रियत्वेऽपि श्रुत्यक्षराण्यनुपपन्नानीति शङ्कते—नन्विति । न तेषां विरोधो दृष्टं दृष्टृत्वादिकर्तृत्वमनूद्य प्रवृत्ते लौकिके वाक्ये तदर्थानुवादित्वादुक्तश्रुत्यक्षराणां स्वार्थे प्रामाण्याभावादिति परिहरति—नेत्यादिना । न दृष्टेरित्यादीन्यपि तर्हि श्रुत्यक्षराणि न स्वार्थे प्रमाणानीत्याशङ्क्याऽऽह—न दृष्टेरिति ।

१ घ. ण. °साक्ष्यात्मा । २ घ. ज. इत्येवं ।

अन्योऽर्थो दृष्ट्यादिकर्ता । यथोक्तोऽर्थो दृष्ट्यादिसाक्षी । दृष्टृपदस्य साक्षिविषयत्वे सिद्धे दृष्टेरिति साध्यसमर्पणात्तदर्थवत्त्वोपपत्तिरित्युपसंहरति—तस्मादिति । पक्षान्तरं निराकृत्य स्वपक्षमुपपाद्यानन्तरं वाक्यं विभजते—एष इति । अन्यदार्तमितिविशेषणसामर्थ्यसिद्धमर्थमाह—एतदेवेति ॥ २ ॥

इति बृहदारण्यकोपनिषद्भाष्यटीकायां तृतीयाध्यायस्य
चतुर्थमुषस्तब्राह्मणम् ॥ ४ ॥

(अथ तृतीयाध्यायस्य पञ्चमं ब्राह्मणम्) ।

बन्धनं सप्रयोजकमुक्तम् । यश्च बद्धस्तस्याप्यस्तित्वमधिगतं व्यतिरिक्तत्वं च । तस्येदानीं बन्धमोक्षसाधनं ससंन्यासमात्मज्ञानं वक्तव्यमिति कहोलप्रश्न आरभ्यते—

अथ हैनं कहोलः कौषीतकेयः पप्रच्छ याज्ञवल्क्येति होवाच यदेव साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरस्तं मे व्याचक्ष्वेत्येष त आत्मा सर्वान्तरः । कतमो याज्ञवल्क्य सर्वान्तरो योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येति । एतं वै तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति या ह्येव पुत्रैषणा सा वित्तैषणा या वित्तैषणा सा लोकैषणोभे ह्येते एषणे एव भवतः । तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत् । बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिरमौनं च मौनं च निर्विद्याथ ब्राह्मणः स ब्राह्मणः केन स्याद्येन स्यात्तेनेदृश एवातोऽन्यदार्तं ततो ह कहोलः कौषीतकेय उपरराम ॥ १ ॥

इति बृहदारण्यकोपनिषदि तृतीयाध्यायस्य
पञ्चमं ब्राह्मणम् ॥ ५ ॥

अथ हैनं कहोलो नामतः कुषीतकस्यापत्यं कौषीतकेयः पप्रच्छ-याज्ञवल्क्येति होवाचेति पूर्ववत्। यदेव साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरस्तं मे व्याचक्ष्वेति। यं विदित्वा बन्धनात्प्रमुच्यते। याज्ञवल्क्य आह–ते तवाऽऽत्मा।

ब्राह्मणत्रयार्थं संगतिं वक्तुमनुवदति–बन्धनमिति। चतुर्थब्राह्मणार्थं संक्षिपति–यश्चेति। उत्तरब्राह्मणतात्पर्यमाह–तस्येति। उपस्तप्रश्नानन्तर्यमथशब्दार्थः। पूर्ववदित्याभिमुख्यकरणार्थं संबोधितवानित्यर्थः। बन्धध्वंसिज्ञानप्रश्नो नात्र प्रतिभाति किंत्वनुवादमात्रमित्याशङ्क्याऽऽह–यं विदित्वेति। तं व्याचक्ष्वेति पूर्वेण संबन्धः।

किमुषस्तकहोलाभ्यामेक आत्मा पृष्टः किंवा भिन्नावात्मानौ तुल्यलक्षणाविति। भिन्नाविति युक्तं प्रश्नयोरपुनरुक्तत्वोपपत्तेः। यदि ह्येक आत्मोषस्तकहोलप्रश्नयोर्विवक्षितस्तत्रैकेनैव प्रश्नेनाधिगतत्वात्द्वितीयो द्वितीयः प्रश्नोऽनर्थकः स्यात्। न चार्थवादरूपत्वं वाक्यस्य। तस्माद्भिन्नावेतावात्मानौ क्षेत्रज्ञपरमात्मारूपाविति केचिद्व्याचक्षते।

प्रश्नयोरवान्तरविशेषपदर्शनार्थं परामृशति–किमुषस्तेति। तत्र पूर्वपक्षं गृह्णाति–भिन्नाविति। उक्तमर्थं व्यतिरेकद्वारा विवृणोति–यदि हीत्यादिना अथैकं वाक्यं वस्तुपरं तस्यार्थवादो द्वितीयं वाक्यं नेत्याह–न चेति। द्वयोर्वाक्ययोस्तुल्यलक्षणत्वे फलितमाह–तस्मादिति। तत्राऽऽद्यं वाक्यं क्षेत्रज्ञमधिकरोति द्वितीयं परमात्मानमित्यभिप्रेत्याऽऽह–क्षेत्रज्ञेति।

तत्र तं इति प्रतिज्ञानात्। एष त आत्मेति हि प्रतिवचने प्रतिज्ञातम्। न चैकस्य कार्यकरणसंघातस्य द्वावात्मावुपपद्येते। एको हि कार्यकरणसंघात एकेनाऽऽत्मनाऽऽत्मवान्। न चोषस्तस्यान्यः कहोलस्यान्यो जातितो भिन्न आत्मा भवति। द्वयोरगौणत्वात्मत्व-सर्वान्तरत्वानुपपत्तेः। यद्येकमगौणं ब्रह्म द्वयोरितरेणावश्यं गौणेन भवितव्यं तथाऽऽत्मत्वं सर्वान्तरत्वं च। विरुद्धत्वात्पदार्थानाम्। यद्येकं सर्वान्तरं ब्रह्माऽऽत्मा मुख्य इतरेणासर्वान्तरेणानात्मनाऽमुख्येनावश्यं भवितव्यम्। तस्मादेकस्यैव द्विः श्रवणं विशेषविवक्षया।

---

१ घ. °कस्य युवाप°। २ च. °तकिस्तदपत्यं कौषीतके°। ३ घ. °ह्मणान्तरार्थसं°। ४ ख. ङ. ण. °यार्थसं°। ५ च. ढ. °लयो°। ६ क, ख, ङ. छ. ढ. तवेति। ७ ग, घ, ङ, ञ, ज. झ. आत्मैष त आत्मे°।

ब्राह्मणद्वयेनार्थद्वयं विवक्षितमिति मर्तृप्रपञ्चप्रस्थानं मत्याह–**तन्नेति** । प्रश्नप्रतिवचनयोरैक्यात्वाच्चार्थभेदोऽस्तीत्युक्तमुपपादयति–**एष त इति** । तथाऽप्यर्थभेदे नाऽनर्थपत्तिरित्यत्राऽऽह–**न चेति** । तदेवोपपादयति–**एको हीति** । कार्यकरणसंघातभेदादात्मभेदमाशङ्क्याऽऽह––**न चेति** । जातितः स्वभावतोऽहमहमिकैकाकारस्फुरणादित्यर्थः । इतश्च न तत्त्वभेद इत्याह–**द्वयोरिति** । तदेव स्फुटयति **यदीति** । द्वयोर्मध्ये यद्येकं ब्रह्मागौणं तदेतरेण गौणेनावश्यं भवितव्यं तथाऽऽत्मत्वादि यद्येकस्येष्टं तदेतरस्यानात्मत्वादीति कुतः स्यादिति चेत्तत्राऽऽह–**विरुद्धत्वादिति** । उक्तोपपादनपूर्वकं द्विः श्रवणस्याभिप्रायमाह–**यदीत्यादिना** । अनेकमुख्यत्वासंभवाद्धस्तुतः परिच्छिन्नस्य घटवदब्रह्मत्वादनात्मत्वाच्चैकमेव मुख्यं प्रत्यगभिन्नं ब्रह्मेत्यर्थः । यदि जीवेश्वरभेदाभावात्तत्प्रश्नयोर्नार्थभेदस्तर्हि पुनरुक्तिरनर्थिकेत्याशङ्क्याऽऽह–**तस्मादिति** ।

यत्तु पूर्वोक्तेन समानं द्वितीये प्रश्नान्तर उक्तं तावन्मात्रं पूर्वस्यैवानवास्तस्यैवानुक्तः कश्चिद्विशेषो वक्तव्य इति । कः पुनरसौ विशेष इति । उच्यते–पूर्वस्मिन्प्रश्नेऽस्ति व्यतिरिक्त आत्मा यस्यायं सप्रयोजको बन्ध उक्त इति । द्वितीये तु तस्यैवाऽऽत्मनोऽज्ञानायादसंसारधर्मतीतित्व विशेष उच्यत । यद्विशेषपरिज्ञानात्संन्याससहितात्पूर्वोक्ताद्बन्धनाद्विमुच्यते । तस्मात्प्रश्नप्रतिवचनयोरेष त आत्मेत्येवमन्तयोस्तुल्यार्थतव ।

तर्हि स एव विशेषो दर्शयितव्यो येन पुनरुक्तिरर्थवतीत्याशङ्क्याऽऽह–**यस्त्विति** । अनुक्तविशेषकथनार्थमुक्तपरिमाणं निर्णेतुमुक्तानुवादश्चेदनुक्तो विशेषस्तर्हि प्रदर्श्यतामिति पृच्छति–**कः पुनरिति** । बुभुत्सितं विशेषं दर्शयति––**उच्यत इति** । इतिशब्दः क्रियापदेन सबध्यते । किमित्येष विशेषो निर्दिश्यते तत्राऽऽह–**यद्विशेषति** । अर्थभेदासंभवे फलितमाह–**तस्मादिति** । योऽज्ञानायेत्यादिना तु विवक्षितविशेषोक्तिरिति शेषः ।

ननु कथमेकस्याऽऽत्मनोऽज्ञानायादतीतित्वं तद्वत्त्वं चेति विरुद्धधर्मसमवायित्वमिति । न । परिहृतत्वात् । नामरूपविकारकार्यकरणलक्षणसंघातोपाधिभेदसंपर्कजनितभ्रान्तिमात्रं हि संसारित्वमित्यसकृदवोचाम । विरुद्धश्रुतिव्याख्यानप्रसङ्गेन च । यथा रज्जुशुक्तिकागगनादयः सर्परजतमलिना भवन्ति परारोपितधर्मविशिष्टाः स्वतः

---

१ ख. ङ. तादृत । २ ख. ञ. तादित । ३ क. घ. ञ. 'त्वादि कु' । ४ च, छ. 'नियत्वसं' ।

केवला एव रज्जशक्तिकागगनादयः । न चैवं विरुद्धधर्ममभवायित्वे पदार्थानां कश्चन विरोधः ।

एकमेवाऽऽत्मतत्त्वमधिकृत्य प्रश्नावित्यत्र चोदयति—**नन्विति** । विरुद्धधर्मवत्त्वान्मिथो भिन्नौ पक्षार्थावित्येतद्दूषयति—**नेति** । परिहृतत्वमेव प्रकटयति—**नामरूपेति** । तयोर्विकारः कार्यकरणलक्षणः सङ्घातः स एवोपाधिभिस्तेन संपर्कस्तस्मिन्नहंममाध्यासस्तेन जनिता भ्रान्तिरहं करेत्याद्या तावन्मात्रं संसारित्वमित्येनकशो व्युत्पादितं तस्मान्नात्मनि वस्तुतो विरुद्धधर्मवत्त्वमित्यर्थः । किंच सविशेषत्वनिर्विशेषत्वश्रुत्योर्विषयविभागोक्तिप्रसङ्गेन संसारित्वस्य मिथ्यात्वं मधवाल्लणान्तेऽवोचामेत्याह—**विरुद्धेति** । कथं तर्हि विरुद्धधर्मवत्त्वप्रतीतिरित्याशङ्क्याऽऽह—**यथेति** । परेण पुरुषेणाज्ञानेन वाऽध्यारोपिताः सर्पत्वादिभिर्धर्मैर्विशिष्टा इति यावत् । स्वतश्चाध्यारोपेण विनेत्यर्थः । प्रतिभासतो विरुद्धधर्मवत्त्वेऽपि क्षेत्रज्ञेश्वरयोर्भिन्नत्वाद्भिन्नार्थावेव प्रश्नाविति चेन्नेत्याह—**न चैवमिति** । निरुपाधिकरूपेणासंसारित्वं सोपाधिकरूपेण संसारित्वमित्यविरोध उक्तः ।

नामरूपोपाध्यस्तित्वे ' एकमेवाद्वितीयम् ' " नेह नानाऽस्ति किंचन " इति श्रुतयो विरुध्येरन्निति चेत् । न । मलिलफेनदृष्टान्तेन परिहृतत्वान्मृदादिदृष्टान्तैश्च । यदा तु परमार्थदृष्ट्या परमात्मतत्त्वाच्छ्रुत्यनुसारिभिरन्यत्वेन निरूप्यमाणे नामरूपे मृदादिविकारा वद्वस्त्वन्तरे तत्त्वतो न स्तः मलिलफेनघटादिविकारवदेव तदा तदपेक्ष्यैकमेवाद्वितीयं नेह नानाऽस्ति किंचनेत्यादिपरमार्थदर्शनगोचरत्वं प्रतिपद्यते ।

इदानीमुपाध्यभ्युपगमे सद्वयत्वं सतश्चैव घटादेरुपाधित्वदृष्टेरिति शङ्कते—**नामेति** । सलिलातिरेकेण न सन्ति फेनादयो विकारा नापि मृदाद्यतिरेकेण तद्विकाराः शरावादयः सन्तीति दृष्टान्तारूढयुक्तिबलादाविद्यकनामरूपरचितकार्यकरणसंघातस्याविद्यामात्रत्वात्तस्याश्च विद्यया निरासाच्चैवमिति परिहरति—**नेत्यादिना** । कार्यतत्त्वमभ्युपगम्योक्तमिदानीं तदपि निरूप्यमाणे नास्तीत्याह—**यदा त्विति** । नेह नानाऽस्ति किंचनेत्यादिश्रुत्यनुसारिभिर्वस्तुदृष्ट्या निरूप्यमाणे नामरूपे परमात्मतत्त्वादन्यत्वेनान्यत्वेन वा निरूप्यमाणे तत्त्वतो वस्त्वन्तरे यदा तु न स्त इति संबन्धः । मृदादिविकारवदित्युक्तं प्रकटयति—**मलिलेति** । तदा तत्परमात्मतत्त्वमपेक्ष्येति योजनीयम् ।

यदा तु स्वाभाविक्याऽविद्यया ब्रह्मस्वरूपं रज्जशक्तिकागगनस्व-

---

१ ण. "न्त चाक्तमित्या" । २ क. ग घ. च छ ज झ. ट "पक्षयट्" । ३ क. ख. ढ. "न चानि" । ४ घ. ण. "पेक्षयेति" ।

रूपवदेव स्वेन रूपेण वर्तमानं केनचिदस्पृष्टस्वभावमपि सन्नाम्नारूपकृतकार्यकरणोपाधिभ्यो विवेकेन नावधार्यते नामरूपोपाधिदृष्टिरेव च भवति स्वाभाविकी तदा सर्वोऽयं वस्त्वन्तरास्तित्वव्यवहारः। अस्ति चायं भेदकृतो मिथ्याव्यवहारो येषां ब्रह्मतत्त्वादन्यत्वेन वस्तु विद्यते येषां च नास्ति।

कदा तर्हि लौकिको व्यवहारस्तत्राऽऽह—यदा त्विति। अविद्यया स्वाभाविक्या ब्रह्म यदोपाधिभ्यो विवेकेन नावधार्यते तदा लौकिको व्यवहारश्चेत्तर्हि विवेकिनां नासौ स्यादित्याशङ्क्याऽऽह—अस्ति चेति। भेदभानप्रयुक्तो व्यवहारो विवेकिनामविवेकिनां च तुल्य एवायं वस्त्वन्तरास्तित्वाभिविवेशस्तु विवेकिनां नास्तीति विशेषः।

परमार्थवादिभिस्तु श्रुत्यनुसारेण निरूप्यमाणे वस्तुनि किं तत्त्वतोऽस्ति वस्तु किंवा नास्तीति ब्रह्मैकमेवाद्वितीयं सर्वसंव्यवहारशून्यमिति निर्धार्यते तेन न कश्चिद्विरोधः। नाहि परमार्थावधारणनिष्ठायां वस्त्वन्तरास्तित्वं प्रतिपद्यामहे। "एकमेवाद्वितीयम्" "अनन्तरमबाह्यम्" इति श्रुतेः। न च नामरूपव्यवहारकाले स्वावेकिनां क्रियाकारककफलादिसंव्यवहारो नास्तीति प्रतिषिध्यते। तस्माज्ज्ञानाज्ञाने अपेक्ष्य सर्वः संव्यवहारः शास्त्रीयो लौकिकश्च। अतो न काचन विरोधशङ्का। सर्ववादिनामप्यपरिहार्यः परमार्थसंव्यवहारकृतो व्यवहारः।

ननु यथाप्रतिभासं वस्त्वन्तरं पारमार्थिकमेव किं न स्यात्तत्राऽऽह—परमार्थेति। किं द्वितीयं वस्तु तत्त्वतोऽस्ति किंवा नास्तीति वस्तुनि निरूप्यमाणे सति श्रुत्यनुसारेण तत्त्वदर्शीभिरेकमेवाद्वितीयं ब्रह्माव्यवहार्यमिति निर्धार्यते तेन व्यवहारदृष्ट्याश्रयणेन भेदकृतो मिथ्याव्यवहारस्तत्त्वदृष्ट्याश्रयणेन च तदभावविषयः शास्त्रीयो व्यवहार इत्युभयविधव्यवहारसिद्धिरित्यर्थः। तत्र शास्त्रीयव्यवहारोपपत्तिं प्रपञ्चयति—नहीति। तथा च विद्यावस्थायां शास्त्रीयोऽभेदव्यवहारस्तदितरव्यवहारस्त्वाभासमात्रमिति शेषः। अविद्यावस्थायां लौकिकव्यवहारोपपत्तिं विवृणोति—न च नामेति। उभयविधव्यवहारोपपत्तिमुपसंहरति—तस्मादिति। उक्तरीत्या व्यवहारद्वयोपपत्तौ फलितमाह—अत इति। प्रत्यक्षादिषु वेदान्तेषु चेति शेषः। ज्ञानाज्ञाने पुरस्कृत्य व्यवहारः शास्त्रीयो लौकिकश्चेति नास्माभिरेवोच्यते किंतु सर्वेषामपि परीक्षकाणामेतत्संपन्नं तत्तत्त्वदशायां क्रियाकारकव्यवहारस्य मोक्षावस्थायां च तदभावस्येष्टत्वादित्याह—सर्ववादिनामिति।

---

१ ख. ग. [illegible]। २ घ. ङ. ण. एव। ३ क. म. °रोधाश°। ४ ङ. ण. वेति।

तत्र परमार्थात्मस्वरूपमपेक्ष्य प्रश्नः पुनः कतमो याज्ञवल्क्य सर्वान्तर इति । प्रत्याहेतरो योऽशनायापिपासे । आशितुमिच्छाऽशनाया पातुमिच्छा पिपासा । ते अशनायापिपासे योऽत्येतीति वक्ष्यमाणेन संबन्धः । अविवेकिभिस्तलमलवादिव गगनं गम्यमानमेव तलमल अत्येति परमार्थतस्ताभ्याममंसृष्टस्वभावत्वात् । तथा मूढैरशनाया पिपासादिमद्ब्रह्म गम्यमानमपि क्षुधितोऽहं पिपासितोऽहमिति ते अत्येत्येव परमार्थतस्ताभ्याममंसृष्टस्वभावत्वात् । " न लिप्यते लोकदुःखेन बाह्यः " इति श्रुतेः । अविद्वल्लोकाध्यारोपितदुःखेनेत्यर्थः । प्राणे कथमेतत्समासकरणमशनायापिपासयोः ।

निरुपाधिके परस्मिन्नात्मनि चिद्भावनाद्यविद्याकल्पितोपाधिकृतमशनायादिमत्त्वं वस्तुवस्तु तद्रहित्यमित्युपपाद्यानन्तरप्रश्नपुरस्कारेण प्रतिवक्ति—तत्रेत्यादिना । कल्पिताकल्पितयोरात्मस्वरूपयोर्निर्धारणार्था सप्तमी । योऽत्येति स ब्रह्मान्तरत्वादिविशेषणस्त्वाऽऽत्मेति शेषः । नन्वयं परो नाशनायादिमानप्रसिद्धेनापि जीवस्तथा तस्य परस्मादव्यतिरेकादत आह—अविवेकिभिरिति । परमार्थत इत्युभयतः संबध्यते । ब्रह्मैवाखण्डं सच्चिदानन्दमनाद्यविद्यातत्कार्यबुद्ध्यादिसंबद्धाभासद्वारा स्वानुभवादशनायादिमद्भम्यते तत्त्वं वस्तुतोऽविद्याद्यसंबन्धादशनायाद्यतीतं नित्यमुक्तं तिष्ठतीत्यर्थः । अशनायापिपासादिमद्ब्रह्म गम्यमानमिति वदञ्शाचार्यो नानाजीववादस्यानिष्टत्वं सूचयति । परमार्थतो ब्रह्मण्यशनायाद्यसंबन्धे मानमाह—न लिप्यत इति । बाह्यत्वमसङ्गत्वम् । लोकदुःखेनेत्ययुक्तं लोकस्यानात्मनो दुःखसंबन्धानभ्युपगमादित्याशङ्क्याऽऽह—अविद्वदिति । अशनायापिपासयोः समस्योपादाने हेतुमाह—प्राणेति ।

शोकं मोहं शोक इति कामः । इष्टं वस्तूद्दिश्य चिन्तयतो यदरमणं तत्तृष्णाभिभूतस्य कामबीजं तेन हि कामो दीप्यते । मोहस्तु विपरीतप्रत्ययप्रभवोऽविवेको भ्रमः । स चाविद्या सर्वस्यानर्थस्य प्रसवबीजम् । भिन्नकार्यत्वात्तयोः शोकमोहयोरसमासकरणम् । तौ मनोधिकरणौ । तथा शरीराधिकरणौ जरां मृत्युं चात्येति । जरेति कार्यकरणसंघातविपरिणामो वलीपलितादिलिङ्गः । मृत्युरिति तद्विच्छेदो विपरिणामावसानः । तौ जरामृत्यू शरीराधिकरणावत्येति ।

अरतिवाची शोकशब्दो न कामविषय इत्याशङ्क्याऽऽह—इष्टमिति कामबीजत्वमरतेरनुभवेनाभिव्यनक्ति—तेन हीति । कामस्य शोको बीजमिति स

१ ख. छ. झ. °संस्पृष्टं । २ ख. ङ. °संसृष्टं । ३ ख. ढ. नच ।

कामतया व्याख्यातः । अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिर्वै-परीत्यप्रत्ययस्तस्मान्मनसि प्रभवति कर्तव्याकर्तव्याविवेकः स लौकिकः सम्यग्ज्ञा-नविरोधाद्भ्रमोऽविद्येत्युच्यते । तस्याः सर्वानर्थोत्पत्तौ निमित्तत्वं मूलाविद्यायास्तु-पादानत्वं तदेतदाह-मोहस्त्विति । कामस्य शोको मोहो दुःखस्य हेतुरिति भिन्न-कार्यत्वं तद्विच्छेद इत्यत्र कार्यकरणसंघातस्तच्छब्दार्थः ।

ये तेऽशनायादयः प्राणमनःशरीराधिकरणाः प्राणिष्वनवरतं वर्त-माना अहोरात्रादिवत्समुद्रोर्मिवच्च प्राणिषु संसार इत्युच्यते । योऽसौ दृष्टेत्यादिलक्षणः साक्षादव्यवहितोऽपरोक्षादगौणः सर्वान्तर आत्मा ब्रह्मादिस्तम्बपर्यन्तानां भूतानामशनायापिपासादिभिः संसारधर्मैः सदा न स्पृश्यत आकाश इव घनादिमलैः । तमेतं वा आत्मानं स्वं तत्त्वं विदित्वा ज्ञात्वाऽयमहमस्मि परं ब्रह्म सदा सर्वसंसारविनिर्मुक्तं नित्य-तृप्तमिति ब्राह्मणाः । ब्राह्मणानामेवाधिकारो व्युत्थानेऽतो ब्राह्मणग्र-हणम् । व्युत्थाय वैपरीत्यनास्थानं कृत्वा । कृत इत्याह-पुत्रैषणायाः पुत्रार्थैषणा पुत्रैषणा । पुत्रेणेमं लोकं जयेयमिति लोकजयसाधनं पुत्रं प्रतीच्छैषणा दारसंग्रहः । दारसंग्रहमकृत्वेत्यर्थः । वित्तैषणायाश्च कर्म-साधनस्य गवादेरुपादानमनेन कर्म कृत्वापि पितृलोकं जेष्यामीति विद्या संयुक्तेन वा देवलोकं केवलया वा हिरण्यगर्भावेद्यया दैवेन वित्तेन देवलोकम् ।

संसारादिरूपस्य पारिव्राज्यं वक्तुमुत्तरं वाक्यमित्यभिप्रेत्य संक्षेपतः संसारस्व-रूपमाह-ये त इत्यादिना । तेषामात्मधर्मत्वं व्यावर्तयितुं विशिनष्टि-प्राणेति । तेषां स्वरूपतो विच्छेदशङ्कां वारयति-प्राणिष्विति । प्रवाहरूपेण नैरन्तर्यं दृष्टान्तमाह-अहोरात्रादिवदिति । तेषामनित्यत्वे दृष्टान्तः--समुद्रोर्मिव-दिति । तेषां हेयत्वं द्योतयति-प्राणिष्विति । ये यथोक्ताः प्राणिष्वशनाया-दयस्ते तेषु संसार इत्युच्यत इति योजना । एतं वै तमित्यत्र तच्छब्दार्थमुपस्त-यन्प्रश्नोक्तं त्वंपदार्थं कथयति-योऽयमिति । एतच्छब्दार्थं कहोलप्रश्नोक्तं त्वंप-दार्थं तत्पदार्थं दर्शयति-अशनायेति । तयोरैक्यं सामानाधिकरण्येन सूचित-मित्याह-तमेतामिति । ज्ञानमेव विशदयति-अयमित्यादिना । ज्ञात्वा ब्राह्म-णा व्युत्थाय भिक्षाचर्यं चरन्तीति संबन्धः । संन्यासविधायके वाक्ये किमित्य-धिकारिणि ब्राह्मणपदं तत्राऽऽह-ब्राह्मणानामिति । पुत्रार्थैषणामेव विवृ-णोति-पुत्रेणेति । ततो व्युत्थानं संगृह्णाति-दारसंग्रहमिति । वित्तैषणा-

१ ख. च. ज. ट. °च्यन्त। या' । २ क. ख. ञ. ट. °च्यन्त इ ।

याश्च व्युत्थानं कर्तव्यमित्याह—वित्तेति । वित्तं द्विविधं मानुषं दैवं च । मानुषं गवादि तस्य कर्मसाधनस्योपादानमुपार्जनं तेन कर्म कृत्वा केवलेन कर्मणा पितृलोकं जेष्यामि । दैवं वित्तं विद्या तत्संयुक्तेन कर्मणा देवलोकं केवलया च विद्यया तमेव जेष्यामीतीच्छा वित्तैषणा ततश्च व्युत्थानं कर्तव्यमिति व्याचष्टे—कर्मसाधनस्येति । एतेन लोकैषणायाश्च व्युत्थानमुक्तं वेदितव्यम् ।

दैवाद्वित्ताद्व्युत्थानमेव नास्तीति कैश्चित् । यस्मात्तद्बलेन हि किल व्युत्थानमिति । तदसत् । एतावान्वै काम इति पठित्वादेषणामध्ये दैवस्य वित्तस्य । हिरण्यगर्भादिदेवताविषयैव विद्या वित्तमित्युच्यते । देवलोकहेतुत्वात् । नहि निरुपाधिकप्रज्ञानघनविषया ब्रह्मविद्या देवलोकप्राप्तिहेतुः । " तस्मात्तत्केवलमभवत् " " आत्मा ह्येषां स भवति " इति श्रुतेः । तद्बलेन हि व्युत्थानम् । ' एतं वै तमात्मानं विदित्वा " इति विशेषवचनात् । तस्मात्त्रिभ्योऽप्येतेभ्योऽनात्मलोकप्राप्तिसाधनेभ्य एषणाविषयेभ्यो व्युत्थाय । एषणा कामः " एतावान्वै कामः " इति श्रुतेः । एतस्मिन्त्रिविधेऽनात्मलोकप्राप्तिसाधने तृष्णामकृत्वेत्यर्थः ।

दैवाद्वित्ताद्व्युत्थानमनास्तीति—दैवादिति । तत्रापि कामत्वात्ततो व्युत्थानमित्यभिप्रेत्य परिहरति—तदसदिति । नहि ब्रह्मविद्यायाः सकाशादिति व्युत्थानात्तन्मूलध्वंसे तद्व्यवधानात् स्यादित्याशङ्क्याऽऽह—हिरण्यगर्भादीति । देवोपासनाया वित्तमात्रहेतुत्वे हेतुमाह—देवलोकेति । तत्प्राप्तिहेतुत्वं ब्रह्मविद्यायामपि तुल्यमिति चेत्तत्राह—नहीति । तत्र फलान्तरश्रवणं हेतुं करोति—तस्मादिति । इतश्च ब्रह्मविद्या दैवाद्वित्ताद्विरेत्याह—तद्बलेनेति । प्रागेव वेदनं सिद्धं चेत्किं पुनर्व्युत्थानेनेत्याशङ्क्य प्रयोजकज्ञानं तत्प्रयोजकमुद्देश्यं तु तत्त्वसाक्षात्करणमिति विवक्षित्वाऽऽह—तस्मादिति । प्रयोजकज्ञानं पञ्चम्यर्थः । व्युत्थाय भिक्षाचर्यं चरन्तीति संबन्धः । व्युत्थानस्वरूपप्रदर्शनार्थमेषणास्वरूपमाह—एषणेति । किमेतावतेत्याशङ्क्य व्युत्थानस्वरूपमाह एतस्मिन्निति । संबन्धस्तु पूर्ववत् ।

सर्वा हि साधनेच्छा फलेच्छैव । अतो व्याचष्टे—श्रुतिरेकैवैषणेति । कथम् ? या ह्येव पुत्रैषणा सा वित्तैषणा । दृष्टफलसाधनत्वतुल्यत्वात् । या वित्तैषणा सा लोकैषणा फलत्वेव सा । सर्वः फलार्थप्रयुक्त एव हि सर्वं साधनमुपादत्ते । अत एकैवैषणा या लोकैषणा सा साधनमन्तरेण संपादयितुं न शक्यत इति । साध्यसाधनभेदेनोमे हि

१ क. ग. घ. ङ. छ. झ. विद्यत्यु । २ घ. ज. °कप्राप्तिहे° । ३ ख. घ. ढ. हेतु त° । ४ क. ख. ग. ढ. च. छ. झ णा कर्मभूता सा ।

यस्मादेते एषणे एव भवतः । तस्माद्ब्रह्मविदो नास्ति कर्म कर्मसाधनं वा ।

या खेत्यादिश्रुतेस्तात्पर्यमाह—सर्वा इति । फलं नेच्छति साधनं च चिकीर्षतीति व्याघातात्फलेच्छान्तर्भूतैव साधनेच्छा तद्युक्तमेषणैक्यमित्यर्थः । श्रुतेस्तदैक्यव्युत्पादकत्वं प्रश्नपूर्वकं व्युत्पादयति—कथमित्यादिना । फलैषणान्तर्भावं साधनैषणायाः समर्थयते—सर्व इति । उभे ह्रीत्यादिश्रुतिमवतार्य व्याचष्टे—या लोकैषणेति ।

अतो येऽतिक्रान्ता ब्राह्मणाः सर्वं कर्म कर्मसाधनं च सर्वं दैवपितृमानुषनिमित्तं यज्ञोपवीतादि तेन हि दैवं पित्र्यं मानुषं च कर्म क्रियते । ' निवीतं मनुष्याणाम् " इत्यादिश्रुतेः । तस्मात्पूर्वे ब्राह्मणा ब्रह्मविदो व्युत्थाय कर्मसाधनेभ्यश्च यज्ञोपवीतादिभ्यः परमहंसपारिव्राज्यं प्रतिपद्य भिक्षाचर्यं चरन्ति भिक्षार्थं चरणं भिक्षाचर्यं चरन्ति त्यक्त्वा स्मार्तं लिङ्गं केवलमाश्रममात्रशरणानां जीवसाधनं पारिव्राज्यव्यञ्जकम् । विद्वाल्लिङ्गवर्जितः । " तस्मादलिङ्गो धर्मज्ञोऽव्यक्तलिङ्गोऽव्यक्ताचारः " इत्यादिस्मृतिभ्यः । " अथ परिव्राडविवर्णवासा मुण्डोऽपरिग्रहः " इत्यादिश्रुतेः । सशिखान्केशानुत्सृज्य विसृज्य यज्ञोपवीतमिति च ।

प्रयोजकज्ञानवतः साध्यसाधनरूपात्संसारादिरक्तस्य कर्मतत्साधनयोरसंभवे साक्षात्कारमुद्दिश्य फलितं संन्यासं दर्शयति—अत इति । अतिक्रान्ता ब्राह्मणाः किं प्रजयेत्यादिप्रकाशितास्तेषां कर्मसाधनं च यज्ञोपवीतादि नास्तीति पूर्वेण संबन्धः । दैवपितृमानुषनिमित्तमिति विशेषणं विशदयति—तेन हीति । प्राचीनावीतं पितॄणामुपवीतं देवानामित्यादिशब्दार्थः । यस्मात्पूर्वे विचारप्रयोजकज्ञानवन्तो ब्राह्मणा विरक्ताः संन्यस्य तत्प्रयुक्तं धर्ममन्वतिष्ठंस्तस्माद्धुनातनोऽपि प्रयोजकज्ञानी विरक्तो ब्राह्मणस्तथा कुर्यादित्याह—तस्मादिति । ' त्रिदण्डेन यतिरेव ' इत्यादिस्मृतेर्न परमहंसपारिव्राज्यमत्र विवक्षितमित्याशङ्क्याऽऽह—त्यक्त्वेति तस्य दृढार्थत्वान्मुमुक्षोरेवत्याज्यत्वं सूचयति—केवलमिति । अरूढत्वाच्च तस्य त्याज्यतेत्याह—पारिव्राज्येति । तथाऽपि त्वदिष्टः संन्यासो न स्मृतिकारैर्निबद्ध इति चेन्नेत्याह—विद्वानिति । प्रत्यक्षश्रुतिविरोधाच्च स्मार्तसंन्यासो मुख्यो न भवतीत्याह—अथेति ।

---

१ ध. ङ. ज. झ. ञ. सर्वं । २ ख. °चरणं च । ३ ख. ज. ढ. स्मार्तलिं° । ४ ङ. घ. च. छ. ज. ट °वलाभ्रं° । ५ ख. ट. ण. पितृणां° ।

ननु व्युत्थायाथ भिक्षाचर्यं चरन्तीति वर्तमानापदेशादर्थवादोऽयं न विधायकः प्रत्ययः कश्चिच्छ्रूयते लिङ्लोट्तव्यानामन्यतमोऽपि । तस्मादर्थवादमात्रेण श्रुतिस्मृतिविहितानां यज्ञोपवीतादीनां साधनानां न शक्यते परित्यागः कारयितुम् । यज्ञोपवीत्यधीयीत याजयेद्यजेत वा । पारिव्राज्ये तावदध्ययनं विहितम्—

" वेदसंन्यसनाच्छूद्रस्तस्माद्वेदं न संन्यसेत् " इति ।
" स्वाध्याय एवोत्सृज्यमानो वाचम्" इति चाऽऽपस्तम्बः ।
" ब्रह्मोज्झं वेदनिन्दा च कौटसाक्ष्यं सुहृद्वधः ।
गर्हितान्नाद्ययोर्जग्धिः सुरापानसमानि षट् "

इति वेदपरित्यागे दोषश्रवणात् । उपासने गुरूणां वृद्धानामतिथीनां होमे जप्यकर्मणि भोजन आचमने स्वाध्याये च यज्ञोपवीती स्यादिति परिव्राजकधर्मेषु च गुरूपासनस्वाध्यायभोजनाचमनादीनां कर्मणां श्रुतिस्मृतिषु कर्तव्यतया चोदितत्वाद्गुर्वाद्युपासनाङ्गत्वेन यज्ञोपवीतस्य विहितत्वात्तत्परित्यागो नैवावगन्तुं शक्यते । यद्यप्येषणाभ्यो व्युत्थानं विधीयत एव तथाऽपि पुत्राद्येषणाभ्यस्तितुल्य एव व्युत्थानं न तु सर्वस्मात्कर्मणः कर्मसाधनाच्च व्युत्थानम् । सर्वपरित्यागे चाश्रुतं कृतं स्याच्छ्रुतं च यज्ञोपवीतादि हापितं स्यात् । तथा च महानपराधो विहिताकरणप्रतिषिद्धाचरणानिमित्तः कृतः स्यात् । तस्माद्यज्ञोपवीतादिलिङ्गपरित्यागोऽन्धपरम्परैव ।

एवं वै तमित्यादिवाक्यस्य विधायकत्वमुपेत्य सर्वकर्मतत्साधनपरित्यागपरत्वमुपपादयति—नन्विति । इतश्च यज्ञोपवीतपरित्याज्यमित्याह—यज्ञोपवीत्येवेति । याजनादिसमभिव्याहाराद्संन्यासविषयमेवेदित्याशङ्क्याऽऽह—पारिव्राज्ये तावदिति । वेदत्यागे दोषश्रुतेस्तदत्यागेऽपि कथं पारिव्राज्ये यज्ञोपवीतित्वमित्याशङ्क्याऽऽह—उपासन इति । इत्यनेन वाक्येन गुर्वाद्युपासनाङ्गत्वेन यज्ञोपवीतस्य विहितत्वात्परिव्राजकधर्मेषु गुरूपासनादीनां कर्तव्यतया श्रुतिस्मृतिषु चोदितत्वाद्यज्ञोपवीतपरित्यागोऽवगन्तुं नैव शक्यत इत्यन्वयः । तंप्रति पौडिशारूढो व्युत्थाने विधिनङ्गीकृत्यापि दूषयति—यद्यपीत्यादिना । एषणाभ्यो व्युत्थाने तत्येषणात्वाविशेषात्कर्मणस्तत्साधनाच्च व्युत्थानं तेत्स्यतीत्याशङ्क्य यज्ञोपवीतादेरेषणात्वव्यभिचारित्याशयेनाऽऽह—सर्वेति । अश्रुतकरणे श्रुतत्यागे च 'अकुर्वन्विहितं कर्म' इत्यादिस्मृतिमाश्रित्य दूषणमाह—तथा चेति । ननु दृश्यते यज्ञोपवीतादिलि-

१ ढ. °विश्रुतिं । २ ढ. ण. दूषयति ।

ङ्गत्यागः स कस्मान्निराक्रियते तत्राऽऽह—तस्मादिति ।

न । " यज्ञोपवीतं वेदांश्च सर्वं तद्वर्जयेद्यतिः " इति श्रुतेः । अपि चाऽऽत्मज्ञानपरत्वात्सर्वस्या उपनिषदः । आत्मा द्रष्टव्यः श्रोतव्यो मन्तव्य इति हि प्रस्तुतं स चाऽऽत्मैव साक्षादपरोक्षात्सर्वान्तरोऽशनायादिसंसारधर्मवर्जित इत्येवं विज्ञेय इति तावत्प्रसिद्धम् । सर्वा हीयमुपनिषदेवं वदेति विध्यन्तरशेषत्वं तावन्नास्त्यतो नार्थवादः । आत्मज्ञानस्य कर्तव्यत्वात् । आत्मा चाशनायादिधर्मवान्न भवतीति साधनफलविलक्षणो ज्ञातव्यः । अतोऽन्यतिरेकेणाऽऽत्मनो ज्ञानमविद्या । " अन्योऽसावन्योऽहमस्मीति " " न स वेद " " मृत्योः स मृत्युमाप्नोति " " य इह नानेव पश्यति " " एकधैवानुद्रष्टव्यम् " "एकमेवाद्वितीयम् " " तत्त्वमसि " इत्यादिश्रुतिभ्यः । क्रियाफलं साधनं चाशनायादिसंसारधर्मातीतादात्मनोऽन्यदविद्याविषयम् । " यत्र हि द्वैतमिव भवति " " अन्योऽसावन्योऽहमस्मीति " " न स वेद " अथ येऽन्यथाऽतो विदुः " इत्यादिवाक्यशतेभ्यः ।

नेयमन्यपरमन्यरेति परिहरति—नेत्यादिना । ब्रह्मचर्यादेव प्रव्रजेदित्यादिविध्युपलम्भेऽपि मैत्रेय्यादेनाऽऽत्मज्ञानविधिबलादेव संन्यासं साधयितुमात्मज्ञानपरत्वं तावदुपनिषदामुन्नयति—अपि चेति । इतश्चास्ति संन्यासे विधिरिति यावत् । तद्विधिबलादेव संन्याससिद्धिरिति शेषः । कथं सर्वोपनिषदामात्मज्ञानपरत्वमिष्यते कर्तृत्वादिद्वारा कर्मविधिशेषत्वेनार्थवादत्वादित्याशङ्क्याऽऽह—आत्मेत्यादिना । अस्तु यथोक्तं वस्तु विज्ञेयं तथाऽपि प्रस्तुते किं जातं तदाह—सर्वा हीति । ननु तस्य कर्तव्यत्वेऽपि कथं कर्मतत्साधनत्यागसिद्धिरत आह—आत्मा चेति । विपक्षे दोषमाह—अत इति । साधनफलान्तर्भूतत्वेनाऽऽत्मनो ज्ञानमविधेयमित्यत्र प्रमाणमाह—अन्योऽसावित्यादिना । क्रियाकारकफलविलक्षणस्याऽऽत्मनो ज्ञानं कर्तव्यं, तत्साधनतयोक्ताध्यसाधनत्यागः सिध्यतीयुक्तं संप्रत्यविद्याविषयत्वाच्च साध्यसाधनयोरविद्यावतां त्याज्यतेत्याह—क्रियेति । तस्याविद्याविषयत्वे श्रुतीरुदाहरति—यत्रेति ।

न च विद्याविद्ये एकस्य पुरुषस्य सह भवतां विरोधात्तमःप्रका-

---

१ ङ छ. इत्यादिश्रु° । २ घ. ज. °याकारकं फ° । ३ ख. घ. ज. झ. °नं वाऽश° । ४ ण प्रौढिवा° । ५ ब. ण. द्वामात्म° । ६ घ. ण. °परतेभ्य° । ७ घ. °ते किमायातं । ८ ङ. तत्राऽऽह ।

शाविव[1] तस्मादात्मविदोऽविद्याविषयाऽधिकारो न द्रष्टव्यः क्रियाकारकफलभेदरूपः । "मृत्योः स मृत्युमाप्नोति" इत्यादि निन्दितत्वात् । सर्वक्रियासाधनफलानां चाविद्याविषयाणां तद्विपरीतात्मविद्यया हातव्यत्वेनेष्टत्वात् । यज्ञोपवीतादिसाधनानां च तद्विषयत्वात् । तस्मादसाधनफलस्वभावादात्मनोऽन्यविषया विलक्षणैषणा । उभे ह्येता साधनफले एषणे एव भवतः । यज्ञोपवीतादेस्तत्साध्यकर्मणां च साधनत्वात् । उभे ह्येते एषणे एवेति हेतुवचनमवधारणार्थम् । यज्ञोपवीतादिसाधनात्तत्साध्यभ्यश्च कर्मभ्योऽविद्याविषयत्वादेषणारूपत्वाच्च अजहासितव्यरूपत्वाच्च व्युत्थानं विधिरिसतमेव ।

अविद्याविषयत्वेऽपि साधनादि विद्यावत एव विधीयते विद्याक्रिययोः स्वरूपादिषु साहित्योपलम्भादित्याशङ्क्याऽऽह—न चेति । विद्याविद्ययोः साहित्यासंभवे फलितमाह—तस्मादिति । इतश्च प्रयोजकज्ञानवता साध्यसाधनभेदो न द्रष्टव्यो विवक्षिततत्त्वसाक्षात्कारविरोधित्वादित्याह—सर्वेति । भवत्वविद्याविषयाणां विद्यावैतत्स्यागस्तथाऽपि कुतो यज्ञोपवीतादीनां त्यागस्तत्राऽऽह—यज्ञोपवीतादेरिति । तद्विषयत्वादित्यत्र तच्छब्दोऽविद्याविषयः । एषणात्वाच्च यज्ञोपवीतादीनां त्याज्यतेत्याह—तस्मादिति । ज्ञेयत्वेन प्रस्तुतादिति यावत् । साध्यसाधनविषया तदात्मिकैषणा त्याज्येत्यत्र हेतुमाह—विलक्षणेति । पुरुषार्थरूपाद्विपरीता सा हेयेत्यर्थः । साध्यसाधनयोरेषणात्वं साधयति—उभे ह्रीति । तथाऽपि यज्ञोपवीतादीनां कर्मणां च कथमेषणात्वमित्याशङ्क्य कथं साधनान्तर्भावादित्याह—यज्ञोपवीतादेरिति । तयोरेषणात्वं कथं प्रतिज्ञामात्रेण सेत्स्यतीत्याशङ्क्याऽऽह—उभे ह्रीति । तयोरेषणात्वे सिद्धे फलितमाह—यज्ञोपवीतादीति ।

ननूपनिषद आत्मज्ञानपरत्वाद्व्युत्थानश्रुतिस्तत्स्तुत्यर्था न विधिः । न विधित्सितविज्ञानेन समानकर्तृकत्वश्रवणात् । नह्यकर्तव्येन कर्तव्यस्य समानकर्तृकत्वेन वेदे कदाचिदपि श्रवणं संभवति । कर्तव्यानामेव ह्यभिषवहोमभक्षाणां यथा श्रवणमभिषुत्य हुत्वा भक्षयन्तीति तद्वदात्मज्ञानैषणाव्युत्थानभिक्षाचर्याणां कर्तव्यानामेव समानकर्तृकत्वश्रवणं भवेत् ।

आत्मज्ञानविधिरेव संन्यासविधिरित्युक्तत्वाद्व्युत्थायेत्यस्य नास्ति विधित्व-

---

१ ग. °विदामवि° । २ ग. च. छ. ढ. °तस्वरू° । घ. ज झ. °तरू° । ३ क ण. °वता त्याग° । ४ ण. °षयतया । ५ ग. °ज्ञानस° । ६ ख. घ. ङ. ज. ढ. °भक्षणानां य° ।

मिति शङ्कते—नन्विति । व्युत्थाय विदित्वेति पाठक्रमप्राप्तिक्रम्य व्याख्याने अर्थस्येवायं विधिर्वादश्चेति विधिरिति पारिशेष्यात्—न विधिरित्युक्तमिति । पाठक्रमेऽपि प्रयोजकज्ञानवतो विरक्तस्य प्राप्तत्वायं विधिरारण्याश्रमेत्याऽऽह—नहीति । उक्तमेवाभ्यनुज्ञानोदाहरणद्वारा विवृणोति—कृतव्यानामिति । आभिमुख्य लोपस्य कण्ठ्यं कृत्वा रत्नवादाद्येत्यर्थः ।

अविद्याविषयत्वादेषणात्वाच्चायंग्रामं आत्मज्ञानविधेरेव यज्ञोपवीतादिपरित्यागो न तु विधातस्य ज्ञानस्य चेत्र । सुतरामात्मज्ञानविधानेन विहितस्य समानकर्तृकत्वश्रवणेन दार्ढ्योपपत्तिस्तथा भिक्षाचर्यस्य च । यत्पुनरुक्तं वर्तमानापदेशादयमवादमाश्रमीति । तन्न । आदुम्बरयूपादावविद्यमानत्वाद्दोषः ।

पाठक्रमपक्षमाऽऽश्रित्य शङ्कते—अविद्येति । प्रयोजकज्ञानवतो विरक्तस्याऽऽत्मज्ञानविधिप्राप्तत्वेऽप्यस्य यज्ञोपवीतादित्यागस्य कर्तव्यात्मज्ञानेन समानकर्तृकत्व श्रवणाद्विशेषेणाऽऽरण्यकत्वानाद्दारिण्यमाह—न सुतरामिति । ज्ञाने दार्ढ्यं स्यात् भिक्षाचर्येऽप्यविरुद्धमित्—तथेति । भिक्षाचर्यस्य चाऽऽत्मज्ञानसाधनकर्मवतस्तथैव दार्ढ्योपपत्तिरिति संबन्धः । व्युत्थानादिवाक्यस्थाणवादेरकर्मत्वं दूषयति—यत्पुनरित्यादिना । आदुम्बरो यूपो भवतीत्यादौ तदुपयोगि विधिस्वीकारवदत्रापि यज्ञोपवीतत्याग विधिस्वीकारेणार्थवादत्वशङ्कायोगः ।

व्युत्थाय भिक्षाचर्यं परमात्मज्ञानेन पारिव्राज्यं विधीयत । पारिव्राज्याश्रमे च यज्ञोपवीतादिसाधनानि विहितानि लिङ्गं च प्राप्तमपि तत्रैव विधिरभिश्च । अतस्तद्जन्यत्वाऽन्यस्माद्व्युत्थानमेषणात्वऽपाति चेत् । न । भिक्षाचर्यसमानकर्तृकात्पारिव्राज्यादेषणाव्युत्थानलक्षणात्पारिव्राज्यान्तरापपत्तेः । यद्धि तदेषणाभ्यां व्युत्थानलक्षणं पारिव्राज्यं तदात्मज्ञानाङ्गम् । आत्मज्ञानावरोधिएषणापरित्यागरूपत्वात् । अविद्याविषयत्वाच्चैषणायाः । तद्व्यतिरेकेण चास्याश्रमरूपं पारिव्राज्यं ब्रह्मलोकादिफलप्राप्तिसाधनं यद्वैदर्यं यज्ञोपवीतादिसाधनविधानं लिङ्गविधानं च ।

संप्रति प्रकृते वाक्ये पारिव्राज्यविधिवत्कीर्त्य व्युत्थयः शङ्कते—व्युत्थायेति । का तर्हि विधातपपत्तिस्तत्राऽऽह—पारिव्राज्येति । लिङ्गं त्रिदण्डत्वादि ।

---

१ ण °वत्वयं विधि° । २ क च. °त्र एवाऽऽत्म° । ३ ग. घ. झ. ढ. °विधिर° । ४ क. च क ज झ. °त्र्योत्पात्त° । ५ क ख. ग. घ. च. छ. ज. झ. ढ. °स्य । य° । ग. °ति तस्याद्° । क° °ति । ओं° । ७ क° छ° ज° न । उद्° । ८ घ. °त्र्योत्पत्ति° ।

[1]पुराणे यज्ञोपवीते विसृज्य नवमुपादायाऽऽश्रमं प्रविशेत्' 'विदण्डी कमण्डलुमान्' इत्याद्याः श्रुतयः स्मृतयश्च । एषणात्वाद्यज्ञोपवीतादीनामपि त्याज्यत्वं युक्तमित्याशङ्क्य श्रुतिस्मृतिवशाद्व्युत्थाने संकोचमभिप्रेत्याऽऽह—अत इति । उदाहृतश्रुतिस्मृतीनां विषयान्तरं दर्शयन्नुत्तरमाह—नेत्यादिना । तदेव विवृणोति—यद्धीत्यादिना । तस्याऽऽत्मज्ञानाङ्गत्वे हेतुमाह—आत्मज्ञानार्थीति । एषणायास्तु हिरण्यित्वमेव कुतः सिद्धं तत्राऽऽह—आवद्यातेति । तर्हि यथोक्तानां श्रुतिस्मृतीनां किमालम्बनं तदाह—तद्व्यतिरिक्तेति । आश्रमत्वेन रूप्यते वस्तुतस्तु नाऽऽश्रमस्य भावः इति यावत् । तस्याऽऽत्मज्ञानाङ्गत्वं वारयति—ब्रह्मेति ।

न चैषणारूपसाधनोपादानस्याऽऽश्रमधर्ममात्रेण पारिव्राज्यान्तरविषय संभवति सति सर्वोपनिषद्विहितस्याऽऽत्मज्ञानस्य बाधनं युक्तम् । ब्रह्मापर्वतायविद्याविषयैषणारूपसाधनोपादित्सायां चावश्यमसाधनफलरूपस्याज्ञानायादेर्मा भूदवर्जितत्वाद्दं ब्रह्मास्मीति विज्ञानं बाध्यत इति । न च तद्बाधनं युक्तम् । सर्वोपनिषदां तदर्थपरत्वात् ।

अथ व्युत्थानवाक्योक्तमुख्यपारिव्राज्यविषयत्वमेव लिङ्गादिविधानस्य किं न स्यात्तत्राऽऽह—न चेति । एषणारूपाणि साधनानि ब्रह्मापर्वतायादीनि तेषामुपादानमनुष्ठानं तस्याऽऽश्रमधर्ममात्रेणोक्तस्य यथोक्त संन्यासाभासे विषये सति प्रधानबाधेन मुख्यपारिव्राज्यविषयत्वयकल्पितमित्यर्थः । कथं पुनर्मुख्यपारिव्राज्यविषयत्वे यज्ञोपवीतादेरिष्टे प्रधानबाधनं तदाह—यज्ञोपवीतादाविति । साध्यसाधनयोरासङ्गे तद्विलक्षणस्याऽऽत्मनो ज्ञानं बाध्यते वेत्का नो हानिरित्याशङ्क्याऽऽह—न चेति ।

भिक्षाचर्यं चरन्ती त्यषणां ग्राहयन्ती श्रुतिः स्वयमेव बाधत इति चेत् । अथाप्येषणाभ्यो व्युत्थान विधाय पुनरेषणैकदेशं भिक्षाचर्यं ग्राहयन्ती तत्संबन्धमन्यदपि ग्राहयतीति चेत् । न । भिक्षाचर्यस्याप्रयोजकत्वाद्भक्षवोत्तरकालभक्षणवत् । शेषप्रतिपत्तिकर्मत्वादंप्रयोजकं हि तत् । असंस्कारकत्वाच्च । भक्षणं पुरुषसंस्कारकमपि स्याद्न तु भिक्षाचर्यम् । नियमादृष्टस्यापि ब्रह्मविदोऽनिष्टत्वात् ।

भिक्षाचर्यं तावद्विहितं विहितानुष्ठानं च यज्ञोपवीतादि विना न संभवतीति श्रुत्यैवाऽऽत्मज्ञानं यज्ञोपवीतादिविरोधि बाधितमिति शङ्कते—भिक्षाचर्यमिति ।

---

१ क. ख. ञ. ढ. °न निरू° । २ क. ख. ग. च. छ. ज. ढ. °त्रे पा° । ३ क. ङ. च. ढ. °न्तरवि° । ४ घ. ञ. °धे मु° । ५ क, ग. °थाऽपि स्याद्वेष° । ६ ख. °दृष्यत्र° । ७ क. घ. ज. ढ. °स्करार्थम° ।

शङ्कत एव विवृणोति–अथापीत्यादिना । यथा हुतशेषस्य भक्षणं विहितमपि न द्रव्यक्षेपकं परिशिष्टद्रव्योपादानेन प्रवृत्तेस्तथा सर्वस्वत्यागे विहिते परिशिष्टभिक्षोपादानेन विहितमपि भिक्षाचरणमुपवीतादिद्रव्यक्षेपकमित्युत्तरमाह–नेत्यादिना । दृष्टान्तमेव स्पष्टयति–शेषेति । तद्भक्षणमिति संबन्धः । अप्रयोजकं द्रव्यविशेषस्यानाक्षेपकमिति यावत् । यद्वा दार्ष्टान्तिकमेव स्फुटयति–शेषेति । सर्वस्वत्यागे विहिते शेषस्य कालस्य शरीरपातान्तस्य पातपात्तिकर्ममात्रं भिक्षाचर्यमतो न तदुपवीतादिद्रव्यापेक्षकमित्यर्थः । किंच भिक्षाचर्यस्य शरीरास्थित्यैवाऽऽक्षिप्तत्वान्न तत्रापि विधिर्दूरे तदशादुपवीतादिसिद्धिरित्याह––असंभारकत्वाच्चेति । तदेव स्फुटयति–भक्षणमिति । 'एककालं चरेद्भैक्षम्' इत्यादिनियमवशादृष्टं सिध्युपवीतादिकमप्याक्षिपतीति चेन्नेत्याह––नियमेति । विविदिषासंन्यासेऽपि नोपवीताद्याक्षेपकं ज्ञानोत्पादकश्रवणाद्युपयोगिदेहस्थित्यर्थत्वेनैव चरितार्थत्वादिति भावः ।

नियमादृष्टस्यानिष्टत्वे किं भिक्षाचर्येणेति चेत् । न । अन्यसाधनाद्व्युत्थानस्य विहितत्वात् । तथाऽपि किं तनाति चेत् । यदि स्याद्वाढमभ्युपगम्यते हि तत् । यानि पारिव्राज्येऽभिहितानि वचनानि यज्ञोपवीत्येवार्धायीतेत्यादीनि तान्यविद्वत्पारिव्राज्यमाविषयाणीति परिहृतानि । इतरथाऽऽत्मज्ञानबाधः स्यादिति युक्तम् ।

" निराशिषमनारम्भं निर्नमस्कारमस्तुतिम् ।
अक्षीणं क्षीणकर्माणं तं देवा ब्राह्मण विदुः ॥ "

इति सर्वकर्माभावं दर्शयति स्मृतिर्विदुषः । विद्वाल्लिङ्गवर्जितस्तस्यादलिङ्गो धर्मज्ञ इति च । तस्मात्परमहंसपारिव्राज्यमेव व्युत्थानलक्षणं प्रतिपद्येताऽऽत्मवित्सर्वकर्मसाधनपरित्यागरूपमिति ।

तर्हि यथाकथंचिदुपनतेनान्नेन शरीरस्थितिसंभवाद्भिक्षाचर्यं चरन्तीति वाक्यं व्यर्थमिति शङ्कते–नियमादृष्टस्येति । भिक्षाचर्यानुवादेन प्रतिग्रहादिनिवृत्त्यर्थत्वाद्वाक्यस्य नाऽऽनर्थक्यमित्युत्तरमाह–नान्येति । निवृत्त्युपदेशेन वाक्यस्यार्थवत्त्वेऽपि तदुपदेशस्य नार्थवत्त्वं कूटस्थात्मज्ञानेनैव सर्वनिवृत्तेः सिद्धेरिति शङ्कते–तथाऽपीति । यदि निष्क्रियात्मज्ञानादशेषनिवृत्तिः स्यात्तर्हि तदस्माभिरपि स्वीक्रियते तत्यमित्यङ्गी करोति–यदीति । यदि तु क्षुदादिदोषबाल्यादात्मानं

---

१ ख. ढ. विवृणोति । २ ञ. ढ. ण. °व्यापेक्षकं । ३ ञ. ण. नापेक्षक° । ४ घ. ढ. ण. °र्यस्य त्या° । ५ ढ. ण. स्फुटयति । ६ क. ग. घ. ढ. °द्भैक्ष्यम् । ७ घ. ज. ण. °वीस्तु तदि° । ८ ण. °वृत्त्याऽपि तदुपदेशस्य सार्थ° । ९ ख. घ. ज. ढ. ण. क्षुधादि° ।

निष्क्रियमपि विस्मृत्य प्रार्थनादिपरो भवति तदा निवृत्त्युपदेशोऽपि भवत्यर्थवानिति भावः । प्रागुक्तवाक्यविरोधान्निवृत्युपदेशोऽशक्य इति चेत्तत्राऽऽह—यानीति । मुख्यपरिव्राड्विषयत्वे दोषं स्मारयति—इतरथेति । निवृत्त्युपदेशानुग्राहकत्वेन स्मृतीरुदाहरति—निराशिषमित्यादिना । अमुख्यसंन्यासिविषयत्वात्तंभवान्मुख्यपरिव्राड्विषयं व्युत्थानवाक्यमित्युपसंहरति—तस्मादिति । इतिशब्दो व्युत्थानवाक्यव्याख्यानसमाप्त्यर्थः ।

यस्मात्पूर्वे ब्राह्मणा एतमात्मानमसाधनफलस्वभावं विदित्वा सर्वस्मात्साधनफलस्वरूपादेषणालक्षणाद्व्युत्थाय भिक्षाचर्यं चरन्ति स्म । दृष्टादृष्टार्थं कर्म तत्साधनं च हित्वा । तस्मादद्यत्वेऽपि ब्राह्मणो ब्रह्मवित्पाण्डित्यं पण्डितभावमेतदात्मविज्ञानं पाण्डित्यं निर्विद्य निःशेषं विदित्वाऽऽत्मविज्ञानं निरवशेषं कृत्वेत्यर्थः । आचार्यत आगमतश्चैषणाभ्यो व्युत्थाय । एषणाव्युत्थानावसानमेव हि तत्पाण्डित्यम् । एषणातिरस्कारोद्भवत्वादेषणाविरुद्धत्वात् । एषणातिरस्कृत्य नह्यात्मविषयस्य पाण्डित्यस्योद्भव इत्यात्मज्ञानेनैव विहितमेषणाव्युत्थानम् । आत्मज्ञानसमानकर्तृकत्वाप्रत्ययोपादान लिङ्गश्रुत्या दृढीकृतम् ।

तस्मादित्यादिवाक्यमवतार्य व्याचष्टे—यस्मादिति । आदिना । उक्तमेव व्युत्थानं स्पष्टयति—दृष्टेति । विवेकवैराग्याभ्यामेषणाभ्यो व्युत्थाय श्रुत्याचार्याभ्यां कर्तव्यं ज्ञानं निःशेषं कृत्वा बाल्येन तिष्ठासेदिति व्यवहितेन संबन्धः । पाण्डित्यं निर्विद्येत्यनेनैव व्युत्थानं विहितमित्याह—एषणेति । तद्धि पाण्डित्यमेषणाभ्यो व्युत्थानस्यावसाने संभवति तदत्र व्युत्थानविधिरित्यर्थः । तदेव स्फुटयति—एषणेत्यादिना । तासां तिरस्कारेण पाण्डित्यमुद्भवति तस्यैषणाभ्यो विरुद्धत्वात्तथा च पाण्डित्यं निर्विद्येत्यत्र ताभ्यो व्युत्थानविधानमुचितमित्यर्थः । विनाऽपि व्युत्थानं पाण्डित्यमुद्भविष्यतीति चेन्नेत्याह—नहीति । पाण्डित्यं निर्विद्येत्यत्र ताभ्यो व्युत्थानविधानमुचितमित्यर्थः । विनाऽपि व्युत्थानं पाण्डित्यमुद्भविष्यतीति चेन्नेत्याह—नहीति । पाण्डित्यं निर्विद्येत्यत्र व्युत्थानविधिमुक्तमुपसंहरति—इत्यात्मज्ञानेनेति । तर्हि किमिति विदित्वा व्युत्थायेत्यत्र व्युत्थाने विधिरभ्युपगतस्तत्राऽऽह—आत्मज्ञानेनेति । तेन व्युत्थानस्य समानकर्तृकत्वे कृत्वाप्रत्ययस्योपादानेनैव लिङ्गभूता श्रुतिस्तया दृढीकृतं नियमेन प्रापितं व्युत्थानमित्यर्थः ।

तस्मादेषणाभ्यो व्युत्थाय ज्ञानबलभावेन बाल्येन तिष्ठासेत्स्थातुमिच्छेत् । साधनफलाश्रयणं हि बलमितरेषामनात्मविदाम् । तद्मूलं

१ घ. ण. °यत्व उक्तं दो° । २ ख. ग. घ. ङ. च. छ. ज. झ. ट. °पि ब्रह्मविद्ब्राह्मणः पाण्डि° । ३ क. ग. ङ ज. °न्यं तन्निर्वि° । ४ ग. घ. च. ढ. °त्मज्ञा° ।

हित्वा विद्वानसाधनफलस्वरूपात्मविज्ञानमेव बलं तद्भावमेव केवल-माश्रयेत् । तदाश्रयणे हि करणान्येषणाविषय एनं हृत्वा स्वापयितुं नोत्सहन्ते । ज्ञानबलहीनं हि मूढं दृष्टादृष्टविषयायामेषणायामेवैनं करणानि नियोजयन्ति । बलं नामाऽऽत्मविद्ययाऽशेषविषयदृष्टितिरस्करणम् । अतस्तद्भावेन बाल्येन तिष्ठासेत् । तथा " आत्मना विन्दते वीर्यम् " इति श्रुत्यन्तरात । " नायमात्मा बलहीनेन लभ्यः " इति च ।

बाल्येनेत्यादि वाक्यमुत्थाप्य व्याकरोति—तस्मादिति । विवेकादिवशादे-षणाभ्यो व्युत्थाय पाण्डित्यं संपाद्य परमात्मैकत्वज्ञानबलभावेन स्थातु-मिच्छादिति योजना । केवं ज्ञानबलभावेन स्थातुमिच्छेदित्याकाङ्क्ष्य तां व्युत्पादयति—साधनेत्यादिना । विद्वानिति विशेषणोक्तिः । यथोक्तबलभावावष्टम्भे करणाना विषयपारवश्यनिवृत्ता पुरुषस्यापि तत्पारवश्यानिवृत्तिः फलतीत्याह—तदाश्रयणे हीति । उक्तमेवार्थं व्यतिरेकमुखेन (५) विवृणोति—ज्ञानबलेति । नन्वधीत-ज्ञानस्य बलं कीदृशं न ज्ञायते तदाऽऽह—बलं नामेति । बाल्यवाक्यार्थमुप-संहरति—अत इति । यथा ज्ञानबलेन विषयानुपरक्ता दृष्टिस्तिरस्क्रियते तथेत्य-र्थावत् । आत्मना वाऽविज्ञातविशेषेणेत्यर्थः । वीर्यं विषयदृष्टितिरस्करणसामर्थ्य-मित्येतत् । बलहीनेन विषयदृष्टितिरस्करणसामर्थ्यरहितेनायमात्मा न लभ्यो न शक्यः साक्षात्कर्तुमित्यर्थः ।

बाल्यं च पाण्डित्यं च निर्विद्य निःशेषं कृत्वाऽथ मननान्मुनि-र्योगी भवति । एतावद्धि ब्राह्मणेन कर्तव्यं यदुत सर्वानात्मप्रत्ययाति-रस्करणमेतत्कृत्वा कृतकृत्यो योगी भवति । अमौनं चाऽऽत्मज्ञाना-नात्मप्रत्ययातिरस्करणस्य पर्यवसानं फलं तच्च निर्विद्याथ ब्राह्मण कृतकृत्यो भवति । ब्रह्मैव सर्वमिति प्रत्यय उपजायते । स ब्राह्मणः कृतकृत्योऽतो ब्राह्मणः ।

बाल्यं चेत्यादि वाक्यमादाय व्याचष्टे—बाल्यं चेति । पूर्वोक्तयोरुत्तरस्य हेतुत्वद्योतनार्थोऽथशब्दः । तदेवोपपादयति—एतावद्धीति । वाक्यान्तरमुत्थाप्य व्याकरोति—अथौनं चेत्यादिना । मौनामौनयोर्ब्राह्मण्यं प्रति साधनत्वद्योत-नेऽथशब्दः । ब्राह्मण्यमुपपादयति—ब्रह्मैवेति । आचार्यपरिचर्यापूर्वकं वेदा-न्तानां तात्पर्यावधारणं पाण्डित्यम् । युक्तितोऽनात्मदृष्टितिरस्कारो बाल्यम् ।

---

१ ख. ग. ङ. च. छ. ढ. °णे नहि । २ क. ख. च. ढ. °यितुमुत्स° । ३ ध. च. ज. ट. °या सर्वान्यवि° । ४ ख. ञ. ढ. ण. °ह । नहीं° । ५ क. ख. ग. घ. च. छ. ज. झ. °रस्कार एत° । ६ च. ढ. °गी च भ° । ७ च. ट. °रस्कारस्य । ८ ग. छ. ज. झ. आत्मौव । ९ ट. आत्मैवेति ।

'अहमात्मा परं ब्रह्म न मत्तोऽन्यदस्ति किंचन' इति मनसैवानुसंधानं मौनम् । महावाक्यार्थावगतिर्ब्राह्मण्यमिति विभागः ।

निरुपचरितं हि तदा तस्य ब्राह्मण्यं प्रतिपत्त आह—स ब्राह्मणः केन स्यात्केन चरणेन भवेद्येन स्याद्येन चरणेन भवतीदृश एवाभवत् । येन केनचिच्चरणेन स्यात्तेनेदृश एवाकृत्स्नलक्षण एव ब्राह्मणो भवति । येन केनचिच्चरणेनेति स्तुत्यर्थं यद्यं ब्राह्मण्यावस्था सेयं स्तूयते न तु चरणेऽनादरः । अत एतस्माद्ब्राह्मण्यावस्थानादूर्ध्वं यावतीतात्मस्वरूपाधिगत्यन्तादन्यविद्याविषयभूतलक्षणं वस्त्वन्तरजातं तावदशेषमिदं [1]तदेवं यावन्मर्त्यदुःखजातं तावदशेषमिदं तदेवं यावत्संसारं केवल नित्यं कूटस्थमित्यर्थः । तदा हि कहोलः कौषीतकेय उदरस्थ इति ॥ १ ॥

इति बृहदारण्यकोपनिषद्भाष्यटीकायां तृतीयाध्यायस्य
पञ्चमं ब्राह्मणम् ॥ ५ ॥

---

[2]अथ [3]षष्ठं ब्राह्मण्यमिति पतनाय्यह—निरुपचरितमिति । ब्रह्मविदः स्वरूपं पृच्छति—स इति । अनेन तस्य चरणमित्युत्तरमाह—येनेति । उक्तलक्षणं कृतकृत्यत्वम् । अकृत्स्नमित्यत्र परमनिष्ठेतो ब्रह्मविदो यथेष्टचेष्टाऽभीष्टा स्यात्तथा च 'यद्यदाचरति श्रेष्ठः' इति स्मृतेरितरेषामप्याचारेऽनादरः स्यादित्याशङ्क्याऽऽह—येन केनचिदिति । विहितमाचरतो निषिद्धं च त्यजतः शुद्धबुद्धेः श्रुताद्वाक्यात्सम्यगुत्पद्यते तस्य च बाधनायोगाद्ध्रुवास्थितिरेव चेष्टा नान्यास्थितेति न यथेष्टाचरणप्रयुक्तो दोष इत्यर्थः । अतोऽन्यदित्यादि व्याकरोति अत इति । यावत्येत्यादि बहुदृष्टान्तोपादानं द्वादशविधस्य बहुरूपत्वख्यापनार्थम् । अतोऽन्यदिति कुतो विशेषणमित्याशङ्क्याऽऽह—आत्मैवेति ॥ १ ॥

इति बृहदारण्यकोपनिषद्भाष्यटीकायां तृतीयाध्यायस्य
पञ्चमं कहोलब्राह्मणम् ॥ ५ ॥

(अथ तृतीयाध्यायस्य षष्ठं ब्राह्मणम्)

---

१ घ. ज. ञ. एव । २ ख. ग. ङ. ण. च्छता ब्रूयं ।

अथ हैनं गार्गी वाचक्नवी पप्रच्छ याज्ञवल्क्येति होवाच यदिदꣳ सर्वमप्योतं च प्रोतं च कस्मिन्नु खल्वाप ओताश्च प्रोताश्चेति वायौ गार्गीति कस्मिन्नु खलु वायुरोताश्च प्रोताश्चेत्यन्तरिक्षलोकेषु गार्गीति कस्मिन्नु खल्वन्तरिक्षलोका ओताश्च प्रोताश्चेति गन्धर्वलोकेषु गार्गीति कस्मिन्नु खलु गन्धर्वलोका ओताश्च प्रोताश्चेत्यादित्यलोकेषु गार्गीति कस्मिन्नु खल्वादित्यलोका ओताश्च प्रोताश्चेति चन्द्रलोकेषु गार्गीति कस्मिन्नु खलु चन्द्रलोका ओताश्च प्रोताश्चेति नक्षत्रलोकेषु गार्गीति कस्मिन्नु खलु नक्षत्रलोका ओताश्च प्रोताश्चेति देवलोकेषु गार्गीति कस्मिन्नु खलु देवलोका ओताश्च प्रोताश्चेतीन्द्रलोकेषु गार्गीति कस्मिन्नु खल्विन्द्रलोका ओताश्च प्रोताश्चेति प्रजापतिलोकेषु गार्गीति कस्मिन्नु खलु प्रजापतिलोका ओताश्च प्रोताश्चेति ब्रह्मलोकेषु गार्गीति कस्मिन्नु खलु ब्रह्मलोका आताश्च प्रोताश्च ते स होवाच गार्गि माऽतिप्राक्षीर्मा ते मूर्धा व्यपप्तदनतिप्रश्न्यां वै देवतामतिपृच्छसि गार्गि माऽतिप्राक्षीरिति ततो ह गार्गी वाचक्नव्युपरराम ॥ ८ ॥

इति बृहदारण्यकोपनिषदि तृतीयाध्याये

षष्ठं ब्राह्मणम् ॥ ६ ॥

यत्साक्षादपरोक्षाद्ब्रह्म सर्वान्तर आत्मेत्युक्तं तस्य सर्वान्तरस्य स्वरूपाधिगमायाऽऽकृत्स्नब्राह्मणग्रन्थ आरभ्यते । पृथिव्यादीनि ह्याकाशान्तानि भूतान्यन्तर्बहिर्भावेन व्यवस्थितानि तेषां यद्ब्राह्मं बाह्यवस्त्वधिगम्याधिगम्य निराकुर्वन्द्रष्टुः साक्षात्सर्वान्तरोऽगौण आत्मा सर्व

---

१ च ढ. ज्ञ य आत्मा सर्वान्तर इयु । २ ख ङ. छ. ङ. यद्वा । ३ क. ज्ञ. °गम्य ।

संसारधर्मविनिर्मुक्तो दर्शयितव्य इत्यारम्भः। अथ हैनं गार्गी नामतो वाचक्नवी वचक्नोदुहिता पप्रच्छ याज्ञवल्क्येति होवाच यादिदं सर्वं पार्थिवं धातुजातमप्यूदक्क आत्तं च प्रोतं चातं दीर्घाटान्तवद्गार्ग यंक्कन्तुवद्विपरातं वा। अद्भिः सर्वतोऽन्तर्बहिर्भूताभिर्व्याप्तमित्यर्थः। अन्यथा मक्कगण्ठिवद्विशीर्येत। इदं तावदनमानमुपन्यस्तम्। यत्कार्यं परिच्छिन्नं स्थूलं कारणनापरिच्छिन्नेन सूक्ष्मेण व्याप्तमिति दृष्टम्। यथा पृथिव्याद्भिस्तथा पूर्वं पूर्वोत्तरेणोत्तरेण व्यापिना भवितव्यमित्येष आ सर्वान्तरादात्मनः प्रश्न थेः।

पूर्वब्राह्मणयोरात्मनः सर्वान्तरत्वमुक्तं तन्निर्णयार्थमुत्तरं ब्राह्मणत्रयमिति संगतिमाह—यस्माक्षादिति। उक्तमेव संबन्धं विवृणोति—पृथिव्यादीनीति। अन्तर्बहिर्भावेन सूक्ष्मस्थूलतारतम्यक्रमेणेत्यर्थः। बाह्यं बाह्यमिति वीप्सोपरिष्टात्तच्छब्दो द्रष्टव्यो यत्तदोर्नित्यसंबन्धात्। निरूकुर्वन्यथा मुमुक्षुः सर्वान्तरमात्मानं प्रतिपद्यते तथा स यथोक्तविशेषणो दर्शयितव्य इत्युत्तरग्रन्थारम्भ इति योजना। कहोलप्रश्ननिर्णयानन्तर्यमथशब्दार्थः। यत्पार्थिवं धातुजातं तदिदं सर्वमाप्नोत्यादि योजनीयम्। पदार्थमुक्त्वा वाक्यार्थमाह—अद्भिरिति। पार्थिवस्य धातुजातस्याद्भिर्व्याप्त्यभावे दोषमाह—अन्यथेति। किमत्र गार्ग्यावविक्षितमिति तदाह—इदं तावदिति। तदेव दर्शयितुं व्याप्तिमाह—यत्कार्यमिति। कारणेन व्यापकेनेति शेषः। यत्कार्यं तत्कारणेन व्याप्तं यत्परिच्छिन्नं तद्व्यापकेन व्याप्तं यच्च स्थूलं तत्सूक्ष्मेण व्याप्तमिति त्रिप्रकारा व्याप्तिः। इतिशब्दस्तत्समाप्त्यर्थः। व्याप्तिमूमिमाह—यथेति। संप्रत्यनुमानमाह—यथेति। पूर्वं पूर्वमित्यवादेर्धर्मिणो निर्देशः। उत्तरेणोत्तरेण वाय्वादिकारणनापरिच्छिन्नेन सूक्ष्मेण व्याप्तं कार्यत्वात्परिच्छिन्नत्वात्स्थूलत्वाच्च पृथिवीवदित्यर्थः। सर्वान्तरादात्मनोऽर्वागुक्तन्यायं सर्वत्र संचारयति—इत्येष इति।

तत्र भूतानि पञ्च संहतान्येवोत्तरोत्तरं सूक्ष्मभावेन व्यापकेन कारणरूपेण च व्यवतिष्ठन्ते। न च परमात्मनोऽवशिष्टद्व्यतिरेकेण वस्त्वन्तरमस्ति। "सत्यस्य सत्यम्" इति श्रुतेः। सत्यं च भूतपञ्चकं सत्यस्य सत्यं च परं आत्मा कस्मिन्नु खल्वाप ओताश्च प्रोताश्चेति। तासामपि कार्यत्वात्स्थूलत्वात्परिच्छिन्नत्वाच्च क्वचिद्व्यतिरेकेण

---

१ घ. ञ. ण. °दिक्ष्व का°। २ क. °त्तरात्त°। स. सोत्तरण सू°। ३ घ. ङ. च. ज. ट. °रमात्मा।

भवितव्यम्[1]। क तासामोतप्रोतभाव इत्येवमुत्तरोत्तरप्रश्नप्रसङ्गो योजयितव्यः। वायो गार्गीति। नन्वग्नावाति वक्तव्यम्। नैष दोषः। अग्नेः पार्थिवं वाऽऽप्यं वा धातमनाश्रित्येतरभूतवत्स्वातन्त्र्येणाऽऽत्मलाभो नास्तीति तस्मिन्नोतप्रोतभावो नोपदिश्यते।

ननु तथाऽपि भूतपञ्चकव्यतिरिक्तानां गन्धर्वलोकादीनामप्यान्तरत्वेनोपदेशात्कथं भूतपञ्चकव्युदासेन सर्वान्तरप्रतिपत्तिर्विवक्षितेति तत्राऽऽह—तत्रेति। उक्तनीत्या प्रश्नार्थे स्थिते सतीति यावत्। भूतात्मास्थितिनिर्धारणे वा सप्तमी। अथ परमात्मानं भूतानि च हित्वा पृथगेव गन्धर्वलोकादीनि वस्त्वन्तराणि भविष्यन्तीत्याह—न चेति। गन्धर्वलोकादीन्यपि भूतानामेवावस्थाविशेषास्ततः सत्यं भूतपञ्चकं तस्य सत्यं परं ब्रह्म नान्यदन्तराले प्रतिपत्तव्यमित्यन्यप्रतिषेधार्थौ च शब्दौ। तात्पर्यमुक्त्वा प्रश्नमुत्थाप्य तदक्षराणि व्याकरोति—कस्मिन्नित्यादिना। कस्मिन्नु खलु वायुरित्यादावुक्तन्यायमतिदिशति—एवमिति। यद्यप्यत्र प्रत्युक्तिरपामग्निकार्यत्वादग्नावाति वक्तव्यत्वादिति शङ्कते—नन्वग्नाविति। अग्नेरुदकव्यापकत्वेऽपि काष्ठाविशुद्धादाहारभूतत्वात्स्वतन्त्रेण केनचिद्रूपेण अप्तत्ववक्तव्यत्वाग्नेर्हित्वा तत्कारणं वायावेवोक्तं वायोश्च सत्कारणतन्त्रत्वेऽपि नदकव्यापकत्वात्तत्रैवोक्तमाकाशस्योत्तरमाह—नैष दोष इत्यादिना।

कस्मिन्नु खलु वायुरोतश्च प्रोतश्चेत्यन्तरिक्षलोकेषु गार्गीति। तान्येव भूतानि संहतान्यन्तरिक्षलोकास्तान्यपि गन्धर्वलोकेषु गन्धर्वलोका आदित्यलोकेष्वादित्यलोकाश्चन्द्रलोकेषु चन्द्रलोका नक्षत्रलोकेषु नक्षत्रलोका देवलोकेषु देवलोका इन्द्रलोकेषु इन्द्रलोका विराट्शरीरारम्भकेषु भूतेषु प्रजापतिलोकेषु प्रजापतिलोका ब्रह्मलोकेषु ब्रह्मलोका नामाण्डारम्भकाणि भूतानि। सर्वत्र हि सूक्ष्मतारतम्यक्रमेण प्राप्तुपभोगाश्रयाकारधारणेन तानि भूतानि संहतानि तान्येव पञ्चेति बहुवचनभाञ्जि। कस्मिन्नु खलु ब्रह्मलोका ओताश्च प्रोताश्चेति स होवाच याज्ञवल्क्यो हे गार्गि माऽतिप्राक्षीः स्वं प्रश्नं न्यायप्रकारमतीत्याऽऽगमनं प्रष्टव्यां देवतामनुमानेन मा प्राक्षीरित्यर्थः। पृच्छन्याश्च मा ते तव मूर्धा शिरा व्यपप्तद्विस्पष्टं पतेत्। देवतायाः स्वप्रश्न आगमविषयस्तं प्रश्नविषयमतिक्रान्तो गार्ग्याः प्रश्न आनुमानिकत्वात्स

---

१ ख. °म तत्र क। २ च. ढ. °त्तरत्र प्र°। ३ क. ख. ङ. छ. °त्तरं प्र°। ४ ग. °पद्यते। ५ ख ञ. ण. °क्तरोत्या। ६ ण. °मात्मभूतानन्तर्हितत्वात्पृथ°। ७ क. छ. व°। ८ ख. च. ढ. °क्षीः स्वप्र°। घ. ज. °क्षीः स्वयं प्र°। ९ च. ढ. °मेनैव प्र°।

यस्या देवतायाः प्रश्नः साऽतिप्रश्न्या नातिप्रश्न्याऽनतिप्रश्न्या स्वप्रश्न विषयैव केवलागमगम्येत्यर्थः । तामनतिप्रश्न्यां वै देवतामतिपृच्छसि । अतो गार्गि माऽतिप्राक्षीर्मर्तुं चेन्नेच्छसि ततो ह गार्गी वाचक्नव्युपरराम ॥ १ ॥

इति बृहदारण्यकोपनिषद्भाष्ये तृतीयाध्यायस्य षष्ठं ब्राह्मणम् ॥ ६ ॥

अन्तरिक्षलोकशब्दार्थमाह-तान्येवेति । प्रजापतिलोकशब्दार्थं कथयति-विराडिति । अन्तरिक्षलोकादीनां पञ्चकोशकल्पनाकर्तृत्वं बहुवक्तव्यमित्याशङ्क्याऽऽह सर्वत्र हीति पूर्ववदनुक्रमेण प्रश्नं पृच्छन्तीं गार्गीं प्रतिषेधति-स होवाचेत्यादिना उक्तमेव स्पष्टयन्नाक्षेपमाह-अतिप्रश्न्यामिति । प्रतिषेधाधिक्ये हेतुमाह-पृच्छन्त्याश्चेति । मूर्धपातभयात्प्रश्नं परतः परिहरति-देवताया इत्यादिना । १ ।

इति बृहदारण्यकोपनिषद्भाष्यटीकायां तृतीयाध्यायस्य षष्ठं गार्गिब्राह्मणम् ॥ ६ ।

(अथ तृतीयाध्यायस्य सप्तमं ब्राह्मणम्)।

अथ हैनमुद्दालक आरुणिः पप्रच्छ याज्ञवल्क्येति होवाच मद्रेष्ववसाम पतञ्चलस्य काप्यस्य गृहेषु यज्ञमधीयानास्तस्याऽऽसीद्भार्या गन्धर्वगृहीता तमपृच्छाम कोऽसीति सोऽब्रवीत्कबन्ध आथर्वण इति सोऽब्रवीत्पतञ्चलं काप्यं याज्ञिकाश्च वेत्थ नु त्वं काप्य तत्सूत्रं येनायं च लोकः परश्च लोकः सर्वाणि च भूतानि संदृब्धानि भवन्तीति सोऽब्रवीत्पतञ्चलं काप्यं याज्ञिकाश्च वेत्थ नु त्वं काप्य तमन्तर्यामिणं य इमं च लोकं परं च

---

१ झ. °मवेत्थेत्य° ।

लोकः सर्वाणि च भूतानि यात्मान्तरो यमयतीति सोऽब्रवीत्पतञ्चलः काप्यो नाहं तं भगवन्वेदेति सोऽब्रवीत्पतञ्चल काप्यं याज्ञिकाश्च यो वै तत्काप्य सूत्रं विद्यात्तं चान्तर्यामिणमिति स ब्रह्मविस्स लोकवित्स देववित्स वेदवित्स भूतवित्स आत्मवित्स सर्वविदिति तेभ्योऽब्रवीत्तदहं वेद तञ्चेत्त्वं याज्ञवल्क्य सूत्रमविद्वाꣳस्तं चान्तर्यामिणं ब्रह्मगवीरुदजने मूर्धा ते विपतिष्यतीति वेद वा अहं गौतम तत्सूत्रं तं चान्तर्यामिणमिति यो वा इदं कश्चिद्ब्रूयाद्वेद वेदेति यथा वेत्थ तथा ब्रूहीति ॥ १ ॥

इदानीं ब्रह्मलोकानन्तरतमं सूत्रं वक्तव्यमिति तदर्थं आरम्भः। तच्चाऽऽगमेनैव प्रष्टव्यमितीतिहासेनाऽऽगमोपन्यासः क्रियते—अथ हैनमुद्दालको नामतोऽरुणस्यापत्यमारुणिः पप्रच्छ याज्ञवल्क्येति होवाच। मद्रेषु देशेष्ववसामौषधिवन्तः पतञ्चलस्य पतञ्चलो नामतस्तस्यैव कपिगोत्रस्य काप्यस्य गृहेषु यज्ञमधीयाना यज्ञशास्त्राध्ययनं कुर्वाणाः। तस्याऽऽमाद्भार्या गन्धर्वगृहीता तमपृच्छाम कोऽसीति। सोऽब्रवीत्कबन्धो नामतोऽथर्वणोऽपत्यमाथर्वण इति।

पूर्वस्मिन्ब्राह्मणे सूत्रादर्वाक्तनं व्याकृतमिदानीं सूत्रं तदन्तर्गतमन्तर्यामिणं च निर्वक्तुमुत्तरब्राह्मणमिति[1] संगतिमाह—इदानीमिति। ब्राह्मणतात्पर्यमुक्त्वाऽऽख्यायिकातात्पर्यमाह—तच्चाऽऽगमेनैवेति। आचार्योपदेशोऽत्राऽऽगमशब्दार्थः। गार्ग्यो मूर्धपातभयादुपरतेरनन्तरमित्यथशब्दार्थः।

सोऽब्रवीद्गन्धर्वः पतञ्चलं काप्यं याज्ञिकांश्च तांच्छिष्यान्वेत्थ नु

---

१ ण. °क्तुमनन्तर ब्रा°। २ ख. ञ. °तर ब्रा°। ३ ण. °ति विभा मा°। ४ घ. ङ. छ. °ध्यानस्मान्वे। ख. ट °ध्यानस्मांश्च वेत्थ।

त्वं हे काप्य जानीये तत्सूत्रम्। किं तत्। येन सूत्रेणायं च लोक इदं च जन्म परश्च लोकः परं च प्रतिपत्तव्यं जन्म सर्वाणि च भूतानि ब्रह्मादिस्तम्बपर्यन्तानि संदृब्धानि संग्रथितानि सागैव सूत्रेण विष्टब्धानि भवन्ति येन तत्किं सूत्रं वेत्थ। सोऽब्रवीदेवं पृष्टः काप्यो नाहं तद्भगवन्वेदेति तत्सूत्रं नाहं जाने हे भगवन्निति संपूजयन्नाह। सोऽब्रवीत्पुनर्गन्धर्व उपाध्यायमस्मांश्च वेत्थ नु त्वं काप्य तमन्तर्यामिणमन्तर्यामीति विशेष्यते। य इमं च लोकं परं च लोकं सर्वाणि च भूतानि योऽन्तरोऽभ्यन्तरः संयमयति नियमयति दारुयन्त्रमिव भ्रामयति स्वं स्वमचितव्यापारं कारयतीति। सोऽब्रवीदेवमुक्तः पतञ्चलः[1] काप्यो नाहं तं जाने भगवन्निति संपूजयन्नाह।

सोऽब्रवीदिति प्रतीकोपादानं तस्य तात्पर्यमाह—सूत्रेति।

सोऽब्रवीत्पतञ्चलगन्धर्वः सूत्रतदन्तर्गतान्तर्यामिणोर्विज्ञानं स्तूयते। यः कश्चिद्वै तत्सूत्रं हे काप्य विद्याद्विजानीयात्तं चान्तर्यामिणं सूत्रान्तर्गतं तस्यैव सूत्रस्य नियन्तारं विद्याद्य इत्यवमुक्तेन प्रकारेण स हि ब्रह्मवित्तरमाविस्म लोकाश्च भरादीनन्तर्यामिणा नियम्यमानाँल्लोकान्वेत्ति स देवांश्चाग्न्यादीँल्लोकिना जानाति वेदाश्च सर्वमाणभूतान्वेत्ति भूतानि च ब्रह्मादीनि सूत्रेण ध्रियमाणानि तदन्तर्यामिणा नियम्यमानानि वेत्ति स आत्मानं च कर्तृत्वभोक्तृत्वविशिष्टं तेनैवान्तर्यामिणा नियम्यमानं वेत्ति सर्वं च जगत्तयाभूतं वेत्तीत्येवं स्तुते सूत्रान्तर्यामिविज्ञाने प्रलब्धः काप्योऽभिमुखीभूतो वयं च तेभ्यश्चास्मभ्यमभिमुखीभूतेभ्योऽब्रवीद्बन्धव सूत्रमन्तर्यामिणं च। तदहं सूत्रान्तर्यामिविज्ञानं वद गन्धर्वाद्बुध्यागमः मन्। तच्च याज्ञवल्क्य सूत्रं तं चान्तर्यामिणमविद्वांश्चेदब्रह्मवित्तन्वदि ब्रह्मगवीरुदजसे ब्रह्मविदा स्वभूता या उदजस उन्नयति तमन्यायेन तव मूर्धा शिरस्ते तव विरिष्टं पतिष्यति। एवमुक्तो याज्ञवल्क्य आह वेद जानाम्यहं हे गौतमेति गौत्रनस्तत्सूत्रं यदगन्धर्वेणोक्तवा यं चान्तर्यामिणं गन्धर्वाद्विदितवन्तो यूयं तं चान्तर्यामिणं वेदाहमित्येवमुक्ते प्रत्याह गौतमो यः कश्चित्प्राकृत इदं यत्त्वयोक्तं ब्रूयात्कथं वेद वेदेत्यात्मानं श्लाघयन्किं तेन गर्जितेन कार्येण दर्शय यथा वेत्थ तथा ब्रूहीति ॥ १ ॥

१ क. ख. ङ. ण. तत्पार्थना°। २ क. ख. ङ. सूत्रमिति।

इतिशब्दार्थमाह-एवमिति । येनायं चेत्यादिरुक्तः प्रकारः, स सर्वलोकांश्च वेत्तीति संबन्धः । विशेषणोक्तिपूर्वकं तानेव लोकाननुवदति-भूरादीनिति । स ब्रह्मविदित्यादिनोक्तं संक्षिपति-सर्वं चेति । तथाभूतं सूत्रेण विधृतमन्तर्यामिणा च नियम्यमानमिति यावत् । प्रस्तुतस्तुतेरभिप्रयोजनमाह-इत्येवमिति । भवत्येवं तव सूत्रादिज्ञानं मम किमायातमित्याशङ्क्य ऽऽह-तच्चेदिति । किं तेनेत्यत्र तस्ये-त्यध्याहारः । कार्येण दर्शये यक्तं विवृणोति-यथेति ॥ १ ॥

स होवाच वायुर्वै गौतम तत्सूत्रं वायुना वै गौतम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च भूतानि संदृब्धानि भवन्ति तस्माद्वै गौतम पुरुषं प्रेतमाहुर्व्यस्रंसिषतास्यांगानीति वायुना हि गौतम सूत्रेण संदृब्धानि भवन्तीत्येवमेवैतद्याज्ञवल्क्य यान्तर्यामिणं ब्रूहीति ॥ २ ॥

स होवाच याज्ञवल्क्यः । अक्षलोका यस्मिन्नोताश्च प्रोताश्च वर्तमाने काले यथा पृथिव्यादयः तत्सम्बन्धसम्बन्धं वक्तव्यमिति तदर्थं प्रश्नान्तरमुत्थापितमतस्तदर्थं गार्ग्यऽऽह-वायुर्वै गौतम तत्सूत्रं नान्यद्वायुरिति सूत्रमाकाशादिभूतात्मकं भूतादिना यदात्मकं सप्तदशविधं लिङ्गं कर्मवासनाज्ञानमयं प्राणिनां यत्तत्सप्तदशावयवात्मकं यस्य बाह्या भूताः सप्त सप्त मरुद्गणा समुद्रस्येवोर्मयस्तदेतद्वायव्यं तत्त्वं सूत्रमित्यभिधीयते । वायुना वै गौतम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च भूतानि संदृब्धानि भवन्ति संग्रथितानि भवन्तीति प्रसिद्धमेतत् । अस्ति च लोके प्रसिद्धः । कथं, यस्माद्वायुं सूत्रं वायुना विधृतं सर्वं तस्माद्वै गौतम पुरुषं प्रेतमाहुः कथयन्ति व्यस्रंसिषत विस्रस्तान्यस्य पुरुषस्याङ्गानीति । सूत्रापगमे हि मण्यादीनां प्रोतानामवस्रसनं दृष्टमेवं वायुसूत्रे तस्मिन्प्राणिवर्गप्रोतानि यस्यस्याङ्गानि स्युस्ततो युक्तमेतद्वाय्वपगमेऽवस्रंसनमङ्गानाम् । अतो वायुना हि गौतम सूत्रेण संदृब्धानि भवन्तीति निगमयति । एवमेवैतद्याज्ञवल्क्य सम्यगुक्तं सूत्रं तदन्तर्गतं त्विदानीं तस्यैव सूत्रस्य नियन्तारमन्तर्यामिणं ब्रूहीत्युक्त आह ॥ २ ॥

---

१ ख. ङ. °नमिति तन्नि° । २ ग. तमुदिश्यैवमा° ।

, याज्ञवल्क्योक्तेस्तात्पर्यमाह—ब्रह्मलोका इति । इत्यमीष्टमागमाविद्यामित्यध्याहृत्याऽऽद्यस्येतिशब्दस्य योजना । प्रश्नान्तरं गौतमस्य कथम् । वैशब्द्यार्थमाह—नान्यदिति सूक्ष्मत्वे दृष्टान्तमाह—आकाशवदिति । वायुमेव विशिनष्टि—यदात्मकमिति . पञ्च भूतानि दश च ज्ञानेन्द्रियाणि पञ्चवृत्तिः प्राणश्चतुर्विधमन्तःकरणमिति सप्तदशविधत्वम् । कर्मणां वासनानां चोत्तरसृष्टिहेतूनां प्राणिभिरर्जितानां प्रलयत्वादपेक्षितमेव । कर्मेत्याह—कर्मेति । तस्यैव सामान्यविशेषात्मना बहुरूपत्वमाह—यत्तदिति तस्यैव लोकपरीक्षकपतिदेवत्वमाह—य इति । तस्य सूत्रत्वं साध्यति—वायुनेति । प्रतिज्ञातेतत्सूत्रविद्यामिति शेषः । प्रसिद्धिमेव प्रश्नपूर्वकमनन्तरश्रुत्यवष्टम्भेन स्पष्टयति—कथमित्यादिना । एकमेव दृष्टान्तेन व्यनक्ति—सूत्रेत्यादिना । वायोः सूत्रत्वे सिद्धे फलितमाह—अत इति ॥ २ ॥

य. पृथिव्यां तिष्ठन्पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥ ३ ॥

यः पृथिव्यां तिष्ठ भवति सोऽन्तर्यामी सर्वः पृथिव्यां तिष्ठतीति सर्वत्र प्रसङ्गो मा भूदिति विशिनष्टि—पृथिव्या अन्तरोऽभ्यन्तरः । तत्रैतत्स्यात्पृथिवी देवतैवान्तर्यामीत्यत आह—यमन्तर्यामिणं पृथिवी देवताऽपि न वेद मद्व्यन्यः कश्चिद्वर्तत इति । यस्य पृथिवी शरीरं यस्य च पृथिव्येव शरीरं नान्यत्पृथिवीदेवताया यच्छरीरं तदेव शरीरं यस्य । शरीरग्रहणं चोपलक्षणार्थं करणं च पृथिव्यास्तस्य । स्वकर्मप्रयुक्तं हि कार्यं करणं च पृथिवीदेवतायाः । तदस्य स्वकर्माभावादन्तर्यामिणो नित्यमुक्तत्वात् । परार्थकर्तव्यतास्वभावत्वात्परस्य यत्कार्यं करणं च तदवास्य न स्वतस्तदाह—यस्य पृथिवी शरीरमिति । देवताकार्यकरणस्यश्वरसाक्षिमात्रसंनिध्येन हि नियमेन प्रवृत्तिनिवृत्ती स्याताम् । य ईदृगीश्वरो नारायणाख्यः पृथिवीं पृथिवीदेवतां यमयति नियमयति स्वव्यापारेऽन्तराऽभ्यन्तरस्तिष्ठन्नेष त आत्मा ते तव मम च सर्वभूतानां चेत्यपलक्षणार्थमेवमन्तर्यामी यस्त्वया पृष्टोऽमृतः सर्वसंसारधर्मवर्जित इत्येतत् ॥ ३ ॥

---

१ ण. ह्यस्येति° । २ ख. ङ. °कप्र° । ३ ख. ढ. °सिद्धित्व° । ४ ङ. °सर्व । क, च. छ. ज. झ. ढ. °स्तस्याः । ६ क. घ. च. ज. °दृश ईश्व° ।

नियन्तुरीश्वरस्य लौकिकनियन्तृत्वकार्यकरणवत्त्वमाशङ्क्याऽऽह—**यस्य चेति**। पृथिव्याः शरीरत्वमेव न तु शरीरवत्त्वमित्याशङ्क्याऽऽह—**पृथिवीति**। पृथिव्या यत्करणं तदेव तस्य करणं चेति योजना। कथं पृथिव्याः शरीरेन्द्रियवत्त्वं तदाह—**स्वकर्मेति**। अन्तर्यामिणोऽपि तथा किं न स्यात्तत्राऽऽह—**तदस्येति**। अस्यान्तर्यामिणस्तदेव कार्यं करणं च नान्यदित्यत्र हेतुमाह—**स्वकर्मेति**। तदेव हेत्वन्तरेण स्फोरयति—**परार्थेति**। यः पृथिवीमित्यादिवाक्यस्य तात्पर्यमाह—**देवतेति**। तत्र वाक्यमवतार्य व्याचष्टे—**य इहेति**। नियम्यपृथिवीदेवताकार्यकरणाभ्यामेव कार्यकरणवत्त्वमीदृशत्वम् ॥ ३ ॥

योऽप्सु तिष्ठन्नद्भ्योऽन्तरो यमापो न विदुर्यस्याऽऽपः शरीरं योऽपोऽन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥ ४ ॥

योऽग्नौ तिष्ठन्नग्नेरन्तरो यमग्निर्न वेद यस्याग्निः शरीरं योऽग्निमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥ ५ ॥

योऽन्तरिक्षे तिष्ठन्नन्तरिक्षादन्तरो यमन्तरिक्षं न वेद यस्यान्तरिक्षꣳ शरीरं योऽन्तरिक्षमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥ ६ ॥

यो वायौ तिष्ठन्वायोरन्तरो यं वायुर्न वेद यस्य वायुः शरीरं यो वायुमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥ ७ ॥

यो दिवि तिष्ठन्दिवोऽन्तरो यं द्यौर्न वेद यस्य द्यौः शरीरं यो दिवमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥ ८ ॥

य आदित्ये तिष्ठन्नादित्यादन्तरो यमादित्यो न

---

१ घ. यस्येति। २ ढ. °ण स्फुटय°। ३ ण. ञ. °क्यता°। ४ ख. ढ. व्याकरो। ५ घ. ञ. ण. °दृश इति।

वेद यस्याऽऽदित्यः शरीरं य आदित्यमन्तरो यम
यत्येष त आत्माऽन्तर्याम्यमृतः ॥ ९ ॥
यो दिक्षु तिष्ठन्दिग्भ्योऽन्तरो यं दिशो न विदुर्यस्य
दिशः शरीर यो दिशोऽन्तरो यमयत्येष त आत्माऽ-
न्तर्याम्यमृतः ॥ १० ॥

यश्चन्द्रतारके तिष्ठंश्चन्द्रतारकादन्तरो यं चन्द्रता-
रकं न वेद यस्य चन्द्रतारकꣳ शरीरं यश्चन्द्र-
तारकमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृत ॥ ११॥
य आकाशे तिष्ठन्नाकाशादन्तरो यमाकाशो न वेद
यस्याऽऽकाशः शरीरं य आकाशमन्तरो यमयत्येष
त आत्माऽन्तर्याम्यमृतः ॥ १२ ॥

यस्तमसि तिष्ठꣳस्तमसोऽन्तरो यं तमो न वेद यस्य
तमः शरीरं यस्तमोऽन्तरो यमयत्येष त आत्मऽन्त-
र्याम्यमृतः ॥ १३ ॥
यस्तेजसि तिष्ठꣳस्तेजसोऽन्तरो यं तेजो न वेद यस्य
तेजः शरीरं यस्तेजोऽन्तरो यमयत्येष त आत्माऽ-
न्तर्याम्यमृत इत्यधिदैवतमथाधिभूतम् ॥ १४ ॥

समानमन्यत् । योऽप्सु तिष्ठन्नद्भ्योऽन्तरो वायो दि॰ आदित्ये दिक्षु चन्द्रतारक आकाशे यस्तमस्यावरणात्मके बाह्ये तमसि तेजसि तद्वि परीते प्रकाशसामान्य इत्येवमधिदैवतमन्तर्यामिविषयं दर्शनं देवतासु । अथाधिभूतं भूतेषु ब्रह्मादिस्तम्बपर्यन्तेष्वन्तर्यामिदर्शनमधिभूतम् ॥ ४ ॥ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥

पृथिवीपर्याये दर्शितं न्यायं पर्यायान्तरेष्वतिदिशति—समानमिति ॥ ४ ॥ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥

यः सर्वेषु भूतेषु तिष्ठन्सर्वेभ्यो भूतेभ्योऽन्तरो यꣳ सर्वाणि भूतानि न विदुर्यस्य सर्वाणि भूतानि शरीरं यः सर्वाणि भूतान्यन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृत इत्यधिभूतमथाध्यात्मꣳ ॥ १५ ॥

यः प्राणे तिष्ठन्प्राणादन्तरो यं प्राणो न वेद यस्य प्राणः शरीरं यः प्राणमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥ १६ ॥

यो वाचि तिष्ठन्वाचोऽन्तरो यं वाङ्न वेद यस्य वाक्शरीरं यो वाचमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥ १७ ॥

यश्चक्षुषि तिꣳश्चक्षुषोऽन्तरो यं चक्षुर्न वेद यस्य चक्षुः शरीर यश्चक्षुरन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥ १८ ॥

यः श्रोत्रे तिष्ठꣳश्रोत्रादन्तरो यꣳ श्रोत्रं न वेद यस्य श्रोत्रꣳ शरीर यः श्रोत्रमन्तरो यमयत्येष आत्माऽन्तर्याम्यमृतः ॥ १९ ॥

यो मनसि तिष्ठन्मनसोऽन्तरो यं मनो न वेद यस्य मन शरीरं यो मनोऽन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥ २० ॥

यस्त्वचि तिष्ठꣳस्त्वचोऽन्तरो यं त्वङ्न वेद यस्य त्वक्शरीरं यस्त्वचमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥ २१ ॥

यो विज्ञाने तिष्ठन्विज्ञानादन्तरो यं विज्ञानं न

वेद यस्य विज्ञानꣳ शरीरं यो विज्ञानमन्तरो यम-
यत्येष त आत्माऽन्तर्यामृतः ॥ २२ ॥
यो रेतसि तिष्ठन्रेतसोऽन्तरो यꣳ रेतो न वेद यस्य
रेतः शरीरं यो रेतोऽन्तरो यमयत्येष त आत्माऽ-
न्तर्याम्यमृतोऽदृष्टो द्रष्टाऽश्रुतः श्रोताऽमतो मन्ता-
विज्ञातो विज्ञाता नान्योऽतोऽस्ति द्रष्टा नान्योऽ-
तोऽस्ति श्रोता नान्योऽतोऽस्ति मन्ता नान्योऽ-
तोऽस्ति विज्ञातैष त आत्माऽन्तर्याम्यमृतोऽतोऽन्य
दार्तं ततो होद्दालक आरुणिरुपरराम ॥ २३ ॥

इति बृहदारण्यकोपनिषदि तृतीयाध्यायस्य
सप्तमं ब्राह्मणम् ॥ ७ ॥

अथाध्यात्मं यः प्राणे प्रा[illegible]हित [illegible] वाचे चक्षुषि श्रोत्रे मनसि त्वचि विज्ञाने बुद्धौ र[illegible] [illegible] कस्मात्पुनः कारणात्पृथिव्यादिदेवता महाभागाः [illegible] यादिवदात्मनि तिष्ठन्तमात्मनो नियन्तारमन्तर्यामिणं न विदुरिति [illegible] आह अदृष्टो न दृष्टा न विषयीभूतश्चक्षुर्दर्शनस्य कस्यचित्स्वयं तु चक्षुषि संनिहितत्वाद्दृशिस्वरूप इति द्रष्टा । तथाऽश्रुतः श्रोत्रगोचरत्वमनापन्नः कस्यचित्स्वयं त्वलुप्तश्रवणशक्तिः सर्वश्रोत्रेषु संनिहितत्वाच्छ्रोता । तथाऽमतो मनःसंकल्पविषयतामनापन्नः । दृष्टश्रुते एव हि सर्वः संकल्पयत्यदृष्टत्वादश्रुतत्वादेवामतोऽलुप्तमननशक्तित्वात्सर्वमनःसु संनिहितत्वाच्च मन्ता । तथाऽविज्ञातो निश्चयगोचरतामनापन्नो रूपादिवत्सुखादिवद्वा स्वयं त्वलुप्तविज्ञानशक्तित्वात्तत्संनिधानाच्च विज्ञाता । तत्र यं पृथिवी न वेद यं सर्वाणि भूतानि न विदुरिति चान्ये नियन्तव्या विज्ञातारोऽन्यो

---

१ क. स. ग. घ. ङ. च. छ. ज. झ. ट. °यम° । २ ग. °त्वाच्चाम° । ३ क. स. च. छ. ट. °रम° ।

मियन्नाऽन्तर्यामीति प्राप्तं तदन्यत्वाशङ्कानिवृत्त्यर्थमुच्यत—नान्योऽतो नान्यः। अतोऽस्मादन्तर्यामिणो नान्योऽस्ति द्रष्टा तथा नान्योऽतोऽस्ति श्रोता नान्योऽतोऽस्ति मन्ता नान्योऽतोऽस्ति विज्ञाता। यस्मान्नरो नास्ति द्रष्टा श्रोता मन्ता विज्ञाता योऽदृष्टो द्रष्टाऽश्रुतः श्रोताऽमतो मन्ताऽविज्ञातो विज्ञाताऽमृतः सर्वसंसारधर्मवर्जितः सर्वसंसारिणां कर्मफलविभागकर्तेष त आत्माऽन्तर्याम्यमृतोऽस्मादीश्वरादात्मनोऽन्यदार्त ततो हाहालक आरुणिरुपरराम ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥

इति बृहदारण्यकोपनिषद्भाष्ये तृतीयाध्यायस्य
सप्तमं ब्राह्मणम् ॥ ॥

सर्वत्र प्राणादा तिष्ठन्नन्तर्यामी तवाऽऽत्मेति संबन्धः। वाक्यान्तरं प्रश्नपूर्वकमुत्थाप्य व्याचष्टे—कस्मादित्यादिना। यथा मनसि तथा बुद्धावपि सन्निधानाज्ज्ञातृत्वेन यावत्। तवेति पूर्वसंदर्भोक्तिः। अन्वयमुपलक्षयितुमतो नान्य इत्युक्तम्। पदार्थान्व्याकरोति—अत इति। अन्यो द्रष्टा नास्तीति संबन्धः। एष त इत्यादिवाक्यस्यार्थमाह—यस्मादित्यादिना ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥

इति बृहदारण्यकोपनिषद्भाष्यटीकायां तृतीयाध्यायस्य
सप्तममन्तर्यामिब्राह्मणम् ॥ ७ ॥

(अथ तृतीयाध्यायस्याष्टमं ब्राह्मणम्)।

अतः परमशनायादिविनिर्मुक्तं निरुपाधिकं साक्षादपरोक्षात्सर्वान्तरं ब्रह्म वक्तव्यमित्यत आरम्भः—

अथ ह वाचक्नव्युवाच ब्राह्मणा भगवन्तो हन्ताहमिमं द्वौ प्रश्नौ प्रक्ष्यामि तौ चेन्मे वक्ष्यति न जातु युष्माकमिमं कश्चिद्ब्रह्मायं जेतेति पृच्छ गार्गीति ॥ १ ॥

---

१ ह. °तोऽस्ति ना°। २ ग. च. ज. नास्ति। ३ क. घ. ढ. °न्योऽतोऽस्ति। ४ घ. °ज्ञाते°। ५ क. स. ञ. ण. °तोऽन्य°। ६ क. स. घ. ढ. °त्युक्तान्पदा°। ७ ञ. °रुष°। ८ च. ढ. पृच्छामि।

अथ ह वाचक्नव्युवाच पूर्वं याज्ञवल्क्येन निषिद्धा मूर्धपातभया-दुपरता सती पुनः प्रष्टुं ब्राह्मणानुज्ञां प्रार्थयते । हे ब्राह्मणा भगवन्तः पूजावन्तः शृणुत मम वचो हन्ताहमिमं याज्ञवल्क्यं पुनर्द्वौ प्रश्नौ प्रक्ष्यामि यद्यनुमतिर्भवतामस्ति । तौ प्रश्नौ चेद्यदि वक्ष्यति कथयिष्यति मे कथंचिन्न वै जातु कदाचिद्युष्माकं मध्य इमं याज्ञवल्क्यं कश्चिद्ब्रह्मोद्यं ब्रह्मवदनं प्रति जेता न वै कश्चिद्भवेदित्येवमुक्ता ब्राह्मणा अनुज्ञां प्रददुः पृच्छ गार्गीति ॥ १ ॥

पूर्वस्मिन्ब्राह्मणे सूत्रान्तर्यामिणौ प्रश्नप्रत्युक्तिभ्यां निर्धारितौ संप्रत्युत्तरब्राह्मणतात्पर्यमाह--अतः परामिति । सोपाधिकवस्तुनिर्धारणानन्तर्यमथशब्दार्थः । ननु यस्माद्भयाद्गार्गी पूर्वमुपरता तस्य तदवस्थत्वात्कथं पुनः सा प्रष्टुं प्रवर्तते तत्राऽऽह—पूर्वमिति । हन्तेत्यस्यार्थमाह—यदीति । न वै जातिवित्प्रतीकमादाय व्याचष्टे--कदाचिदित्यादिना । अन्वयं दर्शयितुं कश्चिदिति पुनरुक्तिः ॥ १ ॥

सा होवाचाहं वै त्वा याज्ञवल्क्य यथा काश्यो वा वैदेहो वोग्रपुत्र उज्ज्यं धनुरधिज्यं कृत्वा द्वौ बाणवन्तौ सपत्नातिव्याधिनौ हस्ते कृत्वोपोत्तिष्ठेदेवमेवाहं त्वा द्वाभ्या प्रश्नाभ्यामुपोदस्थां तौ मे ब्रूहीति पृच्छ गार्गीति ॥ २ ॥

लब्धानुज्ञा ह याज्ञवल्क्यं सा होवाचाहं वै त्वां त्वां द्वौ प्रश्नौ प्रक्ष्यामीत्यनुषज्यते । कौ तावितिं जिज्ञासायां तयोर्दुरुत्तरत्वं द्योतयितुं दृष्टान्तपूर्वकं तावाह–हे याज्ञवल्क्य यथा लोके काश्यः काशिषु भवः काश्यः प्रसिद्धः शौर्यं काश्य वैदेहो वा विदेहानां वा राजोग्रपुत्रः शूरान्वय इत्यर्थः । उज्ज्यमवतारितज्याकं धनुः पुनरधिज्यमारोपितज्याकं कृत्वा द्वौ बाणवन्तौ बाणशब्देन शराग्रे यो वंशखण्डः संधीयते । तेन विनाऽपि शरो भवतीत्यतो विशिनष्टि–बाणवन्ताविति । बाणवन्तौ शरौ तयोरेव विशेषणं सपत्नातिव्याधिनौ शत्रोः पीडाकरावतिशयेन हस्ते कृत्वोपोत्तिष्ठेत्समीपत आत्मानं दर्शयेदेवमेवाहं त्वां

१ च. छ. ढ. वाचो । २ च. ढ. पृच्छामि । ३ क. ग. ट. ड. त्वां । ४ ग. घ. ङ. ञ. ट. त्वा याज्ञ° । ५ ख. °श्नौ पृच्छामी° । ६ क. काशीषु । ७ क. ङ. च. छ. ढ. °ति । तौ द्वौ । ८ क. ङ. च. छ. °हं त्वा । ९ ग. त्वा शू° ।

त्वां शरस्थानीयाभ्यां प्रश्नाभ्यां द्वाभ्यामुपोदस्थामुत्थितवत्यास्मि त्वत्समीपे । तौ मे ब्रूहीति ब्रह्मविच्चेत् । आहेतरः पृच्छ गार्गीति ॥ २ ॥

संधीयते स उच्यत इति [illegible]। प्रश्नयोरवश्यप्रत्युत्तरणीयत्वे ब्रह्मिष्ठत्वाङ्गीकारो हेतुरित्याह—ब्रह्मविच्चेदिति ॥ २ ॥

सा होवाच यदूर्ध्वं याज्ञवल्क्य दिवो यदवाक्पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतं च भवच्च भविष्यच्चेत्याचक्षत कस्मिंस्तदोतं च प्रोतं चेति ॥ ३ ॥

सा होवाच यदू-[illegible] पृथिव्या अधोऽण्डकपालयोर्यच्चावागधः पृथिव्या अधोऽण्डकपालयोरन्तरा [illegible] पृथिवी द्यावापृथिव्योरण्डकपालयोरिमे च द्यावापृथिवी यद्भूतं च भवच्चातीतं भवच्च वर्तमानं स्वव्यापारस्थं भविष्यच्च वर्तमानादूर्ध्वकालभाविलिङ्गगम्यं यत्सर्वमेतदाचक्षते कथयन्त्यागमतस्तत्सर्वं द्यूतजातं यस्मिन्नकी भवतीत्यर्थः । तत्सूत्रमाकाशं पूर्वोक्तं कस्मिन्नु च [ओतं च] पृथिवीधातुरिवाप्सु ॥ ३ ॥

सूत्रस्याऽऽकारे नष्टव्ये किमिति तर्हि जगदुच्यते तत्राऽऽह—तत्सर्वमिति । पूर्वोक्तं तर्हि जगदात्मकमिति यावत् । ३ ॥

स होवाच यदूर्ध्वं गार्गि दिवो यदवाक्पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतं च भवच्च भविष्यच्चेत्याचक्षत आकाशे तदोतं च प्रोतं चेति ॥ ४ ॥

स होवाचेतरो हे गार्गि यच्चयोक्तमूर्ध्वं दिव इत्यादि तत्सर्वं यत्सूत्रमाचक्षते तत्सूत्रमाकाशे तदोतं च प्रोतं च यदेतद्व्याकृतं सूत्राख्यं जगदव्याकृताकाशेऽप्स्विव पृथिवीधातुस्थिष्वपि कालेषु वर्तत उतस्तौ स्थितौ लये च ॥ ४ ॥

यथाप्रश्नमनूद्य प्रत्युक्तिमादत्ते—स होवाचेति । तां व्याचष्टे—यदेतादिति ।

---

१ क. घ. ङ. च. छ. ज. झ ब्रूहि । २ ख. यद्वस्तूर्ध्वं । ३ ङ. छ.झ. °थिव्यो° । ४ ग. °ते चाती° । ५ च. यदती° । ६ ग. घ. झ. °त्रेकं भ° । ७ क. ख. त्र. ढ. सर्वं ज° । ८ च. यच्चोक्त° ।

यज्जगद्व्याकृतं सूत्रात्मकमेतदव्याकृताकाशे वर्तत इति संबन्धः । त्रिष्वपि काले-ष्विति यदुक्तं तद्व्यनक्ति—उत्पत्ताविति ।

सा होवाच नमस्तेऽस्तु याज्ञवल्क्य यो म एतं व्यवोचोऽपरस्मै धारयस्वेति पृच्छ गार्गीति ॥ ५ ॥

पुनः सा होवाच नमस्तेऽस्त्वित्यादि प्रश्नस्य दुर्वचत्वप्रदर्शनार्थम् । या मं ममैतं प्रश्नं व्यवोचो विशेषेणोपाकृतवानसि । एतस्य दुर्वचत्वे कारणं सूत्रमव तावदगम्यमितरदुर्वाच्यं किमुत तद्यस्मिन्नोतं च प्रोतं चेत्यतो नमोऽस्तु ते तुभ्यमपरस्मै द्वितीयाय प्रश्नाय धारयस्व दृढीं कुर्वात्मा मित्यर्थः । पृच्छ गार्गीतोतर अ... ॥ ५ ॥

स होवाच यदूर्ध्वं याज्ञवल्क्य दिवो यदवाक्पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतं च भवच्च भविष्य-च्चेत्याचक्षते कस्मिंस्तदोतं च प्रोतं चेति ॥ ६ ॥

व्याख्यातमन्यत् । सा होवाच यदूर्ध्वं याज्ञवल्क्येत्यादिप्रश्नः प्रति-वचनं चाक्तस्यैवार्थस्यावधारणार्थं पुनरुच्यते । न किंचिदपूर्वमर्था-न्तरमुच्यते ॥ ६ ॥

वक्ष्यमाणं वाक्यमन्यदित्युच्यते । तदेव प्रश्नप्रतिवचनरूपमनुवदति—सा हेति । पुनरुक्तेरकिंचित्करत्वं व्यावर्तयति—उक्तस्यैवेति ॥ ६ ॥

स होवाच यदूर्ध्वं गार्ग दिवो यदवाक्पृथिव्या यदन्तरा द्यावापृथिवी इमे यदभूतं च भवच्च भविष्यच्चत्याचक्षत आकाश एव तदोतं च प्रोतं चेति कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चेति ॥ ७ ॥

सर्वं यथोक्तं गार्ग्या प्रत्युच्चार्य तमेव पूर्वोक्तमर्थमवधारितवानो-

---

१ क. ग ङ. च. छ. ढ °स्त्वप्र । ज. °चनत्व° । २ क. ग. °षेणोक्त° । च. ङ. °षेण व्याकृ° । ३ ख. ङ च. छ. झ. ढ तदस्य । ४ क. ग. घ. ङ. च. छ. ढ, °वस्त्वे का° ।

काश एवेति याज्ञवल्क्यः । गार्ग्याह-कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चेति । आकाशमेव तावत्कालत्रयातीतत्वाददुर्वाच्यम् । ततोऽपि कष्टतरमक्षरं यस्मिन्नाकाशमोतं च प्रोतं चातोऽवाच्यमिति कृत्वा न प्रतिपद्यते साऽप्रतिपत्तिर्नाम निग्रहस्थानं तार्किकसमये । अथावाच्यमपि वक्ष्यति तथाऽपि विप्रतिपत्तिर्नाम निग्रहस्थानं विरुद्धा प्रतिपत्तिर्हि सा यदवाच्यस्य वदनमतो दुर्वचनं प्रश्नं मन्यते गार्गी ॥ ७ ॥

प्रतिवचनानुवादतात्पर्यमाह-गार्गीति । प्रश्नाभिप्रायं प्रकटयति-आकाशमेवेति ॥ ७ ॥

स होवाचैतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्य-
स्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छायमतमो-
ऽवाय्वनाकाशममङ्गमरसमगन्धमचक्षुष्कमश्रोत्रम-
वागमनोऽतेजस्कमप्राणममुखममात्रमनन्तरमबाह्यं न
तदश्नाति किंचन न तदश्नाति कश्चन ॥ ८ ॥

तद्दोषद्वयमपि परिजिहीर्षन्नाह-स होवाच याज्ञवल्क्य एतद्वै तद्यत्पृष्टवत्यसि कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चेति । किं तदक्षरं यन्न क्षीयते न क्षरतीति वाऽक्षरं तदक्षरं हे गार्गि ब्राह्मणा ब्रह्मविदोऽभिवदन्ति । ब्राह्मणाभिवदनकथनेन नाहमवाच्यं वक्ष्यामि न च न प्रतिपद्येयमित्येवं दोषद्वयं परिहरति । एवमपाकृते प्रश्ने पुनर्गार्ग्याः प्रतिवचनं द्रष्टव्यं ब्रूहि किं तदक्षरं यद्ब्राह्मणा अभिवदन्तीत्युक्त आह-अस्थूलं तत्स्थूलादन्यत् । एवं तर्ह्यणवनणु । अस्तु तर्हि ह्रस्वमह्रस्वम् । एव तर्हि दीर्घं नानि दीर्घमदीर्घम् । एवमेतैश्चतुर्भिः परिमाणप्रतिषेधैर्द्रव्यधर्मैः प्रतिषिद्धो न द्रव्यं तदक्षरमित्यर्थः । अस्तु तर्हि लोहितो गुणस्ततोऽप्यन्यदलोहितम । आग्नेयो गुणो लोहितः । भवतु तर्ह्यपां स्नेहनं नास्नेहम् । अस्तु तर्हि च्छाया सर्वथाऽप्यनिर्देश्यत्वाच्छायाया

---

१ च. °ल्क्यः । सा होवाच क° । २ क. ख. छ. वदति । ३ च. ढ. °स्य च व° । ४ ग. दुर्वाचं । ५ ख. ग. घ. च. गार्ग्येति । ६ क. ख. ङ. °श एवे° । ७ च. ढ. कंचन । ८ च. झ. ढ. रं न क्षी° । छ. ज. रं तन्न । ९ क. ख. ङ. छ. °ति चाक्ष° । १० च. ढ. °र्ह्यणु नान° । ११ ग. दीर्घमदीर्घम् । १२ घ. °धर्मप्रतिषेधे न । च. ढ. धर्मे प्र° । १३ च. ढ. °षिद्ध न ।

अप्यन्यदच्छायम्[1] अस्तु तर्हि तमोऽतमः। भवत वायुमन्तरवायः। भवेत्तर्ह्याकाशमनाकाशम्। भवतु तर्हि सङ्गात्मकं जनुवदसङ्गम्। रसोऽस्तु तर्ह्यरसम्। तथा गन्धोऽस्त्वगन्धम्। अस्तु तर्हि चक्षुरचक्षुष्कं नहि चक्षुरस्य करणं विद्यतेऽतोऽचक्षुष्कम्। "पश्यत्यचक्षुः" इति मन्त्रवर्णात्। तथाऽश्रोत्रं स शृणोत्यकर्ण इति। भवतु तर्हि वाग्[2] वाक्। तथाऽमनः। तथाऽतेजस्कमविद्यमानं तेजोऽस्य तदतेजस्कम्। नहि तेजाऽग्न्यादिप्रकाशवदस्य विद्यते। अप्राणमाध्यात्मिको वायुः प्रतिषिध्यतेऽप्राणमिति। मुख तर्हि द्वार तदमुखम्। अमात्रं मीयते येन तन्मात्रममात्रं मात्रारूपं तन्न भवति न तेन किंचिन्मीयते। अस्तु तर्हि च्छिद्रवदनन्तरं नास्यान्तरमस्ति। भवेत्तर्हि बहिस्तस्याबाह्यम्। अस्तु तर्हि भक्षयितृ तन्न तदश्नाति किंचन। भवेत्तर्हि भक्ष्य कस्यचिन्न तदश्नाति कश्चन। सर्वविशेषणरहितमित्यर्थः। एकमेवाद्वितीयं हि तत्केन किं विशिष्यते ॥ ८ ॥

अप्रतिपत्तिर्विप्रतिपत्तिश्चेति दोषद्वयं सामान्येनोक्तं विशेषतो ज्ञातुं पृच्छति—किं बादिति। अस्थूलादिवाक्यमवतार्य व्याकरोति—एवमित्यादिना। 'यदग्ने रोहितं रूपम्' इत्यादिश्रुतिमाश्रित्याऽऽह—आग्नेय इति। अवायुविशेषणेनाप्राणविशेषणस्य पुनरुक्तिमाशङ्क्याऽऽह—आध्यात्मिक इति। अमात्रमिति ज्ञानमेयान्वयो निराक्रियते। तस्येत्यात्मोक्तिः। संपिण्डितमर्थमाह—सर्वेति। तदुपपादयति—एकमिति।

एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठत एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठत एतस्य वा अक्षरस्य प्रशासने गार्गि निमेषा मुहूर्ता अहोरात्राण्यर्धमासा मासा ऋतवः संवत्सरा इति विधृतास्तिष्ठन्त्येतस्य वा अक्षरस्य प्रशासने गार्गि

---

१ ग. °म्। तमस्तर्हि न तमो°। २ क म च. छ °थाऽन्य°। ३ क. ग श्रुष्क मच°। च. छ. झ ढ. °श्रुष्कं। ४ ख. ढ °ग्न्यादित्याद°। ५ क ख. ङ च छ ढ. °दन्तरवदना°। ६ ग. °स्ति। म°। ७ ङ. °तृ न त°। ८ च कंचन। ९ ध. ज. °पर। १० ग. घ. ज. अ. विशेष्य°।

प्राच्योऽन्या नद्यः स्यन्दन्ते श्वेतेभ्यः पर्वतेभ्यः
प्रतीचोऽन्या यां यां च दिशमन्वेत्य वा अक्षर-
स्य प्रशासने गार्गि ददतो मनुष्याः प्रशंसन्ति
यजमानं देवा दर्वीं पितरोऽन्वायत्ताः ॥ ९ ॥

अनेकविशेषणप्रतिषेधप्रयासादस्तित्व तावदक्षरस्योपगमितं श्रुत्या तथाऽपि लोकबुद्धिमपेक्ष्याऽऽशङ्क्यते यताऽतोऽस्तित्वायानुमानं प्रमाणमुपन्यस्यति—एतस्य वा अक्षरस्य । यदेतदधिगतमक्षर सर्वान्तर साक्षादपरोक्षाद्ब्रह्म य आत्माऽज्ञानायादिधर्मातीत एतस्य वा अक्षरस्य प्रशासने । यथा राज्ञः प्रशासने राज्यमस्फाटितं नियतं वर्तत एवमेतस्याक्षरस्य प्रशासने हे गार्गि सूर्याचन्द्रमसौ सूर्यश्च चन्द्रमाश्च सूर्याचन्द्रमसावहोरात्रयोर्लोकप्रदीपौ तादर्थ्येन प्रशासित्रा ताभ्यां निवर्त्यमानलोकप्रयोजनविज्ञानवता निर्मितौ च स्यातां साधारणस्वप्राणप्रकाशोपकारकत्वाल्लोककप्रदीपवत् ।

अथ यथोक्तया नीत्या श्रुत्यैवाक्षरास्तित्व ज्ञापिते वक्तव्याभावात्कपत्तरेण ब्रह्मणेति तत्राऽऽह अनुमानेति यद्यपि तत्सविशेषणमवति लौकिको बुद्धिः । आशङ्क्यते नास्त्यक्षरं निर्विशेषणत्वादिति शेषः । अन्वयाभाव जगत्कारणे परस्मिन्ननुमानसिद्धे विवक्षित निरुपाधिकमक्षरं सत्यति जगत्कारणस्योपलक्षणतया तस्मादिव स्थितत्वादुपलक्षणद्वारा ब्रह्मणि स्वरूपलक्षणप्रवेशेऽपि मनुषा पक्षतेऽपयुक्तेति भावः । अनुमानश्रुत्यक्षराणि व्याकरोति-यदतादेति । प्रशासने सूर्याचन्द्रमसौ विधृतौ स्यातामिति संबन्धः । उक्तमर्थं दृष्टान्तेन स्मारयति—यथेति । अत्रापि पूर्ववदन्वयः । जगद्व्यवस्था प्रशासनपूर्विका व्यवस्थात्वाद्राज्यव्यवस्थावदित्यर्थः । सूर्याचन्द्रमसावित्यादौ विवक्षितमनुमानमाह—सूर्यश्चेत्यादिना । तादर्थ्येन लोकप्रकाशार्थत्वेन । प्रशासित्रा निर्मितावित्ति संबन्धः । नियंतुर्विशिष्टविज्ञानवत्त्वमाक्षिपति—ताभ्यां निवर्त्यमानेति । सूर्याचन्द्रमसौ तच्छब्दवाच्यौ । विमतौ विशिष्टविज्ञानवता निर्मितौ प्रकाशत्वात्प्रदीपवदित्यर्थः । विमतौ नियन्तृपूर्वकौ विशिष्टचेष्टावत्त्वाद्भृत्यादिवदित्यभिप्रेत्याऽऽह— विधृता-

---

१ ख. ड. ढ. °त्रा तन्निव° । ग झ °वाऽऽस्यां । २ ण. रीत्या । ३ घ. ञ. ण. °वादुत्तरो ग्रन्थो वृथा त° । ख. ढ. °वादत किमु° । ४ घ °णतया । ५ घ °मित्वानुमानं नाप्रकृताषयुक्तमिति । ण. °मित्वानुमानता प्र° । ६ क. ख. ञ. ढ. ण. °ष्ठे । तन्निर्व°।

विति । प्रकाशोपकारकत्वं तज्जनकत्वं निर्वर्तुर्विशिष्टविज्ञानसंभावनार्थं साधारणेति विशेषणं साधारणः सर्वेषां प्राणिनां यः प्रकाशस्तस्य जनकत्वादिति यावत् । दृष्टान्ते लौकिकविशेषणं प्रासादादिविशिष्टदेशनिविष्टत्वसिद्ध्यर्थम् ।

तस्मादस्ति तद्येन विधृतावाश्वरौ स्वतन्त्रौ मन्तौ निर्मितौ तिष्ठतो नियतदेशकालनिमित्तोदयास्तमयवृद्धिक्षयाभ्यां वर्तेते । तदस्त्येवमेतयोः प्रशासितृत्वेऽक्षर प्रतापकर्तृविधारयितृवत् । एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ द्यौश्च पृथिवी च सावयवत्वात्स्फटनस्वभावे अपि सत्यौ गुरुत्वात्पतनस्वभावे संयुक्तत्वाद्वियत्स्वभावे च सति वदमिमा निर्देवताधिष्ठितत्वात्स्वतन्त्रे अप्येतस्याक्षरस्य प्रशासने वर्तेते विधृते तिष्ठतः ।

अनुबन्धफलमुपसंहरति—तस्मादिति । विधिरूपेणेष्टत्वादिति शेषः । दृष्टहेतुं स्पष्टयति नियतेति निमित्तं कारणम् । स्वतन्त्रत्वे दृष्टहेतुं तदभावौ सूर्याचन्द्रमसावद्यन्तावस्त [illegible] वृद्धिक्षयाभ्यां च वर्तेते । उदयश्चास्त [illegible] वृद्धिश्च अस्तश्च वृद्धिक्षयौ तयोर्द्वंद्वं कृत्वा द्विवचनम् । एवं कर्तृ [illegible] विधारयितृवत् चेत्यर्थः । विधृते प्रशासने विधृते सावयवत्वेऽप्यस्फुटनाद्गुरुत्वेऽप्यपतनात्संयुक्तत्वेऽप्याकाशेनावयवत्वेऽप्यस्वतन्त्रत्वाच्च हस्तन्यस्तपाषाणादिवदिति द्वितीयपर्यायस्य तात्पर्यमाह—सावयवत्वादित्यादिना ।

एतद्ध्यक्षरं सर्वज्ञत्व शक्तेः विधारणमतो नास्त्यक्षरस्य प्रशासनं द्यावापृथिव्यावातिक्रामतस्तत्प्रसिद्धमस्यास्तित्वमक्षरस्य । अव्यभिचारि हि तल्लिङ्गं यद्द्यावापृथिव्यौ नियते वर्तेते । चेतनावन्तं प्रशासितारमसंसारिणमन्तरेण नैतद्युक्तम् । "येन द्यौरुग्रा पृथिवी च दृढा" इति मन्त्रवर्णात् ।

किमित्येतस्य प्रशासने द्यावापृथिव्यौ वर्तेते तत्राऽऽह—एतद्धीति । पृथिव्यादिव्यवस्था नियन्तारं विनाऽनुपपन्ना तत्कल्पिकेत्यर्थः । तथाऽपि किमित्येतेन विधृते द्यावापृथिव्याविति तत्राऽऽह—सर्वमर्यादेति । 'एष सेतुर्विधरणः' इति श्रुत्यन्तरमाश्रित्य फलितमाह—अतो नाम्यति । द्वितीयपर्यायार्थमुपसंहरति—तस्मादिति । तच्छब्दोपात्तमर्थं स्फोरयति—अव्यभिचारीति । अव्यभिचारित्वं

१ क ख. र्थं वि° । २ क. घ च छ. ज. झ. ढ. °मनवृ° । ३ क. ग. °भ्यां च व° । ४ ख. घ ङ. च. छ. ज. झ. ढ. °व तं° । ५ ख. घ. ज. ढ. ण. °ता धृ° । ६ ख. ञ. ट. ण. °प्यपातित्वा° । ७ ख. छ. °र्वस्य व्य° । ८ ग छ. °थिवी अति° । ९ ग. छ. °थिवी नि° । १० ग. ङ. °ति च म° ।

कटयति-चेतनावन्तमिति । पृथिव्यादेर्नियन्तृत्वमेतच्छब्दार्थः । नियन्तृत्वसिद्धावपि कथमीश्वरसिद्धिरित्याशङ्क्याऽऽह-यमाति । उग्रत्वं पृथिव्यादेश्चेतनावदभिमानिदेवतावत्त्वेन स्वातन्त्र्यम् । 'येन स्वरभ्यभितं येन नाको यो अन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम' इत्यत्र हिरण्यगर्भाधिष्ठातेश्वरः पृथिव्यादिनियन्तोच्यते । नहि हिरण्यगर्भमात्रस्याऽस्मिन्प्रकरणे पूर्वापरग्रन्थयोरुच्यमानं निरङ्कुशं सर्वनियन्तृत्वं संभवतीति भावः ।

एतस्य वा अक्षरस्य प्रशासने गार्गि निमेषा मुहूर्ता इत्येते कालावयवा संवत्सरादीनामागमापायिनामवयवानां जनितृतः कलयितारः । यथा लोके प्रमाणा नियतो गणकः स्वमायं व्ययं चाप्रमत्तो गणयति तथा प्रमाणानीमे सर्गा कालावयवानां नियन्ता । तथा प्राच्यः प्रागञ्चनाः पूर्वदिग्गमना नद्यः स्यन्दन्ते स्रवन्ति श्वेतेभ्यो हिमवदादिभ्यः पर्वतेभ्यो नानाभ्यो गङ्गाद्या नदभेदाश्च तथा प्रवर्तिता एव नियताः प्रवर्तन्तेऽन्याऽपि प्रवर्तितुमुत्सहन्त्यस्तदतालिङ्गं प्रशास्तृ । प्रतीच्योऽन्या प्रतीचीं दिशमञ्चन्ति सिन्ध्वाद्या नद्यः । अन्याश्च यां यां दिशमनुप्रवृत्तास्तां तां न व्यभिचरन्ति तच्च लिङ्गम् ।

एते कालावयवा विधृतास्तिष्ठन्तीति संबन्धः । तत्रानुमानं वक्तुं हेतुमाह-सर्वस्येति । यः कलयिता स नियन्तृपूर्वक इति व्याप्तिभूमिमाह यथेति दार्ष्टान्तिकं दर्शयन्ननुमानमाह-तथेति । निमेषादयो नियन्तृपूर्वकाः कलयितृत्वात्तंवत्सरविपञ्चवदित्यर्थः । कास्ता नद्य इत्यपेक्षायामाह-गङ्गाद्या इति । अन्यथा सर्वस्यितुमुत्सहमानत्वं तत्तद्देवतानां चेतनत्वेन स्वातन्त्र्यम् । विमता नियन्तृपूर्विका नियतप्रवृत्तित्वाद्धृत्यादिवदिति चतुर्थपर्यायार्थः । नियतप्रवृत्तिमत्त्वं तदेतदित्युच्यते। तच्चेत्यन्यभिचारितेत्युक्तिः ।

किंच ददतो हिरण्यादीन्प्रयच्छत आत्मपीडां कुर्वतोऽपि प्रमाणज्ञा अपि मनुष्याः प्रशंसन्ति । तत्र यच्च दीयते ये च ददति ये च प्रतिगृह्णन्ति तेषामिहैव समागमो विलक्षणश्चान्यक्षो दृश्यते । अदृष्टस्तु परः समागमः । तथाऽपि मनुष्या ददतां दानफलेन संयोगं पश्यन्तः प्रमा-

---

१ क. ख. ढ. °यन्तृत्व° । २ ढ. ण. °न सुवस्त° । ३ ग. झ. °यमितो । ४ क. ख. °न्ते नान्य° । ५ क. ग. °न्त्यनस्त° । ६ ख. °ङ्गमेतस्य वा अक्षरस्य । किं । ७ ण. °त्वात्सूर्यादि° । ८ ख. घ. °चारोक्तिः । ९ ण. °रित्वोक्तिः । १० च. ढ. लयः प्रत्यक्षो । १ ग. ददतो ।

णज्ञतया प्रशंसन्ति । तच्च कर्मफलेन संयोजयितरि कर्तुः कर्मफलवि-
भागज्ञे प्रशास्तर्यसति न स्यात् । दानक्रियायाः प्रत्यक्षविनाशित्वात् ।
तस्मादस्तिदानकर्तृणां फलेन संयोजयिता ।

विषयं विशिष्टज्ञानवद्दातृकं कर्मफलत्वात्सेवाफलवदित्यभिप्रेत्य पञ्चमं पर्यायमु-
त्थापयति—किंचेति । दाता प्रतिग्रहीता दानं देयं वा फलं दास्यति किमीश्वरे-
णेत्याशङ्क्याऽऽह—तत्रेति । दात्रादीनामिहैव प्रत्यक्षो नाशो दृश्यते तेन तत्पुरुषो
दृष्टः । पुरुषार्थो न कश्चिदस्तीत्यर्थः । अदृष्टं पुरुषार्थं प्रत्याह—अदृष्टास्त्विति ।
समागमः फलप्राप्तिलाभः स खल्वैहिको न भवति किंतु पारलौकिकस्तथा च दा-
तारविहैव नष्टदात्रादिप्रयुक्तः संभवतीत्यर्थः । तर्हि फलदातुरभावात्स्वार्थभ्रंशो हि
मूर्खतेति न्यायाद्दातृप्रशंसैव मा भूदित्याशङ्क्याऽऽह—तथाऽपीति । फलसंयोग-
दृष्टौ हेतुमाह—प्रमाणज्ञतयेति । ' हिरण्यदा अमृतत्वं भजन्ते ' इत्यादि प्रमा-
णम् । तथाऽपि कथमीश्वरसिद्धिस्तत्राऽऽह—कर्तुरिति । तद्धि दातृप्रशंसनं वि-
शिष्टे नियन्तर्यसत्यनुपपन्नं तत्कल्पकमित्यर्थः । दानक्रियावशादेव तत्फलसिद्धौ
किं नियन्त्रेति चेन्नेत्याह—दानेति । कर्मणः क्षणिकत्वात्फलस्य च कालान्तर-
भावित्वान्न साधनत्वोपपत्तिरित्यर्थः । अनुमानार्थापत्तिभ्यां सिद्धमर्थमनुवदन्—
तस्मादिति ।

अपूर्वमिति चेन्न । तत्सद्भावे प्रमाणानुपपत्तेः । प्रशास्तरपीति चेन्न ।
आगमतात्पर्यस्य सिद्धत्वात् । अवोचाम ह्यागमस्य वस्तुपरत्वम् ।
किंचान्यदपूर्वकल्पनाया चार्थापत्तेः क्षयोऽन्यथैवोपपत्तेः । सेवाफलस्य
सेव्यात्प्राप्तिदर्शनात् ।

अपूर्वस्यैव फलदातृत्वात्कृतमीश्वरेणेति शङ्कते—अपूर्वमिति चेदिति । स्वयं
चाचेतनं चेतनाधिष्ठितं चापूर्वं फलदातृ न कल्प्यमप्रमाणकत्वादिति परिहरति—
नेति । ईश्वरद्वेषी शङ्कते—प्रशास्तारिति । सद्भावे प्रमाणानुपपत्तिरिति शेषः ।
परिहरति—नाऽऽगमेति । कथं कार्यपरस्याऽऽगमस्य वस्तुपरत्वमित्याशङ्क्याऽऽह—
अवोचामेति । कर्माविधिर्हि फलदात्रनिरेकेण नोपपद्यते । न च कर्माऽऽशुवि-
नाशि कालान्तरभाविफलानुकूलं तदर्थापत्तिसिद्धेऽपूर्वे कथं मानासिद्धिरित्या-
शङ्क्याऽऽह—किंचेति । न केवलं सद्भावे प्रमाणासत्त्वमेवापूर्वे दूषणं किंत्वन्य-
च्च किंचिदस्तीति यावत् । तदेव प्रकटयति—अपूर्वेति । अपूर्वस्य कल्पनायां

१ ख. तच्च तत्र कं° । ग. छ. ज. झ. ढ. तत्र कं° । घ. ङ. च. तत्कर्मं° । २ क. ख. ढ. ण. °यं फ° । ३ घ. ञ. ण. °तिलन्मः स । ४ ख. °र्थसि° । ५ ण. °यमेवार्थे° । ६ ख. घ. झ. ण. °तं वाऽपू° । ७ ण. शङ्कितो ।

पाऽर्थापत्तिः शङ्क्यते तस्याः कल्पितमपूर्वमन्तरेणाप्युपपत्तेः क्षयः स्यादिति योजना । अन्यथाऽप्युपपत्तिं विवृणोति—सेवेति । यागादिफलमपीश्वरात्संभवतीति शेषः ।

सेवायाश्च क्रियात्वात्तत्सामान्याच्च यागदानहोमादीनां सेव्यादीश्वरादेः फलप्राप्तिरुपपद्यते । दृष्टक्रियाधर्मसामर्थ्यमपरित्यज्यैव फलप्राप्तिकल्पनोपपत्तौ दृष्टक्रियाधर्मसामर्थ्यपरित्यागो न न्याय्यः । कल्पनाधिक्याच्च । ईश्वरः कल्प्याऽपूर्वं वा । तत्र क्रियायाश्च स्वभावः सेव्यात्फलप्राप्तिर्दृष्टा न त्वपूर्वान्न चापूर्वं दृष्टम् । तत्रापूर्वमदृष्टं कल्पयितव्यं तस्य च फलदातृत्वे सामर्थ्ये तिमर्थ्ये च सति दानं चाभ्यधिकमिति । इह त्वीश्वरस्य सेव्यस्य सद्भावमात्रं कल्प्यं नतु फलदानसामर्थ्यं दृष्टत्वं च । सेव्यात्फलप्राप्तेर्दर्शनात् । अनुमानं च दर्शितं यावापृथिव्यौ विधृते तिष्ठत इत्यादि ।

कल्पनाधिक्याधीनां यागादिफलातिरेकमाह—सेवायाश्चेति । आदिपदेनेन्द्रादिदेवता गृह्यन्ते । तासां त्वदीक्षितो यजेत दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यादिविधिविशिष्टक्रियात्वात्संप्रतिपन्नवदिति भावः । इतश्चेश्वरस्य फलदातृत्वं नापूर्वस्येत्याह—दृष्टेति । दृष्टं सेवायाधर्मत्वेन सामर्थ्यं सेव्यात्फलप्राप्तिदर्शनानुसारेण दानस्य फलप्राप्तिजनने तन्निरासेनापूर्वात्तत्कल्पना न न्याय्या । दृष्टानुसारिण्यां कल्पनायां तद्विरोधिकल्पनायोगादित्यर्थः । अपूर्वस्य फलहेतुत्वे दोषान्तरमाह—कल्पनेति । तदाधिक्यं वक्तुं परामृशति—ईश्वर इति । नापूर्वं कल्प्यं कल्प्यत्वात्तन्न कल्पनाधिक्यमित्याङ्क्याऽऽह—तत्रेति । व्यवहारभूमिः सामान्यार्थः । भूमिकां कृत्वा कल्पनाधिक्यं स्फुटयति—तत्रेत्यादिना । अपूर्वस्यादृष्टत्वे सतीति यावत् । इति कल्पनाधिक्यमिति शेषः । त्वन्मतेऽपि तुल्या कल्पनेत्याशङ्क्याऽऽह—इह त्विति । स्वपक्षे धर्मिमात्रं कल्प्यं परपक्षे धर्मी धर्मश्चेत्याधिक्यं तस्मात्फलमत उपपत्तेरिति न्यायेन परस्यैव फलदातृतेति भावः । धर्मिणोऽपि प्रामाणिकत्वं न कल्प्यत्वमित्यभिप्रेत्याऽऽह—अनुमानं चेति ।

तथा च यजमानं देवा ईश्वराः सन्तो जीवनार्थेऽनुगताश्चरुपरोडाशाद्युपजीवनप्रयोजनेनान्यथाऽपि जीवितुमुत्सहन्तः कृपणा हीनां वृत्तिमाश्रित्य स्थितास्तच्च प्रशास्तुः प्रशासनात्स्यात् । तथा पितरोऽपि तदर्थं दर्वी दर्वीहोममन्वायत्ता अनुगता इत्यर्थः । समानं सर्वमन्यत् ॥ १ ॥

---

१ घ. ण. °कत्वान्न क° । २ ग. घ. °णा च ही° । ३ ग. °मास्थि° ।

ईश्वरास्तित्वे हेत्वन्तरमाह—तथा चेति । देवा यजमानमन्यायत्ता इति शेषः । जीवनार्थे जीवनं निमित्तीकृत्येति यावत् । देवानामीश्वराणामपि हव्यार्थित्वेन मनुष्याधीनत्वाख्यहीनवृत्तिभाक्त्वं नियन्तृकल्पकमित्यर्थः । यो न कस्यचित्प्रकृतित्वेन विकृतित्वेन वा वर्तते स दर्वीहोमः ॥ ९ ॥

यो वा एतदक्षरं गार्ग्यविदित्वाऽस्मिँल्लोके जुहोति यजते तपस्तप्यते बहूनि वर्षसहस्राण्यन्तवदेवास्य तद्भवति यो वा एतदक्षरं गार्ग्यविदित्वाऽस्माल्लोकात्प्रैति स कृपणोऽथ य एतदक्षरं गार्गि विदित्वाऽस्माल्लोकात्प्रैति स ब्राह्मणः ॥ १० ॥

इतश्चास्ति तदक्षरं यस्मात्तद्ज्ञाने नियता संसारोपपत्तिर्भवितव्यं तु तत्, यद्विज्ञानाद्विच्छेदो न्यायोपपत्तेः । ननु क्रियत एव तद्विच्छित्तिः स्यादिति चेन्न । यो वा एतदक्षरं हे गार्ग्यविदित्वाऽविज्ञायास्मिँल्लोकं जुहोति यजते तपस्तप्यते यद्यपि बहूनि वर्षसहस्राण्यन्तवदेवास्य तत्फलं भवति तत्फलोपभोगान्ते क्षीयन्त एवास्य कर्माणि । अपि च यद्विज्ञानात्कार्पण्यात्क्षयः संसारविच्छेदो यद्विज्ञानाभावाच्च कर्मकृत्कृपणः कृतफलस्यैवोपभोक्ता जननमरणप्रबन्धारूढः संसरति । तदस्त्यक्षरं प्रशासितृ तदेतदुच्यते । यो वा एतदक्षरं गार्ग्यविदित्वाऽस्माल्लोकात्प्रैति स कृपणः पणक्रीत इव क्षुद्रादिः । अथ य एतदक्षरं गार्गि विदित्वाऽस्माल्लोकात्प्रैति स ब्राह्मणः ॥ १० ॥

ईश्वरास्तित्वे हेत्वन्तरमाह—इतश्चेति । मोक्षहेतुज्ञानविषयत्वेनापि तदस्तीत्याह—भवितव्यमिति । 'यद्ज्ञानात्प्रवृत्तिर्या तज्ज्ञानात्सा निवर्तते' इति न्यायः । कर्मवशादेव मोक्षसिद्धेस्तद्धेतुज्ञानविषयत्वेनाक्षरं नाभ्युपेयमिति शङ्कते—नन्विति । उत्तरवाक्येनो (णो) त्तरमाह—नेत्यादिना । अस्याज्ञानादनुष्ठितानि विशिष्टफलान्यपि सर्वाणि कर्माणि संसारमेव फलन्ति तदज्ञातमक्षरं नास्तीत्ययुक्तं संसाराभावप्रसङ्गादिति भावः । अक्षरास्तित्वे हेत्वन्तरमाह—अपि चेति । पूर्ववाक्यं जीवदवस्थपुरुषविषयमिदं तु परलोकविषयमिति विशेषं दर्शयन्नुत्तरवाक्यमवतार्य व्याचष्टे—तदेतदित्यादिना ॥ १० ॥

अग्नेर्दहनप्रकाशकत्ववत्स्वाभाविकमस्य प्रशास्तृत्वमचेतनस्यैवेत्यत आह—

१ घ. 'ध्यायत्तत्वा' । २ क. ख. ङ. 'कल्पमि' । ३ ग. 'शनव' ।

तद्वा एतदक्षरं गार्ग्यदृष्टं द्रष्टृश्रुतꣳ श्रोत्रमतं मन्त्रविज्ञातं विज्ञातृ नान्यदतोऽस्ति द्रष्टृ नान्यदतोऽस्ति श्रोतृ नान्यदतोऽस्ति मन्तृ नान्यदतोऽस्ति विज्ञात्रेतस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चेति ॥ ११ ॥

तद्वा एतदक्षरं गार्ग्यदृष्टं न केनचिददृष्टमविषयत्वात्स्वयं तु द्रष्टृ दृष्टिस्वरूपत्वातू । तथाऽश्रुतं श्रोत्राविषयत्वात्स्वयं श्रोतृ श्रुतिस्वरूपत्वातू । तथाऽमतं मनसोऽविषयत्वातू । स्वयं मन्तृ मतिस्वरूपत्वातू । तथाऽविज्ञातं बुद्धेरविषयत्वात्स्वयं विज्ञातृ विज्ञानस्वरूपत्वातू । किंच नान्यदतोऽस्मादक्षरादस्ति नास्ति किंचिदद्रष्टृ दर्शनक्रियाकर्तृ । एतदेवाक्षरं दर्शनक्रियाकर्तृ सर्वत्र । तथा नान्यदतोऽस्ति श्रोतृ । तदेवाक्षरं श्रोतृ सर्वत्रं । नान्यदतोऽस्ति मन्तृ तदेवाक्षरं मन्तृ सर्वत्रं सर्वमनोद्वारेण । नान्यदतोऽस्ति विज्ञातृ विज्ञानक्रियाकर्तृ तदेवाक्षरं सर्वबुद्धिद्वारेण । विज्ञानक्रियाकर्तृ नाचेतनं प्रधानमन्यद्वा । एतस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चेति । यदेवं साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरोऽशनायादिसंसारधर्मातीतो यस्मिन्नाकाश ओतश्च प्रोतश्चैषा परा काष्ठैषा परा गतिरेतत्परं ब्रह्मेतत्पृथिव्यादेराकाशान्तस्य सत्यस्य सत्यम् ॥ ११ ॥

प्रधानवादिनः शङ्कामनूद्योत्तरवाक्येन (ण) निराकरोति—अग्नेरित्यादिना । इदमक्षरस्य नाचेतनत्वमित्याह—किंचेति । नास्तीत्यन्वयप्रदर्शनम । अवोऽन्यदित्यविशेषणनिषेधमर्थमाह—एतदिति । अन्यद्वा पूर्वोक्तमव्याकृतादिपृथिव्यन्तं निगमनवाक्यमुदाहृत्य तस्य तात्पर्यमाह—एतस्मिन्निति । परा काष्ठा परं पर्यवसानं नास्मादुपरिष्टादविद्वानं किंचिदस्तीत्यर्थः । तस्यैव परमपुरुषार्थत्वमाह—एषेति । 'पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः' इति हि श्रुत्यन्तरम् । ब्रह्मास्मादक्षरादन्यदस्तीति चेन्नेत्याह—एतदिति । ननु चतुर्थं सत्यस्य सत्यं ब्रह्म व्याख्यातमक्षरं तु नैवमिति चेत्तत्राऽऽह—एतत्पृथिव्यादेरिति ॥ ११ ॥

सा होवाच ब्राह्मणा भगवन्तस्तदेव बिभ्यु

---

१ क. ख. ग. ङ. ज. झ ङ्कशिरव । २ च. ढ. त्र वथा नां । ३ घ. ज. °त्र वृ° । ४ च. छ. °देतत्साक्षा । ५ घ. ण. तो नान्य° ।

मन्येध्वं यदस्मान्नमस्कारेण मुच्येध्वं न वै जातु
युष्माकमिमं काश्चिद्ब्रह्मोद्य जेतेति ततो ह वाच-
क्नव्युपरराम ॥ १२ ॥
इति बृहदारण्यकोपनिषदि तृतीयाध्यायस्याष्टमं
ब्राह्मणम् ॥ ८ ॥

सा होवाच हे ब्राह्मणा भगवन्तः शृणुत मदीयं वचस्तदेव बहु मन्येध्वम् । किं तद्यदस्माद्याज्ञवल्क्यान्नमस्कारेण मुच्येध्वमस्मै नमस्कारं कृत्वा तदेव बहु मन्यध्वमित्यर्थः । जयस्त्वस्य मनसाऽपि नाऽऽशंसनीयः किमुत कार्यतः । कस्मान्न वै युष्माक मध्ये जातु कदाचिदपीमं याज्ञवल्क्यं ब्रह्मोद्यं प्रति जेता । प्रश्नो चेन्मह्यं वक्ष्यति न जेता भवितेति पूर्वमेव मया प्रतिज्ञातमद्यापि ममायमेव निश्चयो ब्रह्मोद्यं प्रत्येतत्तुल्यो न काश्चिद्विद्यत इति । ततो ह वाचक्नव्युपरराम ।

किं तद्वचनं तदाह——तदेवेति । बहुमानविषयभूतं वस्तु पृच्छति——किं तादिति । यदादौ मदीयं वचनं तदेव बहुमानयोग्यमित्याह—यदिति । तदव्याकरोति—अस्मा इति । नमस्कार कृत्वाऽस्मादनुज्ञां प्राप्येति शेषः । तदेवेति प्राथमिकवचनोक्तिः । किमिति त्वदीयं पर्व वचो बहु मन्यामहे जेतुं पुनरिममाशास्महे नेत्याह—जयस्त्विति । तत्र प्रश्नपूर्वकं पूर्वोक्तमेव बहुमानविषयभूतं वाक्यमवतार्य व्याचष्टे—कस्मादित्यादिना । पराजिताया गार्ग्या वचो नोपादेयमित्याशङ्क्याऽऽह—प्रश्नो चेदिति । ततश्च प्रश्ननिर्णयाद्य ज्ञवल्क्यस्यापकल्प्यत्वं प्रतिपाद्य ब्राह्मणान्प्रति हितं चोक्त्वेत्यर्थः ।

अत्रान्तर्यामिब्राह्मण एतदुक्तम् । यं पृथिवी न वेद यं सर्वाणि भूतानि न विदुरिति च । यमन्तर्यामिणं न विदुर्यं च ने विदुर्यच्च तदक्षरं दर्शनादिक्रियाकर्तृत्वेन सर्वेषां चेतनाधातुरित्युक्तम् । कस्त्वेषां विशेषः किंवा सामान्यमिति ।

अन्तर्यामी क्षेत्रज्ञोऽक्षरमित्येषामवान्तरविशेषप्रदर्शनार्थं प्रकृतत्वं दर्शयति—अत्रान्तर्यामीति । तत्रान्तर्यामिणः प्रकृतत्वं प्रकटयति—यमिति । क्षेत्रज्ञस्य

---

१ क. ख. घ. ङ. ज. न्येध्वं मन्यध्वम् । २ क. च्यध्व । मुच्यध्व । ३ ङ. मन्ये° । ४ ख. ग. नाऽऽशङ्क्नी । ५ घ. ण. ततः स्वप° । ६ घ. ण. °तिपद्य । ७ ख. घ. वा वि° ।

प्रकृतत्वं स्फुटयति–ये चेति । अक्षरस्य प्रस्तुतत्वं प्रत्याययति–यच्चेति । सर्वेषां विषयाणां दर्शनश्रवणादिक्रियाकर्तृत्वेन चेतनाधातुरिति यत्तदक्षरमुक्तमित्यन्वयः । तेषु विचारमवतारयति–कस्मिन्निति ।

तत्र केचिदाचक्षते परस्य महासमुद्रस्थानीयस्य ब्रह्मणोऽक्षरस्याप्रचलितस्वरूपस्येषत्प्रचलितावस्थाऽन्तर्यामी । अत्यन्तप्रचलितावस्थाक्षेत्रज्ञो यस्तं न वेदान्तर्यामिणम् । तथाऽन्याः पञ्चावस्थाः परिकल्पयन्ति । तथाऽष्टावस्था ब्रह्मणो भवन्तीति वदन्ति । अन्येऽक्षरस्य शक्तय एता इति वदन्त्यनन्तशक्तिमदक्षरमिति च । अन्ये त्वक्षरस्य विकारा इति वदन्ति ।

तस्मिन्विचारे स्वयूथ्यमतमुत्थापयति–तत्रेति । क्षेत्रज्ञस्यापस्तुतत्वमाह–यस्तमिति । यथा परस्याऽऽत्मनोऽन्तर्यामी जीवश्चेत्यवस्थे[1] ते कल्प्येते तथा तस्यैवान्याः पञ्चावस्थाः पिण्डो जातविराट् सूत्रं दैवमित्यव्यक्तं महाभूतसंस्थानभेदेन कल्पयन्तीत्याह तथेति । उक्तरीत्या कल्पनायां पिण्डो जातविराट् सूत्रं दैवमव्याकृतं साक्षी क्षेत्रज्ञश्चेत्यष्टावस्था ब्रह्मणो भवन्तीति वदन्तः परिकल्पयन्तीति सम्बन्धः । अवस्थापक्षं कथं दूषयन्तीत्याह–अन्य इति । तु शब्दोऽवस्थापक्षं दूषयन्विकारपक्षं निराकुर्वन्–अन्य इत्यादि ।

अवस्थाशक्ती तावन्नोपपद्यते । अक्षरस्याशनायादिसंसारधर्मातीतत्वश्रुतेः । न ह्यशनायाद्यतीतत्वमशनायादिधर्मवदवस्थावत्त्वं चैकस्य युगपदुपपद्यते । तथा शक्तिमत्त्वं च । विकारावयवत्वे च दोषाः प्रदर्शिताश्चतथं । तस्मादेना अमन्याः सर्वा कल्पनाः ।

तत्र पक्षद्वयं प्रत्याह–अवस्थेति । अन्तर्यामिप्रभृतीनामिति शेषः । तस्य सांसारिकधर्मातीतत्वश्रुतावपि कथमवस्थावत्त्वं शक्तिमत्त्वं वा न सिध्यतीत्याशङ्क्याऽऽह–न हीति । अवशिष्टपक्षद्वयनिराकरणं प्रागेव प्रवृत्तं स्मारयति–विकारेति । परपक्षनिराकरणमुपसंहरति–तस्मादिति ।

कस्तर्हि भेद एषाम् । उपाधिकृत इति ब्रूमो न स्वत एषां भेदोऽभेदो वा सैन्धवघनवत्प्रज्ञानघनैकरसस्वाभाव्यात् । "अपूर्वमनपरमनन्तरमबाह्यम्" "अयमात्मा ब्रह्म" इति च श्रुतेः । "सर्वानुभ्यन्तरो ह्यजः" इति चाऽऽथर्वणे । तस्मान्निरुपाधिकस्याऽऽत्मनो निरुपाख्यत्वान्निर्विशेषत्वादेकत्वाच्च नेति नेतीति व्यपदेशो भवति । अवि-

---

१ ख. ञ. ढ. °कल्पेते । २ क. घ. °क्षणम° । ३ क. ख. घ. ञ. ञ. °न्तः क° ।

याकामकर्मविशिष्टकार्यकरणोपाधिरात्मा संसारी जीव उच्यते । नित्यनिरतिशयज्ञानशक्त्युपाधिरात्माऽन्तर्यामीश्वर उच्यते ।

परकीयकल्पनानंभवे. पृच्छति—कस्तर्हीति । उत्तरमाह—उपाधीति । आत्मनि स्वतो विशेषाभावे हेतुमाह—मैघवेति । तत्रैव हेत्वन्तरमाह—अपूर्वमिति । बाह्यं कार्यमाभ्यन्तरं कारणं ताभ्यां कल्पिताभ्यां सहाधिष्ठानत्वेन सत्तास्फूर्तिप्रदतया वर्तते ब्रह्म स्वभावतस्तु जन्मादिसर्वविक्रियाशून्यं कूटस्थं तदित्याथर्वणश्रुतेरर्थः । आत्मनि स्वतो विशेषानवगमे फलितमाह—तस्मादिति । निरुपाख्यत्वं वाचां मनसां चागोचरत्वम् । तत्र निर्विशेषत्वमेकत्वं च हेतुः निरुपाधिकस्येति निर्विशेषत्वं साधयितुमुक्तम् । तत्र च वीप्सावाक्यं प्रमाणं कृतम् । कथं पुनरेवंविधस्य वस्तुनः संसारित्वं तदाह—अविद्येति . सर्वविशिष्टं यत्कार्यकरणं तेनोपाधिनोपहितः परमात्मा जीवः संसारीति च व्यपदेशभाग्भवतीत्यर्थः । तथाऽपि कथं तस्यान्तर्यामित्वं तदाह—नित्यानि । नित्यं निरतिशयं सर्वत्र प्रतिबद्धं ज्ञानं यस्मिन्तत्त्वपरिणामे सत्त्वप्रधाना मायाशक्तिरुपाधिस्तेन विशिष्टः सन्नात्मेश्वरोऽन्तर्यामीति चोच्यत इत्यर्थः ।

स एव निरुपाधिः केवलः शुद्धः स्वेन स्वभावेनाक्षरं पर उच्यते । तथा हिरण्यगर्भाव्याकृतदेवताजातिपण्ढमनुष्यातिर्यक्प्रेतादिकार्यकरणोपाधिभिर्विशिष्टस्तदाख्यस्तद्रूपो भवति । तथा तदेजति तन्नैजतीति व्याख्यातम् । तथा " एष त आत्मा " " एष सर्वभूतान्तरात्मा " " एष सर्वेषु भूतेषु गूढः " "तत्त्वमसि " "अहमेवेदं सर्वम् " "आत्मैवेदं सर्वम् " " नान्योऽतोऽस्ति द्रष्टा " इत्यादिश्रुतयो न विरुध्यन्ते । कल्पनान्तरेष्वेताः श्रुतयो न गच्छन्ति । तस्मादुपाधिभेदेनैवैषां भेदो नान्यथैकमेवाद्वितीयमित्यवधारणात्सर्वोपनिषत्सु ॥ १२ ॥

इति बृहदारण्यकोपनिषद्भाष्ये तृतीयाध्यायस्याष्टमं ब्राह्मणम् ॥ ८ ॥

कथं तर्हि तस्मिन्नक्षरशब्दप्रवृत्तिस्तत्राऽऽह—स एवेति । निरुपाधित्वं शुद्धत्वे हेतुः । केवलत्वमद्वितीयत्वम् । तथाऽपि कथं तत्र हिरण्यगर्भादिशब्दप्रवृत्तिरित्याशङ्क्याऽऽह—तयेति । यथैकस्मिन्नेव परस्मिन्नात्मनि कल्पितोपाधिकृतं नानात्वं तथा तदेजति तन्नैजतीत्यादि वाक्यमाश्रित्य पूर्वश्लोकमित्याह—तथेति । कल्पनया परस्य नानात्वं वस्तुतस्त्वेकरूपमित्यत्र श्रुतीरुदाहरति—तथेत्यादिना । अवस्थाशक्तिविकारावयवपक्षेष्वपि यथोक्तश्रुतीनामुपपत्तिर्वाच्य-

१ घ. ञ. °र्यम्य° । २ घ. ञ. ण. °वायोगे फ° । ३ च. ज. °न्नाः । ४ च. ज. °ग्रन्थ्या° । ५ ख. ग. सर्वम् ।

ह्याऽऽह—कल्पनान्तरेष्विति । औपाधिकोऽन्तर्याम्यादिभेदो न स्वाभाविक इत्युपसंहरति—तस्मादिति । स्वतो वस्तुनि नास्ति भेदः किंत्वैकरस्यमेवेत्यत्र हेतुमाह—एकमिति ॥ १२ ॥

इति बृहदारण्यकोपनिषद्भाष्यटीकायां तृतीयाध्यायस्या-
ष्टमं ब्राह्मणम् ॥ ८ ॥

(अथ तृतीयाध्यायस्य नवमं ब्राह्मणम्) ।

अथ हैनं विदग्धः शाकल्य पप्रच्छ पृथिव्यादीनां सूक्ष्मतारत-
म्यक्रमेण पूर्वस्य पूर्वस्योत्तरोत्तरस्मिन्नान्तर्यं कथयन्सर्वा-
न्तरं ब्रह्म प्रकाशितवान् । तत्र च ब्रह्मण व्याकृतविषये सूत्रभेदेषु
नियन्तृत्वम् [1] [2] [3] [4] [5] [6] [7] [8] । व्याकृतविषे लिङ्गमिति । तस्यैव ब्राह्मणः
भाक्षेपसंक्षेपाभ्यां नियन्तव्यभेदसंकोचविकासद्वारेणाधिगन्तव्ये इति
तदर्थं शाकल्यब्राह्मणमारभ्यते ।

ब्राह्मणान्तरमुत्थापयति—अथेति । गार्गिप्रश्ने निर्णीते तथा ब्रह्मवदनं प्रत्येतुल्यो नास्तीति सर्वमिति कथनानन्तर्यमथशब्दार्थः । सगर्वं वक्तुं वृत्तं कीर्तयति—पृथिव्यादीनि । इति यत्क्षात्रादित्यादि प्रस्तुत्य सर्वान्तरत्वनिरूपणद्वारा क्षात्रादिकमार्थिकं ब्राह्मणत्रये निर्धारितमित्यर्थः । अन्तर्यामिब्राह्मणे मुख्यतो निर्दिष्टमर्थमनुद्रवति—तस्य चेति । नामरूपाभ्यां व्याकृतो विषयो द्वैतपक्षस्तत्र भूम्यप्भेदा ये पृथिव्यादयस्तेषु नियम्येषु नियन्तृत्वं तस्योक्तमिति योजना । किमिति व्याकृतविषये नियन्तृत्वमुक्तमिति तत्राऽऽह—व्याकृतेति । तत्र हेः परतन्त्रस्य पृथिव्यादेर्ग्रहणं नियम्यत्वे स्पष्टतरं लिङ्गमिति तत्रैव नियन्तृत्वमुक्तमित्यर्थः । वृत्तमनूद्योत्तरस्य ब्राह्मणस्य तात्पर्यमाह—तस्यैवेति । नियन्तव्यानां देवताभेदानां प्राणान्तः संकोचो विकासश्चाऽऽनन्त्यपर्यन्तस्तद्द्वारा प्रकृतस्यैव ब्रह्मणः साक्षात्परोक्षत्वे स एष नेति नेत्यात्मेत्यादिनाऽधिगन्तव्ये इति कृत्वा तथं देवतासंकोचविकासोक्तिरनन्तरं वस्तुनिर्देश इत्येतदर्थमेतद्ब्राह्मणमित्यर्थः ।

अथ हैनं विदग्धः शाकल्यः पप्रच्छ कति देवा
याज्ञवल्क्येति स हैतयैव निविदा प्रतिपेदे यावन्तो

---

१ ख. ग. ङ च छ. ढ. त्तरोत्त । २ ग °येषु च व्य° । ३ क क. घ. च. छ. ज. ञ. ढ. °क्षादपरो° । ग. °क्षात्त्वागो । ङ क्षात्करणगे° । ४ क घ छ. ज. °ते वि° ५ ञ. ण. साक्षात्त्वादि° । ६ क. पुरतो । ७ घ ञ ण. °मुक्त त° । ८ क. ख. ञ. ढ °क्षात्त्वापरो° ।

वैश्वदेवस्य निविद्यच्यन्ते त्रयश्च त्री च शता त्रयश्च त्री च सहस्रेत्योमिति होवाच कत्येव देवा याज्ञवल्क्येति त्रयस्त्रिंशदित्योमिति होवाच कत्येव देवा याज्ञवल्क्येति षडित्योमिति होवाच कत्येव देवा याज्ञवल्क्येति त्रय इत्योमिति होवाच कत्येव देवा याज्ञवल्क्येति द्वावित्योमिति होवाच कत्येव देवा याज्ञवल्क्येत्यध्यर्ध इत्योमिति होवाच कत्येव देवा याज्ञवल्क्येत्य इत्योमिति होवाच कतमे ते त्रयश्च त्री च शता त्रयश्च त्री च सहस्रेति ॥ १ ॥

अथ हैनं विदग्ध इति नामतः शाकल्यापत्यं शाकल्यः पप्रच्छ कतिसंख्याका देवा हे याज्ञवल्क्येति । स याज्ञवल्क्यो ह किलैतयैव वक्ष्यमाणया निविदा मन्त्रोपदेशे संख्यां वा संख्यां पृष्टवाञ्शाकल्यो यावन्तो यावत्संख्याका देवा वैश्वदेवस्य शास्त्रस्य निविदि । निविन्नाम देवतासंख्यावचनानि मन्त्रपदानि कानिचिद्वह्वृचे शास्त्रे शस्यन्ते तेषां निविदज्ञानं । तस्यां निविदि यावन्तो देवाः श्रूयन्ते तावन्तो देवा इति । का पुनः सा निविदिति । तानि निवित्पदानि प्रदर्श्यन्ते—त्रयश्च त्री च शता त्रयश्च देवा देवानां त्री च त्रीणि च शतानि पुनरप्येवं त्रयश्च त्री च सहस्रा सहस्राण्येतावन्तो देवा इति । शाकल्योऽप्योमिति होवाच । एवमेषा मध्यमा संख्या सम्यक्तया ज्ञाता । पुनस्तषामेव देवानां संकोचविषयां संख्यां पृच्छति—कत्येव देवा याज्ञवल्क्येति । त्रयस्त्रिंशत्षट्त्रयो द्वावध्यर्ध एक इति । देवतासंकोचविकासविषयां संख्यां पृष्टवा पुनः संख्येयस्वरूपं पृच्छति—कतमे ते त्रयश्च त्री च शता त्रयश्च त्री च सहस्रेति ॥ १ ॥

ब्राह्मणारम्भमेवमुक्त्वा तदक्षराणि व्याकरोति—अथेत्यादिना । निविदि पू-

---

१ घ. झ. °तः शाक° । २ ङ. च. ढ. °दे यां । ३ ख. ग. यां पृ° । ४ ग. °का नि° । ५ ख. देवता । ६ ख. °नि स्युः । त° । ७ घ. ण. विदग्धेत्यादिना ।

वन्त इत्युत्तरत्र संबन्धः। केयं निविदिति पृच्छति—निविज्ञामेति। उत्तरमाह—देवतेति। पदार्थमुक्त्वा वाक्यार्थं कथयति—तस्यामिति। यद्यपि भाष्ये निविद्व्याख्याता तथाऽपि प्रश्नद्वारा श्रुत्या तां व्याख्याति—का पुनरित्यादिना। अनुज्ञावाक्यं व्याकरोति—एवमिति। षष्ट्या संख्या षडधिकत्रिंशताधिकत्रिसहस्रलक्षणा। कत्येवेत्यादिप्रश्नानां पूर्वप्रश्नेन पौनरुक्त्यमाशङ्क्य परिहरति—पुनरित्यादिना कतमे ते त्रयश्चेत्यादिप्रश्नस्य विषयभेदं दर्शयति—देवतेति ॥ १ ॥

स होवाच महिमान एवैषामेते त्रयस्त्रिꣳशत्त्वेव देवा इति कतमे ते त्रयस्त्रिꣳशदित्य[1] वसव एकादश रुद्रा द्वादशाऽऽदित्यास्त एकत्रिꣳशदिन्द्रश्चैव प्रजापतिश्च त्रयस्त्रिꣳशाविति ॥ २ ॥

[1] स होवाचेतरो महिमानो विभूतय एषा + त्रयस्त्रिंशतां देवानामेते त्रयश्च त्री च शतेत्यादयः। परमार्थतस्त्वेव त्रयस्त्रिंशत्त्वेव देवा इति। कतमे ते त्रयस्त्रिंशदित्युच्यते। अष्टौ वसव एकादश रुद्रा द्वादशाऽऽदित्यास्त एकत्रिंशदिन्द्रश्चैव न प्रजापतिश्च त्रयस्त्रिंशतां पूरणौ ॥ २ ॥

कति तर्हि देवा निविदि भवन्ति तत्राऽऽह—परमार्थतस्त्विति। त्रयस्त्रिंशतो देवानां स्वरूपं प्रश्नद्वारा निर्धारयति—कतमे त इति ॥ २ ॥

कतमे वसव इत्यग्निश्च पृथिवी च वायुश्चान्तरिक्षं चाऽऽदित्यश्च द्यौश्च चन्द्रमाश्च नक्षत्राणि चैते वसव एतेषु हीदꣳ सर्वꣳ हितमिति तस्माद्वसव इति ॥ ३ ॥

कतमे वसव इति तेषां स्वरूपं प्रत्येकं पृच्छ्यते। अग्निश्च पृथिवी चेत्यग्न्याद्या नक्षत्रान्ता एते वसवः। प्राणिनां कर्मफलाश्रयत्वेन कार्यकरणसंघातरूपेण तन्निवासत्वेन च विपरिणमन्तो जगदिदं सर्वं वासयन्ति वसन्ति च। ते यस्माद्वासयन्ति तस्माद्वसव इति ॥ ३ ॥

+ इदं बहुवचनं चिन्त्यम्।

---

१ ण. °ति ॥ १ ॥ तर्ह्यनन्ता दे°। २ ख. °च्यन्ते। अ°। ३ क. ण. °वा भ°। ४ ण. त्रयस्त्रिंशतां। ५ क. ख. ग. घ. ङ. छ. ज. ढ. ठ. ढ. हीद वसु स°।

उत्तरपक्षेपपञ्चप्रतीकं गृहीत्वा तस्य तात्पर्यमाह—कतम इति । तेषां वस्वादीनां प्रत्येकं वस्वादित्रये प्रतिगणमिन्द्रे प्रजापतौ चैकैकस्येत्यर्थः । तेषां वसुत्वमेवेषु हीत्यादिवाक्यावष्टम्भेन स्पष्टयति—प्राणिनामिति । तेषां कर्मणस्तत्फलस्य चाऽऽश्रयत्वेन तेषामेव निवासत्वेन च शरीरेन्द्रियसमुदायाकारेण विपरिणमन्तोऽन्यादृशं जगदनेनाद्वासयन्ति स्वयं च तत्र वसन्ति तस्माद्युक्तं तेषां वसुत्वमित्यर्थः । वसुत्वं निगमयति—ते यस्मादिति ॥ ३ ॥

कतमे रुद्रा इति दशेमे पुरुषे प्राणा आत्मैकादश-
स्ते यदास्माच्छरीरान्मर्त्यादुत्क्रामन्त्यथ रोदयन्ति तद्-
यद्रोदयन्ति तस्माद्रुद्रा इति ॥ ४ ॥

रुद्रा इति दशेमे पुरुष कर्मबुद्धीन्द्रियाणि प्राणा आत्मा मन एकादशानां पूरणत्वात् । एते प्राणा यदाऽस्माच्छरीरात्मनः कर्मफलापनयाय उत्क्रामन्ति । अथ तदा रोदयतेऽन्यानात्मनः । तच्च यस्माद्रोदयन्ति तं संबन्धिनस्तस्माद्रुद्रा इति ॥ ४ ॥

प्राणशब्दार्थमाह—कर्मेति । ते यदाऽस्मादित्यादि वाक्यमनूद्य तेषां रुद्रत्वमुपपादयति त एते प्राणा इति । मरणकालः तत्रेत्यर्थः ॥ ४ ॥

कतम आदित्या इति द्वादश वै मासाः संवत्सरस्यैत
आदित्या एत हादꣳ सर्वमाददाना यन्ति ते यदिदꣳ
सर्वमाददाना यन्ति तस्मादादित्या इति ॥ ५ ॥

कतम आदित्या इति द्वादश वै मासाः संवत्सरस्य कालस्यावयवा प्रसिद्धा एत आदित्याः । कथम् एते हि यस्मात्पुनः पुनः परिवर्तमानाः प्राणिनामायूंषि कर्मफलं चाऽऽददाना गच्छन्त उपादत्तो यन्ति गच्छन्ति ते यद्यस्मादेवमिदं सर्वमादददाना यन्ति तस्मादादित्या इति ॥ ५ ॥

तेषामादित्यत्वमप्रसिद्धमिति शङ्कते—कथमिति । एते हीत्यादिवाक्येनोत्तरमाह—एते हीति ॥ ५ ॥

---

१ घ. ञ °श्रपञ्चप्रती । २ क. ख. ढ तदाश्रय । ३ ङ. °यदस्मा° । ४ घ. °णाच्च ए° । ५ ख. ङ. च. छ ढ °भोगाश्रयत्वेन भग° । घ ज °भोगायोत्का° । ६ क. ख. ग. ङ. °न्ति तच्चत्सं° । च. °न्ति °संब° । ७ ग ते तत्संब° । ८ ख. ङ. छ. °न्ति हि ते° ।

कतम इन्द्रः कतमः प्रजापतिरिति स्तनयित्नुरे-
वेन्द्रो यज्ञः प्रजापतिरिति कतमः स्तनयित्नुरि-
त्यशनिरिति कतमो यज्ञ इति पशव इति ॥ ६ ॥

कतम इन्द्रः कतमः प्रजापतिरिति स्तनयित्नुरेवेन्द्रो यज्ञः प्रजापतिरिति कतमः स्तनयित्नुरित्यशनिरिति । अशनिर्वज्रं वीर्यं बलं यत्प्राणिनः प्रमापयति स इन्द्रः । इन्द्रस्य हि तत्कर्म । कतमो यज्ञ इति पशव इति । यज्ञस्य हि साधनानि पशवः । यज्ञस्यारूपत्वात्पशुसाधनाश्रयत्वाच्च पशवो यज्ञ इत्युच्यते ॥ ६ ॥

प्रतिज्ञं वज्रं व्यावर्तयति—वीर्यमिति । तदेव संघातनिष्ठत्वेन स्फुटयति—**बलमिति**। किं तद्बलमिति चेत्तत्राऽऽह—यत्प्राणिन इति । प्रमापणं हिंसनम् । कथं तस्येन्द्रत्वमुपचारादित्याह—इन्द्रस्य हीति । पशूनां यज्ञत्वमप्रसिद्धमित्याशङ्क्याऽऽ—यज्ञस्य हीति । कारणे कार्योपचारं साधयति—यज्ञस्येति । अमूर्तत्वात्साधनव्यतिरिक्तरूपाभावाद्यज्ञस्य पश्वाश्रयत्वाच्च पशवो यज्ञ इत्युच्यत इत्यर्थः ॥ ६ ॥

कतमे षडित्यग्निश्च पृथिवी च वायुश्चान्तरिक्षं चाऽऽ-
दित्यश्च द्यौश्चैत षडते इदꣳ सर्वꣳ षडिति ॥ ७ ॥

कतमे षडिति । त एवाग्न्यादयो वसुत्वेन पठिताश्चन्द्रमसं नक्षत्राणि च वर्जयित्वा षड् भवन्ति षट्संख्याविशिष्टाः । एते हि यस्मात्त्रयस्त्रिंशदादि यदुक्तमिदं सर्वमेत एव षड भवन्ति । सर्वो हि वस्वादिर्विस्तर एतेष्वेव षट्स्वन्तर्भवतीत्यर्थः ॥ ७ ॥

एते हीति मतीकमादाय व्याचष्टे—यस्मादिति । यत्त्रयस्त्रिंशदाद्युक्तं तत्सर्वमेत एव यस्मात्तस्मादेते षड् भवन्तीति योजना । अक्षरार्थमुक्त्वा वाक्यार्थमाह—**सर्वो हीति ॥ ७ ॥**

कतमे ते त्रयो देवा इतीम एव त्रयो लोका

---

१ ख. ञ. ढ. 'निर्दिष्टत्व' । २ क. ख. ढ. तदिति चोत्तरमाह । २घ. ण. °त्तदाह । ४ ग. 'विस्तार । ५ क. ख. ढ. 'स्माद' ।

एषु ह्येमे सर्वे देवा इति कतमो तौ द्वौ देवावित्यन्नं चैव प्राणश्चेति कतमोऽध्यर्ध इति योऽयं पवत इति ॥ ८ ॥

कतमे ते त्रयो देवा इति। इम एव त्रयो लोका इति पृथिवीमग्निं चैकीकृत्यैको देवोऽन्तरिक्षं वायुं चैकीकृत्य द्वितीयो दिवमादित्यं चैकीकृत्य तृतीयस्त एव त्रयो देवा इति। एषु हि यस्माच्च त्रिषु देवेषु सर्वे देवा अन्तर्भवन्ति तेनैत एव देवास्त्रय इत्येष नैरुक्तानां केषांचित्पक्षः। कतमौ तौ द्वौ देवाविति। अन्नं चैव प्राणश्चैतौ द्वौ देवावनयोः सर्वेषामुक्तानामन्तर्भावः कतमोऽध्यर्ध इति। योऽयं पवते ह्यायुः ॥ ८ ॥

प्रतिज्ञासमाप्तावितिशब्दः। तत्र हेतुः—एषु ह्येति। देवलक्षणकृतां केषांचिदेष पक्षो दर्शितोऽन्येषां तु त्रयो लोका इत्यस्य यथाश्रुतोऽर्थ इत्याह—इत्येष इति ॥ ८ ॥

तदाहुर्यदयमेक इवैव पवतेऽथ कथमध्यर्ध इति यदस्मिन्निदꣳ सर्वमध्याध्नोत्तेनाध्यर्ध इति कतम एको देव इति प्राण इति स ब्रह्म त्यदित्याचक्षते ॥ ९ ॥

तत्तत्राऽऽहुश्चोदयन्ति यदय वायुरेक इवैवैक एव पवते। अथ कथमध्यर्ध इति। यदस्मिन्निदं सर्वमध्याध्नोदस्मिन्वायौ सतीदं सर्वमध्याध्नोदधि ऋद्धिं प्राप्नोति तेनाध्यर्ध इति। कतम एका देव इति। प्राण इति। स प्राणो ब्रह्म सर्वदेवात्मकत्वान्महद्ब्रह्म तन स ब्रह्म त्यदित्याचक्षते त्यादिति तद्ब्रह्माऽऽचक्षते परोक्षाभिधायकेन शब्देन। देवानामेतदेकत्वं नानात्वं च। अनन्तानां देवानां निर्दिष्टसंख्याविशिष्टेष्वन्तर्भावः। तेषामपि त्रय स्त्रिंशादादिषूत्तरोत्तरेषु यावदेकस्मिन्प्राणे प्राण स्यैव चैकस्य सर्वोऽनन्तसंख्यातो विस्तरः। एवमेकश्चानन्तश्चावान्तरसंख्याविशिष्टश्च प्राण एव। तत्र च देवस्यैकस्य नामरूपकर्मगुणशक्तिभेदोऽधिकारभेदात् ॥ ९ ॥

एकस्याध्यर्धत्वमाक्षिपति—तत्तत्रेति इवशब्दस्तु कथमित्यत्र संबध्यते।

---

१ ख. °वा इम। २ ग. च. ढ. °स्मात्त्रिषु। ३ च. ढ. विस्तारः।

रिहरति-यदस्मिन्निति । प्राणस्य ब्रह्मत्वं साधयति-सर्वेति । तेन महत्त्वे-नेति यावत् । तस्य परोक्षत्वप्रतिपत्तौ प्रयत्नगौरवार्थं कथयति-स्यादितीति । उक्तमर्थं प्रतिपत्तिसौकर्यार्थं संगृह्णाति-देवानामिति । एकत्वं प्राणे पर्यवसानम् । नानात्वमानन्त्यम् । षडधिकत्रिशताधिकत्रिसहस्रसंख्याकानामेव देवानामश्रोकत्वात्कथं तदानन्त्यमित्याशङ्क्य शतसहस्रशब्दाभ्यामनन्तत्वाप्युक्तवे त्याशयेनाऽऽह-अनन्तानामिति । एकस्मिन्प्राणे पर्यवसानं यावद्भवति तावत्पर्यन्तमुत्तरोत्तरेषु त्रयस्त्रिंशदादिषु तेषामप्यन्तर्भाव इत्याह-तेषामपीति । प्राणस्य कस्मिन्नन्तर्भावस्तत्राऽऽह-प्राणस्येति । संगृहीतमर्थमुपसंहरति-एवमिति एकस्यानेकधाभावे किं निमित्तमित्याशङ्क्याऽऽह-तन्नेति । उक्त्वा प्राण-स्वरूपे स्थिते सतीति यावत् । देवस्यैकस्य प्रकृतस्य प्राणस्यैवेत्यर्थः । प्राणिनां ज्ञाने कर्मणि चाधिकारस्य स्वामित्वस्य भेदोऽधिकारभेदस्तन्निमित्तत्वेन देवस्यापि कर्तृसंस्थानपरिणामसिद्धिः । प्राणिनो हि ज्ञाने कर्मणि चानुष्ठाय सूत्रांशमन्त्र आपद्यन्ते तद्भक्तो यथोक्ते भेद इत्यर्थः ॥ ७ ॥

इदानीं तस्यैव प्राणस्य ब्रह्मणः प्रकारान्तरेण भेद उपदिश्यते-

पृथिव्येव यस्याऽऽयतनमग्निर्लोको मनोज्योतिर्वै तं पुरुषं विद्यात्सर्वस्याऽऽत्मनः परायणं संविता म्यात । याज्ञवल्क्य वद वा अहं तं सर्वस्याऽऽत्मनः परायणं यमात्थ इति तस्मै होवाच शारीरः पुरुषः म एष वदेव शाकल देवतेत्यनृतमिति होवाच ॥ ८ ॥

पृथिव्येव यस्य देवस्याऽऽयतनमाश्रयोऽग्निर्लोको यस्य लोकस्यार्थ-नेति लोकः पश्यतीत्यग्निना पश्यतीत्यर्थः । मनोज्योतिर्मनसा ज्योतिषा संकल्पविकल्पादिकार्यं करोति यः सोऽयं मनोज्योतिः । पृथिवीशरीरं ऽग्निर्दर्शना मनसा संकल्पयिता पृथिव्यभिमानी कार्य-करणसंघातवान्देव इत्यर्थः । य एवंविशिष्टं वै तं पुरुषं विद्याद्विजा-नीयात्सर्वस्याऽऽत्मन आध्यात्मिकस्य कार्यकरणसंघातस्याऽऽत्मनः परमयनं पर आश्रयस्तं परायणम् । मातृजेन त्वङ्मांसरुधिररूपेण

---

१ छ. °स्रसंख्याभ्या । २ घ. °क्त्वभा° । ३ घ ण. °णि वाऽधि° । ४ घ. ण. °मे वाऽनु° । ५ ख. °कल्पा° । ६ घ. ज झ. °णवा° । ७ क. ख. ग. घ. ङ. च. छ. ज. ट. °यं यो वि° ।

क्षेत्रस्थानीयेन बीजस्थ नीयस्य पितृजस्यास्थिमज्जाशुक्ररूपस्य परायणं करणात्मनश्च स वै वेदिता स्याद्य एतदेवं वेत्ति स वै वेदिता पण्डितः स्यादित्यभिप्रायः याज्ञवल्क्य त्वं तमजानन्नेव पाण्डित्याभिमानीत्यभिप्रायः ।

संकोचविकासाभ्यां प्राणस्वरूपोक्त्यनन्तरमवसरप्राप्तारिदानीमित्युच्यते । उपरिष्यते ध्यानार्थमिति शेषः अवयवशो वाक्यं याजयति–पृथिवीति । संपिण्डितं वाक्यत्रयार्थं कथयति-पृथिवीत्यादिना । वैशब्दोऽवधारणार्थः । तं परायणं य एव विजानीयात्स एव वेदिता स्यादिति संबन्धः । अथ केन रूपेण पृथिवीदेवस्य कार्यकरणसंघातं प्रत्याश्रयत्वं तदाह-मातृजनाते । पृथिव्या मातृशब्दवाच्यत्वाद्य एव देवोऽहं पृथिव्यस्मीति मन्यते स एव शरीराम्भकमातृजकोशत्रयाभिमानेतया वर्तते । तथा च तस्य तेन रूपेण पितृजत्रितयं कार्यं लिङ्गं च करणं प्रत्याश्रयत्वं संभवतीत्यर्थः । पृथिवीदेवस्य परायणत्वमुपपाद्यानन्तरवाक्यमुत्थाप्य व्याचष्टे–स वै वेदितेति । स्यादपि मम किमायातमित्याशङ्क्याऽऽह–याज्ञवल्क्येति ।

यदि तद्विज्ञाने पाण्डित्यं लक्ष्यते वेद वा अहं तं पुरुषं सर्वस्याऽऽत्मनः परायणं यमात्थ यं ब्रवीषि तमहं वद तत्र शाकल्यस्य वचनं द्रष्टव्यम् । यदि त्वं वेत्थ तं पुरुष ब्रूहि किंविशेषणोऽसौ । शृणु यद्विशेषणः स य एवायं शरीरः पार्थिवांशे शरीरे मधः शारीरो मातृजकोशत्रयरूप इत्यर्थः स एव देवो यस्त्वया पृष्टो हे शाकल्य । किंत्वस्ति तत्र वक्तव्यं विशेषणान्तरं तद्वदेव पृच्छेत्यर्थो हे शाकल्य । स एवं पक्षोभितोऽमर्षवशग आह–तोत्रार्दित इव गजमजस्तस्य देवस्य शारीरस्य का देवता यस्मान्निष्पद्यते यः सा तस्य देवतेत्यस्मिन्प्रकरणे विवक्षितम् । अमृतामिति होवाचामृतामिति यो भुक्तस्यान्नस्य रसो मातृजस्य लोहितस्य निष्पातिहेतुस्तस्माद्धयन्नरसाल्लोहितं निष्पद्यते स्त्रियां श्रेत ततश्च लोहितमयं शरीरं बीजाश्रयम् तमानमन्यत् ॥ १० ॥

स पुरुषो येन विशेषणेन विशिष्टस्तद्विशेषणमुच्यमानं शृण्वित्युक्त्वा वदेत्याऽऽह–य एवेति । शरीरं हि पञ्चभूतात्मकं तत्र पार्थिवांशे जनकत्वेन स्थितः

---

१ घ "प्राप्तत्वमिदा° । ढ. "प्राप्तमिदा° । २ क. ण "कार्यलिं° । ३ ण. "ङ्गं कार° । ४ ख. ग. ङ झ "नेन पा° । ५ क. घ. "नं च द्र° । ६ घ. च. छ. "र्थिवंश° । क. ख. ढ. "र्थिवोऽज्ञः श° । ७ ग घ. च. ज झ. ट. ढ स । ८ क. ख. ग. छ. झ. ढ. "क्षित । अ° । ९ ख. स्त्रियामाश्रि° । ग. च. ज. स्त्रियास्तन° । ङ. स्त्रियां त° । १० क. "शेन ज° ।

शरीर इति यावत् । तस्य जीवत्वं वारयति मातृजेति । पृथिवीदेवस्य निर्णीतित्वशङ्कां वारयति-किंत्विति । याज्ञवल्क्यो वक्ता सन्प्रष्टारं शाकल्यं प्रति कथं वदैवेति कथयति तत्राऽऽह--पृच्छति । क्षोभितस्यामर्षवशगत्वे दृष्टान्त--तोत्रेति । प्राकरणिकं देवताशब्दमाह--यस्मादिति । पुरुषो निष्पत्तिकर्ता षष्ठ्योच्यते । लोहितनिष्पत्तिहेतुतापन्नरसस्यानुभवेन साधयति-यस्माद्धीति । तस्य कार्यमाह-ततश्चेति । हि यस्माद्वह्नीन्धनपदार्थनिष्ठात्तत्कार्यस्वरूपांतरुधिररूपं बीजं मांसास्थिमज्जाशुक्रात्मकस्याऽऽश्रयभूतं भवतीत्यर्थः । पर्यायसप्तकमाद्यपर्यायेण तुल्यार्थत्वान्न पृथग्व्याख्यानापेक्षामित्याह--समाप्तमिति ॥ १० ॥

काम एव यस्याऽऽयतनꣳ हृदयं लोको मनोज्यो-
तिर्यो वै तं पुरुषं विद्यात्सर्वस्याऽऽत्मनः परायणꣳ
स वै वेदिता स्यात् । याज्ञवल्क्य वेद वा अहं तं
पुरुषꣳ सर्वस्याऽऽत्मनः परायणं यमात्थ य एवायं
काममयः पुरुषः स एष वदैव शाकल्य तस्य का
देवतेति स्त्रिय इति होवाच ॥ ११ ॥

काम एव यस्याऽऽयतन स्त्रीव्यतिकराभिलाषः कामः कामशरीर इत्यर्थः । हृदय लोका हृदयेन बुद्ध्या पश्यति । य एवायं काममयः पुरुषोऽध्यात्ममपि काममय एव तस्य का देवतेति स्त्रिय इति होवाच । स्त्रीतो हि कामस्य दीप्तिर्जायते ॥ ११ ॥

उत्तरपर्यायेषु येषां पदानामर्थभेदस्तेषां तत्कैलनार्थं प्रतीकं गृह्णाति-कामइति । वाक्यार्थमाह-कामशरीर इत्यर्थ इति । स च हृदयदर्शनो मनसा संकल्पयितेति पूर्ववत् । तस्य विशेषणं दर्शयति-य एवेति । अध्यात्मिकस्य काममयस्य पुरुषस्य कारणं पृच्छति-तस्येति । तस्यास्तत्कारणत्वमनुभवेन व्यनक्ति-स्त्रीतो हीति ॥ ११ ॥

रूपाण्येव यस्याऽऽयतनं चक्षुर्लोको मनोज्यो
तिर्यो वै तं पुरुषं विद्यात्सर्वस्याऽऽत्मनः पराय-
णꣳ स वै वेदिता स्यात् । याज्ञवल्क्य वेद

---

१ घ. ञ. ण. व्यावर्तयति । २ ख. ञ. ङ. तादृतीं । ३ ञ. °ष्ठा तत्का° । घ. ञ. °ष्टात्का° । ४ घ. ञ. ण. °त्कथना° ।

वा अहं तं पुरुषꣳ सर्वस्याऽऽत्मनः परायणं
यमात्थ य एवासावादित्ये पुरुषः स एष वदैव
शाकल्य तस्य का देवतेति सत्यमिति होवाच
॥ १२ ॥

रूपाण्येव यस्याऽऽयतनम् । रूपाणि शुक्लकृष्णादीनि । य एवासावादित्ये पुरुषः सर्वेषां हि रूपाणां विशिष्टं कार्यमादित्ये पुरुषस्तस्य का देवतेति । सत्यमिति होवाच । सत्यमिति चक्षुरुच्यते । चक्षुषो ह्युत्पत्तौ आदित्यस्याधिदैवतस्य निष्पत्तिः ॥ १२ ॥

रूपशब्दितस्य चक्षुर्ग्राह्यस्य मनसा संकल्पयितुर्देवस्य कथमादित्ये पुरुषो विशेषणमित्याशङ्क्याऽऽह—सर्वेषां हीति । रूपाणि चक्षुर्ग्राह्याणि तानिनो देवस्याऽऽदित्ये पुरुषो विशेषावच्छेदः । स च सर्वरूपप्रकाशकत्वादेव तैजसैः स्वप्रकाशनायाऽऽरोपितः । तस्माद्युक्तं यथोक्तं विशेषणमित्यर्थः । कथं चक्षुषः सकाशादादित्यस्योत्पत्तिरित्याशङ्क्य ' चक्षोः सूर्यो अजायत ' इति श्रुतिमाश्रित्याऽऽह—चक्षुषो ह्युत्पत्ताविति ॥ १२ ॥

आकाश एव यस्याऽऽयतनꣳ श्रोत्रं लोको मनोज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्याऽऽत्मनः परायणꣳ स वै वेदिता स्यात् । याज्ञवल्क्य वेद वा अहं तं पुरुषꣳ सर्वस्याऽऽत्मनः परायणं यमात्थ य एवायꣳ श्रौत्रः प्रातिश्रुत्कः पुरुषः स एष वदैव शाकल्य तस्य का देवतेति दिश इति होवाच ॥ १३ ॥

आकाश एव यस्याऽऽयतनम् । य एवायं श्रोत्रे भवः श्रौत्रस्तस्मिन्नपि प्रतिश्रवणवेलायां विशेषतो भवतीति प्रातिश्रुत्कस्तस्य का देवतेति । दिश इति होवाच । दिग्भ्यो ह्यसावाध्यात्मिको निष्पद्यते ॥ १३ ॥

तत्रापीति श्रौत्रोक्तिः । प्रतिश्रवणं संवादः प्रतिविषयं श्रवणं वा सर्वाणि श्रवणानि वा तदशायामिति यावत् । दिशस्तत्राधिदैवतमिति श्रुतिमाश्रित्याऽऽह—दिग्भ्यो हीति ॥ १३ ॥

---

१ ङ. च. ज. झ. ड. °षो ह्यात्मन आ° । २ ख. घ. ञ. ण. °ति श्रोत्रो° ।

तम एव यस्याऽऽयतनꣳ हृदयं लोको मनो-
ज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्याऽऽत्मनः
परायणꣳ स वै वेदिता स्यात् । याज्ञवल्क्य
वेद वा अहं तं पुरुषꣳ सर्वस्याऽऽत्मनः परायणं
यमात्थ य एवायं छायामयः पुरुषः स एष
वदैव शाकल्य तस्य का देवतेति मृत्युरिति
होवाच ॥ १४ ॥

तम एव यस्याऽऽयतनम । तम इति शार्वराद्यन्धकारः परिगृह्यते । अध्यात्मं छायामयाऽज्ञानमयः पुरुषस्तस्य का देवतेति । मृत्युरिति होवाच । मृत्युरधिदैवतं तस्य निष्पत्तिकारणम् ॥ १४ ॥

अधिदैवतं मृत्युरीश्वरो मृत्युर्नेवेदमात्मानं दिदिक्षति [१] इति । तस्य च तस्याज्ञानमयस्याऽऽध्यात्मिकस्य पुरुषस्योत्पत्तिकारणं कर्मप्रवृत्तेरीश्वराधीनत्वादीश्वरप्रेरितो मच्छेत्स्वर्गं वा श्वभ्रमेव वेति हि पठन्ति तदाह—मृत्युरिति ॥ १४ ॥

रूपाण्येव यस्याऽऽयतनं चक्षुर्लोको मनोज्यो-
तिर्यो वै तं पुरुषं विद्यात्सर्वस्याऽऽत्मनः परा
यणꣳ स वै वेदिता स्यात् । याज्ञवल्क्य वेद
वा अहं तं पुरुषꣳ सर्वस्याऽऽत्मनः परायणं
यमात्थ य एवायमादर्शे पुरुषः स एष वदैव
शाकल्य तस्य का देवतत्यमुरिति होवाच
॥ १५ ॥

रूपाण्येव स्याऽऽयतनम् । पूर्वं साधारणानि रूपाण्यक्तानीह तु प्रकाशकानि विशिष्टानि रूपाणि गृह्यन्ते । रूपायतनस्य दृश्यस्य विशेषायतनं प्रतिबिम्बाधारमादर्शादि तस्य का देवतेत्यमुरिति होवाच तस्य प्रतिबिम्बाख्यस्य पुरुषस्य निष्पत्तिरसौ प्राणात् ॥ १५ ॥

पुनरुक्तिं प्रत्याह—पूर्वमिति । आधारशब्दो भावप्रधानस्तथा च प्रतिबिम्बस्याऽऽधारत्वं यत्र तदित्युक्तं भवति । आदिशब्देन स्वच्छस्वभावं खड्गादि गृह्यते । प्राणेन हि निघृष्यमाणे दर्पणादौ प्रतिबिम्बाभिव्यक्तियोग्ये रूपविशेषो निष्पद्यते । ततो युक्तं प्राणस्य प्रतिबिम्बकारणत्वमित्यभिप्रेत्याऽऽह—तस्येति ॥ १५ ॥

---

१ घ. ण. °योग्यो रू° ।

आप एव यस्याऽऽयतनꣳ हृदयं लोको मनोज्यो-
तिर्यो वै त पुरुषं विद्यात्सर्वस्याऽऽत्मनः परायणꣳ
स वै वेदिता स्यात् । याज्ञवल्क्य वेद वा अहं तं
पुरुषꣳ सर्वस्याऽऽत्मनः परायणं यमात्थ य एषा-
यमप्सु पुरुषः स एष वदैव शाकल्य तस्य का
देवतेति वरुण इति होवाच ॥ १६ ॥

आप एव यस्याऽऽयतनम् । साधारणाः सर्वा आप आयतनं वा-
पीकूपतडागाद्याश्रयास्वप्सु विशेषावस्थानम् । तस्य का देवतेति वरुण
इति । वरुणात्संघातकर्त्रोऽध्यात्ममाप एव वाप्याद्यपां निष्पत्तिकार-
णम् ॥ १६ ॥

आप एव यस्याऽऽयतनं य एवायमप्सु पुरुष इत्युभयत्र सामान्यविशेषभावो
न प्रतिभातीति शङ्कमानं प्रत्याह—साधारणा इति । कथं पुनर्वापीकूपादिविशे-
षायतनस्य वरुणो देवता न हि देवतात्मनो वरुणस्य तद्विष्ठातुस्तत्कारणत्वं त-
त्राऽऽह—वरुणादिति । आपो वापीकूपाद्याः पीताः सत्योऽध्यात्मं शरीरे मूत्रा-
दिसंघातं कुर्वन्ति । ते च वरुणाद्भवन्ति । वरुणशब्देनाऽऽप एव रश्मिद्वारा मूर्धि
पतन्त्योऽभिधीयन्ते । तथा च ता एव वरुणात्मिका वाप्याद्यपां पीयमानानामुत्प-
त्तिकारणमिति युक्तं वरुणस्य वापीतडागाद्यायतनं पुरुषं प्रति कारणत्वमि-
त्यर्थः ॥ १६ ॥

रेत एव यस्याऽऽयतनꣳ हृदयं लोको मनोज्यो-
तिर्यो वै तं पुरुषं विद्यात्सर्वस्याऽऽत्मनः परायणꣳ
स वै वेदिता स्यात् । याज्ञवल्क्य वेदं वा अहं
तं पुरुषꣳ सर्वस्याऽऽत्मनः परायणं यमात्थ य ए-
षायं पुत्रमयः पुरुषः स एष वदैव शाकल्य तस्य
का देवतेति प्रजापतिरिति होवाच ॥ १७ ॥

रेत एव यस्याऽऽयतनं य एवायं पुत्रमयो विशेषायतनं रेत आयत-
नस्य पुत्रमय इति चास्थिमज्जाशुक्राणि पितुर्जातानि । तस्य का

१ क. ग. घ. च. छ. ज झ. °पीतं । २ ण. °रे सत्त्वादिकं ।

देवतेति । प्रजापतिरिति होवाचेति । प्रजापतिः पितोच्यते । पितृतो हि पुत्रस्योत्पत्तिः ॥ १६ ॥

वाक्यद्वयं गृहीत्वा तात्पर्यमाह-विशेषेति । पुत्रमयत्वार्थं व्याचष्टे-पुत्रमय इति ॥ १७ ॥

शाकल्येति होवाच याज्ञवल्क्यस्त्वाꣳ स्विदिमे
ब्राह्मणा अङ्गारावक्षयणमक्रताꣳ इति ॥ १८ ॥

अष्टधा देवलोकपुरुषभेदेन त्रिधा त्रिधाऽऽत्मानं प्रविभज्यावस्थित एकैको देवः प्राणभेद एवोपासनार्थं व्यपदिष्टः । अधुना दिग्विभागेन पञ्चधा प्रविभक्तस्याऽऽत्मन्युपसंहारार्थमाह-तूष्णींभूतं शाकल्यं याज्ञवल्क्या ग्रहणेवाऽऽवेशयन्नाह । याज्ञवल्क्येति होवाच याज्ञवल्क्यस्त्वा स्विदिति वितर्के । इमे नूनं ब्राह्मणा अङ्गारावक्षयणमङ्गारा अवक्षीयन्ते यस्मिन्संदंशादौ तदङ्गारावक्षयणं तन्नूनं त्वामकृत कृतवन्तो ब्राह्मणास्त्वं तु तन्न बुध्यस आत्मानं मया दह्यमानमित्यभिप्रायः॥१८॥

शाकल्येति होवाचेत्यादिग्रन्थस्य तात्पर्यं वक्तुं वृत्तं कीर्तयति-अष्टधेति । लोकः सामान्याकारः पुरुषो विशेषावच्छेदो देवस्तत्कारणमनेन प्रकारेण त्रिधा त्रिधाऽऽत्मानं प्रविभज्य स्थितो य एकैको देव उक्तः स प्राण एव सूत्रात्मा तद्भेदत्वात्पूर्वोक्तस्य सर्वस्य स चोपासनार्थमष्टधोपादिष्टोऽवस्तादित्यर्थः । उत्तरस्य तात्पर्यं दर्शयति-अधुनेति । प्रविभक्तस्य जगतः सर्वस्येति शेषः । आत्मशब्दो हृदयविषयः । याज्ञवल्क्यवाक्यस्य शाकल्यं प्रष्टर्यबुद्धिपूर्वकारित्वापादकत्वं दर्शयति-ग्रहणेति ॥ १८ ॥

याज्ञवल्क्येति होवाच शाकल्यो यदिदं कुरुपञ्चालानां ब्राह्मणानत्यवादीः किं ब्रह्म विद्वानिति दिशो वेद सदेवाः सप्रतिष्ठा इति यद्दिशो वेत्थ सदेवाः सप्रतिष्ठाः ॥ १९ ॥

याज्ञवल्क्येति होवाच शाकल्यः । यदिदं कुरुपञ्चालानां ब्राह्मणानत्यवादीरित्युक्तवानसि स्वयं भीतास्त्वामङ्गारावक्षयणं कृतवन्त इति । किं ब्रह्म विद्वान्सन्नेवमधिक्षिपसि ब्राह्मणान् । याज्ञवल्क्य आह-ब्रह्मविज्ञानं तावदिदं मम किं तर्हि दिशो वेद दिग्विषयं विज्ञानं

क. घ. ङ. °नं वि° । २ क. ख. ढ. प्रतिपद्य ।

जाने। तच्च न केवलं दिश एव सदेवा देवः सह दिगाधिष्ठातृभिः किंच सप्रतिष्ठाः प्रतिष्ठाभिश्च सह। इतर आह। यद्यदि देशो वेत्थ सदेवाः। सप्रतिष्ठा इति। सफल यदि विज्ञानं त्वया प्रतिज्ञातम् ॥१९॥

सर्वेषामेव ब्राह्मणानां प्रायेण हन्तव्यत्वेन संमतो भवानिति मुनेराभिमुख्यं शाकल्यस्तु कालचोदितत्वात्तदनुरोधिनीमन्यथाप्रतिपत्तिमेवाऽऽदाय चोदयतीत्याह—यदिदमिति। दिग्विषयं विज्ञानं जाने तन्ममास्तीत्यर्थः। तच्च विज्ञानं केवलं दिङ्मात्रस्य न भवति किंतु देवैः प्रतिष्ठाभिश्च सहिता दिशो वेदेत्याह—तच्चेति। अवतारितस्य वाक्यस्यार्थं संक्षिपति—सफलामिति ॥ १९ ॥

किंदेवतोऽस्यां प्राच्यां दिश्यसीत्यादित्यदेवत इति स आदित्यः कस्मिन्प्रतिष्ठित इति चक्षुषीति कस्मिन्नु चक्षुः प्रतिष्ठितमिति रूपेष्वति चक्षुषा हि रूपाणि पश्यति कस्मिन्नु रूपाणि प्रतिष्ठितानीति हृदय इति होवाच हृदयेन हि रूपाणि जानाति हृदये ह्येव रूपाणि प्रतिष्ठितानि भवन्तीत्येवमेवैतद्याज्ञवल्क्य ॥ २० ॥

किंदेवतः का देवताऽस्य तव दिग्भूतस्य। अमी हि याज्ञवल्क्यो हृदयमात्मानं दिक्षु पञ्चधा विभक्तं दिगात्मभूतं तद्द्वारेण सर्वं जगद्दात्मत्वेनोपगम्याहमस्मि दिगात्मेति व्यवस्थितः। पूर्वाभिः स्वः सप्रतिष्ठावचनाद्यथा याज्ञवल्क्यस्य प्रतिज्ञा तथैव पृच्छति। किंदेवतम्वमस्यां दिश्यसीति। सर्वत्र हि वेदे यां यां देवतामपाश्रित्य इहैव तदभूतस्तां तां प्रतिपद्यत इति। तथा च वक्ष्यति- देवो भूत्वा देवानप्येतीति। अस्यां प्राच्यां का देवता दिगात्मनस्त्वाधिष्ठात्री। कया देवतया त्वं प्राचीदिग्रूपेण संपन्न इत्यर्थः इतर आहाऽऽदित्यदेवत इति प्राच्यां दिशि ममाऽऽदित्यो देवता सोऽहमादित्यदेवतः सदेवा इत्येतदुक्तं सप्रतिष्ठा इति तु वक्तव्यमित्याह। स आदित्यः कस्मिन्प्रतिष्ठित इति।

---

१ च. सकलं। २ क. ख. ढ वैः सह प्र°। ३ क. ग. घ. ङ. छ. ञ झ. °दयात्मा°। ४ ख. घ. च. ज. झ. ट. विषक्त।

चक्षुषीति । अध्यात्मंतश्चक्षुष आदित्यो निष्पन्न इति हि मन्त्रब्राह्मण-वादाः "चक्षोः सूर्यो अजायत" चक्षुष आदित्य इत्यादयः । कार्यं हि करणे प्रतिष्ठितं भवति । कस्मिन्न चक्षुः प्रतिष्ठितमिति । रूपेष्विति । रूपग्रहणाय हि रूपात्मकं चक्षू रूपेण प्रयुक्तम् । यैर्हि रूपैः प्रयुक्तं तैरात्मग्रहणायाऽऽरब्धं चक्षुस्तस्मात्तमादित्यं चक्षुः सह प्राच्या दिशा सह तत्स्थैः सर्वैः रूपेषु प्रतिष्ठितम् । चक्षुषा सह प्राची दिक्सर्वा रूपैः सहा तानि च कस्मिन्न रूपाणि प्रतिष्ठितानीति हृदय इति ब्रूयाच्च । हृदयारब्धानि रूपाणि रूपाकरणं हि हृदयं परिणतम् । यस्माद्धृदयेन हि रूपाणि सर्वो लोको जानाति । हृदयमिति बुद्धिमनसी एकीकृत्य निर्देशः । तस्माद्धृदये ह्येव रूपाणि प्रतिष्ठितानि । हृदयन हि स्मरणं भवति रूपाणां वासनात्मनां तस्माद्धृदये रूपाणि प्रतिष्ठितानीत्यर्थः । एवमेवैतद्याज्ञवल्क्य ॥ २० ॥

प्राच्यां दिशि का देवतेति व्याकृत्य कथमन्यथा पृच्छत्यत आऽऽह—अग्नी हीति । आत्मानमात्मीयमिति यावत् । यथोक्तं हृदयमात्मत्वेनोपगम्येति संबन्धः । तथाऽपि यथं प्राचीं दिशमधिकृत्य प्रश्न को हेतुरिति चेत्तत्राऽऽह—पूर्वामिमां दिशमिति । यद्यपि दिगात्माऽहमस्मीति स्थितस्तथाऽपि कथं सर्वं जगदात्मत्वेनोपगम्य स्थितोऽस्मीत्यवगम्यते तत्राऽऽह—सप्रतिष्ठेति । सप्रतिष्ठा दिगा वेदेति वचनात्सर्वमपि हृदयद्वारा जगदात्मत्वेनोपगम्य स्थितो मुनिरिति प्रतिभातीत्यर्थः । प्रतिज्ञानुसारिण्याश्चार्थं प्रश्नो युक्तिमानित्याह—यथेति । अहमस्मि दिगात्मेति प्रतिज्ञानुसारिण्यपि प्रश्ने देहपातोत्तरभावी देवताभावः पृच्छ्यते सति देहे ध्यातुस्तद्भावायोगादित्याशङ्क्याऽऽह—सर्वत्र हीति इति न भाविदेवताभावः प्रश्नगोचर इति शेषः । उक्तेऽर्थे वाक्यशेषमनुकूलयति—तथा चेति । प्रश्नार्थमुपसंहरति—अस्यामिति । आदित्यस्य चक्षुषि प्रतिष्ठितत्वं प्रकटयितुं कार्यकारणभावं तयोराद्दर्शयति—अध्यात्मंतश्चक्षुष इति । 'चक्षोः सूर्यो अजायत' इत्यादयो मन्त्रवादास्तदनुसारिणश्च ब्राह्मणवादाः । भवतु कार्यकारणभावस्तथाऽपि कथं चक्षुष्यादित्यस्य प्रतिष्ठितत्वं तत्राऽऽह—कार्यं हीति । कथं चक्षुषो रूपेषु प्रतिष्ठितत्वं तत्राऽऽह—रूपग्रहणायेति । तथाऽपि कथं यथोक्ताधाराधेयत्वमतआह—

---

१ क. घ. च. छ. ज. ञ ट. °त्मनश्च' । २ क. ख. घ ज. झ. दाः । चन्द्रमा मनसो जातश्चक्षु° । ३ क. °क्षुषः सूर्य इ° । ४ ख. घ. °क्सर्वरू° । च. ज. °क्सर्वभूतानि । ५ ञ. ङ. च. ट. हि यस्मात्स्मर° । ६ घ. ण. °शोऽहं वे° । ७ क. घ. ढ. °त्मनश्च° । ख. ण. °त्मन इ° ।

यैर्हीति । चक्षुषो रूपाधारत्वे फलितमाह—तस्मादिति । उपसंहरणार्थं संगृह्णाति—चक्षुषेति । हृदयाधारत्वं रूपाणां स्फुटयति—रूपाकारणेति । हृदये रूपाणां प्रतिष्ठितत्वे हेत्वन्तरमाह—यस्मादिति । हृदयशब्दस्य मांसखण्डविषयत्वं व्यावर्तयति—हृदयमिति । कथं पुनर्बहिर्मुखानि रूपाण्यन्तर्हृदये स्थातुं पारयन्ति तथाऽऽह—हृदयेन होति । तथाऽपि कथं तेषां हृदयप्रतिष्ठितत्वं तत्राऽऽह—वासनात्मनामिति ॥ २० ॥

> किंदेवतोऽस्यां दक्षिणायां दिश्यमंसीति यमदेवत इति स यमः कस्मिन्प्रतिष्ठित इति यज्ञ इति कस्मिन्नु यज्ञ प्रतिष्ठित इति दक्षिणायामिति कस्मिन्नु दक्षिणा प्रतिष्ठितेति श्रद्धायामिति यदा ह्येव श्रद्दधात्यथ दक्षिणां ददाति श्रद्धायां ह्येव दक्षिणा प्रतिष्ठितेति कस्मिन्नु श्रद्धा प्रतिष्ठितेति हृदय इति होवाच हृदयेन हि श्रद्धां जानाति हृदये ह्येव श्रद्धा प्रतिष्ठिता भवतीत्येवमेवैतद्याज्ञवल्क्य ॥ २१ ॥

किंदेवतोऽस्यां दक्षिणायां दिश्यमंसीति पूर्ववत् । दक्षिणायां दिशि का देवता तव । यमदेवत इति । यमो देवता मम दक्षिणादिग्भूतस्य । स यमः कस्मिन्प्रतिष्ठित इति । यज्ञ इति । यज्ञे कारणे प्रतिष्ठितो यमः सह दिशा । कथं पुनर्यज्ञस्य कार्यं यम इत्युच्यते । ऋत्विग्भिर्निष्पादितो यज्ञो दक्षिणया यजमानस्तेभ्यो यज्ञं निष्क्रीय तेन यज्ञेन दक्षिणां दिशं सह यमनाभिजयति । तेन यज्ञे यमः कार्यत्वात्प्रतिष्ठितः सह दक्षिणया दिशा । कस्मिन्नु यज्ञः प्रतिष्ठित इति । दक्षिणायामिति । दक्षिणया स निष्क्रीयते । तेन दक्षिणाकार्यं यज्ञः । कस्मिन्नु दक्षिणा प्रतिष्ठितेति । श्रद्धायामिति । श्रद्धा नाम दित्सुत्वमास्तिक्यबुद्धिभक्तिसहिता । कथं तस्यां प्रतिष्ठिता दक्षिणा । यस्मायदा ह्येव श्रद्दधात्यथ दक्षिणां ददाति नाश्रद्दधद्दक्षिणां ददाति । तस्माच्छ्रद्धायां ह्येव

---

१ घ. ण. °पारम्यत्वे । अ °पारब्धत्वे । २ घ. ञ. ण. °पाण्यान्तर हृद° । ३ ञ. °क्षिण्यस्यां दि° । ४ च. ट. °यां हि दि° ।

दक्षिणा प्रतिष्ठेतेति । कस्मिन्नु श्रद्धा प्रतिष्ठेतेति । हृदय इति होवाच। हृदयस्य हि वृत्तिः श्रद्धा यस्माद्धृदयेन हि श्रद्धां जानाति । वृत्तिश्च वृत्तिमति प्रतिष्ठिता भवति । तस्माद्धृदये ह्येव श्रद्धा प्रतिष्ठिता भवतीत्येवमेवैतद्याज्ञवल्क्य ॥ २१ ॥

पूर्ववदित्युक्तमेव व्यनक्ति–दक्षिणायामिति । यस्य यज्ञकार्यत्वमप्रसिद्धमिति शङ्कित्वा व्युत्थापयति–कथमित्यादिना । तस्य यज्ञकार्यत्वे फलितमाह–तेनेति । यज्ञस्य दक्षिणायां प्रतिष्ठितत्वं साधयति–दक्षिणयेति । कार्यं च कारणे प्रतिष्ठितमिति शेषः । दक्षिणायाः श्रद्धायां प्रतिष्ठितत्वं प्रकटयति–यस्यादिति । हृदये सा प्रतिष्ठितेत्यत्र हेतुमाह–हृदयस्येति । हृदयव्याप्यत्वाच्च श्रद्धायास्तत्प्रतिष्ठितत्वमित्याह–हृदयेन हीति। हृदयस्य श्रद्धा वृत्तिरस्तु तथाऽपि वृत्तेः किमायातं तदाह–वृत्तिश्चेति ॥ २१ ॥

किंदेवतोऽस्यां प्रतीच्यां दिश्यसीति वरुणदेवत इति स वरुणः कस्मिन्प्रतिष्ठित इत्यप्स्विति कस्मिन्न्वापः प्रतिष्ठिता इति रेतसीति कस्मिन्नु रेतः प्रतिष्ठितमिति हृदय इति तस्मादपि प्रतिरूपं जातमाहुर्हृदयादिव सृप्तो हृदयादिव निर्मित इति हृदय ह्येव रेतः प्रतिष्ठितं भवतीत्येवमेवैतद्याज्ञवल्क्य ॥ २२ ॥

किंदेवतोऽस्यां प्रतीच्यां दिश्यसीति । तस्यां वरुणोऽधिदेवता मम । स वरुणः कस्मिन्प्रतिष्ठित इत्याप्स्विति । अपां हि वरुणः कार्यम् । "श्रद्धा वा आपः" "श्रद्धातो वरुणमसृजत" इति श्रुतेः । कस्मिन्न्वापः प्रतिष्ठिता इति । रेतसीति । "रेतसो ह्यापः सृष्टाः" इति श्रुतेः । कस्मिन्नु रेतः प्रतिष्ठितमिति । हृदय इति । यस्माद्धृदयस्य कार्यं रेतः । कामो हृदयस्य वृत्तिः । कामिनो हि हृदयाद्रेताऽधिस्कन्दति । तस्मादपि प्रतिरूपमनुरूपं पुत्रं जातमाहुर्लौकिकाः । अस्य पितुर्हृदयादिवायं पुत्रः सृप्तो विनिःसृतो हृदयादिव निर्मितो यथा सुवर्णेन निर्मितः कुण्डलः । तस्माद्धृदये ह्येव रेतः प्रतिष्ठितं भवतीत्येवमेवैतद्याज्ञवल्क्य ॥ २२ ॥

---

१ घ. ञ. ण. श्रद्धा । २ ञ. प्रस्तुते । ३ घ. ङ. ज. सृष्टा । ४ घ. ङ. ज. सृष्टो ।

रेवतो हृदयकार्यत्वं साधयति—काम इति । तथाऽपि कथं रेतो हृदयस्य कार्यं वदाह—कामिनो हीति । तत्रैव लोकप्रसिद्धिं प्रमाणयति—तस्मादिति । अपिशब्दः संभावनार्थोऽवधारणार्थो वा ॥ २२ ॥

किंदेवतोऽस्यामुदीच्या दिश्यसीति सोमदेवत इति स सोमः कस्मिन्प्रतिष्ठित इति दीक्षायामिति कस्मिन्नु दीक्षा प्रतिष्ठितेति सत्य इति, तस्मादपि दीक्षितमाहुः सत्यं वदेति सत्ये ह्येव दीक्षा प्रतिष्ठितेति कस्मिन्नु सत्यं प्रतिष्ठितमिति हृदय इति होवाच हृदयेन हि सत्यं जानाति । हृदये ह्येव सत्यं प्रतिष्ठितं भवतीत्येवमेवैतद्याज्ञवल्क्य ॥ २३ ॥

किंदेवतोऽस्यामुदीच्यां दिश्यसीति । सोमदेवत इति । सोम इति लतां सोमं देवता चैकीकृत्य निर्देशः । स सोमः कस्मिन्प्रतिष्ठित इति । दीक्षायामिति । दीक्षिता हि यजमानः सोमं क्रीणाति क्रीतेन सोमेनेष्ट्वा ज्ञानवानुत्तरां दिशं प्रतिपद्यते सोमदेवताधिष्ठितां सौम्याम् । कस्मिन्नु दीक्षा प्रतिष्ठितेति । सत्य इति । कथम् । यस्मात्सत्ये दीक्षा प्रतिष्ठिता तस्मादपि दीक्षितमाहुः सत्यं वदेति कारणभ्रंशे कार्यभ्रंशो मा भूदिति । सत्ये ह्येव दीक्षा प्रतिष्ठितेति । कस्मिन्नु सत्यं प्रतिष्ठितमिति । हृदय इति होवाच । हृदयेन हि सत्यं जानाति । तस्माद्धृदये ह्येव सत्यं प्रतिष्ठितं भवतीत्येवमेवैतद्याज्ञवल्क्य ॥ २३ ॥

दीक्षायां सोमस्य प्रतिष्ठितत्वं साधयति—दीक्षितो हीत्यादिना । दीक्षायाः सत्ये प्रतिष्ठितत्वमप्रसिद्धमिति शङ्कित्वा समाधत्ते—कथमित्यादिना । अपिशब्दोऽवधारणार्थः । सत्यं वदेति वदतामभिप्रायमाह—कारणेति । भ्रंशो नाशः । इति तेषामभिप्राय इति शेषः । श्रुत्योपसंहारः—सत्ये हीति ॥ २३ ॥

किंदेवतोऽस्या ध्रुवायां दिश्यसीत्यग्निदेवत इति सोऽग्निः कस्मिन्प्रतिष्ठित इति वाचीति कस्मिन्नु वाक्प्रतिष्ठितेति हृदय इति कस्मिन्नु हृदयं प्रतिष्ठितमिति ॥ २४ ॥

१ ख. ङ. च. सोमदे° । २ घ. ञ. ण. °त्वं प्रसा° ।

किंदेवतोऽस्यां ध्रुवायां दिश्यसीति । मेरोः समन्ततो वसतामस्य-
न्निचारादूर्ध्वा दिग्ध्रुवेत्युच्यते । अग्निदेवत इति । ऊर्ध्वायां हि प्रका-
शभूयस्त्वं प्रकाशश्चाग्निः । सोऽग्निः कस्मिन्प्रतिष्ठित इति वाचीति ।
कस्मिन्नु वाक्प्रतिष्ठितति । हृदय इति । तत्र याज्ञवल्क्यः सर्वासु दिक्षु
विप्रसृतेन हृदयेन सर्वा दिश आत्मत्वेनाभिसंपन्नः । सदेवाः सप्रतिष्ठा
दिश आत्मभूतास्तस्य नामरूपकर्मात्मभूतस्य याज्ञवल्क्यस्य । यद्रूपं
तत्प्राच्या दिशा सह हृदयभूतं याज्ञवल्क्यस्य । यत्केवलं कर्म पुत्रो-
त्पादनलक्षणं च ज्ञानसंहितं च सह फलनाधिष्ठात्रीभिश्च देवताभिर्द-
क्षिणाप्रतीच्युदीच्यः कर्मफलात्मिका हृदयमेवाऽऽपद्यास्तस्य । ध्रुवया
दिशा सह नाम सर्वं वाग्द्वारेण हृदयमेवाऽऽपद्यम् । एतावद्वीदं सर्वं
यदुत रूपं वा कर्म वा नाम वेति तत्सर्वं हृदयमेव तत्सर्वात्मकं हृदयं
पुच्छ्यते कस्मिन्नु हृदयं प्रतिष्ठितमिति ॥ २४ ॥

कथं पुनरूर्ध्वा दिगेवंस्थिता ध्रुवत्वमुच्यते तत्राऽऽह—मेरोरिति । तत्राग्नेर्दे-
वत्वं प्रकटयति—ऊर्ध्वायां हीति । 'दिशो मेरु' इत्यादिश्रुत्या जगतो विमा-
नेन पञ्चधात्वं ध्यानार्थमुक्तमित्युर्ध्वाया विमानत्वादित्याः पुनरग्निरित्यभ्य-
धात्—तत्रेति । कथमेतावेव विमाने स्यातामित्याह—सदेवा इति । तत्रावान्तर-
विभागमाह—यद्रूपमिति । आद्ये पर्याये हृदये रूपनामकर्मोपसंहारो दर्शितः ।
'हृदये ह्येव रूपाणि' इति श्रुतेरित्यर्थः । दक्षिणायामित्यादिपर्यायत्रयेण तत्रैव
कर्मोपसंहार उक्त इत्याह—यत्केवलमिति । यद्धि केवलं कर्म तत्फलादिभिः
सह दक्षिणादिरूपात्मकं हृदयमुपसंहियते यज्ञस्य दक्षिणादिद्वारा हृदये प्रविष्टत्वात्के-
वलस्य दक्षिणस्या दिशस्तत्फलत्वात्पुत्रजन्मात्मकं च कर्म प्रतीच्यात्मकं तत्रैवोपसंहृतम् ।
'हृदये ह्येव रेतः प्रतिष्ठितम्' इति श्रुतेः । पुत्रजन्मनश्च तत्कर्मफलत्वाज्ज्ञानसहितमपि
कर्म फलप्रतिष्ठादेवताभिः सहोदीच्यात्मकं तत्रैवोपसंहृतं सोमदेवत्यया दीक्षादि-
द्वारा तत्प्रतिष्ठत्वश्रुतेरेवं दिक्त्रये सर्वं कर्म हृदि संहृतमित्यर्थः । पञ्चमपर्यायस्य
तात्पर्यमाह—ध्रुवयेति । नामरूपकर्मसूपसंहृतेष्वपि किंचिदुपसंहर्तव्यान्तरमवशिष्ट-
मस्तीत्याशङ्क्य निराकरोति—एतावद्वीति । प्रश्नान्तरमुत्थापयति तत्सर्वात्म-
कमिति ॥ २४ ॥

---

१ क. च. यद्रूपं । २ क. च. छ. ढ. °मेत° । ३ घ. ञ. ण. °दिग्व्यव° । ४ घ.
ण. °दानीमुक्तवि° । ५ घ. ढ. ण. °तिष्ठितत्व° ।

अहल्लिकेति होवाच याज्ञवल्क्यो यत्रैतदन्यत्रास्मन्मन्यासै यद्धचेतदन्यत्रास्मत्स्याच्छ्वानो वैनदद्युर्वयाꣳसि वैनद्विमथ्नीरन्निति ॥ २५ ॥

अहल्लिकेति होवाच याज्ञवल्क्यो नामान्तरेण संबोधनं कृतवान् । यत्र यस्मिन्काल एतद्हृदयमात्माऽस्य शरीरस्यान्यत्र क्वचिद्देशान्तरेऽदस्मत्तो वर्तत इति मन्यासे मन्यसे । यद्धि यदि ह्येतद्हृदयमन्यत्रास्मत्स्याद्भवेच्छ्वानो वैनच्छरीरं तदाऽद्युर्वयांसि वा पक्षिणो वैनद्विमथ्नीरन्विलोडयेयुर्विकर्षेरन्निति । तस्मान्मयि शरीरे हृदयं प्रतिष्ठितमित्यर्थः । शरीरस्यापि नामरूपकर्मात्मकत्वाद्हृदये प्रतिष्ठितत्वम् ॥ २५ ॥

हृदयपदेन नामाद्याधारवद्हल्लिकशब्देनापि हृदयाधिकरणं विवक्षयते वाक्यच्छायासाम्यादित्याशङ्क्याऽऽह—नामान्तरेणेति । अहनि लीनत इति विगृह्य लेतवाचिनेति शेषः । देहे हृदयं प्रतिष्ठितमिति व्युत्पादयति—यत्रेत्यादिना । तस्मिन्काले शरीरं मृतं स्यादिति शेषः । शरीरस्य हृदयाश्रयत्वं विवृणोति—यद्धीत्यादिना । देहादन्यत्र हृदयस्यावस्थाने यथोक्तं दोषमितिशब्देन परामृश्य फलितमाह—इतीत्यादिना । देहस्तर्हि कुत्र प्रतिष्ठित इत्यत्राऽऽह—शरीरस्थेति ॥ २५ ॥

कस्मिन्नु त्वं चाऽऽत्मा च प्रतिष्ठितौ स्थ इति प्राण इति कस्मिन्नु प्राणः प्रतिष्ठित इत्यपान इति कस्मिन्न्वपानः प्रतिष्ठित इति व्यान इति कस्मिन्नु व्यानः प्रतिष्ठित इत्युदान इति कस्मिन्नुदानः प्रतिष्ठित इति समान इति स एष नेति नेत्यात्माऽगृह्यो नहि गृह्यतेऽशीर्यो नहि शीर्यतेऽसङ्गो नहि सज्यतेऽसितो न व्यथते न रिष्यति। एतान्यष्टावायतनान्यष्टौ लोका अष्टौ देवा अष्टौ पुरुषाः स यस्तान्पुरुषान्निरुह्य प्र-

---

१ च. °वतत्तदाऽद्यु° । २ घ. च. °वैतद्वि । ३ ख. घ. च. ज. झ. ढ. °वैतच्छ° । ४ ख. ग. घ. ङ. च. ज. ढ. °वैतद्वि° । ५ च. °विंकुर्वीर° । ६ क. ढ. °सामान्यादि° ।

त्युह्यात्यक्रामत्तं त्वौपनिषदं पुरुषं पृच्छामि तं चेन्मे न विवक्ष्यसि मूर्धा ते विपतिष्यतीति । तꣳ ह न मेने शाकल्यस्तस्य ह मूर्धा विपपाताऽपि हास्य परिमोषिणोऽस्थीन्यपजह्रुरन्यन्मन्यमानाः ॥ २६ ॥

हृदयशरीरयोरेवमन्योन्यप्रतिष्ठोक्ता कार्यकरणयोरतस्त्वां पृच्छामि । कस्मिन्नु त्वं च शरीरमात्मा च तव हृदयं प्रतिष्ठितौ स्य इति । प्राण इति । देहात्मानौ प्राणे प्रतिष्ठितौ स्यातां प्राणवृत्तौ । कस्मिन्नु प्राणः प्रतितिष्ठित इत्यपान इति । साऽपि प्राणवृत्तिः प्रागेव प्रेयादपानवृत्त्या चेन्न निगृह्यते । कस्मिन्नपानः प्रतिष्ठित इति व्यान इति । साऽप्यपानवृत्तिरध एव यायात्प्राणवृत्तिश्च प्रागेव मध्यस्थया चेद्व्यानवृत्त्या न निगृह्यते कस्मिन्नु व्यानः प्रतिष्ठित इति । उदान इति । सर्वास्तिस्रोऽपि वृत्तय उदाने कीलस्थानीये चेन्न निबद्धा विष्वङ्भिद्येयुः । कस्मिन्नूदानः प्रतिष्ठित इति समान इति । समानप्रतिष्ठा ह्येताः सर्वा वृत्तयः । एतदुक्तं भवति—शरीरहृदयवायवोऽन्योन्यप्रतिष्ठाः संघातेन नियता वर्तन्ते विज्ञानमर्थार्थप्रयुक्ता इति । सर्वमेतद्येन नियतं यस्मिन्प्रतिष्ठितमाकाशान्तमोतं च प्रोतं च तस्य निरुपाधिकस्य साक्षादपरोक्षाद्ब्रह्मणो निर्देशः कर्तव्य इत्ययमारम्भः ।

वृत्तमनूद्य प्रश्नान्तरमुपादत्ते—हृदयेति । प्राणशब्दस्य सूत्रविषयत्वं व्यवच्छेत्तुं वृत्तिविशेषणम् । प्राणस्यापाने प्रतिष्ठित्वं व्यतिरेकद्वारा स्फोरयति—साऽपीति । प्राणापानयोरुभयोरपि व्यानाधीनत्वं साधयति—साऽप्यपानेति । तिसृणां वृत्तीनामुक्तानामुदाने निबद्धत्वं दर्शयति—सर्वा इति । विष्वङ्भिद्येयुरिति नानागतित्वोक्तिः कस्मिन्नु हृदयमित्यादेः समानान्तस्य तात्पर्यमाह—एतादिति । तेषां प्रवर्तकं दर्शयति—विज्ञानमयेति । स एष इत्यादेस्तात्पर्यमाह—सर्वमिति ।

स एषः । स यो नेति नेतीति निर्दिष्टो मधुकाण्ड ऐष सः । सोऽयमात्माऽगृह्यो न गृह्यः कथम् । यस्मात्सर्वकार्यधर्मातीतस्तस्मादगृह्यः कुतो यस्मान्नहि गृह्यते । यद्धि करणगोचरं व्याकृतं वस्तु तद्ग्रह-

---

१ क. प्राङेव । ५ ख. ङ. च. निगृह्येत । २ ख. छ. प्राङेव । ४ ख. ग. निगृह्येत । ङ. छ. निगृह्येते । ५ घ. ङ. ज. °तिष्ठितोः सं° । ६ ख. ग. ङ. च. ङ. झ. ढ. °यार्थं प्र° । ७ ण. °न्तपदस्य ग्रन्थस्य ता° । ८ घ. °स्य ग्रन्थस्य ता° । ९ ख. झ. °काण्डे स एषः । १० च. ढ. एषः । सो° ।

जगोचरमिदं तु तद्विपरीतमात्मतत्त्वम् । तथाऽशीर्यो[1] यद्धि मूर्तं संहतं शरीरादि तच्छीर्यतेऽयं तु तद्विपरीतोऽतो नहि शीर्यते[2] । तथाऽसङ्गो मूर्तो मूर्तान्तरेण संबध्यमानः सज्यतेऽयं च तद्विपरीतोऽतो नाहि स[3]ज्यते[4] । तथाऽसितोऽबद्धो यद्धि मूर्तं तद्बध्यतेऽयं तु तद्विपरीतत्वाद्बद्ध त्वान्न व्यथतेऽतो न रिष्यति । ग्रहणंविशरणंसङ्गबन्धकार्यधर्मरहितत्वान्न रिष्यति न हिंसामापद्यते न विनश्यतीत्यर्थः ।

यस्य कूटस्थदृष्टिमात्रस्यान्तर्यामित्वकल्पनाधिष्ठानस्याज्ञानवशात्मशासने द्यावापृथिव्यादि स्थितं स परमात्मैव प्रत्यगात्मेवेति पदयोरर्थं विवक्षित्वाऽऽह—स एष इति । निषेधद्वयं मूर्तामूर्तब्राह्मणे व्याख्यातमित्याह—स यो नेति[5] । येन मधुकाण्डे चतुर्थे नेति नेतीति निषेधमुखेन निर्दिष्टः स एष कूर्वब्राह्मणे तन्मुखेनैव वक्ष्यत इति योजना । निषेधद्वारा निर्दिष्टमेव स्पष्टयति—सोऽयमिति । कार्यधर्माः शब्दादयोऽशनायादयश्च । श्रुत्युक्तं हेतुमवतार्य व्याचष्टे—कुत इत्यादिना । तद्विपरीतत्वं करणागोचरत्वं न चक्षुषेत्यादिश्रुतेः । तद्विपरीतत्वादमूर्तत्वादिति यावत् । पूर्वत्राप्युभयत्र तद्वैपरीत्यमेतदेव । अतःशब्दार्थं स्फुटयन्नुक्तमुपपादयति—ग्रहणेति । कार्यधर्माः शब्दादयोऽशनायादयश्च प्रागुक्ताः ।

क्रममतिक्रम्यौपनिषदस्य पुरुषस्याऽऽख्यायिकातोऽपसृत्य श्रुत्या स्वेन रूपेण त्वरया निर्देशः कृतः । ततः पुनराख्यायिकामेवाऽऽश्रित्याऽऽह । एतानि यान्युक्तान्यष्टावायतनानि पृथिव्येव यस्याऽऽयतनमित्येवमादीन्यष्टौ लोका अग्निलोकादयोऽष्टौ देवा अमृतमिति होवाचेत्येवमादयोऽष्टौ पुरुषाः शारीरः पुरुष इत्यादयः । स यः कश्चित्तान्पुरुषाञ्शारीरप्रभृतीन्निरुह्य निश्चयेनोह्य गमयित्वाऽष्टचतुष्कभेदेन लोकास्थितिमुपपाद्य पुनः प्राचीदिगादिद्वारेण प्रत्युह्य स्वात्मनि हृदयेऽत्यक्रामदतिक्रान्तवानुपाधिधर्मं हृदयाद्यात्मत्वं स्वेनैवाऽऽत्मना व्यवस्थितो य औपनिषदः पुरुषोऽशनायादिवर्जित उपनिषत्स्वेव विज्ञेयो नान्यप्रमाणगम्यस्तं त्वा त्वां विद्याभिमानिनं पुरुषं पृच्छामि तं चेद्यदि मे न विवक्ष्यसि विस्पष्टं न कथयिष्यसि मूर्धा ते विपतिष्यतीत्याह

---

१ क. ग. घ. ङ. च. छ. ञ. ट. °ते । अस° । २ ङ. °ते । असि° । ३ क. ग. घ. ङ. च. छ. ज. झ. °ध्यत इदं तु । ४ घ. ज. °त्वान्न । ५ ख. घ. ट. °दक्षितोऽव° । ६ क. ङ. च. छ. ज. झा. °णश° । ७ घ. ज. °णसव° । ८ छ. °ङ्गसंब° । ९ ख. नेतीति । १० ख. च. ट. °त्युपोपसंहृत्य रवा° । ११ घ. ज. °ह्य चाऽऽत्म° । १२ क. ट. ठ. °तो यः स कौ° । १३ क. घ. छ. ञ. °तीति । तं ।

याज्ञवल्क्यः । तं त्वौषनिषदं पुरुषं शाकल्यो न मेने ह न विज्ञातवान्किल । तस्य ह मूर्धा विपपात विपतितः । समाप्ताऽऽख्यायिका श्रुतेर्वचनं तं ह न मेन इत्यादि ।

ननु शाकल्ययाज्ञवल्क्योः संवादात्मिकेयमाख्यायिका तत्र कथं शाकल्येनापृष्टमात्मानं याज्ञवल्क्यो व्याचष्टे तत्राऽऽह—क्रमामिति । विज्ञानादिवाक्ये वक्ष्यमाणत्वात्किमित्यत्र निर्देश इत्याशङ्क्याऽऽह—त्वरयेति । एतान्यष्टावित्यादिवाक्यस्य पूर्वेणासंगतिमाशङ्क्याऽऽह—ततः पुनारिति । निश्चयेन गमयित्वेत्येतदेव स्पष्टयति—अष्टेति । प्रत्युत्तोपसंहृत्येति यावत् । औषनिषदत्वं पुरुषस्य व्युत्पादयति—उपनिषत्स्वेवेति । तं हेत्यादि याज्ञवल्क्यस्य वा मध्यस्थस्य वा वाक्यमिति शङ्कां वारयति—समाप्तेति ।

किंचापि हास्य परिमोषिणस्तस्करा अस्थीन्यपि संस्कारार्थं शिष्यैर्नीयमानानि गृहान्प्रत्यपजह्रुरपहृतवन्तः । किंनिमित्तम् । अन्यद्धनं गायमानं मन्यमानाः पूर्ववृत्ता ह्याख्यायिकेह सूचिता । अष्टाध्याय्यां किल शाकल्येन याज्ञवल्क्यस्य समानान्त एव किल संवादो निर्वृत्त तत्र याज्ञवल्क्येन शापो दत्तः पुरेऽतिथ्ये मरिष्यसि न तऽस्थानर्चन गृहान्प्राप्स्यन्तीतं स तथैव ममार । तस्य ह्यप्यन्यमन्यमाना परिमोषिणोऽस्थीन्यपजह्रुः । तस्मान्नोपवादी स्यादुत ह्येवंविदपरा भवतीति । सैषाऽऽख्यायिकाऽऽचारार्थं सूचिता विद्यास्तुतये चेह ॥ २६ ॥

ब्रह्मविदिदृक्षे परलोकविरोधोऽपि स्यादित्याह—किंचेति । मूर्धा ते विपतिष्यतीति 'मूर्ध्नि पतिते शापेन' किमत्यग्निहोत्रोऽग्निसंस्कारमपि शाकल्यो न प्राप्तवानित्याशङ्क्याऽऽह—पूर्ववृत्तेति । तामेवाऽऽख्यायिकामनुक्रामति—अष्टाध्याय्यामिति । अष्टाध्यायी बृहदारण्यकात्प्राचीना कर्मविषया । पुरे पुण्यक्षेत्रातिरिक्ते देशे । अतिथ्ये पुण्यतिथिशून्ये काले । अस्थीनिचनेत्यत्र चेनशब्दोऽप्यर्थः । उपवादी परिभवकर्ता तच्छब्दार्थमाह—उत ह्वीति । किमितीयमाख्यायिकाऽत्र विद्याप्रकरणे सूचितेत्याशङ्क्याऽऽह—सैषेति । ब्रह्मविदि विनीतेन भवितव्यमित्याचारः । महती ह्वीयं ब्रह्मविद्या यत्तन्निष्ठावज्ञायामैहिकामुष्मिकविरोधः स्यादिति विद्यास्तुतिः ॥ २६ ॥

---

१ घ. ञ. ण. °त्र तन्निदे° । २ क. °ध्यमस्य । ३ घ. ज. एष । क. च. झ. ढ. एव सं° । ४ घ. च. ज. झः °दो वृत्तः । ५ ख. °सि ते° । ६ क. ग. घ. च. ज. च गृ° । ७ घ. ज. °ति । इति स । ८ ङ. ज. तस्मा° । ९ ग. घ. च, ज. °वति । १० घ. ण. मूर्धपातशा° । ११ ण. °पे कि° । १२ घ. ञ. ण. °हात्रसं° । १३ क, ख. °नेति च° । १४ ख. घ. ञ. ढ. चश° ।

यस्य नेति नेतीत्यन्यप्रतिषेधद्वारेण ब्रह्मणो निर्देशः कृतस्तस्य विधिमुखेन कथं निर्देशः कर्तव्य इति पुनराख्यायिकामेवाऽऽश्रित्याऽऽह—मूलं च जगतो वक्तव्यमिति। आख्यायिकासंबन्धस्त्वब्रह्मविदो ब्राह्मणाञ्जित्वा गोधनं हर्तव्यमिति। न्यायं मत्वाऽऽह—

अथ होवाच ब्राह्मणा भगवन्तो यो व कामयते
स मा पृच्छतु सर्वे वा मा पृच्छत यो वः कामयते
तं वः पृच्छामि सर्वान्वा वः पृच्छामीति ते ह
ब्राह्मणा न दधृषुः ॥ २७ ॥

अथ होवाच। अथानन्तरं तूष्णींभूतेषु ब्राह्मणेषु होवाच हे ब्राह्मणा भगवन्त इत्येवं संबोध्य। यो वो युष्माकं मध्ये कामयते इच्छति याज्ञवल्क्यं पृच्छामीति स मा मामागत्य पृच्छतु। सर्वे वा मा पृच्छत। सर्वे वा यूयं मा मां पृच्छत। यो वः कामयते याज्ञवल्क्यो मां पृच्छत्विति तं वः पृच्छामि सर्वान्वा वो युष्मानहं पृच्छामि। ते ह ब्राह्मणा न दधृषुस्ते ब्राह्मणा एवमुक्ता अपि न प्रगल्भाः संवृत्ताः किंचिदपि प्रत्युत्तरं वक्तुम् ॥ २७ ॥

अथ हेत्याद्युत्तरग्रन्थमवतारयति यस्येत्यादिना। जगतो मूलं च वक्तव्यमित्याख्यायिकामेवाऽऽश्रित्याऽऽहेति संबन्धः। आख्यायिका किमर्थेत्यत आह—आख्यायिकेति। इतिशब्दः संबन्धसमाप्त्यर्थः। ननु ब्राह्मणेषु तूष्णींभूतेषु प्रतिषेद्धुरभावाद्धोधनं हर्तव्यं किमिति तान्प्रति याज्ञवल्क्यो वदतीत्यत आह—न्यायं मत्त्वेति। ब्रह्मस्वं हि ब्राह्मणानुमतिमनापाद्य नीयमानमनर्थाय स्यादिति न्यायः। संबोध्योवाचेति संबन्धः। यो व इति प्रतीकमादाय व्याचष्टे—युष्माकमिति। आख्येयतं भागमनूद्य व्याख्येयमादाय व्याकरोति—यो व इत्यादिना। यथोक्तप्रश्नानन्तरं ब्राह्मणानामप्रतिभां दर्शयति—ते हेति ॥ २७ ॥

तान्हैतैः श्लोकैः पप्रच्छ—

यथा वृक्षो वनस्पतिस्तथैव पुरुषोऽमृषा।
तस्य लोमानि पर्णानि त्वगस्योत्पाटिका
बहिः ॥ १ ॥

तेष्वप्रगल्भभूतेषु ब्राह्मणेषु तान्हैतैर्वक्ष्यमाणैः श्लोकैः पप्रच्छ प्रष्ट-

---

१ क. ख. ढ. °क्यातभा°। २ ख. घ. ढ. °इनान्त°।

वान् । यथा लोके वृक्षो वनस्पतिः । वृक्षस्य विशेषणं वनस्पतिरिति । अथेव पुरुषोऽमुष्य । अमुना सत्यमेतत् । तस्य लोमानि । तस्य पुरुषस्य लोमानीतरस्य वनस्पतेः पर्णानि । त्वगस्योत्पाटिका बहिश्चवास्य पुरुषस्येतरस्योत्पाटिका वनस्पतेः ॥ १ ॥

[illegible]पकर्षप्रकटनार्थमेव प्रश्नान्तरमवतारयति—तेष्विति । वृक्षो वनस्पतिरिति [illegible] नरुक्तिरित्याशङ्क्याऽऽह—वृक्षस्येति । तच्च तस्य महत्त्वमाहात्म्यं [illegible]क्षस्य वृक्षसाधर्म्यमेतदित्युच्यते । साधर्म्यमेव स्पष्टयति—तस्येत्यादिना । नीरसा त्वगुत्पाटिकेत्युच्यते ॥ १ ॥

त्वच एवास्य रुधिरं प्रस्यन्दि त्वच उत्पटः ।
तस्मात्तदातृण्णात्प्रैति रसो वृक्षादिवाऽऽहता-
त् ॥ २ ॥

त्वच एव त्वकाशादस्य पुरुषस्य रुधिरं प्रस्यन्दि वनस्पतेस्त्वच उत्पटस्त्वच एवोत्स्फुटति यस्मादेवं सर्वं समानमेव वनस्पतेः पुरुषस्य च तस्मादातृण्णाद्धिंसितात्प्रैति तद्रुधिरं निर्गच्छति वृक्षादिवाऽऽहताच्छिन्नाद्रसः ॥ २ ॥

उत्पटो वृक्षनिर्यासः ॥ २ ॥

मांसान्यस्य शकराणिं किनाटं स्नाव
तत्स्थिरम् । अस्थीन्यन्तरतो दारूणि
मज्जा मज्जोपमा कृता ॥ ३ ॥

एवं मांसान्यस्य पुरुषस्य वनस्पतेस्तानि शकराणि शकलानीत्यर्थः । किंनाटं वृक्षस्य किंनाटं नाम शकलेभ्योऽभ्यन्तरं वल्कलरूपं काण्डशकलं तत्स्नाव पुरुषस्य तात्स्थिरं तच्च किंनाटं स्नाववद्दृढं हि भवति । अस्थीनि पुरुषस्य स्नाव्नोऽन्तरतोऽस्थीनि भवन्ति । तथा किंनाटस्याभ्यन्तरतो दारूणि काष्ठानि । मज्जा मज्जैव वनस्पतेः पुरुषस्य च मज्जोपमा कृता मज्जाया उपमा मज्जोपमा नान्यो विशेषोऽस्तीत्यर्थः । यथा वनस्पतेर्मज्जा तथा पुरुषस्य यथा पुरुषस्य तथा वनस्पतेः ॥ ३ ॥

---

१ ज. घ. ञ. ढ. ण. स्फुटयति । २ क. ख. ग. ङ. च. छ. झ. ढ. °स्मात्तदा° । ३ ब. ङ. °ङि कीना° । ४ ग. च. कीनाट । ५ च. कीनाटं । ६ च. कीनाटं । ७ ग. ङ. झ. °व च दृढं । ८ ब. °या कीना° ।

विशेषाभावमेवाभिनयति—यथेति ॥ ३ ॥

यद्वृक्षो वृक्णो रोहति मूलान्नवतरः पुनः । मर्त्यः
स्विन्मृत्युना वृक्णः कस्मान्मूलात्प्ररोहति ॥ ४ ॥

यद्यपि वृक्षो वृक्णश्छिन्नो रोहति पुनः पुनः प्ररोहति प्रादुर्भवति मूलात्पुनर्नवतरः पूर्वस्मादभिनवतरः । यदेतस्माद्विशेषणात्प्राग्वनस्पतेः पुरुषस्य च सर्वं सामान्यमवगतम् । अयं तु वनस्पतौ विशेषो दृश्यते यच्छिन्नस्य प्ररोहणम् । न तु पुरुषे मृत्युना वृक्णे पुनः प्ररोहणं दृश्यते । भवितव्यं तु कुतश्चित्प्ररोहणेन । तस्माद्वः पृच्छामि मर्त्यो मनुष्यः स्विन्मृत्युना वृक्णः कस्मान्मूलात्प्ररोहति मृतस्य पुरुषस्य कुतः प्ररोहणमित्यर्थः ॥ ४ ॥

साधर्म्ये सति वैधर्म्यं वक्तुमशक्यमित्याशयेनाऽऽह—यद्यदीति । इदमपि तु धर्म्यमेव किं न स्यादित्याशङ्क्याऽऽह—यदेतस्मादिति । एतस्माद्विशेषणात्प्राग्यद्यद्विशेषणमुक्तं तत्सर्वमुभयोः सामान्यमवगतमिति संबन्धः । वृक्णस्य तु विशेषः । मा भूत्तस्य प्ररोहणमिति चेन्नेत्याह—भवितव्यं चेति । 'वृक्ष इव मृतस्य च' इति स्मृतेरित्यर्थः ॥ ४ ॥

रेतस इति मा वोचत जीवतस्तत्प्रजायते । धानारुह
इव वै वृक्षोऽञ्जसा प्रेत्य संभवः ॥ ५ ॥

यदि चेदेवं वदथ रेतसः प्ररोहतीति मा वोचत मैवं वक्तुमर्हथ । कस्मात् । यस्माज्जीवतः पुरुषात्तद्रेतः प्रजायते न मृतात् । अपि च धानारुहो धाना बीजं बीजरुहोऽपि वृक्षो भवति न केवलं धानारुह एव । इवशब्दोऽनर्थकः । वै वृक्षोऽञ्जसा साक्षात्प्रेत्य मृत्वा संभवो धानातोऽपि प्रेत्य संभवो भवेदञ्जसा पुनर्वनस्पतेः ॥ ५ ॥

जीवतो हि रेतो जायते स एव कुतो भवतीति विचार्यते न वासिक्येनातिक्लेशेन साधनं न च पुरुषान्तरादिति वाच्यमेकान्तिकावैन्यवरमयोगानुपपत्तेरिति मन्वानो हेतुमाह—यस्मादिति । वैषम्यान्तरमाह—अपि चेति । काण्डरुहोऽपीत्यपेरर्थः । वैशब्दः प्रसिद्धिद्योतक इत्यभिप्रेत्याऽऽह—वै वृक्ष इति । अञ्जसेत्यादेरर्थमुक्त्वा वाक्यार्थमाह—धानातोऽपीति ॥ ५ ॥

---

१ क. च. छ. झ. ट. नः प्र° । २ ग. °रुषस्य मृत्युना वृक्णस्य वृक्षस्येव पु° । ३ झ. ज. विवृक्णस्य । ४ ब. ञ. ण. वृक्षस्या° । ५ क. छ. °र्हत । क° ।

यत्समूलमावृहेयुर्वृक्षं न पुनराभवेत् । मर्त्यः स्विन्मृ-
त्युना वृक्णः कस्मान्मूलात्प्ररोहति ॥ ६ ॥

यद्यदि सह मूलेन धानया वाऽऽबृहेयुरुद्यच्छेयुरुत्पाटयेयुर्वृक्षं न पुनराभवेत्पुनरागत्य न भवेत् । तस्माद्वः पृच्छामि सर्वस्यैव जगतो मूलं मर्त्यः स्विन्मृत्युना वृक्णः कस्मान्मूलात्प्ररोहति ॥ ६ ॥

तथाऽपि कथं वैधर्म्यमित्याशङ्क्याऽऽह—यद्यदीति । पुरुषस्यापि पुनरुत्पत्तिर्मा भूदित्याशङ्क्य पूर्वोक्तं निगमयति—तस्मादिति ॥ ६ ॥

जात एव न जायते को न्वेनं जनयेत्पुनः ।
विज्ञानमानन्दं ब्रह्म रातिर्दातुः परायणं
तिष्ठमानस्य तद्विद इति ॥७॥२८॥

इति बृहदारण्यकोपनिषद्भाष्ये तृतीयाध्यायस्य
नवमं ब्राह्मणम् ॥ ९ ॥

इति बृहदारण्यकोपनिषदि तृतीयोऽध्यायः ॥ ३ ॥
बृहदारण्यकक्रमेण पञ्चमोऽध्यायः ॥ ५ ॥

जात एवेति मन्यध्वं यदि किमत्र प्रष्टव्यमिति । जनिष्यमाणस्य हि संभवः प्रष्टव्यो न जातस्यायं तु जात एवातोऽस्मिन्विषये प्रश्न एव नोपपद्यत इति चेत् । न । किं तर्हि मृतः पुनरपि जायत एवान्यथाऽकृताभ्यागमकृतनाशप्रसङ्गात् । अतो वः पृच्छामि को न्वेनं मृतं पुनर्जनयेत् । तत्र विजज्ञ[1]ब्राह्मणा यतो मृतः पुनः प्ररोहति जगतो मूलं न विज्ञातं ब्राह्मणैः । अतो ब्रह्मिष्ठत्वाद्धृता गावो याज्ञवल्क्येन जिता ब्राह्मणाः । समाप्ताऽऽख्यायिका । यज्जगतो मूलं येन च शब्देन साक्षाद्व्यपदिश्यते ब्रह्म यद्याज्ञवल्क्यो ब्राह्मणान्पृष्टवांस्तत्स्वेन रूपेण श्रुतिरस्मभ्यमाह—विज्ञानं विज्ञप्तिर्विज्ञानं तच्चाऽऽनन्दं न विषयावेज्ञानवदुःखानुविद्धं किं तर्हि प्रसन्नं शिवमतुलमनायासं नित्यतृप्तमेकरसमित्यर्थः । किं तद्ब्रह्मोभयविशेषणवद्भाति रातेः षष्ठ्यर्थे प्रथमा धनस्येत्यर्थः । धनस्य दातुः कर्मकृतो यजमानस्य

---

१ क. ख. घ. ङ. च. छ. ज. झ. ढ. °ष्यतो हि । २ ख. च. ढ. °तविप्रणाश° । ३ ग. °जज्ञिरे ब्राह्म° । ४ ख. °थमुखव° । घ. ज. °यज्ञ° ।

परायणं परा गतिः कर्मफलस्य प्रदातृ । किंच व्युत्थायैषणाभ्यस्तस्मिन्नेव ब्रह्मणि तिष्ठत्यकर्मकृत्तद्वच्च वर्त्तीति तद्विच्च तस्य तिष्ठमानस्य च तद्विदो ब्रह्मविदं इत्यर्थः । परायणमिति ।

स्वभाववादमुत्थापयति—जात इति । इतिशब्दश्चोद्यसमाप्त्यर्थः । तदेव स्फुटयति—जनिष्यमाणस्य हीति । न जायत इति भागेनोत्तरमाह—नेत्यादिना । स्वभाववादे दोषमाह—अन्ययेति । स्वभावासंभवे फलितमाह—अत इति । उक्तमेव स्फुटयति—जगत इति । ब्रह्मविदां श्रेष्ठत्वे याज्ञवल्क्यस्य सिद्धे फलितमाह—अत इति । समाप्ताऽऽख्यायिकेति । ब्राह्मणाश्च सर्वे यथावयं जग्मुरित्यर्थः । विज्ञानादिवाक्यमुत्थापयति—यज्जगत इत्यादिना । विज्ञानशब्दस्य कारणादिविषयत्वं वारयति—विज्ञप्तिरिति । आनन्दविशेषणस्य कृत्यं दर्शयति—नेत्यादिना । प्रसन्नं दुःखहेतुना कामक्रोधादिना संबन्धरहितम् । शिवं कामादिकारणेनाज्ञानेनापि संबन्धशून्यम् । सातिशयत्वप्रयुक्तदुःखराहित्यमाह—अतुलमिति । साधनसाध्यत्वाधीनदुःखवैधुर्यमाह—अनायासमिति । दुःखनिवृत्तिमात्रं सुखमिति पक्षं प्रतिक्षिपति—नित्यतृप्तमिति । आनन्दो ज्ञानमिति ब्रह्मण्याकारभेदमाशङ्क्याऽऽह—एकरसमिति । फलमत उपपत्तेरिति न्यायेन ब्रह्मणो जगन्मूलत्वमाह—रातिरित्यादिना । 'ब्रह्मसंस्थोऽमृतत्वमेति' इति श्रुत्यन्तरमाश्रित्य तस्यैव मुक्तोपसृप्यत्वमुपदिशति—किंचेति । अक्षरव्याख्यानसमाप्ताविति शब्दः ।

अत्रेदं विचार्यते—आनन्दशब्दो लोके सुखवाची प्रसिद्धः । अत्र च ब्रह्मणो विशेषणत्वेनाऽऽनन्दशब्दः श्रूयत आनन्दं ब्रह्मेति । श्रुत्यन्तरे च—" आनन्दो ब्रह्मेति व्यजानात् " " आनन्दं ब्रह्मणो विद्वान् " " यदेष आकाश आनन्दो न स्यात् " " यो वै भूमा तत्सुखम् " इति च । "एष परम आनन्दः " इत्येवमाद्याः । संवेद्ये च सुखे आनन्दशब्दः प्रसिद्धः । ब्रह्मानन्दश्च यदि संवेद्यः स्याद्युक्ता एते ब्रह्मण्यानन्दशब्दाः । ननु च श्रुतिप्रामाण्यात्संवेद्यानन्दस्वरूपमेव ब्रह्म किं तत्र विचार्यमिति । न । विरुद्धश्रुतिवाक्यदर्शनात् । सत्यमानन्दशब्दो ब्रह्मणि श्रूयते विज्ञानप्रतिषेधश्चैकत्वे । " यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्तत्केन कं विजानीयाद्यत्र नान्यत्पश्यति

---

१ ख. ग. ङ. छ. ज. झ. परमयनं प° । २ ग. °विदः प° । ३ क. ख. घ. ञ. ट. ण. °त्य हीं° । ४ घ. ञ. °भाववादासं° । ५ ञ. स्पष्टयति । ६ ञ. ण. °ह्मणाः स° । ७ क. ५. ट. रातेरिं° । ८ ख. ग. च. ढ. °द्वान्न बिभेति कुतश्चन । को ह्येवान्यात्कः प्राण्यात् । य° । ९ क. घ. ङ. छ. °नन्दः । यो । १० क. च. ढ. °रमान° । ११ ग. च. ढ. आः श्रुतयः । सं° ।

नान्यच्छृणोति नान्यद्विजानाति स भूमा " " प्राज्ञेनाऽऽत्मना संपरिष्वक्तो न बाह्यं किंचन वेद " इत्यादि । विरुद्धश्रुतिवाक्यदर्शनात्तेन कर्तव्यो विचारः । तस्माद्युक्तं वेदवाक्यार्थनिर्णयाय विचारयितुम् ।

सच्चिदानन्दात्मकं ब्रह्म विद्याविद्याभ्यां बन्धमोक्षास्पदमित्युक्तमिदानीं ब्रह्मानन्दे विचारमवतारयन्नाविर्गीतमर्थमाह--अत्रेति । तथाऽपि प्रकृते वाक्ये किमायातमिति वदाह-अत्र चेति । ने च केवलमत्रैवाऽऽनन्दशब्दो ब्रह्मविशेषणार्थकत्वेन श्रुतः किंतु तैत्तिरीयकादावपीत्याह-श्रुत्यन्तरे चेति । ब्रह्मणो विशेषणत्वेनाऽऽनन्दशब्दः श्रूयत इति संबन्धः । अन्याः श्रुतीरेवोदाहरति-आनन्द इत्यादिना । एवमाद्याः श्रुतय इति शेषः । तथाऽपि कथं विचारसिद्धिस्तत्राऽऽह-संवेद्य इति । लोकप्रसिद्धेरद्वैतश्रुतेश्च ब्रह्मण्यानन्दः संवेद्योऽसंवेद्यो वेति विचारः कर्तव्य इत्यर्थः । उभयत्र फलं दर्शयति- ब्रह्मानन्दश्चेति । अन्यथा लोकवेदयोः शब्दार्थभेदादविशिष्टस्तु वाक्यार्थ इति न्यायविरोधोऽसंवेद्यत्वे पुनरद्वैतश्रुतिरविरुद्धेति भावः । विचारमाक्षिपति-नन्विति । विरुद्धश्रुत्यर्थनिर्णयार्थं विचारकर्तव्यतां दर्शयति-नेति । संग्रहवाक्यं विवृणोति-सत्यमित्यादिना । एकत्वे सति विज्ञानप्रतिषेधश्रुतिमेवोदाहरति-यत्रेत्यादिना । इत्यादि श्रवणमिति शेषः । फलितमाह-विरुद्धश्रुतीति । श्रुतिविप्रतिपत्तेर्विचारकर्तव्यतामुपसंहरति-तस्मादिति ।

मोक्षवादिविप्रतिपत्तेश्च । सांख्या वैशेषिकाश्च मोक्षवादिनो नास्ति मोक्षे सुखं संवेद्यमित्येवं विप्रतिपन्नाः । अन्ये निरतिशयं सुखं स्वसंवेद्यमिति । किं तावद्युक्तमानन्दादिश्रवणात् । "जक्षत्क्रीडन्रममाणः" " स यदि पितृलोककामो भवति " " यः सर्वज्ञः सर्ववित् " " सर्वान्कामान्समश्नुते " इत्यादिश्रुतिभ्यो मोक्षे सुखं संवेद्यमिति । नन्वेकत्वे कारकविभागाभावाद्विज्ञानानुपपत्तिः । क्रियायाश्चानेककारकसाध्यत्वाद्विज्ञानस्य च क्रियात्वात् । नैष दोषः । शब्दप्रामाण्याद्ब्रह्मविज्ञानमानन्दविषये । विज्ञानमानन्दमित्यादीन्यानन्दस्वरूपस्यासंवेद्यत्वेऽनुपपन्नानि वचनानीत्यवोचाम ।

तत्रैव हेत्वन्तरमाह-मोक्षेति । तामेव विप्रतिपत्तिं विवृणोति-सांख्या इति ।

---

१ घ. ञ. ण. न के° । २ क. ख. घ. ढ. °ह्मवि° । ३ ञ. ण. °दिदर्शयिषति । ४ ङ. मोक्षे वा° । ५ क. ख. ग. घ. ङ. च. छ. ज. °वं प्र° । ६ ग. ङ. झ. °खं सं° । ७ ख. °मित्येवं विप्रतिपत्तौ कि । ८ झ. °ति प्रतिपन्नाः । कि । ९ घ. ज. झ. °ति सर्व° । १० ङ. ख. ग. ङ. ञ. स ।

विमर्शपूर्वकं पूर्वपक्षं गृह्णाति—किं तावदित्यादिना । आनन्दादिश्रवणाद्विज्ञानमानन्दं ब्रह्मेति श्रुतेर्मोक्षे सुखं संवेद्यमिति युक्तमिति संबन्धः । एवमेव वाक्यान्तराण्युदाहरति—जक्षदित्यादिना । पूर्वपक्षमाक्षिपति—नन्विति । मोक्षे चेदिष्यते सुखज्ञानं तर्हि तदनेककारकसाध्यं वाच्यं क्रियात्वात्पाकादिवत्सर्वैकत्वे च मोक्षे कारकविभागाभावान्न सुखसंवेदनं संभवतीत्यर्थः । जन्यस्य कारकापेक्षायामपि सुखज्ञानस्याजन्यत्वान्न तदपेक्षेत्याशङ्क्याऽऽह—क्रियायाश्चेति । या क्रिया साऽनेककारकसाध्येति व्याप्तेर्गमनादाववगतत्वाज्ज्ञानस्यापि धात्वर्थत्वेन क्रियात्वादनेककारकसाध्यता सिद्धैवेत्यर्थः । श्रुतिप्रामाण्यमाश्रित्य पूर्ववादी परिहरति—नैष दोष इति । तदेव स्फुटयति—विज्ञानमिति ।

ननु वचनेनाप्यग्नेः शैत्यमुदकस्य चोष्ण्यं न क्रियत एव ज्ञापकत्वाद्वचनानाम् । न च देशान्तरेऽग्निः शीत इति शक्यते ज्ञापयितुमगम्ये वा देशान्तर उष्णमुदकमिति । न । प्रत्यगात्मन्यानन्दविज्ञानदर्शनात् । न विज्ञानमानन्दमित्येवमादीनां वचनानां शीतोऽग्निरित्यादिवाक्यवत्प्रत्यक्षादिविरुद्धार्थप्रतिपादकत्वम् ।

अद्वये ब्रह्मणि श्रुतिप्रामाण्यादानन्दज्ञात्रमुक्तमाक्षिपति—नन्विति । अद्वैतश्रुतिविरोधाद्ब्रह्मणि विज्ञानक्रियाकारकविभागापेक्षा नोपपद्यते । नहि विज्ञानमानन्दमित्यादिवचनानि मानान्तरविरोधेन विज्ञानक्रियां ब्रह्मण्युत्पादयन्ति तेषां ज्ञापकत्वाज्ज्ञापकस्य चाविरोधापेक्षत्वादन्यथाऽतिप्रसङ्गादित्यर्थः । लौकिकज्ञानस्य क्रियात्वेऽपि मोक्षे सुखज्ञानं क्रियैव न भवेति । तन्न । विज्ञानादिवाक्यस्याद्वैतश्रुतिविरोधोऽस्तीत्याशङ्क्याऽऽह—न चेति । पयःपावकयोः सर्वत्रैकरूप्यवद्विज्ञानस्यापि लोकवेदयोरेकरूपत्वमेवेति भावः । मानान्तरविरोधादात्मन्यानन्दज्ञानस्य सत्त्वमेव वा निषिध्यते तस्य क्रियात्वं वा निराक्रियते तत्राऽऽद्यं दूषयति—नेत्यादिना । तदेव स्पष्टयति—न विज्ञानमिति ।

अनुभूते त्वविरुद्धार्थता । सुख्यहमिति सुखात्मकमात्मानं स्वयमेव वेदयते । तस्मात्सुतरां प्रत्यक्षाऽविरुद्धार्थता । तस्मादानन्दं ब्रह्म विज्ञानात्मकं सत्स्वयमेव वेदयते । तथाऽऽनन्दप्रतिपादिकाः श्रुतयः समञ्जसाः स्युर्जक्षत्क्रीडन्रममाण इत्येवमाद्याः पूर्वोक्ताः ।

---

१ अ. विचारपू° । क. ख. ञ. ढ. तदाऽने° । ३ ण °यात्वादिति । ४ घ. ज. °मवगम्यते च दे° । ५ ण. शुद्धे । ६ क. ख ढ. ण. मोक्षे सु° । ७ घ. °वतीति न वि° । ८ ख. ङ. च. ढ. °क्षाद्यावि° ।

सुखज्ञानस्य गुणत्वाङ्गीकारात्क्रियात्वनिराकरणमिष्टमेवेति मत्वाऽऽह—अनुभूयते इति । । अनुभवमेवाभिनयति—सुरूयहमिति । तथाऽपि श्रुतिविरोधः स्यादित्याशङ्क्य प्रत्यक्षानुसारेण साऽपि नेतव्येत्याशयेनाऽऽह—तस्मादिति । आत्मन्यानन्दज्ञानस्य क्रियात्वानङ्गीकारात्कारकभेदापेक्षाभावादित्यर्थः । गुणत्वपक्षे च प्रत्यक्षस्यानुगुणत्वादागमस्य विरोधिनस्तदनुसारेण नेयत्वादविरुद्धागमस्य मुख्यत्वादित्यविशेषः । अविरुद्धार्थता विज्ञानादिश्रुतेरिति शेषः । गुणगुणिभावेऽपि नाद्वैतश्रुतिः शक्या नेतुमित्याशङ्क्य स्वंवेद्यत्वपक्षमाश्रित्याऽऽह—तस्मादानन्दमिति । यथाकथंचिद्ब्रह्मण्यानन्दस्य वेद्यत्वे श्रुतीनामानुगुण्यमस्तीत्याह-तथेति ।

न कार्यकारणाभावेऽनुपपत्तेर्विज्ञानस्य । शरीरवियोगो हि मोक्ष आत्यन्तिकः । शरीराभावे च करणानुपपत्तिराश्रयाभावात् । ततश्च विज्ञानानुपपत्तिरकार्यकरणत्वात् । देहाद्यभावे च विज्ञानोत्पत्तौ सर्वेषां कार्यकरणोपादानानर्थक्यप्रसङ्गः । एकत्वविरोधाच्च ।

आनन्दो वेद्यो ब्रह्मणीति चोदिते सिद्धान्तमाह-नेति । आगन्तुकमनागन्तुकं वा ज्ञानं मुक्तावानन्दं गोचरयति नाऽऽद्य इत्याह—कार्येति । अनुपपत्तिमेव स्फोरयति—शरीरेति । कार्यकरणयोरभावेऽपि मोक्षे ब्रह्मानन्दज्ञानं जनिष्यते संसारे हि हेत्वपेक्षेत्याशङ्क्याऽऽह—देहादीति । द्वितीयं दूषयति—एकत्वेति । यदि ब्रह्म स्वरूपज्ञानेनैव वेद्यानन्दरूपं भवितुमुत्सहते विषयविषयिणोरेकत्वविरोधात्तत्स्थानागन्तुकमपि ज्ञानं मुक्तौ नाऽऽनन्दमधिकरोतीत्यर्थः ।

परं चेद्ब्रह्मानन्दात्मकमात्मानं नित्यविज्ञानत्वान्नित्येमेव विजानीयात् । तच्च । संसार्यमपि संसारविनिर्मुक्तेः स्वाभाव्यं प्रतिपद्येत । जलाशय इवोदकाञ्जलिः क्षिप्तो न पृथक्त्वेन व्यवतिष्ठत आनन्दात्मैकब्रह्मविज्ञानाय । तदा मुक्त आनन्दात्मकमात्मानं वेदयत इत्येतदनर्थकं वाक्यम् ।

किंच ब्रह्म वा मुक्तो वा संसारी वा ब्रह्मानन्दं गोचरयेत्तत्राऽऽद्यमनुवदति—परं चेदिति । तस्मिन्पक्षे न ब्रह्म स्वरूपानन्दं वेत्ति तेनैक्यादेकत्र विषयविषयित्वानुपपत्तेरुक्तत्वादिति दूषयति—तच्चेति । नापि संसारी ब्रह्मानन्दं गोचरयति स खल्वनि-

---

१ ट. ण. °दित्याश° । २ घ. °शयमवि° । ३ ग. °शङ्क्यावे° । ४ घ. °स्वसंवेद्ये श्रुतिः शक्या नेतुमिति स्वसंवे° । ५ क. ग. ड. छ. ज. झ. तत्र सं° । ६ ख. °र्मुक्तस्त स्वाभा° । ७ ख. ग. घ. °पद्यते । म° । ८ घ. ञ. °लिः प्रक्षि° । ९ च. ढ. °त्मकं ब्र° । १० च. ढ. °विज्ञाय । ११ ञ. ण. तत्रेति ।

वृत्ते संसारे संसारिणमात्मानमभिमन्यमानो न ब्रह्मानन्दमाकलयितुमर्हति संसारे निवृत्ते तु ततो विनिर्मुक्तो ब्रह्मस्वाभाव्यं प्रतिपद्यमानस्तदानन्दं तदुदेव विषयीकर्तुं नार्हतीति तृतीयं पक्षमाह—संसार्यपीति । मुक्तोऽपि ब्रह्मणोऽभिन्नो भिन्नो वेति विकल्प्याभेदपक्षमनुभाषते—ब्रह्मेति । ब्रह्माभिन्नस्य मुक्तस्य तदानन्दविषयीकरणमुक्तन्यायेन निरस्यति—तदेति ।

अथ ब्रह्मानन्दमयः सन्मुक्तो वेदयते प्रत्यगात्मानं चाहमस्म्यानन्दस्वरूप इति । तदैकत्वविरोधः । तथा च सति सर्वश्रुतिविरोधः । तृतीया च कल्पना नोपपद्यते । किंचान्यद्ब्रह्मणश्च निरन्तरात्मानन्दविज्ञाने विज्ञानाविज्ञानकल्पनानर्थक्यम् । निरन्तरं चेदात्मानन्दाविषयं ब्रह्मणो विज्ञानं तदेव तस्य स्वभाव इत्यात्मानन्दं विजानातीति कल्पनाऽनुपपन्ना । अतादृज्ञानप्रसङ्गे हि कल्पनाया अर्थवत्त्वं यथाऽऽत्मानं परं च वेत्तीति । नहीष्वाद्यासक्तमनसो नैरन्तर्येणेषुज्ञानाज्ञानकल्पनायां अर्थवत्त्वम् ।

भेदपक्षमनुवदति—अथेति । ब्रह्मानन्दं प्रत्यगात्मानमिति संबन्धः । वेदनमाकारमभिनयति—अहमिति । तत्त्वमस्यादिश्रुतिविरोधेन निराकरोति—तदेति । मुक्तो ब्रह्मणः सकाशाद्भिन्नोऽभिन्नो वा स्या भूद्भिन्नाभिन्नस्तु स्यादित्याकाङ्क्षायामाह—तृतीयेति । तत्रैव भेदाभेदवादस्य दूषितत्वादित्यर्थः । ब्रह्मणः स्वानन्दस्वभावत्वे हेत्वन्तरमाह—किंचान्यदिति । तदेवोपपादयति—निरन्तरं चेदिति । आख्यातप्रयोगस्य तर्हि कुत्रार्थवत्त्वं तत्राऽऽह—अतादृज्ञानेति । देवदत्तो हि बुद्धिपूर्वकारित्वात्स्थाणां स्वात्मानमन्यं च विविच्य जानाति नान्यदेत्युभयथास्वदर्शनात्तत्राऽऽख्यातप्रयोगो युज्यते । नैवं ब्रह्मण्यज्ञानप्रसङ्गोऽस्ति । नित्यज्ञानस्वभावत्वात्तथा च तत्राऽऽख्यातप्रयोगो नार्थवानित्यर्थः । ब्रह्मण्याख्यातप्रयोगानर्थक्यं दृष्टान्तेन स्पष्टयति—नहीति ।

अथ विच्छिन्नमात्मानन्दं विजानाति । विज्ञानस्याऽऽत्मविज्ञानच्छिद्रेऽन्यविषयत्वप्रसङ्गः । आत्मनश्च विक्रियावत्त्वं ततश्चानित्यत्वप्रसङ्गः । तस्माद्विज्ञानमानन्दमिति स्वरूपान्वाख्यानपरैव श्रुतिर्नाऽऽत्मानन्दसंवेद्यत्वार्था । जक्षत्क्रीडन्नित्यादिश्रुतिविरोधोऽसंवेद्यत्व इति चेन्न । सर्वात्मैकत्वे यथाप्राप्तानुवादित्वात् । मुक्तस्य सर्वात्मभावे सति यत्र क्वचियोगिषु देवेषु वा जक्षणादि प्राप्तं तद्यथाप्राप्तमेवानूद्यते तत्तस्यैव सर्वात्मभावादिति सर्वात्मभावमोक्षस्तुतये ।

---

१ घ. ण. °तीत्यभिप्रेत्याह । २ ख. ग. ङ. छ. °न्तरमात्मा° । ३ क. ख. ढ. °त्तो भू° । ४ क. ख. °च्य न जा° । ५ क. नातीति । ६ ग. घ. ञ. °पाख्या° । ७ ङ. मोक्षः तस्तयते य° ।

मत्यगात्मनि नित्यज्ञानत्वासिद्धिं शङ्कयति—अथेति । विच्छिन्नमिति क्रिया-विशेषणम् । परिहरति—विज्ञानस्येति । आत्मनो विज्ञानस्य च्छिद्रमन्तरालम-वस्त्वावस्था तदाऽपि विज्ञानमस्ति चेत्तस्यान्यविषयत्वप्रसङ्गस्तथा च ' यत्रान्य-दिव ' इत्यादिश्रुतेरात्मनो मर्त्यत्वापत्तिर्न चेत्तदा विज्ञानं तदा पाषाणवदचे-तनत्वं विज्ञानस्वरूपत्वानङ्गीकारादित्यर्थः । आत्मनोऽनित्यज्ञानवत्त्वे दोषान्तरमा-ह—आत्मनश्चेति । आनन्दज्ञाने ब्रह्मणि विषयविषयित्वायोगश्चेत्कथं विज्ञाना-दिवाक्यमित्याशङ्क्योपसंहरति—तस्मादिति । ब्रह्मण्यानन्दस्यावेद्यत्वे श्रुतिविरो-धमुक्तं स्मारयति—जक्षदिति । सर्वत्राऽऽत्मनो मुक्तस्यैक्ये सति योग्यादिषु यथा जक्षणादि प्राप्तं तथैव तदनुवादित्वादस्याः श्रुतेर्न विरोधोऽस्तीति परिहरति—नेत्यादिना । तदेव प्रपञ्चयति—मुक्तस्येति । किमनुवादे फलमिति चेत्तदाह—तत्रास्येति । मुक्तस्य योग्यादिषु सर्वत्राऽऽत्मैभावादेव तत्र प्राप्तं जक्षणाद्यत्र मुक्ति-स्तुतयेऽनूद्यते तन्नानुवादवैयर्थ्यमित्यर्थः ।

यथाप्राप्तानुवादित्वे दुःखित्वमपीति चेत् । योग्यादिषु यथाप्राप्त-जक्षणादिवत्स्थावरादिषु यथाप्राप्तदुःखित्वमपीति चेत् । न । नामरूप-कृतकार्यकरणोपाधिसंपर्कजनितभ्रान्त्यध्यारोपितत्वात्सुखित्वदुःखित्वा-दिविशेषस्येति परिहृतमेतत्सर्वम् । विरुद्धश्रुतीनां च विषयमवोचाम । तस्मादेषोऽस्य परम आनन्द इतिवत्सर्वाण्यानन्दवाक्यानि द्रष्ट-व्यानि ॥ ७ ॥ २८ ॥

इति बृहदारण्यकोपनिषद्भाष्ये तृतीयाध्यायस्य
नवमं ब्राह्मणम् ॥ ९ ॥

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य
श्रीमच्छंकरभगवतः कृतौ बृहदारण्यकोपनिषद्भाष्ये
तृतीयोऽध्यायः ॥ ३ ॥

विदुषः तावात्म्येन योग्यादिषु प्राप्तलक्षणाद्यनुवादे स्यादतिप्रसक्तिरिति शङ्कते—यथाप्राप्तेति । अतिप्रसक्तिमेव प्रकटयति—योग्यादिष्विति । अविद्यात्मकनामरू-पविरचितोपाधिद्वयसंबन्धनिबन्धनमिथ्याज्ञानाधीनत्वादात्मनि दुःखित्वादिप्रतीतेर्न तत्र वस्तुतो दुःखित्वं न च जक्षणाद्यपि वास्तवमविद्यास्यैव मुक्तिस्तुतयेऽनु-वादाद्दुःखित्वस्य हि नानुवादोऽतिहीनत्वप्राप्तेरिति परिहरति—नेत्यादिना ।

---

१ क. ण. शङ्कते । २ ण. °त्मलाभादे° । ३ घ. °णाद्येव मु° । ४ घ. ज. °रमान° ।

यत्तु विरुद्धश्रुतिदृष्टेर्नाऽऽगमार्थो निर्णीतो भवतीति तत्राऽऽह—विरुद्धेति । वेद्यत्ववेद्यत्वादिश्रुतीनां सोपाधिकनिरुपाधिकविषयत्वेन मधुकाण्डे व्यवस्थोक्तेत्यर्थः । ब्राह्मणार्थमुपसंहरति—तस्मादिति । ब्रह्मण्यानन्दस्य वेद्यताया दुर्निरूपत्वं तच्छब्दार्थः । यथैषोऽस्येत्यत्र भेदो न विवक्षितः तत्त्वात्मभावस्य प्रकृतत्वात्तथा विज्ञानादिवाक्येष्वानन्दस्य वेद्यता न विवक्षिता । उक्तरीत्या तद्वेद्यताया दुष्पतिपादत्वात्तस्मादनतिशयानन्दं चिदेकतानं वस्तु सिद्धमित्यर्थः ॥ ७ ॥२८॥

इति बृहदारण्यकोपनिषद्भाष्यटीकायां तृतीयाध्यायस्य
नवमं ब्राह्मणम् ॥ ९ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छुद्धानन्दपूज्यपादशिष्य-
श्रीमदानन्दज्ञानविरचितायां बृहदारण्यकोपनिषद्भाष्यटीकायां
तृतीयोऽध्यायः ॥ ३ ॥

(अथ चतुर्थाध्यायस्य प्रथमं ब्राह्मणम्) ।

जनको ह वैदेह आसांचक्रे । अस्य संबन्धः । शारीराद्यानर्थौ पुरुषान्निरुह्य प्रत्युह्य पुनर्हृदये दिग्भेदेन च पुनः पञ्चधा व्यूह्य हृदये प्रत्युह्य हृदयं शरीरं च पुनरन्योन्यप्रतिष्ठं प्राणादिपञ्चवृत्त्यात्मके समानाख्ये जगदात्मनि सूत्र उपसंहृत्य जगदात्मानं शरीरहृदयसूत्रावस्थमतिक्रान्तवान्य औपनिषदः पुरुषो नेति नेतीति व्यपदिष्टः स साक्षाच्चोपादानकारणस्वरूपेण च निर्दिष्टो विज्ञानमानन्दमिति[1] तस्यैव वागादिदेवताद्वारेण पुनरधिगमः कर्तव्य इत्यधिगमनोपायान्तरार्थोऽयमारम्भो ब्राह्मणद्वयस्य । आख्यायिका त्वाचारप्रदर्शनार्था—

ॐ जनको ह वैदेह आसांचक्रेऽथ ह याज्ञवल्क्य
आववाज । तꣳ होवाच याज्ञवल्क्य किमर्थ-
मचारीः पशूनिच्छन्नण्वन्तानिति । उभयमेव सम्रा-
डिति होवाच ॥ १ ॥

जनको ह वैदेह आसांचक्र आसनं कृतवानास्थायिकां दत्तवानि-

---

१ च. ढ. °नन्दं ब्रह्मेति । २ क. °गमोपा° ।

त्यर्थः । दर्शनकामेभ्यो राज्ञः । अथ ह तस्मिन्नवसरे याज्ञवल्क्य आव-
व्राजाऽऽगतवानात्मनो योगक्षेमार्थं राज्ञो वा विविदिषां दृष्ट्वाऽनुग्र-
हार्थम् । तमागतं याज्ञवल्क्यं ययावत्पूजां कृत्वोवाच होक्तवाञ्जनको
हे याज्ञवल्क्य किमर्थमचारीरागतोऽसि किं पशूनिच्छन्पुनरप्याहो-
स्विदण्वन्तान्सूक्ष्मवस्तुनिर्णयान्तान्प्रश्नान्मत्तः श्रोतुमिच्छाम्यिति । उभ-
यमेव पशून्प्रश्नांश्च हे सम्राट् । सम्राडिति वाजपेययाजिनो लिङ्गं
यच्चाज्ञया राज्यं प्रशास्ति स सम्राट् तस्याऽऽमन्त्रणं हे सम्राडिति
समस्तस्य वा भारतस्य वर्षस्य राजा ॥ १ ॥

पूर्वस्मिन्नध्याये जल्पन्यायेन सच्चिदानन्दं ब्रह्म निर्धारितम् । इदानीं वादन्या-
येन तदेव निर्धारयितुमध्यायान्तरमवतारयति—जनक इति । तत्र ब्राह्मणद्वयस्या-
ध्यान्तरसंबन्धं प्रतिजानीते—अस्येति । तमेव वक्तुं वृत्तं कीर्तयति—शारीराद्या-
नीति । निरुह्य प्रत्युह्येति विस्तार्य व्यवहारमापाद्येत्यर्थः । प्रेत्युह्य हृदये
पुनरुपसंहृत्येति यावत् । जगदात्मनीत्यव्याकृतोक्तिः । सूत्रशब्देन तत्कारणं
गृह्यते । अतिकृपणं तद्गुणदोषासंस्पृष्टत्वम् । अनन्तरब्राह्मणद्वयतात्पर्यमाह—तस्यै-
वेति । वागाद्यधिष्ठात्रीष्वग्न्यादिदेवतासु ब्रह्मदृष्टिद्वारेत्यर्थः । पूर्वोक्तान्वयव्यतिरे-
कादिसाधनापेक्षयाऽन्तरशब्दः । आचार्यवता श्रद्धादिसंपन्नेन विद्या लब्धव्येत्या-
दारः । अप्राप्तप्राप्तियोगः, प्राप्तस्य रक्षणं क्षेम इति विभागः । भारतस्य वर्षस्य
हिमवत्सेतुपर्यन्तस्य देशस्येति यावत् ॥ १ ॥

यत्ते कश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्मे जित्वा शै-
लिनिर्वाग्वै ब्रह्मेति यथा मातृमान्पितृमानाचार्यवा-
न्ब्रूयात्तथा तच्छैलिनिरब्रवीद्वाग्वै ब्रह्मेत्यव (वे)दतो
हि किꣳ स्यादित्यब्रवीत्तु ते तस्याऽऽयतनं प्रतिष्ठां
न मेऽब्रवीदित्येकपाद्वा एतत्साम्राडिति स वै नो
ब्रूहि याज्ञवल्क्य । वागेवाऽऽयतनमाकाशः प्रतिष्ठा
प्रज्ञेत्येनमुपासीति । का प्रज्ञता याज्ञवल्क्य वागेव
सम्राडिति होवाच । वाचा वै सम्राड्बन्धुः प्रज्ञायत

---

१ ब. °भ्यो हि राजा राजभ्यः । अ°। २ क. ग. राजा । ३ झ. °ट । इति होवाच । ह°। ४ क. ग. छ. झ. ञ. °ङ्गं समस्त° । ५ ङ. व्युह्य । ६ ण. तत्तत्का° । ७ ण. तत्तदु° । ८ ब. ण. °रेणेत्य° । ९ क. घ. ङ. छ. ट. ठ. ड. ढ. °लिनोऽब्र° । १० च. ज. झ. ढ. °त्यतदु° ।

ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानीष्टं हुतमाशितं पायितमयं च लोकः परश्च लोकः सर्वाणि च भूतानि वाचैव सम्राट्प्रज्ञायन्ते वाग्वै सम्राट्परमं ब्रह्म नैनं वाग्जहाति सर्वाण्येनं भूतान्यभिक्षरन्ति देवो भूत्वा देवानप्येति य एवं विद्वानेतदुपास्ते । हस्त्यृषभं सहस्रं ददामीति होवाच जनको वैदेहः । स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥ २ ॥

किंतु यत्ते तुभ्यं कश्चिदब्रवीदाचार्योऽनेकाचार्यसेवी हि भवांस्तच्छ्रुणवामेति । इतर आह—अब्रवीदुक्तवान्मे ममऽऽचार्यो जित्वा नामतः शैलिनस्यासत्यं शैलिनिर्वाग्वै ब्रह्मेति वाग्देवता ब्रह्मेति । आहेतरो यथा मातृमान्माता यस्य विद्यते पुत्रस्य सम्यगनुशास्त्यनुशासनकर्त्री स मातृमान् । अत ऊर्ध्वं पिता यस्यानुशास्ता स पितृमान् । उपनयनादूर्ध्वमा समावर्तनादाचार्यो यस्यानुशास्ता स आचार्यवान् । एवं शुद्धित्रयहेतुसंयुक्तः स साक्षादाचार्यः स्वयं न कदाचिदपि प्रामाण्याद्व्यभिचरति स यथा ब्रूयाच्छिष्यार्थं यथाऽसौ जित्वा शैलिनिरुक्तवान्वाग्वै ब्रह्मेति । अवदतो हि किं स्यादिति । नहि मूकस्येहार्थममुत्रार्थं वा किंचन स्यात् ।

तत्र राजानं प्रति प्रश्नमुत्थापयति—किंत्विति । कश्चिदिति विशेषणस्य तात्पर्यमाह—अनेकेति । प्रामाण्यमाप्तत्वम् । यथोक्तार्थानुमोदने युक्तिमाह—नहीति ।

किंत्वब्रवीदुक्तवांस्ते तुभ्यं तस्य ब्रह्मण आयतनं प्रतिष्ठां च । आयतनं नाम शरीरम् । प्रतिष्ठा त्रिष्वपि कालेषु य आश्रयः । आहेतरो न मेऽब्रवीदिति । इतर आह—यद्येवमेकपाद्वा एतदेकः पादो यस्य

---

१ ङ. वाचा वै स° । २ झ. °ह जनकः । अ° । ३ ख. घ. ङ. च. ज. ढ. °मांस्तत ४ क. च. ङ. °युक्तबुद्धिराचा° । ५ क. ख. ङ. छ. ढ. °रतीति । ६ घ. °य तत्तथाऽ° ७ ख. ढ. °माप्यात्वे य° । ८ घ. ङ. ञ. वा ।

ब्रह्मणस्तदिदमेकपाद्ब्रह्म त्रिभिः पादैः शून्यमुपास्यमानमपि न फलाय भवतीत्यर्थः । यद्येवं स त्वं विद्वान्सन्नोऽस्मभ्यं ब्रूहि हे याज्ञवल्क्येति । स चोऽऽह–वागेवाऽऽयतनं वैाग्देवैस्य ब्रह्मणो वागेव करणमायतनं शरीरमाकाशोऽव्याकृताख्यः प्रतिष्ठोत्पत्तिस्थितिलयकालेषु । प्रज्ञेत्येनदुपासीत प्रज्ञैतायमुपनिषद्ब्रह्मणश्चतुर्थः पादः प्रज्ञेति कृत्वैनद्ब्रह्मोपासीत ।

यथोक्तब्रह्मविद्यया कृतकृत्यत्व मन्वानं राजानं प्रत्याह–किंत्विति । आयतनप्रतिष्ठयोरेकत्वात्पुनरुक्तिमाशङ्क्य विभजते–आयतनं नामेति । एकपादत्वेऽपि ब्रह्मणस्तदुपासनादिष्टसिद्धिरिति चेन्नेत्याह–त्रिभिरिति ब्रूहि प्रतिष्ठायायतनं चेति शेषः ।

का प्रज्ञता याज्ञवल्क्य किं स्वयमेव प्रज्ञोत प्रज्ञानिमित्तम् । यथाऽऽयतनप्रतिष्ठे ब्रह्मणो व्यतिरिक्ते तद्वत्किम् । न, कथं तर्हि, वागेव सम्राडिति होवाच वागव प्रज्ञेति होवाचोक्तवान्न व्यतिरिक्ता प्रज्ञेति । कथं पुनर्वागेव प्रज्ञेति, उच्यते--वाचा व सम्राड्बन्धुः प्रज्ञायतेऽस्माकं बन्धुरित्युक्ते प्रज्ञायते बन्धुस्तथर्ग्वदादि । इष्टं यागनिमित्तं धर्मजातं हुतं होमनिमित्तं च । आशितमन्नदाननिमित्तं पायितं पानदाननिमित्तमयं च लोक इदं च जन्म परश्च लोकः प्रतिपत्तव्यं च जन्म सर्वाणि च भूतानि वाचैव सम्राट्प्रज्ञायन्तेऽतो वाग्वै सम्राट्परमं ब्रह्म नैनं यथोक्तब्रह्मविदं वाग्जहाति । सर्वाण्येनं भूतान्यभिक्षरन्ति बलिदानादिभिरिह । देवो भूत्वा पुनः शरीरपातोत्तरकालं देवानप्येत्यपिगच्छति य एवं विद्वानेतदुपास्ते । विद्यानिष्क्रयार्थं हरितुल्यं ऋषभो ह्यस्त्यृषभो यस्मिन्गोसहस्रे तद्धस्त्यृषभं सहस्रं ददामीति होवाच जनको वैदेहः । स होवाच याज्ञवल्क्यः । अननुशिष्य शिष्यं कृतार्थमकृत्वा शिष्याद्धनं न हरेतेति मे मम पिताऽमन्यत ममाप्ययमेवाभिप्रायः ॥ २ ॥

प्रश्नमेव विवृणोति–किं स्वयमेवेति । प्रज्ञा निमित्तं यस्या वाचः सा तथा ।

---

१ घ. ज. होवाच । २ ग. वाग्दैव° । ३ ङ. °वतस्य । ४ च. ढ. °तिष्ठाऽऽश्रय उत्प° । ५ क. ख. ग. घ. ङ. च. छ. ज. ढ. °त्येतदु° । ६ क. ख. ग. घ. ङ. च. छ. ज. ढ. °त्वैतद्ब्र° । ७ क. ख. घ. च. छ. ज. ढ. वाचा दै स° । ८ ग. ङ. छ. झ. ढ. °भिरुप्रहारैरि° । ९ ग. °भा य° ।

द्वितीयपक्षं विशदयति—यथेति । व्यतिरेकपक्षं निषेधति—नेति । आकाङ्क्षापूर्वकं पक्षान्तरं गृहणाति—कथं तर्हीति । बलिदानमुपहारसमर्पणम् । आदिशब्देन स्रक्चन्दनवस्त्रालंकारादिग्रहः । विद्यानिष्क्रयार्थमुवाचेति संबन्धः । पितुरेतन्मतमस्तु तव किमायातं तदाह—ममापीति ॥ २ ॥

यदेव ते कश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्म उदङ्कः शौल्बायनः प्राणो वै ब्रह्मेति यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्तथा तच्छौल्बायनोऽब्रवीत् प्राणो वै ब्रह्मेत्यप्राणतो हि किं स्यादित्यब्रवीन्न ते तस्याऽऽयतनं प्रतिष्ठां न मेऽब्रवीदित्येकपाद्वा एतत्समस्राडिति स वै नो ब्रूहि याज्ञवल्क्य प्राण एवाऽऽयतनमाकाशः प्रतिष्ठा प्रियमित्येतदुपासीत का प्रियता याज्ञवल्क्य प्राण एव सम्राडिति होवाच प्राणस्य वै सम्राट्कामायायाज्यं याजयत्यप्रतिगृह्यस्य प्रतिगृह्णात्यपि तत्र वधाशङ्कं भवति यां दिशमेति प्राणस्यैव सम्राट्कामाय प्राणो वै सम्राट्परमं ब्रह्म नैनं प्राणो जहाति सर्वाण्येनं भूतान्यभिक्षरन्ति देवो भूत्वा देवानप्येति य एव विद्वानेतदुपास्ते हस्त्युषभः सहस्रं ददामीति होवाच जनको वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥ ३ ॥

यदेव ते कश्चिदब्रवीदुदङ्को नामतः शुल्बस्यापत्यं शौल्बायनोऽब्रवीत्प्राणो वै ब्रह्मेति प्राणो वायुर्देवता पूर्ववत् । प्राण एवाऽऽयतन-

---

१ घ. ज. ट. °णस्य वै म°। २ ग. घ. ज. झ. ट. °यदेव°।

माकाशः प्रतिष्ठोपनिषत्प्रियमित्येनदुपासीत । कथं पुनः प्रियत्वं, प्राणस्य वै हे सम्राट्कामाय प्राणस्यार्थायायाज्यं याजयति पतितादिकमप्यप्रतिगृह्यस्याप्युग्रादेः प्रतिगृह्णात्यपि तत्र तस्यां दिशि वधनिमित्तमाशङ्कं वधाशङ्केत्यर्थो यां दिशमेति तस्करायाकीर्णा च तस्यां दिशि वधाशङ्का तच्चैतत्सर्वं प्राणस्य प्रियत्वे भवति प्राणस्यैव सम्राट्कामाय । तस्मात्प्राणो वै सम्राट्परमं ब्रह्म नैनं प्राणो जहाति । समानमन्यत् ॥ ३ ॥

यथा वागग्निर्देवता तद्वदित्याह—पूर्ववदिति । प्राण एवाऽऽयतनमित्यत्र प्राणशब्दः करणविषयः । पतितादिकमित्यादिपदमकुलीनग्रहार्थम् । उग्रो जातिविशेषः । आदिशब्देन म्लेच्छगणो गृह्यते ॥ ३ ॥

यदेव ते कश्चिदब्रवीत्तच्छृणवामेत्यब्रवीम्मे बर्कुर्वार्ष्णश्चक्षुर्वै ब्रह्मेति यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्तथा तद्वार्ष्णोऽब्रवीच्चक्षुर्वै ब्रह्मेत्यपश्यतो हि किं स्यादित्यब्रवीत्तु ते तस्याऽऽयतनं प्रतिष्ठां न मेऽब्रवीत्येकपाद्वा एतत्सम्राडिति स वै नो ब्रूहि याज्ञवल्क्य चक्षुरेवाऽऽयतनमाकाशः प्रतिष्ठा सत्यमित्येनदुपासीत का सत्यता याज्ञवल्क्य चक्षुरेव सम्राडिति होवाच चक्षुषा वै सम्राट्पश्यन्तमाहुरद्राक्षीरिति स आहाद्राक्षमिति तत्सत्यं भवति चक्षुर्वै सम्राट्परमं ब्रह्म नैनं चक्षुर्जहाति सर्वाण्येनं भूतान्यभिक्षरन्ति देवो भूत्वा देवानप्येति य एवं विद्वानेतदुपास्ते हस्त्यृषभं सहस्रं ददामीति होवाच जनको वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥ ४ ॥

यदेव ते कश्चिद्बर्कुरिति नामतो वृष्णस्यापत्यं वार्ष्णश्चक्षुर्वै ब्रह्मेत्या-

---

१ क. ग. घ. ङ. च. छ. ञ. ट. °त्येतदु° । २ घ. ज. झ. °णस्य वै स° । ३ ग. च. ढ. °त्येतदु° ।

दित्यो देवता चक्षुष्युपनिषत्सत्यम् । यस्माच्छ्रोत्रेण श्रुतमनूतमपि स्याच्च तु चक्षुषा दृष्टम् । तस्माद्वै सम्राट्पश्यन्तमाहुरद्राक्षीस्त्वं हास्विनमिति स चेदद्राक्षमित्याह तस्मात्सत्यमेव भवति । यस्त्वन्यो ब्रूयादहमश्रौषमिति । तद्व्यभिचरति । यत्तु चक्षुषा दृष्टं तदव्यभिचारित्वात्सत्यमेव भवति ॥ ४ ॥

चक्षुर्ब्रह्मणः सत्यत्वं साधयति—यस्मादिति । उक्तमेवोपपादयति—यस्त्विति ॥ ४ ॥

यदेव ते कश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्मे गर्दभीविपीतो भारद्वाजः श्रोत्रं वै ब्रह्मेति तथा मातृमान्पितृमानाचार्यवान्ब्रूयात्तथा तद्भारद्वाजोऽब्रवीच्छ्रोत्रं वै ब्रह्मेत्यशृण्वतो हि किꣳ स्यादित्यब्रवीतु ते तस्याऽऽयतनं प्रतिष्ठां न मेऽब्रवीदित्येकपाद्वा एतत्सम्राडिति स वै नो ब्रूहि याज्ञवल्क्य श्रोत्रमेवाऽऽयतनमाकाशः प्रतिष्ठाऽनन्त इत्येनदुपास्तीति काऽनन्तता याज्ञवल्क्य दिश एव सम्राडिति होवाच तस्माद्वै सम्राडपि यां कां च दिशं गच्छति नैवास्या अन्तं गच्छत्यनन्ता हि दिशो दिशो वै सम्राट् श्रोत्रꣳ श्रोत्रं वै सम्राट्परमं ब्रह्म नैनꣳ श्रोत्रं जहाति सर्वाण्येनं भूतान्यभिक्षरन्ति देवो भूत्वा देवानप्येति य एवं विद्वानेतदुपास्ते हस्त्यृषभꣳ सहस्रं ददामीति होवाच जनको वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥ ५ ॥

यदेव ते गर्दभीविपीत इति नामतो भारद्वाजो गोत्रतः श्रोत्रं वै ब्रह्मेति ।

---

१ च. ढ. °हुर्लोका अद्रा° । २ च. ढ. चेत्तानद्राक्षमिति । त° । ३ ग. घ. ज. झ. °त्सत्यं भ° । ४ ख. ङ. झ. °रत्यपि य° । ५ घ. ञ. ण. तस्मादिति । ६ क. ख. यत्त्विति । ७ ग. च. ढ. °त्येतदु° ।

श्रोत्रे दिग्देवताऽनन्त इत्येनदुपासीत । काऽनन्तता श्रोत्रस्य । दिश एव श्रोत्रस्याऽऽनन्त्यं यस्मात्तस्माद्वै सम्राट्प्राचीमुदीचीं वा यां काञ्चिदपि दिशं गच्छति नैवास्या अन्तं गच्छति कश्चिदपि । अतोऽनन्ता हि दिशः । दिशो वै सम्राट्श्रोत्रम् । तस्माद्दिगानन्त्यमेव श्रोत्रस्याऽऽनन्त्यम् ॥ ५ ॥

दिशामानन्त्येऽपि श्रोत्रस्य किमायातं तदाह—दिशो वा इति ॥ ५ ॥

यस्मै व ते कश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्मे सत्यकाम इति जाबालो मनो वै ब्रह्मेति तथा मातृमान्पितृमानाचार्यवान्ब्रूयात्तथा तज्जाबालोऽब्रवीन्मनो वै ब्रह्मेत्यवसन्नो हि किꣳ स्यादित्यब्रवीत्तु ते तस्याऽऽयतनं प्रतिष्ठां न मेऽब्रवीदित्येकपाद्वा एतत्सम्राडिति स वै नो ब्रूहि याज्ञवल्क्य मन एवाऽऽयतनमाकाशः प्रतिष्ठाऽऽनन्द इत्येनदुपासीत काऽऽनन्दता याज्ञवल्क्य मन एव सम्राडिति होवाच मनसा वै सम्राट्स्त्रियमभिहार्यते तस्यां प्रतिरूपः पुत्रो जायते स आनन्दो मनो वै सम्राट्परमं ब्रह्म नैनं मनो जहाति सर्वाण्येनं भूतान्यभिक्षरन्ति देवो भूत्वा देवानप्येति य एवं विद्वानेतदुपास्ते हस्त्यृषभꣳ सहस्रं ददामीति होवाच जनको वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नानुशिष्य हरेतेति ॥ ६ ॥

सत्यकाम इति नामतो जबालाया अपत्यं जाबालः । चन्द्रमा मनसि देवता । आनन्द इत्युपनिषत् । यस्मान्मन एवाऽऽनन्दस्तस्मान्मनसा वै सम्राट्स्त्रियमभिकामयमानोऽभिहार्यते प्रार्थयत इत्यर्थः ।

१ क. ख. ग. घ. ङ. च. छ. ज. ढ. °त्येतदु° । २ ग. च. ढ. °त्येतदु° ।

तस्माद्यां स्त्रियमभिकामयमानोऽभिहार्यते तस्यां प्रतिरूपोऽनुरूपः पुत्रो जायते स आनन्दहेतुः पुत्रः स येन मनसा निर्वर्त्यते तन्मय आनन्दः ॥ ६ ॥

तथाऽपि कथमानन्दत्वं मनसः संभवति तत्राऽऽह—स येनेति ॥ ६ ॥

यदेव ते कश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्मे विदग्धः शाकल्यो हृदयं वै ब्रह्मेति तथा मातृमान्पितृमानाचार्यवान्ब्रूयात्तथा तच्छाकल्योऽब्रवीद्धृदयं वै ब्रह्मेत्यहृदयस्य हि किꣳ स्यादित्यब्रवीत्तु ते तस्याऽऽयतनं प्रतिष्ठां न मेऽब्रवीदित्येकपाद्वा एतत्सम्राडिति स वै नो ब्रूहि याज्ञवल्क्य हृदयमेवाऽऽयतनमाकाशः प्रतिष्ठा स्थितिरित्येनदुपासीत का स्थितता याज्ञवल्क्य हृदयमेव सम्राडिति होवाच हृदयं वै सम्राट् सर्वेषां भूतानामायतनꣳ हृदयं वै सम्राट्सर्वेषां भूतानां प्रतिष्ठा हृदये ह्येव सम्राट्सर्वाणि भूतानि प्रतिष्ठितानि भवन्ति हृदयं वै सम्राट्परमं ब्रह्म नैनꣳ हृदयं जहाति सर्वाण्येनं भूतान्यभिक्षरन्ति देवो भूत्वा देवानप्येति य एवं विद्वानेतदुपास्ते हस्त्यृषभꣳ सहस्रं ददामीति होवाच जनको वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥ ७ ॥

इति बृहदारण्यकोपनिषदि चतुर्थाध्यायस्य
प्रथमं ब्राह्मणम् ॥ १ ॥

विदग्धः शाकल्यो हृदयं वै ब्रह्मेति । हृदयं वै सम्राट्सर्वेषां भूता-

---

१ ग, च. ढ. °त्येतदु° ।

नामायतनम् । नामरूपकर्मात्मकानि हि भूतानि हृदयाश्रयाणीत्यवोचाम शाकल्यब्राह्मणे हृदयप्रतिष्ठानि चेति । तस्माद्धृदये ह्येव सम्राट्सर्वाणि भूतानि प्रतिष्ठितानि भवन्ति। तस्माद्धृदयं स्थितिरित्युपासीत हृदये च प्रजापतिर्देवता ॥ ७ ॥

इति बृहदारण्यकोपनिषद्भाष्ये चतुर्थाध्यायस्य
प्रथमं ब्राह्मणम् ॥ १ ॥

कथं हृदयस्य सर्वभूतायतनत्वं तत्प्रतिष्ठात्वं च तदाह—नामरूपेति । तस्मादिति शाकल्यन्यायपरामर्शः । भूतानां हृदयप्रतिष्ठत्वे फलितमाह—तस्माद्धृदयमिति ॥ ७ ॥

इति बृहदारण्यकोपनिषद्भाष्यटीकायां चतुर्थाध्यायस्य
प्रथमं ब्राह्मणम् ॥ १ ॥

(अथ चतुर्थाध्यायस्य द्वितीयं ब्राह्मणम्) ।

जनको ह वैदेहः कूर्चादुपावसर्पन्नुवाच नमस्तेऽस्तु याज्ञवल्क्यानु मा शाधीति स होवाच, यथा वै सम्राण्महान्तमध्वानमेष्यन्रथं वा नावं वा समाददीतैवमेवैताभिरुपनिषद्भिः समाहितात्माऽस्येवं वृन्दारक आढ्यः सन्नधीतवेद उक्तोपनिषत्क इतो विमुच्यमानः क्व गमिष्यमीति नाहं तद्भगवन्वेद यत्र गमिष्यामीत्यथ वै तेऽहं तद्वक्ष्यामि यत्र गमिष्यसीति ब्रवीतु भगवानिति ॥ १ ॥

जनको ह वैदेहः । यस्मात्सविशेषणानि सर्वाणि ब्रह्माणि जानाति याज्ञवल्क्यस्तस्मादाचार्यकत्वं हित्वा जनकः कूर्चादासनविशेषादुत्थायोपसदीषमवसर्पन्पादयोर्निपतन्निित्यर्थः। उवाचोक्तवान्नमस्ते वृन्यमस्तु हे

---

१ क. ठ. °तु ऽ भ° । ग. °तु नो म° । २ क. °णि जा° । ३ झ. °दार्य° । ४ ग. घ. ङ. च. ज. °र्वत्वं ।

याज्ञवल्क्यानु मा शाध्यनुशाधि मामित्यर्थः । इतिशब्दो वाक्यपरिसमाप्त्यर्थः । स होवाच याज्ञवल्क्यो यथा वै लोके हे सम्राड्महान्तं दीर्घमध्वानमेष्यन्गमिष्यन्स्थं वा स्थलेन गमिष्यन्नावं वा जलेन गमिष्यन्समाददीत । एवमेवैतानि ब्रह्माण्येताभिरुपनिषद्भिर्युक्तान्युपासीनः समाहितात्माऽस्यत्यन्तमेताभिरुपनिषद्भिः संयुक्तात्माऽसि न केवलमुपनिषत्समाहित एवं वृन्दारकः पूज्यश्चाऽऽढ्यश्चेश्वरो न दरिद्र इत्यर्थः । अधीतवेदोऽधीतो वेदो येन स त्वमधीतवेद उक्ताश्चोपनिषद आचार्यैस्तुभ्यं स त्वमुक्तोपनिषत्क एवं सर्वविभूतिसंपन्नोऽपि सन्भयमध्यस्थ एव परमात्मज्ञानेन विनाऽकृतार्थ एव तावदित्यर्थः । यावत्परं ब्रह्म न वेत्सि । इतोऽस्माद्देहाद्विमुच्यमान एताभिर्नौरथस्थानीयाभिः समाहितः क्व कस्मिन्गमिष्यसि किं वस्तु प्राप्स्यसीति । नाहं तद्वस्तु भगवन्पूजावन्वेद जाने यत्र गमिष्यामीति । अथ यद्येवं न जानीषे यत्र गतः कृतार्थः स्यां अहं वै ते तुभ्यं तद्वक्ष्यामि यत्र गमिष्यसीति । ब्रवीतु भगवानिति, यदि प्रसन्नो मां प्रति । शृणु ॥ १ ॥

पूर्वस्मिन्ब्राह्मणे कानिचिदुपासनानि ज्ञानसाधनान्युक्तानि इदानीं ब्रह्मणस्तैर्ज्ञेयस्य जानत्त्वादिद्वारा ज्ञानार्थं ब्राह्मणान्तरमवतारयति—जनको होति । राज्ञो ज्ञानित्वाभिप्राये शिष्यत्वविरोधिन्यपनीते मुनिं प्रति तस्य शिष्यत्वेनोपसत्तिं दर्शयति—यस्मादिति । नमस्कारोक्तेरुद्देश्यमुपन्यस्यति—अनु मेति । अभीष्टप्रशासनं कर्तुं प्राचीनज्ञानस्य फलाभासहेतुत्वोक्तिद्वारा परमफलहेतुरात्मज्ञानमेवेति विवक्षित्वा तत्र राज्ञो जिज्ञासामापादयति—स होत्यादिना । यथोक्तगुणसंपन्नश्चेदहं तर्हि कृतार्थत्वान्न मे कर्तव्यमस्तीत्याशङ्क्याऽऽह—एवमिति । याज्ञवल्क्यो राज्ञो जिज्ञासामापाद्य पृच्छति—इत इति । परवस्तुविषये गतेरयोगात्प्रश्नविषयं विवक्षितं संक्षिपति—किं वस्त्विति । राज्ञा स्वकीयमज्ञत्वमुपेत्य शिष्यत्वे स्वीकृते प्रत्युक्तिमवतारयति—अथेति । तत्रापेक्षितमथशब्दसूचितं पूरयति यद्येवमिति । आज्ञापनमनुचितमिति शङ्कां वारयति—यदीति । प्रसादाभिमुख्यमात्मनः सूचयति—शृण्विति ॥ १ ॥

---

१ ग. ङ. छ. ढ °के देशे हे । २ ङ. ढ. °सीन एतेषामुपासनानि कुर्वन्समा° । ग. घ. च. ज. °सीन एतेषामुपासनां कुर्वन्समा° । ३ क. ख. ङ. छ. झ. °दो यस्य सोऽयम° । ४ क. छ. ज. स्यामहं । ५ क. ङ. °तु मे भ° । ६ ख. ढ. फलमुपासनहे° । ७ ख. ञ. ट. क्षित्वात्तत्र । ८ ख. ढ. °हिं किं कु° ।

इन्धो ह वै नामैष योऽयं दक्षिणेऽक्षन्पुरुषस्तं वा
एतमिन्धꣳ सन्तमिन्द्र इत्याचक्षते परोक्षेणैव परो-
क्षप्रिया इव हि देवाः प्रत्यक्षद्विषः ॥ २ ॥

इन्धो ह वै नाम । इन्ध इत्येवंनामा । यश्चक्षुर्वै ब्रह्मेति पुरोक्त आदित्यान्तर्गत पुरुषः स एष योऽयं दक्षिणेऽक्षन्नक्षणि विशेषेण व्यवस्थितः । स च सत्यनामा । तं वा एतं पुरुषं दीप्तिगुणत्वात्प्रत्यक्षं नामास्येन्ध इति तमिन्धं सन्तमिन्द्र इत्याचक्षते परोक्षेण । यस्मात्परोक्षप्रिया इव हि देवाः प्रत्यक्षद्विषः प्रत्यक्षनामग्रहणं द्विषन्ति । एष त्वं वैश्वानरमात्मानं संपन्नोऽसि ॥ २ ॥

विश्वतैजसप्राज्ञानुवादेन तुरीयं ब्रह्म दर्शयितुमादौ विश्वमनुवदति—इन्ध इति । कोऽसाविन्धनामेति चेत्तमाह—यश्चक्षुरिति । अधिदैवतं पुरुषमुक्त्वाऽध्यात्मं तं दर्शयति—योऽयमिति । तस्य पूर्वस्मिन्नपि ब्राह्मणे प्रस्तुतत्वमाह—स चेति । प्रकृते पुरुषे विदुषां संमतिमाह—तं वा एतमिति । इन्धत्वं साधयति—दीप्तीति प्रत्यक्षस्य परोक्षेणाऽऽम्नाने हेतुमाह—यस्मादिति ॥ २ ॥

अथैतद्वामेऽक्षणि पुरुषरूपमेषाऽस्य पत्नी विराट्तयो-
रेष सꣳस्तावो य एषोऽन्तर्हृदय आकाशोऽथैनयोरेत-
दन्नं य एषोऽन्तर्हृदये लोहितपिण्डोऽथैनयोरेतत्प्रावरणं
यदेतदन्तर्हृदये जालकमिवाथैनयोरेषा सृतिः संचरणी
यैषा हृदयादूर्ध्वा नाड्युच्चरति यथा केशः सहस्रधा
भिन्न एवमस्यैता हिता नाम नाड्योऽन्तर्हृदये प्रति
ष्ठिता भवन्त्येताभिर्वा एतदास्रवदास्रवति तस्मा-
देष प्रविविक्ताहारतर इवैव भवत्यस्माच्छारीरा-
दात्मनः ॥ ३ ॥

अथैतद्वामेऽक्षणि पुरुषरूपमेषाऽस्य पत्नी यं त्वं वैश्वानरमात्मानं संपन्नोऽसि तस्यास्येन्द्रस्य भोक्तुर्भोग्यैषा पत्नी विराडन्नं भोग्यत्वादेव

---

१ ख. ङ. झ. ढ. °क्षेण वै । २ ख. ग. घ. ङ. च छ. झ. ड. °क्षुर्ब्रह्मे° । ३ क. ग. छ. झ. °ष्ण ए° । ४ क. च. ढ. °त्यक्षं ना° । ५ ख. च. ढ. °र्वैश्वानरस्य भोग्यै° ।

तदेतदन्नं चाऽन्नं चैकं मिथुनं स्वप्ने । कथम् । तयोरेष इन्द्राण्या इन्द्रस्य चैष संस्तावः संभूय यत्र संस्तवं कुर्वाते अन्योन्यं स एष संस्तावः । कोऽसौ । य एषोऽन्तर्हृदय आकाशोऽन्तर्हृदये हृदयस्य मांसपिण्डस्य मध्ये । अथैनयोरेतद्दृश्यमाणमन्नं भाज्यं स्थितिहेतुः । किं तत् । य एषोऽन्तर्हृदये लोहितपिण्डो लोहित एव पिण्डाकारापन्नो लोहितपिण्डः । अन्नं जग्धं द्वेधा परिणमते यत्स्थूलं तदधो गच्छति । यदन्यत्तत्पुनरग्निना पच्यमानं द्वेधा परिणमते । यो मध्यमो रसः स लोहितादिक्रमेण पाञ्चभौतिकं पिण्डं शरीरमुपचिनोति । योऽणिष्ठो रसः स एष लोहितपिण्ड इन्द्रस्य लिङ्गात्मनो हृदये मिथुनीभूतस्य । यं तैजसमाचक्षते स तयोरिन्द्रेन्द्राण्योर्हृदये मिथुनीभूतयोः सूक्ष्मासु नाडीष्वनुप्रविष्टः स्थितिहेतुर्भवति । तदेतदुच्यतेऽथैनयोरेतदन्नमित्यादि । किंचान्यत् । अथैनयोरेतत्प्रावरणम् । भुक्तवतोः स्वपतोश्च प्रावरणं भवति लोके तत्सामान्यं हि कल्पयति श्रुतिः । किं तादिह प्रावरणम् । यदेतदन्तर्हृदये जालकमिवानेकनाडीछिद्रबहुलत्वाज्जालकमिव ।

एकस्यैव वैश्वानरस्योपासनार्थं प्रासङ्गिकमिन्द्रस्येन्द्राणी चेति मिथुनं कल्पयति--अथेत्यादिना । प्रासङ्गिकध्यानाधिकारार्थोऽथशब्दः । यदेतन्मिथुनं जागरितं विश्वशब्दितं तदेवैक स्वप्ने तैजसशब्दवाच्यमित्याह--तदेतदिति । तच्छब्दितं तैजसमधिकृत्य पृच्छति--कथमिति । किं तस्य स्थानं पृच्छ्यतेऽन्नं वा प्रावरणं वा मार्गो वेति विकल्प्याऽऽद्यं प्रत्याह--तयोरिति । संस्तवं संगतिमिति यावत् । द्वितीयं प्रत्याह--अथेति । अन्नातिरेकेण स्थितेरसंभवात्तस्य वक्तव्यत्वादित्यथशब्दार्थः । लोहितपिण्डं सूक्ष्मान्नरसं व्याख्यातुं भक्षितस्यान्नस्य तावद्विभागमाह--अन्नमिति । यदन्यत्पुनरिति योजनीयम् । तत्रेत्यध्याहृत्य यो मध्यम इत्यादिग्रन्थो योज्यः । उपाध्युपहितयोरेकत्वमाश्रित्याऽऽह--यं तैजसमिति । तस्यान्नत्वमुपपादयति--स तयोरिति । व्याख्यातेऽर्थे वाक्यस्यान्विताभिधायित्वमाह--तदेतदिति । यदि प्रावरणं पृच्छ्यते तत्राऽऽह--किंचान्यदिति । भोगस्वापानन्तर्भूतमथशब्दार्थः । प्रावरणप्रदर्शनस्य प्रयोजनमाह--भुक्तवतोरिति । इहेति भोक्तृभोग्ययोरिन्द्रेन्द्राण्योरुक्तिः । हृदयजालकयोराधाराधेयत्वमविवक्षितमस्यैव तद्भावात् ।

---

१ क. ख. ङ. च. ढ. स रसो लो° । २ ञ. ण. °ति । तै° । ३ ण. संस्तावः संगतमि° । ४ घ. ञ. ण. ˈस्थित्यसं° । ५ क. घ. ञ. ण. °न्यत्तत्पु° । ६ ख. घ. ढ. ण गस्यऽऽन° ।

अथैनयोरेषा सृतिर्मार्गः संचरतोऽनयेति संचरणो स्वप्नाज्जागरितदेशागमनमार्गः। का सा सृतिः। यैषा हृदयाच्छ्दयदेशादूर्ध्वोऽभिमुखी सत्युद्धरति नाडी। तस्याः परिमाणमिदमुच्यते। यथा लोके केशः सहस्रधाभिन्नोऽत्यन्तसूक्ष्मो भवत्येवं सूक्ष्मा अस्य देहस्य संबन्धिन्यो हिता नाम हिता इत्येवं ख्याता नाड्यस्ताश्चान्तर्हृदये मांसपिण्डे प्रतिष्ठिता भवन्ति हृदयाद्विप्ररूढास्ताः सर्वत्र कदम्बकेसरवदेताभिर्नाडीभिरत्यन्तसूक्ष्माभिरेतदन्नमास्रवद्रच्छदास्रवति गच्छति। तदेतद्देवताशरीरमनेनान्नेन दामभूतेनोपचीयमानं तिष्ठति। तस्माद्यस्मात्स्थूलेनान्नेनोपचितः पिण्ड इदं तु देवताशरीरं लिङ्गं सूक्ष्मेणान्नेनोपचितं तिष्ठति। पिण्डोपचयकरमप्यन्नं प्राविविक्तमेव मूत्रपुरीषादिस्थूलमपेक्ष्य लिङ्गस्थितिकरं त्वन्नं ततोऽपि सूक्ष्मतरम्। अतः प्राविविक्ताहारः पिण्डः। तस्मात्प्राविविक्ताहारादपि प्राविविक्ताहारतर एष लिङ्गात्मैवैव भवत्यस्माच्छरीराच्छरीरमेव शारीरं तस्माच्छारीरात्। आत्मनो वैश्वानरात्तैजसः सूक्ष्मान्नोपचितो भवति ॥ ३ ॥

मार्गश्चेत्पृच्छ्यते तत्राऽऽह—अथेति। नाडीभिः शरीरं व्याप्तस्यान्नस्य प्रयोजनमाह—तदेतादिति। तस्मादित्यादिवाक्यमादाय व्याचष्टे—तस्मादिति। तथाऽपि प्राविविक्ताहार इत्येव वक्तव्ये प्राविविक्ताहारतर इति कस्मादुच्यते तत्राऽऽह—पिण्डेति। यस्मादित्यस्यापेक्षितं कथयति—अत इति। शारीरादिति श्रूयते कथं शरीरादित्युच्यते तत्राऽऽह—शरीरमेवेति। उक्तमर्थं संक्षिप्योपसंहरति—आत्मन इति ॥ ३ ॥

तस्य प्राची दिक्प्राञ्चः प्राणा दक्षिणा दिग्दक्षिणे प्राणाः प्रतीची दिक्प्रत्यञ्चः प्राणा उदीची दिगुदञ्चः प्राणा ऊर्ध्वा दिगूर्ध्वाः प्राणा अवाची दिगवाञ्चः प्राणाः सर्वा दिशः सर्वे प्राणाः स एष नेति नेत्यात्माऽगृह्यो न हि गृह्यतेऽशीर्यो न हि शीर्यतेऽसङ्गो न हि सज्यतेऽसितो न व्यथते न रिष्यत्यभयं वै जनक प्राप्तोऽसीति होवाच याज्ञवल्क्यः। स होवाच जनको वैदेहोऽभयं त्वा गच्छताद्याज्ञ-

---

१ क. घ. च. छ. ज. °चितम्। पिं°। २ क. ख. ग. घ. ङ. छ. °स्माच्छारी°। ३ घ, ङ. छ, ज. °रीरे भवाच्छा°। ४ क. ङ. ण. °थं शारी°।

वल्क्य यो नो भगवन्नभयं वेदयसे नमस्तेऽस्त्विमे
विदेहा अयमहमस्मि ॥ ४ ॥
इति बृहदारण्यकोपनिषदि चतुर्थाध्यायस्य
द्वितीयं ब्राह्मणम् ॥ २ ॥

स एष हृदयभूतस्तैजसः सूक्ष्मभूतेन प्राणेन विधियमाणः प्राज्ञ एव भवति । तस्यास्य विदुषः क्रमेण वैश्वानरात्तैजसं प्राप्तस्य हृदयात्मानमापन्नस्य हृदयात्मनश्च प्राणात्मानमापन्नस्य प्राची दिक्प्राञ्चः प्राङ्जाताः प्राणाः । तथा दक्षिणा दिग्दक्षिणे प्राणाः । तथा प्रतीची दिक्प्रत्यञ्चः प्राणाः । उदीची दिगुदञ्चः प्राणाः । ऊर्ध्वा दिगूर्ध्वाः प्राणाः । अवाची दिगवाञ्चः प्राणाः । सर्वा दिशः सर्वे प्राणाः । एवं विद्वान्क्रमेण सर्वात्मके प्राणमात्मत्वेनोपगतो भवति । तं सर्वात्मानं प्रत्यगात्मन्युपसंहृत्य द्रष्टुर्हि द्रष्टृभावं नेतिं नेतीत्यात्मानं तुरीयं प्रतिपद्यते । यमेष विद्वाननेन क्रमेण प्रतिपद्यते स एष नेति नेत्यात्मेत्यादि न श्रिष्यतीत्यन्तं व्याख्यातमेतत् । अभयं वै जन्ममरणादिनिमित्तभयशून्यं हे जनक प्राप्तोऽसीति हैवं किलोवाचोक्तवान्याज्ञवल्क्यः । तदेतदुक्तमथ वै तेऽहं तद्वक्ष्यामि यत्र गमिष्यसीति । न होवाच जनको वैदेहोऽभयमेव त्वा त्वामपि गच्छताद्गच्छतु यस्त्वं नोऽस्मान्हे याज्ञवल्क्य भगवन्पूजावन्नभयं ब्रह्म वेदयसे ज्ञापयसि प्रापितवानुपाधिकृताज्ञानव्यवधानापनयनेनेत्यर्थः । किमन्यद्वयं विद्यानिष्क्रयार्थं प्रयच्छामि साक्षादात्मानमेव दत्तवते । अतो नमस्तेऽस्त्विमे विदेहास्तव यथेष्टं भुज्यन्तामयं चाहमस्मि दासभावे स्थितो यथेष्टं मां राज्यं च प्रतिपद्यस्वेत्यर्थः ॥ ४ ॥

इति बृहदारण्यकोपनिषद्भाष्ये चतुर्थाध्यायस्य
द्वितीयं ब्राह्मणम् ॥ २ ॥

तस्य प्राची दिगित्याद्यवतारयितुं भूमिकां करोति—स एष इति । प्राज्ञशब्देनाज्ञातः प्रत्यगात्मा प्राज्ञो गृह्यते । एवं भूमिकां कृत्वा वाक्यमादाय व्याक-

१ क. च. °मस्तीति ॥ ४ ॥ २ ग. च. झ. °सं सूक्ष्मं प्रा° । ३ घ. ज. प्राग्जाताः । ४ क. ख. ग. घ. ङ. च. छ. ज. झ. ढ. °नेत्या° । ५ च. °सीतीति । ६ ख. ङ. °विभूता° । ७ ख. ग. ङ. झ. °वेन स्थि° ।

दीति—तस्येत्यादिना । तैजसं प्राप्तस्येत्यस्य व्याख्यानं हृदयात्मानमापन्नस्येति । उक्तमर्थं संक्षिप्याऽऽह—एवं विद्वानिति । विश्वस्य जागरिताभिमानिनस्तजसे स्वप्न च स्वप्नाभिमानिनः सुषुप्त्यभिमानिनि प्राज्ञे क्रमेणान्तर्भावं जानन्नित्यर्थः । स एष नेति नेत्यात्मेत्यादेर्भूमिकां करोति—तं सर्वात्मानमिति । तत्र वाक्यमवतार्य पूर्वोक्तं व्याख्यानं स्मारयति—यमेष इति । तुरीयादपि प्राप्तव्यमन्यदभयमस्तीत्याशङ्क्याऽऽह—अभयमिति । गन्तव्यं वक्ष्यामीत्युपक्रम्यावस्थात्रयातीतं तुरीयमुपदिशन्नाम्नाऽपृष्टः कोविदारानाचष्ट इतिन्यायविषयतां नातिवर्ततेत्याशङ्क्याऽऽह—तदेतदिति । विद्यायां दक्षिणान्तराभावमभिप्रेत्याऽऽह—स होवाचेति । कथं पुनरन्यस्य स्थितस्य नष्टस्य वाऽन्यंप्रापणमित्याशङ्क्याऽऽह—उपाधीति । पश्वादिकं दक्षिणान्तरं संभवतीत्याशङ्क्य तस्योक्तविद्यानुरूपत्वं नास्तीत्याह—किमन्यादिति । वस्तुतो दक्षिणान्तराभावमुक्त्वा प्रतीतिमाश्रित्याऽऽह—अत इति । अक्षरार्थमुक्त्वा वाक्यार्थमाह—यथेष्टमिति ॥ ४ ॥

इति बृहदारण्यकोपनिषद्भाष्यटीकायां चतुर्थाध्यायस्य
द्वितीयं ब्राह्मणम् ॥ २ ॥

(अथ चतुर्थाध्यायस्य तृतीयं ब्राह्मणम्) ।

जनकं ह वैदेहं याज्ञवल्क्यो जगामेत्यस्याभिसंबन्धः । विज्ञानमय आत्मा साक्षादपरोक्षाद्ब्रह्म सर्वान्तरः पर एव । नान्योऽतोऽस्ति द्रष्टा नान्यदतोऽस्ति द्रष्ट्रित्यादिश्रुतिभ्यः । स एष इह प्रविष्टो वदनादिलिङ्गोऽस्ति व्यतिरिक्त इति मधुकाण्डेऽजातशत्रुसंवादे प्राणादिकर्तृत्वभोक्तृत्वप्रत्याख्यानेनाधिगतोऽपि सन्पुनः प्राणनादिलिङ्गमुपन्यस्यौपस्तप्रश्ने प्राणनादिलिङ्गे यः सामान्येनाधिगतः प्राणेन प्राणितीत्यादिना दृष्टेर्द्रष्टेत्यादिनाऽलुप्तशक्तिस्वभावोऽधिगतः ।

पूर्वस्मिन्ब्राह्मणे जागरादिद्वारा तत्त्वं निर्धारितं संप्रति ब्राह्मणान्तरमवतार्य तस्य पूर्वेण संबन्धं प्रतिजानीते—जनकामिति । तमेवं वक्तुं तृतीये वृत्तं कीर्तयति—विज्ञानमय इति । यद्ब्रह्म साक्षादपरोक्षात्सर्वान्तर आत्मा स पर एव विज्ञानमय आत्मेत्यत्र हेतुमाह—नान्य इति । विज्ञानमयः पर एवेत्यत्र वाक्यान्तरं पठति—स एष इति । वदन्वामित्यादावुक्तमनुवदति—वदनादीति । तार्तीयमर्थमनूद्य

---

१ ख. ढ. °न्यत्प्राप° । २ क. छ. झ. प्राणादि° । ३ ख. ग. ङ. छ. ढ. °द्विप्रमाणमु° । ४ ङ. च. छ. झ. ढ. °ना न द्र° । ५ च. ढ. °र्द्रष्टारमित्या° । ६ ञ. °व संबन्धं व° । ७ ञ. °यवृत्तमनू° ।

चातुर्थिकमर्थमनुवदति—अस्तीति । यदि मधुकाण्डे गार्ग्यकाश्यपसंवादे प्राणादीनां कर्तृत्वादिनिराकरणेन तेभ्यो व्यतिरिक्तोऽस्ति विज्ञानात्मेति सोऽधिगतस्तर्हि किमिति पञ्चमे तत्सद्भावो व्युत्पाद्यते तत्राऽऽह—पुनरिति । यद्यपि विज्ञानमयसद्भावश्चतुर्थे स्थितस्तथाऽपि पुनरौषस्ते प्रश्ने यः प्राणेन प्राणितीत्यादिना प्राणादिलिङ्गमुपन्यस्य तल्लिङ्गगम्यः सामान्येनाधिगतः । स इष्टेर्द्रष्टेत्यादिना कूटस्थदृष्टिस्वभावो विशेषतो निश्चितस्तथा च पञ्चमेऽपि तद्व्युत्पादनमुचितमित्यर्थः ।

तस्य च परोपाधिनिमित्तः संसारो यथा रज्जूषरशुक्तिकागगनादिषु सर्पोदकरजतमलिनत्वादि पराध्यारोपणनिमित्तमेव न स्वतस्तथा निरुपाधिको निरुपाख्यो नेति नेतीति व्यपदेश्यः साक्षादपरोक्षात्सर्वान्तर आत्मा ब्रह्माक्षरमन्तर्यामी प्रशास्तोपनिषदः पुरुषो विज्ञानमानन्दं ब्रह्मेत्यधिगतम् ।

आत्मा कूटस्थदृष्टिस्वभावश्चेत्कथं तस्य संसारस्तत्राऽऽह—तस्य चेति । अज्ञानं तत्कार्यं चान्तःकरणादि परोपाधिशब्दार्थः । संसारस्याऽऽत्मन्यौपाधिकत्वे दृष्टान्तमाह—यथेति । दार्ष्टान्तिकस्यानेकरूपत्वादनेकदृष्टान्तोपादानमित्यभिप्रेत्य दार्ष्टान्तिकमाह—तथेति । यथोक्तदृष्टान्तानुसारेणाऽऽत्मन्यपि परोपाधिः संसार इति यावत् । सोपाधिकस्याऽऽत्मनः संसारित्वमुक्त्वा निरुपाधिकस्य नित्यमुक्तत्वमाह—निरुपाधिक इति । निरुपाख्यत्वं वाचां मनसां वागोचरत्वम् । कथं तर्हि तत्राऽऽगमप्रामाण्यं तत्राऽऽह—नेति नेतीति व्यपदेश्य इति । कण्वोक्तमनूद्यते—साक्षादिति । अक्षरब्राह्मणोक्तं स्मारयति—अक्षरमिति । अन्तर्यामिब्राह्मणोक्तं स्मारयति—अन्तर्यामीति । शाकल्यब्राह्मणोक्तमनुसंदधाति—औपनिषद इति ।

तदेव पुनरिन्धसंज्ञ. प्रविविक्ताहारस्ततोऽन्तर्हृदये लिङ्गात्मा प्रविविक्ताहारतरस्ततः परेण जगदात्मा प्राणोपाधिस्ततोऽपि प्रविलाप्य जगदात्मानमुपाधिभूतं रज्ज्वादाविव सर्पादिकं विद्यया स एष नेति नेतीति साक्षात्सर्वान्तरं ब्रह्माधिगतम् । एवमभयं परिप्रापितो जनको याज्ञवल्क्येनाऽऽगमतः संक्षेपतः । अत्र च जाग्रत्स्वप्नसुषुप्ततुरीयाण्युपन्यस्तान्यन्यप्रसङ्गेनेन्धः प्रविविक्ताहारतरः सर्वे प्राणाः स एष नेति नेतीति ।

पाञ्चमिकमर्थमित्थमनूद्यातीते ब्राह्मणद्वये वृत्तमनुभाषते—तदेवेति । यत्साक्षादपरोक्षात्सर्वान्तरं ब्रह्म तदेवाधिगमनोपायविशेषोपदर्शनपुरःसरं पुनरधिगमयिषि

१ ख. °कवृत्तमनु° । घ. ज. ण. °कमनु° । २ ख. ङ. °गम्यसा° । ३ ख. ङ. °ततः ङम° । ४ ख. घ. ङ. ज. परोपाध्या° । ५ घ. °पाधिकः सं° । ख. °नुवदति ।

संबन्धः । पदाचार्यब्राह्मणार्थं संक्षिप्य कूर्चब्राह्मणार्थं संक्षिपति—इन्ध इत्यादिना । इन्धस्य विशेषणं प्रविविक्ताहार इति । हृदयेऽन्तर्यो लिङ्गात्मा स एषो वैश्वानरादिन्धात्माविविक्ताहारतर इति योजना । विश्वतैजसावुक्तौ प्राज्ञतुरीये प्रदर्शयति—ततः परेणेति । ततस्तस्माद्विश्वात्तैजसाच्च परेण व्यवस्थितो यो जगदात्मा प्राणोपाधिरव्याकृताख्यः प्राज्ञस्ततोऽपि तमप्युपाधिभूतं जगदात्मानं केवले प्रतीचि विद्यया प्रविलाप्य स एष नेति नेतीति यत्तुरीयं ब्रह्म तदधिगतमिति संबन्धः । विद्ययोपाधिविलापने दृष्टान्तमाह—रज्ज्वादाविति । अभयं वै जनकेत्यादावुक्तमनुवदति—एवमिति । कूर्चब्राह्मणोक्तमर्थमनुभाषितं संक्षिप्याऽऽह—अत्र चेति । अन्यप्रसङ्गेनोपासनानां क्रममुक्तिफलत्वप्रदर्शनप्रसङ्गेनेति यावत् । तेषामुपन्यासमेवाभिनयति—इन्ध इत्यादिना ।

इदानीं जाग्रत्स्वप्नादिद्वारेणैव महता तर्केण विस्तरतोऽधिगमः कर्तव्यः । अभयं प्रापयितव्यम् । सद्भावश्चाऽऽत्मनो विप्रतिपत्त्याशङ्कानिराकरणद्वारेण । व्यतिरिक्तत्वं शुद्धत्वं स्वयंज्योतिष्ट्वमलुप्तशक्तिस्वरूपत्वं निरतिशयानन्दस्वाभाव्यमद्वैतत्वं चाधिगन्तव्यमितीदमारभ्यते ।

वृत्तमनूद्योत्तरब्राह्मणस्य तात्पर्यमाह—इदानीमिति । आदिशब्दः सुषुप्तितुरीयसंग्रहार्थः । तर्कस्य महत्त्वं चतुर्विधदोषराहित्येनाबाधितत्वम् । अधिगमस्तस्यैव प्रस्तुतस्य ब्रह्मण इति शेषः । कर्तव्य इतीदमिदानीमारभ्यत इति संबन्धः । किमिदं ब्रह्मणोऽधिगमस्य कर्तव्यत्वं नाम तदाह—अभयमिति । अधिगन्तव्यमर्थान्तरमाह—सद्भावश्चेति । प्रागपि सद्भावस्तस्याधिगतस्तत्किमर्थं पुनस्तादर्थ्येन वैयत्येत तत्राऽऽह—विप्रतिपत्तीति । बाह्यानां विप्रतिपत्त्या नास्तित्वशङ्कायां तन्निरासद्वाराऽऽत्मनः सद्भावोऽधिगन्तव्य इत्यर्थः । आत्मनोऽस्तित्वेऽपि केचिद्देहादौ तदभ्युपगमभ्युपयन्ति तान्प्रत्याह—व्यतिरिक्तत्वमिति । देहादिव्यतिरिक्तोऽप्यात्मा कर्ता भोक्ता चेत्येके भोक्तैव केवलमित्यपरे तान्प्रत्युक्तम्—शुद्धत्वमिति । तस्य जडत्वपक्षं प्रत्याचष्टे—स्वयंज्योतिष्ट्वमिति । तत्र कूटस्थदृष्टित्वभावत्वं हेतुमाह—अलुप्तेति । एतेन विज्ञानस्य गुणत्वपक्षोऽपि प्रत्युक्तो वेदितव्यः । ये त्वानन्दमात्मगुणमाहुस्तान्प्रत्याह—निरतिशयेति । आत्मनः समपक्षत्वपक्षं प्रत्यादिशति—अद्वैतत्वं चेति ।

आख्यायिका तु विद्यासंप्रदानग्रहणविधिप्रकाशनार्था । विद्यास्तुतये च विशेषतः । वरदानादिसूचनात् ।

---

१ ख. ढ. °ति तत्रे° । २ घ. ञ. °वुक्त्वा प्रा° । ३ घ. °तुर्यौ प्र° । ञ. ण. °तुर्ये प्र° । ४ ख. ढ. °तारूयात्प्राज्ञतो° । ५ ङ. °न्धः । अविद्योपा° । ६ ढ. नामात्राह । ७ घ. ण. प्रगृह्यने । ८ ञ. ढ. °पेत्येति । ९ ख. ढ. °त्वे के° ।

ब्राह्मणतात्पर्यमभिधायाऽऽख्यायिकातात्पर्यमाह—आख्यायिका त्विति । विद्यायाः संप्रदानं शिष्यस्तस्य ग्रहणविधिः श्रद्धादिप्रकारस्तस्य प्रकाशनार्थेयमाख्यायिकेति यावत् । प्रयोजनान्तरं तस्या दर्शयति—विद्येति । कथं कर्मभ्यो विशेषतो विद्यायाः स्तुतिरत्र लक्ष्यते तत्राऽऽह—वरेति । कामप्रश्नाख्यस्य वरस्य याज्ञवल्क्येन राज्ञे दत्तत्वात्तेन चावसरे ब्रह्मज्ञानस्यैव पृष्टत्वादनेन विधिना विद्यास्तुतेः सूचनात्साऽप्यत्र विवक्षितेत्यर्थः ।

> जनक[१] ह वैदेहं याज्ञवल्क्यो जगाम स मेने न वदिष्य इत्यथ ह यज्जनकश्च वैदेहो याज्ञवल्क्यश्चाग्निहोत्रे समूदाते तस्मै ह याज्ञवल्क्यो वरं ददौ स ह कामप्रश्नमेव वव्रे त[२] हास्मै ददौ त[२] ह सम्राडेव पूर्वं पप्रच्छ ॥ १ ॥

जनकं ह वैदेहं याज्ञवल्क्यो जगाम । स च गच्छन्नेवं मेने चिन्तितवान्न वदिष्ये किंचिदपि राज्ञे । गमनप्रयोजनं तु योगक्षेमार्थम् । न वदिष्य इत्येवं संकल्पोऽपि याज्ञवल्क्यो यद्यज्जनकः पृष्टवांस्तत्तत्प्रतिपेदे तत्र को हेतुः संकल्पितस्यान्यथाकरण इत्यत्राऽऽख्यायिकामाचष्टे । पूर्वत्र किल जनकयाज्ञवल्क्ययोः संवाद[३] आसीदग्निहोत्रे निमित्ते तत्र जनकस्याग्निहोत्रविषयं विज्ञानमुपलभ्य परितुष्टो याज्ञवल्क्यस्तस्मै जनकाय ह किल वरं ददौ । स च जनको ह कामप्रश्नमेव वरं वव्रे वृतवांस्तं च वरं हास्मै ददौ याज्ञवल्क्यः । तेन वरप्रदानसामर्थ्येनाऽऽख्याचिख्यासुमपि याज्ञवल्क्यं तूष्णीं स्थितमपि सम्राडेव जनकः पूर्वं[४] पप्रच्छ । तत्रैवानुक्तिर्ब्रह्मविद्यायाः कर्मणा विरुद्धत्वात् । विद्यायाश्च स्वातन्त्र्यात् । स्वतन्त्रा हि ब्रह्मविद्या सहकारिसाधनान्तरनिरपेक्षा पुरुषार्थसाधनेति ॥ १ ॥

तात्पर्यमेवमुक्त्वा व्याख्यामक्षराणामारभते—जनकमित्यादिना । संवादं न करोमीति व्रतं चेत्किमिति गच्छतीत्याशङ्क्य[५]ते—गमनेति । उत्तरमाह—योगेति । अथ हेत्याद्यवतारयति—नेत्यादिना । अत्रोत्तरत्वेनेति शेषः । पूर्वत्रेति कर्मकाण्डोक्तिः । नन्वग्निहोत्रप्रकरणे कामप्रश्नो वरो दत्तश्चेत्किमिति तत्रैवाऽऽत्मयाथात्म्यप्रश्नप्रतिवचने नासूचिषातां तत्राऽऽह—तत्रैवेति । कर्मनिरपेक्षाया ब्रह्मविद्यायां मोक्षहेतुत्वादपि कर्मप्रकरणे तदनुक्तिरित्याह—विद्यायाश्चेति । सर्वापेक्षाधिकरण-

१ ख. ग. घ. ङ. छ. ट. ड. ढ. पूर्वः । २ झ. च । ३ ख. घ. ज. °वादो य आ° । ४ ख. घ. ज. °नानाचि° । ५ ग. झ. पूर्वः ।

न्यायान्न तस्याः स्वातन्त्र्यमित्याशङ्क्याऽऽह—स्वतन्त्रा हीति । सा हि स्वो त्तौ स्वफले वा कर्माण्यपेक्षते । नाऽऽद्योऽभ्युपगमात् । न द्वितीयः । अत एव चाग्नीन्धनाद्यनपेक्षेतिन्यायविरोधादित्यभिप्रेत्याऽऽह—सहकारीति । इत्यस्माच्च हेतोस्तत्रैवानुकिरीति संबन्धः ॥ १ ॥

याज्ञवल्क्य किंज्योतिरयं पुरुष इति । आदित्य-
ज्योतिः सम्राडिति होवाचाऽऽदित्येनैवायं ज्योति-
षाऽऽस्ते पल्ययते कर्म कुरुते विपल्येतीत्येवमेवैत-
द्याज्ञवल्क्य ॥ २ ॥

हे याज्ञवल्क्येत्येवं संबोध्याभिमुखीकरणाय किंज्योतिरयं पुरुष इति किमस्य पुरुषस्य ज्योतिर्येन ज्योतिषा व्यवहरति सोऽयं किंज्यो-तिरयं प्राकृतः कार्यकरणसंघातरूपः शिरःपाण्यादिमान्पुरुषः पृच्छ्यते । किमयं स्वावयवसंघातबाह्येन ज्योतिरन्तरेण व्यवहरत्याहोस्वि-त्स्वावयवसंघातमध्यपातिना ज्योतिषा ज्योतिष्कार्यमयं पुरुषो निर्वर्त-यतीत्येतदभिप्रेत्य पृच्छति । किंच तो यदि व्यतिरिक्तेन यदि वाऽव्य-तिरिक्तेन ज्योतिषा ज्योतिष्कार्यं निवर्तयति । शृणु तत्र कारणं । यदि व्यतिरिक्तेनैव ज्योतिषा ज्योतिष्कार्यनिर्वर्तकत्वमस्य स्वभावो नि-र्धारितो भवति ततोऽदृष्टज्योतिष्कार्यविषयेऽप्यनुमास्यामहे व्यतिरिक्त-ज्योतिर्निमित्तमेवेदं कार्यमिति ।

याज्ञवल्क्यव्रतभङ्गे हेतुमुक्त्वा जनकस्य प्रश्नमुत्थापयति—हे याज्ञवल्क्येति । अक्षरार्थमुक्त्वा प्रश्नवाक्ये विवक्षितमर्थमाह—किमयमित्यादिना । स्वशब्दो यथोक्तपुरुषविषयः । ज्योतिष्कार्यमित्यासनादिव्यवहारोक्तिः । इत्येतदिति कल्प-द्वयं परामृश्यते । पक्षद्वयेऽपि फलं पृच्छति—किंचेति । तसन्यर्थे तसिः । उत्तर-माह—शृण्विति । तत्रेति पक्षद्वयोक्तिः । कारणं फलमिति यावत् । प्रथमपक्षम-नूद्य स्वपक्षसिद्धिफलमाह—यदीत्यादिना । षष्ठी पुरुषमधिकरोति । यत्र कार-णभूतं ज्योतिर्न दृश्यते तत्कार्यं स्वातनाद्युपलभ्यते तत्रापि विषये स्वप्नादाविति यावत् । अनुमानमेवाभिनयति—व्यतिरिक्तेति । विमतंमतिरिक्तज्योतिरधीनं व्यव-हारत्वात्संमतवदित्यर्थः ।

---

१ क. ग. घ. ङ. च. छ. ज. ढ. °तिष्का° । २ ख. छ. °विशेषविष° । ३ ख. ञ. ट. ण. °ल्वयस्य व्र° । ४ घ. किंचात इति । ५ क. ख. ञ. ढ. °ति । का° । ६ घ. °तमेतद्व्यति° । ण. °तमेतद्वति° ।

अथाव्यतिरिक्तेनैव स्वात्मना ज्योतिषा व्यवहरति ततोऽप्रत्यक्षेऽपि ज्योतिषि ज्योतिष्कार्यदर्शनेऽव्यतिरिक्तमेव ज्योतिरनुमेयम् । अथानियम एव व्यतिरिक्तमव्यतिरिक्तं वा ज्योतिः पुरुषस्य व्यवहारहेतुस्ततोऽनध्यवसाय एव ज्योतिर्विषय इत्येवं मन्वानः पृच्छति जनको याज्ञवल्क्यं किंज्योतिरयं पुरुष इति ।

पक्षान्तरमनूद्य लोकायतपक्षसिद्धिफलमाह—अथेत्यादिना । अप्रत्यक्षेऽपीत्यव्यतिरिक्तमिति च्छेदः । कल्पान्तरमाह—अथेति । अनियमं व्याकरोति—व्यतिरिक्तमिति । तस्मिन्पक्षे व्यवहारहेतौ ज्योतिष्यनिश्चयात्तद्विकारो व्यवहारोऽपि न स्थैर्यमालम्बेतेत्याह—तत इति । व्याख्यातं पक्षमुपसंहरति—इत्येवमिति ।

नन्वेवमनुमानकौशले जनकस्य किं प्रश्नेन स्वयमेव कस्मान्न प्रतिपद्यत इति । सत्यमेतत् । तथाऽपि लिङ्गलिङ्गिसंबन्धविशेषाणामत्यन्तसौक्ष्म्यादतिदुरवबोध्यतां मन्यते बहूनामपि पण्डितानां किमुतैकस्य । अत एव हि धर्मसूक्ष्मनिर्णये परिषद्व्यापार इष्यते । पुरुषविशेषश्चापेक्ष्यते । दशावरा परिषत्त्रयो वैको वेति ।

प्रश्नमाक्षिपति—नन्विति । व्यतिरिक्तज्योतिर्बुभुत्सया प्रश्नो भविष्यतीति चेत्तदाऽऽह—स्वयमेवेति । राज्ञोऽनुमानकौशलमङ्गीकरोति—सत्यमिति । किमिति तर्हि पृच्छतीत्याशङ्क्याऽऽह—तथाऽपीति । व्याप्यव्यापकयोस्तत्संबन्धस्य चातिसूक्ष्मत्वादेकेन दुर्ज्ञानत्वात्तज्ज्ञाने याज्ञवल्क्योऽप्यपेक्षित इत्यर्थः । कथं तेषामतिसूक्ष्मत्वमित्यं तत्राऽऽह—बहूनामपीति । लिङ्गादिष्वनेकेषामपि विवेकिनां दुर्बोधत्वाऽस्ति किमुतैकस्य तेषु दुर्बोधता वाच्येत्यर्थः । तेषामत्यन्तसौक्ष्म्ये मानवीं स्मृतिं प्रमाणयति—अत एवेति । कुशलस्यापि सूक्ष्मार्थनिर्णये पुरुषान्तरापेक्षायाः तत्त्वादेवेति यावत् । पुरुषविशेषो वेदविदध्यात्मविदित्यादिः । तत्र स्मृत्यर्थं संक्षिपति—दशेति । उक्तं हि—

" धर्मेणाधिगतो यैस्तु वेदः सपरिबृंहणः ।
ते शिष्टा ब्राह्मणा ज्ञेयाः श्रुतिप्रत्यक्षहेतवः ॥
दशावरा वा परिषद्यं धर्मं परिचक्षते ।
त्र्यवरा वाऽपि वृत्तस्थास्तं धर्मं न विचारयेत् ॥
त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्मपाठकः ।
त्रयश्चाऽऽश्रमिणः पूर्वे विज्ञेया दशावरा ॥

---

१ क. °नकुशलो जनकस्तस्य । २ क. ज. °मेवमेत° । ग. घ. ङ. °मेव त° । ३ ख. क. °मव्यत्य° । ४ च. छ. झ. ढ. °ख्याद्बुद्धःसवो° । ५ च. ढ. हि सूक्ष्मवर्मनि° । ६ ख. ञ. ढ. °त्यादि । त° । घ. ण. °त्यादिनोक्तं स्मृ° । ७ क. °चालये° । ८ क. ख. ढ. ण. °° । ९ क. ख. घ. ञ. ढ. परिषदे° ।

ऋग्वेदविद्यजुर्विच्च सामवेदविदेव च ।
त्र्यवरा परिषज्ज्ञेया धर्मसंशयनिर्णये " इति ।

एको वेत्यध्यात्मविदुच्यते ।

तस्माद्यद्यप्यनुमानकौशलं राज्ञस्तथाऽपि तु युक्तो याज्ञवल्क्यः प्रष्टुम् । विज्ञानकौशलतारतम्योपपत्तेः पुरुषाणाम् । अथवा श्रुतिः स्वयमेवाऽऽख्यायिकाव्याजेनानुमानमार्गमुपन्यस्यास्मान्बोधयति पुरुषमतिमनुसरन्ती ।

कुशलस्यापि राज्ञो याज्ञवल्क्यं प्रति प्रश्नोपपत्तिमुपसंहरति-तस्मादिति । सूक्ष्मार्थनिर्णये पुरुषान्तरापेक्षाया वृद्धसंमतत्वादिति यावत् । तत्रैव हेत्वन्तरमाह-विज्ञानेति । राज्ञो याज्ञवल्क्यापेक्षामुपपाद्य पक्षान्तरमाह-अथवेति । तथा चात्र राज्ञो मुनेर्वा विवक्षितत्वाभावात्किमिति राजा मुनिमनुसरतीति चोद्यं निरवकाशमिति शेषः ।

याज्ञवल्क्योऽपि जनकाभिप्रायाभिज्ञतया व्यतिरिक्तमात्मज्योतिर्बोधयिष्यञ्जनकं व्यतिरिक्तप्रतिपादकमेव लिङ्गं प्रतिपेदे यथा प्रसिद्धमादित्यज्योतिः सम्राडिति होवाच । कथम् । आदित्येनैव स्वावयवसंघातव्यतिरिक्तेन चक्षुषोऽनुग्राहकेण ज्योतिषाऽयं प्राकृतः पुरुष आस्त उपविशति पल्ययते पर्येति क्षेत्रमरण्यं वा तत्र गत्वा कर्म कुरुते विपल्येति विपर्येति च यथागतम् । अत्यन्तव्यतिरिक्तज्योतिष्ट्वप्रसिद्धताप्रदर्शनार्थमनेकविशेषणम् । बाह्यानेकज्योतिःप्रदर्शनं च लिङ्गस्याव्यभिचारित्वप्रदर्शनार्थम् । एवमेवैतद्याज्ञवल्क्य ॥ २ ॥

प्रश्नोपपत्तौ प्रतिवचनमुपपन्नमेवेति मन्वानस्तदुत्थापयति-याज्ञवल्क्योऽपीति । अतिरिक्ते ज्योतिषि प्रष्टू राज्ञोऽभिप्रायस्तदभिज्ञतया तथाविधं ज्योती राजानं बोधयिष्यन्यथाऽतिरिक्तज्योतिरावेदकं वक्ष्यमाणं लिङ्गं गृहीतव्याप्तिकं प्रसिद्धं भवति तथा तद्व्याप्तिग्रहणेस्थलमादित्यज्योतिरित्यादिना मुनिरपि प्रतिपन्नवानित्यर्थः । व्याप्तिं बुभुत्समानः पृच्छति-कथमिति । यो व्यवहारः सोऽतिरिक्तज्योतिरधीनो यथा सवित्रधीनो जाग्रद्व्यवहार इति व्याप्तिं व्याकरोति-आदित्येनेति । एवकारं व्याचष्टे-स्वावयवेति । आदित्यापेक्षामन्तरेण चक्षुर्वशादेवायं व्यवहारः सेत्स्यतीत्याशङ्क्याऽऽह-चक्षुष इति । आसनाद्यन्यतमव्यापारदेशे व्याप्तिसिद्धेर्वृथा विशेषणबहुत्वमित्याशङ्क्याऽऽह-अत्यन्तेति । आसनादीनामेकैकव्यभिचारे देहस्यान्यथाभावेऽपि नानुग्राहकं ज्योतिरन्यथा भवति । अतस्तदनुग्राह्या-

१ ग. °कादित्या° । २ ख. च. ज. °कं प्रति व्य° । ३ ख. ढ. °णस्य स्थ° ।

दित्यन्तविलक्षणमिति विवक्षित्वा व्यापारचतुष्टयमुपदिष्टमित्यर्थः । तथाऽपि किमर्थमादित्याद्यनेकपर्यायोपादानमेकेनैव व्याप्तिग्रहसंभवादित्याशङ्क्याऽऽह—बाह्येति । देहेन्द्रियमनोव्यापाररूपं कर्म लिङ्गं तस्य व्यतिरिक्तज्योतिरव्यभिचारसाधनार्थमनेकपर्यायोपन्यासो बहवो हि दृष्टान्ता व्याप्तिं दृढयन्तीत्यर्थः ॥ २ ॥

अस्तमित आदित्ये याज्ञवल्क्य किंज्योतिरेवायं पुरुष इति चन्द्रमा एवास्य ज्योतिर्भवतीति चन्द्रमसैवायं ज्योतिषाऽऽस्ते पल्ययते कर्म कुरुते विपल्येतीत्येवमेवैतद्याज्ञवल्क्य ॥ ३ ॥

तथाऽस्तमित आदित्ये याज्ञवल्क्य किंज्योतिरेवायं पुरुष इति चन्द्रमा एवास्य ज्योतिः ॥ ३ ॥

॥ ३ ॥

अस्तमित आदित्ये याज्ञवल्क्य चन्द्रमस्यस्तमिते किंज्योतिरेवायं पुरुष इत्यग्निरेवास्य ज्योतिर्भवतीत्यग्निनैवायं ज्योतिषाऽऽस्ते पल्ययते कर्म कुरुते विपल्येतीत्येवमेवैतद्याज्ञवल्क्य ॥ ४ ॥

अस्तमित आदित्ये चन्द्रमस्यस्तमितेऽग्निर्ज्योतिः ॥ ४ ॥

॥ ४ ॥

अस्तमित आदित्ये याज्ञवल्क्य चन्द्रमस्यस्तमिते शान्तेऽग्नौ किंज्योतिरेवायं पुरुष इति वागेवास्य ज्योतिर्भवति वाचैवायं ज्योतिषाऽऽस्ते पल्ययते कर्म कुरुते विपल्येतीति तस्माद्वै सम्राडपि यत्र स्वः पाणिर्न विनिर्ज्ञायतेऽथ यत्र वागुच्चरत्युपैव यत्र नेतीत्येवमेवैतद्याज्ञवल्क्य ॥ ५ ॥

शान्तेऽग्नौ वाग्ज्योतिः । वागिति शब्दः परिगृह्यते । शब्देन विषयेण श्रोत्रमिन्द्रियं दीप्यते । श्रोत्रेन्द्रिये संप्रदीप्ते मनसि विवेक उपजायते । तेन मनसा बाह्यां चेष्टां प्रतिपद्यते । मनसा ह्येव पश्यति मनसा शृणोतीति ब्राह्मणम् । कथं पुनर्वाग्ज्योतिरिति वाचोज्योतिष्ट्वमप्रसिद्धमित्यत

१ ख. घ. ण. °संदी° ।

आह—तस्माद्वै सम्राड्यस्माद्वाचा ज्योतिषाऽनुगृहीतोऽयं पुरुषो व्यवहरति तस्मात्प्रसिद्धमेतद्वाचो ज्योतिष्ट्वम्। कथमपि यत्र यस्मिन्काले प्रावृषि प्रायेण मेघान्धकारे सर्वज्योतिःप्रत्यस्तमये स्वोऽपि पाणिहस्तो न विस्पष्टं निर्ज्ञायते। अथ तस्मिन्काले सर्वचेष्टानिरोधे प्राप्ते बाह्यज्योतिषोऽभावाद्यत्र वागुच्चरति श्वा वा भषति गर्दभो वा रौत्युपैव तत्र ज्योति तेन शब्देन ज्योतिषा श्रोत्रमनसोर्नैरन्तर्यं भवति तेन ज्योतिष्कार्यत्वं वाक्प्रतिपद्यते तेन वाचा ज्योतिषोपन्येत्येवोपगच्छत्येवं तत्रैं संनिहितो भवतीत्यर्थः। तत्र च कर्म कुरुते विपल्योति। तत्र वाग्ज्योतिषो ग्रहणं गन्धादीनामुपलक्षणार्थम्। गन्धादिभिरपि हि घ्राणादिष्वनुगृहीतेषु प्रवृत्तिनिवृत्त्यादयो भवन्ति। तेन तैरप्यनुग्रहो भवति कार्यकरणसंघातस्य। एवमेवैतद्याज्ञवल्क्य ॥ ५ ॥

इन्द्रियं व्यावर्तयति—वागितीति। शब्दस्य ज्योतिष्ट्वं स्पष्टयितुं पातनिकां करोति—शब्देनेति। तद्दीपनकार्यमाह—श्रोत्रेति। मनसि विषयाकारेपरिणामे सति किं स्यात्तदाह—तेनेति। तत्र प्रमाणमाह—मनसा हीति। एवं पातनिकां कृत्वा वाचो ज्योतिष्ट्वसाधनार्थं पृच्छति—कथमिति। का पुनरत्रानुपपत्तिस्तत्राऽऽह—वाच इति। तत्रानन्तरवाक्यमुत्तरत्वेनोत्थाप्य व्याकरोति—अत आहेत्यादिना। प्रसिद्धमेवाऽऽकाङ्क्षापूर्वकं स्फुटयति—कथमित्यादिना। उपपैवेत्यादि व्याचष्टे—तेन शब्देनेति। ज्योतिष्कार्यत्वं तज्जन्यव्यवहाररूपकार्यवत्त्वमिति यावत्। तत्र वा ज्योतिष इत्यत्र चतुर्थपर्यायः सप्तम्यर्थः। किमिति गन्धादयः शब्देनोपलक्ष्यन्ते तत्राऽऽह—गन्धादिभिरिति। प्रश्नान्तरमुत्थापयति—एवमेवेति। तथाऽपि स्वमादौ तस्य प्रवृत्तिदर्शनात्तत्कारणीभूतं ज्योतिर्वक्तव्यमिति शेषः ॥ ५ ॥

अस्तमित आदित्ये याज्ञवल्क्य चन्द्रमस्यस्तमिते
शान्तेऽग्नौ शान्तायां वाचि किंज्योतिरेवायं पुरुष
इत्यात्मैवास्य ज्योतिर्भवतीत्यात्मनैवायं ज्योति-
षाऽऽस्ते पल्ययते कर्म कुरुते विपल्येतीति ॥६॥

---

१ ख. °र्यवत्त्वं वा°। २ क. ज. °त्येव तत्र च। ३ च. ढ. °व सं°। ४ ग. ङ. °त्र च। ५ क. ख. ञ. ण. °कारे प°। ढ. °कारेण प°। ६ ख. घ. ण. °सिद्धिमे°। ७ क. ख. °र्यवत्त्वं त°।

शान्तायां पुनर्वाचि गन्धादिष्वपि च शान्तेषु बाह्येष्वनुग्राहकेषु सर्वप्रवृत्तिनिरोधः प्राप्तोऽस्य पुरुषस्य । एतदुक्तं भवति । जाग्रद्विषये बहिर्मुखानि करणानि चक्षुरादीन्यादित्यादिज्योतिर्भिरनुगृह्यमाणानि यदा स्फुटतरः संव्यवहारोऽस्य पुरुषस्य भवतीति । एवं तावज्जागरिते स्वावयवसंघातव्यतिरिक्तेनैव ज्योतिषा ज्योतिष्कार्यसिद्धिरस्य पुरुषस्य दृष्टा । तस्मात्ते वयं मन्यामहे सर्वबाह्यज्योतिःप्रत्यस्तमयेऽपि स्वप्नसुषुप्तकाले जागरिते च तादृगवस्थायां स्वावयवसंघातव्यतिरिक्तेनैव ज्योतिषा ज्योतिष्कार्यसिद्धिरस्येति । दृश्यते च स्वप्ने ज्योतिष्कार्यसिद्धिर्बन्धुसंगमनवियोगदर्शनं देशान्तरगमनादि च । सुषुप्ताच्चोत्थानं सुखमहमस्वाप्सं न किंचिदवेदिषमिति । तस्मादस्ति व्यतिरिक्तं किमपि ज्योतिः। किं पुनस्तच्छान्तायां वाचि ज्योतिर्भवतीति ।

कथं पुनरत्र पृच्छ्यते ज्योतिरन्तरमित्याशङ्क्य प्रष्टुरभिप्रायमाह—एतदुक्तं भवतीति । यो व्यवहारः सोऽतिरिक्तज्योतिर्निमित्तो यथाऽऽदित्यादिनिमित्तो जाग्रद्व्यवहार इति व्याप्तिमुक्तां निगमयति—एवं तावदिति । तादृगवस्थायां सर्वज्योतिःप्रत्यस्तमयदशायामिति यावत् । विमतो व्यवहारोऽतिरिक्तज्योतिरधीनो व्यवहारत्वात्संप्रतिपन्नवदित्यधस्तादेवानुमानमाबोदितमिति भावः । हेतोराश्रयासिद्धिमाशङ्क्य परिहरति—दृश्यते चेति । आदिशब्देन देशान्तरादौ कर्मकरणं गृह्यते । आश्रयैकदेशासिद्धिमाशङ्क्याऽऽह—सुषुप्ताच्चेति । स्वप्नदशायामिष्टदेवतादर्शनं चकारार्थः । अनुमानफलं निगमयति—तस्मादिति । यथोक्तानुमानाज्ज्योतिः सिद्धं चेत्किं प्रश्नेनेत्याशङ्क्याऽऽह—किं पुनरिति । सर्वज्योतिरुपशमे दृश्यमानस्य व्यवहारस्य कारणतयाऽनुमानतो ज्योतिर्मात्रसिद्धावपि तद्विशेषबुभुत्सायां प्रश्नोपपत्तिरित्यर्थः ।

उच्यते—आत्मैवास्य ज्योतिर्भवतीति । आत्मेति कार्यकरणस्वावयवसंघातव्यतिरिक्तं कार्यकरणावभासकमादित्यादिबाह्यज्योतिर्वत्स्वयमन्येनानवभास्यमानमभिधीयते ज्योतिरन्तःस्थं च तत्पारिशेष्यात् । कार्यकरणव्यतिरिक्तं तादिति तावत्सिद्धम् । कार्यकरणव्यतिरिक्तं कार्यकरणसंघातानुग्राहकं च ज्योतिस्तद्बाह्यैश्चक्षुरादिकरणैरुपलभ्यमानं दृष्टं न तु तथा तच्चक्षुरादिभिरुपलभ्यत आदित्यादिज्योतिःषूपरतेषु ।

१ ग. च. झ. ढ. °ये हि ब° । २ क. ग. °षुसिका° । ३ ग. ङ. छ. झ. ञ. °त्थानम् । त° । ४ ख. ग. घ. ङ. च. छ. झ. ढ. °षम । त° । ५ घ. ञ. ण. °क्तावनु° । ६ क. ख. ढ. °परमे । ७ घ. ञ. ण. °भुत्सया प्र° । ८ घ. ज. °णसघातव्य° ।

कार्यं तु ज्योतिषो दृश्यते यस्मात्तस्मादात्मनैवायं ज्योतिषाऽऽस्ते पल्ययते कर्म कुरुते विपल्येतीति । तस्मान्नूनमन्तःस्थं ज्योतिरित्यवगम्यते ॥ किंचाऽऽदित्यादिज्योतिर्विलक्षणं तदभौतिकं च स एव हेतुर्यच्चक्षुराद्यग्राह्यत्वमादित्यादिवत् ।

प्रतिवचनमवतार्य व्याकरोति—उच्यत इत्यादिना । अवभासकत्वे दृष्टान्तमाह—आदित्यादीति । तत्र व्यतिरिक्तत्वं साधयति—कार्येति । अनुग्राहकत्वादादित्यादिवदिति शेषः । तच्चान्तःस्थं पारिशेष्यादित्युक्तमुपपादयति—यच्चेति । उपरतेष्वात्मज्योतिरिति शेषः । तदेव तर्हि मा भूदिति चेन्नेत्याह—कार्यं त्विति । स्वप्नादौ दृश्यमानं व्यवहारं हेतूकृत्य फलितमाह—यस्मादित्यादिना । विमतमन्तःस्थमतीन्द्रियत्वादादित्यवदिति व्यतिरेकीत्यर्थः । व्यतिरेकान्तरमाह—किंचेति ।

न । समानजातीयेनैवोपकारदर्शनात । यदादित्यादिविलक्षणं ज्योतिरान्तरं सिद्धमित्येतदसत् । कस्मात् । उपक्रियमाणसमानजातीयेनैवाऽऽदित्यादिज्योतिषा कार्यकरणसंघातस्य भौतिकस्य भौतिकेनैवोपकारः क्रियमाणो दृश्यते । यथादृष्टं चेदमनुभेयम् । यदि नाम कार्यकरणादर्थान्तरं तदुपकारकमादित्यादिवज्ज्योतिस्तथाऽपि कार्यकरणसंघातसमानजातीयमेवानुमेयं कार्यकरणसंघातोपकारकत्वादादित्यादिज्योतिर्वत् । यत्पुनरन्तःस्थत्वादप्रत्यक्षत्वाच्च वैलक्षण्यमुच्यते तच्चक्षुरादिज्योतिर्भिरनैकान्तिकम् । यतोऽप्रत्यक्षाण्यन्तःस्थानि च चक्षुरादिज्योतींषि भौतिकान्येव । तस्मात्तव मनोरथमात्रं विलक्षणमात्मज्योतिः सिद्धमिति ।

संभवति लोकायतश्चोदयति—नेत्यादिना । तत्र नञर्थं व्याचष्टे—यदिति । उक्तं हेतुं प्रश्नपूर्वकं विभजते—कस्मादित्यादिना । यद्यपि देहादेरुपकार्यादुपकारकमादित्यादिसजातीयं दृष्टं तथाऽपि नाऽऽत्मज्योतिरुपकार्यसजातीयमनुमेयमित्याशङ्क्याऽऽह—यथादृष्टं चेति । तदेव स्पष्टयति—यदि नामेति । विमतमन्तःस्थमतिरिक्तं चातीन्द्रियत्वादादित्यवदिति परोक्तं व्यतिरेक्यनुमानमनूद्य दूषयति—यत्पुनरित्यादिना । अनैकान्तिकत्वं व्यनक्ति—यत इति । अन्तःस्थान्यव्यतिरिक्तानि च संघातादीति द्रष्टव्यम् । व्यभिचारफलमाह—तस्मादिति । विलक्षणमन्तःस्थं चेति मन्तव्यम् ।

---

१ क. घ. ज. °स्मादा° । २ च. ङ. एष । ३ ख. ङ. °ह्यमा° । ४ ग. ङ. च. छ. ज. झ. °तिरन्त° । ५ ख. ङ. छ. झ. °दनु° । ६ ख. चेदिति । ७ ख. °कं वाऽवी° । ८ ख. ढ. षेति ।

कार्यकरणसंघातभावभावित्वाच्च संघातधर्मत्वमनुमीयते ज्योतिषः सामान्यतो दृष्टस्य चानुमानस्य व्यभिचारित्वादप्रामाण्यम्। सामान्यतो दृष्टबलेन हि भवानादित्यादिवद्व्यतिरिक्तं ज्योतिः साधयति कार्यकरणेभ्यः। न च प्रत्यक्षमनुमानेन बाधितुं शक्यते। अयमेव तु कार्यकरणसंघातः प्रत्यक्षं पश्यति शृणोति मनुते विजानाति च। यदि नाम ज्योतिरन्तरमस्योपकारकं स्यादादित्यादिवन्न तदाऽऽत्मा स्याज्ज्योतिरन्तरमादित्यादिवदेव। य एव तु प्रत्यक्षं दर्शनादिक्रियां करोति स एवाऽऽत्मा स्यात्कार्यकरणसंघातो नान्यः। प्रत्यक्षविरोधेऽनुमानस्याप्रामाण्यात्।

किंच चैतन्यं शरीरधर्मस्तद्भावभावित्वाद्रूपादिवदित्याह—कार्यकरणेति। विमतं संघाताद्भिन्नं तद्भासकत्वादादित्यवदित्यनुमानान्न संघातधर्मत्वं चैतन्यस्येत्याशङ्क्याऽऽह—सामान्यतो दृष्टस्येति। लोकायतस्य हि देहावभासकमपि चक्षुस्ततो न भिद्यते तथा च व्यभिचारान्न त्वदनुमानप्रामाण्यमित्यर्थः। मनुष्योऽहं जानामीति प्रत्यक्षविरोधाच्चं त्वदनुमानममानमित्याह—सामान्यतो दृष्टेति। ननु तेन प्रत्यक्षमुत्सार्यतामिति चेन्नेत्याह—न चेति। इतश्च देहस्यैव चैतन्यमित्याह—अयमेवेति। ज्योतिषो देहव्यतिरेकमङ्गीकृत्यापि दूषयति—यदि नामेति। विमतं ज्योतिरनात्मा देहोपकारकत्वादादित्यवदित्यर्थः। आत्मत्वं तर्हि कस्येत्याशङ्क्याऽऽह—य एव त्विति। अनुमानादात्मनो देहव्यतिरिक्तत्वमुक्तमित्याशङ्क्याऽऽह—प्रत्यक्षेति। नान्य आत्मेति पूर्वेण संबन्धः।

नन्वयमेव चेद्दर्शनादिक्रियाकर्ताऽऽत्मा संघातः कथमविकलस्यैवास्य दर्शनादिक्रियाकर्तृत्वं कदाचिद्भवति कदाचिन्नेति। नैष दोषो दृष्टत्वात्। नहि दृष्टेऽनुपपन्नं नाम। नहि खद्योते [illegible]शप्रकाशकत्वेन दृश्यमाने कारणान्तरमनुमेयम्। अनुमेयत्वे चं कनचित्सामान्यात्सर्वं सर्वत्रानुमेयं स्यात्। तच्चानिष्टम्। न च पदार्थस्वभावो नास्ति न ह्यग्नेरुष्णस्वाभाव्यमन्यनिमित्तमुदकस्य वा शैत्यम्। प्राणिधर्माधर्माद्यपेक्षमिति चेत्। धर्माधर्मादेर्निमित्तान्तरापेक्षस्वभावप्रसङ्गः। अस्त्विति चेन्न तदनवस्थाप्रसङ्गः। स चानिष्टः।

देहस्याऽऽत्मत्वे कादाचित्कं दृष्टत्वश्रोतृत्वाद्ययुक्तमिति शङ्कते—नन्विति। स्वभा-

१ ग. घ. ज. °वन्नासावात्मा°। २ ख. ङ. ढ. °दाऽसावात्मा। ३ क. ख. ढ. °त्वं हे°। ४ क. घ. ढ. ण. °च्च तद्°। ५ घ. ज. °यायां क°। ६ ख. ज. ढ. °शत्वे°। ७ ख. ढ. वा।

ववादी परिहरति—नैष दोष इति । कादाचित्के दर्शनादर्शने संभवतो देहस्वाभाव्यादित्यत्र दृष्टान्तमाह—नहीति । विमतं कारणान्तरपूर्वकं कादाचित्कत्वादघटवदित्यनुमानं दृष्टान्ते भविष्यतीत्याशङ्क्याग्निरुष्ण इतिवदुष्णमुदकमित्यपि द्रव्यत्वादिनाऽनुमीयेतेत्यतिप्रसङ्गमाह—अनुमेयत्वे चेति । ननु यद्भवति तत्सनिमित्तमेव न स्वभावाद्भवेत्किंचिदस्माकं प्रसिद्धं तत्राऽऽह—न चेति । अग्नेरौष्ण्यमुदकस्य शैत्यमित्यादावपि न निर्निमित्तं किंतु प्राण्यदृष्टापेक्षमिति शङ्कते—प्राणीति । आदिशब्देनेश्वरादि गृह्यते । गूढाभिसंधिः स्वभाववाद्याह—धर्मेति । प्रसङ्गस्येष्टत्वं शङ्कित्वा स्वाभिप्रायमाह—अस्त्वित्यादिना ।

न । स्वप्नस्मृत्योर्दृष्टस्यैव दर्शनात् । यदुक्तं स्वभाववादिना देहस्यैव दर्शनादिक्रिया न व्यतिरिक्तस्येति । तन्न । यदि हि देहस्यैव दर्शनादिक्रिया स्वप्ने दृष्टस्यैव दर्शनं न स्यात् । अन्धः स्वप्नं पश्येन्दृष्टपूर्वमेव पश्यति न शाकद्वीपादिगतमदृष्टरूपम् । ततश्चैतत्सिद्धं भवति यः स्वप्ने पश्यति दृष्टपूर्वं वस्तु स एव पूर्वं विद्यमाने चक्षुष्यद्राक्षीन्न देह इति । देहश्चेद्द्रष्टा स येनाद्राक्षीत्तस्मिन्नुद्धृते चक्षुषि स्वप्ने तदेव दृष्टपूर्वं न पश्येत् । अस्ति च लोके प्रसिद्धिः पूर्वं दृष्टं मया हिमवतः शृङ्गमद्याहं स्वप्नेऽद्राक्षमित्युद्धृतचक्षुषामन्धानामपि । तस्मादनुद्धृतेऽपि चक्षुषि यः स्वप्नदृक्स एव द्रष्टा न देह इत्यवगम्यते ।

सिद्धान्ती स्वप्नादिसिद्ध्यनुपपत्त्या देहातिरिक्तमात्मानमभ्युपगमयन्नुत्तरमाह—नेत्यादिना । तत्र नञर्थं विभजते—यदुक्तमिति । स्वप्ने दृष्टस्यैव दर्शनादिति हेतुभागं व्यतिरेकद्वारा विवृणोति—यदि हीति । जाग्रद्देहस्य द्रष्टुः स्वप्ने नष्टत्वादतीन्द्रियस्य च संस्कारस्य चानिष्टान्यदृष्टे चान्यस्य स्वप्नायोगाच्च स्वप्ने दृष्टस्यैव दर्शनं देहात्मवादे संभवतीत्यर्थः । मा भूद्दृष्टस्यैव स्वप्ने दृष्टिरन्धस्यापि स्वप्नदृष्टेरित्याशङ्क्याऽऽह—अन्ध इति । अपिशब्दोऽध्याहर्तव्यः । पूर्वदृष्टस्यैव स्वप्ने दृष्टत्वेऽपि कुतो देहव्यतिरिक्तो द्रष्टा सिध्यतीत्याशङ्क्याऽऽह—ततश्चेति । अथोभयत्र देहस्यैव द्रष्टृत्वे का हानिरिति चेदत आह—देहश्चेदिति । तत्र सहकारिचक्षुरभावाच्चक्षुरन्तरस्य चोत्पत्तौ देहान्तरस्यापि समुत्पत्तिसंभवादन्यदृष्टेऽन्यस्य न स्वप्नः स्यादित्यर्थः । मा भूत्पूर्वदृष्टे स्वप्नो हेत्वभावादित्याशङ्क्याऽऽह—अस्ति चेति । कथं ते जात्यन्धानामिदंदर्शनामिति चेज्जन्मान्तरानुभववशादिति ब्रूमः । अन्धस्य देहस्यादृष्टृत्वेऽपि चक्षुष्मतस्तस्य स्यादेव द्रष्टृत्वमित्याङ्क्याऽऽह—तस्मादिति ।

---

१ घ. ञ. वेति । २ घ. ङ. ङ्यन्पूर्वदृष्टम° । ३ क. ङ. ष्टपूर्वम् । ४ ग. घ. ङ. पूर्वदृ° । ५ क. घ. ङ्य सं° ।

तथा स्मृतौ द्रष्टृस्मर्त्रोरेकत्वे सति य एव द्रष्टा स एव स्मर्ता । यदा चैवं तदा निमीलिताक्षोऽपि स्मरन्दृष्टपूर्वं यद्रूपं तद्दृष्टवदेव पश्यतीति । तस्माद्यन्निमीलितं तन्न द्रष्टृ यन्निमीलिते चक्षुषि स्मरन्रूपं पश्यति तदेवानिमीलितेऽपि चक्षुषि द्रष्ट्रासीदित्यवगम्यते । मृते च देहेऽविकलस्यैव च रूपादिदर्शनाभावात् । देहस्यैव द्रष्टृत्वे मृतेऽपि दर्शनादिक्रिया स्यात् । तस्माद्यदपाये देहे दर्शनं न भवति यद्भावे च भवति तद्दर्शनादिक्रियाकर्तृ न देह इत्यवगम्यते ।

स्वप्ने दृष्टस्यैव दर्शनादिति हेतुं व्याख्याय स्मृतौ दृष्टस्यैव दर्शनादिति हेतुं व्याचष्टे—तथेति । द्रष्टृस्मर्त्रोरेकत्वेऽपि कुतो देहातिरिक्तो द्रष्टेत्याशङ्क्याऽऽह—यदा चेति । देहातिरिक्तस्य स्मर्तृत्वेऽपि कुतो द्रष्टृत्वमित्याशङ्क्याऽऽह—तस्मादिति । द्रष्टृस्मर्त्रोरेकत्वस्योक्तत्वाद्देहातिरिक्तः स्मर्ता चेद्द्रष्टाऽपि तथा सिध्यतीति भावः । देहस्याद्रष्टृत्वे हेत्वन्तरमाह—मृते चेति । न तस्य द्रष्टृतेति शेषः । तदेवोपपादयति—देहस्यैवेति । देहव्यतिरिक्तमात्मानमुपपादितमुपसंहरति—तस्मादिति । चैतन्यं यत्तदोरर्थः ।

चक्षुरादीन्येव दर्शनादिक्रियाकर्तृणीति चेत् । न । यदहमद्राक्षं तत्स्पृशामीति भिन्नकर्तृकत्वे प्रतिसंधानानुपपत्तेः । मनस्तर्हीति चेत् । न । मनसोऽपि विषयत्वाद्रूपादिवद्दृष्टृत्वाद्यनुपपत्तिः । तस्मादन्तःस्थं व्यतिरिक्तमादित्यादिवदिति सिद्धम् ।

मा भूद्देहस्याऽऽत्मत्वमिन्द्रियाणां तु स्यादिति शङ्कते—चक्षुरादीनीति । अन्यदृष्टस्येतरेणाप्रत्यभिज्ञानादिति न्यायेन परिहरति—नेत्यादिना । आत्मप्रतिपत्तिहेतूनां मनसि संभवादिति न्यायेन शङ्कते—मन इति । ज्ञातुर्ज्ञानसाधनोपपत्तेः संज्ञाभेदमात्रमिति न्यायेन परिहरति—न मनसोऽपीति । देहादेरनात्मत्वे फलितमाह तस्मादिति । आत्मज्योतिः संघातादिति शेषः ।

यदुक्तं कार्यकरणसंघातसमानजातीयमेव ज्योतिन्तरमनुमेयम् । आदित्यादिभिस्तत्समानजातीयैरेवोपक्रियमाणत्वादिति । तदसत् । उपकार्योपकारकभावस्यानियमदर्शनात् । कथं, पार्थिवैरिन्धनैः पार्थिवत्वसमानजातीयैस्तृणोलपादिभिरग्नेः प्रज्वलनोपकारः क्रियमाणो दृश्यते । न च तावता तत्समानजातीयैरेवाग्नेः प्रज्वलनोपकारः सर्वत्रानुमेयः स्यात् । येनोदकेनापि प्रज्वलनोपकारो भिन्नजातीयेन वैद्युतस्याग्नेर्जाठरस्य च क्रियमाणो दृश्यते ।

१ ख. ङ. ञ. तद्वद्दृष्टव° । २ ग. घ. ज. °र्शनक्रियादिक° । ३ ग. घ. ण. देहाति° । ४ ङ. न चैता° ।

परोक्तमनुवदति—यदुक्तमिति । अनुग्राह्यसजातीयमनुग्राहकप्रियत्व हेतुमाह—आदित्यादिभिरिति । उपकार्योपकारकत्वेसाजात्यनियमं दूषयति—तदसदिति । अनियमदर्शनमाकाङ्क्षापूर्वकमुदाहरति—कथं पार्थिवैरिति । उलपं बालतृणम् । पार्थिवैस्याग्निं प्रत्युकारकत्वनियमं वारयति—न चेति । तावता पार्थिवेनाग्नेरुपक्रियमाणत्वदर्शनेनेति यावत् । तत्समानजातीयैरिति तच्छब्दः पार्थिवत्वविषयः । तत्र हेतुमाह—येनेति ।

तस्मादुपकार्योपकारकभावे समानजातीयासमानजातीयनियमो नास्ति । कदाचित्समानजातीया मनुष्या मनुष्यैरेवोपक्रियन्ते कदाचित्स्थावरपश्वादिभिश्च भिन्नजातीयैः । तस्मादहेतुः कार्यकरणसंघातसमानजातीयैरेवाऽऽदित्यादिज्योतिर्भिरुपक्रियमाणत्वादिति ।

दर्शनफलं निगमयति—तस्मादिति । उपकार्योपकारकभावे साजात्यानियमवदपकार्यापकारकभावेऽपि वैजात्यनियमो नास्तीत्यर्थः । तत्रोपकार्योपकारकत्वे साजात्यनियमाभावमुदाहरणान्तरेण दर्शयति—कदाचिदिति । अम्भसाऽग्निना वाऽग्नेरुपशान्त्युपलम्भादपकार्यापकारत्वे वैजात्यनियमोऽपि नास्तीति मत्वोपसंहरति—तस्मादिति । उक्तानियमदर्शनं तच्छब्दार्थः । अहेतुरात्मज्योतिषः संघातेन समानजातीयतायामिति शेषः ।

यत्पुरात्थ चक्षुरादिभिरादित्यादिज्योतिर्वैदृश्यत्वादित्ययं हेतुर्ज्योतिरन्तरस्यान्तःस्थत्वं वैलक्षण्यं च न साधयति चक्षुरादिभिरनैकान्तिकत्वादिति । तदसत् । चक्षुरादिकरणेभ्योऽन्यत्वे सतीति हेतोर्विशेषणत्वोपपत्तेः । कार्यकरणसंघातधर्मत्वं ज्योतिष इति यदुक्तं तन्न । अनुमानविरोधात् । आदित्यादिज्योतिर्वत्कार्यकरणसंघातादर्थान्तरं ज्योतिरिति ह्यनुमानमुक्तं तेन विरुध्यत इयं प्रतिज्ञा कार्यकरणसंघातधर्मत्वं ज्योतिष इति । तद्भावभावित्वं त्वसिद्धं मृते देहे ज्योतिषोऽदर्शनात् ।

अनुग्राहकमनुग्राह्यसजातीयमनुग्राहकत्वादादित्यवदित्यपास्तम् । संप्रतीन्द्रियत्वहेतोरनैकान्त्यं परोक्तमनुभाष्य दूषयति—यत्पुनरित्यादिना । विमतं ज्योतिः संघातधर्मस्तद्भावभावित्वाद्रूपादिवदित्युक्तमनूद्य निराकरोति—कार्येति । अनुमा-

---

१ घ. ञ. ण. °कभावस्य सा°। २ घ. ञ. ण. °वस्यैवाग्निं । ३ घ. ज. °हि । य°। ङ. °तिर्दृश्य° ।

नविरोधमेव साधयति—आदित्यादीति । कालात्ययापदेशमुक्त्वा हेत्वसिद्धिं दोषान्तरमाह—तद्भावेति । अदर्शनादिति च्छेदः ।

सामान्यतो दृष्टस्यानुमानस्याप्रामाण्ये सति पानभोजनादिसर्वव्यवहारलोपप्रसङ्गः । स चानिष्टः । पानभोजनादिषु हि क्षुत्पिपासादिनिवृत्तिमुपलब्धवतस्तत्सामान्यात्पानभोजनाद्युपादानं दृश्यमानं लोके न प्राप्नोति । दृश्यन्ते ह्युपलब्धपानभोजनाः सामान्यतः पुनः न पानभाजनान्तरैः क्षुत्पिपासादिनिवृत्तिमनुमिन्वन्तस्तादर्थ्येन प्रवर्तमानाः ।

यत्पुनर्विशेषेऽनुगमाभावः सामान्ये सिद्धसाध्यतेत्यनुमानदूषणमभिप्रेत्य सामान्यतो दृष्टस्य चेत्याद्युक्तं तद्दूषयति—सामान्यतो दृष्टस्येति । विशेषतोऽदृष्टस्येत्यपि द्रष्टव्यम् । किमित्यनुमानाप्रामाण्ये सर्वव्यवहारहानिरित्याशङ्क्याऽऽह—पानेति । तत्सामान्यात्पानत्वभोजनत्वादिसादृश्यादिति यावत् । पानभोजनाद्युपादानं दृश्यमानमित्युक्तं विशदयति—दृश्यन्ते हीति । तादर्थ्येन क्षुत्पिपासादिनिवृत्त्युपायभोजनपानाद्यर्थत्वेनेति यावत् ।

यदुक्तमयमेव तु देहो दर्शनादिक्रियाकर्तेति तत्प्रथममेव परिहृतं स्वप्नस्मृत्योर्देहादर्थान्तरभूतो द्रष्टेति । अनेनैव ज्योतिरन्तरस्यानात्मत्वमपि प्रत्युक्तम् । यत्पुनः खद्योतादेः कादाचित्कं प्रकाशाप्रकाशकत्वं तदसत् । पक्षाद्यवयवसंकोचविकासनिमित्तत्वात्प्रकाशाप्रकाशकत्वस्य । यत्पुनरुक्तं धर्माधर्मयोरवश्यं फलदातृत्वं स्वभावोऽभ्युपगन्तव्य इति । तदभ्युपगमे भवतः सिद्धान्तहानात् । एतेनानवस्थादोषः प्रत्युक्तः । तस्मादस्ति व्यतिरिक्तं चान्तःस्थं ज्योतिरात्मेति ॥ ६ ॥

देहस्यैव द्रष्टृत्वमित्युक्तमनूद्य पूर्वोक्तं परिहारं स्मारयति—यदुक्तमित्यादिना ज्योतिरन्तरमादित्यादिवदनात्मेत्युक्तं प्रत्याह—अनेनेति । संघातादेर्दृष्टृत्वनिराकरणेनेति यावत् । देहस्य कादाचित्कं दर्शनादिमत्त्वं स्वाभाविकमित्यत्र परोक्तं दृष्टान्तमनुभाष्य निराचष्टे—यत्पुनरित्यादिना । सिद्धान्तिनाऽपि स्वभाववादस्य क्वचिदेष्टव्यत्वमुपदिष्टमनूद्य दूषयति—यत्पुनरिति । धर्मादेर्यदि हेत्वन्तराधीनं फलदातृत्वं तदा हेत्वन्तरस्यापि हेत्वन्तराधीनं फलदातृत्वमित्यनवस्थेत्युक्तं प्रत्याह—एतेनेति । सिद्धान्तविरोधप्रसञ्जनेनेति यावत् । लोकायतमतासंभवे स्वपक्षमुपसंहरति—तस्मादिति ॥ ६ ॥

---

१ ख. च. ढ. °काशात्मक° । २ क. ग. घ. ङ. च. छ. ज. ढ. °काशनि° । ३ च. ढ. °शत्व° । ४ क. च. ढ. °तृत्वस्व° । ५ ञ. ढ. °तादिद्रष्टृ° । ६ क. °सङ्गेनेति । ढ. °सज्जने° ।

कतम आत्मेति योऽयं विज्ञानमयः प्राणेषु हृद्यन्त-
र्ज्योतिः पुरुषः स समानः सन्नुभौ लोकावनुसंच-
रति ध्यायतीव लेलायतीव स हि स्वप्नो भूत्वेमं
लोकमतिक्रामति मृत्यो रूपाणि ॥ ७ ॥

यद्यपि व्यतिरिक्तत्वादि सिद्धं तथाऽपि समानजातीयानुग्राहकत्वदर्शननिमित्तभ्रान्त्या करणानामेवान्यतमो व्यतिरिक्तो वेत्यविवेकतः पृच्छति—कतम इति । न्यायसूक्ष्मताया दुर्विज्ञेयत्वादुपपद्यते भ्रान्तिः । अथवा शरीरव्यतिरिक्ते सिद्धेऽपि करणानि सर्वाणि विज्ञानवन्तविविवेकत आत्मनोऽनुपलब्धत्वात् । अतोऽहं पृच्छामि कतम आत्मेति । कतमोऽसौ देहेन्द्रियप्राणमनःसु यस्त्वयोक्त आत्मा । येन ज्योतिषाऽऽस्त इत्युक्तम् ।

नन्वात्मज्योतिः संघाताद्व्यतिरिक्तमन्तःस्थं चेति साधितं तथा च कथं कतम आत्मेति पृच्छ्यते तत्राऽऽह—यद्यपीति । अनुग्राह्येण देहादिना समानजातीयस्याऽऽदित्यादेरनुग्रहाहकत्वदर्शनान्निमित्तादनुग्राहकत्वाविशेषादात्मज्योतिरपि समानजातीयं देहादिनेति भ्रान्तिर्भवति तयेति यावत् । अविवेकिनो निष्कृष्टदृष्टव्यभावादित्यर्थः । व्यतिरेकसाधकस्य दर्शितत्वात्कुतो भ्रान्तिरित्याशङ्क्याऽऽह—न्यायेति । भ्रान्तिनिमित्ताविवेककृतं प्रश्नमुक्त्वा प्रकारान्तरेण प्रश्नमुत्थापयति—अथवेति । प्रश्नाक्षराणि व्याचष्टे—कतमोऽसाविति । ननु ज्योतिर्निमित्तो व्यवहारो मयोक्तो न त्वात्मेत्याशङ्क्याऽऽह—येनेति । आत्मनैवायं ज्योतिषेत्युक्त्वादासनादिनिमित्तं ज्योतिरात्मेत्यर्थः ।

अथवा योऽयमात्मा त्वयाऽभिप्रेतो विज्ञानमयः । सर्व इमे प्राणा विज्ञानमया इवैषु प्राणेषु कतमः । यथा समुदितेषु ब्राह्मणेषु सर्व इमे तेजस्विनः कतम एषु षडङ्गवित्विदिति । पूर्वस्मिन्व्याख्याने कतम आत्मेत्येतावदेव प्रश्नवाक्यं योऽयं विज्ञानमय इति प्रतिवचनम् । द्वितीये तु व्याख्याने प्राणेष्वित्येवमन्तं प्रश्नवाक्यम् । अथवा सर्वमेव प्रश्नवाक्यं विज्ञानमयो हृद्यन्तर्ज्योतिः पुरुषः कतम इत्येतदन्तम् । योऽयं विज्ञानमय इत्येतस्य शब्दस्य निर्धारितार्थविशेषविषयत्वं कतम

---

१ च. सधीः स्व° । २ ख. घ. ङ. ढ. °ने कतमः प्रा° ।

आत्मेतीतिशब्दस्य प्रश्नवाक्यपरिसमाप्त्यर्थत्वं व्यवहितसंबन्धमन्तरेण युक्तमिति ज्ञात्वा कतम आत्मेत्येवमन्तमेव प्रश्नवाक्यं योऽयमित्यादि परं सर्वमेव प्रतिवचनमिति निश्चीयते ।

प्रकारान्तरेण प्रश्नं व्याकरोति—अथवेति । सप्तम्यर्थं कथयति—सर्व इति । योऽयं त्वयाऽभिप्रेतो विज्ञानमयः स प्राणेषु मध्ये कतमः स्यात्तेऽपि हि विज्ञानमया इव भान्तीति योजना । उक्तमर्थं दृष्टान्तेन बुद्धावारोपयति—यथेति । व्याख्यानयोरवान्तरविभागमाह—पूर्वस्मिन्नित्यादिना । हृदीत्यादि प्रतिवचनमिति शेषः । पक्षान्तरमाह—अथवेति । सर्वस्य प्रश्नत्वे वाक्यं योजयति—विज्ञानेति । त्व तमानः सन्नित्यादि प्रतिवचनमिति शेषः ।

योऽयमित्यात्मनः प्रत्यक्षत्वान्निर्देशः । विज्ञानमयो विज्ञानप्रायो बुद्धिविज्ञानोपाधिसंपर्काविवेकाद्विज्ञानमय इत्युच्यते । बुद्धिविज्ञानसंपृक्त एव हि यस्मादुपलभ्यते राहुरिव चन्द्रादित्यसंपृक्तः । बुद्धिर्हि सर्वार्थकरणं तमसीव प्रदीपः पुरोवस्थितः । मनसा ह्येव पश्यति मनसाऽ शृणोतीति ह्युक्तम् । बुद्धिविज्ञानालोकविविक्तमेव हि सर्वं विषयजातमुपलभ्यते पुरोवस्थितप्रदीपालोकविशिष्टमिव तमसि द्वारमात्राणि त्वन्यानि करणानि बुद्धेः । तस्मात्तेनैव विशेष्यते विज्ञानमय इति ।

द्वितीयतृतीयपक्षयोररुचिं सूचयन्नाद्यं पक्षमङ्गी करोति—योऽयमिति । यस्त्वया पृष्टः सोऽयमित्यात्मनश्चिद्रूपत्वेन प्रत्यक्षत्वादयमिति निर्देश इति पदद्वयस्यार्थः । देहव्यवच्छेदार्थं विशिनष्टि—विज्ञानमय इति । विज्ञानशब्दार्थमाचक्षाणस्तत्प्रायत्वं प्रकटयति—बुद्धीति । बुद्धिरेव विज्ञानं विज्ञायतेऽनेनेति व्युत्पत्तेस्तेनोपाधिना संपर्क एवाविवेकस्तस्मादिति यावत् । तत्संपर्के प्रमाणमाह—बुद्धिविज्ञानेति । तस्माद्विज्ञानमय इति शेषः । ननु चक्षुर्मयः श्रोत्रमय इत्यादि हित्वा विज्ञानमय इत्येवं कस्मादुपदिश्यते तत्राऽऽह—बुद्धिर्हीति । तस्याः साधारणकरणत्वे प्रमाणमाह—मनसा हीति । मनसः सर्वार्थत्वं समर्थयते—बुद्धीति ।

---

१ ग. ढ. °त्मेति चेति° । २ च. °त्मेतीत्ये° । ३ ख. घ. च. छ. ज. झ. ढ. °मयशब्दस्य निर्धारितार्थविशेषविषयत्वं युक्तम् । विज्ञानमयो । ४ क. ख. घ. ढ. च. छ. ज. झ. ढ. °संयुक्त° । ५ घ. ज. °हुवच्चन्द्रा° । ६ क. ख. ड. झ. ढ. °संयुक्तः । ७ ख. °सा ह्येव शृ° । ८ ख. ड. °त्यक्षाद° । ९ ख. घ. °त्येवं क° ।

किमर्थानि तर्हि चक्षुरादीनि करणानीत्याशङ्क्याऽऽह—द्वारमात्राणीति । मुख्ये सति प्राधान्ये फलितमाह तस्मादिति ।

येषां परमात्मविज्ञानविकार इति व्याख्यानं तेषां विज्ञानमयो मनोमय इत्यादौ विज्ञानमयशब्दस्यान्यार्थदर्शनादश्रौतार्थताऽवसीयते संदिग्धश्च पदार्थोऽन्यत्र निश्चितप्रयोगदर्शनान्निर्धारयितुं शक्यो वाक्यशेषात् । निश्चितन्यायबलाद्वा । सधीरिति चोत्तरत्र पाठात् । हृद्यन्तरिति वचनाद्युक्तं विज्ञानप्रायत्वमेव ।

विज्ञानं परं ब्रह्म तत्प्रकृतिको जीवो विज्ञानमय इति भर्तृप्रपञ्चैरुक्तमनुवदति—येषामिति । विज्ञानमयादिग्रन्थे मयटो न विकारार्थतेति तैरेवोच्यते तत्र मनःसमभिव्याहाराद्विज्ञानं बुद्धिर्न चाऽऽत्मा तद्विकारस्तस्मादस्मिन्प्रयोगे मयटो विकारार्थत्वं वदतां स्वोक्तिविरोधः स्यादिति दूषयति—तेषामिति । कथं विज्ञानमयपदार्थनिर्णयार्थं प्रयोगान्तरमनुश्रीयते तत्राऽऽह—संदिग्धश्चेति । यथा पुरोडाशं चतुर्धा कृत्वा बर्हिषदं करोतीति पुरोडाशमात्रचतुर्धाकरणवाक्यमेकार्थसंबन्धिना शास्त्रान्तरीयेणाऽऽग्नेयं चतुर्धा करोतीत्यनेन विशेषविषयता निश्चितार्थेनाऽऽग्नेय एव पुरोडाशे व्यवस्थाप्यते यथा चौक्काः शर्करा उपदधातीत्यत्र केनाकृतेत्यपेक्षायां तेजो वै घृतमिति वाक्यशेषान्निर्णयस्तथेहापीत्यर्थः । आत्मविकारत्वे मोक्षानुपपत्त्या स्वबाधितन्यायाद्वा विज्ञानमयपदार्थानिश्चय इत्याह—निश्चितेति । यदुक्तं निर्णयो वाक्यशेषादिति तदेव व्यनक्ति—सधीरिति चेति ।

प्राणेष्विति व्यतिरेकप्रदर्शनार्था सप्तमी । यथा वृक्षेषु पाषाण इति सामीप्यलक्षणा । प्राणेषु हि व्यतिरेकाव्यतिरेकता संदिह्यत आत्मनः । प्राणेषु प्राणेभ्यो व्यतिरिक्त इत्यर्थः । यो हि येषु भवति स तद्व्यतिरिक्तो भवत्येव । यथा पाषाणेषु वृक्षः ।

आधारार्थता सप्तमी दृष्टा सा कथं व्यतिरेकप्रदर्शनार्थेत्याशङ्क्याऽऽह—यथेति । भवत्यत्रापि सामीप्यलक्षणा सप्तमी तथाऽपि कथं व्यतिरेकप्रदर्शनमित्याशङ्क्याऽऽह—प्राणेषु हीति । फलितं सप्तम्यर्थमभिनयति—प्राणेष्विति । तेषु समीपस्थोऽपि कथं तेभ्यो व्यतिरिच्यते तत्राऽऽह—यो हीति ।

हृदि तत्रैतस्यात्प्राणेषु प्राणजातीयैव बुद्धिः स्यादित्यत आह—हृद्यन्तरिति । हृच्छब्देन पुण्डरीकाकारो मांसपिण्डस्तात्स्थ्याद्बुद्धि-

---

१ ख. घ. ङ. ज. °ति च व° । २ ख. ढ. जीवोऽपि । ३ अ. वाऽक्काः । ४ अ. °त्मनो वि° । ५ क. त्र. ण. °त्याबबा° । ६ छ. झ. °रेके° ।

हृत्तस्यां हृदि बुद्धौ । अन्तरिति बुद्धिवृत्तिव्यंरकप्रदर्शनार्थम् । ज्योतिर्ज्यभासात्मकत्वादात्मोच्यते । तेन स्वभासकेनाऽऽत्मना ज्योतिषाऽऽस्त पल्ययते कर्म कुरुते चेतनावानिव ह्ययं कार्यकरणपिण्डो यथाऽऽदित्यप्रकाशस्थो घटो वा यथा मरकतादिर्मणिः क्षीरादिद्रव्ये प्राक्षिप्तः परीक्षणायाऽऽत्मच्छायमेव तत्क्षीरादिद्रव्यं करोति तादृगेतदात्मज्योतिर्बुद्धेरपि हृदयात्मक्षमत्वाद्बुध्यन्तःस्थमपि हृदयादिकं कार्यकरणसंघातं चैकीकृत्याऽऽत्मज्योतिच्छायं करोति । पारम्पर्येण सूक्ष्मस्थूलतारतम्यात्मर्यान्तरतमत्वात् ।

विशेषणान्तरमादाय व्यावर्त्यं शङ्कामुक्त्वा पुनरुक्तार्थं व्याकरोति—हृदीत्यादिना । विशेषणस्य तात्पर्यमाह—अन्तरितीति । ज्योतिःशब्दार्थमाह—ज्योतिरिति । तस्य प्राधिष्ट्यं स्पष्टयति—तेनेति । आत्मज्योतिषा व्याप्तस्य कार्यकरणसंघातस्य स्वप्नहारक्षमत्वे दृष्टान्तमाह—यथेति । चेतनावानिवेत्युक्तं स्पष्टयति—यथा वेति । हृदये बुद्धिस्तत्रापि सूक्ष्मत्वादात्मज्योतिस्तदन्तःस्थमपि हृदयादिकं संघातं च सर्वमेकीकृत्य स्वच्छायं करोतीति कृत्वा यथोक्तविशेषणमपि बुद्धिविषये योजयति । कथमदमात्मज्योतिः सर्वमात्मच्छायं करोतीत्यत आह—पारम्पर्येणेति । विषयादिषु प्रत्यगात्मान्तेषूत्तरोत्तरं सूक्ष्मतारतम्यं तारतम्यादिविषयेषु स्थूलतारतम्याच्च प्रतीचः सर्वस्मादन्तरतमत्वं तच्च व्याकरोतीत्यर्थः ।

बुद्धेरपि स्वच्छत्वादानन्तर्याच्चाऽऽत्मचैतन्यज्योतिच्छाया भवति । तेन हि सर्वकिलार्थि तत्राऽऽत्माभिमानबुद्धिः प्रथमा । ततोऽप्यानन्तर्यान्मनसि चैतन्यावभासना बुद्धिसंपर्कात् । तत इन्द्रियेषु । मनःसंयोगात् । ततोऽनन्तरं शरीरे । इन्द्रियसंपर्कात् । पारम्पर्येण कृत्स्नं कार्यकरणसंघातमात्मा चैतन्यस्वरूपज्योतिषाऽवभासयति । तेन हि सर्वस्य लोकस्य कार्यकरणसंघाते तद्वृत्तिषु चानियतात्माभिमानबुद्धिर्यथाविवेकं जायते । तथा च भगवतोक्तं गीतासु—

" यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः ।
क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत " ॥

' यदादित्यगतं तेजः " इत्यादि च ।

" नित्योऽनित्यानां चेतनश्चेतनानां " इति च काठके । " तमेव

१ ख. घ. ङ. योक्तमं । २ क. ङ. °दिप्र । ३ क. ग. °तार्थं । ४ क. °तार्थं । ५ घ. ङ. च. °तावानिं ।

भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति " इति च । " येन सूर्यस्तपति तेजसेद्धः " इति च मन्त्रवर्णः । तेनायं हृद्यन्तर्ज्योतिः ।

बुद्धेरात्मच्छायत्वं समर्थयते—बुद्धिस्तावदिति । लौकिकरारीक्षकाणां बुद्धावात्माभिमानभ्रान्तिमुक्तेऽर्थे प्रमाणयति—तेन हीति । बुद्धेः पश्चान्मनस्यपि चिच्छायतेत्यत्र हेतुमाह—बुद्धीति । आत्मनः सर्वावभासकत्वमुक्तमुपसंहरति—एवमिति । आत्मनः सर्वावभासकत्वे किमिति कस्यचित्क्वचिदेवाऽऽत्मधीरित्याशङ्क्याऽऽह—तेन हीति । बुद्ध्यादेरुक्तक्रमेणाऽऽत्मच्छायत्वं तच्छब्दार्थः । आत्मज्योतिषः सर्वावभासकत्वे लोकप्रसिद्धिरेव न प्रमाणं किंतु भगवद्वाक्यमपीत्याह—तथा चेति । नाशिनामयमनाशी चेतनाश्चेतयितारो ब्रह्मादयस्तेषामयमेव चेतनो यथोदकादीनामनग्नीनामग्निर्निमित्तं दाहकत्वं तथाऽऽत्मचैतन्यनिमित्तमेव चेतयितृत्वमन्येषामित्याह—नित्य इति । अनुगमनवदनुमानं स्वगतया भासा स्यादिति शङ्कां प्रत्याह—तस्येति । येनेति । तत्र नावेदविन्मनुते तं बृंहन्तमित्युत्तरत्र संबन्धः । ज्योतिःशब्दव्याख्यानमुपसंहरति—तेनेति ।

पुरुष आकाशवत्सर्वगतत्वात्पूर्ण इति पुरुषः । निरतिशयं चास्य स्वयंज्योतिष्ट्वं सर्वावभासकत्वात्स्वयमन्यानवभास्यत्वाच्च स एष पुरुषः स्वयमेव ज्योतिःस्वभावो यं त्वं पृच्छसि कतम आत्मेति । बाह्यानां ज्योतिषां सर्वकरणानुग्राहकाणां प्रत्यस्तमयेऽन्तःकरणद्वारेण हृद्यन्तर्ज्योतिः पुरुष आत्माऽनुग्राहकः करणानामित्युक्तम् ।

हृद्यन्तःस्थितोऽयमात्मा सर्वावभासकत्वेन ज्योतिर्भवतीति योजना । पदान्तरमादाय व्याचष्टे—पुरुष इति । आदित्यादिज्योतिषः सकाशादात्मज्योतिषि विशेषमाह—निरतिशयं चेति । प्रतिवचनवाक्यार्थमुपसंहरति—स एष इति । स सामानः सन्नित्याधवतारयितुं वृत्तं कीर्तयति—बाह्यानामिति ।

यद्यऽपि बाह्यकरणानुग्राहकाणामादित्यादिज्योतिषां भावस्तदाऽप्यादित्यादिज्योतिषां परार्थत्वात्कार्यकरणसंघातस्याचैतन्ये स्वार्थानुपपत्तेः स्वार्थज्योतिष आत्मनोऽनुग्रहाभावेऽयं कार्यकरणसंघातो न व्यवहाराय कल्पते । आत्मज्योतिरनुग्रहेणैव हि सर्वदा सर्वः संव्यवहारः । " यदेतद्धृदयं मनश्चैतत्संज्ञानम् " इत्यादिश्रुत्यन्तरात् । सामि-

---

१ ख. ढ. °णमाह । °णमाह । त° । २ क. ख. ग. घ. ङ. छ. ज. °भातात्मक° । ३ क. °त्रा तु बा° । झ. यद्यपि । ४ घ. °षां सद्भाव° । ५ ग. ग. ङ. °न्यैन स्वा° । ६ झ. °पाति. स्वा° । ७ झ. °नुग्राहकत्वाभा° । ८ झ. °नुग्राहकेणै° । ९ ग. घ. च. ज. °व स°।

मानो हि सर्वप्राणिसंव्यवहारः । अभिमानहेतुं च मरकतमणिदृष्टान्तेनावोचाम ।

वर्हि बाह्यज्योतिःसद्भावावस्थायामकिंचित्करमात्मज्योतिरित्याशङ्क्याऽऽह—यदाऽपीति । व्यतिरेकमुखेनो (णो) क्तमर्थमन्वयमुखेन कथयति—आत्मज्योतिरिति । आत्मज्योतिषः सर्वानुग्राहकत्वे प्रमाणमाह—यदेतादिति । सर्वमन्तःकरणादिप्रज्ञानेत्रमित्यैतरेयके श्रवणाद्युक्तमात्मज्योतिषः सर्वानुग्राहकत्वमित्यर्थः । किं चाचेतनानां कार्यकरणानां चेतनत्वप्रसिद्ध्यनुपपत्त्या सदा चिदात्मव्याप्तिरेष्टव्येत्याह—साभिमानो हीति । कथमसङ्गस्य प्रतीचः सर्वत्र बुद्ध्यादावहंमान इत्याशङ्क्याऽऽह—अभिमानेति ।

यद्यप्येवमेतत्तथाऽपि जाग्रद्विषये सर्वकरणागोचरत्वादात्मज्योतिषो बुद्ध्यादिवाह्याभ्यन्तरकार्यकरणव्यवहारसंनिपातव्याकुलत्वान्न शक्यते तज्ज्योतिरात्माख्यं मुञ्जेषीकावन्निष्कृष्य दर्शयितुमित्यतः स्वप्न दिदर्शयिषुः प्रक्रमते—स समानः सन्नुभौ लोकावनुसंचरति । यः पुरुषः स्वयमेव ज्योतिरात्मा स समानः सदृशः सन् । केन । प्रकृतत्वात्संनिहितत्वाच्च हृदयेन । हृदीति च हृच्छब्दवाच्या बुद्धिः प्रकृता संनिहिता च । तस्मात्तयैव सामान्यम् ।

वृत्तमनूद्योत्तरवाक्यमवतारयति—यद्यपीति । यथोक्तमपि प्रत्यग्ज्योतिर्जागरिते दर्शयितुमशक्यमिति श्रुतिः स्वप्नं प्रस्तौतीत्यर्थः । अशक्यत्वे हेतुद्वयमाह—सर्वेति । स्वप्ने निष्कृष्टं ज्योतिरिति शेषः । सदृशः सन्ननुसंचरतीति संबन्धः । सादृश्यस्य प्रतियोगिसापेक्षत्वमपेक्ष्य पृच्छति—केनेति । उत्तरम्—प्रकृतत्वादिति । प्राणानामपि तुल्यं तदिति चेत्तत्राऽऽह—संनिहितत्वाच्चेति । हेतुद्वयं साधयति—हृदीत्यादिना । प्रकृतत्वादिफलमाह—तस्मादिति ।

किं पुनः सामान्यमश्वमहिषवद्विवेकतोऽनुपलब्धिः । अवभास्या बुद्धिरवभासकं तदात्मज्योतिरालोकवत् । अवभास्यावभासकयोर्विवेकतोऽनुपलब्धिः प्रसिद्धा । विशुद्धत्वाद्बुद्ध्यालोकोऽवभास्येन सदृशो भवति । यथा रक्तमवभासयन्रक्तसदृशो रक्ताकारो भवति । यथा हरितं नीलं लोहितं चावभासयन्नालोकस्तत्समानो भवति । तथा

---

१ ग. ङ. च. छ. ढ. सर्वः प्रा° । २ क. ण °दा त्विति । ३ घ. ञ ण. मान ग्राह । ४ क. ग. च. ढ. °णव्यापार° । ५ ग. घ. ज. °तेऽन्तर्ज्योति° । ६ घ. छ. ज. °ति हृ° । ७ क. घ. न्तं वाऽव° ।

बुद्धिमवभासयन्बुद्धिद्वारेण कृत्स्नं क्षेत्रमवभासयतीत्युक्तं मरकतमणिनिदर्शनेन तेन सर्वेण समानो बुद्धिसामान्यद्वारेण । सर्वमय इति चात एव वक्ष्यति ।

सामान्यं प्रश्नपूर्वकं विशदयति–किं पुनरित्यादिना । विवेकतोऽनुपलब्धिं व्यक्तीकर्तुं बुद्धिज्योतिषोः स्वरूपमाह–अवभास्येति । अवभासकत्वे दृष्टान्तमाह–आलोकवदिति । तथाऽपि कथं विवेकतेऽनुपलब्धिस्तत्राऽऽह–अवभास्येति । पौसिद्धिमेव प्रकटयति–विशुद्धत्वाद्धीति । उक्तमर्थं दृष्टान्तेन बुद्धावारोपयति–यथेत्यादिना । दृष्टान्तगतमर्थं दार्ष्टान्तिके योजयति–तथेति । पुनरुक्तिं परिहरति–इत्युक्तमिति । सर्वावभासकत्वं कथं बुद्धेरेव सामान्यमित्याशङ्क्याऽऽह–तेनेति । सर्वावभासकत्वं तच्छब्दार्थः । किमर्थं तर्हि बुद्ध्या सामान्यमुक्तमित्याशङ्क्य द्वारत्वेनेत्याह–बुद्धीति । आत्मनः सर्वेण समानत्वे वाक्यशेषमनुकूलयति–सर्वमय इति ।

तेनासौ कुताश्चित्प्राविभज्य मुञ्जेषीकावत्स्वेन ज्योतीरूपेण दर्शयितुं न शक्यत इति सर्वव्यापारं तत्राध्यारोप्य नामरूपगतं ज्योतिरपि च नामरूपयोर्नामरूपे चाऽऽत्मज्योतिषि सर्वो लोको मोमुह्यतेऽयमात्मा नायमात्मैवंधर्मा नैवंधर्मा कर्ताऽकर्ता शुद्धोऽशुद्धो बद्धो मुक्तः स्थितो गत आगतोऽस्ति नास्तीत्यादिविकल्पैः । अतः समानः सन्नुभौ लोकौ प्रतिपन्नप्रतिपत्तव्याविहलोकपरलोकावुपात्तदेहेन्द्रियादिसघातसंगृहीतयोपादानसंतानप्रबन्धशतमंनिपातैरनुक्रमेण संचरति। धीमात्रदृश्यमेवोभयलोकसंचरणहेतुर्न स्वत इति ।

वाक्यशेषसिद्धेऽर्थे लोकभ्रान्तेर्गमकत्वमाह–तेनेति । सर्वसत्वेनेति यावत् । आत्मानात्मनोर्विवेकदर्शनस्याशक्यत्वे परस्पराध्यासस्तद्धर्माध्यासश्च स्यात्ततश्च लोकानां मोहो भवेदित्याह–इति सर्वेति । धर्मिविषयं मोहमभिनयति–अयमिति । धर्मविषयं मोहं दर्शयति–एवंधर्मेति । तदेव स्फुटयति–कर्तेत्यादिना । विकल्पैः सर्वो लोको मोमुह्यत इति संबन्धः । स समानः सन्नित्यस्यार्थमुक्त्वाऽवशिष्टं भागं व्याकरोति–अत इत्यादिना ।

तत्र नामरूपोपाधिसादृश्यं भ्रान्तिनिमित्तं यत्तदेव हेतुर्न स्वत इत्येतदुच्यते । यस्मात्स समानः सन्नुभौ लोकावनुक्रमेण संचरति तदेतत्प्रत्यक्षमित्येतद्दर्शयति–यतो ध्यायतीव ध्यानव्यापारं करोतीव चिन्तयतीव ध्यानव्यापारवतीं बुद्धिं स तत्स्थेन चित्स्वभावज्योती-

१ घ. ढ. ण. °सिद्धमे° । २ ख. ञ. स्पष्टयति । ३ घ. ज झ. °त्र तावन्नाम° । ४ ब. ञ. °ब च हे° । ५ ग घ. ङ च. छ. ज. झ. ढ. °त्समा° ।

रूपेणावभासयंस्तत्सदृशस्तत्समानः सन्ध्यायतीवाऽऽलोकवदेव । अतो भवति चिन्तयतीति भ्रान्तिर्लौकिकस्य । न तु परमार्थतो ध्यायति । तथा लेलायतीवात्यर्थं चलतीव । तथैव करणेषु बुद्ध्यादिषु वायुषु च चलत्सु तदवभासकत्वात्तत्सदृशं तादिति लेलायतीव । न तु परमार्थतश्चलनधर्मकं तदात्मज्योतिः ।

आत्मनः स्वाभाविकमुभयलोकसंचरणमित्याशङ्क्यानन्तरवाक्यमादत्ते—तत्रेति । आत्मा सप्तम्यर्थः । यतःशब्दो वक्ष्यमाणानःशब्देन संबध्यते । अक्षरोत्थमर्थमुक्त्वा वाक्यार्थमाह—ध्यानेति । ध्यानवतीं बुद्धिं व्याप्तश्चिदात्मा ध्यायतीवेत्यत्र दृष्टान्तमाह—आलोकवदिति । यथा खल्वालोको नीलं पीतं वा विषयं व्यश्नुवानस्तदाकारो दृश्यते तथाऽयमपि ध्यानवतीं बुद्धिं भासयन्ध्यानवानिव भवतीत्यर्थः । यथोक्तबुद्ध्यवभासकत्वमुक्तं हेतुमनूद्य फलितमाह—अत इति । इवशब्दार्थं कथयति—न त्विति । बुद्धिधर्माणामात्मन्यौपाधिकत्वेन मिथ्यात्वमुक्त्वा प्राणधर्माणामपि तत्र तथात्वं कथयति तथेति । आत्मनि चलनस्यौपाधिकत्वं साधयति—तेष्विति । इवशब्दसामर्थ्यासिद्धमर्थमाह—न त्विति ।

कथं पुनरेतदवगम्यते तत्समानत्वभ्रान्तेरेवोभयलोकसंचरणादिहेतुर्न स्वत इत्यस्यार्थस्य प्रदर्शनाय हेतुरुपदिश्यते—स आत्मा हि यस्मात्स्वप्नो भूत्वा । स यया धिया समानः सा धीर्यद्यद्भवति तत्तदात्मापि भवतीव तस्माद्यदाऽसौ स्वप्नो भवति स्वापवृत्तिं प्रतिपद्यते धीस्तदा सोऽपि स्वप्नवृत्तिं प्रतिपद्यते यदा धीर्जिजागरिषति तदाऽसावप्येत आह स्वप्नो भूत्वा स्वप्नवृत्तिमवभासयन्धियः स्वापवृत्त्याकारो भूत्वेमं लोकं जागरितव्यवहारलक्षणं कार्यकरणसंघातात्मकं लौकिकशास्त्रीयव्यवहारास्पदमतिक्रामत्यतीत्य क्रामति विविक्तेन स्वेनाऽऽत्मज्योतिषा स्वप्नात्मिकां धीवृत्तिमवभासयन्नवतिष्ठते यस्मात्तस्मात्स्वयंज्योतिः स्वभाव एवासौ विशुद्धः सँ कर्तृक्रियाकारकफलशून्यः । परमार्थतो धीमात्रदृश्यमेव तूभयलोकसंचारादिसंव्यवहारभ्रान्तिहेतुः । मृत्यो रूपाणि मृत्युः कर्माविद्यादिर्न तस्यान्यद्रूपं

१ ड. °तीवति । २ ख. घ ट. झ चल° । ३ घ ञ ण. प्रत्यगात्मा । ४ घ. ञ. ण. °क्षरार्थं° । ५ क. तावत उच्यत । त° । ग °तीवात उच्यते । यदा° । झ. °तीव तदुच्यते । त° । ६ क. ञ मन्त्र° । ७ ग. °त्य. कामक° ।

स्वतः कार्यकरणान्येवास्य रूपाणि । अतस्तानि मृत्यो रूपाण्यतिक्रामति क्रियाफलाश्रयाणि ।

स हीत्याद्यनन्तरवाक्यमाकाङ्क्षाद्वारोत्थापयति–कथमित्यादिना । तच्छब्दो बुद्धिविषयः । संचरणादीत्यादिशब्दो ध्यानादिव्यापारसंग्रहार्थः । स्वप्नो भूत्वा लोकमतिक्रामतीति संबन्धः । कथमात्मा स्वप्नो भवति तत्राऽऽह–स्वं ययेति । उक्तेऽर्थे वाक्यमवतार्य व्याकरोति–अत आहेति । उक्तं हेतुमनूद्य फलितमाह–यस्मादित्यादिना । कार्यकरणातीत्वात्प्रत्यगात्मनो न स्वतः संचारित्वमित्याह–मृत्योरिति । रूपाण्यतिक्रामतीति पूर्वेण संबन्धः । क्रियास्तत्फलानि चाऽऽश्रयो येषां तानि वा क्रियाणां तत्फलानां चाऽऽश्रयस्तानीति यावत् ।

ननु नास्त्येव धिया समानमन्यद्धियोऽवभासकमात्मज्योतिः । धीव्यतिरेकेण प्रत्यक्षेण चाऽनुमानेन चाऽनुपलम्भात् । यथाऽन्या तत्काल एव द्वितीया धीः । यत्त्ववभास्यावभासकयोरन्यत्वेऽपि विवेकानुपलम्भात्साहश्यमिति घटाद्यालोकयोः । तत्र भवत्वन्यत्वेनाऽऽलोकस्योपलम्भाद्घटादेः संश्लिष्टयोः साहश्यं भिन्नयोरेव न च तथेह घटादेरिव धियोऽवभासकं ज्योतिरन्तरं प्रत्यक्षेण चाऽनुमानेन वोपलभामहे । धीरेवं हि चित्स्वरूपावभासकत्वेन स्वाकारा विषयाकारा च । तस्मान्नानुमानतो नापि प्रत्यक्षतो धियोऽवभासकं ज्योतिः शक्यते प्रतिपादयितुं व्यतिरिक्तम् ।

बुद्ध्यवभासकं ज्योतिरात्मेत्युक्तं श्रुत्वा शाक्यः शङ्कते–नन्विति । प्रमाणादतिरिक्तात्मोपलब्धिरित्याशङ्क्य प्रत्यक्षमनुमानं चेति प्रमाणद्वैविध्यनियममभिप्रेत्य ताभ्यामतिरिक्तात्मानुपलम्भान्नासावस्तीत्याह–धीव्यतिरेकेणेति । तत्र दृष्टान्तमाह–यथेति । घटादिरालोकश्चेत्युभयोर्मिथः संसृष्टयोर्विवेकेनानुपलम्भवदवभास्यावभासकयोर्बुद्ध्यात्मनोर्भेदेऽपि पृथगनुपलम्भादैक्यमवभासते वस्तुतस्तु तयोरन्यत्वमेवेति शङ्कामनुवदति–यद्यपीति । वैषम्यपदर्शनेनोत्तरमाह–तत्रेति । दृष्टान्तः सप्तम्यर्थः । घटादेरन्यत्वेनेति संबन्धः । ज्योतिरन्तरं नास्ति चेत्कुतो ग्राह्यग्राहकसंवित्तिरित्याशङ्क्याऽऽह–धीरेवेति । बाह्यार्थवादिनोः सौत्रान्तिकवैभाषिकयोरभिप्रायमुपसंहरति–तस्मान्नेति ।

यदपि दृष्टान्तरूपमभिहितमवभास्यावभासकयोर्भिन्नयोरेव घटाद्या-

---

१ घ. असावपीति । २ घ. उक्ते । ३ घ. अ. ण. °त्वाच्च प्रत्य° । ४ ख. घ. अ. ढ. ण. संसारि° । ५ क. ख. °मित्यत आह । ६ ख. ङ. च. छ. ढ. °ण चानु° । ७ ख. ङ. च. छ. ढ. °न चानु° । ८ क., ख. ग. ङ. °ण चानु° । ९ ख. ङ. °न चो प° । १० ङ. °व चि° ।

लोकयोः संयुक्तयोः सादृश्यमिति । तत्राभ्युपगममात्रमस्माभिरुक्तं न तत्र घटाद्यवभास्यावभासकौ भिन्नौ । परमार्थतस्तु घटादिरेवावभासात्मकः सालोकः । अन्योऽन्यो हि घटादिरुत्पद्यते । विज्ञानमात्रमेवं सालोकघटादिविषयाकारमवभासते । यदैवं तदा न बाह्यो दृष्टान्तोऽस्ति विज्ञानैकलक्षणमात्रत्वात्सर्वस्य । एवं तस्यैव विज्ञानस्य ग्राह्यग्राहकाकारतामलं परिकल्प्य तस्यैव पुनर्विशुद्धिं परिकल्पयन्ति । तदग्राह्यग्राहकविनिर्मुक्तं विज्ञानं स्वच्छीभूतं क्षणिकं व्यवतिष्ठत इति केचित् । तस्यापि शान्तिं केचिदिच्छन्ति । तदपि विज्ञानं संवृतं ग्राह्यग्राहकांशविनिर्मुक्तं शून्यमेव घटादिबाह्यवस्तुवदित्यपरे माध्यमिका आचक्षते ।

इदानीं विज्ञानवादी बाह्यार्थवादिभ्यामभ्युपगतं दृष्टान्तमनुवदति—यदपीति । बाह्यार्थवादप्रक्रिया न सुगताभिप्रेतेति दूषयति—तत्रेति । उभयत्र दृष्टान्तस्वरूपं सप्तम्यर्थः । ननु घटादेरवभास्यादालोको भिन्नो लक्ष्यते नेत्याह—परमार्थतस्त्विति । तस्य स्थायित्वं व्यावर्तयति—अन्योऽन्य इति । प्रतीतं विषयप्राधान्यं व्यावर्तयन्नुक्तमेव व्यनक्ति—विज्ञानमात्रमिति । विज्ञानवादे यथोक्तदृष्टान्तराहित्यं फलतीत्याह—यदेति । शिष्यबुद्ध्यनुसारेण त्रिविधं बुद्धाभिप्रायमुपसंहरति—एवमित्यादिना । परिकल्प्येत्यन्तेन बाह्यार्थवादमुपसंहृत्य तस्यैवेत्यादिना विज्ञानवादमुपसंजहार । तत्र विज्ञानवादोपसंहारं विवृणोति—तद्ह्येति । शून्यवादिमतमाह—तस्यापीति । तदेव स्फुटयति—तदपीति ।

सर्वा एताः कल्पना बुद्धिविज्ञानावभासकस्य व्यतिरिक्तस्याऽऽत्मज्योतिषोऽपह्नवादस्य श्रेयोमार्गस्य प्रतिपक्षभूता वैदिकस्य । तत्र येषां बाह्योऽर्थोऽस्ति तान्प्रत्युच्यते तावत् । न स्वात्मावभासकत्वं घटादेः । तमस्यवस्थितो घटादिस्तावन्न कदाचिदपि स्वात्मनाऽवभास्यते । प्रदीपाद्यालोकसंयोगेन तु नियमेनैवावभास्यमानो दृष्टेः सालोका घट इति । संश्लिष्टयोरपि घटालोकयोरन्यत्वमेव पुनः पुनः संश्लेषे विश्लेषे च विशेषदर्शनाद्रज्जुघटयोरिव । अन्यत्वे च व्यतिरिक्तावभासकत्वं न स्वात्मनैव स्वमात्मानमवभासयति ।

---

१ क. छ. झ. °व वा सा° । २ झ. °ज्ञाने स्वल° । ३ ग. घ. ङ. च. छ. ढ. °नस्वल° । ४ झ. तत्र ग्राह्य° । ५ क. ख. ग. ङ. छ. ज. झ. °च्छन्त्यन्ये । त° । ६ क. °ज्ञानमनावृत्त ग्रा° । ज. °ज्ञानमनावृत्त । ७ ग. घ. छ. साधृतं । झ. शान्तं । च. संवृत्तं । ८ घ. ण. °ष्टान्तार्थम° । ९ क. ढ. °संहरंस्तत्र । १० ग. घ. ङ. च. छ. झ. ढ. °ते । न तावत्स्वात्मा° । ११ क. ङ. च. ञ. ढ. °त्मानव° । १२ क. घ. ङ. च. छ. ज. ढ. °कत्वाद्घटा° । १३ क. छ. झ. °ष्टः । स° ।

पक्षत्रयेऽपि दोषं संभावयति—सर्वा इति । कथमूषां कल्पनानां दूषणमित्याशङ्क्य प्रथमं बाह्यार्थवादिनं प्रत्याह—तत्रेति । निर्धारणे सप्तमी । यत्तु धीरेवावभासकत्वेन स्वीकरोति तत्राऽऽह—नेति । यदवभास्यं तत्स्वातिरिक्तावभास्यमवभास्यत्वाद्यथा घटादि । अवभास्या चेयं बुद्धिरित्यनुमानादबुद्धिव्यतिरिक्तः साक्षी सिध्यतीत्यर्थः । दृष्टान्तं साधयति—तमसीति । तस्यावभासकापेक्षां दर्शयितुं विशेषणम्—आलोके घट इति । संदंशावगमान्नास्ति घटस्य व्यतिरिक्तावभास्यत्वानित्याशङ्क्याऽऽह—संश्लिष्टयोरपीति । भवत्वन्यत्वं किं तावतेत्याशङ्क्याऽऽह—अन्यत्व चेति । व्यतिरिक्तावभासकत्वं तादृगवभासकसाहित्यमिति यावत् । अवभासयति घटादिरिति शेषः ।

ननु प्रदीपः स्वात्मानमेवावभासयन्दृष्ट इति । न हि घटादिवत्प्रदीपदर्शनाय प्रकाशान्तरमुपादीयते लौकिकैः । तस्मात्प्रदीपः स्वात्मानं प्रकाशयति । न । अवभास्यत्वाविशेषात । यद्यपि प्रदीपोऽन्यस्यावभासकः स्वयमवभासात्मकत्वात्तथाऽपि व्यतिरिक्तचैतन्यावभास्यत्वं न व्यभिचरति घटादिवदेव । यदा चैवं तदा व्यतिरिक्तावभास्यत्वं तावदवश्यंभावि । ननु यथा घटश्चैतन्यावभास्यत्वऽपि व्यतिरिक्तमालोकान्तरमपेक्षते नत्वयं प्रदीपोऽन्यमालोकान्तरमपेक्षते । तस्मात्प्रदीपोऽन्यावभास्योऽपि सन्नात्मानं घटं चावभासयति ।

दृष्टान्तस्य साध्यविकलत्वे पर्यवसिते व्यभिचारमाशङ्क्य—नन्विति । तदेवव्यतिरेकमुखेन (णा)ऽऽह—नहीति । अनैकान्तिकत्वं निगमयति—तस्मादिति । प्रदीपस्य पक्षतुल्यत्वान्न व्यभिचारोऽस्तीति परिहरति—नावभास्यत्वति । अथान्यावभासकत्वात्तस्य नान्यावभास्यत्वमिति चेत्तत्राऽऽह—यद्यपीति । अवभास्यत्वहेतोरव्यभिचारे फलितमाह—यदा चेति । व्यतिरिक्तावभास्यत्वं बुद्धेरिति शेषः । अवभास्यत्वे सत्यपि प्रदीपे स्वातिरिक्तेनैवावभास्यत्वमिति नियमासिद्धेर्व्यभिचारतादवस्थ्यमिति शङ्कते—नन्विति ।

न । स्वतः परतो वा विशेषाभावात । यथा चैतन्यावभास्यत्वं घटस्य तथा प्रदीपस्यापि चैतन्यावभास्यत्वमविशिष्टम् । यत्तूच्यते प्रदीप आत्मानं घटं चावभासयतीति तदसत । कस्मात । यदाऽऽत्मानं नावभासयति तदा कीदृशः स्यात । न हि तदा प्रदीपस्य स्वतो वा परतो वा विशेषः कश्चिदुपलभ्यते । स ह्यवभास्यो भवति यस्या-

१ ग. ढ. ण. भास्य यथा । २ क. ऽवबुध्यति । ३ झ. ऽभ्यमानत्वा । ४ झ. घटादेश्चै । ५ क. छ. स नाम ह्यं । ब. ङ. च. ञ. ट. स हि नाम ह्यं ।

वभासकसंनिधावसंनिधौ च विशेष उपलभ्यते । नहि प्रदीपस्य स्वात्मसंनिधिरसंनिधिर्वा शक्यः कल्पयितुम् । असति च कादाचित्के विशेष आत्मानं प्रदीपः प्रकाशयतीति मृषैवोच्यते ।

यदि प्रदीपस्य स्वावभासनात्पूर्वमसन्विशेषः समनन्तरकाले स्यात्तदा स्वात्मानं भासयतीति वक्तुं युक्तं न च सोऽस्तीति दूषयति—नेत्यादिना । तदेव विवृणोति—यथेति । अवभास्यत्वाविशेषादित्यर्थः । प्रदीपे परोक्तं विशेषमनुभाष्य दूषयति—यत्त्वित्यादिना । यदा दीपो न स्वात्मानं भासयति तदाऽनवभासमानः स्यादित्याशङ्क्याऽऽह—नहीति । विशेषाभावेऽपि दीपस्य स्वेनैवावभास्यत्वं किं न स्यादिति चेत्तत्राऽऽह—सं हीति । दीपस्य विशेषान्तराभावेऽपि स्वात्मसंनिध्यसंनिधी विशेषावित्याशङ्क्याऽऽह—नहीति । दीपस्य स्वेनान्येन वा स्वस्मिन्विशेषाभावे फलितमाह—असतीति ।

चैतन्यग्राह्यत्वं तु घटादिभिर्न विशिष्टं प्रदीपस्य । तस्माद्विज्ञानस्याऽऽत्मग्राह्यग्राहकत्वे न प्रदीपो दृष्टान्तः । चैतन्यग्राह्यत्वं च विज्ञानस्य बाह्यविषयैरविशिष्टम् । चैतन्यग्राह्यत्वे च विज्ञानस्य किं ग्राह्यविज्ञानग्राह्यतैव किंवा ग्राहकविज्ञानग्राह्यतेति तत्र संदिह्यमाने वस्तुनि योऽन्यत्र दृष्टो न्यायः स कल्पयितुं युक्तो न तु दृष्टविपरीतः । तथा च सति यथा व्यतिरिक्तेनैव ग्राहकेण बाह्यानां प्रदीपानां ग्राह्यत्वं दृष्टं तथा विज्ञानस्यापि चैतन्यग्राह्यत्वात्प्रकाशकत्वे सत्यपि प्रदीपवद्व्यतिरिक्तचैतन्यग्राह्यत्वं युक्तं कल्पयितुं न त्वनन्यग्राह्यत्वम् । यश्चान्यो विज्ञानस्य ग्रहीता स आत्मा ज्योतिरन्तरं विज्ञानात् ।

व्यभिचारनिरासपूर्वकं भास्यत्वानुमानमुपपाद्यानुमानान्तरमाह—चैतन्येति । यद्व्यञ्जकं तत्स्वविजातीयव्यङ्ग्यं यथा सूर्यादि व्यञ्जकं च विज्ञानं तस्माद्विज्ञानव्यतिरिक्तश्चिदात्मा सिध्यतीत्यर्थः । प्रदीपस्य न स्वावभास्यत्वं किंतु विजातीयचैतन्यावभास्यत्वमिति स्थिते फलितमाह—तस्मादिति । यद्ग्राह्यं तद्ग्राहकान्तरग्राह्यं यथा दीपो ग्राह्यं चेदं विज्ञानमित्यनुमानान्तरमाह—चैतन्येति । तथाऽपि कथं त्वदिष्टग्राहकसिद्धिरित्याशङ्क्य विमृशति—चैतन्यग्राह्यत्वे चेति । कथं तर्हि निर्णयस्तत्राऽऽह—तत्र संदिह्यमान इति । अस्तु लोकानुसारी निश्चयो

१ च. छ. ज. ढ. °लभ्येत । न । २ घ. ज. ढ. °त्मनः सं° । ३ क. स नाम ही° । ४ ख. च. झ. ढ. °ति सं° । ५ क. ख. घ. ङ. च. छ. ज. ढ. °नि यथाऽन्य° । ६ क. ग. च. छ. °यः । ७ क. ग. ङ. झ. °पादीना । ८ क. ख. घ. ढ. ण. °ति सं° ।

लोकस्तु कथमित्याशङ्क्याऽऽह—तथा चेति । तथाऽपि कुतो विवक्षितात्मज्योतिस्तत्राऽऽह—यश्चेति ।

तदाऽनवस्थेति चेत् । न ग्राह्यत्वमात्रं हि तदग्राहकस्य वस्त्वन्तरत्वे लिङ्गमुक्तं न्यायतः । न त्वेकान्ततो ग्राहकत्वे तद्ग्राहकान्तरास्तित्वे वा कदाचिदपि लिङ्गं संभवति । तस्मान्न तदनवस्थाप्रसङ्गः ।

विज्ञानस्य ग्राहकान्तरग्राह्यत्वे तस्यापि ग्राहकान्तरापेक्षायामनवस्थाप्रसक्तिरिति शङ्कते—तदाऽनवस्थेति चेदिति । कूटस्थबोधस्य विज्ञानसाक्षिणोऽविषयत्वान्नानवस्थेति परिहरति—नेति । यद्ग्राह्यं तत्स्वातिरिक्तग्राह्यं यथा घटादीति ग्राह्यत्वमात्रं बुद्धिग्राहकस्य ततो वस्त्वन्तरत्वे प्रदीपस्य स्वानवभास्यत्वन्यायेन लिङ्गमुक्तं न च बुद्धिसाक्षिणो ग्राह्यत्वमस्ति कूटस्थदृष्टिस्वाभाव्यात्तत्कुतोऽनवस्थेत्युपपादयति—ग्राह्यत्वमात्रं हीति । साक्षी स्वातिरिक्तग्राह्यो ग्राहकत्वाद्बुद्धिवदित्याशङ्क्याऽऽह—न त्विति । ग्राहकत्वं हि ग्रहणकर्तृत्वं वा तत्साक्षित्वं वा । आद्ये बुद्धिसाक्षिणो मुख्यवृत्त्या ग्रहणकर्तृत्वे न किंचिल्लिङ्गं संभवति । द्वितीये तस्य ग्राहकान्तरास्तित्वे न कदाचिदपि प्रमाणमस्ति तत्कुतोऽनवस्थेत्यर्थः ।

विज्ञानस्य व्यतिरिक्तग्राह्यत्वे करणान्तरापेक्षायामनवस्थेति चेत् । न । नियमाभावात् । न हि सर्वत्रायं नियमो भवति । यत्र वस्त्वन्तरेण गृह्यते वस्त्वन्तरं तत्र ग्राह्यग्राहकव्यतिरिक्तं करणान्तरं स्यादिति नैकान्तेन नियन्तुं शक्यते । वैचित्र्यदर्शनात् । कथम् । घटस्तावत्स्वात्मव्यतिरिक्तेनाऽऽत्मना गृह्यते तत्र प्रदीपादिरालोको ग्राह्यग्राहकव्यतिरिक्तं करणम् । न हि प्रदीपाद्यालोको घटाद्यंशश्चक्षुरंशो वा । घटवच्चक्षुर्ग्राह्यत्वेऽपि प्रदीपस्य चक्षुः प्रदीपव्यतिरेकेण न बाह्यमालोकस्थानीयं किंचित्करणान्तरमपेक्षते । तस्मान्नैव नियन्तुं शक्यते । यत्र यत्र व्यतिरिक्तग्राह्यत्वं तत्र तत्र करणान्तरं स्यादेवेति । तस्माद्विज्ञानस्य व्यतिरिक्तग्राहकग्राह्यत्वं न करणद्वाराऽनवस्था नापि ग्राहकत्वद्वारा कदाचिदप्युपपादयितुं शक्यते । तस्मात्सिद्धं विज्ञानव्यतिरिक्तमात्मज्योतिरन्तरमिति ।

ग्राहकानवस्थां परिहृत्य करणानवस्थामाशङ्कते—विज्ञानस्येति । तस्य हि ग्राह्यत्वे चक्षुरादिस्थानीयेन करणेन भवितव्यं तस्यापि ग्राह्यत्वेऽन्यत्करणमित्यनवस्थां दूषयति—न । नियमाभावादिति । नियमाभावं साधयति—नहीत्यादिना

---

१ क. ख. न्तरा° । २ घ. ढ. °त्मनाऽति° । ३ ग. च. झ. °ना ग्राहकेण गृ° । ४ घ. ढ. °रा तत्रान ।

वैचित्र्यदर्शनमाकाङ्क्षापूर्वकं स्फुटयति—कथमित्यादिना । उभयव्यतिरेकं विशदयति—नहीति । तथाऽपि कथं वैचित्र्यं तत्राऽऽह—घटवादिति । नियमाभावमुपसंहरति—तस्मादिति । अनवस्थाद्वयनिराकरणं निगमयति—तस्माद्विज्ञानस्येति । बाह्यार्थवादिमतनिराकरणमुपसंहरति—तस्मात्सिद्धमिति ।

ननु नास्त्येव बाह्योऽर्थो घटादिः प्रदीपो वा विज्ञानव्यतिरिक्तः । यद्धि यद्व्यतिरेकेण नोपलभ्यते तत्तावन्मात्रं वस्तु दृष्टम् । यथा स्वप्नविज्ञानग्राह्यं घटपटादिवस्तु स्वप्नविज्ञानव्यतिरेकेणानुपलम्भात्स्वप्नघटप्रदीपादेः स्वप्नविज्ञानमात्रताऽवगम्यते, तथा जागरितेऽपि घटप्रदीपादेर्जाग्रद्विज्ञानव्यतिरेकेणानुपलम्भाज्जाग्रद्विज्ञानमात्रतैव युक्ता भवितुम् । तस्मान्नास्ति बाह्योऽर्थो घटप्रदीपादिर्विज्ञानमात्रमेव तु सर्वम् । तत्र यदुक्तं विज्ञानस्य व्यतिरिक्तावभास्यत्वाद्विज्ञानव्यतिरिक्तमस्ति ज्योतिरन्तर घटादेरिवेति तन्मिथ्या । सर्वस्य विज्ञानमात्रत्वे दृष्टान्ताभावात् ।

बाह्यार्थवादिनि ध्वस्ते विज्ञानवादी चोदयति—नन्विति । बाह्यार्थो विज्ञानातिरिक्तो नास्तीत्यत्र प्रमाणमाह—यद्धीति । नोपलभ्यते च जाग्रद्वस्तु जाग्रद्विज्ञानव्यतिरेकेणेति शेषः । दृष्टान्तं समर्थयते—स्वप्नेति । दार्ष्टान्तिकं विवृणोति—तथेति । उक्तमनुमानमुपसंहरति—तस्मादिति । सर्वं विज्ञानमात्रमिति स्थिते फलितमाह—तत्रेति । किमिति तस्य मिथ्यात्वं तत्राऽऽह—सर्वस्येति ।

न । यावत्तावदभ्युपगमात् । न तु बाह्योऽर्थो भवतैकान्तेनैव नाभ्युपगम्यते । ननु मया नाभ्युपगम्यत एव । न । विज्ञानं घटः प्रदीप इति च शब्दार्थपृथक्त्वाद्यावत्तावदपि बाह्यमर्थान्तरमवश्यमभ्युपगन्तव्यम् । विज्ञानादर्थान्तरं वस्तु न चेदभ्युपगम्यते विज्ञानं घटः पट इत्येवमादीनां शब्दानामेकार्थत्वे पर्यायशब्दत्वं प्राप्नोति । तथा साधनानां फलस्य चैकत्वे साध्यसाधनभेदोपदेशशास्त्रानर्थक्यप्रसङ्गः । तत्कर्तुरज्ञानप्रसङ्गो वा ।

बाह्यार्थापलापवादिनं दूषयति—नेत्यादिना । हेतुं विशदयति—नन्विति । विज्ञानमात्रवादित्वादेकान्तेन बाह्यार्थानभ्युपगमविरिति शङ्कते—नन्विति । बाह्यार्थं हठादङ्गीकारयति—नेत्यादिना । अन्वयमुखेनोक्तमर्थं व्यतिरेकमुखेन (च) विशदयति—विज्ञानमादीति । ज्ञानज्ञेययोरैक्ये दोषान्तरमाह—तथेति । अनर्थकं शास्त्रमुपदिशतो बुद्धस्य सर्वज्ञत्वं न स्यादित्याह—तत्कर्तुरिति । वाशब्दश्चार्थः ।

१ क. घ. ङ. °टादिरि°।

किंच।न्यत्। विज्ञानव्यतिरेकेण वादिप्रतिवादिवादद्वोषाभ्युपगमात्। न ह्यात्मविज्ञानमात्रमेव वादिप्रतिवादिवादस्तद्दोषो वाऽभ्युपगम्यते निराकर्तव्यत्वात्प्रतिवाद्यादीनाम्। न ह्यात्मीयं विज्ञानं निराकर्तव्यमभ्युपगम्यते स्वयं वाऽऽत्मा कस्यचित्। तथा च सति सर्वसंव्यवहारलोपप्रसङ्गः। न च प्रतिवाद्यादयः स्वात्मनैव गृह्यन्त इत्यभ्युपगमः। व्यतिरिक्तग्राह्या हि तेऽभ्युपगम्यन्ते। तस्माच्चद्वत्सर्वमेव व्यतिरिक्तमग्राह्यं वस्तु जाग्रद्विषयत्वाज्जाग्रद्वस्तु प्रतिवाद्यादिवादिति सुलभो दृष्टान्तः। संतत्यन्तरवद्विज्ञानान्तरवच्चेति। तस्माद्विज्ञानवादिनाऽपि न शक्यं विज्ञानव्यतिरिक्तं ज्योतिरन्तरं निराकर्तुम्।

इतश्च सर्वस्य नास्तित्वं विज्ञानमात्रत्वमित्याह--किंचान्यदिति। न केवलं पूर्वोक्तोपपत्तिवशादेव बाह्यार्थोऽभ्युपेयः किंतु तत्रैवान्यदपि कारणमुच्यत इति यावत्। तदेव स्फुटयति--विज्ञानेति। यद्ग्राह्यं तत्स्वव्यतिरिक्तग्राह्यं यथा प्रतिवाद्यादि जाग्रद्वस्तु चेदं ग्राह्यमित्यनुमानान्न बाह्यार्थापलापसिद्धिरित्यर्थः। दृष्टान्ते विपतिपत्तिं प्रत्याह--नहीति। निराकर्तव्यत्वेऽपि तेषां ज्ञानमात्रत्वं किं न स्यादित्याशङ्क्याऽऽत्मीयज्ञानत्वमात्मज्ञानत्वं वा तेषामिति विकल्प्य क्रमेण दूषयति--नहीत्यादीना। स्वकीयनिषेधे स्वनिषेधे[3] चानिष्टापत्तिमाचष्टे--तथा चेति[4]। त्वदङ्गीकारालोचनायामपि प्रतिवाद्यादीनां विज्ञानातिरेकः सेत्स्यतीत्याह--न चेति। अन्यथा विवादाभावापातादिति भावः। कथं तर्हि तेषामङ्गीकारस्तत्राऽऽह--व्यतिरिक्तेति। सिद्धे दृष्टान्ते फलितमनुमानं निगमयति--तस्मादिति। किंच चैत्रसंतानेन मैत्रसंतानो व्यवहारादनुमीयते सर्वज्ञज्ञानेन चासर्वज्ञज्ञानानि ज्ञायन्ते तत्र भेदस्य तेऽपि सिद्धेस्तैर्दृष्टान्तान्नीलादेस्तद्धियश्च भेदः शक्योऽनुमातुमित्याह-संतत्यन्तरवदिति। इति न बाह्यार्थापलापासिद्धिरिति शेषः। तदपलापासंभवे फलितमाह--तस्मादिति।

स्वप्ने विज्ञानव्यतिरेकाभावादयुक्तमिति चेत्। न। अभावादपि भावस्य वस्त्वन्तरत्वोपपत्तेः। भवतैव तावत्स्वप्ने घटादिविज्ञानस्य भावभूतत्वमभ्युपगतम्। तदभ्युपगम्य तद्व्यतिरेकेण घटाद्यभाव उच्यते। स विज्ञानविषयो घटादिर्यद्यभावो यदि वा भावः स्यादुभयथाऽपि घटादिविज्ञानस्य भावभूतत्वमभ्युपगतमेव। न तु तन्निवर्तयितुं शक्यते तन्निवर्तकन्यायाभावात्। एतेन सर्वस्य शून्यता प्रत्युक्ता। प्रत्यगात्मग्राह्यता चाऽऽत्मनोऽहमिति मीमांसकपक्षः प्रत्युक्तः।

---

१ ख. ग. घ. ङ. छ. ज. झ. चाऽऽत्मा। २ ञ ढ. ण. बाह्याऽर्थो°। ३ घ. ञ. °धे वाऽनि°। ४ ख. °ति। तद्°। ५ढ. °स्य सि°। ६ण. °स्तन्न दृष्टा°। ७ ढ. °स्तद्विषयभे°।

विज्ञानादर्थभेदोक्त्या प्रत्यगात्मा विज्ञानादिरिक्त एवः । तंपरि विषयं न ज्ञातमिष्टं ग्राह्यत्वात्स्वमग्राह्यवदित्युक्तमनुवदति—स्यादिति । अयुक्तं विज्ञानादिरिक्तत्वमर्थस्येति शेषः । दृष्टान्तस्य साध्यविकलतामाशङ्क्य परिहरति—नाभावादपीति । संग्रहवाक्यं विवृणोति—भवतेवेति । वाक्यार्थवादिभ्यो विशेषमाह—तदभ्युपगम्येति । तथाऽपि कथं दृष्टान्तस्य साध्यविकलत्वेत्याशङ्क्याऽऽह—स इति । घटादिविज्ञानस्य भावभूतस्याभ्युपगतस्य घटादेर्भावादभावाद्वा विषयादर्थान्तरत्वाद्यस्य कस्यचिद्विज्ञानार्थस्योपगमाद्दृष्टान्तस्य साध्यविकलता दुष्परिहरेत्यर्थः । साध्यमिकमतमतिदेशेन निराकरोति—एतेनेति । ज्ञानज्ञेययोर्निराकर्तुमशक्यत्ववचनेनेति यावत् । आत्मनो ग्राह्यस्याहमिति प्रत्यगात्मनैव ग्राह्यतेति मीमांसकमतमपि प्रत्युक्तमेकस्यैव ग्राह्यग्राहकतया निरस्तत्वादित्याह—प्रत्यगात्मेति ।

यच्चोक्तं सालोकोऽन्यश्चान्यश्च घटो जायत इति । तदसत् । क्षणान्तरेऽपि स एवायं घट इति प्रत्यभिज्ञानात् । सादृश्यात्प्रत्यभिज्ञानं छत्रोत्थितकेशनखादिष्वेवेति चेत् । न । तत्रापि क्षणिकत्वस्याप्रसिद्धत्वात् । जात्येकत्वाच्च । छत्रेषु पुनरुत्थितेषु च केशनखादिषु केशनखत्वजातेरेकत्वात्केशनखत्वप्रत्ययस्तन्निमित्तोऽभ्रान्त एव । न हि दृश्यमानलूनोत्थितकेशनखादिषु व्यक्तिनिमित्तः स एवेति प्रत्ययो भवति । कस्यचिद्धीर्घकालव्यवहितदृष्टेषु च तुल्यपरिमाणेषु तत्कालीनवालादितुल्येषु केशनखाद्या इति प्रत्ययो भवति न तु त एवेति । घटादिषु पुनर्भवति स एवेति प्रत्ययः । तस्मान्न समो दृष्टान्तः ।

क्षणभङ्गित्ववादिनोक्तमनूद्य प्रत्यभिज्ञाविरोधेन निराकरोति—यच्चोक्तमित्यादिना । स्वपक्षेऽपि प्रत्यभिज्ञोपपत्तिं शाक्यः शङ्कते—सादृश्यादिति । दृष्टान्तं विघटयन्नुत्तरमाह—न तत्रापीति । तथाऽपि कथं तत्र प्रत्यभिज्ञेत्याशङ्क्याऽऽह—जातीति । तन्निमित्ता तेषु प्रत्यभिज्ञेति शेषः । तदेव स्पष्टयति—छत्रेष्विति । अभ्रान्तं इति च्छेदः । किमिति जातिनिमित्तैषा धीर्व्यक्तिनिमित्ता किं न स्यादत आह—नहीति । ननु सादृश्यवशाद्व्यक्तिमेव विषयीकृत्य प्रत्यभिज्ञानं केशादिषु किं न स्यात्तत्राऽऽह—कस्याचिदिति । अभ्रान्तस्येति यावत् । दार्ष्टान्तिके वैषम्यमाह—घटादिष्विति । वैषम्यमुपसंहरति—तस्मादिति ।

---

१ ख. घ. ञ. ण. °त्मा ज्ञा° । २ ञ. ण °तं ज्ञानाभि° । ३ ख. °शनत्व° । ४ ख. घ. ज. झ. °स्वप्र° । ५ ख. ङ. ढ. °षु च त° । ६ क. ग. छ. °ल्या इति । ७ च. ढ. °षु तु प° । झ. °षु च पु° ।

प्रत्यक्षेण हि प्रत्यभिज्ञायते वस्तुनि तदेवेति न चान्यत्वमनुमातुं युक्तं प्रत्यक्षविरोधे लिङ्गस्याऽऽभासत्वोपपत्तेः । सादृश्यप्रत्ययानुपपत्तेश्च । ज्ञानस्य क्षणिकत्वात् । एकस्यं हि वस्तुदर्शिनो वस्त्वन्तरदर्शने सादृश्यप्रत्ययः स्यात् । न तु वस्तुदृश्यैको वस्त्वन्तरदर्शनाय क्षणान्तरमवतिष्ठते । विज्ञानस्य क्षणिकत्वात्सकृद्वस्तुदर्शनेनैव क्षयोपपत्तेः । तेनेदं सदृशमिति हि सादृश्यप्रत्ययो भवति । तेनेति दृष्टस्मरणमिदमिति वर्तमानप्रत्ययः । तेनेति दृष्टं स्मृत्वा यावदिदमिति वर्तमानक्षणकालमवतिष्ठेत । ततः क्षणिकवादहानिः ।

यत्सत्तत्क्षणिकं यथा प्रदीपादि सन्तश्चामी भावा इत्यनुमानविरोधाद्भ्रान्तं प्रत्यभिज्ञानमित्याशङ्क्याऽऽह–प्रत्यक्षेणेति । अनुष्णतानुमानवत्प्रत्यक्षविरोधे क्षणिकत्वानुमानं नौदेत्यबाधितविषयत्वस्याप्यनुमित्यङ्गत्वादिति भावः । इतश्च प्रत्यभिज्ञानं सादृश्यनिबन्धनो भ्रमो न भवतीत्याह–सादृश्येति । तदनुपपत्तौ हेतुमाह–ज्ञानस्येति । तस्य क्षणिकत्वेऽपि किमिति सादृश्यप्रत्ययो न सिध्यतीत्याशङ्क्याऽऽह–एकस्येति । अस्तु तर्हि वस्तुद्वयदर्शित्वमेकस्येति चेन्नेत्याह–न त्विति । उक्तमेवार्थं प्रपञ्चयति–तेनेत्यादिना । भवतु किं तावतेति तत्राऽऽह–तेनेति दृष्टमिति । अवतिष्ठेत यदीति शेषः ।

अथ तेनेत्येवोपक्षीणः स्मार्तः प्रत्यय इदमिति चान्य एव वार्तमानिकः प्रत्ययः क्षीयते ततः सादृश्यप्रत्ययानुपपत्तिस्तेनेदं सदृशमिति । अनेकदर्शिन एकस्याभावात् । व्यपदेशानुपपत्तिश्च द्रष्टव्यदर्शनेनैवोपेक्षयाद्विज्ञानस्येदं पश्याम्यदोऽद्राक्षमितिव्यपदेशानुपपत्तिर्दृष्टवतो व्यपदेशक्षणानवस्थानात् । अथावतिष्ठेत क्षणिकवादहानिः । अथादृष्टवतो व्यपदेशः सादृश्यप्रत्ययश्च तदानीं जात्यन्धस्येव रूपविशेषव्यपदेशस्तत्सादृश्यप्रत्ययश्च सर्वमन्धपरम्परेति प्रसज्येत सर्वज्ञशास्त्रप्रणयनादि नं चैतदिष्यते । अकृताभ्यागमकृतविप्रणाशदोषौ तु प्रसिद्धतरौ क्षणवादे ।

क्षणिकत्वहानिपरिहारं शङ्कित्वा परिहरति–अथेत्यादिना । तत्र हेतुमाह–अनेकेति । परपक्षे दोषान्तरमाह––व्यपदेशेति । तदेव विवृणोति

---

१ च. ढ. °वेदमिति । २ ग. °स्य हि क्ष° । ३ घ. ज. झ. °स्य व° । ४ क. ग. घ. छ. ज. झ. क्षणवा° । ५ ख. घ. ढ. °दिकं स° । ६ घ. ण. °र्शितत्व° । ७ झ °पक्षी णत्वादि° । ८ क. ग. °दं दृष्टमदो° । ९ क. ख. ग. घ. ङ. छ. झ. क्षणवा° । १० घ. ज. न च त° ।

इदमिति । व्यपदेशक्षणेऽनवस्थानात्सिद्धिं शङ्कित्वा दूषयति—अथेत्यादिना । अन्यो द्रष्टाऽन्यश्च व्यपदेष्टेत्याशङ्क्य परिहरति—अथेत्यादिना । शास्त्रप्रणयनादीत्यादिशब्देन शास्त्रीयं साध्यसाधनादि गृह्यते । क्षणिकत्वपक्षे दूषणान्तरमाह—अक्षतेति ।

दृष्टव्यपदेशहेतुः पूर्वोत्तरसंहित एक एव हि शृङ्खलावत्प्रत्ययो जायत इति चेत् । तेनेदं सदृशमिति च । न । वर्तमानातीतयोर्भिन्नकालत्वात् । तत्र वर्तमानप्रत्यय एकः शृङ्खलावयवस्थानीयोऽतीतश्चापरस्तौ प्रत्ययौ भिन्नकालौ तदुभयप्रत्ययविषयस्पृक्चेच्छृङ्खलाप्रत्ययस्ततः क्षणद्वयव्यापित्वादेकस्य विज्ञानस्य पुनः क्षणवादहानिः । ममतवतादिविशेषानुपपत्तेश्च सर्वसंव्यवहारलोपप्रसङ्गः । सर्वस्यं च स्वसंवेद्यविज्ञानमात्रत्वे विज्ञानस्य च स्वच्छावबोधावभासमात्रस्वाभाव्याभ्युपगमात्तद्दर्शिनश्चान्यस्याभावेऽनित्यदुःखशून्यानात्मत्वाद्यनेककल्पनानपपत्तिः ।

व्यपदेशानुपपत्तिमुक्तां समादधानः शङ्कते—दृष्टेति । सादृश्यप्रत्ययश्च शृङ्खलास्थानीयेन प्रत्ययेनैव सेत्स्यतीत्याह—तेनेदमिति । अपसिद्धान्तप्रसक्त्या प्रत्याचष्टे—नेत्यादिना । तावेवौ यौ प्रत्ययौ विषयौ तदवगाही चेन्मध्यवर्ती शृङ्खलावयवस्थानीयः प्रत्यय इति यावत् । क्षणानां मिथः संबन्धस्तर्हि मा भूदिति चेत्तत्राऽऽह—ममेति । व्यपदेशसादृश्यप्रत्ययानुपपत्तिस्तु स्थितैवेति चकारार्थः । यत्तु विज्ञानस्य दुःखाद्युपप्लुतत्वं तद्दूषयति—सर्वस्य चेति । शुद्धत्वात्तत्संसर्गदृष्टभावाच्च न ज्ञानस्य दुःखादिसंप्लवः स्वसंवेद्यत्वाङ्गीकारादित्यर्थः ।

न च दाडिमादेरिव विरुद्धानेकांशवत्त्वं विज्ञानस्य । स्वच्छावबोधावभासस्वाभाव्यं[5]द्विज्ञानस्य । अनित्यदुःखादीनां विज्ञानांशत्वे च सत्यनुभूयमानत्वाव्यतिरिक्तविषयत्वप्रसङ्गः । अथानित्यदुःखाद्यात्मैकत्वमेव विज्ञानस्य तदा तद्वियोगाद्विशुद्धिकल्पनानुपपत्तिः । संयोगिमलवियोगाद्धि विशुद्धिर्भवति । यथाऽऽदर्शप्रभृतीनाम् । न तु स्वाभाविकेन धर्मेण कस्यचिद्वियोगो दृष्टः ॥ न ह्यग्नेः स्वाभाविकेन प्रकाशेनौष्ण्येन वा वियोगो दृष्टः । यद्यपि पुष्पगुणानां रक्तत्वादीनां द्रव्यान्तरयोगेन(ण)वियोजनं दृश्यते तत्रापि संयोगपूर्वत्वमनुमीयते

१ ख. ग. ङ. च. छ. झ. ढ. °व शृ° । २ ख. ग. ङ. च. छ. ढ. तदेतद् । ३ घ. ण. °सर्गिद्र° । ४ ण. तस्य° । ५ ङ. च छ. झ. ढ. व्यात् । अ° । ६ ख. ग. ङ. झ. ढ. °त्तिः । स्वसं° । ७ च. ढ. °शनोष्मणा वा ।

बीजभावमयी पुष्पफलादीनां गुणान्तरोत्पत्तिदर्शनात् । अतो विज्ञानस्य विशुद्धिकल्पनानुपपत्तिः ।

ज्ञानस्य शुद्धधर्मैकस्वाभाव्यमसिद्धं दाडिमादिवज्ज्ञानाविधदुःखाद्यंशवत्त्वाश्रयणादित्याशङ्क्याऽऽह—न चेति । तत्रैव हेत्वन्तरमाह—अनित्येति । तेषां तद्धर्मत्वे तत्त्वनुपपत्तेत्वात्ततोऽतिरिक्तत्वं स्याद्धर्माणां धर्मिमात्रत्वाभावान्मेयानां च मानादर्थान्तरत्वादतो यन्मेयं न तज्ज्ञानांशो यथा घटादि मेयं च दुःखादीत्यर्थः । ज्ञानस्य दुःखादि धर्मो न भवति किंतु स्वरूपमेवेति शङ्कामनुभाष्य दोषमाह—अथेत्यादिना । अनुपपत्तिमेव प्रकटयति—संयोगीत्यादिना । स्वाभाविकस्यापि वियोगोऽस्ति पुष्परक्तत्वादीनां यथोपलम्भादित्याशङ्क्याऽऽह—यदपीति । द्रव्यान्तरशब्देन पुष्पसंबन्धिनोऽवयवास्तद्गतरक्तत्वाद्यारम्भका विवक्षिताः । विमतं संयोगपूर्वकं विभागवत्त्वान्मेयादिवदित्यनुमानं न स्वाभाविकस्य सति वस्तुनि नाशोऽस्तीत्यर्थः । अनुमानानुगुणं प्रत्यक्षं दर्शयति—बीजेति । कार्पासादिबीजे द्रव्यविशेषसंपर्काद्रक्तादिद्रव्यसंसर्गया तत्पुष्पादीनां रक्तादिगुणोदयोपलम्भात्तत्संयोगिद्रव्यापगमादेव तत्पुष्पादिषु रक्तत्वाद्यपगतिरित्यर्थः । विशुद्धयनुपपत्तिमुपसंहरति—अत इति ।

विषयविषय्याभासत्वं च यन्मलं परिकल्प्यते विज्ञानस्य तदप्यन्यसंसर्गाभावादनुपपन्नम् । न ह्यविद्यमानेन विद्यमानस्य संसर्गः स्यात् असति चान्यसंसर्गे यो धर्मो [redacted] दृष्टः स तत्स्वभावत्वान्न तेन वियोगमर्हति । यथाग्नेरौष्ण्यं सवितुर्वा प्रभा । तस्मादनित्यसंसर्गेण मलिनत्वं तद्विशुद्धिश्च विज्ञानस्येतीयं कल्पनाऽन्धपरम्परैव प्रमाणशून्येत्यवगम्यते ।

कल्पनान्तरमनूद्य दूषयति—विषयविषयीति । कथं पुनर्ज्ञानस्यान्येन संसर्गाभावस्तस्य विषयेण संसर्गादित्याशङ्क्याऽऽह—नहीति । अथान्यसंसर्गमन्तरेणापि ज्ञानस्य विषयविषय्याभासत्वमलं स्यादिति चेत्तत्राऽऽह—असति चेति । कल्पनाद्वयमप्यनिष्कमनादेवमित्युपसंहरति—तस्मादिति ।

यदपि तस्य विज्ञानस्य निर्वाणं पुरुषार्थं कल्पयन्ति तत्रापि फलाश्रयानुपपत्तिः। कण्टकविरुद्धस्य हि कण्टकवेधजनितदुःखनिवृत्तिः फलं न तु कण्टकविद्धमरणे तद्दुःखनिवृत्तिफलस्याऽऽश्रय उपपद्यते । तद्वत्सर्वनिर्वाणेऽसति च फलाश्रये पुरुषार्थकल्पना व्यर्थैव । यस्य हि पुरुषश-

---

१ ख. ज. ट. °ति । स्वसं । २ ञ. °न्मेयादि° । ३ क. घ. °द्रव्यसं° । ख. °दप्य न्यसं° ।

व्यर्थोऽस्य संत्वस्याऽऽत्मनो विज्ञानस्य चार्थः परिकल्प्यते तस्य पुनः पुरुषस्य निर्वाणे कस्यार्थः पुरुषार्थ इति स्यात् । यस्य पुनरस्त्यनेकार्थदर्शी विज्ञानव्यतिरिक्त आत्मा तस्य दृष्टस्मरणदुःखसंयोगवियोगादि सर्वमेवोपपन्नमन्यसंयोगनिमित्तं कालुष्यं तद्वियोगनिमित्तौं च विशुद्धिरिति । शून्यवादिपक्षस्तु सर्वप्रमाणविप्रतिषिद्ध इति तन्निराकरणाय नाऽऽदरः क्रियते ॥ ७ ॥

कल्पनान्तरमुत्थापयति—यदपीति । उपशान्तिर्निर्वाणशब्दार्थः । दूषयति—तत्रापीति । फल्यभावेऽपि फलं स्यादिति चेन्नेत्याह—कण्टकेति । दार्ष्टान्तिकं विवृणोति—यस्य हीति । ननु त्वन्मतेऽपि वस्तुनोऽद्वयत्वात्तस्यासङ्गस्य केनचिदपि संयोगवियोगयोरयोगात्फलित्वासंभवे मोक्षासंभवादि तुल्यमित्याशङ्क्याऽऽह—येस्य पुनरिति । यद्यपि पूर्णं वस्तु वस्तुतोऽसङ्गमङ्गी क्रियते तथाऽपि क्रियाकारकफलभेदस्यांविद्यामात्रकृतत्वादस्मन्मते सर्वव्यवहारसंभवान्न साम्यमिति भावः । ननु बाह्यार्थवादो विज्ञानवादश्च निराकृतौ शून्यवादो निराकर्तव्योऽपि कस्मान्न निराक्रियते तत्राऽऽह—शून्यवादीति । समस्तस्य वस्तुनः सत्त्वेन भानान्मानान्तरेण च सर्वेषां तद्विषयत्वाच्छून्यस्य चाविषयतया प्राप्त्यभावेन निराकरणानर्हत्वात्तद्विषयत्वे च शून्यवादिनैव विषयनिराकरणोक्त्या शून्यस्यापह्नवात्तस्य च स्फुरणास्फुरणयोः सर्वशून्यत्वायोगात्तद्वादिनश्च सत्त्वासत्त्वयोस्तदनुपपत्तेः संवृतेश्चाऽऽश्रयाभावादसंभवात्तदभ्युपगमे च शून्यस्य स्वरूपहानान्निराश्रयत्वे चासंवृतित्वान्नास्माभिरसाकाऽऽदरः क्रियते तत्सिद्धं बुद्ध्याद्यतिरिक्तं नित्यसिद्धमत्यन्तशुद्धं कूटस्थमद्वयमात्मज्योतिरिति भावः ।

स वा अयं पुरुषो जायमानः शरीरमभिसंपद्यमानः पाप्मभिः संसृज्यते स उत्क्रामन्म्रियमाणः पाप्मनो विजहाति ॥ ८ ॥

यथैवेहैकस्मिन्देहे स्वप्नो भूत्वा मृत्यो रूपाणि कार्यकरणान्यतिक्रम्य स्वप्ने स्व आत्मज्योतिष्यास्त एवं स वै प्रकृतः पुरुषोऽयं जायमानः। कथं जायमान इत्युच्यते—शरीरं देहेन्द्रियसंघातमभिसंपद्यमानः शरीरं आत्मभावमापद्यमान इत्यर्थः । पाप्मभिः पाप्मसमवायिभिर्धर्माधर्माभ्यां कार्यकरणैरित्यर्थः । संसृज्यते संयुज्यते । स एवोत्क्रामञ्छरीरान्तरमूर्ध्वं क्रामन्गच्छन्म्रियमाण इत्येतस्य व्याख्यानमुत्क्रामन्निति । तानेव संश्लिष्टान्पाप्मरूपान्कार्यकरणलक्षणान्विजहाति तैर्वियुज्यते

१ ङ. ज. सर्वस्या° । २ ख. ढ. °षा तद्वि° । ३ घ. ञ. ण. °वृत्तश्च° । ४ घ. ञ. ठ. °वृत्त्या° । ५ क. ख. ग. छ. झ. स्वप्न आ° । ६ घ. ङ. च. ढ. °रीरम° ।

वान्परित्यजति । यथाऽयं स्वप्नजागरद्वृत्त्योर्वर्तमान एवैकस्मिन्देहे पाप्मरूपकार्यकरणोपादानपरित्यागाभ्यामनवरतं संचरति विद्या समानः सन्, तथा सोऽयं पुरुष उपाधिहलोकपरलोकौ जन्ममरणाभ्यां कार्यकरणोपादानपरित्यागाभ्यामनवरतं प्रतिपाद्यमान आ संसारमोक्षात्संचरति तस्मात्सिद्धमस्याऽऽत्मज्योतिषोऽन्यत्वं कार्यकरणरूपेभ्यः पाप्मभ्यः संयोगवियोगाभ्याम् । नहि सद्धर्मत्वे सति तैरेव संयोगो वियोगो वा युक्तः ॥ ८ ॥

प्रसङ्गागतं परपक्षं निराकृत्य श्रुतिव्याख्यानायैवानुवर्तयन्नुक्तवाक्यतात्पर्यमाह—यथेति । एवमात्मा देहभेदेऽपि वर्तमानं जन्म त्यजन्नन्यान्तरं घोषादादानः कार्यकरणान्यतिक्रामतीति शेषः । अतः स्वप्नजागरितसंचारादेहाद्यतिरेकवदिहलोकपरलोकसंचारोक्त्याऽपि तदतिरेकस्तल्योच्यतेऽनेनवाक्येन (ये) त्यर्थः । संप्रत्युत्तरं वाक्यं गृहीत्वा व्याकरोति—स वा इत्यादिना । पाप्मशब्दस्य लक्षणया तत्कार्यविपयत्वं दर्शयति—पाप्मसमवायिभिरिति । पाप्मशब्दस्य पापवाचित्वेऽपि कार्यसाम्याद्धर्मेऽपि वृत्तिं सूचयति—धर्माधर्मेति । उक्तमर्थं दृष्टान्तत्वेनानुवदति—यथेति । अवस्थाद्वयसंचारस्य लोकद्वयसंचारं दार्ष्टान्तिकमाह—तथेति । इहलोकपरलोकावनवरतं संचरतीति संबन्धः । संचरणप्रकारं स्पष्टयति—जन्मेति । जन्मना कार्यकरणयोरुपादाने मरणेन च तयोस्त्यागेनेति छेदेन लभमानो मोक्षाद्वागनवरतं संचरन्दुःखी भवतीत्यर्थः । न वा इत्यादिवाक्यतात्पर्यमुपसंहरति—तस्मादिति । तच्छब्दार्थमेव स्फुटयति—संयोगेति । कथमेवंविधता तेभ्योऽन्यत्वं तत्राऽऽह—नहीति । स्वाभाविकस्य हि धर्मस्य सति स्वभावे कुतः संयोगवियोगौ बह्न्योष्ण्यादिष्वदर्शनात्कार्यकरणयोश्च संयोगवियोगधर्मकत्वस्वाभाविकत्वे सिद्धमात्मनस्तदन्यत्वमित्यर्थः ॥ ८ ॥

ननु न स्तोऽस्योभौ लोकौ यौ जन्मन्यस्मिन्धामकृतमेव संचरति स्वप्नजागरिते इव । स्वप्नजागरिते तु प्रत्यक्षमवगम्येते न त्विहलोकपरलोकौ केनचित्प्रमाणेन । तस्मादेते एव स्वप्नजागरिते इहलोकपरलोकाविति । उच्यते—

> तस्य वा एतस्य पुरुषस्य द्वे एव स्थाने भवत इदं च परलोकस्थानं च संध्यं तृतीयं स्वप्नस्थानं तस्मिन्संध्ये स्थाने तिष्ठन्नेते उभे स्थाने

१ ख. ङ. ज. °भादन° । ख. ग. ङ. च. ढ. °भाव्यमान° । २ क. ग. घ. ङ. °विभाषा ।

पश्यतीदं च परलोकस्थानं च ।
अथ यथाक्रमोऽयं परलोकस्थाने भवति
तमाक्रममाक्रम्योभयान्प्राप्मन आनन्दाꣳश्च
पश्यति य एव प्रस्वपित्यस्य लोकस्य
सर्वावतो मात्रामुपादाय स्वयं विहत्य स्वयं
निर्माय स्वेन भास्वेन ज्योतिषा प्रस्व-
पित्यत्रायं पुरुषः स्वयं ज्योतिर्भवति ॥९॥

तत्रैतस्य पुरुषस्य द्वे एव स्थाने भवतो न तृतीयं चतुर्थं वा । । के ते । इदं च यत्प्रतिबुद्धं वर्तमानं जन्म शरीरेन्द्रियविषयवेदनाविशिष्टं स्थानं प्रत्यक्षतोऽनुभूयमानम् । परलोक एव स्थानं परलोकस्थानम् । तच्च शरीरादिवियोगोत्तरकालानुभाव्यम् । ननु स्वप्नोऽपि परलोकस्तथा च सति द्वे एवेत्यवधारणमयुक्तम् । न । कथं तर्हि संध्यं तत् । इहलोकपरलोकयोर्यः संधिस्तस्मिन्भवं संध्यं यत्तृतीयं तत्स्वप्नस्थानम् । तेन स्थानाद्वित्वावधारणम् । नहि ग्रामयोः संधिस्थानमेव ग्रामावपेक्ष्य तृतीयत्वपरिगणनमर्हति । कथं पुनस्तस्य परलोकस्थानस्यास्तित्वमवगम्यते यदपेक्ष्य स्वप्नस्थानं संध्यं भवेत् । यतस्तु तस्मिन्संध्ये स्वप्नस्थाने तिष्ठन्यथावर्तमान एते उभे स्थाने पश्यति । के ते उभे । इदं च परलोकस्थानं च । तस्मात्तः स्वप्नजागरितव्यतिरेकेणापरो लोको यो विद्वा ममायः सन्ननुसंचरति जन्ममरणसंतानप्रबन्धेन ।

तत्रैतस्यादिनाक्यस्य व्याख्यायां शङ्कामाह—नन्विति । अवस्थाद्वयवलोकद्वयसिद्धिरित्याशङ्क्याऽऽह—स्वप्नेति । कथं तर्हि लोकद्वयसिद्धिरिति आह—तस्मादिति । उक्तोत्तरवेनोत्तरं सन्दर्भमुत्थाप्य व्याकरोति—उच्यत इति । स्थानद्वयसिद्धिद्योतनार्थो वै शब्दः । अवधारणं विवृणोति—नेति । वेदना सुखदुःखादिलक्षणा । आगमस्य परलोकसाधकत्वमभिप्रेत्याऽऽह—वक्ष्येति । अवधारणमाक्षिपति—नन्विति । तस्य स्थानान्तरत्वं दूषयति—नेति । स्वप्नस्य लोकद्वयातिरिक्तस्थानत्वाभावे कथं तृतीयत्वसिद्धिरित्याह—कथमिति । तस्य संध्यत्वात्तत्स्थानान्तरत्वमित्युत्तरमाह—संध्यं वादिति । संध्यत्वं व्युत्पादयति—इहेति । यत्तत्स्वप्नस्थानं तृतीयं सम्पन्नं तदिहलोकपरलोकयोः संध्यमिति संबन्धः ।

१ क. °वे हि द्वे ।

अस्य संध्यत्वे फलितमाह—तेनेति । पूरणप्रत्ययश्रुत्या स्थानान्तरत्वमेव स्वप्नस्य किं न स्यादित्याशङ्क्य प्रथमश्रुतसंध्यशब्दविरोधान्नैवमित्याह—नहीति । परलोकास्तित्वे प्रमाणान्तरजिज्ञासया पृच्छति—कथमिति । प्रत्यक्षं प्रमाणमनुत्तरमाह—यत इत्यादिना ।

कथं पुनः स्वप्ने स्थितः सन्नुभौ लोकौ पश्यति । किमाश्रयः केन विधिनेति । उच्यते—अथ कथं पश्यतीति । शृणु । यथाक्रम आक्रामत्यनेनेत्याक्रम आश्रयोऽवष्टम्भ इत्यर्थः । यादृश आक्रमोऽस्य सोऽयं यथाक्रमः । अयं पुरुषः परलोकस्थाने प्रतिपत्तव्ये निमित्ते यथाक्रमो भवति यादृशेन परलोकप्रतिपत्तिसाधनेन विद्याकर्मपूर्वप्रज्ञालक्षणेन युक्तो भवतीत्यर्थः । तमाक्रमं परलोकस्थानायोन्मुखीभूतं प्राप्ताङ्कुरीभावमिव बीजं तमाक्रममाक्रम्यावष्टभ्याऽऽश्रित्योभयान्पश्यति बहुवचनं धर्माधर्मफलानेकत्वादुभयानुभयप्रकारानित्यर्थः । कांस्तान्पाप्मनः पापफलानि न तु पुनः साक्षादेव पाप्मनां दर्शनं संभवति तस्मात्पापफलानि दुखानीत्यर्थः । आनन्दांश्च धर्मफलानि सुखानीत्येतत् । तानुभयान्पाप्मन आनन्दांश्च पश्यति जन्मान्तरहेतुवासनामयान् । यानि च प्रतिपत्तव्यजन्मविषयाणि क्षुद्रधर्माधर्मफलानि धर्माधर्मप्रयुक्तो देवतानुग्रहाद्वा पश्यति ।

स्वप्नप्रत्यक्षं परलोकास्तित्वे प्रमाणमित्युक्तं, तदेवोत्तरवाक्येन[ण] स्फुटयितुं पृच्छति—कथमिति । कथंशब्दार्थमेव प्रकटयति—किमित्यादिना । उत्तरवाक्यमुत्तरत्वेनोत्थापयति—उच्यत इति । तत्राथशब्दमुक्तप्रश्नार्थतया व्याकरोति—अथेति । उत्तरभागमुत्तरत्वेन व्याचष्टे—शृण्विति । यदुक्तं किमाश्रय इति तत्राऽऽह—यथाक्रम इति । यदुक्तं केन विधिनेति तत्राऽऽह—तमाक्रममिति । पाप्मशब्दस्य यथाश्रुतार्थत्वे संभवति किमिति फलविषयत्वं तत्राऽऽह—न त्विति । साक्षादागमादृते प्रत्यक्षेणेति यावत् । पाप्मनामेव साक्षाद्दर्शनासंभवस्तच्छब्दार्थः । कथं पुनरार्ये वयसि पाप्मनामानन्दानां च स्वप्ने दर्शनं तत्राऽऽह—जन्मान्तरेति । यद्यपि मध्यमे वयसि करणपाटवादैहिकवासनया स्वप्नो दृश्यते तथाऽपि कथमन्तिमे वयसि स्वप्नदर्शनं तदाह—यानि चेति । फलानां क्षुद्रत्वमत्र लेशतो भुक्तत्वम् । यानीत्युपक्रमात्तानीत्युपसंख्यातव्यम् ।

---

१ घ. ञ. ण. तस्य । २ ख. ङ. 'क्षोऽयं भ° । ३ ञ. °रवाक्यमु° । ४ क. ख. ढ. °थार्थ° । ५ ञ. तत्राऽऽह ।

तत्कथमवगम्यते परलोकस्थानंभावितत्पाप्मानन्ददर्शनं स्वप्न इति । उच्यते—यस्मादिह जन्मन्यननुभाव्यमपि पश्यति बहु । न च स्वप्नो नामापूर्वं दर्शनम् । पूर्वदृष्टस्मृतिर्हि स्वप्नः प्रायेण । तेन स्वप्न-जागरितस्थानव्यतिरेकेण स्त उभौ लोकौ ।

ऐहिकवासनावशादैहिकानामेव पाप्मनामानन्दानां च स्वप्ने दर्शनसंभवान्न स्वप्नपक्षं परलोकसाधकमिति शङ्कते—तत्कथमिति । परिहरति—उच्यत इति । यद्यपि स्वप्ने मनुष्याणामिन्द्रादिभावोऽननुभूतोऽपि भाति तथाऽपि तदपूर्वमेव दर्शनमित्याशङ्क्याऽऽह—न चेति । स्वप्नविषया भाविजन्मभाविनोऽपि स्वप्ने दर्शनात्तथोक्तम् । न च तदपूर्वदर्शनमपि तत्त्वज्ञानमुत्थानमन्तरेण मिथ्यात्वात् । न चैवं स्वप्नविषया भाविजन्मादिसिद्धिर्मिथ्याज्ञानमर्थक्रियाकारादिति भावः । प्रमाणफलमुपसंहरति—तेनेति ।

यदादित्यादिबाह्यज्योतिषामभावेऽयं कार्यकरणसंघातः पुरुषो येन व्यतिरिक्तेनाऽऽत्मना ज्योतिषा व्यवहरतीत्युक्तम् । तदेव नास्ति । यदादित्यादिज्योतिषामभावगमनं यत्रेदं विविक्तं स्वयंज्योतिरुपलभ्येत । येन सर्वदैवायं कार्यकरणसंघातः संसृष्ट एवोपलभ्यते । तस्मादसत्समोऽसन्नेव वा स्वेन विविक्तस्वभावेन ज्योतीरूपेणाऽऽत्मेति ।

स यत्रेत्यादिवाक्यस्य व्यवहितेन संबन्धं वक्तुं वृत्तमनूद्याऽऽक्षिपति—यदित्यादिना । बाह्यज्योतिरभावे सत्ययं पुरुषः कार्यकरणसंघातो येन संघातातिरिक्तेनाऽऽत्मज्योतिषा गमनागमनादि निर्वर्तयति तदात्मज्योतिरस्तीति वदितुकामित्यनुवादार्थः । विशिष्टस्थानाभावं वक्तुं विशेषणाभावं तावद्दर्शयति—तदेवेति । आदित्यादिज्योतिरभावाविशिष्टस्थानं यत्रेत्युक्तं तदेव स्थानं नास्ति विशेषणाभावादिति शेषः । यथोक्तस्थानाभावे हेतुमाह—येनेति । संतृप्तो बाह्यज्योतिर्भिरिति शेषः । व्यवहारभूमौ बाह्यज्योतिरभावाभावे फलितमाह—तस्मादिति ।

अथ क्वचिद्विविक्तः स्वेन ज्योतीरूपेणोपलभ्येत बाह्याध्यात्मिकभूतभौतिकसंसर्गशून्यस्ततो यथोक्तं सर्वं भविष्यतीत्येतदर्थमाह—स यः प्रकृत आत्मा यत्र यस्मिन्काले प्रस्वपिति प्रकर्षेण स्वापमनुभवति तदा किमुपादानः केन विधिना स्वपिति संध्यं स्थानं प्रतिपद्यत इत्युच्यते । अस्य दृष्टस्य लोकस्य जागरितलक्षणस्य, सर्वावतः सर्वमवयवि सर्वावानयं लोकः कार्यकरणसंघातो विषयवेदनासंयुक्तः

---

१ छ. ट. °नसंबन्धि त° । च. °नसंबन्धिपाप्मा° । २ घ. ज. °विनां पाप्मना द° । ३ छ. °त्पाप्मनामानन्दानां द° । ४ घ. च. ज. ट. °पूर्वद° । ५ ञ. ण. °ति । भा° । ६ घ. ज. सदै° । ख. म. °ना प्रस्व° ।

सर्वात्मत्वमस्य ब्याख्यातमेवमध्यायप्रकरणेऽर्थो अयं वा आत्मेत्यादिना सर्वा वा भूतभौतिकमात्रा अस्य संसर्गकारणभूता विद्यन्त इति सर्वस्मात्सर्वमेवं सर्वात्मानमस्य सर्वोपनिषदां मात्रामेकदेशमवयवमपादायापच्छिद्यादाय गृहीत्वा इहजन्मवासनावासितः मन्त्रिरयथः । स्वयमात्मनैव विहत्य देहं पातयित्वा निःसंबोधमापाद्य । आगच्छति आदित्यादीनां चक्षुरादिष्वनुग्रहो देहव्यवहारार्थः । देहव्यवहारश्चाऽऽत्मनो धर्माधर्मफलोपभोगप्रयुक्तस्तद्धर्माधर्मफलोपभोगापरमणमस्मिन्देह आत्मकर्मापरमश्चतमित्यात्माऽस्य विहन्तव्य उच्यते । स्वयं निर्माय निर्माणं कृत्वा वासनामयं स्वप्नदेहं मायामयमिव । निर्माणमपि तत्कर्मापेक्षत्वात्स्वयंकर्तृकमुच्यते । स्वेनाऽऽत्मीयेन भासा मात्रोपादानलक्षणेन भासा दीप्त्या प्रकाशेन सर्वासामनात्मकानान्तःकरणवृत्तिप्रकाशनेत्यर्थः । सा हि तत्र विषयभूता सर्ववासनामयी प्रकाशते । सा तत्र स्वं सा उच्यते । तेन स्वेन भासा विषयभूतेन स्वेन च ज्योतिषा साक्षिचैतन्येन विविक्तरूपेणालुप्तैकस्वभावेन तद्विलक्षणं वासनात्मकं विषयीकुर्वन्प्रस्वपिति । यदेवं वर्तते तत्प्रस्वपितीत्युच्यते । अत्रैतस्यामवस्थायामेतस्मिन्काले‌ऽयं पुरुष आत्मा स्वयमेव विविक्तज्योतिर्भवति । बाह्याध्यात्मिकसर्वभौतिकसंसर्गरहितं ज्योतिर्भवति ।

उत्तरग्रन्थमुत्तरत्वेनावतारयति—अथेत्यादिना । यथोक्तं सर्वव्यतिरिक्तत्वे स्वयंज्योतिष्ट्वमित्यादि । आह स्वप्न प्रस्तावादिति यावत् । उपादानशब्दः परिग्रहविषयः । कथमस्य सर्वात्मत्वं तदाह—सर्वोपनिषदामिति । संसर्गकारणभूताः सङ्घात्मविविधभागेनेति शेषः । किमुपादान इत्यस्योत्तरमुक्त्वा केन विहन्तव्यस्योत्तरमाह—स्वयमित्यादिना । अपाद्य प्रस्वपितीत्युत्तरस्य संबन्धः । कथं पुनरात्मनो देहविहन्तृत्वं जायत्स्वप्नकर्मफलोपभोगोपरमणादि स विहन्यते तत्राऽऽह—जागरितेत्यादिना । निर्माणविषयं दर्शयति—वासनामयमिति । यथा मायावी मायामयं देहं निर्मिमीते तद्वदित्याह—मायामयमिवेति । कथं पुनरात्मनो यथोक्तदेहनिर्माणकर्तृत्वे कर्मापेक्षत्वान्निर्माणस्येत्याशङ्क्याऽऽह—निर्माणमपीति । स्वेन स्वप्नेऽप्रतीत्यभावे तृतीया । करणे तृतीया व्यावर्तयति—सा हीति । तमेति अप्नोतिः । यथोक्तान्तःकरणवृत्तेर्विषयत्वेन प्रकाशका-

---

ख. °भवन्त्य° । २ क. ज. °र्षितः सर्वा का । ३ ङ. च. छ. झ. ट. °व हि सो ४ ख. ग. घ. ङ. च. छ. ज. °ति स्वेऽऽत्मीयेन भा° । ५ घ. ङ. °वृत्तेः भा° । ६ ख. ङ. °वेदीयो भा°

नस्येऽपि स्वमानो भवतु करणत्वमित्याशङ्क्याऽऽह—मा वयमिति । स्वेन ज्योतिषेति कर्तरि तृतीया । स्वशब्दाभ्यां [illegible] । कोऽयं प्रत्ययः नाम तत्राऽऽह—यदेषमिति । विविक्तविशेषणं [illegible]—प्राणेति ।

नन्वस्य लोकस्य मात्रोपादानं दृष्टं तत्र तस्मिन्सत्यन्यायं पुरुषः स्वयंज्योतिर्भवतीत्यच्यते । नैष दोषः । विषयभूतत्व हि तत् । तेनैव चाप्रायं पुरुषः स्वयं ज्योतिर्देशयितुं शक्यः । न ह्यन्यथाऽसति विषये कस्मिंश्चित्सुषुप्तकाल इव । यदा पुनः [illegible] वासनात्मिका विषयभूतोपलभ्यमाना भवति तदाऽसौ कालादिव निष्टङ्कितः सर्वसंसर्गरहितं चक्षुरादिकार्यकरणव्यापारस्वरूपमलब्धवृत्तिकमात्मज्योतिः स्वेन रूपेणावभासयदवगृह्यते । तेनात्रायं पुरुषः स्वयंज्योतिर्भवतीति सिद्धम् ॥ ९ ॥

स्वप्ने स्वयं ज्योतिरात्मपुरुषमाक्षिपति—नन्वस्येति । बाह्यमात्रापरिग्रहस्य मनोवृत्तिरूपस्य विषयाया विषयित्वाभावात्तद्विशिष्टस्य स्वप्ने स्वयंज्योतिष्ट्वमिति समाधत्ते—नैष दोष इति । कुतो वासनात्मनोऽन्तःकरणस्य विषयत्वमित्याशङ्क्य स्वयंज्योतिष्टवमुक्तिसामर्थ्यादित्याह—तनोति । नाम्नानस्य विषयत्वेनेति शक्तम् । तदेव व्यतिरेकमुखेनाऽऽ(गाऽऽ)ह—नान्धाते । यथा सुषुप्तिकाले व्यक्तस्य विषयस्याभावे स्वयंज्योतिष्ट्वमुक्त्या [illegible] । [illegible] । भवतु स्वप्ने वासनात्मनस्य विषयत्वं तथाऽपि कथं स्वयंज्योतिरात्मा शक्यते विविच्य दर्शयितुमित्याशङ्क्याऽऽह—यदा पुनरिति । अवभासयदवभासयं वासनात्मकमन्तःकरणमिति शेषः । स्वप्नावस्थायामात्मनोऽवभासकान्तरामावे फलितमाह—तनोति ॥ १० ॥

नन्वत्र कथं पुरुषः स्वयंज्योतिर्यत्र जागरित इव ग्राह्यग्राहकादिलक्षणः सर्वो व्यवहारो दृश्यते । दक्षरादयश्चाऽऽदित्याद्या लोकास्तथैव दृश्यन्ते यथा जागरिते । तत्र कथं विज्ञेयावधारणं क्रियतेऽन्यं पुरुषः स्वयं ज्योतिर्भवतीति । उच्यते—वैलक्षण्यात्स्वप्नदर्शनस्य । जागरिते हीन्द्रियबाह्यमनआलोकादिव्यापारसंकीर्णमात्मज्योतिः । इह तु स्वप्ने इन्द्रियाभावाद्यदनुग्रहादिरथालोकाभावाच्च विविक्तं केवलं भाति । तस्माद्विलक्षणम् । यद्यु तथैव विषया उपलभ्यन्ते स्वप्नेऽपि यथा जागरिते तत्र कथमिन्द्रियाभावाद्विलक्षण्यमुच्यत इति । शृणु—

न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ
रथान्रथयोगान्पथः सृजते न तत्राऽऽनन्दा मुदः

---

१ ब. ब. °क्षितं हृ° ।

प्रमुदो भवन्त्यथाऽऽनन्दान्मुदः प्रमुदः सृजते न तत्र
वेशान्ताः पुष्करिण्यः स्रवन्त्यो भवन्त्यथ वेशान्ता-
न्पुष्करिणीः स्रवन्तीः सृजते स हि कर्ता ॥ १० ॥

न तत्र विषयाः स्वप्ने रथादिलक्षणाः । तथा न रथयोगा रथेषु युज्यन्त इति रथयोगा अश्वादयस्तत्र न विद्यन्ते । न च पन्थानो रथमार्गा भवन्ति । अथ रथान्रथयोगान्पथश्च सृजते स्वयम् ।

यदुक्तं स्वप्ने स्वयंज्योतिरात्मेति तत्प्रकारान्तरेणाऽऽक्षिपति—नन्विति । अवस्थाद्वये विशेषाभावकृतं चोद्यं दूषयति—उच्यत इति । वैलक्षण्यं स्फुटयति—जागरिते हीति । मनस्तु स्वप्ने तदपि विषयत्वान्न स्वयंज्योतिष्ट्वविघातीति भावः । उक्तं वैलक्षण्यं प्रतीतिमाश्रित्याऽऽक्षिपति—नन्विति । न तत्रेत्यादिवाक्यं व्याकुर्वन्नुत्तरमाह—शृण्विति । प्रतीतिं घटयति—अथेति ।

कथं पुनः सृजते रथादिसाधनानां वृक्षादीनामभावे । उच्यते—ननूक्तमस्य लोकस्य सर्वावतो मात्रामपादाय स्वयं विहृत्य स्वयं निर्मायेत्यन्तःकरणवृत्तिरस्यं लोकस्य वासना मात्रा तामपादाय रथादिवासनारूपान्तःकरणवृत्तिस्तदुपलब्धिनिमित्तेन कर्मणा चोद्यमाना दृश्यत्वेन व्यवतिष्ठते तदुच्यते स्वयं निर्मायेति । तदेवाऽऽह—रथादीन्सृजत इति । नतु तत्र करणं वा करणानुग्राहकाणि वाऽऽदित्यादिज्योतींषि तदवभास्या वा रथादयो विषया विद्यन्ते । तद्वासनामात्रं तु केवलं तदुपलब्धिकर्मनिमित्तचोदितोदभूतान्तःकरणवृत्त्याश्रयं दृश्यते । तस्यस्य ज्योतिषो दृश्यतेऽलुप्तदृशस्तदात्मज्योतिरत्र केवलमसिरिव कोशाद्विविक्तम् ।

रथादितृष्टिमाक्षिपति—कथं पुनरिति । वासनामयी सृष्टिः श्रुतेत्युत्तरमाह—उच्यत इति । तदुपलब्धिनिमित्तेनेत्यत्र तच्छब्देन वासनात्मिका मनोवृत्तिरेवोक्ता । उक्तमेव प्रपञ्चयति—नैत्तिरित्यादिना । तदुपलब्धिर्वासनोपलब्धिस्तस्य यत्कर्म निमित्तं तेन चोदिता योद्भूताऽन्तःकरणवृत्तिर्ग्राहकावस्था तदाश्रयं तदात्मकं तद्वासनारूपं दृश्यत इति योजना । तथाऽपि कथमात्मज्योतिः स्वप्ने केवलं तिष्ठति तत्राऽऽह—तस्यस्येति । यथा कोशादसिर्विविक्तो भवति तथा दृश्याद्बुद्धेर्विविक्तमात्मज्योतिरिति केवल्यं साधयति—असिरिवेति ।

---

१ क. ग. घ. छ. ज. 'थे यु° । २ ङ. °ते सृजति स्व° । ३ क. ङ. ञ. °वे । नं° । ४ क. स. ञ. ढ. °स्तिततया यो° । ५ घ ज. °र्यं वा त° ।

तथा न तत्राऽऽनन्दाः सुखविशेषा मुदो हर्षाः पुत्रादिलाभनिमित्ताः प्रमुदस्त एव प्रकर्षोपेताः । अथ चाऽऽनन्दादीन्सृजते । तथा न तत्र वेशान्ताः पल्वलाः पुष्करिण्यस्तडागाः स्रवन्त्यो नद्यो भवन्ति । अथ वेशान्तादीन्सृजते वासनामात्ररूपान् । यस्मात्स हि कर्ता । तद्वासनाश्रयचित्तवृत्युद्भवनिमित्तकर्महेतुत्वेनेत्यवोचाम । तस्य कर्तृत्वं न तु साक्षादेव तत्र क्रिया संभवति साधनाभावात् । न हि कारकमन्तरेण क्रिया संभवति । न च तत्र हस्तपादादीनि क्रियाकारकाणि संभवन्ति । यत्र तु तानि विद्यन्ते जागरिते तत्राऽऽत्मज्योतिरवभासितैः कार्यकरणैः रथादिवासनाश्रयान्तःकरणवृत्युद्भवनिमित्तं कर्म निर्वर्त्यते तेनोच्यते स हि कर्तेति । तदुक्तमात्मनैवायं ज्योतिषाऽऽस्ते पल्ययते कर्म कुरुत इति । तत्रापि न परमार्थतः स्वतः कर्तृत्वं चैतन्यज्योतिषोऽवभासकत्वव्यतिरेकेण । यच्चैतन्यात्मज्योतिषाऽन्तःकरणद्वारेणावभासयति कार्यकरणानि तदवभासितानि कर्मसु व्याप्रियन्ते कार्यकरणानि तत्र कर्तृत्वमुपचर्यत आत्मनः । यदुक्तं ध्यायतीव लेलायतीवेति तदेवानूद्यते स हि कर्तेतीह हेत्वर्थम् ॥ १० ॥

तथा रथाद्यभाववदिति यावत् । सुखान्येव विशिष्यन्त इति विशेषाः सुखसामान्यानीत्यर्थः । तथेत्यानन्दाद्यभावो दृष्टान्ततः । अल्पीयांसि सरांसि पल्वलशब्देनोच्यन्ते । स हि कर्तेत्यत्र हिशब्दार्थो यस्मादित्युक्तस्तस्मात्सृजतीति शेषः । कुतोऽस्य कर्तृत्वं सहकार्यभावादित्याशङ्क्याऽऽह—तद्वासनेति । तच्छब्देन वेशान्तादिग्रहणम् । तदीयवासनाधाराश्चित्तपरिणामस्तेनोद्भवति यत्कर्म तस्य सृज्यमानैनिदानत्वेनेति यावत् । मुख्यं कर्तृत्वं वारयति—नन्विति । तत्रेति स्वप्नोक्तिः । साधनाभावेऽपि स्वप्ने क्रिया किं न स्यादित्याशङ्क्याऽऽह—नहीति । तर्हि स्वप्ने कारकाण्यपि भविष्यन्ति नेत्याह—न चेति । तर्हि पूर्वोक्तमपि कर्तृत्वं कथमिति चेत्तत्राऽऽह—यत्र त्विति । उक्तेऽर्थे वाक्योपक्रममनुकूलयति—तदुक्तमिति । उपक्रमे मुख्यं कर्तृत्वमिह त्वौपचारिकमिति विशेषमाशङ्क्याऽऽह—तत्रापीति । परमार्थतश्चैतन्यज्योतिषो व्यापारवदुपाध्यवभासकत्वव्यतिरेकेण स्वतो न कर्तृत्वं वाक्योपक्रमेऽपि विवक्षितमित्यर्थः । आत्मनो वाक्योपक्रमे कर्तृत्वमौपचारिकमित्युपसंहरति—यदिति । स हि कर्तेत्यौपचारिकं कर्तृत्वमित्युच्यते चेत्तस्य ध्याय-

१ घ. ज. हर्षोत्कर्षाः । २ ख. ग. ङ. ज °थवाऽऽन । ३ ख. य. ङ. च. छ. झ. ञ. °य च वे° । ४ च. ढ. °र्तेति हे° । ग. घ. ज. °र्तेति हि हे° । ५ ख. °ह हि हे° । ६ क. ख. ढ. °शब्दो य° । ७ ख. ढ. °नस्य नि° । ८ ख. घ. ढ. ण. °घकाभा° ।

तीवेत्यादिनोक्तत्वात्पुनरुक्तिरित्याशङ्क्याऽऽह-यदुक्तमिति । अनुवादे प्रयोजनमाह-हेत्वर्थमिति । स्वप्ने रथादिसृष्टाविति शेषः ॥ १० ॥

तदेते श्लोका भवन्ति । स्वप्नेन शारीरमभिप्रहत्या-
सुप्तः सुप्तानभिचाकशीति । शुक्रमादाय पुनरैति
स्थानꣳ हिरण्मयः पुरुष एकहꣳसः ॥ ११ ॥

तदेते एतस्मिन्नुक्तेऽर्थे एते श्लोका मन्त्रा भवन्ति । स्वप्नेन स्वप्नभावेन शारीरं शरीरमभिहत्यं निश्चेष्टमापाद्यासुप्तः स्वयमलुप्तदृगादिशक्तिस्वाभाव्यात्सुप्तान्वासनाकारोद्भूतानन्तःकरणवृत्त्याश्रयान्बाह्याध्यात्मिकान्सर्वानेव भावान्स्वेन रूपेण प्रत्यस्तमितान्सुप्तानभिचाकशीत्यलुप्तयाऽऽत्मदृशा पश्यत्यवभासयतीत्यर्थः । शुक्रं शुद्धं ज्योतिष्मदिन्द्रियमात्रारूपमादाय गृहीत्वा पुनः कर्मणे जागरितस्थानमैत्यागच्छति हिरण्मयो हिरण्मय इव चैतन्यज्योतिःस्वभावः पुरुष एकहंस एक एव हन्तीत्येकहंसः । एको जाग्रत्स्वप्नेहलोकपरलोकादीन्गच्छतीत्येकहंसः ॥ ११ ॥

तदेते श्लोका भवन्तीत्येतत्प्रतीकं गृहीत्वा व्याचष्टे-तदेतँ इति । उक्तोऽर्थः स्वयंज्योतिष्ट्वादिः । शारीरमिति स्वार्थे वृद्धि(त्तिः) । स्वयमसुप्तत्वे हेतुमाह-अलुप्तेति । व्याख्येयं पदमादाय व्याचष्टे-सुप्तानित्यादिना । उक्तमनूद्य पदान्तरमवतार्य व्याकरोति-सुप्तानभिचाकशीतीति ॥ ११ ॥

प्राणेन रक्षन्नवरं कुलायं बहिष्कुलायादमृतश्चरित्वा ।
स ईयतेऽमृतो यत्र कामꣳ हिरण्मयः पुरुष एक-
हꣳसः ॥ १२ ॥

तथा प्राणेन पञ्चवृत्तिना रक्षन्पारिपालयन्नन्यथा मृतभ्रान्तिः स्यादवरं निकृष्टमनेकाशुचिसंघातत्वादत्यन्तबीभत्सं कुलायं नीडं शरीरं स्वयं तु बहिस्तस्मात्कुलायाच्चरित्वा । यद्यपि शरीरस्थ एव स्वप्नं पश्यति तथाऽपि तत्संबन्धाभावात्ततस्थ इवाऽऽकाशो बहिश्चरित्वेत्युच्यते । अमृतः स्वयममरणधर्मेयते गच्छति यत्र कामं यत्र यत्र कामो विषयेषूद्भूतवृत्तिर्भवति तं तं कामं वासनारूपेणोद्भूतं गच्छति ॥ १२ ॥

---

१ क. ख. ग. घ. ङ. छ. ज. झ. ढ. °तस्मिं° । २ घ. ज. °नाकरो° । ३ ङ. झ. °तान्तः° । ४ झ. °ष्टद्दं° । ५ घ. ङ. ज. °या दृ° । ६ क. घ. छ. कर्मणा । झ. कर्मणो । ७ ख. ढ. °तस्मिन्निति ।

तथाशब्दः स्वप्नगतविशेषसमुच्चयार्थः । किमिति स्वप्ने प्राणेन शरीरमात्मा पालयति तत्राऽऽह—अन्यथेति । बहिश्चरित्वेत्ययुक्तं शरीरस्थस्य स्वप्नोपलम्भादित्याशङ्क्याऽऽह—यद्यपीति । तत्संबन्धाभावाद्बहिश्चरित्वेत्युच्यत इति संबन्धः । दहस्थस्यैव तदसंबन्धे दृष्टान्तमाह—तत्स्थ इति ॥ १२ ॥

स्वप्नान्त उच्चावचमीयमानो रूपाणि देवः कुरुते बहूनि । उतेव स्त्रीभिः सह मोदमानो जक्षदुतेवापि भयानि पश्यन् ॥ १३ ॥

किंच स्वप्नान्ते स्वप्नस्थान उच्चावचमुच्चं देवादिभावमवचं तिर्यगादिभावं निकृष्टं तदुच्चावचमीयमानो गम्यमानः प्राप्नुवन्रूपाणि देवो द्योतनावान्कुरुते निर्वर्तयति वासनारूपाणि बहून्यसंख्येयानि । उतापि स्त्रीभिः सह मोदमान एव जक्षदिव हसन्निव वयस्यैः । उतेवापि भयानि बिभेत्येभ्य इति भयानि सिंहव्याघ्रादीनि पश्यन्निव ॥ १३ ॥

स्वप्नस्थं विशेषान्तरमाह—किंचेति । उच्चावचं विषयीकृत्य तेन तेनाऽऽत्मना स्वेनैव स्वयं गम्यमान इति यावत् ॥ १३ ॥

आरामस्य पश्यन्ति न तं पश्यति कश्चनेति । तं नाऽऽयतं बोधयेदित्याहुः । दुर्भिषज्यꣳ हास्मै भवति यमेष न प्रतिपद्यते । अथो खल्वाहुर्जागरितदेश एवास्यैष इति यानि ह्येव जाग्रत्पश्यति तानि सुप्त इत्यत्रायं पुरुषः स्वयं ज्योतिर्भवति सोऽहं भगवते सहस्रं ददाम्यत ऊर्ध्वं विमोक्षाय ब्रूहीति ॥ १४ ॥

आरामं आरमणमाक्रीडामनेन निर्मितां वासनारूपामस्याऽऽत्मनः पश्यन्ति सर्वे जनाः । ग्रामं नगरं स्त्रियमन्नाद्यमित्यादिवासनानिर्मितमाक्रीडनरूपम् । न तं पश्यति[1] तं न पश्यति कश्चन । कष्टं भो वर्ततेऽत्यन्तविविक्तं दृष्टिगोचरापन्नमप्यहो भाग्यहीनता लोकस्य यच्छक्यदर्शनमप्यात्मानं न पश्यतीति लोकं प्रत्यनुक्रोशं दर्शयति श्रुतिः । अत्यन्तविविक्तः स्वयंज्योतिरात्मा स्वप्ने भवतीत्यभिप्रायः ।

---

१ घ. ज. झ. °ति क°।

आरामं विवृणोति—आरामित्यादिना । न तमित्यादेस्तात्पर्यमाह—कष्टमिति । दृष्टिगोचरापन्नमपि न पश्यतीति संबन्धः । कष्टमित्यादिनोक्तं प्रपञ्चयति—अहो इति । श्लोकानां तात्पर्यमुपसंहरति—अत्यन्तेति ।

तं नाऽऽयतं बोधयेदित्याहुः । प्रसिद्धिरपि लोके विद्यते स्वप्न आत्मज्योतिषो व्यतिरिक्तत्वे । काऽसौ । तमात्मानं सुप्तमायतं सहसा भृशं न बोधयेदित्याहुरेवं कथयन्ति चिकित्सकादयो जना लोके । नूनं ते पश्यन्ति जाग्रद्देहादिन्द्रियद्वारतोऽपसृत्य केवलो बहिर्वर्तत इति यत आहुस्तं नाऽऽयतं बोधयेदिति । तत्र च दोषं पश्यन्ति भृशं ह्यसौ बोध्यमानस्तानीन्द्रियद्वाराणि सहसा प्रतिबोध्यमानो न प्रतिपद्यत इति । तदेतदाह—दुर्भिषज्यं हास्मै भवति यमेष न प्रतिपद्यते यमिन्द्रियद्वारदेशं यस्माद्देशाच्छ्रुक्रमादायापसृतंस्तमिन्द्रियदेशमेष आत्मा पुनर्न प्रतिपद्यते । कदाचिद्व्यत्यासेनेन्द्रियमात्राः प्रवेशयति । तत आन्ध्यबाधिर्यादिदोषप्राप्तौ दुर्भिषज्यं दुःखभिषक्कर्मता ह्यस्मै देहाय भवति दुःखेन चिकित्सनीयोऽसौ देहो भवतीत्यर्थः । तस्मात्प्रसिद्ध्याऽपि स्वप्ने स्वयंज्योतिष्ट्वमस्य गम्यते ।

वाक्यान्तरमादाय तात्पर्यमुक्त्वाऽऽकाङ्क्षापूर्वकमक्षराणि व्याकरोति—तं नेत्यादिना । तेषामभिप्रायमाह—नूनमिति । इन्द्रियाण्येव द्वाराण्यस्येतीन्द्रियद्वारो जाग्रद्देहस्तस्मादिति यावत् । तथाऽपि सहसाऽसौ बोध्यतां का हानिरित्याशङ्क्याऽऽह—तत्रेति । सहसा बोध्यमानत्वं सुप्तस्यर्थः । किमत्र प्रमाणमित्याशङ्क्यानन्तरवाक्यमवतार्य व्याचष्टे—तदेतदाहेत्यादिना । पुनरप्रतिपत्तौ दोषप्रसङ्गं दर्शयति—कदाचिदिति । व्यत्यासप्रवेशस्य कार्यं दर्शयन्दुर्भिषज्यमित्यादिव्याचष्टे—तत इति । उक्तां प्रसिद्धिमुपसंहरति—तस्मादिति ।

स्वप्नो भूत्वाऽतिक्रान्तो मृत्यो रूपाणीति तस्मात्स्वप्ने स्वयंज्योतिरात्मा । अथो अपि खल्वन्य आहुर्जागरितदेश एवास्यैष यः स्वप्नः । न संधेयं स्थानान्तरमिहलोकपरलोकाभ्यां व्यतिरिक्तं किं तर्हीहलोक एव जागरितदेशः । यद्येवं, किंचातः । शृण्वतो यद्भवति, यदा जागरितदेश एवायं स्वप्नस्तदाऽयमात्मा कार्यकरणेभ्यो न व्यावृत्तस्तैर्मिश्रीभूतः । अतो न स्वयंज्योतिरात्मेत्यतः स्वयंज्योतिष्ट्वबाधनायान्य

---

१ ख. °न्द्रियाणि । २ ख. ङ. छ. ढ. °तस्तं यमि° । ३ ख. ङ झ. दुःखं मि° । ग. दुर्भिषकर्म । ४ घ. °षज्यता । ५ ख. °तिष्ट्वं देहादिव्यतिरिक्तत्वम् । ६ ख. ग. घ. ङ. छ. ज. ढ. °ते । यस्मात्स्वप्नो ।

आहुर्जागरितदेश एवास्येष इति । तत्र च हेतुमाक्षिपते जागरितदेशत्वे यानि हि यस्माद्धस्त्यादीनि पदार्थजातानि जाग्रज्जागरितदेशे पश्यति लौकिकस्तान्येव सुप्तोऽपि पश्यतीति । तदसत् । इन्द्रियोपरमात् । उपरतेषु होन्द्रियेषु स्वप्नान्न पश्यति । तस्मान्नान्यस्य ज्योतिषस्तत्र संभवोऽस्ति । तदुक्तं न तत्र रथा न रथयोगा इत्यादि । तस्मादत्रायं पुरुषः स्वयंज्योतिर्भवत्येव ॥

वृत्तमनूद्य मतान्तरमुत्थापयति—स्वप्नो भूत्वेत्यादिना । इतिशब्दो यस्मादर्थे । तदेव मतान्तरं स्फोरयति—नेत्यादिना । उक्तमङ्गीकृत्य फलं पृच्छति—यद्येवमिति । स्वप्नो जागरितदेश इत्येवं यदीष्टमतश्च किं स्यादिति प्रश्नार्थः । प्रतिज्ञाय प्रकटयति—शृण्विति । मतान्तरोपन्यासस्य स्वमताविरोधित्वमाह—इत्यत इति । स्वप्नस्य जाग्रद्देशत्वं दूषयति—तदसदिति । तस्य जाग्रद्देशत्वाभावे फलितमाह—तस्मादिति । स्वप्ने बाह्यज्योतिषः संभवो नास्तीत्यत्र प्रमाणमाह—तदुक्तमिति । बाह्यज्योतिरभावेऽपि स्वप्ने व्यवहारदर्शनात्तत्र स्वयंज्योतिष्ट्वमाक्षेप्तुमशक्यमित्युपसंहरति—तस्मादिति ।

स्वयंज्योतिरात्माऽस्तीति स्वप्ननिदर्शनेन प्रदर्शितम् । अतिक्रामति मृत्यो रूपाणीति च क्रमेण संचरन्निहलोकपरलोकादीनिहलोकपरलोकादिव्यतिरिक्तः । तथा जाग्रत्स्वप्नकुलाभ्यां व्यतिरिक्तः । तत्र च क्रमसंचारान्नित्यश्चेत्येतत्प्रतिपादितं याज्ञवल्क्येन । अतो विद्यानिष्क्रयार्थं सहस्रं ददामीत्याह जनकः सोऽहमेवं बोधितस्त्वया भगवते तुभ्यं सहस्रं ददामि । विमोक्षश्च कामप्रश्नो मयाऽभिप्रेतः । तदुपयोग्ययं तादर्थ्यात्तदेकदेश एव । अतस्त्वां नियोक्ष्यामि समस्तकामप्रश्ननिर्णयश्रवणेन विमोक्षायात ऊर्ध्वं ब्रूहीति । येन संसाराद्विप्रमुच्येयम्, त्वत्प्रसादात् । विमोक्षपदार्थैकदेशनिर्णयहेतोः सहस्रदानम् ॥ १४ ॥

कथं पुनर्विद्यायामनुक्तायां सहस्रदानवचनमित्याशङ्क्य वृत्तं कीर्तयति—स्वयंज्योतिरिति । मृत्यो रूपाण्यतिक्रामतीत्यत्र च कार्यकरणव्यतिरिक्तत्वमात्मनो दर्शितमित्याह—अतिक्रामतीति । लोकद्वयसंचारवशादुक्तमर्थमनुद्रवति—क्रमेणेति । आदिशब्दस्तँत्तद्देहादिविषयः । स्थानद्वयसंचारवशादुक्तमनुभाषते—तथेति । इहलोकपरलोकाभ्यामिवेति यावत् । लोकद्वये स्थानद्वये च क्रमसंचारप्रयुक्तमर्थान्तरमाह—तत्र चेति । आत्मनः स्वयंज्योतिषो देहादिव्यतिरिक्तस्य नित्यस्व

१ ख. घ. ङ. यदिष्ट° । २ घ. ञ. ण. °ण्वित्यादिना । म° । ३ ञ. ण. जागरितदे° श° । ४ क. छ. °योग्योऽयं । ५ ख. ग. घ. च. ञ. ङ. °द्विमु° । ६ घ. छ. °स्तत्र देहा° । ञ. °स्तद्दे° ।

ज्ञापितत्वादित्यतःशब्दार्थः। कामप्रश्नस्य निर्णीतत्वान्निराकाङ्क्षत्वमिति शङ्कां वारयति—विमोक्षश्चेति। सम्यग्बोधस्तद्धेतुरिति यावत्। ननु स एव प्रागुक्तो नासौ वक्तव्योऽस्ति तत्राऽऽह—तदुपयोगीति। अयमित्युक्तात्मप्रत्ययोक्तिः। तादर्थ्यात्पदार्थज्ञानस्य वाक्यार्थज्ञानशेषत्वादिति यावत्। पदार्थस्य वाक्यार्थबहिर्भावं दूषयति—तदेकदेश एवेति। कामप्रश्नो नाद्यापि निर्णीत इत्यत्रोत्तरवाक्यं गमकमित्याह—अत इति। कामप्रश्नस्यानिर्णीतत्वादिति यावत्। तेनापेक्षितेन हेतुनेत्यर्थः। विमोक्षशब्दस्य सम्यग्ज्ञानविषयत्वं सूचयति—येनेति। सम्यग्ज्ञानप्राप्तौ गुरुप्रसादस्य प्राधान्यं दर्शयति—त्वत्प्रसादादिति। ननु विमोक्षपदार्थो निर्णीतोऽन्यथा सहस्रदानस्याऽऽकस्मिकत्वप्रसङ्गादत आह—विमोक्षेति।

यत्प्रस्तुतमात्मनैवायं ज्योतिषाऽऽस्त इति। तत्प्रत्यक्षतः प्रतिपादितमत्रायं पुरुषः स्वयंज्योतिर्भवतीति स्वप्ने। यत्तूक्तं स्वप्नो भूत्वेमं लोकमतिक्रामति मृत्यो रूपाणीति। तत्रैतदाशङ्क्यते मृत्यो रूपाण्येवातिक्रामति न मृत्युम्। प्रत्यक्षं ह्येतत्स्वप्ने कार्यकरणव्यावृत्तस्यापि मोदत्रासादिदर्शनम्। तस्मान्नूनं नैवायं मृत्युमतिक्रामति। कर्मणो हि मृत्योः कार्यं मोदत्रासादि दृश्यते। यदि च मृत्युना बद्ध एवायं स्वभावतस्ततो विमोक्षो नोपपद्यते। न हि स्वभावात्कश्चिद्विमुच्यते। अथ स्वभावो न भवति मृत्युस्ततस्तस्मान्मोक्ष उपपत्स्यते। यथाऽसौ मृत्युरात्मीयो धर्मो न भवति तथा प्रदर्शनायात ऊर्ध्वं विमोक्षाय ब्रूहीत्येवं जनकेन पर्यनुयुक्तो याज्ञवल्क्यस्तद्दिदर्शयिषया प्रववृते—

उत्तरकण्डिकामवतारयितुं वृत्तं कीर्तयति—यत्प्रस्तुतमिति। आत्मनैवेत्यादिना यदात्मनः स्वयंज्योतिष्ट्वं ब्राह्मणादौ प्रस्तुतं तदत्रायमित्यादिना प्रत्यक्षतः स्वप्ने प्रतिपादितमिति संबन्धः। वृत्तमर्थान्तरमनूद्य चोद्यमुत्थापयति—यत्तूक्तमिति। मृत्युं नातिक्रामतीत्यत्र हेतुमाह—प्रत्यक्षं हीति। इच्छाद्वेषादिशब्दार्थः तथाऽपि कुतो मृत्युं नातिक्रामति तत्राऽऽह—तस्मादिति। कार्यस्य कारणादन्यत्र प्रवृत्त्ययोगादिति यावत्। उक्तमुपपादयति—कर्मणो हीति। अतः स्वप्नं गतो मृत्युं कर्माख्यं नातिक्रामतीति शेषः। मा तार्हि मृत्योरतिक्रमो भूत्को दोषस्तत्राऽऽह—यदि चेति। स्वभावादपि मृत्योर्विमुक्तिमाशङ्क्याऽऽह—न हीति। उक्तं हि—

"नहि स्वभावो भावानां व्यावर्तेतौष्ण्यवद्वेः" ॥ इति।

---

१ ण. °नित्यात्म°। २ घ. ज. इत्येत°। ३ च. ढ. °ण्येतान्यति°। ४ ख. च. ढ. °पद्यते। ५ ख. ढ. °ना प्रकटीकर्तुं प्र°। ६ क. ख. °वर्त्येतौ°।

कथं तर्हि मोक्षोपपत्तिरित्याशङ्क्याऽऽह—अथेति । एषा च शङ्का पूर्वमेव राज्ञा कृतेति दर्शयन्नुत्तरमुत्थापयति—यथेत्यादिना । तद्दिदर्शयिषयेत्यत्र तच्छब्देन मृत्योरतिक्रमणं गृह्यते ।

स वा एष एतस्मिन्संप्रसादे रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च । पुनः प्रतिन्यायं प्रतियोन्याद्रवति स्वप्नायैव स यत्तत्र किंचित्पश्यत्यनन्वागतस्तेन भवत्यसङ्गो ह्ययं पुरुष इत्येवमेव तद्याज्ञवल्क्य सोऽहं भगवते सहस्रं ददाम्यत ऊर्ध्वं विमोक्षायैव ब्रूहीति ॥ १५ ॥

स वै प्रकृतः स्वयंज्योतिः पुरुषः । एष यः स्वप्ने प्रदर्शित एतस्मिन्संप्रसादे सम्यक्प्रसीदत्यस्मिन्निति संप्रसादः । जागरितं देहेन्द्रियव्यापारशतसंनिपातजं हित्वा कालुष्यं तेभ्यो विप्रमुक्त ईषत्प्रसीदति स्वप्ने । इह तु सुषुप्ते सम्यक्प्रसीदतीत्यतः सुषुप्तं संप्रसाद उच्यते । तीर्णो हि वक्ष्यति सुषुप्तस्थमात्मानम् । स वा एष एतस्मिन्संप्रसादे क्रमेण संप्रसन्नः सन्सुषुप्ते स्थित्वा । कथं संप्रसन्नः । स्वप्नात्सुषुप्तं प्रविविक्षुः स्वप्नावस्थ एव रत्वा रतिमनुभूय मित्रबन्धुजनदर्शनादिना चरित्वा विहृत्यानेकधा चरणफलं श्रममुपलभ्येत्यर्थः । दृष्ट्वैव नैकत्वेत्यर्थः । पुण्यं च पुण्यफलं पापं च पापफलम् । न तु पुण्यपापयोः साक्षाद्दर्शनमस्तीत्यवोचाम । तस्मान्न पुण्यपापाभ्यामनुबद्धः । यो हि करोति पुण्यपापे स ताभ्यामनुबध्यते । नहि दर्शनमात्रेण तदनुबद्धः स्यात् । तस्मात्स्वप्नो भूत्वा मृत्युमतिक्रामत्येव न मृत्युरूपाण्येव केवलम् ।

वैशब्दस्य प्रतिज्ञार्थत्वमुपेत्य सशब्दार्थमाह—प्रकृत इति । एषशब्दमनूद्य व्याकरोति—एष इति । संप्रसादे स्थित्वा मृत्युमतिक्रामतीति शेषः । सुषुप्तस्य संप्रसादत्वं साधयति—जागरित इत्यादिना । तत्र वाक्यशेषमनुकूलयति—तीर्णो

१ ख. ङ. °षः स ए° । २ घ. ज झ. °रितद° । ३ ख. घ. ङ. च. छ. ज. झ. ट. सुषुप्तः । ४ घ. च. ज. झ. ट °कानिति सलि° ५ ख. घ. °नहि कृ° । च. ट. नतु कृ° ।

हीति । अस्तु संप्रसादः सुषुप्तं स्थानं तथाऽपि किमायातमित्यत आह—स वा इति ॥ पूर्वोक्तेन क्रमेण संप्रसादे सुषुप्ते स्थित्वा संप्रसन्नः सन्मृत्युमतिक्रामतीत्यर्थः उक्तमर्थमुपपादयितुमाकाङ्क्षामाह—कथमिति । रत्वेत्यादि व्याकुर्वन्परिहरति—स्वप्नादिति । पुण्यपापशब्दयोर्यथाश्रुतार्थत्वमाशङ्क्याऽऽह—न त्विति । अवोचामोभयान्पाप्मन आनन्दांश्च पश्यतीत्यत्रेति शेषः । पुण्यपापयोर्दर्शनमेव न कारणमित्यत्र फलितमाह—तस्मादिति । तद्द्रष्टुरपि तदनुबन्धः स्यादित्याशङ्क्यातिप्रसङ्गान्नैवमित्याह—यो हीत्यादिना । पुण्यपापाभ्यामात्मनोऽसंस्पर्शे फलितमाह—तस्मादिति ।

अतो न मृत्योरात्मस्वभावत्वाशङ्का । मृत्युश्चेत्स्वभावोऽस्यं स्वप्नेऽपि कुर्यात् । न तु करोति । स्वभावश्चेत्क्रिया स्यादनिर्मोक्षतैव स्यात् । न तु स्वभावः स्वप्नेऽभावात् । अतो विमोक्षोऽस्योपपद्यते मृत्योः पुण्यपापाभ्याम् । ननु जागरितेऽस्य स्वभाव एव । न । बुद्ध्याद्युपाधिकृतं हि तत् । तच्च प्रतिपादितं सादृश्याद्ब्रह्मायतीव लेलायतीवेति । तस्मादेकान्तेनैव स्वप्ने मृत्युरूपातिक्रमणान्न स्वाभाविकत्वाशङ्काऽनिर्मोक्षता वा । तत्र चरित्वेति चरणफलं श्रममुपलभ्येत्यर्थः । ततः संप्रसादानुभवोत्तरकाले पुनः प्रतिन्यायं यथान्यायं यथागतं निश्चित आयो न्यायः । अयनमायो निर्गमनं पुनः पूर्वगमनवैपरीत्येन यदागमनं स प्रतिन्यायः । यथागतं पुनरागच्छतीत्यर्थः । प्रतियोगि यथास्थानम् । स्वप्नस्थानाद्धि सुषुप्तं प्रतिपन्नः सन्यथास्थानमेव पुनरागच्छति । प्रतियोन्याद्रवति स्वप्नायैव स्वप्नस्थानायैव ।

मृत्योरतिक्रमणे किं स्यादित्याशङ्क्याऽऽह—अतो नेति । मृत्योरस्वभावत्वमुपपादयति—मृत्युश्चेदिति । इष्टापत्तिमाशङ्क्याऽऽह—न त्विति । अनन्वागतवाक्यादसङ्गवाक्याच्चेत्यर्थः । मोक्षशास्त्रप्रामाण्यादपि मृत्योरस्वभावत्वमित्याह—स्वभावश्चेदिति । इतश्च मृत्युः स्वभावो न भवतीत्याह—न त्विति । अभावादिति च्छेदः । तस्याः स्वभावत्वे लब्धमर्थं कथयति—अत इति । मृत्युमेव व्याचष्टे—पुण्यपापाभ्यामिति । स्वप्ने मृत्योः स्वभावत्वाभावेऽपि जाग्रदवस्थायां कर्तृत्वमात्मनः स्वभावस्तथा च नियमेन तस्य मृत्योरतिक्रमो न सिध्यतीति शङ्कते—नन्विति । औपाधिकत्वात्कर्तृत्वस्य स्वाभाविकत्वाभावादात्मनो मृत्योरतिक्रमः संभवतीति परिहरति—नेति । कथमौपाधिकत्वं कर्तृत्वस्य सिद्धवदुच्यते

---

१ घ. ढ. ण. °षुप्तस्वा° । २ च. ढ. °स्य स स्व° । ३ ग. ततस्तत्र सं° । ४ ख. °त्र त° । छ. °त्र सं° । ५ क. झ. °र्थः । सं° । ६ झ. °थाग° । ७ क. ग. छ. ज. झ. नि आ° । ८ क. ग. छ. ज. निगम° । ९ क. ख. ङ. ञ. ढ. °स्थानं स्वप्नस्थान° । १०

तत्राऽऽह—तच्चेति। ध्यावतीवेत्यादौ सादृश्यवाचकादिशब्दादौपाधिकत्वं कर्तृत्वस्य प्रागेव दर्शितमित्यर्थः। जागरितेऽपि कर्तृत्वस्य स्वाभाविकत्वाभावे फलितमाह—तस्मादिति। मृत्योः स्वाभाविकत्वाशङ्कानिवृत्तं फलमाह—अनिर्मोक्षता वेति। वाशब्दो नञनुकर्षणार्थः। पुण्यं च पापं चेत्येतदन्तं वाक्यं व्याख्याय पुनरित्यादि व्याचष्टे—तत्रेति। स्वप्नाद्व्युत्थाय सुषुप्तिमनुभूयोत्तरकालमिति यावत्। स्थानात्स्थानान्तरप्राप्तावभ्यासं वक्तुं पुनःशब्दः। प्रतिन्यायमित्यस्यावयवार्थमुक्त्वा विवक्षितमर्थमाह—पुनरिति। संप्रसादादूर्ध्वमिति यावत्। जागरितं वा गच्छतीति यदागमनं स प्रतिन्यायः। तमेव संक्षिपति—यथेति। यथास्थानमादत्त इत्येतद्विवृणोति—स्वप्नस्थानादिति। उक्तेऽर्थे वाक्यं पातयति—प्रतियोनीति। किमर्थं यथास्थानमागमनं तदाह—स्वप्नायेति।

ननु स्वप्ने न करोति पुण्यपापे तयोः फलमेव पश्यतीति कथमवगम्यते यथा जागरिते तथा करोत्येव स्वप्नेऽपि तुल्यत्वाद्दर्शनस्येति, अत आह स आत्मा यत्किंचित्तत्र स्वप्ने पश्यति पुण्यपापफलमनन्वागतोऽननुबद्धस्तेन दृष्टेन भवति नैवानुबद्धो भवति। यदि हि स्वप्ने कृतमेव तेन स्यात्तेनानुबध्येत। स्वप्नादुत्थितोऽपि समन्वागतः स्यात्। न च तल्लोके स्वप्नकृतकर्मणाऽन्वागतप्रसिद्धिः। न हि स्वप्नकृतेनाऽऽगसाऽऽगस्कारिणमात्मानं मन्यते कश्चित्। न च स्वप्नदृश आगः श्रुत्वा लोकस्तं गर्हति परिहरति वा। अतोऽनन्वागत एव तेन भवति। तस्मात्स्वप्ने कुर्वन्निवोपलभ्यते न तु क्रियाऽस्ति परमार्थतः। उतेव स्त्रीभिः सह मोदमान इति श्लोक उक्तः। आख्यातारश्च स्वप्नस्य सहेवशब्देनाऽऽचक्षते हस्तिनोऽद्य घटीकृता धावन्तीव मया दृष्टा इति। अतो न तस्य कर्तृत्वमिति।

स यदित्यादिवाक्यस्य व्यावर्त्यमाशङ्क्याह—नन्विति। तत्र वाक्यमुत्तरत्वेनावतार्य व्याकरोति—अत आहेति। अननुबद्ध इत्यस्यार्थं स्फुटयति—नैवेति। स यदित्यादिवाक्यस्याक्षरार्थमुक्त्वा तात्पर्यमाह—यदि हीति। तेनाऽऽत्मनेति यावत्। स्वप्ने कृतं कर्म पुनस्तेनेत्युक्तम्। अनुबन्धे दोषमाह—स्वप्नादिति।

१ घ. ञ. गरेऽपि। २ ञ. तत इति। ३ ग. ङ. च. ढ. °नुगतोऽननुब°। ४ ग. °द्धस्तत्स्थ एव तेन स्वप्नद्र°। ५ घ. ज. नैव ब°। ६ क. ख. घ. ङ. छ. ज. झ. °दृशः श्रु°। ७ ख. ड. च. छ. ढ तु तत्र कि°। ८ क. ख. ग. ङ. छ. झ. ढ. हवेति। ९ ख. °ति ह श्लो°। ग. ङ. ज. °ति हि श्लो°। १० घ. च. ज. °त्वम्। क°। ११ ख. म. घ. ण. °त्पर्यार्थमा°।

इष्टापत्तिमाशङ्क्याऽऽह—न चेति । स्वप्नकृतेन कर्मणा जाग्रद्वस्थस्य पुरुषस्या-न्वागतत्वप्रसिद्धिरिति यदुच्यते तन्न व्यवहारभूमौ संप्रतिपन्नमित्यर्थः । स्वप्नदृष्टेन जाग्रद्गतस्य न संगतिरित्यत्र स्वानुभवं दर्शयति—नहीति । यथोक्तेऽनुभवे लोक-स्यापि संमतिं दर्शयति—न चेति । तत्र फलितमाह—अत इति । कथं तर्हि स्वमे कर्तृत्वप्रतीतिस्तत्राऽऽह—तस्मादिति । स्वप्नस्याऽऽभासत्वाच्च न तत्र वस्तु-तोऽस्ति क्रियेत्याह—उतेवेति । तदाभासत्वे लोकप्रसिद्धिमनुकूलयति—आख्या-तारश्चेति । स्वप्नस्याऽऽभासत्वे फलितमाह—अत इति ।

कथं पुनरस्याकर्तृत्वमिति । कार्यकरणैर्मूर्तैः संश्लेषो मूर्तस्य स तु क्रियाहेतुर्दृष्टः । नह्यमूर्तः कश्चित्क्रियावान्दृश्यतेऽमूर्तश्चाँऽऽत्माऽतोऽ-सङ्गः । यस्माच्चासङ्गोऽयं पुरुषस्तस्मादनन्वागतस्तेन स्वप्नदृष्टेन । अत एव न क्रियाकर्तृत्वमस्य कथंचिदुपपद्यते । कार्यकरणसंश्लेषेण हि कर्तृत्वं स्यात्स च संश्लेषः सङ्गोऽस्य नास्ति यतोऽसङ्गो ह्ययं पुरु-षः । तस्मादकृतः । एवमेवैतद्याज्ञवल्क्य । सोऽहं भगवते सहस्रं ददा-म्यत ऊर्ध्वं विमोक्षायैव ब्रूहि । मोक्षपदार्थैकदृशस्य कर्मप्रविवेकस्य सम्यगदर्शितत्वात् । अत ऊर्ध्वं विमोक्षायैव ब्रूहीति ॥ १५ ॥

अनन्वागतवाक्यं प्रतिज्ञारूपं व्याख्यायासङ्गवाक्यं हेतुरूपमवतारयितुमाका-ङ्क्षामाह—कथमिति । मूर्तस्य मूर्तान्तरेण संयोगे क्रियोपलम्भादमूर्तस्य तदभा-वात्तत्संयोगाभावेनाऽऽत्मनश्चामूर्तत्वेनासंयोगात्क्रियायोगादकर्तृत्वासिद्धिरित्युत्तरं हेतुवाक्यार्थकथनपू-र्वकं कथयति—कार्यकरणैरित्यादिना । आत्मनोऽसङ्गत्वेनाकर्तृत्वमुक्तं समर्थ-यते—अत एवेति । अतःशब्दार्थं विशदयति—कार्येति । क्रियावत्त्वाभावे जन्म-मरणादिराहित्यं कौटस्थ्यं फलतीत्याह—तस्मादिति । कर्मप्रविवेकमुक्तमङ्गी क-रोति—एवमिति । तत्प्रविविक्तात्मज्ञाने दार्ढ्यं सूचयति—सोऽहमिति । नैराका-ङ्क्ष्यं व्यावर्तयति—अत इति । कथं तर्हि सहस्रदानमित्याशङ्क्याऽऽह—मोक्षेति कामप्रविवेकविषयनियोगमभिप्रेत्य पुनरनुक्रामति—अत ऊर्ध्वमिति ॥ १५ ॥

स वा एष एतस्मिन्स्वप्ने रत्वा चरित्वा दृष्ट्वैव
पुण्यं च पापं च पुनः प्रतिन्यायं प्रतियोन्याद्रवति
बुद्धान्तायैव स यत्तत्र किंचित्पश्यत्यनन्वा-

---

१ घ. ण °त्वान्न तं° । २ ख. ङ. च. झ. ढ. °ति । यतः का° । ३ ख. घ. ज. °पो यो मू° । ४ झ श्चायमात्मा° । ५ क. °ङ्गो ह्ययं । ६ घ. ङ. ज. °न भवति । अं° । ७ घ. ज. °षे क° । झ. °ष हि । ८ क. ग. ङ. झ. संयोगोऽस्य ।

गतस्तेन भवत्यसङ्गो ह्ययं पुरुष इत्येवमेवैतद्याज्ञव-
ल्क्य सोऽयं भगवते सहस्रं ददाम्यत ऊर्ध्वं विमो-
क्षायैव ब्रूहीति ॥ १६ ॥

तत्रासङ्गो ह्ययं पुरुष इत्यसङ्गताऽकर्तृत्वे हेतुरुक्तः। उक्तं च पूर्वं कर्मवशात्म ईयते यत्र काममिति । कामश्च सङ्गोऽतोऽसिद्धो हेतुरुक्तोऽसङ्गो ह्ययं पुरुष इति। न त्वेतदस्ति । कथं तर्हि । असङ्ग एवेत्येतदुच्यते—स वा एष एतस्मिन्स्वप्ने मे वा एष पुरुषः । संप्रमादात्प्रत्यागतः स्वप्ने रत्वा चरित्वा यथाकामं दृष्ट्वैव पुण्यं च पापं चेति सर्वं पूर्ववत्। बुद्धान्तायैव जागरितस्थानाय । तस्मादसङ्ग एवायं पुरुषः। यदि स्वप्ने सङ्गवान्स्यात्कामी ततस्तत्सङ्गजैर्दोषैर्बुद्धान्ताय प्रत्यागतो लिप्येत ॥ १६ ॥

उत्तरकण्डिकाव्यावर्त्यां शङ्कामाह-तत्रेति । पूर्वकण्डिका सप्तम्यर्थः । भवत्यकर्तृत्वहेतुरसङ्गत्वं किं तावतेत्याशङ्क्याऽऽह--उक्तं चेति । पूर्वं श्लोकोपन्यासदशायामिति यावत् । कर्मवशात्स्वप्नहेतुकर्मसापेक्षत्वादित्यर्थः । आत्मनः स्वप्ने कामकर्मसंबन्धेऽपि किमिति नासङ्गत्वं तत्राऽऽह—कामश्चेति । हेत्वसिद्धिं परिहरति-न त्विति । न चेद्धेतोरसिद्धत्वं तर्हि कथं तत्सिद्धिरिति पृच्छति—कथमिति । हेतुसमर्थनार्थमुत्तरग्रन्थमुत्थापयति—असङ्ग इति । प्रतियोन्यादवतीत्येतदन्तं सर्वमित्युक्तम्। स्वप्ने कर्तृत्वाभावस्तच्छब्दार्थः । उक्तमसङ्गत्वं व्यतिरेकमुखेन(ण) विशदयति—यदीति । सङ्गवानित्यस्य व्याख्यानम्—कामीति। तत्सङ्गजैस्तत्र स्वप्ने विषयविशेषेषु कामाख्यसङ्गवशादुत्पन्नैरपराधैरिति यावत् । न तु लिप्यते प्रायश्चित्तविधानस्यापि स्वप्नसूचिताशुभाशङ्कानिबर्हणार्थत्वाद्वस्तुवृत्तानुसारित्वाभावादिति शेषः ॥ १६ ॥

यथाऽसौ स्वप्नेऽसङ्गत्वात्स्वप्नसङ्गजैर्दोषैर्जागरिते प्रत्यागतो न लिप्यत एवं जागरितसङ्गजैरपि दोषैर्न लिप्यत एव बुद्धान्तेन तदेतदुच्यते—

स वा एष एतस्मिन्बुद्धान्ते रत्वा चरित्वा दृष्टवैव

---

१ ग घ. °वेति त°। २ च ढ स वे पु°। ज. स ए प ३ ण. °र्तृत्वे हे°। ४ ख. °कायस°। ढ. कामस°। ५ झ ढ. °न्त जागरित। त°।

पुण्यं च पापं च पुनः प्रतिन्यायं प्रतियोन्याद्रवति
स्वप्नान्तायैव ॥ १७ ॥

स वा एष एतस्मिन्बुद्धान्ते जागरिते रत्वा चरित्वेत्यादि पूर्ववत्। स यत्तत्र बुद्धान्ते किंचित्पश्यत्यनन्वागतस्तेन भवत्यसङ्गो ह्ययं पुरुष इति। ननु दृष्ट्वैवेति कथमवधार्यते करोति च तत्र पुण्यपापे तत्फलं च पश्यति। न। कारकावभासकत्वेन कर्तृत्वोपपत्तेः। आत्मनैवायं ज्योतिषाऽऽस्त इत्यादिनाऽऽत्मज्योतिषाऽवभासितः कार्यकरणसंघातो व्यवहरति तेनास्य कर्तृत्वमुपचर्यते न स्वतः कर्तृत्वम्। तथा चोक्तं ध्यायतीव लेलायतीवेति। बुद्ध्याद्युपाधिकृतमेव न स्वतः। इह तु परमार्थापेक्षयोपाधिनिरपेक्ष उच्यते दृष्ट्वैव पुण्यं च पापं च न कृत्वेति तेन न पूर्वापरव्याघातोऽशङ्क्य। यस्मान्निरुपाधिकः परमार्थतो न करोति न लिप्यते क्रियाफलेन। तथा चं भगवतोक्तम्—

" अनादित्वान्निर्गुणत्वात्परमात्माऽयमव्ययः।
शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते " ॥ इति।

उक्तमर्थं दृष्टान्तीकृत्य जागरितेऽपि निर्लेपत्वमात्मनो दर्शयति यथेत्यादिना। तत्र प्रमाणमाह—तदेतादिति। जाग्रदवस्थायामुक्तमकर्तृत्वमाक्षिपति—नन्विति। तत्र कल्पितं कर्तृत्वमित्युत्तरमाह—नेत्यादिना। तदेव विवृणोति—आत्मनैवेति। स्वतोऽकर्तृत्वे वाक्योपक्रमं संवादयति—तथा चेति। वाक्यार्थं संगृह्णाति—बुद्ध्यादीति। कर्तृत्वमिति शेषः। नन्वौपाधिकं कर्तृत्वं पूर्वमुक्तमिदानीं तन्निराकरणे पूर्वापरविरोधः स्यादित्यत्राऽऽह—इह त्विति। उपाधिनिरपेक्षः कर्तृत्वाभाव इति शेषः। तेनेत्युक्तं हेतुं स्फुटयति—यस्मादिति। आत्मनो लेपाभावे भगवद्वाक्यमपि प्रमाणमित्याह—तथा चेति।

तथा सहस्रदानं तु कामप्रविवेकस्य दर्शितत्वात्। तथा स वा एष एतस्मिन्स्वप्ने स वा एष एतस्मिन्बुद्धान्त इत्येताभ्यां कण्डिकाभ्यामसङ्गतैव प्रतिपादिता। यस्माद्बुद्धान्ते कृतेन स्वप्नान्तं गतः संप्रसन्नोऽसंबद्धो भवति स्तैन्यादिकार्यादर्शनात्तस्मान्निष्वपि स्थानेषु

---

१ च. °व स यत्तत्र किंचित्पश्यत्यन्वागतस्तेन भवत्यसङ्गो ह्ययं पुरुष इत्येवमेवैतद्याज्ञवल्क्य सोऽहं भगवते सहस्रं ददाम्यत ऊर्ध्वं विमोक्षायैव ब्रूहीति ॥ १७ ॥ २ झ. °न्ते र°। ३ क. ग. °त्। य°। ४ छ. °व्याख्याता°। ढ. व्याख्याघा°। ५ झ. °धातश°। ६ क. म. घ. ङ. च. छ. ज. झ. ढ. च व्यासेन भ°। ७ क. पूर्वोत्तर°। ८ क. ख. ङ. झ. ढ. °प्रश्नावि°। ९ क. ख. ङ. °प्रान्तग°। ग. °प्रान्तमाग°।

स्वतोऽसङ्ग एवायम् । अतोऽमृतः । स्थानत्रयधर्मविलक्षणः प्रतियोन्याद्रवति स्वप्नान्तायैव संप्रसादायेत्यर्थः । दर्शनवृत्तेः स्वप्नस्य स्वप्नशब्देनाभिधानदर्शनादन्तशब्देन च विशेषणोपपत्तेः । एतस्मा अन्ताय धावतीति च सुषुप्तं दर्शयिष्यति । यदि पुनरेवमुच्यते स्वप्नान्ते रत्वा चरित्वैतावुभावन्तावनुसंचरति स्वप्नान्तं च बुद्धान्तं चेति दर्शनात्स्वप्नान्तायैवेत्यत्रापि दर्शनवृत्तिरेव स्वप्न उच्यत इति तथाऽपि न किंचिद्दुष्यत्यसङ्गता हि सिषाधयिषिता सिध्यत्येव । यस्माज्जागरिते दृष्ट्वैव पुण्यं च पापं च रत्वा चरित्वा स्वप्नान्तमागतो न जागरितदोषेणानुगतो भवति ॥ १७ ॥

अवस्थात्रयेऽप्यसङ्गत्वमनन्वागतत्वं चाऽऽत्मनः सिद्धं चेद्विमोक्षपदार्थस्य निर्णीतत्वाज्जनकस्य नैराकाङ्क्ष्यमित्याशङ्क्याऽऽह—तथेति । यथा मोक्षैकदेशस्य कर्मविवेकस्य दर्शितत्वात्पूर्वत्र सहस्रदानमुक्तं तथाऽत्रापि तदेकदेशस्य कामविवेकस्य दर्शितत्वात्तद्दानं न तु कामप्रश्नस्य निर्णीतत्वादित्यर्थः । द्वितीयतृतीयकण्डिकयोस्तात्पर्यं संगृह्णाति—तथेत्यादिना । यथा प्रथमकण्डिकया कर्मविवेकः प्रतिपादितस्तथेति यावत् । कण्डिकाद्वितयार्थं संक्षिप्योपसंहरति—यस्मादिति । अवस्थात्रयेऽप्यसङ्गत्वे किं सिध्यति तदाह—अत इति । प्रतीकमादाय स्वप्नान्तशब्दार्थमाह—प्रतियोनीति । कथं पुनस्तस्य सुषुप्तविषयत्वमत आह—दर्शनवृत्तेरिति । दर्शनं वासनामयं तस्य वृत्तिर्यस्मिन्निति व्युत्पत्त्या स्वप्नो दर्शनवृत्तिस्तस्य स्वप्नशब्देनैव सिद्धत्वादन्तशब्दवैयर्थ्यात्तस्यान्तो लयो यस्मिन्निति व्युत्पत्त्या स्वप्नान्तशब्देन सुषुप्तग्रहे सत्यन्तशब्देन स्वप्नस्य व्यावृत्त्युपपत्तेरत्र सुषुप्तस्थानमेव स्वप्नान्तशब्दितमित्यर्थः । तत्रैव वाक्यशेषानुगुण्यमाह—एतस्मा इति । स्वप्नान्तशब्दस्य स्वप्ने प्रयोगदर्शनादिहापि तस्यैव तेन ग्रहणमिति पक्षान्तरमुत्थाप्याङ्गी करोति—यदीत्यादिना । सिषाधयिषितार्थसिद्धौ हेतुमाह—यस्मादिति ॥ १७ ॥

एवमयं पुरुष आत्मा स्वयंज्योतिः कार्यकरणविलक्षणस्तत्प्रयोजकाभ्यां कामकर्मभ्यां विलक्षणो यस्मादसङ्गो ह्ययं पुरुषोऽसङ्गत्वादित्ययमर्थः । स वा एष एतस्मिन्संप्रसाद इत्याद्याभिस्तिसृभिः कण्डिकाभिः प्रतिपादितः । तत्रासङ्गत्वेवाऽऽत्मनः कुतो यस्माज्जागरितात्स्वप्नं स्वप्नाच्च संप्रसादं संप्रसादाच्च पुनः स्वप्नं क्रमेण बुद्धान्तं जागरितं बुद्धान्ताच्च पुनः स्वप्नान्तमित्येवमनुक्रमसंचारेण स्थानत्रयस्य व्यतिरेकः साधितः । पूर्वमप्युपन्यस्तोऽयमर्थः स्वप्नो

१ ब. ञ. प. व्युत्पत्तेः । २ स. घ. ङ. °णसंघातवि° । ३ क. ग. घ. ङ. च. छ. ज. ट. पूर्व प° ।

भूत्वेमं लोकमतिक्रामति मृत्यो रूपाणीति तं विस्तरेण प्रतिपाद्य केवलं दृष्टान्तमात्रमवशिष्टं तद्वक्ष्यामीत्यारभ्यते-

तद्यथा महामत्स्य उभे कूले अनुसंचरति पूर्वं चापरं चैवमेवायं पुरुष एतावुभावन्तावनुसंचरति स्वप्नान्तं च बुद्धान्तं च ॥ १८ ॥

तत्तत्रैतस्मिन्यथाप्रदर्शितेऽर्थे दृष्टान्तोऽयमुपादीयते यथा लोके महामत्स्यो महांश्चासौ मत्स्यश्च नादेयेन स्रोतसाऽहार्य इत्यर्थः। स्रोतश्च विष्टम्भयति स्वच्छन्दचार्युभे कूले नद्याः पूर्वं चापरं चानुक्रमेण संचरति। संचरन्नपि कूलद्वयं तन्मध्यवर्तिनोदकस्रोतोवेगेन न परवशी क्रियते। एवमेवायं पुरुष एतावुभा अन्ता अनुसंचरति। कौ तौ। स्वप्नान्तं च बुद्धान्तं च। दृष्टान्तप्रदर्शनफलं तु मृत्युरूपः कार्यकरणसंघातः सह तत्प्रयोजकाभ्यां कामकर्मभ्यामनात्मधर्मोऽयं चाऽऽत्मैतस्माद्विलक्षण इति विस्तरतो व्याख्यातम् ॥ १८ ॥

कण्डिकात्रयेण सिद्धमर्थमनुवदति—एवमिति। आत्मनः स्थानत्रयसंचारादसिद्धोऽसङ्गत्वहेतुरिति शङ्कते—तत्रेति। प्रतिज्ञाहेत्वोर्हेतुनिर्धारणं सप्तम्यर्थः। सप्रयोजकाद्देहद्वयाद्विलक्षण्यं तु दूरनिरस्तामित्येवशब्दार्थः। एवं चोदिते हेतुसमर्थनार्थं महामत्स्यवाक्यमिति संगतिमभिप्रेत्य संगत्यन्तरमाह—पूर्वमपीति। यथाप्रदर्शितोऽर्थोऽसङ्गत्वं कार्यकरणविनिर्मुक्तत्वं च। अहार्यत्वमप्रकम्प्यत्वम्। स्वच्छन्दचारित्वं प्रकटयति—संचरन्नपीति। किं पुनर्दृष्टान्तेन दार्ष्टान्तिके लभ्यते तदाह—दृष्टान्तेति ॥ १८ ॥

अत्र च स्थानत्रयानुसंचारेण स्वयंज्योतिष आत्मनः कार्यकरणसंघातव्यतिरिक्तस्य कामकर्मभ्यां विविक्ततोक्ता स्वतो नायं संसारधर्मवानुपाधिनिमित्तमेव त्वस्य संसारित्वमविद्याध्यारोपितमित्येष समुदायार्थ उक्तः। तत्र च जाग्रत्स्वप्नसुषुप्तस्थानानां त्रयाणां विप्रकीर्णरूप उक्तो न पुञ्जीकृत्यैकत्र दर्शितः। यस्माज्जागरिते ससङ्गः समृत्युः सकार्यकरणसंघात उपलक्ष्यतेऽविद्यया स्वप्ने तु कामसं-

१ ग. ङ. च. छ. ढ. °रभते। २ ख. °र्शितार्थ। ३ ग. °तश्चावट्°। ४ क. ख. ग. घ. ढ. °ति स सं°। ५ क. °रित्याश°। ६ क. ख. पूर्वं चेति। ७ घ. ण. लक्ष्यते।

युक्तो मृत्युरूपाविनिर्मुक्त उपलभ्यते । सुषुप्ते पुनर्बुद्धान्तमागतो बुद्धान्ताच्च सुषुप्ते संप्रसन्नोऽमङ्क्ते भवतीत्यशङ्क्यताऽपि दृश्यते । एकवाक्यतया तूपसंहियमाणं फलं नित्यमुक्तबुद्धशुद्धस्वभावताऽस्य नैकत्र पुञ्जीकृत्य प्रदर्शितेति तत्प्रदर्शनाय कण्डिकाऽऽरभ्यते । सुषुप्ते ह्येवंरूपताऽस्य वक्ष्यमाणा तद्वा अस्यैतदतिच्छन्दा अपहतपाप्माऽभयं रूपमिति । यस्मादेवंरूपं विलक्षणं सुषुप्तं प्रविविक्षति । कथमित्याह—दृष्टान्तेनास्यार्थस्य प्रकटीभावो भवतीति तत्र दृष्टान्त उपादीयते ।

श्येनवाक्यमवतारयितुं वृत्तं कीर्तयति—अत्र चेति । पूर्वसंदर्भः सप्तम्यर्थः । देहद्वयेन सप्रयोजकेन वस्तुतोऽसंबन्धे फलितमाह—स्वत इति । कथं तर्हि तत्र संसारित्वधीरित्याशङ्क्याऽऽह—उपाधीति । औपाधिकस्यापि वस्तुत्वमाशङ्क्याऽऽह—अविद्येति । वृत्तमनूद्योत्तरग्रन्थमवतारयन्भूमिकामाह—तत्रेति । स्थानत्रयसंबन्धित्वेन विप्रकीर्णं विशिष्टं रूपमस्येत्यात्मा तथा । पुञ्जीकृत्य विवक्षितं सर्वं विशेषणमादायेति यावत् । एकेति वाक्योक्तिः । तत्र हेतुं वदञ्जाग्रद्वाक्येन विवक्षितात्मोक्तिरित्याह—यस्मादिति । सप्तङ्क्त्वादेर्दृश्यमानरूपस्य मिथ्यात्वं सूचयति—अविद्ययेति । स्वप्नवाक्ये विवक्षितात्मसिद्धिमाशङ्क्याऽऽह—स्वप्ने त्विति । तर्हि सुषुप्तवाक्ये तत्सिद्धिर्नेत्याह—सुषुप्ते पुनरिति । तत्राप्यविद्यानिर्मोको न प्रतिभातीति भावः । एवं पातनिकां कृत्वा श्येनवाक्यमादत्ते—एकवाक्यतयेति । पूर्ववाक्यानां (णा) मिति शेषः । कुत्र तर्हि यथोक्तमात्मरूपं पुञ्जीकृत्य प्रदर्श्यते तत्राऽऽह—सुषुप्ते हीति । तत्राभयमित्यविद्याराहित्यमुच्यते । सा च सुषुप्ते स्वरूपेण सत्यपि नाभिव्यक्तौ भातीति द्रष्टव्यम् । यस्मात्सुषुप्ते यथोक्तमात्मरूपं वक्ष्यते तस्मादिति यावत् । एवंरूपमित्येतदेव प्रकटयति—विलक्षणमिति । कार्यकरणाविनिर्मुक्तं कामकर्माविद्याराहित्यमित्यर्थः । स्थानद्वयं हित्वा कथं सुषुप्तं प्रवेष्टुमिच्छतीति पृच्छति—तत्कथमिति । स्वप्नादौ दुःखानुभवात्तत्त्यागेन सुषुप्तं प्राप्नोतीत्याह—आहेति । अथोत्तरा श्रुतिः स्थानान्तरप्राप्तिमभिधत्तां तथाऽपि किं दृष्टान्तवचनमत्याशङ्क्याऽऽह—दृष्टान्तेनेति । अस्यार्थस्य सुषुप्तिप्राप्तिरूपस्येत्येतत् । स एवार्थस्तत्रेति सप्तम्यर्थः ।

तेयथाऽस्मिन्नाकाशे श्येनो वा सुपर्णो वा
विपरिपत्य श्रान्तः सꣳहत्य पक्षौ संलयायैव
ध्रियत एवमेवायं पुरुष एतस्मा अन्ताय धा-

१ ग. घ. ज. °लक्ष्यत । २ क. ग. छ. झ. °त । पु° । ३ ग. ज. ढ. °ते पुनः सं° । ४ ख. घ. ङ. °तयोप° । ५ ख. घ. ङ. छ. ज. ढ. °पं भयाद्विल° । ६ ग. °णं भयात्सुषु° । ७ घ. ञ. ण. °क्काऽऽर्तीति । ८ ख. ङ. °द्यान्तनत्या° ।

वति यत्र सुप्तो न कंचन कामं कामयते न
कंचन स्वप्नं पश्यति ॥ १९ ॥

तद्यथाऽस्मिन्नाकाशे भौतिके श्येनो वा सुपर्णो वा । सुपर्णशब्देन क्षिप्रः श्येन उच्यते । यथाऽऽकाशेऽस्मिन्विहृत्य विपरिपत्य श्रान्तो नानापरिपतनलक्षणेन कर्मणा परिखिन्नः संहृत्य पक्षौ संगमय्य संप्रसार्य पक्षौ सम्यग्लीयतेऽस्मिन्निति संलयो नीडो नीडायैव ह्रियते स्वात्मनैव धार्यते स्वयमेव । यथाऽयं दृष्टान्त एवमेवायं पुरुष एतस्या एतस्मै अन्ताय धावति । अन्तशब्दवाच्यस्य विशेषणं यत्र यस्मिन्नन्ते सुप्तो न कंचन न कंचिदपि कामं कामयते । तथा च न कंचन स्वप्नं पश्यति । न कंचन कामामिति स्वप्नबुद्धान्तयोरविशेषेण सर्वः कामः प्रतिषिध्यते । कंचनेत्यविशेषिताभिधानात् । तथा न कंचन स्वप्नामिति । जागरितेऽपि यद्दर्शनं तदपि स्वप्नं मन्यते श्रुतिरत आह-न कंचन स्वप्नं पश्यतीति । तथा च श्रुत्यन्तरम् " तस्य त्रय आवसथास्त्रयः स्वप्नाः " इति । यथा दृष्टान्ते पक्षिणः परिपतनजश्रमापनुत्तये स्वनीडोपसर्पणमेवं जाग्रत्स्वप्नयोः कार्यकरणसंयोगजाक्रियाफलैः संयुज्यमानस्य पक्षिणः परिपतनज इव श्रमो भवति तच्छ्रमापनुत्तये स्वात्मनो नीडमायतनं सर्वसंसारधर्मविलक्षणं सर्वक्रियाकारकफलायासशून्यं स्वमात्मानं प्रविशति ॥ १९ ॥

परमात्माकाशं व्यावर्तयितुं भौतिकविशेषणम् । महाकायो मन्दवेगः श्येनः सुपर्णस्तु वेगवानल्पविग्रह इति भेदः । धारणे सौकर्यं वक्तुं स्वमेवेत्युक्तम् । स्वप्नजागरितयोरवसानमन्तमज्ञातं ब्रह्म । तथा न कंचन स्वप्नामिति स्वप्नजागरितयोरविशेषेण सर्वं दर्शनं निषिध्यत इति शेषः । स्वमविशेषणात्स्वप्नदर्शननिषेधेऽपि कुतो जाग्रद्दर्शनं निषिध्यते तत्राऽऽह—जागरितेऽपीति । कथमयमभिप्रायः श्रुतेरवगत इत्याशङ्क्य विशेषणसामर्थ्यादित्याह—अत्र आहेति । जागरितस्यापि स्वप्नत्वे श्रुत्यन्तरं संवादयति—तथा चेति । दृष्टान्तदार्ष्टान्तिकयोर्विवक्षितमंशं दर्शयति—यथेत्यादिना । संयुज्यमानस्य क्षेत्रज्ञस्येति शेषः । सर्वसंसारधर्मविलक्षणमिति विशेषणं व्याचष्टे—सर्वेति ॥ १९ ॥

यद्यस्यायं स्वभावः सर्वसंसारधर्मशून्यता परोपाधिनिमित्तं चास्य संसारधर्मित्वम् । यन्निमित्तं चास्य परोपाधिकृतं संसारधर्मित्वं सा

१ क. ख. ङ. छ. झ. ढ. स्वयमा° । २ ख. ढ. °क्षितार्थं संद° ।

चाविद्या । तस्या अविद्यायाः किं स्वाभाविकत्वमाहोस्वित्कामकर्मादिवदागन्तुकत्वम् । यदि चाऽऽगन्तुकत्वं ततो विमोक्ष उपपद्यते । तस्याश्चाऽऽगन्तुकत्वे कोपपत्तिः कथं वा नाऽऽत्मधर्मोऽविद्येति, सर्वानर्थबीजभूताया अविद्यायाः सतत्त्वावधारणार्थं परा कण्डिकाऽऽरभ्यते--

> ता वा अस्यैता हिता नाम नाड्यो यथा केशः सहस्रधा भिन्नस्तावताऽणिम्ना तिष्ठन्ति शुक्लस्य नीलस्य पिङ्गलस्य हरितस्य लोहितस्य पूर्णा अथ यत्रैनं घ्नन्तीव जिनन्तीव हस्तीव विच्छायया गर्तमिव पतति यदेव जाग्रद्भयं पश्यति तदत्राविद्यया मन्यतेऽथ यत्र देव इव राजेवाहमेवेदꣳ सर्वोऽस्मीति मन्यते सोऽस्य परमो लोकः ॥ २० ॥

ता वा अस्य शिरःपाण्यादिलक्षणस्य पुरुषस्यैता हिता नाम नाड्यो यथा केशः सहस्रधा भिन्नस्तावता तावत्परिमाणेनाणिम्नाऽणुत्वेन तिष्ठन्ति । ताश्च शुक्लस्य रसस्य पिङ्गलस्य हरितस्य लोहितस्य पूर्णा एतैः शुक्लत्वादिभी रसविशेषैः पूर्णा इत्यर्थः । एते च रसानां वर्णविशेषा वातपित्तश्लेष्मणामितरेतरसंयोगवैषम्यविशेषाद्विचित्रा बहवश्च भवन्ति ।

श्येनवाक्येनाऽऽत्मनः सौषुप्तं रूपमुक्तमिदानीं नाडीखण्डस्य संबन्धं वक्तुं चोदयति—यद्यस्येति । परः खलु भाविवृद्ध्यादिः । असङ्गत्वतः स्वतो बुद्ध्यादिसंबन्धासंभवमुपेत्याऽऽह—यन्निमित्तं चेति । सिद्धान्ताभिप्रायमनूद्य पूर्ववादी विकल्पयति—तस्या इति । आगन्तुकत्वमनवाभाविकत्वम् । आद्ये मोक्षानुपपत्तिं विवक्षित्वाऽऽह—यदि चेति । अस्तु तर्हि द्वितीयो मोक्षोपपत्तेरित्याशङ्क्याऽऽह—तस्याश्चेति । मा भूदविद्याऽऽत्मत्वमात्मधर्मत्वाभावस्तद्धि तु स्याद्धर्मान्तराभावादित्याह—कथं वेति । तत्रोत्तरत्वेनोत्तरमन्थमुत्थापयति—सर्वानर्थेति । तासां परमसूक्ष्मत्वं दृष्टान्तेन दर्शयति—यथेति । कथमन्नरसस्य वर्णविशेषप्राप्तिरित्याशङ्क्याऽऽह—वातेति । भुक्तस्यान्नस्य परिणामविशेषो वातबाहुल्ये नीलो भवति

१ स. ङ. °र्थं चानात्म° । २ ग. °स्य तृतीयार्थे षष्ठी र° । ३ घ. ण. परस्मिन्नु° । ४ घ. ण. द्वितीय । ५ घ, ञ. ण. °पत्तिरि° । ६ स. ञ, ण. चेति ।

पित्ताधिक्ये पिङ्गलो जायते श्लेष्मातिशये शुक्लो भवति पित्ताल्पत्वे हरितः साम्ये च धातूनां लोहित इति तेषां मिथः संयोगवैषम्यात्तत्साम्याच्च विचित्रा बहवश्चान्यरसा भवन्ति तद्वत्याप्तानां नाडीनामपि तादृशो वर्णो जायते ।

' अरुणाः शिरा वातवहा नीलाः पित्तवहाः शिराः ।
असृग्वहास्तु रोहिण्यो गौर्यः श्लेष्मवहाः शिराः ' ॥

इति सौश्रुते दर्शनादित्यर्थः ।

तास्वेवंविधासु नाडीषु सूक्ष्मासु वालाग्रसहस्रभेदपरिमाणासु शुक्लादिरसपूर्णासु सकलदेहव्यापिनीषु सप्तदशकं लिङ्गं वर्तते । तदाश्रिताः सर्वा वासना उच्चावचसंसारधर्मानुभवजनिताः । तल्लिङ्गं वासनाश्रयं सूक्ष्मत्वात्स्वेच्छं स्फटिकमणिकल्पं नाडीगतरसोपाधिसंसर्गवशाद्धर्माद्धर्मेरितोद्भूतवृत्तिविशेषं क्षीरथहस्त्याद्याकारविशेषैर्वासनाभिः प्रत्यवभासते । अथैवं सति यत्र यस्मिन्काले केचन शत्रवोऽन्ये वा तस्करा मामागत्य घ्नन्तीति मृषैव वासनानिमित्तः प्रत्ययोऽविद्यारूयो जायते तदेतदुच्यत एनं स्वप्नदृशं घ्नन्तीवेति । तथा जिनन्तीव वशी कुर्वन्तीव । न केचन घ्नन्ति नापि वशी कुर्वन्ति केवलं त्वविद्यावासनोद्भवनिमित्तं भ्रान्तिमात्रम् । तथा हस्तीवैनं विच्छाययति विच्छादयति विद्रावयति धावयतीवेत्यर्थः । गर्तामिव पतति गर्तं जीर्णकूपादिकमिव पतन्तमात्मानमुपलक्षयति । तादृशी ह्यस्य मृषा वासनोद्भवत्यत्यन्तानिकृष्टाऽधर्मोद्भासितान्तःकरणवृत्त्याश्रया दुःखस्वरूपत्वात् ।

नाडीस्वरूपं निरूप्य तत्र जागरिते लिङ्गशरीरस्य वृत्तिं दर्शयति—तास्विति। एवंविधास्वित्यस्यैव विवरणं सूक्ष्मास्वित्यादि । पञ्च भूतानि दशेन्द्रियाणि प्राणोऽन्तःकरणमिति सप्तदशकम् । जागरिते लिङ्गशरीरस्य स्थितिमुक्त्वा स्वाप्नीं तत्स्थितिमाह—तल्लिङ्गमिति । विवक्षितां स्वप्नस्थितिमुक्त्वा श्रुत्यक्षराणि योजयति—अथेत्यादिना । स्वप्ने धर्मादिनिमित्तवशान्नित्यैव लिङ्गं नानाकारमवभासते तन्मिथ्याज्ञानं लिङ्गानुगतमूलाविद्याकार्यत्वादविद्येति स्थिते सतीत्यथशब्दार्थमाह—एवं सतीति । तस्मिन्काले स्वप्नदर्शनं विज्ञेयमिति शेषः । इवशब्दार्थमाह—नेत्यादिना । उक्तोदाहरणेन समुच्चित्योदाहरणान्तरमाह—तथेति । गर्तादिपतनप्रतीतौ हेतुमाह—तादृशी हीति । तादृशत्वं विशदयति—अत्यन्ते-

---

१ च. ढ. °त्स्वच्छस्फ°। २ घ. ज. झ. विद्रा°। ३ ग. च. °ति धा°। ४ घ. ञ. °तीत्य°। ५ ख. °खभूतत्वा°। ६ ख. घ. ढ. °क्त्वा स्वप्नान्तस्थिति°। ७ ण. °प्नीं स्थिति°। ८ ख. घ. ढ. °गतं मृ°। ९ क. °प्रतिपत्तौ हे°।

ति । यथोक्तवासनाप्रभवत्वं कथं गतपतनादेरवगतमित्याशङ्क्याऽऽह—दुःखेति ।

किं बहुना यदेव जाग्रद्भयं पश्यति हस्त्यादिलक्षणं तदेव भयरूपमत्रास्मिन्स्वप्ने विनैव हस्त्यादिरूपं भयमविद्यावासनया मृषैवोद्भूतया मन्यते । अथ पुनर्यत्राविद्याऽपकृष्यमाणा विद्या चोत्कृष्यमाणा किंविषया किंलक्षणा चेत्युच्यते—अथ पुनर्यत्र यस्मिन्काले देव इव स्वयं भवति । देवताविषया विद्या यदोद्भूता जागरितकाले तदोद्भूतया वासनया देवमिवाऽऽत्मानं मन्यते । स्वप्नेऽपि तदुच्यते देव इव राजव राज्यस्थोऽभिषिक्तः स्वप्नेऽपि राजाऽहमिति मन्यते राजवासनावासितः । एवमत्यन्तप्रक्षीयमाणाऽविद्योद्भूता च विद्या सर्वात्मविषया यदा यदा स्वप्नेऽपि तद्भावभावितोऽहमेवेदं सर्वोऽस्मीति मन्यते । स यः सर्वात्मभावः सोऽस्याऽऽत्मनः परमो लोकः परम आत्मभावः स्वाभाविकः । यत्तु सर्वात्मभावादर्वाग्वालाग्रमात्रमप्यन्यत्वेन दृश्यते नाहमस्मीति । तदवस्थाऽविद्या तयाऽविद्यया ये प्रत्युपस्थापिता अनात्मभावा लोकास्तेऽपरमाः स्थावरान्तास्तान्सव्यवहारविषयाल्लोकानपेक्ष्यायं सर्वात्मभावः समस्तोऽनन्तरोऽबाह्यः सोऽस्य परमो लोकः ।

यदेवेत्यादिश्रुतेरर्थमाह—किं बहुनेति । भयमित्यस्य भयरूपमिति व्याख्या नम् । भयं रूप्यते येन तत्कारणं तथा । हस्त्यादि नास्ति चेत्कथं स्वप्ने भातीत्याशङ्क्याऽऽह—अविद्येति । अथ यत्र देव इवेत्यादेस्तात्पर्यमाह—अथेति । तत्र तस्याः फलमुच्यत इति शेषः । तात्पर्योक्त्याऽथशब्दार्थमुक्त्वा विद्याया विषयस्वरूपे प्रश्नपूर्वकं वदन्यत्रेत्यादेरर्थमाह—किंविषयेति । इवशब्दप्रयोगात्स्वप्न एवोक्त इति शङ्कां वारयति—देवतेति । विद्येत्युपास्तिरुक्ता । अभिषिक्तो राज्यस्थो जाग्रदवस्थायामिति शेषः । अहमेवेदमित्याद्यवतारयति—एवमिति । यथाऽविद्यायामपकृष्यमाणायां कार्यमुक्तं तद्वदित्यर्थः । यदेति जागरितोक्तिः । इदं चैतन्यमहमेव चिन्मात्रं न तु मदतिरेकेणास्ति तस्मादहं सर्वः पूर्णोऽस्मीति जानातीत्यर्थः । सर्वात्मभावस्य परमत्वमुपपादयति—यत्त्वित्यादिना । तत्र तेनाऽऽकारेणाविद्याऽवस्थितेत्याह—तदवस्थेति । तस्याः कार्यमाह—तयेति ।

---

१ ख. ट. ण. °थोक्तं वा° । २ ङ. °क्षणेत्यु° । ३ झ. °णा सा चे° । क. ग. °णा. वेत्यु° । ४ ख. घ ङ. °दा जाग्रदवस्थायां त° । ५ व. °ते । यः । ६ ग. यत्र° । ७ ग. च, ट. °स्ते चाप° । ८ क. ख. ञ ट. °महं चिन्मात्रमेव न ।

समस्तत्वं पूर्णत्वम् । अनन्तरत्वमेकरसत्वम् । अबाह्यत्वं प्रत्यक्त्वम् । योऽयं यथोक्तो लोकः सोऽस्याऽऽत्मनो लोकान्पूर्वोक्तानपेक्ष्य परम इति संबन्धः ।

तस्मादपकृष्यमाणायामविद्यायां विद्यायां च काष्ठां गतायां सर्वात्मभावो मोक्षः । यथा स्वयंज्योतिष्ट्वं स्वप्ने प्रत्यक्षत उपलभ्यते तद्वद्विद्याफलमुपलभ्यत इत्यर्थः । तथाऽविद्यायामप्युत्कृष्यमाणायां तिरोधीयमानायां च विद्यायामविद्यायाः फलं प्रत्यक्षते एवोपलभ्यतेऽथ यत्रैनं घ्नन्तीव जिनन्तीवेति । ते एते विद्याविद्याकार्ये सर्वात्मभावः परिच्छिन्नात्मभावश्च । विद्यया शुद्धया सर्वात्मा भवति । अविद्यया चासर्वो भवति । अन्यतः कुतश्चित्प्रविभक्तो भवति । यतः प्रविभक्तो भवति तेन विरुध्यते । विरुद्धत्वाद्धन्यते जीयते विच्छाद्यते च । असर्वविषयत्वे च भिन्नत्वादेतद्भवति । ममस्तंस्तु मत्कृतो भिद्यते येन विरुध्येत विरोधाभावे केन हन्यते जीयते विच्छाद्यते च । अत इदमविद्यायाः सतत्त्वमुक्तं भवति । सर्वात्मानं मन्तममसर्वात्मत्वेन ग्राहयति । आत्मनोऽन्यद्वस्त्वन्तरमविद्यमानं प्रत्युपस्थापयति । आत्मानमसर्वमापादयति । ततस्तद्विषयः कामो भवति । यतो भिद्यते कामतः क्रियामुपादत्ते । ततः फलम् । तदेतदुक्तम् । वक्ष्यमाणं च यत्र हि द्वैतमिव भवति तदितर इतरं पश्यतीत्यादि । इदमविद्यायाः सतत्त्वं सह कार्येण प्रदर्शितम् । विद्यायाश्च कार्यं सर्वात्मभावः प्रदर्शितोऽविद्याया विपर्ययेण । सा चाविद्या नाऽऽत्मनः स्वाभाविको धर्मो यस्माद्विद्यायामुत्कृष्यमाणायां स्वयमपचीयमाना सती काष्ठां गतायां विद्यायां परिनिष्ठिते सर्वात्मभावे सर्वात्मना निवर्तते रज्ज्वामिव सर्पज्ञानं रज्जुनिश्चये । तच्चोक्तं यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदित्यादि । तस्मान्नाऽऽत्मधर्मोऽविद्या । न हि स्वाभाविकस्योच्छित्तिः कदाचिदप्युपपद्यते सवितुरिवौष्ण्यप्रकाशयोः । तस्मात्तस्या मोक्ष उपपद्यते ॥ २० ॥

वाक्यार्थमुपसंहरति--तस्मादिति । मोक्षो विद्याफलमित्युत्तरत्र संबन्धः । तस्य प्रत्यक्षत्वं दृष्टान्तेन स्पष्टयति--यथेति । विद्याफलवदविद्याफलमपि स्वप्ने प्रत्यक्षमित्युक्तमनुवदति -यथेति । विद्याफलमविद्याफलं चेत्युक्तमुपसंहरति--त एते इति । उक्तं फलद्वयं विभजते- विद्ययेति । असर्वो भवतीत्येतत्प्रकटयति--

---

१ क ख. घ ज °त उप । २ क ङ. च ज झ ढ यतो वि° । ३ च. झ. ढ. °त्वाच्च हन्य° । ४ ख. ग ङ. च छ. ढ वा । ५ क. ङ. छ. °स्तश्च स° । ६ ख. ग. ङ. च. छ. झ. ढ. वा । ७ घ. ज. °र्वविद्या° । झ. °र्वत्वना° । ८ क. ग. च. झ. ढ. °द्यावि° ।

अन्यत इति । प्रविभागफलमाह–यत इति । विरोधफलं कथयति–विरुद्धत्वादिति । अविद्याकार्यं निगमयति–असर्वेति । अविद्यायाश्चेत्परिच्छिन्नफलत्वं तदा तस्य भिन्नत्वादेव यथोक्तं विरोधादि दुर्वारमित्यर्थः । विद्याफलं निगमयति–समस्तास्त्विति । नन्वविद्यायाः सतत्त्वं निरूपयितुमारब्धं न च तदद्यापि दर्शितं तथा च किं कृतं स्यादत आह–अत इति । कार्यवशादिति यावत् । इदंशब्दार्थमेव स्फुटयति–सर्वात्मानमिति । ग्राहकत्वमेव व्यनक्ति–आत्मन इति । वस्त्वन्तरोपस्थितिफलमाह–तत इति । कामस्य कार्यमाह–यत इति । क्रियातः फलं लभते तद्भोगकाले च रागादिना क्रियामादधातीत्याविच्छिन्नः संसारस्तद्यावन्न सम्यग्ज्ञानं तावन्मिथ्याज्ञाननिदानमविद्या दुर्वारेत्याह–तत इति । भेददर्शननिदानमविद्येत्यविद्यासूत्रे वृत्तमित्याह–तदेतदिति । तत्रैव वाक्यशेषमनुकूलयति–वक्ष्यमाणं चेति । अविद्याऽऽत्मनः स्वभावो न वेति विचारे किं निर्णीतं भवतीत्याशङ्क्य वृत्तं कीर्तयति–इदमिति । अविद्यायाः परिच्छिन्नफलत्वमास्ते ततो वैपरीत्येन विद्यायाः कार्यमुक्तं स च सर्वात्मभावो दर्शित इति योजना । संप्रति निर्णीतमर्थं दर्शयति–सा चेति । ज्ञाने सत्यविद्यानिवृत्तिरित्यत्र वाक्यशेषं प्रमाणयति–तच्चेति । अविद्या नाऽऽत्मनः स्वभावो निवर्त्यत्वाद्रज्जुसर्पवदित्याह–तस्मादिति । निवर्त्यत्वेऽप्यात्मस्वभावत्वे का हानिरित्याशङ्क्याऽऽह–नहीति । अविद्यायाः स्वाभाविकत्वाभावे फलितमाह–तस्मादिति ॥ २० ॥

तद्वा अस्यैतदतिच्छन्दा अपहतपाप्माभयꣳ रूपम् ।
तद्यथा प्रियया स्त्रिया संपरिष्वक्तो न बाह्यं
किंचन वेद नाऽऽन्तरमेवमेवायं पुरुषः प्राज्ञेनाऽऽत्मना संपरिष्वक्तो न बाह्यं किंचन वेद नाऽऽन्तरं
तद्वा अस्यैतदाप्तकाममात्मकाममकामꣳ रूपꣳ
शोकान्तरम् ॥ २१ ॥

इदानीं योऽसौ सर्वात्मभावो मोक्षो विद्याफलं क्रियाकारकफलशून्यं स प्रत्यक्षतो निर्दिश्यते यत्राविद्याकामकर्माणि न सन्ति । तदेतत्प्रस्तुतं यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यतीति । तदेतद्वा अस्य रूपं यः सर्वात्मभावः सोऽस्य परमो लोक इत्युक्तस्तदतिच्छन्दा अतिच्छन्दमित्यर्थः । रूपपरत्वात् । छन्दः

१ ब्र. ण. °वत्सम्य° । २ क. ड. च. छ. झ. तद्वा ।

कामोऽतिगतश्छन्दो यस्माद्रूपात्तदतिच्छन्दं रूपम् । अन्योऽसौ साम्नश्छन्दःशब्दो गायत्र्यादिच्छन्दोवाची । अयं तु कामवचनोऽतः स्वरान्त एव । तथाऽप्यतिच्छन्दा इति पाठः स्वाध्यायधर्मो द्रष्टव्यः । अस्ति च लोके कामवचनप्रयुक्तश्छन्दः (न्द)शब्दः स्वच्छन्दः परच्छन्द इत्यादौ । अतोऽतिच्छन्दामित्येवमुपनेयं कामवर्जितमेतद्रूपमित्यस्मिन्नर्थे ।

तद्वा अस्यैतदित्यनन्तरवाक्यतात्पर्यमाह—इदानीमिति । विद्याविद्ययोस्तत्फलयोश्च प्रदर्शनानन्तरमिति यावत् । मोक्षमेव विशिनष्टि—यत्रेति । पदद्वयस्यास्यं दर्शयन्विवक्षितमर्थमाह-तदेतदिति । यत्रेत्यन्तशब्दितं ब्रह्मोच्यते । व्याख्यायैपदद्वयमनूद्य वैशब्दस्य प्रसिद्धार्थत्वं मन्वानो रूपशब्देन षष्ठ्याः संबन्धं दर्शयति—तदिति । अतिच्छन्दामिति प्रयोगे हेतुमाह—रूपपरत्वादिति । कथमतिच्छन्दमित्यात्मरूपं विवक्ष्यते तत्राऽऽह—छन्द इति । छन्दःशब्दस्य गायत्र्यादिच्छन्दोविषयस्य कथं कामविषयत्वमित्याशङ्क्याऽऽह—अन्योऽसाविति । गायत्र्यादिविषयत्वं त्यक्त्वा च्छन्दः (न्द) शब्दस्य कामविषयत्वमतःशब्दार्थः । यद्यात्मरूपं कामवर्जितमित्येतदत्र विवक्षितं किमिति तर्हि दैर्घ्यं तत्राऽऽह—तथाऽपीति । स्वाध्यायधर्मत्वं छान्दसत्वम् । वृद्धव्यवहारमन्तरेण कामवाचित्वं छन्दः (न्द) शब्दस्य कथमित्याशङ्क्याऽऽह—अस्ति चेति । तस्य कामवचनत्वे सति सिद्धं यद् (रू) पमनूद्य तस्यार्थमुपसंहरति—अत इति ।

तथाऽपहतपाप्म पाप्मशब्देन धर्माधर्मावुच्येते । पाप्मभिः संसृज्यते पाप्मनो विजहातीत्युक्तत्वात् । अपहतपाप्म धर्माधर्मवर्जितमित्येतत् । किंच, अभयम् । भयं हि नामाविद्याकार्यम् । अविद्यया भयं मन्यत इति ह्युक्तम् । तत्कार्यद्वारेण कारणप्रतिषेधोऽयम् । अभयं रूपमित्यविद्यावर्जितमित्येतत् । यदेतद्विद्याफलं सर्वात्मभावस्तदेतदतिच्छन्दापहतपाप्माभयं रूपं सर्वसंसारधर्मवर्जितमतोऽभयं रूपमेतत् । इदं च पूर्वमेवोपन्यस्तमतीतानन्तरब्राह्मणसमाप्तावभयं वै जनक प्राप्तोऽसीत्यागमतः । इह तु तर्कतः प्रपञ्चितं दर्शितागमार्थप्रत्ययदाढ्यार्थं ।

तथा कामवर्जितत्ववदित्येतत् । नन्वत्राधर्मवर्जितत्वमेव प्रतीयते न धर्मवर्जितत्वं पाप्मशब्दस्याधर्ममात्रवचनत्वादत आह—पाप्मशब्देनेति । उपक्रमानुसारेण

---

१ क. घ. ज. °न्दोऽस्मिन्रूप तदा° । २ क. °न्योऽसावसन्त° । ख. ङ. छ. झ. °न्योऽसावस्वरान्त° । ३ घ. च. ज. °चने प्र° । छ झ. °चनः प्र° । ४ क. ञ. °दं पदरूप° । ण. °दं पररूप° । ५ क. ङ. च. ज. झ. ढ. °पाप्मा । पा° । ६ क, घ. झ. ज. प्मा घ° । ७ झ. °त इत्ये° । ८ च. झ. ढ. °न्दा अप° ।

पाप्मशब्दस्योभयविषयत्वे विशेषणमनूद्य विवक्षितमर्थं कथयति—अपहतेति । तर्हि कार्यमेवाविद्याया निषिध्यते नेत्याह—तत्कार्येति । तस्मादर्थे तच्छब्दः । वाक्यार्थमुपसंहरति—यदेतादिति । कूर्चब्राह्मणान्तेऽपीदं रूपमुक्तमित्याह—इदं चेति । आगमवशात्तत्रोक्तं चेत्किमित्यत्र पुनरुच्यते तत्राऽऽह—इह त्विति । तद्विशेषत्वं चेदात्मवानुपपत्तिरित्यादिस्तर्कः । आगमसिद्धे किं तर्कोपन्यासेनेत्याशङ्क्याऽऽह—दर्शितेति ।

अयमात्मा स्वयं चैतन्यज्योतिःस्वभावः सर्वं स्वेन चैतन्यज्योतिषाऽवभासयति । स यत्तत्र किंचित्पश्यति रमते चरति जानाति चेत्युक्तम् । स्थितं चैतन्न्यायतो नित्यं स्वरूपं चैतन्यज्योतिष्ट्वमात्मनः । स यद्यात्माऽत्राविनष्टः स्वेनैव रूपेण वर्तते कस्मादयमहमस्मीत्यात्मानं वा बहिर्वेमानि भूतानीति जाग्रत्स्वप्नयोरिव न जानातीत्यत्रोच्यते । शृण्वत्राज्ञानहेतुम् । एकत्वमेवाज्ञानहेतुः । तत्कथमिति । उच्यते । दृष्टान्तेन हि प्रत्यक्षी भवति विवक्षितोऽर्थ इत्याह—तत्तत्र यथा लोके प्रियया इष्टया स्त्रिया संपरिष्वक्तः सम्यक्परिष्वक्तः कामयन्त्या कामुकः सन्न बाह्यमात्मनः किंचन किंचिदपि वेद मत्तोऽन्यद्वस्त्विति नं चाऽऽन्तरमयमहमस्मि सुखी दुःखी वेति । अपरिष्वक्तस्तु तया प्रविभक्तो जानाति सर्वमेव बाह्यमाभ्यन्तरं च । परिष्वङ्गोत्तरकालं त्वेकत्वापत्तेर्न जानाति ।

जीवाक्यस्य संगतिं वक्तुं वृत्तमनूद्यति—अयमिति । अनन्वागतवाक्ये चाऽऽत्मनश्चेतनत्वमुक्तमित्याह—स यदिति । आत्मनः सदा चैतन्यज्योतिष्ट्वं स्वरूपं न केवलमुक्तादागमादेव सिद्धं किंतु पूर्वोक्तादनुमानाच्च स्थितमित्याह—स्थितं चेति । वृत्तमनूद्य संबन्धं वक्तुकामश्चोदयति—स यदीति । अत्रैवं सुषुप्तिरुक्ता । चैतन्यस्वभावस्यैव सुषुप्ते विशेषज्ञानाभावं साधयति—उच्यत इति । सुषुप्तिः सप्तम्यर्थः । अज्ञानं विशेषज्ञानाभावः । कोऽसावज्ञानहेतुस्तमाह—एकत्वमिति । जीवस्य परेणाऽऽत्मना यदेकत्वं तत्कथं सुषुप्ते विशेषज्ञानाभावे कारणं तस्मिन्सत्यपि चैतन्यस्वाभावान्निवृत्तेरिति शङ्कते—तत्कथमिति । तत्रैं जीवाक्यमुत्तरत्वेनोत्थापयति—उच्यत इति । तत्र दृष्टान्तभागमाचष्टे—

---

१ ङ. च. छ. ज. च. रतिं जा° । २ क. घ. ज. ढ. °म् । अतः स्थि° । ३ ख. ङ. °नष्टश्चैतन्यस्वरूपः स्वे° । ४ घ. ज. ढ. °ष्टः सुषुप्तावस्थायां स्वे° । ५ ख. ज. °तानि जा° ६ च. ढ. सन्त्याह्° । ङ. ज. स वा° । ७ क. ख. घ. ङ. च. छ. ज. ढ. °पि न वे° । ८ छ. न वाऽऽन्त° । ९ क. ख. घ. ङ. ज. °सी चेति । १० ग. घ. ञ. °मान्त° । ११ ख. ढ. °नुवदति । १२ क. °ह । अतः स्थि° । ञ. °ह । अत इति । घ. ण. °हं न्यायत्व । १३ घ. ण. ततः । १४ घ. ञ. ण. °मादत्ते । ट्ट° ।

दृष्टान्तेनेति । एकत्वकृतो विशेषज्ञानाभावो विवक्षितोऽर्थः परिष्वङ्गप्रयुक्तसुखाभिनिवेशादज्ञानं किमिति कल्प्यते स्वाभाविकमेव तत्किं न स्यादित्याशङ्क्याऽऽह-अपरिष्वक्तस्त्विति । तर्हि परिष्वङ्गवतोऽपि स्वभावाविपरिलोपासंभवाद्विशेषविज्ञानं स्यादिति चेन्नेत्याह-परिष्वङ्गेति । स्त्रीपुंसलक्षणयोर्व्यामिश्रत्वं परिष्वङ्गस्तदुत्तरकालं संभोगफलप्राप्तिरेकत्वापत्तिस्तद्वशाद्विशेषाज्ञानमित्यर्थः ।

एवमेव यथा दृष्टन्तोऽयं पुरुषः क्षेत्रज्ञो भूतमात्रासंसर्गतः सैन्धवखिल्यवत्प्रविभक्तो जलादौ चन्द्रादिप्रतिबिम्बवत्कार्यकरण इह प्रविष्टः सोऽयं पुरुषः प्राज्ञेन परमार्थेन स्वाभाविकेन स्वेनाऽऽत्मना परेण ज्योतिषा संपरिष्वक्तः सम्यक्परिष्वक्त एकीभूतो निरन्तरः सर्वात्मा न बाह्यं किंचन वस्त्वन्तरं नाप्यान्तरमात्मन्ययमहमस्मि सुखी दुःखी वेति वेद । तत्र चैतन्यज्योतिःस्वभावत्वे कस्मादिह न जानातीति यदप्राक्षीस्तत्रायं हेतुर्मयोक्त एकत्वं यथा स्त्रीपुंसयोः संपरिष्वक्तयोः । तत्रार्थान्नानात्वं विशेषविज्ञानहेतुरित्युक्तं भवति । नानात्वे च कारणमात्मनो वस्त्वन्तरस्य प्रत्युपस्थापिकाऽविद्येत्युक्तम् । तत्र चाविद्याया यदा प्रविविक्तौ भवति तदा सर्वेणैकत्वमेवास्य भवति । ततश्च नानज्ञेयादिकारकविभागेऽसति कुतो विशेषविज्ञानप्रादुर्भावः कामो वा संभवति स्वाभाविके स्वरूपस्थ आत्मज्योतिषि ।

दार्ष्टान्तिकं व्याकरोति-एवमेवेति । भूतमात्राः शरीरेन्द्रियलक्षणास्ताभिश्चिदात्मनस्तादात्म्याध्यासात्तत्प्रतिबिम्बो जातस्ततो विभक्तवद्भातीत्यत्र दृष्टान्तमुह-सैन्धवेति । तस्य देहादौ प्रवेशं दृष्टान्तेन दर्शयति-जलादाविति । उपसर्गबलल्ब्धमर्थं कथयति-एकीभूत इति । तादात्म्यं व्यावर्तयितुं निरन्तर इत्युक्तम् । परमात्माभेदप्रयुक्तमनवच्छिन्नत्वमाह-सर्वात्मेति । एवं स्त्रीवाक्याक्षराणि व्याख्याय चोद्यपरिहारं प्रकटयति-तत्रेति । प्रत्यगात्मनीति यावत् । इहेति सुषुप्तिरुच्यते । यथा परिष्वक्तयोः स्त्रीपुंसयोरेकत्वं पुंसो विशेषविज्ञानाभावे कारणं तथा परेणाऽऽत्मना सुषुप्ते जीवस्यैकत्वं विशेषविज्ञानाभावे तस्य तत्र कारणमुक्तमित्यर्थः । स्त्रीवाक्ये श्रौतमर्थमभिधायाऽऽर्थिकमर्थमाह-तत्रेति । किं पुनर्नानात्वे कारणमिति तदाह-नानात्वे चेति । उक्तमथ योन्यामित्यादाविति यावत् । किमेतावता सुषुप्ते विशेषविज्ञानाभावस्याऽऽयातं तत्राऽऽह-तत्रेति । विशेषविज्ञाने नानात्वं तत्र चाविद्या कारणमिति स्थिते सतीति यावत् । यदा तदेति सुषुप्तिर्विवक्षिता । प्रविविक्तत्वं कार्यकारणाविद्याविरहितत्वम् । सर्वेण पूर्णेन

१ ख. घ. ञ. ढ. ण. °पुस° । २ ख. घ. च. ज. ढ. चेति । ३ ख. ग. ङ. च. झ, ढ. °विभक्तो । ४ ञ ए. °विभक्त° ।

परमात्मना सहेत्यर्थः । विज्ञानात्मा षष्ठ्योच्यते । एकत्वफलमाह—ततश्चेति ।

यस्मादेवं सर्वैकत्वमेवास्य रूपमतस्तद्वा अस्याऽऽत्मनः स्वयंज्योतिः-स्वभावस्यैतद्रूपमाप्तकामं यस्मात्तमस्तमेतत्तस्मादाप्ताः कामा अस्मिन्रूपे तदिदमाप्तकामम् । यस्य ह्यन्यत्वेन प्रविभक्तः कामस्तदनाप्तकामं भवति । यथा जागरितावस्थायां देवदत्तादिरूपं न त्विदं तथा कुतश्चित्प्रविभज्यतेऽतस्तदाप्तकामं भवति । किमन्यस्माद्रूपान्तरान्न प्रविभज्यत आहोस्विदात्मैव तद्रूपान्तरमत आह नान्यदस्त्यात्मनः । कथम् । यत आत्मकामत्वमात्मैव कामा यस्मिन्रूपेऽन्यत्र प्रविभक्ता इवान्यत्वेन काम्यमाना यथा जाग्रत्स्वप्नयोस्तस्याऽऽत्मैवान्यत्वप्रत्युपस्थापकहेतोरविद्याया अभावादात्मकाममत एवाकाममेतद्रूपं काम्यविषयाभावाच्छोकान्तरं शोकच्छिद्रं शोकशून्यमित्येतच्छोकमध्यमिति वा सर्वथाऽप्यशोकमेतद्रूपं शोकवर्जितमित्यर्थः ॥ २१ ॥

उक्तमुपजीव्याऽऽप्तकामवाक्यमवतार्य व्याचष्टे—यस्मादिति । आप्तकामत्वं समर्थयते—यस्मात्समस्तमिति । तदेव व्यतिरेकमुखेन(ण) विशदयति—यस्य हीत्यादिना । विशेषमान्तरमाकाङ्क्षापूर्वकमादाय व्याचष्टे—किमन्यस्मादित्यादिना । सुषुप्तेरन्यत्राऽऽत्मनः सकाशादन्यत्वेन प्रविभक्ता इव काम्यमानाः सुषुप्तावात्मैव कामास्तस्मादात्मकाममात्मरूपमित्येतद्दृष्टान्तेनाऽऽह—यथेति । अवस्थाद्वये खल्वात्मनः सकाशादन्यत्वेन प्रविभक्ता इव कामाः काम्यन्त इति कामाः । न चैवं सुषुप्त्यवस्थायामात्मनस्ते भिद्यन्ते किंतु सुषुप्तस्याऽऽत्मैव कामइत्यात्मकामंस्तद्रूपमित्यर्थः । तस्याऽऽत्मैवेत्यत्र हेतुमाह—अन्यत्वेति । यद्यपि सुषुप्तेऽविद्या विद्यते तथाऽपि न साऽऽत्मव्यक्ताऽस्तीत्यनर्थपरिहारोपपत्तिरित्यर्थः । कामानामात्माश्रयत्वपक्षं प्रतिक्षेप्तुं तृतीयं विशेषणम् । शोकमध्यं शोकस्यान्तरं प्रत्यग्भूतमिति यावत् । तर्हि शोकवत्त्वं प्राप्तं नेत्याह—सर्वथेति । पक्षद्वयेऽपि शोकशून्यमात्मस्वरूपम् । न हि शोको येनाऽऽत्मवारस्य शोकवत्त्वं शोकस्याऽऽत्माधीनसत्तास्फूर्तेरात्मातिरेकेणाभावादित्यर्थः ॥ २१ ॥

अत्र पिताऽपिता भवति माताऽमाता लोका अलोका देवा अदेवा वेदा अवेदाः । अत्र स्तेनोऽ-

१ ग °मा यस्मिं° । २ ख घ ङ च. ज ढ कामा य° । ग. कामोऽस्मिं° । ३ क. ख. °यास्तेऽस्या° । ४ ग. °स्तस्मादात्मे° । ५ घ ञ ण कामस्त । ६ क. कामा । ७ क. °कामं तद्रू° । ८ ख ढ. °मयतद्रू° ।

स्तेनो भवति भ्रूणहाऽभ्रूणहा चाण्डालोऽचाण्डालः
पौल्कसोऽपौल्कसः श्रमणोऽश्रमणस्तापसोऽताप-
सोऽन्वागतं पुण्येनानन्वागतं पापेन तीर्णो हि तदा
सर्वाञ्छोकान्हृदयस्य भवति ॥ २२ ॥

प्रकृतः स्वयंज्योतिरात्माऽविद्याकामकर्मविनिर्मुक्त इत्युक्तम् । असङ्गत्वादात्मन आगन्तुकत्वाच्च तेषाम् । तत्रैवमाशङ्का जायते चैतन्यस्वभावत्वे सत्यप्येकीभावान्न जानाति स्त्रीपुंसयोरिव संपरिष्वक्तयोरित्युक्तम् । तत्र प्रासङ्गिकमेतदुक्तं कामकर्मादिवत्स्वयंज्योतिष्ट्वमप्यस्याऽऽत्मनो न स्वभावः । यस्मात्संप्रसादे नोपलभ्यत इत्याशङ्कायां प्राप्तायां तन्निराकरणाय स्त्रीपुंसयोर्दृष्टान्तोपादानेन विद्यमानस्यैव स्वयंज्योतिष्ट्वस्य सुषुप्तेऽग्रहणमेकीभावाद्धेतोर्न तु कामकर्मादिवदागन्तुकम् । इत्येतत्प्रासङ्गिकमभिधाय यत्प्रकृतं तदेवानुप्रवर्तयति । अत्र चैतत्प्रकृतमविद्याकामकर्मविनिर्मुक्तमेव तद्रूपं यत्सुषुप्त आत्मनो गृह्यते प्रत्यक्षत इति । तदेतद्यथाभूतमेवाभिहितं सर्वसंबन्धतीतमेतद्रूपमिति यस्मादत्रैतास्मिन्सुषुप्तस्थानेऽतिच्छन्दापहतपाप्माभयमेतद्रूपं तस्मादत्र पिता जनकः । तस्य च जनयितृत्वाद्यत्पितृत्वं पुत्रं प्रति तत्कर्मनिमित्तं तेन च कर्मणाऽयमसंबद्धोऽस्मिन्काले तस्मात्पितापुत्रसंबन्धनिमित्तात्कर्मणो विनिर्मुक्तत्वात्पिताऽप्यपिता भवति । तथा पुत्रोऽपि पितुरपुत्रो भवतीति सामर्थ्याद्गम्यते । उभयोर्हि संबन्धनिमित्तं कर्म तदयमतिक्रान्तो वर्तते । अपहतपाप्मेति ह्युक्तम् ।

अत्र पितेत्यादिवाक्यमवतारयितुं वृत्तमनुवदति—प्रकृत इति । अविद्यादिनिर्मोके हेतुद्वयमाह-असङ्गत्वादिति । यद्यपि नाऽऽगन्तुकत्वमविद्याया युक्तं तथाऽप्यभिव्यक्ता साऽनर्थहेतुरागन्तुकीति द्रष्टव्यम् । स्त्रीवाक्यनिरस्यां शङ्कामनुवदति—तत्रेति । कामादिविमोके दर्शिते सतीति यावत् । स्वभावस्यापायो न

---

१ ख. घ ङ. च. झ. ढ. क्तियुक्त । २ ख. ङ. झ. इत्येवमाश° । ३ घ. च. °णा. थैवं स्त्री° । ४ ख. ग. ङ. च. छ ज. झ. ढ. °पुंदृष्टा° । ५ ग. ङ. च. झ. ढ. °नुव । ६ घ. ज. °दत्रास्मि° । ७ च झ. °न्दा अप° । ८ ख. ङ. ढ. °दत्रास्मिन्सुषुप्तेऽपि° । ९ ख. ङ. छ. झ ढ. °स्य ज° । १० क. ख. घ. ङ. च. छ. झ. ढ. °गेत्तस्य कर्म° । ११ घ. ग. °व्यक्त्या सा ।

संभवतीत्यभिप्रेत्य हेतुमाह—यस्मादिति । शङ्कोत्तरत्वेन स्त्रीवाक्यमवतार्य तत्ता-त्पर्यं पूर्वोक्तमनुकीर्तयति—स्वयमिति । वृत्तमनूद्योत्तरग्रन्थमुत्थापयति—इत्येत-दिति । स्वयंज्योतिष्ट्वस्य स्वाभाविकत्वमेतच्छब्दार्थः । प्रासङ्गिकं कामादेरा-गन्तुकत्वोक्तिप्रसङ्गादागतमिति यावत् । प्रकृतमेव दर्शयति -अत्र चेति । अति-च्छन्दादिवाक्यं सप्तम्यर्थः । प्रत्यक्षतः स्वरूपचैतन्यवशाद्यथोक्तात्मरूपस्य सुषुप्ते गृह्यमाणत्वमुत्थितस्य परामर्शादवगमेयम् । कामादिसंबन्धवदात्मनस्तद्रहितमपि रूपं कल्पितमेवेत्याशङ्क्याऽऽह—तदेतदिति । प्रकृतमर्थमुक्त्वोत्तरवाक्यस्थसप्तम्यर्थ-माह—एतस्मिन्निति । जनकोऽप्यत्रापिता भवतीति संबन्धः । पिताऽप्यत्रापिता भवतीत्युपपादयति—तस्य चेत्यादिना । यथाऽस्मिन्काले पिता पुत्रस्यापिता भवति तद्वदित्याह—तथेति । नास्यार्थस्य प्रतिपादकः शब्दोऽस्तीत्याशङ्क्याऽऽह—सामर्थ्यादिति । तदेव सामर्थ्यं दर्शयति—उभयोरिति । सुषुप्ते कर्मातिक्रमे प्रमाणमाह—अपहतेति । पुनर्लोकदेवशब्दावनुवादार्थौ ।

तथा माताऽमाता लोकाः कर्मणा जेतव्या जिताश्च तत्कर्मसंबन्धा-भावाल्लोका अलोकाः । तथा देवाः कर्माङ्गभूतास्तत्कर्मसंबन्धात्तथा-हेवा अदेवाः । तथा वेदाः साध्यसाधनसंबन्धाभिधायकाँ मन्त्रलक्ष-णाश्चाभिधा-कत्वेन कर्माङ्गभूता अधीता अध्येतव्याश्च कर्मनिमित्त-मेव संबध्यन्ते पुरुषेण तत्कर्मातिक्रमणादेतस्मिन्काले वेदा अप्यवेदाः संपद्यन्ते ।

वाक्यान्तरमादाय व्याचष्टे—तथेत्यादिना । साध्यसाधनसंबन्धाभिधायका ब्राह्मणलक्षणा इति शेषः । अभिधायकत्वेन प्रमाणत्वेन प्रमेयत्वेन चेत्यर्थः ।

न केवलं शुभकर्मसंबन्धातीतः किं तर्ह्यशुभैरप्यत्यन्तघोरैः कर्मभि-रसंबद्ध एवायं वर्तत इत्येतमर्थमाह—अत्र स्तेनो ब्राह्मणसुवर्णहर्ता भ्रूणघ्ना सह पाठादवगम्यते । स तेन घोरेण कर्मणैतस्मिन्काले विनि-र्मुक्तो भवति । येनायं कर्मणा महापातकी स्तेन उच्यते । तथा भ्रूण-हाऽभ्रूणहा तथा चाण्डालो न केवलं प्रत्युत्पन्नेनैव कर्मणा विनिर्मुक्तः किं तर्हि सहजेनाप्यत्यन्तनिकृष्टजातिप्रापकेणापि विनिर्मुक्त एवा-यम् । चाण्डालो नाम शूद्रेण ब्राह्मण्यामुत्पन्नश्चण्डाल एव चाण्डालः ।

---

१ घ. ञ. ण. °ति । एवमिति । २ घ. ञ ण. °त्मस्वरू° । ३ ञ ण. °प्यपि° । ४ घ. ङ. °तीत्येतदुप° । ५ क. ख. ढ. तस्येति । ६ क. ख ग. ङ छ. ज. झ. ढ. °बन्धविधा° । ७ क. ख. ग. ङ. च. छ. ज. झ. ढ °का ब्राह्मणलक्षणा न° । ८ घ. °ता यमाना अ° । ९ ङ. अवे° ।

स जातिनिमित्तेन कर्मणाऽसंबद्धत्वाच्चाण्डालो भवति । पौल्कसः पुल्कस एव पौल्कसः शूद्रेणैव क्षत्रियायामुत्पन्नः । सोऽप्यपुल्कसो भवति । तथाऽऽश्रमलक्षणैश्च कर्मभिरसंबद्धो भवतीत्युच्यते । श्रमणः परिव्राड्यत्कर्मनिमित्तो भवति स तेन विनिर्मुक्तत्वादश्रमणः । तथा तापसो वानप्रस्थोऽतापसः सर्वेषां वर्णाश्रमादीनामुपलक्षार्थमुभयोर्ग्रहणम् ।

अत्र स्तेनोऽस्तेनो भवतीत्यादेस्तात्पर्यमाह—न केवलमिति । स्तेनशब्दोऽत्र चोरमात्रे भाति कथं विशेषणमित्याशङ्क्याऽऽह—भ्रूणघ्नेति । भ्रूणहा च वरिष्ठब्रह्महन्तोच्यते । तदेव घोरं कर्म विशिनष्टि—येनेति । महत्पातकमस्येति व्युत्पत्त्या महापातकी स्तेन. । स्तेनादिवाक्येन चाण्डालादिवाक्यस्य गतार्थत्वमाशङ्क्याऽऽह—नेत्यादिना । प्रत्युत्पन्नमागन्तुकम् ।

" ब्राह्मण्यां क्षत्रियात्सूतो वैश्याद्वैदेहकस्तथा ।
शूद्राज्जातस्तु चाण्डालः सर्वधर्मबहिष्कृतः "

इति श्रुतिमाश्रित्याऽऽह—चाण्डालो नामेति ।

' जातो निषादाच्छूद्रायां जात्या भवति पुल्कसः ' ।

इति स्मृतेः शूद्रायां ब्राह्मणाज्जातो निषादः स च जात्या शूद्रस्तस्मात्क्षत्रियायां जातः पुल्कसो भवतीति व्याख्यानमुपेत्याऽऽह—शूद्रेणेवेति । श्रमणादिवाक्यस्य तात्पर्यमाह—तथेति । तथा चाण्डालवदिति यावत् । परिव्राट्तापसयोरेव ग्रहणात्तत्कर्मायोगेऽपि सौषुप्तस्य वर्णाश्रमान्तरकर्मयोगं शङ्कित्वाऽऽह—सर्वेषामिति । आदिशब्देन वयोवस्थादि गृह्यते ।

किं बहुनाऽन्वागतं नान्वागतमनन्वागतमसंबद्धमित्येतत्पुण्येन शास्त्रविहितेन कर्मणा तथा पापेन विहिताकरणप्रतिषिद्धक्रियालक्षणेन । रूपपरत्वान्नपुंसकलिङ्गम् । अभयं स्वरूपमिति ह्यनुवर्तते । किं पुनरसंबद्धत्वे कारणमिति तद्धेतुरुच्यते—तीर्णोऽतिक्रान्तो हि यस्मादेवंरूपस्तदा तस्मिन्काले सर्वाञ्छोकाञ्शोकाः कामाः । इष्टविषयप्रार्थना हि तद्विषयवियोगे शोकत्वमापद्यते । इष्टं हि विषयमप्राप्तं वियुक्तं चोद्दिश्य चिन्तयानस्तदगुणान्संतप्यते पुरुषोऽतः शोको रतिः काम

---

१ क. ग. °त्यन्नस्तथा सो° । २ ग घ. ज. °था चाऽऽश्र° । ३ घ ञ °देहिक° । ४ क. ख. ञ. ढ. °ति तथा चाण्डालवदिति यावत् । श्र° । ५ क. ख. ञ. ड. °ति । प° । ६ क. ग घ. च. छ. ज. °यन्त । इ° । ७ च. ज ढ °षोऽन्तः शा° ।

इति पर्यायाः । यस्मात्सर्वकामातीतो ह्यत्रायं भवति । न कंचन कामं कामयतेऽतिच्छन्दा इति ह्युक्तं तत्प्रक्रियापतितोऽयं शोकशब्दः कामवचन एव भवितुमर्हति । कामश्च कर्महेतुः । वक्ष्यति हि–" स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते " इति । अतः सर्वकामातितीर्णत्वाद्युक्तमुक्तमनन्वागतं पुण्येनत्यादि ।

सौषुप्ते पुरुषे प्रकृते कथमनन्वागतामिति नपुंसकप्रयोगस्तत्राऽऽह–रूपपरत्वादिति । तत्परत्वे हेतुमनुषङ्गं दर्शयति–अभयमिति । हेतुवाक्यमाकाङ्क्षापूर्वकमुत्थाप्य व्याचष्टे–किं पुनरित्यादिना । यस्मादतिच्छन्दादिवाक्योक्तस्वभावोऽयमात्मा सुषुप्तिकाले हृदयनिष्ठान्सर्वाञ्छोकानतिक्रामति तस्मादेतदात्मरूपं पुण्यपापाभ्यामनन्वागतं युक्तमित्यर्थः । शोकशब्दस्य कामविषयत्वं साधयति–इष्टेति । कथं तस्याः शोकत्वापत्तिरित्याशङ्क्याऽऽह–इष्टं हीति । तेषां पर्यायत्वेऽपि प्रकृते किमायातं तदाह–यस्मादिति । अत्रेति सुषुप्तिरुच्यते । अतः सर्वकामातितीर्णत्वादित्युत्तरत्र संबन्धः । न केवलं शोकशब्दस्य कामविषयत्वमुपपन्नमेव किंतु सैनिधेरापे सिद्धमित्याह–न कंचनेति । शोकशब्दस्य कामविषयत्वेऽपि तदत्ययमात्रात्कथं कर्मात्ययः स्यादित्याशङ्क्याऽऽह–कामश्चेति । तत्र वाक्यशेषं प्रमाणयति–वक्ष्यति हीति । कामस्य कर्महेतुत्वे सिद्धे फलितमाह–अत इति ।

हृदयस्य हृदयमिति पुण्डरीकाकारो मांसपिण्डस्तत्स्थमन्तःकरणं बुद्धिर्हृदयमित्युच्यते । तास्थ्यान्मञ्चक्रोशनवत् । हृदयस्य बुद्धेर्ये शोकाः बुद्धिसंश्रया हि ते । कामः संकल्पो विचिकित्सेत्यादि सर्वं मन एवेत्युक्तत्वात् । वक्ष्यति च–" कामा येऽस्य हृदि श्रिताः " इति आत्मसंश्रयभ्रान्त्यपनोदाय होदं वचनं–हृदि श्रिता हृदयस्य शोका इति च । हृदयकरणसंबन्धातीतश्चायमस्मिन्काले ऽतिक्रामति मृत्यो रूपाणीति ह्युक्तम् । हृदयकरणसंबन्धातीतत्वात्तत्संश्रयकामसंबन्धातीतो भवतीति युक्ततरं वचनम् ।

हृदयस्य शोकानतिक्रामतीत्यत्र हृदयशब्दार्थमाह–हृदयमिति । मांसपिण्डविशेषविषयं हृदयपदं कथं बुद्धिमाहेत्याशङ्क्याऽऽह–तास्थ्यादिति । यथा मञ्चाः क्रोशन्तीति मञ्चक्रोशनमुच्यमानं मञ्चस्थान्पुरुषानुपचारादाह तथा हृदयस्थत्वाद्बुद्धेरुपचाराद्बुद्धिं हृदयशब्दो दर्शयतीत्यर्थः । हृदयशब्दार्थमुक्त्वा तस्य संबन्धं दर्शयति–हृदयस्येति । तानतिक्रान्तो भवतीति शेषः । आत्मा-

१ क. ख. ट. °प्ते का° । २ ख. ञ. तस्य । ३ क. ख. ढ वाक्यं प्र° । ४ ख. ङ. [illegible] बु° । ५ क. ख. ग. ङ. च. छ. झ. ढ. °यसं° । ६ घ. ज. वचः ।

अयास्ते न बुद्धिमाश्रयन्तीत्याशङ्कयाऽऽह--बुद्धीति । कथं तर्हि केचिदात्माश्रयत्वं तेषां वदन्तीत्याशङ्कय भ्रान्तिवशादित्याह-आत्मेति । भवतु कामानां हृदयाश्रितत्वं तथाऽपि तत्संबन्धद्वारा तदाश्रयत्वसंभवात्कथमात्मा सुषुप्ते कामानतिवर्तते तत्राऽऽह-हृदयेति । तत्संबन्धातीतत्वे श्रुतिसिद्धे फलितमाह-हृदयैकरणेति ।

ये तु वादिनो हृदि श्रिताः कामा वासनाश्च हृदयसंबन्धिनमात्मानमुपसृप्योपश्लिष्यन्ति हृदयवियोगेऽपि चाऽऽत्मन्यवतिष्ठन्ते पुटतैलस्थ इव पुष्पादिगन्ध इत्याचक्षते । तेषां कामः संकल्पो हृदये ह्येव रूपाणि हृदयस्य शोका इत्यादीनां वचनानामानर्थक्यमेव । हृदयकरणोत्पाद्यत्वादिति चेत् । न । हृदि श्रिता इति विशेषणात् । न हि हृदयस्य करणमात्रत्वे हृदि श्रिता इति वचनं समञ्जसं हृदये ह्येव रूपाणि प्रतिष्ठितानीति च । आत्मविशुद्धेश्च विवक्षितत्वाद्हृच्छ्रयणवचनं यथार्थमेव युक्तम् । ध्यायतीव लेलायतीवेति च श्रुतेरन्यार्थासंभवात् ।

भर्तृप्रपञ्चप्रस्थानमुत्थापयति-ये त्विति । सत्येव हृदये तन्निष्ठानां कामादीनामात्मन्युपश्लेषो न तन्निवृत्तावित्याशङ्कयाऽऽह--हृदयवियोगेऽपीति । तन्मते श्रुतिविरोधमाह-तेषामिति । हृदयेन करणेनोत्पाद्यत्वादात्मविकाराणामपि कामादीनां हृदयसंबन्धसंभवान्नाऽऽनर्थक्यं श्रुतीनामिति शङ्कते-हृदयेति । न कामादितंबन्धमात्रं हृदयस्य श्रुत्यर्थः किंत्वाश्रयाश्रयित्वं तच्च करणत्वे न स्यात् । नहि चक्षुराद्याश्रयं रूपादिज्ञानं दृष्टमिति परिहरति-न हृदीति । चकारादवचनं न समञ्जसमिति संबध्यते । प्रदीपायत्तं घटज्ञानमिति वदन्तः करणायत्तमात्माश्रितं कामादीति तस्य तदाश्रयत्ववचनमौपचारिकमित्याशङ्कयाऽऽह-आत्मविशुद्धेश्चेति । इतश्चेदं यथार्थमेवेत्याह-ध्यायतीवेति । अन्यार्थासंभवादवुद्ध्याश्रयणवचनस्येति शेषः ।

कामा येऽस्य हृदि श्रिता इति विशेषणादात्माश्रया अपि सन्तीति चेत् । न । अनाश्रितापेक्षत्वात् । नात्राऽऽश्रयान्तरमपेक्ष्यं ये हृदीति विशेषणं किं तर्हि ये हृद्यनाश्रिताः कामास्तानपेक्ष्य विशेषणम् । ये त्वप्ररूढा भविष्या भूताश्च प्रतिपक्षतो निवृत्तास्ते नैव हृदि श्रिताः संभाव्यन्ते च ते । अतो युक्तं तानपेक्ष्य विशेषणम् । ये प्ररूढा वर्तमाना विषये ते सर्वे प्रमुष्यन्त इति ।

---

१ क. °मादीनां । २ क. °दयकरणेति । ३क. °दयेति । ४ क. ख. ग. घ. ङ. छ. ज. झ. °पसर्प्योप° । ५ ढ. घटादिज्ञा° । ६ ख. °पेक्षते ह° । ७ ग. च. झ. ढ. °क्ष्य ह° । ८ ख. ङ. च. छ. ढ. °विष्यन्तो भू° । ९ ख. ग. घ. ङ. च. छ. °न्ते । अ° ।

दक्षिणेनाक्ष्णा पश्यतीत्युक्ते वामेन न पश्यतीतिवत्प्रमुच्यन्ते हृदि श्रिता इति विशेषणमाश्रित्याऽऽशङ्कते—कामा य इति । प्रकारान्तरेण विशेषणस्यार्थवत्त्वं दर्शयति—नेत्यादिना । अत्रेति प्रकृतश्रुत्युक्तिः । आश्रयान्तरं बुद्ध्यतिरिक्तमात्माख्यम् । बुद्ध्यनाश्रिताः कामा एव न सन्ति यदपेक्षया हृदयाश्रयत्वविशेषणमित्याशङ्क्याऽऽह—ये त्विति । प्रतिपक्षतो विषयदोषदर्शनादिति यावत् । कामानां वर्तमानत्वनियमाभावाद्भूतभविष्यतामपि संभवे फलितमाह—अत इति ।

तथाऽपि विशेषणानर्थक्यमिति चेत् । न । तेषु यत्नाधिक्यबोधेयार्थत्वात् । इतरथाऽश्रुतमनिष्टं च कल्पितं स्यादात्माश्रयत्वं कामानाम् । न कंचन कामं कामयत इति प्राप्तप्रतिषेधादात्माश्रयत्वं कामानां श्रुतमेवेति चेत् । न । सधीः स्वप्नो भूत्वेति परानिमित्तत्वात्कामाश्रयत्वप्राप्तेरसङ्ग्वचनाच्च । न हि कामाश्रयत्वेऽसङ्ग्वचनमुपपद्यते । सङ्गश्च काम इत्यवोचाम । आत्मकाम इति श्रुतेरात्मविषयोऽस्य कामो भवतीति चेत् । न । व्यतिरिक्तकामाभावार्थत्वात्तस्याः ।

हृदयानाश्रितभूतभविष्यत्कामसंभवेऽपि सर्वकामनिवृत्तेर्विवक्षित्वाद्वर्तमानविशेषणमनर्थकमिति शङ्कते—तथाऽपीति । अतीतानागतकामाभावः संभवति स्वतः सिद्धो न तन्निवृत्तौ यत्नोऽपेक्ष्यते शुद्धात्मदिदृक्षुणा तु मुमुक्षुणा वर्तमानकामनिरोधे यत्नाधिक्यमाधेयमिति ज्ञापयितुं वर्तमानग्रहणमिति परिहरति—न तेष्विति । यदि यथोक्तं व्याख्यानमनादृत्याऽऽत्माश्रयत्वमेव कामानामाश्रीयते तदाऽश्रुतं मोक्षासंभवेनानिष्टं च कल्पितं स्यादित्याह—इतरथेति । अश्रुतत्वमसिद्धमिति शङ्कते—न कंचनेति । अर्थादात्माश्रयत्वं श्रुतमेव कामानामित्येतद्दूषयति—नेत्यादिना । निषेधो हि प्राप्तिमपेक्षते न वास्तवं कामानामात्मधर्मत्वं प्राप्तिस्तु भ्रान्त्याऽपि संभवति । तस्मादात्मनो वस्तुतो न कामाद्याश्रयत्वमित्यर्थः । इतश्चाऽऽत्मनो न कामाद्याश्रयत्वमित्याह—असङ्गेति । नन्वसङ्ग्वचनमात्मनः सङ्गनभावं साधयत्तस्य कामित्वे न विरुध्यते तत्राऽऽह—सङ्गश्चेति । कामश्च सङ्गस्ततोऽसिद्धो हेतुरत्रेति शेषः । वाक्यान्तरमाश्रित्याऽऽत्मनि कामाश्रयत्वं शङ्कित्वा दूषयति—आत्मेत्यादिना ।

वैशेषिकादितन्त्रन्याय[1]योपपन्नमात्मनः कामाद्याश्रयत्वमिति चेत् । न । हृदि श्रिता इत्यादिविशेष[2]श्रुतिविरोधानपेक्ष्यास्ता वैशेषिकादितन्त्रोपपत्तयः । श्रुतिविरोधे न्यायाभासत्वोपगमात् । स्वयंज्योति-

---

१ घ. ण. स्थिता । २ घ. ण. बुद्धिमना° । ३ क. ख. °ह । य इ° । ढ. °ह । ये प्रलुडा इ° । ४ घ. ङ. ञ. °क्याद्धानार्थं । ५ घ. ण. °रसाय य° । ६ झ. °षणश्र° । ७ घ. ज. °पेक्षास्ता ।

ष्टृबाधनाच्च । कामादीनां च स्वप्ने केवलदृशिमात्रविषयत्वात्स्वयंज्योतिष्ट्वं सिद्धं स्थितं च बाध्येत । आत्मसमवायित्वे दृश्यत्वानुपपत्तेश्चक्षुर्गतविशेषवत् । द्रष्टृहिं दृश्यमर्थान्तरभूतमिति द्रष्टुः स्वयंज्योतिष्ट्वं सिद्धम् । तद्बाधितं स्याद्यदि कामाद्याश्रयत्वं परिकल्प्येत ।

इच्छादयः क्वचिदाश्रिता गुणत्वाद्रूपादिवदित्यनुमानात्परिशेषात्कामाद्याश्रयत्वमात्मनः सेत्स्यतीति शङ्कते—वैशेषिकादीति । श्रुत्यवष्टम्भेन निराचष्टे—नेत्यादिना । स्वयंज्योतिष्ट्वबाधनाच्च नाऽऽत्माश्रयत्व कामादीनामिति शेषः । तदेव विवृणोति—कामादीनामिति । स्थितं चानुमानादिति शेषः । यद्यत्र समवेतं तत्तेन न दृश्यते । यथा चक्षुर्गतं काष्ण्यं तेनैव चक्षुषा न दृश्यते तथा कामादीनामात्मसमवायित्वे दृश्यत्वं न स्याददृश्यत्वबलेनैवं स्वयंज्योतिष्ट्वं साधितं तथा च तद्बाधे पूर्वोक्तमनुमानमपि बाध्येतेत्यर्थः । कथं कामादीनामात्मदृश्यत्वमाश्रित्य स्वप्ने स्वयंज्योतिष्ट्वस्योपदिष्टत्वं तत्राऽऽह—द्रष्टुरिति । स्थाऽपि तेषामात्माश्रयत्वे काऽनुपपत्तिस्तत्राऽऽह-तद्बाधितमिति ।

सर्वशास्त्रार्थविप्रतिषेधाच्च । परस्यैकदेशकल्पनायां कामाद्याश्रयत्वे च सर्वशास्त्रार्थजातं कुप्येत । एतच्च विस्तरेण चतुर्थेऽवोचाम । महता हि प्रयत्नेन कामाद्याश्रयत्वकल्पनाः प्रतिषेद्धव्या आत्मनः परैकत्वशास्त्रार्थसिद्धेः । तत्कल्पनायां पुनः क्रियमाणायां शास्त्रार्थ एव बाधितः स्यात् । यथेच्छादीनामात्मधर्मत्वं कल्पयन्तो वैशेषिका नैयायिकाश्चोपनिषच्छास्त्रार्थेन न संगच्छन्ते, तथेयमपि कल्पनोपनिषच्छास्त्रार्थबाधनान्नाऽऽदरणीया ॥ २२ ॥

यत्तु परमात्मैकदेशं जीवमाश्रित्य तदाश्रितं कामादीति तत्राऽऽह सर्वशास्त्रेति । तदेव स्फुटयति—परस्येति । शास्त्रार्थजातं निरवयवत्वप्रत्यगेकत्वादि तस्य कथं कोपः स्यादित्याशङ्क्याऽऽह—एतच्चेति । चतुर्थे चेद्भर्तृप्रपञ्चमतं निरस्तं तर्हि पुनर्निराकरणमकिंचित्करमित्याशङ्क्याऽऽह—महतेति । परेण सह प्रत्यगात्मनो यदेकत्वं तस्य शास्त्रार्थस्य सिद्धयर्थमिति यावत् । अंशत्वादिकल्पनायामपि शास्त्रार्थसिद्धिमाशङ्क्याऽऽह—तत्कल्पनायामिति । भर्तृप्रपञ्चकल्पनाया हेयत्वमुपसंहरति—यथेत्यादिना ॥ २२ ॥

---

१ ख. घ. ङ. ज. ना स्व° । २ ख. °वल दृ° । ३ ख. ग ङ. च. छ. ढ. °षणा° । ४ क. ङ. छ. झ. °कल्पेत । स° । ग. घ. °कल्प्यते । स° । ज. °कल्पते । ५ घ. ण. °त्वे तद्दृश्य° । ञ. °त्वेन दृ° । ६ ञ. स्यात्तद्दृ° । ७ क. छ. °शास्त्रप्र° । घ. ज. शास्त्रवि° । ८ च. °र्थप्र° । ९ क. ग. ङ. च. छ. ढ. °यक° । १० ग. ङ. °सिद्धये । तृ° । ११ क. ख. ढ. °शत्वक° । १२ ज. °ति । तथ° ।

स्त्रीपुंसयोरिवैकत्वान्न पश्यतीत्युक्तं स्वयंज्योतिरिति च । स्वयंज्योतिष्ट्वं नाम चैतन्यात्मस्वभावता । यदि ह्यग्न्युष्णत्वादिवच्चैतन्यात्मस्वभाव आत्मा स कथमेकत्वेऽपि हि स्वभावं जह्यान्न जानीयात् । अथ न जहाति कथमिह सुषुप्ते न पश्यति । विप्रतिषिद्धमेतच्चैतन्यमात्मस्वभावो न जानाति वेति । न विप्रतिषिद्धमुभयमप्येतदुपपद्यत एव । कथम्—

यद्वै तन्न पश्यति पश्यन्वै तन्न पश्यति
नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वात् । न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येत ॥ २३ ॥

यद्वै सुषुप्ते तन्न न पश्यति पश्यन्वै तत्तत्र पश्यन्नेव न पश्यति । यत्तत्र सुषुप्ते न पश्यतीति जानीषे तन्न तथा गृह्णीथाः । कस्मात् । पश्यन्वै भवति तत्र ।

यद्वै तन्न पश्यतीत्यादेः संबन्धं वक्तुं वृत्तं कीर्तयति—स्त्रीपुंसयोरिति । चकारादुक्तं स्वयंज्योतिष्ट्वमिति संबध्यते । किमिदं स्वयंज्योतिष्ट्वमिति तदाह—स्वयंज्योतिष्ट्वं नामेति । एवं वृत्तमनूद्योत्तरवाक्यव्याख्यार्थं शङ्कामाह—यदीत्यादिना । स्वभावत्यागमेवाभिनयति—न जानीयादिति । तत्त्यागाभावे सुषुप्ते विशेषविज्ञानराहित्यमयुक्तमित्याह—अथेत्यादिना । आत्मा चिद्रूपोऽपि सुषुप्ते विशेषं न जानाति चेत्किं दुष्यतीत्याशङ्क्याऽऽह—विप्रतिषिद्धमिति । परिहरति—नेति । उभयं चैतन्यस्वभावत्वं विशेषविज्ञानराहित्यं चेत्यर्थः । उभयस्वीकारे शङ्कितं विप्रतिषेधमाकाङ्क्षापूर्वकं श्रुत्या निराकरोति—कथमित्यादिना । यद्वै तदित्यादिवाक्यं चोदितार्थानुवादस्तत्परिहारस्तु पश्यन्नित्यादिवाक्यमिति विभजते—यत्तत्रेति ।

नन्वेवं न पश्यतीति सुषुप्ते जानीमो यतो न चक्षुर्वा मनो वा दर्शने करणं व्यापृतमस्ति । व्यापृतेषु हि दर्शनश्रवणादिषु पश्यतीति व्यवहारो भवति शृणोतीति वा । न च व्यापृतानि करणानि पश्यामः । तस्मान्न पश्यत्येवायम् । न हि । किं तर्हि पश्यन्नेव भवति । कथम् । न हि यस्मादद्रष्टुर्दृष्टिकर्तुर्या दृष्टिस्तस्या दृष्टेर्विपरिलोपो विनाशः स न विद्यते । यथाऽग्नेरौष्ण्यं यावदग्निभावि तथाऽयं चाऽऽत्मा

१ च. ढ ह्यग्नेरुष्ण° । २ स. ड. च. छ झ. ढ. °पि स्व° । ३ झ. °षुप्तादौ त° । ४ घ गृह्णीथा. । ५ झ. °हणीयात् । क° । ६ ध. अ. ण. तत्राऽऽह ।

द्रष्टाऽविनाश्यतोऽविनाशित्वादात्मनो दृष्टिरप्यविनाशिनी यावद्द्रष्टृभावि-नी हि सा ।

न हीत्यादिवाक्यनिरस्यमाशङ्कतेऽत्राह—नन्विति । चक्षुरादिव्यापारा-भावेऽपि सुषुप्ते दर्शनादि किं न स्यादित्याशङ्क्याऽऽह--व्यापृतेष्विति । अस्तु तर्हि तत्रापि करणव्यापारो नेत्याह--न चेति । अयमिति सुषुप्तपुरुषोक्तिः । न पश्य-त्येवेति नियमं निषेधति--न हीति । तत्र हेतुं वक्तुं प्रश्नपूर्वकं प्रतिज्ञां मुञ्चतीति-किं तर्हीति । तत्राऽऽकाङ्क्षापूर्वकं हेतुवाक्यमुत्थाप्य व्याचष्टे--कथमित्यादि-ना । अविनाशित्वादित्येतद्व्याकुर्वन्दृष्टेर्विनाशाभावं स्पष्टयति--यथेत्यादिना ।

ननु विप्रतिषिद्धमिदमभिधीयते द्रष्टुः सा दृष्टिर्न विपरिलुप्यत इति च । दृष्टिश्च द्रष्टृ क्रियते । दृष्टिकर्तृत्वाद्धि द्रष्टेत्युच्यते । क्रिय-माणा च द्रष्ट्रा दृष्टिर्न विपरिलुप्यत इति चाशक्यं वक्तुम् । ननु न विपरिलुप्यत इति वचनादविनाशिनी स्यात् । न । वचनस्य ज्ञापक-त्वात् । नहि न्यायप्राप्तो विनाशः कृतकस्य वचनशतेनापि वारयितुं शक्यते । वचनस्य यथाप्राप्तार्थज्ञापकत्वात् ।

द्रष्टुर्दृष्टिर्न पश्यतीत्यत्र विरोधं चोदयति—नन्विति । विप्रतिषेधमेव स्पष्टयति—दृष्टिश्चेति । कार्यस्यापि वचनादविनाशः स्यादिति शङ्कते—नन्विति । तस्या-कारकत्वान्नैवमिति परिहरति—न । वचनस्येति । तदेव स्फुटयति—नहीति । यत्कृतकं तदनित्यमिति व्याप्त्यनुगृहीतानुमानविरोधाद्वचो न कार्यनित्यत्वबोधक-मित्यर्थः ।

नैष दोषः । आदित्यादिप्रकाशकत्ववद्दर्शनोपपत्तेः । यथाऽऽदित्या-दयो नित्यप्रकाशस्वभावा एव सन्तः स्वाभाविकेन नित्येनैव प्रकाशेन प्रकाशयन्ति । न त्वप्रकाशात्मानः सन्तः प्रकाशं कुर्वन्तः प्रकाशय-न्तीत्युच्यन्ते । किं तर्हि स्वभावेनैव नित्येन प्रकाशेन । तथाऽयमप्या-त्माऽविपरिलुप्तस्वभावया दृष्ट्या नित्यया द्रष्टेत्युच्यते । गौणं तर्हि द्रष्टृत्वम् । नैवमेव मुख्यत्वोपपत्तेः । यदि ह्यन्यथाऽऽत्मनो द्रष्टृत्वं दृष्टं तदाऽस्य द्रष्टृत्वस्य गौणत्वं न त्वात्मनोऽन्यो दर्शनप्रकारोऽस्ति तदेवमेव मुख्यं द्रष्टृत्वमुपपद्यते नान्यथा । यथाऽऽदित्यादीनां प्रका-शयितृत्वं नित्येनैव स्वाभाविकेनाक्रियमाणेन प्रकाशेन तदेव च

---

१ घ. ञ. ण. पि च सु° । २ ख. °भूत्व° । घ. च. ज. °शव° । ३ क. घ. ङ. ज. तदैव° ।

प्रकाशयितृत्वं पुरुषं प्रकाशयितृत्वान्तरानुपपत्तेः । तस्माच्च द्रष्टुर्दृष्टि-र्विपरिलुप्यत इति नैवं विप्रतिषेधलक्षणोऽन्योऽस्ति ।

कूटस्थदृष्टिरेवात्र द्रष्टृशब्दार्थो न दृष्टिकर्ता यत्र विपरिलोपोऽस्तीति विद्वत्स्व-यमेव दृष्टेः इति । आदित्यादिवैकाशकल्पत्वादित्युक्तं दृष्टान्तं व्याचष्टे—यथेति । दृष्टान्तेऽपि विपरिलोपं पश्यन्नाह—न हीति । दर्शनोपपत्तेरित्युक्तं दार्ष्टान्तिकं विवृणोति—तथेति । आत्मनो नित्यदृष्टित्वे दोषान्तरमुद्भावयति—गौणमिति । गौणस्य मुख्यापेक्षत्वान्मुख्यत्वस्य चात्मस्थस्य द्रष्टृत्वस्यासाधारण्यैवमित्युत्तरमाह—नेत्यादिना । तमेवोपपादयति—यदि हीत्यादिना । अन्यथा कूटस्थदृष्टित्वव्यतिरेकेणेति पाठः । दर्शनव्यापकारस्यान्यत्वं किमात्मेयत्तम् । तस्य निष्क्रियत्वश्रुतिस्मृतिविरोधा-दिति शेषः । द्रष्टृत्वान्तरानुपपत्तौ फलितमाह—तदेवमेवेति । नित्यदृष्टित्वेनैवे-त्यर्थः । उक्तेऽर्थे दृष्टान्तमाह—यथेत्यादिना । यथाऽऽत्मनोऽपि द्रष्टृत्वं नित्येनैव स्वाभाविकेन चैतन्यज्योतिषा सिध्यति तदेव च द्रष्टृत्वं पुरुषं द्रष्टृत्वान्तरानुपपत्ते-रिति शेषः । आत्मनो नित्यदृष्टित्वस्वभावत्वे फलितमाह—तस्मादिति ।

नन्वनित्यक्रियाकर्तृविषय एव तृच्प्रत्ययान्तस्य शब्दस्य प्रयोगो दृष्टो यथा छेत्ता भेत्ता मन्तेति तथा द्रष्टेत्यत्रापीति चेत् । न । प्रकाश-यितेति दृष्टत्वात् । भवतु प्रकाशकेष्वन्यथाऽसंभवान्न त्वात्मनीति चेत् । न । द्रष्ट्यविपरिलोपश्रुतेः । पश्यामि न पश्यामीत्यनुभवदर्शनान्नेति चेत् । न । करणव्यापारविशेषापेक्षत्वात् । उद्धृतचक्षुषां च स्वप्न आ-त्मद्रष्टेरविपरिलोपदर्शनात् । तस्मादविपरिलुप्तस्वभावैवाऽऽत्मनो दृष्टि-। अतस्तथाऽविपरिलुप्तया द्रष्ट्या स्वयंज्योतिःस्वभावयाऽयं पश्यन्नेव भ-वति सुषुप्ते ।

तृजन्तं द्रष्टृशब्दमाश्रित्य शङ्कते—नन्विति । अथाप्यनित्यक्रियाकर्तृविषय स्तृजन्तशब्दप्रयोग इति शेषः । तृजन्तशब्दप्रयोगस्यानित्यक्रियाकर्तृविषयत्वं व्यभिचारमुक्त्वोत्तरमाह—नेति । तैरप्यमाशङ्कते—भवतीति । आदित्यादिषु स्वाभाविकप्रकाशेन प्रकाशयितृत्वमस्तु कादाचित्कप्रकाशेन प्रकाशयितृत्वस्य तेष्वसंभवान्न त्वात्मनि नित्या दृष्टिरस्ति तन्नानाभावात् । तथा च कादाचित्क-दृष्टयैव तस्य द्रष्टृत्वेत्यर्थः । प्रतीचश्चिद्रूपत्वस्य श्रौतत्वात्कर्तृत्वं विना प्रकाशयितृ-त्वमविशिष्टमित्युत्तरमाह—न दृष्टीति । कूटस्थदृष्टिरात्मेत्युक्ते प्रत्यक्षविरोधं शङ्कते—पश्यामीति । दिक्विशेषोऽनुभवस्तस्य कूटस्थदृष्टित्वमनुगृह्णाति चक्षुरादि-

१ ख. घ. ज. न प्र° । २ ख. च. ण. °शव° । ३ म. °त्मकत्व° । ४ घ. ञ. °तिवि° । ण. भावः । ५ क. ख. ट. °पस्य ।

व्यापारभावापेक्षया पश्यामि न पश्यामीति वियोरात्मसाक्षिकत्वादित्युत्तरमाह—न करणोति । आत्मदृष्टेर्नित्यत्व हेत्वन्तरमाह—उद्धृतेति । आत्मदृष्टेर्नित्यत्वमुपसंहरति—तस्मादिति । तन्नित्यत्वोक्तिफलमाह—अत इति ।

कथं तर्हि न पश्यतीति । उच्यते । न तु तदस्ति किं तत् । द्वितीयं विषयभूतम् । किंविशिष्टम् । ततो द्रष्टुरन्यदन्यत्वेन विभक्तं यत्पश्येद्यदुपलभेत यद्धि तद्विशेषदर्शनकारणमन्तःकरणं चक्षू रूपं च तदविद्ययाऽन्यत्वेन प्रत्यपस्थापितमाभात् । तदेतस्मिन्काल एकीभूतम् । आत्मनः परेण परिष्वङ्गात् । द्रष्टर्हि परिच्छिन्नस्य विशेषदर्शनाय करणमन्यत्वेन व्यवतिष्ठते । अयं तु स्वेन सर्वात्मना संपरिष्वक्तः स्वेन परेण प्राज्ञेनाऽऽत्मना प्रिययेव पुरुषः । तेन न पृथक्त्वेन व्यवस्थितानि करणानि विषयाश्च । तदभावाद्विशेषदर्शनं नास्ति । करणादिकृतं हि तन्नाऽऽत्मकृतम् । आत्मकृतानि प्रत्यवभासते । तस्मात्तत्कृतेयं भ्रान्तिरात्मनो दृष्टिः परिलुप्यत इति ॥ २३ ॥

वाक्यान्तरमाकाङ्क्षापूर्वकमुत्थाप्य व्याचष्टे—कथमित्यादिना । द्वितीयादिपदानां पौनरुक्त्यमाशङ्क्याऽर्थभेदं दर्शयति—यद्धीत्यादिना । साभासमन्तःकरणं यत्पश्येदिति विशेषदर्शनकारणं प्रमातृ द्वितीयं तस्मादन्यच्चक्षुरादि प्रमाणं रूपादि च प्रमेयं विभक्तं तत्सर्वं जाग्रत्स्वप्नयोरविद्याप्रतिबन्धं सुषुप्तिकाले कारणमात्रतां गतमभिव्यक्तं नास्तीत्यर्थः । सुषुप्ते द्वितीयं प्रमातृरूपं नास्तीत्येतदुपपादयति—आत्मन इति । प्रमातृरूपं पृथङ्नास्तीति शेषः । तथाऽपि करणव्यापारकृतं विषयदर्शनमात्मनः स्यादित्याशङ्क्याऽऽह—द्रष्टुरिति । सुषुप्तस्यापि परिच्छिन्नत्वमाशङ्क्याऽऽह—अयं त्विति । तस्य परेणैकीभावफलमाह—तेनेति । विषयेन्द्रियाभावकृतं फलमाह—तदभावादिति । किमिति विषयाद्यभावाद्विशेषदर्शनं निषिध्यते सत्त्वमेव तस्याऽऽत्मसत्त्वाधीनं किं न स्यादित्याशङ्क्याऽऽह—करणादीति । नन्ववस्थाद्वये विशेषदर्शनमात्मकृतं प्रतिभाति तस्य प्रधानत्वादत आह—आत्मकृतमिवेति । नन्वित्यादेस्तात्पर्यमुपसंहरति—तस्मादिति । प्रमातृकरणविषयकृतत्वाद्विशेषदृष्टेस्तेषां च सुषुप्तावभावात्तत्कार्याणां विशेषदृष्टेरपि तत्राभावादिति यावत् । तत्कृता जागरादावात्मकृतत्वेन भ्रान्तिप्रतिपन्नविशेषदर्शनाभावप्रयुक्तेत्यर्थः ॥ २३ ॥

यद्वै तन्न जिघ्रति जिघ्रन्वै तन्न जिघ्रति न
हि घ्रातुर्घ्रातेर्विपरिलोपो विद्यतेऽविनाशि-

---

१ झ. °रणान्यन्य° । २ झ. °ष्ठन्ते । अ° । ३ च. तु स° ।

त्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यज्जिघ्रेत् ॥ २४ ॥

यद्वै तन्न रसयते रसयन्वै तन्न रसयते न हि रसयितू रसयतेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यद्रसयेत् ॥२५॥

यद्वै तन्न वदति वदन्वै तन्न न वदति न हि वक्तुर्वक्तेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यद्वदेत् ॥ २६ ॥

यद्वै तन्न शृणोति शृण्वन्वै तन्न शृणोति न हि श्रोतुः श्रोतेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्य द्विभक्तं यच्छृणुयात्॥२७॥

यद्वै तन्न मनुते मन्वानो वै तन्न मनुते न हि मन्तुर्मतेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यन्मन्वीत ॥ २८ ॥

यद्वै तन्न स्पृशति स्पृशन्वै तन्न स्पृशति न हि स्प्रष्टुः स्पृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्स्पृशेत् ॥२९॥

यद्वै तन्न विजानाति विजानन्वै तन्न विजानाति न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यद्विजानीयात् ॥ ३० ॥

समानमन्यत् । यद्वै तन्न जिघ्रति । यद्वै तन्न रसयते । यद्वै तन्न वदति । यद्वै तन्न शृणोति । यद्वै तन्न मनुते । यद्वै तन्न स्पृशति । यद्वै तन्न विजानातीति । मननविज्ञानयोर्दृष्ट्यादिसहकारित्वेऽपि सति चक्षु-

१ च °यति र° । २ °यति न° ।

रादिनिरपेक्षो भूतभविष्यद्वर्तमानविषयव्यापारो विद्यत इति पृथग्ग्रहणम् ।

यद्वै तन्न पश्यतीत्यादावुक्तन्यायमुत्तरवाक्येष्वातिदिशति—सम्राजमन्यादिति । मनोबुद्धयोः साधारणकरणत्वात्पृथग्व्यापाराभावे कथं पृथक्निर्देशः स्यादित्याशङ्क्याऽऽह—मननेति ।

किं पुनर्दृष्ट्यादीनामग्नेरौष्ण्यप्रकाशनज्वलनादिवद्धर्मभेद आहोस्विदभिन्नस्यैव धर्मस्य परोपाधिनिमित्तं धर्मान्यत्वमिति । अत्र केचिद्व्याचक्षते । आत्मवस्तुनः स्वत एवैकत्वं नानात्वं च यथा गोर्गोद्रव्यतयैकत्वं सास्नादीनां धर्माणां परस्परतो भेदः । यथा स्थूलेष्वेकत्वं नानात्वं च तथा निरवयवेष्वमूर्तवस्तुष्वेकत्वं नानात्वं चानुमेयम् । सर्वत्राव्यभिचारदर्शनादात्मनोऽपि तद्वदेव दृष्ट्यादीनां परस्परं नानात्वमात्मना चैकत्वमिति ।

वाक्यानि व्याचक्ष्य स्वसिद्धान्तस्फुटीकरणार्थं विचारयति—किं पुनरिति । धर्मभेदो धर्माणां सतां मिथो धर्मिणश्च भेदोऽस्तीति यावत् । धर्मस्य दृष्ट्यादिपदार्थस्येत्यर्थः । परोपाधिनिमित्तं चक्षुराद्युपाधिकृतमित्येवत् । धर्मान्यत्वं धर्मत्वं धर्मिणो मिथोऽन्यत्वं चेत्यर्थः । भट्टमपश्चमतेन पूर्वपक्षं गृह्णाति—अत्रेति । गवादीनां सावयवत्वाद्रूपभेदसंभवादेकेन रूपेणाभिन्नत्वं रूपान्तरेण भिन्नत्वमित्युभयथात्वेऽपि निरवयवेष्वात्मादिषु कथमनेकरूपत्वसिद्धिरित्याशङ्क्याऽऽह—यथा स्थूलेष्विति । एकरूपत्वे वस्तुनो दृष्टान्तादृष्टेनानारूपत्वे गवादिदृष्टान्तदर्शनात्तदेवानुमेयम् । विमतं भिन्नाभिन्नं वस्तुत्वाद्गवादिवदित्यर्थः । यद्यपि गगनादिषु भिन्नाभिन्नत्वमनुमीयते तथाऽपि कथमात्मनि तदनुमानमित्याशङ्क्याह वस्तुत्वस्य नानारूपत्वेनाव्यभिचारादात्मन्यपि यथोक्तमनुमानं निरङ्कुशमसरमित्याह—सर्वत्रेति । यथोक्तानुमानानुग्रहाद्यद्वै तदित्यादेर्भिन्नाभिन्ने वस्तुनि तात्पर्यमिति भावः ।

नान्यपरत्वात् । न हि दृष्ट्यादिधर्मभेदप्रदर्शनपरमिदं वाक्यं यद्वै तदित्यादि । किं तर्हि । यदि चैतन्यात्मज्योतिः कथं न जायति सुषुप्ते

---

१ ङ. °व्यवर्त° । २ क. ग. घ. ङ. च. छ. ज. झ. ढ. °मित्तकं च° । ३ घ. ङ. ज. ढ. °ख्यभिचारदर्शनादात्मनोऽपि तद्वदेव दृष्ट्यादीनां परस्परं भे° । ४ क. ग. ङ. छ. ज. झ. ढ. °ज्ञेवैक° । ५ घ. °त्वं तद्धर्मि° । ढ. ण. °त्वं धर्मि° । ६ क. ख. ढ. °र्भिन्नत्वे व° । ७ ख. ङ. च. झ. ढ. °ष्ट्यादेर्घ° ।

नूनमतो न चैतन्यात्मज्योतिरित्येवमाशङ्क्याप्तौ तन्निराकरणायेतदारब्धं यद्वै तदित्यादि । यदस्य जाग्रत्स्वप्नयोश्चक्षुराद्यनेकोपाधिद्वारं चैतन्यात्मज्योतिःस्वाभाव्यमुपलक्षितं दृष्ट्याद्यभिधेयव्यवहारापन्नं सुषुप्त उपाधिभेदव्यापारानिवृत्तावनुद्भास्यमानत्वादनुपलक्ष्यमाणस्वभावमप्युपाधिभेदेन भिन्नमिव यथाप्राप्तानुवादेनैवं विद्यमानत्वमुच्यते । तत्र दृष्ट्यादिधर्मभेदकल्पनाऽविवक्षितार्थाऽनभिज्ञतया । सैन्धवघनवत्प्रज्ञानैकरसघनश्रुतिविरोधाच्च । "विज्ञानमानन्दं ब्रह्म" "सत्यं ज्ञानम्" "प्रज्ञानं ब्रह्म" इत्यादिश्रुतिभ्यश्च । शब्दप्रवृत्तेश्च । लौकिकी च शब्दप्रवृत्तिश्चक्षुषा रूपं विजानाति श्रोत्रेण शब्दं विजानाति रसनेनान्नस्य रसं विजानातीति च सर्वत्रैव च दृष्ट्यादिशब्दाभिधेयानां विज्ञानशब्दवाच्यतामेव दर्शयति । शब्दप्रवृत्तिश्च प्रमाणम् ।

भर्तृप्रपञ्चोक्तं वाक्यतात्पर्यं निराकरोति—नेत्यादिना । चैतन्याविनाशे वाक्यतात्पर्यं चेत्कथं तर्हि दृष्ट्यादिभेदवचनमित्याशङ्क्याऽऽह—यदस्येति । तद्धि सुषुप्तावस्थायामुपाधेरन्तःकरणस्य चक्षुरादिभेदाधीनपरिणामव्यापारनिवृत्तौ तत्यामुपाधिभेदस्यानुद्भास्यमानत्वात्तेन भिन्नमिवानुपलक्ष्यमाणस्वभावं यद्यपि तथाऽपि चक्षुर्द्वारेण जायमानायां बुद्धिवृत्तौ व्यक्तं चैतन्यं दृष्टिर्द्वारीगद्वारेण जातायां तस्यां व्यक्तं द्रष्टारमित्युपाधिभेदात्प्राप्तभेदानुवादेन चैतन्यस्याविनाशित्वे वाक्यतात्पर्यमित्यर्थः । उक्ते वाक्यतात्पर्ये स्थिते फलितमाह—तत्रेति । इतश्च दृष्ट्यादिभेदकल्पना न श्लिष्टेत्याह—सैन्धवेति । तदेव स्पष्टयति—विज्ञानमिति । न दृष्ट्यादिभेदकल्पनेति शेषः । यथा घटाकाशो महाकाश इत्येकशब्दविषयत्वादुपाधिभेदेऽप्याकाशस्यैकत्वमिष्टं तथैकशब्दप्रवृत्तेरेकत्वं चितोऽपि स्वीकर्तव्यं तत्कृतो दृष्ट्यादिभेदस्तिथिरित्याह—शब्दप्रवृत्तेश्चेति । तामेव विवृणोति—लौकिकी चेति ।

दृष्टान्तोपपत्तेश्च । यथा हि लोके स्वच्छस्वाभाव्ययुक्तः स्फटिकस्तन्निमित्तमेव केवलं हरितनीललोहितायुपाधिभेदसंयोगात्तदाकारत्वं भजते । न च स्वच्छस्वाभाव्यव्यतिरेकेण हरितनीललोहितादिलक्षणा धर्मभेदाः स्फटिकस्य कल्पयितुं शक्यन्ते । तथा चक्षुरायुपाधिभेदसंयोगात्प्रज्ञानघनस्वभावस्यैवाऽऽत्मज्योतिषो दृष्ट्यादिशक्तिभेद उपलक्ष्यते । प्रज्ञानघनस्य स्वच्छस्वाभाव्यात्स्फटिकस्वच्छस्वाभाव्यवत्स्व-

---

१ क. °द्वारा चै° । २ ख. च. ढ. °व भिद्य° । ३ च. ढ °नन्दं ब्रह्म स° । ४ च. ढ. °ज्ञानमनन्तं ब्र° । ५ झ. °ति जिह्वयाऽन्न° । ६ ग. °सनयाऽन्न° । ७ घ. ञ. ण, ।ि °। ८ घ. ण. मठाका° ।

यंज्योतिष्ट्वाच्च । यथा चाऽऽदित्यज्योतिरवभास्यभेदैः संयुज्यमानं हरितनीलपीतलोहितादिभेदैरविभाग्यं तदाकाराभासं भवति । तथा च कृत्स्नं जगदवभासयच्चक्षुरादीनि च तदाकारं भवंति । तथा चोक्तमात्मनैवायं ज्योतिषाऽऽस्त इत्यादि ।

यत्तु सिद्धान्ते दृष्टान्तो नास्तीति तत्राऽऽह—दृष्टान्तेति । किमेकरूपत्वे वस्तुनो दृष्टान्तो नास्ति किंवा मिथ्यात्वे तन्नानारूपत्वस्येति वक्तव्यम् । नाऽऽद्यः । नानारूपवस्तुवादिभिरप्येकैकरूपस्यानवस्थापरिहारार्थमनेकरूपत्वाङ्गीकारादस्माकं दृष्टान्तसिद्धेर्वस्तु वहेतोश्च तत्रैवानैकान्तिकत्वात्तस्मादेकरूपमेव वस्तु स्वीकर्तव्यमिति भावः । द्वितीयं दूषयति—यथा हीति । तन्निमित्तमेवेत्यत्र तच्छब्देन स्वच्छस्वाभाव्यं परामृश्यते । स्फटिके हरितादिवर्णानां स्वाभाविकत्वं किं न स्यादित्याशङ्क्याऽऽह—न चेति । तस्य हि स्वच्छस्वाभाव्यं तद्वशेन हरितादुपाधिभेदसंबन्धव्यतिरेकेणेति यावत् । एकस्य नानारूपत्वं मिथ्येत्यत्र दृष्टान्तमुक्त्वा दार्ष्टान्तिकमाह—तथेति । आत्मा मिथ्यानानानिर्भास उपाहितत्वात्स्फटिकवदित्यर्थः । किंचाऽऽत्मा मिथ्यानानात्वाधारः स्वच्छत्वात्संप्रतिबन्धवदित्याह—प्रज्ञानेति । किंचाऽऽत्मा कल्पितनानात्वाधारो ज्योतिष्ट्वादादित्यादिज्योतिर्वदित्याह—स्वयमिति। आदित्यादावकल्पितोऽपि भेदोऽस्तीत्याशङ्क्य विवक्षितं साम्यमाह—यथा चेत्यादिना । अविभाग्यं वस्तुतो विभागायोग्यमिति यावत् । चक्षुरादीनि चावभासयंतीति संबन्धः । आत्मनः सर्वावभासकत्वे वाक्योपक्रमं प्रमाणयति तथा चेति ।

न च निरवयवेष्वनेकात्मता शक्यते कल्पयितुम् । दृष्टान्ताभावात् । यद्प्याकाशस्य सर्वगतत्वादिधर्मभेदः परिकल्प्यते परमाण्वादीनां च गन्धरसाद्यनेकगुणत्वं तद्पि निरूप्यमाणं परोपाधिनिमित्तमेव भवति । आकाशस्य तावत्सर्वगतत्वं नाम न स्वतो धर्मोऽस्ति । सर्वोपाधिसंश्रयाद्धि सर्वत्र स्वेन रूपेण सत्त्वमपेक्ष्य सर्वगतत्वव्यवहारो न त्वाकाशः क्वचिद्गतो वाऽगतो वा स्वतः । गमनं हि नाम देशान्तरस्थस्य देशान्तरेण संयोगकारणम् । सा च क्रिया नैवाविशेषे संभवति । एवं धर्मभेदा नैव सन्त्याकाशे ।

यत्तु निरवयवेष्वपि नानारूपत्वमनुमेयमिति तत्राऽऽह—न चेति । आकाशादीनां दृष्टान्तत्वमाशङ्क्य निराचष्टे—यद्पीत्यादिना । कथमाकाशस्यानेकधर्मवत्त्वमौपाधिकमित्याशङ्क्य तस्य सर्वगतत्वं तावदौपाधिकमिति साधयति—आकाशस्येति । कथं तर्हि सर्वगतत्वव्यवहारस्तत्राऽऽह—सर्वोपाधीति । नन्वा-

१ घ. ण. °र्थमेकरू° । २ क. ख. ग. .छ. °णवत्त्व त° । ३ घ. ञ. तत्र त° ह °

काशस्य सर्वत्र गमनमपेक्ष्य सर्वगतत्वं किमिति न व्यवह्रियते तत्राऽऽह—न त्विति। आकाशे गमनायोगं वक्तुं तत्स्वरूपमाह गमनं हीति । ननु कुतश्चिद्विभागे संयोगे च केनचिद्देशेन तत्कारणीभूता क्रियाऽपि श्येनादाविवाऽऽकाशे भविष्यति नेत्याह—सा चेति । सावयवे हि श्येनादौ क्रिया दृश्यत आकाशं त्वविशेषं निरवयवं कुतस्तत्र क्रियेत्यर्थः । तथाऽपि धर्मान्तराण्याकाशे भविष्यन्तीत्याशङ्क्य तेषामपि क्रियापूर्वकाणामुक्त [illegible] स्वीकृतत्वमाह—एवमिति । भेदाभेदाभ्यां दुर्वचत्वाच्च तत्र धर्मधर्मिभावो न [illegible] वतीति भावः ।

तथा परमाण्वादावपि । परमाणुर्नाम पृथिव्या गन्धघनायाः परमसूक्ष्मोऽवयवो गन्धात्मक एव न तस्य पुनर्गन्धवत्त्वं नाम शक्यते कल्पयितुम् । अथ तस्यैव रसादिमत्त्वं स्यादिति चेन्न । तत्राप्यबादिसंसर्गनिमित्तत्वात् । तस्मान्न निरवयवस्यानेकधर्मवत्त्वे दृष्टान्तोऽस्ति । एतेन दृगादिशक्तिभेदानां पृथक्चक्षूरूपादिभेदेन परिणामभेदकल्पना परमात्मनि प्रत्युक्ता ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ॥ ३० ॥

आकाशे दर्शितन्यायमन्यत्रापि संचारयति—तथेति । पार्थिवत्वं परमाणोरेकं रूपं गन्धवत्त्वं चापरमित्यनेकरूपत्वमित्याशङ्क्याऽऽह—परमाणुर्नामेति । न हि पार्थिवत्वातिरेकि गन्धवत्त्वं प्रामाणिकमिति भावः । वैशेषिकपरिभाषामाश्रित्य शङ्क्यति—अथेति । पार्थिवे परमाणौ रसादिमत्त्वमनौपाधिकं न भवति जलादिसंसर्गकृतत्वात्तथा च निरुपाधिकभेदेनेदमुदाहरणमिति परिहरति—न तत्रापीति । उक्तन्यायस्य दिगादावपि समत्वं मत्वोपसंहरति—तस्मादिति । सन्ति परस्मिन्नात्मनि दृगादिशक्तिभेदास्तेषां मध्ये दृक्शक्तिश्चक्षुरात्मना रूपात्मना न पृथगेव परिणमते घ्रातिशक्तिश्च घ्राणात्मना गन्धात्मना चेत्यनेन क्रमेण परस्मिन्परिणामकल्पना भर्तृप्रपञ्चैर्या कृता साऽपि परस्यैकरूपत्वोपपादनेन निरस्तेत्याह—एतेनेति ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥

यत्र वा अन्यदिव स्यात्तत्रान्योऽन्यत्पश्येदन्योऽन्यज्जिघ्रेदन्योऽन्यद्रसयेदन्योऽन्यद्वदेदन्योऽन्यच्छृणुयादन्योऽन्यन्मन्वीतान्योऽन्यत्स्पृशेदन्योऽन्यद्विजानीयात् ॥ ३१ ॥

---

१ ख. ढ. °चनाच्च° । २ क. ङ. छ झ. °रमः सू° । ३ [illegible] एक एव ख. ङ. °म गुणः श° । ५ ख. ङ. च. ढ. °दि र्मवत्त्वं । ग छ. °दिधर्मत्वं स्या° झ. °दिधर्मत्वं स्या° । ६ ख. ङ च °दिधर्म

जाग्रत्स्वप्नयोरिव यद्विजानीयात्तद्द्वितीयं प्रविभक्तमन्यत्वेन नास्तीत्युक्तमतः सुषुप्ते न विजानाति विशेषम् । ननु यद्यस्यायमेव स्वभावः किंनिमित्तमस्य विशेषविज्ञानं स्वभावपरित्यागेन । अथ विशेषविज्ञानमेवास्य स्वभावः कस्मादेष विशेषं न विजानातीति । उच्यते शृणु । यत्र यस्मिञ्जागरिते स्वप्ने वा अन्यदिवाऽऽत्मनो वस्त्वन्तरमिवाविद्यया प्रत्युपस्थापितं भवति तत्र तस्मादविद्याप्रत्युपस्थापितादन्योऽन्यमिवाऽऽत्मानं मन्यमानोऽसत्यात्मनः प्रविभक्ते वस्त्वन्तरेऽसति चाऽऽत्मनि ततः प्रविभक्तेऽन्योऽन्यत्पश्येदुपलभेत । तच्च दर्शितं स्वप्ने प्रत्यक्षतो घ्नन्तीव जिघ्रन्तीवेति । तथाऽन्योऽन्याञ्जिघ्रेद्रसयेद्वदेच्छृणुयान्मन्वीत स्पृशेद्विजानीयादिति ॥ ३१ ॥

औपाधिको दृष्ट्यादिभेदो न वास्तवोऽस्तीत्युपपाद्य वृत्तमनुद्रवति—जाग्रदिति । यत्रेत्युत्तरवाक्यव्यावर्त्यामाशङ्कां दर्शयति—नन्विति । किमस्य विशेषविज्ञानराहित्यं स्वरूपं किंवा विशेषविज्ञानत्वम् । आद्ये जाग्रत्स्वप्नयोरनुपपत्तिः । द्वितीये सुषुप्तेरसिद्धिरिति भावः । प्रतीचश्चिन्मात्रज्योतिषो विशेषविज्ञानराहित्यमेव स्वरूपं तथाऽपि स्वाविद्याकल्पितविशेषविज्ञानवत्त्वमाश्रित्यावस्थाद्वयं सिध्यतीत्युत्तरवाक्यमवलम्ब्योत्तरमाह—उच्यत इत्यादिना । तच्चेत्याविद्यं दर्शनमित्यर्थः ॥ ३१ ॥

> सलिल एको द्रष्टाऽद्वैतो भवत्येष ब्रह्मलोकः सम्राडिति हैनमनुशशास याज्ञवल्क्य एषाऽस्य परमा गतिरेषाऽस्य परमा संपदेषोऽस्य परमो लोक एषोऽस्य परम आनन्द एतस्यैवाऽऽनन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति ॥ ३२ ॥

यत्र पुनः साऽविद्या सुषुप्ते वस्त्वन्तरप्रत्युपस्थापिका शान्ता तेनान्यत्वेनाविद्याप्रविभक्तस्य वस्तुनोऽभावात्तत्केन कं पश्येज्जिघ्रेद्विजानीयाद्वा । अतः स्वेनैव हि प्राज्ञेनाऽऽत्मना स्वयंज्योतिःस्वभावेन संपरिष्वक्तः समस्तः संप्रसन्न आप्तकाम आत्मकामः सलिलवत्स्वच्छीभूतः सलिल इव सलिल एको द्वितीयस्याभावात् । अविद्यया हि द्वितीयः प्रविभज्यते । सा च शान्ताऽत्रात एको द्रष्टा दृष्टेरविप-

---

१ ख °नुवदति । २ घ ञ. ण. °त्र्यात्युत्त° । ३ क. ञ. °त्तर वा° । ४ घ. ञ, ण. °विधकं द° । ५ ख. ग. च. ढ. °ष्वक्त उपसंहृतकरणः स° ।

रिलुप्तत्वादात्मज्योतिःस्वभावाया अद्वैत द्रष्टव्यस्य द्वितीयस्याभावात् । एतदमृतमभयमेष ब्रह्मलोको ब्रह्मैव लोको ब्रह्मलोकः पर एवायमस्मिन्काले व्यावृत्तकार्यकरणोपाधिभेदः स्व आत्मज्योतिषि शान्तसर्वसंबन्धो वर्तते । हे सम्राडिति हैवं जनकमनुशशासानुशिष्टवान्याज्ञवल्क्य इतिवचनमेतत् ।

पूर्वोक्तवस्तूपसंहारार्थं सलिलवाक्यमुत्थापयति—यत्रेत्यादिना । तेनाविद्यायाः शान्तत्वेनेति यावत् । वस्तुनोऽभावात्तत्रेति शेषः । सुषुप्ते विशेषविज्ञानाभावमयुक्तं फलमाह—अत इति । पूर्वमेवास्यार्थस्योक्तत्वं द्योतयितुं हिशब्दः । संपरिष्वङ्गफलं समस्तत्वमपरिच्छिन्नत्वं तत्फल संपसन्नत्वम् । असंप्रमादो हि परिच्छेदाभिमानकृतः । संपसन्नत्वे हेत्वन्तरमाह—आप्तकाम इति । तदेव संपसन्नत्वं दृष्टान्तेन स्पष्टयति—सालिलवादिति । उक्तेऽर्थे वाक्याक्षराणि योजयति—सलिल इवेति । द्वितीयस्याभावं सुषुप्ते व्यक्ती करोति—अविद्ययेति । अद्दृष्टा द्रष्टेति वा छेदः । एकोऽद्वैत इत्यभ्यासस्तात्पर्यलिङ्गं तस्य परमपुरुषार्थत्वं दर्शयन्कूटस्थत्वमाह—एतदिति । किमिति षष्ठीसमासमुपेक्ष्य कर्मधारयो गृह्यते तत्राऽऽह—पर एवेति । अस्मिन्काले सुषुप्त्यवस्थायामित्येतत् ।

कथं वऽनुशशास । एषाऽस्य विज्ञानमयस्य परमा गतिः । यास्त्वन्या देहग्रहणलक्षणा ब्रह्मादिस्तम्बपर्यन्ता अविद्याकल्पितास्ता गतयोऽतोऽपरमा अविद्याविषयत्वात् । इयं तु देवत्वादिगतीनां कर्मविद्यासाध्यानां परमोत्तमा यः समस्तात्मभावो यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानातीत्येषैव च परमा संपत्सर्वासां संपदां विभूतीनामियं परमा स्वाभाविकत्वादस्याः कृतका ह्यन्याः संपदः । तथैषोऽस्य परमो लोकः । येऽन्ये कर्मफलाश्रया लोकास्तेऽस्मादपरमाः । अयं तु न केनचन कर्मणा मीयते स्वाभाविकत्वादेषोऽस्य परमो लोकः । तथैषोऽस्य परम आनन्दः । यान्यन्यानि विषयेन्द्रियसंबन्धजनितान्यानन्दजातानि तान्यपेक्ष्येषोऽस्य परम आनन्दो नित्यत्वात् । " यो वै भूमा तत्सुखम् " इति श्रुत्यन्तरात् ।

परमत्वं साधयति—यास्त्विति । प्रस्तुतं समस्तात्मभावं विशेषविज्ञानराहित्येन विशिनष्टि—यत्रेति । सर्वात्मभावरूपस्य लोकस्य परमत्वमुपपादयति—येऽन्य इति । मीयते परिच्छिद्यते साध्यत इति यावत् । सौषुप्तस्य सर्वात्मभावस्य

१ ग. ङ. छ. °बन्धे व° । २ क. ख. ग. ङ. ज. °स्तेऽस्याप° । ३ क. ग. घ. ङ. च. ज. झ. °च क° । ख. ढ. °मतस्याऽऽत्म° ।

परमानन्दत्वं विशदयति–यामीति । आत्मनोऽनवाच्छिन्नानन्दत्वे छान्दोग्यश्रुतिं संवादयति–यो वै भूमेति ।

यत्रान्यत्पश्यत्यन्यद्विजानाति तदल्पं मर्त्यममृतं सुखमिदं तु तद्विपरीतम् । अत एवैषोऽस्य परम आनन्दः । एतस्यैवाऽऽनन्दस्य मात्रां कलामविद्याप्रत्युपस्थापितां विषयेन्द्रियसंबन्धकालविभाव्यामन्यानि भूतान्युपजीवन्ति । कानि तानि तत एवाऽऽनन्दादविद्यया प्रविभज्यमानस्वरूपाण्यन्यत्वेन तानि ब्रह्मणः परिकल्प्यमानान्यन्यानि सन्त्युपजीवन्ति विषयेन्द्रियसंपर्कद्वारेण विभाव्यमानाम् ॥ ३२ ॥

ननु वैषयिकमेकं सुखमात्मरूपं चापरमिति सुखभेदाङ्गीकारादपसिद्धान्तः स्यादित्याशङ्क्य मुख्यामुख्यभेदेन तदुपपत्तेर्नैवमित्याह–यत्रेत्यादिना । किंच वस्तुतो नास्त्येवाऽऽत्मसुखातिरिक्तं वैषयिकं सुखमित्याह–एतस्येति । ब्रह्मातिरिक्तचेतनाभावे कान्युपजीवकानि स्युरित्याशङ्क्य परिहरति–कानीत्यादिना । विभाव्यमानामानन्दस्य मात्रामिति पूर्वेण संबन्धः ॥ ३२ ॥

स यो मनुष्याणाꣳ राद्धः समृद्धो भवत्यन्येषामधिपतिः सर्वैर्मानुष्यकैर्भोगैः संपन्नतमः स मनुष्याणां परम आनन्दोऽथ ये शतं मनुष्याणामानन्दाः स एकः पितॄणां जितलोकानामानन्दोऽथ ये शतं पितॄणां जितलोकानामानन्दाः स एको गन्धर्वलोक आनन्दोऽथ ये शतं गन्धर्वलोक आनन्दाः स एकः कर्मदेवानामानन्दो ये कर्मणा देवत्वमभिसंपद्यन्तेऽथ ये शतं कर्मदेवानामानन्दाः स एक आजानदेवानामानन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतोऽथ ये शतमाजानदेवानामानन्दाः स एकः प्रजापतिलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतोऽथ ये शतं प्रजापतिलोक आनन्दाः स एको ब्रह्मलोक

१ घ. ज. °वियाप्र । २ ख. घ. ञ. ण. पराद्धा° । ३ घ. ज. °न्यलोकै° ।

आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतोऽथैष एव परम आनन्द एष ब्रह्मलोकः सम्राडिति होवाच याज्ञवल्क्यः सोऽहं भगवते सहस्रं ददाम्यत ऊर्ध्वं विमोक्षायैव ब्रूहीत्यत्र ह याज्ञवल्क्यो बिभयांचकार मेधावी राजा सर्वेभ्यो माऽन्तेभ्य उदरौत्सीदिति ॥ ३३ ॥

यस्य परमानन्दस्य मात्रा अवयवा ब्रह्मादिभिर्मनुष्यपर्यन्तैर्भूतैरुपजीव्यन्ते तदानन्दमात्राद्वारेण मात्रिणं परमानन्दमधिजिगमयिषन्नाह सैन्धवलवणशकलैरिव लवणशैलम् । स यः कस्मिन्मनुष्याणां मध्ये राद्धः संसिद्धोऽविकलः समग्रावयव इत्यर्थः । समृद्ध उपभोगोपकरणसंपन्नो भवति । किंचान्येषां समानजातीयानामधिपतिः स्वतन्त्रः पतिर्न माण्डलिकः सर्वैः समस्तैर्मानुष्यकैरिति । दिव्यभोगोपकरणनिवृत्त्यर्थं मनुष्याणामेव यानि भोगोपकरणानि तैः संपन्नानामप्यतिशयेन संपन्नः संपन्नतमः स मनुष्याणां परम आनन्दः ।

स यो मनुष्याणामित्यादिवाक्यतात्पर्यमाह—यस्येति । यथा सैन्धवावयवैः सैन्धवाचलं लोको बोधयति तथा तस्याऽऽनन्दस्य मात्रा नामावयवास्तत्प्रदर्शनद्वारेणावयविनं परमानन्दमधिगमयितुमिच्छन्ननन्तरो ग्रन्थः प्रवृत्त इत्यर्थः । तात्पर्यमुक्त्वाऽक्षराणि व्याचष्टे—स यः कश्चिदित्यादिना । राद्धत्वमविकलत्वं चेत्समृद्धत्वेन पुनरुक्तिरित्याशङ्क्याऽऽह—समग्रेति । तदेव समृद्धत्वमपीत्याशङ्क्य व्याकरोति—उपभोगेति । अन्तर्बहिःसंपत्तिभेदात्पुनरुक्तिरिति भावः । न केवलमुक्तमेव तस्य विशेषणं किंतु विशेषणान्तरं चास्तीत्याह—किंचेति । विशेषणतात्पर्यमाह—दिव्येति । तदनिर्वर्तने त्वस्य वक्ष्यमाणगन्धर्वादिष्वन्तर्भावः स्यादिति भावः । अतिशयेन संपन्न इति शेषः ।

तत्राऽऽनन्दानन्दिनोरभेदनिर्देशान्नार्थान्तरभूतत्वमित्येतत् । परमानन्दस्यैवेयं विषयविषय्याकारेण मात्रा प्रसृतेति ह्युक्तं यत्र वा अन्यदिव स्यादित्यादिवाक्येन । तस्माद्युक्तोऽयं परम आनन्द इत्यभेदनि-

---

१ क. ख. ग. घ. ङ. च. छ झ. ढ. °त्रावमवद्वा° । २ घ. ज. °व्यलोक° । ३ ख, ढ. °वार्तितस्य । ४ क. ख. ग. छ. °यं स प° ।

देशः । युधिष्ठिरादितुल्यो राजाऽत्रोदाहरणम् । दृष्टं मनुष्यानन्दमादिं कृत्वा शतगुणोत्तरोत्तरक्रमेणोन्नीय परमानन्दं यत्र भेदो निवर्तते तमधिगमयति । अत्रायमानन्दः शतगुणोत्तरोत्तरक्रमेण वर्धमानो यत्र वृद्धिकाष्ठामनुभवति । यत्र गणितभेदो निवर्ततेऽन्यदर्शनश्रवणमननाभावात्तं परमानन्दं विवक्षन्नाह । अथ ये मनुष्याणामेवंप्रकाराः शतमानन्दभेदाः स एकः पितृणाम् । तेषां विशेषणं जितलोकानामिति । श्राद्धादिकर्मभिः पितॄंस्तोषयित्वा तेन कर्मणा जितो लोको येषां ते जितलोकाः पितरस्तेषां पितृणां जितलोकानां मनुष्यानन्दशतगुणोक्तपरिमाण एक आनन्दो भवति । सोऽपि शतगुणोक्तो गन्धर्वलोक एक आनन्दो भवति । स च शतगुणोक्तः कर्मदेवानामेक आनन्दः ।

अभेदनिर्देशस्याभिप्रायमाह–तत्रेति । प्रकृतं वाक्यं तत्रम्यर्थः । आत्मनः सकाशादानन्दस्येति शेषः । औपचारिकत्वमभेदनिर्देशस्य भविष्यतीत्याशङ्क्याऽऽह–परमानन्दस्येति । तस्यैव विषयत्वं विषयित्वमिति स्थिते फलितमाह–तस्मादिति । यथोक्तो मनुष्यो न दृष्टिपथमवतरतीत्याशङ्क्याऽऽह–युधिष्ठिरादीति । अथ ये शतं मनुष्याणामित्यादेस्तात्पर्यमाह–दृष्टमिति । शतगुणेनोत्तरोत्तरत्राऽऽनदस्योत्कर्षप्रदर्शनक्रमेण परमानन्दमुन्नीय तमधिगमयत्युत्तरेण ग्रन्थेनेति संबन्धः । परमानन्दमेव विशिनष्टि–यत्रेति । भेदः संख्याव्यवहारः । उक्तमेव प्रमयति–यत्रेत्यादिना । परमानन्दे विवृद्धिकाष्ठायां हेतुमाह–अन्येति । यद्यपि यस्येत्यादिनोक्तमेतत्तथाऽपीहाक्षरव्याख्यानावसरे तदेव विवृतमित्यविरोधः । तत्तदानन्दप्रदर्शनानन्तर्यं तत्र तत्राथशब्दार्थः । तत्तद्वाक्योपक्रमो वा । एवंप्रकारत्वं तत्समृद्धत्वादि । पितृणामानन्द इति संबन्धः । श्राद्धादिकर्मभिरित्यादिशब्देन पिण्डपितृयज्ञादि गृह्यते ।

अग्निहोत्रादिश्रौतकर्मणा ये देवत्वं प्राप्नुवन्ति ते कर्मदेवाः । तथैवाऽऽजानदेवानामेक आनन्दः । अजानत एवोत्पत्तित एव ये देवास्त आजानदेवाः । यश्च श्रोत्रियोऽधीतवेदोऽवृजिनो वृजिनं पापं तद्रहितो यथोक्तकारीत्यर्थः । अकामहतो वीततृष्ण आजानदेवेभ्योऽर्वाग्यावन्तो विषयास्तेषु । तस्य चैवंभूतस्याऽऽजानदेवैः समान आनन्द इत्येतदन्वाख्यते चशब्दात्तच्छतगुणोक्तपरिमाणः प्रजापतिलोक एक आनन्दो विराट्शरीरे । तथा तद्विज्ञानवाञ्श्रोत्रियोऽधीतवेदश्चावृजिन

१ घ. ज. °वाऽयमानन्दः श° । २ ग. घ. ज. °त्तर° । ३ ग. झ. °ति । यत्रा° । ४ ध. ज. °त्तर° । ५ ग. ढ. °कृतोऽत्र प° । ६ ग. च. ढ. °नन्दो भवति । अ° । ७ घ. ञ. त्तर° । ८ घ. ण. °ति । अत्रे° ।

इत्यादि पूर्ववत्। तच्छतगुणीकृतपरिमाण एक आनन्दो ब्रह्मलोके हिरण्यगर्भात्मनि।

के ते कर्मदेवा नाम तत्राऽऽह—अग्निहोत्रादीति। यथा गन्धर्वानन्दः शतगुणीकृतः कर्मदेवानामेक आनन्दस्तथा कर्मदेवानन्दः शतगुणीकृतः सनाजानदेवानामेक आनन्दो भवतीत्याह—तथैवेति। कुत्र वीततृष्णत्वं तत्राऽऽह—आजानदेवेभ्य इति। श्रोत्रियादिवाक्यस्य प्रकृतार्थगतिमाशङ्क्याऽऽह—तस्य चेति। एवंभूतस्य विशेषणत्रयविशिष्टस्येति यावत्। प्रजापतिलोकशब्दस्य ब्रह्मलोकशब्दादर्थभेदमाह—विराडिति। यथा विराडात्मन्याजानदेवानन्दः शतगुणीकृतः सनेक आनन्दो भवति तथा विराडात्मोपासिता श्रोत्रियत्वादिविशेषणो विराजा तुल्यानन्दः स्यादित्याह—तथेति। तच्छतगुणीकृतेति तच्छब्दो विराडानन्दविषयः।

यश्चेत्यादि पूर्ववदेव। अतः परं गणितनिवृत्तिः। एष परम आनन्द इत्युक्तः। यस्य च परमानन्दस्य ब्रह्मलोकाद्यानन्दा मात्रा उदधेरिव विप्रुषः। एवं शतगुणोत्तरोत्तरवृद्ध्युपेता आनन्दा यत्रैकतां यान्ति यश्च श्रोत्रियप्रत्यक्षोऽथैष एव संप्रसादलक्षणः परम आनन्दस्तत्र हि नान्यत्पश्यति नान्यच्छृणोति। अथो भूमा भूमत्वादमृतः। इतरे तद्विपरीताः। अत्र च श्रोत्रियत्वावृजिनत्वे तुल्ये। अकामहतत्वकृतो विशेष आनन्दशतगुणवृद्धिहेतुः। अत्रैतानि साधनानि श्रोत्रियत्वावृजिनत्वाकामहतत्वानि तस्य तस्याऽऽनन्दस्य प्राप्तावर्थादभिहितानि। यथा कर्माण्यग्निहोत्रादीनि देवानां देवत्वप्राप्तौ।

श्रोत्रियत्वादिविशेषणवानपि हिरण्यगर्भोपासकस्तेन तुल्यानन्दो भवतीत्याह—यश्चेति। हिरण्यगर्भानन्दादुपरिष्टादपि ब्रह्मानन्दे गणितभेदे प्राकरणिके प्राप्ते प्रत्याह—अतः परमिति। एषोऽस्य परम आनन्द इत्युपक्रम्य किमित्यानन्दान्तरमुपदर्शितमित्याशङ्क्याऽऽह—एष इति। तथाऽपि सौषुप्तं सर्वात्मत्वमुपेक्षितमिति चेन्नेत्याह-यस्य चेति। प्रकृतस्य ब्रह्मानन्दस्यापरिच्छिन्नत्वमाह-तत्र हीति अनवच्छिन्नत्वफलमाह-भूमत्वादिति। ब्रह्मानन्दादितरे परिच्छिन्ना मर्त्याश्चेत्याह—इतर इति। अथ यत्रान्यत्पश्यतीत्यादिश्रुतेरिति भावः। श्रोत्रियादिपदानि व्याख्याय तात्पर्यं दर्शयति- अत्र चेति। मध्ये विशेषणेषु त्रिष्विति यावत्। तुल्ये सर्वपर्याप्तेष्विति शेषः। विशेषणान्तरे विशेषमाह—अकामहतत्वेति। यथोक्तं

---

१ ढ. तदाह। २ ख. ङ. °रं गुणि°। ३ ख. ङ. वृत्तरेष। ४ ग. छ. झ. °नन्दः। य°। ५ च. ढ. °ति नान्यद्विजानाति। अ। ६ क. °रीता आनन्दाः। अ°। ७ क.

विभागमुपपादयितुं सिद्धमर्थमाह—अत्रैतानीति । यश्चेत्यादिवाक्यं सप्तम्यर्थः । तस्य तस्याऽऽनन्दस्येति दैवप्राजापत्यादिनिर्देशः । अर्थादभिहितत्वे दृष्टान्तमाह—यथेति । ये कर्मजा देवत्वमित्यादिश्रुतिसामर्थ्यादेवानन्दाप्तौ यथा कर्माणि साधनान्युक्तानि तथा यश्चेत्यादिश्रुतिसामर्थ्यादेतान्यपि श्रोत्रियत्वादीनि तत्तदानन्दप्राप्तौ साधनानि विवक्षितानीत्यर्थः ।

तत्र च श्रोत्रियत्वावृजिनत्वलक्षणे कर्मणी अधरभूमिष्वपि समाने इति नोत्तरानन्दप्राप्तिसाधने अभ्युपेयेते । अकामहतत्वं तु वैराग्यतारतम्योपपत्तेरुत्तरोत्तरभूम्यानन्दप्राप्तिसाधनमित्यवगम्यते । स एष परम आनन्दो वितृष्णश्रोत्रियप्रत्यक्षोऽधिगतः । तथा च वेदव्यासः—

" यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम् ।
तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम् " ॥ इति ।

एष ब्रह्मलोको हे सम्राडिति होवाच याज्ञवल्क्यः सोऽहमेवमनुशिष्टो भगवते तुभ्यं सहस्रं ददामि गवाम् । अत ऊर्ध्वं विमोक्षायैव ब्रूहीति व्याख्यातमेतत् । अत्र ह विमोक्षायेत्यस्मिन्वाक्ये याज्ञवल्क्यो विभयांचकार भीतवान् । याज्ञवल्क्यस्य भयकारणमाह श्रुतिः । न याज्ञवल्क्यो वक्तृत्वसामर्थ्याभावाद्भीतवानज्ञानाद्वा किं तर्हि मेधावी राजा सर्वेभ्यो मा मामन्तेभ्यः प्रश्ननिर्णयावसानेभ्य उदरौत्सीदावृणोदवरोधं कृतवानित्यर्थः । यद्यन्मया निर्णीतं प्रश्नरूपं विमोक्षार्थं तत्तदेकदेशत्वेनैव कामप्रश्नस्य गृहीत्वा पुनः पुनर्मां पर्यनुयुङ्क्त एव मेधावित्वादित्येतद्भयकारणं सर्वं मदीयं विज्ञानं कामप्रश्नव्याजेनोपादित्सतीति ॥ ३३ ॥

ननु त्रयाणामविशेषश्रुतौ कथं श्रोत्रियत्वावृजि त्वयोः सर्वत्र तुल्यत्वं न हि ते पूर्वभूमिषु श्रुते तथा चाकामहतत्ववदानन्दोत्कर्षे तयोरपि हेतुतेति तत्राऽऽह—तत्र चेति । निर्धारणार्था सप्तमी । न हि श्रोत्रियत्वादिशून्यः सार्वभौमादिसुखमनुभवितुमुत्सहते । तथा च सर्वत्र श्रोत्रियत्वादेस्तुल्यत्वाच्च तदानन्दातिरेकप्राप्तावसाधारणं साधनमित्यर्थः । यदुक्तमानन्दशतगुणवृद्धिहेतुरकामहतत्वकृतो विशेष इति तदुपपादयति—अकामहतत्वं त्विति । पूर्वपूर्वभूमिषु वैराग्यमुत्तरोत्तरभूम्यानन्दप्राप्तिसाधनं वैराग्यस्य तरतमभावेन परमकाष्ठोपपत्तेर्निरतिशयस्य तस्य परमानन्दप्राप्तिसाधनत्वसंभवादित्यर्थः । यश्चेत्यादिवाक्यस्येत्थं तात्पर्यमुक्त्वा प्रकृते परमानन्दे विद्वदनुभवं प्रमाणयति—स एष इति । निरतिशयमकामहतत्वं परमानन्दप्राप्तिहेतुरित्यत्र प्रमाणमाह—तथा चेति । प्रकृत

१ घ. ञ. ण. °यितुमर्थोसि° । २ घ. ञ. ण. °भौमत्वादि° ।

प्रत्यग्भूतं परमानन्देष इति परामृशति । अनिर्मोक्षावित्याद्या तां व्याचष्टे—नेत्यादिना । तथापि किं तद्भयकारणं तदाह—यद्यदिति । मेधाविनस्त्वात्मज्ञातिशयशालित्वादिति यावत् । तदेव भयकारणं प्रकटयति—सर्वमिति ॥ ३३ ॥

स वा एष एतस्मिन्स्वप्नान्ते रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं प्रतियोन्याद्रवति बुद्धान्तायैव ॥ ३४ ॥

अत्र विज्ञानमयः स्वयंज्योतिरात्मा स्वप्ने प्रदर्शितः । स्वप्नान्तबुद्धान्तसंचारेण कार्यकरणव्यतिरिक्तता । कामकर्मप्रविवेकश्वासङ्गतया महामत्स्यदृष्टान्तेन प्रदर्शितः । पुनश्चाविद्याकार्यं स्वप्न एव घ्नन्तीत्यादिना प्रदर्शितम् । अथादविद्यायाः सतत्त्वं निर्धारितमतद्धर्माध्यारोपणरूपत्वमनात्मधर्मत्वं च । तथा विद्यायाश्च कार्यं प्रदर्शितं सर्वात्मभावः स्वप्न एव प्रत्यक्षतः सर्वोऽस्मीति मन्यते सोऽस्य परमो लोक इति । तत्र च सर्वात्मभावः स्वभावोऽस्येवमविद्याकामकर्मादि सर्वसंसारधर्मसंबन्धातीतं रूपमस्य साक्षात्सषप्ते गृह्यत इत्येतद्विज्ञापितं स्वयंज्योतिरात्मैष परम आनन्दः । एष विद्यायां विषयः । सैष एष परमः संप्रसादः सुखस्य च परा काष्ठेत्येतदेवमन्तेन ग्रन्थेन व्याख्यातम् । तच्चैतत्सर्वं विमोक्षपदार्थस्य दृष्टान्तभूतं बन्धनस्य च । ते चैते मोक्षबन्धने सहेतुके सप्रपञ्चे निर्दिष्टे विद्याविद्याकार्ये तत्सर्वं दृष्टान्तभूतमेवेति तद्दार्ष्टान्तिकस्थानीय मोक्षबन्धने सहेतुके कामप्रश्नार्थभूते त्वया वक्तव्ये इति पुनः पर्यनुयुङ्क्ते जनकोऽत ऊर्ध्वं विमोक्षायैव ब्रूहीति ।

स वा एष एतस्मिन्नित्याद्युत्तरग्रन्थस्य संबन्धं वक्तुं वृत्तं कीर्तयति—अत्रेति । अत्रायं पुरुषः स्वयंज्योतिर्भवतीति वाक्यं सप्तम्यर्थः । वृत्तमर्थान्तरमनुद्रवति—स्वप्नान्तेति । कार्यकरणव्यतिरिक्तत्वं प्रदर्शितमिति संबन्धः । उक्तमर्थान्तरमाह—कामेति । अथ यत्रैनं घ्नन्तीत्यादावुक्तमनुभाषते—पुनश्चेति । किं तत्कार्यप्रदर्शनसामर्थ्यान्निर्धारितमविद्यायाः सतत्त्वं तदाह—अतद्धर्मेति । अनात्मधर्मत्वमात्मनि चैतन्यवदस्वाभाविकत्वम् । अविद्याकार्यवद्विद्याकार्यं च स्वप्ने सर्वात्मभावलक्षणं प्रत्यक्षत एव प्रदर्शितमित्याह—तयेति । सुषुप्तेऽपि स्वभावेतद्दर्शितमित्याह—एवमिति । साक्षात्स्वरूपचैतन्यवदादित्येनु । अन्यथोत्पत्तस्य सुखस्य

१ च. ढ. एवैन । २ क. ख. ङ. छ. °ऽत्रेषावि° । ३ ग. घ. ज. °द्याकि° । ४ ख. ढ. °मनु° । ५ ख. ढ. °तत्प्रदर्शि° । ६ ख. ढ. °ह । तत्र चेति ।

रामर्शो न स्यादिति भावः । उक्तं विद्याकार्यं निगमयति—एष इति । तमेव विद्याविषयं विशदयति—स एष इति । वृत्तानुवादमुपसंहरति—इत्येतादिति । एवमन्तेन ग्रन्थेन ब्रह्मलोकान्तवाक्येनेति यावत् । सोऽहमित्यादेस्तात्पर्यमनुवदति—तच्चेति । यतो राजेत्थं मन्यतेऽतस्तस्य सहस्रदाने युक्ता प्रवृत्तिरित्यर्थः । अत ऊर्ध्वमित्यादेरभिप्रायमनुवदति—ते चेति । यद्यपि यथोक्तलक्षणे मोक्षबन्धने पागेवोपदिष्टे तथाऽपि पूर्वोक्तं सर्वं दृष्टान्तभूतमेव तयोरिति यतो राजा भ्राम्यत्यतो मोक्षबन्धने दार्ष्टान्तिकभूते वक्तव्ये याज्ञवल्क्येनेति मन्यमानस्तं प्रेरयतीत्यर्थः ।

तत्र महामत्स्यवत्स्वप्नबुद्धान्तावसङ्गः संचरत्येक आत्मा स्वयंज्योतिरित्युक्तम् । तथा चासौ कार्यकरणानि मृत्युरूपाणि परित्यजन्नुपाददानश्च महामत्स्यवत्स्वप्नबुद्धान्तावनुसंचरति तथा जायमानो म्रियमाणश्च तैरेव मृत्युरूपैः संयुज्यते वियुज्यते च । उभौ लोकावनुसंचरतीति संचरणं स्वप्नबुद्धान्तानुसंचारस्य दार्ष्टान्तिकत्वेन सूचितम् । तदिह विस्तरेण सनिमित्तं संचरणं वर्णयितव्यमिति तदर्थोऽयमारम्भः । तत्र च बुद्धान्तात्स्वप्नान्तमयमात्माऽनुप्रवेशितः । तस्मात्संप्रसादस्थानं मोक्षदृष्टान्तभूतम् । ततः प्रच्याव्य बुद्धान्ते संसारव्यवहारः प्रदर्शयितव्य इति तेनास्य संबन्धः । स वै बुद्धान्तात्स्वप्नान्तक्रमेण संप्रसन्न एष एतस्मिन्संप्रसादे स्थित्वा ततः पुनरीषत्प्रच्युतः स्वप्नान्ते रत्वा चरित्वेत्यादि पूर्ववद्बुद्धान्तायैवाऽऽद्रवति ॥ ६४ ॥

बन्धमोक्षयोर्वक्तव्यत्वेन प्राप्तयोरपि प्रथमं बन्धो वर्ण्यत इति वक्तुं दृष्टान्तं स्मारयति—तत्रेति । दृष्टान्तमनूद्य दार्ष्टान्तिकस्य बन्धस्य सूचितत्वं दर्शयति—यथा चेत्यादिना । उभौ लोकावित्यत्र प्रथमग्रहणशब्दो द्रष्टव्यः । वृत्तमनूद्यानन्तरप्रकरणमुत्थापयति—तदिहेति । अज्ञः संसारी सप्तम्यर्थः । सनिमित्तं कामादिना निमित्तेन सहितमित्येतत् । प्रकरणारम्भमुक्त्वा समनन्तरवाक्यस्य व्यवहितेन संबन्धमाह—तत्र चेति । स वा एष एतस्मिन्बुद्धान्ते रत्वेत्युपक्रम्य स्वमान्तायैवेति वाक्यं सप्तम्या परामृश्यते । स्वप्नान्तशब्दस्य स्वमविषयव्यावृत्त्यर्थं विशिनष्टि-संप्रसादेति। कथं पुनः संप्रसन्नस्य संसारोपवर्णनमित्याशङ्क्याऽऽह—तत इति । पागुक्तः सप्तम्यर्थो व्यवहितो ग्रन्थस्तेनेति परामृश्यते । समनन्तरग्रन्थः

---

१ घ. °नुवदति । २ छ. झ. ड. °रसंव्य° । ३ च. ज ढ. °द्धान्तस्वप्ना° । ४ ख. झ. °त्स्वप्नक° । ५ घ. ञ. ण. °वतुं तदुद्दृष्टा° । ६ ख. ढ. °णान्तरमु° ।

पक्षस्योच्यते। वाक्यस्य व्यवहितेन संबन्धमुक्त्वा तदक्षराणि योजयति—स वै ब्रह्मान्तादिति। स्वप्नान्ते रत्वा चरित्वेत्यादि बुद्धान्तायैवाऽऽद्रवतीत्येवमन्तं पूर्ववदिति योजना ॥ ३४ ॥

तद्यथाऽनः सुसमाहितमुत्सर्जयायादेवमेवायꣳ शारीर आत्मा प्राज्ञेनाऽऽत्मनाऽन्वारूढ उत्सर्जन्याति यत्रैतदूर्ध्वोच्छ्वासी भवति ॥ ३५ ॥

इत आरभ्यास्य संसारो वर्ण्यते। यथाऽयमात्मा स्वप्नान्ताद्बुद्धान्तमागत एवमयमस्माद्देहाद्देहान्तरं प्रतिपत्स्यत इत्याहात्र दृष्टान्तम्। तत्तत्र यथा लोकेऽनः शकटं सुसमाहितं सुष्ठु भृशं वा समाहितं भाण्डोपस्करणेनोलूखलमुसलशूर्पपिठरादिनाऽन्नाद्येन च संपन्नं संभारेणाऽऽक्रान्तमित्यर्थः। तथा भाराक्रान्तं सदुत्सर्जच्छब्दं कुर्वद्यथा यायाद्गच्छेच्छाकटिकेनाधिष्ठितं सत्। एवमेव यथोक्तो दृष्टान्तोऽयं शारीरः शरीरे भवः। कोऽसौ। आत्मा लिङ्गोपाधिः। यः स्वप्नबुद्धान्तावित्र जन्ममरणाभ्यां पाप्मसंसर्गवियोगलक्षणाभ्यामिहलोकपरलोकावनुसंचरति। यस्योत्क्रमणमनु प्राणाद्युत्क्रमणं स प्राज्ञेन परेणाऽऽत्मना स्वयंज्योतिःस्वभावेनान्वारूढोऽधिष्ठितोऽवभास्यमानः। तथा चोक्तमात्मनैवायं ज्योतिषाऽऽस्ते पल्ययत इति। उत्सर्जन्याति। तत्र चैतन्यात्मज्योतिषा भास्ये लिङ्गे प्राणप्रधाने गच्छति तदुपाधिरप्यात्मा गच्छतीव। तथा श्रुत्यन्तरम्—"कस्मिन्नहम्" इत्यादि "ध्यायतीव" इति च। अत एवोक्तं प्राज्ञेनाऽऽत्मनाऽन्वारूढ इति। अन्यथा प्राज्ञेनैकीभूतः शकटवत्कथमुत्सर्जन्याति।

तद्यथेत्यादेरिति नु कामयमान इत्यन्तस्य संदर्भस्य तात्पर्यं तद्धेत्यत्रोक्तमनुवदति—इत आरभ्येति। तद्यथेत्यस्मादाकयादित्येतत्। दृष्टान्तवाक्यमुत्थाप्य व्याकरोति—यथेत्यादिना। इत्यत्र दृष्टान्तमाहेति योजना। भाण्डोपस्करणेन भाण्डप्रमुखेन(ण) गृहोपस्करणेनेति यावत्। तदेवोपस्करणं विशिनष्टि—उलूखलेति। पिठरं पाकार्थं स्थूलं भाण्डम्। अन्वयं दर्शयितुं यथाशब्दोऽनूद्यते।

---

१ क. ख. ग. घ. ङ. च. ज. ट ढ. ढ. °र्जयाति। २ ख. ङ °था चाय°। ३ घ. °स्वप्नान्तेषु°। ४ ख. ग. च. झ. ढ. यस्य चोत्क्रं°। ५ घ. °ति। त°। ६ क. ख. ग. घ. ङ. छ. ज. ढ. °र्जयाति। ७ ग. °तिरवभा°। ८ क. °ति सति त°। ९ झ. °मुत्सृजन्या°। १० क. ख. ग. घ. ङ. च. छ. ज. ढ. °र्जयाति। ११ क. ख. घ ढ. ण. इत इत्य°। १२ घ. ञ. ण. °पकर°। १३ क. घ. ञ. ण. °पकर°।

लिङ्गविशिष्टमात्मानं विशिनष्टि-यः स्वप्नेति। जन्ममरणे विशदयति-पाप्मेति। कार्यकरणानि पाप्मशब्देनोच्यन्ते। शारीरस्य प्राधान्यं द्योतयति-यस्येति। उत्सर्जन्यातीति चेत्तदाऽङ्गीकृतमात्मनो गमनमित्याशङ्क्याऽऽह-तत्रेति। लिङ्गोपाधेरात्मनो गमनप्रतीतिरित्यत्राऽऽथर्वणश्रुतिं प्रमाणयति-तथा चेति। उत्सर्जन्यातीति श्रुतेर्मुख्यार्थत्वार्थमात्मनो वस्तुतो गमनं किं न स्यादित्याशङ्क्याऽऽह-ध्यायतीवेति। औपाधिकमात्मनो गमनमित्यत्र लिङ्गान्तरमाह-अत एवेति। कथमेतावता निरुपाधेरात्मनो गमनं नेष्यते तत्राऽऽह-अन्यथेति।

तेन लिङ्गोपाधिरात्मोत्सर्जन्मर्मसु निकृत्यमानेषु दुःखवेदनयाऽऽर्तः शब्दं कुर्वन्यातीति गच्छति तत्कस्मिन्काल इति। उच्यते-यत्रैतद्भवति। एतदिति क्रियाविशेषणम्। ऊर्ध्वोच्छ्वासी यत्रोर्ध्वोच्छ्वासित्वमस्य भवतीत्यर्थः। दृश्यमानस्याप्यनुवदनं वैराग्यहेतोः। ईदृशः कष्टः खल्वयं संसारः। येनोत्क्रान्तिकाले मर्ममृत्कृत्यमानेषु स्मृतिलोपो दुःखवेदनार्तस्य पुरुषार्थसाधनप्रतिपत्तौ चासामर्थ्यं परवशीकृतचित्तस्य। तस्माद्यावदियमवस्था नाऽऽगमिष्यति तावदेव पुरुषार्थसाधनकर्तव्यतायामप्रमत्तो भवेदित्याह कारुण्याच्छ्रुतिः॥ ३५॥

प्रमाणफलं निगमयति-तेनेति। तत्कस्मिन्नित्यत्र तच्छब्देनाऽऽर्तस्य शब्दविशेषकरणपूर्वकं गमनं गृह्यते। एतदूर्ध्वोच्छ्वासित्वमस्य यथा स्यात्तथाऽवस्था यस्मिन्काले भवति तस्मिन्काले तद्गमनमित्युपपादयति-उच्यत इत्यादिना। किमिति प्रत्यक्षमर्थं श्रुतिरनुवदति तत्राऽऽह-दृश्यमानस्येति। कथं संसारस्वरूपानुवादमात्रेण वैराग्यसिद्धिस्तत्राऽऽह-ईदृश इति। ईदृशत्वमेव विशदयति-येनेत्यादिना। अनुवादश्रुतेरभिप्रायमुपसंहरति तस्मादिति॥ ३५॥

स यत्रायमणिमानं न्येति जरया वोपतपता वाऽणिमानं निगच्छति तद्यथाऽऽम्रं वोदुम्बरं वा पिप्पलं वा बन्धनात्प्रमुच्यत एवमेवायं पुरुष एभ्योऽङ्गेभ्यः संप्रमुच्य पुनः प्रतिन्यायं प्रतियोन्याद्रवति प्राणायैव॥३६॥

तदस्योर्ध्वोच्छ्वासित्वं कस्मिन्काले किंनिमित्तं कथं किमर्थं वा

---

१ ख. घ. ञ. ढ ण. यस्य चेति। २ क °जयातीं°। ३ क. °जीयाउी°। ४ ख. ङ. °देगावं पु° : ५ क. °मत्ता भवनेत्या°।

स्यादित्येतदुच्यते—सोऽयं प्राकृतः शिरःपाण्यादिमान्पिण्डो यत्र यस्मिन्काले ऽयमाणिमानमणोर्भावमणुत्वं कार्श्यमित्यर्थः । न्येति निगच्छति । किंनिमित्तं जरया वा स्वयमेव कालपक्वफलवज्जीर्णः कार्श्यं गच्छति । उपतपतीत्युपतपज्ज्वरादिरोगसम्बन्धेनोपतपता वा । उपतप्यमानो हि रोगेण विषमाग्नितयाऽन्नं भुक्तं न जरयति ततोऽन्नरसेनानुपचीयमानः पिण्डः कार्श्यमापद्यते तदुच्यत उपतपता वेति । अणिमानं निगच्छति, यदाऽत्यन्तकार्श्यं प्रतिपन्नो जरादिनिमित्तमन्दोर्ध्वोच्छ्वासी भवति । यदोर्ध्वोच्छ्वासी तदा भूयाहितसंभारशकटवदुत्सर्जन्याति । जराभिभवो रोगादिपीडनं कार्श्यापत्तिश्च शरीरवतोऽवश्यंभाविन एतेऽनर्था इति वैराग्यायेदमुच्यते ।

प्रश्नचतुष्टयमनूद्य तदुत्तरत्वेन स यत्रेत्यादि वाक्यमादाय व्याकरोति—तदस्येत्यादिना । प्रश्नपूर्वकं कार्श्यनिमित्तं स्वाभाविकमागन्तुकं चेति दर्शयति—किंनिमित्तमित्यादिना । कथं ज्वरादिना कार्श्यमापद्यत इत्याशङ्क्याऽऽह—उपतप्यमानो होति । यथोक्तनिमित्तद्वयाद्गात्कार्श्यमापद्यते निगच्छति—अणिमानमेति । कस्मिन्काले तदूर्ध्वोच्छ्वासित्वमस्येति प्रश्नस्योत्तरमुक्तया विधया सिद्धमित्याह—यदेति । अवशिष्टप्रश्नद्वयस्योत्तरमाह—यदोर्ध्वोच्छ्वासीति । तत्र हि कार्श्यनिमित्तं संभृतशकटवन्नानाशब्दकरणं स्वरूपं शरीरविमोक्षणं प्रयोजनमित्यर्थः । स यत्रेत्यादिवाक्यादर्थसिद्धमर्थमाह—जरेति ।

यदाऽऽमावुत्सर्जन्याति तदा कथं शरीरं विमुञ्चतीति दृष्टान्त उच्यते—तत्तत्र यथाऽऽम्रं वा फलमुदुम्बरं वा पिप्पलं वा फलम् । विषमानेकदृष्टान्तोपादानं मरणस्यानियतनिमित्तत्वख्यापनार्थम् । अनियतानि हि मरणस्य निमित्तान्यसंख्यातानि च एतदपि वैराग्यार्थमेव । यस्मादयमनेकमरणनिमित्तवांस्तस्मात्सर्वदा मृत्योरास्ये वर्तत इति । बन्धनाद्बध्यते येन वृन्तेन सह स बन्धनकारणो रसो यस्मिन्वा बध्यत इति वृन्तमेवोच्यते बन्धनं तस्माद्रसाद्वृन्ताद्वा बन्धनात्प्रमुच्यते वाताद्यनेकनिमित्तमेवमेवायं पुरुषो लिङ्गात्मा लिङ्गोपाधिरेभ्योऽङ्गेभ्यश्चक्षुरादिदेहावयवेभ्यः संप्रमुच्य सम्यङ्निर्लेपेन प्रमुच्य ।

---

१ ख. च ढ प्रकृतः । २ झ लेऽगि° । ३ च ढ °सी भवति त° । ४ क. ख. घ. ङ छ ज ढ. °र्जयाति । ५ क. °कं चैतद्दर्शं° । ञ. °कं च तद्दर्शं° । ६ ख. ढ. चेदं । ७ क. ख. घ. ङ छ. ज. ढ. °र्जयाति । ८ ग. घ. ङ ज. झ. °न संबन्धका° । च. छ. °न संब° : ढ °न स ब° । ९ क. °ह ब° ।

तद्यथेत्यादिवाक्यं प्रश्नपूर्वकमादाय व्याचष्टे—यदेत्यादिना । कथं बन्धनात्मोक्षणमुच्यत इति संबन्धः । किमिति विषमानेकदृष्टान्तोपादानमेकेनापि विवक्षितसिद्धेरित्याशङ्क्याऽऽह—विषमेति । कथं मरणस्यानियतान्यनेकानि निमित्तानि संभवन्तीत्याशङ्क्यानुभवमनुसृत्याऽऽह—अनियतानीति । अथ मरणस्यानेकानियतानिमित्तेभ्यस्त्वसंकीर्तनं कुत्रोपयुज्यते तत्राऽऽह—एतदपीति । तदर्थत्वमेव समर्थयते—यस्मादीति । इत्यमेभिर्मत्तैर्भवितव्यमिति शेषः । वृन्तेन सह फलं येन रसेन संबध्यते स रसो बन्धनकारणभूतो बन्धनं वृन्तमेव वा बन्धनं यस्मिन्फलं बध्यते रसेनेति व्युत्पत्तेस्तस्माद्बन्धनादनेकनिमित्तवशात्पूर्वोक्तस्य फलस्य भवति प्रमोक्षणमित्याह—बन्धनादित्यादिना । लिङ्गमात्मोपाधिरस्येति तद्विशिष्टः शारीरस्तथोच्यते । संपमुच्याऽऽद्रवतीति संबन्धः ।

न सुषुप्तगमनकाल इव प्राणेन रक्षन् । किं तर्हि सह वायुनोपसंहृत्य । पुनः प्रतिन्यायं पुनःशब्दात्पूर्वमप्ययं देहाद्देहान्तरमसकृद्गतवान्यथा स्वप्नबुद्धान्तौ पुनः पुनर्गच्छति तथा पुनः प्रतिन्यायं प्रतिगमनं यथागतमित्यर्थः । प्रतियोनि योनिं योनिं प्रति कर्मश्रुतादिवशादाद्रवति । किमर्थम् । प्राणायैव प्राणव्यूहायैवेत्यर्थः । सप्राण एव हि गच्छति ततः प्राणायैवेति विशेषणमनर्थकम् । प्राणव्यूहाय हि गमनं देहाद्देहान्तरं प्रति । तेन ह्यस्य कर्मफलोपभोगार्थसिद्धिर्न प्राणसत्तामात्रेण । तस्मात्तादर्थ्यार्थं युक्तं विशेषणं प्राणव्यूहायेति ॥ २६ ॥

समित्युपसर्गस्य तात्पर्यमाह—नेत्यादिना । यदि स्वप्नावस्थायामिव मरणावस्थायां प्राणेन देहं रक्षन्नाद्रवतीति नाऽऽद्रियते केन प्रकारेण तर्हि तदा देहान्तरं प्रति गमनमित्याशङ्क्याऽऽह—किं तर्हीति । वायुना प्राणेन सह करणजातमुपसंहृत्याऽऽद्रवतीति पूर्ववत्संबन्धः । पुनः प्रतिन्यायमिति प्रतीकमादाय पुनःशब्दस्य तात्पर्यमाह—पुनरित्यादिना । तथा पुनराद्रवतीति संबन्धः । यथा पूर्वमिमं देहं प्राप्तवान्पुनरपि तथैव देहान्तरं गच्छतीत्याह—प्रतिन्यायमिति । देहान्तरगमने कारणमाह—कर्मेति । आदिशब्देन पूर्वप्रज्ञा गृह्यते । प्राणव्यूहाय प्राणानां विशेषाभिव्यक्तिलाभायेति यावत् । प्राणायेति श्रुतिः किमर्थमित्थं व्याख्यायते तत्राऽऽह—सप्राण इति । एतच्च तदन्तरप्रतिपत्त्यधिकरणे निर्धारितम् । प्राणायेति विशेषणस्याऽऽनर्थक्यादुक्तं प्राणव्यूहायेति विशेषणमित्याह—प्राणेति । नन्वस्य प्राणः सह वर्तते चेत्तावतैव भोगसिद्धेरलं प्राणव्यूहेनेत्याश-

---

१ घ. ञ. ण. °स्थानियतानेकमिति° । २ ख. °त्तत्व° । ३ घ. ञ. ण. र्थत्वमे° । ४ घ. ण. °त्यत्राप्र° ।

ङ्क्याऽऽह—तेन हीति। अन्यथा सुषुप्तिमूर्छयोरपि भोगप्रसक्तेरित्यर्थः। तादर्थ्यार्थं प्राणस्य भोगशेषत्वसिद्ध्यर्थमिति यावत्॥ ३६॥

तत्रास्येदं शरीरं परित्यज्य गच्छतो नान्यस्य देहान्तरस्योपादाने सामर्थ्यमस्ति। देहेन्द्रियवियोगात्। न चान्येऽस्य भृत्यस्थानीया गृहमिव राज्ञे शरीरान्तरं कृत्वा प्रतीक्षमाणा विद्यन्ते। अथैवं सति कथमस्य शरीरान्तरोपादानमिति। उच्यते—सर्वं ह्यस्य जगत्स्वकर्मफलोपभोगाय चायं प्रवृत्तो देहाद्देहान्तरं प्रतिपित्सुस्तस्मात्सर्वमेव जगत्स्वकर्मणा प्रयुक्तं तत्कर्मफलोपभोगयोग्यं साधनं कृत्वा प्रतीक्षत एव। "कृतं लोकं पुरुषोऽभिजायते" इति श्रुतेः। यथा स्वप्नाज्जागरितं प्रतिपित्सोः।

तद्यथा राजानमित्यादिवाक्यव्यावर्त्यामाशङ्कामाह—तत्रेति। मुमूर्षावस्था सप्तम्यर्थः। अथास्य स्वयमसामर्थ्येऽपि शरीरान्तरकर्तारोऽन्ये भविष्यन्ति यथा राज्ञो भृत्या गृहनिर्मातारस्तत्राऽऽह—न चेति। स्वयमसामर्थ्यमन्येषां चासत्त्वमिति स्थिते फलितमाह—अथेति। तद्यथेत्यादिवाक्यस्य तात्पर्यं दर्शयन्नुत्तरमाह—उच्यत इति। भवत्वज्ञस्य स्वकर्मफलोपभोगे साधनत्वसिद्ध्यर्थं सर्वं जगदुपात्तं तथाऽपि देहाद्देहान्तरं प्रतिपित्समानस्य किमायातमित्याशङ्क्याऽऽह—स्वकर्मेति। स्वकर्मणेत्यत्र स्वशब्दस्तत्कर्मफलोपभोगयोग्यमित्यत्र तच्छब्दश्च प्रकृतभोक्तृविषयौ। तत्र प्रमाणमाह—कृतमिति। पुरुषो हि त्यक्तवर्तमानदेहो भूतपञ्चकादिना निर्मितमेव देहान्तरमभिव्याप्य जायत इति श्रुतेरर्थः। उक्तमेवार्थं दृष्टान्तेन स्पष्टयति—यथेति। स्वप्नस्थानाज्जागरितस्थानं प्रतिपित्सोश्छतः शरीरं पूर्वमेव कृतं नापूर्वं क्रियते तथा देहाद्देहान्तरं प्रतिपित्समानस्य पञ्चभूतादिना कृतमेव देहान्तरमित्यर्थः।

तत्कथमिति लोकप्रसिद्धो दृष्टान्त उच्यते—

> तद्यथा राजानमायान्तमुग्राः प्रत्येनसः सूतग्रामण्योऽन्नैः पानैरावसथैः प्रतिकल्पन्तेऽयमायात्ययमागच्छतीत्येवꣳ हैवंविदꣳ सर्वाणि भूतानि प्रतिकल्पन्त इदं ब्रह्माऽऽयातीदमागच्छतीति॥ ३७॥

१ ख. ढ. °भोगसा°। २ ख. ढ व्यज्यत। घ. ण व्यवतिष्ठत। ३ घ. च. छ. ट. ढ. °मायन्त°।

तत्त्रात्र तथा राजानं राज्याभिषिक्तमायान्तं स्वराष्ट्र उग्रा जातिविशेषाः क्रूरकर्माणो वा प्रत्येनसः प्रति प्रत्येनसि पापकर्मणि नियुक्ताः प्रत्येनसस्तस्करादिदण्डनादौ नियुक्ताः सूताश्च ग्रामण्यश्च सूतग्रामण्यः सूता वर्णसंकरजातिविशेषा ग्रामण्यो ग्रामनेतारस्ते पूर्वमेव राज्ञ आगमनं बुद्ध्वाऽन्नैर्भोज्यभक्ष्यादिप्रकारैः पानैर्मदिरादिभिरावसथैश्च प्रासादादिभिः प्रतिकल्पन्ते निष्पन्नैरेव प्रतीक्षन्तेऽयं राजाऽऽयात्ययमागच्छतीत्येवं वदन्तः। यथाऽयं दृष्टान्त एवं हैवंविदं कर्मफलस्य वेदितारं संसारिणमित्यर्थः। कर्मफलं हि प्रस्तुतं तदेवंशब्देन परामृश्यते। सर्वाणि भूतानि शरीरकर्तृणि करणानुग्रहीतृणि चाऽऽदित्यादीनि तत्कर्मयुक्तानि कृतैरेव कर्मफलोपभोगसाधनैः प्रतीक्षन्ते। इदं ब्रह्म भोक्तृ कर्तृ चास्माकमायाति तयेदमागच्छतीत्येवमेव च कृत्वा प्रतीक्षन्त इत्यर्थः ॥ ३७ ॥

सर्वेषां भूतानां देहान्तरं कृत्वा संसारिणि परलोकाय प्रस्थिते प्रतीक्षणं केन प्रकारेणेति प्रश्नपूर्वकं दृष्टान्तवाक्यमुत्थाप्य व्याचष्टे—तत्त्रेत्यादिना। तत्र पापकर्मणि नियुक्तत्वमेव व्यनक्ति—तस्करादीति। आदिपदेनान्येऽपि निग्राह्या गृह्यन्ते। दण्डनादावित्यादिशब्दो हिंसाप्रभेदसंग्रहार्थः। 'ब्राह्मण्यां क्षत्रियात्सूतः' इति स्मृतिमाश्रित्य सूतशब्दार्थमाह—वर्णसंकरेति। भोज्यभक्ष्यादिप्रकारैरित्यादिशब्देन लेह्यचोष्ययोः संग्रहः। मदिरादिभिरित्यादिपदेन क्षीरादि गृह्यते। प्रासादादिभिरित्यादिशब्दो गोपुरतोरणादिग्रहार्थः। विद्वन्मात्रे प्रतीयमाने किमिति कर्मफलस्य वेदितारमिति विशेषोपादानमित्याशङ्क्याऽऽह—कर्मफलं हीति। तत्कर्मप्रयुक्तानित्यत्र तच्छब्दः संसारिविषयः। संसारिणो वस्तुतो ब्रह्माभिन्नत्वात्तस्मिन्ब्रह्मशब्दः। अभ्यासस्तूभयत्राऽऽदरार्थः ॥ ३७ ॥

तद्यथा राजानं प्रयियासन्तमुग्राः प्रत्येनसः
सूतग्रामण्योऽभिसमायन्त्येवमेवेममात्मानमन्तकाले सर्वे प्राणा अभिसमायन्ति यत्रैतद्ऊर्ध्वोच्छ्वासी भवति ॥ ३८ ॥

इति बृहदारण्यकोपनिषदि चतुर्थाध्यायस्य तृतीयं ब्राह्मणम् ॥ ३ ॥

---

१ ङ. छ. °मायन्त°। २ अ °राष्ट्रमुग्रा। ३ घ. ज. °कर्मिणो। ४ क. छ. °जा जाति°।

तमेवं विद्वांसं के सह गच्छन्ति । ये वा गच्छन्ति ते किं तत्क्रियाप्रयुक्ता आहोस्विदुत्क्रमणशास्त्रवशात्स्वयमेव गच्छन्ति परलोकशरीरकर्तृणि च भूतानीति । अत्रोच्यते दृष्टान्तः—तद्यथा राजानं प्रयियासन्तं प्रकर्षेण यातुमिच्छन्तमुग्राः प्रत्येनसः सूतग्रामण्यस्तं यथाऽभिसमायन्त्याभिमुख्येन समायन्त्येकीभावेन तमभिमुखा ओषध्यंनाह्वया एव राज्ञा केवलं तज्जिगमिषाभिज्ञाः, एवमेवेममात्मानं मोक्षारम्भकाले मरणकाले सर्वे प्राणा वागादयोऽभिसमायन्ति । यत्रैतदूर्ध्वोच्छ्वासी भवतीति व्याख्यातम् ॥ ३८ ॥

इति बृहदारण्यकोपनिषदि चतुर्थाध्यायस्य
तृतीयं ब्राह्मणम् ॥ ३ ॥

तद्यथा राजानं प्रयियासन्तमित्यादिवाक्यव्यावर्त्यं चोद्यमुत्थापयति—तमेवमिति । वागादयस्तमनुगच्छन्तीत्याशङ्क्याऽऽह—ये वेति । तत्क्रियाप्रयुक्तास्तस्य मन्त्रवर्णादिव्यापारेण प्रेरिताः समाहूता इति यावत् । यानि च भूतानि परलोकशब्दितं शरीरं कुर्वन्ति यानि वा कारणानुगृहीतृणवादिस्थादीनि केचिदिति यथोक्तप्रश्नप्रवृत्तिं दर्शयति—परलोकेति । नाऽऽद्यः । परलोकार्थं पतिष्यतस्तस्य वागादिव्यापाराभावादाहानानुपपत्तेः । न द्वितीयो भोक्तृकर्मवशादपि वागादिव्यापारेषु स्वयं प्रवृत्तेरनुपपत्तेरिति चोदयितुरभिप्रायः । उत्तरवाक्येनो (ओ) त्तरयति—अत्रेत्यादिना । मरणकालमेव विशिनष्टि—यत्रेति । अचेतनानामपि वागादीनां चेतनप्रेरितानां प्रवृत्तिदर्शनाद्वागादीनामपि भोक्तृकर्मवशादाहृतत्वमन्तरेणाप्रवृत्तिः संभवतीति भावः ॥ ३८ ॥

इति बृहदारण्यकोपनिषद्भाष्यटीकायां चतुर्थाध्यायस्य
ज्योतिर्ब्राह्मणं तृतीयम् ॥ ३ ॥

(अथ चतुर्थाध्यायस्य चतुर्थं ब्राह्मणम्) ।

स यत्रायमात्मा । संसारोपवर्णनं प्रस्तुतम् । तत्रायं पुरुष एतेभ्योऽङ्गेभ्यः संप्रमुच्येत्युक्तम् । तत्संप्रमोक्षणं कस्मिन्काले कथं वेति तावित्स्तरं संसरणं वर्णयितव्यमित्यारभ्यते—

स यत्रायमात्माऽबल्यं न्येत्य संमोहमिव न्येत्यथैन-

---

१ ग. ये तु सह गं° । २ क. ख. ङ. छ. °तृणीव भूं° । ३ क. ग. ङ, छ. °ग्रस्त एवाभि° । ४ ङ. तदभि° । ५ क. झ. आयास्य° । ६ ख. °स्यनभिज्ञं° । ७ ख, ग, घ, च, झ, ङ. चेति ।

मेते प्राणा अभिसमायन्ति स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामति स यत्रैष चाक्षुषः पराङ्पर्यावर्ततेऽथारूपज्ञो भवति ॥ १ ॥

सोऽयमात्मा प्रस्तुतः यत्र यस्मिन्कालेऽबल्यमबलभावं निरेत्य गत्वा । यद्देहस्य दौर्बल्यं तदात्मन एव दौर्बल्यमित्युपचर्यतेऽबल्यं न्येत्येति । न ह्यसौ स्वतोऽमूर्तत्वादबलभावं गच्छति । तथा संमोहमिव संमूढता संमोहो विवेकाभावः संमूढतामिव न्येति निगच्छति । न चास्य स्वतः संमोहोऽसंमोहो वाऽस्ति । नित्यचैतन्यज्योतिःस्वभावत्वात । तेनेवशब्दः संमोहमिव न्येतीति । उत्क्रान्तिकाले हि करणोपसंहारनिमित्तो व्याकुलीभाव आत्मन इव लक्ष्यते लौकिकैः । तथा च वक्तारो भवन्ति संमूढः संमूढोऽयमिति ।

ब्राह्मणान्तरमुत्थापयति—स यत्रेति । तस्य संबन्धं वक्तुमुक्तं कीर्तयति—संसारेति । वक्ष्यमाणोपयोगित्वेनोक्तपर्यन्तरमनुद्रवति—तत्रेति । संसारप्रकरणं तत्र्यर्थः । संप्रत्याकाङ्क्षापूर्वकमुत्तरब्राह्मणमादत्ते—तत्संप्रमोक्षणमिति । एवं ब्राह्मणमवतार्य तदक्षराणि व्याकरोति—सोऽयमित्यादिना । गत्वा संमोहमिव न्येतीत्युत्तरत्र संबन्धः । कथमात्मनो दौर्बल्यं तदाह—यद्देहस्येति । किमित्युपचारो मुख्यमेवाऽऽत्मनो दौर्बल्यं किं न स्यादित्याशङ्क्याऽऽह—न हीति । यथाऽबलभावं निगच्छति तथा संमोहं संमूढतामिव प्रतिपद्यते । विवेकाभावो हि संमोहः । तथा च संमूढतामिव निगच्छतीति युक्तमित्याह—तथेति । इवशब्दार्थमाह—न चेति । कथं पुनरात्मनः समारोपितोऽपि संमोहः स्यान्नित्यचैतन्यज्योतिष्ट्वादित्याशङ्क्याऽऽह—उत्क्रान्तीति । व्याकुलीभावो लिङ्गस्येति शेषः । तत्र लौकिकीं वार्तामनुकूलयति—तथेति ।

अथ वोभयत्रेवशब्दप्रयोगो योज्योऽबल्यमिव न्येत्य संमोहमिव न्येतीति । उभयस्य परोपाधिनिमित्तत्वाविशेषात् । समानकर्तृकनिर्देशाच्च । अथास्मिन्काल एते प्राणा वागादय एनमात्मानमभिसमायन्ति तदाऽस्य शारीरस्याऽऽत्मनोऽङ्गेभ्यः संप्रमोक्षणम् । कथं पुनः संप्रमोक्षणं केन वा प्रकारेणाऽऽत्मानमभिसमायन्तीति । उच्यते—स आत्मैतास्तेजोमात्रास्तेजसो मात्रास्तेजोमात्रास्तेजोवयवा रूपादिप्र-

१ क, ख, घ, ङ. च. ज. झ. ट. संमोहता° । २ ग. °हो वा° । ३ ख. अथ यस्मि° ।

कारकत्वाच्चक्षुरादीनि करणानीत्यर्थः । ता एताः समभ्यादद्दानः सम्यङ्निर्लेपेनाभ्यादद्दान आभिमुख्येनाऽऽददानं संहरमाणस्तत्स्वप्नापेक्षया विशेषणं समिति । ननु स्वप्ने निर्लेपेन सम्यगादानम् । अस्ति त्वादानमात्रम् । गृहीता वागगृहीतं चक्षुरस्य लोकस्य सर्वावतो मात्रामपादाय शुष्कमादायेत्यादिवाक्येभ्यः ।

यथाश्रुतमिवशब्दं गृहीत्वा वाक्यं व्याख्याय पक्षान्तरमाह—अथवेति । इवशब्दप्रयोगस्योभयत्र योजनामेवाभिनयति—अवश्यमिति । उभयत्र तद्योजने हेतुमाह—उभयस्येति । तुल्य[illegible]नाकल्पसंमोहघोरैककर्तृकत्वानिर्देशाद्भ्युपपत्तेवकारो द्रष्टव्य इत्याह—समानेति । अथेत्यादि वाक्यमवतार्य व्याकुर्वन्किमस्मिन्काले तत्संपमोक्षणमित्यस्योत्तरमाह—अथेत्यादिना । कथं वेत्युक्तं प्रश्नपूर्वं प्रश्नान्तरं पस्तौति—कथमिति । अत्रोत्तरत्वेनोत्तरं वाक्यमादाय व्याकरोति—उच्यत इत्यादिना । रूपादिप्रकाशनशक्तिमत्तत्त्वप्रधानभूतकार्यत्वात्तेजोमात्राश्चक्षुरादीनित्युक्तं संप्रति समभ्यादद्दान इत्यस्यार्थमाह—ता एता इति । संहरमाणो हृदयमभिवक्रामतीत्यन्वयः । तत्समिति विशेषणं स्वप्नापेक्षयेति संबन्धः । कथं स्वप्नापेक्षया विशेषणं तदाह—न हीति । आदानमात्रमपि स्वप्ने नास्तीति कुतस्तद्व्यावृत्त्यर्थं विशेषणमित्याशङ्क्याऽऽह—अस्तीति ।

हृदयमेव पुण्डरीकाकाशमन्वभिवक्रामत्यन्वागच्छति हृदयेऽभिव्यक्तविज्ञानो भवतीत्यर्थः । बुद्ध्यादिविक्षेपोपसंहारे सति । न हि तस्य स्वतश्चलनं विक्षेपोपसंहारादिविक्रिया वा । ध्यायतीव लेलायतीवेत्युक्तत्वात् । बुद्ध्याद्युपाधिद्वारेव हि सर्वविक्रियाऽध्यारोप्यते तस्मिन् । कदा पुनस्तस्य तेजोमात्राभ्यादानमिति । उच्यते—स यत्रैष चक्षुषि भवश्चाक्षुषः पुरुष आदित्यांशो भोक्तुः कर्मणा प्रयुक्तो यावद्देहधारणं तावच्चक्षुषोऽनुग्रहं कुर्वन्वर्तते । मरणकाले त्वस्य चक्षुरनुग्रहं परित्यजति स्वमादित्यात्मानं प्रतिपद्यते ।

स एतास्तेजोमात्राः समभ्यादद्दान इत्येतद्व्याख्याय हृदयमेवेत्यादि व्याचष्टे—हृदयमित्यादिना । तविज्ञानो भवतीति वाक्यशेषमाभित्य वाक्यार्थमाह—हृदय इति । कथमात्मनो निष्क्रियस्य तेजोमात्रादानकर्तृत्वमित्याशङ्क्याऽऽह—बुद्ध्यादीति । तेषां तद्विक्षेपस्य चोपसंहारे सत्यात्मनस्तदादानकर्तृत्वमौपचारिकमित्यर्थः । वस्तुतस्तद्विक्षेपोपसंहर्तृत्ववत्तदादानकर्तृत्वमपि मुख्यमेव भविष्यतीत्याशङ्क्याऽऽह—न हीति । आदिशब्देन क्रियाविशेषः सर्वो गृह्यते । कथं वस्तुतः

१ स. घ. ञ. ट. ण. चेत्यकं । २ ग. च. छ. झ. °कारम° । ३ क. °त्यन्वेवग° । ४ °क्षुषोऽनु° ।

वर्तीति कर्तृत्वादिपदेत्याशङ्क्याऽऽह–बुद्ध्यादीति । तं यदेत्यादि वाक्यमवतारयति–कदा पुनरित्यादिना । तस्य पुरुषशब्दाभ्यां पदाभ्यां विशिनष्टि–आदित्यांश इति । तस्य चाक्षुषत्वं तावद्वर्तते–भोक्तुरित्यादिना । यावद्देहधारणमिति कुतो विशेषणं तत्राऽऽह–मरणकाले त्विति । आदित्यांशस्य चक्षुरनुग्रहमकुर्वतः स्वातन्त्र्यं वारयति–स्वामिति ।

तदेतदुक्तं यत्रास्य पुरुषस्य मृतस्याग्निं वाग्अप्येति वातं प्राणश्चक्षुरादित्यमित्यादि पुनर्देहारम्भकाले संश्रयिष्यन्ति । तथा स्वप्नस्यतः प्रबुध्यतश्च । तदेवाह–चाक्षुषः पुरुषो यत्र यस्मिन्काले पराङ्पर्यावर्तते परिसमन्तात्पराङ्व्यावर्तत इति । अथात्रास्मिन्काले ऽरूपज्ञो भवति पुरुषं रूपं न जानाति तदाऽयमात्मा चक्षुरादितेजोमात्राः समभ्याददानो भवति स्वप्नकाल इव ॥ १ ॥

मरणावस्थायां चक्षुराद्यनुग्राहकदेवतांशानामधिदेवतात्मनोपसंहारे भृत्यन्तरं संश्रयति–तदेतदिति । तर्हि देहान्तरे वागादेराहित्यं स्यादित्याशङ्क्याऽऽह–पुनरिति । संश्रयिष्यन्ति वागादयस्तत्तद्देवताधिष्ठिता यथास्थानमिति शेषः । पुरुषोत्थिव स्वप्नस्यतः सर्वाणि करणानि लिङ्गात्मनोपसंहियन्ते प्रबुध्यमानस्य पुरुषोत्थिव तानि यथास्थान प्रादुर्भवन्तीत्याह—तथेति । उक्तेऽर्थे वाक्यं पातयति—तदेतदाहेति । परीक्रूपर्यावर्तत इति रूपवैमुख्यं चाक्षुषस्य विवक्षितमिति शेषः ।

> एकी भवति न पश्यतीत्याहुरेकी भवति न जिघ्रतीत्याहुरेकी भवति न रसयत इत्याहुरेकी भवति न वदतीत्याहुरेकी भवति न शृणोतीत्याहुरेकी भवति न मनुत इत्याहुरेकी भवति न स्पृशतीत्याहुरेकी भवति न विजानातीत्याहुस्तस्य हैतस्य हृदयस्याग्रं प्रद्योतते तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुष्टो वा मूर्ध्नो वाऽन्येभ्यो वा शरीरदेशेभ्यस्तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति सविज्ञानो भवति

---

१ क. ङ. °राद्वि° । ग. °राव° । २ ब. ञ. ण. °राद्याव° । ३ क. ग. °क्षुषो वा ।

तविज्ञानमेवान्ववक्रामति। तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च ॥ २ ॥

एकी भवति करणजातं स्वेन लिङ्गात्मना। तदेनं पार्श्वस्था आत्मनं पश्यन्तीति। तथा घ्राणदेवतानिवृत्तौ घ्राणमेकी भवति लिङ्गात्मना तदा न जिघ्रतीत्याहुः। समानमन्यत्। जिह्वायां सोमो वरुणो वा देवता तन्निवृत्त्यपेक्षया न रसयत इत्याहुः। तथा न वदति न शृणोति न मनुते न स्पृशति न विजानातीत्याहुः। तदुपलक्ष्यते देवतानिवृत्तिः करणानां च हृदय एकीभावः। तत्र हृदय उपसंहृतेषु करणेषु योऽन्तर्व्यापारः स कथ्यते—तस्य हैतस्य प्रकृतस्य हृदयस्य हृदयच्छिद्रस्येत्येतत्। अग्रं नाडीमुखं निर्गमनद्वार प्रद्योतते स्वप्नकाल इव स्वेन भासा तेजोमात्रादानकृतेन स्वेनैव ज्योतिषाऽऽत्मनैव च। तेनाऽऽत्मज्योतिषा प्रद्योतेन हृदयाग्रेणैष आत्मा विज्ञानमयो लिङ्गोपाधिर्निर्गच्छति निष्क्रामति। तथाऽऽथर्वणे "कस्मिन्वहमुत्क्रान्त उत्क्रान्तो भविष्यामि कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीति स प्राणमसृजत" इति।

तर्हि भोक्तृोपसंहृतं चक्षुरत्यन्ताभावीभूतमित्याशङ्क्याऽऽह—एकीति। उक्तेऽर्थे लोकपसिद्धिं दर्शयति—तदेति। चक्षुषि दर्शितं न्यायं घ्राणेऽतिदिशति—तथेति। यथा चक्षुर्देवतायां निवृत्तौ लिङ्गात्मना चक्षुरेकी भवति तथा घ्राणदेवतांशस्य घ्राणानुग्रहनिवृत्तिद्वारेणाश्विदेवतयैकये लिङ्गात्मना घ्राणमेकी भवतीत्यर्थः। तन्निवृत्त्यपेक्षया वरुणादिदेवतायां जिह्वायामनुग्रहनिवृत्तौ जिह्वाया लिङ्गात्मनैकयव्यपेक्षयेत्यर्थः। तत्तदनुग्राहकदेवतांशस्य तत्र तत्रानुग्रहनिवृत्त्या तत्तदिन्द्रादिदेवतायामाधौ तत्तत्करणस्य लिङ्गात्मनैकयं भवतीत्यभिप्रेत्याऽऽह—तथेति। मरणदशायां रूपादिदर्शनराहित्यमर्थदृष्टसाधकमित्याह—तदेति। तस्य हैतस्येत्यादि वाक्यमुपादत्ते—तत्रेति। मुमूर्षावस्था तत्रत्यर्थः। केनायं पर्योवो भवतीत्यपेक्षायामाह—स्वप्नेति। यथा स्वप्नकाले स्वेन भासा स्वेन ज्योतिषा प्रस्वपितीति व्याख्यातं तथाऽत्रापि तेजोमात्राणां यदादाने तत्कृतेन वासनारूपेण भाव्यफलविषयबुद्धिवृत्तिरूपेण स्वेन भासा स्वेन चाऽऽत्मना चैतन्यज्योतिषा हृदयाग्रप्रद्योतनमित्यर्थः। तत्पार्थक्रियां दर्शयति—तेनेति। किमिति लिङ्गद्वाराऽऽत्मनो निर्गमनं प्रतिज्ञायते तत्राऽऽह—तथेति।

१ झ. °लभ्यते। २ क. ग. घ. च. छ. ज. झ. ढ. °ज्योतिः प्र°। ३ ख. ञ. ढ. °णां नि°। ४ ख. ढ. °तायां जि°। ५ ख. ढ °द्योतितो। ६ क. घ. ञ. ण. °त्मने°

तत्र चाऽऽत्मचैतन्यज्योतिः सर्वदाऽभिव्यक्ततरम् । तदुपाधिद्वारा ह्यात्मनि जन्ममरणगमनागमनादिसर्वविक्रियालक्षणः संव्यवहारः । तदात्मकं हि द्वादशविधं करणं बुद्ध्यादि तत्सूत्रं तज्जीवनं सोऽन्तरात्मा जगतस्तस्थुषश्च । तेन प्रद्योतेन हृदयाग्रप्रकाशेन निष्क्रममाणः केन मार्गेण निष्क्रामतीति । उच्यते-चक्षुष्टो वा । आदित्यलोकप्राप्तिनिमित्तं ज्ञानं कर्म वा यदि स्यात् । मूर्ध्नो वा ब्रह्मलोकप्राप्तिनिमित्तं चेत् । अन्येभ्यो वा शरीरदेशेभ्यः शरीरावयवेभ्यो यथाकर्म यथाश्रुतम् । तं विज्ञानात्मानमुत्क्रामन्तं परलोकाय प्रस्थितं परलोकार्थोद्भूतोकृतमित्यर्थः । प्राणः सर्वाधिकारिस्थानीयो राज्ञ इवानूत्क्रामति । तं च प्राणमनूत्क्रामन्तं वागादयः सर्वे प्राणा अनूत्क्रामन्ति ।

यदि मरणकाले तेजोमात्रादानं न तर्हि तदा लिङ्गोपाधिरात्मेत्याशङ्क्याऽऽह-तत्र चेति । तत्तस्या लिङ्गमुच्यते । सर्वदेति लिङ्गस्तत्तादशोक्तिः । आत्मोपाधिभूते लिङ्गे किं प्रमाणमित्याशङ्क्याऽऽत्मनि कूटस्थे संव्यवहारदर्शनमित्याह-तदुपाधीति । चक्षुरादिपरिच्छिन्नेऽपि प्रमाणमित्याह-तदात्मकं हीति । एकादशविधं करणमित्यभ्युपगमात्कुतो द्वादशविधत्वमित्याशङ्क्य विशिनष्टि-बुद्ध्यादीति । 'वायुर्वै गौतम तत्सूत्रम्' इत्यादिश्रुतिरपि यथोक्ते लिङ्गे प्रमाणमित्याह-तत्सूत्रमिति । जगतो जीवनमपि तत्र मानमित्याह-तज्जीवनमिति । 'एष सर्वभूतान्तरात्मा' इति श्रुतिरपि यथोक्तं लिङ्गं साधयतीत्याह-सोऽन्तरात्मेति । लिङ्गोपाधेरात्मनो यथोक्तप्रकाशेन मरणकाले हृदयान्निष्क्रमणे पार्श्वपृष्ठंकमुत्तरवाक्येनो (णो) पदिशति-तेनेत्यादिना । चक्षुष्टो वेति विकल्पे निमित्तं सूचयति-आदित्येति । मूर्ध्नो वेति विकल्पे हेतुमाह-ब्रह्मलोकेति । तत्प्राप्तिनिमित्तं चेज्ज्ञानं कर्म वा स्यादिति पूर्वेण संबन्धः । देहावयवान्तरेभ्यो निष्क्रमणे नियामकमाह-यथेति । कथं परलोकाय प्रस्थितमित्युच्यते प्राणगमनाधीनत्वादिज्ञानात्मगमनस्येत्याशङ्क्याऽऽह-परलोकायेति ।

यथाप्रधानान्वाचिख्यासेयं न तु क्रमेण साधुवद्गमनमिहेह विवक्षितम् । तदेष आत्मा सविज्ञानो भवति स्वप्न इव विशेषविज्ञानवान्भवति कर्मवशान्न स्वतन्त्रः । स्वातन्त्र्येण हि सविज्ञानत्वे सर्वः कृतकृत्यः स्यात् । नैव तु तल्लभ्यते । अत एवाऽऽह व्यासः " सदा

१ च. छ. ट. °द्वारो ह्या° । २ च. छ. °नादि° । ३ क. छ. ज. चक्षुषो । ४ क. °तामिति । तं । ५ क. च. छ. ज. °ताकृत° । ज. °ताकृतिमि° । ६ क. चक्षुषो । ७ ङ. महाश्रुत वि° । ८ च. ट. °लभते ।

तद्भावभावितः" इति । कर्मणा तूद्भाव्यमानेनान्तःकरणवृत्ति-विशेषाश्रितवासनात्मकविशेषविज्ञानेन सर्वो लोक एतस्मिन्काले सविज्ञानो भवति । सविज्ञानमेव च गन्तव्यमन्ववक्रामत्यनुच्छति विशेषविज्ञानोद्भासितमेवेत्यर्थः । तस्मात्तत्काले स्वातन्त्र्यार्थं योगधर्मानुसेवनं परिसंख्यानाभ्यासश्च विशिष्टपुण्योपचयश्च श्रद्दधानैः परलोकार्थिभिरप्रमत्तैः कर्तव्य इति ।

ननु जीवस्य प्राणादितादात्म्ये सति कथमनुशब्देन क्रमो विवक्ष्यते तत्राऽऽह—यथाप्रधानेति । प्रधानमनतिक्रम्य ह्ययमन्वारोहणेच्छा । तथा च जीवादेः प्राधान्याभिप्रायेणानुशब्दप्रयोगो न क्रमाभिप्रायेण देशकालभेदाभावादित्यर्थः । सार्थे समूहे व्यक्तिषु क्रमेण गमनं दृश्यते न तथा प्राणादिष्विति व्यतिरेकः । यदुक्तं हृदयाग्रप्रद्योतन तत्सविज्ञानश्रुत्या प्रकटयति—तदेति । कर्मवशादिति विशेषणं साधयति—नेति । विपक्षे दोषमाह—स्वातन्त्र्येणेति । इष्टापत्तिमाशङ्क्याऽऽह—नैवेति । मुमूर्षोरस्वातन्त्र्ये मानमाह—अत एवेति । कर्मवशादुक्तं सविज्ञानत्वमुपसंहरति—कर्मणेति । अन्तःकरणस्य वृत्तिविशेषो भाविदेहविषयस्तदाश्रितं तद्रूपं यद्वासनात्मकं विशेषविज्ञानं तेनेति यावत् । म्रियमाणस्य सविज्ञानत्वे सत्यर्थसिद्धमर्थमाह—सविज्ञानमेवेति । गन्तव्यस्य सविज्ञानत्वं विज्ञानाश्रयत्वमित्याशङ्क्य विशिनष्टि—विशेषेति । प्रागेवोत्क्रान्तेः सविज्ञानत्वादिश्रुतेस्तात्पर्यमाह—तस्मादिति । पुरुषस्य कर्मानुसारित्वं तच्छब्दार्थः । योगश्चित्तवृत्तिनिरोधः । तस्य धर्मा यमनियमप्रभृतयः । तेषामनुसेवनं पुनः पुनरावर्तनम् । परिसंख्यानाभ्यासो योगानुष्ठानम् । कर्तव्य इति पक्षश्रुतेर्विधेयोऽर्थ इति शेषः ।

सर्वशास्त्राणां प्रयत्नतो विधेयोऽर्थो दुश्चरिताच्चोपरमणम् । न हि तत्काले शक्यते किंचित्संपादयितुम् । कर्मणा नीयमानस्य स्वातन्त्र्याभावात् । पुण्यो वै पुण्येन कर्मणा भवति पापः पापेनेत्युक्तम् । एवस्य ह्यनर्थस्योपशमोपायविधानाय सर्वशास्त्रोपनिषदः प्रवृत्ताः । न हि तद्विहितोपायानुसेवनं मुक्त्वाऽऽत्यन्तिकोऽस्यानर्थस्योपशमोपायोऽस्ति । तस्मादत्रैवोपनिषद्विहितोपाये यत्नपरैर्भवितव्यमित्येष प्रकरणार्थः ।

किंच पुण्योपचयकर्तव्यतारूपेऽर्थे सर्वमेव विधिकाण्डं पर्यवसितमित्याह—सर्वशास्त्राणामिति । तत्र तस्मादागामिदुश्चरितादुपरमणं कर्तव्यमित्यस्मिन्नर्थे निषेधशास्त्रमपि पर्यवसितमित्याह—दुश्चरिताच्चेति । ननु पूर्वं यथेष्टचेष्टां कृत्वा

१ क. ग. °णाऽनूद्भा° । २ झ. °त्येवं प्र° ।

रस्यकाले सर्वमेवोत्सादयिष्यते नेत्याह—न हीति । कर्मणा नीयमानत्वे मानमाह—पुण्य इति । तर्हि पुण्योपचयादेव यथोक्तानर्थनिवृत्तेरर्थं तत्त्वज्ञानमित्याशङ्क्याऽऽह—एतस्येति । उपशमोपायस्तत्त्वज्ञानं तस्य विधानं प्रकाशनं तदर्थमिति यावत् । देवताध्यानादनर्थो निवर्तिष्यते किं तत्त्वज्ञानेनेत्याशङ्क्याऽऽह—न हीति । तद्विहितेति तच्छब्देन प्रकृताः सर्वशास्त्रोपनिषदो गृह्यन्ते । विधान्तरेणानर्थध्वंसासिद्धौ फलितमाह—तस्मादिति । ज्ञापितविज्ञानवाक्येनेति शेषः ।

शकटवत्संभृतसंभार उत्सर्जन्यातीत्युक्तं, किं पुनस्तस्य परलोकाय प्रवृत्तस्य पथ्यदनं शाकटिकसंभारस्थानीयं गत्वा वा परलोकं यद्भुक्ते शरीरारम्भकं च यत्तत्किमिति । उच्यते—तं परलोकाय गच्छन्तमात्मानं विद्याकर्मणी विद्या च कर्म च विद्याकर्मणी विद्या सर्वप्रकारा विहिता प्रतिषिद्धा चाविहिताऽप्रतिषिद्धा च । तथा कर्म विहितं प्रतिषिद्धं चाविहितमप्रतिषिद्धं च समन्वारभेते सम्यगन्वारभेते अन्वालभेते अनुगच्छतः पूर्वप्रज्ञा च पूर्वानुभूतविषया प्रज्ञा पूर्वप्रज्ञाऽतीतकर्मफलानुभववासनेत्यर्थः ।

वृत्तमनूद्य प्रश्नपूर्वकमुत्तरवाक्यमवतार्य व्याचष्टे—शकटवदित्यादिना । विहिता विद्या ध्यानात्मिका । प्रतिषिद्धा नग्नस्त्रीदर्शनादिरूपा । अविहिता घटादिविषया । अप्रतिषिद्धा पथि पतिततृणादिविषया । विहितं कर्म यागादि प्रतिषिद्धं ब्रह्महननादि । अविहितं गमनादि । अप्रतिषिद्धं नेत्रपक्ष्मविक्षेपादि ।

सा चैं वासनाऽपूर्वकर्मारम्भे कर्मविपाके चाङ्गं भवति । तेनासावप्यन्वारभते । न हि तया वासनया विना कर्म कर्तुं फलं चोपभोक्तुं शक्यते । न ह्यनभ्यस्ते विषये कौशलमिन्द्रियाणां भवति । पूर्वानुभववासनाप्रबुद्धानां त्विन्द्रियाणामिहाभ्यासमन्तरेण कौशलमुपपद्यते । दृश्यते च केषाञ्चित्कासुचित्क्रियासु चित्रकर्मादिलक्षणासु विनैवेहाभ्यासेन जन्मत एव कौशलं कासुचिदत्यन्तसौकर्ययुक्तास्वप्यकौशलं केषांचित् । तथा विषयोपभोगेषु स्वभावत एव केषांचित्कौशलाकौशले दृश्येते । तच्चैतत्सर्वं पूर्वप्रज्ञोद्भवानुद्भवनिमित्तम् । नैवं पूर्वप्रज्ञया विना कर्मणि वा फलोपभोगे वा न कस्यचित्प्रवृत्तिरुप-

१ स. ग. घ. ङ. च. छ. ज. झ. ट. °र्जयाती° । २ घ. ज. °लोके घ° । ३ घ. ङ. ज. झ. अनु° । ४ ग. घ. ज. °नुभवबि° । ५ घ. ज. झ. झाऽतीं° । ६ घ. ञ. ण. °तृं ग्रा° । ७ झ. च कर्मवा° । ८ झ. °तेनेह पू° ।

पद्यते । तस्मादेतत्त्रयं शाकटिकसंभारस्थानीयं परलोकपथ्यदनं विद्याकर्मपूर्वप्रज्ञाख्यम् । यस्माद्विद्याकर्मणी पूर्वप्रज्ञा च देहान्तरप्रतिपत्त्युपभोगसाधनं तस्माद्विद्याकर्मादि शुभमेव समाचरेद्यथेष्टदेहसंभोगोपभोगौ स्यातामिति प्रकरणार्थः ॥ २ ॥

विद्याकर्मणोरुपभोगसाधनत्वप्रसिद्धेरन्वारम्भेऽपि किमित्यन्वारभते वासनेत्याशङ्क्याऽऽह—सा चेति । अपूर्वकर्मारम्भादवश्यं पूर्ववासनेत्यत्र हेतुमाह—न हीति । उक्तमेव हेतुमादर्शयति—नहीत्यादिना । इन्द्रियाणां विषयेषु कौशलमनुष्ठाने प्रयोजकं सत्फलोपभोगे हेतुः । न चान्तरेणाभ्यासमिन्द्रियाणां विषयेषु कौशलं संभवति । तस्मादनुष्ठानाभ्यासापीनमपि यर्थः । तथाऽपि कथं पूर्ववासना कर्मानुष्ठानादवश्यमित्याशङ्क्याऽऽह—पूर्वानुभवेति । तत्र लोकानुभवं प्रमाणयति—दृश्यते चेति । विद्याकर्मादित्यादिशब्देन प्रासादनिर्माणादि गृह्यते । पूर्ववासनोद्भवश्च कार्यमुक्त्वा तद्भावश्च कार्यमाह—कासुचिदिति । रज्जुनिर्माणादिष्वपि योज्यम् । तत्रैवाऽऽदरगौरवमभ्याहृत्य—तथेति । तत्र हेत्वन्तरमाशङ्क्य परिहरति—तच्चेति । कर्मानुष्ठानादौ पूर्वप्रज्ञाया हेतुत्वमुपसंहरति—तेनेति । समन्वारम्भवचनार्थं निगमयति—तस्मादिति । तत्रैव तात्पर्यार्थमाह—यस्मादिति ॥ २ ॥

एवं विद्यादिसंभारसंभृतो देहान्तरं प्रतिपद्यमानो मुक्त्वा पूर्वं देहं पक्षीव वृक्षान्तरं देहान्तरं प्रतिपद्यते । अथवाऽऽतिवाहिकेन शरीरान्तरेण कर्मफलजन्मदेशं नीयत । किंचात्रस्थस्यैव सर्वगतानां करणानां वृत्तिलाभो भवत्याहोस्विच्छरीरस्थस्य संकुचितानि करणानि मृतस्य भिन्नघटप्रदीपप्रकाशवत्सर्वतो व्याप्य पुनर्देहान्तरारम्भे संकोचमुपगच्छन्ति । किंच भगवान्न वैशेषिकसमय इव देहान्तरारम्भे देशं प्रति गच्छति किंवा कल्पनान्तरमेव वेदान्तसमय इति । उच्यते—" त एते सर्व एव समाः सर्वऽनन्ताः " इति श्रुतेः सर्वात्मकानि तावत्करणानि[1] सर्वात्मकप्राणसंश्रयाच्च । तेषामाध्यात्मिकाधिभौतिकपरिच्छेदः प्राणिकर्मज्ञानभावनानिमित्तः । अतस्तद्वशात्स्वभावतः सर्वगतानामनन्तानामपि प्राणानां कर्मज्ञानवासनारूपेणैव देहान्तरारम्भवशात्प्राणानां वृत्तिः संकुचति विकसति च । तथा चोक्तम्—" समः प्लुषिणा-

१ घ. ङ. ज. क्रियमा । २ क. ख. च. झ. किंवाऽत्र । ग. किंच तत्र । ढ किंवा तत्र । २ क. ख. ग. ङ. च. ज झ ढ. किंवा । ४ ङ. नारू । ५ क. ख. छ. ज. झ ॰रूपेण ॰ ।

समो मशकेन समो नागेन सम एभिस्त्रिभिर्लोकैः समोऽनेन सर्वेण" इति। तथा चेदं वचनमनुकूलम्-"स य एतानन्तानुपास्ते" इत्यादि। "तं यथा यथोपासते" इति च।

तृणजलायुकावाक्यमवतारयितुं वृत्तमनूद्य वादविवादान्दर्शनादौ दिगम्बरमतमाह-एवमित्यादिना। देवतावादिमतमाह-अथवेति। देवता येन शरीरेण विशिष्टं जीवं परलोकं नयति तदातिवाहिकं शरीरान्तरं तेनेति यावत्। सांख्यादितमतमाह-किंचेति। सिद्धान्तं सूचयति-आहोस्विदिति। वैशेषिकादिपक्षमाह-किंचेति। न्यूनत्वनिवृत्त्यर्थमाह-किंवा कल्पान्तरमिति। तत्र सिद्धान्तस्य प्रामाणिकत्वेनोपादेयत्वं वदन्कल्पान्तराणामप्रामाणिकत्वेन त्याज्यत्वमभिप्रेत्याऽऽह-उच्यत इति। तेषां सर्वात्मकत्वे हेत्वन्तरमाह-सर्वात्मकेति। कथं तर्हि करणानां परिच्छिन्नत्वधीरित्याशङ्क्याऽऽह-तेषामिति। आधिदैविकेन रूपेणापरिच्छिन्नानामपि करणानामाध्यात्मिकादिरूपेण परिच्छिन्नतेति स्थिते फलितमाह-अत इति। तद्दृशादुदाहरणश्रुतिवशादित्येतत्। स्वभावतो देवतास्वरूपानुसारेणेति यावत्। कर्मज्ञानवासनानुरूपेणेत्यत्र भोक्तुरिति शेषः। उभयत्र संबन्धार्थं प्राणानामिति द्विरुक्तम्। तेषां वृत्तिसंकोचादौ प्रमाणमाह-तथा चेति। परिच्छिन्नापरिच्छिन्नप्राणोपासने गुणदोषसंकीर्तनमपि प्राणसंकोचविकासयोः सूचकमित्याह-तथा चेदमिति।

तत्र वासना पूर्वप्रज्ञारूपा विद्याकर्मतन्त्रा जलूकावत्संततैव स्वप्नकाल इव कर्मकृतं देहाद्देहान्तरमारभते हृदयस्थैव पुनर्देहान्तरारम्भे देहान्तरं पूर्वाश्रयं विजहातीत्येतस्मिन्नर्थे दृष्टान्त उपादीयते-

> तद्यथा तृणजलायुका तृणस्यान्तं गत्वाऽन्यमाक्रममाक्रम्याऽऽत्मानमुपसंहरत्येवमेवायमात्मेदं शरीरं निहत्याविद्यां गमयित्वाऽन्यमाक्रममाक्रम्याऽऽत्मानमुपसंहरति ॥ ३ ॥

तत्तत्र देहान्तरसंचार इदं निदर्शनम्। यथा येन प्रकारेण तृणजलायुका तृणजलूका तृणस्यान्तमवसानं गत्वा प्राप्यान्यं तृणान्तरमाक्रममाक्रम्यत इत्याक्रमस्तमाक्रममाक्रम्याऽऽश्रित्याऽऽत्मानमात्मनः पूर्वावयवमुपसंहरत्यन्यावयवस्थाने। एवमेवायमात्मा यः प्रकृतः संसारीदं शरीरं पूर्वोपात्तं निहत्य स्वप्न प्रतिपित्सुरिव पातयित्वाऽविद्यां

---

१ झ. 'दं सर्वम'। २ क. ढ. किंवेति। ३ ख. किंवेति। ४ ण. 'र्वान्तरत्वे। ५ ण. 'पेण सर्वगतानां'। ६ घ. ञ ण. 'णेत्यर्थः। क'। ७ क. घ. ञ. ढ. 'नारू'। ८ क. ग. ञ. छ. 'न्तरं। ९ ख. ड. 'र्थं तथा दृ'। १० घ. ज. 'णस्या'। ११ घ. ङ. च. ढ. 'यन्याव'

ायित्वाऽचेतनं कृत्वा स्वात्मोपसंहारेणान्यमाक्रमं तृणान्तरमिव तृण-
ृका शरीरान्तरं गृहीत्वा प्रसारितया वासनयाऽऽत्मानमुपसंहरति ।
ाऽऽत्मभावमारभते यथा स्वप्ने देहान्तरमारभते[1] स्वप्नदेहान्तरस्य
ितारम्भदेश आरभ्यमाणे देहे जङ्गमे स्थावरे वा ।

आधिदैविकेन रूपेण सर्वमतानामपि करणानामाध्यात्मिकाधिभौतिकरूपेण
च्छिन्नत्वात्तत्परिवृतस्य गमनं सिध्यतीति सिद्धान्तो दर्शितः । इदानीं तृणज-
ुकादृष्टान्ताद्देहान्तरं गृहीत्वा पूर्वदेहं मुञ्चत्यात्मेति स्थूलदेहविशिष्टस्यैव पर-
क्रमणमिति पौराणिकपक्रियां प्रत्याख्यातुं दृष्टान्तवाक्यस्य तात्पर्यमाह—तत्रे-
ादिना । देहनिर्गमनात्पागवस्था सप्तम्यर्थः । तैरेव यथोक्ता वासना हृदय-
। विद्याकर्मनिर्मितं भाविदेहं सृजतीति जीवोऽपि तत्राभिमानं करोति पुनश्च पूर्व-
त्यजति । यथा स्वप्ने देवोऽहमित्यभिमन्यमानो देहान्तरस्थ एव भवति तथो-
न्तावपि । तस्मान्न पूर्वदेहविशिष्टस्यैव परलोकगमनमित्यर्थः । स्वात्मोपसंहारो
पूर्वस्मिन्नात्माभिमानत्यागः । प्रसारितया वासनया शरीरान्तरं गृहीत्वेति
न्धः । उपसंहारस्य स्वरूपमाह—तत्रेति । सप्तम्यर्थं विवृणोति—आरभ्य-
ण इति ।

तत्र च कर्मवशात्करणानि लब्धवृत्तीनि संहन्यन्ते । बाह्यं च कुश-
स्तिकास्थानीयं शरीरमारभ्यते । तत्र च करणव्यूहमपेक्ष्य वागाद्यनु-
ग्राहयाग्न्यादिदेवताः संश्रयन्ते । एष देहान्तरारम्भविधिः ॥ ३ ॥

आरब्धे देहान्तरे सूक्ष्मदेहस्याभिव्यक्तिमाह—तत्र चेति । कर्मग्रहणं विद्या-
पक्षयोरुपलक्षणम् । ननु लिङ्गदेहबलादेवार्थक्रियासिद्धौ कृतं स्थूलशरीरेणे-
शङ्क्य तद्व्यतिरेकेणेतरस्यार्थक्रियाकारित्वं नास्तीति मत्वाऽऽह—बाह्यं चेति।
रब्धे देहद्वये करणेषु देवतानामनुग्राहकत्वेनावस्थानं दर्शयति—तत्रेति ।
लो देहः सप्तम्यर्थः । करणव्यूहस्तेषामभिव्यक्तिः ॥ ३ ॥

तत्र देहान्तरारम्भे नित्योपात्तमेवोपादानमुपमृद्योपमृद्य देहान्तरमा-
ात आहोस्विदपूर्वमेव पुनः पुनरादत्त इति । अत्रोच्यते दृष्टान्तः—

तद्यथा पेशस्कारी पेशसो मात्रामपादायान्यन्नव-
तरं कल्याणतरꣳ रूपं तनुत एवमेवायमात्मेदꣳ-
शरीरं निहत्याविद्यां गमयित्वाऽन्यन्नवतरं कल्याण-

---

१ ग. च °रस्य । २ ढ °ते देहान्तारितस्व° । ३ घ ज स्वप्नान्तरारम्भ आ° : ४ ज. °रीरमार° । ५ ण. °पेणापरिच्छिन्नाना° । ६ ण. °कादिरू° । ७ ख. ढ. तदैवं । घ. घ. ण. °निर्मितं भा° । ९ ध. एष । १० ख. °क्षणार्थम् ।

तरꣳ रूपं कुरुते पित्र्यं वा गान्धर्वं वा दैवं वा प्राजापत्यं
वा ब्राह्मं वाऽन्येषां वा भूतानाम् ॥ ४ ॥

तत्तत्रैतस्मिन्नर्थे । यथा पेशस्कारी पेशः सुवर्णं तत्करोतीति पेशस्कारी सुवर्णकारः पेशसः सुवर्णस्य मात्रामपादायापाच्छिद्य गृहीत्वाऽन्यत्पूर्वस्माद्रचनाविशेषान्नवतरमभिनवतरं कल्याणात्कल्याणतरं रूपं तनुते निर्मिनोति । एवमेवायमात्मेत्यादि पूर्ववत् ।

पेशस्कारिवाक्यव्यावर्त्यमाशङ्क्याह-तत्रेति । संसारिणो हि प्रकृते देहान्तरारम्भे किमुपादानमस्ति किंवा नास्ति चेन्न भावरूपं कार्यं सिध्येत् । अस्ति चेत्तत्किं भूतपञ्चकमुतान्यत् । आद्येऽपि तन्नित्योपात्तमेव पूर्वपूर्वदेहोपमर्देनान्यमन्यं देहमारभते किंवाऽन्यदन्यद्भूतपञ्चकमन्यमन्य देहं जनयति । नाऽऽद्यः । भूतपञ्चकस्य तत्तद्देहोपादानत्वे मायायाः सर्वकारणत्वस्वीकारविरोधात् । न द्वितीयः । भूतपञ्चकोत्पत्तावपि कारणान्तरस्य मृग्यत्वात्तस्यैव देहान्तरकारणत्वसंभवान्नेतरो देहस्य पाञ्चभौतिकत्वप्रसिद्धिविरोधादिति भावः । उत्तरं वाक्यमुत्तरत्वेनाऽऽदत्ते-अत्रेति । तच्छब्दार्थमपेक्षितं पूरयन्नाह-दृष्टान्त इति । अवशिष्टं भागमादाय व्याचष्टे-यथेत्यादिना ।

नित्योपात्तान्येव पृथिव्यादीन्याकाशान्तानि पञ्च भूतानि यानि द्वे वाव ब्रह्मणो रूपे इति चतुर्थे व्याख्यातानि पेशस्थानीयानि तान्येवोपमृद्योपमृद्यान्यदन्यच्च देहान्तरं नवतरं कल्याणतरं रूपं संस्थानविशेषं देहान्तरमित्यर्थः । कुरुते पित्र्यं वा पितृभ्यो हितं पितृलोकोपभोगयोग्यमित्यर्थः । गान्धर्वं गन्धर्वाणामुपभोगयोग्यं तथा देवानां दैवं प्रजापतेः प्राजापत्यं ब्रह्मण इदं ब्राह्मं वा । यथाकर्म यथाश्रुतमन्येषां वा भूतानां संबन्धि शरीरान्तरं कुरुत इत्यभिसंबध्यते ॥ ४ ॥

किं पुनरुपादानमेतावता देहान्तरारम्भेऽभ्युपगतं भवति तत्राऽऽह-नित्योपात्तानीति । शरीरद्वयारम्भकाणीति शेषः । तेषामुभयारम्भकत्वेन मूर्तामूर्तब्राह्मणे प्रस्तुतत्वं दर्शयति-यानीति । देहविकल्पे नियामकमाह-यथाकर्मेति ॥ ४ ॥

येऽस्य बन्धनसंज्ञका उपाधिभूता यैः संयुक्तस्तन्मयोऽयमिति विभाव्यते ते पदार्थाः पुञ्जीकृत्येहैकत्र प्रतिनिर्दिश्यन्ते-

स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमयः

---

१ च छ. °न्नवान्नव° । २ ख. ङ °पतरिद प्रा° । ३ घ ज. °सज्ञिता उ° ।

प्राणमयश्चक्षुर्मय. श्रोत्रमयः पृथिवीमय आपोमयो वायुमय आकाशमयस्तेजोमयोऽतेजोमयः काममयोऽकाममयः क्रोधमयोऽक्रोधमयो धर्ममयोऽधर्ममयः सर्वमयस्तद्यदेतदिदमयाऽदोमय इति यथाकारी यथाचारी तथा भवति साधुकारी साधुर्भवति पापकारी पापो भवति पुण्यः पण्येन कर्मणा भवति पापः पापेन । अथो खल्वाहुः काममय एवायं पुरुष इति स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते यत्कर्म कुरुते तदभिसंपद्यते ॥ ५ ॥

स वा अयं य एवं संसरन्नात्मा ब्रह्मैव पर एव योऽशनायाद्यतीतो विज्ञानमयो विज्ञानं बुद्धिस्तेनोपलक्ष्यमाणस्तन्मयः । कतम आत्मेति योऽयं विज्ञानमयः प्राणेष्विति श्रुतम् । विज्ञानमयो विज्ञानप्रायो यस्मात्तद्धर्मत्वमस्य विभाव्यते ध्यायतीव लेलायतीवेति । तथा मनोमयो मनःसंनिकर्षान्मनोमयः । तथा प्राणमयः प्राणः पञ्चवृत्तिस्तन्मयो येन चेतनश्चलतीव लक्ष्यते । तथा चक्षुर्मयो रूपदर्शनकाले । एवं श्रोत्रमयः शब्दश्रवणकाले । एवं तस्य तस्येन्द्रियस्य व्यापारोद्भवे तत्तन्मयो भवति ।

शरीरारम्भे मायात्मकभूतपञ्चकमुपादानमिति वदता भूतावयवानामपि सहैव गमनमित्युक्तम् । इदानीं स वा अयमात्मेत्यादेस्तात्पर्यमाह—योऽयमिति । तानेवोपादिभूतान्पदार्थान्विशिनष्टि—यैरिति । ननु पूर्वमप्येते पदार्था दर्शिताः किं पुनस्तत्प्रदर्शनेत्याशङ्क्याऽऽह—पुञ्जीकृत्येति । स वा अयमात्मा ब्रह्मेति भागं व्याकुर्वन्नात्मनो ब्रह्मैक्यं वास्तवं वृत्तं दर्शयति—स वा इति । तस्यैवावास्तवं रूपमुपन्यस्यति—विज्ञानमय इत्यादिना । ज्योतिर्ब्राह्मणेऽपि व्याख्यातं विज्ञानमयत्वमित्याह—कतम इति । कस्मिन्नर्थे मयट् प्रयुज्यते तत्राऽऽह—विज्ञानेति । उक्ते मयडर्थे हेतुमाह—यस्मादिति । बुद्ध्यैकाध्यासात्तद्धर्मस्य कर्तृत्वादेरात्मनि प्रतीतिरित्यत्र मानमाह—ध्यायतीवेति । मनःसंनिकर्षान्मन दृष्टव्यतया संबन्धादिति यावत् । चक्षुर्मयत्वादेरुपलक्षणत्वमङ्गीकृत्याऽऽह—एवमिति ।

---

१ च ज ठ पापेनेति । २ च ढ द्भवकाल त ।

एवं बुद्धिप्राणद्वारेण चक्षुरादिकरणमयः सञ्शरीरारम्भकपार्थिव्या-देभूतमयो भवति । तत्र पार्थिवशरीरारम्भे पृथिवीमयो भवति । तथा वरुणादिलोकेष्वाप्यशरीरारम्भ आपोमयो भवति । तथा वायव्यशरी-रारम्भे वायुमयो भवति । तथाऽऽकाशशरीरारम्भ आकाशमयो भव-ति । एवमेतानि तैजसानि देवशरीराणि । तेष्वारभ्यमाणेषु तन्मयस्ते-जोमयो भवति । अतो व्यतिरिक्तानि पश्वादिशरीराणि नरकप्रेतादि-शरीराणि चातेजोमयानि तान्यपेक्ष्याऽऽहातेजोमय इति । एवं कार्य-करणसंघातमयः सन्नात्मा प्राप्तव्यं वस्त्वन्तरं पश्यन्निदं मया प्राप्तमदो मया प्राप्तव्यमित्येवं विपरीतप्रत्ययस्तदभिलाषः कामयते भवति । तस्मिन्काम दोषं पश्यंस्तद्विषयाभिलाषप्रशमे चित्तं प्रसन्नमकलुषं शान्तं भवति । तन्मयोऽकामयः । एवं तस्मिन्विहते कामे केनचित्स कामः क्रोधत्वेन परिणमते तेन तन्मयो भवंन्क्रोधमयः । स क्रोधः केनचिदुपायेन निवर्तितो यदा भवति तदा प्रसन्नमनाकुलं चित्तं सद्-क्रोध उच्यते तेन तन्मयः । एवं कामक्रोधाभ्यामकामाक्रोधाभ्यां च तन्मयो भूत्वा धर्ममयोऽधर्ममयश्च भवति । न हि कामक्रोधादिभि-र्विना धर्मादिप्रवृत्तिरुपपद्यते ।

" यद्यद्धि कुरुते कर्म तत्तत्कामस्य चेष्टितम् "

इति स्मरणात् । धर्ममयोऽधर्ममयश्च भूत्वा सर्वमयो भवति । समस्तं धर्माधर्मयोः कार्यं यावत्किंचिद्व्याकृतं तत्सर्वं धर्माधर्मयो. फलं तत्प्र-तिपद्यमानस्तन्मयो भवति ।

उक्तमनूद्य सामान्येन भूतमयत्वम ह–एवं बुद्धीति । भूतमयत्वे सत्यवान्तर-विशेषमाह–तत्रेत्यादिना । न चाऽऽकाशपरमाण्वभावाद्वाकाशस्य शरीरानारम्भ-कत्वं श्रुतिविरुद्धारम्भप्रक्रियानभ्युपगमादित्यभिप्रेत्याऽऽह–तथाऽऽकाशेति । कथं पुनर्धर्मादिमयत्वे कामादिमयत्वमुपयुज्यते तत्राऽऽह–न हीति । कथं धर्मादिमयत्वं सर्वमयत्वे कारणमित्याशङ्क्याऽऽह–समस्तमिति ।

किं बहुना तदेतत्सिद्धमस्य यदयमिदंमयो गृह्यमाणविषयादिमयस्त-स्मादयमदोमयः । अद इति परोक्षं कार्येण गृह्यमाणेन निर्दिश्यते । अनन्ता ह्यन्तःकरणे भावनाविशेषाः । नैव ते विशेषतो निर्देष्टुं शक्य-न्ते । तस्मिंस्तस्मिन्क्षणे कार्यतोऽवगम्यन्त इदमस्य हृदि वर्ततेऽ-

---

१ क. तत्तन्न° । २ ङ. च. ढ. °रके प्रे° । ३ ख. ग. छ. झ °णि वाऽते° । ४ क. न. झ. प्राप्तव° । ५ ग. घ. ज. झ. °प्तव्य° । ६ ख. भवेन्क्रोध° । ७ घ. ज. ढ. °वति

दोऽस्येति तेन गृह्यमाणकार्येणेदंमयतया निर्दिश्यते परोक्षोऽन्तःस्थो व्यवहारोऽयमिदानीमदोमय इति । संक्षेपतस्तु तथा कर्तुं यथा वा चरितुं शीलमस्य सोऽयं यथाकारी यथाचारी स तथा भवति । करणं नाम नियता क्रिया विधिप्रतिषेधादिगम्या चरणं नामानियतमिति विशेषः । साधुकारी साधुर्भवतीति यथाकारीत्यस्य विशेषणं पापकारी पापी भवतीति च यथाचारीत्यस्य ।

तद्यदेतादित्यादेरर्थमाह—किं बहुनेति । विषयः शब्दादिस्तसोऽन्यदपि प्रत्यक्षतो गृह्यमाणमादिशब्दार्थः । इदंमयत्वमदोमयत्वे गमकमित्याह—तस्मादिति । विशेषतस्तन्मयत्वोक्तिं विना किमिति सामान्योक्तिरित्याशङ्क्याऽऽह—अनन्ता हीति । तदस्तित्वे मानमाह—तस्मिन्निति । अवगतिप्रकारमभिनयति—इदमस्येति । इदंमयत्वमदोमयत्वं चोपसंहरति—तेनेत्यादिना । परोक्षत्वं व्याकरोति—अन्तःस्थ इति । व्यवहितविषयव्यवहारवानिति यावत् । इदानीमित्यस्मादुपरिष्टादपि तेनेति संबध्यते । परोक्षत्वावस्थेदानीमित्युक्ता । तृतीयया च प्रकृतो व्यवहारो निर्दिश्यते । इतिशब्दः सर्वमयत्वोपसंहारार्थः । विज्ञानमयादिवाक्यार्थं संक्षिपति—संक्षेपतस्त्विति । करणचरणयोरैक्येन पौनरुक्त्यमाशङ्क्याऽऽह—करणं नामेति । आदिशब्दः शिष्टाचारसंग्रहार्थः ।

तात्त्वीत्यप्रत्ययोपादानादस्यन्ततात्पर्यतैव तन्मयत्वं न तु तत्कर्ममात्रेणेत्याशङ्क्याऽऽह—पुण्यः पुण्येन कर्मणा भवति पापः पापेनेति । पुण्यपापकर्ममात्रेणैव तन्मयता स्यान्न तु तात्त्वीत्यमपेक्षते । तात्त्वीत्ये तु तन्मयत्वातिशय इत्ययं विशेषः । तत्र कामक्रोधादिपूर्वकपुण्यापुण्यकारिता सर्वमयत्वे हेतुः संसारस्य कारणं देहादेहान्तरसंचारस्य च । एतत्प्रयुक्तो ह्यन्यदन्यद्देहान्तरमुपादत्ते । तस्मात्पुण्यापुण्ये संसारस्य कारणम् । एतद्विषयौ हि विधिप्रतिषेधौ । अत्र शास्त्रस्य साफल्यमिति ।

वाक्यान्तरं शङ्कोत्तरत्वेनोत्थाप्य व्याचष्टे—तात्त्वीत्येत्यादिना । कुत्र तर्हि तात्त्वीत्यमुपयुज्यते तत्राऽऽह—तात्त्वीत्ये त्विति । पूर्वपक्षमुपसंहरति—तत्रेत्यादिना । कर्मणः संसारकारणत्वमुपसंहरति—एतत्प्रयुक्तो हीति । कथं यथोक्तकर्मविषयत्वं विधिनिषेधयोरित्याशङ्क्याऽऽह—अत्रेति । इतिशब्दः पूर्वपक्षसमाप्त्यर्थः ।

अथो अप्यन्ये बन्धमोक्षकुशलाः खल्वाहुः—सत्यं कामादिपूर्वके

१ ग. ढ स्य विशेषणम् । ता° । २ ख. यैतयैव । ३ घ. ञ. °च्छील्यं तु ।

पुण्यापुण्ये शरीरग्रहणकारणं तथाऽपि कामप्रयुक्तो हि पुरुषः पुण्यापुण्ये कर्मणी उपचिनोति कामप्रहाणे तु कर्म विद्यमानमपि पुण्यापुण्योपचयकरं न भवति । उपचिते अपि पुण्यापुण्ये कर्मणी कामशून्ये फलारम्भके न भवतः । तस्मात्काम एव संसारस्य मूलम् । तथा चोक्तमाथर्वणे–कामान्यः कामयते मन्यमानः स कामभिर्जायते तत्र तत्र" इति । तस्मात्काममय एवायं पुरुष इत्यन्वयतत्वं तत्कारणं विद्यमानमपीत्यतोऽवधारयति काममय एवेति ।

सिद्धान्तमवतारयति–अथो इति । संसारकारणस्याज्ञानस्य प्राधान्येन कामः सहकारीति स्वसिद्धान्तं समर्थयते–सत्यमित्यादिना । कामाभावेऽपि कर्मणः सत्त्वं दृष्टमित्याशङ्क्याऽऽह–कामप्रहाणे इति । ननु कामाभावेऽपि नित्याद्यनुष्ठानात्पुण्यापुण्ये संचीयेते तत्राऽऽह–उपचिते इति । यो हि पशुपुत्रस्वर्गादीननतिशयपुरुषार्थान्मन्यमानस्तानेव कामयते स तत्तद्भोगभूमौ तत्तत्कामसंयुक्तो भवतीत्याथर्वणश्रुतेरर्थः । श्रुतियुक्तिसिद्धमर्थं निगमयति–तस्मादिति । धर्मादिमयत्वस्यापि सत्त्वादवधारणानुपपत्तिमाशङ्क्याऽऽह–यदिति ।

यस्मात्स च काममयः मन्याद्दशेन कामेन यथाकामो भवति तत्क्रतुर्भवति स काम इषदभिलाषमात्रेणाभिव्यक्तो यस्मिन्विषये भवति सोऽविहन्यमानः स्फुटीभूवन्क्रतुत्वमापद्यते । क्रतुनाध्यवसायो निश्चयो यदनन्तरा क्रिया प्रवर्तत । यत्क्रतुर्भवति यादृक्कामकार्येण क्रतुना यथारूपः क्रतुरस्य सोऽयं यत्क्रतुभवति तत्कर्म कुरुते यद्विषयः क्रतुस्तत्फलनिर्वृत्तये यद्योग्यं कर्म तत्कुरुते निर्वर्तयति । यत्कर्म कुरुते तदभिसंपद्यते, तदीयं फलमभिसंपद्यते । तस्मात्सर्वमयत्वेऽस्य संसारित्वे च कामं एव हेतुरिति ॥ ५ ॥

स यथाकामो भवतीत्यादि व्याचष्टे–यस्मादित्यादिना । यस्मादित्यस्य तस्मादिति व्यवहितेन संबन्धः । इतिशब्दो ब्राह्मणसमाप्त्यर्थः ॥ ५ ॥

तदेष श्लोको भवति । तदेव सक्तः सह कर्मणैति लिङ्गं मनो यत्र निषक्तमस्य । प्राप्यान्तं कर्मणस्तस्य यत्किंचेह करात्ययम् । तस्माल्लोकात्पुनरैत्यस्मै लोकाय कर्मण इति नु कामय

१ च झ ढ °हिका । २ घ. ण. °ति तत्सिद्धा° । ३ घ ज °मगयत्वमेव ।

मानोऽथाकामयमानो योऽकामो निष्काम आप्तकाम आत्मकामो न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन्ब्रह्माप्येति।

तत्तस्मिन्नर्थ एष श्लोको मन्त्रोऽपि भवति। तदेवैति तदेव गच्छति सक्त आसक्तस्तत्रोद्भूताभिलाषः सन्नित्यर्थः। कथमेति। स ह कर्मणा यत्कर्म फलासक्तः सन्नकरोत्तेन कर्मणा सहैव तदेति तत्फलमेति। किं तल्लिङ्गं मनः। मनःप्रधानत्वाल्लिङ्गस्य मनो लिङ्गमित्युच्यते। अथवा लिङ्ग्यतेऽवगम्यतेऽवगच्छति येन तल्लिङ्गं तन्मनो यत्र यस्मिन्निषक्तं निश्चयेन सक्तमुद्भूताभिलाषमस्य संसारिणः। तदभिलाषो हि तत्कर्म कृतवान्। तस्मात्तन्मनाऽभिषङ्गवशादेवास्य तेन कर्मणा तत्फलप्राप्तिः। तेनैतत्सिद्धं भवति कामो मूलं संसारस्येति। अत उच्छिन्नकामस्य विद्यमानान्यपि कर्माणि ब्रह्मविदो वन्ध्यप्रसवानि भवन्ति। "पर्याप्तकामस्य कृतात्मनश्च इहैव सर्वे प्रविलीयन्ति कामाः" इति श्रुतेः।

तत्रेति गन्तव्यफलपरामर्शः। तदेव गन्तव्यं फलं विशेषतो ज्ञातुं पृच्छति—किं तदिति। प्रतीकमादाय व्याचष्टे—लिङ्गमिति। योऽवगच्छति स प्रमात्रादिसाक्षी येन साक्ष्येण मनसाऽवगम्यते तन्मनो लिङ्गमिति पक्षान्तरमाह—अथवेति। यस्मिन्निश्चयेन संसारिणो मनः। सक्तं तत्फलप्राप्तिस्तस्येति संबन्धः। तदेवोपपादयति—तदभिलाषो हीति। पूर्वार्धार्थमुपसंहरति—तेनेति। कामस्य संसारमूलत्वे सत्यर्थसिद्धमर्थमाह—अत इति। वन्ध्यप्रसवत्वं निष्फलत्वम्। पर्याप्तकामस्य प्राप्तपरमपुरुषार्थस्येति यावत्। कृतात्मनः शुद्धबुद्धेर्विदिततत्त्वस्येत्यर्थः। इहेति जीवदवस्थोक्तिः।

किंच प्राप्यान्तं कर्मणः प्राप्य भुक्त्वाऽन्तमवसानं यावत्कर्मणः फलपरिसमाप्तिं कृत्वेत्यर्थः। कस्य कर्मणोऽन्तं प्राप्येत्युच्यते—तस्य यत्किंच कर्मेहास्मिँल्लोके करोति निर्वर्तयत्यर्थं तस्य कर्मणः फलं भुक्त्वाऽन्तं प्राप्य तस्माल्लोकात्पुनरेत्यागच्छत्यस्मै लोकाय कर्मणेऽर्थं हि लोकः कर्मप्रधानस्तेनाऽऽह कर्मण इति पुनः कर्मकरणाय

१ ख. झ. °न्त्रो भ°। २ क. झ. उत्सन्न°। ३ ख. घ. छ. °नस्त्विहै°। ४ ञ. ण. °वयद°। ५ ङ. ज. °स्तेनेह।

पुनः कर्म कृत्वा फलावशेषात्पुनरमुं लोकं यातीत्येवम् । इति त्वेवं नु कामयमानः संसरति । यस्मात्कामयमान एवैवं संसरत्यथ तस्मादकामयमानो न क्वचित्संसरति ।

कामप्रधानः संसरति चेत्कर्मफलभोगानन्तरं कामाभावान्मुक्तिः स्यादित्याशङ्क्याऽऽह—किंचेति । इतश्च संसारस्य कामप्रधानत्वमास्थेयमित्यर्थः । यावदवतानं तावदुक्त्वेति संबन्धः । उक्तमेव संक्षिपति—क्रमेण इति । इत्येवं परम्परया संसरणादिह ज्ञानान्न मुक्तिरिति शेषः । संसारप्रकरणमुपसंहरति—इति त्विति । अवस्थाद्वयस्य दार्ष्टान्तिकं बन्धं प्रबन्धेन दर्शयित्वा सुषुप्तस्य दार्ष्टान्तिकं मोक्षं वक्तुमथेत्यादि वाक्यं तत्राथशब्दार्थमाह—यस्मादिति ।

फलासक्तस्य हि गतिरुक्ता । अकामस्य हि क्रियानुपपत्तेरकामयमानो मुच्यत एव । कथं पुनरकामयमानो भवति । योऽकामो भवत्यसावकामयमानः । कथमकामतेत्युच्यते—यो निष्कामो यस्मान्निर्गताः कामाः सोऽयं निष्कामः । कथ कामा निर्गच्छन्ति । य आप्तकामो भवत्यात्माः कामा येन स आप्तकामः । कथमाप्यन्ते कामा आत्मकामत्वेन यस्याऽऽत्मैव नान्यः कामयितव्यो वस्त्वन्तरभूतः पदार्थो भवति । आत्मैवानन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एकरसो नोर्ध्वं न तिर्यङ्नाध आत्मनोऽन्यत्कामयितव्यं वस्त्वन्तरम् । यस्य सर्वमात्मैवाभूत्तत्केन कं पश्येच्छृणुयात्कन्वीत विजानीयाद्वैवं विजानन्कं कामयेत । ज्ञायमानो ह्यन्यत्वेन पदार्थः कामयितव्यो भवति । न चासावन्यो ब्रह्मविद आप्तकामस्यास्ति । य एवाऽऽत्मकामतयाऽऽप्तकामः स निष्कामोऽकामोऽकामयमानश्चेति मुच्यते । न हि यस्याऽऽत्मैव सर्वं भवति तस्यानात्मा कामयितव्योऽस्ति । अनात्मा चान्यः कामयितव्यः सर्वं चाऽऽत्मैवाभूदिति विप्रतिषिद्धम् । सर्वात्मदर्शिनः कामयितव्याभावात्कर्मानुपपत्तिः ।

कामरहितस्य संसाराभावं साधयति—फलासक्तस्येति । विदुषो निष्कामस्य क्रियारहित्ये नैष्कर्म्यमयत्नसिद्धमिति भावः । अकामयमानत्वे प्रश्नपूर्वकं हेतुमाह—कथमित्यादिना । बाह्येषु शब्दादिषु विषयेष्वसङ्गराहित्यादकामयमानतेत्यर्थः । अकामत्वे हेतुमाकाङ्क्षापूर्वकमाह—कथमिति । वासनारूपकामाभावादकामतेत्यर्थः । निष्कामत्वे प्रश्नपूर्वकं हेतुमुत्थाप्य व्याचष्टे—कथमिति । प्राप्तपरमानन्दत्वान्निष्कामतेत्यर्थः । आप्तकामत्वे हेतुमाकाङ्क्षापूर्वकमाह—कथमित्यादिना । हेतुमेव साधयति—यस्येति । तस्य युक्तमाप्तकामत्वमिति

१ झ. यत्र त्वस्य । २ क. ख. ङ. झ. °नन्कि का° । ३ क. घ. ङ. च. छ. ज. झ. ञ. पत्रि. का° ।

शेषः । उक्तमर्थं पर्यायपदर्शनार्थं पर्यञ्चयति—आत्मेवेति । कामयितव्याभावं ब्रह्मविदः श्रुत्यवष्टम्भेन स्पष्टयति—यस्येति । इति विद्यावस्था यस्य विदुषोऽस्ति सोऽन्यमविजानन्नपि कंचिदपि कामयेतेति योजना । पदार्थोऽन्यत्वेनाविज्ञातोऽपि कामयितव्यः स्यादिति चेन्नेत्याह—ज्ञायमानो हीति । अनुभूते स्मरणाविपरिवर्तिनि कामनियमादित्यर्थः । अन्यत्वेन ज्ञायमानस्तर्हि पदार्थो विदुषोऽपि कामयितव्यः स्यादित्याशङ्क्याऽऽह—न चेति । आप्तकामस्य ब्रह्मविदो दर्शितरीत्या कामयितव्याभावे मुक्तिः सिद्धेत्युपसंहरति—य एवेति । कथं कामयितव्याभावोऽनात्मनस्तथात्वादित्याशङ्क्याऽऽह—न हीति । सर्वात्मत्वमनात्मकामयितृत्वं च स्यादित्याशङ्क्याऽऽह—अनात्मा चेति । अथेत्यादिवाक्ये श्रौतमर्थमुक्त्वार्थसिद्धमर्थं कथयति—सर्वात्मदर्शिन इति ।

ये तु प्रत्यवायपरिहारार्थं कर्म कल्पयन्ति ब्रह्मविदोऽपि तेषां नाऽऽत्मैव सर्वं भवति । प्रत्यवायस्य जिहासितव्यस्याऽऽत्मनोऽन्यस्याभिप्रेतत्वात् । येन चाशनायाद्यतीता नित्यं प्रत्यवायासंबद्धो विदित आत्मा तं वयं ब्रह्मविदं ब्रूमः । नित्यमेवाशनायाद्यतीतमात्मानं पश्यति । यस्माच्च जिहासितव्यमन्यमुपादेयं वा यो न पश्यति तस्य कर्म न शक्यत एव संबद्धुं (न्धुं)म् । यस्त्वब्रह्मवित्तस्य भवत्येव प्रत्यवायपरिहारार्थं कर्मेति न विरोधः । अतः कामाभावादकाम्यमानो न जायते मुच्यत एव ।

कर्मजहानिं पक्षमुत्थाप्य श्रुतिविरोधेन प्रत्याचष्टे—ये त्विति । ब्रह्मविदि प्रत्यवायाधिमङ्गीकृत्योक्तमिदानीं तत्पाधिरेव वस्मिन्नास्तीत्याह—येन चेति । यथोक्तस्यापि ब्रह्मविदो विहितत्वादेव नित्याद्यनुष्ठानं स्यादिति चेन्नेत्याह—नित्यमेवेति । यो हि सदैवासंसारिणमात्मानमनुभवति न च हेयमादेयं वाऽऽत्मनोऽन्यत्पश्यति । यस्मादेवं तस्मात्तस्य कर्म संपादयितुमयोग्यम् । यथोक्तब्रह्मविद्यया कर्माधिकारहेतूनामुपमृदितत्वादित्यर्थः कर्मसंबन्धस्तर्हि कस्येत्याशङ्क्याऽऽह—यस्त्विति । न विरोधो विविदिषाण्डस्येति शेषः । श्रुत्यर्थाभ्यां सिद्धमर्थमुपसंहरति—अत इति । विद्यावस्थादित्येवत् । कामाभावात्कर्माभावाच्चेति द्रष्टव्यम् । अकामयमानोऽकुर्वाणश्चेति शेषः ।

तस्यैवमकामयमानस्य कर्माभावे गमनकारणाभावात्प्राणा वागादयो नोत्क्रामन्ति नोर्ध्वं क्रामन्ति देहात् । स च विद्वानाप्तकाम

१ क. °णतः प्र° । घ. ञ. ट. ण. °प्र° । २ घ. ण. °यितृत्वाभा° । ३ क. साधयति । ४ क. ख. ञ. °ञ्च किंचि° । ५ ण. °यं चाऽऽत्म° । ६ घ. ङ. छ. °स्यैवाका° ।

आत्मकामतयेहैव ब्रह्मभूतः। सर्वात्मनो हि ब्रह्मणो दृष्टान्तत्वेन प्रदर्शितमेतद्रूपं तद्वा अस्यैतदाप्तकाममात्मकाममकामं रूपमिति। तस्य हि दार्ष्टान्तिकभूतोऽयमर्थ उपसंहियतेऽथाकामयमान इत्यादिना। स कथमेवंभूतो मुच्यत इत्युच्यते—यो हि सुषुप्तावस्थामिव निर्विशेषमद्वैतमलप्तचिद्रूपज्योतिःस्वभावमात्मानं पश्यति तस्यैवाकामयमानस्य कर्मामावे गमनकारणाभावात्प्राणा वागादयो नोत्कामन्ति। किंतु विद्वान्स इहैव ब्रह्म यद्यपि देहवानिव लक्ष्यते स ब्रह्मैव सन्ब्रह्माप्येति।

देशान्तरप्राप्त्यापत्ता मुक्तिरित्येतन्निराकर्तुं न तस्येत्यादि व्याचष्टे—तस्येत्यादिना। ब्रह्मैव सन्नित्येतदवतारयति—स चेति। कथं वर्तमाने देहे तिष्ठन्नेव ब्रह्मभूतो भवति तत्राऽऽह—सर्वात्मनो हीति। दृष्टान्तालोचनया दार्ष्टान्तिकेऽपि तदा ब्रह्मत्वं भावीति भावः। तदा ब्रह्मीभूतस्य मुक्तिर्नाम नास्तीति शङ्कित्वा परिहरति—स कथमिति। परिहारमेव स्फोरयितुं न तस्येत्यादिवाक्यार्थमनुवदति—तस्यैवेति। ब्रह्मैव सन्नित्यस्यार्थमनुवदति—किंत्विति। विद्वानिहैव ब्रह्मचेत्कथं तस्य ब्रह्मप्राप्तिरित्याशङ्क्याऽऽह—ब्रह्मैवेति।

यस्माच्च हि तस्याब्रह्मत्वपरिच्छेदहेतवः कामाः सन्ति तस्मादिहैव ब्रह्मैव सन्ब्रह्माप्येति न शरीरपातोत्तरकालम्। न हि विदुषो मृतस्य भावान्तरापत्तिर्जीवतोऽन्यो भावो देहान्तरप्रतिसंधानाभावमात्रेणैव तु ब्रह्माप्येतीत्युच्यते। भावान्तरापत्तौ हि मोक्षस्य सर्वोपनिषद्विवक्षितोऽर्थ आत्मैकत्वाख्यः स बाधितो भवेत्। कर्महेतुकश्च मोक्षः प्राप्नोति न ज्ञाननिमित्त इति। स चानिष्टोऽनित्यत्वं च मोक्षस्य प्राप्नोति। न हि क्रियानिर्वृत्तोऽर्थो नित्यो दृष्टः। नित्यश्च मोक्षोऽभ्युपगम्यते। "एष नित्यो महिमा" इति मन्त्रवर्णात्।

यदुक्तं ब्रह्मैव सन्नित्यादि तदुपपादयति—यस्मादिति। प्रागपि ब्रह्मभूतस्यैव पुनर्देहपाते ब्रह्मप्राप्तिरित्ययुक्तं विदुषो मृतस्य भावान्तरापत्तिस्वीकारादित्याशङ्क्याऽऽह—न हीति। कथं तर्हि ब्रह्माप्येतीत्युच्यते तत्राऽऽह—देहान्तरेति। विदुषो भावान्तरापत्तिर्मुक्तिरिति पक्षेऽपि किं दूषणमिति चेत्तदाह—भावान्तरापत्तौ हीति। तथा चोपनिषदामप्रामाण्यं विना हेतुना स्यादिति भावः। भावान्तरापत्तिर्मुक्तिरित्यत्र दोषान्तरमाह—कर्मेति। इतिपदादुपरिष्टात्क्रियापदस्य संबन्धः। अस्तु कर्मनिमित्तो मोक्षो ज्ञाननिमित्तस्तु वा मृतत्वाऽऽह—स चेति।

१ ख. ग. ण. भवतीति। २ घ. ङ. °यो हीति। न। ३ घ. ङ. च. °त्तिर्जायतेऽन्यावावे दे°।

प्रसङ्गः सर्वनाम्ना परामृश्यते प्रतिषेधशास्त्रविरोधादिति भावः । मोक्षस्य कर्मसाध्यत्वे दोषान्तरमाह—अनित्यत्वं चेति । तत्रोपयुक्तां व्याप्तिमाह—न हीति। अस्तु तर्हि प्राप्तादादिवत्क्रियासाध्यस्य मोक्षस्याप्यनित्यत्वं नेत्याह—नित्यश्चेति ।

न च स्वाभाविकात्स्वभावादन्यन्नित्यं कल्पयितुं शक्यम् । स्वाभाविकश्चेदग्न्युष्णवदात्मनः स्वभावः स न शक्यते पुरुषव्यापारानुभावीति वक्तुम् । न ह्यग्नेरौष्ण्यं प्रकाशो वाऽग्निव्यापारानन्तरानुभावी । अग्निव्यापारानुभावी स्वाभाविकश्चेति विप्रतिषिद्धम् । ज्वलनव्यापारानुभावित्वमुष्णप्रकाशयोरिति चेत् । न । अन्योपलब्धिव्यवधानापगमाभिव्यक्त्यपेक्षत्वात् । ज्वलनादिपूर्वकमग्निरुष्णप्रकाशगुणाभ्यामभिव्यज्यते तत्राग्न्यपेक्षया किं तह्यन्यदृष्टेरग्नेरौष्ण्यप्रकाशौ धर्मौ व्यवहितौ कस्यचिद्दृष्ट्या त्वसंबध्यमानौ ज्वलनापेक्षया व्यवधानापगमे दृष्टेरभिव्यज्येते तदपेक्षया भ्रान्तिरुपजायते ज्वलनपूर्वकावेतावुष्णप्रकाशौ धर्मौ जाताविति ।

कृतकोऽपि ह्यलभावो ध्वंसवन्नित्यः स्यादित्याशङ्क्याऽऽह—न चेति । कृत्रिमस्वभावव्यावृत्त्यर्थं स्वाभाविकपदम् । ' अतोऽन्यदार्तम् ' इति हि श्रुतिः । ध्वंसस्य तु विकल्पमात्रत्वान्नित्यत्वमसंमतमिति भावः । मोक्षोऽकृत्रिमस्वभावोऽपि कर्मोत्थः स्यादित्याशङ्क्याऽऽह—स्वाभाविकश्चेदिति । अग्नेरौष्ण्यवदात्मनो मोक्षश्च स्वाभाविकस्वभावश्चेन्न स क्रियासाध्यो व्याघातादित्यर्थः । दृष्टान्तं समर्थयते—न हीति । अरणिगतस्याग्नेरौष्ण्यप्रकाशौ नोपलभ्येते सति च ज्वलने दृश्येते तेन स्वाभाविकावपि तावागन्तुकौ कादाचित्कोपलब्धिमत्त्वादिति शङ्कते—ज्वलनेति न हि सतोऽग्नेरौष्ण्यादि कादाचित्कं युक्तं तदृष्टेर्व्यवधानस्य दार्वादेर्ध्वंसे मथनज्वलनादिना वह्न्यभिव्यक्तिमपेक्ष्य तत्स्वभावस्यौष्ण्यादेर्व्यक्त्यभ्युपगमादिति परिहरति नान्येति । तदेव प्रपञ्चयति—ज्वलनादीति । मथनादिव्यापारवशात्काशादिना व्यज्यतेऽग्निरिति यदुच्यते तदग्नौ सत्येव तद्गतव्यापारापेक्षया तदौष्ण्याद्यभिव्यक्तिवशान्न भवति किंतु देवदत्तदृष्टेरग्निधर्मौ व्यवहितौ न तु तौ कस्यचिद्दृष्ट्या संबध्येते ज्वलनादिव्यापारात्तु दृष्टेर्व्यवधानभङ्गे तयोरभिव्यक्तिरित्यर्थः । कथं तर्हि ज्वलनादिव्यापारादग्नेरौष्ण्यप्रकाशौ जाताविति बुद्धिस्तत्राऽऽह—तदपेक्षयेति । ज्वलनादिव्यापारादृष्टिव्यवधानभङ्गे वह्नेरौष्ण्यप्रकाशाभिव्यक्त्यपेक्षयेति यावत् ।

---

१ ख. छ. °रनन्तरानु° । २ च. ढ. °त्वमौष्ण्यप्र° । ३ च. ढ. °ग्निरौष्ण्यप्र° । ४ क. ङ. झ. °ते नाग्न्य° । ५ च. ढ. °तावौष्ण्यप्र° । ख. ढ. °ध्वंसज्वलनमथन ।

धर्मस्तमुदाहरिष्यामः । न च स्वाभाविको धर्म एव नास्ति पदार्थानामिति शक्यं वक्तुम् । न च निगडभङ्ग इवाभावभूतो मोक्षो बन्धननिवृत्तिरुपपद्यते । परमात्मैकत्वाभ्युपगमात् ' एकमेवाद्वितीयम् ' इति श्रुतेः । न चान्यो बद्धोऽस्ति यस्य निगडनिवृत्तिवद्बन्धननिवृत्तिर्मोक्षः स्यात् । परमात्मव्यतिरेकेणान्यस्याभावं विस्तरेणावादिष्म । तस्मादविद्यानिवृत्तिमात्रे मोक्षव्यवहार इति चावोचाम यथा रज्ज्वादौ सर्पाद्यज्ञाननिवृत्तौ सर्पादिनिवृत्तिः ।

यथा वह्नेरौष्ण्यादि स्वाभाविकं न क्रियासाध्यं तथाऽऽत्मनो मुक्तिः स्वाभाविकी न क्रियासाध्येत्युक्तमिदानीमग्नेरौष्ण्यादि न स्वाभाविकमित्याशङ्क्याऽऽह—यदीति । उदाहरिष्यामो मोक्षस्याऽऽत्मस्वभावस्याकर्मसाध्यत्वायेति शेषः । अथाग्नेः स्वाभाविको न कश्चिद्धर्मोऽस्ति यो मोक्षस्य दृष्टान्तः स्यादत आह—न चेति । उष्णात्मकं हि वस्तु वस्त्वन्तरेण संबध्यते । अस्ति च निम्बादौ तिक्तत्वादिर्धर्मोरित्यर्थः । भावान्तरापत्तिपक्षं प्रतिक्षिप्य पक्षान्तरं प्रत्याह—न चेति । न हि बन्धस्य तथाभूतस्य निवृत्तिर्विरोधान्मोक्ष्यन्यथाभूतस्यानवस्थानात् । न च प्राप्तिर्विरोधो दुर्निरूपध्वस्तिविषयत्वादिति भावः । किंच परस्मादन्यस्य बन्धनिवृत्तिस्तस्यैव वा नाऽऽद्य इत्याह—न चेति । तत्र हेतुक्षेत्रे परमात्मैकत्वाभ्युपगमादित्वादिभाष्यं व्याख्येयम् । न द्वितीयस्तस्य नित्यमुक्तस्य त्वयाऽपि बद्धत्वानभ्युपगमादिति द्रष्टव्यम् । कथं परस्मादन्यो बद्धो नास्तीत्याशङ्क्य प्रवेशविचाराद्वक्तुं स्मारयति—परमात्मेति । न चेदन्यो बद्धोऽस्ति कथं मोक्षव्यवहारः स्यादित्याशङ्क्याऽऽह—तस्मादिति । अन्यस्य बद्धस्याभावात्परस्य च नित्यमुक्तत्वादिति यावत् । यथा रज्ज्वादावधिष्ठाने सर्पादिर्हेतौ रज्ज्वज्ञानस्य निवृत्तौ सत्यां सर्पादेरपि निवृत्तिस्तथाऽविद्याया बन्धहेतोर्निवृत्तिमात्रेण तत्कार्यस्य बन्धस्यापि निवृत्तिव्यवहारो भवतीति चावादिष्मेति योजना ।

येऽप्याचक्षते मोक्षे विज्ञानान्तरमानन्दान्तरं चाभिव्यज्यत इति तैर्वक्तव्योऽभिव्यक्तिशब्दार्थः । यदि तावल्लौकिकयेवोपलब्धिविषयव्याप्तिरभिव्यक्तिशब्दार्थः । ततो वक्तव्यं किं विद्यमानमभिव्यज्यतेऽविद्यमानमिति वा । विद्यमानं चेद्यस्य मुक्तस्य तदभिव्यज्यते तस्याऽऽ-

---

१ च. ढ. यद्यौष्ण्यप्र° । २ क. ग. च. छ. ज. झ. ढ °विष्म । त° । ३ क ढ. ङ. छ. ज. °र्पादिज्ञा° । झ. °र्पादिभान° । ४ घ. ञ. ण. °ध्यतायामिति । ५ ण. °थं ते ° । ६ ख. ञ. ढ. ण. °रज्ञा° । ७ ख, घ. ज. °तेऽथावि° । ८ घ. ज. °ति । वि° ।

त्मभूतमेव तदित्युपलब्धिव्यवधानानुपपत्तेर्नित्याभिव्यक्तत्वान्मुक्तस्याभिव्यज्यत इति विशेषवचनमनर्थकम् । अथ कदाचिदेवाभिव्यज्यत उपलब्धिव्यवधानादनात्मभूतं तदित्यन्यतोऽभिव्यक्तिप्रसङ्गः । तथा चाभिव्यक्तिसाधनापेक्षता । उपलब्धिसमानाश्रयत्वे तु व्यावधानकल्पनानुपपत्तेः सर्वदाऽभिव्यक्तिरनभिव्यक्तिर्वा नत्वन्तरालकल्पनायां प्रमाणमस्ति ।

मतान्तरमुद्भावयति—येऽप्याचक्षत इति । वैषयिकज्ञानानन्दापेक्षयाऽन्तरशब्दः । केयमभिव्यक्तिरुत्पत्तिर्वा प्रकाशो वा । नाऽऽद्यो मोक्षे सुखाद्युत्पत्तौ तदनित्यत्वापत्तेरित्यभिप्रेत्याऽऽह—तैरिति । द्वितीयमालम्बते—यदीति । तत्र दोषं वक्तुं विकल्पयति—तत इति । द्वितीये खरविषाणवदपरोक्षाभिव्यक्तिर्न स्यादित्यभिप्रेत्याऽऽद्यमनुभाष्य दूषयति—विद्यमानं चेदिति । उपलब्धिस्वभावस्तावदात्मा तस्य विद्यमानं सुखादि व्यज्यते चेज्ज्ञानानन्दयोर्देशादिव्यवधानाभावादानन्दः सदैव व्यज्यत इति मुक्तिविशेषणमनर्थकमित्यर्थः । चक्षुर्घटयोर्विषयविषयित्वप्रतिबन्धककुड्यादिवद्धर्मादिप्रतिबन्धादानन्दो ज्ञानं च संसारदशायां न व्यज्यते मोक्षे तु व्यज्यते तदभावादिति शङ्कते—अथेति । उपलब्धिर्देशादिव्यवधानस्यैव घटादेरुपलब्धिप्रतिबन्धदर्शनादनात्मभूतं सुखं न स्वभावभूतयोपलब्ध्या प्रकाशेत किंतु विषयेन्द्रियसंपर्कादित्युत्तरमाह—उपलब्धीति । अन्यतोऽभिव्यक्तौ किं स्यादिति चेत्तदाह—तथा चेति । तत्साधनानि चेन्मुक्तौ स्युः संसारादविशेषः स्यादिति भावः । उपलब्धिव्यवधानमानन्दस्याङ्गीकृत्योक्तमिदानीं तदेव नास्तीत्याऽऽह—उपलब्धीति । कदाचिदभिव्यक्तिरनभिव्यक्तिश्च कदाचिदित्येवं कालभेदेनोभयं किं न स्यादित्याशङ्क्याऽऽह—न त्विति ।

न च समानाश्रयाणामेकस्याऽऽत्मभूतानां धर्माणामितेतरविषयविषयित्वं संभवति । विज्ञानसुखयोश्च प्रागभिव्यक्तेः संसारित्वमभिव्यक्त्युत्तरकालं च मुक्तत्वं यस्य सोऽन्यः परस्मान्नित्याभिव्यक्तज्ञानस्वरूपादत्यन्तवैलक्षण्याच्छैत्यमिवौष्ण्यात् । परमात्मभेदकल्पनाया च वैदिकः कृतान्तः परित्यक्तः स्यात् । मोक्षस्येदानीमिव निर्विशेषत्वे तदर्थाधिकयत्नानुपपत्तिः शास्त्रवैयर्थ्यं च प्राप्नोतीति चेन्न । अविद्याभ्रमापोहार्थत्वात् । न हि वस्तुतो मुक्तामुक्तत्वविशेषोऽस्ति । आत्मनो नित्यैकरूपत्वात् । किंतु तद्विषयाऽविद्याऽपोह्यते शास्त्रोप-

---

१ ढ. °षणव° । २ क. च. छ. °यत्वाद्यव° । ३ ख. घ. ङ. ज °पत्ति. । स° । ४ क. °व्यक्त्या कि । ५ च. छ. ढ. °ठ°न्ना° । ६ च. ढ. °नसुखस्व° । ७ च. ज. °त्वेन त । ८ क. घ. ङ. छ, ज. वस्तुनो ।

देशजनितविज्ञानेन । प्राक्तदुपदेशप्राप्तेस्तदर्थश्च प्रयत्न उपपद्यत एव ।

आनन्दज्ञानयोर्विषयविषयित्वमभ्युपेत्य कादाचित्की तावदभिव्यक्तिर्निरस्ता, संप्रति तदपि न संभवतीत्याह—न चेति । आत्मभूतत्वं स्वाभाविकत्वम् । विमतं न समानाश्रयविषयं धर्मत्वात्प्रदीपप्रकाशवदिति भावः । मुक्तावानन्दज्ञानाभिव्यक्तिपक्षे दोषान्तरं वक्तुं भूमिकां करोति—विज्ञानसुखयोश्चेति । तद्भेदापादनमिष्टमेवेत्याशङ्क्य विवक्षितं दोषमाह—परमात्मेति । परमते निराकृते सिद्धान्तेऽपि दोषद्वयमाशङ्कते—मोक्षस्येति । मोक्षार्थोऽधिको यत्नः शमदमादिः । शास्त्रं मोक्षविषयम् । मोक्षस्य निर्विशेषत्वेऽपि प्रत्यगविद्यातदुत्थानर्थध्वंसित्वेनोभयमर्थवदिति परिहरति—नाविद्येति । तत्र नञर्थं विवृणोति—नहीति । कथं तर्हि शास्त्रार्थवत्त्वमित्याशङ्क्याऽऽह—किंत्विति । तत्र शास्त्रस्यार्थवत्त्वं समर्थयति—तद्विषयेति । प्रस्तुतात्मविषयस्तच्छब्दः । संप्रति प्रयत्नस्यार्थवत्त्वं प्रकटयति—प्रागिति । प्रथमस्तच्छब्दः शास्त्रविषयः । द्वितीयो मोक्षविषयः ।

अविद्यावतोऽविद्याविद्यानिवृत्त्यनिवृत्तिकृतो विशेष आत्मनः स्यादिति चेत् । न । अविद्याकल्पनाविषयत्वाभ्युपगमाद्रज्जूषरशुक्तिकागगनानां सर्पोदकरजतमलिनत्वादिवददोष इत्यवोचाम । तिमिरातिमिरदृष्टिवदविद्याकर्तृत्वाकर्तृत्वकृत आत्मनो विशेषः स्यादिति चेत् । न । ध्यायतीव लेलायतीवेति स्वतोऽविद्याकर्तृत्वस्य प्रतिषिद्धत्वात् । अनेकव्यापारसंनिपातजनितत्वाच्चाविद्याभ्रमस्य । विषयत्वोपपत्तेश्च ।

आत्मनः सदैकरूपत्वं प्रागुक्तमाक्षिपति—अविद्येति । आविद्यः सोऽपीति समाधत्ते—नेति । यथा रज्ज्वाद्यविद्योत्थसर्पादेस्तद्विद्यया ध्वंसाध्वंसयो रज्ज्वादेर्न वास्तवो विशेषस्तथाऽऽत्मनोऽपि स्वाविद्यामात्रोत्थविशेषवत्त्वेऽपि तद्ध्वंसाध्वंसयोर्न वास्तवो विशेषोऽस्तीत्यर्थः । अदोषः सविशेषत्वदोषराहित्यम् । प्रकारान्तरेण सविशेषत्वं शङ्कते—तिमिरेति । किमिदमविद्याकर्तृत्वं किं तज्जनकत्वं किंवा तदाश्रयत्वमिति विकल्प्याऽऽद्यं दूषयति—न । ध्यायतीवेति । आत्मनः स्वतोऽविद्याकर्तृत्वाभावे हेत्वन्तरमाह—अनेकेति । विषयविषयिव्यापारोऽन्तःकरणस्य तत्र चिदाभासोदयश्चाऽऽत्मनो व्यापारस्तथा चानेकव्यापारसंनिपाते सत्यहं संसारीत्यविद्यात्मको भ्रमो जायते । तस्मान्न तस्याऽऽत्मकार्यतेत्यर्थः । कल्पान्तरं प्रत्याह—विषयत्वेति । अविद्यादेरात्मदृश्यत्वान्न तदाश्रयत्वं न हि तद्वत्तस्य तद्ग्राह्यत्वमंशतः स्वग्रहापनेरित्यर्थः ।

---

१ क. ख. ङ °न्त दो° । २ घ. ञ. ण. °त्याह । ३ क. ञ. °कारान्त° ।

यस्य चाविद्याभ्रमो घटादिवद्विविक्तो गृह्यते स नाविद्याभ्रमवान्[1]। अहं न जाने मुग्धोऽस्मीति प्रत्ययदर्शनादविद्याभ्रमवत्त्वमेवेति चेन्न। तस्यापि विवेकग्रहणात्[2]। न हि यो यस्य विवेकेन ग्रहीता स तस्मिन्भ्रान्त इत्युच्यते। तस्य च विवेकग्रहणं तस्मिन्नेव च भ्रम इति विप्रतिषिद्धम्[3]। न जाने मुग्धोऽस्मीति दृश्यत इति ब्रवीषि तद्दर्शिनश्चाज्ञानं मुग्धरूपता दृश्यत इति च[4] तद्दर्शनस्य विषयो भवति कर्मतामापद्यत इति तत्कथं कर्मभूतं सत्कर्तृस्वरूपदृशिविशेषणमज्ञानमुग्धते स्याताम्[5]। अथ दृशिविशेषणत्वं तयोः कथं कर्म स्यातां दृशिना व्याप्येते। कर्म हि कर्तृक्रियया व्याप्यमानं भवति। अन्यच्च व्याप्यमन्यद्व्यापकं न तेनैव तद्व्याप्यते। यद कथमेवं सत्यज्ञानमुग्धते दृशिविशेषणे स्याताम्[6]। न चाज्ञानविवेकदर्शज्ञानमात्मनः कर्मभूतमुपलभमान उपलब्धृधर्मत्वेन गृह्णाति शरीरे कार्श्यरूपादिवत्तथा।

तदेव स्फोरयति—यस्य चेति। अनुभवमनुसृत्य शङ्कते—अहं नेत्यादिना। साक्षिसाक्ष्यभावेन भेदाभ्युपगमान्नाऽऽत्मनोऽविद्याश्रयत्वमित्युत्तरमाह—न तस्यापीति। तदेव स्पष्टयति—न हीति। अविद्यादेर्विवेकेन ग्रहीतर्यपि तद्विषये भ्रान्तत्वे का हानिरित्याशङ्क्याऽऽह—तस्य चेति। अज्ञानं मुग्धत्वं चाऽऽत्मनो न विशेषणमिति विधान्तरेण दर्शयितुं चोद्यवाक्यमनुवदति—न जान इति। तद्व्याचष्टे—तद्दर्शिनश्चेति। अज्ञानादिस्तच्छब्दार्थः। दृश्यमानत्वमेव विशदयति—कर्मतामिति। इति ब्रवीषीति संबन्धः। एवं परकीयं वाक्यं व्याख्याय फलितमाह—तत्कथमिति। तत्र चोद्यवाक्यार्थे दर्शितरीत्या स्थिते सति कर्तृविशेषणं नाज्ञानमुग्धते स्यातां तयोः प्रत्येकं कर्मभूतत्वादित्यर्थः। विपक्षे दोषमाह—अथेति। कथं कर्म स्यातामित्येतदेव व्याचष्टे—दृशिनेति। तत्रापि कथंशब्दः संबध्यते। एतदेव स्फुटयति—कर्म हीति। एवं सति व्याप्यव्यापकभावस्य भेदनिष्ठत्वे सतीत्येतत्। किंचाज्ञानमुपलब्धृधर्मो न भवत्युपलभ्यमानत्वाद्देहगतकार्श्यादिवदित्याह—न चेति। अज्ञानवत्तत्कार्यमपि नाऽऽत्मधर्मः स्यादित्यतिदिशति—तथेति।

---

१ ख. घ. ङ. ञ. छ ढ °व्याविभ्र। २ ज. ढ °नू। न। ३ ज झ. मत्वमे। ४ क. च. ज. झ. ढ. °न्तज्ञान इ°। ५ ख. ग. घ. ङ. छ. ज च दर्श°। ६ क. ग. छ. °षयं म°। घ. ज. झ. °षयं संभ°। ७ क. घ ङ छ ज. °रूपंदृ°। ८ ख. ञ. ढ ण. °ते। ने°। ९ क. ञ. चोद्यं वा°।

सुखदुःखेच्छाप्रयत्नादीन्सर्वो लोको गृह्णातीति चेत् । तथाऽपि ग्रहीतुर्लोकस्य विविक्तैतवाभ्युपगता स्यात् । न जानेऽहं त्वदुक्तं मुग्ध एवेति चेत् । भवत्वज्ञो मुग्धो यस्त्वेवंदर्शी तं ज्ञममुग्धं प्रतिजानीमहे वयम् । तथा व्यासेनोक्तम्-इच्छादि कृत्स्नं क्षेत्रं क्षेत्री प्रकाशयतीति । "समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम् । विनश्यत्स्वविनश्यन्तम्" इत्यादि शतश उक्तम् । तस्मान्नाऽऽत्मनः स्वतो बद्धमुक्तज्ञानाज्ञानकृतो विशेषोऽस्ति । सर्वदा समैकरसस्वाभाव्याभ्युपगमात् ।

अज्ञानोत्थस्येच्छादेरात्मधर्मत्वनिराकरणे प्रतीतिविरोधः स्यादिति शङ्कते-सुखेति । तेषां ग्राह्यत्वमङ्गीकृत्य परिहरति-तथाऽपीति । आत्मनिष्ठत्वे सुखादीनां चैतन्यवदात्मग्राह्यत्वायोगात्तद्ग्राह्याणा तेषां न तद्धर्मतेति भावः । प्रकारान्तरेण निराकर्तुं निराकृतमेव चोद्यमनुद्रवति-न जान इति । किं प्रमातुरज्ञानाद्याश्रयत्वमनुभवादभिदधासि तत्साक्षिणो वा । तत्राऽऽद्यं प्रत्याह-भवत्विति । कल्पान्तरं निराकरोति-यस्त्विति । न हि यो यत्र साक्षी स तत्राज्ञो मूढो वेति। तथा च सर्वसाक्षी नाज्ञानादिमान्भवतीत्यर्थः । आत्मनो मोहादिराहित्ये भगवद्वाक्यं प्रमाणयति-तथेति । तस्य सर्वविशेषशून्यत्वे वाक्यान्तरमुदाहरति-समभिति । आदिपदेन समं पश्यन्हि सर्वत्र । ज्योतिषामपि तज्ज्योतिरित्यादि गृह्यते । आत्मनो निर्विशेषत्वे प्रामाणिके स्वमतमुपसंहरति-तस्मान्नेति ।

ये त्वतोऽन्यथाऽऽत्मवस्तु परिकल्प्य बन्धमोक्षादिशास्त्रं चार्थवादमापादयन्ति त उत्सहन्ते खेऽपि शाकुनं पदं द्रष्टुं खं वा मुष्टिनाऽऽक्रष्टुं चर्मवद्वेष्टितुम् । वयं तु तत्कर्तुमशक्ताः सर्वदा समैकरसमद्वैतमविक्रियमजमजरममरममृतमभयमात्मतत्त्वं ब्रह्मैव स्म इत्येष सर्ववेदान्तनिश्चितोऽर्थ इत्येवं प्रतिपद्यामहे । तस्माद्ब्रह्माप्येतीत्युपचारमात्रमेतद्विपरीतग्रहवद्देहसंततेर्विच्छेदमात्रं विज्ञानफलमपेक्ष्य ॥ ६ ॥

पक्षान्तरमनुभाषते-ये त्विति । अतो निर्विशेषस्वाभाव्यादिति यावत् । अज्ञानाद्बन्धो ज्ञानान्मुक्तिरिति शास्त्रार्थवादः । आदिशब्देन रुदरोदनाद्यर्थवादं दृष्टान्तं सूचयति । सोपहासं दूषयति-त उत्सहन्त इति । न हि सविशेषत्वं शक्यमात्मनः प्रतिपत्तुं निर्विशेषत्वप्रत्ययकागमविरोधादिति भावः । कथं तर्हि भवद्भिरात्मतत्त्वमभ्युपगम्यते तत्राऽऽह-वयं त्विति । प्रमाणविरुद्धार्थदर्शनं

१ ख. ङ. °त्वहनज्ञा । २ च ढ त न मु° । ३ घ. ञ. ण. वा । ४ घ. ञ. ण. °त्रिशब्देन । ५ घ ञ च । ६ क. ग. घ ङ. ढ. °द्वेष्टयितुं । ७ ख. ढ. °मभयममृतना° । ८ ख. ङ. ह्मैवास्मी° । ९ क. ग. घ. ढ. ण. °ति । उ° । १० क. ख. घ. ञ. ण. हि वि° ।

तच्छब्देन परामृश्यते । तत्त्वादीनामिव साम्यं दूरयति—सर्वेति । भेदाभेदमप-वदति—एकरसमिति । तत्र हेतुमाह—अद्वैतमिति । द्वैताभावोपलक्षितत्वादि-त्यर्थः । ऐकरस्ये कौटस्थ्यं हेत्वन्तरमाह—अविक्रियमिति । तदुपपादयति अजं-मित्यादिना । अमरं मरणायोग्यम् । तत्र सर्वत्राविद्यासंबन्धराहित्यं हेतुमाह—अभयमिति । ननु ब्रह्मैवेदं न त्वात्मतत्त्वमित्याशङ्क्य उच्यते—ब्रह्मैवेति । यथोक्तं प्रत्यग्भूतं ब्रह्मेत्यत्र प्रमाणमाह—इत्येष इति । तत्रैव विद्वदनुभवं प्रमाण-यति—इत्येवमिति । परपक्षनिरासेन प्रकृतं वाक्यार्थमुपसंहरति—तस्मादिति । उपचारनिमित्तमाह—विपरीतेति । आत्मा तत्त्वतः संसारीति विपरीतग्रहवति या देहसंततिस्तस्या विच्छेदमात्रं ज्ञानफलमपेक्ष्योपचारमात्रमित्यर्थः ॥ ६ ॥

स्वप्नबुद्धान्तगमनदृष्टान्तस्य दार्ष्टान्तिकः संसारो वर्णितः । संसार-हेतुश्च विद्याकर्मपूर्वप्रज्ञा वर्णिता । यैश्चोपाधिभेदैः कार्यकरणलक्षण-भूतैः परिवेष्टितः संसारित्वमनुभवति तानि चोक्तानि तेषां साक्षात्प्र-योजकौ धर्माधर्माविति पूर्वपक्षं कृत्वा काम एवेत्यवधारितम् । यथा च ब्राह्मणेनायमर्थोऽवधारित एवं मन्त्रेणापीति बन्धं बन्धकारणं चो-क्त्वोपसंहृतं प्रकरणमिति न कामयमान इति । अथाकामयमान इ-त्यारभ्य सुषुप्तदृष्टान्तस्य दार्ष्टान्तिकभूतः सर्वात्मभावो मोक्ष उक्तः । मोक्षकारणं चाऽऽत्मकामतया यदाप्तकामत्वमुक्तं तच्च सामर्थ्यान्नाऽऽ-त्मज्ञानमन्तरेणात्मकामतयाऽऽप्तकामत्वमिति सामर्थ्याद्ब्रह्मविद्यैव मोक्ष-कारणमित्युक्तम् । अतो यद्यपि कामो मूलमित्युक्तं तथाऽपि मोक्ष-कारणविपर्ययेण बन्धकारणमविद्येत्येतदप्युक्तमेव भवति । अत्रापि मोक्षो मोक्षसाधनं च ब्राह्मणेनोक्तम् । तस्यैव दृढीकरणाय मन्त्र उदाहियते श्लोकशब्दवाच्यः—

तदेष श्लोको भवति । यदा सर्वे प्रमुच्यन्ते कामा
येऽस्य हृदि श्रिताः । अथ मर्त्योऽमृतो भवत्यत्र
ब्रह्म समश्नुत इति । तद्यथाऽहिर्निर्ल्वयनी वल्मीके
मृता प्रत्यस्ता शयीतैवमेवेदꣳ शरीरꣳ शेतेऽथायम

१ घ. ण. °दवादम° । २ ख. ट. °जगादि° । ३ ख. अ. वर्णिताः । ध. ट. च. ञ. अ. वर्णितः ।

शरीरोऽमृतः प्राणो ब्रह्मैव तेज एव सोऽहं भगवते
सहस्रं ददामीति होवाच जनको वैदेहः ॥ ७ ॥

तत्तस्मिन्नेवार्थ एष श्लोको मन्त्रो भवति । यदा यस्मिन्काले सर्वे समस्ताः कामास्तृष्णाप्रभेदाः प्रमुच्यन्ते । आत्मकामस्य ब्रह्मविदः समूलतो विशीयन्ते । ये प्रसिद्धा लोक इहामुत्रार्थाः पुत्रवित्तलोकैषणालक्षणा अस्य प्रसिद्धस्य पुरुषस्य हृदि बुद्धौ श्रिता आश्रिताः । अथ तदा मर्त्यो मरणधर्मा सन्कामवियोगात्समूलतोऽमृतो भवति । अर्थादनात्मविषयाः कामा अविद्यालक्षणा मृत्यव इत्येतदुक्तं भवति अतो मृत्युवियोगे विद्वाञ्जीवन्नेवामृतो भवति । अत्रास्मिन्नेव शरीरे वर्तमानो ब्रह्म समश्नुते ब्रह्मभावं मोक्षं प्रतिपद्यत इत्यर्थः । अतो मोक्षो न देशान्तरगमनाद्यपेक्षते । तस्माद्विदुषो नोत्क्रामन्ति प्राणा यथावस्थिता एव स्वकारणे पुरुषे समवनीयन्ते । नाममात्रं ह्यवशिष्यत इत्युक्तम् ।

ब्राह्मणोक्तेऽर्थे मन्त्रमवतारयितुं ब्राह्मणार्थमनुवदति-स्वप्नेत्यादिना । अयमर्थः संसारस्तद्धेतुश्च मन्त्रस्तदेव सक्तः सह कर्मणेत्यादिः । आत्मज्ञानस्य तर्हि मोक्षकारणत्वमुपेक्षितमित्याशङ्क्याऽऽह-तच्चेति । अतो ब्रह्मज्ञानं मोक्षकारणमित्युक्तत्वादिति यावत् । मूलं बन्धस्येति शेषः । अत्रेति मोक्षप्रकरणोक्तिः । बन्धप्रकरणं दृष्टान्तयितुमपिशब्दः । उक्तेऽर्थे तदेष इत्याद्यक्षराणि व्याचष्टे-तत्तस्मिन्नेवेति । यस्मिन्काले विद्यापरिपाकावस्थायामित्यर्थः । सुषुप्तिव्यावृत्त्यर्थं सर्वविशेषणमिति मत्वाऽऽह-समस्ता इति । कामशब्दस्यार्थान्तरविषयत्वं व्यावर्तयति-तृष्णेति । क्रियापदं सोपसर्गं व्याकरोति-आत्मकामस्येति । तानेव विशिनष्टि-ये प्रसिद्धा इति । कामानामात्माश्रयत्वं निराकरोति-हृदीति । समूलतः कामवियोगादिति संबन्धः । कामवियोगादमृतो भवतीति निर्देशसामर्थ्यसिद्धमर्थमाह-अर्थादिति । तेषां मृत्युत्वे किं स्यात्तदाह-अत इति । अत्रेत्यादिना विवक्षितमर्थमाह-अतो मोक्ष इति । आदिपदमुत्क्रान्त्यादिसंग्रहार्थम् । मुक्तेस्तदपेक्षाभावे फलितमाह-तस्मादिति । तर्हि मरणसिद्धिरित्याशङ्क्याऽऽह-यथेति । उत्क्रान्तिगत्यागतिराहित्यं यथावस्थितम् । एतच्च पञ्चमे प्रतिपादितमित्याह-नाममात्रमिति ।

कथं पुनः समवनीतेषु प्राणेषु देहे च स्वकारणे प्रलीने विद्वान्मु-

---

१ च. °तो न यो° । २ ड. °क्षो दे° । ३ ग. °पेक्ष्यत । ४ झ. इति श्रुत° । ५ क. ख. ढ. इत्यक्ष° । ६ क. ख. घ. ञ. ण. तस्मि° । ७ ख. ढ. अत इ° । ८ घ. ण. °तो न ति ।

कोऽत्रैव सर्वात्मा सन्वर्तमानः पुनः पूर्ववद्देहित्वं संसारित्वलक्षणं न प्रति पद्यत इति। अत्रोच्यते—तत्रायं दृष्टान्तो यथा लोके ऽहिः सर्पस्त्वच निर्व्ययनी निर्मोकः साऽहिर्निर्व्ययनी वल्मीके सर्पाश्रये वल्मीकादावित्यर्थः। मृता अत्यस्ता प्रक्षिप्तात्मत्वभावेन सर्पेण परित्यक्ता शयीत वर्तेत। एवमेव यथाऽयं दृष्टान्त इदं शरीरं सर्पस्थानीयेन मुक्तेनात्मभावेन परित्यक्तं मृतमिव शेते।

तद्धेत्यादिकाक्यनिरस्यं शङ्कामाह—कथं पुनरिति। विदुषो विद्वान्सऽत्मभावस्तेन प्राणादिषु बाधितेष्वपि देहे चेदसौ वर्तते ततोऽस्य पूर्ववद्देहित्वादिद्यावैधर्म्यमित्यर्थः। दृष्टान्तेन परिहरति—अत्रेत्यादिना। देहे वर्तमानस्यापि विदुषस्तत्रात्माभिमानराहित्यं तत्रेत्युच्यते। यस्यां त्वचि सर्पो नितरां छीयते सा निर्व्ययनी सर्पत्वगुच्यते। सर्पनिर्मोकदृष्टान्तस्य दार्ष्टान्तिकमाह—एवमेवेति।

अथेतरः सर्पस्थानीयो मुक्तः सर्वात्मभूतः सर्पवत्तत्रैव वर्तमानोऽप्यशरीर एव न पूर्ववत्पुनः सशरीरो भवति। कामकर्मप्रयुक्तशरीरात्मभावेन हि पूर्वं सशरीरो मर्त्यश्च। तद्वियोगादथेदानीमशरीरोऽत एव चामृतः। प्राण. प्राणितीति प्राणः। प्राणस्य प्राणमिति हि वक्ष्यमाणे श्लोके। "प्राणबन्धनं हि सौम्य मनः" इति च श्रुत्यन्तरे। प्रकरणवाक्यसामर्थ्याच्च पर एवाऽऽत्माऽत्र प्राणशब्दवाच्यः। ब्रह्मैव परमात्मैव। किं पुनस्तत्तेज एवं विज्ञानं ज्योतिर्येनाऽऽत्मज्योतिषा जगद्वभास्यमानं प्रज्ञानेत्रं विज्ञानज्योतिष्मत्सदनिभ्रंशद्वर्तते।

सर्पदृष्टान्तस्य दार्ष्टान्तिकं दर्शयति—अथेति। अज्ञानेन सह देहस्य सत्त्वमशरीरत्वादौ हेतुरथशब्दार्थः। अथशब्दावद्योतितहेत्वनुरूपेणाशरीरत्वं विशदयति—कामेति। पूर्वमित्यविद्यावस्थोक्तिः। इदानीमिति विद्यावस्थोच्यते। व्युत्पत्त्यनुसारिणं रूढं च मुख्यं प्राणं व्यावर्णयति—प्राणनादिति। श्लोके परएवाऽऽत्मा यथा प्राणशब्दस्तथाऽत्रापीत्यर्थः। यथा च श्रुत्यन्तरे प्राणशब्दः पर एवाऽऽत्मा तथाऽत्रापीत्याह—प्राणेति। किंच परविद्याप्रकरणमिदं मुक्तस्यथाकामयमान इति मोक्षस्य प्रक्रान्तत्वादथाऽमित्यादि वाक्यं च तद्विषयमन्यथा ब्रह्मादिशब्दानुपपत्तेः। तस्मादुभयसामर्थ्यादत्र पर एवाऽऽत्मा प्राणशब्दित इत्याह—प्रकरणेति। विशेष्यं दर्शयित्वा विशेषणं दर्शयति—ब्रह्मेति। ब्रह्मशब्दस्य कर्मलक्षणाधिष्ठिपत्वं वारयति—किं पुनरिति। तेजःशब्दस्य कार्यज्यो-

---

१ क. ख. घ. च. ज. झ ढ. °र्थः। प्र°। २ ख. ढ. °विद्य°। ३ क. ञ. साहि नि°। ४ क. ख ग. ज. ढ. सौम्य। ५ क छ झ. °शब्द. । ब्र°। ग. °शब्दार्थ. । ब्र°। ६ ख. छ. ढ. तद्विज्ञा°। घ ङ ज. 'वमेतद्विज्ञा°। ७ ग. घ. ज. °र्येन ज्यो°। ८ ख. ढ. °सारगे °।

विधिपरत्वपाशङ्क्याऽऽह—विज्ञानेति । तत्र प्रमाणमाह—येनेति । प्रज्ञा प्रकृष्टा ज्ञप्तिः स्वरूपचैतन्यं नेत्रमिव नेत्रं प्रकाशकमस्येति तथोक्तम् ।

यः कामप्रश्नो विमोक्षार्थो याज्ञवल्क्येन वरो दत्तो जनकाय सहेतुको बन्धमोक्षार्थलक्षणो दृष्टान्तदार्ष्टान्तिकभूतः स एष निर्णीतः सविस्तरो जनकयाज्ञवल्क्याख्यायिकारूपधारिण्या श्रुत्या । संसारविमोक्षोपाय उक्तः प्राणिभ्यः । इदानीं श्रुतिः स्वयमेवाऽऽह विद्यानिष्क्रयार्थं जनकेनैवमुक्तमिति । कथं सोऽहमेव विमोक्षितस्त्वया भगवते तुभ्यं विद्यानिष्क्रयार्थं सहस्रं ददामीति ह्येवं किलोवाचोक्तवाञ्जनको वैदेहः । अत्र कस्माद्विमोक्षपदार्थे निर्णीते विदेहराज्यमात्मानमेवं च न निवेदयत्येकदेशोक्ताविव सहस्रमेव ददाति तत्र क्रोऽभिप्राय इति ।

[1] सोऽहमित्यादेस्तात्पर्यं वक्तुं वृत्तं कीर्तयति—यः कामप्रश्न इति । निर्णयमकारं संक्षिपति—संसारेति । सोऽहमित्यादिवाक्यान्तरमुत्थापयति—इदानीमिति । आकाङ्क्षापूर्वकं वाक्यमादाय विभजते—कथमिति । सहस्रदानमाक्षिपति—अत्रेति ।

अत्र केचिद्वर्णयन्ति—अध्यात्मविद्यारसिको जनकः श्रुतमप्यर्थं पुनर्मन्त्रैः शुश्रूषति । अतो न सर्वमेव निवेदयति । श्रुत्वाऽभिप्रेतं याज्ञवल्क्यात्पुनरन्ते निवेदयिष्यामीति हि मन्यते । यदि चात्रैव सर्वं निवेदयामि निवृत्ताभिलाषोऽयं श्रवणादिति मत्वा श्लोकाच्च वक्ष्यतीति च भयात्सहस्रदानं शुश्रूषालिङ्गज्ञापनायेति । सर्वमप्येतदसत्पुरुषस्यैव प्रमाणभूतायाः श्रुतेर्व्याजानुपपत्तेः । अर्थशेषोपपत्तेश्च । विमोक्षपदार्थ उक्तेऽप्यात्मज्ञानसाधन आत्मज्ञानशेषभूतः सर्वैषणापरित्यागः संन्यासाख्यो वक्तव्योऽर्थशेषो विद्यते । तस्माच्छ्लोकमात्रशुश्रूषाकल्पनाऽनूर्ज्वी । अगतिका हि गतिः पुनरुक्तार्थकल्पना । सा चायुक्ता सत्यां गतौ ।

सर्वस्वदानप्राप्तावपि सहस्रदाने हेतुमेकदेशीयं दर्शयति—अन्त्रेत्यादिना । कदा तर्हि गुरवे सर्वस्वं राजा निवेदयिष्यति तत्राऽऽह—श्रुत्वेति । ननु पुनः शुश्रूषुरपि राजा किमिति संप्रत्येव गुरवे न प्रयच्छति प्रभूता हि दक्षिणा गुरुं प्रीणयन्ती स्वीयां शुश्रूषां फलयति तत्राऽऽह—यदि चेति । अनाप्तोक्तौ हृदयेऽन्यन्निधाय वाचाऽन्यन्निष्पादनात्मकं व्याजोत्तरं युक्तं श्रुतौ त्वपौरुषेय्यामपास्ताशेषदोषशङ्कायां न व्याजोक्तिर्युक्ता तदीयस्वारसिकप्रामाण्यभङ्गप्रसङ्गादिति दूषयति—सर्वमपीति । [2]एकदेशीयपरिहारासंभवे हेत्वन्तरमाह—अर्थेति । तदु-

---

१ घ. ञ. ण. नेत्रं । २ क. अत्र केचिदित्या° । ख. ढ. अध्यात्मेत्या° । ३ घ. ण. ये संनिधा° । ४ ख. ढ. °न्यद्विधा । ५ क. ख. ढ. °न्यन्निष्पा° । ६ ञ. ण. एकीय° ।

पपत्तिमेवोपपादयति—विमोक्षेति। तस्यापि पूर्वमसत्कृतेस्तदीयशुश्रूषाधीनं सहस्रदानमनुचितमित्याशङ्क्य शमादेर्ज्ञानसाधनत्वेन प्रागुक्तेस्तेन सह भूयोऽपि संन्यासस्य वक्तव्यत्वयोगात्तदपेक्षया युक्तं सहस्रदानमित्याह—अगतिका हीति।

न च तत्स्तुतिमात्रमित्यवोचाम। नन्वेवं सत्यत ऊर्ध्वं विमोक्षायैवेति वक्तव्यम्। नैष दोषः। आत्मज्ञानवदप्रयोजकः संन्यासः पक्षे प्रतिपत्तिकर्मवादिति हि मन्यते। "संन्यासेन तनुं त्यजेत्" इति स्मृतेः। साधनत्वपक्षेऽपि नात ऊर्ध्वं विमोक्षायैवेति प्रश्नमर्हति मोक्षसाधनभूतात्मज्ञानपरिपाकार्थत्वात् ॥ ७ ॥

ननु संन्यासादि विद्यास्तुत्यर्थमुच्यते महाभागा ह्यियं यत्तदर्थी दुष्करमपि करोत्यतो नार्थशेषसिद्धिस्तत्राऽऽह—न चेति। न तावत्संन्यासो विद्यास्तुतिर्विदित्वा व्युत्थायेति समानकर्तृत्वनिर्देशादिति पञ्चमे स्थितं नापि शमादिर्विद्यास्तुतिस्तत्रापि विधेर्वक्ष्यमाणत्वादित्यर्थः। अर्थशेषशुश्रूषया सहस्रदानमित्यत्र जनकस्याकौशलं चोद्यति—नन्विति। राज्ञः शङ्कितमकौशलं दूषयति—नैष इति। तत्र हेतुमाह—आत्मज्ञानवदिति। यथाऽऽत्मज्ञानं मोक्षे प्रयोजकं न तथा संन्यासो न चास्मिन्पक्षे तस्याकर्तव्यत्वं प्रतिपत्तिकर्मवदनुष्ठानसंभवादिति राजा यतो मन्यते ततः संन्यासस्यं न ज्ञानतुल्यत्वमतो नात ऊर्ध्वं विमोक्षायैव ब्रूहीति पृच्छतीत्यर्थः। संन्यासस्य प्रतिपत्तिकर्मवत्कर्तव्यत्वे प्रमाणमाह—संन्यासेनेति। ननु विविदिषासंन्यासमङ्गीकुर्वता न तस्य प्रतिपत्तिकर्मवदनुष्ठेयत्वमिष्यते तत्राऽऽह—साधनत्वेति। 'त्यजतैव हि तज्ज्ञेयं त्यक्तुः प्रत्यक्परं पदम्' इत्युक्तत्वादित्यर्थः ॥ ७ ॥

तदेते श्लोका भवन्ति। अणुः पन्था विततः
पुराणो मां स्पृष्टोऽनुवित्तो मयैव। तेन धीरा
अपियन्ति ब्रह्मविदः स्वर्गं लोकमित ऊर्ध्वं
विमुक्ताः ॥ ८ ॥

आत्मकामस्य ब्रह्मविदो मोक्ष इत्येतस्मिन्नर्थे मन्त्रब्राह्मणोक्ते विस्तरप्रतिपादका एते श्लोका भवन्ति। अणुः सूक्ष्मः पन्था दुर्विज्ञेयत्वाद्वितनो विस्तीर्णो विस्पष्टतरणहेतुत्वाद्वा वितर इति पाठान्तरान्मोक्षसाधनो ज्ञानमार्गः पुराणश्चिरंतनो नित्यश्रुतिप्रकाशितत्वान्न तार्किकबुद्धिप्रभवकुदृष्टिमार्गवदर्वाककालिको मां स्पृष्टो मया लब्ध

---

१ घ. ढ. ण. प्रागुक्तेः। २ ख. ढ. °घ दोष इ°। ३ घ. त्र. ण. °था ज्ञा°। ४ घ. त्र. ण. °स्य ज्ञानेनाबुल्यत्वान्नात। ५ क. ग. ट. ऊर्ध्वा। घ. ङ. छ. ज. ठ. ड. ढ. ऊर्ध्वो। ६ ग. द्व. आसका°।

इत्यर्थः । यो हि येन लभ्यते स तं स्पृशतीव संबध्यते तेनायं ब्रह्मविद्यालक्षणो मोक्षमार्गो मया लब्धत्वान्मां स्पृष्ट इत्युच्यते । न केवलं मया लब्धः किंत्वनुवित्तो मयैव । अनुवेदनं नाम विद्यायाः परिपाकापेक्षया फलावसानतानिष्ठा प्राप्तिः । भुजेरिव तृप्त्यवसानता । पूर्वं तु ज्ञानप्राप्तिसंबन्धमात्रमेवेति विशेषः ।

सङ्गोऽकौशलं परिहृत्य मन्त्रानवतारयति—आत्मकामस्येति । यदेत्याद्यतीतश्लोकेनाऽऽगामिश्लोकानामर्थापौनरुक्त्यं सूचयति—विस्तरेति । ज्ञानमार्गस्य सूक्ष्मत्वे हेतुमाह—दुर्विज्ञेयत्वादिति । विस्तीर्णत्वं पूर्णवस्तुविषयत्वादवधेयम् । माध्यंदिनश्रुतिमाश्रित्याऽऽह—विस्पष्टेति । प्रयत्नसाध्यत्वं तस्य पञ्चम्या विवक्ष्यते कथं पुनरधुनातनो वैदिको ज्ञानमार्गश्चिरंतनो निरुच्यते तत्राऽऽह—नित्येति । विशेषणप्रकाशितमर्थमुक्त्वा तस्य व्यवच्छेद्यमाह—न तार्किकेति । मन्त्रदृशा लब्धत्वेऽपि कुतो ज्ञानमार्गस्य तत्संसर्गित्वमित्याशङ्क्याऽऽह—यो हीति । अनुवेदनलाभयोर्विशेषाभावात्पौनरुक्त्यमाशङ्क्याऽऽह—अनुवेदनमिति । पूर्वशब्देन पाठक्रमानुसारेण लाभो गृह्यते ।

किमसावेव मन्त्रदृगेको ब्रह्मविद्याफलं प्राप्तो नान्यः प्राप्तवान्येनानुवित्तो मयैवेत्यवधारयति । नैष दोषः । अस्याः फलमात्मसाक्षिकमनुत्तममिति ब्रह्मविद्यायाः स्तुतिपरत्वात् । एवं हि कृतार्थात्मामिमानैकरसमात्मप्रत्ययसाक्षिकमात्मज्ञानं किमतः परमन्यत्स्यादिति ब्रह्मविद्यां स्तौति । न तु पुनरन्यो ब्रह्मवित्तत्फलं न प्राप्नोतीति । " तद्यो यो देवानाम् " इति सर्वार्थश्रुतेः । तदेवाऽऽह—तेन ब्रह्मविद्यामार्गेण धीराः प्रज्ञावन्तोऽन्येऽपि ब्रह्मविद इत्यर्थः । अपियन्त्यपिगच्छन्ति ब्रह्मविद्याफलं मोक्षं स्वर्गं लोकम् । स्वर्गलोकशब्दस्त्रिविष्टपवाच्यपि सन्निह प्रकरणान्मोक्षाभिधायकः । इतोऽस्माच्छरीरपातादूर्ध्वं जीवन्त एव विमुक्ताः सन्तः ॥ ८ ॥

एवकारमाश्रित्य शङ्कते—किमसाविति । तथा च तद्यो यो देवानामित्याद्यविशेषश्रुतिर्विरुध्येतेति शेषः । अवधारणश्रुतेस्त्वयपस्त्वेनान्ययोगव्यवच्छेदकाभावमभिप्रेत्य परिहरति—नैष दोष इति । स्तुतिपरत्वमेव प्रकटयति—एवं हीति ।

---

१ घ. ङ. °र्णत्वे पूर्ण° । २ घ च. छ. ज. प्राप ३ ङ. °नुपममि° । घ. ज. झ. ढ. °नुवित्तमि° । ४ क. ख न. घ. ङ. ज ढ. °र्थाभि° । ५ म °नकारणभा° । ६ क ख, ङ. ज. °रणभा° । ७ घ. ज. °ज्ञानत्व° । ८ क °दूर्ध्वं ऊर्ध्वं । छ. ज. दूर्ध्वं ऊर्ध्वं ।

कृतार्थोऽस्मीत्यात्मन्यभिमानेकरं स्वानुभवसिद्धमात्मज्ञानं नास्मादन्यदुत्कृष्टं किंचिदित्येवं विद्यामवधारणश्रुतिः स्तौतीत्यर्थः । यथाश्रुतार्थत्वे को दोषः स्यादिति चेत्तत्राऽऽह—नान्विति । इत्यवधारणश्रुत्या विवक्षितमिति शेषः । तत्र हेतुः—तद्यो य इति । तदर्थश्रुतेर्ब्रह्मविद्या सर्वार्था सर्वसाधारणीति श्रवणादिति यावत् । ब्रह्मविद्यायाः सर्वार्थत्वे वाक्यशेषं प्रमाणत्वेनावतार्य व्याचष्टे—तदेवेति । ननु मोक्षे स्वर्गशब्दो न युज्यते तस्यार्थान्तरे रूढत्वादत आह—स्वर्गेति । यथा ज्योतिष्टोमप्रकरणे श्रुतो ज्योतिःशब्दो ज्योतिष्टोमविषयस्तथा मोक्षप्रकरणे श्रुतः स्वर्गशब्दो मोक्षमधिकरोति । रूढ्यङ्गीकारे ब्रह्मविद्यार्थां निष्कर्षप्रसङ्गादिति भावः । जीवन्त एव मुक्ताः सन्तः शरीरपातादूर्ध्वं मोक्षमपियन्तीति संबन्धः ॥८॥

तस्मिञ्छुक्लमुत नीलमाहुः पिङ्गलꣳ हरितं लोहितं च । एष पन्था ब्रह्मणा हानुवित्तस्तेनैति ब्रह्मवित्पुण्यकृत्तेजसश्च ॥ ९ ॥

तस्मिन्मोक्षसाधनमार्गे विप्रतिपत्तिर्मुमुक्षूणाम् । कथम् । तस्मिञ्छुक्लं शुद्धं विमलमाहुः केचिन्मुमुक्षवो नीलमन्ये पिङ्गलमन्ये हरितं लोहितं च यथादर्शनम् । नाड्यस्त्वेता एषम्नाद्याः श्लेष्मादिरसैः संपूर्णाः शुक्लस्य नीलस्य पिङ्गलस्येत्याद्युक्तत्वात् । आदित्य वा मोक्षमार्गमेवंविधं मन्यन्ते । "एष शुक्ल एष नी" इत्यादिश्रुत्यन्तरात् । दर्शनमार्गस्य शुक्लादिवर्णासंभवात् । सर्वथाऽपि तु प्रकृताद्ब्रह्मविद्यामार्गादन्य एते शुक्लादयः ।

तस्मिन्नित्यादिपूर्वपक्षमुत्थापयति—तस्मिन्निति । विप्रतिपत्तिमेव प्रश्नपूर्वकं विशदयति—कथमित्यादिना । पिङ्गलं हरिन्ज्वालातुल्यम् । लोहितं जपाकुसुमसंनिभम् । सप्तम्यं शब्दस्पर्शरूपरसादिमद्ब्रह्म तदुपासनमनुसृत्य तन्मार्गे विवादो मुमुक्षूणामित्याह—यथादर्शनमिति । तथाऽपि कथं ब्रह्ममार्गे शुक्लादिरूपसिद्धिः । नहि ज्ञानस्य रूपादिमत्त्वमिति शङ्क्याऽऽह—नाड्य इति । नाडीनामपि कथं यथोक्तरूपवत्त्वमित्याशङ्क्याऽऽह—श्लेष्मादीति । तथाऽपि कथं शुक्लादिरूपवत्त्वमित्याशङ्क्य नाडीखण्डोक्तं स्मारयति—शुक्लस्येति । नाडीपरिग्रहे नियामकाभावमाशङ्क्य पक्षान्तरमाह—आदित्यं वेति । एवंविधं शुक्लादिनानावर्णमित्यर्थः । तस्य तथात्वे प्रमाणमाह—एष इति ।

---

१ क. घ. °नकारणं स्वा° । २ ख. ङ. करणं स्वा° । ३ ख. ण. °या निष्कर्ष° । घ. °या निष्कृष्ट° । ४ ङ. निष्कृष्टत्वप्र° । ५ ख. ग घ ङ. ज. °सपूं° । ६ ख. ङ. °त्वसि. द्धिरित्या° ।

प्रकृते ज्ञानमार्गे किमिति मार्गान्तरं कल्प्यते तत्राऽऽह—दर्शनेति । तार्हि नाडीपक्षो वाऽऽदित्यपक्षो वा कतरो विवक्षितस्तत्राऽऽह—सर्वथाऽपीति ।

ननु शुक्लः शुद्धोऽद्वैतमार्गः । न । नीलपीतादिशब्देर्वर्णवाचकैः सहानुद्रवणात् । याञ्शुक्लादीन्योगिनो मोक्षपथानाह्नुते ते मोक्षमार्गाः संसारविषया एव हि ते । चक्षुष्टो वा मूर्ध्नो वाऽन्येभ्यो वा शरीरदेशेभ्य इति शरीरदेशान्निःसरणसंबन्धात् । ब्रह्मादिलोकप्रापका हि ते । तस्मादयमेव मोक्षमार्गो य आत्मकामत्वेनाऽऽप्तकामतया सर्वैकामक्षये गमनानुपपत्तौ प्रदीपनिर्वाणवच्चक्षुरादीनां कार्यकरणानामत्रैव समवनय इत्येष ज्ञानमार्गः पन्था ब्रह्मणा परमात्मस्वरूपेणैव ब्राह्मणेन त्यक्तसर्वैषणेनानुवित्तः । तेन ब्रह्मविद्यामार्गेण ब्रह्मविदन्योऽप्येति । कीदृशो ब्रह्मवित्तेनैतीत्युच्यते—पूर्वं पुण्यकृद्भूत्वा पुनस्त्यक्तपुत्राद्येषणः परमात्मतेजस्यात्मानं संयोज्य तस्मिन्नाभिनिवृत्तस्तैजसश्चाऽऽत्मभूत इहैवेत्यर्थः । ईदृशो ब्रह्मवित्तेन मार्गेणेति ।

शुक्लमार्गस्य ज्ञानमार्गान्तरत्वमाक्षिपति—नन्विति । शुक्लशब्दस्य नाद्वैतमार्गविषयत्वं नीलादिशब्दतमभिव्याहारविरोधादिति परिहरति—न नीलेति । सैद्धान्तिकमन्त्रभागं व्याख्यातुं पूर्वपक्षं दूषयति याञ्शुक्लादीनिति । न केवलं देहदेशनिःसरणसंबन्धादेव नाडीभेदानां संसारविषयत्वं किंतु ब्रह्मलोकादिसंबन्धादपीत्याह—ब्रह्मादीनि । आदित्योऽपि देवयानपथप्रापकः संसारहेतुरेवेति मन्वानो मोक्षमार्गमुपसंहरति—तस्मादिति । आप्तकामतया ज्ञानमार्ग इति संबन्धः । एवं भूमिकां कृत्वैष इत्यस्यार्थमाह—सर्वैकामेति । यथा तैलादिविलये प्रदीपस्य ज्वलनानुपपत्तौ तेजोधात्रे निर्वाणभिष्यते तथा स्थूलस्य सूक्ष्मस्य च सर्वस्यैव कार्यस्य ज्ञानात्क्षये सति गत्यनुपपत्तावत्रैव प्रत्यगात्मनि कार्यकरणानामेकीभावेनावस्थानमित्ययमेषशब्दार्थ इत्यर्थः । पन्था इत्येतद्व्याचष्टे—ज्ञानमार्ग इति । इत्थंभावे तृतीयामाश्रित्याऽऽह—परमात्मेति । अनुवेदनकर्तुर्ब्राह्मणस्य संन्यासित्वं दर्शयति—त्यक्तेति । विधातिपत्तिं निराकृत्य मोक्षमार्गं निर्धार्य तेन धीरा अपियन्तीत्यत्रोक्तं निगमयति—तेनेति । अन्योऽपि मन्त्रदृशः सकाशादिति शेषः । इहेति जीवदवस्थोक्तिः ।

---

१ क. ग. ङ. च. छ. झ. ढ. °पंथ आहुं । २ ग. ज. चक्षुषो । ३ ख. ध. ङ. च. छ ज झ ड °र्वकमेक्ष° । ४ क ङ. च. छ. ढ. परात्म° । ५ ख. ढ. इत्यादेरर्थ° । ६ ख. ग. ञ ढ ण °र्वकर्मेति । ७ ख. ढ. °मित्येवमे° । ८ ख. ढ. °ब्दार्थः ।

न पुनः पुण्यादिसमुच्चयकारिणो ग्रहणं विरोधादित्यवोचाम।

" अपुण्यपुण्योपरमे यं पुनर्भवनिर्भयाः।
शान्ताः संन्यासिनो यान्ति तस्मै मोक्षात्मने नमः॥

इति च स्मृतेः। त्यज धर्ममधर्मं च " इत्यादिपुण्यापुण्यत्यागोपदेशात्।

" निराशिषमनारम्भं निर्नमस्कारमस्तुतिम्।
अक्षीणं क्षीणकर्माणं तं देवा ब्राह्मणं विदुः "॥

नेताहशं ब्राह्मणस्यास्ति वित्तं यथैकता समता सत्यता च।
शीलं स्थितिर्दण्डनिधानमार्जवं ततस्ततश्चोपरमः क्रियाभ्यः "॥

इत्यादिस्मृतिभ्यश्च।

समुच्चयकारिणोऽत्र ब्रह्मप्राप्तिर्विवक्षितेति केचिन्नान्यथाह—न पुनरिति। विरोधाज्ज्ञानकर्मणोरिति शेषः। किंच कर्मसमुच्चयः समस्तसमुच्चयो वेति विकल्प्याऽऽद्यमङ्गीकृत्य द्वितीयं दूषयति—अपुण्येति। ज्ञानस्य कर्मसमुच्चयेऽपि विवेकज्ञानेन समुच्चयोऽस्तीत्याशङ्क्याऽऽह—त्यजेति। ब्रह्मविदोऽपि स्तुत्यादिदृष्टेस्तेन समुच्चयो ज्ञानस्येत्याशङ्क्याऽऽह—निराशिषमिति। काम्याननुष्ठानमनारम्भः। अक्षीणत्वं निषिद्धानाचरणम्। क्षीणकर्मत्वं नित्यादिकर्मराहित्यम्। असमुच्चये वाक्यान्तरमाह—नेत्यादिना। एकता निरपेक्षता सर्वोदासीनतेति यावत्। समता मित्रोदासीनशत्रुबुद्धिव्यतिरेकेण सर्वत्र स्वस्मिन्निव दृष्टेः। दण्डनिधानमहिंसापरत्वम्।

" अर्थस्य मूलं निर्वृतिः क्षमा च कामस्य चित्तं च वशुर्वयश्च।
धर्मस्य यागादि दयो दमश्च मोक्षस्य सर्वोपरमः क्रियाभ्यः "॥

इत्यादि चतुर्विधे पुरुषार्थे साधनभेदोपदेशि वाक्यमादिशब्दार्थः। इत्यादिस्मृतिभ्यश्च न पुण्यादिसमुच्चयकारिणो ग्रहणमिति संबन्धः।

उपदेक्ष्यति चैवापि तु " एष नित्यो महिमा ब्राह्मणस्य न वर्धते कर्मणा नो कनीयान् " इति कर्मसमुच्चयोजनाभावे हेतुमुक्त्वा तस्मादेवंविच्छान्तो दान्त इत्यादिना सर्वक्रियोपरमम्। तस्माद्यथाव्याख्यातमेव पुण्यफलत्वम्। अथवा यो ब्रह्मवित्तेनेति स पुण्यफलतेजसश्चेति

---

१ स. ङ. °त्यतोऽयो°। २ म. °लं धृतिं°। ३ छ. °श्च। इहा°। ४ स रूपं। ञ. वित्तं। ५ क. °याऽप्यदभ्र। ६ स. ञ. ट. °र्विचपु°। ७ स. °हाप्येष। ८ क. स. ग. घ. ङ. च. छ. ज. ट. °स्माद्ब्राह्मणः शान्तो। ९ झ. °विद्ब्राह्मणः शान्तो। १० क. स. ग. घ. ङ. च. छ. ज. झ. ट. °रमं दर्शयति। त°।

ब्रह्मवित्स्तुतिरेषा । पुण्यकृति तैजसे च योगिनि महाभाग्यं प्रसिद्धं लोके ताभ्यामतो ब्रह्मवित्स्तूयते प्रख्यातमहाभाग्यत्वाल्लोके ॥ ९ ॥

तथाऽपि प्रकृते मन्त्रे समुच्चयो भातीत्याशङ्क्याऽऽह--उपदेक्ष्यतीति । वाक्यशेषादिपर्यालोचनासिद्धमर्थमुपसंहरति—तस्मादिति । पूर्वं पुण्यकृत्त्वा पुनस्त्यक्तपुत्राद्येषणो ब्रह्मवित्तैर्नैतीति क्रमो न युज्यतेऽश्रुतत्वादित्याशङ्क्याऽऽह—अथवेति । स्तुतिमेवोपपादयति—पुण्यकृतीति । तेजांसि करणान्युपसंहृत्य स्थितस्तैजसो हिरण्यगर्भादिरुपासीनो योगी तस्मिन्नणिमाद्यैश्वर्यान्महानुभावत्वप्रसिद्धिः । ताभ्यां पुण्यकृत्तैजसाभ्यामित्यर्थः । अतःशब्दपरामृष्टं स्पष्टयति—प्रख्यातेति । पुण्यकृत्तैजसयोरिति शेषः । ९ ॥

अन्धं तमः प्रविशन्ति येऽविद्यामुपासते । ततो भूय
इव ते तमो य उ विद्यायाꣳ रताः ॥ १० ॥

अन्धं अदर्शनात्मकं तमः संसारनियामकं प्रविशन्ति प्रतिपद्यन्ते । के । येऽविद्यां विद्यातोऽन्यां कर्मोपासनाधनलक्षणामुपासते कर्मानुवर्तन्त इत्यर्थः । ततस्तस्मादपि भूय इव बहुतरमिव तमः प्रविशन्ति । के । य उ विद्यायामविद्यावस्तुप्रतिपादिकायां कर्मार्थायां त्रय्यामेव विद्यायां रता अभिरताः । विधिप्रतिषेधपर एव वेदो नान्योऽस्तीत्युपनिषदर्थानपेक्षिण इत्यर्थः ॥ १० ॥

प्रस्तुतज्ञानमार्गस्तुत्यर्थं मार्गान्तरं निन्दति—अन्धमित्यादिना । विद्यायामिति प्रतीकमादाय व्याकरोति—अविद्येति । कथं पुनस्त्र्यामभिरतानामधःपतनमित्याशङ्क्याऽऽह—विधीति ॥ १० ॥

अनन्दा नाम ते लोका अन्धेन तमसाऽऽ-
वृताः । ताꣳस्ते प्रेत्याभिगच्छन्त्यविद्वाꣳ-
सोऽबुधो जनाः ॥ ११ ॥

यदि तेऽदर्शनलक्षणं तमः प्रविशन्ति को दोष इत्युच्यते—अनन्दा अनानन्दा असुखा नाम ते लोकास्तेनान्धेनादर्शनलक्षणेन तमसाऽऽवृता व्याप्तास्ते तस्याज्ञानतमसो गोचरास्तांस्ते प्रेत्य मृत्वाऽभिगच्छन्त्यभियान्ति । के । येऽविद्वांसः । किं सामान्येनाविद्वत्तामात्रेण नेत्युच्यते—अबुधः । बुधेरवगमनार्थस्य धातोः क्विप्प्रत्ययान्तस्य रूपम् ।

---

१ घ ञ. °णो ब्राह्मणो ब्र° । २ घ. ज. ङ. के ते ये° । ३ ख. ङ. °ना । उ वि° ।

आत्मावगमवर्जिता इत्यर्थः। जनाः प्रकृता एव जननधर्मिणो न वेत्येतत् ॥ ११ ॥

मन्त्रान्तरमाकाङ्क्षाद्वारोत्थाप्य व्याचष्टे—यदीत्यादिना। अबुध इत्यस्य निष्पत्तिं सूचयन्विवक्षितमर्थमाह—बुधेरिति ॥ ११ ॥

आत्मानं चेद्विजानीयादयमस्मीति पूरुषः।
किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेत् ॥ १२ ॥

आत्मानं स्वं परं सर्वप्राणिमनीषितज्ञं हृत्स्थमशनायादिधर्मातीतं चेद्यदि विजानीयात्सहस्रेषु कश्चित्। चेदित्यात्मविद्याया दुर्लभत्वं दर्शयति। कथमयं परं आत्मा सर्वप्राणिप्रत्ययसाक्षी यो नेति नेतीत्युक्तो यस्मान्नान्योऽस्ति द्रष्टा श्रोता मन्ता विज्ञाता समः सर्वभूतस्थो नित्यशुद्धबुद्धमुक्तस्वभावोऽस्मि भवामीति पूरुषः पूरुषः। स किमिच्छंस्तत्स्वरूपव्यतिरिक्तमन्यद्रस्तु फलभूतं किमिच्छन्कस्य वाऽन्यस्याऽऽत्मनो व्यतिरिक्तस्य कामाय प्रयोजनाय। न हि तस्याऽऽत्मन एष्टव्यं फलम्। न चाप्यात्मनोऽन्योऽस्ति यस्य कामायेच्छति सर्वस्याऽऽत्मभूतत्वात्। अतः किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेद्भ्रंशेत्। शरीरोपाधिकृतदुःखमनु दुःखी स्यात्। शरीरतापमनुतप्येत। अनात्मदर्शिनो हि तद्व्यतिरिक्तवस्त्वन्तरेप्सोः। ममदं स्यात्पुत्रस्येदं भार्याया इदमित्येवमीहमानः पुनः पुनर्जननमरणप्रबन्धरूढः शरीरेरोगमनु रुंज्यते सर्वात्मदर्शिनस्तु तदसंभव इत्येतदाह ॥ १२ ॥

उक्तात्मज्ञानस्तुत्यर्थमेव तन्निष्ठस्य कायक्लेशराहित्यं दर्शयति—आत्मानमित्यादिना। विज्ञानात्मनो वैलक्षण्यार्थं विशिनष्टि—सर्वेति। तात्स्थ्यं व्यावर्तयति—हृत्स्थमिति। बुद्धिसंबन्धप्राप्तं संसारित्वं वारयति—अशनायादीति। प्रश्नपूर्वकं ज्ञानप्रकारं प्रकटयति—कथमित्यादिना। सर्वभूतसंबन्धप्रयुक्तं दोषं वारयितुं विशिनष्टि—नित्येति। इति विजानीयादिति संबन्धः। प्रयोजनाय शरीरमनुसंज्वरेदिति संबन्धः। किमिच्छन्नित्याक्षेपं समर्थयते—नहीति। कस्य वा कामायेत्याक्षेपमुपपादयति—न चेति। आक्षेपद्वयं निगमयति—अत इति। तदेव स्पष्टयति—शरीरेति। विदुषस्तापाभावे व्यतिरेकमु-

---

१ ख. घ. ङ. च. छ. ज. झ ढ. प्राकृता। ग. °धर्माणो। ३ ग. स्वं स°। ४ च. ङ ढ. °रमात्मा। ५ घ. ज. ढ. °रागं°। ६ घ. ज. ढ. °नुरज्य°। ७ क. रुध्यते। ८ ख. ञ. ण. °स्य कां°।

सेन (ण) विशदयति–अनात्मेति । वस्त्वन्तरेणोत्सारणसंभव इति शेषः । स चैवंव्याहत्य ममेदमित्यादि योज्यम् । इत्येतदाह किमिच्छन्नित्यादिश्रुतिरिति शेषः ॥ १२ ॥

यस्यानुवित्तः प्रतिबुद्ध आत्माऽस्मिन्संदेहे गहने
प्रविष्टः । स विश्वकृत्स हि सर्वस्य कर्ता तस्य
लोकः स उ लोक एव ॥ १३ ॥

किंच यस्य ब्राह्मणस्यानुवित्तोऽनुलब्धः प्रतिबुद्धः साक्षात्कृतः कथमहमस्मि परं ब्रह्मेत्येवं प्रत्यगात्मत्वेनावगत आत्माऽस्मिन्संदेहे संदेहेऽनेकानर्थसंकटोपचये गहने विषमेऽनेकशतसहस्रविवेकविज्ञान-प्रतिपक्षे विषमे प्रविष्टः स यस्य ब्राह्मणस्यानुवित्तः प्रतिबोधेनेत्यर्थः । स विश्वकृद्विश्वस्य कर्ता । कथं विश्वकृत्त्वं तस्य किं विश्वकृदिति नामेत्याशङ्क्याऽऽह–स हि यस्मात्सर्वस्य न नाममात्रं न केवलं विश्वकृत्परमप्रयुक्तः सन् । किं तर्हि तस्य लोकः सर्वः । किमन्यो लोकोऽन्योऽसावित्युच्यते–स उ लोक एव । लोकशब्देनाऽऽत्मोच्यते । तस्य सर्वं आत्मा स च सर्वस्याऽऽत्मेत्यर्थः । य एष ब्राह्मणेन प्रत्यगात्मा प्रतिबुद्धतयाऽनुवित्त आत्माऽनर्थसंकटे गहने प्रविष्टः स न संसारी किंतु पर एव । यस्माद्विश्वस्य कर्ता सर्वस्याऽऽत्मा तस्य च सर्व आत्मा । एक एवाद्वितीयः पर एवास्मीत्यनुसंधातव्य इति श्लोकार्थः ॥ १३ ॥

न केवलमात्मविद्यारतिकस्य कायक्लेशराहित्यं किंतु कृतकृत्यता चास्तीत्याह–किंचेति । संदेहे पृथिव्यादिभिर्भूतैरुपचिते शरीरे । संदेहत्वं साधयति–अनेकेति । विषमत्वं विशदयति–अनेकशतेति । न नाममात्रमित्यत्र पुरस्तोऽत्रस्तस्मादिति पठितव्यं यस्मादित्युपक्रमाद्विश्वकृत्त्वमिति शेषः । परशब्दो विद्याविषयः । विश्वकृत्कृतकृत्य इत्येतत् । लोकलोकिविभागेन भेदं शङ्कित्वा दूषयति–किमित्यादिना । यस्येत्यादिमन्त्रस्य तात्पर्यार्थं संगृह्णाति–य एष इति । अस्त्वेवं किं तावतेत्याशङ्क्याऽऽह–एक एवेति । यो हि परः सर्वप्रकारभेदराहित्यात्पूर्णतया वर्तते स एवास्मीत्यात्माऽनुसंधातव्य इति न योजना ॥ १३ ॥

इहैव सन्तोऽथ विद्मस्तद्वयं न चेदवेदिर्महती

---

१ क. ख. ङ. चेत्येतद्व्या° । २ ख. ग. घ. ङ. च. ट ठ. ड. ढ. °देहे ग° । ३ ख. ग. घ. च. ढ. °देहे सं° । ४ च. °विष्टो जलसूर्यकादिवदिति स । क. ग, घ, ङ. च, छ. ज. झ. ढ. °स्मीति मन्तव्य । ६ ख. ढ. °स्तात्तस्मा° ।

विनष्टिः । ये तद्विदुरमृतास्ते भवन्त्यथेतरे दुःख-
मेवापियन्ति ॥ १४ ॥

किंचेहैवानेकानर्थसंकुले सन्तो भवन्तोऽज्ञानदीर्घनिद्रामोहिताः सन्तः कथंचिदिव ब्रह्मतत्त्वमात्मत्वेनाथ विद्मो विजानीमः । तदेतद्ब्रह्म प्रकृतमहो वयं कृतार्था इत्यभिप्रायः । यदेतद्ब्रह्म विजानीमस्तन्न चेद्विदितवन्तो वयं वदनं वेदोऽस्यास्तीति वेदी वेद्येव वेदिर्न वेदिरवेदिः । ततोऽहमवेदिः स्याम् । यद्यवेदिः स्यां को दोषः स्यान्महत्यनन्तपरिमाणा जन्ममरणादिलक्षणा विनष्टिर्विनशनम् । अहो वयमस्मान्महतो विनशनान्निर्मुक्ता यदद्वयं ब्रह्म विदितवन्त इत्यर्थः । यथा च वयं ब्रह्म विदित्वाऽस्माद्विनशनाद्विप्रमुक्ता एवं तद्विदुरमृतास्ते भवन्ति ये पुनर्नैवं ब्रह्म विदुस्त इतरे ब्रह्मविद्भ्योऽन्येऽब्रह्मविद इत्यर्थः । दुःखमेव जन्ममरणादिलक्षणमेवापियन्ति प्रतिपद्यन्ते न कदाचिदप्यविदुषां ततो विनिवृत्तिरित्यर्थः । दुःखमेव हि त आत्मत्वेनोपगच्छन्ति ॥ १४ ॥

ब्रह्मविदो विद्यया कृतकृत्यत्वे श्रुतिसंप्रतिपत्तिरेव केवलं न भवति किंतु स्वानुभवसंप्रतिपत्तिरस्तीत्याह—किंचेति । अथेत्यस्य कथंचिदिवेति व्याख्यानम् । तदित्यस्य ब्रह्मतत्त्वमित्युक्तमर्थं स्फुटयति—तदेतदिति । ब्रह्मज्ञाने कृतार्थत्वं श्रुत्यनुभवाभ्यामुक्त्वा तदभावे दोषमाह—यदेतदिति । तर्हि महतीति विनष्टिरिति संबन्धः । बहुत्वं न विवक्षितं ज्ञानान्मोक्षोऽत्र विवक्षित इत्यभिप्रेत्य वेदिरित्यस्यार्थमाह—वेदनमित्यादिना । न चेद्ब्रह्म विदितवन्तो वयं ततोऽहमवेदिः स्यामिति योजना विद्याभावे दोषमुक्त्वा विद्वदनुभवसिद्धमर्थं निगमयति—अहो वयमिति । इहैवेत्यादिना पूर्वार्धेनोक्तमेवार्थमुत्तरार्धेन पपञ्चयति—यथा चेत्यादिना । दुःखादविदुषां विनिर्मोकाभावे हेतुमाह—दुःखमेवेति ॥ १४ ॥

यदैतमनुपश्यत्यात्मानं देवमञ्जसा । ईशानं भूतभव्यस्य
न ततो विजुगुप्सते ॥ १५ ॥

यदा पुनरेतमात्मानं कथंचित्परमकारुणिकं कंचिदाचार्यं प्राप्य

---

१ च. ङ. °ष्टिः । एत° । क. च. ढ. °ष्टि । य एत° । २ च. 'मेवोपय° । ३ ख. °द्वारहि° । ग. घ. ङ. च. छ. ज. ढ. °द्राहि° । ४ ख. ग. घ. ङ. छ. ज. °वेदिर्न चेद्वेदिस्ततो° । ५ ख. ङ. च. छ. ज. ढ. यत्तद्° । ग. झ. यत्तद्व° । ६ ढ. एवमेत° । ७ घ. °वै ब्र एत° । ८ च. ढ. °मेवोपय° । ९ ख. ट. °दिति ब्र° ।

ततो लब्धप्रसादः सन्ननु पश्चात्पश्यति साक्षात्करोति स्वमात्मानं देवं द्योतनवन्तं दातारं वा सर्वप्राणिकर्मफलानां यथाकर्मानुरूपमञ्जसा साक्षादीशानं स्वामिनं भूतभव्यस्य कालत्रयस्येत्येतत् । न ततस्तस्मादीशानाद्देवादात्मानं विशेषेण जुगुप्सते गोपायितुमिच्छति । सर्वो हि लोक ईश्वराद्गुप्तिमिच्छति भेददर्शी । अयं त्वेकत्वदर्शी न बिभेति कुतश्चन । अतो न तदा विजुगुप्सते । यदेशानं देवमञ्जसाऽऽत्मत्वेन पश्यति न तदा निन्दति[6] वा कंचित् । सर्वमात्मानं हि पश्यति सं एवं पश्यन्कमसौ निन्द्यात् ॥ १५ ॥

किंच विदुषो विहिताकरणादिप्रयुक्तं भयं नास्तीति विद्यां स्तोतुमेव मन्त्रान्तरमादाय व्याचष्टे—यदा पुनरित्यादिना । उक्तमर्थं व्यतिरेकमुखेन (ण) विशदयति—सर्वो हीति । जुगुप्सायां निन्दात्वेन प्रसिद्धत्वात्कथमवयवार्थमादाय व्याख्यायते रूढिर्योगमपहरतीति न्यायादित्याशङ्क्याऽऽह—यदेति । तदेवोपपादयति—सर्वमिति ॥ १५ ॥

यस्मादर्वाक्संवत्सरोऽहोभिः परिवर्तते । तद्देवा ज्योतिषां
ज्योतिरायुर्होपासतेऽमृतम् ॥ १६ ॥

किंच यस्मादीशानादर्वाग्यस्मादन्यविषय एवेत्यर्थः । संवत्सरः कालात्मा सर्वस्य जानेमतः परिच्छेत्ता यमपरिच्छिन्द्न्नर्वागेव वर्ततेऽहोभिः स्वावयवैरहोरात्रैरित्यर्थः । तज्ज्योतिषा ज्योतिरादित्यादिज्योतिषामप्यवभासकत्वादायरित्यु[7]सते देवा अमृतं ज्योतिरतोऽन्यन्म्रियते न हि ज्योतिः । सर्वस्य ह्येतज्ज्योतिरायुः । आयुर्गुणेन यस्माद्देवास्तज्ज्योतिरुपासते तस्मादायुष्मन्तस्ते । तस्मादायुष्कामेनाऽऽ(णाऽऽ)युर्गुणेनोपास्यं ब्रह्मेत्यर्थः ॥ १६ ॥

अथेश्वरस्यापि कालान्यत्वे सति वस्तुत्वाद्घटवत्कालावच्छिन्नत्वान्न कालत्रयं प्रति युक्तमीश्वरत्वमत आह—किंचेति । यस्मादीशानादर्वाक्संवत्सरो वर्तते तमुपासते देवा इति संबन्धः। ननु कथं संवत्सरोऽर्वागित्युच्यते कालस्य—कालान्तराभावेन पूर्वकालसंबन्धाभावादत आह—यस्मादिति । अन्वयस्तु पूर्ववत् । आत्मज्योतिषो गुणमायुष्ट्वलक्षणं स्पष्टयन्नुपासकस्य फलमाह—सर्वस्येति । यथोक्तोपासने देवानामेवाधिकारो विशेषवचनादित्याशङ्क्याऽऽह—तस्मादिति ॥ १६ ॥

---

१ क. घ. ज. °कद्° । छ. झ. °ति क° । ३ घ. ज किंचित । ४ घ. ज. य. ५ ग. °इयन्किम° । ६ झ. निन्देत् । ७ ङ. च. छ. ढ. °स्माद्व्यायुं° । ८ ख. ङ. झ. °व्यास्यमृतं ब्र° । ९ ख. ञ. ढ. °वाधि° ।

यस्मिन्पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः। तमेव मन्य आत्मानं विद्वान्ब्रह्मामृतोऽमृतम् ॥ १७ ॥

किंच यस्मिन्यत्र ब्रह्मणि पञ्च पञ्चजना गन्धर्वादयः पञ्चैव संख्याता गन्धर्वाः पितरो देवा असुरा रक्षांसि निषादपञ्चमा वा वर्णा आकाशश्चाव्याकृताख्यो यस्मिन्सूत्रमोतं च प्रोतं च। यस्मिंश्च प्रतिष्ठित एतस्मिन्नु खल्वक्षरे गार्ग्याकाश इत्युक्तं तमेवाऽऽत्मानममृतं ब्रह्म मन्येऽहं न चाहमात्मानं ततोऽन्यत्वेन जाने। किं तर्ह्यमृतोऽहं ब्रह्म विद्वान्सन्नज्ञानमात्रेण तु मर्त्योऽहमासं तदपगमाद्विद्वानहममृत एव ॥ १७ ॥

ज्योतिषां ज्योतिरमृतमित्युक्तं तस्यामृतत्वं सर्वाधिष्ठानत्वेन साधयति—किंचेति। एवकारार्थमाह—न चेति। यद्यात्मानं ब्रह्म जानासि तर्हि किं ते तद्विद्याफलमिति प्रश्नपूर्वकमाह—किं तर्हीति। कथं तर्हि ते मर्त्यत्वमतीतिस्तत्राऽऽह—अज्ञानमात्रेणेति ॥ १७ ॥

प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रं मनसो ये मनो विदुः। ते निचिक्युर्ब्रह्म पुराणमग्र्यम् ॥ १८ ॥

किंच तेन हि चैतन्यात्मज्योतिषाऽवभास्यमानः प्राणः आत्मभूतेन प्राणिति तेन प्राणस्यापि प्राणः स तं प्राणस्य प्राणम्। तथा चक्षुषोऽपि चक्षुरुत श्रोत्रस्यापि श्रोत्रम्। ब्रह्मशक्त्यधिष्ठितानां हि चक्षुरादीनां दर्शनादिसामर्थ्यं स्वतः काष्ठलोष्टसमानि हि तानि चैतन्यात्मज्योतिःशून्यानि। मनसोऽपि मन इति ये विदुश्चक्षुरादिव्यापारानुमितास्तित्वं प्रत्यगात्मानं न विषयभूतं ये विदुस्ते निचिक्युर्निश्चयेन ज्ञातवन्तो ब्रह्म पुराणं चिरंतनमग्र्यमग्रे भवम्। "तद्यदात्मविदो विदुः" इति ह्याथर्वणे ॥ १८ ॥

प्रकृताः पञ्चजनाः पञ्च ज्योतिषा सह प्राणादयो वा स्युरित्यभिप्रेत्याऽऽह—किंचेति। कथं चक्षुरादिषु चक्षुरादित्वं ब्रह्मणः सिध्यति तत्राऽऽह—ब्रह्मशक्तीति। विषयतानि केनचिदधिष्ठितानि प्रवर्तन्ते करणत्वाद्वास्यादिवदिति चक्षुरादिव्यापारेणानुमितास्तित्वं प्रत्यगात्मानं ये विदुरिति योजना। विदिक्रियावि-

---

१ घ. ञ. ण. °ह्मत्वेन जा°। २ क. घ. ज. °णः संस्तं प्रा°। ३ झ. °र्थ नं स्व°। ४ क. घ. ज. °पारद्वारा°। ५ क. स. ग. ध. झ. °स्ते किं नि°।

षयत्वं व्यावर्तयति–नेति । प्रत्यगात्मविदां कथं ब्रह्मवित्त्वमित्याशङ्क्याऽऽह–तदिति ॥ १८ ॥

मनसैवानुद्रष्टव्यं नेह नानाऽस्ति किंचन ।
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति ॥ १९ ॥

तदब्रह्मदर्शनं साधनमुच्यते मनसैव परमार्थज्ञानसंस्कृतेनाऽऽचार्योपदेशपूर्वकं चानुद्रष्टव्यम् । तत्र च दर्शनविषये ब्रह्मणि नेह नानाऽस्ति किंचन किंचिदपि । अस्ति नानात्वे नानात्वमध्यारोपयत्यविद्यया । स मृत्योर्मरणान्मृत्युं मरणमाप्नोति । कोऽसौ । य इह नानेव पश्यति । अविद्याध्यारोपणव्यतिरेकेण नास्ति परमार्थतो द्वैतमित्यर्थः ॥ १९ ॥

मनसो ब्रह्मदर्शनसाधनत्वे कथं ब्रह्मणो वाङ्मनसागोचरत्वश्रुतिरित्याशङ्क्याऽऽह–परमार्थेति । केवलं मनो ब्रह्मविषयीकुर्वदपि श्रवणादिसंस्कृतं तदाकारं जायते तेन द्रष्टव्यं तदुच्यतेऽतः एव वृत्तिव्याप्यं ब्रह्मेत्युपगच्छन्तीति भावः । अनुशब्दार्थमाह–आचार्येति । दृष्टिदृष्टयादिभिन्न भेदमाशङ्क्याऽऽह–तत्र चेति । एवकारार्थमाह–नेहेति । कथमात्मनि वस्तुतो भेदरहितेऽपि भेदो भातीत्याशङ्क्याऽऽह–अस्तीति । नेहेत्यादेः सोपपत्तिकमर्थं कथयति–अविद्येति ॥ १९ ॥

एकधैवानुद्रष्टव्यमेतदप्रमेयं ध्रुवम् । विरजः पर
आकाशादज आत्मा महान्ध्रुवः ॥ २० ॥

यस्मादेवं तस्मादेकधैवैकेनैव प्रकारेण विज्ञानघनैकरसप्रकारेणाऽऽकाशवन्निरन्तरेणानुद्रष्टव्यम् । यस्मादेतद्ब्रह्माप्रमेयमप्रमेयम् । सर्वैकत्वात् । अन्येन ह्यन्यत्प्रमीयत इदं त्वेकमेवाद्वयोऽप्रमेयम् । ध्रुवं नित्यं कूटस्थमविचालीत्यर्थः । ननु विरुद्धमिदमुच्यतेऽप्रमेयं ज्ञायत इति च । ज्ञायत इति प्रमाणैर्मीयत इत्यर्थाऽप्रमेयमिति च तत्प्रतिषेधः। नैष दोषः । अन्यवस्तुवेदनागमप्रमाणप्रमेयत्वप्रतिषेधार्थत्वात् । यथाऽन्यानि वस्तून्यागमनिरपेक्षैः प्रमाणैर्विषयी क्रियन्ते न तथैतदात्मतत्त्वं प्रमाणान्तरेण विषयीकर्तुं शक्यते । सर्वस्याऽऽत्मत्वे केन कं पश्येद्विजानीयादित्यतः प्रमातृप्रमाणादिव्यापारप्रतिषेधेनैवाऽऽगमोऽपि विज्ञापयति न त्वभिधानाभिधेयलक्षणवाक्यधर्माङ्गीकरणेन ।

---

१ ख. न चेह । २ क. ख. ङ. च छ. ज्ञ. ढ. °ता द्वितीयमिं° । ३ ख. ढ. तदोच्य° । ४ क. ख. ण. त. येति । घ. किचेति । ५ ग. ज. °वदागमातिरिक्तप्र° । ६ घ. ज. °प्रेक्षप्र०

तस्माच्चाऽऽगमेनापि स्वर्गमेवादिवेत्तत्प्रतिपाद्यते । प्रतिपादयित्रात्मभूतं हि तत् । प्रतिपादयितुः प्रतिपादनस्य प्रतिपाद्यविषयत्वात् । भेदे हि सति तद्भवति ।

द्वैताभिप्राये कथमनुद्रष्टव्यमित्याशङ्क्याऽऽह-यस्मादिति । तमेवैकं प्रकारं प्रकटयति-विज्ञानेति । परिच्छिन्नं व्यवच्छिनत्ति-आकाशवादिति । एकरसत्वं हेतूकृत्याप्रमेयत्वं प्रतिजानीते-यस्मादिति । एतदुक्तं यस्मादेकरसं तस्मादप्रमेयमिति योजना । हेत्वर्थं स्फुटयति-सर्वैकत्वादिति । तथाऽपि कथमप्रमेयत्वं तदाह-अन्येनेति । मिथो विरोधपराहतेत्यन्विति । विरोधमेव स्फोरयति-ज्ञायत इतीति । चोदितं विरोधं निराकरोति नैष दोष इति । संगृहीतं समाधानं विशदयति-यथेत्यादिना । तस्य मानान्तरेविषयीकर्तुमशक्यत्वे हेतुमाह-सर्वस्येति । इति सर्वद्वैतोपशान्तिश्रुतेरिति शेषः । आगमोऽपि तर्हि कथमात्मानमावेदयेदित्याशङ्क्याऽऽह-प्रमात्रिति । आत्मनः स्वर्गादिवद्विषयत्वेनाऽऽगमप्रतिपाद्यत्वाभावे हेतुमाह-प्रतिपादयितृत्वादिति । तथाऽपि किमिति विषयत्वेनाप्रतिपाद्यत्वं तत्राऽऽह-प्रतिपादयितुरिति । तदिति प्रतिपाद्यत्वमुक्तम् ।

ज्ञानं च तस्मिन्परात्मभावनिवृत्तिरेव । न तस्मिन्साक्षादात्मभावः कर्तव्यो विद्यमानत्वादात्मभावस्य । नित्यो ह्यात्मभावः सर्वस्यात्तद्वेषय इव प्रत्यवभासते । तस्मादतद्विषयाभासनिवृत्तिव्यतिरेकेण न तस्मिन्नात्मभावो विधीयते । अन्यात्मभावनिवृत्तावात्मभावः स्वात्मनि स्वाभाविको यः स केवलो भवतीत्यात्मा ज्ञायत इत्युच्यते । स्वतश्चाप्रमेयः प्रमाणान्तरेण न विषयी क्रियत इत्युभयमप्यविरुद्धमेव । विरजा विगतरजो रजो नाम धर्माधर्मादिमलं तद्रहित इत्येतत् । परः परो व्यतिरिक्तः सूक्ष्मो व्यापी वाऽऽकाशादप्यव्याकृताद्व्यापी । अजो न जायते जन्मप्रतिषेधादुत्तरेऽपि भावविकाराः प्रतिषिद्धाः । सर्वेषां जन्मादित्वात् । आत्मा महान्परिमाणतो महत्तरः सर्वस्मात् । ध्रुवोऽविनाशी ॥ २० ॥

कथं तर्हि तस्मिन्नागमिकं ज्ञानं तत्राऽऽह-ज्ञानं चेति । परस्मिन्देहादावात्मभावस्याऽऽरोपितस्य निवृत्तिरेव वाक्येन क्रियते । तथा चाऽऽत्मनि परिशिष्टे स्वाभाविकमेव स्फुरणं प्रतिबन्धविगमात्प्रकटी भवतीति भावः । ननु ब्रह्मण्यात्मभावः श्रुत्या कर्तव्यो विवक्ष्यते न तु देहादावात्मत्वव्यावृत्तिरत आह-न

१ क. घ. ज. °वत्प्र°। २ झ. °यावभा°। ३ ग. झ. °दृश्या°। ४ घ. ञ ण. तदाह।

तस्मिन्निति । ब्रह्मणश्चेदात्मभावः सदा मन्यते कथमन्यथा प्रथेत्याशङ्क्याऽऽह—नित्यो हीति । सर्वस्य पूर्णस्य ब्रह्मण इत्येतत् । अतद्विषयो ब्रह्मव्यतिरिक्तविषय इत्यर्थः । ब्रह्मण्यात्मभावस्य सदा विद्यमानत्वे फलितमाह—तस्मादिति । अतद्विषयाभासो देहादावात्मत्वप्रतिभासः । तस्मिन्ब्रह्मणीत्यर्थः । अन्यस्मिन्नात्मभावनिवृत्तिरेवाऽऽत्मनेन क्रियते चेतर्हि कथमात्मा तेन गम्यत इत्युच्यते तत्राऽऽह—अन्येति । यद्यागमिकवृत्तिव्याप्यत्वेनाऽऽत्मनो मेयत्वमिष्यते कथं तर्हि तस्यामेयत्ववाचोयुक्तिरित्याशङ्क्याऽऽह—स्वतश्चेति । वृत्तिव्याप्यत्वेन मेयत्वं स्फुरणाव्याप्यत्वेन चामेयत्वमित्युपसहरति—इत्युभयमिति । यदुक्तं ध्रुवत्वं तदुपस्कारपूर्वकमुपपादयति—विरज इत्यादिना । कथं जन्मनिषेधादितरे विकारा निषिध्यन्ते तत्राऽऽह—सर्वेषामिति ॥ २० ॥

तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः
नानुध्यायाद्बहूञ्छब्दान्वाचो विग्लापनꣳ हि तादिति ॥ २१ ॥

तमीदृशमात्मानमेव धीरो धीमान्विज्ञायोपदेशतः शास्त्रतश्च प्रज्ञां शास्त्राचार्योपदिष्टविषयां जिज्ञासापारसमाप्तिकरीं कुर्वीत ब्राह्मणः एवं प्रज्ञाकरणसाधनानि संन्यासशमदमोपरमतितिक्षासमाधानानि कुर्यादित्यर्थः । नानुध्यायान्नानुचिन्तयेद्बहून्प्रभूताञ्छब्दान् । तत्र बहुत्वप्रतिषेधात्केवलात्मैकत्वप्रतिपादकाः स्वल्पाः शब्दा अनुज्ञायन्ते " ओमित्येवं ध्यायथ आत्मानम् " " अन्या वाचो विमुञ्चथ " इति चाऽऽथर्वणे । वाचो विग्लापनं विशेषेण ग्लानिकरं श्रमकरं हि यस्मात्तद्बहुशब्दाभिध्यानमिति ॥ २१ ॥

येथोक्तं वस्तुनिदर्शनं निगमयति- तमीदृशमिति । नित्यशुद्धत्वादिलक्षणमिति यावत् । उक्तरीत्या प्रज्ञाकरणे कानि साधनानीति चेत्तानि दर्शयति—एवमिति । काम्यनिषिद्धत्यागः संन्यास उपरमो नित्यनैमित्तिकत्याग इति भेदः । बहूनिति विशेषणवशादायातमर्थं दर्शयति—तत्रेति । चिन्तनीयेषु शब्देष्विति यावत् । तत्र श्रुत्यन्तरं संवादयति—ओमित्येवमिति । नानुध्यायादित्यत्र हेतुमाह—वाचेति । तस्माद्बहूञ्छब्दान्नानुचिन्तयेदिति पूर्वेण संबन्धः । इतिशब्दः श्लोकव्याख्यानसमाप्त्यर्थः ॥ २१ ॥

स वा एष महानज आत्मा योऽयं विज्ञानमयः
प्राणेषु य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते
सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः स

---

१ क. ञ. °थोके व° । ख. ढ. °थोक्तव° ।

न साधुना कर्मणा भूयान्नो एवासाधुना कनीयानेष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसंभेदाय तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेनैतमेव विदित्वा मुनिर्भवति । एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति । एतद्ध स्म वै तत्पूर्वे विद्वाꣳसः प्रजां न कामयन्ते किं प्रजया करिष्यामो येषां नोऽयमात्माऽयं लोक इति ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति या ह्येव पुत्रैषणा सा वित्तैषणा या वित्तैषणा सा लोकैषणोभे ह्येते एषणे एव भवतः । स एष नेति नेत्यात्माऽगृह्यो न हि गृह्यतेऽशीर्यो न हि शीर्यतेऽसङ्गो न हि सज्यतेऽसितो न व्यथते न रिष्यत्येतमु हैवैते न तरत इत्यतः पापमकरवमित्यतः कल्याणमकरवमित्युभे उ हैवैष एते तरति नैनं कृताकृते तपतः ॥ २२ ॥

सहेतुको बन्धमोक्षावभिहितौ मन्त्रब्राह्मणाभ्यां श्लोकैश्च पुनर्मोक्षस्वरूपं विस्तरेण प्रतिपादितमेवमेतस्मिन्नात्मविषये सर्वो वेदो यथोपयुक्तो भवति तत्तथा वक्तव्यमिति तदर्थेयं कण्डिकाऽऽरभ्यते । तच्च यथाऽस्मिन्प्रपाठकेऽभिहितं स प्रयोजनमनुयात्रैवोपयोगः कृत्स्नस्य वेदस्य काम्यराशिवर्जितस्येत्येवमर्थ उक्तार्थानुवादः स वा एष इत्यादिः । स इत्युक्तपरामर्शार्थः । कोऽसावुक्तः परामृश्यते तं प्रति निर्दिशति य एष विज्ञानमय इति । अतीतानन्तरवाक्योक्तसंप्रत्ययो मा भूदिति य एषः । कतम एष इत्युच्यते-विज्ञानमयः प्राणेष्विति । उत्तरवाक्यो लिङ्गनं संशयनिवृत्त्यर्थम् । उक्तं हि पूर्वं जनकप्रश्नारम्भे कतम आत्मेति योऽयं विज्ञानमयः प्राणेष्वित्यादि ।

---

१ क. ग. घ. च. ज. °के विहि° ।

कण्डिकान्तरमपवारयितुं वृत्तं कीर्तयति—सहेतुकाविति । उत्तरकण्डिकातात्पर्यमाह—एवमिति । विरजः पर इत्यादिनोक्तक्रमेणावस्थिते ब्रह्मणीति यावत् । तदित्युपपुर्क्तोक्तिः । तदर्थो ब्रह्मात्मनि सर्वस्य वेदस्य विनियोगप्रदर्शनोऽर्थोति यावत् । ननु विविदिषावाक्येन(ण) ब्रह्मात्मनि सर्वस्य वेदस्य विनियोगो वक्ष्यते तथा च तस्मात्पाक्तनं वाक्यं किमर्थमित्याशङ्क्याऽऽह—तञ्चेति । यथाऽस्मिन्नध्याये सफलमात्मज्ञानमुक्तं तथैव तदनूद्यते योजना । कथं यथोक्ते ज्ञाने सर्वो वेदो विनियोक्तुं शक्यते स्वर्गकामादिवाक्यस्य स्वर्गादावेव पर्यवसानादित्याशङ्क्य संयोगपृथक्त्वन्यायमनादृत्य विशिनष्टि—काम्यराशीति । उक्तस्य सफलस्याऽऽत्मज्ञानस्यानुवाद इति यावत् । उक्तानां भूयस्त्वे विशेषं ज्ञातु पृच्छति—कोऽसाविति । विशेषणानर्थक्यमाशङ्क्य परिहरति—अतीतेति । तद्धि विरजः पर इत्यादि[1] तेनोक्तो यो महत्त्वादिविशेषणः परमात्मा तत्र सशब्दात्पतीतिर्मा भूदिति ज्ञात्वा तेन ज्योतिर्ब्राह्मणस्थं जीवं परामृश्य तमेव वैशब्देन स्मारयित्वा तस्य संनिहितेन परेणाऽऽत्मनैक्यमेषशब्देन निर्दिशतीत्यर्थः । विशेषणवाक्यस्थमेषशब्दं पश्नपूर्वकं व्याचष्टे—कतम इति । कथं जीवो विज्ञानमयः कथं वा प्राणेष्विति सप्तमी प्रयुज्यते तत्राऽऽह—उक्तेति । तदनुवादस्यैं सशब्दार्थसंदेहापोहं फलमाह—संशयेति । उक्तवाक्योल्लङ्घनामित्युक्तं विवृणोति—उक्तं होति ।

एतदुक्तं भवति योऽयं विज्ञानमयः प्राणेष्वित्यादिना वाक्येन प्रतिपादितः स्वयंज्योतिरात्मा स एष कामकर्माविद्यानामनात्मधर्मत्वप्रतिपादनद्वारेण मोक्षितः परमात्मभावमापादितः पर एवायं नान्य इत्येष स साक्षान्महानज आत्मेत्युक्तः । योऽयं विज्ञानमयः प्राणेष्विति यथाव्याख्यातार्थ एव । य एषोऽन्तर्हृदये हृदयपुण्डरीकमध्ये य एष आकाशो बुद्धिविज्ञानसंश्रयस्तस्मिन्नाकाशे बुद्धिविज्ञानसहिते शेते तिष्ठति । अथवा संप्रसादकालेऽन्तर्हृदये य एष आकाशः पर एवाऽऽत्मा निरुपाधिको विज्ञानमयस्य स्वस्वभावस्तस्मिन्स्वस्वभावे परमात्मन्याकाशाख्ये शेते । चतुर्थ एतद्व्याख्यातं क्वेष तदाऽभूदि-

---

१ ख. ञ. ण. °र्थेत्यर्थः । न° । २ ञ ढ ण. तद्धि° । ३ क ख घ. ढ °दिनो° । ४ क. घ. ञ °ण. । °क्तो म° । ५ ञ. ण. °स्य श° । ६ क. घ. ञ. ढ. ण. °ऽर्थो सं° । ७ च. ढ. °भूत्कुत एतद्गागादि° ।

त्यस्य प्रतिवचनत्वेन। स च सर्वस्य ब्रह्मेन्द्रादेर्वशी। सर्वो ह्यस्य वशे वर्तते। उक्तं चतस्य वा अक्षरस्य प्रशासनेन इति। न केवलं वशी सर्वस्येशान ईशिता च ब्रह्मेन्द्रप्रभृतीनामीशितृत्वं च कदाचिज्जातिच्छेदं यथा राजकुमारस्य बलवत्तरानपि भृत्यान्प्रति तद्वन्मा भूदित्याह सर्वस्याधिपतिरधिष्ठाय पालयिता स्वतन्त्र इत्यर्थः। न राजपुत्रवदमात्यादिभृत्यतन्त्रः। त्रयमप्येतद्वशित्वादिहेतुहेतुमद्ब्रह्म॥

योऽयं विज्ञानमयः प्राणेषु प्रागुक्तः स एष महानज आत्मेति जीवानुवादेन परमात्मभावो विहित इति वाक्यार्थमाह—एतदिति। परमात्मभावापादनप्रकारमनुवदति—साक्षादिति। विशेषणवाक्यस्य व्याख्येयत्वप्राप्तावुक्तवाक्योल्लिङ्गनमित्यत्रोक्तं स्मारयति—योऽयमिति। वाक्यान्तरमवतार्य व्याचष्टे—य एष इति। कथं पुनराकाशशब्दस्य परमात्मविषयत्वमुपेत्य द्वितीयं व्याख्यानं तस्यार्थान्तरे रूढत्वादित्याशङ्क्याऽऽह—चतुर्थ इति। इत्थमुक्तं ज्ञानमनूद्य तत्फलमनुवदति—स चेत्यादिना। कथं पुनर्निरुपाधिकस्येश्वरस्य वशित्वं कथं च तद्भावे तदात्मनो विदुषस्तदुपपद्यते तत्राऽऽह—उक्तं चेति।

यस्मात्सर्वस्याधिपतिस्ततोऽसौ सर्वस्येशानः। यो हि यमधिष्ठाय पालयति स तं प्रतीष्ट एवेति प्रसिद्धम्। यस्माच्च सर्वस्येशानस्तस्मात्सर्वस्य वशीति। किंचान्यत्स एवंभूतो ह्यन्तर्ज्योतिः पुरुषो विज्ञानमयो न साधुना शास्त्रविहितेन कर्मणा भूयान्भवति न वर्धते पूर्वावस्थातः केनचिद्धर्मेण। नो एव शास्त्रप्रतिषिद्धेनासाधुना कर्मणा कनीयानल्पतरो भवति पूर्वावस्थातो न हीयत इत्यर्थः। किंच सर्वो ह्यधिष्ठानपालनादि कुर्वन्परानुग्रहपीडाकृतेन धर्माधर्माख्येन युज्यतेऽस्यैव तु कथं तद्भाव इति। उच्यते—यस्मादेष सर्वेश्वरः सन्कर्मणोऽपीशितुं भवत्येव शीलमस्य तस्मान्न कर्मणा संबध्यते। किंचैष भूताधिपतिर्ब्रह्मादिस्तम्बपर्यन्तानां भूतानामधिपतिरित्युक्तार्थं पदम्॥

विशेषणत्रयस्य हेतुहेतुमद्भूतत्वमेव विशदयति—यस्मादित्यादिना। तत्र प्रसिद्धिं प्रमाणयति—यो हीति। न केवलमुक्तमेव विद्याफलं किंत्वन्यच्चास्तीत्याह—किंचेति। एवंभूतत्वं ज्ञातपरमात्माभिन्नत्वम्। पारिशुद्ध्यर्थमनुवदति—हृदीति। ब्रह्मीभूतस्य विदुषः स्वातन्त्र्यादिवद्धर्माद्यस्पर्शित्वमपि फलमित्यर्थः। अधिष्ठानादिकर्तृत्वाद्विदुषोऽपि लौकिकवद्धर्मादिसंबन्धित्वं स्यादिति शङ्कते—सर्वो हीति।

१ च. ढ. °सने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठत इ°। २ ग. ङ. छ. °द्वदात्मा मा भू°। झ. °द्वदात्मनो मा भू°। ३ घ. ज. °स्ततः स°। ४ ख. ङ. °र्शितृत्व°।

तत्र श्रुत्यन्तरं प्रमाणयति—तथा हीति । ततो नित्याद्यनुष्ठानाद्विशुद्धधीरात्मानं सदा चिन्तयन्नुपनिषद्भिस्तं पश्यतीत्यर्थः । आदिशब्देन कषायपक्तिरित्यादि-स्मृतिसंग्रहः ।

कथं पुनर्नित्यानि कर्माणि संस्कारार्थानीत्यवगम्यते " स ह वा आत्मयाजी यो वेदेदं मेऽनेनाङ्गं संस्क्रियत इदं मेऽनेनाङ्गमुपधीयते " इत्यादिश्रुतेः । सर्वेषु च स्मृतिशास्त्रेषु कर्माणि संस्कारार्थान्येवाऽऽचक्षतेऽष्टाचत्वारिंशत्संस्कारा इत्यादिषु । गीतासु च—

" यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ।
सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः " ।

इति । यज्ञेनेति द्रव्ययज्ञा ज्ञानयज्ञाश्च संस्कारार्थाः । संस्कृतस्य च विशुद्धसत्त्वस्य ज्ञानोत्पत्तिरप्रतिबन्धेन भविष्यत्यतो यज्ञेन विविदिषन्ति । दानेन दानमपि पापक्षयहेतुत्वाद्धर्मवृद्धिहेतुत्वाच्च । तपसा तप इत्यविशेषेण कृच्छ्रचान्द्रायणादिप्राप्तौ विशेषणमनाशकेनेति । कामानशनमनाशकं न तु भोजननिवृत्तिः । भोजननिवृत्तौ म्रियत एव नाऽऽत्मवेदनम् ।

नित्यकर्मणां संस्कारार्थत्वे प्रमाणं पृच्छति—कथमिति । यद्यपि श्रुतिस्मृतिभ्यां कर्मभिः संस्कृतस्योपनिषद्भिरात्मा ज्ञातुं शक्यते तथाऽपि तेषां संस्कारार्थत्वे किं प्रमाणमिति प्रश्ने श्रुतिस्मृती प्रमाणयति—स ह वा इत्यादिना । किं पुनः स्मृतिशास्त्रं तदाह—अष्टाचत्वारिंशादिति । अष्टावनायासादयो गुणाश्चत्वारिंशद्भर्भाधानादयः संस्कारा इति विभागः । बहुवचनोपात्तं स्मृत्यन्तरमाह—गीतासु चेति । पदान्तरमादाय व्याचष्टे—यज्ञेनेतीति । तेषां संस्कारार्थत्वेऽपि कथं ज्ञानसाधनत्वमित्याशङ्क्याऽऽह—संस्कृतस्येति । दानेन विविदिषन्तीति पूर्वेण संबन्धः । कथं पुनः स्वतन्त्रं दानं विविदिषाकारणमत आह—दानमपीति । विविदिषाहेतुरिति शेषः । तपसेत्यत्रापि पूर्ववदन्वयः । कामानशनं रागद्वेषरहितैरिन्द्रियैर्विषयसेवनं यदृच्छालाभसंतुष्टत्वमिति यावत् । यथाश्रुतार्थत्वे का हानिरित्याशङ्क्याऽऽह—न त्विति ।

वेदानुवचनयज्ञदानतपःशब्देन सर्वमेव नित्यं कर्मोपलक्ष्यते । एवं काम्यवर्जितं नित्यं कर्मजातं सर्वमात्मज्ञानोत्पत्तिद्वारेण मोक्षसाधनत्वं प्रतिपद्यते । एवं कर्मकाण्डेनास्यैकवाक्यतावगतिः । एवं यथोक्तेन

---

१ ख. अ. °पङ्क्तिरि° । २ च. °र्थान्येवेत्य° । घ. ज. °र्थान्येवेति ग° । ३ ख. °देदमने° । घ. ज. °देदमेन° । ४ ख. झ. इदमेने° । घ. इदमने° । छ. इदमेतेना° । ५ ख. ग. घ. °मुपाधी° । ६ ग. ज. हि । घ. च. धर्मशा° । ७ ख. °ज्ञेन द्र° । ८ घ. अ. °रूक्त्वत्र रूपास्तैः सं° । ९ ढ. °रार्थास्तै. सं° । १० ख. ढ. °नेति ।

न्यायेनैतमेवाऽऽत्मानं विदित्वा यथाप्रकाशितं मुनिर्भवति मननान्मुनिर्योगी भवतीत्यर्थः । एतमेव विदित्वा मुनिर्भवति नान्यम् । नन्वन्यवेदनेऽपि मुनित्वं स्यात्कथमवधार्यत एतमेवेति । बाढमन्यवदनेऽपि मुनिर्भवेत् । किंत्वन्यवेदने न मुनिरेव स्यात्किं तर्हि कर्म्यपि भवेत्सः । एतं त्वौपनिषदं पुरुषं विदित्वा मुनिरेव स्यान्न तु कर्मी । अतोऽसाधारणं मुनित्वं विवक्षितमस्येत्यवधारयत्येतमेवेति । एतस्मिन्हि विदिते कस्य कं पश्येदित्येवं क्रियासंभवान्मननमेव स्यात् । किंचैतमेवाऽऽत्मानं स्वं लोकमिच्छन्तः प्रार्थयन्तः प्रव्राजिनः प्रव्रजनशीला प्रव्रजन्ति प्रकर्षेण व्रजन्ति सर्वाणि कर्माणि संन्यस्यन्तीत्यर्थः ।

भवतूपात्तानां वेदानुवचनादीनामिष्यमाणे ज्ञाने विनियोगस्तथाऽपि कथं सर्वं नित्यं कर्म तत्र विनियुक्तमित्याशङ्क्याऽऽह—वेदानुवचनेति । उपलक्षणफलमाह—एवमिति । तेनाऽऽश्रमा कर्मणो मुक्तिहेतुत्वे काण्डद्वयस्यैकवाक्यत्वमपि सिध्यतीत्याह—एवं कर्मेति । वाक्यान्तरमवतार्य व्याकरोति—एवमिति । तस्यैवार्थमाह—यथोक्तेनेति । यज्ञाद्यनुष्ठानाद्विशुद्धिद्वारा विविदिषोत्पत्तौ गुरूपादोपसर्पणं श्रवणादि चेत्यनेन क्रमेणेत्यर्थः । यथाप्रकाशितं मोक्षप्रकरणे मन्त्रब्राह्मणाभ्यामुक्तलक्षणमित्यर्थः । योगिशब्दो जीवन्मुक्तविषयः । एवकारं व्याकरोति—एवमेवेति । अवधारणमाक्षिप्य समाधत्ते—नान्वित्यादिना । एवकारस्तर्हि त्यज्यतामित्याशङ्क्याऽऽह—किंत्विति । आत्मवेदनेऽपि कर्मित्वं स्यादिति चेन्नेत्याह—एतं त्विति । कथमात्मविदोऽपि मुनित्वमसाधारणं तदाह—एतस्मिन्निति । इतश्चाऽऽत्मविदो न कर्मित्वमित्याह—किंचेति । आत्मलोकमिच्छतां मुमुक्षूणामपि कर्मत्यागश्रवणादात्मविदां कर्मितेति किं वक्तव्यमित्यर्थः । तच्छीलत्वं वैराग्यातिशयशालित्वम् ।

एतमेव लोकमिच्छन्त इत्यवधारणान्न बाह्यलोकत्रयेप्सूनां पारिव्राज्येऽधिकार इति गम्यते । न हि गङ्गाद्वारं प्रतीप्सुः काशीदेशनिवासी पूर्वाभिमुखः प्रैति । तस्माद्बाह्यलोकत्रयार्थिनां पुत्रकर्मापरब्रह्मविद्याः साधनम् । "पुत्रेणाय लोको जय्यो नान्येन कर्मणा" इत्यादिश्रुतेः । अतस्तदर्थीभिः पुत्रादिसाधनं प्रत्याख्याय न पारिव्राज्यं प्रतिपत्तुं युक्तम् । अतत्साधनत्वात्पारिव्राज्यस्य । तस्मादेतमेव लोकमिच्छन्तः प्रव्रजन्तीति युक्तमवधारणम् । आत्मलोकप्राप्तिहेतुविद्यानिवृत्तौ स्वात्मन्यवस्थानमेव । तस्मादात्मानं चेल्लोकमिच्छति

१ घ. ज. °ते तत्केन । २ झ. °वान्मुनिरेव । ३ ख. ढ. प्रनाड्या । ४ क. ख. घ. च. छ. ज. ढ. °विद्या सा° ।

यस्तस्य सर्वक्रियोपरम एवाऽऽत्मलोकसाधनं मुख्यमन्तरङ्गम् । यथा पुत्रादिरेव बाह्यलोकत्रयस्य । पुत्रादिकर्मण आत्मलोकं प्रत्यसाधनत्वात् । असंभवेन विरुद्धत्वमवोचाम । तस्मादात्मानं लोकमिच्छन्तः प्रव्रजन्त्येव सर्वक्रियाभ्यो निवर्तेरन्नेवेत्यर्थः । यथा च बाह्यलोकत्रयार्थिनः प्रतिनियतानि पुत्रादीनि साधनानि विहितान्येवमात्मलोकार्थिनः सर्वैषणानिवृत्तिः पारिव्राज्य ब्रह्मविदो विधीयत एव ।

अवधारणसामर्थ्यसिद्धमर्थमाह—एतमेवेति । पारिव्राज्ये लोकत्रयार्थिनामनधिकारे दृष्टान्तमाह—न हीति । लोकत्रयार्थिनश्चेत्पारिव्राज्ये नाधिक्रियन्ते कुत्र तर्हि तेषामधिकारस्तत्राऽऽह—तस्मादिति । स्वर्गकामस्य स्वर्गसाधने यागेऽधिकारवल्लोकत्रयार्थिनामपि तत्साधने पुत्रादावधिकार इत्यर्थः । पुत्रादीनां बाह्यलोकसाधनत्वे प्रमाणमाह—पुत्रेणेति । पुत्रादीनां लोकत्रयसाधनत्वे सिद्धे फलितमाह—अत इति । अतत्साधनत्वं लोकत्रयं प्रत्यनुपायत्वम् । अवधारणार्थमुपसंहरति—तस्मादिति । लोकत्रयार्थिनां पारिव्राज्येऽनधिकारादिति यावत् । आत्मलोकस्य स्वरूपत्वेन सदाऽऽप्तत्वात्कथं तत्रेच्छेत्याशङ्क्याऽऽह—आत्मेति । तस्याऽऽत्मत्वेन नित्यप्राप्तत्वेऽप्यविद्यया व्यवहितत्वात्प्रेप्सा संभवतीति भावः । भवत्वात्मलोकप्रेप्सा तथाऽपि किं तत्प्राप्तिसाधनं तदाह—तस्मादिति । अविद्यावशात्तदीप्सासंभवादित्यर्थः । तदिच्छाया दौर्लभ्यं द्योतयितुं चेच्छब्दः । मुख्यत्वं श्रुत्यक्षरप्रतिपन्नत्वम् । प्रनाडिकासाधनेभ्यो वेदानुवचनादिभ्यो विशेषमाह—अन्तरङ्गमिति । पारिव्राज्यमेवाऽऽत्मलोकस्यान्तरङ्गसाधनमिति दृष्टान्तमाह—यथेति । तथा पारिव्राज्यमेवाऽऽत्मलोकस्य साधनमिति शेषः । पारिव्राज्यमेवेति नियमे हेतुमाह—पुत्रादीति । तस्यान्यत्र विनियुक्तत्वादिति शेषः । यद्यपि केवलं पुत्रादिकं नाऽऽत्मलोकप्रापकं तथाऽपि पारिव्राज्यसमुच्चितं तथा स्यादित्याशङ्क्याऽऽह—असंभवेनेति । न हि परिव्राजकस्य पुत्रादि तद्वतो वा पारिव्राज्यं संभवति । उक्तं च समुच्चयं निराकुर्वद्भिः सपरिकरस्य ज्ञानस्य कर्मादिना विरुद्धत्वं तेन कुतः समुच्चितं पुत्राद्यात्मलोकप्रापकमित्यर्थः । साधनान्तरासंभवे फलितमुपसंहरति—तस्मादात्मानमिति । प्रव्रजन्तीति वर्तमानापदेशान्नात्र विधिरस्तीत्याशङ्क्याग्निहोत्रं जुहोतीतिवद्विधिमाश्रित्याऽऽह—यथा चेति ।

कुतः पुनस्त आत्मलोकार्थिनः प्रव्रजन्त्येवेत्युच्यते । तत्रार्थवादवाक्यरूपेण हेतुं दर्शयति । एतद्ध स्म वै तत् । तदेतत्पारिव्राज्ये कारणमुच्यते- ह स्म वै किल पूर्वेऽतिक्रान्तकालीना विद्वांस आत्मज्ञाः प्रजां कर्मापरब्रह्मविद्यां च । प्रजोपलक्षितं हि त्रयमेतद्बाह्यलोकत्रय-

१ घ. ण. °विद्याव्य° । २ ख. ञ. ढ. ङिकसा° ।

साधनं निर्दिश्यते प्रजामिति । प्रजां किं न कामयन्ते पुत्रादिलोकत्रयसाधनं नानुतिष्ठन्तीत्यर्थः । नन्वपरब्रह्मदर्शनमनुतिष्ठन्त्येव । तदलाद्धि व्युत्थानम् । नापवादात् । ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेद सर्वं तं परादादित्यपरब्रह्मदर्शनमप्यपवदत्येव । अपरब्रह्मणोऽपि सर्वमध्यन्तर्भावात् । यत्र नान्यत्पश्यतीति च । पूर्वापरबाह्यान्तरदर्शनप्रतिषेधाच्चापूर्वमनपरमनन्तरमबाह्यमिति । तत्केन कं पश्येद्विजानीयादिति च । तस्मान्नात्मदर्शनव्यतिरेकेणान्यद्व्युत्थानकारणमपेक्षते ।

पारिव्राज्यविधिमुक्त्वा तदपेक्षितमर्थवादमाकाङ्क्षापूर्वकमुत्थापयति—कुतः पुनरिति । उत्थापितस्यार्थवादस्य तात्पर्यमाह—तत्रेति । आत्मलोकार्थिनां पारिव्राज्यनियमः तत्रम्यर्थः । अर्थवादस्थान्यक्षराणि व्याचष्टे—तदेतदिति । क्रियापदेन स्मेति संबध्यते । निपातद्वयस्यार्थमाह—किलेति । प्रजां न कामयन्त इत्युत्तरत्र संबन्धः । प्रजामात्रे श्रुते कथं कर्मादि गृह्यते तत्राऽऽह—प्रजेति । आकाङ्क्षापूर्वकमन्वयमन्वाचष्टे—प्रजां किमिति । अकामयमानत्वस्य पर्यवसानं दर्शयति—पुत्रादीति । पूर्वे विद्वांसः साधनत्रयं नानुतिष्ठन्तीत्युक्तमाक्षिपति—नन्विति । एषणाभ्यो व्युत्तिष्ठतां किं तदनुष्ठानेनेत्याशङ्क्याऽऽह—तद्बलाद्धीति । आत्मविदामपरविद्यानुष्ठानं दूषयति—नापवादादिति । अथात्र सर्वस्याऽऽत्मनो दर्शनमेवापोद्यते न त्वपरस्य ब्रह्मणो दर्शनमत आह—अपरब्रह्मणोऽपीति । तदपवादे श्रुत्यन्तरमाह—यत्रेति । यस्मिन्भूम्नि स्थितश्चक्षुरादिभिरन्यन्न पश्यति न शृणोतीत्यादिना च दर्शनादिव्यवहारस्य वारितत्वादात्मविदो न युक्तमपरब्रह्मदर्शनमित्यर्थः । तत्रैव हेत्वन्तरमाह—पूर्वेति । प्रतिषेधप्रकारमभिनयति—अपूर्वमिति । इतश्चाऽऽत्मविदां नापरब्रह्मदर्शनमित्याह—तत्केनेति । अपरब्रह्मदर्शनासंभवे किं तेषामेषणाभ्यो व्युत्थाने कारणमित्याशङ्क्याऽऽह—तस्मादिति ।

कः पुनस्तेषामभिप्राय इत्युच्यते किं प्रयोजनं फलं साध्यं करिष्यामः प्रजया साधनेन । प्रजा हि बाह्यलोकसाधनं निर्ज्ञाता । स च बाह्यलोको नास्त्यस्माकमात्मव्यतिरिक्तः । सर्वं ह्यस्माकमात्मभूतमेव सर्वस्य च वयमात्मभूताः । आत्मा च नाऽऽत्मत्वादेव न केनचित्साधनेनोत्पाद्य आप्यो विकार्यः संस्कार्यो वा । यदप्यात्मयाजिनः संस्कारार्थं कर्मेति तदपि कार्यकरणात्मदर्शनविषयमेव । इदं

१ झ. ॰प्यपोद्यते । अ० । २ क. ख. ॰दन्त्येव । ३ क. ग. ङ. छ. न्तर्दशं॰ । च. ज. ढ. ॰न्तद॰ । ४ च. ढ. ॰श्येत्तत्केन कं विजा॰ । ५ ग. च. छ. ज. ढ. पेक्ष्यते । ६ क.च. छ. झ. ढ. वाह्यो लो॰ । ७ घ. झ. इदमने॰ । ढ. इदमेतेना॰ ।

मेऽनेनाङ्गं संस्क्रियत इत्यङ्गाङ्गित्वादिश्रवणात् । न हि विज्ञानघनैकरसनैरन्तर्यदर्शिनोऽङ्गाङ्गिसंस्कारोपधानदर्शनं संभवति । तस्मान्न किंचित्प्रजादिसाधनैः करिष्यामः । अविदुषां हि तत्प्रजादिसाधनैः कर्तव्यं फलम् । न हि मृगतृष्णिकायामुदकपानाय तदुदकदर्शी प्रवृत्त इति तत्रोषरमात्रमुदकाभावं पश्यतोऽपि प्रवृत्तिर्युक्ता । एवमस्माकमपि परमार्थात्मलोकदर्शिनां प्रजादिसाधनसाध्ये मृगतृष्णिकादिसमेऽविद्वद्दर्शनविषये न प्रवृत्तिर्युक्तेत्यभिप्रायः ।

साधनत्रयमननुतिष्ठतामभिप्रायं प्रश्नपूर्वकमाह—कः पुनरित्यादिना । कैवल्यमेव तत्साध्यं फलमित्याशङ्क्याऽऽह—प्रजा हीति । निज्ञांता सोऽयमित्यादिश्रुतावितिः शेषः । स एव तर्हि प्रजया साध्यवानिति चेन्नेत्याह—स चेति । आत्मव्यतिरिक्तो नास्तीत्युक्तमुपपादयति—सर्वं हीति । आत्मव्यतिरिक्तस्यैव लोकस्य प्रजादिसाध्यत्वमिष्यतामिति चेन्नेत्याह—आत्मा चेति । आत्मयाजिनः संस्कारार्थं कर्मेत्यङ्गीकारादात्मनोऽस्ति संस्कार्यत्वमित्याशङ्क्याऽऽह—यदपीति । अथाङ्गाङ्गित्वं संस्कार्यत्वं च मुख्यात्मदर्शनविषयमेव किं नेष्यते तत्राऽऽह—न हीति । आत्मविदां प्रजादिसाध्याभावमुपसंहरति—तस्मान्नेति । केषां तर्हि प्रजादिभिः साध्यं फलं तदाह—अविदुषां हीति । केषांचित्पुत्रादिषु प्रवृत्तिश्चेत्तेनैव न्यायेन विदुषामपि तेषु प्रवृत्तिः स्यादित्याशङ्क्याऽऽह—न हीति । तत्र प्रवृत्तिरिति संबन्धः । अविद्वद्दर्शनविषय इति च्छेदः ।

तदेतदुच्यते—येषामस्माकं परमार्थदर्शिनां नोऽयमात्माऽशनायादिविनिर्मुक्तः साध्यसाधुभ्यामविकार्योऽयं लोकः फलमभिप्रेतम् । न चाऽऽस्याऽऽत्मनः साध्यसाधनादिसर्वसंसारधर्मविनिर्मुक्तस्य साधनं किंचिदेषितव्यम् । साध्यस्य हि साधनान्वेषणा क्रियते । असाध्यस्य साधनान्वेषणायां हि जलबुद्ध्या स्थल इव तरणं कृतं स्यात् । खे वा शाकुनपदान्वेषणम् । तस्मादेतमात्मानं विदित्वा प्रव्रजेयुरेव ब्राह्मणा न कर्माऽऽरभेरन्नित्यर्थः । यस्मात्पूर्वे ब्राह्मणा एवं विद्वांसः प्रजामकामयमानाः ।

उक्तेऽर्थे वाक्यमवतार्य व्याचष्टे—तदेतादिति । आत्मा चेत्तदभिप्रेतं फलं तर्हि तत्र साधनेन भवितव्यमित्याशङ्क्याऽऽह—न चेति । क्व तर्हि साधनमेष्टव्यमित्याशङ्क्याऽऽह—साध्यस्येति । विपक्षे दोषमाह—असाध्यस्येति ।

---

१ च. °पसाधन° । २ झ. °मार्थात्मद° । ३ क. ख. ङ. च. छ. झ. °र्शिनामय° । ४ घ. ण. घनमेष्टव्य° ।

येषामित्यादिवाक्यार्थमुपसंहरति—तस्मादिति। ब्राह्मणानां ब्रह्मविदां प्रजादिभिः साध्यभावादिति यावत्।

त एवं साध्यसाधनसंव्यवहारं निन्दन्तोऽविद्वद्द्वेषयोऽयमिति कृत्वा किं कृतवन्त इत्युच्यते—ते ह स्म किल पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्तीत्यादि व्याख्यातम्। तस्मादात्मानं लोकमिच्छन्तः प्रव्रजन्ति प्रव्रजेयुरित्येष विधिरर्थवादेन संगच्छते। न हि सार्थवादस्यास्य लोकस्तुत्याभिमुख्यमुपपद्यते। प्रव्रजन्तीत्यस्यार्थवादरूपो ह्येतद्ध स्मेत्यादिरुत्तरो ग्रन्थः। अर्थवादश्चेन्नार्थवादान्तरमपेक्षेत। अपेक्षते त्वेतद्ध स्मेत्याद्यर्थवादं प्रव्रजन्तीत्येतत्।

वाक्यान्तरं प्रश्नद्वारेणावतार्य पाञ्चमिकं व्याख्यानं तस्य स्मारयति—त एवमित्यादिना। यदर्थोऽयमर्थवादस्तं विधिं निगमयति—तस्मादिति। महानुभावोऽयमात्मलोको यत्तदर्थिनो दुष्करमपि पारिव्राज्यं कुर्वन्तीति स्तुतिरत्र विवक्षिता न विधिरित्याशङ्क्याऽऽह—न हीति। तदेव प्रपञ्चयति—प्रव्रजन्तीत्यस्येति। तथाऽपि प्रव्रजन्तीतिवाक्यस्यार्थवादत्वं किं न स्यादित्याशङ्क्याऽऽह—अर्थवादश्चेदिति।

यस्मात्पूर्वे विद्वांसः प्रजादिकर्मभ्यो निवृत्ताः प्रव्रजितवन्त एव तस्मादधुनातना अपि प्रव्रजन्ति प्रव्रजेयुरित्येवं संबध्यमानं न लोकस्तुत्यभिमुखं भवितुमर्हति। विज्ञानसमानकर्तृकत्वोपदेशादित्यादिनाऽवोचाम। वेदानुवचनादिसहपाठाच्च। यथाऽऽत्मवेदनसाधनत्वेन विहितानां वेदानुवचनादीनां यथार्थत्वमेव नार्थवादत्वं तथा तैरेव सह पठितस्य पारिव्राज्यस्याऽऽत्मलोकप्राप्तिसाधनत्वेनार्थवादत्वमयुक्तम्। फलविभागोपदेशाच्च। एतमेवाऽऽत्मानं लोकं विदित्वेत्यन्यस्माद्ब्राह्मल्लोकादात्मानं फलान्तरत्वेन प्रविभजति। यथा पुंत्रेणैवायं लोको जय्यो नान्येन कर्मणा कर्मणा पितृलोक इति। न च प्रव्रजन्तीत्येतत्प्राप्तवल्लोकस्तुतिपरम्। प्रधानवच्चार्थवादापेक्षम्। सङ्कुच्छुतं स्यात्। तस्मादभ्रान्तिरेवैषा लोकस्तुतिपरमिति।

अपेक्षाप्रकारमेव प्रकटयन्नस्य स्तुत्यभिमुखत्वाभावाद्विधिस्त्वमेवेत्याह—यस्मादिति। किंच विदित्वा व्युत्थाय भिक्षाचर्यं चरन्तीत्यत्र विज्ञानेन समानकर्तृकत्वं

१ क. ख. ग. च. छ. झ. °षय°। २ घ. ज. °त्वा किमकुर्वतेत्यु°। ३ घ. ज. °दात्मलो°। ४ ख. ग. ङ. ढ. °न्तीत्येतस्या°। ५ ख. ङ. ढ. °न्तीत्येतस्ये°। ६ झ. णायं। ७ च. ज. झ. °णा पि°। ८ ख. ढ. °टयंस्तस्थ।

व्युत्थानादेरुपदिश्यते विज्ञानं च सर्वासूपनिषत्सु विधीयतेऽतो व्युत्थानमपि विधिमर्हतीत्युक्तं तथा चात्रापि व्युत्थानापरपर्यायं पारिव्राज्यं विधेयमित्याह—विज्ञानेति। इतश्च पारिव्राज्यवाक्यमर्थवादो न भवतीत्याह—वेदेति । तदेव साधयति—यथेत्यादिना । पारिव्राज्यस्य विधेयत्वे हेत्वन्तरमाह—फलेति । पुत्रादिफलापेक्षया पारिव्राज्यफलं विभागेनोपदिश्यते । तथा च फलवत्त्वात्पुत्रादिवत्पारिव्राज्यस्य विधेयत्वसिद्धिरित्यर्थः । तदेव विवृणोति—एतमेवेति । प्रकृतमात्मानं स्वं लोकमापाततो विदित्वा तमेव साक्षात्कर्तुमिच्छन्तः प्रव्रजन्तीति वचनात्पुत्रादिसाध्यान्मनुष्यादिलोकादात्मारूयं लोकं पारिव्राज्यस्यैव फलान्तरत्वेन यतः श्रुतिर्विभज्याभिदधाति । अतस्तस्य विधेयत्वमप्यूहमित्यर्थः । फलविभागोपदेशे दृष्टान्तमाह—यथेति । तथा पारिव्राज्येऽपि[1] फलविभागोक्तेर्विधेयतेति दार्ष्टान्तिकमितिशब्दार्थः । पारिव्राज्यस्य स्तुतिपरत्वाभावे हेत्वन्तरमाह—न चेति । यथा वायुर्वै क्षेपिष्ठेत्यादिरर्थवादः प्राप्तार्थो देवतादिस्तुत्यर्थः स्थितो न तथेदं स्तुतिपरे तदवद्योतिशब्दाभावादित्यर्थः । किंच प्राधानस्य दर्शपूर्णमासादेरर्थवादापेक्षावत्पारिव्राज्यमपि तदपेक्षमुपलभ्यते तेन तस्य दर्शादिवद्विधेयत्वं दुर्वारमित्याह—प्रधानवच्चेति । किंच पारिव्राज्यं सकृदेव श्रुतं चेदविवक्षितमन्यस्तुतिपरं स्यान्न चेदं सकृदेव श्रूयते प्रव्रजन्तीत्युपक्रम्य प्रजां न कामयन्ते व्युत्थायाथ भिक्षाचर्यं चरन्तीत्यभ्यासादतोऽपि न स्तुतिमात्रमेतदित्याह—सकृदिति । न चेत्रापि संभवति कथं तर्हि पारिव्राज्यस्य स्तुतिपरत्वप्रतीतिस्तत्राऽऽह—तस्मादिति ।

न चानुष्ठेयेन पारिव्राज्येन स्तुतिरुपपद्यते । यदि पारिव्राज्यमनुष्ठेयमपि सदन्यस्तुत्यर्थं स्याद्दर्शपूर्णमासादीनामप्यनुष्ठेयानां स्तुत्यर्थता स्यात् । न चान्यत्र, कर्तव्यतैतस्माद्विषयान्निर्ज्ञाता यत इह स्तुत्यर्थो भवेत् । यदि पुनः क्वचिद्विधिः परिकल्प्येत पारिव्राज्यस्य स इहैव मुख्यो नान्यत्र संभवति । यदप्यनधिकृतविषये पारिव्राज्यं परिकल्प्यते तत्र वृक्षाद्यारोहणाद्यपि पारिव्राज्यवत्कल्प्येत कर्तव्यत्वेनानिर्ज्ञातत्वाविशेषात् । तस्मात्स्तुतित्वगन्धोऽप्यत्र न शक्यः कल्पयितुम् ।

अस्तु तर्हि विधेयमपि पारिव्राज्यं स्तावकमपीति चेन्नेत्याह—न चेति । विपक्षे दोषमाह—यदीति । अथ पारिव्राज्यं यज्ञादिवदन्यत्र विधीयतामिहैं तु स्तुतिरेवेत्याशङ्क्याऽऽह—न चान्यत्रेति । आत्मज्ञानाधिकारादन्यत्र पारिव्राज्यविध्यनुपलम्भादित्यर्थः । अन्यत्र विध्यनुपलम्भं समर्थयते—यदीत्यादिना । अन्यत्रेति क्रियायामिति यावत् । कर्माधिकारे तत्त्यागविधेर्विरुद्धत्वादिति भावः ।

---

१ घ. ण. स्पष्टयति । २ ख. ढ. °पि यथोक्तफ° । ३ क. ख. ढ. °ह स्तु° ।

भवतीह पारिव्राज्ये विधिस्तथाऽपि सर्वकर्मानधिकृतविषयः स्यादित्याशङ्क्याऽऽह—यदपीति। तत्र कर्मानधिकृते पुंसीत्येतत्। तत्र हेतुमाह—कर्तव्यत्वेनेति। कर्मानधिकृतेन कर्तव्यतया ज्ञातत्वं वृक्षारोहणादाविव पारिव्राज्ये नास्ति तथा चानधिकृतविषये पारिव्राज्यं कल्प्यते चेत्तस्मिन्विषये वृक्षारोहणाद्यपि कल्प्येताविशेषादित्यर्थः। पारिव्राज्यस्याधिकृतविषयत्वे विधेयत्वे च सिद्धे फलितमाह—तस्मादिति।

यद्ययमात्मा लोक इष्यते किमर्थं तत्प्राप्तिसाधनत्वे कर्माण्येव नाऽऽरभेरन्निति पारिव्राज्येनेति। अत्रोच्यते—अस्याऽऽत्मलोकस्य कर्मभिरसंबन्धात्। यमात्मानमिच्छन्तः प्रव्रजेयुः स आत्मा साधनत्वेन फलत्वेन चोत्पाद्यत्वादिप्रकाराणामन्यतमत्वेनापि कर्मभिर्न संबध्यते। तस्मात्स एष नेति नेत्यात्माऽगृह्यो न हि गृह्यत इत्यादिलक्षणः। यस्मादेवंलक्षण आत्मा कर्मफलसाधनासंबन्धी सर्वसंसारधर्मविलक्षणोऽशनायाद्यतीतोऽस्थूलादिधर्मवानजोऽजरोऽमरोऽमृतोऽभयः सैन्धवघनवद्विज्ञानैकरसस्वभावः स्वयंज्योतिरेक एवाद्वयोऽपूर्वोऽनपरोऽनन्तरोऽबाह्य इत्येतदागमतस्तकतश्च स्थापितं विशेषतश्चेह जनकयाज्ञवल्क्यसंवादेऽस्तस्मादेवंलक्षण आत्मनि विदित आत्मत्वेन नैव कर्मारम्भ उपपद्यते। तस्मादात्मविषयः शेषः। न हि चक्षुष्मान्पार्थिवे प्रवृत्तोऽहनि कूपे कण्टके वा पतति। अतस्तस्य च कर्मफलस्य विद्याफलेऽन्तर्भावात्। न चायत्नसाध्ये वस्तुनि विद्वायत्नमाचरति।

"अङ्के चेन्मणिं विन्देत किमर्थं पर्वतं व्रजेत्।
इष्टस्यार्थस्य संप्राप्तौ को विद्वान्यत्नमाचरेत्॥"
"सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते"।

इति गीतासु। इहापि चैतस्यैव परमानन्दस्य ब्रह्मादीन्यन्यान्यानि भूतानि मात्रामुपजीवन्तीत्युक्तम्। अतो ब्रह्मविदां न कर्मारम्भः।

सार्थवादं पारिव्राज्यं व्याख्याय स एष इत्यादि व्याकर्तुं शङ्कते—यदीति। परिहरति—अत्रेति। तदर्थिनो नाऽऽरभन्ते कर्माणीति शेषः। कर्मभिरसंबन्धमात्मलोकस्य साधयति—यमात्मानमिति। तस्य कर्मसंबन्धे निष्पन्नत्वं फलतीत्याह—तस्मादिति। आत्मनो निष्पन्नत्वेऽपि कथं तदर्थिनां पारिव्रा-

१ ग. च. छ. ज. ढ. ते। न। २ ख. ग. घ. स्यैक°। ३ ङ. ग. च. छ. झ. ढ. अर्के। ख. अक्के।

ज्यसिद्धिरित्याशङ्क्याऽऽह—यस्मादिति । निर्विशेषस्तत्र तत्र वाक्ये दर्शित-स्वरूपोऽयमात्मेत्येतदागमोपपत्तिभ्यां यथा पूर्वत्र स्थापितं तथैवात्रापि ब्राह्मणद्वये विशेषतो यस्मान्निर्धारितं तस्मादस्मिन्नात्मन्यापाततो ज्ञाते कर्मानुष्ठानमपेक्षितसिद्धि-रिति योजना । उक्तात्मविषयविवेकविज्ञानवतो न कर्मानुष्ठानमित्यत्र दृष्टान्तमाह—न हीति । ब्रह्मज्ञानफले सर्वकर्मफलान्तर्भावाच्च तदर्थिनो मुमुक्षोर्न कर्तव्यं कर्मे-त्याह—कृत्स्नस्येति । तथाऽपि विचित्रफलानि कर्माणीति विवेकी कुतूहलवशा-दनुष्ठास्यतीत्याशङ्क्याऽऽह—न चेति । तत्र लौकिकं न्यायं दर्शयति—अङ्के चेदिति । पुरोदेशे मधु लभेत चेदिति यावत् । ज्ञानफले कर्मफलान्तर्भावे मान-माह—सर्वमिति । अखिलं समग्राङ्गोपेतमित्यर्थः । तत्रैव श्रुतिं संवादयति—इहापीति । निषेधवाक्यतात्पर्यमुपसंहरति—अत इति ।

यस्मात्सर्वैषणाविनिवृत्तः स एव नेति नेत्यात्मानमात्मत्वेनोपगम्य तद्रूपेणैव वर्तते तस्मादेतमेवंविदं नेति नेत्यात्मभूतमु हैवैते वक्ष्यमाणे न तरतो न प्राप्नुत इति युक्तमेवेति वाक्यशेषः । के ते इत्युच्यते—अतोऽ-स्मान्निमित्ताच्छरीरधारणादिहेतोः पापमपुण्यं कर्माकरवं कृतवानस्मि कष्टं खलु मयँ वृत्तमनेन पापेन कर्मणाऽहं नरकं प्रतिपत्स्य इति योऽयं पश्चात्तापं कर्म कृतवतः परितापः स एनं नेति नेत्यात्मभूतं न तरति । तथाऽतः कल्याणं फलविषयकामान्निमित्तायज्ञदानादिलक्षणं पुण्यं शोभनं कर्म कृतवानस्मि । अतोऽहमस्य फलं सुखमुपभोक्ष्ये देहान्तर इत्येषोऽपि हर्षस्तं न तरति । उभे उ हैवैष ब्रह्मविदेते कर्मणी तरति पुण्यपापलक्षणे ।

एतमित्यादि वाक्यं योजयति—यस्मादिति । उ हेति निपाताभ्यां सूचितोऽर्थो यस्मादित्यनुभाषितः । इतिशब्दस्यापेक्षितं पूरयति—युक्तमिति । आकाङ्क्षा-पूर्वकमुत्तरवाक्यमवतार्य व्याकरोति—के ते इत्यादिना । यथोक्तात्मविदस्तापह-र्षासंस्पर्शे हेतुमाह—उभे हीति ।

एवं ब्रह्मविदः संन्यासिन उभे अपि कर्मणी क्षीयेते पूर्वजन्मनि कृते ये ते इह जन्मनि कृते ये ते चापूर्वे च नाऽऽरभ्येते । किंच नैनं कृताकृते कृतं नित्यानुष्ठानमकृतं तस्यैवाक्रिया ते अपि कृताकृते एनं न तपतः । अनात्मज्ञं हि कृतं फलदानेनाकृतं प्रत्यवायोत्पादनेन तपतः। अयं तु ब्रह्मविदात्मविद्याग्निना सर्वाणि कर्माणि भस्मी करोति

१ घ. ण. पूर्वं । २ ख. ढ. °ज्ञि° । ३ क. ख. ढ. ण. अर्के । ख. ञ. अक्वे । ४ ख. ग. ङ. छ. °म संधु° । ५ ख. °श्चात्तापः क° । ६ ख. च. एतं । ७ क. ख. घ. ञ. ट. °ति । इति यु° । ८ ख. ग. °रभेते ।

" यथेधांसि समिद्धोऽग्निः " इत्यादिस्मृतेः । शरीरारम्भकयोस्तूपभोगेनैव क्षयः । अतो ब्रह्मविदकर्मसंबन्धी ॥ २२ ॥

पुण्यपापे तरतीत्युक्ते पृथगवस्थानं तयोः शङ्क्येत तन्निरस्यति—एवमेवेति निषेधवाक्योक्तक्रमेणेति यावत् । इतश्चाऽऽत्मविदो धर्मादिसंबन्धो नास्तीत्याह—किंचेति । तदेवानन्तरवाक्यव्याख्यानेन स्फोरयति—नैनमिति । तयोस्तर्हि कुत्र तापकत्वं तदाह—अनात्मज्ञं होति । पुरुषत्वाद्ब्रह्मविदुष्यपि कृताकृतयोस्तापकत्वं स्यादित्याशङ्क्याऽऽह—अयं त्विति । अत्र भगवद्वाक्यं प्रमाणयति—यथेति । यद्यपि पूर्वोत्तरयोर्धर्माधर्मयोरनारब्धयोरात्मविद्यावशादिनांशाश्लेषौ तथाऽपि प्रारब्धयोरस्ति तयोस्तापकत्वमित्याशङ्क्याऽऽह—शरीरेति । प्रकृतं विद्याफलमुपसंहरति—अत इति । कर्मकार्यासंबन्धादिति यावत् ॥ २२ ॥

तदेतदृचाऽभ्युक्तम् । एष नित्यो महिमा ब्राह्मणस्य
न वर्धते कर्मणा नो कनीयान् । तस्यैव स्यात्पद-
वित्तं विदित्वा न लिप्यते कर्मणा पापकेनेति ।
तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः समा-
हितो भूत्वाऽऽत्मन्येवाऽऽत्मानं पश्यति सर्वमात्मानं
पश्यति नैनं पाप्मा तरति सर्वं पाप्मानं तरति नैनं
पाप्मा तपति सर्वं पाप्मानं तपति विपापो विरजोऽ-
विचिकित्सो ब्राह्मणो भवत्येष ब्रह्मलोकः सम्राडेनं
प्रापितोऽसीति होवाच याज्ञवल्क्यः सोऽहं भगवते
विदेहान्ददामि मां चापि सह दास्यायेति ॥ २३ ॥

तदेतदृस्तु ब्राह्मणेनोक्तमृचा मन्त्रेणाभ्युक्तं प्रकाशितम् । एष नेति नेत्यादिलक्षणो नित्यो महिमा । अन्ये तु महिमानः कर्मकृता इत्यनित्याः । अयं तु तद्विलक्षणो महिमा स्वाभाविकत्वान्नित्यो ब्रह्मविदो ब्राह्मणस्य त्यक्तसर्वैषणस्य । कुतोऽस्य नित्यत्वमिति हेतुमाह—

---

१ घ. ञ. तत्र । २ ढ. ण °नाशस्तथा° । ३ क. ख. ग. ङ. छ. ज. ट. ठ. ड. ढ. °रादिति । ४ क. ग. छ. ज. तु नेति नेत्यादिल° ।

कर्मणा न वर्धते शुभलक्षणेन कृतेन वृद्धिलक्षणां विक्रियां न प्राप्नोति अशुभेन कर्मणा नो कणीयान्नाप्यपक्षयलक्षणां विक्रियां प्राप्नोति। उपचयापचयहेतुभूता एव हि सर्वा विक्रिया इत्येताभ्यां प्रतिषिध्यन्ते। अतोऽविक्रियत्वान्नित्य एष महिमा। तस्मात्तस्यैव महिम्नः स्याद्वेत्पदवित्पदस्य वेत्ता पद्यते गम्यते ज्ञायतं इति महिम्नः स्वरूपमेवं पदं तस्यं पदस्य वेदिता। किं तत्पदवेदनेन स्यादित्युच्यते—तं विदित्वा महिमानं न लिप्यते न संबध्यते कर्मणा पापकेन धर्माधर्मलक्षणेनोभयमपि पापकमेव विदुषः।

उक्ते विद्याफले मन्त्रं संवादयति—तदेतादीति। एष नित्यो महिमेत्यत्र नित्यत्वमुपपादयति—अन्ये त्विति। तद्विलक्षणमकर्मकृतत्वम्। अकर्मकृतो महिमा स्वाभाविकत्वान्नित्य इत्यत्राकर्मकृतत्वेन स्वाभाविकत्वमसिद्धमित्याशङ्क्याऽऽह—कुतोऽस्येति। वृद्धिरपक्षयश्चेति विक्रियादयाभावेऽपि विक्रियान्तराणि भविष्यन्तीत्याशङ्क्याऽऽह—उपचयेति। एताभ्यां निषेधाभ्यामिति यावत्। आत्मनः सर्वविक्रियाराहित्ये फलितमाह—अत इति। तस्य नित्यत्वेऽपि किं तदाह—तस्मादिति। अधर्मलक्षणेनेति वक्तव्ये किमिदं धर्माधर्मलक्षणेनेत्युक्तमत आह—उभयमपीति। संसारहेतुत्वाविशेषादित्यर्थः।

यस्मादेवमकर्मसंबन्ध्येष ब्राह्मणस्य महिमा नेति नेत्यादिलक्षणस्तस्मादेवंविच्छान्तो बाह्येन्द्रियव्यापारत उपशान्तस्तथा दान्तोऽन्तःकरणतृष्णातो निवृत्त उपरतः सर्वैषणाविनिर्मुक्तः संन्यासी तितिक्षुर्द्वंद्वसहिष्णुः समाहित इन्द्रियान्तःकरणचलनरूपाद्व्यावृत्त्यैकाग्र्यरूपेण समाहितो भूत्वा। तदेतदुक्तं पुरस्ताद्बाल्यं च पाण्डित्यं च निर्विद्येति। आत्मन्येव[1] स्वे कार्यकरणसंघात आत्मानं प्रत्यक्चेतयितारं पश्यति। तत्र किं तावन्मात्रं परिच्छिन्नं नेत्युच्यते—सर्वं समस्तमात्मानमेव पश्यति नान्यदात्मव्यतिरिक्तं वालाग्रमात्रमप्यस्तीत्येवं[2] पश्यति[3]। मननान्मुनिर्भवति जाग्रत्स्वप्नसुषुप्ताख्यं[5] स्थानत्रयं हित्वा। एवं पश्यन्तं ब्राह्मणं नैनं पाप्मा पुण्यपापलक्षणस्तरति न प्राप्नोति। अयं तु ब्रह्मवित्सर्वं पाप्मानं तरत्यात्मभावेनैव व्याप्नोत्यतिक्रामति। नैनं पाप्मा कृताकृतलक्षणस्तपतीष्टफलप्रत्यवायोत्पादनाभ्याम्। सर्वं पाप्मानमयं

१ ख. घ. च. °स्य बै°। २ क. ख. म. ङ. च. छ. ज. ढ. °काग्रमू°। ३ ख. झ. °वं म°। ४ च. ढ. °ति। एवं म°। ५ घ. ज. °ख्यं भावत्र°। ६ क. ग. घ. ङ. छ. ज. झ. ढ. °ति। नचैतं।

तपति ब्रह्मवित्सर्वात्मदर्शनवह्निना भस्मी करोति। स एष एवंविद्विधूतपापो विगतधर्माधर्मो विरजो विगतरजो रजः कामो विगतकामोऽविचिकित्साच्छिन्नसंशयोऽहमस्मि सर्वात्मा परं ब्रह्मेति निश्चितमतिर्ब्राह्मणो भवति।

तस्मादित्यादिवाक्यं व्याचष्टे—यस्मादिति। एवंविदात्मा कर्मतत्फलसंबन्धशून्य इत्यापततो जानन्नित्यर्थः। विशेषणाभ्यामुत्सर्गतो विहितस्योभयविधकरणव्यापारोपरमस्य यावज्जीवादिश्रुतिविहितं कर्मापवादस्तस्माद्विरक्तस्यापि न नित्यादित्यागः। 'उत्सर्गस्यापवादेन बाधः कस्य न संमतः' इत्यादिन्यायादित्याशङ्क्याऽऽह—उपस्त इति। जीवनावच्छेदव्यतिरिक्तशीतादिसहिष्णुत्वं तितिक्षुत्वम्। यत्र कर्तुः स्वातन्त्र्यं तेषां कर्मणां निवृत्तिः शमादिपदैरुक्ता। यत्र तु सम्यग्धीविरोधिनि निद्रालस्यादौ पुंसो न स्वातन्त्र्यं तन्निवृत्तिः समाधानम्। समाहितो भूत्वा पश्यतीति संबन्धः। पश्यतीति वर्तमानापदेशात्कथं विशेषणेषु संक्रामितो विधिरित्याशङ्क्याऽऽह—तदेतदिति। यथोक्तैः साधनैरुदितायां विद्यायां किं स्यादित्याशङ्क्याऽऽह—एवमिति। तस्य पुण्यपापासंबन्धे हेतुमाह—अयं त्विति। इतश्च विदुषो न कर्मसंबन्धोऽस्तीत्याह—नैनमिति। किमिति पाप्मा बलविदं न तपतीत्याशङ्क्याऽऽह—सर्वमिति।

अयं त्वेवंभूत एतस्यामवस्थायां मुख्यो ब्राह्मणः प्रागेतस्माद्ब्रह्मस्वरूपाभ्यानाद्गौणमस्य ब्राह्मण्यम्। एष ब्रह्मलोको ब्रह्मैव लोको ब्रह्मलोको मुख्यो निरुपचरितः सर्वात्मभावलक्षणो हे सम्राट्। एवं ब्रह्मलोकं परिप्राप्तोऽस्यभय नेति नेत्यादिलक्षणमिति होवाच याज्ञवल्क्यः।

कथं ब्राह्मणो भवतीत्यपूर्ववदुक्तेन प्रागपि ब्राह्मण्यस्य तत्त्वादित्याशङ्क्याऽऽह—अयं त्विति। मुख्यत्वमबाधितत्वम्। सफलां विद्यां मन्त्रब्राह्मणाभ्यामुपदिश्योपसंहरति—एष इति। तत्र कर्मधारयसमासं सूचयति—ब्रह्मैवेति। तथाविधसमासपरिग्रहे प्रकरणमनुग्राहकमभिप्रेत्याह—मुख्य इति। तथाऽपि किं मम सिद्धमित्यत आह—एनामिति।

एवं ब्रह्मभूतो जनको याज्ञवल्क्येन ब्रह्मभावमापादितः प्रत्याह—सोऽहं त्वया ब्रह्मभावमापादितः सन्भगवते तुभ्यं विदेहान्देशान्सम राज्यं समस्तं ददामि मां च सह विदेहैर्दास्याय दासकर्मणे ददामीति चशब्दात्संबध्यते। परिसमापिता ब्रह्मविद्या सह संन्यासेन साङ्गा

---

१ घ ङ कर्मकर्त.। २ ञ. ढ. °ह। न चैन°। ३ ग. घ. एवं। ४ घ. एवमि°।

सेतिकर्तव्यताका । परिसमाप्तः परपुरुषार्थः । एतावत्पुरुषेण कर्तव्यमेषा निष्ठैषा परा गतिरेतन्निःश्रेयसमेतत्प्राप्य कृतकृत्यो ब्राह्मणो भवत्येतत्सर्ववेदानुशासनमिति ॥ २३ ॥

आत्मीयं विद्यालाभं श्रोतवितुं राज्ञो वचनमित्याह—एवमिति । इति वक्ष्यमाणे कथमित्थं राज्ञो वचनमित्याशङ्क्याऽऽह—परिसमापितेति । तथाऽपि परमपुरुषार्थस्य वक्तव्यत्वमित्याशङ्क्याऽऽह—परिसमाप्त इति । कर्तव्यान्तरं वक्तव्यमस्तीत्याशङ्क्याऽऽह—एतावदिति । तथाऽपि यत्र निष्ठा कर्तव्या तद्ब्रह्मेत्याशङ्क्याऽऽह—एषेति । तथाऽपि परमा निष्ठाऽन्याऽस्तीति चेन्नेत्याह—एषेति । निश्चितं श्रेयोऽन्यदस्तीत्याशङ्क्याऽऽह—एतदिति । तथाऽपि कृतकृत्यतया मुख्यब्राह्मण्यसिद्ध्यर्थं वक्तव्यान्तरमस्तीत्याशङ्क्याऽऽह—एतत्प्राप्येति किमस्यां प्रतिज्ञापरम्परायां नियामकमित्याशङ्क्याऽऽह—एतदिति । निरुपाधिकब्रह्मज्ञानात्कैवल्यमिति गमयितुमितिशब्दः ॥ २३ ॥

स वा एष महानज आत्माऽन्नादो वसुदानो
विन्दते वसु य एवं वेद ॥ २४ ॥

योऽयं जनकयाज्ञवल्क्याख्यायिकायां व्याख्यात आत्मा स वा एष महानज आत्माऽन्नादः सर्वभूतस्थः सर्वान्नानामत्ता वसुदानो वसु धनं सर्वप्राणिकर्मफलं तस्य दाता प्राणिनां यथाकर्म फलेन योजयितेत्यर्थः । तमेतमजमन्नादं वसुदानमात्मानमन्नादवसुदानगुणाभ्यां युक्तं यो वेद स सर्वभूतेष्वात्मभूतोऽन्नमत्ति विन्दते च वसु सर्वं कर्मफलजातं लभते सर्वात्मत्वादेव य एवं यथोक्तं वेद । अथवा दृष्टफलार्थिभिरप्येवंगुण उपास्यः । तेनान्नादो वसोश्च लब्धा दृष्टेनैव फलेनान्नाद्यत्वेन गोश्वादिना चास्य योगो भवतीत्यर्थः ॥ २४ ॥

संप्रति स्वोपाधिकब्रह्मज्ञानादभ्युदयं दर्शयति—योऽयमित्यादिना । ईश्वरेत्यादिभ्यः कर्मफलं ददाति तर्हि तस्य वैषम्यनैर्घृण्ये स्यातामित्याशङ्क्याऽऽह—प्राणिनामिति । उपास्यस्वरूपं दर्शयित्वा तदुपासनं तत्फलं दर्शयति—तमेतमिति । सर्वात्मत्वफलमुपासनमुक्त्वा पक्षान्तरमाह—अथवेति । दृष्टं फलमन्नाद्यत्वं वसुलाभश्च । उक्तगुणकमीश्वरं ध्यायतः फलमाह—तेनेति । तदेव फलं स्पष्टयति—दृष्टेनेति । अन्नाद्यत्वं दीप्ताग्नित्वम् ॥ २४ ॥

स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽ-

---

१ च. °दानः स यो मैवमेतं महान्तमजमात्मानमन्नादं वसुदानं वेद विन्दते वसु ॥२४॥

अथो ब्रह्माभयं वै ब्रह्माभयꣳ हि वै ब्रह्म
इति य एवं वेद ॥ २५ ॥
इति बृहदारण्यकोपनिषदि चतुर्थाध्यायस्य
चतुर्थं ब्राह्मणम् ॥ ४ ॥

इदानीं समस्तस्यैवाऽऽरण्यकस्य योऽयं उक्तः स समुच्चित्यास्यां कण्डिकायां निर्दिश्यत एतावान्समस्तारण्यकार्थ इति । स वा एष महानज आत्माऽजरो न जीर्यत इति न विपरिणमत इत्यर्थः। अमरो यस्माच्चाजरस्तस्मादमरो न म्रियत इत्यमरः । यो हि जायते जीर्यते च स विनश्यति म्रियते वा । अयं त्वजत्वादजरत्वाच्चाविनाशी यतोऽत एवामृतः । यस्माज्जनिप्रभृतिभिर्भिन्नैर्भावविकारैर्वर्जितस्तस्मादितरैरपि भावविकारैर्भिन्नैस्तत्कृतैश्च कामकर्ममोहादिभिर्मृत्युरूपैर्वर्जित इत्येतत्। अभयोऽत एव । यस्माच्चैवं पूर्वोक्तविशेषणस्तस्माद्भयवर्जितः भयं च हि नामाविद्याकार्यं तत्कार्यप्रतिषेधेन भावविकारप्रतिषेधेन चाविद्यायाः प्रतिषेधः सिद्धो वेदितव्यः । अभय आत्मैवंगुणविशिष्टः किमसौ ब्रह्म परिवृढं निरतिशयं महदित्यर्थः। अभयं वै ब्रह्म । प्रसिद्धमेतल्लोकेऽभयं ब्रह्मेति । तस्मादुक्तमेवंगुणविशिष्ट आत्मा ब्रह्मेति ।

निरुपाधिकब्रह्मज्ञानान्मुक्तिरुक्ता सोपाधिकब्रह्मध्यानाच्चाभ्युदय उक्तस्तथा च किमुत्तरकण्डिकयेत्याशङ्क्याऽऽह—इदानीमिति । अजत्वाच्चाविनाशीति वक्तुं चशब्दः । कथं जन्मजराभावयोरमरत्वाविनाशित्वसाधकत्वं तदाह—यो हीति । अयं त्वजत्वादविनाश्यजरत्वाच्चाविनाशीति योजना । मरणायोग्यत्वमुपजीव्य मरणकार्याभावं दर्शयति—अत एवेति । जन्मापक्षयविनाशानामेव भावविकाराणामिह मुख्यतो निषेधादिवृद्ध्यादीनि विकारान्तराण्यात्मनि भविष्यन्तीति विशेषनिषेधस्य शेषाभ्यनुज्ञापरत्वादित्याशङ्क्याऽऽह—यस्मादिति । इतरे तत्त्वविवृद्धिविपरिणामाः । अत एवाभय इत्युक्तं विवृणोति—यस्माच्चेति । किं तद्भयं तदाह—भयं चेति अविद्यानिषेधिविशेषणाभावादात्मानं तां तदा स्पृशतीत्याशङ्क्याऽऽह—तत्कार्येति । विशेषणान्तरं प्रश्नपूर्वकमुत्थाप्य व्याक-

---

१ च. ङ. ज. हि जीर्यते जायते च । २ झ. च । ३ क. ङ. छ. °यं हि । ग. च. ज. °यं चावि° । झ. °यं ना° । ४ च. च ना° । ५ क. ख. ङ. छ. झ. ढ. अयमभ° । ६ ख. छ. °इयत एव चाम° ।

रोति—अभय इति । कथं पुनरभयगुणविशिष्टस्याऽऽत्मनो ब्रह्मत्वं तदाह—अभय-मिति । वैशब्दार्थमाह—प्रसिद्धमिति । लोकशब्दः शास्त्रस्याप्युपलक्षणम् ।

य एवं यथोक्तमात्मानमभयं ब्रह्म वेद सोऽभयं हि वै ब्रह्म भवति । एष सर्वस्या उपनिषदः संक्षिप्तोऽर्थ उक्तः । एतस्यैवार्थस्य सम्यक्प्रबोधायोत्पत्तिस्थितिप्रलयादिकल्पना-क्रियाकारकफलाध्यारोपणा चाऽऽत्मन्विहिता तदपोहेन च नेति नेतीत्यध्यारोपितविशेषापनयद्वारेण पुनस्तत्त्वमावेदितम् । यथैकप्रभृत्यापरार्धसंख्यास्वरूपपरिज्ञानाय रेखाध्यारोपणं कृत्वैकेयं रेखा दशेयं शतयं सहस्रेयमिति ग्राहयत्यब्रह्मयति संख्यास्वरूपं केवलं संख्याया रेखात्मत्वमेव यथा चाकारादीन्यक्षराणि विजिग्राहयिषुः पत्रमषीरेखादिसंयोगोपायमास्थाय वर्णानां सत्तत्त्वमावेदयति न पत्रमष्यादयात्मतामक्षराणां ग्राहयति तथा चेहोत्पत्त्याद्यनेकोपायमास्थायैकं ब्रह्मतत्त्वमावेदितम् । पुनस्तत्कल्पितोपायजानतविशेषपरिशोधनार्थं नेति नेतीति तत्त्वोपसंहारः कृतः । तदुपसंहृतं पुनः परिशुद्धं केवलमेव सफलं ज्ञानमन्तेऽस्यां कण्डिकायामिति ॥ २५ ॥

इति श्रीमद्बृहदारण्यकोपनिषद्भाष्ये चतुर्थाध्यायस्य चतुर्थं ब्राह्मणम् ॥ ४ ॥

वेद्यस्वरूपमुक्त्वा विद्याफलं कथयति—य एवमिति । कण्डिकार्थमुपसंहरति—एष इति । सृष्ट्यादेरपि तदर्थत्वात्किमित्यसाविह नोपसंह्रियते तत्राऽऽह—एतस्येति । सृष्ट्यादेरारोपितत्वे गमकमाह—तदपोहेनेति । तच्छब्दः सृष्ट्यादिप्रपञ्चविषयः । तदपोहेनेति यदुक्तं तदेव स्फुटयति—नेतीति । अध्यारोपापवादन्यायेन तत्त्वस्याऽऽवेदितत्वाद्वारोपितं भवत्येव सृष्ट्यादिद्वैतमित्यर्थः । अध्यारोपापवादन्यायस्य पङ्कप्रक्षालनन्यायविरुद्धत्वात्तत्रेयं विवक्षितं चेत्तदेवोच्यतां कृतं सृष्ट्यादिदितारोपेणेत्याशङ्क्याऽऽह—यथेति । उदाहरणान्तरमाह—यथा चेति । दृष्टान्तद्वयमनूद्य दार्ष्टान्तिकमाचष्टे—तथा चेति । इहेति मोक्षशास्त्रोक्तिः । तथाऽपि कल्पितप्रपञ्चसंबन्धयुक्तं सविशेषत्वं ब्रह्मणः स्यादित्याशङ्क्याऽऽह—पुनरिति । तस्मिन्नात्मनि कल्पितः सृष्ट्यादिरुपायस्तेन जनितो विशेषस्तस्मिन्कारणत्वादिस्तस्य निरासार्थमिति यावत् । तर्हि द्वैताभावविशिष्टं तत्त्वमिति चेन्नेत्याह—

---

१ च. ढ. °पलक्षणं । २ ख. झ. °त्मकत्व° । ३ ग. घ. च. ज. झ. ढ. °था वाऽका° ४ घ. ज. °नां त° । ५ ङ. सत्त्व° । ६ झ. °पाविज° । ७ झ. तत्रोप । ८ ख. °बलज्ञानं सुफलम° । च. झ. °मभिहिमन्तेऽ° । १० घ. ढ. वेति ।

तदुपसंहृतमिति । परिशुद्धं भाववदभावेनापि न संस्पृष्टमित्यर्थः । केवलमित्य-द्वितीयोक्तेः । सृष्ट्यादिवचनस्य गतिमुक्त्वा प्रकृतमुपसंहरति—सफलमिति । इतिशब्दः संग्रहसमाप्त्यर्थो ब्राह्मणसमाप्त्यर्थो वा ॥ २५ ॥

इति बृहदारण्यकोपनिषद्भाष्यटीकायां चतुर्थाध्यायस्य
चतुर्थं शारीरकब्राह्मणम् ॥ ४ ॥

(अथ चतुर्थाध्यायस्य पञ्चमं ब्राह्मणम्) ।

आगमप्रधानेन मधुकाण्डेन ब्रह्मतत्त्वं निर्धारितम् । पुनस्तस्यैवोपपत्तिप्रधानेन याज्ञवल्कीयेन काण्डेन पक्षप्रतिपक्षपरिग्रहं कृत्वा विगृह्य वादेन विचारितम् । शिष्याचार्यसंबन्धेन च षष्ठे प्रश्नप्रतिवचनन्यायेन सविस्तरं विचार्योपसंहृतम् । अथेदानीं निगमस्थानीयं मैत्रेयीब्राह्मणमारभ्यते । अयं च न्यायो वाक्यकोविदैः परिगृहीतो हेत्वपदेशात्प्रतिज्ञायाः पुनर्वचनं निगमनमिति । अथवाऽऽगमप्रधानेन मधुकाण्डेन यदमृतत्वसाधनं ससंन्यासमात्मज्ञानमभिहितं तदेव तर्केणाप्यमृतत्वसाधनं ससंन्यासमात्मज्ञानमधिगम्यते । तर्कप्रधानं हि याज्ञवल्कीयं काण्डम् । तस्माच्छास्त्रतर्काभ्यां निश्चितमेतद्यदेतदात्मज्ञानं ससंन्यासममृतत्वसाधनमिति । तस्माच्छास्त्रश्रद्धावद्भिरमृतत्वप्राप्तिमेतैस्तैरभिरेतत्प्रतिपत्तव्यमिति । आगमोपपत्तिभ्यां हि निश्चितोऽर्थः श्रद्धेयो भवत्यव्यभिचारादिति । अक्षराणां तु चतुर्थे यथा व्याख्यातोऽर्थस्तथा प्रतिपत्तव्योऽत्रापि । यान्यक्षराण्यव्याख्यातानि तानि व्याख्यास्यामः ।

तमाहे शारीरकब्राह्मणे वंशब्राह्मणं व्याख्यातव्यं कृतं गतार्थेन मैत्रेयीब्राह्मणेनेत्याशङ्क्य मधुकाण्डार्थमनुवदति—आगमेति । पाञ्चभिक धर्मनुभावते—पुनरिति । तस्यैव ब्रह्मणस्तत्त्वमिति शेषः । विगृह्यवादो जल्पराजपथवानो जल्पन्यायः । षष्ठे प्रतिष्ठाप्रतिपादनमनुवदति—शिष्येति । प्रश्नप्रतिवचनन्यायस्तत्त्वनिर्णयप्रधानो वादः । उपसंहृतं तदेव तत्त्वमिति शेषः । संप्रत्युत्तरब्राह्मणस्यागमार्थत्वमाह—अथेति । आगमोपपत्तिभ्यां तत्त्वे निगमनमार्किंचित्करमित्याशङ्क्याऽऽ-

---

१ घ. ण. °संसृष्ट° । २ घ. ङ. ञ. °न निर्धारि° । ३ क, म. ङ. छ. झ. ट. °ति । वाक्याक्ष° । ४ घ. ण. °ङेन प्र° ।

ह-अयं चेति । प्रकारान्तरेण संगतिमाह-अथवेति । कथमिह तर्केणाधिगतिस्तत्राऽऽह-तर्केति । मुनिकाण्डस्य तर्कप्रधानत्वे किं स्यात्तदाह-तस्मादिति । इति फलतीति शेषः । शास्त्रादिना यथोक्तस्य ज्ञानस्य निश्चितत्वेऽपि किं सिध्यति तदाह-तस्माच्छास्त्रश्रद्धावद्भिरिति । एतच्छब्दो यथोक्तज्ञानपरामर्शार्थः । इति सिध्यतीति शेषः । तत्र हेतुमाह-आगमेति । अव्यभिचारान्मानयुक्तिगम्यस्यार्थस्य तथैव सत्त्वादिति यावत् । इतिशब्दो ब्राह्मणसंगतिसमाप्त्यर्थः । तात्पर्यार्थं व्याख्याते सत्यक्षरव्याख्यानमसङ्गावाह-अक्षराणां त्विति । तर्हि ब्राह्मणेऽस्मिन्वक्तव्यामावात्परिसमाप्तिरेवेत्याशङ्क्याऽऽह-यानीति ।

> अथ ह याज्ञवल्क्यस्य द्वे भार्ये बभूवतुर्मैत्रेयी च कात्यायनी च तयोर्ह मैत्रेयी ब्रह्मवादिनी बभूव स्त्रीप्रज्ञैव तर्हि कात्यायन्यथ ह याज्ञवल्क्योऽन्यदुत्तमुपाकरिष्यन् ॥ १ ॥

अथेति हेतूपदेशानन्तर्यप्रदर्शनार्थः । हेतुप्रधानानि हि वाक्यान्यतीतानि तदनन्तरमागमप्रधानेन प्रतिज्ञातोऽर्थो निगम्यते मैत्रेयीब्राह्मणेन । हशब्दो वृत्तावद्योतकः । याज्ञवल्क्यस्यर्षेः किल द्वे भार्ये पत्न्यौ बभूवतुरास्तां मैत्रेयी च नामत एकाऽपरा कात्यायनी नामतः । तयोर्भार्ययोर्मैत्रेयी ह किल ब्रह्मवादिनी ब्रह्मवदनशीला बभूवाऽऽसीत् स्त्रीप्रज्ञा स्त्रिया योचिता सा स्त्रीप्रज्ञा सैव यस्याः प्रज्ञा गृहप्रयोजनान्वेषणालक्षणा सा स्त्रीप्रज्ञैव तर्हि तस्मिन्काल आसीत्कात्यायनी । अथैवं सति ह किल याज्ञवल्क्योऽन्यत्पूर्वस्मादगार्हस्थ्यलक्षणाद्वृत्तात्पारिव्राज्यलक्षणं वृत्तमुपाकरिष्यन्नुपाचिकीर्षुः सन् ॥ १ ॥

ननु वाक्यानि पूर्वत्र व्याख्यातानि न हेतुरुपादिष्टस्तत्कथं तदुपदेशानन्तर्यं संन्यासस्यामृतत्वहेतोरात्मज्ञानस्याथशब्देन द्योत्यते तत्राऽऽह-हेतुप्रधानानीति । तदेव वृत्तं व्यनक्ति-याज्ञवल्क्यस्येति । अथेत्यस्यार्थमाह-एवं सतीति । भार्याद्वये दर्शितरीत्या स्थिते स्वस्य च वैराग्यातिरेके सतीति यावत् ॥ १ ॥

मैत्रेयीति होवाच याज्ञवल्क्यः प्रव्रजिष्यन्वा

---

१ घ. ञ. ण. दर्शिते । २ क. ग. ङ. च. छ ज. ट. देत्वप° । ३ घ. ज. °त्तार्थयो° । ४ घ. त्तार्थाव° । ४ घ. ण. °र्वव्याख्या° । ५ ध. ञ. ण. तदप° । ६ घ. ण. तस्य । ७ घ. ञ. ण. °तात्पर्यः ।

अरेऽहमस्मात्स्थानादस्मि हन्त तेऽनया कात्या-
यन्याऽन्तं करवाणीति ॥ २ ॥

हे मैत्रेयीति ज्येष्ठां भार्यामामन्त्रयामास । आमन्त्र्य चोवाच ह प्रव्र-जिष्यन्पारिव्राज्यं करिष्यन्वा अरे मैत्रेय्यस्मात्स्थानाद्गार्हस्थ्यादहमस्मि भवामि । मैत्रेय्यनुजानीहि मां हन्तेच्छामि यदि तेऽनया कात्यायन्या-ऽन्तं करवाणीत्यादि व्याख्यातम् ॥ २ ॥

तस्या ब्रह्मवादित्वं तदामन्त्रणद्वारेण तां प्रत्येव संवादे हेतुकर्तव्यम् । तस्या ब्रह्मवादित्वं द्योतयितुमिच्छसि यदीत्युक्तम् ॥ २ ॥

सा होवाच मैत्रेयी यन्नु म इयं भगोः सर्वा
पृथिवी वित्तेन पूर्णा स्यात्स्यां न्वहं तेना-
मृताऽऽहो३ नेति नेति होवाच याज्ञवल्क्यो
यथैवोपकरणवतां जीवितं तथैव ते जीवि-
तꣳ स्यादमृतत्वस्य तु नाऽऽशाऽस्ति वित्ते-
नेति ॥ ३ ॥

सा होवाच मैत्रेयी येनाहं नामृता स्यां किमहं तेन कुर्यां
यदेव भगवान्वेद तदेव मे[4] ब्रूहीति ॥ ४ ॥

सैवमुक्तोवाच मैत्रेयी सर्वेयं पृथिवी वित्तेन पूर्णा स्यान्नु किं स्यां किमहं वित्तसाध्येन कर्मणाऽमृताऽऽहो न स्यामिति । नेति होवाच याज्ञवल्क्य इत्यादि समानमन्यत् ॥ ३ ॥ ४ ॥

मैत्रेयी स्वमृतत्वमात्रार्थितामात्मनो दर्शयति-सैवमिति ॥ ३ ॥ ४ ॥

स होवाच याज्ञवल्क्यः प्रिया वै खलु नो भवती
सती प्रियमवृधद्धन्त तर्हि भवत्येतद्व्याख्यास्यामि
ते व्याचक्षाणस्य तु मे निदिध्यासस्वेति ॥ ५ ॥

---

१ घ. ञ. ण. तस्यां । २ ख. °गवन्वे° । ३ क. ख. ग. घ. ङ. छ. ज. ट. ठ. न्वेत्थ त° । ४ क. ख. घ. ढ. मे विब्रू° ।

स होवाच प्रियैव पूर्वं खलु नोऽस्मभ्यं भवती भवन्ती सती प्रियमेवामृषद्वार्धितवती निर्धारितवत्यसि । अतस्तुष्टो हं हन्तेच्छासि चेदमृतत्वसाधनं ज्ञातुं हे भवति ते तुभ्यं तदमृतत्वसाधनं व्याख्यास्यामि ॥ ५ ॥

गुरुप्रसादाधीना विद्यावाप्तिरिति बोधयितुमाह—स होवाचेति । ज्ञानेच्छोर्दुर्लभत्वाद्बोधनाय चेदित्युक्तम् ॥ ५ ॥

स होवाच न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति । न वा अरे जायायै कामाय जाया प्रिया भवत्यात्मनस्तु कामाय जाया प्रिया भवति । न वा अरे पुत्राणां कामाय पुत्राः प्रिया भवन्त्यात्मनस्तु कामाय पुत्राः प्रिया भवन्ति । न वा अरे वित्तस्य कामाय वित्तं प्रियं भवत्यात्मनस्तु कामाय वित्तं प्रियं भवति । न वा अरे पशूनां कामाय पशवः प्रिया भवन्त्यात्मनस्तु कामाय पशवः प्रिया भवन्ति । न वा अरे ब्रह्मणः कामाय ब्रह्म प्रियं भवत्यात्मनस्तु कामाय ब्रह्म प्रियं भवति । न वा अरे क्षत्रस्य कामाय क्षत्रं प्रियं भवत्यात्मनस्तु कामाय क्षत्रं प्रियं भवति । न वा अरे लोकानां कामाय लोकाः प्रिया भवन्त्यात्मनस्तु कामाय लोकाः प्रिया भवन्ति । न वा अरे देवानां कामाय देवाः प्रिया भवन्त्यात्मनस्तु कामाय देवाः प्रिया भवन्ति । न वा अरे वेदानां कामाय वेदाः प्रिया भवन्त्यात्मनस्तु कामाय वेदाः प्रिया भवन्ति । न वा

---

१ स. ग. च. छ. झ. ढ. °यमवृ° । २ घ. ज. °ज्यामीति ॥ ५ ॥ ३ झ. ढ. °च्छागा इ° ।

अरे भूतानां कामाय भूतानि प्रियाणि
भवन्त्यात्मनस्तु कामाय भूतानि प्रियाणि
भवन्ति । न वा अरे सर्वस्य कामाय सर्वं
प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवति।
आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो
निदिध्यासितव्यो मैत्रेय्यात्मनि खल्वरे दृष्टे
श्रुते मते विज्ञात इदꣳ सर्वं विदितम् ॥ ६ ॥

आत्मनि खल्वरे मैत्रेयि दृष्टे । कथं दृष्ट आत्मनीति, उच्यते—पूर्वमाचार्यागमाभ्यां श्रुते पुनस्तर्केणोपपत्त्या मते विचारिते । श्रवणं त्वागममात्रेण मत उपपत्त्या पश्चाद्विज्ञात एवमेतन्नान्यथेति निर्धारिते। किं भवतीत्युच्यत इदं विदितं भवति । इदं सर्वमिति यदात्मनोऽन्यत् । आत्मव्यतिरेकेणाभावात् ॥ ६ ॥

व्याख्यानप्रकारमेवाऽऽह—आत्मनीति । दृष्टे सर्वमिदं विदितं भवतीत्युत्तरत्र संबन्धः । केनोपायेनाऽऽत्मनि दृष्टे सर्वं दृष्टं भवतीत्युपायं पृच्छति—कथमिति । आत्मदर्शनोपायं श्रवणादिकं दर्शयन्नुत्तरमाह—उच्यत इति । उक्तोपायफलं प्रश्नपूर्वकमाह—किमित्यादिना । इदं सर्वमित्यनूद्य तस्यार्थमाह—यदात्मनोऽन्यदिति । तदात्मनि दृष्टे दृष्टं स्यादिति शेषः । कथमन्यस्मिन्दृष्टे सत्यन्यद्दृष्टं भवति तत्राऽऽह—आत्मव्यतिरेकेणेति ॥ ६ ॥

ब्रह्म तं परादाद्योऽन्यत्राऽऽत्मनो ब्रह्म वेद
क्षत्रं तं परादाद्योऽन्यत्राऽऽत्मनः क्षत्रं वेद
लोकास्तं परादुर्योऽन्यत्राऽऽत्मनो लोकान्वेद
देवास्तं परादुर्योऽन्यत्राऽऽत्मनो देवान्वेद
वेदास्तं परादुर्योऽन्यत्राऽऽत्मनो वेदान्वेद

---

१ च. °रे यज्ञानां कामाय यज्ञाः प्रिया भवन्त्यात्मनस्तु कामाय यज्ञाः प्रिया भवन्ति । न वा अरे भू° । २ ख. ग. ङ. च. छ. ट. ठ. ढ. °त्मा त्वरे । ३ क. ग. घ. ङ. च. छ. ज. झ. ढ. °त् ॥ ६ । ७ । ८ । ९ । १० च° । ४ घ. °र्शयितुमुत्त° । ५ च. °द् यज्ञास्तं परादुर्योऽन्यत्राऽऽत्मनो यज्ञान्वेद भू° ।

भूतानि तं परादुर्योऽन्यत्राऽऽत्मनो भूतानि वेद सर्वं तं परादाद्योऽन्यत्राऽऽत्मनः सर्वं वेददं ब्रह्मेदं क्षत्रमिमे लोका इमे देवा इमे वेदा इमानि भूतानीदꣳ सर्वं यदयमात्मा ॥ ७ ॥

स यथा दुन्दुभेर्हन्यमानस्य न बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो गृहीतः ॥ ८ ॥

स यथा शङ्खस्य ध्मायमानस्य न बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय शङ्खस्य तु ग्रहणेन शङ्खध्मस्य वा शब्दो गृहीतः ॥ ९ ॥

स यथा वीणायै वाद्यमानायै न बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय वीणायै तु ग्रहणेन वीणावादस्य वा शब्दो गृहीतः ॥ १० ॥

तमयथार्थदर्शिनं परादात्पराकुर्यात्कैवल्यासंबन्धिनं कुर्यादयमनात्मस्वरूपेण मां पश्यतीत्यपराधादिति भावः ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥

॥ ७ ॥ ८ ॥ ९ ॥ १० ॥

स यथाऽऽर्द्रेधाग्नेरभ्याहितस्य पृथग्धूमा विनिश्चरन्त्येवं वा अरेऽस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानीष्टꣳ हुतमाशितं पायितमयं च लोकः परश्च लोकः सर्वाणि च भूतान्यस्यैवैतानि सर्वाणि निःश्वसितानि ॥ ११ ॥

---

१ च. °वा इमे यज्ञा ह° । २ ख. ग. घ. ङ. छ. ज. ट. ठ. ढ. °मेवैत° । ३ च. °नानि दशꣳ ह° ।

स यथा सर्वासामपाꣳ समुद्र एकायनमेवꣳ सर्वेषाꣳ स्पर्शानां त्वगेकायनमेवꣳ सर्वेषां गन्धानां नासिके एकायनमेवꣳ सर्वेषाꣳ रसानां जिह्वैकायनमेवꣳ सर्वेषाꣳ रूपाणां चक्षुरेकायनमेवꣳ सर्वेषाꣳ शब्दानाꣳ श्रोत्रमेकायनमेवꣳ सर्वेषाꣳ संकल्पानां मन एकायनमेवꣳ सर्वासां विद्यानाꣳ हृदयमेकायनमेवꣳ सर्वेषां कर्मणाꣳ हस्तावेकायनमेवꣳ सर्वेषामानन्दानामुपस्थ एकायनमेवꣳ सर्वेषां विसर्गाणां पायुरेकायनमेवꣳ सर्वेषामध्वनां पादावेकायनमेवꣳ सर्वेषां वेदानां वागेकायनम्

॥ १२ ॥

चतुर्थे शब्दनिःश्वासेनैव लोकाद्यर्थनिःश्वासः सामर्थ्यादुक्तो भवतीति पृथङ्नोक्तः। इह तु सर्वशास्त्रार्थोपसंहार इति कृत्वाऽर्थप्राप्तोऽप्यर्थः स्पष्टीकर्तव्य इति पृथगुच्यते ॥ ११ ॥ १२ ॥

स तथाऽद्वैधाभेरित्यादाविष्टं हुतमित्याद्यधिकं दृष्टं तस्यार्थमाह—चतुर्थ इति। सामर्थ्यादर्थशून्यस्य शब्दस्यानुपपत्तेरित्यर्थः। नन्वत्रापि सामर्थ्याविशेषात्पृथगुक्तिरयुक्तेत्याशङ्क्याऽऽह—इह त्विति ॥ ११ ॥ १२ ॥

स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एवैवं वा अरेऽयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञाऽस्तीत्यरे ब्रवीमीति होवाच याज्ञवल्क्यः ॥ १३ ॥

सर्वकार्यप्रलये विद्यानिमित्ते सैन्धवघनवदनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एक आत्माऽवतिष्ठते[2]। पूर्वं तु भूतमात्रासंसर्गविशेषाल्लब्ध-

---

१ क. ख. घ. ङ. छ. ज. ट. ठ. °र्वेषां रसानां जिह्वैकायनमेवꣳ सर्वेषां गन्धानां नासिके एकायनमेवꣳ सर्वेषाꣳ रू। २ ख. घ. छ. ढ. °ते नेतरत्। पू°।

विशेषविज्ञानेः सन्। तस्मिन्प्रविलापिते विद्यया विशेषविज्ञाने तन्निमित्ते च भूतसंसर्गे न प्रेत्य संज्ञाऽस्तीत्येवं याज्ञवल्क्येनोक्ता ॥ १३ ॥

त यथा सैन्धवघन इत्यादिवाक्यतात्पर्यमाह—सर्वकार्योति । एतेभ्यो भूतेभ्य इत्यादेरर्थमाह—पूर्व त्विति । ज्ञानोदयात्पागवस्थायामित्यर्थः । लब्धविशेषविज्ञानः सन्व्यवहरतीति शेषः । प्रविलापिते तस्येत्यध्याहारः ॥ १३ ॥

सा होवाच मैत्रेय्यत्रैव मा भगवान्मोहान्तमापीपिपन्न वा अहमिमं विजानामीति स होवाच न वा अरेऽहं मोहं ब्रवीम्यविनाशी वा अरेऽयमात्माऽनुच्छित्तिधर्मा ॥ १४ ॥

सा होवाचात्रैव मा भगवानेतस्मिन्नेव वस्तुनि प्रज्ञानघन एव न प्रेत्य संज्ञाऽऽस्तीति मोहान्तं मोहमध्यमापीपिपदापीपददवगमितवानसि संमोहितवानसीत्यर्थः । अतो न वा अहमिममात्मानमुक्तलक्षणं विजानामि विवेकत इति । स होवाच नाहं मोहं ब्रवीम्यविनाशी वा अरेऽयमात्मा यतो विन(नं)ष्टुं शीलमस्येति विनाशी न विनाश्यविनाशी विनाशशब्देन विक्रियाऽविनाशीत्यविक्रिय आत्मेत्यर्थः। अरे मैत्रेय्ययमात्मा प्रकृतोऽनुच्छित्तिधर्मा । उच्छित्तिरुच्छेद उच्छेदोऽन्तो विनाश उच्छित्तिर्धर्मोऽस्येत्युच्छित्तिधर्मा नोच्छित्तिधर्माऽनुच्छित्तिधर्मा नापि विक्रियालक्षणो नाप्युच्छेदलक्षणो विनाशोऽस्य विद्यत इत्यर्थः ॥ १४ ॥

पूर्वोत्तरविरोधं शङ्कित्वा परिहरति—सा होवाचेत्यादिना । अविनाशित्वं पूर्वत्र हेतुरित्याह—यत इति ॥ १४ ॥

यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति तदितर इतरं जिघ्रति तदितर इतरꣳ रसयते तदितर इतरमभिवदति तदितर इतरꣳ शृणोति तदितर इतरं मनुते तदितर इतरꣳ स्पृशति तदितर इतरं विजानाति यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं

---

१ क. ख. घ. ङ. छ. °नः। त°। २ ज. ढ. °नु। प्रवि°। झ. °न्। यास्ति°। ३ ख. ग. घ. ज. °वीमीत्याह याज्ञवल्क्यः। अपि°। ४ ग. घ. ज. °नाश्यय°।

पश्येत्तत्केन कं जिघ्रेत्तत्केन कꣳ रसयेत्तत्केन
कमभिवदेत्तत्केन कꣳ शृणुयात्तत्केन कं मन्वीत
तत्केन कꣳ स्पृशेत्तत्केन कं विजानीयाद्येनेदꣳ
सर्वं विजानाति तं केन विजानीयात्स एष नेति
नेत्यात्माऽगृह्यो न हि गृह्यतेऽशीर्यो न हि शीर्य-
तेऽसङ्गो न हि सज्यतेऽसितो न व्यथते न रिष्यति
विज्ञातारमरे केन विजानीयादित्युक्तानुशास-
नाऽसि मैत्रेय्येतावदरे खल्वमृतत्वमिति होक्त्वा
याज्ञवल्क्यो विजहार ॥ १५ ॥

इति बृहदारण्यकोपनिषदि चतुर्थाध्यायस्य
पञ्चमं ब्राह्मणम् ।

चतुर्ष्वपि प्रपाठकेष्वेक आत्मा तुल्यो निर्धारितः परं ब्रह्म । उपायविशेषस्तु तस्याधिगमेऽन्यश्चान्यश्च । उपेयस्तु स एवाऽऽत्मा यश्चतुर्थेऽथात आदेशो नेति नेतीति निर्दिष्टः । स एव पञ्चमे प्राणपणोपन्यासेन शाकल्ययाज्ञवल्क्यसंवादे निर्धारितः । पुनः पञ्चमसमाप्तौ । पुनर्जनकयाज्ञवल्क्यसंवादे । पुनरिहोपनिषत्समाप्तौ । चतुर्णामपि प्रपाठकानामेतदात्मनिष्ठता नान्योऽन्तराले कश्चिदपि विवक्षितोऽर्थ इत्येतत्प्रदर्शनायान्त उपसंहारः स एष नेति नेत्यादिः ।

प्रत्यध्यायमन्यथोऽन्यथा प्रतिपादनादात्मनः सविशेषत्वमाशङ्क्य स एष इत्यादेस्तात्पर्यमाह—चतुर्ष्वपीति । केन प्रकारेण तस्य तुल्यत्वमित्याशङ्क्याऽऽह—परं ब्रह्मेति । अध्यायभेदस्तर्हि कथमित्याशङ्क्याऽऽह—उपायेति । उपायभेदवदुपेयभेदोऽपि स्यादित्याशङ्क्याऽऽह—उपेयस्त्विति । चातुर्थिकादर्थान्तराधिकस्यार्थस्य भेदं व्यावर्तयति—स एवेति । प्राणपणोपन्यासेन मूर्ता ये विषयिण्यतीति मूर्तपातोपन्यासात्मानाः पणत्वेन गृहीता इति गम्यते । तेन शाकल्यब्राह्मणेन निर्विशेषः प्रत्यगात्मा निर्धारित इत्यर्थः । विज्ञानघनश्चैवेत्यादानुक्तं स्मारयति—पुनरिति । पञ्चमसमाप्तौ पुनर्विज्ञानमित्यादिना स एव निर्धारित इति योजना । कूर्चब्राह्मणादावपि स एवोक्त इत्याह—पुनर्जनकेति । अस्मिन्नपि ब्राह्मणे स एवोक्त इत्याह—पुनरिहेति । किमिति पूर्वत्र

---

१ ख. घ. °तो च । च° । २ क. ख. ढ. °था प्र° ।

तत्र तत्रोक्तस्य निर्विशेषस्याऽऽत्मनोऽवसाने वचनमित्याशङ्क्याऽऽह—चतुर्णा-मपीति ।

यस्मात्प्रकारशतेनापि निरूप्यमाणे तत्त्वे नेति नेत्यात्मैव निष्ठा नान्योपलभ्यते तर्केण वाऽऽगमेन वा तस्मादेतदेवामृतत्वसाधनं यदेत-न्नेति नेत्यात्मपरिज्ञानं सर्वसंन्यासश्चेत्येतमर्थमुपसंजिहीर्षन्नाह—एताव-देतावन्मात्रं यदेतन्नेति नेत्यद्वैतात्मदर्शनमिदं चान्यसहकारिकारण-निरपेक्षमेवारे मैत्रेय्यमृतत्वसाधनम् । यत्पृष्टवत्यसि यदेव भगवान्वेद तदेव मे ब्रूह्यमृतत्वसाधनमिति तदेतावदेवेति विज्ञेयं त्वयेति हैवं किलामृतत्वसाधनमात्मज्ञानं प्रियायै भार्यायै उक्त्वा याज्ञवल्क्यः किं कृतवान्यत्पूर्वं प्रतिज्ञातं प्रव्रजिष्यन्नस्मीति तच्चकार विजहार प्रव्रजितवानित्यर्थः । परिसमाप्ता ब्रह्मविद्या संन्यासपर्यवसाना । एता-वानुपदेश एतद्वेदानुशासनमेषा परमा निष्ठैष पुरुषार्थकर्तव्यतान्त इति ।

पौर्वापर्यपर्यालोचनायामुपनिषदर्थो निर्विशेषमात्मतत्त्वमित्युपपाद्य वाक्यान्तर-मवतार्य व्याकरोति—यस्मादित्यादिना । इति होक्त्वेत्यादिवाक्यमाकाङ्क्षा-पूर्वकमादाय व्याचष्टे—यत्पृष्टवत्यसीत्यादिना । ब्राह्मणार्थमुपसंहरति—परिस-माप्तेति । तथाऽप्युपदेशान्तरं कर्तव्यमस्तीत्याशङ्क्याऽऽह—एतावानिति । किमत्र प्रमाणमिति तदाह—एतदिति । तथाऽपि परमा निष्ठा संन्यासिनो वक्त-व्येति चेन्नेत्याह—एषेति । आत्मज्ञाने सतिसंन्यासे सत्यपि पुरुषार्थान्तरं कर्तव्य-मस्तीत्याशङ्क्याऽऽह—एष इति । इतिशब्दो ब्राह्मणसमाप्त्यर्थः ।

इदानीं विचार्यते शास्त्रार्थविवेकप्रतिपत्तये । यत आकुलानि हि वाक्यानि दृश्यन्ते " यावज्जीवमग्निहोत्रं जुहुयात् " " यावज्जीवं दर्शपूर्णमासाभ्यां यजेत " " कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः " " एतद्वै जरामर्यं सत्रं यदग्निहोत्रम् " इत्यादीन्येकाश्रम्य-ज्ञापकान्यन्यानि चाऽऽश्रमान्तरप्रतिपादकानि वाक्यानि " विदित्वा व्युत्थाय प्रव्रजन्ति " " ब्रह्मचर्यं समाप्य गृही भवेद्गृहाद्वनी भूत्वा प्रव्रजेत् " " यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेद्गृहाद्वा वनाद्वा ",

---

१ घ. ञ. ण. °ति । पूर्वापरपर्या° । २ ख. °तसां° । ३ झ. ससंन्यासमित्ये° । ४ घ. ञ. ट. 'देवैता° । ५ क. ख. ग. घ. ङ. छ. ज. ज. ट. °न्वेत्थ तं । ६ घ. छ. ज. मे विब्रू° । ७ ख. ग. ब. ज. झ. °रमा नि° । ८ घ. ण. तत्राऽऽह । ९ ग. °म्यप्रतिपादका° । १० छ. झ. °दि चेत° ।

इति । " द्वावेव पन्थानावनुनिष्क्रान्ततरौ भवतः क्रियापथश्चैव पुरस्तात्संन्यासश्च तयोः संन्यास एवातिरेचयति " इति । " न कर्मणा न प्रजया धनेन त्यागेनैकेऽमृतत्वमानशुः " इत्यादीनि । तथा स्मृतयश्च—" ब्रह्मचर्यवान्प्रव्रजति " " अविशीर्णब्रह्मचर्यो यमिच्छेत्तमावसेत् " " तस्याऽऽश्रमविकल्पमेके ब्रुवते " तथा—

" वेदानधीत्य ब्रह्मचर्येण पुत्रपौत्रानिच्छेत्पावनार्थं पितृणाम् ।
अग्नीनाधाय विधिवच्चेष्टयज्ञो वनं प्रविश्याथ मुनिर्बुभूषेत् " ॥
" प्राजापत्यां निरुप्येष्टिं सर्ववेदसदक्षिणाम् ।
आत्मन्यग्नीन्समारोप्य ब्राह्मणः प्रव्रजेद्गृहात् " ॥ इत्याद्याः ।

तसंन्यासमात्मज्ञानमुद्भवत्वसाधनमित्युपपाद्य संन्यासमधिकृत्य विचारमवतारयति—इदानीमिति । तत्र तत्र पूर्वमेव विचारितत्वात्किं पुनर्विचारेणेत्याशङ्क्याऽऽह—शास्त्रार्थेति । विरक्तस्य संन्यासो ज्ञानस्यान्तरङ्गसाधनं ज्ञानं तु केवलममृतत्वस्येति शास्त्रार्थे विवेकरूपा प्रतिपत्तिरपि पूर्वमेव सिद्धेति किं तदर्थेन विचारारम्भेणेत्याशङ्क्याऽऽह यत इति । अतो विचारः कर्तव्यो नान्यथा शास्त्रार्थविवेकः स्यादित्युपसंहारार्थो हिशब्दः । वाक्यानामाकुलत्वमेव दर्शयति—यावदिति । यदग्निहोत्रमित्यादीनित्यादिशब्दादैकाश्रम्यं त्वाचार्याः प्रत्यक्षविधानाद्दार्ढ्यस्यैत्यादिस्मृतिवाक्यं गृह्णतें । कथमेतावता वाक्यानि व्याकुलानीत्याशङ्क्याऽऽह—अन्यानि चेति । विदित्वा व्युत्थाय भिक्षाचर्यं चरन्तीति वाक्यं पाठक्रमेण विद्वत्संन्यासपरमर्थक्रमेण तु विविदिषासंन्यासपरमात्मानमेव लोकमिच्छन्तः प्रव्रजन्तीति तु विविदिषासंन्यासपरमेवेति विभागः । क्रमसंन्यासपरां श्रुतिमुदाहरति—ब्रह्मचर्यमिति । अक्रमसंन्यासविषयं वाक्यं पठति—यदि वेति । कर्मसंन्यासयोः संन्यासस्याऽऽधिक्यप्रदर्शनपरां श्रुतिं दर्शयति—द्वावेवेति । अनुनिष्क्रान्ततरौ शास्त्रे क्रमेणाभ्युदयनिःश्रेयसोपायत्वेन पुनः पुनरुक्तावित्यर्थः । ज्ञानद्वारा संन्यासस्य मोक्षोपायत्वे श्रुत्यन्तरमाह—न कर्मणेति । ' तानि वा एतान्यवराणि तपांसि न्यास एवात्यरेचयत् ' इत्यादिवाक्यमादिशब्दार्थः । यथा श्रुतयस्तथा स्मृतयोऽप्याकुला दृश्यन्त इत्याह—तथेति । तत्र क्रमसंन्यासे स्मृतिमादावुदाहरति—ब्रह्मचर्यवानिति । यथेष्टाश्रमप्रतिपत्तौ प्रमाणभूतां स्मृतिं दर्शयति—अविशीर्णेति । आश्रमविकल्पविषयां स्मृतिं

१ ग. घ. ज. °रौ क्रि° । २ ख. ङ. °ण नित्यं °पु° । ३ ख. °तस्ये° । ४ घ. ञ. °ऋार्थवि° । ५ घ. °चार्य. प्र° । ६ ण. °स्येतिस्मृ° । ७ ख. चेति । ८ ख. ढ. इति वा° क. ख. ढ. °योऽपि व्याकु° ।

पठति-तस्येति । ब्रह्मचारी पठितार्थः । कथं तर्ह्यत्र प्रमाणमाह-तथेति । अत्रैव वाक्यान्तरं पठति-प्राजापत्यामिति । सर्ववेदसं सर्वस्वं दक्षिणा यस्यां तां निर्वपत्येतदर्थः । आदिपदेन मुण्डा भिस्तन्वन्नेत्यादिवाक्यं गृह्यते । इत्याद्याः स्मृतयश्चेति पूर्वेण संबन्धः ।

एवं व्युत्थानविकल्पक्रमयथेष्टाश्रमप्रतिपत्तिप्रतिपादकानि हि श्रुति-स्मृतिवाक्यानि शतशः उपलभ्यन्ते इतरेतरविरुद्धानि । आचारश्च तद्विदाप्त । विप्रतिपत्तिश्च शास्त्रार्थप्रतिपत्तृणां बहुविदामपि । अतो न शक्यते शास्त्रार्थो मन्दबुद्धिभिर्विवेकेन प्रतिपत्तुम् । परिनिष्ठित-शास्त्रन्यायबुद्धिभिरेव हि एषां वाक्यानां विषयविभागः शक्यतेऽवधा-रयितुम् । तस्मादेषां विषयविभागज्ञापनाय यथाबुद्धिसामर्थ्यं विचा-रयिष्यामः । यावज्जीवश्रुत्यादिवाक्यानामन्याय्यांसंभवात्क्रियावसान एव वेदार्थः । तं यज्ञपात्रैर्दहन्तीत्यन्यकर्मश्रवणाज्जरामर्यश्रवणाच्च लिङ्ग-च्च मस्मान्तं शरीरमिति । न हि पारिव्राज्यपक्षे मस्मान्तता शरी-रस्य स्यात् । स्मृतिश्च-

" निषेकादिश्मशानान्तो मन्त्रैर्यस्योदितो विधिः ।
तस्य शास्त्रेऽधिकारोऽस्मिन्नान्यो नाप्यस्य कस्यचित् " ॥ इति ।

समन्त्रकं हि यत्कर्म वेदनेह विधीयते तस्य श्मशानान्तता दर्श-यति स्मृतिः । अधिकाराभावप्रदर्शनाच्चात्यन्तमेव श्रुत्यधिकाराभा-वोऽकर्मिणो गम्यते । अग्न्युद्वासनापवादाच्च " वीरहा वा एष देवानां योऽग्निमुद्वासयते " इति ।

उपाकृतानि वाक्यानि दर्शयित्वोपसंहरति-एवमिति । इतश्च कर्तव्यो वि-चार इत्याह-आचारश्चेति । श्रुतिस्मृतिविदामाचारः स विरुद्धो लक्ष्यते के-चिदग्निहोत्रचर्यादेव प्रव्रजन्ति । अपरे तु तत्परित्यज्य गार्हस्थ्यमेवाऽऽचरन्ति । अन्ये तु चतुरोऽप्याश्रमान्क्रमेणाऽऽश्रयन्ते । तथा च विना विचारं निर्णयानिष्पत्तिरित्यर्थः । इतश्चास्मिन् विचारस्य कार्यतेत्याह-विप्रतिपत्तिश्चेति । यद्यपि बहुविदः शास्त्रा-र्थविषयविचारे जैमिनिप्रभृतयस्तथाऽपि तेषां विप्रतिपत्तिरुपलभ्यते । केचिदन्तरे-वस आश्रमाः सन्तीत्याहुर्न सन्तीत्यपरे । सत्कृतो विचाराद्धि निश्चयसिद्धिरित्यर्थः । अथ केषांचिदन्तरेणापि विचारं शास्त्रार्थो विवेकेन प्रतिभात्यपि तत्राऽऽह—

---

१ ध. ञ. ढ. °शास्त्रार्थन्या° । २ घ. च. ज्ञाना° । ३ क. ख. ग. छ. ज. °त्य-क्तक° । ४ ग. घ. ज. स्मृतेश्च । ५ ग. छ. °देन वि° । ६ घ. क. झ. °नेहाभिधी° । ७ च. °सि । अ° । ८ क. ग. क. ख. झ. °स्मृत्याऽग्नि° । च. ढ. °स्मृत्याऽग्नि° । ९ झ. °व स्मृत्य° । १० झ. °ोऽवन° । ११ ख. °यतीति । १२ क. ख. ढ. रे न° ।

[illegible] इति । श्रुतिस्मृत्याचाराविप्रतिपत्तेरिति यावत् । कस्यर्हि शास्त्रार्थो विवेकेन ज्ञातुं शक्यते तत्राऽऽह—परिनिष्ठितेति । नानाश्रुतिवर्णनादिवशादुपात्तिं विचारारम्भमुपसंहरति—तस्मादिति । विचारकर्तव्यतामुक्त्वा पूर्वपक्षं गृह्णाति—ब्राह्मणविद्यादिना । श्रुत्यादीत्यादिशब्देन कुर्वन्नित्यादिमन्त्रवादौ गृह्यते । ऐकाश्रम्ये हेत्वन्तरमाह—तमिति । एतद्वै जरामर्यं सत्रं यदग्निहोत्रमिति श्रुतेश्च पारिव्राज्यापातिद्विरित्याह—जरेति । तत्रैव हेत्वन्तरमाह—लिङ्गाच्चेति । पारिव्राज्यपक्षेऽपि तदुपपत्तिमाशङ्क्याऽऽह—न हीति । इतश्च नास्ति पारिव्राज्यमित्याह—श्रुतिश्चेति । तस्यास्तात्पर्यमाह—समन्त्रकं हीति । नान्यस्य कस्यचिदित्यत्र सूचितमर्थं कथयति—अधिकारेति । गृहस्थस्य पारिव्राज्याभावे हेत्वन्तरमाह अग्नीति ।

ननु व्युत्थानादिविधानाद्वैकल्पिकं क्रियावसानत्वं वेदार्थस्य । न । अन्यार्थत्वाद्व्युत्थानादिश्रुतीनाम् । " यावज्जीवमग्निहोत्रं जुहोति " " यावज्जीवं दर्शपूर्णमासाभ्यां यजेत " इत्येवमादीनां श्रुतीनां जीवनमात्रनिमित्तत्वाद्यदा न शक्यतेऽन्यार्थता कल्पयितुं तदा व्युत्थानादिवाक्यानां कर्मानधिकृतविषयत्वसंभवात् " कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः " इति च मन्त्रवर्णाज्जरया वा ह्येवास्मान्मुच्यते मृत्युना वेति च जरामृत्युभ्यामन्यत्र कर्मविरोगाच्छिद्रासंभवात्कर्मिणां श्मशानान्तत्वं न वैकल्पिकम् । काणकुब्जादयोऽपि कर्मण्यनधिकृता अनुग्राह्या एव श्रुत्येति व्युत्थानाद्याश्रमान्तरविधानं नानुपपन्नम् ।

पूर्वपक्षमाक्षिपति—नन्विति । उभयविधिदर्शने षोडशीग्रहणाग्रहणवदधिकारिभेदेन विकल्पो युक्तो न तु क्रियावसान एव वेदार्थ इति पक्षपाते निबन्धनमस्तीत्यर्थः । तुल्यविधिदर्शने हि विकल्पो भवत्यत्र तु सावकाशानवकाशबलेनातुल्यत्वाच्चैवमित्याह—अन्यार्थत्वादिति । तदेव स्फुटयति—यावज्जीवमित्यादिना । कर्मानधिकृतविषयत्वान्न वैकल्पिकमिति संबन्धः । क्रियावसानत्वं वेदार्थस्येति शेषः । तत्रैव हेत्वन्तराण्याह—कुर्वन्नित्यादिना । न वैकल्पिकमित्यत्र पूर्ववदन्वयः । व्युत्थानादिवाक्यानां कथमनधिकृतविषयत्वमित्याशङ्क्याऽऽह—काणेति ।

पारिव्राज्यक्रमविधानस्यानवकाशत्वमिति चेत् । न । विश्वजित्सर्वमेधयोर्यावज्जीवविध्यपवादत्वात् । यावज्जीवाग्निहोत्रादिविधेर्विश्वजि-

---

१ ब्र. ण. स्मृतेश्चे । २ क. ङ. छ. °नां च कृ° । ३ क. घ. ज. °ति म° । ४ च. ब्र. °र्णात्तथैतद्वै जरामर्यं सत्रं यदग्निहोत्रं जर° । ५ क. ग. °न्मुच्येत मृ° । ६ ङ. ज. °च्यन्ते मृ° । ७ क. ज. °कुण्ठाद° ।

स्तर्वमेधयोरेवापवादस्तत्र च क्रमप्रतिपत्तिसंभवो ब्रह्मचर्यं समाप्य-
गृही भवेद्गृहाद्वनी भूत्वा प्रव्रजेदिति विरोधानुपपत्तेः । न सर्वावि-
षयत्वे पारिव्राज्यक्रमविधानवाक्यस्य काश्चिद्विरोधः क्रमप्रतिपत्तेः ।
अन्यविषयपरिकल्पनायां तु यावज्जीवविधानश्रुतिः स्वविषयात्संको-
चिता स्यात् । क्रमप्रतिपत्तेस्तु विश्वजित्सर्वमेधविषयत्वान्न काश्चिद्बाधः ।
नाऽऽत्मज्ञानस्यामृतत्वहेतुत्वाभ्युपगमात् ।

अनधिकृतविषयत्वं तेषामशक्यं वक्तुं ब्रह्मचर्यं समाप्येत्यादावधिकृतविषये
क्रमदर्शनादिति शङ्कते—पारिव्राज्येति । गत्यन्तरं दर्शयन्नुत्तरमाह—न विश्व-
जिदिति । यावज्जीवमग्निहोत्रं जुहोतीत्युत्सर्गस्तस्यापवादो विश्वजित्सर्वमेधौ तद-
नुष्ठाने सर्वस्वदानादेव साधनसंपद्विरहात्पारिव्राज्यस्यावश्यभावित्वादतस्तद्विषयं क्रम-
विधानमित्यर्थः । तदेव स्फुटयति—यावज्जीवेति । कथं क्रमविधेरेवंविषयत्वं
कल्पकाभावादित्याशङ्क्याऽऽह—विरोधानुपपत्तेरिति । गृहस्थस्यापि विरक्तस्य
पारिव्राज्यमिति किमिति क्रमविषयो नेष्यते तत्राऽऽह—अन्यविषयेति । क्रमवि-
धेरपि स्वत्पक्षे संकोचः स्यादित्याशङ्क्याऽऽह—क्रमप्रतिपत्तेस्त्विति । सति ज्ञाने
कर्मत्यागो विधिष्यते सत्यां वाँ जिज्ञासायामिति विकल्प्याऽऽद्यं दूषयति
सिद्धान्ती—नाऽऽत्मज्ञानस्येति ।

यत्तावदात्मेत्येवोपासीतेत्यारभ्य स एष नेति नेत्येतदन्तेन ग्रन्थेन
यदुपसंहृतमात्मज्ञानं तदमृतत्वसाधनमित्यभ्युपगतं भवता । तत्रैतावं-
देवामृतत्वसाधनमन्यनिरपेक्षमित्येतन्न मृष्यते । तत्र भवन्तं पृच्छामि
किमर्थमात्मज्ञानं मर्षयति भवानिति । शृणु तत्र कारणं यथा स्वर्ग-
कामस्य स्वर्गप्राप्त्युपायमजानतोऽग्निहोत्रादि स्वर्गप्राप्तिसाधनं
ज्ञापयति तथेहाप्यमृतत्वप्राप्तिपित्सोरमृतत्वप्राप्त्युपायमजानतो यदेव
भगवान्वेद तदेव मे ब्रूहीत्येवमाकाङ्क्षितममृतत्वसाधनमेतावदेव
इत्येवमादौ वेदेन ज्ञाप्यत इति । एवं तर्हि यथा ज्ञापितमग्निहोत्रादि
स्वर्गसाधनमभ्युपगम्यते तथेहाप्यात्मज्ञानम् । यथा ज्ञाप्यते तथाभूतमे-
वामृतत्वसाधनमात्मज्ञानमभ्युपगन्तुं युक्तम् । तुल्यप्रामाण्यादुभयत्र ।

विद्वत्संन्यासस्यावश्यंभावित्वान्न कर्मावशेष एव वेदार्थ इति संगृहीतं वस्तु
विवृणोति—यत्तावदिति। विद्यासूत्रादारभ्य निषेधवाक्यान्तेन ग्रन्थेन यदात्मज्ञानमु-

---

१ स. घ. ङ. छ. °भवाद्ब्रह्म° । २ च. ढ. °यत्वप° । झ. यत्वक° । ३ ग. झ. °ग्निद्विरोधः । ४ ञ. विधेर्विष° । ५ क. स. ढ. वा विधेर्जिज्ञा° । ६ घ. ज. °न्थेनोप° । ७ ङ. च. छ. ढ. °वदमृ° । ८ झ. °नं दर्शय° । ९ क. स. छ. ज. झ. °न्त्वेत्य तँ° । १० स. ङ. मे विद्वँ° ।

पसंहृतं तत्तावन्मुक्तिसाधनमिति भवताऽपि यस्मादभ्युपगतं पराङ्मुखं चाऽऽत्मविज्ञानादन्यत्रेत्यवधारणादिति न्यायात्तस्माज्ज्ञाने सति कर्मानुष्ठानं निरवकाशमित्यर्थः । अथाऽऽत्मज्ञानं कर्मतद्धितममृतत्वसाधनमिष्यते न केवलं तथा च ज्ञानोत्तरकालमपि न कर्मत्यागसिद्धिरिति शङ्कते—तत्रेति । आत्मज्ञानस्यामृतत्वसाधनत्वे सत्यपीति यावत् । कर्मनिरपेक्षत्वं चेदात्मज्ञानस्य भवान् तद्धते किमिति तर्हि ज्ञानमेवोपगतमिति सिद्धान्तीति पृच्छति—तत्रेति । तस्य कर्मानपेक्षत्वनङ्गीकारे सतीत्यर्थः । तत्र पूर्ववादी शास्त्रीयत्वादात्मज्ञानममृतत्वसाधनमभ्युपगतमिति शङ्कते—शृण्विति । ज्ञापयति वेद इति शेषः । शास्त्रानुसारेणाऽऽत्मज्ञानाङ्गीकारे कर्मनिरपेक्षमेवाऽऽत्मज्ञानं मोक्षसाधनं स्तेत्स्यतीति परिहरति—एवं तर्हीति । उभयत्र ज्ञाने कर्मणि चेत्यर्थः । यद्वा ज्ञानस्यामृतत्वसाधनत्वे तस्य कर्मनिरपेक्षत्वे चेत्यर्थः । तुल्यप्रामाण्यात्प्रामाणस्य तुल्यत्वाद्वेदस्येति शेषः ।

यद्येवं किं स्यात् । सर्वकर्महेतूपमर्दकत्वादात्मज्ञानस्य विद्योद्भवे कर्मनिवृत्तिः स्यात् । दाराग्निसंबद्धानां[1] तावदग्निहोत्रादिकर्मणां भेदबुद्धिविषयसंप्रदानकारकसाध्यत्वम् । अन्यबुद्धिपरिच्छेद्यां ह्यग्न्यादिदेवता संप्रदानकारकभूतामन्तरेण न हि तत्कर्म निर्वर्त्यते[2] । यथा हि संप्रदानकारकबुद्ध्या संप्रदानकारकं कर्मसाधनत्वेनोपदिश्यते सेह विद्यया निर्वर्त्यते[3] " अन्योऽसावन्योऽहमस्मीति न स वेद " " देवास्तं परादुर्योऽन्यत्राऽऽत्मनो देवान्वेद " " मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति " " एकधैवानुद्रष्टव्यं सर्वमात्मानं पश्यति " इत्यादिश्रुतिभ्यः । न च देशकालनिमित्ताद्यपेक्षत्वं व्यवस्थितात्मवस्तुविषयत्वादात्मज्ञानस्य । क्रियायास्तु पुरुषतन्त्रत्वात्स्यादेशकालनिमित्ताद्यपेक्षत्वम् । ज्ञानं तु वस्तुतन्त्रत्वान्न देशकालनिमित्ताद्यपेक्षते । यथाऽग्निरुष्णं आकाशोऽमूर्त इति तथाऽऽत्मेति विज्ञानमपि ।

यथाशास्त्रं ज्ञानाभ्युपगमेऽपि कथं तत्केवलं कैवल्यकारणमिति पृच्छति—यद्येवमिति । शास्त्रानुसारेण ज्ञानमभ्युपगच्छन्तं प्रत्याह—सर्वकर्मेति । आत्मज्ञानस्य तदुपमर्दकत्वं दर्शयितुं कर्महेतुं तावद्दर्शयति—दाराग्नीति । अग्निहोत्रादीनां संप्रदानकारकसाध्यत्वं व्यतिरेकद्वारा साधयति—अन्येति । तथाऽपि कथमात्मज्ञानस्य कर्महेतूपमर्दकत्वमित्याशङ्क्याऽऽह—यथा हीति । इहेति विद्याद्दशोक्तिः । विद्यायाः श्रुतिजन्यत्वेन बलवत्त्वं दर्शयति—अन्योऽसावित्यादिना

---

१ ख. घ. ज. °बन्धानां । २ घ. ज. °वर्तते । ३ क. ख. घ. ङ. च. ज. ढ. °त्तापे° । ४ क. °ण्यस्वाका° । ५ घ. ज. °त्मज्ञा° ।

ननु शुचौ देशे दिवसादौ काले शास्त्राचार्यादिवशादुत्पन्नं ज्ञानं पुमर्थसाधनम्। 'शुचौ देशे प्रतिष्ठाप्य' इत्यादिस्मृतेस्तथा च कथं तस्य भेदबुद्ध्युपमर्दकत्वमत आह—न चेति। यत्रैकाग्रता तत्राविशेषादिति न्यायाज्ज्ञानसाधनस्य समाधेरपि न देशाद्यपेक्षा दूरतस्तु कूटस्थवस्तुतन्त्रस्य ज्ञानस्येति भावः। विमतं देशाद्यपेक्षं शास्त्रार्थत्वाद्धर्मवदित्याशङ्कय पुरुषतन्त्रत्वमुपाधिरित्याह—क्रियाया-स्त्विति। साधनव्याप्तिं दूषयति—ज्ञानं त्विति। विमतं न देशाद्यपेक्षं प्रमाण-त्वादुष्णाग्निज्ञानवदिति प्रत्यनुमानमाह—यथेति।

नन्वेवं सति प्रमाणभूतस्य कर्मविधेर्निरोधः स्यात्। न च तुल्य-प्रमाणयोरितरेतरनिरोधो युक्तः। न। स्वाभाविकभेदबुद्धिमात्रनि-रोधकत्वात्। न हि विध्यन्तरानिरोधकमात्मज्ञानं स्वाभाविकभेद-बुद्धिमात्रं निरुणद्धि। तथाऽपि हेत्वपहारात्कर्मानुपपत्तेर्विधिनिरोध एव स्यादिति चेत्। न। कामप्रतिषेधात्काम्यप्रवृत्तिनिरोधवद्दोषात्। यथा स्वर्गकामो यजेतेति स्वर्गसाधने यागे प्रवृत्तस्य कामप्रतिषे-धविधेः कामे विहते काम्ययागानुष्ठानप्रवृत्तिर्निरुध्यते। न चैतावता काम्यविधिर्निरुद्धो भवति।

आत्मज्ञानस्य सर्वकर्महेतूपमर्दकत्वे दोषमाशङ्कते—नन्विति। इष्टापत्तिमा-शङ्कयाऽऽह—न चेति। कर्मकाण्डेन काण्डान्तरस्यापि निरोधसंभवादित्यर्थः। साक्षादात्मज्ञानं कर्मविधिनिरोधेऽपर्याप्तेति विकल्प्याऽऽद्यं दूषयति—नेत्यादिना तदेव स्फुटयति—न हि विध्यन्तरेति। द्वितीयं शङ्कते—तथाऽपीति। यथा न कामी स्यादिति निषेधात्कस्यचित्कामप्रवृत्तिर्न भवतीत्येतावता न सर्वान्प्रति काम्यविधिर्निरुध्यते। तथा कस्यचिदात्मज्ञानात्कर्मविधिनिरोधेऽपि न सर्वान्प्र-त्यसौ निरुद्धो भविष्यतीति परिहरति—न कामेति। दृष्टान्तमेव स्पष्टयति—यथे-त्यादिना। प्रतिषेधशास्त्रार्थानभिज्ञं प्रति तदुपपत्तेरिति भावः।

कामप्रतिषेधविधिना काम्यविधेरनर्थकत्वज्ञानात्प्रवृत्त्यनुपपत्तेर्निरुद्ध एव स्यादिति चेत। भवत्येवमेवं कर्मविधिनिरोधोऽपि। यथा कामप्रति-षेधे काम्यविधेरेवं प्रामाण्यानुपपत्तिरिति चेत्। अननुष्ठेयत्वेऽनुष्ठातुर-

---

१ घ. ज. पकारा°। २ घ. ज. °निषेध। ३ छ. °त्कामस्य प्र°। ४ क. ख. ञ. ट. °पि विरो°। ५ घ. ञ. ण. °रोधकमर्था°। ६ ढ. ण. °ज्ञान°। ७ क. ग. घ. ज. °ना प्रतिषेधवि°। ८ क. ख. ङ. च. ढ. थैत्व°। ९ च. °वस्वनयैव क°। १० ग. झ. °त्वेवं। ११ क. ग. घ. छ. ज. °रोधः। य°। १२ क. घ. ङ. छ. ज. झ. ढ. °धेस्तथा प्रा°। १३ ग. °रवेम्। अ°। १४ च. ङ. °त्तिरेवेति।

भावादनुष्ठानविध्यानर्थक्यादप्रामाण्यमेवं कर्मविधीनामिति चेत्। न। प्रागात्मज्ञानात्प्रवृत्त्युपपत्तेः स्वाभाविकस्य क्रियाकारकफलभेदविज्ञानस्य प्रागात्मज्ञानात्कर्महेतुत्वमुपपद्यत एव। यथा कामविषये दोषविज्ञानोत्पत्तेः प्राक्काम्यकर्मप्रवृत्तिहेतुत्वं स्यादेव स्वर्गादीच्छायाः स्वाभाविक्यास्तद्वत्।

अभिप्रायमविद्वानाशङ्कते—कामप्रतिषेधविधिनेति। अनर्थकत्वज्ञानात्कामस्येति शेषः। प्रवृत्त्युपपत्तेः काम्येषु कर्मस्विति द्रष्टव्यम्। निरुद्धः स्यात्काम्यविधिरित्यध्याहर्तव्यम्। गूढाभिसंधिः सिद्धान्ती ब्रूते—भवत्विति। पुनरभिप्रायमप्रतिपद्यमानश्चोदयति—यथेति। एवमिति ज्ञानेन कर्मविधिनिरोधे सतीति यावत्। तत्प्रामाण्यानुपपत्तिरिति शेषः। तदेव चोद्यं विशदयति—अननुष्ठेयत्व इति। तेषामनुष्ठेयानामग्निहोत्रादीनां कर्मणां ये विधयस्तेषामिति यावत्। सिद्धान्ती स्वाभिसंधिमुद्घाटयन्नुत्तरमाह—नेत्यादिना। उपपत्तिमेवोपदर्शयति—स्वाभाविकस्येति। तदेव दृष्टान्तेन स्पष्टयति—यथेति।

तथा सत्यनर्थार्थौ वेद इति चेत्। न। अर्थानर्थयोरभिप्रायतन्त्रत्वात्। मोक्षमेकं वर्जयित्वाऽन्यस्याविद्याविषयत्वात्। पुरुषाभिप्रायतन्त्रौ ह्यर्थानर्थौ। मरणादिकाम्येष्टिदर्शनात्। तस्माद्यावदात्मज्ञानविधेराभिमुख्यं तावदेव कर्मविधयः। तस्मान्नाऽऽत्मज्ञानसहभावित्वं कर्मणामित्यतः सिद्धमात्मज्ञानमेवामृतत्वसाधनमेतावदरे खल्वमृतत्वमिति। कर्मनिरपेक्षत्वाज्ज्ञानस्य। अतो विदुषस्तावत्पारिव्राज्यं सिद्धं संप्रदानादिकर्मकारकजात्यादिशून्याविक्रियब्रह्मात्मदृढप्रतिपत्तिमात्रेण वचनमन्तरेणाप्युक्तन्यायतः।

अज्ञानावस्थायामेव कर्मविधिप्रवृत्तिरित्यनिष्टमाशङ्कते—तथा सतीति। कर्मविधेरपि पुरुषाभिप्रायवशात्पुरुषार्थोपयोगित्वसिद्धेर्नानिष्टापत्तिरित्युत्तरमाह—नार्थेति। अर्थस्य पुरुषाभिप्रायतन्त्रत्वे मोक्षस्यापि वास्तवं पुरुषार्थत्वं न स्यादित्याशङ्क्याऽऽह—मोक्षमिति। अर्थानर्थयोरभिप्रायतन्त्रत्वं साधयति—पुरुषेति। मरणं महाप्रस्थानमित्यादि काम्यं कृत्वा जीवदवस्थायामेव महाभारतादाविष्टिविधानं दृष्टमतोऽर्थानर्थावभिप्रायतन्त्रकौ वेत्यर्थः। कर्मविधीनामात्मज्ञानात्प्राचीनत्वं प्रतिपादितमुपसंहरति—तस्मादिति। तथाऽपि प्रकृते किं यावत्तदा-

१ क. च. °व तत्कर्म°। २ च. ढ. °त्माविज्ञा°। ३ क. °ति। एवमिति। ए°। ञ. °ति। एवमिति। ज्ञा°। ढ. °ति। तथेति। ए°। ४ झ. °र्थौ वे°। ५ झ. °विरोधात्°। ६ ख. घ. ङ. °त्यतो युक्तमवधारणं सि°। ७ क. ग. घ. च. छ. ज. झ. ढ. °नमात्रे°। ८ ग. घ. ज. °मता°। ९ च. ढ. °त्वादात्मज्ञान°।

ह–तस्मान्नेति । तत्र प्रमाणमाह–इत्यत इति । अतःशब्दार्थं स्फुटयति–कर्मेति । ज्ञानस्य कर्मविरोधित्वे तन्निरपेक्षत्वे च सिद्धे फलितमाह–अत इति । आत्मज्ञानस्यामृतत्वहेतुत्वाभ्युपगमादित्यादेरुक्तन्यायादात्मसाक्षात्कारस्य केवलस्य कैवल्यकारणत्वसिद्धेः सति तस्मिञ्जीवन्मुक्तस्य कर्मानुष्ठानावकाशात्तदुद्देशेन प्रवृत्तस्याधीतवेदस्य विदितपदपदार्थस्य परोक्षज्ञानवतस्तन्मात्रेण प्रमाणापेक्षामन्तरेण सिद्धं सर्वकर्मत्यागलक्षणं पारिव्राज्यमेष एव विद्वत्संन्यासो न त्वपरोक्षज्ञानवतः प्रारब्धफलप्राप्तिमन्तरेणानुष्ठेयं किंचिदस्तीति भावः । विध्यविषयत्वाज्जातसाक्षात्कारस्य कथं पारिव्राज्यं तत्राऽऽह–वचनमिति । उक्तन्यायः शान्तादिवाक्यसूचितः । विधिं विनाऽपि फलभूतं पारिव्राज्यमित्यर्थः ।

तथाच व्याख्यातमेतद्येषां नोऽयमात्माऽयं लोक इति हेतुवचनेन पूर्वे विद्वांसः प्रजामकामयमाना व्युत्तिष्ठन्तीति पारिव्राज्यं विदुषामात्मलोकावबोधादेव । तथाच विविदिषोरपि सिद्धं पारिव्राज्यम् । "एतमेवाऽऽत्मानं लोकमिच्छन्तः प्रव्रजन्ति" इति वचनात् । कर्मणां चाविद्वद्विषयत्वमवोचाम । अविद्याविषये चोत्पत्त्यादिविकारसंस्कारार्थानि कर्माणीत्यतः । आत्मसंस्कारद्वारेणाऽऽत्मज्ञानसाधनत्वमपि कर्मणामवोचाम यज्ञादिभिर्विविदिषन्तीति ।

सत्यां जिज्ञासायां कर्मत्यागो न शक्यते निषेद्धुमिति वदन्विविदिषासंन्यासं साधयति–तथा चेत्यादिना । एतत्पारिव्राज्यमिति संबन्धः । विदुषामात्मसाक्षात्कारार्थिनां तत्परोक्षनिश्चयवतामिति यावत् । आत्मलोकस्यावबोधोऽपि व्युत्थानहेतुः परोक्षनिश्चय एव । सतीतरस्मिन्फलावस्थस्य व्युत्थानाद्यनुष्ठानायोगात्तदन्तरेण तत्प्राप्त्यभावाच्च । उक्तं हि शमादिवदुपरतेरपि तत्त्वसाक्षात्कारे नियतं साधनत्वं तदाह–तथा चेति । विविदिषुर्नामाधीतवेदो विचारप्रयोजकापातिकज्ञानवान्मुमुक्षुर्मोक्षसाधनं तत्त्वसाक्षात्कारमपेक्षमाणस्तस्मिन्परोक्षनिश्चयेनापि शून्यो विवक्षितस्तस्य कथं पारिव्राज्यमत आह–एतमेवाऽऽत्मानमिति । इतश्च विविदिषासंन्यासोऽस्तीत्याह–कर्मणां चेति । तथा चाविद्याविरुद्धां विद्यामिच्छन्नशेषाणि कर्माणि शरीरधारणमात्रकारणेतराणि त्यजेदिति शेषः । विविदिषासंन्यासे हेत्वन्तरमाह––अविद्याविषये चेति । चतुर्विधफलानि कर्माण्यविद्याविषये परं संभवन्ति न त्वसाध्ये वस्तुनीत्यतो

---

१ ख. ढ. °णत्वे सिद्धे स° । २ क. ख. ढ. °ति वि° । ३ ग. सिद्धमेतदुक्तन्यायात् । ए° । ४ क. ख. ञ. ढ. ण. °ना । वि° । ५ क. ञ. °ति । एतत्पारि ज्यमिति संबन्धः । वि° । ख. ढ. ण. °ति । एतत्पारिव्राज्यमिति संबन्धः । उक्तन्यायः शान्तादिवाक्यसूचितः। वि° । ६ ञ. °पथपराणि सं° ।

वस्तुजिज्ञासायां त्याज्यानि तानीत्यर्थः। कथं तर्हि कर्मणामुत्तमफलान्वयस्तत्राऽऽह—आत्मेति। बुद्धिशुद्धिद्वारा ज्ञानहेतुत्वात्कर्मणामस्ति प्रेणाड्या परमपुरुषार्थान्वय इत्यर्थः।

अथैवं सत्यविद्वद्विषयाणामाश्रमकर्मणां बलाबलविचारणायांमात्मज्ञानोत्पादनं प्रति यमप्रधानानाममानित्वादीनां मानसानां च ध्यानज्ञानवैराग्यादीनां संनिपत्योपकारकत्वं। हिंसारागद्वेषादिबाहुल्यांबहुक्लिष्टकर्मविमिश्रिता इतर इत्यतः पारिव्राज्यं मुमुक्षूणां प्रशंसन्ति—

" त्याग एव हि सर्वेषामुक्तानामपि कर्मणाम्।
वैराग्यं पुनरेतस्य मोक्षस्य परमोऽवधिः " ॥
किं ते धनेन किमु बन्धुभिस्ते
किं ते दारैर्ब्राह्मण यो मरिष्यसि।
आत्मानमन्विच्छ गुहां प्रविष्टं
पितामहास्ते क्व गंताः पिता च "।

एवं सांख्ययोगशास्त्रेषु च संन्यासो ज्ञानं प्रति प्रत्यासन्न उच्यते। कामप्रवृत्त्यभावाच्च। कामप्रवृत्तेर्हि ज्ञानप्रतिकूलता सर्वशास्त्रेषु प्रसिद्धा। तस्माद्विरक्तस्य मुमुक्षोर्विनाऽपि ज्ञानेन ब्रह्मचर्यादेव प्रव्रजेदित्याद्युपपन्नम्।

' संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ '

इति स्मृतेर्विविदिषूणां मुमुक्षूणां कथं पारिव्राज्यस्यैव कर्तव्यत्वमित्याशङ्क्याऽऽह—अथेति। यथा विद्वत्संन्यासस्तथा विविदिषासंन्यासेऽपि यथोक्तेनीत्या संभविते सतीति यावत्। आत्मज्ञानोत्पादनं प्रत्याश्रमधर्माणां बलाबलविचारणा नामान्तरङ्गत्वबहिरङ्गत्वचिन्ता तस्यां सत्यामित्यर्थः अहिंसास्तेयब्रह्मचर्यादयो यमाः। वैराग्यादीनामित्यादिशब्देन शमादयो गृह्यन्ते। इतरे नियमप्रधाना आश्रमधर्मा बहुना क्लिष्टेन पापेन कर्मणा संकीर्णा हिंसादिप्राचुर्यात्।

" यमान्पतत्यकुर्वाणो नियमान्केवलान्भजन् '

इति स्मृतेस्तस्मात्पूर्वेषामन्तरङ्गत्वमुत्तरेषां बहिरङ्गत्वमित्याशयेनाऽऽह—हिंसेति। कर्मयोगापेक्षया तत्त्यागस्याधिकारिविशेषं प्रति प्रशस्तत्वमुपसंहरति—

---

१ घ. ञ ण. प्रनाड्या। २ ग. छ. °याऽऽत्म°। ३ ख. घ. ङ. झ. °मानियमप्र°। ४ ख. °नवै°। ५ म. °रागादिदोषना°। ६ ग. °हुकष्ट°। घ. °हुप्रकृष्ट°। ङ. °हुकृष्ट°। ७ क. ख. ग. छ. ज. झ. ढ. °मो विधिः। ८ घ. °ह्मणैर्वा मनुष्यैः। आ°। ९ च. °महते। १० च. ढ. गतः। ११ ख. ण. °क्तरीत्या। १२ ञ. प्रकृष्टेन। ण. कृष्णेन।

इत्यत इति । तत्पदंसामकारमेवाभिनयति—त्याग एवेति । उक्तानामग्निहोत्रादीनामश्रमैरनुष्ठेयत्वेनेति शेषः । तत्त्यागे हेतुमाह—वैराग्यमिति । मोक्षस्य कर्मपरित्यागस्येत्यर्थः। उत्तमपुरुषार्थार्थिनः संन्यासद्वारा श्रवणादि कर्तव्यमित्यत्र वाक्यान्तरमुदाहरति—किं ते कर्मणेति । अथ पित्रादिभिर्गतं पन्थानमन्वेषयामि नाऽऽत्मानमित्याशङ्क्याऽऽह—पितामहा इति । विविदिषासंन्यासे सांख्यादिसंपत्तिमाह—एवमिति । यथाऽऽहुः सांख्याः—

' ज्ञानेन चापवर्गो विपर्ययादिष्यते बन्धः ' इति ।
विवेकख्यातिपर्यन्तमज्ञानोच्चित्तचेष्टितम् ' इति च ।
अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानम् ' इति च ।

योगशास्त्रविदश्चाऽऽहुः—' अभ्यासवैराग्याभ्यां तन्निरोधः ' इति । तत्र वैराग्येण विषयस्रोतः परिखिली क्रियते । विवेकदर्शनाभ्यासेन कल्याणस्रोत उत्पाद्यत इति च । ' दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम् ' इति च । इतश्च संन्यासो ज्ञानं प्रति प्रत्यासन्नं इत्याह—कामेति । संन्यासिनः कामप्रवृत्त्यभावेऽपि कथं संन्यासस्य ज्ञानं प्रति प्रत्यासन्नत्वमित्याशङ्क्याऽऽह—कामप्रवृत्तेरिति । " इति तु कामयमानः "

" काम एष क्रोध एष रजोगुणसमुद्भवः ।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् "

इत्यादीनि शास्त्राणि । विविदिषासंन्यासमुपसंहरति—तस्मादिति । यथोक्तस्याधिकारिणो दर्शितया विधया ज्ञानेन विनाऽपि संन्यासस्य प्राप्तत्वाद्ब्रह्मचर्यादेवेत्यादि विधिवाक्यमुपपन्नमिति योजना ।

ननु सावकाशत्वादनधिकृतविषयमेतादित्युक्तं यावज्जीवश्रुत्युपरोधात् । नैष दोषः । नितरां सावकाशत्वाद्यावज्जीवश्रुतीनाम् । अविदुत्काम्यकर्तव्यतां ह्यवोचाम सर्वकर्मणाम् । न तु निरपेक्षमेव जीवननिमित्तमेव कर्तव्यं कर्म । प्रायेण हि पुरुषाः कामबहुलाः । कामश्चानेकविषयोऽनेककर्मसाधनसाध्यश्च । अनेकफलसाधनानि च वैदिकानि कर्माणि द्वाराग्निसंबन्धपुरुषकर्तव्यानि पुनः पुनश्चानुष्ठीयमानानि बहुफलानि कृष्यादिवद्वर्षशतसमाप्तीनि च गार्हस्थ्ये वाऽरण्ये वाऽतस्तदपेक्षया यावज्जीवश्रुतयः । " कुर्वन्नेवेह कर्माणि " इति च मन्त्रवर्णः ।

अथ पारिव्राज्यविधानमनधिकृतविषयमुचितं तथा सति सावकाशत्वान्न

---

१ घ. ञ. °मह इ° । २ क. ख. ञ. ङ. °नान्वितचे° । ३ ख. ठ. कवैल्यमुपपद्यते । ४ घ. ञ. ण. °तः खि° । ५ क. ण. °सज्ञ व° । ६ ख. °मित्तं क° ।

स्वाधिकृतविषयं यावज्जीवश्रुतिविरोधात्तस्या निरवकाशत्वात्तावकाश निरवकाशयोश्च निरवकाशस्यैव बलवत्त्वादित्युक्तं शङ्कते—नन्विति। यावज्जीवश्रुतेर्निरवकाशत्वं दूषयति—नैष दोष इति। कथमतिशयेन तावकाशत्वं तत्राऽऽह—अविद्वदिति। जीवनमात्रं निमित्तीकृत्य चोदितं कर्म कथं कामिना कर्तव्यं तत्राऽऽह—न त्विति। प्रत्यवायपरिहारादेरिष्टत्वादित्यर्थः। अनुष्ठातृस्वरूपनिरूपणायामपि न जीवनमात्रं निमित्तीकृत्य कर्म कर्तव्यमित्याह—आत्मेति। तथाऽपि नित्येषु कर्मसु न कामनिमित्ता प्रवृत्तिस्तत्र काम्यमानफलाभावादित्याशङ्क्याऽऽह—कामश्चेति। प्रत्यवायपरिहारादेरपि कामितत्वं युक्तमिति भावः। तथाऽपि नित्ये कर्मणि काम्यमानं फलं विध्युद्देशे किंचिन्न श्रुतमित्याशङ्क्याऽऽह—अनेकेति। कर्मभिरनेकैः साधनैर्यद्दुरितानिर्बहणादि साध्यं तदेवास्याश्रुतमपि विध्युद्देशे साध्यं भवति।

यद्यद्धि कुरुते जन्तुस्तत्तत्कामस्य चेष्टितम्।

इति स्मृतेस्तद्व्यतिरेकेण प्रवृत्त्यनुपपत्तेरतो नित्येऽपि कामितं फलमस्त्वित्यर्थः। ननु वैदिकानां कर्मणां निगतफलत्वात्कामोऽपि नियतफलो युक्तस्तथाच नित्येषु तदभावान्न कामितं फलं सेत्स्यतीति तत्राऽऽह—अनेकफलेति। अथ कानि पुरुषमात्रकर्तव्यानीति कुतो विवक्षितसंन्याससिद्धिस्तत्राऽऽह—दारेति। तस्मादविरक्तेनापि गृहिणा सकृदेव तान्यनुष्ठेयानि तावता विधेश्चरितार्थत्वात्तथाच कथं फलबाहुल्यमित्याशङ्क्याऽऽह—पुनः पुनश्चेति। यावज्जीवोपबन्धादावृत्तिसिद्धिरिति भावः। तर्हि यावज्जीवश्रुतिवशादशेषाश्रमानुष्ठेयान्यनवरतमग्निहोत्रादीनि कुर्वतो यथोक्तसंन्यासोपपत्तिरित्याशङ्क्याऽऽह—वर्षशतेति। अविरक्तगृहिविषयत्वं श्रुतिमन्त्रयोरित्युपसंहरति—अत इति।

तस्मिंश्च पक्षे विश्वजित्सर्वमेधयोः कर्मपरित्यागः। यस्मिंश्च पक्षे यावज्जीवानुष्ठानं तदा श्मशानान्तत्वं भस्मान्तता च शरीरस्य। इतरवर्णापेक्षया वा यावज्जीवश्रुतिः। न हि क्षत्रियवैश्ययोः पारिव्राज्यप्रतिपत्तिरस्ति। तथा मन्त्रैर्यस्योदितो विधिः। ऐकाश्रम्यं त्वाश्रार्या इत्येवमादीनां क्षत्रियवैश्यापेक्षत्वम्। तस्मात्पुरुषसामर्थ्यज्ञानवैराग्यकामाद्यपेक्षया व्युत्थानविकल्पक्रमपारिव्राज्यप्रतिपत्तिप्रकारा न विरुध्यन्ते। अनधिकृतानां च पृथग्विधानात्पारिव्राज्यस्य स्नातको

१ क. ख. ढ. कर्त°। २ ख. ग. ञ. ढ. ण. साधितैर्ग°। ३ क. ग. °देशसा°। ४ घ. ढ. ण. °त्स्यतीति। ५ क. ख. ग. घ. ङ. छ. ज. यस्मिंस्तु। ६ ख. ञ. न्तश्च च। ७ ङ. °ता श°। ८ ग. घ. च. ढ. °या च या°।

वाऽज्ञातको वोत्सन्नाग्निरनग्निको वेत्यादिना । तस्मात्सिद्धान्याश्रमान्तराण्यधिकृतानामेव ॥ १५ ॥

इति श्रीमद्बृहदारण्यकोपनिषद्भाष्ये चतुर्थाध्यायस्य पञ्चमं ब्राह्मणम् ॥ ५ ॥

यत्तु यावज्जीवश्रुतेरपवादो विध्यन्तरमेधयोरिति तदपि कामिगृहिविषयत्वाच्च ब्रह्मचर्यादेव मन्त्रजेदितिविध्यपवादकमित्याह—तस्मिन्श्चेति । परोक्षं लिङ्गमपि बहिष्पवत्वाच्च तस्य वेदस्य कर्मावबोधकत्वं द्योतयतीत्याह—यस्मिन्श्चेति । यावज्जीवश्रुतेर्गत्यन्तरमाह—इतरेति । कथं ता क्षत्रियवैश्यविषयत्वेन प्रवृत्ता वैधर्मिकाणामपि पारिव्राज्यपरिग्रहादित्याशङ्क्याऽऽह—न हीति । यावज्जीवश्रुतिर्यदैकाग्र्यभङ्गापविषादकरस्मृतीनामपि क्षत्रियादिविषयत्वमाह—तथेति । श्रुतिस्मृतीनां कर्मावबोधकत्वात्तार्थानां भिन्नविषयत्वे फलितमुपसंहरति—तस्मादिति । यत्तु काण्वकुण्ड्यादयोऽपि कर्मण्यनधिकृता अनुज्ञया एव श्रुत्येति तत्राऽऽह—अनधिकृतानां चेति । तत्यागेन भार्यायां त्वकाग्निरुत्तराग्निस्त्वस्यामतत्यां परित्यक्काग्निरनग्निक इति भेदः । आश्रमान्तरविषयश्रुतिस्मृतीनामनधिकृतविषयत्वाभावे तिरश्चमर्थं निगमयति—तस्मादिति ॥ १५ ॥

इति बृहदारण्यकोपनिषद्भाष्यटीकायां चतुर्थाध्यायस्य पञ्चमं ब्राह्मणम् ॥ ५ ॥

(अथ चतुर्थाध्यायस्य षष्ठं ब्राह्मणम्) ।

अथ वꣳशः पौतिमाष्यो गौपवनाद्गौपवनः पौतिमाष्यात्पौतिमाष्यो गौपवनाद्गौपवनः कौशिकात्कौशिकः कौण्डिन्यात्कौण्डिन्यः शाण्डिल्याच्छाण्डिल्यः कौशिकाच्च गौतमाच्च गौतमः ॥ १ ॥

आग्निवेश्यादाग्निवेश्यो गार्ग्यांद्गार्ग्यो गार्ग्या-

---

१ ख. °ग्निको वाऽन° । २ घ. ज. °दि । त° । ३ क. °कुण्ठान्वाद° । ण. °कुण्डाद° । ४ ग. ङ्गान्वाद° ।

द्वाग्र्यो गौतमाद्गौतमः सैतवात्सैतवः पाराशर्या-
यणात्पाराशर्यायणो गार्ग्यायणाद्गार्ग्यायण उद्दा-
लकायनादुद्दालकायनो जाबालायनाज्जाबालायनो
माध्यंदिनायनान्माध्यंदिनायनः सौकरायणात्सौ-
करायणः काषायणात्काषायणः सायकायनात्सा-
यकायनः कौशिकायनेः कौशिकायनिः ॥ २ ॥
घृतकौशिकाद्घृतकौशिकः पाराशर्यायणात्पाराश-
र्यायणः पाराशर्यात्पाराशर्यो जातूकर्ण्याज्जातूकर्ण्य
आसुरायणाच्च यास्काच्चाऽऽसुरायणस्त्रैवणेस्त्रैवणि-
रौपजन्धनेरौपजन्धनिरासुरेरासुरिर्भारद्वाजाद्भारद्वाज
आत्रेयादात्रेयो माण्टेर्माण्टिर्गौतमाद्गौतमो गौतमा-
द्गौतमो वात्स्याद्वात्स्यः शाण्डिल्याच्छाण्डिल्यः
कैशोर्यात्काप्यात्कैशोर्यः काप्यः कुमारहारितात्कु
मारहारितो गालवाद्गालवो विदर्भीकौण्डिन्याद्विद-
र्भीकौण्डिन्यो वत्सनपातो बाभ्रवाद्वत्सनपाद्बाभ्रवः
पथः सौभरात्पन्थाः सौभरोऽयास्यादाङ्गिरसादयास्य
आङ्गिरस आभूतेस्त्वाष्ट्रादाभूतिस्त्वाष्ट्रो विश्वरूपा-
त्त्वाष्ट्राद्विश्वरूपस्त्वाष्ट्रोऽश्विभ्यामश्विनौ दधीच आ-
थर्वणाद्दध्यङ्ङाथर्वणोऽथर्वणो दैवाद्दथर्वा दैवो
मृत्योः प्राध्वꣳसनान्मृत्युः प्राध्वꣳसनः प्रध्वꣳसनात्प्र-
ध्वꣳसन एकर्षेरेकर्षिर्विप्रचित्तिर्व्यष्टेर्व्यष्टिः सनारोः
सनारुः सनातनात्सनातनः सनगात्सनगः परमेष्ठिनः
परमेष्ठी ब्रह्मणो ब्रह्म स्वयंभु ब्रह्मणे नमः ॥ ३ ॥

---

१ घ. ङ. ज. ट. ठ. ड. ढ. °र्यो गार्ग्याद्गार्ग्यो गौ° । २ छ. ड. ढ. °घन्व° । ३ छ. ठ. ड. °पचन्ध° । ४ ग. °हारीता° । ५ ग. °हारीतो ।

इति बृहदारण्यकोपनिषदि चतुर्थाध्यायस्य
षष्ठं ब्राह्मणम् ॥ ६ ॥
इति श्रीबृहदारण्यकोपनिषदि चतुर्थोऽध्यायः ॥ ४ ॥
बृहदारण्यककमेण षष्ठोऽध्यायः ॥ ६ ॥

अथानन्तरं याज्ञवल्कीयस्य काण्डस्य वंश आरभ्यते यथा मधुकाण्डस्य वंशः । व्याख्यानं तु पूर्ववत् । ब्रह्म स्वयंभु ब्रह्मणे नमॐमिति ॥ १ ॥ २ ॥ ३ ॥

इति श्रीमद्बृहदारण्यकोपनिषद्भाष्ये चतुर्थाध्यायस्य
षष्ठं ब्राह्मणम् ॥ ६ ॥
इति श्रीमद्गोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीशंकरभगवतः कृतौ बृहदारण्यकोपनिषद्भाष्ये
चतुर्थोऽध्यायः ॥ ४ ॥

तदेवं विचारद्वारा श्रुतिस्मृतीनामापाततो विरुद्धानामविरोधं प्रतिपाद्याथ वंश इत्यस्यार्थमाह—अथेति । साङ्गोपाङ्गस्य सफलस्याऽऽत्मविज्ञानस्य प्रवचनानन्तर्यमथशब्दार्थमाह—अनन्तरमिति । यथा प्रथमान्तः शिष्यो गुरुस्तु पञ्चम्यन्त इति चतुर्थान्ते व्याख्यातं तथाऽत्रापीत्याह—व्याख्यानं त्विति । ईत्यागमोपपत्तिभ्यां तसंन्यासं सेतिकर्तव्यताकमात्मज्ञानममृतत्वसाधनं तिद्धमित्युपसंहर्तुमितिशब्दः । परिसमाप्तौ मङ्गलमाचरति—ब्रह्मेति ॥ १ ॥ २ ॥ ३ ॥

इति बृहदारण्यकोपनिषद्भाष्यटीकायां चतुर्थाध्यायस्य
षष्ठं वंशब्राह्मणम् ॥ ६ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छुद्धानन्दभगवत्पूज्यपादशिष्यस्य श्रीमद्भगवदानन्दज्ञानविरचितायां श्रीमद्बृहदारण्यकोपनिषद्भाष्यटीकायां चतुर्थोऽध्यायः ॥ ४ ॥

---

१ ख. ङ. °यंम्विति ह ब्र° । २ ख. ङ. °नमः ॥ १ ॥ २ ॥ ॥ ३ घ. °म इति । ४ क. इत्थमाग° ।

अथ पञ्चमाध्यायस्य प्रथमं ब्राह्मणम् ।

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते । ॐ खं ब्रह्म । खं पुराणं वायुरं खमिति ह स्माऽऽह कौरव्यायणी-पुत्रो वेदोऽयं ब्राह्मणा विदुर्वेदैनेन यद्वेदितव्यम् ।

इति बृहदारण्यकोपनिषदि पञ्चमाध्यायस्य प्रथमं ब्राह्मणम् ॥ १ ॥

पूर्णमद इत्यादि खिलकाण्डमारभ्यते । अध्यायचतुष्टयेन यदेव साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरो निरुपाधिकोऽशनायाद्यतीतो नेति नेतीति व्यपदेश्यो निर्धारितो यद्विज्ञानं केवलममृतत्वसाधनम-धुना तस्यैवाऽऽत्मनः सोपाधिकस्य शब्दार्थादिव्यवहारविषयापन्नस्य पुरस्तादनुक्तान्युपासनानि कर्मभिरविरुद्धानि प्रकृष्टाभ्युदयसाधनानि क्रममुक्तिभाञ्जि च तानि वक्तव्यानीति परः संदर्भः सर्वोपासनशेषत्वे-नोंकारो दमं दानं दयामित्येतानि च विधित्सितानि । पूर्णमदः पूर्णं न कुतश्चिद्व्यावृत्तं व्यापीत्येतत् । निष्ठा च कर्तरि द्रष्टव्या । अद इति परोक्षाभिधायि सर्वनाम तत्परं ब्रह्मेत्यर्थः । तत्संपूर्णमाकाशवद्व्यापि निरन्तरं निरुपाधिकं च । तदेवेदं सोपाधिकं नामरूपस्थं व्यवहारापन्नं पूर्णं स्वेन रूपेण परमात्मना व्याप्येव नोपाधिपरिच्छिन्नेन विशेषा-त्मनाँ । तदिदं विशेषापन्नं कार्यात्मकं ब्रह्म पूर्णात्कारणात्मन उदच्यत

[illegible] पूर्णमादाय [illegible] विद्यया ऽविद्याकृतं भूतमात्रोपाधिसंसर्गजन्यत्वाद्वमास [illegible] पूर्णमेवानन्तरमबाह्यं प्रज्ञानघनैकरसस्वभावं केवलं ब्रह्मावशिष्यते ।

---

१ क. च खानि ता° । २ ख. घ. ञ. °ष्ठा ब्र° । ३ क. इत्यप° । ४ ख. छ. °ना । तत्त्वंपदयोः क्रमेण लक्ष्यांशमुक्त्वा तयोरेव वाच्यांशं कथयंस्त्वंपदार्थस्य पूर्णत्वे हेतुमाह पू-र्णादिति । त° । ङ च. ढ. °ना । एवं तत्त्वंपदयोः क्रमेण लक्ष्यांशमुक्त्वा तयोरेव वाच्यांशं कथयंस्त्वंपदार्थस्य पूर्णत्वे हेतुमाह पूर्णादिति । त° । ङ. ग. घ. ञ. °त । तथ्य° । ६ ख. छ. °नोदच्य° । ७ क. ग. घ. ङ. ज. झ. °वं न ज° । ८ क. ग. च. ञ. झ. ढ. °मा-पाद्य । ९ क. च. झ. °जन्य° । १० घ. ज. ट. °न्यथाव° ।

पूर्वस्मिन्नध्याये ब्रह्मात्मैक्यं सफलं साङ्गोपाङ्गं वादन्यायेनोक्तमिदानीं काण्डान्तरवक्तारंप्रति—पूर्णमिति । पूर्णाध्यायेनैव सर्वस्य वक्तव्यस्य समाप्तत्वादलं खिलकाण्डारम्भेणेत्याशङ्क्य पूर्णमुक्तं परिशिष्टं वस्तु खिलशब्दवाच्यमस्तीत्याह—अध्यात्मतत्त्वेनेति । तत्त्वान्तर इत्युक्त इति शेषः । अमृतत्वसाधनं निर्धारितमिति पूर्वेण संबन्धः । शब्दार्थादित्यादिशब्देन मानसेषादिग्रहः । दर्शादिशब्दोदित्युक्तानीति शेषः । ॐकारादि यत्र साधनत्वेन विधिरितं तत्पूर्वोक्तमैक्यज्ञानमनुवदति—पूर्णमिति । अवयवार्थमुक्त्वा समुदायार्थमाह—तत्संपूर्णमिति । अदः पूर्णमित्यनेन लक्ष्यं तत्पदार्थं दर्शयित्वा त्वंपदार्थं दर्शयति—तदेवेति । कथं तीपाधिकस्य पूर्णत्वमित्याशङ्क्याऽऽह—स्वेनेति । व्यावर्त्यमाह—नोपाधीति । न तत्तदुपहितेन विशिष्टेन रूपेण पूर्णतां दर्शयामः किंतु केवलेन स्वरूपेणेत्यर्थः । लक्ष्यौ तत्पदार्थावुक्त्वा तावेव वाक्ये कथयति—तदिदमिति । कथं कार्यात्मनोर्विरुध्यमानस्य पूर्णत्वमित्याशङ्क्याऽऽह—यद्यपीति । लक्ष्यपदार्थैक्यज्ञानफलमनुवदति—पूर्णस्येति ।

यदुक्तं ब्रह्म वा इदमग्र आसीत्तदात्मानमेवावेत्तस्मात्तत्सर्वमभवदित्येषोऽस्य मन्त्रस्यार्थः । तत्र ब्रह्मेत्यस्यार्थः पूर्णमद इति । इदं पूर्णमिति ब्रह्म वा इदमग्र आसीदित्यस्यार्थः । तथा च श्रुत्यन्तरम्—" यदेवेह तदमुत्र यदमुत्र तदन्विह " इति । अतोऽदःशब्दवाच्यं पूर्णं ब्रह्म तदेवेदं पूर्णं कार्यस्थं नामरूपोपाधिसंयुक्तमविद्ययोद्रिक्तम् । तस्मादेव परमार्थस्वरूपादन्यदिव प्रत्यवभासमानम् । यद्यदात्मानमेव परं पूर्णं ब्रह्म विदित्वाऽहमदः पूर्णं ब्रह्मास्मीत्येवं पूर्णमादाय तिरस्कृत्यापूर्णस्वरूपतामविद्याकृतां नामरूपोपाधिसंपर्कजामेतया ब्रह्मविद्यया पूर्णमेव केवलमवशिष्यते । तथा चोक्तम्—"तस्मात्तत्सर्वमभवत्" इति ।

उपक्रमोपसंहारयोरैकरूप्यमैक्ये श्रुतितात्पर्यलिङ्गं सांगिरसे—यदुक्तमिति । कथं पूर्णकाण्डिकाया ब्रह्मकाण्डिकया सहैकार्थत्वेनैकवाक्यत्वमित्याशङ्क्य तद्व्युत्पादयति—तत्रेत्यादिना । उपक्रमोपसंहारतिद्धे ब्रह्मात्मैक्ये कठश्रुतिं संवादयति तथा चेति । ब्रह्मात्मनोरैक्यमुक्तमुपजीव्य वाक्यार्थमाह—अत इति । पूर्णं यदब्रह्मेति यच्छब्दो दृष्टव्यः । उक्तमेव व्यनक्ति—तस्मादेवेति । संसारावस्थां दर्शयित्वा मोक्षावस्थां दर्शयति—तदेदात्मानमिति । उक्ते विद्याफले वाक्योपक्रममनुकूलयति—तथा चोक्तमिति ।

---

१ घ. ङ. ण. °मित्यादिना । अ° । २ ख. छ. ट. °वुक्तौ ता° । ३ घ. ङ. ढ. °नेदंत्त ब्रह्मास्मीति तस्मा° ।

यः सर्वोपनिषदर्थो ब्रह्म स एषोऽनेन मन्त्रेणाद्यत्व उपरराम्भ्यार्थम्। ब्रह्मविद्यासाधनत्वेन हि सर्वाणि कर्मकाण्डानि विधित्सितानि चित्तैकाग्र्यसंपादनात्सर्वोपासनाङ्गभूतानि च।

न केवलं ब्रह्मकाण्डकर्मकाण्डयोरन्यतरैकावयवार्थं किंतु सर्वोपनिषदभिहितमित्याह—यः सर्वोपनिषदर्थ इति। अनुवादफलमाह—उपदेक्ष्यति। तदेव स्फुटयति—ब्रह्मविद्येति। तस्मादुक्तो ब्रह्मणोऽनुवाद इति शेषः। कथं पुनः सर्वोपासनशेषत्वेन विधित्सितत्वमोंकारस्यानुवक्ष्यत आह—चित्तेति।

अत्रैके वर्णयन्ति—पूर्णात्कारणात्पूर्णं कार्यमुद्रिच्यते। उद्रिक्तं कार्यं वर्तमानकालेऽपि पूर्णमेव परमार्थवस्तुभूतं द्वैतरूपेण। पुनः प्रलयकाले पूर्णस्य कार्यस्य पूर्णतामात्मायाऽऽत्मनि चित्वा पूर्णमेवावशिष्यते कारणरूपम्। एवमुत्पत्तिस्थितिप्रलयेषु त्रिष्वपि कालेषु कार्यकारणयोः पूर्णत्वम्। सा चैकैव पूर्णता कार्यकारणयोर्भेदेन व्यपदिश्यते। एवं च द्वैताद्वैतात्मकमेकं ब्रह्म। यथा किल समुद्रो जलतरङ्गफेनबुद्बुदाद्यात्मक एव। यथा च जलं सर्वं तद्रूपाश्च तरङ्गफेनबुद्बुदादयः समुद्रात्मभूता एवाऽऽविर्भावतिरोभावधर्मिणः परमार्थसत्या एव। एवं सर्वमिदं द्वैतं परमार्थसत्यमेव जलतरङ्गादिस्थानीयं समुद्रजलस्थानीयं तु परं ब्रह्म। एवं च किल द्वैतस्य सत्यत्वे कर्मकाण्डस्य प्रामाण्यं यदा पुनर्द्वैतं द्वैतमिवाविद्याकृतं मृगतृष्णिकाजलवदनृतमद्वैतमेव परमार्थतस्तदा किल कर्मकाण्डं विषयाभावादप्रमाणं भवति। तथा च विरोध एव स्यात्। वेदैकदेशभूतोपनिषत्प्रमाणं परमार्थाद्वैतवस्तुप्रतिपादकत्वादप्रमाणं कर्मकाण्डमसद्द्वैतविषयत्वात्। तद्विरोधपरिहारेण श्रुत्यैतदुक्तं कार्यकारणयोः सत्यत्वं समुद्रवत्पूर्णमदः इत्यादिनेति।

अदितीयं ब्रह्मेत्युत्सर्गप्रवृत्तं शास्त्रं प्रलयावस्थब्रह्मविषयं सृष्टिशास्त्रं तु विशेषप्रवृत्तं तस्यापवादस्तदो हैवाद्रियत्वं ब्रह्म सर्वोपनिषदर्थस्येव ब्रह्मणेव सन्धेव संक्षिप्यत इति मतमुपन्यस्यन्नुत्थापयति—ब्रह्मेत्यादिना। कार्यकारणयोरुत्पत्तिकाले पूर्णत्वमुक्त्वा स्थितिकालेऽपि वदन्—उद्रिक्तमिति। यतश्चा-

---

१ स. छ. अत्र केचिदधिकं°। २ ग. °मेकेऽ। ३ ब. ग. छ. °मुद्रच्य°। ४ क. ब. °चित्वात्पूर्ण°। ५ क. ग. °दैनैव स्य°। ६ ब. क. ज. °त्मकं। ७ च. ट. °त्मं°। ८ क. स. च. छ. झ. ट. °सत्याः। एवं। ९ क. च. झ. ट. °सत्यादीत्यपि°। १० ब. ज. °दसत्यम°। ११ च. ज. °वत्त°। १२ ब. छ. ञ. ट. °ति। पुनः ब°।

ऽऽऽपि तयोः पूर्णत्वं दर्शयति—पुनरिति । कालभेदेन कार्यकारणयोरुक्तां पूर्णतां निगमयति—एवमिति । कार्यकारणे द्वे पूर्णे चेत्तर्हि कथमद्वैतसिद्धिरित्याशङ्क्याऽऽह—सा चेति । कथं तर्हि द्वयोरुक्तं पूर्णत्वं तदाह—कार्यकारणयोरिति । एका पूर्णता व्यपदिश्यते च द्वयोरिति स्थिते लब्धमर्थमाह—एवं चेति । एकं सनेकात्मकमिति विप्रतिषेधमाशङ्क्य दृष्टान्तेन निराचष्टे—यथा किलेति । एवमेकं ब्रह्मानेकात्मकमिति शेषः । ब्रह्मणो द्वैताद्वैतात्मकत्वेऽपि सत्यमद्वैतमसत्यमितरदित्याशङ्क्याऽऽह—यथा चेत्यादिना । द्वैतस्य परमार्थसत्यत्वे कर्मकाण्डश्रुतिमनुकूलयति—एवं चेति । विपक्षे दोषमाह—यदा पुनरिति । अस्तु कर्मकाण्डस्य प्रामाण्यं नेत्याह—तथा चेति । विरोधोऽध्ययनविधेरिति शेषः । तमेव विरोधं साधयति—वेदेति । कथं तर्हि विरोधस्य समाधिस्तत्राऽऽह—तद्विरोधेति ।

तदसत् । विशिष्टविषयापवादविकल्पयोरसंभवात् । न ह्यत्र सुविवक्षिता कल्पना । कस्मात् । यथा क्रियाविषय उत्सर्गप्राप्तस्यैकदेशेऽपवादः क्रियते । यथाऽहिंसन्सर्वभूतान्यन्यत्र तीर्थेभ्य इति हिंसा सर्वभूतविषयोत्सर्गेण निवारिता तीर्थे विशिष्टविषये ज्योतिष्टोमादावनुज्ञायते । न च तथा वस्तुविषय इहाद्वैतं ब्रह्मोत्सर्गेण प्रतिपाद्य पुनस्तदेकदेशेऽपवदितुं शक्यते । ब्रह्मणोऽद्वैतत्वादेवैकदेशानुपपत्तेः । तथा विकल्पानुपपत्तेश्च । यथाऽतिरात्रे षोडशिनं गृह्णाति नातिरात्रे षोडशिनं गृह्णातीति ग्रहणाग्रहणयोः पुरुषाधीनत्वाद्विकल्पो भवति । न त्विह तथा वस्तुविषये द्वैतं वा स्यादद्वैतं वेति विकल्पः संभवत्यपुरुषतन्त्रत्वादात्मवस्तुनः । विरोधाच्च द्वैताद्वैतयोरेकस्य । तस्मान्न सुविवक्षितेयं कल्पना ।

प्राप्तं मनुपपन्नप्रस्थानं प्रत्याचष्टे—तदसदिति । विशिष्टमद्वितीयं ब्रह्म तद्विषयोत्सर्गापवादयोर्विकल्पतदुच्चययोश्चासंभवं वक्तुं प्रतिज्ञाभागं विभजते—न हीति तत्र प्रश्नपूर्वकं हेतुं विवृणोति—कस्मादित्यादिना । यथेत्यादिग्रन्थस्य न च तथेत्यादिना संबन्धः । क्रियायामुत्सर्गापवादसंभावनामुदाहरति—यथेत्यादिना । तथाऽन्यत्रापि क्रियायामुत्सर्गापवादौ द्रष्टव्यावितीव शेषः । वैधर्म्यदृष्टान्तस्य दार्ष्टान्तिकमाह—न त्वेति । विषयभेदे सत्युत्सर्गापवादौ दृष्टौ न तावदद्वितीये ब्रह्मणि संभवतः । न हि ब्रह्माद्वयमेव जायते लीयते चेति संभाव-

---

१ क. °हिं तयो° । २ ञ. °धारेकं पू° । ३ स. घ. छ. ञ. ण. °कं दृष्ट्यात्म° । ४ च. ढ. °था न हिंस्यात्सर्वा भू° । ग. °था न हिंस्यात्सर्वभू° । ५ घ. च. ज. °पय उत्स° । ६ च. ढ. °ज्ञाप्यते । ७ स. ग. ङ. च. ज. झ. ढ. °तयो° । ८ घ. ञ. ण. °माचष्टे° । न । ९ घ. ण. °ह्माद्वितीय° ।

नास्पदमिति भावः । उत्सर्गापवादानुपपत्तिवद्ब्रह्मणि विकल्पानुपपत्तेश्च तदेकरसमेवितव्यमित्याह—तथेति । विकल्पानुपपत्तिमुपपादयति—यथेत्यादिना । संभवति समुच्चयासंभवमभिदधाति—विरोधाच्चेति । उत्सर्गापवादविकल्पसमुच्चयानामसंभवान्न युक्ता ब्रह्मणो नानारसत्वकल्पनेति फलमाह—तस्मादिति ।

श्रुतिन्यायविरोधाच्च । सैन्धवघनवत्प्रज्ञानैकरसघनं निरन्तरं पूर्वापरबाह्याभ्यन्तरभेदविवर्जितं सबाह्याभ्यन्तरमजं नेति नेत्यस्थूलमनण्वजमजरममयममृतमित्येवमाद्याः श्रुतयो निश्चितार्थाः संशयविपर्यासाशङ्काराहिताः सर्वाः समुद्रे प्रक्षिप्ताः स्युरकिंचित्करत्वात् । तथा न्यायविरोधोऽपि सावयवस्यानेकात्मकस्य क्रियावतो नित्यत्वानुपपत्तेः । नित्यत्वं चाऽऽत्मनः स्मृत्यादिदर्शनादनुमीयते । तद्विरोधश्च प्राप्नोत्यनित्यत्वे । भवत्कल्पनानर्थक्यं च । स्फुटमेव चास्मिन्पक्षे कर्मकाण्डानर्थक्यम् । अकृताभ्यागमकृतविप्रणाशप्रसङ्गात् ।

परकीयकल्पनानुपपत्तौ हेत्वन्तरं प्रतिज्ञाय श्रुतिविरोधं प्रकटीकृत्य न्यायविरोधं प्रकटयति—तथेति । ब्रह्मणोऽनेकरसत्वे स्यादिति शेषः । नित्यत्वानुपपत्तेरात्मनो नित्यत्वाङ्गीकारविरोधः । स्यादित्यध्याहारः । ननु तस्य नित्यत्वं नाङ्गीक्रियते मानाभावादिति प्रासङ्गिकीमाशङ्कां प्रत्याह—नित्यत्वं चेति । स्मृत्यादिदर्शनादित्यादिशब्देन स एव तु कर्मानुस्मृतिशब्दविधिभ्य इत्यधिकरणोक्ता हेतवो गृह्यन्ते । अनुमीयते कल्प्यते स्वीक्रियत इति यावत् । तद्विरोधश्च स्मृत्यादिदर्शनकृतात्मनित्यत्वानुमानविरोधश्चेत्यर्थः । आत्मनोऽनित्यत्वे दोषान्तरमाह—भवदिति । कर्मकाण्डस्य सत्यार्थत्वं परेण कल्प्यते तदानर्थक्यमात्मानित्यत्वे स्पष्टमापतेदित्युक्तमेव स्फुटयति—स्फुटमेवेति ।

ननु ब्रह्मणो द्वैताद्वैतात्मकत्वे समुद्रादिदृष्टान्ता विद्यन्ते कथमुच्यते भवतैकस्य द्वैताद्वैतत्वं विरुद्धमिति । न । अन्यविषयत्वात् । नित्यनिरवयववस्तुविषयं हि विरुद्धत्वमवोचाम द्वैताद्वैतत्वस्य न कार्यविषये सावयवे । तस्माच्छ्रुतिस्मृतिन्यायविरोधादनुपपन्नेयं कल्पना । अस्याः कल्पनाया वरमुपनिषत्परित्याग एव ।

ब्रह्मणो नानारसत्वे विरोधमुक्तमसहमानः स्वोक्तं स्मारयति—नन्विति । समुद्रादीनां कार्यत्वसावयवत्वाभ्यामनेकात्मकत्वमविरुद्धं ब्रह्मणस्तु नित्यत्वाभि-

---

१ घ. ज. °तं वा° । २ ख. छ. °र्यासश° । ३ क. °ष्टमेवाऽऽप° । घ. °ष्टमेवमा । ४ च. ट. °धये हि । ५ घ. ज, झ. °तस्य ।

स्वभावाच्च नानेकात्मकत्वं युक्तमिति वैषम्यमादर्शयन्नुत्तरमाह—नेत्यादिना । ब्रह्मणो नानारूपात्मकल्पनानुपपत्तिमुपसंहरति—तस्मादिति । 'अजो नित्यः शाश्वतोऽयं पुराणः' इत्याद्याः स्मृतयः । ननु प्रत्यक्षाद्यविरोधेनोपनिषदां विषयतिरूप्यर्थमेषा कल्पना क्रियते तथा च कथं ताऽनुपपन्नेत्याशङ्क्याऽऽह—अस्या इति । विरुद्धार्थत्वे कल्पितेऽपि तत्प्रामाण्यानुपपत्तेरविरोधादिति भावः ।

अध्येयत्वाच्च न शास्त्रार्थोऽयं कल्पना । न हि जननमरणाद्यनर्थशतसहस्रबीजदोषसमाकुलं संसृद्भवनादिवत्सावयवमनेकरसं ब्रह्म ध्येयत्वेन विज्ञेयत्वेन वा श्रुत्योपदिश्यते । प्रज्ञानघनतां चोपदिशति । एकधैवानुद्रष्टव्यमिति च । अनेकधादर्शनापवादाच्च "मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति" इति । यच्च श्रुत्या निन्दितं तन्न कर्तव्यम् । यच्च न क्रियते न स शास्त्रार्थः । ब्रह्मणोऽनेकरसत्वमनेकधात्वं च द्वैतरूपं निन्दितत्वान्न द्रष्टव्यम् । अतो न शास्त्रार्थः । यत्त्वेकरसत्वं ब्रह्मणस्तद्द्रष्टव्यत्वात्प्रशंसितं प्रशस्तत्वाच्च शास्त्रार्थो भवितुमर्हति ।

किंच ब्रह्मणो नानारूपत्वं लौकिकं वैदिकं वा । नाऽऽद्यः । तस्यालौकिकत्वात्तन्नानारूपत्वे लोकस्य तटस्थत्वात् । न द्वितीयः । तन्नानारूपत्वस्य ध्येयत्वेन ज्ञेयत्वेन वा शास्त्रेणानुपदेशादित्याह—अध्येयत्वाच्चेति । तदेव स्फुटयति—न हीति । इतश्च नानारूपं ब्रह्म न यथाशास्त्रमकाश्यमित्याह—प्रज्ञानेति । एकारदुपदिशतीत्याकृष्यते । अनेकधादर्शनापवादाच्च नानारूपं ब्रह्म शास्त्रार्थो न भवतीति शेषः । भेददर्शनस्य निन्दितत्वे लब्धमर्थमाह—यच्चेति । अकर्तव्यत्वे प्राप्तमर्थं कथयति—यच्च नेति । सामान्यन्यायं प्रकृते योजयति—ब्रह्मण इति । कस्तर्हि शास्त्रार्थस्त्वाऽऽह—यस्त्विति ।

यदुक्तं वेदैकदेशस्याप्रामाण्यं कर्मविषये द्वैताभावाद्द्वैते च प्रामाण्यमिति । तत्र । यथार्थानुपदेशार्थत्वात् । न हि द्वैतमद्वैतं वा वस्तु जातमात्रमेव पुरुषं ज्ञापयित्वा पश्चात्कर्म वा ब्रह्मविद्यां वोपदिशति शास्त्रम् । न चोपदेशार्हं द्वैतं जातमात्रप्राणिबुद्धिगम्यत्वात् ।

ब्रह्मैकरस्ये प्रागुक्तं दोषमनुभाषते—यदुक्तमिति । कर्मकाण्डस्य कर्मविषये न

---

१ घ. ञ. ण. °त्याद्या स्मृतिः । न° । २ झ. शास्त्रीयेयं । ३ घ. ज. °स्रार्थ इयं । ४ च. ढ. °ब्रजलादि° । ङ. °ब्रफेना° । ५ घ. ज. °घन चो° । ६ त. ङ. दान्मृत्योः । ७ त. छ. झ. °शस्त° । ८ घ. °सत्वं ब्रह्मणो न । ण. °सत्वं ब्रह्मणो नोभयथा । ९ ञ. °ह्म नोभयशा° । १० क. घ. ङ. च. ज. झ. ढ. °प्राप्त उप° ।

प्रामाण्यमतद्वैतविषयत्वाद्ब्रह्मकाण्डस्य त्वद्वैते प्रामाण्यं परमार्थाद्वैतवस्तुप्रतिपादकत्वात्तथा च विरोधोऽध्ययनविधेरित्यनुवादार्थः । कर्मकाण्डाप्रामाण्यं प्रत्याचष्टे—तमेति । प्रतिद्वं भेदमादाय तत्रैव विधिनिषेधोपदेशस्य प्रवृत्तिनिवृत्तिद्वाराऽर्थवत्त्वान्न कर्मकाण्डानर्थक्यमित्यर्थः । ननु शास्त्रमेवाऽऽदौ भेदं बोधयित्वा पश्चादभ्युदयसाधनं कर्मोपदिशति । तथा च नास्ति भेदस्यान्यतः प्राप्तिरत आह—न हीति । यथा हि शास्त्रं जातमात्रं पुरुषं प्रत्यद्वैतं वस्तु ज्ञापयित्वा पश्चाद्ब्रह्मविद्यामुपदिशतीति नेष्यते तथा प्रथममेव पुरुषं प्रति द्वैतं बोधयित्वा कर्म पुनर्बोधयतीत्यपि नाभ्युपेयं प्रथमतो भेदवेदनावस्थायामस्य शास्त्रानधिकारित्वादित्यर्थः । द्वैतस्योपदेशार्हत्वमङ्गीकृत्योक्तं तदेव नास्तीत्याह—न चेति ।

न च द्वैतस्यानृतत्वबुद्धिः प्रथममेव कस्यचित्स्यात् । येन द्वैतस्य सत्यत्वमुपदिश्य पश्चादात्मनः प्रामाण्यं प्रतिपादयेच्छास्त्रम् । नापि पाषण्डिभिरपि प्रस्थापिताः शास्त्रस्य प्रामाण्यं न गृह्णीयुः ।

ननु द्वैतस्य सत्यबुद्ध्यभावे श्रुत्युक्तानुष्ठानाय पुंसां प्रवृत्त्यनुपपत्तेः स्वप्रामाण्यसिद्ध्यर्थमेव द्वैतसत्यत्वं श्रुतिर्बोधयिष्यति नेत्याह—न च द्वैतस्येति । द्वैतानृतत्ववादिषु कर्मजडानां प्रद्वेषमतीतेर्न प्रथमतो द्वैतानृतत्वबुद्धिर्न च द्वैतसत्यत्वं श्रुत्यर्थस्तत्परिचयहीनानामपि द्वैतसत्यत्वाभिनिवेशादित्यर्थः । किंच न द्वैतवैतथ्यं शास्त्रप्रामाण्यविघातकं यतो बौद्धादिभिः श्रेयसे प्रस्थापिताः स्वशिष्या द्वैतमिथ्यात्वावगमेऽपि स्वर्गकामश्चैत्यं वन्देतेत्यादिशास्त्रस्य प्रामाण्यं गृह्णन्ति । तथाऽग्निहोत्रादिशास्त्रस्यापि प्रामाण्यं भविष्यति साधनत्वशक्त्यनपहारादित्याह—नापीति ।

तस्माद्यथाप्राप्तमेव द्वैतमविद्याकृतं स्वाभाविकमुपादाय स्वाभाविक्यैवाविद्यया युक्ताय रागद्वेषादिदोषवते यथाभिमतपुरुषार्थसाधनं कर्मोपदिशत्यग्रे पश्चात्प्रसिद्धक्रियाकारकफलस्वरूपदोषदर्शनवते तद्विपरीतौदासीन्यस्वरूपावस्थानफलार्थिने तदुपायभूतामात्मैकत्वदर्शनात्मिकां ब्रह्मविद्यामुपदिशति । अथैवं सति तदौदासीन्यस्वरूपावस्थाने फले प्राप्ते शास्त्रस्य प्रामाण्यं प्रत्यर्थित्वं निवर्तते । तदभावाच्छास्त्रस्यापि शास्त्रत्वं तं प्रति निवर्तत एव ।

काण्डद्वयस्य प्रामाण्योपपत्तिमुपसंहरति—तस्मादित्यादिना । प्रतिद्वो बोध्यं क्रियादिरूपे द्वैते दोषः सातिशयत्वादिस्तद्दर्शनं विवेकस्तद्वते तस्माद्द्वैतादिपरी-

१ ब. ञ. ण. तस° । २ घ. ज. °भिप्रेत° । ३ ख. छ. मतं पु° । ४ ख. छ. °विद्य पूर्व पु° । ५ क. °स्थानार्थि° । घ. ज. °स्थाफ° ।

मौदासीन्योपलक्षितं स्वरूपं तस्मिन्नवस्थानं कैवल्यं तदर्थिने मुमुक्षवे साधनचतुष्टयसंपन्नायेत्यर्थः। किंच तत्त्वज्ञानादूर्ध्वं पूर्वं वा काण्डयोर्विरोधः शङ्क्यते। नाऽऽद्य इत्याह—अथेति। अवस्थाभेदादेकस्मिन्नपि पुरुषे काण्डद्वयस्य प्रामाण्यमविरुद्धमित्येवं स्थिते सत्युपनिषदुक्तस्तत्त्वज्ञानोत्पत्त्यनन्तरं नान्तरीयकत्वेन प्राप्ते कैवल्ये पुरुषस्य नैराकाङ्क्ष्यं जायते न च निराकाङ्क्षं पुरुषं प्रति शास्त्रस्य शास्त्रत्वमस्ति।

" प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा।
पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते " ॥

इति न्यायात्कृतकृत्यं प्रति प्रवर्तकत्वादिविरहिणः शास्त्रत्वायोगादतो ज्ञानादूर्ध्वं धर्म्यभावाद्विरोधासिद्धिरित्यर्थः।

तथा प्रतिपुरुषं परिसमाप्तं शास्त्रमिति न शास्त्रविरोधगन्धोऽप्यस्ति। अद्वैतज्ञानावसानत्वाच्छास्त्रशिष्यशासनादिद्वैतभेदस्य। अन्यतमावस्थाने हि विरोधः स्यादास्थितस्येतरेतरापेक्षत्वात्तु शास्त्रशिष्यशासनानां नान्यतमोऽप्यवतिष्ठते। सर्वसमाप्तौ तु कस्य विरोध आशङ्क्येताद्वैते केवले शिवे सिद्धे। नाप्यविरोधिताऽत एव।

एकस्मिन्पुरुषे दर्शितन्यायं सर्वत्रातिदिशति—तथेति। ज्ञानादूर्ध्वं विरोधाभावमुपसंहरति—इति नेति। कल्पान्तरं प्रत्याह—अद्वैतेति। तत्त्वज्ञानात्पूर्वं भेदस्यावस्थितत्वात्तमाविद्यमादायाधिकारिभेदादवस्थाभेदाद्वा काण्डयोरविरोधसिद्धिरित्यर्थः। भेदमेवोपपादयति—अन्यतमेति। शिष्यादीनामन्यतमस्यैवावस्थानं भेदावस्थितस्येतरांश्च सापेक्षत्वान्न सोऽप्यवतिष्ठेत। न च ज्ञानात्प्रागन्यतमस्यैवावस्थानं सर्वेषामेव तेषां यथाप्रतिभासमवस्थानादतो न पूर्वं विरोधशङ्केत्यर्थः।

[illegible] सर्वेति। [illegible] सत्त्वा[illegible]—[illegible]ति। अद्वैत[illegible]पि [illegible] निरञ्जनादित्याह—अत एवेति।

अथाप्यभ्युपगम्य ब्रूमः—द्वैताद्वैतात्मकत्वेऽपि शास्त्रविरोधस्य तुल्यत्वात्। यदाऽपि समुद्रादिवद्द्वैताद्वैतात्मकमेकं ब्रह्माभ्युपगच्छामो नान्यद्वस्त्वन्तरं तदाऽपि भवदुक्ताच्छास्त्रविरोधान्न मुच्यामहे। कथम्। एकं हि परं ब्रह्म द्वैताद्वैतात्मकं तच्छोकमोहाद्यतीतत्वादुपदेशं न काङ्क्षति। न चोपदेष्टाऽन्यो ब्रह्मणो द्वैताद्वैतरूपस्य ब्रह्मण एकस्यैवाभ्युपगमात्।

---

१ घ. ञ. ण. °यप्रा°। २ घ. °षाद्विस्त°। ३ घ. ज. °पेक्षितत्वा°। ४ ख. ग. घ. छ. ज. झ. °त्वाच्छास्त्र°। घ. ज. °वे ना°। ६ ख. ङ. छ. °रोधिता°। ७ घ. ञ. ण. °र्थः। उक्तमे°। ८ ख. घ. छ. ञ. ट. ण. °राधेश°। ९ ग. घ. ज. °शं नाऽऽका°।

अद्वितीयमेव ब्रह्म न द्वैताद्वैतात्मकमित्युपपादितमिदानीं ब्रह्मणो द्वैताद्वैतात्मकत्वाभ्युपगमेऽपि विरोधो न शक्यते परिहर्तुमित्याह—अथापीति । तुल्यत्वात्तदभ्युपगमो वृथेति शेषः । उक्तमेवोपपादयति—यद्यपीति । द्वैताद्वैतात्मकं ब्रह्मेति पक्षे कथं विरोधो न समाधीयते द्वैतमद्वैतं चाधिकृत्य काण्डद्वयप्रामाण्यसंभवादित्याक्षिपति—कथमिति । किं ब्रह्मविषयः शास्त्रोपदेशः किं वाऽब्रह्मविषयः । प्रथमे द्वैताद्वैतरूपस्यैकस्यैव ब्रह्मणोऽभ्युपगमात्तस्य च नित्यमुक्तत्वान्नोपदेशः संभवतीत्याह—एकं हीति । तस्योपदेशाभावे हेत्वन्तरमाह—न चेति । उपदेष्टा हि ब्रह्मणोऽन्योऽनन्यो वा । नाऽऽद्योऽभ्युपगमविरोधात् । न द्वितीयो भेदमन्तरेणोपदेश्योपदेशकभावासंभवादिति भावः ।

अथ द्वैतविषयस्यानेकत्वादन्योन्योपदेशो न ब्रह्मविषय उपदेश इति चेत् । तदा द्वैताद्वैतात्मकमेकमेव ब्रह्म नान्यदस्तीति विरुध्यते । यस्मिन्द्वैतविषयेऽन्योन्योपदेशः सोऽन्यो द्वैतं चान्यदेवेति समुद्रदृष्टान्तो विरुद्धः । न च समुद्रोदकैक्यत्ववद्विज्ञानैकत्वे ब्रह्मणोऽन्यत्रोपदेशग्रहणादिकल्पना संभवति । न हि हस्तादिद्वैताद्वैतात्मके देवदत्ते वाक्कर्णयोर्देवदत्तैकदेशभूतयोर्वागादेष्ट्री कर्णः केवल उपदेशस्य ग्रहीता देवदत्तस्तु नोपदेष्टा नाप्युपदेशस्य ग्रहीतेति कल्पयितुं शक्यते । समुद्रैकोदकात्मत्ववदेकविज्ञानत्वादेवदत्तस्य । तस्माच्छ्रुतिन्यायविरोधश्चाभिप्रेतार्थासिद्धिश्चैवंकल्पनायां स्यात् । तस्माद्यथाव्याख्यात एवास्माभिः पूर्णमद इत्यस्य मन्त्रस्यार्थः ।

कल्पान्तरमुत्थापयति—अथेति । प्रतिज्ञाविरोधेन निराकरोति—तदेति । किंच सर्वस्य ब्रह्मरूपत्वे यः समुद्रदृष्टान्तः स न स्यात्परस्परोपदेशस्याब्रह्मविषयत्वादित्याह—यस्मिन्निति । अथ यथा फेनादिविकाराणां भिन्नत्वेऽपि समुद्रोदकात्मत्वं तथा जीवादीनां भिन्नत्वेऽपि ब्रह्मस्वभावविज्ञानैक्याद्ब्रह्म सर्वमिति न विरुध्यते तत्राऽऽह—न चेति । सर्वस्य ब्रह्मत्वमङ्गीकृतं चेद्ब्रह्मविषय एवोपदेशः स्याद्भेदस्याविचारितरमणीयत्वादित्यर्थः । ननु नानारूपवस्तुसमुदायो ब्रह्म तत्र प्रदेशभेदादुपदेश्योपदेशकभावो ब्रह्म तु नोपदेश्यमुपदेशकं चेति तत्राऽऽह—न हीति । तत्र हेतुमाह—समुद्रेति । यथा समुद्रस्योदकात्मना फेनादिष्वेकत्वं तथा देवदत्तक्षेत्रज्ञस्य वागाद्यवयवेष्वेकत्वेन विज्ञानवत्त्वान्न व्यवस्थासंभवस्तथा ब्रह्मण्यपि द्रष्टव्यमित्यर्थः । मतान्तरनिराकरणमुपसंहरति—तस्मादिति । आत्मैकरस्यप्रतिपादिका श्रुतिर्न्यायश्च सावयवस्यानेकात्मकस्येत्यादावुक्तः । अभिप्रेतार्था-

---

१ क. ख. छ. ढ °तात्म । २ क. °पदिशति । ३ च. ढ. °त्मकत्व° । ४ क. °कत्वविं । ५ ढ. °नबलाद्दे° । ६ च. ढ. इत्येतस्य । ७ क. °त्मकत्वं । ८ घ. ण. वत्प्रदे° । ९ ख. ङ. न तादृज्ञा° ।

सिद्धिर्भवत्कल्पनानर्थक्यं चेत्यादिना दर्शिता । एवंकल्पनायामेकानेकात्मकं ब्रह्मेत्यभ्युपगंतव्यमित्यर्थः । परकीयव्याख्यानासंभवे फलितमाह-तस्मादिति ।

ॐ खं ब्रह्मेति मन्त्रोऽयं चान्यत्राविनियुक्त इह ब्राह्मणेन ध्यानकर्मणि विनियुज्यते । अत्र च ब्रह्मेति विशेष्याभिधानं खमिति विशेषणम् । विशेषणविशेष्ययोश्च सामानाधिकरण्येन निर्देशो नीलोत्पलवत्खं ब्रह्मेति । ब्रह्मशब्दो बृहद्वस्तुमात्रास्पदोऽविशेषितोऽतो विशेष्यते खं ब्रह्मेति । यत्तत्खं ब्रह्म तदोंशब्दवाच्यमोंशब्दस्वरूपमेव वोभयथाऽपि सामानाधिकरण्यमविरुद्धम् ।

ध्यानशेषत्वेनोपनिषदर्थं ब्रह्मानूद्य तद्विधानार्थं तस्मिन्विनियुक्तं मन्त्रमुत्थापयति-ॐ खमिति । इषे त्वेत्यादिवत्तस्य कर्मान्तरे विनियुक्तत्वमाशङ्क्याऽऽह-अयं चेति । विनियोजकाभावादिति भावः । तर्हि ध्यानेऽपि नायं विनियुक्तो विनियोजकाभावाविशेषादित्याशङ्क्याऽऽह-इहेति । खं पुराणमित्यादि ब्राह्मणं तस्य च विनियोजकत्वं ध्यानसमवेतार्थप्रकाशनसामर्थ्यात् । यद्यपि मन्त्रनिष्ठं सामर्थ्यं विनियोजकं तथाऽपि मन्त्रब्राह्मणयोरेकार्थत्वाद्ब्राह्मणस्य सामर्थ्यद्वारा विनियोजकत्वमविरुद्धमिति भावः । अत्रेति मन्त्रोक्तिः । विशेषणविशेष्यत्वे यथोक्तसामानाधिकरण्यं हेतू करोति-विशेषणेति । ब्रह्मेत्युक्ते सत्याकाङ्क्षाभावार्त्तिक विशेषणेनेत्याशङ्क्याऽऽह-ब्रह्मशब्द इति । निरुपाधिकस्य सोपाधिकस्य वा ब्रह्मणो विशेषणत्वेऽपि कथं तस्मिन्नोंशब्दप्रवृत्तिरित्याशङ्क्याऽऽह-यत्तदिति ।

इह च ब्रह्मोपासनसाधनत्वार्थमोंशब्दः प्रयुक्तः । तथा च श्रुत्यन्तरात् "एतदालम्बनं श्रेष्ठमेतदालम्बनं परम्" "ओमित्यात्मानं युञ्जीत" "ओमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत" "ओमित्येवं ध्यायथ आत्मानम्" इत्यादेः । अन्यार्थासंभवाच्चोपदेशस्य । यथाऽग्नयेऽनुब्रूहीति शंसत्योमित्युद्गायतीत्येवमादौ स्वाध्यायारम्भापवर्गयोश्चोंकारप्रयोगो विनियोगादवगम्यते न च तथाऽर्थान्तरमिहावगम्यते । तस्माद्ध्यानसाधनत्वेनैवेहोंकारशब्दस्योपदेशः ।

किमिति यथोक्ते ब्रह्मण्योंशब्दो मन्त्रे प्रयुज्यते तत्राऽऽह-इह चेति ।

---

१ क. °गतेऽपीत्य° । ख. ढ. °गच्छतोऽपीत्य° । २ घ. ब्रह्मोमितिश° । ३ घ. ज. °र्थमोमितिश° । ४ ख. न. छ. °यीतेति । ओं° । ५ ग. ब. ज. °त्यादि । अ° ।

ॐशब्दो ब्रह्मोपासने साधनमित्यत्र मानमाह—तथा चेति । सापेक्षं श्रेष्ठत्वं वारयति—परमिति । आदिशब्देन प्रणवो धनुरित्यादि गृह्यते । ॐ ब्रह्मेति सामानाधिकरण्योपदेशस्य ब्रह्मोपासने साधनत्वमोंकारस्येत्यस्मादर्थान्तरासंभवाच्च तस्य तत्साधनत्वमेष्टव्यमित्याह—अन्यथेति । एतदेव प्रपञ्चयति—यथेत्यादिना । अन्यत्रेति तैत्तिरीयश्रुतिग्रहणम् । अपवर्गः स्वाध्यायावसानम् । अर्थान्तरावगतेरभावे फलितमाह—तस्मादिति ।

यद्यपि ब्रह्मात्मादिशब्दा ब्रह्मणो वाचकास्तथाऽपि श्रुतिप्रामाण्याद्ब्रह्मणो नेदिष्ठमाभिधानमोंकारः । अत एव ब्रह्मप्रतिपत्तावेदं परं साधनम् । तच्च द्विप्रकारेण प्रतीकत्वेनाभिधानत्वेन च । प्रतीकत्वेन । यथा विष्ण्वादिप्रतिमाऽभेदेनवमोंकारो ब्रह्मेति प्रतिपत्तव्यः । तथा ह्योंकारालम्बनस्य ब्रह्म प्रसीदति ।

" एतदालम्बनं श्रेष्ठमेतदालम्बनं परम् ।
एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते " इति श्रुतेः ।

ननु शब्दान्तरेष्वपि ब्रह्मवाचकेषु सत्सु किमित्योंशब्द एव ध्यानसाधनत्वेनोपदिश्यते तत्राऽऽह—यद्यपीति । नेदिष्ठं निकटतमं संप्रियतममित्यर्थः । प्रियतमत्वमयुक्तं फलमाह—अत एवेति । साधनत्वेऽवान्तरविशेषं दर्शयति—तच्चेति । प्रतीकत्वेन कथं साधनत्वमिति पृच्छति—प्रतीकत्वेनेति । कथमित्यध्याहारः । परिहरति—यथेति । ॐकारो ब्रह्मेति प्रतिपत्तौ किं स्यात्तदाह—तथा हीति ।

तत्र खमिति भौतिकं खे प्रतीतिर्मा भूदित्याह—खं पुराणं चिरंतनं खं परमात्माकाशमित्यर्थः । यत्तत्परमात्माकाशं पुराणं खं तच्चक्षुराद्यविषयत्वान्निरालम्बनमशक्यं ग्रहीतुमिति श्रद्धाभक्तिभ्यां भावविशेषेण चोंकार आवेशयति । यथा विष्ण्वङ्गाङ्कितायां शिलादिप्रतिमायां विष्णुं लोक एवम् । वायुरं खं वायुरस्मिन्विद्यत इति वायुरं खं खमात्रं खमित्युच्यते न पुराणं खमित्येवमाह स्म । कोऽसौ कौरव्यायणीपुत्रः । वायुरे हि खे मुख्यः खशब्दव्यवहारस्तन्मान्मुख्ये संप्रत्ययो युक्त इति मन्यते । तत्र यदि पुराणं खं ब्रह्म निरुपाधिस्वरूपं यदि वा वायुरं खं सोपाधिकं ब्रह्म सर्वथाऽप्योंकारः प्रतीकत्वेनैव प्रतिमावत्साधनत्वं

---

१ घ. ण. °सनसा° । २ घ. ण °वात्तस्य । ३ क. ख. ङ. च. छ. °नेवौंका° । ४ घ. ञ. ण. °मं प्रि° । ५ क. ग. ङ. ञ. ज. ट. °र्यां शैला° । ६ ग. च. ट. यद्यपि । ७ ख. छ. °नत्वेन प्र° ।

प्रतिपद्यते । " एतद्वै सत्यकाम परं चापरं च ब्रह्म यदाकारैः " इति श्रुत्यन्तरात् । केवलं स्वशब्दार्थे विप्रतिपत्तिः ।

मन्त्रमेवं व्याख्याय ब्राह्मणमवतार्य व्याचष्टे—तत्रेत्यादिना । मन्त्रः सप्तम्यर्थः । ननु यथोक्तं तत्त्वं स्वेनैव रूपेण प्रतिपत्तुं शक्यते किं प्रतीकोपदेशेनेत्याशङ्क्याऽऽह—यत्तादिति । भावविशेषो बुद्धेर्विषयपारवश्यं परिहृत्य प्रत्यग्ब्रह्मज्ञानाभिमुख्यम् । ओंकारे ब्रह्मावेशनमुदाहरणेन द्रढयति—यथेति । कल्पान्तरमाह—वायुरित्यादिना । किमिति सूत्राधिकरणमव्याकृतमाकाशमत्र गृह्यते तत्राऽऽह—वायुरे हीति । तदेव भूताकाशात्मना विपरिणतमिति भावः । तर्हि पक्षद्वये संप्लवमाने कः सिद्धान्तः स्यादित्याशङ्क्याधिकारिभेदमाश्रित्याऽऽह—तत्रेति । श्रुत्यन्तरस्यान्यथासिद्धिसंभवादोंकारस्य प्रतीकत्वेऽपि विप्रतिपत्तिमाशङ्क्याऽऽह—केवलमिति । इतरत्र विप्रतिपत्तिद्योकाभावादिति भावः ।

वेदोऽयमोंकारो वेदं जिज्ञानात्यनेन यद्वेदितव्यम् । तस्माद्वेद ॐकारो वाचकोऽभिधानम् । तेनाभिधानेन यद्वेदितव्यं ब्रह्म प्रकाश्यमानमभिधीयमानं वेद साधको विजानात्युपलभते । तस्माद्वेदोऽयमिति ब्राह्मणा विदुः । तस्माद्ब्राह्मणानामभिधानत्वे साधनत्वमभिप्रेतमोंकारस्य । अथवा वेदोऽयमित्याद्यर्थवादः । कथमोंकारो ब्रह्मणः प्रतीकत्वेन विहितः । ॐ खं ब्रह्मेति सामानाधिकरण्यात्तस्य स्तुतिरिदानीं वेदत्वेन । सर्वो ह्ययं वेद ॐकार एव । एतत्प्रभव एतदात्मकः सर्वं ऋग्यजुःसामादिभेदभिन्न एष ओंकारः " तद्यथा शङ्कुना सर्वाणि पर्णानि " इत्यादश्रुत्यन्तरात् । इतश्चायं वेद ॐकार यद्वेदितव्यं तत्सर्वं वेदितव्यमोंकारेणैव वेदेनानोऽयमोंकारो वेदः । इतरस्यापि वेदस्य वेदत्वमत एव । तस्माद्विशिष्टोऽयमोंकारः साधनत्वेन प्रतिपत्तव्य इति । अथवा वेदः सः । कोऽसौ । यं ब्राह्मणा विदुरोंकारम् । ब्राह्मणानां ह्यसौ प्रणवादौथ्यादिविकल्पैर्विज्ञेयः । तस्मिन्हि प्रयुज्यमाने साधनत्वेन सर्वो वेदः प्रयुक्तो भवतीति ॥ १ ॥

इति श्रीबृहदारण्यकोपनिषद्भाष्ये पञ्चमाध्यायस्य प्रथमं ब्राह्मणम् ॥ १ ॥

---

१ घ. ज. वदो । २ च. ढ. यस्माद्वे° । ३ घ. ज. °मात्मान° । ४ क. ख. ग. छ. झ. ढ. °व्यं यत्तत्स° । ५ क. ख. छ. झ. °रिमन्प्रयु° ।

प्रतीकपक्षमुपपाद्याभिधानपक्षमुपपादयति—वेदोऽयमिति । तदेव स्पष्टयति—तेनेति । वेदेत्यत्राऽऽदौ तच्छब्दो द्रष्टव्यः । ब्राह्मणा विदुरिति विशेषनिर्देशस्य तात्पर्यमाह—तस्मादिति । प्रतीकपक्षेऽपि वेदोऽयमित्यादिग्रन्थो निर्वहतीत्याह—अथवेति । विध्यभावे कथमर्थवादः संभवतीत्याशङ्क्य परिहरति—कथमित्यादिना । वेदत्वेन स्तुतिमोंकारस्य संग्रहविवरणाभ्यां दर्शयति—सर्वो हीति । ॐकारे सर्वस्य नामजातस्यान्तर्भावे प्रमाणमाह—तद्यथेति । तत्रैव हेत्वन्तरमवतार्य व्याकरोति—इतश्चेति । वेदितव्यं परमपरं वा ब्रह्म । 'द्वे ब्रह्मणी वेदितव्ये' इति श्रुत्यन्तरात् । तद्वेदनसाधनत्वेऽपि कथमोंकारस्य वेदत्वमित्याशङ्क्याऽऽह—इतरस्यापीति । अत एव वेदितव्यवेदनहेतुत्वादेवेत्यर्थः । प्रतीकपक्षे वाक्ययोजनां निगमयति—तस्मादिति । अभिधानपक्षे प्रतीकपक्षे चैकं वाक्यमेकैकश्च योजयित्वा पक्षद्वयेऽपि साधारण्येन योजयति—अथवेति । तस्य पूर्वोक्तनीत्या वेदत्वे लाभं दर्शयति—तस्मिन्निति । ॐकारस्य ब्रह्मोपास्तिसाधनत्वमित्थं सिद्धमित्युपसंहर्तुमितिशब्दः ।

इति बृहदारण्यकोपनिषद्भाष्यटीकायां पञ्चमाध्यायस्य प्रथमं ब्राह्मणम् ॥ १ ॥

अथ पञ्चमाध्यायस्य द्वितीयं ब्राह्मणम् ।

त्रयाः प्राजापत्याः प्रजापतौ पितरि ब्रह्मचर्यमूषुर्देवा मनुष्या असुरा उषित्वा ब्रह्मचर्यं देवा ऊचुर्ब्रवीतु नो भवानिति तेभ्यो हैतदक्षरमुवाच द इति व्यज्ञासिष्टा ३ इति व्यज्ञासिष्मेति होचुर्दाम्यतेति न आत्थेत्योमिति होवाच व्यज्ञासिष्टेति ॥ १ ॥

अधुना दमादिसाधनत्रयविधानार्थोऽयमारम्भः—त्रयास्त्रिसंख्याकाः प्राजापत्याः प्रजापतेरपत्यानि प्राजापत्यास्ते किं प्रजापतौ पितरि ब्रह्मचर्यं शिष्यत्ववृत्तेर्ब्रह्मचर्यस्य प्राधान्याच्छिष्याः सन्तो ब्रह्मचर्यमूषुरुषितवन्त इत्यर्थः । के ते । विशेषतो देवा मनुष्या असुराश्च । ते चोषित्वा ब्रह्मचर्यं किमकुर्वन्नित्युच्यते—तेषां देवा ऊचुः पितरं प्रजापतिम् । किमिति । ब्रवीतु कथयतु नोऽस्मभ्यं यदनुशासनं

---

१ घ. अ. ण च । २ घ. ण. °कं च वा° । ३ अ. ण. °क्तरीत्या । ४ क. ख. छ. ट. ब्रह्मण उपा° । ५ ग. भगवा° । ६ क. च. झ. ट. °व्यट्° । ७ क. °पतिं प्रति । किं° ।

भवानिति । तेभ्य एवमर्थिभ्यो हैतदक्षरं वर्णमात्रमुवाच द इति । उक्त्वा च तान्पप्रच्छ पिता किं व्यज्ञासिष्टा ३ इति । मयोपदेशार्थमभिहितस्याक्षरस्यार्थं विज्ञातवन्त आहोस्विन्नेति । देवा ऊचुर्व्यज्ञासिष्मेति विज्ञातवन्तो वयम् । यद्येवमुच्यतां किं मयोक्तमिति । देवा ऊचुर्दाम्यताद्दाम्ता यूयं स्वभावतोऽतो दाम्ता भवतेति नोऽस्मानाह किमयसि । इतर आहोमिति सम्यग्व्यज्ञासिष्टेति ॥ १ ॥

ब्रह्मचर्यान्तरस्य तात्पर्यमाह—अधुनेति । तद्विधानं तदोपास्तिशेषत्वेनेति द्रष्टव्यम् । आख्यायिकाप्रवृत्तिरारम्भः । पितरि ब्रह्मचर्यमूषुरिति संबन्धः । प्रजापतिसदसि ब्रह्मचर्यवासमात्रेण किमित्यसौ देवादिभ्यो हितं ब्रूयादित्याशङ्क्याऽऽह—शिष्यभावेनेति । शिष्यभावेन वृत्तेः संबन्धिनो ये धर्मास्तेषां मध्ये ब्रह्मचर्यस्येत्यादि योज्यम् । तेषामिति निर्धारणे षष्ठी । ऊहापोहशक्तानामेव शिष्यत्वमिति योजनार्थो हशब्दः । विचारार्था प्लुतिरित्यङ्गीकृत्य प्रश्नमेव व्याचष्टे—मयेति । ॐमित्यनुज्ञामेव विभजते—सम्यगिति ।

> अथ हैनं मनुष्या ऊचुर्ब्रवीतु नो भवानिति तेभ्यो हैतदेवाक्षरमुवाच द इति व्यज्ञासिष्टा ३ इति व्यज्ञासिष्मेति होचुर्दान्तेति न आत्थेत्योमिति होवाच व्यज्ञासिष्टेति ॥ २ ॥

समानमन्यत् । स्वभावतो लुब्धा यूयमतो यथाशक्ति संविभजत दत्तेति नोऽस्मानात्थ किमन्यद्ब्रूयाद्यो हितमिति मनुष्याः ॥ २ ॥

समानत्वेनोत्तरस्य सर्वस्यैवार्थवादस्याप्यालस्येऽस्ते प्राप्ते दत्तेत्यस्य तात्पर्यमाह—स्वभावत इति । दानमेव लोभत्यागरूपमुपदिष्टमिति कुतो निर्दिष्टं किमन्यदेव हितं किंचिदादिष्टं किं न स्यादित्याशङ्क्याऽऽह—किमन्यदिति ॥ २ ॥

> अथ हैनमसुरा ऊचुर्ब्रवीतु नो भवानिति तेभ्यो हैतदेवाक्षरमुवाच द इति व्यज्ञासिष्टा ३ इति व्यज्ञासिष्मेति होचुर्दयध्वमिति न आत्थेत्योमिति होवाच व्यज्ञासिष्टेति तदेतदेवैष दैवी

---

१ क. ख. घ. छ. ढ. ण. °शिष्येति । २ ग. भगवा° । ३ ख. छ. ञ. ठ. ण. °तीऽनिष्टे । ४ क. ख. घ. छ. ढ. ण. °ष्टं किमन्य° । ५ ग. भगवा° ।

आत्मनुभवति स्तनयित्नुर्द द द इति दाम्यत
दत्त दयध्वमिति तदेतत्त्रय[१] शिक्षेद्दमं दानं
दयामिति ॥ ३ ॥

इति बृहदारण्यकोपनिषदि पञ्चमाध्यायस्य
द्वितीयं ब्राह्मणम् ॥ २ ॥

तथाऽसुरा दयध्वमिति। क्रूरा यूयं हिंसादिपरा अतो दयध्वं प्राणिषु दयां कुरुतेति। तदेतत्प्रजापतेरनुशासनमद्याप्यनुवर्तत एव। यः पूर्वं प्रजापतिर्देवादीननुशशास सोऽद्याप्यनुशास्त्येव दैव्या स्तनयित्नुलक्षणया वाचा कथमेषा श्रूयते दैवी वाक्काऽसौ स्तनयित्नुर्द द द इति दाम्यत दत्त दयध्वमित्येषां वाक्यानामुपलक्षणाय त्रिर्दकार उच्चार्यतेऽनुकृतिर्न तु स्तनयित्नुशब्दस्त्रिरेव संख्यानियमस्य लोकेऽप्रसिद्धत्वात्। यस्मादद्यापि प्रजापतिर्दाम्यत दत्त दयध्वमित्यनुशास्त्येव तस्मात्कारणादेतत्त्रयम्। किं तत्त्रयमित्युच्यते दमं दानं दयामिति शिक्षेदुपादद्यात्प्रजापतेरनुशासनमस्माभिः कर्तव्यमित्येवं मतिं कुर्यात्। तथा च स्मृतिः—

" त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् " इति।

यथा देवा मनुष्याश्च स्वाभिप्रायानुसारेण दकारश्रवणे सत्यर्थं जगृहुस्तथेति भावः। दयध्वमित्यत्र तात्पर्यमाह—क्रूरा इति। हिंसादित्यादिशब्देन परस्वापहारादि गृह्यते। प्रजापतेरनुशासनं प्रागासीदित्यत्र लिङ्गमाह—तदेतदिति। अनुशासनस्यानुवृत्तिमेव व्याकरोति—यः पूर्वमिति। दं इति विसंधिकरणं सर्वत्र वर्णान्तरभ्रमापोहार्थम्। यथा दकारत्रयमत्र विवक्षितं तथा स्तनयित्नुशब्देऽपि त्रित्वं विवक्षितं चेत्प्रसिद्धिविरोधः स्यादित्याशङ्क्याऽऽह—अनुकृतिरिति। दशब्दानुकारमात्रमत्र विवक्षितं न तु स्तनयित्नुशब्दे त्रित्वं प्रमाणाभावादित्यर्थः। फलवत्स्वार्थवादस्य विधिपर्यवसायित्वं फलितमाह—यस्मादिति। उपादानमेकादेशमभिनयति—प्रजापतेरिति। श्रुतिसिद्धविध्यनुसारेण भगवदाकूतमवृत्तिं दर्शयति—तथा चेति।

---

१ च. ढ. एवं यः। २ क. °त्रयश्र°। ३ घ. द द द इ°। ४ घ. ञ. ण. °ति। ५ घ. ञ. ण. °दाने प्र°।

अस्य हि विधेः शेषः पूर्वः । तथाऽपि देवादीनुद्दिश्य किमर्थं दकारत्रयमुच्चारितवान्प्रजापतिः पृथगनुशासनार्थिभ्यः । ते वा कथं विवेकेन प्रतिपन्नाः प्रजापतेर्मनोगतं समानेनैव दकारवर्णमात्रेणेति पराभिप्रायज्ञा विकल्पयन्ति ।

तदेतत्त्रयं शिक्षेदित्येष विधिश्चेत्कृतं त्रयाः प्राजापत्या इत्यादिना ग्रन्थेनेत्याशङ्क्य यस्मादित्यादिना सूचितमाह—अस्येति । सर्वैरेव त्रयमनुष्ठेयं चेत्तर्हि देवादीनुद्दिश्य दकारत्रयोच्चारणमनुपपन्नमिति शङ्कते—तथेति । दमादित्रयस्य सर्वैरनुष्ठेयत्वे सतीति यावत् । किंच पृथक्पृथगनुशासनार्थिनो देवादयस्तेभ्यो दकारमात्रोच्चारणेनापेक्षितमनुशासनं सिध्यतीत्याह—पृथगिति । किमर्थमित्यादिना पूर्वेण संबन्धः । दकारमात्रमुच्चारयतोऽपि प्रजापतेर्विभागेनानुशासनमभिसंहितमित्याशङ्क्याऽऽह—ते वेति । त्रयं सर्वैरनुष्ठेयमिति परस्य सिद्धान्तिनोऽभिप्रायस्तदभिज्ञाः सन्तो यथोक्तनीत्या विकल्पयन्तीति योजना । पराभिप्रायज्ञा इत्यस्य हासो वा परस्य प्रजापतेर्मनुष्यादीना चाभिप्रायज्ञा इति । नन्वलेखी वा पाठः ।

अत्रैक आहुरदान्तत्वादीनत्वादयालुत्वैरपराधित्वमात्मनो मन्यमानाः शङ्किता एव प्रजापतावूषुः किं नो वक्ष्यतीति । तेषा च दकारश्रवणमात्रादेवाऽऽत्माशङ्कावशेन तदर्थप्रतिपत्तिरभूत् । लोकेऽपि हि प्रसिद्धं पुत्राः शिष्याश्चानुशास्याः सन्तो दोषान्निवर्तयितव्या इति । अतो युक्तं प्रजापतेर्दकारमात्रोच्चारणम् । दमादित्रये च दकारान्वयादात्मनो दोषानुरूप्येण देवादीना विवेकेन प्रतिपत्तुं चेति । फलं त्वेतदात्मदोषज्ञाने सति दोषान्निवर्तयितुं शक्येतेऽल्पेनाप्युपदेशेन दकारमात्रेणेति ।

एकीयं परिहारमुत्थापयति—अत्रेति । अस्तु तेषामेवं शङ्का तथाऽपि दकारमात्रात्कीदृशी प्रतिपत्तिरित्याशङ्क्याऽऽह—तेषां चेति । तदर्थो दकारार्थो दमादिस्तस्य प्रतिपत्तिस्तद्द्वारेणादान्तत्वादिनिवृत्तिरासीदित्यर्थः । किमिति प्रजापतिर्दोषज्ञापनद्वारेण ततो देवादीननुशास्यान्दोषान्निवर्तयिष्यति तत्राऽऽह—लोकेऽपीति । दकारोच्चारणस्य प्रयोजने सिद्धे फलितमाह—अत इति । यत्तूक्तं ते वा कथमित्यादि तत्राऽऽह—दमादीति । प्रतिपत्तुं च युक्तं दमादीति शेषः ।

---

१ ख. छ. ढ. °इय तच्च किं° । २ घ. ज. °र्थिनः । ते । ३ क. झ. °रना° । ४ घ. °यन्तीति । अ° । ५ क. ख. छ ढ तच्चेति । ६ ञ. ण. °क्तरीत्या । ७ क. ख छ. ढ. नत्र उक्ते° । ८ क. °दात्तत्वा° । ९ ख. ङ. छ. झ. ञ. ऽऽत्मशं° । १० क. झ. ढ. °वयन्तेऽल्पे° । ११ ख. छ. °तेऽन्येना° । १२ क. ढ. °मेव शं° । ख. छ. °मेवाऽऽशं° । १३ °स्तत्त द्वा° ।

इति शब्दः स्वयूथ्यमतसमाप्त्यर्थः । परोक्तं परिहारमङ्गीकृत्याऽऽख्यायिकातात्पर्यं सिद्धान्ती ब्रूते—फलं त्विति । निर्ज्ञातदोषा देवादयो यथा दकारमात्रेण ततो निवर्त्यन्त इति शेषः । इति शब्दो दार्ष्टान्तिकप्रदर्शनार्थः ।

नन्वेतत्त्रयाणां देवादीनामनुशासनं देवादिभिरप्येकैकमेवोपादेयमित्वेऽपि न तु त्रयं मनुष्यैः शिक्षितव्यमिति । अत्रोच्यते—पूर्वैर्देवादिभिर्विशिष्टैरनुष्ठितमेतत्त्रयं तस्मान्मनुष्यैरेवं शिक्षितव्यमिति । तत्र दयालुत्वस्यानुष्ठेयत्वं स्यात्कथमसुरैरप्रशस्तैरनुष्ठितत्वादिति चेत् । न, तुल्यत्वात्त्रयाणामतोऽन्योऽत्राभिप्रायः । प्रजापतेः पुत्रा देवादयस्त्रयः पुत्रेभ्यश्च हितमेव पित्रोपदेष्टव्यम् । प्रजापतिश्च हितज्ञो नान्यथोपदिशति । तस्मात्पुत्रानुशासनं प्रजापतेः परमेतद्धितम् । अतो मनुष्यैरेवैतत्त्रयं शिक्षितव्यमिति ।

विशिष्टान्मनुशासनस्य प्रवृत्तत्वादस्माकं तदभावादनुपादेयं दमादीति शङ्कते—नन्विति । किंच देवादिभिरपि प्रातिस्विकानुशासनवशादेकैकमेव दमाद्यनुष्ठेयं नैतत्त्रयमित्याह—देवादिभिरिति । यथा पूर्वस्मिन्काले देवादिभिरेकैकमेवोपादेयमित्युक्तं तथा वर्तमानेऽपि काले मनुष्यैरेकैकमेव कर्तव्यं पूर्वाचारानुसारान्न तु त्रयं शिक्षितव्यं तथा च कस्यायं विधिरित्याह—अद्यत्वेऽपीति । आचारप्रामाण्यमाश्रित्य परिहरति—अत्रेति । इत्येकैकमेव नोपादेयमिति शेषः । दयालुत्वस्यानुष्ठेयत्वमाक्षिपति—तत्रेति । मध्ये दमादीनामिति यावत् । असुरैरनुष्ठितत्वेऽपि दयालुत्वमनुष्ठेयं हितसाधनत्वाद्दानादिवदिति परिहरति—नेत्यादिना । देवादिषु प्रजापतेरविशेषात्तेभ्यस्तदुपदिष्टमद्यत्वेऽपि सर्वमनुष्ठेयमित्यर्थः । हितस्यैवोपदेष्टव्यत्वेऽपि तदज्ञानात्प्रजापतिरन्यथोपदिशतीत्याशङ्क्याऽऽह—प्रजापतिश्चेति । हि यस्मात्तस्य पितुरहितोपदेशित्वाभावस्तस्मादित्युक्तः । विशिष्टैरनुष्ठितस्यास्मदादिभिरनुष्ठेयत्वे फलितमाह—अत इति । प्राजापत्या देवादयो विग्रहवन्तः सन्तीत्यर्थवादस्य यथाश्रुतेऽर्थे प्रामाण्यमभ्युपगम्य दकारत्रयस्य तात्पर्यं सिद्धमिति वक्तुमितिशब्दः ।

अथवा न देवा असुरा वाऽन्ये केचन विद्यन्ते मनुष्येभ्यः । मनुष्याणामेवादान्ता येऽन्यैरुत्तमैर्गुणैः संपन्नास्ते देवा लोभप्रधाना मनुष्यास्तथा हिंसापराः क्रूरा असुरास्त एव मनुष्या अदान्तत्वादिदोषत्रयमपेक्ष्य देवादिशब्दभाजो भवन्तीतरांश्च गुणान्सत्त्वरजस्तमास्यपेक्ष्य । अतो मनुष्यैरेवं शिक्षितव्यमेतत्त्रयमिति । तदपेक्षयैव प्रजा-

१ घ. ज. °रेवं च शि । २ ख. ङ. छ. ढ. °व च शि° । ३ घ. च. °याणा °। ४ ङ. ट. च. छ. ज. झ. ढ. °दयः । ५ ख. ग. ङ. च. छ. झ. ढ. °रमे° । ६ घ. ञ. ण. त्रय° । ७ घ. °त्वे फलितेऽपि । ८ ख. ट. ञ. ण. °पेक्षमतौ° । ९ क. °व हि शि° ।

पतिनोपदिष्टत्वात् । तथा हि मनुष्या अदान्ता लुब्धाः क्रूराश्च दृश्यन्ते । तथा च स्मृतिः-" कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् " इति ॥ ३ ॥

इति बृहदारण्यकोपनिषद्भाष्ये पञ्चमाध्यायस्य
द्वितीयं ब्राह्मणम् ॥ २ ॥

संप्रति कर्मीमांसकमतमनुसृत्याऽऽह-अथवेति । कथं मनुष्येष्वेव देवासुरत्वं तत्राऽऽह-मनुष्याणामिति । अन्ये गुणा ज्ञानादयः । किं पुनर्मनुष्येषु देवादिशब्दप्रवृत्तौ निमित्तं तदाह-अदान्तत्वादीति । देवादिशब्दप्रवृत्तौ निमित्तान्तरमाह-इतरांश्चेति । मनुष्येष्वेव देवादिशब्दप्रवृत्तौ फलितमाह-अत इति । इतिशब्दो विध्युपपत्तिपदर्शनार्थः । मनुष्यैरेव त्रयं शिक्षितव्यमित्यत्र हेतुमाह-तदपेक्षयेति । मनुष्याणामेव देवादिभावे प्रकृतमाह-तथा हीति । त्रयं शिक्षितव्यमित्यत्र स्मृतिमुदाहरति-तथा चेति । इतिशब्दो ब्राह्मणसमाप्त्यर्थः ॥ ३ ॥

इति बृहदारण्यकोपनिषद्भाष्यटीकायां पञ्चमाध्यायस्य
द्वितीयं ब्राह्मणम् ॥ २ ॥

(अथ पञ्चमाध्यायस्य तृतीयं ब्राह्मणम्) ।

दमादिसाधनत्रयं सर्वोपासनशेषं विहितम् । दान्तोऽलुब्धो दयालुः सन्सर्वोपासनेष्वधिक्रियते । तत्र निरुपाधिकस्य ब्रह्मणो दर्शनमधिकान्तमथाधुना सोपाधिकस्य तस्यैवाभ्युदयफलानि वक्तव्यानीत्येकमर्थोऽयमारम्भः—

एष प्रजापतिर्यद्धृदयमेतद्ब्रह्मैतत्सर्वं तदेतत्त्र्यक्षरꣳ हृदयमिति हृ इत्येकमक्षरमभिहरन्त्यस्मै स्वाश्चान्ये च य एवं वेद द इत्येकमक्षरं ददत्यस्मै स्वाश्चान्ये च य एवं वेद यमित्येकमक्षरमेति स्वर्गं लोकं य एवं वेद ॥ १ ॥

इति बृहदारण्यकोपनिषदि पञ्चमाध्यायस्य
तृतीयं ब्राह्मणम् ॥ ३ ॥

---

१ च, ट. व्याश्चादा° । २ स. छ. ञ. सर्वो° । ३ घ. च, ञ. ट. यत इति न° ।

एष प्रजापतिर्यद्धृदयं प्रजापतिरनुशास्तीत्यनन्तरमेवाभिहितम्। कः पुनरसावनुशास्ता प्रजापतिरिति। उच्यते—एष प्रजापतिः। कोऽसौ यद्धृदयं हृदयमिति हृदयस्था बुद्धिरुच्यते। यस्मिन्शाकल्यब्राह्मणान्ते नामरूपकर्मणामुपसंहार उक्तो दिग्विभागद्वारेण तदेतत्सर्वभूतप्रतिष्ठं सर्वभूतात्मभूतं हृदयं प्रजापतिः प्रजानां स्रष्टा। एतद्ब्रह्म बृहत्त्वात्सर्वात्मत्वाच्च ब्रह्म। एतत्सर्वम्[1]। उक्तं पञ्चमाध्याये हृदयस्य सर्वत्वम्। तस्मर्वं यस्मात्तस्मादुपास्यं हृदयं ब्रह्म। तत्र हृदयनामाक्षरविषयमेव तावदुपासनमुच्यते। तदेतद्धृदयमिति नाम त्र्यक्षरं त्रीण्यक्षराण्यस्येति त्र्यक्षरम्। कानि पुनस्तानि त्रीण्यक्षराण्युच्यन्ते। ह इत्येकमक्षरम्। अभिहरन्ति हृतेराहृतिकर्मणो ह इत्येतद्रूपमिति यो वेद यस्माद्धृदयाय ब्रह्मणे स्वाश्चेन्द्रियाण्यन्ये च विषयाः शब्दादयः स्वं स्वं कार्यमभिहरन्ति हृदयं च भोक्तव्यमभिहरति। अतो हृदयनाम्नो ह इत्येतदक्षरमिति यो वेदास्मै विदुषेऽभिहरन्ति स्वाश्च ज्ञातयोऽन्ये चासंबद्धाः। बलिमिति वाक्यशेषः। विज्ञानानुरूप्येणैतत्फलम्।

तार्थवादेन विधिना सिद्धमर्थमनुवदति—दमादीति। कथं तस्य सर्वोपासनशेषत्वं तदाह—दान्त इति। अलुब्ध इति च्छेदः। संप्रत्युत्तरसंदर्भस्य तात्पर्यं वक्तुं भूमिकां करोति—तत्रेति। काण्डद्वयं सप्तदशार्थः। अनन्तरसंदर्भस्य तात्पर्यमाह—अथेति। दानादयो हृदयस्तत्फलान्युपासनानीति शेषः। अनन्तरब्राह्मणमादाय तस्य संगतिमाह—एष इत्यादिना। उक्तस्य हृदयशब्दार्थस्य पारमार्थिकत्वं दर्शयन्प्रजापतित्वं साधयति—यस्मिन्निति। कथं हृदयस्य सर्वत्वं तदाह—उक्तमिति। सर्वत्वसंकीर्तनफलमाह—तस्मर्वमिति। तत्र हृदयस्योपास्यत्वे सिद्धे सतीत्येवम्। फलौकिमुत्थाप्य व्याकरोति—अभिहरन्तीति। यो वेदास्मै विदुषेऽभिहरन्तीति संबन्धः। वेदनमेव विशदयति—यस्मादित्यादिना। स्वं कार्यं स्वप्रदर्शनादि। हृदयस्य तु कार्यं तृप्त्यादि। असंबद्धा ज्ञातिव्यतिरेकाः। औपनिषदफले कथयति—विज्ञानेति।

तथा ह इत्येतदप्येकाक्षरमेतदपि दानार्थस्य ददातेर्द इत्येतद्रूपं हृदयनाम्नाक्षरत्वेन निबद्धम्। अत्रापि हृदयाय ब्रह्मणे स्वाश्च करणा-

---

१ च. च. °यशब्देन ह°। २ ख. ङ. छ. झ. °द्धिरित्युच्य°। ३ ख. छ. उक्तं। ४ ङ. °स्तर्वं भू°। ५ ढ. °स्य ब्रह्मत्वं स°। ६ क. ख. ग. ङ. छ. ढ. °र्वत्वं च य°। च. ज. °र्वत्वं च त°। झ. °र्वत्वं क°। ७ क. ख. ग. घ. ङ. छ. ज. झ. °राहरति°। ८ क. ख. ङ. °ह। तदेत°। ढ °ह। तदेतद्धृदयमि°। ९ क. ख. छ. ढ. °रिका इत्युक्तं फलं क°। १० ग. °स्य वाणी रूपं।

न्यन्ये च विषयाः स्वं स्वं वीर्यं ददति हृदयं च भोक्त्रे ददाति स्वं वीर्यमतो दकार इत्येवं यो वेदास्मै ददति स्वाश्चान्ये च । तथा यमित्येतदप्येकमक्षरम् । इणो गत्यर्थस्य यमित्येतद्रूपमस्मिन्नग्नि निबद्धमिति या वेद स स्वर्गं लोकमेति । एवं नामाक्षरादपीदृशं विशिष्टं फलं प्राप्नोति किमु वक्तव्यं हृदयस्वरूपोपासनादिति हृदयस्तुतये नामाक्षरोपन्यासः ॥ १ ॥

इति श्रीमद्बृहदारण्यकोपनिषद्भाष्ये पञ्चमाध्यायस्य तृतीयं ब्राह्मणम् ॥ ३ ॥

अत्रापीति दकाराक्षरोपासनेऽपि फलमुच्यत इति शेषः । तामेव फलोक्तिं व्यनक्ति—हृदयायति । अस्मै विदुषे स्वाश्चान्ये च ददति । बलिमिति शेषः । नामाक्षरोपासनानि त्रीणि हृदयस्वरूपोपासनमेकमिति चत्वार्युपासनान्यत्र विवक्षितानीत्याशङ्क्याऽऽह—एवमिति ॥ १ ॥

इति बृहदारण्यकोपनिषद्भाष्यटीकायां पञ्चमाध्यायस्य तृतीयं ब्राह्मणम् ॥ ३ ॥

अथ पञ्चमाध्यायस्य चतुर्थं ब्राह्मणम् ।

तद्ध तदेतदेव तदास सत्यमेव स यो हैतं[1] महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति जयतीमाँल्लोकाञ्जित इन्वसावसद्य एवमेतन्महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति सत्यꣳ ह्येव ब्रह्म ॥ १ ॥

इति बृहदारण्यकोपनिषदि पञ्चमाध्यायस्य चतुर्थं ब्राह्मणम् ॥ ४ ॥

तस्यैव हृदयाख्यस्य ब्रह्मणः सत्यमित्युपासनं विधित्सन्नाह—तत्तदिति हृदयं ब्रह्म परामृष्टम् । वा इति स्मरणार्थम् । तद्यद्धृदयं ब्रह्म स्मर्यत इत्येकस्तच्छब्दः । तदेतदुच्यते प्रकारान्तरेणेति द्वितीयस्तच्छब्दः । किं पुनस्तत्प्रकारान्तरम् । एतदेव तदित्येतच्छब्देन संबध्यते तृतीयस्तच्छब्दः । एतदिति वक्ष्यमाणं बुद्धौ संनिधीकृत्याऽऽह । आस

---

१ ग. हैतन्महः । २ क. ग. घ. ङ. ज. ट. ठ. ड. ढ. °मेतं महः । ३ क. °व । ए° ।

बभूव। किं पुनरेतदेवाऽऽस यदुक्तं हृदयं ब्रह्मेति तादिति तृतीयस्तच्छब्दो विनियुक्तः। किं तादिति विशेषतो निर्दिशति सत्यमेव सच्च त्यच्च मूर्तं चामूर्तं च सत्यं ब्रह्म पञ्चभूतात्मकमित्येतत्। स यः कश्चित्सत्यात्मानमेतं महन्महत्त्वाद्यक्षं पूज्यं प्रथमजं प्रथमंजातं सर्वस्मात्संसारिण एतदेवाग्रे जातं ब्रह्मातः प्रथमजं वेद विजानाति सत्यं ब्रह्मेति। तस्येदं फलमुच्यते—यथा सत्येन ब्रह्मणेमे लोका आत्मसात्कृता जिता एवं सत्यात्मानं ब्रह्म महद्यक्षं प्रथमजं वेद स जयतीमाँल्लोकान्। किंच जितो वशीकृत इत्स्विदर्थं यथा ब्रह्मणाऽसौ शत्रुरिति वाक्यशेषः। असच्चासद्ब्रह्मवेदसौ शत्रुर्जितो भवेदित्यर्थः। कस्यैतत्फलमिति पुनर्निगमयति—य एवमेतन्महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति। अतो विद्यानुरूपं फलं युक्तम्। सत्यं ह्येव यस्माद्ब्रह्म ॥ १ ॥

इति श्रीमद्बृहदारण्यकोपनिषद्भाष्ये पञ्चमाध्यायस्य
चतुर्थं ब्राह्मणम् ॥ ४ ॥

ब्राह्मणान्तरमुत्थाप्याक्षराणि व्याचष्टे—तस्येत्यादिना। सत्यशब्दार्थं सत्यज्ञानादिवाक्योपात्तं व्यावर्तयति—सच्चेति। सर्वात्मत्वस्य चतुर्थे वस्तुतत्त्वं सूचयति—मूर्तं चेति। वेदनमनूद्य फलोक्तिमवतारयति—स य इति। पथमत्वमेवं प्रकटयति—सर्वस्मादिति। स यः कश्चिदेवेति संबन्धः। कैवृत्तिकसिद्धं फलान्तरमाह—किंचेति। वशीकृतस्य शत्रोः स्वरूपेण तत्त्वं वारयति—असच्चेति = यो ह्येतमित्यादिना न एवमेतदित्यादेरेकार्थत्वात्पुनरुक्तिरित्याशङ्क्याऽऽह—कस्यैतादिति। कथमस्य विज्ञानस्येदं फलमित्याशङ्क्याऽऽह—अत इति पञ्चमीपरामृष्टं स्पष्टयति—सत्यं ह्येति।

इति बृहदारण्यकोपनिषद्भाष्यटीकायां पञ्चमाध्यायस्य
चतुर्थं ब्राह्मणम् ॥ ४ ॥

अथ पञ्चमाध्यायस्य पञ्चमं ब्राह्मणम्।

आप एवेदमग्र आसुस्ता आपः सत्यमसृजन्त सत्यं

---

१ क. ख. ङ. छ. °देव य°। २ च. ङ. °कमादित्यादिकं तत्त्वं हिरण्यगर्भात्मकमि°। ३ ग. °मेतन्म°। ४ क ग. ङ. झ. °थमं जा°। ५ च. ज. °र्थः। तस्यै°। ६ ग. °मेतं मह°। ७ घ. ज. ब्रह्मेति ॥ १ ॥ ८ घ. ञ. ण. सत्यस्य। ञ. तस्य। ९ च. ज. कथयति। १० क. ख. ङ. ढ. °ह। ज्ञित इति। ११ घ. ञ. ण. °तादित्या°। १२ क. °तामित्या°। १३ क. घ. °ह। तस्यै°।

ब्रह्म प्रजापतिं प्रजापतिर्देवान्स्ते देवाः सत्यमेवोपासते तदेतत्त्र्यक्षरꣳ सत्यमिति स इत्येकमक्षरं तीत्येकमक्षरं यमित्येकमक्षरं प्रथमोत्तमे अक्षरे सत्यं मध्यतोऽनृतं तदेतदनृतमुभयतः सत्येन परिगृहीतꣳ सत्यभूयमेव भवति नैवं विद्वाꣳसमनृतꣳ हिनस्ति ॥ १ ॥

सत्यस्य ब्रह्मणः स्तुत्यर्थमिदमाह । महद्यक्षं प्रथमजमित्युक्तं तत्कथं प्रथमजत्वमिति । उच्यते—आप एवेदमग्र आसुः । आप इति कर्मसमवायिन्योऽग्निहोत्राद्याहुतयः । अग्निहोत्राद्याहुतेर्द्रव्यात्मकत्वाद्दृष्टत्वम् । ताभ्याऽऽपोऽग्निहोत्रादिकर्मापवर्गोत्तरकालं केनचिददृष्टेन सूक्ष्मेणाऽऽत्मना कर्मसमवायित्वमपरित्यजन्त्य इतरभूतसहिता एव न केवलाः । कर्मसमवायित्वात्तु प्राधान्यमपामिति । सर्वाण्येव भूतानि प्रागुत्पत्तेरव्याकृतावस्थानि कर्तृसहितानि निर्दिश्यन्त आप इति । ता आपो बीजभूता जगतोऽव्याकृतात्मनाऽवास्थितास्ता एवेदं सर्वं नामरूपविकृतं जगदग्र आसुर्नान्यत्किंचिद्विकारजातमासीत् । ताः पुनरापः सत्यमसृजन्त । तस्मात्सत्यं ब्रह्म प्रथमजम् । तदेतद्धिरण्यगर्भस्य सूत्रात्मनो जन्म यदव्याकृतस्य जगतो व्याकरणम् । तत्सत्यं ब्रह्म कुतः । महत्त्वात् । कथं महत्त्वमित्याह । यस्मात्सर्वस्य स्रष्टृ । कथम् । यत्सत्यं ब्रह्म तत् प्रजापतिं प्रजानां पतिं विराजं सूर्यादिकरणमसृजतेत्यनुषङ्गः । प्रजापतिर्देवान्स विराट्प्रजापतिर्देवानसृजत । यस्मात्सर्वमेवं क्रमेण सत्याद्ब्रह्मणो जातं तस्मान्महत्सत्यं ब्रह्म । कथं पुनर्यक्षमिति । उच्यते—त एवं सृष्टा देवाः पितरमपि विराजमैतीत्य तदेव सत्यं ब्रह्मोपासते । अत एतत्प्रथमजं महद्यक्षम् । तस्मात्सर्वात्मनोपास्यं तत्तस्यापि सत्यस्य ब्रह्मणो नामसत्यमिति तदेतत्त्र्यक्षरम् । कानि तान्यक्षराणीत्याह—स इत्येकमक्षरम् । तीत्येकमक्षरम् । तीतीकारानुबन्धो निर्देशार्थः । यमित्येकमक्षरम् । तत्र तेषां प्रथमोत्तमे अक्षरे सकारयकारौ सत्यम् । मध्य-

---

१ क. स. ग. ङ. छ. ट. ठ. ढ. ढ. °नैनं । २ स. छ. ता । ३ ज. झ. ढ. °त्यज्येत° ४ च. °विकार° । ५ स. घ. छ. °तीत्यैत° । ६ क. स. छ. एव प्र° । ७ ग. घ. ङ. ञ. °म त° । ८ घ. ज. °क्षरं सत्यम् । ९ च. ढ. °णीत्यत आह ।

रूपाभावात् । मध्यतो मध्येऽनृतम् । अनृतं हि मृत्युः । मृत्व्वनृतयोस्तकारसामान्यात् । तदेतदनृतं तकाराक्षरं मृत्युरूपमुभयतः सत्येन सकारयकारलक्षणेन परिगृहीतं व्याप्तमन्तर्भावितं सत्यरूपाभ्यामतोऽकिंचित्करं तत्सत्यभूयमेव सत्यबाहुल्यमेव भवति । एवं सत्यबाहुल्यं सर्वस्य मृत्योरनृतस्याकिंचित्करत्वं च यो विद्वांस्तमेवं विद्वांसमनृतं कदाचित्प्रमादोक्तं न हिनस्ति ॥ १ ॥

इदमा ब्राह्मणं गृह्यते । तस्यावान्तरसंगतिमाह—महादिति । आहुतीनामेव कर्मसमवायित्वं न त्वपामित्याशङ्क्याऽऽह—अग्निहोत्रादीति । यद्यप्यापः सोमाद्या हूयमानाः कर्मसमवायिन्यस्तथाऽप्युत्तरकाले कथं तासां तथात्वं कर्मणोऽस्थायित्वादित्याशङ्क्याऽऽह—ताश्चेति । कर्मसमवायित्वमपरित्यजन्त्यस्तत्संबन्धिनेनाऽऽपः प्रथमं प्रवृत्तास्तान्याशोत्तरकालं सूक्ष्मेणादृष्टेनाऽऽत्मनाऽतीन्द्रियेणाऽऽत्मना तिष्ठन्तीति योजना । आप इति विशेषणं भूम्नान्तरव्याप्तेर्व्यर्थमिति मन्दं वारयति—इतरेति । कथं तर्हि तासामेव श्रुतावुपादानं तदाह—कर्मेति । इति तासां [illegible] प्रवृत्तमिति शेषः । विवक्षितपदार्थं निगमयति—सर्वाण्येवेति । पदार्थमुक्त्वनूद्य वाक्यार्थमाह—ता इति । यास्ता यथोक्ता आपस्ता एवेति यच्छब्दानुबन्धेन योजना । सत्यं ज्ञानमनन्तं ब्रह्मेति श्रुतं सत्यं कथं भूताभ्यस्तत्सहिताभ्योऽद्भ्यो जायते तत्राऽऽह—तदेतादिति । तस्य ब्रह्मत्वं प्रश्नपूर्वकं विशदयति—तत्सत्यमिति । सत्यस्य ब्रह्मणो महत्त्वं प्रश्नद्वारा साधयति—कथमित्यादिना । तस्य सर्वसृष्टृत्वं प्रश्नद्वारेण स्पष्टयति—कथमिति । महत्त्वमुपसंहरति—यस्मादिति । विशेषणत्रये सिद्धे फलितमाह—तस्मादिति । तस्यापीत्यपिशब्दो हृदयब्रह्मदृष्टान्तार्थः । बुद्धिपूर्वकमनृतं विदुषोऽपि बाधकमित्यभिप्रेत्य विशिनष्टि—प्रमादोक्तमिति ॥ १ ॥

तद्यत्तत्सत्यमसौ स आदित्यो य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन्पुरुषस्तावेतावन्योन्यस्मिन्प्रतिष्ठितौ रश्मिभिरेषोऽस्मिन्प्रतिष्ठितः प्राणैरयमस्मिन्स यदोत्क्रमिष्यन्भवति शुद्ध-

---

१ क. ख. ग. घ. ङ. छ. ज. झ. °तं मृ°। २ ग. घ. च. ज. ढ. यो वेद वि°। ३ घ. ञ. ण. °स्थस्य तत्सं°। ४ घ. ञ. ण. भ्रान्तिं। ५ घ. ण. या य°। ६ क. °मित्या° दिना। म°। ७ क. ख. छ. ढ. °ति। तस्मा°। ८ च. °वत्स°।

मेवैतन्मण्डलं पश्यति नैनमेते रश्मयः प्रत्या-
यन्ति ॥ २ ॥

अस्याधुना सत्यस्य ब्रह्मणः संस्थानविशेष उपासनमुच्यते—
यत्। किं तत्सत्यं ब्रह्म प्रथमजं किमसौ सः। कोऽसावादित्यः कः पुनरस्मावादित्यो य एषं क एषं य एतस्मिन्नादित्यमण्डले पुरुषोऽभिमानी सोऽसौ सत्यं ब्रह्म। यश्चायमध्यात्मं योऽयं दक्षिणेऽक्षन्नक्षणि पुरुषः। चशब्दात्स च सत्यं ब्रह्मेति संबन्धः। तावेतावादित्याक्षिस्थौ पुरुषावेकस्य सत्यस्य ब्रह्मणः संस्थानविशेषौ यस्मात्तस्मादन्योन्यस्मिंश्चितरेतरस्मिन्नादित्येश्चाक्षुषे चाक्षुषश्चाऽऽदित्ये प्रतिष्ठितौ। अध्यात्माधिदैवतयोर्न्योपकार्योरुपकारकत्वात्। कथं प्रतिष्ठितावित्युच्यते रश्मिभिः प्रकाशेनानुग्रहं कुर्वन्नेष आदित्योऽस्मिंश्चाक्षुषेऽध्यात्मे प्रतिष्ठितः। अयं च चाक्षुषः प्राणैरादित्यमनुगृह्णन्नमुष्मिन्नादित्येऽधिदैवे प्रतिष्ठितः सोऽस्मिञ्छरीरे विज्ञानमयो भोक्ता यदा यस्मिन्काल उत्क्रमिष्यन्भवति तदाऽसौ चाक्षुष आदित्यपुरुषो रश्मीनुपसंहृत्य केवलेनौदासीन्येन रूपेण व्यवतिष्ठते। तदायं विज्ञानमयः पश्यति शुद्धमेव केवलं विरश्म्येतन्मण्डलं चन्द्रमण्डलमिव। तदेतदरिष्टदर्शनं प्रासङ्गिकं प्रदर्श्यते। कथं नाम पुरुषः करणीये यत्नवान्स्यादिति। नैनं चाक्षुषं पुरुषं ररीक्षत्य तं प्रत्यनुग्रहायेते रश्मयः स्वामिकर्तव्यवशात्पूर्वमागच्छन्तोऽपि पुनस्तत्कर्मक्षयमनुरुध्यमाना इवैनं नोपयन्ति न प्रत्यागच्छन्त्येनम्। अतोऽवगम्यते परस्परोपकार्योपकारकभावात्सत्यस्यैवैकस्याऽऽत्मनोऽक्षावेतावितीति ॥ २ ॥

भाष्यान्तरमवतारयितुं व्याकरोति—अस्येत्यादिना। तत्राऽऽधिदैविकं स्थानविशेषमुपन्यस्यति—तादित्यादिना। तंप्रत्याध्यात्मिकं स्थानविशेषं दर्शयति—यश्चेति। प्रदेशभेदवर्तिनोः स्थानभेदेन भेदं शङ्कित्वा परिहरति—तावेतावितीति।

---

१ सं. ङ. ञ. ट. ठ. ड. °त्यावय°। २ स. ग. छ. ज. झ. तर्कि त°। ३ स. छ. ज. झ. तयत्तत्स°। क. ग. ङ. तयत्स°। ४ ग. °व पृत। ५ स. घ. छ. ज. °व दृ°। ६ क. ज. °श्चाध्या°। ७ ग. झ. °त्यश्चक्षुषि चक्षुरादि। ङ. च. छ. ज. ढ. °त्यश्चक्षुषि चा°। ८ ङ. छ. °त्युच्यते। ९ क. ग. घ. ङ. च. ज. झ. ढ. °स्मिंश्चक्षुष्यो°। १० घ. झ. °ध्यात्मं प्र°। ११ स. ग. ङ. छ. ढ. °यो यो भो°। १२ ग. °घमूरी। १३ झ. ज. °कृत्यानु°। १४ क. व नाऽऽय°। १५ क. °श्चेत्यादिना। प्र°।

अन्योन्यमुपकार्योपकारकत्वेनान्योन्यास्मिन्प्रतिष्ठितत्वं प्रश्नपूर्वकं प्रकटयति—कथमित्यादिना । प्राणैश्चक्षुरादिभिरिन्द्रियैरिति यावत् । अनुगृह्णन्नादित्यमण्डलात्मानं प्रकाशयन्नित्यर्थः । प्रासङ्गिकमुपासनाप्रसङ्गागतमित्यर्थः । तत्प्रदर्शनस्य किं फलमित्याशङ्क्याऽऽह—कथमिति । पुरुषद्वयस्यान्योन्यमुपकार्योपकारकत्वमुक्तं निगमयति—नेत्यादिना । पुनःशब्देन मृतेरुत्तरकालो गृह्यते । रश्मीनामपवेष्टनत्वादिवशब्दः । पुनर्नकारोच्चारणमन्वयप्रदर्शनार्थम् ॥ २ ॥

य एष एतस्मिन्मण्डले पुरुषस्तस्य भूरिति शिर एकꣳ शिर एकमेतदक्षरं भुव इति बाहू द्वौ बाहू द्वे एते अक्षरे स्वरिति प्रतिष्ठा द्वे प्रतिष्ठे द्वे एते अक्षरे तस्योपनिषदहरिति हन्ति पाप्मानं जहाति च य एवं वेद ॥ ३ ॥

तत्र योऽसौ को य एष एतस्मिन्मण्डले पुरुषः सत्यनामा तस्य व्याहृतयोऽवयवाः । कथम् । भूरिति येयं व्याहृतिः सा तस्य शिरः । प्राथम्यात् । तत्र सामान्यं स्वयमेवाऽऽह श्रुतिः—एकमेकसंरूपायुक्तं शिरस्तथैतदक्षरमेकं भूरिति । भुव इति बाहू द्वित्वसामान्याद्द्वौ बाहू द्वे एते अक्षरे । तथा स्वरिति प्रतिष्ठा द्वे प्रतिष्ठे द्वे एते अक्षरे । प्रतिष्ठे पादौ प्रतितिष्ठत्याभ्यामिति । तस्यास्य व्याहृत्यवयवस्य सत्यस्य ब्रह्मण उपनिषद्रहस्यमभिधानम् । येनाभिधानेनाभिधीयमानं तद्ब्रह्माभिमुखी भवति लोकवत् । काऽसावित्याह—अहरिति । अहरिति चैतद्रूपं हन्तेर्जहातेश्चेति यो वेद स हन्ति जहाति च पाप्मानं य एवं वेद ॥ ३ ॥

तत्र स्थानद्वयसंबन्धिनः सत्यस्य ब्रह्मणो ध्याने प्रस्तुते सतीत्यर्थः । तत्रेति प्रथमव्याहृतौ शिरोदृष्ट्यारोपे विवक्षिते । तस्योपनिषदित्यादि व्याचष्टे—तस्येत्यादिना । यथा लोके गवादिः स्वेनाभिधानेनाभिधीयमानः संमुखी भवति तद्वदित्याह—लोकवदिति । नामोपास्तिफलमाह—अहरिति चेति ॥ ३ ॥

योऽयं दक्षिणेऽक्षन्पुरुषस्तस्य भूरिति शिर एकꣳ शिर एकमेतदक्षरं भुव इति बाहू द्वौ बाहू द्वे एते अक्षरे स्वरिति प्रतिष्ठा द्वे प्रतिष्ठे द्वे एते अक्षरे

---

१ ख. छ. °मेकमिति ।

तस्योपनिषदहमिति हन्ति पाप्मानं जहाति च य
एवं वेद ॥ ४ ॥
इति बृहदारण्यकोपनिषदि पञ्चमाध्यायस्य
पञ्चमं ब्राह्मणम् ॥ ५ ॥

एवं योऽयं दक्षिणेऽक्षन्पुरुषस्तस्य भूरिति शिर इत्यादि सर्वं समानम् । तस्योपनिषदहमिति । प्रत्यगात्मभूतत्वात् । पूर्ववद्धन्तेजंहातेश्चेति ॥ ४ ॥

इति बृहदारण्यकोपनिषद्भाष्ये पञ्चमाध्यायस्य
पञ्चमं ब्राह्मणम् ॥ ५ ॥

यथा मण्डलपुरुषस्य व्याहृत्यवयवस्य सोपनिषत्कस्याधिदैवतमुपासनमुक्तं तथाऽध्यात्मं चाक्षुषपुरुषस्योक्तविशेषणस्योपासनमुच्यत इत्याह—एवमिति । चाक्षुषस्य पुरुषस्य कथमहमित्युपनिषदिष्यते तत्राऽऽह—प्रत्यगिति । हन्तेर्जहातेश्चाह-मित्येतद्रूपमिति यो वेद स हन्ति पाप्मानं जहाति चेति पूर्वं फलवाक्यं योज्य-मित्याह—पूर्ववदिति ॥ ४ ॥

इति बृहदारण्यकोपनिषद्भाष्यटीकायां पञ्चमाध्यायस्य
पञ्चमं ब्राह्मणम् ॥ ५ ॥

अथ पञ्चमाध्यायस्य षष्ठं ब्राह्मणम् ।

उपाधीनामनेकत्वादनेकविशेषणत्वाच्च तस्यैव प्रकृतस्य ब्रह्मणो मनउपाधिविशिष्टस्योपासनं विधित्सन्नाह—

मनोमयोऽयं पुरुषो भाःसत्यस्तस्मिन्नन्तर्हृदये यथा
व्रीहिर्वा यवो वा स एष सर्वस्येशानः सर्वस्याधि-
पतिः सर्वमिदं प्रशास्ति यदिदं किंच ॥ १ ॥
इति बृहदारण्यकोपनिषदि पञ्चमाध्यायस्य
षष्ठं ब्राह्मणम् ॥ ६ ॥

मनोमयो मनःप्रायो मनस्युपलभ्यमानत्वात् । मनसा चोपलभ्यते

---

१ क. 'सा वोप' । २ घ. 'लभ्यत' ।

इति मनोमयोऽयं पुरुषो भाःसत्यो भा एव सत्यं सद्भावः स्वरूपं यस्य सोऽयं भाःसत्यो भास्वर इत्येतत् । मनसः सर्वार्थावभासकत्वान्मनोमयत्वाच्चास्य भास्वरत्वम् । तस्मिन्नन्तर्हृदये हृदयस्यान्तस्तस्मिन्नित्येतत् । यथा व्रीहिर्वा यवो वा परिमाणत एवंपरिमाणस्तस्मिन्नन्तर्हृदये योगिभिर्दृश्यत इत्यर्थः । स एष सर्वस्येशानः सर्वस्य स्वभेदंजातस्येशानः स्वामी । स्वामित्वेऽपि सति कश्चिदमात्यादितन्त्रोऽयं तु न तथा किं तर्ह्यधिपतिरधिष्ठाय पालयिता । सर्वमिदं प्रशास्ति यदिदं किंच यत्किंचित्सर्वं जगत्तत्सर्वं प्रशास्ति । एवं मनोमयस्योपासनात्तथारूपापत्तिरेव फलम् । तं यथा यथोपासते तदेव भवतीति ब्राह्मणम् ॥ १ ॥

इति बृहदारण्यकोपनिषद्भाष्ये षञ्चमाध्यायस्य
षष्ठं ब्राह्मणम् ॥ ६ ॥

ब्राह्मणान्तरमुत्थापयति—उपाधीनामिति । अनेकविशेषणत्वाच्च प्रत्येकं तेषामिति शेषः । तत्पायत्वे हेतुमाह—मनमीति । प्रकारान्तरेण तत्पायत्वमाह—मनसा चेति । तस्य भास्वररूपत्वं साधयति—मनस इवेति । तस्य ध्यानार्थं स्थानं दर्शयति—तस्मिन्निति । औपाधिकमिदं परिमाणं स्वाभाविकं त्वानन्त्यमित्यभिप्रेत्याऽऽह—स एष इति । यदुक्तं सर्वस्येशान इति तन्निगमयति—सर्वमितीं । यथाऽन्यत्र तथाऽत्राफलश्रुतेरफलमिदमुपासनमकार्यमिति चेन्नेत्याह—एवमिति ॥ १ ॥

इति बृहदारण्यकोपनिषद्भाष्यटीकायां पञ्चमाध्यायस्य
षष्ठं ब्राह्मणम् ॥ ६ ॥

अथ पञ्चमाध्यायस्य सप्तमं ब्राह्मणम् ।

विद्युद्ब्रह्मेत्याहुर्विदानाद्विद्युद्विद्यत्येनं पाप्मनो य एवं
वेद विद्युद्ब्रह्मेति विद्युद्ध्येव ब्रह्म ॥ १ ॥

इति बृहदारण्यकोपनिषदि पञ्चमाध्यायस्य
सप्तमं ब्राह्मणम् ॥ ७ ॥

---

१ झ. स्य म । २ च. दभात । ३ ग. ढ. ति ॥ १ ॥ ४ ख. छ. ढ. ण. °स्वरू° । ५ ञ. ज. ति । °अथात्र फलाश्र° ।

तथैवोपासनान्तरं सत्यस्य ब्रह्मणो विशिष्टफलमारभ्यते-विद्युद्ब्रह्मेत्याहुः । विद्युतो ब्रह्मणो निर्वचनमुच्यत-विदानादवखण्डनात्तमसो मेघान्धकारं विदार्य ह्यवभासतेऽतो विद्युत् । एवंगुणं विद्युद्ब्रह्मेति यो वेदासौ विद्यत्यवखण्डयति विनाशयति पाप्मन एनमात्मानं प्रति प्रतिकूलभूताः पाप्मानो ये तान्सर्वान्पाप्मनोऽवखण्डयतीत्यर्थः । य एवं वेद विद्युद्ब्रह्मेति तस्यानुरूपं फलम् । विद्युद्धि यस्माद्ब्रह्म ॥ १ ॥

इति बृहदारण्यकोपनिषद्भाष्ये पञ्चमाध्यायस्य
सप्तमं ब्राह्मणम् ॥ ७ ॥

ब्राह्मणान्तरमुद्भाव्य विभजते- तथैवेत्यादिना । तपसो विदानाद्विद्युदिति संबन्धः । तदेव स्फुटयति--मेघेति । उक्तमेव फलं प्रकटयति--एनमिति ॥१॥

इति बृहदारण्यकोपनिषद्भाष्यटीकायां पञ्चमाध्यायस्य
सप्तमं ब्राह्मणम् ॥ ७ ॥

अथ पञ्चमाध्यायस्याष्टमं ब्राह्मणम् ।

वाचं धेनुमुपासीत तस्याश्चत्वारः स्तनाः स्वाहाकारो वषट्कारो हन्तकारः स्वधाकारस्तस्यै द्वौ स्तनौ देवा उपजीवन्ति स्वाहाकारं च वषट्कारं च हन्तकारं मनुष्याः स्वधाकारं पितरस्तस्याः प्राण ऋषभो मनो वत्सः ॥ १ ॥

इति बृहदारण्यकोपनिषदि पञ्चमाध्यायस्याष्टमं
ब्राह्मणम् ॥ ८ ॥

पुनरुपासनान्तरं तस्यैव ब्रह्मणो वाग्वै ब्रह्मेति वागिति शब्दत्रयी तां वाचं धेनुं धेनुरिव धेनुर्यथा धेनुश्चतुर्भिः स्तनैः स्वान्यं पयः क्षरति वत्सायैवं वाग्धेनुर्वक्ष्यमाणैः स्तनैः पय इवान्नं क्षरति देवादिभ्यः । के पुनस्ते स्तना ये वा ते येभ्यः क्षरति । तस्या एतस्या वाचो धेन्वा

१ अ. °ति । य एवमि° ।

द्वौ स्तनौ देवा उपजीवन्ति वत्सस्थानीयाः । कौ तौ । स्वाहाकारं च वषट्कारं च । आभ्यां हि हविर्दीयते देवेभ्यः । हन्तकारं मनुष्याः हन्तेति मनुष्येभ्योऽन्नं प्रयच्छन्ति । स्वधाकारं पितरः । स्वधाकारेण हि पितृभ्यः स्वधां प्रयच्छन्ति । तस्या धेन्वा वाचः प्राण ऋषभः । प्राणेन हि वाक्प्रसूयते । मनो वत्सः । मनसा हि प्रस्नाव्यते । मनसा ह्यालोचिते विषये वाक्प्रवर्तते । तस्मान्मनो वत्सस्थानीयम् । एवं वाग्धेनूपासकस्तद्भाव्यमेव प्रतिपद्यते ॥ १ ॥

इति बृहदारण्यकोपनिषद्भाष्ये पञ्चमाध्यायस्याष्टमं ब्राह्मणम् ॥ ८ ॥

ब्राह्मणान्तरमवतारयति—पुनरिति । तां धेनुमुपासीतेति संबन्धः । वाचो धेन्वाश्च तादृश्यं विशदयति—यथेत्यादिना । स्तनचतुष्टयं भोक्तृत्वयं च प्रश्नपूर्वकं प्रकटयति—के पुनरित्यादिना । कथं देवा यथोक्तौ स्तनावुपजीवन्ति तत्राऽऽह—आभ्यां हीति । हन्त यद्यपेक्षितमित्यर्थः । स्वधामन्नम् । प्रस्नाव्यते प्रसुता क्षरणोद्यता क्रियते । मनसा हीत्यादिनोक्तं विवृणोति—मनसेति । कथाश्रवणादेतदुपासनमकिंचित्करमित्याशङ्क्याऽऽह—एवमिति । तादृश्यं यथोक्तवागुपाधिकन्नलरूपत्वमित्यर्थः ॥ १ ॥

इति बृहदारण्यकोपनिषद्भाष्यटीकायां पञ्चमाध्यायस्याष्टमं ब्राह्मणम् ॥ ८ ॥

अथ पञ्चमाध्यायस्य नवमं ब्राह्मणम् ।

अयमग्निर्वैश्वानरो योऽयमन्तःपुरुषे येनेदमन्नं पच्यते यदिदमद्यते तस्यैष घोषो भवति यमेतत्कर्णावपिधाय शृणोति स यदोत्क्रमिष्यन्भवति नैनं घोषꣳ शृणोति ॥ १ ॥

इति बृहदारण्यकोपनिषदि पञ्चमाध्यायस्य नवमं ब्राह्मणम् ॥ ९ ॥

---

१ घ. ज. °विर्हूय° । २ ग च. ढ °ति हि म° । ३ ढ. स्वधामन्नं प्र. । ४ क. च. प्रस्नव्य° । ग. घ. झ. प्रस्ताव्य° । ५ च. °कस्तद्भावमे° । ६ घ. ण. °हन्तेत्यपे° । ७ ढ. ण. °वा°स° । ८ क. ण. प्रस्नाव्य° । ९ क. घ. छ ञ ढ. प्रस्तुता । स. प्रस्नुता । १० स. ङ. ढ. °पकत्व° ।

अयमग्निर्वैश्वानरः पूर्ववदुपासनान्तरमयमग्निर्वैश्वानरः । कोऽयमग्निरित्याह-योऽयमन्तःपुरुषे । किं शरीरारम्भको नेत्युच्यते-येनाग्निना वैश्वानराख्येनेदमन्नं पच्यते । किं तदन्नम् । यदिदमद्यते भुज्यतेऽन्नं प्रजामिर्जाठराऽग्निरित्यर्थः । तस्य साक्षादुपलक्षणार्थमिदमाह-तस्याग्नेरन्नं पचतो जाठरस्यैष घोषो भवति । कोऽसौ । यं घोषमेतदिति क्रियाविशेषणं कर्णावपिधायाङ्गुलीभ्यामपिधानं कृत्वा शृणोति तं प्रजापतिमुपासीत वैश्वानरमग्निम् । अत्रापि तादर्थ्यं फलम् । तत्र प्रासङ्गिकमिदमारिष्टलक्षणमुच्यते-सोऽत्र शरीरे भोक्ता यदोत्क्रमिष्यन्भवति नैनं घोषं शृणोति ॥ १ ॥

इति बृहदारण्यकोपनिषद्भाष्ये पञ्चमाध्यायस्य
नवमं ब्राह्मणम् ॥ ९ ॥

ब्राह्मणान्तरमनूद्य तस्य तात्पर्यमाह-अयमिति । अन्नपानस्य पक्ता । तत्तद्भावे मानमाह-तस्येति । क्रियायाः श्रवणस्यैतदिति विशेषणं तद्यथा भवति तथेत्यर्थः । कौक्षेयाग्न्युपाधिकस्य परस्योपासने प्रस्तुते सतीत्याह-तमिति ॥ १ ॥

इति बृहदारण्यकोपनिषद्भाष्यटीकायां पञ्चमाध्यायस्य
नवमं ब्राह्मणम् ॥ ९ ॥

अथ पञ्चमाध्यायस्य दशमं ब्राह्मणम् ।

यदा वै पुरुषोऽस्माल्लोकात्प्रैति स वायुमागच्छति तस्मै स तत्र विजिहीते यथा रथचक्रस्य खं तेन स ऊर्ध्वं आक्रमते स आदित्यमागच्छति तस्मै स तत्र विजिहीते यथा लम्बरस्य खं तेन स ऊर्ध्वं आक्रमते स चन्द्रमसमागच्छति तस्मै स तत्र

---

१ ख. घ. °ङ्गुलिभ्या° । २ च. सोऽन्तः । ३ ण. °अपगमस्य । ४ ग. छ. °र्ध्वमाक्° । ५ च. छ. °र्धमाक्° ।

विजिहीते यथा दुन्दुभेः खं तेन स ऊर्ध्वं आक्रमते स लोकमागच्छत्यशोकमहिमं तस्मिन्वसति शाश्वतीः समाः ॥ १ ॥

इति बृहदारण्यकोपनिषदि पञ्चमाध्यायस्य दशमं ब्राह्मणम् ॥ १० ॥

सर्वेषामस्मिन्प्रकरण उपासनानां गतिरियं फलं चोच्यते—यदा वै पुरुषो विद्वानस्माल्लोकात्प्रैति शरीरं परित्यजति स तदा वायुमागच्छत्यन्तरिक्षे तिर्यग्भूतो वायुः स्तिमितोऽभेद्यस्तिष्ठति । स वायुस्तत्र स्वात्मानि तस्मै संप्राप्ताय विजिहीते स्वात्मावयवान्विगमयति छिद्रीकरोत्यात्मानमित्यर्थः । किंपरिमाणं छिद्रमिति । उच्यते—यथा रथचक्रस्य खं छिद्रं प्रसिद्धंपरिमाणम् । तेन छिद्रेण स विद्वानूर्ध्वं आक्रमत ऊर्ध्वः सन्गच्छति स आदित्यमागच्छति । आदित्यो ब्रह्मलोकं जिगमिषोर्मार्गनिरोधं कृत्वा स्थितः सोऽप्येवंविद उपासकाय द्वारं प्रयच्छति । तस्मै स तत्र विजिहीते । यथा लम्बरस्य खं वादित्रविशेषस्य छिद्रपरिमा॰ तेन स ऊर्ध्वं आक्रमते स चन्द्रमसमागच्छति । सोऽपि तस्मै तत्र ।वेजिहीते । यथा दुन्दुभेः खं प्रसिद्धं तेन स ऊर्ध्वं आक्रमते स लोकं प्रजापतिर्लोकमागच्छति । किंविशिष्टम् । अशोकं मानसेन दुःखेन विवर्जितमित्येतत् । अहिमं हिमवर्जितं शारीरदुःखवर्जितमित्यर्थः । तं प्राप्य तस्मिन्वसति शाश्वतीर्नित्याः समाः संवत्सरानित्यर्थः । ब्रह्मणो वहून्कल्पान्वसतीत्येतत् ॥ १ ॥

इति बृहदारण्यकोपनिषद्भाष्ये पञ्चमाध्यायस्य दशमं ब्राह्मणम् ॥ १० ॥

ब्राह्मणान्तरस्य तात्पर्यमाह—सर्वेषामिति । फलं चाश्रुतफलानामिति शेषः । किमिति विद्वान्वायुमागच्छति तमुपेक्ष्यैव ब्रह्मलोकं कुतो न गच्छतीत्याश-

---

१ क. °र्ध्वमाक्र° । २ ग. °हीत आत्मा° । ३ घ. स्वाव° । ४ क. ग. घ. ङ. छ. ज. झ. °सिद्धं प° । ग. ङ 'मूर्ध्वमाक्र° । च. °मूर्ध्वं स गच्छ° । ६ ग. ऊर्ध्वं गच्छ° । क. ख. ङ. छ. झ. ऊर्ध्वं स गच्छ° । ७ ङ. च. छ. झ. ढ. °च्छिद्रं प° । ८ ख. ङ. च. छ. झ. ऊर्ध्वमाक्र° । ९ ख. ग. ङ. च. छ. ऊर्ध्वमाक्र° । १० क. ग. घ. ङ. च. छ. झ. ढ. °तिमा° । ११ च. ढ. °ल्यान्समतीत्येत्ये° । १२ क. ख. घ. छ. ढ. ज. °लं स्वभू° ।

क्षुण्णाऽऽह—अन्तरिक्ष इति । आदित्यं प्रत्यागमने हेतुमाह—आदित्य इति । उक्तेऽर्थे वाक्यं पातयति—तस्मा इति । बहून्कल्पानित्यवान्तरकल्पोक्तिः ॥ १ ॥

इति बृहदारण्यकोपनिषद्भाष्यटीकायां पञ्चमाध्यायस्य
दशमं ब्राह्मणम् ॥ १० ॥

अथ पञ्चमाध्यायस्यैकादशं ब्राह्मणम् ।

एतद्वै परमं तपो यद्व्याहितस्तप्यते परमꣳ हैव
लोकं जयति य एवं वेदैतद्वै परमं तपो यं प्रेतमर-
ण्यꣳ हरन्ति परमꣳ हैव लोकं जयति य एवं
वेदैतद्वै परमं तपो यं प्रेतमग्नावभ्यादधति परमꣳ
हैव लोकं जयति य एवं वेद ॥ १ ॥

इति बृहदारण्यकोपनिषदि पञ्चमाध्यायस्यै-
कादशं ब्राह्मणम् ॥ ११ ॥

एतद्वै परमं तपः । किं तत् । यद्व्याहितो व्याधितो ज्वरादिपरि-गृहीतः सन्यत्तप्यते तदेतत्परमं तप इत्येवं चिन्तयेत् । दुःखसामा-न्यात् । तस्यैवं चिन्तयतो विदुषः कर्मक्षयहेतुस्तदेव तपो भवत्यनि-च्छतोऽविषादतः । एवं च तेन विज्ञानतपसा दग्धकिल्बिषः परमं हैव लोकं जयति य एवं वेद । तथा मुमूर्षुरादावेव कल्पयति किमेतद्वै परमं तपो प्रेतं मां ग्रामादरण्यं हरन्ति । ऋत्विजोऽन्त्यकर्मणे तद्ग्रामादर-ण्यगमनसामान्यात्परमं मम तत्तपो भविष्यति । ग्रामादरण्यगमनं परमं तप इति हि प्रसिद्धम् । परमं हैव लोकं जयति य एवं वेद । तथैतद्वै परमं तपो यं प्रेतमग्नावभ्यादधति । अग्निप्रवेशसामान्यात् । परमं हैव लोकं जयति एवं वेद ॥ १ ॥

इति बृहदारण्यकोपनिषद्भाष्ये पञ्चमाध्यायस्यै-
कादशं ब्राह्मणम् ॥ ११ ॥

ब्रह्मोपासनप्रसङ्गे फलवदब्रह्मोपासनमुपन्यस्यति—एतदिति । यद्व्याहित इति प्रतीकमादाय व्याचष्टे—ज्वरादीति । कर्मक्षयहेतुरित्यत्र कर्मशब्देन पाप-

---

१ क. ङ. सत्संतप्य° । २ ग. ङ एवं ते° । २ घ. ज. °व ते° ।

मुच्यते । परमं हैव लोकमित्यत्र तपसोऽनुकूलं फलं लोकशब्दार्थः । अस्तु ग्रामादरण्यगमनं तथाऽपि कथं तपस्त्वमित्याशङ्क्याऽऽह—ग्रामादिति ॥ १ ॥

इति बृहदारण्यकोपनिषद्भाष्यटीकायां पञ्चमाध्यायस्यैकादशं ब्राह्मणम् ॥ ११ ॥

अथ पञ्चमाध्यायस्य द्वादशं ब्राह्मणम् ।

अन्नं ब्रह्मेत्येक आहुस्तन्न तथा पूयति वा अन्नमृते प्राणात्प्राणो ब्रह्मेत्येक आहुस्तन्न तथा शुष्यति वै प्राण ऋतेऽन्नादेते ह त्वेव देवते एकधाभूयं भूत्वा परमतां गच्छतस्तद्ध स्माऽऽह प्रातृदः पितरं किꣳस्विदेवैवं विदुषे साधु कुर्या किमेवास्मा असाधु कुर्यामिति स ह स्माऽऽह पाणिना मा प्रातृद कस्त्वेनयोरेकधाभूयं भूत्वा परमतां गच्छतीति तस्मा उ हैतदुवाच तदित्यन्नं वै व्यन्ने हीमानि सर्वाणि भूतानि विष्ठानि रमिति प्राणो वै रं प्राणे हीमानि सर्वाणि भूतानि रमन्ते सर्वाणि ह वा अस्मिन्भूतानि विशन्ति सर्वाणि भूतानि रमन्ते य एवं वेद ॥ १ ॥

इति बृहदारण्यकोपनिषदि पञ्चमाध्यायस्य द्वादशं ब्राह्मणम् ॥ १२ ॥

अन्नं ब्रह्मेति । तथैतदुपासनान्तरं विधित्सन्नाह—अन्नं ब्रह्म जपयते यत्तद्ब्रह्मेत्येक आचार्या आहुस्तन्न तथा ग्रहीतव्यमन्नं ब्रह्मेति । अन्ये चाऽऽहुः प्राणो ब्रह्मेति तच्च तथा न ग्रहीतव्यम् । किमर्थं पुनरन्नं ब्रह्मेति न ग्राह्यम् । यस्मात्पूयति क्लिद्यते पूतिभावमापद्यत ऋते प्राणात्तत्कथं ब्रह्म भवितुमर्हति । ब्रह्म हि नाम तद्यदविनाशि । अस्तु तर्हि प्राणो ब्रह्म । नैव । यस्माच्छुष्यति वै प्राणः शोष-

१ च छ ढ. °स्त्वेतया° । २ ग. घ. ज. अन्य आहुः ।

मुपैति ऋतेऽन्नात्[1]। अत्ता हि प्राणः। अतोऽन्नेनाऽऽद्येन विना न शक्नोत्यात्मानं धारयितुम्। तस्माच्छ्रयति वै प्राण ऋतेऽन्नात्। अत एकैकस्य ब्रह्मता नोपपद्यते यस्मात्तस्मादेते ह त्वेवान्नप्राणदेवते एकधाभूयमेकधाभावं भूत्वा गत्वा परमतां परमत्वं गच्छतो ब्रह्मत्वं प्राप्नुतः।

ब्राह्मणान्तरं गृहीत्वा तात्पर्यमाह—अन्नमिति। यथा पूर्वस्मिन्ब्राह्मणे फलवद्ब्रह्मोपासनमुक्तं तद्वदित्याह—तथेति। एतदिति ब्रह्मविषयोक्तिः। उपास्यं ब्रह्म निर्धारयितुं विचारयति—अन्नमित्यादिना। अन्नस्य विनाशित्वेऽपि ब्रह्मत्वं किं न स्यादत आह—ब्रह्म हीति। कथमन्नं विना प्राणस्य शोषप्राप्तिस्तत्राऽऽह—अत्ता हीति। प्रत्येकं नाशित्वमतःशब्दार्थः।

तदेतदेवमध्यवस्य ह स्माऽऽह स्म प्रातृदो नाम पितरमात्मनः किंस्वित्स्विदिति वितर्कं। यथा मया ब्रह्म परिकल्पितमेवं विदुषे किंस्वित्साधु कुर्या साधु शोभनं पूजां कां त्वस्मै पूजां कर्यामित्यभिप्रायः। किमेवास्मै विदुषेऽसाधु कुर्या कृतकृत्योऽसावित्यभिप्रायः। अन्नप्राणौ सहभूतौ ब्रह्मेति विद्वान्नाभावमाधुकरणेन खण्डितो भवति। नापि साधुकरणेन महीकृतः। तमेवंवादिनं स पिता ह स्माऽऽह पाणिना हस्तेन निवारयन्मा प्रातर्द मैवं वोचः। कस्त्वेनयोरन्नप्राणयोरेकधाभूयं भूत्वा परमतां कस्तु गच्छति न कश्चिदपि विद्वानेनेन ब्रह्मदर्शनेन परमतां गच्छति। तस्मान्नैवं वक्तुमर्हसि कृतकृत्योऽसाविति। यद्येवं ब्रवीतु भवान्कथं परमतां गच्छतीति। तस्मा उ हैतदृक्थमाणं वच उवाच। किं तत्। वीति। किं तद्वीति। उच्यते—अन्नं वै वि। अन्ने हि यस्मादिमानि सर्वाणि भूतानि विष्टान्याश्रितान्यतोऽन्नं वीत्युच्यते। किंच रमिति[13]। रमिति चोक्तवान्पिता। किं पुनस्तद्रम्। प्राणो वै रम्। कुत इत्याह। प्राणो हि यस्माद्बलाश्रये सति सर्वाणि भूतानि रमन्तेऽतो रं प्राणः। सर्वभूताश्रयगणनन्नं सर्वभूतरतिगुणश्च प्राणः। न हि कश्चिदनायतनो निराश्रयो रमते। नापि सत्यप्यायतनेऽप्राणो दुर्बलो रमते। यदा त्वायतनवान्प्राणी बलवांश्च तदा कृतार्थमात्मानं

१ क. झ. ॰त्विदि॰। २ ब. ज ॰मेव माऽस्मै। च झ ढ ॰मेव ह्यस्मा एवं वि॰। ३ ग. ॰ह्यस्मा एवं वि॰। ४ घ ज. ॰साधु॰। ५ क. ॰तृदवं। ६ च. ॰स्त्वेतयो॰। ७ झ. ॰ता ग॰। ८ घ. ज. झ. भगवा॰। ९ ख. ङ. च. छ. ढ. ॰न्कथय कथं। १० ख. च. छ. ढ. ॰ण गुणश्च व॰। ११ ख. ग. छ. झ. ढ. ॰ति वा॰। १२ च. ॰णी च व॰।

मन्यमानो रमते लोके। "युवा स्यात्साधुयुवाऽध्यायकः" इत्यादिश्रुतेः। इदानीमेवंविदः फलमाह—सर्वाणि ह वा अस्मिन्भूतानि विशन्त्यन्नगुणज्ञानात्सर्वाणि भूतानि रमन्ते प्राणगुणज्ञानाय एवं वेद ॥ १॥

इति बृहदारण्यकोपनिषद्भाष्ये पञ्चमाध्यायस्य
द्वादशं ब्राह्मणम् ॥ १२ ।

किंस्विदित्यादिवाक्यस्यार्थं विवृणोति—अन्नप्राणाविति। कस्त्वीदृशः प्रतीकमादाय व्याकरोति—एनयोरिति। यद्येवमुक्तरीत्या परमत्वं यदि नास्तीत्यर्थः। उक्तसंकीर्णं गुणद्वयं संक्षिप्याऽऽह—सर्वभूतेति। अन्नगुणं विना प्राणगुणादेर्तदुद्धानं सिध्यतीत्याशङ्क्याऽऽह—न ह्येति। प्राणगुणस्याप्यन्नगुणत्वसंभवादलं प्राणेनेत्याशङ्क्याऽऽह—नापीति। गुणद्वयस्य परम्परापेक्षामनुभवानुसारेण स्फोरयति—यदा त्विति। आयतनवतो बलवत्त्वं कृतार्थेनेत्यत्र तैत्तिरीयश्रुतिं संवादयति—युवा स्यादिति। आशिष्ठो दृढिष्ठो बलिष्ठस्तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यादित्येतदादिशब्देन गृह्यते ॥ १ ॥

इति बृहदारण्यकोपनिषद्भाष्यटीकायां पञ्चमाध्यायस्य द्वादशं
ब्राह्मणम् ॥ १२ ॥

अथ पञ्चमाध्यायस्य त्रयोदशं ब्राह्मणम्।

उक्थं प्राणो वा उक्थं प्राणो ह्येदꣳ सर्वमुत्थापयत्युद्वास्मादुक्थविद्वीरस्तिष्ठत्युक्थस्य सायुज्यꣳ सलोकतां जयति य एवं वेद ॥ १ ॥

उक्थं तथोपासनान्तरमुक्थं शस्त्रम्। तद्धि प्रधानं महाव्रते क्रतौ। किं पुनस्तदुक्थम्। प्राणो वा उक्थम्। प्राणश्च प्रधान इन्द्रियाणामुक्थं च शस्त्राणामत उक्थमित्युपासीत। कथं प्राण उक्थमित्याह—प्राणो हि यस्मादिदं सर्वमुत्थापयति। उत्थापनादुक्थं प्राणः। न ह्यप्राणः कश्चिदुत्तिष्ठति। तदुपासनफलमाह—उद्वास्मादेवंविद उक्थवित्प्राणविद्वीरः पुत्र उत्तिष्ठति ह दृष्टमेतत्फलमदृष्टं तूक्थस्य सायुज्यं सलोकतां जयति य एवं वेद ॥ १ ॥

अन्नप्राणयोर्गुणद्वयविशिष्टयोर्मिलितयोरुपासनमुक्तमिदानीं ब्राह्मणान्तरमादाय तात्पर्यमाह—उक्थमिति। सत्सु शस्त्रान्तरेषु किमित्युक्थमुपास्यतेनोपन्यस्यते

---

१ क. ख. छ. ज. ढ. एतया। २ घ. ङ. ण °दꣳ ध्याम, ३ क. °दित्यादिना। आ°। ४ ख. ङ. छ. ढ. च सवश°। ग. च. झ. त्त सर्वशास्त्र°।

त्रेत्याऽऽह-तद्धीति । कस्मिन्किमारोप्यं कस्योपास्यत्वमिति प्रश्नद्वारा विवृणोति-किं पुनरिति । तस्मिन्नुक्थदृष्टौ हेतुमाह-प्राणश्चेति । तस्मिन्नुक्थशब्दस्य समवेतार्थत्व प्रश्नपूर्वकमाह-कथमित्यादिना । उत्थानस्य स्वतोऽपि संभवान्न प्राणकृतत्वमित्याङ्क्याऽऽह-न हीति । उक्थस्य प्राणस्यैतद्विज्ञानतारतम्यमपेक्ष्य सायुज्यं सालोक्यं च व्याख्येयम् ॥ १ ॥

यजुः प्राणो वे यजुः प्राणे हीमानि सर्वाणि भूतानि युज्यन्ते युज्यन्ते हास्मै सर्वाणि भूतानि श्रैष्ठ्याय यजुषः सायुज्यꣳ सलोकतां जयति य एवं वेद ॥ २ ॥

यजुरिति चोपासीत प्राणम् । प्राणो वै यजुः । कथं युजः प्राणः । प्राणे हि यस्मात्सर्वाणि भूतानि युज्यन्ते । न ह्यमति प्राणे केनचित्कस्यचिद्योगसामर्थ्यम् । अतो युनक्तीति प्राणो यजुः । एवंविदः फलमाह-युज्यन्त उद्यच्छन्त इत्यर्थः । हास्मा एवंविदे सर्वाणि भूतानि श्रैष्ठ्यं श्रेष्ठभावस्तस्मै श्रैष्ठ्याय श्रेष्ठभावायायं न श्रेष्ठो भवेदिति । यजुषः प्राणस्य सायुज्यमित्यादि सर्वं समानम् ॥ २ ॥

यजुःशब्दस्यान्यत्र रूढत्वादयुक्तं प्राणविषयत्वमिति शङ्कित्वा परिहरति-कथमित्यादिना । असत्यपि प्राणे योगः संभवतीत्याशङ्क्याऽऽह-न हीति । प्रकरणानुगृहीतप्राणशब्दश्रुत्या यजुःशब्दस्य रूढिं त्यक्त्वा योगोऽङ्गीकर्तव्य इत्याह-अत इति ॥ २ ॥

साम प्राणो वै साम प्राणे हीमानि सर्वाणि भूतानि सम्यञ्चि सम्यञ्चि हास्मै सर्वाणि भूतानि श्रैष्ठ्याय कल्पन्ते साम्नः सायुज्यꣳ सलोकतां जयति य एवं वेद ॥ ३ ॥

सामेति चोपासीत प्राणम् । प्राणो वै साम । कथं प्राणः साम । प्राणे हि यस्मात्सर्वाणि भूतानि सम्यञ्चि संगच्छन्ते संगमनात्साम्यापत्तिहेतुत्वात्साम प्राणः । सम्यञ्चि संगच्छन्ते हास्मै सर्वाणि भूतानि । न केवलं संगच्छन्त एव श्रेष्ठभावाय चास्मै कल्पन्ते समर्थयन्ते । साम्नः सायुज्यमित्यादि पूर्ववत् ॥ ३ ॥

---

१ घ. ञ. ण. °प्य तस्यो° । २ ज. ग. ध. झ. °त्सान्यताप्र° ।

संगमनादित्येतदेव व्याचष्टे—साम्येति ॥ ३ ॥

क्षत्रं प्राणो वै क्षत्रं प्राणो हि वै क्षत्रं त्रायते हैनं प्राणः क्षणितोः प्र क्षत्रमत्रं प्राप्नोति क्षत्रस्य सायुज्यꣳ सलोकतां जयति य एवं वेद ॥ ४ ॥

इति बृहदारण्यकोपनिषदि पञ्चमाध्यायस्य त्रयोदशं ब्राह्मणम् ॥ १३ ॥

तं प्राणं क्षत्त्रमित्युपासीत । प्राणो वै क्षत्त्रं प्रसिद्धमेतत्प्राणो हि वै क्षत्त्रम् । कथं प्रसिद्धतेत्याह—त्रायते पालयत्येनं पिण्डं देहं प्राणः क्षणितोः शस्त्रादिहिंसितात्पुनर्मीमनभऽऽपूरयति यस्मात्तस्मात्क्षतत्राणात्प्रसिद्धं क्षत्त्रत्वं प्राणस्य । विद्वत्फलमाह प्र क्षत्त्रमत्रं न त्रायतेऽन्येन केनचिदित्यत्रं क्षत्त्रं प्राणस्थमत्रं क्षत्त्र प्राण प्राप्नोतीत्यर्थः । शाखान्तरे वा पाठात्क्षत्त्रमात्र प्राणो भवतीत्यर्थः । क्षत्त्रस्य सायुज्यं सलोकतां जयति य एवं वेद ॥ ४ ॥

इति बृहदारण्यकोपनिषद्भाष्ये पञ्चमाध्यायस्य त्रयोदशं ब्राह्मणम् ॥ १३ ॥

शाखान्तरशब्देन माध्यंदिनशाखोच्यते ॥ ४ ॥

इति बृहदारण्यकोपनिषद्भाष्यटीकायां पञ्चमाध्यायस्य त्रयोदशं ब्राह्मणम् ॥ १३ ॥

अथ पञ्चमाध्यायस्य चतुर्दश ब्राह्मणम् ।

भूमिरन्तरिक्षं द्यौरित्यष्टावक्षराण्यष्टाक्षरꣳ ह वा एकं गायत्र्यै पदमेतदु हैवास्या एतत्स यावदेषु त्रिषु लोकेषु तावद्ध जयति योऽस्या एतदेवं पदं वेद ॥ १ ॥

ब्रह्मणो हृदयाद्यनेकोपाधिविशिष्टस्योपासनमुक्तमथेदानीं गायत्र्युपाधिविशिष्टस्योपासनं वक्तव्यमित्यारभ्यते । सर्वच्छन्दसां हि गाय-

---

१ ङ ज झ °ह । क्षं° । २ च. ढ. °यत्र्योपा° ।

त्रीच्छन्दः प्रधानभूतम् । तत्प्रयोक्तृगयत्राणाद्गायत्रीति वक्ष्यति । नन्वन्येषां छन्दसां प्रयोक्तृप्राणत्राणसामर्थ्यम् । प्राणात्मभूता च सा सर्वच्छन्दसां चाऽऽत्मा प्राणः । प्राणश्च क्षतत्राणात्क्षत्त्रमित्युक्तम् । प्राणश्च गायत्री । तस्मात्तदुपासनमेव विधित्स्यत । द्विजोत्तमजन्महेतुत्वाच्च । गायत्र्या ब्राह्मणमसृजत त्रिष्टुभा राजन्यं जगत्या वैश्यमिति द्विजोत्तमस्य द्वितीयं जन्म गायत्रीनिमित्तम् । तस्मात्प्रधानभूता गायत्री ब्राह्मणा व्युत्थाय ब्राह्मणा अभिवदन्ति स ब्राह्मणो विपापा विरजोऽविचिकित्सो ब्राह्मणो भवतीत्युत्तमपुरुषार्थसंबन्धं ब्राह्मणस्य दर्शयति । तच्च ब्राह्मणत्वं गायत्रीजन्ममूलमतो वक्तव्यं गायत्र्याः सतत्त्वम् । गायत्र्या हि यः सृष्टा द्विजोत्तमो निरङ्कुश एवोत्तमपुरुषार्थसाधनेऽधिक्रियतेऽतस्तन्मूलः परमपुरुषार्थसंबन्धः । तस्मात्तदुपासनविधानायाऽऽह—भूमिरन्तरिक्षं द्यौरित्येतान्यष्टावक्षराणि । अष्टाक्षरमष्टावक्षराणि यस्य तदिदमष्टाक्षरम् । ह वै प्रसिद्धावद्योतका । एकं प्रथमं गायत्र्ये गायत्र्याः पदम् । यकारेणैवाष्टत्वपूरणम् । एतदु ह्येवतदेवास्या गायत्र्याः पदं पादः प्रथमो भूम्यादिलक्षणस्त्रैलोक्यात्मा । अष्टाक्षरत्वसामान्यात् । एवमेतत्त्रैलोक्यात्मक गायत्र्याः प्रथमं पद या वेद तस्य तत्फलम्—स यिद्वान्यावत्किंचिदेषु त्रिषु जेतव्यं तावत्सर्वं ह जयति योऽस्या एतदेव पदं वेद ॥ १ ॥

वृत्तमनूद्य गायत्रीब्राह्मणस्य तात्पर्यमाह—ब्रह्मण इत्यादिना । छन्दोन्तरेष्वपि विद्यमानेषु किमिति गायत्र्युपाधिकमेव ब्रह्मोपास्यमिष्यते तत्राऽऽह—सर्वच्छन्दसामिति । तत्प्राधान्ये हेतुमाह—तत्प्रयोक्तृत्रेति । तत्र प्रयोक्तृप्राणत्राणसामर्थ्यं छन्दोन्तराणामपीति चेन्नेत्याह—न चेति । प्रमाणाभावादिति भावः । किंच प्राणात्मभावो गायत्र्या विवक्ष्यते प्राणश्च सर्वेषां छन्दसां निर्वर्तकत्वादात्मा तथा च सर्वच्छन्दोव्यापकगायत्र्युपाधिकब्रह्मोपासनमेवात्र विवक्षितमित्याह—प्राणात्मेति । तदात्मभूता गायत्रीमुक्तं व्यक्तं करोति—प्राणश्चेति । तत्प्रयोक्तृगयत्राणाद्धि गायत्री । प्राणश्च वागादीनां त्राता । ततश्चैकलक्षणत्वात्तयोस्तादात्म्यमित्यर्थः । प्राणगायत्र्योस्तादात्म्ये फलितमाह—तस्मादिति । गायत्रीप्राधान्ये हेत्वन्तरमाह—द्विजोत्तमेति । तदेव स्फुटयति—गायत्र्येति । तत्पा-

---

१ °ग. ङ. °ति हि व° । २ झ °सां तत्प्रयो° । ३ च ढ. °ततस्त्राणा° । ४ घ. ज. ब्रह्मणो । ५ घ. ज. °त्रीमू° । २ ख घ. ङ च ज. ट °ते तत° । ७ क. घ. ङ. ण. °तादिति । तत्प्रयोगे तु° ।

धान्ये हेत्वन्तरमाह—ब्राह्मणा इति । कथमेतावता गायत्रीपादान्तं तत्राऽऽह—तच्चेति । अतो वक्तव्यमित्यत्रातःशब्दार्थमाह--गायत्र्य हीति । अधिकारित्वकृतं कार्यमाह--अत इति । तच्छब्दो गायत्रीविषयः । गायत्रीविशिष्टं परामृश्य फलितमनुसंहरति--तस्मादिति । गायत्रीप्रथमपादस्य सप्ताक्षरत्वं प्रतीयते न त्वष्टाक्षरत्वमित्याशङ्क्याऽऽह--यकारेणेति । गायत्रीप्रथमपादस्य त्रैलोक्यनाम्नश्च संख्यासामान्यमयुक्तं कार्यमाह--एतदिति । गायत्रीप्रथमपादे त्रैलोक्यदृष्टचारोपस्य प्रयोजनं दर्शयति--एवमिति । प्रथमपादज्ञाने विराडात्मैकत्वं फलतीत्यर्थः ॥ १ ॥

ऋचो यजूंषि सामानीत्यष्टावक्षराण्यष्टाक्षरꣳ ह वा एकं गायत्र्यै पदमेतदु हैवास्या एतत्स यावदियं त्रयी विद्या तावद्ध जयति योऽस्या एतदेवं पदं वेद ॥ २ ॥

तयर्चा यजूंषि सामानीति त्रय्याविद्यानामाक्षराण्येतान्यप्यष्टावेव तयैवाष्टाक्षरं ह वा एकं गायत्र्यै पद द्वितीयमेतदु हैवास्या एतद्ऋग्यजुःसामलक्षणमष्टाक्षरत्वसामान्यादेव । स यावतीयं त्रयी विद्या त्रय्या विद्यया यावत्फलजातमाप्यते तावद्ध जयति योऽस्या एतद्गायत्र्यास्त्रैविद्यलक्षणं पद वेद ॥ २ ॥

प्रथमे पादे त्रैलोक्यदृष्टिवद्द्वितीये पादे कर्तव्या त्रैविद्यदृष्टिरित्याह—तथेति । दृष्टिविध्युपयोगित्वेन संख्यासामान्यं कथयति—ऋच इति । संख्यासामान्यफलमाह--एतदिति । विद्याफलं दर्शयति--स यावतीति ॥ २ ॥

प्राणोऽपाना व्यान इत्यष्टावक्षराण्यष्टाक्षरꣳ ह वा एक गायत्र्यै पदमेतदु हवास्या एतत्स यावदिदं प्राणि तावद्ध जयति योऽस्या एतदेवं पदं वेदाथास्य एतदेव तुरीयं दर्शतं पदं परोरजा य एष त तिं यद्वै चतुर्थं तत्तुरीयं दर्शतं पदमिति ददृश इव ह्येष परो-

१ ख. घ ढ तत । २ क. °पादे ज्ञात वि° । ३ घ. ङ. °ज्ञान वि° । ४ क. ख. छ. ढ. °त्मकं फ° । च. ञ. °त्मत्वं फ° । ५ क. ग. घ. च. ज. झ ढ. °तद्ग्रह° । ६ घ. ञ. झ. °त्र्यास्त्रयीवि° ।

रजा इति सर्वमु ह्येवैष रज उपर्युपरि तपत्येवꣳ
हैव श्रिया यशसा तपति न योऽस्या एतदेवं पदं
वेद ॥ ३ ॥

तथा प्राणोऽपानो व्यान एतान्यपि प्राणाद्यभिधानाक्षराण्यष्टौ । तच्च गायत्र्यास्तृतीयं पदं यावदिदं प्राणिजातं तवाद्ध जयति योऽस्या एतदेवं गायत्र्यास्तृतीयं पदं वेद । अथानन्तरं गायत्र्यास्त्रिपदायाः शब्दात्मिकायास्तुरीयं पदमुच्यतेऽभिधेयभूतमस्याः प्रकृताया गायत्र्या एतदेव वक्ष्यमाणं तुरीयं दर्शतं पदं परोरजा य एष तपति । तुरीयमित्यादिवाक्यपदार्थं स्वयमेव व्याचष्टे श्रुतिः—यद्वै चतुर्थं प्रसिद्धं लोके तदिदं तुरीयशब्देनाभिधीयते । दर्शतं पदमित्यस्य कोऽर्थ इत्युच्यते—ददृश इव दृश्यत इव ह्येष मण्डलान्तर्गतः पुरुषोऽतो दर्शतं पदमुच्यते । परोरजा इत्यस्य पदस्य कोऽर्थ इत्युच्यते—सर्वं समस्तमु ह्येवैष मण्डलस्थः पुरुषो रजो रजोजातं समस्तं लोकमित्यर्थः । उपर्युपर्याधिपत्यभावेन सर्वं लोकं रजोजातं तपति । उपर्युपरीति वीप्सा सर्वलोकाधिपत्यख्यापनार्था । ननु सर्वशब्देनैव सिद्धत्वाद्वीप्साऽनर्थिका । नैष दोषः । येषामरिष्टात्मावेता दृश्यते तद्विषय एव सर्वशब्दः स्यादित्याशङ्कानिवृत्त्यर्था वीप्सा । " ये चामुष्मात्पराञ्चो लोकास्तेषां चेष्टे देवकामानां च " इति श्रुत्यन्तरात् । तस्मात्सर्वावरोधार्था वीप्सा । यथाऽसौ सविता सर्वाधिपत्यलक्षणया श्रिया यशसा च ख्यात्या तपत्येवं हैव श्रिया यशसा च तपति योऽस्या एतदेवं तुरीयं दर्शतं पदं वेद ॥ ॥

प्रथमद्वितीयपादयोस्त्रैलोक्यत्रैविद्यदृष्टिवत्तृतीये पादे प्राणादिदृष्टिः कर्तव्येत्याह—तथेति । ननु त्रिपदा गायत्री व्याख्याता चेत्किमुत्तरग्रन्थेनेत्याशङ्क्याऽऽह—अथेति । शब्दात्मकगायत्रीप्रकरणविच्छेदार्थोऽयशब्दः । यद्वै चतुर्थमित्यादिग्रन्थस्य पूर्वेण पौनरुक्त्यमाशङ्क्याऽऽह—तुरीयमिति । इहेति प्रकृतवाक्योक्तिः । योगिभिर्दृश्यत इवेति लक्ष्यते न तु मुख्यमीश्वरस्य दृश्यत्वमतीन्द्रियत्वादित्याह—दृश्यत इवेति । ' लोका रजास्युच्यन्ते ' इति श्रुत्यन्तरमाश्रित्याऽऽह—समस्तमिति । आधिपत्यप्रभावेनेति कथं व्याख्यातमित्याशङ्क्याऽऽह—उपर्युपरीति ।

---

१ घ. ज. भूते तथाऽस्याः । २ घ. अ. 'दमित्युच्य' । ३ ख. ङ. छ. 'न्यज्ञाप' । ४ घ. ज. सिद्धा वीप्सा' । ५ ख., ग. छ. झ. 'र्वाविरो' । ६ च. ढ. 'था चासौ । ७ घ. अ. 'मित्यादीति । ८ क. घ. ण. 'ख्यातामि' ।

वीप्सामाक्षिपति—नन्विति। सर्वं रजस्तपतीत्येतावतैव सर्वाधिपत्यस्य सिद्धत्वा-दृथर्था वीप्सेति चोद्यं दूषयति—नैष दोष इति। येषां लोकानामिति यावत्। मण्डलपुरुषस्य निरङ्कुशमाधिपत्यमित्यत्र च्छान्दोग्यश्रुतिमनुकूलयति—ये चेति। वीप्तार्थवत्त्वमुपसंहरति—तस्मादिति। चतुर्थपादज्ञानस्य फलवत्त्वं कथयति—यथेति ॥ ३ ॥

सैषा गायत्र्येतस्मि॰स्तुरीये दर्शते पदे परोरजसि प्रतिष्ठिता तद्वै तत्सत्ये प्रतिष्ठितं चक्षुर्वै सत्यं चक्षुर्हि वै सत्यं तस्माद्यदिदानीं द्वौ विवदमानावेयाता-महमदर्शमहमश्रौषमिति य एवं ब्रूयादहमदर्शमिति तस्मा एव श्रद्दध्याम तद्वै तत्सत्ये बले प्रतिष्ठितं प्राणो वै बलं तत्प्राणे प्रतिष्ठितं तस्मादाहुर्बल॰ सत्यादोगीय इत्येवम्वेषा गायत्र्यध्यात्मं प्रतिष्ठिता सा हैषा गया॰स्तत्रे प्राणा वै गयास्तत्प्राणा॰स्त-त्रे तद्यद्गया॰स्तत्रे तस्माद्गायत्री नाम स यामेवा-मू॰ सावित्रीमन्वाहैवैष सा स यस्मा अन्वाह तस्य प्राणा॰स्त्रायते ॥ ४ ॥

सैषा त्रिपदोक्ता या त्रैलोक्यत्रैविद्यप्राणलक्षणा गायत्र्येतस्मिंश्चार्थे तुरीये दर्शते पदे परोरजसि प्रतिष्ठिता। मूर्तामूर्तरसत्वादादित्यस्य। रसापाये हि वस्तु नीरसमप्रतिष्ठितं भवति। यथा काष्ठादि दग्धं सारं तद्वत्। तथा मूर्तामूर्तात्मकं जगत्त्रिपदा गायत्र्यादित्ये प्रतिष्ठिता तद्रसत्वात्सह त्रिभिः पादैः। तद्वै तुरीयं पदं सत्ये प्रतिष्ठितम्। किं पुनस्तत्सत्यमित्युच्यते—चक्षुर्वै सत्यम्। कथं चक्षुः सत्यमित्याह—प्रसिद्धमेतच्चक्षुर्हि वै सत्यम्। कथं प्रसिद्धतेत्याह—तस्माद्यद्यदीदानीमेव द्वौ विवदमानौ विरुद्धं वदमानावेयातामागच्छेयातामहमदर्शं दृष्टवानस्मीत्यन्य आहाहमश्रौषं त्वया दृष्टं न तथा तद्वस्त्विति तयोर्य एवं ब्रूयादहमद्राक्षमिति तस्मा एव श्रद्दध्याम न पुनर्यो ब्रूयादहमश्रौ-

१ च. °मद्राक्षम°। २ च °मद्राक्षमि°। ३ च. ढ. °प्राणादिल°। ४ घ. छ. ज. झ. °वं यत्त्वया।

षामिति । श्रोतुर्मृषा श्रवणमपि संभवति न तु चक्षुषो मृषा दर्शनम् । तस्माच्चाश्रौषमित्युक्तवते श्रद्दध्याम । तस्मात्सत्यप्रतिपत्तिहेतुत्वात्सत्यं चक्षुस्तस्मिन्सत्ये चक्षुषि सह त्रिभिरितरैः पादैस्तुरीयं पदं प्रतिष्ठितमित्यर्थः । उक्तं च स आदित्यः कस्मिन्प्रतिष्ठित इति चक्षुषीति ।

अभिधानाभिधेयात्मिकां गायत्रीं व्याख्यायाभिधानस्याभिधेयवन्नत्वमाह—सैषेति । आदित्ये प्रतिष्ठिता मूर्तामूर्तात्मिका गायत्रीत्यत्र हेतुमाह—मूर्तेति । भवतु मूर्तामूर्तब्राह्मणानुसारेणाऽऽदित्यस्य तत्सारत्वं तथाऽपि कथं गायत्र्यास्तत्प्रतिष्ठत्वं पृथगेव सा मूर्ताद्यात्मिका स्यात्स्यादित्याशङ्क्याऽऽह—रसेति । तद्वदादित्यसंबन्धाभावे मूर्ताद्यात्मिका गायत्री स्यादप्रतिष्ठितेति शेषः । सारादृते स्वातन्त्र्येण मूर्तादेर्न स्थितिरिति स्थिते फलितमाह—तथेति । आदित्यस्य स्वातन्त्र्यं वारयति—तद्वा इति । सत्यशब्दस्यानृतविपरीतवाग्विषयत्वं शङ्कानद्वारा वारयति—किं पुनरित्यादिना । चक्षुषः सत्यत्वे प्रमाणाभावं शङ्कित्वा दूषयति—कथमित्यादिना । श्रोतरि श्रद्धाभावे हेतुमाह—श्रोतुरिति । द्रष्टुरपि मृषादर्शनं संभवतीत्याशङ्क्याऽऽह—न त्विति । क्वचित्कथंचित्संभवेऽपि श्रोत्रपेक्षया द्रष्टरि विश्वासो दृष्टो लोकस्येत्याह—तस्मान्नेति । विश्वासातिशयफलमाह—तस्मादिति । आदित्यस्य चक्षुषि प्रतिष्ठितत्वं पञ्चमेऽपि प्रतिपादितमित्याह—उक्तं चेति ।

तद्वै तुरीयपदाश्रयं सत्यं बले प्रतिष्ठितम् । किं पुनस्तद्बलमित्याह—प्राणो वै बलं तस्मिन्प्राणे बले प्रतिष्ठितं सत्यम् । तथा चोक्तं सूत्रे तदोतं च प्रोतं चेति । यस्माद्बले सत्यं प्रतिष्ठितं तस्मादाहुर्बलं सत्यादोगीय ओजीय ओजस्तरमित्यर्थः । लोकेऽपि यस्मिन्हि यदाश्रितं भवति तस्मादाश्रितादाश्रयस्य बलवत्तरत्वं प्रसिद्धम् । न हि दुर्बलं बलवतः क्वचिदाश्रयभूतं दृष्टम् । एवमुक्तन्यायेन उ एषा गायत्र्यध्यात्ममध्यात्मे प्राणे प्रतिष्ठिता । सैषा गायत्री प्राणः । अतो गायत्र्यां जगत्प्रतिष्ठितम् । यस्मिन्प्राणे सर्वे देवा एकं भवन्ति । सर्वे वेदा कर्माणि फलं च सैवं गायत्री प्राणरूपा सती जगत आत्मा । स हैषा गयांस्तत्रे त्रातवती । के पुनर्गयाः । प्राणा वागादयो वै गयाः । शब्दकरणात् । तांस्तत्रे सैषा गायत्री । तत्तत्र यद्यस्माद्-

---

१ च. चक्षुषा । २ ख. छ. °षोर्मृषा । ३ क. तिष्ठात्वं । ञ. ढ. ण. °तिष्ठितत्वे । ४ ख. छ. झ. °त्यं पदं वै । ५ ग. झ. ट. सैव । ६ थ, ज. °स्तत्र एषा ।

यांस्तत्रे तस्माद्गायत्री नाम । गयत्राणाद्गायत्रीति प्रथिता । स आचार्य उपनीय माणवकमष्टवर्षं यामेवामूं गायत्रीं सावित्रीं सवितृदेवताकामन्वाहैं पच्छोर्धर्चशः समस्तां च । एषैव सा साक्षात्प्राणो जगत आत्मा माणवकाय समर्पितेहेदानीं व्याख्याता नान्या स आचार्यो यस्मै माणवकायान्वाहानुवक्ति तस्य माणवकस्य गयान्प्राणांस्त्रायते नरकादिपतनात् ॥ ४ ॥

सत्यस्य स्वातन्त्र्यं प्रत्याह—तद्वा इति । सत्यस्य प्राणप्रतिष्ठात्वं च पाञ्चभौतिकमित्याह—तथा चेति । सूत्रं प्राणो वायुः । तच्छब्देन सत्यशब्दितसर्वभूतग्रहणम् । सत्यं बले प्रतिष्ठितमित्यत्र लोकप्रसिद्धिं प्रमाणयति—तस्मादिति । तदेवोपपादयति—लोकेऽपीति । तदेव व्यतिरेकमुखेनाऽऽ(णाऽऽ)ह—न हीति । एतेन गायत्र्याः सूत्रात्मत्वं सिद्धमित्याह—एवमिति । तस्मिन्नर्थे वाक्यं योजयति—सैषेति । गायत्र्याः प्राणत्वे किं सिध्यति तदाह—अत इति । तदेव स्पष्टयति—यस्मिन्नित्यादिना । गायत्रीनामनिर्वचनेन तस्या जगज्जीवनहेतुत्वमाह—सा हैषेति । प्रयोक्तृशरीरं सप्तम्यर्थः । गायन्तीति गया वागुपलक्षिताश्चक्षुरादयः । ब्राह्मणमूलत्वेन स्तुत्यर्थं गायत्र्या एव सावित्रीत्वमाह—स आचार्य इति । पच्छः पादशः । सावित्र्या गायत्रीत्वं साधयति—स इति । अतः सावित्री गायत्रीति शेषः ॥ ४ ॥

ताꣳ हैतामेके सावित्रीमनुष्टुभमन्वाहुर्वागनुष्टुबेतद्वा-
घमनुब्रूम इति न तथा कुर्यांद्गायत्रीमेव सावित्रीम-
नुब्रूयाद्यदि ह वा अप्येवंविद्ब्राह्मव प्रतिगृह्णाति न
हैव तद्गायत्र्या एकंचन पदं प्रति ॥ ५ ॥

तामेतां सावित्रीं हैके शाखिनोऽनुष्टुभमनुष्टुप्छन्दस्कामन्वाहुरुपनीताय । तदभिप्रायमाह—वागनुष्टुप् । वाक्च शरीरे सरस्वती तामेव हि वाचं सरस्वतीं माणवकायानुब्रूम इत्येतद्वदन्तः । न तथा कुर्यान्न तथा विद्यादित्त आहुर्मृषैव तत् । किं तर्हि गायत्रीमेव सावित्रीमनुब्रूयात् । कस्मात् । यस्मात्प्राणो गायत्रीत्युक्तम् । प्राण उक्ते वाक्च सरस्वती चान्ये च प्राणाः सर्वे माणवकाय समर्पितं भवति । किंचेदं प्रासङ्गिकमुक्त्वा गायत्रीविदं स्तौति—यदि ह

---

१ क. ग घ. च. झ. ञ ढ. °मूं सा° । २ च. ढ. °ह पादशोऽर्ध° । ३ घ. ञ. ण. प्राणे प्र° । ४ ढ. °ति । अस्मि° । ५ घ. ण. °ति । पा° । ६ घ. ङ. ज. °ष्टुप्छ° । ७ झ. सावित्रीं । ८ ख. घ. ङ. छ. वाक्सर° । ९ ख. ङ. छ. °स्तौतीदानीम् । य° ।

धा अप्येवंविद्बह्वविदं न हि तस्य सर्वात्मनो बहु नामास्ति किंचित्सर्वात्मकत्वाद्विदुषः प्रतिगृह्णाति न हैव तत्प्रतिग्रहजातं गायत्र्या एकंचनैकमपि पदं प्रति पर्याप्तम् ॥ ५ ॥

मतान्तरमुद्भावयति—तामेतामिति । 'तत्सवितुर्वृणीमहे वयं देवस्य भोजनम् । श्रेष्ठं सर्वधातमं तुरं भगस्य धीमहि' इत्यनुष्टुभं सावित्रीमाहुः । सवितृदेवताकत्वादित्यर्थः । उपनीतस्य माणवकस्य प्रथमतः सरस्वत्यां वर्णोत्पत्तिकायां सापेक्षत्वं द्योतयितुं हिशब्दः । दूषयति—नेत्यादिना । नन्वपेक्षितवागात्मकसरस्वतीसमर्पणं विना गायत्रीसमर्पणमयुक्तमिति शङ्कित्वा परिहरति—कस्मादित्यादिना । यदि हेत्यादेरुत्तरस्य ग्रन्थस्याव्यवहितपूर्वग्रन्थासंगतिमाशङ्क्याऽऽह—किंचेदमिति । सावित्र्या गायत्र्यात्वमिति यावत् । इवशब्दार्थं दर्शयति—न हीति । यद्यपि बहु प्रतिगृह्णाति विद्वानिति पूर्वेण संबन्धः । तथाऽपि न तेन प्रतिग्रहजातेनैकस्यापि गायत्रीपदस्य विज्ञानफलं भुक्तं स्यात् । दूरतस्तु दोषाधायकत्वं तस्येत्यर्थः ॥५॥

स य इमाꣳस्त्रीँल्लोकान्पूर्णान्प्रतिगृह्णीयात्सोऽस्या एतत्प्रथमं पदमाप्नुयादथ यावतीयं त्रयी विद्या यस्तावत्प्रतिगृह्णीयात्सोऽस्या एतद्द्वितीयं पदमाप्नुयादथ यावदिदं प्राणि यस्तावत्प्रतिगृह्णीयात्सोऽस्या एतत्तृतीयं पदमाप्नुयादथास्या एतदेव तुरीयं दर्शतं पदं परोरजा य एष तपति नैव केनचनाऽऽप्यं कुत उ एतावत्प्रतिगृह्णीयात् ॥ ६ ॥

स य इमांस्त्रीन्स यो गायत्रीविदिमान्भूरादींस्त्रीन्गोश्वादिधनपूर्णाँल्लोकान्प्रतिगृह्णीयात्स प्रतिग्रहोऽस्या गायत्र्या एतत्प्रथमं पदं यद्वाख्यातमाप्नुयात्प्रथमपदविज्ञानफलं तेन भुक्तं स्यान्न त्वधिकदोषोत्पादकः स प्रतिग्रहः । अथ पुनर्यावतीयं त्रयी विद्या यस्तावत्प्रतिगृह्णीयात्सोऽस्या एतद्द्वितीयं पदमाप्नुयात् । द्वितीयपदविज्ञानफलं तेन भुक्तं स्यात् । तथा यावदिदं प्राणि यस्तावत्प्रतिगृह्णीयात्सोऽस्या

---

१ घ. ङ च ढ. °विदेवं विद्वान्बहवि° । २ ख. ङ. छ. °व च न । ३ क. ख. छ. ढ. °त्यां श्रवणात्मि° । ४ क. ख. छ. ढ. °ह । इद° । ५ घ. ज. °त्प्रतिग्रहप्रथ° । ६ च. ढ. °वा प्रसिद्धा तावत्तद्वच्छिन्नं वस्तु य° ।

एतत्तृतीयं पदमाप्नुयात्। तेन तृतीयपदविज्ञानफलं भुक्तं स्यात्। क॰ल्पयित्वेदमुच्यते। पादत्रयसममपि यदि कश्चित्प्रतिगृह्णीयात्तत्पादत्रयविज्ञानफलस्यैव क्षयकारणं न त्वन्यस्य दोषस्य कर्तृत्वे क्षमम्। स चैवं दाता प्रतिग्रहीता वा गायत्रीविज्ञानस्तुतये कल्प्यते। दाता प्रतिग्रहीता च यद्यप्येवं संभाव्यते नासौ प्रतिग्रहोऽपराधक्षमः। कस्मायंतोऽप्यधिकमपि पुरुषार्थविज्ञानमवशिष्टमेव चतुर्थपादविषयं गायत्र्यास्तद्दर्शयति। अथास्या एतदेव तुरीयं दर्शतं पदं परोरजा य एष तपति। यच्चैतन्नैव केनचन केनचिदपि प्रतिग्रहेणाऽऽप्यं नैव प्राप्यमित्यर्थः। यथा पूर्वोक्तानि त्रीणि पदानि। एतान्यपि नैवाऽऽप्यानि केनचित्कल्पयित्वैवमुक्तं परमार्थतः कुत उ एतावत्प्रतिगृह्णीयात्त्रैलोक्यादिसमम्। तस्माद्गायत्र्येवंप्रकारोपास्येत्यर्थः॥ ६॥

गायत्रीविदः प्रतिगृह्णतो दोषाभावं सामान्येनोक्त्वा विशेषतस्तदभावमाह—स य इति। यथा त्रैलोक्यावच्छिन्नस्य चार्थस्य प्रतिग्रहेण पादद्वयविज्ञानफलमेव भुक्तं नाधिकं दूषणं तथेति यावत्। प्रतिग्रहीता दाता वा नैवंविधः संभाव्यते किंतु स्तुत्यर्थं श्रुत्यैतत्कल्पितमित्याह—कल्पयित्वेति। उक्तमेव संगृह्णाति—पादत्रयेति। कल्पयित्वेदमुच्यत इति किमिति कल्प्यते मुख्यमेवैतत्किं न स्यादित्याशङ्क्याऽऽह—न चेति। कल्पनाऽपि तर्हि किमर्थेत्याशङ्क्याऽऽह—गायत्रीति। अङ्गीकृत्योत्तरवाक्यमुत्थापयति—दातेति। तदेवाऽऽकाङ्क्षापूर्वकमाह—कस्मादिति। वाङ्मात्रकपदत्रयविज्ञानफलभोगोक्त्यानन्तर्यमथशब्दार्थः। नैव प्राप्यं प्रतिग्रहेण केनचिदपि नैव भुक्तं स्यादित्यर्थः। तत्रैव वैधर्म्यदृष्टान्तमाह—यथेति। तानि प्रतिग्रहेण यथाऽऽप्यानि न तथैतदाप्यमित्यर्थः। कुत इत्यादिवाक्यस्य तात्पर्यमाह—एतान्यपीति। गायत्रीविदः स्तुतिरुक्ता तत्फलमाह—तस्मादिति। एवंप्रकारा पादचतुष्टयरूपा सर्वात्मिकेत्यर्थः॥ ६॥

तस्या उपस्थानं गायत्र्यस्येकपदी द्विपदी
त्रिपदी चतुष्पद्यपदासि न हि पद्यसे। नमस्ते
तुरीयाय दर्शताय पदाय परोरजसेऽसावदो
मा प्रापादिति यं द्विष्यादसावस्मै कामो मा

---

१ च. ढ. °तोऽस्याधि°। २ ख. ङ. छ. °र्थपद°। ३ क. घ. ज. °ति। तच्चै°। ४ ङ. झ. °यित्वेदमु°। ५ घ. ण. °स्तमा°। ६ घ. ण. सर्वार्थस्य। ७ घ. ञ. ण. °हे पा°। ८ घ. ञ. ण. तत्र। ९ क. ख. छ. ढ. °थैव त°।

संमृद्धीति वा न हैवास्मै स कामः समृ
ध्यते यस्मा एवमुपतिष्ठतेऽहमदः प्रापमिति वा ॥ ७ ॥

तस्या उपस्थानं तस्या गायत्र्या उपस्थानमुपेत्य स्थानं नमस्कार-
णमनेन मन्त्रेण । कोऽसौ मन्त्र इत्याह-हे गायत्र्यसि मयसि त्रैलोक्य-
पादनैकपदी । त्रयीविद्यारूपेण द्वितीयेन द्विपदी । प्राणादिरूपा तृतीयेन
त्रिपद्यसि । चतुर्थेन तुरीयेण चतुष्पद्यसि । एवं चतुर्भिः पादैरुपासकैः
पद्यसे ज्ञायसेऽतः परं परेण निरुपाधिकेन स्वेनाऽऽत्मनाऽपदासि । अ-
विद्यमानं पदं यस्यास्तव येन पद्यसे मा त्वमपदासि यस्माच्चाहि पद्यसे
नेति नेत्यात्मत्वात् । अतो व्यवहारविषयाय नमस्ते तुरीयाय दर्शताय
पदाय परोरजसे । असौ शत्रुः पाप्मा त्वत्प्राप्तिविघ्नकरोऽदस्तदात्मन
कार्यं यत्त्वत्प्राप्तिविघ्नकर्तृत्वं मा प्रापन्मैव प्राप्नोतु । इतिशब्दो मन्त्रप-
रिसमाप्त्यर्थः । यं द्विष्याद्यं प्रति द्वेषं कुर्यात्स्वयं विद्वांस्तं प्रत्यनेनोप-
स्थानमसौ शत्रुरमुकनामेति नाम गृह्णीयादस्मै यज्ञदत्तायाभिप्रेत
कामो मा संमृद्धि समृद्धिं मा प्राप्नोत्विति वोपतिष्ठते । न हैवास्मै
देवदत्ताय स कामः समृध्यते । कस्मै । यस्मा एवमुपतिष्ठते । अहमदो
देवदत्ताभिप्रेतं प्रापमिति वोपतिष्ठते । अभावदो मा प्रापादित्यादित्रया-
णां मन्त्रपदानां यथाकामं विकल्पः ॥ ७ ॥

पञ्चतमुपासनमेव मन्त्रेण संगृह्णाति-तस्या इत्यादिना । ध्येयं रूपमुक्त्वा
ज्ञेयं गायत्र्या रूपमुपन्यस्यति-अतः परामिति । चतुर्थस्य पादस्य पादत्रयापे-
क्षया पादाभ्यामभिप्रेत्याऽऽह-अत इति । यथोक्तनमस्कारस्य प्रयोजनमाह-अ-
सावितीति । द्विविधमुपस्थानमाभिचारिकमाभ्युदयिकं च तत्राऽऽद्यं हेया व्युत्पाद-
यति-यं द्विष्यादिति । नाम गृह्णीयात्तदोयं नाम गृहीत्वा च तदभिप्रेतं मा
मापदित्यनेनोपस्थानमिति संबन्धः । आभ्युदयिकमुपस्थानं दर्शयति-अहमिति
कीदृगुपस्थानमत्र मन्त्रपदेन कर्तव्यमित्याशङ्क्य यथारुचि विकल्पं दर्शयति-
असाविति ॥ ७ ॥

एतद्ध वै तज्जनको वैदेहो बुडिलमाश्वतराश्वि-
मुवाच यन्नु हो तद्गायत्रीविदब्रूथा अथ कथ-
हस्तीभूतो वहसीति मुख-ं ह्यस्याः सम्राण्न

---

१ ग. च. सगर्धीति । २ क ध. ज ट ठ. ड ढ काम ऋव्य° । ३ च. झ. °सि
र्थं भ° । ४ क. समर्धि । ५ क. ख. घ ङ. छ ज. झ. °ति चोप° । ६ ख. छ. द.
ध्येयमु° । ७ ञ ण. °हस्रमुप° ।

विदांचकारेति होवाच तस्या अग्निरेव मुखं यदि ह
वा अपि बह्विवाग्नावभ्यादधाति सर्वमेव तत्संदहत्ये-
वꣳ हैवैवंविद्यद्यपि बह्विव पापं कुरुते सर्वमेव त-
त्संप्साय शुद्धः पूतोऽजरोऽमृतः संभवति ॥ ८ ॥

इति बृहदारण्यकोपनिषदि पञ्चमाध्यायस्य
चतुर्दशं ब्राह्मणम् ॥ १४ ॥

गायत्र्या मुखंविधानार्थोऽर्थवाद उच्यते--एतद्ध किल वै स्मर्यते । तत्तत्र गायत्रीविज्ञानविषये जनको वैदेहो बुडिलो नामतोऽश्वतराश्व-स्यापत्यमाश्वतराश्विस्तं किलोक्तवान् । यन्न इति वितर्के हो अहो इत्येतत्तद्यत्त्वं गायत्रीविदब्रूथा गायत्रीविदस्मीति यदब्रूथाः किमिदं तस्य वचसोऽननुरूपम् । अथ कथं यदि गायत्रीवित्प्रतिग्रहदोषेण हस्तीभूतो वहसीति । स प्रत्याह राज्ञा स्मारितो मुखं गायत्र्या हि यस्मादस्या हे सम्राण्न विदाचकार न विज्ञातवानस्मीति होवाच । एकाङ्गविकलत्वादायत्रीविज्ञानं ममाफलं जातम् । शृणु तर्हि तस्या गायत्र्या अग्निरेव मुखम् । यदि ह वा अपि बह्विवेन्धनमग्नावभ्यादध-ति लौकिकाः सर्वमेव तत्संदहत्येवेन्धनमग्निरेवं हैवैवंविद्गायत्र्या अ-ग्निर्मुखमित्येवं वेत्तीत्येवंवित्स्यात्स्वयं गायत्र्यात्माऽग्निमुखः सन् । यद्यपि बह्विव पापं कुरुते प्रतिग्रहादिदोषं तत्सर्वं पापजातं संप्साय भक्षयित्वा शुद्धोऽग्निवत्पूतश्च तस्मात्प्रतिग्रहदोषाद्गायत्र्यात्माऽजरोऽ-मृतश्च संभवति ॥ ८ ॥

इति बृहदारण्यकोपनिषद्भाष्ये पञ्चमाध्यायस्य
चतुर्दशं ब्राह्मणम् ॥ १४ ॥

किं तद्गायत्रीविज्ञानप्रतिकूलमुपलभ्यते तदाह--अथेति । पूर्वापरविरोधावधी-रकोऽथशब्दः । तथाऽपि गायत्रीविज्ञानस्य फलवत्त्वे सति प्रतिकूलमिदं हस्ती-

---

१ घ. ज. °ढिलं ना° । २ क. ख. ङ. छ. °ज्ञानवा° । ३ ख. छ. °य स भ° क. ग. घ. ङ. ज. झ. ढ. °य संप्र° । ४ ख. छ. °लभसे ।

भूतस्य तव मां प्रति वहनमित्याशङ्क्याऽऽह-एकाङ्केति । राजा ब्रूते-शृण्विति । मुखविज्ञानस्य दृष्टान्तावष्टम्भेन फलमाचष्टे-यदीत्यादिना । इवशब्दोऽवधारणार्थः । पापसंस्पर्शराहित्यं शुद्धिस्तत्फलासंस्पर्शस्तु पूततेति भेदः । गायत्रीज्ञानस्य क्रममुक्तिफलत्वं दर्शयति-गायत्र्यात्मेति ॥ ८ ॥

इति बृहदारण्यकोपनिषद्भाष्यटीकायां पञ्चमाध्यायस्य
चतुर्दशं ब्राह्मणम् ॥ १४ ॥

अथ पञ्चमाध्यायस्य पञ्चदशं ब्राह्मणम् ।

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् । तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये । पूषन्नेकर्षे यम सूर्य प्राजापत्य व्यूह रश्मीन् । समूह तेजो यत्ते रूपं कल्याणतमं तत्ते पश्यामि । योऽसावसौ पुरुषः सोऽहमस्मि । वायुरनिलममृतमथेदं भस्मान्तꣳ शरीरम् । ॐ क्रतो स्मर कृतꣳ स्मर क्रतो स्मर कृतꣳ स्मर । अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम ॥ १ ॥

इति बृहदारण्यकोपनिषदि पञ्चमाध्यायस्य
पञ्चदशं ब्राह्मणम् ॥ १५ ॥

इति बृहदारण्यकोपनिषदि पञ्चमोऽध्यायः ॥ ५ ॥

बृहदारण्यकक्रमेण सप्तमोऽध्यायः ॥ ७ ॥

यो ज्ञानकर्मसमुच्चयकारी सोऽन्तकाल आदित्यं प्रार्थयति। अस्ति च प्रसङ्गो गायत्र्यास्तुरीयः पादो हिसः। तदुपस्थानं प्रकृतमतः स एव प्रार्थ्यते। हिरण्मयेन ज्योतिर्मयेन पात्रेण यथा पात्रेणेष्टं वस्त्वपिधीयत एवमिदं सत्यारूयं ब्रह्म ज्योतिर्मयेन मण्डलेनापिहितमिवासमाहितचेतसामदृश्यत्वात्तदुच्यते। सत्यस्यापिहितं मुखं मुख्यं स्वरूपं तदपिधानं पात्रमपिधानमिव दर्शनप्रतिबन्धकारणं तत्त्वं हे पूषन्जगतः पोषणात्पूषा सविताऽपावृण्वपावृतं कुरु दर्शनप्रतिबन्धकारणमपनयेत्यर्थः। सत्यधर्माय सत्यं धर्मोऽस्य मम सोऽहं सत्यधर्मा तस्मै त्वदात्मभूतायेत्यर्थः। दृष्टये दर्शनाय। पूषन्नित्यादीनि नामान्यामन्त्रणार्थानि सवितुः। एकर्षे एकश्वासावृषिश्चैकर्षिर्दर्शनाद्वा ऋषिः। स हि सर्वस्य जगत आत्मा चक्षुश्च सन्सर्वं पश्यत्येको वा गच्छतीत्येकर्षिः "सूर्य एकाकी चरति" इति मन्त्रवर्णात्। यम सर्वं हि जगतः संयमनं त्वत्कृतम्। सूर्य सुष्ठुवीरयँवै रसान्रश्मिन्प्राणान्धियो वा जगत इति।

ब्राह्मणान्तरस्य तात्पर्यमाह—यो ज्ञानकर्मेति। आदित्यस्यापस्तुतत्वात्कथं तत्प्रार्थनेत्याशङ्क्याऽऽह—अस्ति चेति। तथाऽपि कथमादित्यस्य प्रसङ्गस्तत्राऽऽह—तदुपस्थानमिति। नमस्ते तुरीयायेति हि दर्शितमित्यर्थः। आदित्यस्य प्रसङ्गे सति फलितमाह—अत इति। समाहितचेतसां प्रयतत्वादृष्ट्वाऽपिहितमेव किंतु पिहितमेवेत्यत्र हेतुमाह--असमाहितेति। जगतः पोषणादूषर्महिमवृष्ट्यादिदानेनेति शेषः। अपावरणकरणमेव विवृणोति--दर्शनेति। सत्यं परमार्थस्वरूपं ब्रह्म धर्मस्वभाव इति यावत्। ननु दर्शनार्थं तत्प्रतिबन्धकनिवृत्तौ पूषणि नियुक्ते किमित्यन्ये संबाध्य नियुज्यन्ते तत्राऽऽह--पूषन्नित्यादीनीति। दर्शनाद्वा ऋषिरित्युक्तं विशदयति-स हीति। 'सूर्य आत्मा जगतस्तस्थुषश्च' इति मन्त्रवर्णमाश्रित्योक्तम्--जगत आत्मेति। 'चक्षुर्मित्रस्य वरुणस्याग्नेः' इत्येतदाश्रित्याऽऽह--चक्षुश्चेति।

प्राजापत्य प्रजापतेरीश्वरस्यापत्यं हिरण्यगर्भस्य वा हे प्राजापत्य

---

१ च. °न मण्डलेन पा°। २ च. ढ. °मिष्टं स°। ३ च. झ. ढ. °र्मो यस्य। ४ क. ग. घ. च. झ. °स्मै तदा°। ५ च. ढ. °र्णात्सर्वस्य जगतो नियमनाद्यम°। ६ ख. ग. सर्वस्य। ७ घ. ज. °यति र°। ८ च. ढ. °ते तोयादीन्रसा°। ९ च. ढ. °णादीन्धि°। १० च. ढ. °ति व्युत्पत्तेः। प्रा°। ११ घ. ञ. °सां दृ°। १२ क. ख. छ. ढ. °तामपि दृ°। १३ ञ. °त्वपि°। १४ ख. छ. ढ. °मिव तत्राऽऽह। १५ क. °वेति तत्राऽऽह। १६ घ. ण. °ज्मे। ढ. °णकार°।

व्यूह विगमय रश्मीन् । समूह संक्षिपाऽऽत्मनस्तेजो येनाहं शक्नुयां द्रष्टुम् । तेजसा ह्यपहतदृष्टिर्न शक्नुयां त्वत्स्वरूपमञ्जसा द्रष्टुम् । विद्योतन इवं रूपाणामत उपसंहर तेजः । यत्ते तव रूपं सर्वकल्याणानामतिशयेन कल्याणं कल्याणतमं तत्ते पश्यामि । वयं वचनव्यत्ययेन । योऽसौ भूर्भुवः स्वर्व्याहृत्यवयवः पुरुषः पुरुषाकृतित्वात्पुरुषः सोऽहमस्मि भवामि । अहंरहमिति चोपनिषद् उक्तत्वादादित्यचाक्षुषयोस्तदेवेदं परामृश्यते सोऽहमस्म्यमृतामति संबन्धः। ममामृतस्य सत्यस्य शरीरपाते शरीरस्थो य. प्राणो वायुः सोऽनिलं बाह्यं वायुमेव प्रतिगच्छतु । तथाऽन्या देवताः स्वा स्वा प्रकृतिं गच्छन्तु । अथेदमपि भस्मान्तं सत्पृथिवीं यातु शरीरम् ।

स्वाभाविका रश्मयो न निगमयितुं शक्या इत्याशङ्क्याऽऽह—समूहेति । मदीयतेजःसंक्षेपं विनाऽपि ते मत्स्वरूपदर्शनं स्यादित्याशङ्क्याऽऽह—तेजसा हीति । विद्योतनं विद्युत्प्रकाशतास्मिन्सति रूपाणां स्वरूपमञ्जसा चक्षुषा न शक्यं द्रष्टुं तस्य चक्षुर्मोषित्वात्तथेत्याह—विद्योतन इवेति । तेजःसंक्षेपस्य प्रयोजनमाह—यदिति । किंच नाहं त्वां मृत्यवद्याचेऽभेदेन ध्यातत्वादित्याह—योऽसाविति । व्याहृतिशरीरे कथमहमिति प्रयोगोपपत्तिरित्याशङ्क्याऽऽह—अहरिति । तदेवेदमित्यहंरूपमुच्यते । ननु तव शरीरपातेऽपि नामृतत्वमाध्यात्मिकस्यादिमतिबन्धादत आह—ममेति । वायुग्रहणस्योपलक्षणत्वं विवक्षित्वाऽऽह—तथेति । देहस्थदेवतानामप्रतिबन्धकत्वेऽपि देहस्यैव सूक्ष्मतां गतस्य प्रतिबन्धकत्वान्न तवामृतत्वमित्याशङ्क्याऽऽह—अथेति ।

अथदानीमात्मनः संकल्पभूतां मनसि व्यवस्थितामग्निदेवता प्रार्थयते—ॐ क्रतो । ॐमिति क्रतो इति च संबोधनार्थावेव । ॐकारप्रतीकत्वादोः । मनोमयत्वाच्च क्रतुः । हे ॐ हे क्रतो स्मर स्मर्तव्यमन्तकाले हि १ त्वत्स्मरणवशादिष्टा गतिः प्राप्यतेऽतः प्रार्थ्यते यन्मया कृतं तत्स्मर पुनरुक्तिरादरार्था । किंच हेऽग्ने नय प्रापय सुपथा शोभनेन मार्गेण राये धनाय कर्मफलप्राप्तय इत्यर्थः । न दक्षि-

१ त्वोदात्तश्चेति ।

१ घ. छ. ज. झ. ञ 'व स्वरू' । २ च. 'हमि' । ३ ख. ग. ङ. छ. 'षदृक्' । ४ च. छ. 'न्धः । कथमीदृग्विध व तव दहनेन्द्रियाद्यवच्छिन्नत्वादित्यत आह । म' । ५ क. ञ. ण, 'दीयं ते' । ६ घ ञ ण. र पुरुष क' । ७ ख. 'कबाह्या' । ८ ग. हि स्मर' । ९ ङ. 'त्स्मरेति पु' ।

णेन कृष्णेन पुनरावृत्तियुक्तेन किं तर्हि शुक्लेनैव सुपथाऽस्मान्विश्वानि सर्वाणि हे देव वयुनानि प्रज्ञानानि[1] सर्वप्राणिनां विद्वान् । किंच युयोध्यपनय वियोजयास्मदस्मत्तो जुहुराणं कुटिलमेनः पापं पापजातं सर्वम् । तेन पापेन वियुक्ता वयमेष्याम उत्तरेण पथा त्वत्प्रसादात्[2] । किंतु वयं तुभ्यं परिचर्यां कर्तुं न शक्नुमो भूयिष्ठां बहुतमां ते तुभ्यं[3] नमउक्तिं नमस्कारवचनं विधेम नमस्कारोक्त्या परिचरेमेत्यर्थः । अन्यत्कर्तुमशक्ताः[4] सन्त इति ॥ १ ॥

इति बृहदारण्यकोपनिषद्भाष्ये पञ्चमाध्यायस्य
पञ्चदशं ब्राह्मणम् ॥ १५ ॥

मन्त्रान्तरमवतार्य व्याकरोति—**अथेदानीमित्यादिना** । अवतीत्योपीश्वरः सर्वस्य रक्षकस्तस्य जाठराग्निप्रतीकत्वेन ध्यातत्वादग्निशब्देन निर्देशः । एवमग्निदेवतां संबोध्य नियुङ्क्ते—**स्मरेति** । इष्टां गतिं जिगमिषता किमिति स्मरणे देवता नियुज्यते तत्राऽऽह—**स्मरणेति** । प्रार्थनान्तरं समुच्चिनोति—**किंचेति** । उक्तमेव व्यनक्ति—**नेत्यादिना** । अस्मान्नयेति पूर्वेण संबन्धः । प्रज्ञानग्रहणं कर्मादीनामुपलक्षणम् । प्रार्थनान्तरं दर्शयति—**किंचेति** । पापवियोजनफलमाह—**तेनेति** । भवद्भिराराधितो भवतां यथोक्तं फलं साधयिष्यामीत्याशङ्क्याऽऽह—**किंत्विति** । बहुतमत्वं भक्तिश्रद्धातिरेकयुक्तत्वम् । यागादिनाऽपि परिचरणं किमत्रापित्याशङ्क्याऽऽह—**अन्यादिति** । संततनमस्कारोक्त्या परिचरेमेति पूर्वेण संबन्धः । अशक्तिश्च मुमूर्षावसादादिति द्रष्टव्यम् । इतिशब्दोऽध्यायसमाप्त्यर्थः ॥ १ ॥

इति श्रीमद्गोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीशंकरभगवतः कृतौ बृहदारण्यकोपनिषद्भाष्ये
पञ्चमोऽध्यायः ॥ ५ ॥

इति बृहदारण्यकोपनिषद्भाष्यटीकायां पञ्चमाध्यायस्य
पञ्चदशं ब्राह्मणम् ॥ १५ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छुद्धानन्दभगवत्पूज्यपादशिष्यश्रीमद्भगवदानन्दज्ञानविरचितायां श्रीमद्बृहदारण्यकोपनिषद्भाष्यटीकायां
पञ्चमोऽध्यायः ॥ ५ ॥

---

१ च. ढ. °नि तदुपलक्षितानि कर्माणि च सं° । २ च ढ. विमुक्ता । ३ च ढ. वयं यास्याम । ४ घ. ज. °मोऽतो भू° ।

अथ षष्ठाध्यायस्य प्रथमं ब्राह्मणम् ।

ॐ यो ह वै ज्येष्ठं च श्रेष्ठं च वेद ज्येष्ठश्च श्रेष्ठश्च स्वानां भवति प्राणो वै ज्येष्ठश्च श्रेष्ठश्च ज्येष्ठश्च श्रेष्ठश्च स्वानां भवत्यपि च येषां बुभूषति य एवं वेद ॥ १ ॥

ॐ प्राणो गायत्रीत्युक्तम् । कस्मात्पुनः कारणात्प्राणभावो गायत्र्या न पुनर्वागादिभाव इति । यस्माज्ज्येष्ठश्च श्रेष्ठश्च प्राणो न वागादयो ज्यैष्ठ्यश्रैष्ठ्यभाजः । कथं ज्येष्ठत्वं श्रेष्ठत्वं च प्राणस्येति तन्निर्दिधारयिषयेदमारभ्यते । अथवोक्तयजुःसामक्षत्रादिभावैः प्राणस्यैवोपासनमभिहितं सत्स्वप्यन्येषु चक्षुरादिषु । तत्र हेतुमात्रमिहाऽऽनन्तर्येण संबध्यते । न पुनः पूर्वशेषता । विवक्षितं तु खिलत्वादस्य काण्डस्य पूर्वत्र यदनुक्तं विशिष्टफलं प्राणविषयमुपासनं तदुक्तव्यमिति ।

ॐकारो दमादित्रयं ब्रह्माब्रह्मोपासनानि तत्फलं तदर्था गतिरादित्याद्युपस्थानमित्येषोऽर्थः सप्तमे निवृत्तः । संप्रति प्राधान्येनाब्रह्मोपासनं सफलं श्रीपन्थादिकर्म च वक्तव्यमित्यष्टममध्यायमारभमाणो ब्राह्मणसंगतिमाह—प्राण इति । तस्मात्प्राणो गायत्रीति युक्तमुक्तमिति शेषः । प्राणस्य ज्येष्ठत्वादि नाद्यापि निर्धारितमिति शङ्कित्वा परिहरति—कथमित्यादिना । प्रकारान्तरेण पूर्वोत्तरग्रन्थसंगतिमाह—अथवेति । आदिशब्दादन्यैर्विशिष्टत्वादिनिर्देशः । तत्रेति प्राणस्यैव विशिष्टगुणकस्योपास्यत्वोक्तिः । हेतुर्ज्येष्ठत्वादिस्तन्मात्रमिहानन्तरग्रन्थे कथ्यत इति शेषः । तदेवं पूर्वग्रन्थस्य हेतुमत्त्वादुत्तरस्य च हेतुत्वादानन्तर्येण पौर्वापर्येण पूर्वग्रन्थेन सहोत्तरग्रन्थजातं संबध्यत इति फलितमाह—आनन्तर्येणेति । वक्ष्यमाणप्राणोपासनस्य पूर्वोक्तोक्थाद्युपास्तिशेषत्वमाशङ्क्य च गुणभेदात्फलभेदाच्च नैवमित्यभिप्रेत्याऽऽह—न पुनरिति । किमिति प्राणोपासनमिह स्वतन्त्रमुपदिश्यते तत्राऽऽह—खिलत्वादिति इतिशब्दो ब्राह्मणारम्भोपसंहारार्थः ।

यः कश्चिद्व वा इत्यवधारणार्थौ । यो ज्येष्ठश्रेष्ठगुणं वक्ष्यमाणं यो वेदासौ भवत्येव ज्येष्ठश्च श्रेष्ठश्च । एवं फलेन प्रलोभितः सन्प्र-

---

१ स. छ. ढ. °यो ज्येष्ठत्वश्रेष्ठत्वभा°, ग. घ. ज. °यो ज्येष्ठश्रेष्ठगणभा° । २ झ. °थ ह ऋग्यजुः° । ३ स. घ. छ. ढ. °निर्वृत्तः । ४ स. छ. ढ. °न्येन ब्र° । क. °न्थेन क° । ६ क. °णं वे° ।

श्वाभिमुखीभूतस्तस्मै चाऽऽह–प्राणो वै ज्येष्ठश्च श्रेष्ठश्च । कथं पुनरवगम्यते प्राणो ज्येष्ठश्च श्रेष्ठश्चेति । यस्माच्छिष्येककाल एव शुक्र-शोणितसंबन्धः प्राणादिकलापस्याविशिष्टः । तथाऽपि नाप्राणं शुक्रं विरोहतीति प्रथमो वृत्तिलाभः प्राणस्य चक्षुरादिभ्यः । अतो ज्येष्ठो वयसा प्राणः । निषेककालादारभ्य गर्भं पुष्यति प्राणः । प्राणे हि लब्धवृत्तौ पश्चाच्चक्षुरादीनां वृत्तिलाभः । अतो युक्तं प्राणस्य ज्येष्ठत्वं चक्षुरादिषु । भवति तु कश्चित्कुले ज्येष्ठो गुणहीनत्वात्तु न श्रेष्ठः मध्यमः केनिष्ठो वा गुणाढ्यत्वाद्भवेच्छ्रेष्ठो न ज्येष्ठः । न तु तथेहेत्याह प्राण एव तु ज्येष्ठश्च श्रेष्ठश्च । कथं पुनः श्रैष्ठ्यमवगम्यते प्राणस्य तदिह संवादेन दर्शयिष्यामः । सर्वथाऽपि तु प्राणं ज्येष्ठश्रेष्ठगुणं यो वेदोपास्ते स स्वानां ज्ञातीनां ज्येष्ठश्च श्रेष्ठश्च भवति । ज्येष्ठश्रेष्ठगुणोपासनसामर्थ्यात्स्वव्यतिरेकेणापि च येषां मध्ये ज्येष्ठश्च श्रेष्ठश्च भविष्यामीति बुभूषति भवितुमिच्छति तेषामपि ज्येष्ठश्रेष्ठप्राणदर्शी ज्येष्ठश्च श्रेष्ठश्च भवति । ननु वयोनिमित्तं ज्येष्ठत्वं तदिच्छातः कथं भवतीत्युच्यते । नैषदोषः । प्राणवद्वृत्तिलाभस्यैव ज्येष्ठत्वस्य विवक्षितत्वात् ॥ १ ॥

एवं ब्राह्मणारम्भं प्रतिपाद्याक्षराणि व्याचष्टे–यः कश्चिदित्यादिना । यच्छब्दस्य पुनरुपादानमन्वयार्थम् । निपातयोरर्थमवधारणमेव प्रायुक्तं प्रकटयति–भवत्येवेति । प्रश्नाय कोऽसौ ज्येष्ठश्च श्रेष्ठश्चेति प्रश्नस्तदर्थमिति यावत् । प्राणस्य ज्येष्ठत्वादिकमाक्षिपति–कथमिति । तत्र हेतुमाह–यस्मादिति । तस्माज्ज्येष्ठत्वादिकं तुल्यमेवेति शेषः । संबन्धाविशेषमङ्गीकृत्य ज्येष्ठत्वं प्राणस्य साधयति–तथाऽपीति । उक्तमेव समर्थयते–निषेककालादिति । तथापि विप्रतिपन्नं प्रत्याह–प्राणे हीति । ज्येष्ठत्वेनैव श्रेष्ठत्वे सिद्धे किमिति पुनरुक्तिरित्याशङ्क्याऽऽह–भवति त्विति । ज्येष्ठत्वे सत्यपि श्रेष्ठत्वाभावमुक्त्वा तस्मिन्सत्यपि ज्येष्ठत्वाभावमाह–मध्यत इति । इहेवि प्राणोक्तिः । प्राणश्रेष्ठत्वे प्रमाणाभावमाशङ्क्य प्रत्याह–कथमित्यादिना । पूर्वोक्तमुपास्तिफलमनुसंहरति–सर्वथाऽपीति । आरोपेणानारोपेण वेत्यर्थः । ज्येष्ठस्य विद्याफलत्वमाक्षिपति–नन्विति । तस्य विद्याफलत्वं साधयति–उच्यत इति । इच्छातो ज्यैष्ठ्यं दुःसाध्यमिति दोषस्यासत्त्वमाह–नेति । तत्र हेतुमाह–प्राण-

---

१ च. झ. °ष्ठश्चेति । क° । २ घ. ज. न ज्यैष्ठ्येन । ग. न ज्यैष्ठ्येनैव तु न त° । ३ क. ख. ङ. छ. ट. म त° । ४ ख. ङ. छ. °भत्वस्यै° । ५ घ. ञ. °णस्य श्रे° । ६ च. ज. °ष्ठत्वस्य । ७ ङ. °लभा° । घ. ञ. ण. °लत्वमा° ।

वदिति । यथा प्राणकृतौशनादिप्रयुक्तश्चक्षुरादीनां वृत्तिलाभस्तथा प्राणोपासकाधीने जीवनमन्येषां स्वानां च भवतीति प्राणदर्शिनो ज्येष्ठत्वं न वयोनिबन्धनमित्यर्थः ॥ १ ॥

यो ह वै वसिष्ठां वेद वसिष्ठः स्वानां भवति वाग्वै वसिष्ठा वसिष्ठः स्वानां भवत्यपि च येषां बुभूषति य एवं वेद ॥ २ ॥

यो ह वै वसिष्ठां वेद वसिष्ठः स्वानां भवति । तद्दर्शनानुरूपेण फलम् । येषां च ज्ञातिव्यतिरेकेण वसिष्ठो भवितुमिच्छति तेषां च वसिष्ठो भवति । उच्यतां तर्हि कोऽसौ वसिष्ठश्चेति । वाग्वै वसिष्ठा । वासयत्यतिशयेन वस्ते वेति वसिष्ठा । वाग्गिमनो हि धनवन्तो वसन्त्यतिशयेन । आच्छादनार्थस्य वा वसेर्वसिष्ठा । अभिभवन्ति हि वाचा वाग्गिमनोऽन्यान् । तेन वसिष्ठगुणवत्परिज्ञानाद्वसिष्ठगुणो भवतीति दर्शनानुरूपं फलम् ॥ २ ॥

वसिष्ठत्वमपि प्राणस्यैवेति वक्तुमुत्तरवाक्यमुत्थाप्य व्याचष्टे--यो हेत्यादिना । फलेन प्रलोभितं शिष्यं प्रश्नाभिमुखं प्रत्याह--उच्यतामित्यादिना । वाचो वसिष्ठत्वं द्विधा प्रतिजानीते--वासयतीति । वासयत्यतिशयेनेत्युक्तं विशदयति--वाग्गिमनो हीति । वासयन्ति चेति द्रष्टव्यम् । वस्ते वेत्युक्तं स्फुटयति--आच्छादनार्थस्य वेति । आच्छादनार्थत्वमनुभवेन साधयति--अभिभवन्तीति । उक्तमुपास्तिफलं निगमयति--तेनेति ॥ २ ॥

यो ह वै प्रतिष्ठां वेद प्रतितिष्ठति समे प्रतितिष्ठति दुर्गे चक्षुर्वै प्रतिष्ठा चक्षुषा हि समे च दुर्गे च प्रतितिष्ठति प्रतितिष्ठति समे प्रतितिष्ठति दुर्गे य एवं वेद ॥ ३ ॥

यो ह वै प्रतिष्ठां वेद प्रतितिष्ठत्यनयेति प्रतिष्ठा तां प्रतिष्ठागुणवतीं यो वेद तस्यैतत्फलं प्रतितिष्ठति समे देशे काले च । तथा दुर्गे विषमे च दुर्गमने च देशे दुर्भिक्षादौ वा काले विषमे । यद्येवमुच्यतां काऽसौ प्रतिष्ठा । चक्षुर्वै प्रतिष्ठा । कथं चक्षुषः प्रतिष्ठात्वमित्याह--चक्षुषा हि समे च दुर्गे च दृष्ट्वा प्रतितिष्ठति । अतोऽनुरूपं फलं प्रतितिष्ठति समे प्रतितिष्ठति दुर्गे य एवं वेदेति ॥ ३ ॥

---

१ ढ. °नायादि°। २ क. घ. ञ. ण. °नां भ°। ३ ख. ङ. च छ. झ. ढ. °वतीति। ४ ख. छ. प्रतेलो°। ५ च. ज. ढ. °मे दु°। ६ झ. °थं; पुनश्चक्षु°। ७ ख. ङ. छ. °र्गे य ।

गुणान्तरं वक्तुं वाक्यान्तरमादाय व्याचष्टे—यो ह वा इति । समे प्रतिष्ठा विद्यां विनाऽपि स्यादित्याशङ्क्याऽऽह—तथेति । विषमे च प्रतितिष्ठतीति सम्बन्धः। विषमशब्दस्यार्थमाह—दुर्गमने चेति । इदानीं प्रश्नपूर्वकं प्रतिष्ठां दर्शयति—वद्येवमिति । प्रतिष्ठात्वं चक्षुषो व्युत्पादयति—कथमित्यादिना । विद्याफलं निगमयति—अत इति ॥ ३ ॥

यो ह वै संपदं वेद स[१] हास्मै पद्यते यं कामं कामयते श्रोत्रं वै संपच्छ्रोत्रं हीमे सर्वे वेदा अभिसंपन्नाः स[२] हास्मै पद्यते यं कामं कामयते य एवं वेद ॥ ४ ॥

यो ह वै संपदं वेद संपद्गुणयुक्तं यो वेद तस्यैतत्फलमस्मै विदुषे संपद्यते ह । किम् । यं कामं कामयते स कामः । किं पुनः संपद्-गुणकम् । श्रोत्रं वै संपत् । कथं पुनः श्रोत्रस्य संपद्गुणत्वमिति उच्यते—श्रोत्र सति हि यस्मात्सर्वे वेदा अभिसंपन्नाः श्रोत्रेन्द्रियवतोऽध्येयत्वात् । वेदविहितकर्मायत्ताश्च कामास्तस्माच्छ्रोत्रं संपत् । अतो विज्ञानानुरूपं फलम् । स हास्मै पद्यते यं कामं कामयते य एवं वेद ॥ ४ ॥

वाक्यान्तरमादाय विभजते—यो व वै संपदमिति । प्रश्नपूर्वकं संपदुत्पत्ति-वाक्यमुपादत्ते—किं पुनरिति । श्रोत्रस्य संपद्गुणत्वं व्युत्पादयति—कथमिति अध्येयत्वमध्ययनार्हत्वम् । तथाऽपि कथं श्रोत्रं संपद्गुणकमित्याशङ्क्याऽऽह—वेदेति । पूर्वोक्तं फलमुपसंहरति—अत इति ॥ ४ ॥

यो ह वा आयतनं वेदाऽऽयतन[१] स्वानां भवत्यायतनं जनानां मनो वा आयतनमायतन[२] स्वानां भवत्यायतनं जनानां य एवं वेद ॥ ५ ॥

यो ह वा आयतनं वेद । आयतनमाश्रयस्तद्यो वेदाऽऽयतनं स्वानां भवत्यायतनं जनानामन्येषामपि । किं पुनस्तदायतनमिति । उच्यते—मनो वा आयतनमाश्रय इन्द्रियाणां विषयाणां च । मनआश्रिता हि विषया आत्मनो भोग्यत्वं प्रतिपद्यन्ते । मनःसंकल्पवशानि चेन्द्रियाणि प्रवर्तन्ते निवर्तन्ते च । अतो मन आयतनमिन्द्रियाणाम् ।

१ ग. आश्रत्य ह । २ घ. ङ. च. वा ।

अस्मै दर्शनानुरूपेण फलमायतनं स्वानां स्वानां भवत्यायतनं जनानां य एवं वेद ॥ ५ ॥

वाक्यान्तरमादाय विभजते—यो ह वा आयतनमिति । सामान्येनोक्तमायतनं प्रश्नपूर्वकं विशदयति—किं पुनरिति । मनसो विषयाश्रयत्वं विशदयति—मन इति । इन्द्रियाश्रयत्वं तस्य स्पष्टयति- मनःसंकल्पेति । पूर्ववत्फलं निगमयति- अत इति ॥ ५ ॥

यो ह वै प्रजापतिं वेद प्रजायते ह प्रजया पशुभी
रेतो वै प्रजापतिः प्रजायते ह प्रजया पशुभिर्य एवं
वेद ॥ ६ ॥

यो ह वै प्रजापतिं वेद प्रजायते ह प्रजया पशुभिश्च संपन्नो भवति । रेतो वै प्रजापतिः । रेतसा प्रजननेन्द्रियमुपलक्ष्यते । तद्विज्ञानानुरूपं फलं प्रजायते ह प्रजया पशुभिर्य एवं वेद ॥ ६ ॥

गुणान्तरं वक्तुं वाक्यान्तरं गृहीत्वा तदक्षराणि व्याकरोति - यो हेत्यादिना । वागादीन्द्रियाणि तत्तद्गुणविशिष्टानि शिष्ट्वा रेतो विशिष्टगुणमाचक्षाणस्य प्रकरणविरोधः स्यादित्याशङ्क्याऽऽह रेतसेति । विद्याफलमुपसंहरति—तद्विज्ञानेति ॥ ६ ॥

ते हेमे प्राणा अहꣳश्रेयसे विवदमाना ब्रह्म जग्मु-
स्तद्धोचुः को नो वसिष्ठ इति तद्धोवाच यस्मिन्व
उत्क्रान्त इदꣳ शरीरं पापीयो मन्यते स वो
वसिष्ठ इति ॥ ७ ॥

ते हेमे प्राणा वागादयोऽहंश्रेयसेऽहं श्रेयानित्येतस्मै प्रयोजनाय विवदमाना विरुद्धं वदमाना ब्रह्म जग्मुर्ब्रह्म गतवन्तो ब्रह्मशब्दवाच्यं प्रजापतिं गत्वा च तद्ब्रह्म होचुरुक्तवन्तः । को नोऽस्माकं मध्ये वसिष्ठः कोऽस्माकं मध्ये वसति च वासयति च । तद्ब्रह्म तैः पृष्टं सद्धोवाचोक्तवद्यस्मिन्वो युष्माकं मध्य उत्क्रान्ते निर्गते शरीरादिदं शरीरं पूर्वस्मादतिशयेन पापीयः पापतरं मन्यते लोकः । शरीरं हि नामानेकाशुचिसंघातत्वाज्जीवतोऽपि पापमेव ततोऽपि कष्टतरं

---

१ ख. छ. ढ. वा इति । आयतनमिति सा° । २ क. ग. च. ज. ठ. ड. ढ. °जापति । ३ ग. च. ज. ढ. °जापतिः । ४ क. ग. ङ च. झ. ढ. °जापतिं । ५ ग. ङ. झ °जापतिः ।

यस्मिन्नुत्क्रान्ते भवति । वैराग्यार्थमिदमुच्यते—पापीय इति । स वो युष्माकं मध्ये वसिष्ठो भविष्यति जानन्नपि वसिष्ठं प्रजापतिर्नोवाचायं वसिष्ठ इतीतरेषामप्रियपरिहारार्थं ॥ ७ ॥

उक्ता वसिष्ठत्वादिगुणा न वागादिगामिनः किंतु मुख्यप्राणगता एवेति दर्शयितुमाख्यायिकां करोति—ते हेत्यादिना । ईयसुन्प्रयोगस्य तात्पर्यमाह—शरीरं हीति । किमिति शरीरस्य पापीयस्त्वमुच्यते तदाह—वैराग्यार्थमिति । शरीरे वैराग्योत्पादनद्वारा तस्मिन्नहंममाभिमानपरिहारार्थमित्यर्थः । वसिष्ठो भवतीत्युक्तवानिति संबन्धः । किमिति साक्षादेव मुख्यं प्राणं वसिष्ठत्वादिगुणं नोक्तवान्प्रजापतिः स हि सर्वज्ञ इत्याशङ्क्याऽऽह—जानन्नपीति ॥ ७ ॥

वाग्घोच्चक्राम सा संवत्सरं प्रोष्याऽऽगत्योवाच कथमशकत मदृते जीवितुमिति ते होचुर्यथाऽकला अवदन्तो वाचा प्राणन्तः प्राणेन पश्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेण विद्वाꣳसो मनसा प्रजायमाना रेतसैवमजीविष्मेति प्रविवेश ह वाक् ॥ ८ ॥

त एवमुक्ता ब्रह्मणा प्राणा आत्मनो वीर्यपरीक्षणाय क्रमेणोच्चक्रमुः । तत्र वागेव प्रथमं हास्माच्छरीरादुच्चक्रामोत्क्रान्तवती । सा चोत्क्रम्य संवत्सरं प्रोष्य प्रोषिता भूत्वा पुनरागत्योवाच—कथमशकत शक्तवन्तो यूयं मदृते मां विना जीवितुमिति । त एवमुक्ता ऊचुर्यथा लोकेऽकला मूका अवदन्तो वाचा प्राणन्तः प्राणनव्यापारं कुर्वन्तः प्राणेन पश्यन्तो दर्शनव्यापारं चक्षुषा कुर्वन्तस्तथा शृण्वन्तः श्रोत्रेण विद्वांसो मनसा कार्याकार्यादिविषयं प्रजायमाना रेतसा पुत्रानुत्पादयन्त एवमजीविष्म वयमित्येवं प्राणैर्दत्तोत्तरा वागात्मनोऽस्मिन्नवसिष्ठत्वं बुद्ध्वा प्रविवेश ह वाक् ॥ ८ ॥

वाग्घोच्चक्रामेत्यादेस्तात्पर्यमाह—त एवमिति । उक्तेऽर्थे श्रुत्यक्षराणि व्याच-

---

१ घ. ज. भवति । २ ग. °य ॥७॥ ए° । ३ च ण °यिकामाविक° । ४ घ ञ. ण. °शुगक्रं नो° । ५ ञ. नाचिमा° । ६ क ख. छ. झ प्राणेन । ७ छ. ञ. °ह । ए° ।

ष्टे—तत्रेत्यादिना । कार्याकार्यादिविषयमित्यादिशब्देनोपेक्षणीयसंग्रहः । चक्षुरादिभिर्दत्तोत्तरा पुनर्वाक्किंपकरोदिति तत्राऽऽह—आत्मन इति ॥ ८ ॥

चक्षुर्होच्चक्राम तत्संवत्सरं प्रोष्याऽऽगत्योवाच कथमशकत मदृते जीवितुमिति ते होचुर्यथाऽन्धा अपश्यन्तश्चक्षुषा प्राणन्तः प्राणेन वदन्तो वाचा शृण्वन्तः श्रोत्रेण विद्वाꣳसो मनसा प्रजायमाना रेतसैवमजीविष्मेति प्रविवेश ह चक्षुः ॥ ९ ॥

श्रोत्रꣳ होच्चक्राम तत्संवत्सरं प्रोष्याऽऽगत्योवाच कथमशकत मदृते जीवितुमिति ते होचुर्यथा बधिरा अशृण्वन्तः श्रोत्रेण प्राणन्तः प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा विद्वाꣳसो मनसा प्रजायमाना रेतसैवमजीविष्मेति प्रविवेश ह श्रोत्रम् ॥ १० ॥

मनो होच्चक्राम तत्संवत्सरं प्रोष्याऽऽगत्योवाच कथमशकत मदृते जीवितुमिति ते होचुर्यथा मुग्धा अविद्वाꣳसो मनसा प्राणन्तः प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेण प्रजायमाना रेतसैवमजीविष्मेति प्रविवेश ह मनः ॥ ११ ॥

रेतो होच्चक्राम तत्संवत्सरं प्रोष्याऽऽगत्योवाच कथमशकत मदृते जीवितुमिति ते होचुर्यथा क्लीबा अप्रजायमाना रेतसा प्राणन्तः प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेण विद्वाꣳसो मनसैवमजीविष्मेति प्रविवेश ह रेतः ॥ १२ ॥

तथा चक्षुर्होच्चक्रामेत्यादि पूर्ववत् । श्रोत्रं मनः प्रजातिरिति ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥

॥ ९ ॥ १० ॥ ११ ॥ १२ ॥

अथ ह प्राण उत्क्रमिष्यन्यथा महासुहयः सैन्धवः
पड्वीशशङ्कून्संवृहेदेवꣳ हैवमान्प्राणान्संववर्ह ते
होचुर्मा भगव उत्क्रमीर्न वै शक्ष्यामस्त्वदृते जी-
वितुमिति तस्यो मे बलिं कुरुतेति तथेति ॥ १३ ॥

अथ ह प्राण उत्क्रमिष्यन्नुत्क्रमणं करिष्यंस्तदानीमेव स्वस्थानात्प्रचलिता वागादयः । किमिवेत्याह—यथा लोके महाँश्चासौ सुहयश्च महासुहयः शोभनो हयो लक्षणोपेतो महान्परिमाणतः सिन्धुदेशे भवः सैन्धवोऽभिजनतः पड्वीशशङ्कून्पादबन्धनशङ्कून्पड्वीशाश्च ते शङ्कवश्च वान्संबृहेदुद्यच्छेद्युगपदुत्खनेदश्वारोह आरूढे परीक्षणाय । एवं हैवमान्वागादीन्प्राणान्संववर्होद्यतवान्स्वस्थानाद्भ्रंशितवान् । ते वागादयो होचुर्हे भगवो भगवन्मोत्क्रमीर्यस्मान्न वै शक्ष्यामस्त्वदृते त्वां विना जीवितुमिति । यद्येवं मम श्रेष्ठता विज्ञाता भवद्भिरहमत्र श्रेष्ठस्तस्य उ मे मम बलिं करं कुरुत करं प्रयच्छेतेति । अयं च प्राणसंवादः कल्पितो विदुषः श्रेष्ठपरीक्षणप्रकारोपदेशः । अनेन हि प्रकारेण विद्वान्को नु खल्वत्र श्रेष्ठ इति परीक्षणं करोति । स एष परीक्षणप्रकारः संवादभूतः कथ्यते । न ह्यन्यथा संहत्यकारिणां सतामेषामसैव संवत्सरमात्रमेवैकैकस्य निर्गमनाद्युपपद्यते । तस्माद्विद्वानेवानेन प्रकारेण विचारयति वागादीनां प्रधानबुभुत्सुरुपासनाय बलिं प्रार्थिताः सन्तः प्राणास्तथेति प्रतिज्ञातवन्तः ॥ १३ ॥

वागादिप्रकरणविच्छेदार्थोऽथशब्दः । उत्क्रमणं करिष्यन्यदा भवतीति शेषः । उत्क्रमणे दृष्टान्तेन स्पष्टयन्नुत्तरवाक्यमवतारयति—किमिवेत्यादिना । प्राणस्य श्रेष्ठत्वं वागादिभिर्निर्धारितमित्याह—ते वागादय इति । तर्हि तत्फलेन भवितव्यमित्याह—यद्येवमिति । यथोक्तस्य प्राणसंवादस्य काल्पनिकत्वं दर्शयति—अयं चेति । कल्पनाफलं सूचयति—विदुष इति । तदेव स्पष्टयति—अनेन हीति ।

---

१ ग. घ. ङ. च. ज. झ. °जापतिं । २ च. °षः श्रैष्ठ्यप° । ३ ङ. च. °नां प्राधान्यबु । ४ ख. ङ. छ ट. सन्तोऽन्ये प्रा° । ५ घ. ज प्रजा° । ६ झ. °तिश्रुत° । ७ घ. प्र. °ष्यितुमुत्त° ।

उपास्यपरीक्षणप्रकारो विवक्षितश्चेत्किं संवादेनेत्याशङ्क्याऽऽह—स एष इति। संवादस्य मुख्यार्थत्वादकल्पितत्वमाशङ्क्याऽऽह—न हीति। संवादस्य कल्पितत्वे फलितमाह—तस्मादिति। एवं प्राणसंवादस्य तात्पर्यमुक्त्वा प्रकृतामक्षरव्याख्यामेवानुवर्तयति—बलिमिति ॥ १३ ॥

मा ह वागुवाच यद्वा अहं वसिष्ठाऽस्मि त्वं तद्वसिष्ठोऽसीति यद्वा अहं प्रतिष्ठाऽस्मि त्वं तत्प्रतिष्ठोऽसीति चक्षुर्यद्वा अहꣳ संपदस्मि त्वं तत्संपदसीति श्रोत्रं यद्वा अहमायतनमस्मि त्वं तदायतनमसीति मनो यद्वा अहं प्रजातिरस्मि त्व तत्प्रजातिरसीति रेतस्तस्यो मे किमन्न किं वास इति यदिद किंचाऽऽश्वभ्य आ कृमिभ्य आ कीटपतङ्गेभ्यस्तत्तेऽन्नमापो वास इति न ह वा अस्यानन्नं जग्धं भवति नानन्नं प्रतिगृहीतं य एवमेतदनस्यान्नं वेद तद्विद्वाꣳसः श्रोत्रिया अशिष्यन्त आचामन्त्यशित्वाऽऽचामन्त्येतमेव तदनमनन्नं कुर्वन्तो मन्यन्ते ॥ १४ ॥

इति बृहदारण्यकोपनिषदि षष्ठाध्यायस्य
प्रथमं ब्राह्मणम् ॥ १ ॥

सा ह वाक्प्रथमं बलिदानाय प्रवृत्ता ह किलोवाचोक्तवती यद्वै अहं वसिष्ठाऽस्मि यन्मम वसिष्ठत्वं तत्त्वमेव तेन वसिष्ठगुणेन त्वं तद्वसिष्ठोऽसीति यद्वा अहं प्रतिष्ठाऽस्मि त्वं तत्प्रतिष्ठोऽसि या मम प्रतिष्ठा सा त्वमसीति। चक्षुः। समानमन्यत्। संपदायतनप्रजातित्वगुणां-

१ च. ज. °जापति'। २ च. ज ढ °जापति। ३ क. ख. ग. घ ङ. ज ट. ढ. °न्नं परिगृ°। ४ च. छ °लिमादाय। ५ क. ख. ग. घ. ङ छ. ज. ढ यदहे। ६ च. ढ. चक्षुरुवाचेति प्रत्येक सर्वत्र संबध्यत। स°। ७ क. घ. झ. °जापति°। ८ ख. छ. °तिगृ°। ९ च °गुणांस्त क्रमे°। ढ. °गुणांस्ते क्रमे°। १० क. ग °णान्तं क्रमे। ङ. झ. 'णाननुक्रमे°।

न्क्रमेण समर्पितवन्तः । यद्येवं साधु बलिं दत्तवन्तो भवन्तो ब्रूत तस्य उ म एवंगुणविशिष्टस्य किमन्नं किं वास इति । आहुरितरे—यदिदं लोके किंच किं चिदन्नं नामाप्या श्वभ्य आ कृतिभ्य आ कीटपतङ्गेभ्यः । यच्च श्वान्नं कृम्यन्नं कीटपतङ्गान्नं च तेन सह सर्वमेव यत्किंचित्प्राणिभिरद्यमानमन्न तत्सर्वं तवान्नं सर्वं प्राणस्यान्नमिति दृष्टिरत्र विधीयते ।

सा ह वागिति प्रतीकमादाय व्याचष्टे—प्रथमस्मिति । तेन वसिष्ठगुणेन त्वमेव वसिष्ठोऽसि तथा च तद्वसिष्ठत्व तवेति योजना । बलिदानमङ्गीकृत्यान्नवासती पृच्छति—यद्येवमित्यादिना । एवगुणविशिष्टस्य ज्येष्ठत्वश्रेष्ठत्ववसिष्ठत्वादिसंबद्धस्येत्यर्थः । यदिदमित्यादि वाक्य व्याचष्टे—यदिदमिति । प्रकृतेन शुनाप्यन्नेन कीटादीनां चान्नेन सह यत्किंचित्कृम्यन्नं दृश्यते तत्सर्वमेव तवान्नमिति योजना । तदेव स्फुटयति—यत्किंचिदिति । पदार्थमुक्त्वा वाक्यार्थं कथयति—सर्वमिति ।

केचित्तु सर्वभक्षणे दोषाभावं वदन्ति प्राणान्नविदः । तदसत् । शास्त्रान्तरेण प्रतिषिद्धत्वात् । तेनास्य विकल्प इति चेत् । न । अविधायकत्वात् । न ह वा अस्यान्नं जग्धं भवतीति सर्वं प्राणस्यान्नमित्येतस्य विज्ञानस्य विहितस्य स्तुत्यर्थमेतत् । तनैकवाक्यतापत्तेः । न तु शास्त्रान्तराविहितस्य बाधने सामर्थ्यमन्यपरत्वादस्य । प्राणमात्रस्य सर्वमन्नमित्येतद्दर्शनमिह विधित्सितं न त सर्वं भक्षयेदिति ।

अस्मिन्नेव वाक्ये पक्षान्तरमुत्थापयति—केचित्त्विति । न ह वा अस्येत्यादयर्थवाददर्शनादित्यर्थः । तदूहयति—तदमादिति । शास्त्रान्तरेण क्रिमयो भवन्त्यभक्ष्यभक्षिण इत्यादिनेत्यर्थः । प्राणविदतिरिक्तविषयं शास्त्रान्तरं सर्वभक्षणं तु प्राणदर्शिनो विवक्षितमतो व्यवस्थितविषयत्वात्प्रतिषेधेन सर्वभक्षणस्योदितानुदितहोमवद्विकल्पः स्यादिति शङ्कते—तेनेति । किं तर्हि सर्वान्नभक्षणं विहितं न वा । न चेन्न तस्य निषिद्धस्यानुष्ठानं प्राणविदि तत्प्रापकाभावाद्विहितं चेत्तर्हि यदिदमित्यादिना न हेत्यादिना वा विहितं नाऽऽद्य इत्याह—नाविधायकत्वादिति । यदिदमित्यादिना हि सर्वं प्राणस्यान्नमिति ज्ञानमेव विधीयते न तु प्राणा[न्न]विदः सर्वान्नभक्षणं तदवद्योतिपदाभावान्न विकल्पोपपत्तिरित्यर्थः । द्वितीयं दूषयति—न ह वा इति । अस्येति विद्वत्परामर्शान्निपातयोरर्थवादत्वावद्योतिनोर्दर्शनादेकवाक्यत्वसंभवे वाक्यभेदस्यान्याय्यत्वाच्चेति हेतुमाह—तेनेति । अर्थ-

१ क. ज. °दल्पमप्यन्न नामाऽऽ इव° । ङ. °दनल्पमप्या° । २ झ. नाल्प । इव° । ३ ख. छ. °माथाऽऽ इव° । च. माऽऽइव° । ४ घ. ङ. ज. यच्छ्वान्नं । ५ क. ख. छ. ढ. यच्चेति । ञ यदिति । ६ घ. ण. यत्क्रिम्य° । ७ घ. ण. हि ।

वादस्यापि स्वार्थे प्रामाण्यं देवताधिकरणन्यायेन भविष्यतीत्याशङ्क्याह न कलञ्जं भक्षयेदित्यादिविहितस्य भक्षणाभावस्य तस्य बाधने न हेत्यादेर्न सामर्थ्यं दृष्टिपरत्वादस्य मानान्तरविरोधे स्वार्थे मानत्वायोगादित्याह—न त्विति । न हेत्यादेरन्यपरत्वं प्रपञ्चयति—प्राणमात्रस्येति ।

यत्तु सर्वभक्षणे दोषाभावज्ञानं तन्मिथ्यैव प्रमाणाभावात् । विदुषः प्राणत्वात्सर्वान्नोपपत्तेः सामर्थ्याददोष एवेति चेत् । न । अशेषान्नत्वानुपपत्तेः । सत्यं यद्यपि विद्वान्प्राणो येन कार्यकरणसंघातेन विशिष्टस्य विदुषस्तेन कार्यकरणसंघातेन कृमिकीटदेवाद्यशेषान्नभक्षणं नोपपद्यते । तेन तत्राशेषान्नभक्षणे दोषाभावज्ञापनमनर्थकम् । अप्राप्तत्वादशेषान्नभक्षणदोषस्य । ननु प्राणः सन्भक्षयत्येव कृमिकीटाद्यन्नमपि । बाढम् । किंतु न तद्विषयः प्रतिषेधोऽस्ति । तस्माद्धि वरक्तं किंशुकं तत्र दोषाभावः । अतस्तद्रूपेण दोषाभावज्ञापनमनर्थकम् । अप्राप्तत्वादशेषान्नभक्षणदोषस्य । येन तु कार्यकरणसंघातसंबन्धेन प्रतिषेधः क्रियते तत्संबन्धेन त्विह नैव प्रतिप्रसवोऽस्ति । तस्मात्तत्प्रतिषेधातिक्रमे दोष एव स्यादन्यविषयत्वान्न ह वा इत्यादेः ।

तत्र दोषाभावज्ञापनात्तदेव विधित्सितमित्याशङ्क्याऽऽह—यत्त्विति । अर्थवादस्य मानान्तरविरोधे स्वार्थे मानत्वायोगस्योक्तत्वादिति भावः । प्रमाणभावस्यासिद्धिमाशङ्कते—विदुष इति । सामर्थ्यात्प्राणस्वरूपवत्तादिति यावत् । अदोषः सर्वान्नभक्षणे तस्येति शेषः । अर्थापत्तिं दूषयति—नेत्यादिना । अनुपपत्तिमेव विवृणोति—सत्यमिति । येनेत्यस्मात्प्राक्तथाऽपीति वक्तव्यम् । यद्यपीत्युपक्रमात् । प्राणस्वरूपसामर्थ्यादनुपपत्तिरपि शाम्यतीति शङ्कते—नन्विति । किं फलात्मना विदुषः सर्वान्नभक्षणं साध्यते किंवा साधकत्वरूपेणेति विकल्प्याऽऽद्यमङ्गीकरोति—बाढमिति । प्राणरूपेण सर्वभक्षणं तच्छब्दार्थः । तत्र प्रतिषेधाभावे तद्दृष्टान्तं फलितमाह—तस्मादिति । तथा स्वारसिकं प्राणस्य सर्वभक्षणं तत्र चाप्रतिषेधाद्दोषराहित्यमिति शेषः । तदाहित्ये किं स्यादिति चेत्तदाह—अत इति । पञ्चम्यर्थमेव स्फोरयति—अप्राप्तत्वादिति । प्राणविदः साधकत्वाकारेण साध्यते सर्वान्नभक्षणमिति पक्षं प्रत्याह—येन त्विति । इहेति प्राणविदुच्यते । निमित्तान्तरादत्यन्ताप्राप्तविषयो विधिः प्रतिप्रसवो यथा ज्वरितस्याशनप्रतिषेधेऽप्यौषधं पिबेदिति तथा शास्त्राधिकारिणः सर्वाभक्ष्यभक्षणनिषेधेऽपि प्राणविदो विशेषविधिर्नोपलभ्यते । तथा च तस्य भक्षणं दुःसाध्यमित्यर्थः । प्रतिप्रस-

---

१ च. °कीटाद्य° । २ घ च. °त्थेवं कृ । ३ ग. °पेणाशेषान्नभक्षणदो° । ४ क. ङ. च. झ. ढ. °ज्ञान° । ५ घ. ज. °क्षणे दो° । ६ क. च. झ. °स्मात्प्र° ।

वाभावे लब्धं दर्शयति—तस्मादिति। अर्थवादस्य तर्हि का गतिरित्याशङ्क्याऽऽह—अन्यविषयत्वादिति। तस्य स्तुतिमात्रार्थत्वान्न तदशान्निषेधातिक्रम इत्यर्थः।

न च ब्राह्मणादिशरीरस्य सर्वान्नत्वदर्शनमिह विधीयते किंतु प्राणमात्रस्यैव। यथा च सामान्येन सर्वान्नस्य प्राणस्य किंचिदन्नजातं कस्यचिज्जीवनहेतुः। यथा विषं विषजस्य क्रिमेस्तदेवान्यस्य प्राणान्नमपि सद्दृष्टमेव दोषमुत्पादयति मरणादिलक्षणम्। तथा सर्वान्नस्यापि प्राणस्य प्रतिषिद्धान्नभक्षणे ब्राह्मणत्वादिदेहसंबन्धाद्दोष एव स्यात्। तस्मान्मिथ्याज्ञानमेवाभक्ष्यभक्षणे दोषाभावज्ञानम्।

ननु विशिष्टस्य प्राणस्य सर्वान्नत्वदर्शनमत्र विधीयते तथा च विदुषोऽपि तदात्मनः सर्वान्नभक्षणे न दोषो यथादर्शनं फलाभ्युपगमादत—आह—न चेति इतोऽपि सर्वं प्राणस्यान्नमित्येतदवष्टम्भेन प्राणविदः सर्वभक्षणं न विधेयमित्याह—यथा चेति। प्राणस्य यथोक्तस्य स्वीकारेऽपि कस्यचित्किंचिदन्नं जीवनहेतुरित्यत्र दृष्टान्तमाह—यथेति। तथा सर्वप्राणिषु व्यवस्थयाऽसंबन्धे दार्ष्टान्तिकमाह—तथेति। प्राणविदोऽपि कार्यकरणवो निषेधातिक्रमायोगे फलितमाह—तस्मादिति।

आपो वास इत्यापो भक्षमाणा वासःस्थानीयास्तव। अत्र च प्राणस्याऽऽपो वास इत्येतद्दर्शनं विधीयते। न तु वासःकार्य आपो विनियोक्तुं शक्याः। तस्माद्यथाप्राप्तेऽम्भक्षणे दर्शनमात्रं कर्तव्यम्। न ह वा अस्य सर्वं प्राणस्यान्नमित्येवंविदोऽनन्नमनदनीयं जग्धं भुक्तं न भवति ह। यद्यप्यनेनानदनीयं भुक्तमदनीयमेव भुक्तं स्याद्वा तु तत्कृतदोषेण लिप्यत इत्येतद्विद्यास्तुतिरित्यवोचाम। तथा नानन्नं प्रतिगृहीतं यद्यप्यप्रतिग्राह्यं हस्त्यादि प्रतिगृहीतं स्यात्तदप्यन्नमेवं प्रतिग्राह्यं प्रतिगृहीतं स्यात्तत्राप्यप्रतिग्राह्यप्रतिग्रहदोषेण न लिप्यत इति स्तुत्यर्थमेव य एवमेतदनस्य प्राणस्यान्नं वेद। फलं तु प्राणात्मभाव एव न त्वेतत्फलाभिप्रायेण किं तर्हि स्तुत्यभिप्रायेणेति। नन्वेतदेव फलं कस्मान्न भवति न प्राणात्मदर्शिनः प्राणात्मभाव एव फलम्। तत्र च प्राणात्मभूतस्य सर्वात्मनोऽनदनीयमप्याद्यमेव। तथाऽप्रतिग्राह्यमपि प्रतिग्राह्यमेवेति यथाप्राप्तमेवोपादाय विद्या स्तूयते। अतो नैव फलविधिसरूपता वाक्यस्य।

---

१ ब. °र्थकार°। २ घ. ञ. °णा वसगस्था°। ३ ग. ङ. च. झ. ढ. °प्त भक्ष°। ४ क. ख. ङ. छ. ज्ञ. झ. ढ. °क्तं म°। ५ ख. छ. झ. °ति। य°। ङ. °ति न। व°। ६ ञ. च. ञ. ढ. °व। अप्र°। ७ क. ख, ग. घ. ङ. च. छ. ज. झ. ढ. °मप्यद्य°, ८ क ङ, °मित्यव°।

वाक्यस्थ वाक्यान्तरमादाय व्याकरोति—आप इति । स्मार्तादाचमनादन्यदेव श्रौतमाचमनमन्यतोऽप्राप्तं विधेयं तदर्थमिदं वाक्यमिति केचित्तान्प्रत्याह-अत्र चेति । वासःकार्यं परिधानम् । तत्र साक्षादपां विनियोगे प्राप्तमर्थमाह—तस्मादिति । यदिदं किंचेत्यादावुक्तं दृष्टिविरेरर्थवादमादाय व्याचष्टे—नेत्यादिना । पुनर्नञनुकर्षणमन्वयाय । पदार्थमुक्त्वा वाक्यार्थमाह—यद्यपीति । अभक्ष्यभक्षणं तर्हि स्वीकृतमिति चेन्नेत्याह—इत्येतदिति । यथा प्राणविदो नानग्नं भुक्तं भवति तथेतत्येतत् । अनुमतस्तर्हि प्राणविदो दुष्प्रतिग्रहोऽपीत्याशङ्क्याऽऽह—तत्रापीति। अतत्प्रतिग्रहे प्राप्तेऽपीत्यर्थः । किमित्ययं स्तुत्यर्थवादः फलवाद एव किं न स्यादित्याशङ्क्याऽऽह——फलं त्विति । इतिशब्द सर्वं प्राणस्यान्नमितिदृष्टिविधेस्तार्थवादस्योपसंहारार्थः। उक्तमेवार्थं चोद्यसमाधिभ्यां समर्थयते—नन्वित्यादिना । यथाप्राप्तं प्रकृतवाक्यवशात्प्रतिषिद्धं रूपमनतिक्रम्येति यावत् । वाक्यस्य विद्यास्तुतित्वे फलितमाह—अत इति ।

यस्मादापो वासः प्राणस्य तस्माद्विद्वांसो ब्राह्मणाः श्रोत्रिया अधीतवेदा अशिष्यन्तो भोक्ष्यमाणा आचामन्त्यपोऽशित्वाऽऽचामन्ति भुक्त्वा चोत्तरकालमपो भक्षयन्ति । तत्र तेषामाचामतां कोऽभिप्राय इत्याह—एतमेवानं प्राणमनग्नं कुर्वन्तो मन्यन्ते । अस्ति चैतद्यो यस्मै वासो ददाति स तमनग्नं करोमीति हि मन्यते । प्राणस्य चाऽऽपो वास इति युक्तम् । यदपः पिबामि तत्प्राणस्य वासो ददामीति विज्ञानं कर्तव्यमित्येवमर्थमतत् । ननु भोक्ष्यमाणो भुक्तवाश्च प्रयतो भविष्यामीत्याचामंति । तत्र च प्राणस्यानग्नताकरणार्थत्वे चैं द्विकार्यताऽऽचमनस्य स्यात् । न च कार्यद्वयमाचमनस्यैकस्य युक्तम् । यदि प्रायत्यार्थं नानग्नतार्थमथानग्नतार्थं न प्रायत्यार्थम् । यस्मादेवं तस्माद्द्वितीयमाचमनान्तरं प्राणस्यानग्नताकरणाय भवतु । न । क्रियाद्वित्वोपपत्तेः । द्वे ह्येते क्रिये भोक्ष्यमाणस्य भुक्तवतश्च यदाचमनं स्मृतिविहितं तत्प्रायत्यार्थं भवति । क्रियामात्रमेव न तु तत्र प्रायत्यं दर्शनाद्यपेक्षते । तत्र चाऽऽचमनाङ्गभूतास्वप्सु वासोविज्ञानं प्राणस्येतिकर्तव्यतया चोद्यते न त तस्मिन्क्रियमाण आचमनस्य प्रायत्यर्थता बाध्यते क्रियान्तरत्वादाचमनस्य । तस्माद्भोक्ष्य-

---

१ घ. ण. °वृत्तह° । २ क. ख छ. ढ. °र्थसु° । ३ क. ख. छ ढ °पन्नरू° । ४ घ. °मत्यपि । त° । ५ क. च °त्र प्रा° । ६ क. ख ग. घ. ङ. च. छ. ज झ. ढ. च, द्विःका° ।

माणस्य भुक्तवतश्च यदाचमनं तत्राऽऽपो वासः प्राणस्येति दर्शनमात्रं विधीयते । अप्राप्तत्वादन्यतः ॥ १४ ॥

इति बृहदारण्यकोपनिषद्भाष्ये षष्ठाध्यायस्य
प्रथमं ब्राह्मणम् ॥ १ ॥

यदुक्तमापो वास इति तस्य शेषभूतमुत्तरमन्यमुत्थाप्य व्याचष्टे—यस्मादिति । तत्रेत्यशनात्प्रागूर्ध्वकालोक्तिः । उक्तेऽभिप्राये लोकप्रसिद्धिमनुकूलयति—अस्ति चेति । तत्रैव वाक्योपक्रमस्याऽऽनुकूल्यं दर्शयति—प्राणस्येति । किमर्थमिदं सोपक्रमं वाक्यमित्यपेक्षायामत्र चेयादावुक्तं स्मारयति—यदप इति । दृष्टिविधानमसहमानः शङ्कते—नन्विति । अस्तु प्रायत्यार्थमाचमनं प्राणपरिधानार्थं चेत्याशङ्क्याऽऽह—तत्रेति । कुल्याप्रणयनन्यायेन द्विकार्यत्वाविरोधमाशङ्क्याऽऽह—न चेति । तत्र प्रत्यक्षत्वात्कार्यभेदस्याविरोधेऽपि प्रकृते प्रमाणाभावाद्द्विकार्यत्वानुपपत्तिरित्यभिप्रेत्योक्तमुपपादयति—यदीति । ननु स्मार्तांचमनस्य प्रायत्यार्थत्वं तस्यैवानन्नत्वं प्रकृतवाक्यादविगतं तथा च कथं द्विकार्यत्वमप्रामाणिकमित्याशङ्क्य वाक्यस्य विषयान्तरं दर्शयति—यस्मादिति । द्विकार्यत्वदोषमुक्तं दूषयति—नेत्यादिना । तच्चाऽऽचमनं दर्शननिरपेक्षमित्याह—क्रियामात्रमेवेति । नन्वाचमनेन फलभूतं प्रायत्यं दर्शनसापेक्षमिति चेन्नेत्याह—न त्विति । क्रियाया एव तदावहनसामर्थ्यादित्यर्थः । तत्रेत्याचमने शुद्ध्यर्थे क्रियान्तरे सतीत्यर्थः । प्राणविज्ञानप्रकरणे वासोविज्ञानं चोद्यते चेद्वाक्यभेदः स्यादित्याशङ्क्याऽऽह—प्राणस्येति । सर्वान्नविज्ञानवदिति चकारार्थः । आचमनीयास्वप्सु वासोविज्ञानं क्रियते चेत्कथमाचमनस्य प्रायत्यार्थत्वमित्याशङ्क्याऽऽह—न त्विति । द्विकार्यत्वदोषाभावे फलितं दर्शनविधिमुपसंहरति—तस्मादिति । अप्राप्तत्वाद्वासोदृष्टेर्विधिव्यतिरेकेण प्राप्त्यभावाद्दृष्टेश्चात्र प्रकृतत्वात्कार्याख्यानादपूर्वमिति च न्यायादित्यर्थः ॥ १४ ॥

इति बृहदारण्यकोपनिषद्भाष्यटीकायां षष्ठाध्यायस्य
प्रथमं ब्राह्मणम् ॥ १ ॥

१ घ. ण °न द्वाःका° । २ क. ख. छ ढ. °द्विकरणत्वा° । अ. °द्विकरत्वा° । क. ख. छ. ढ. °द्वद्विकरणत्वा° । घ. अ °द्वद्विकरत्वा° । ४ ण. °कारत्वा° । ५ अ. ण. स्मार्तेमाच° । ६ घ. अ. ण. तस्यैवा° । ७ ध अ. ण. °क्याधि° । ८ क ख घ. छ. ण. द्विक. रणत्व° । ढ. द्विकरण+त्व° । अ. द्विकरत्व° । ९ क. ख छ ण. द्विकरणत्व° । ढ. द्विकरणकत्व° । घ. अ. द्विकरत्व° । १० क. ख. छ. ढ. ण. द्विकरणत्व° । घ, अ. द्विकरत्व° ।

अथ षष्ठाध्यायस्य द्वितीयं ब्राह्मणम् ।

श्वेतकर्तुर्ह वा आरुणेय इत्यस्य संबन्धः । खिलाधिकारोऽयं तत्र यदनुक्तं तदुच्यते । सप्तमाध्यायान्ते ज्ञानकर्मसमुच्चयकारिणाऽग्ने-र्मार्गयाचनं कृतम्-अग्ने नय सपथेति । तत्रानेकेषां पथां सद्भावो मन्त्रेण सामर्थ्यात्प्रदर्शितः । सुपथेति विशेषणात् । पन्थानश्च कृत-विपाकप्रतिपत्तिमार्गाः । वक्ष्यति च यत्कृत्वेत्यादि । तत्र च कति कर्मविपाकप्रतिपत्तिमार्गा इति सर्वसंसारगत्युपसंहारार्थोऽयमारम्भः । एतावती हि संसारगतिः । एतावान्कर्मणो विपाकः स्वाभाविकस्य शास्त्रीयस्य चं संविज्ञानस्येति । यद्यपि द्वया ह प्राजापत्या इत्यत्र स्वाभाविकः पाप्मा सूचितः । न च तस्येदं कार्यमिति विपाकः प्रदर्शितः । शास्त्रीयस्यैव तु विपाकः प्रदर्शितः । प्रदर्शितस्त्वयमा-त्मप्रतिपत्त्यन्तेन । ब्रह्मविद्यारम्भे तद्वैराग्यस्य विवक्षितत्वात् । तत्रापि केवलेन कर्मणा पितृलोको विद्यया विद्यासंयुक्तेन च कर्मणा देव-लोक इत्युक्तम् । तत्र केन मार्गेण पितृलोकं प्रतिपद्यत केन वा देव-लोकमिति नोक्तम् । तच्चेह खिलप्रकरणेऽशेषतो वक्तव्यमित्यत आर भ्यते । अन्ते च सर्वोपसंहारः शास्त्रस्यष्टः ।

ब्राह्मणान्तरमादाय तस्य पूर्वेण संबन्धं प्रतिजानीते--श्वेतकेतुरिति कोऽसौ संबन्धस्तमाह-खिलेति । तत्र कर्मकाण्डे ज्ञानकाण्डे वा यद्वस्तु भावा-न्येन नोक्तं तदस्मिन्काण्डे वक्तव्यमस्य खिलाविकारत्वात्तथा च पूर्वमनुक्तं वक्तु-मिदं ब्राह्मणमित्यर्थः । वक्तव्यशेषं दर्शयितुं वृत्तं कीर्तयति-सप्तमेति । समु-च्चयकारिणो मुमुक्षोरभिमार्थनेऽपि किं स्यादित्याशङ्क्याऽऽह-तत्रेति । अध्या-यावसानं सप्तम्यर्थः । सामर्थ्यमेव दर्शयति-सुपथेतीति । विशेषणवशाद्ध-वो मार्गा भान्तु किं पुनस्तेषां स्वरूपं तदाह-पन्थानश्चेति । तत्र वाक्यशे-षमनुकूलयति-वक्ष्यति चेति । संप्रत्याकाङ्क्षाद्वारा समनन्तरब्राह्मणतात्पर्य-माह-तत्रेति । उपसंहियमाणा संसारगतिरप परिच्छिनत्ति-एतावती हीति दक्षिणोदगधोगत्यात्मिकेति यावत् । कर्मविपाकस्तर्हि कुत्रोपसंहियते तत्राऽऽह एतावानिति । इतिशब्दो यथोक्तसंसारगत्यतिरिक्तकर्मविपाकाभावात्तदुपसंह-रार्थ एवायमारम्भ इत्युपसंहारार्थः । अथोद्दीथादिकर्म सर्वोऽपि कर्मविपाक-र्थ एवेत्युक्तत्वात्पारिशिष्टसंसारगत्यभावात्कथं खिलकाण्डे तन्निर्देशसिद्धिरत आह-यद्यपीति । कस्तर्हि विपाकस्तत्रोक्तस्तत्राऽऽह-शास्त्रीयस्येति । तत्र

१ ख. घ. ङ. छ. झ. °त्रं कं° । २ क. ग. ङ. झ. °र्वि° । ३ घ. °र्वि° । ४ क. ख. ङ. च. ज. ढ. °स्त्रस्य दृष्टः ।

सुकृतविपाकस्यैवोपन्यासे हेतुमाह—ब्रह्मविद्येति । अनिष्टविपाकात्तु वैराग्यं सुकृताभिमुख्यादेव सिद्धमिति न तत्र तद्विवक्षा । इह पुनः शास्त्रसमाप्तौ खिलाधिकारे तद्विपाकोऽप्युपसंहियत इति भावः । प्रकारान्तरेण सगतिं वक्तुमुक्तं स्मारयति—तत्रापीति । शास्त्रीयविपाकविषयेऽपीत्यर्थः । उत्तरग्रन्थस्य विषयपरिशेषार्थं पातनिकामाह—तत्रेति । लोकस्य सप्तम्यर्थः । प्रागनुक्तमपि देवयानाद्यत्र वक्तव्यमिति कुतो नियमसिद्धिस्तत्राऽऽह—नन्विति । वक्तव्यशेषस्य सत्त्वे फलितमाह—इत्यत इति । यत्तर्हि प्रागनुक्तं तदेवयानादि वक्तव्यं प्रागेवोक्तं तु ब्रह्मलोकादि कस्मादुच्यते तत्राऽऽह—अन्ते चेति । शास्त्रस्यान्ते चेति संबन्धः ।

अपि चैतावदमृतत्वमित्युक्ते न कर्मणोऽमृतत्वाशाऽस्तीति च तत्र हेतुर्नोक्तस्तदर्थश्चायमारम्भः । यस्मादियं कर्मणा गमनं नित्येऽमृतत्वे व्यापारोऽस्ति तस्मादेतावदेतावदेवामृतत्वसाधनमिति सामर्थ्याद्धेतुत्वं संपद्यते । अपि चोक्तमग्निहोत्रे न त्वेवैतयोस्त्वमुत्क्रान्तिं न गतिं न प्रतिष्ठां न तृप्तिं न पुनरावृत्तिं न लोकं प्रत्युत्थायिनं वेत्येति । तत्र प्रतिवचने ते वा एते आहुती हुते उत्क्रामत इत्यादिना आहुतेः कार्यमुक्तम् । तच्चैतत्कर्तुराहुतिलक्षणस्य कर्मणः फलम् । न हि कर्तारमनाश्रित्याऽऽहुतिलक्षणस्य कर्मणः स्वातन्त्र्येणोत्क्रान्त्यादिकार्यारम्भ उपपद्यते । कर्त्रर्थत्वात्कर्मणः कार्यारम्भस्य । साधनाश्रयत्वाच्च कर्मणः । तत्राग्निहोत्रस्तुत्यर्थत्वादाग्निहोत्रस्यैव कार्यमित्युक्तं षट्प्रकारमपि । इह तु तदेव कर्तुः फलमित्युपदिश्यते । षट्प्रकारमपि कर्मफलविज्ञानस्य विवक्षितत्वात् । तद्द्वारेण च पञ्चाग्निदर्शनमिहोत्तरमार्गप्रतिपत्तिसाधनं विधित्सितम् । एवमशेषसंसारगत्युपसंहारः । कर्मकाण्डस्यैषा निष्ठेत्येतद्द्वयं दिदर्शयिषुराख्यायिकां प्रणयति ।

इतश्चेदं ब्राह्मणमगतार्थत्वादारभ्यमित्याह—अपि चेति । एतावदित्यात्मज्ञानोक्तिः । अमृतत्वं तत्साधनमिति यावत् । चकाराद्युक्तमित्यनुषङ्गः । ज्ञानमेवामृतत्वे हेतुरित्युक्तोऽर्थस्तत्रेति सप्तम्यर्थः । तदर्थो हेत्वपदेशार्थः । कथं पुनर्वक्ष्यमाणा कर्मगतिर्ज्ञानमेवामृतत्वसाधनमित्यत्र हेतुत्वं प्रतिपद्यते तत्राऽऽह—यस्मादिति । व्यापारोऽस्ति कर्मण इति शेषः । सामर्थ्याज्ज्ञानातिरिक्तस्योपायस्य संसारहेतुत्वनियमादित्यर्थः । प्रकारान्तरेण ब्राह्मणतात्पर्यं वक्तुमग्निहोत्रविषये जनकयाज्ञवल्क्यसंवादसिद्धमर्थमनुवदति—अपि चेत्यादिना । एतयोरग्निहोत्राहुत्योः सायं प्रातश्चानुष्ठितयोरिति यावत् । लोकं प्रत्युत्थायिनं यजमानं परिवे-

१ क ग छ. ढ. तर्हि । २ घ. ज °वनया° । ३ च. ढ. °याराहुत्योस्त्व° । ४ ख.

ष्टयेमं लोकं प्रत्यावृत्तयोस्तयोरनुष्ठानोपचितयोः परलोकं प्रति स्वाश्रयोत्थान-हेतुं परिणामित्येतदिति प्रश्नषट्कमग्निहोत्रविषये जनकेन याज्ञवल्क्यं प्रत्युक्तमिति संबन्धः । तत्रेत्याक्षेपगर्भतप्रश्नषट्कोक्तिः । ननु फलवतोऽश्रवणात्कस्येदमाहुतिफलं न हि तत्स्वतन्त्रं संभवति तत्राऽऽह—तच्चेति । कर्तृवाचिपदाभावादाहुत्यपूर्वस्यैवोत्क्रान्त्यादिकार्यारम्भकत्वान्न तत्र कर्तृगामिकफलमुक्तमित्याशङ्क्याऽऽह—न हीति । किंच कारकाश्रयत्ववत्त्वात्कर्मणो युक्तं तत्फलस्य कर्तृगामित्वमित्याह—साधनेति । स्तातन्त्र्यासंभवादाहुत्योः स्वकर्तृकयोरेव गत्यादि विवक्षितं चेत्तर्हि कथं तत्र केवलाहुत्योर्गत्यादि गम्यते तत्राऽऽह—तत्रेति । अग्निहोत्रप्रकरणं सप्तम्यर्थः । अग्निहोत्रस्तुत्यर्थत्वात्प्रश्नप्रतिवचनरूपस्य संदर्भस्येति शेषः । भवत्वेवमग्निहोत्रप्रकरणस्थितिः प्रकृते तु किमायातं तत्राऽऽह—इह त्विति । किमिति विद्याप्रकरणे कर्मफलाविज्ञानं विवक्ष्यते तत्राऽऽह—तदुद्धारेणेति । ब्राह्मणारम्भमुपपादितमुपसंहरति—एवमिति । संसारगत्युपसंहारेण कर्मविपाकस्य सर्वस्यैवोपसंहारः सिद्धो भवति तदतिरिक्ततद्विपाकाभावादित्याह—कर्मकाण्डस्येति । यथोक्तं वस्तु दर्शयितुं ब्राह्मणमारभ्यते चेत्तत्र किमित्याख्यायिका प्रणीयते तत्राऽऽह—इत्येतं दृढयमिति । सर्वमेव पूर्वोक्तं वस्तु दर्शयितुमिच्छन्वेदः सुखावबोधार्थमाख्यायिकां करोतीत्यर्थः ।

> श्वेतकेतुर्ह वा आरुणेयः पञ्चालानां परिषदमाजगाम स आजगाम जेवलिं प्रवाहणं परिचारयमाणं तमुदीक्ष्याभ्युवाद कुमारा ३ इति स भो ३ इति प्रतिशुश्रावानुशिष्टोऽन्वसि पित्रेत्योमिति होवाच ॥ १ ॥

श्वेतकेतुर्नामतोऽरुणस्यापत्यमारुणिस्तस्यापत्यमारुणेयः । हशब्द ऐतिह्यार्थः । वै निश्चयार्थः । पित्राऽनुशिष्टः मन्नात्मनो यशः प्रथनाय पञ्चालानां परिषदमाजगाम । पञ्चालाः प्रसिद्धास्तेषां परिषदमागत्य जित्वा राज्ञोऽपि परिषदं जेष्यामीति गर्वेण स आजगाम । जीवलस्यापत्यं जेवलिं पञ्चालराजं प्रवाहणनामानं स्वभृत्यैः परिचारयमाणमात्मनः परिचरणं कारयन्तमित्येतत् । स राजा पूर्वमेव तस्य विद्याभिमानगर्वं श्रुत्वा विनेतव्योऽयमिति मत्वा

---

१ घ. °त्थाने हे° । २ अ. °रिणमोदित्ये° । ३ ज. ण. °गर्भप्र° । ४ घ. ज. ण. °मिफ° । ५ घ. अ. ण. °यत्वात्क° । ६ क. ढ. ण. °वत्येव° । ७ अ. °तच्चेति । घ. ण° °तदिति । ८ क. ग. ज झ. °र्थः । पि° । ९ च ढ. वेशब्दा नि° । १० ख. ग. ङ. छ. लेस्तं प° ।

तमुदीक्ष्योत्प्रेक्ष्याऽऽगतमात्रमेवाभ्युवादाभ्युक्तवान्कुमारा३इति संबोध्य , भर्त्सनार्थो प्लुतिः । एवमुक्तः स प्रतिशुश्राव भो३इति । भो ३ इत्य-प्रतिरूपमपि क्षत्रियं प्रत्युक्तवान्क्रुद्धः सन् । अनुशिष्टोऽनुशासितोऽसि भवसि किं पित्रेत्युवाच राजा । प्रत्याहेतर अमिति वाढमनुशिष्टोऽस्मि पृच्छ यदि संशयस्ते ॥ १ ॥

यदा कदाचिदतिक्रान्ते काले वृत्तार्थद्योतित्वं निपातस्य दर्शयति—हशब्द इति । यशःपथनं विद्वत्सु स्वकीयविद्यासामर्थ्यख्यापनं प्रतिज्ञाविद्वज्जनाविशिष्ट-त्वेनेति शेषः । क्वचिज्जयस्य प्राप्तत्वं मर्वे हेतुः । किमिति राजा श्वेतकेतुमागत-मात्रं तदीयाभिप्रायमप्रतिपद्य तिरस्कुर्वन्निव संबोधितवानित्याशङ्क्याऽऽह—स राजेति । संबोध्य भर्त्सनं कृतवानिति शेषः । तदवद्योति पदमिह नास्तीत्याश-ङ्कयाऽऽह—भर्त्सनार्थेति । भो ३ इति प्रतिवचनमाचार्ये प्रत्युचितं न क्षत्रियं प्रति तस्य हीनत्वादित्याह—भो ३ इतीति । अप्रतिरूपवचने क्रोधं हेतुं करोति—क्रुद्धः सन्निति । पितुः सकाशात्तव लब्धानुशासनत्वे लिङ्गं नास्तीत्याशङ्कयाऽऽह—पृच्छेति ॥ १ ॥

वेत्थ यथेमाः प्रजाः प्रयत्यो विप्रतिपद्यन्ता ३ इति नेति होवाच वेत्थो यथेमं लोकं पुनरा-पद्यन्ता ३ इति नेति[1] होवाच वेत्थो यथाऽसौ लोक एवं बहुभिः पुनः पुनः प्रयद्भिर्न संपूर्यता ३ इति नेति[2] होवाच वेत्थो यतिथ्यामाहुत्याः[3] हुतायामापः पुरुषवाचो भूत्वा समुत्थाय वदन्ती३ इति नेति[4] होवाच वेत्थो देवयानस्य वा पथः प्रतिपदं पितृयाणस्य[5] वा यत्कृत्वा देवयानं वा पन्थानं प्रतिपद्यन्ते[6] पितृयाणं[7] वाऽपि हि न ऋषे-र्वचः श्रुतं द्वे सृती अशृणवं पितृणामहं देवाना-मुत मर्त्यानां ताभ्यामिदं विश्वमेजत्समेति यद-न्तरा पितरं मातरं चेति नाहमत एकंचन वेदेति होवाच ॥ २ ॥

---

१ ख. ङ च. छ. झ. ढ. °ति प्रतिवचनम् । भो ३ । २ क. ख. च. छ. °सि पि° । ३ ग. च. छ. °ति होवा° । ४ म. °ति होवा° । ५ च. ठ. °यानस्य । ६ च. ढ. °यते । ७ च. °यानं वा° । ८ क. च. ढ. पितृणा° ।

यद्येवं वेत्थ विजानासि किं यथा येन प्रकारेणेमाः प्रजाः प्रसिद्धाः प्रयत्यो म्रियमाणा विप्रतिपद्यन्ता ३ इति विप्रतिपद्यन्ते विचारणाया प्लुतिः। समानेन मार्गेण गच्छन्तीनां मार्गद्वैविध्यं यत्र भवति तत्र काश्चित्प्रजा अन्येन मार्गेण गच्छन्ति काश्चिदन्येनेति विप्रतिपत्तिः। यथा ताः प्रजा विप्रतिपद्यन्ते तत्किं वेत्थेत्यर्थः। नेति होवाचेतरः तर्हि वेत्थ उ यथेमं लोकं पुनरापद्यन्ता ३ इति पुनरापद्यन्ते यथा पुनरागच्छन्तीमं लोकम्। नेति हैवोवाच श्वेतकेतुः। वेत्थो यथाऽसौ लोक एवं प्रसिद्धेन न्यायेन पुनः पुनरसकृत्प्रयाद्भिर्म्रियमाणैर्यथा येन प्रकारेण न संपूर्यता३ इति न संपूर्यतेऽसौ लोकस्तत्किं वेत्थ। नेति हैवोवाच। वेत्थो यतिथ्यां यस्यामख्याकायामाहुत्यामाहुतो हुतायामापः पुरुषवाचः पुरुषस्य या वाक्सैव यामां वाक्ताः पुरुषवाचो भूत्वा पुरुषशब्दवाच्या वा भूत्वा। यदा पुरुषाकारपरिणतास्तदा पुरुषवाचो भवन्ति। समुत्थाय सम्यगुत्थायोद्भूताः सत्यो वदन्ती ३ इति। नेति हैवोवाच। यद्येवं वेत्थ उ देवयानस्य पथो मार्गस्य प्रतिपदं प्रतिपद्यते येन सा प्रतिपत्तां प्रतिपदं पितृयाणस्य वा प्रतिपदं प्रतिपच्छब्दवाच्यमर्थमाह। यत्कर्म कृत्वा यथाविशिष्टं कर्म कृत्वेत्यर्थः। देवयानं वा पन्थानं मार्गं प्रतिपद्यन्ते पितृयाणं वा यत्कर्म कृत्वा प्रतिपद्यन्ते तत्कर्म प्रतिपदुच्यते तां प्रतिपदं किं वेत्थ देवलोकपितृलोकप्रतिपत्तिसाधनं किं वेत्थेत्यर्थः।

पदार्थमुक्त्वा वाक्यार्थमाह—समानेनेति। नाडीरूपेण साधारणेन मार्गेणाभ्युदयं गच्छतां यत्र मार्गविप्रतिपत्तिस्तत्किं जानासीति प्रश्नार्थः। विप्रतिपत्तिमेव विशदयति—तत्रेति। अधिकृतप्रजानिर्धारणार्था सप्तमी। प्रथमप्रश्नं निगमयति—यद्येति। प्रश्नान्तरमादत्ते—तर्हीति। तदेव स्पष्टयति—यथेति। परलोकगताः प्रजाः पुनरिमं लोकं यथाऽऽगच्छन्ति तथा किं वेत्थेति योजना। प्रश्नान्तरप्रतीकमुपादत्ते—वेत्थेति। तद्व्याकरोति—एवमिति। प्रसिद्धो न्यायो जरोज्वरादिभिरणहेतुः प्रश्नान्तरमुत्थाप्य व्याचष्टे—वेत्थेत्यादिना। पुरुषशब्द-

---

१ ख. छ. °त्थ आ°। २ क ख. ग. च छ झ ढ °ति होवा°। ३ क. ख. ग. च. छ. झ. ढ. °ति होवा° ४ ख. ङ. छ. °षशब्दवा°। ५ ख. ङ च. छ. °च्या भू°। ६क. ग. च. झ. °ति होवा°। ७ च. ढ. °ब्दस्य वा°। ८ ख. छ. °यते पि°। ९ क. ख. °यते। त°। १० क. ञ. °थमं प्र°। ११ क. °रादि°। १२ घ. ण. °दिभिरं°। १३ घ. °रणे हे°

वाच्या भूत्वा समुत्थाय वदन्तीति संबन्धः । कथमयं पुरुषशब्दवाच्यत्वं तदाह—यदेति । प्रश्नान्तरमवतारयति -यद्येवं वेत्थेति । पितृयाणस्य वा प्रतिपदं वेत्थेति संबन्धः । यत्कृत्वा प्रतिपद्यन्ते पन्थानं तत्कर्म प्रतिपदिति योजना । वाक्यार्थमाह—देवयानमिति । उक्तमर्थं संक्षिप्याऽऽह—देवलोकेति ।

अप्यत्रास्यार्थस्य प्रकाशकमृषेर्मन्त्रस्य वचो वाक्यं नः श्रुतमस्ति । मन्त्रोऽप्यस्यार्थस्य प्रकाशको विद्यत इत्यर्थः । कोऽसौ मन्त्र इति । उच्यते—द्वे सृती द्वौ मार्गावशृणवं श्रुतवानस्मि तयोरेका पितॄणां प्रापिका पितृलोकसंबद्धा तया सृत्या पितृलोकं प्राप्नोतीत्यर्थः । अहमशृणवमिति व्यवहितेन संबन्धः । देवानामुतापि देवानां संबन्धिन्यन्या देवान्प्रापयति सा । पुनरुभाभ्यां सृतिभ्यां पितॄन्देवांश्च गच्छन्तीति । उच्यते—उतापि मर्त्यानां मनुष्याणां संबन्धिन्यौ मनुष्या एव हि सृतिभ्यां गच्छन्तीत्यर्थः । ताभ्यां सृतिभ्यामिदं विश्वं समस्तमेजद्गच्छत्समेति संगच्छते । ते च द्वे सृती यदन्तरा ययोरन्तरा यदन्तरा पितरं मातरं च मातापित्रोरन्तरा मध्य इत्यर्थः । कौ तौ मातापितरौ द्यावापृथिव्यावण्डकपाले । इयं वै माताऽसौ पितेति हि व्याख्यातं ब्राह्मणेन । अण्डकपालयोर्मध्ये संसारविषये एवैते सृती नाऽऽत्यन्तिकामृतत्वगमनाय । इतर आह—नाहमतोऽस्मात्प्रश्नसमुदायादेकंचनैकमपि प्रश्नं न वेद नाहं वेदेति होवाचैं श्वेतकेतुः ॥ २ ॥

मार्गद्वयमेव नास्ति त्वया तूपेक्षामात्रेण पृच्छ्यते तत्राऽऽह—अपीति । अत्रेति कर्मविपाकप्रक्रियोक्तिः। अस्यार्थस्य मार्गद्वयस्येत्येतत् । तेषामेव मार्गद्वयेऽधिकृतत्वमिति वक्तुं हीत्युक्तं तदेव स्फुटयति—ताभ्यामिति । विश्वं साध्यसाधनात्मकं संगच्छते गन्तव्यत्वेन गन्तृत्वेन चेति शेषः । प्रकृतमन्त्रव्याख्यानग्रन्थो ब्राह्मणशब्दार्थः । यदन्तरेत्यादौ विवक्षितमर्थमाह—अण्डकपालयोरिति ॥ २ ॥

अथैनं वसत्योपमन्त्रयांचक्रेऽनादृत्य वसतिं कुमारः प्रदुद्राव स आजगाम पितरं तꣳ होवाचेति वाव किल नो भवान्पुराऽनुशिष्टानवोच इति कथꣳ सुमेध इति पञ्च मा प्रश्नान्राजन्यबन्धुरप्राक्षीत्ततो

१ क. च. झ. पि[illegible]ा । २ क. ख. ब. ङ. च. छ. ज. झ. ढ. °ति सम्यगच्छ° ३ ख. ड. छ. °च्छतीति । ते । ४ क. °र्यादति ।

नैकंचन वेदेति कतमे त इतीम इति ह प्रतीकान्यु-
दाजहार ॥ ३ ॥

अथानन्तरमपनीय विद्याभिमानगर्वमेनं प्रकृतं श्वेतकेतुं वसत्या वसतिप्रयोजनेनोपमन्त्रयांचक्रे । इह वसन्तु भवन्तः पाद्यमर्घ्यं चाऽऽनीयतामित्युपमन्त्रणं कृतवान्राजा । अनादृत्य तां वसतिं कुमारः श्वेतकेतुः प्रदुद्राव प्रतिगतवान्पितरं प्रति । स चाऽऽजगाम पितरमागत्य चोवाच तं कथमिति वाव किलैवं किल नोऽस्मान्भवान्पुरा समावर्तनकालेऽनुशिष्टान्सर्वाभिर्विद्याभिरवोचोऽवोचदिति । सोपालम्भं पुत्रस्य वचः श्रुत्वाऽऽह पिता । कथं केन प्रकारेण तव दुःखमुपजातं हे सुमेधः शोभना मेधा यस्येति सुमेधाः । शृणु मम यथा वृत्तं पञ्च पञ्चसंख्याकान्प्रश्नान्मा मां राजन्यबन्धू राजन्या बन्धवो यस्येति । परिभववचनमेतद्राजन्यबन्धुरिति । अप्राक्षीत्पृष्टवांस्ततस्तस्मान्नैकंचनैकमपि न वेद न विज्ञातवानस्मि । कतमे ते राज्ञा पृष्टाः पञ्चा इति पित्रोक्तः पुत्र ईमे त इति ह प्रतीकानि मुखानि पञ्चानामुदाजहारोदाहृतवान् ॥ ३ ॥

श्वेतकेतोरभिमाननिवृत्तिद्योतनार्थं बहुवचनम् । राजन्यदत्तवसत्यनादरे हेतुमाह—कुमार इति । एवं किलेति राजपराभवालिङ्गकं पितृवचसो मृषात्वं द्योत्यते । अज्ञानाधीनं दुःखं तवासंभावितमिति सूचयति—सुमेध इति ॥ ३ ॥

स होवाच तथा नस्त्वं तात जानीथा यथा यदहं
किंच वेद सर्वमहं तत्तुभ्यमवोचं प्रेहि तु तत्र
प्रतीत्य ब्रह्मचर्यं वत्स्याव इति भवानेव गच्छत्विति
स आजगाम गौतमो यत्र प्रवाहणस्य जैवलेरास
तस्मा आसनमाहृत्योदकमाहारयांचकाराथ हास्मा अर्घ्यं चकार तꣳ होवाच वरं भगवते गौतमाय दद्म इति ॥ ४ ॥

स होवाच पिता पुत्रं क्रुद्धमुपशमयंस्तथा तेन प्रकारेण नोऽस्मांस्त्वं हे तात वत्स जानीथा गृह्णीथा यथा यदहं किंच विज्ञानजातं वेद सर्वं

---

१ क. °भिरेवोच । २ क. ख. ग. ङ. छ. °वोऽस्ये° । ३ क. ख. ङ. छ. झ. °ति । इ° । ग. घ. ज. °ति । एवमिमे । ४ ख. छ. इम इ° । ५ ख. च. ङ. ढ अर्घ । ६ क. ख. ग. ङ. च. छ. ढ. ङ- भव° ।

तत्तुभ्यमवोचमित्येव जानीथाः । कोऽन्यो मम प्रियतरोऽस्ति त्वत्तो यदर्थं रक्षिष्ये । अहमप्येतन्न जानामि यद्राज्ञा पृष्टम् । तस्मात्प्रेह्या-गच्छ तत्र प्रतीत्य गत्वा राज्ञि ब्रह्मचर्यं वत्स्यावो विद्यार्थमिति । स आह भवानेव गच्छत्विति नाहं तस्य मुखं निरीक्षितुमुत्सहे । स आ-जगाम गौतमो गोत्रतो गौतम आरुणिर्यत्र प्रवाहणस्य जैवलेरासाऽऽ-सनमास्थायिका षष्ठीद्वयं प्रथमांस्थान तस्मै गौतमायाऽऽगतायाऽऽसनम-नुरूपमाहृत्योदकं भृत्यैराहारयाचकार । अथ हास्मा अर्घ्यं पुरोधसा कृतवान्मन्त्रवन्मधुपर्कं च । कृत्वा चैवं पूजां तं होवाच वरं भगवते गौतमाय तुभ्यं दद्म इति गोश्वादिलक्षणम् ॥ ४ ॥

सत्यं किंचिदुक्तं किंचित्तु विज्ञानमन्यस्मै प्रियतमाय दातुं रक्षितमित्याश-ङ्क्याऽऽह—कोऽन्य इति । राज्ञा यत्पृष्टं तन्मया न विज्ञातं तथा च तस्मिन्वि-षये त्वया वञ्चितोऽस्मीत्याशङ्क्याऽऽह—अहमपीति । तर्हि तज्ज्ञानं कथं सा-ध्यतामित्याशङ्क्याऽऽह—तस्मादिति ॥ ४ ॥

स होवाच प्रतिज्ञातो म एष वरो यं तु कुमार-
स्यान्ते वाचमभाषथास्तं मे ब्रूहीति ॥ ५ ॥

स होवाच गौतमः प्रतिज्ञातो मे ममैष वरस्त्वयाऽस्यां प्रतिज्ञाय दृढी कुर्वात्मानं मां तु वाचं कुमारस्य मम पुत्रस्यान्ते समीपे वाच मभाषथाः प्रश्नरूपां तामेव मे ब्रूहि म एव नो वर इति ॥ ५ ॥

विवक्षितविद्यागौरवं विवक्षित्वाऽऽह—अस्यामिति । तदिति सामान्योक्त्या वरो निर्दिश्यते ॥ ५ ॥

स होवाच दैवेषु वै गौतम तद्वरेषु मानुषाणां
ब्रूहीति ॥ ६ ॥

स होवाच राजा दैवेषु वरेषु तद्वै गौतम यस्त्वं प्रार्थयसे मानुषा-णामन्यतमं प्रार्थय वरम् ॥ ६ ॥

॥ ६ ॥

---

१ घ. ण. °ष्ठी वा प्र° । २ ढ. °मार्यं त° । ३ ड. च. ढ. अर्घं । ४ क. ख. छ. °श्चित्तषु° । ढ. °श्चिद्विज्ञा° । ५ क. ख. छ. ढ. तत्त्वज्ञान । ६ घ ज ढ. °थाः पञ्चमं° । ७ ण. °ह । वत्स्याव इति ८ घ. ड. ढ. °म यं त्वं प्रा° । ९ झ. यत्त्वं प्र° ।

स होवाच विज्ञायते हास्ति हिरण्यस्यापात्तं गोअश्वानां दासीनां प्रवाराणां परिदानस्य मा नो भवान्बहोरनन्तस्यापर्यन्तस्याभ्यवदान्यो भूदिति वै स गौतम तीर्थेनेच्छासा इत्युपैम्यहं भवन्तमिति वाचा ह स्मैव पूर्व उपयन्ति स होपायनकीर्त्योवास ॥ ७ ॥

स होवाच गौतमो भवतोऽपि विज्ञायते ह ममास्ति सः । तेन प्रार्थितेन कृत्यं मम यं त्वं दित्ससि मानुषं वरम् । यस्मान्ममाप्यस्ति हिरण्यस्य प्रभूतस्यापात्तं प्राप्तं गोअश्वानामपात्तमस्तीति सर्वत्रानुषङ्गो दासीनां प्रवाराणां परिवाराणां परिधानस्य च । न च यन्मम वित्तमानं तत्त्वतः प्रार्थनीयं त्वया वा देयम् । प्रतिज्ञातश्च वरस्त्वया त्वमेव जानीषे यदत्र युक्तं प्रतिज्ञां रक्षणीया तवेति । मम पुनरयमभिप्रायो मा भून्नोऽस्मानभ्यस्मानेव केवलान्प्रति भवान्सर्वत्र वदान्यो भूत्वाऽवदान्यो मा भूत्कदर्यो मा भूदित्यर्थः । बहोः प्रभूतस्यानन्तस्यानन्तफलस्येत्येतत् । अपर्यन्तस्यापरिसमाप्तिकस्य पुत्रपौत्रादिगामिकस्येत्येतत् । ईदृशस्य वित्तस्य मां प्रत्येव केवलमदाता मा भूद्भवान् । न चान्यत्रादेयमस्ति भवतः । एवमुक्त आह—स त्वं वै हे गौतम तीर्थेन न्यायेन शास्त्रविहितेन विद्यां मत्त इच्छासा इच्छाम्याप्तुमित्युक्तो गौतम आह—उपैम्युपगच्छामि शिष्यत्वेनाहं भवन्तमिति । वाचा ह स्मैव किल पूर्वे ब्राह्मणाः क्षत्रियान्विद्यार्थिनः सन्तो वैश्यान्वा क्षत्रियान्वा वैश्यानापद्युपयन्ति शिष्यवृत्त्या ह्युपगच्छन्ति नोपायनशुश्रूषादिभिः । अतः स गौतमो होपायनकीर्त्योपगमनकीर्तनमात्रेणैवोवासोषितवान्नोपायनं चकार ॥ ७ ॥

ममास्ति स इति यदुक्तं तदुपपादयति—यस्मादित्यादिना । न च यन्ममेत्यत्र तस्मादिति पठितव्यम् । किं तर्हि मया कर्तव्यमित्याशङ्क्याऽऽह—प्रतिज्ञातश्चेति । यत्तवाभिप्रेतं तदहं न करोमीत्याशङ्क्याऽऽह—ममेति । मा भूदित्यन्वयं दर्श-

---

१ ख. घ. च. छ. ज. ड. गोश्वा° । २ व. च. ज. क्त ंता वि° । ३ क. च. मा. श्वा° । ४ घ. च. ज. °रिवा° । ५ घ. च ज. ढ. °स्य । न । ६घ. ज. °नं मया तत्रतः प्रा° । क. म. च. झ. ढ. °नं त्वत्तः । ७ घ. च. ज °ज्ञानं रक्षणीयमेवे° । ८ क. ङ. ख. ग. ङ. च. छ. ढ. चात्यन्तादे° । ९ क. ख. ग. ङ. च. छ. झ. ढ. इच्छस्वाऽऽप्तुं° । १० घ. ङ. च. छ. ज. झ. ढ नोपनय° । ११ क. घ. ङ. छ. झ. °नोपनय° । च. ढ. °नोपगमनं । १२ क. ख छ. ञ. ढ. °हं क ।

अन्नप्रतीकमादाय व्याचष्टे—नोऽस्मानिति। वदान्यो दानशीलो विभवे सत्यदाता कदर्य इति भेदः। परिशिष्टं भागं व्याकुर्वन्वाक्यार्थमाह—बहोरित्यादिना। यां प्रत्येवेति नियमस्य कृत्यं दर्शयति—न चेति। कोऽसौ न्यायस्तत्राऽऽह—शास्त्रेति। उपसदनवाक्यं शास्त्रमित्युच्यते। गौतमो राजानं प्रति शिष्यत्ववृत्तिं कुर्वाणः शास्त्रार्थविरोधमाचरतीत्याशङ्क्याऽऽह—वाचा होति। आपदि तदधिकाद्वा विद्याप्राप्त्यसंभवावस्थायामित्यर्थः। उपायनमुपगमनं पादोपसर्पणमिति यावत् ॥ ७ ॥

स होवाच तथा नस्त्वं गौतम माऽपराधास्तव च पितामहा यथेयं विद्येतः पूर्वं न कस्मिंश्चन ब्राह्मण उवास तां त्वहं तुभ्यं वक्ष्यामि को हि त्वैवं ब्रुवन्तमर्हति प्रत्याख्यातुमिति ॥ ८ ॥

एवं गौतमेनाऽऽषदन्तर उक्ते स होवाच राजा पीडितं मत्वा क्षामयंस्तथा नोऽस्मान्प्रति माऽपराधा अपराधं मा कार्षीरस्मदीयोऽपराधो न ग्रहीतव्य इत्यर्थः। तव च पितामहा अस्मत्पितामहेषु यथाऽपराधं न जगृहुस्तथा पितामहानां वृत्तमस्मास्वपि भवता रक्षणीयमित्यर्थः। यथेयं विद्या त्वया प्रार्थितेतस्त्वत्संप्रदानात्पूर्वं प्राङ्न कस्मिन्नपि ब्राह्मण उवासोषितवती तथा त्वमपि जानीषे सर्वदा क्षत्रियपरम्परयेयं विद्याऽऽगता सा स्थितिर्मयाऽपि रक्षणीया यदि शक्यत इत्युक्तं देवेषु गौतम तद्वरेषु मानुष्याणां ब्रूहीति न पुनस्तवादेयो वर इतीतः परं न शक्यते रक्षितुम्। तामपि विद्यामहं तुभ्यं वक्ष्यामि को ह्यन्योऽपि हि यस्मादेवं ब्रुवन्तं त्वामर्हति प्रत्याख्यातुं न वक्ष्यामीति। अहं पुनः कथं न वक्ष्ये तुभ्यमिति ॥ ८ ॥

विद्याराहित्यापेक्षयो निहीनशिष्यभावोपगतिरापदन्तरम्। तथाशब्दार्थमेव विशदयति—तव चेति। सन्तु पितामहा यथा तथा किमस्माकमित्याशङ्क्याऽऽह—पितामहानामिति। किमिति तर्हीयं विद्या झटिति मह्यं नोपदिश्यते तत्राऽऽह—न कस्मिन्निति। तर्हि भवता सा स्थितौ रक्ष्यतामहं तु यथागतं गमिष्यामीत्याशङ्क्याऽऽह—इतः परामिति। तवाहं शिष्योऽस्मीत्येवं ब्रुवन्तं

---

१ ख. छ. ढ °मुपाग°। २ ख. ङ. च. छ ढ °त्वा क्षमापयं°। ३ घ. ज. °र्थः। किंतु य°। ङ. °र्थः। किंत्वियं। ४ क. ख. ग घ. ङ. छ. ज. झ. कास्मिंश्चिदपि। ५ च. ढ. °दि रक्षितुं श। ६ च ढ. इत्यभिप्रायेणेत्यु°। ७ घ. ज. °पि य°। ८ ग. घ. ज. ढ. °वन्तन°। ९ घ ञ. ण. °याऽतिहीन°। १० घ, ण. °ह। कास्मिंश्चिदिति। ञ.

मत्तोऽन्योऽपि न वक्ष्यामीति यस्मान्न प्रत्याख्यातुमर्हति तस्मादहं पुनस्तुभ्यं कथं न वक्ष्ये किंतु वक्ष्याम्येव विद्यामित्युक्तमुपपादयति—को हीत्यादिना ॥ ८ ॥

असौ वै लोकोऽग्निर्गौतम तस्याऽऽदित्य समिद्-
रश्मयो धूमोऽहरर्चिर्दिशोऽङ्गारा अवान्तरदिशो
विस्फुलिङ्गास्तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जु-
ह्वति तस्या आहुत्यै सोमो राजा संभवति ॥९॥

असौ वै लोकोऽग्निर्गौतमेत्यादिचतुर्थः प्रश्नः प्राथम्येन निर्णीयते । क्रमभङ्गस्त्वेतन्निर्णयायत्तत्वादितरप्रश्ननिर्णयस्य । असौ द्यौर्लोकोऽग्निर्हे गौतम द्युलोकेऽग्निर्दृष्टिरनग्नौ विधीयते यथा योषित्पुरुषयोस्तस्य द्युलोकाग्नेरादित्य एव समित्समिन्धनात् । आदित्येन हि समिध्यतेऽसौ लोकः । रश्मयो धूमः समिध उत्थानसामान्यात् । आदित्याद्धि रश्मयो निर्गताः । समिधश्च धूमो लोक उत्तिष्ठति । अहरर्चिः प्रकाशसामान्यात् । दिशोऽङ्गारा उपशमसामान्यात् । अवान्तरदिशो विस्फुर्लिङ्गा विस्फुलिङ्गवद्विक्षेपात् । तस्मिन्नेतस्मिन्नेवंगुणविशिष्टे द्युलोकाग्नौ देवा इन्द्रादयः श्रद्धां जुह्वत्याहुतिद्रव्यस्थानीयां प्रक्षिपन्ति । तस्या आहुत्या आहुतेः सोमो राजा पितॄणां ब्राह्मणानां च संभवति । तत्र के देवाः कथं जुह्वति किंवा श्रद्धाख्यं हविरित्यत उक्तमस्माभिः संबन्धे । नत्वेवैनयोस्त्वमुत्क्रान्तिमित्यादिपदार्थषट्कनिर्णयार्थमग्निहोत्र उक्तम् । ते वा एते अग्निहोत्राहुती हुते सत्यावुत्क्रामतः । ते अन्तरिक्षमाविशतः । ते अन्तरिक्षमाहवनीयं कुर्वाते वायुं समिध मरीचीरेव शुक्रामाहुतिम् । ते अन्तरिक्षं तर्पयतः । ते तत उत्क्रामतः । ते दिवमाविशतः । ते दिवमाहवनीयं कुर्वाते आदित्यं समिधमित्येवमाद्युक्तम् ।

असावित्यादिना यातिथ्यामित्यादिचतुर्थप्रश्नस्य प्राथम्येन निर्णये क्रमभङ्गः स्यात्तत्र च कारणं वाच्यमित्याशङ्क्याऽऽह—क्रमभङ्गस्त्विति । मनुष्यजन्मास्थितिउत्पानां चतुर्थप्रश्ननिर्णयाधीनतया तस्य प्राधान्यात्प्राधान्ये सत्यर्थक्रममाश्रित्याविवक्षितस्य पाठक्रमस्य भङ्ग इत्यर्थः । इन्द्रादीनां कर्मानधिकारित्वाद्द्युलो-

---

१ क. ढ. °त्युप° । २ ख. ङ. छ. तथा । २ ख छ. °साम्यात् । ४ ख. ग. छ. झ. °हुतिं व्र° । ५ च. ढ. प्रातीक्षि° । ६ घ ज. या । ७ घ. ङ. ज. किंच । ८ क. ग. °वैतयो° । ९ ख. शुक्लामा° । १० घ. ज. भङ्गः । कु इ° ।

कस्य चाऽऽहवनीयत्वाप्रसिद्ध्या होमाधारत्वायोगात्पत्ययस्य च श्रद्धार्थो होम्यत्वानुपपत्तेस्तस्मिन्नित्यादि वाक्यमयुक्तमिति शङ्कते—तत्रेति । होमकर्म सप्तम्यर्थः । अस्य ब्राह्मणस्य संबन्धमन्थे समाधानमस्य चोद्यस्यास्माभिरुक्तमित्याह—अत इति । तदेव दर्शनुमग्निहोत्रप्रकरणे वृत्तं स्मारयति—नात्विति । किं तदुक्तमिति चेत्तदाह—ते वा इति । आहुत्योः स्वतन्त्रयोरुत्क्रान्त्यादि कथमित्याशङ्क्याऽऽह—तत्रेति ।

तत्राग्निहोत्राहुती समाधने एवोत्क्रामतः । यथेह यैः साधनैर्विशिष्टं ये ज्ञायते आहवनीयाग्निमभिदधूमाङ्गारविस्फुलिङ्गाहुतिद्रव्यैस्ते तथैवोत्क्रामतोऽस्माल्लोकादमुं लोकम् । तत्राग्निराग्नित्वेन समित्साम्नित्वेन धूमो धूमत्वेनाङ्गारा अङ्गारत्वेन विस्फुलिङ्गा विस्फुलिङ्गत्वेनाऽऽहुतिद्रव्यमपि पयआद्याहुतिद्रव्यत्वेनैव सर्गादावव्याकृतावस्थायामपि परेण सूक्ष्मेणाऽऽत्मना व्यवतिष्ठते । तद्विद्यमानमेव ससाधनमग्निहोत्रलक्षणं कर्मापूर्वेणाऽऽत्मना व्यवस्थितं सत्तत्पुनरुत्पादयांकरणकाले तथैवान्तरिक्षादीनामाहवनीयाद्यग्न्यादिभावं कुर्वद्विपरिगमते । तथैवेदानीमप्यग्निहोत्राख्यं कर्म ।

यजमानस्य मृतिकालः सप्तम्यर्थः । ससाधनयोरेव तयोरुत्क्रान्तिर्न स्वतन्त्रयोरेवेत्येतदुपपादयति—यथेत्यादिना । इहेति जीवदवस्थोच्यते । नष्टानामग्न्यादीनामव्याकृतभावापन्नत्वेनाविशेषप्रसङ्गान्न तैः सहाऽऽहुत्योरुत्क्रान्त्यादिसिद्धिरित्याशङ्क्याऽऽह—तत्राग्निरिति । नाशादूर्ध्वमपि प्रातिस्विकशक्तिरूपेणाग्न्यादिरेवतिष्ठते तथा चाविशेषप्रसङ्गाभावादाहुत्योः ससाधनयोरेवोत्क्रान्त्यादिसिद्धिरित्यर्थः । यथोक्तयोराहुत्योरुत्क्रान्त्यादिसमर्थनेनाग्निहोत्राद्यपूर्वस्य जगदारम्भकत्वमुक्तं भवतीत्याह—तद्विद्यमानमिति । विद्यमानमेव विशदयति—अपूर्वेणेति । अथ यथोदितया विधया कथमपि पूर्वकल्पीयं कर्म प्रलयदशायामव्याकृतात्मना स्थितं पुनर्जगदारभतां तथाऽपीदानींतनमग्निहोत्रादिकं कर्म कथं जगदारम्भकं भविष्यतीत्याशङ्क्याऽऽह—तथैवेति । विगतमारम्भकं तच्छक्तिमत्त्वात्संप्रतिपन्नवदिति भावः ।

एवमग्निहोत्राद्यत्यपूर्वविपरिणामात्मकं जगत्सर्वमित्याहुत्योरेव स्तुत्यर्थत्वेनोत्क्रान्त्याद्या लोकं प्रत्युत्थायितान्ताः षट् पदार्थाः कर्मभक्करणेऽधस्तान्निर्णीताः । इह तु कर्तुः कर्मविवक्षायां द्युलोकाग्न्याद्या-

---

१ क. ख. छ ढ °या होम्य° । २ ख. ग. छ. °ष्टे जायते । ३ घ ङ. ये ते । ४ ख. ग. छ झ. ढ °आज्याहु° । ५ ख. छ. सत्पु° । ६ घ. ञ. ण. °योरित्ये° । ७ घ. ञ, ण. °दि व्यव° । ८ क. ख. छ. ढ. °दि समर्थ्य तेना° । ९ ख. छ. ढ. °ति विधित्सिभा° । १० घ. ज. °काद्या° ।

ष्य पञ्चाग्निदर्शनमुत्तरमार्गप्रतिपत्तिसाधनं विशिष्टकर्मफलोपभोगाय विधित्सितमिति द्युलोकाग्न्यादिदर्शनं प्रस्तूयते। तत्र य आध्यात्मिकाः प्राणा इहाग्निहोत्रस्य होतारस्त एवाऽऽधिदैविकत्वेन परिणताः सन्त इन्द्रशब्दवो भवन्ति त एव तत्र होतारो द्युलोकाग्नौ। ते चेहाग्निहोत्रस्य फलभागायाग्निहोत्रं हुतवन्तः। त एव फलपरिणामकालेऽपि तत्फलभोक्तृत्वात्तत्र तत्र होतृत्वं प्रतिपद्यन्ते तथा तथा विपरिणमयाना देवशब्दवाच्याः सन्तः। अत्र च यत्पयोद्रव्यमग्निहोत्रकर्माश्रयभूतमिहाऽऽहवनीये प्रक्षिप्तमग्निना भक्षितमदृष्टेन सूक्ष्मेण रूपेण विपरिणतं सह कर्त्रा यजमानेनामुं लोकं धूमादिक्रमेणान्तरिक्षाद्द्युलोकमाविशति। ताः सूक्ष्मा आप आहुतिकार्यभूता अग्निहोत्रसमवायिन्यः कर्तृसहिताः श्रद्धाशब्दवाच्याः सोमलोके कर्तुः शरीरान्तरारम्भाय द्युलोकं प्रविशन्त्यो हूयन्त इत्युच्यन्ते तास्तत्र द्युलोकं प्रविश्य सोममण्डले कर्तुः शरीरमारभन्ते। तदेतदुच्यते देवाः श्रद्धां जुह्वति तस्या आहुत्यै सोमो राजा संभवतीति। " श्रद्धा वा आपः " इति श्रुतेः।

अग्निहोत्रप्रकरणस्यार्थं संगृहीतमुपसंहरति—एवमिति। उक्तमुपजीव्य पञ्चत्रात्मनप्रवृत्तिप्रकारं दर्शयति—इह त्विति। उत्तरमार्गप्रतिपत्तिसाधनं विधित्सितमिति संबन्धः। किमित्युत्तरमार्गप्रतिपत्तिस्तत्राऽऽह—विशिष्टेति। त्रात्मनप्रवृत्तिमभिधायासौ वै लोकोऽग्निरित्यादिवाक्यप्रवृत्तिप्रकारमाह—इति द्युलोकेति। इत्थं त्रात्मने स्थिते सतीत्येतत्। भवत्वेवं तथाऽपि के देवा इति प्रश्नस्य किमुत्तरं तत्राऽऽह—तत्रेति। उक्तनीत्या पञ्चाग्निदर्शने प्रस्तुते सतीत्येतत्। इहेति व्यवहारभूमिग्रहः। कथं तेषां तत्र होतृत्वं तदाह—ते चेति। तथाऽपि कथं द्युलोकेऽग्नौ तेषां होतृत्वं तदाह—त एवेति। तत्फलभोक्तृत्वादित्यत्र तच्छब्दोऽग्निहोत्रादिकर्मविषयस्तद्भोक्तृत्वं च प्राणानां जीवोपाधित्वादवधेयम्। तथा तथा द्युपर्जन्यादिसंबन्धयोग्याकारेणेति यावत्। के देवा इति प्रश्नो निर्णीतः संप्रत्यवशिष्टं प्रश्नद्वयं निर्णेतुमाह—अत्र चेति। जीवदवस्थायामिति यावत्। सह कर्त्रेत्यत्र तच्छब्दो द्रष्टव्यः। अमुं लोकमाविशतीति संबन्धः। आवेशप्रकारमाह—धूमादीति। कथमेतावता किं पुनः श्रद्धारूपं हविरिति प्रश्नो निर्णीत

१ ख. म. ङ. च. छ. झ. ट. °न्यादेर्द्यु°। २ घ. ज. °णमन्तः स°। ३ ग. °भोक्तृत्वं। ४ ग. घ. ज. °रार°। ५ ख. ग. घ. ङ. छ. झ. ञ. °च्यते। ता°। ६ च. °हुता द्यु°। ७ घ. ञ. ण. 'क्तरीत्या। ८ घ. ञ. ण. °लोकाग्नौ। ९ घ. ञ. ण प्रकटयति। द्यु°।

स्तत्राऽऽह ताः सूक्ष्मा इति। तथाऽपि कथं जुह्वतीति प्रश्नस्य कथं निर्णयस्तत्राऽऽह—सोमलोक इति। तथाऽपि तस्या आहुतेः सोमो राजा संभवतीति कथमुच्यते तत्राऽऽह—तास्तत्रेति। निर्णीतेऽर्थे श्रुतिमवतारयति—तदेतदिति। कथं पुनरापः श्रद्धाशब्दवाच्या न हि लोके श्रद्धाशब्दं तासु प्रयुञ्जते तत्राऽऽह—श्रद्धेति।

वेत्थ यतिथ्यामाहुत्यां हुतायामापः पुरुषवाचो भूत्वा समुत्थाय वदन्तीति प्रश्नस्तस्य च निर्णयविषयेऽसौ वै लोकोऽग्निरिति प्रस्तुतम्। तस्मादापः कर्मसमवायिन्यः कर्तुः शरीरारम्भिकाः श्रद्धाशब्दवाच्या इति निश्चीयते। भूयस्त्वादापः पुरुषवाच इति व्यपदेशो न त्वितराणि भूतानि न सन्तीति कर्मप्रयुक्तश्च शरीरारम्भः। कर्म चाप्सु समवायि। ततश्चापां प्राधान्यं शरीरकर्तृत्वे। तेन चाऽऽपः पुरुषवाच इति व्यपदेशः। कर्मकृतो हि जन्मारम्भः सर्वत्र। तत्र यद्यप्यग्निहोत्राहुतिस्तुतिद्वारेणोत्क्रान्त्यादयः प्रस्तुताः षट्पदार्था अग्निहोत्रे तथाऽपि वैदिकानि सर्वाण्येव कर्माण्यग्निहोत्रप्रभृतीनि लक्ष्यन्ते। दाराग्निसंबद्धं हि पाङ्क्तं कर्म प्रस्तुत्योक्तम्—कर्मणा पितृलोक इति। वक्ष्यति च—अथ ये यज्ञेन दानेन तपसा लोकाञ्जयन्तीति ॥ ९ ॥

उपक्रमवशादप्यापोऽत्र श्रद्धाशब्दवाच्या इत्याह—वेत्थेति। अपामेव पुरुषशब्दवाच्यानां शरीरारम्भकत्वान्न भूतान्तराणामिति कृत्वा तस्य तच्चभूतारब्धत्वाभ्युपगमभङ्गः स्यादिति चेन्नेत्याह—भूयस्त्वादिति। अपां पुरुषशब्दवाच्यत्वे हेत्वन्तरमाह—कर्मेति। अथाकर्मप्रयुक्तमपि प्रकृष्टं जन्मास्ति तत्कथमपां सर्वत्र पुरुषशब्दवाच्यत्वं तत्राऽऽह—कर्मकृतो हीति। अन्यथा तत्र तत्र सुखदुःखभोगोपभोगासंभवादिति भावः। यदि कर्मापूर्वशब्दवाच्यं भूतसूक्ष्मं सर्वत्र शरीरारम्भकं कथं तर्हि पूर्वमग्निहोत्राहुत्योरेव व्यक्तजगदारम्भकत्वमुक्तं तत्राऽऽह—तत्रेति। लक्ष्यन्तेऽग्निहोत्रहुत्योरिति शेषः। लक्षणायां पूर्वोत्तरवाक्ययोर्गमकत्वमाह—दाराग्नीति ॥ ९ ॥

पर्जन्यो वा अग्निर्गौतम तस्य संवत्सर एव समिदभ्राणि धूमो विद्युदर्चिरशनिरङ्गारा ह्रादुनयो विस्फुलिङ्गास्तस्मिन्नेतस्मिन्नग्नौ देवाः सोमं राजानं

---

१ घ. च. ज. °भस्य। २ क. घ. च. ज. झ. °स्य मि°। ३ च. ढ. °म्यान्तरार°। ४ ङ. च, झ. ढ. °न्तेऽग्निहोत्राहुत्या। दा°। ५ क. चं. ढ. °क्तं हि। ६ ख. व्यक्तं जु°

जुह्वति तस्या आहुत्यै वृष्टिः संभवति ॥ १० ॥

पर्जन्यो वा अग्निर्गौतम द्वितीय आहुत्याधार आहुत्योरावृत्तिक्रमेण। पर्जन्यो नाम वृष्ट्युपकरणाभिमानी देवतात्मा। तस्य संवत्सर एव समित्। संवत्सरेण हि शरदादिभिर्ग्रीष्मान्तैः स्वावयवैर्विपरिवर्तमानेन पर्जन्योऽग्निर्दीप्यते। अभ्राणि धूमः। धूमप्रभवत्वाद्धूमवदुपलक्ष्यत्वाद्वा। विद्युदर्चिः। प्रकाशसामान्यात्। अशनिरङ्गाराः। उपशान्तकाठिन्यसामान्याभ्याम्। ह्रादुनयो ह्लादुनयः स्तनयित्नुशब्दा विस्फुलिङ्गाः। विक्षेपानेकत्वसामान्यात्। तस्मिन्नेतस्मिन्नित्याहुत्यधिकरणनिर्देशः। देवा इति त एव होतारः सोमं राजानं जुह्वति। योऽसौ द्युलोकाग्नौ श्रद्धायां हुतायामभिनिर्वृत्तः सोमः स द्वितीये पर्जन्याग्नौ हूयते। तस्याश्च सोमाहुतेर्वृष्टिः संभवति ॥ १० ॥

आद्यमाहुत्याधारमेवं निरूप्याऽऽहुत्याधारान्तराणि क्रमेण निरूपयति—पर्जन्यो वा अग्निरित्यादिना। कुतोऽस्य द्वितीयत्वमिति शङ्कित्वोक्तम्—आहुत्योरिति। अस्ति खल्वभ्राणां धूमप्रभवत्वे गाथा 'धूमज्योतिःसलिलमरुतां संनिपातः क्वमेघः' इति ॥ १० ॥

अयं वै लोकोऽग्निर्गौतम तस्य पृथिव्येव समिद-
ग्निर्धूमो रात्रिरर्चिश्चन्द्रमा अङ्गारा नक्षत्राणि
विस्फुलिङ्गास्तस्मिन्नेतस्मिन्नग्नौ देवा वृष्टिं जुह्व-
ति तस्या आहुत्या अन्नं संभवति ॥ ११ ॥

अयं वै लोकोऽग्निर्गौतम। अयं लोक इति प्राणिजन्मोपभोगाश्रयः क्रियाकारकफलविशिष्टः स तृतीयोऽग्निः। तस्याग्नेः पृथिव्येव समित्। पृथिव्या ह्ययं लोकोऽनेकप्राण्युपभोगसंपन्नया समिध्यते। अग्निर्धूमः। पृथिव्याश्रयोत्थानसामान्यात्। पार्थिवं हीन्धनद्रव्यमाश्रित्याग्निरुत्तिष्ठति। यथा समिदाश्रयेण धूमः। रात्रिरर्चिः। समित्संबन्धप्रभवसामान्यात्। अग्नेः समित्संबन्धेन ह्यर्चिः संभवति। तथा पृथिवीसमित्संबन्धेन शार्वरी। पृथिवीछायां हि शार्वरं तम आचक्षते। चन्द्रमा अङ्गाराः। तत्प्रभवत्वसामान्यात्। अर्चिषो ह्यङ्गाराः प्रभ-

१ च. झ. ढ. या समिधा स[ं]।

वन्ति तथा रात्रौ चन्द्रमाः । उपशान्तत्वसामान्याद्वा । नक्षत्राणि विस्फुलिङ्गाः । विस्फुलिङ्गवद्विक्षेपसामान्यात् । तस्मिन्नेतस्मिन्नित्यादि पूर्ववत् । वृष्टिं जुह्वति तस्या आहुतेरन्नं संभवति । वृष्टिप्रभवत्वस्य प्रसिद्धत्वाद्व्रीहियवादेरन्नस्य ॥ ११ ॥

एतल्लोकपृथिव्योर्देहदेहिभावेन भेद इत्याह—पृथिवीछायां हीति । 'एतानि हि चन्द्रं रात्रेस्तमसो मृत्योर्विभ्यतमत्यपारयन्' इति श्रुते रात्रेस्तमस्त्वावगमात्तस्य च मृत्युर्वै तमश्छाया मृत्युमेव तत्तमश्छाया तरतीति मृछायात्वं श्रुतम् । तमो राहुस्थानं तच्च मृछायेति हि प्रसिद्धम्—

"उद्धृत्य पृथिवीछायां निर्मितं मण्डलाकृति ।
स्वर्भानोस्तु बृहत्स्थानं तृतीयं यत्तमोमयम् " ॥

इति स्मृतेरित्यर्थः । सोमचन्द्रमसोराश्रयाश्रयिभावेन भेदः ॥ ११ ॥

पुरुषो वा अग्निर्गौतम तस्य व्यात्तमेव समित्प्राणो धूमो वागर्चिश्चक्षुरङ्गाराः श्रोत्रं विस्फुलिङ्गास्तस्मिन्नेतस्मिन्नग्नौ देवा अन्नं जुह्वति तस्या आहुत्यै रेतः संभवति ॥ १२ ॥

पुरुषो वा अग्निर्गौतम प्रसिद्धः शिरःपाण्यादिमान्पुरुषश्चतुर्थोऽग्निस्तस्य व्यात्तं विवृतं मुखं समित् । विवृतेन हि मुखेन दीप्यते पुरुषो वचनस्वाध्यायादौ । यथा समिधोऽग्नेः प्राणो धूमस्तदुत्थानसामान्यात् । मुखाद्धि प्राण उत्तिष्ठति । वाक्शब्दोऽर्चिर्व्यञ्जकत्वसामान्यात् । अर्चिश्च व्यञ्जकम् । तथा वाक्शब्दोऽभिधेयव्यञ्जकः । चक्षुरङ्गारा उपशमसामान्यात्प्रकाशाश्रयत्वाद्वा । श्रोत्रं विस्फुलिङ्गा विक्षेपसामान्यात् । तस्मिन्नग्नं जुह्वति । ननु नैव देवा अन्नमिह जुह्वतो दृश्यन्ते । नैष दोषः । प्राणानां देवत्वोपपत्तेः । अधिदैवमिन्द्रादयो देवास्त एवाध्यात्मं प्राणास्ते चान्नस्य पुरुषे प्रक्षेप्तारः । तस्या आहुते रेतः संभवति । अन्नपरिणामो हि रेतः ॥ १२ ॥

योग्यानुलब्धिविरोधमाशङ्क्याह—नन्विति । इहेति पुरुषाग्निनिर्देशः । शङ्कितं विरोधं निराकरोति—नैष दोष इति । उपपत्तिमेव दर्शयति—अधिदैवमिति । ॥ १२ ॥

योषा वा अग्निर्गौतम तस्या उपस्थ एव समिल्लोमानि धूमो योनिरर्चिर्यदन्तः करोति तेऽङ्गारा

१ क. °मन्तराय° । ब. छ. ढ. °मत्यराय° । २ क. ख. छ. ढ. °याप्नुम् ।

अभिनन्दा विस्फुलिङ्गास्तस्मिन्नेतस्मिन्नग्नौ देवा
रेतो जुह्वति तस्या आहुत्यै पुरुषः संभवति स
जीवति यावज्जीवत्यथ यदा म्रियते ॥ १२ ॥

योषा वा अग्निर्गौतम । योषेति स्त्री पञ्चमी होमाधिकरणोऽग्निस्तस्या उपस्थ एव समित् । तेन हि सा समिध्यते । लोमानि धूमस्तदुत्थानसामान्यात् । योनिरर्चिर्वर्णसामान्यात् । यदन्तः करोति तेऽङ्गारा अन्तः करणं मैथुनव्यापारस्तेऽङ्गारा वीर्योपशमहेतुत्वसामान्यात् । वीर्यादुपशमकारणं मैथुनम् । तथाऽङ्गारभावोऽग्नेरुपशमकारणम् । अभिनन्दाः सुखलवाः क्षुद्रत्वसामान्याद्विस्फुलिङ्गाः । तस्मिन्रेतो जुह्वति । तस्या आहुतेः पुरुषः संभवति । एवं द्युपर्जन्यायंलोकपुरुषयोषाग्निषु क्रमेण हूयमानाः श्रद्धासोमवृष्ट्यन्नरेतोभावेन स्थूलतारतम्यक्रमापद्यमानाः श्रद्धाशब्दवाच्या आपः पुरुषशब्दमारभन्ते । यः प्रश्नश्चतुर्थो वेत्थ यतिथ्यामाहुत्यां हुतायामापः पुरुषवाचो भूत्वा समुत्थाय वदन्ती३ इति म एष निर्णीतः । पञ्चम्यामाहुतौ योषाग्नौ हुतायां रेतोभूता आपः पुरुषवाचो भवन्तीति । स पुरुष एवं क्रमेण जातो जीवति । कियन्तं कालमिति । उच्यते-यावज्जीवति यावदस्मिञ्छरीरे स्थितिनिमित्तं कर्म विद्यते तावदित्यर्थः । अथ तत्क्षये यदा यस्मिन्काले म्रियते ॥ १३ ॥

तस्या आहुत्यै पुरुषः संभवतीति वाक्यं व्याकरोति-एवमिति । पञ्चाग्निदर्शनस्य चतुर्थप्रश्ननिर्णायकत्वेन प्रकृतोपयोगं दर्शयति-यः प्रश्न इति । निर्णयप्रकारमनुवदति-पञ्चम्यामिति । यद्योक्तनीत्या जाते देहे कथं पुरुषस्य जीवनकालो नियम्यते तत्राऽऽह-स पुरुष इति । पञ्चाग्निक्रमेण जातोऽग्निरहं तेनाग्न्यात्मेति ध्यानसिद्धये षष्ठमग्निमस्याहुत्यधिकरणं प्रस्तौति-अथेति । जीवनिमित्तकर्मविषयस्तच्छब्दः ॥ १३ ॥

अथैनमग्नये हरन्ति तस्याग्निरेवाग्निर्भवति समि-
त्समिद्धूमो धूमोऽर्चिरर्चिरङ्गारा विस्फुलिङ्गा

१ ख. छ °भाषाद्य° । २ ब. ङ. ञ. झ. °शरीरमा° । ३ ग. °ब्दवाच्यं शरीरमा° । ४ ञ. ण. °कृरीत्या । ५ ख. छ. °ण ज्ञातो° ।

विस्फुलिङ्गास्तस्मिन्नेतस्मिन्नग्नौ देवाः पुरुषं जुह्वति
तस्या आहुत्यै पुरुषो भास्वरवर्णः संभवति ॥ १४ ॥

अथ तदेनं मृतमग्नयेऽन्वर्थमेवाग्न्याहुत्यै हरति ऋत्विजस्तस्याऽऽहुतिभूतस्य प्रसिद्धोऽग्निरेव होमाधिकरणं न परिकल्प्योऽग्निः । प्रसिद्धेव समित्समिद्धूमो धूमोऽर्चिरर्चिरङ्गारा अङ्गारा विस्फुलिङ्गा विस्फुलिङ्गा यथाप्रसिद्धमेव सर्वमित्यर्थः । तस्मिन्पुरुषमन्त्याहुतिं जुह्वति तस्या आहुत्या आहुतेः पुरुषो भास्वरवर्णोऽतिशयदीप्तिमान्निषेकादिभिरन्त्याहुत्यन्तैः कर्मभिः संस्कृतत्वात्संभवति निष्पद्यते ॥१४॥

वक्ष्यमाणकीटादिदेहव्यावृत्तये भास्वरवर्णविशेषणम् । दीप्त्यतिशयवत्त्वे हेतुमाह—निषेकादिभिरिति ॥ १४ ॥

ते य एवमेतद्विदुर्ये चामी अरण्ये श्रद्धा सत्यमुपासते तेऽर्चिरभिसंभवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षण्मासानुदङ्ङादित्य एति मासेभ्यो देवलोकं देवलोकादादित्यमादित्याद्वैद्युतं वैद्युतान्पुरुषो मानस एत्य ब्रह्मलोकान्गमयति ते तेषु ब्रह्मलोकेषु पराः परावतो वसन्ति तेषां न पुनरावृत्तिः ॥ १५ ॥

इदानीं प्रथमप्रश्ननिराकरणार्थमाह—ते । के । य एवं यथोक्तं पञ्चाग्निदर्शनमेतद्विदुः । एवंशब्दादग्निसमिद्धूमार्चिरङ्गारविस्फुलिङ्गश्रद्धादिविशिष्टाः पञ्चाग्नयो निर्दिष्टास्तानेवमेतान्पञ्चाग्नीन्वेदुरित्यर्थः । नन्वग्निहोत्राहुतिदर्शनविषयमेवैतद्दर्शनम् । तत्र ह्युक्तमुत्क्रान्त्यादिपदार्थषट्कनिर्णये दिवमेवाऽऽहवनीयं कुर्वाते इत्यादि । इहाप्यमुष्य लोकस्याग्नित्वमादित्यस्य च समित्त्वमित्यादि बहु साम्यम् । तस्मात्तच्छेषमेवैतद्दर्शनमिति । न, यतिष्यामिति प्रश्नप्रतिवचनपरिग्रहात् । यतिष्यामित्यस्य प्रश्नस्य प्रतिवचनस्य यावदेव परिग्रहस्तावदेवंशब्देन पराम्रष्टुं युक्तम् । अन्यथा प्रश्नानर्थक्या-

---

१ घ. ज. °हुतेः । २ ख. घ. °यत्वे हे° । ३ ख. छ. °नेवैता° । ४ झ ञ्य च या° ।

निर्ज्ञातत्वाच्च संख्याया अग्नय एव वक्तव्याः। अथ निर्ज्ञातमप्यनू-[1]द्यते। यथाप्राप्तस्यैवानुवदनं युक्तं न त्वसौ लोकोऽग्निरिति। अथो-पलक्षणार्थः। तथाऽप्याद्येनान्त्येन चोपलक्षणं युक्तम्। श्रुत्यन्तराच्च। समाने हि प्रकरणे छान्दोग्यश्रुतौ पञ्चाग्नीन्वेदेति पञ्चसंख्याया एवो-पादानादग्निहोत्रशेषमेतत्पञ्चाग्निदर्शनम्। यत्त्वग्निसमिदादिसामा-न्यं तदग्निहोत्रस्तुत्यर्थमित्यवोचाम। तस्मान्नोत्क्रान्त्यादिपदार्थषट्क-परिज्ञानादर्चिरादिप्रतिपत्तिः। एवमिति प्रकृतोपादानेनार्चिरादिप्र-तिपत्तिविधानात्।

पञ्चाग्निविदो गतिं विवक्षुरुत्तरग्रन्थमवतारयति—इदानीमिति। ये विदुस्तेऽ-र्चिषमभिसंभवन्तीति संबन्धः। एवं शब्दस्य प्रकृतपञ्चाग्निपरामर्शित्वं स्फुटीकर्तुं चोदयति—नन्विति। एवमेतद्विदुरिति श्रुतमेतद्दर्शनमित्युक्तं तदेवेदमिति प्रत्यभि-ज्ञापकं दर्शयति—तत्र हीति। आदिपदमादित्यं समिधमित्यादि संग्रहीतुं रश्मीनां धूमत्वमह्नोऽर्चिष्ट्वमित्यादि ग्रहीतुं द्वितीयमादिपदम्। प्रत्यभिज्ञाफलमाह—तस्मा-दिति। प्रश्नप्रतिवचनविषयस्यैव प्रकृतस्येवंशब्देन परामर्शान्न षट्प्रश्नीयं दर्शन-मिह परामृष्टमिति परिहरति—नेत्यादिना। संगृहीतं परिहारं विवृणोति—यति-ष्यामित्यस्येति। व्यधिकरणे षष्ठ्यौ। यावदेव वस्तुपरिग्रहो विषय इत्यर्थः। षट्प्रश्नीयमेव व्यवहितं दर्शनमत्र परामृष्टं चेत्तदा यतिष्यामिति प्रश्नो व्यर्थः स्यात्। षट्प्रश्नीनिर्णीतदर्शनशेषभूतदर्शनस्य प्रश्नादृते प्रतिवचनसंभवादित्याह—अन्यथेति। किंच पूर्वस्मिन्ग्रन्थे प्रचयशिष्टतया पञ्चत्वसंख्याया निश्चितत्वात्त-दवच्छिन्नाः सौपादिकाग्नय एवात्रैवंशब्देन परामर्तुमुचिता इत्याह—निर्ज्ञातत्वा-च्चेति। अग्निहोत्रप्रकरणे निर्ज्ञातमेवाग्न्यादि पूर्वग्रन्थेऽप्यनूद्यते। तथा चाग्नि-होत्रदर्शनमव्यवहितमेवंशब्देन किं न परामृष्टमिति शङ्कते—अथेति। अग्निहोत्र-दर्शनं पूर्वग्रन्थेऽनूद्यते चेत्तत्प्रकरणे प्राप्तं रूपमनतिक्रम्यैवान्तरिक्षादेरप्यत्रानुवदनं स्यान्न तु तद्विपरीत्येनानुवदन युक्तम्। अनुवादस्य पुरोवादसापेक्षत्वात्। न चा-न्तरिक्षाद्यनूद्यते तस्मादेवंशब्दो नाग्निहोत्रपरामर्शीति परिहरति—यथाप्राप्तस्ये-ति। द्युलोकादिवादस्यान्तरिक्षाद्युपलक्षणार्थत्वात्पूर्वस्यानुवादत्वसंभवादेवंशब्दस्या-ग्निहोत्रविषयत्वासिद्धिरिति चोदयति—अथेति। प्रापकाभावादुपलक्षण-पक्षायोगेऽप्यङ्गीकृत्य पञ्चाग्निनिर्देशवैयर्थ्येन दूषयति—तथाऽपीति।

---

१ क. ग. घ ज. °नूद्येत। य°। २ क. छ ढ. ण. प्रव°। ३ क. °न्थे पर्यवशि°। ण. °म्थे प्राचुर्यशि°। ४ क. ख. ढ. °संख्यया। ५ ख. ग. छ. ङ सापादि°। ६ घ, ञ. ट °न शक्यं व्यवस्थापि°।

इतश्च स्वतन्त्रमेव पञ्चाग्निदर्शनमेवंशब्दपरामृष्टमित्याह–श्रुत्यन्तराच्चेति। समिदादिसाम्यदर्शनादग्निहोत्रदर्शनशेषभूतमेवैतद्दर्शनमित्युक्तमनूद्य दूषयति––यास्त्वित्यादिना। अथोचामाग्निहोत्रस्तुत्यर्थत्वादग्निहोत्रस्यैव कार्यमित्युक्तमित्यनेति शेषः। एवंशब्देनाग्निहोत्रपरामर्शासंभवे फलितमाह–तस्मादिति। तच्छब्दार्थमेव स्फुटयति–एवमितीति। प्रकृतं पञ्चाग्निदर्शनं तच्च स्वतन्त्रमित्युक्तं तद्वतामर्चिरादिप्रतिपत्तिर्न केवलकर्मिणामित्यर्थः।

के पुनस्ते य एवं विदुर्गृहस्था एव। ननु तेषां यज्ञादिसाधनेन धूमादिप्रतिपत्तिर्विधित्सिता। न अनेवंविदामपि गृहस्थानां यज्ञादिसाधनोपपत्तेः। भिक्षुवानप्रस्थयोश्चारण्यसंबन्धेन ग्रहणात्। गृहस्थकर्मसंबद्धत्वाच्च पञ्चाग्निदर्शनस्य। अतो नापि ब्रह्मचारिण एवं विदुरिति गृह्यन्ते। तेषां तूत्तरे पथि प्रवेशः स्मृतिप्रामाण्यात्–

"अष्टाशीतिसहस्राणामृषीणामूर्ध्वरेतसाम्।
उत्तरेणार्यम्णः पन्थास्तेऽमृतत्वं हि भेजिरे" इति।

तस्माद्ये गृहस्था एवमग्निजोऽहमग्न्यपत्यमित्येवं क्रमेणाग्निभ्यो जातोऽग्निरूप इत्येवं ये विदुस्ते च ये चामी अरण्ये वानप्रस्थाः परिव्राजकाश्चारण्यनित्याः श्रद्धां श्रद्धायुक्ताः सन्तः सत्यं ब्रह्म हिरण्यगर्भात्मानमुपासते न पुनः श्रद्धां चोपासते ते सर्वेऽर्चिरभिसंभवन्ति।

प्रश्नपूर्वकं वेदितृविशेषं निर्दिशति–के पुनरित्यादिना। गृहस्थानां यज्ञादिना पितृयाणप्रतिपत्तेर्वक्ष्यमाणत्वान्न देवयाने पथि प्रवेशोऽस्तीति शङ्कते––नन्विति। पञ्चाग्निविदां गृहस्थानां देवयाने पथ्यधिकारस्तद्रहितानां तु तेषामेव यज्ञादिना पितृयाणप्राप्तिरिति विभागोपपत्तेर्न वाक्यशेषविरोधोऽस्तीति समाधत्ते–नेत्यादिना। एवं विदुरिति सामान्यवचनात्परिव्राजकादेरप्यत्र ग्रहणं स्यादिति चेन्नेत्याह–भिक्षुवानप्रस्थयोश्चेति। विधान्तरेण तयोरुत्तरमार्गे प्रवेशान्न पञ्चाग्निविषयत्वेन ग्रहणं पुनरुक्तेरित्यर्थः। गृहस्थानामेव पञ्चाग्निविदां तत्र ग्रहणमित्यत्र हेत्वन्तरमाह–गृहस्थेति। ब्रह्मचारिणां तर्हीह ग्रहणं भविष्यति नेत्याह–अत इति। पञ्चाग्निदर्शनस्य गृहस्थकर्मसंबन्धादेवेत्येतत्। कथं तर्हि नैष्ठिकब्रह्मचारिणां देवयाने पथि प्रवेशस्तत्राऽऽह–तेषां त्विति। अर्यम्णः संबन्धी यः पन्थास्तमासाद्य तेनोत्तरेण पथा ते यथोक्तसंख्या ऋषयः सापेक्षममृतत्वं प्राप्ता इति स्मृत्यर्थः। आश्रमान्तराणां पञ्चाग्निविषयत्वेनाग्रहणे फलितमाह–तस्मादिति। अग्निजत्वे फलितमाह––अग्न्यपत्यमिति।

---

१ च. ज. झ. ढ. °बन्धत्वा°। २ क. निष्ठाः श्र°। ३ घ. झ. ण. °वित्त्वेन। ४ ज. °वित्त्वेना°।

अग्निजत्वं साधयति—एवमिति । अग्न्यपत्यत्वे किं स्यात्तदाह—अग्नीति । इत्येवं ये गृहस्था विदुस्ते चेति योजना । अरण्यं स्त्रीजनासंकीर्णो देशः । परिव्राजकाश्चेति त्रिदण्डिनो गृह्यन्तेऽन्येषामेषणाभ्यो व्युत्थितानां तत्त्वज्ञान-निष्ठानां देवयाने पथ्यप्रवेशादाश्रममात्रनिष्ठा वा तेऽपि गृहेरन्निति द्रष्टव्यम् । अत्राऽपि स्वयमुपास्या कर्मत्वश्रवणादित्याशङ्क्य प्रत्ययमात्रस्य सापेक्षत्वादु-पास्यत्वानुपपत्तेर्नैवमित्याह—न पुनरिति । तत्त्वं पञ्चाग्निविदः तत्पञ्चाग्नि-विदित्येतदर्थः ।

यावद्गृहस्थाः पञ्चाग्निविद्यां सत्यं वा ब्रह्म न विदुस्तावच्छ्रद्धा-द्याहुतिक्रमेण पञ्चम्यामाहुतौ हुतायां ततो योषाग्नेर्जाताः पुनर्लोकं प्रत्युत्थायिनोऽग्निहोत्रादिकर्मानुष्ठातारो भवन्ति । तेन कर्मणा धूमा-दिक्रमेण पुनः पितृलोकं पुनः पर्जन्यादिक्रमेणेममावर्तन्ते । पुनर्यो-षाग्नेर्जाताः पुनः कर्म कृत्वेत्येवमेव घटीयन्त्रवदुत्यागतिभ्यां पुनः पुनरावर्तन्ते । यदा त्वेवं विदुस्ततो घटीयन्त्रभ्रमणाद्विनिर्मुक्ताः सन्तोऽर्चिरभिसंभवन्ति । अर्चिरिति नाग्निज्वालामात्रं किं तर्ह्यर्चि-राभिमानिन्यार्चिः शब्दवाच्या देवतोत्तरमार्गलक्षणा व्यवस्थितैव तामभिसंभवन्ति । न हि परिव्राजकानामग्न्यर्चिषैव साक्षात्संबन्धोऽस्ति । तेन देवतैव परिगृह्यतेऽर्चिःशब्दवाच्या । अतोऽहर्देवताम् । मरण-कालनियमानुपपत्तेरहःशब्दोऽपि देवतैव । आयुषः क्षये हि मरणम् । नह्येवंविदोऽहन्येव मर्तव्यमित्येवंमरणकालो नियन्तुं शक्यते । न च रात्रौ प्रेताः सन्तोऽहः प्रतीक्षन्ते । "स यावत्क्षिप्येन्मनस्तावदादित्यं गच्छति" इति श्रुत्यन्तरात् ।

विनाऽपि विद्याबलमर्चिरभिसंपत्तिः स्यादिति चेन्नेत्याह—यावदिति । कर्म कृत्वा लोकं प्रत्युत्थायिन इति पूर्वेण संबन्धः । केवलकर्मिणां देवयानमार्गप्रा-प्तिर्नास्तीत्युक्तं निगमेनेति—इत्येवमेवेति । विदुषामेव देवयानप्राप्तिमुपसंहरति—यदा त्विति । नन्वर्चिषो ज्वालात्मनोऽस्त्येवार्चिदभिसंपत्तिर्न फलाय कल्पते तत्राऽऽह—अर्चिरिति । अर्चिःशब्देन यथोक्तदेवताग्रहे लिङ्गमाह—न हीति । अतोऽर्चिर्देवतायाः सकाशादिति यावत् । अहःशब्दस्य कालविषयत्वमुक्तदोषा-भावादिति चेन्नेत्याह—मरणेति । नियमाभावमेव व्यनक्ति—आयुष इति ।

---

१ क. ख. छ. ण. °स्ते ये ते चे° । २ ख. छ. ढ. °ष्ठावन्तोऽपि । ३ घ. ञ. ण साक्षादु° । ४ च. झ. ढ. °मर्चि° । ५ च. ढ. °बन्धस्तेषां ते° । ६ क. झ. °स्ति तेषां ते° । ७ ख. छ. छ. °रणेनैवं° । ८ क. घ. ङ. च. ज. झ. ढ. °म् । नैवं° । ९ ग. ज. झ. ढ दामह° । १० ख. घ. छ. ढ. °मिति । नह्यव° । ११ क. ख. छ. ढ. °ति । एव° ।

विद्वद्विषये नियमशङ्क्याऽऽह—न ह्रीति । ननु रात्रौ मृतोऽपि विद्वानहरपेक्ष्य फली संपत्स्यते नेत्याह—न चेति ।

अहन आपूर्यमाणपक्षमहर्देवतयाऽतिवाहिता आपूर्यमाणपक्षदेवतां प्रतिपद्यन्ते शुक्लपक्षदेवतामित्येतत् । आपूर्यमाणपक्षाद्यान्षण्मासानुदङ्ङुत्तरां दिशमादित्यः सवितैति तान्मासान्प्रतिपद्यन्ते शुक्लपक्षदेवताऽतिवाहिताः सन्तः । मासानिति बहुवचनात्संघचारिण्यः षडुत्तरायणदेवतास्तेभ्यो मासेभ्यः षण्मासदेवताभिरतिवाहिता देवलोकाभिमानिनीं देवतां प्रतिपद्यन्ते । देवलोकादादित्यमादित्याद्विद्युतं विद्युदभिमानिनीं देवतां प्रतिपद्यन्ते । विद्युद्देवतां प्राप्तान्ब्रह्मलोकवासी पुरुषो ब्रह्मणा मनसा सृष्टो मानसः कश्चिदेत्याऽऽगत्य ब्रह्मलोकान्गमयति । ब्रह्मलोकानित्यधरोत्तरभूमिभेदेन भिन्ना इति गम्यन्ते । बहुवचनप्रयोगात् । उपासनतारतम्योपपत्तेश्च । ते तेन पुरुषेण गमिताः सन्तस्तेषु ब्रह्मलोकेषु पराः प्रकृष्टाः सन्तः स्वयं परावतः प्रकृष्टाः समाः संवत्सरानेकान्वसन्ति । ब्रह्मणोऽनेकान्कल्पान्वसन्तीत्यर्थः । तेषां ब्रह्मलोकं गतानां नास्ति पुनरावृत्तिरस्मिन्संसारे न पुनरागमनमिहेति शाखान्तरपाठात् । इहेत्याकृतिमात्रग्रहणमिति चेच्छ्वोभूते पौर्णमासीमिति यद्वत् । न, इहेतिविशेषणानर्थक्यात् । यदि हि नाऽऽवर्तन्त एवेहग्रहणमनर्थकमेव स्यात् । श्वोभूते पौर्णमासीमित्यत्र पौर्णमास्याः श्वोभूतत्वमनुक्तं न ज्ञायत इति युक्तं विशेषयितुम् । न हि तत्र श्वआकृतिशब्दार्थो विद्यत इति श्वःशब्दो निरर्थक एव प्रयुज्यते । यत्र तु विशेषणशब्दे प्रयुक्तेऽन्विष्यमाणे विशेषणफलं चेन्न गम्यते तत्र युक्तो निरर्थकत्वेनोत्सृष्टुं विशेषणशब्दो न तु सत्यां विशेषणफलावगतौ । तस्मादस्मात्कल्पादूर्ध्वमावृत्तिर्गम्यते ॥ १५ ॥

एकस्मिन्नेव ब्रह्मलोके कथं बहुवचनमिति शङ्क्याऽऽह—ब्रह्मेति । ब्रह्मलोकानिति बहुवचनप्रयोगादिति संबन्धः । अत्र ब्रह्मलोका विशेष्यत्वेन गृह्यन्ते, बहुवचनोपपत्तौ हेत्वन्तरमाह—उपासनेति । कल्पशब्दोऽत्रावान्तरकल्पविषयः तेषामिह न पुनरावृत्तिरिति क्वचित्पाठादस्मिन्नित्यादिव्याख्यानमयुक्तमिति शङ्कते—इहेति । यथा श्वोभूते पौर्णमासीं यजेतेत्यत्राऽऽकृतिः पौर्णमासीशब्दार्थः श्वोभूतत्वं च न व्यावर्तकं पौर्णमासीपदलक्षणेष्टेः प्रतिपद्येव कर्तृ-

१ घ. ज. °सनाता° । २ ख. छ. तत्राऽऽकृ° । ३ ख. च. ढ. °तिः श्वःश्° ।

व्यतानियमात्तथेहाऽऽकृतेरिहशब्दार्थत्वान्निरङ्कुशैवानावृत्तिरत्र सिध्यतीत्यर्थः । परिहरति—नेत्यादिना । परोक्तं दृष्टान्तं विघटयति—श्वोभूत इति । कृतसंभारदिवसापेक्षं हि श्वोभूतत्वं पौर्णमासीदिने चातुर्मास्येष्टौ कृतायां कदा पौर्णमासीष्टिः कर्तव्येति विना वचनं न ज्ञायते तत्र श्वोभूतत्वं विशेषणं भवत्यन्यव्यावर्तकं तद्वदिहेति विशेषणमपि व्यावर्तकमेवेति नाऽऽत्यन्तिकानावृत्तिसिद्धिरित्यर्थः । यत्तु पौर्णमासीशब्दवदिहशब्दस्याऽऽकृतिवाचित्वाद्व्यावर्तकत्वमिति तन्नाऽऽह—न हीति। अद्यापि प्रकृते वाक्ये पौर्णमासीशब्दो भवत्याकृतिवचनस्तथाऽपि श्वःशब्दार्थोऽपि काचिदाकृतिरस्तीत्यङ्गीकृत्याव्यावर्तकः श्वोभूतशब्दो नैव प्रयुज्यते । तथाऽत्रापि विशेषणशब्दस्य व्यावर्तकत्वमावश्यकमित्यर्थः । सुषिरमाकाशमित्यादौ व्यावर्त्याभावेऽपि विशेषणप्रयोगवदत्रापि विशेषणं स्वरूपानुवादमात्रमित्याशङ्क्याऽऽह—यत्र त्विति । विशेषणफलमुपसंहरति—तस्मादिति ॥ १५ ॥

अथ ये यज्ञेन दानेन तपसा लोकाञ्जयन्ति ते धूममभिसंभवन्ति धूमाद्रात्रिꣳ रात्रेरपक्षीयमाणपक्षमपक्षीयमाणपक्षाद्यान्षण्मासान्दक्षिणाऽऽदित्य एति मासेभ्यः पितृलोकं पितृलोकाच्चन्द्रं ते चन्द्रं प्राप्यान्नं भवन्ति ताꣳस्तत्र देवा यथा सोमꣳ राजानमाप्यायस्वापक्षीयस्वेत्येवमेनाꣳस्तत्र भक्षयन्ति तेषां यदा तत्पर्यवैत्ययेममेवाऽऽकाशमभिनिष्पद्यन्त आकाशाद्वायुं वायोर्वृष्टिं वृष्टेः पृथिवीं ते पृथिवीं प्राप्यान्नं भवन्ति ते पुनः पुरुषाग्नौ हूयन्ते ततो योषाग्नौ जायन्ते लोकान्प्रत्युत्थायिनस्त एवमेवानुपरिवर्तन्तेऽथ य एतौ पन्थानौ न विदुस्ते कीटाः पतङ्गा यदिदं दन्दशूकम् ॥ १६ ॥

इति बृहदारण्यकोपनिषदि षष्ठाध्यायस्य द्वितीयं ब्राह्मणम् ॥ २ ॥

---

१ क. ख. छ. ढ. विशदय°। २ घ. ण. °तत्वावि°। ३ क. घ. छ. ञ. ण. °तर्क-श्वो°। ४ ख. छ. ढ. °पादिवा°। ५ ख. ग. ङ. च. ज. ठ. ड. ढ. °न्ति त ए°।

अथ पुनर्ये नैवं विदुरुत्क्रान्त्याद्यग्निहोत्रसंबन्धपदार्थषटकस्यैव वेदितारः केवलकर्मिणो यज्ञेनाग्निहोत्रादिना दानेन बहिर्वेदि भिक्षमाणेषु द्रव्यसंविभागलक्षणेन तपसा बहिर्वेद्येव दीक्षादिव्यतिरिक्तेन कृच्छ्रचान्द्रायणादिना लोकाञ्जयन्ति । लोकानिति बहुवचनात्तत्रापि फलतारतम्यमभिप्रेतम् । ते धूममभिसंभवन्ति । उत्तरमार्ग इवेहापि देवता एवं धूमादिशब्दवाच्या धूमदेवता प्रतिपद्यन्त इत्यर्थः । आतिवाहिकत्वं च देवताना तद्वदेव । धूमाद्रात्रिं रात्रिदेवतां ततोऽपक्षीयमाणपक्षमपक्षीयमाणपक्षदेवता ततो यान्षण्मासान्दक्षिणां दिशमादित्य एति तान्मासदेवताविशेषान्प्रतिपद्यन्ते ।

देवयानं पन्थानमुक्त्वा पथ्यन्तरं वक्तुं वाक्यान्तरमादाय पदद्वयं व्याकरोति—अथेत्यादिना । कथं ते फलभागिनो भवन्तीत्याकाङ्क्षायामाह—यज्ञेनेति । ननु दानतपसी यज्ञग्रहणेनैव गृहीते न पृथग्रहीतव्ये तत्राऽऽह—बहिर्वेदीति । दीक्षादीत्यादिपदेन पयोव्रतादियज्ञाङ्गसंग्रहः । तेनेति पितृलोकोक्तिः । अपिशब्दो ब्रह्मलोकदृष्टान्तार्थः । धूमसंपत्तेरपुरुषार्थत्वमाशङ्क्योक्तम्—उत्तरमार्ग इवेति । इहापीति पितृयाणमार्गेऽपीत्यर्थः । तद्वदेवेत्युत्तरमार्गगामिनीनां देवतानामिवेत्यर्थः ।

मासेभ्यः पितृलोकं पितृलोकाच्चन्द्रम् । ते चन्द्रं प्राप्यान्नं भवन्ति तांस्तत्रान्नभूतान्यथा सोमं राजानमिह यज्ञ ऋत्विज आप्यायस्वापक्षीयस्वेति भक्षयन्त्येवमेनांश्चन्द्रं प्राप्तान्कर्मिणो भृत्यानिव स्वामिनो भक्षयन्त्युपभुञ्जते देवाः । आप्यायस्वापक्षीयस्वेति न मन्त्रः किं तर्ह्याप्याप्याऽऽप्याय्य चमसस्थं भक्षणेनापक्षयं च कृत्वा पुनः पुनर्भक्षयन्तीत्यर्थः । एवं देवा अपि सोमलोके लब्धशरीरान्कर्मिण उपकरणभूतान्पुनः पुनर्विश्रामयन्तः कर्मानुरूपं फलं प्रयच्छन्तः । तद्धि तेषामाप्यायनं सोमस्याऽऽप्यायनमिवोपभुञ्जत उपकरणभूतान्देवाः, तेषां कर्मिणां यदा यस्मिन्काले तद्यज्ञदानादिलक्षणं सोमलोकप्रापकं कर्म पर्यवैति परिगच्छति परिक्षीयत इत्यर्थः । अथ तदेममेव प्रसिद्धमाकाशमभिनिष्पद्यन्ते । यास्ताः श्रद्धाशब्दवाच्या द्युलोकाग्नौ हुता आपः सोमाकारपरिणता याभिः सोमलोके कर्मिणामुपभोगाय

१ घ. च. ज. ढ. °देवताः । त° ।

शरीरमारब्धमम्मयं ताः, कर्मक्षयाद्धिमपिण्ड इवाऽऽतपसंपर्कात्प्रविलीयन्ते । प्रविलीनाः सूक्ष्मा आकाशभूता इव भवन्ति तदिदमुच्यत इममेवाऽऽकाशमभिनिष्पद्यन्त इति ।

तत्रेति प्रकृतलोकोक्तिः । कर्मिणां तर्हि देवैर्भक्ष्यमाणानां चन्द्रलोकप्राप्तिरनर्थायैवेत्याशङ्क्याऽऽह—उपभुञ्जत इति । अन्यथाप्रतिभासं व्यावर्तयति—आप्यायस्वेति । एवं देवा अपीति सांक्षिप्तं दार्ष्टान्तिकं विवृणोति—सोमलोक इति । कथं पौनःपुन्येन विश्रान्तिः संपाद्यते तत्राऽऽह—कर्मानुरूपमिति । दृष्टान्तवद्दार्ष्टान्तिके किमित्याप्यायनं नोक्तं तत्राऽऽह—तद्धीति । पुनः पुनर्विश्रम्याम्यनुज्ञानमिति यावत् । लोकद्वयप्रापकौ पन्थानावित्थं व्याख्याय पुनरेतल्लोकप्राप्तिप्रकारमाह—तेषामित्यादिना । कथं चन्द्रस्थलस्खलितानां कर्मिणामाकाशतादात्म्यमित्याशङ्क्याऽऽह—यस्ता इति । सोमाकारपरिणतत्वमेव स्फोरयति—याभिरिति । तस्य झटिति द्रवीभवनयोग्यता दर्शयति—अम्मयमिति । साभाव्यापत्तिरुपपत्तेरिति न्यायेनाऽऽह—आकाशभूता इवेति ।

ते पुनरपि कर्मिणस्तच्छरीराः सन्तः पुरोवातादिना इतश्चामुतश्च नीयन्तेऽन्तरिक्षगास्तदाह—आकाशाद्वायुमिति । वायोर्वृष्टिं प्रतिपद्यन्ते । तदुक्तम्—पर्जन्याग्नौ सोमं राजानं जुह्वतीति । ततो वृष्टिभूता इमा पृथिवीं पतन्ति । ते पृथिवीं प्राप्य व्रीहियवाद्यन्नं भवन्ति । तदुक्तमस्मिँल्लोकेऽग्नौ वृष्टिं जुह्वति तस्या आहुत्या अन्नं संभवतीति । ते पुनः पुरुषाग्नौ हूयन्तेऽन्नभूता रेतःसिचि । ततो रेतोभूता योषाग्नौ हूयन्ते ततो जायन्ते लोकं प्रत्युत्थायिनस्ते लोकं प्रत्युत्तिष्ठन्तोऽग्निहोत्रादिकर्मानुतिष्ठन्ति । ततो धूमादिना पुनः पुनः सोमलोकं पुनरिमं लोकमिति । त एवं कर्मिणोऽनुपरिवर्तन्ते घटीयन्त्रवच्चक्रीभूता भ्रमन्तीत्यर्थः । उत्तरमार्गाय सद्योमुक्तये वा यावद्ब्रह्म न विदुः । इति नु कामयमानः संसरतीत्युक्तम् ।

आकाशाद्वायुप्राप्तिप्रकारमाह—ते पुनरिति । अन्याधिष्ठिते पूर्ववदभिलापादिति न्यायेनाऽऽह—ते पृथिवीमिति । रेतःसिग्योगोऽपेति न्यायमाश्रित्याऽऽह—ते पुनरिति । योनेः शरीरमिति न्यायमनुसृत्याऽऽह—तत इति । उत्पन्नानां केषाञ्चिदिष्टादिकारित्वमाह—लोकनिति । कर्मानुष्ठानान्तरं तत्फलभागित्व-

---

१ ख. छ. ढ. °न्तदार्ष्टां° । २ ञ. °र्विश्रनाभ्य° । ख. ढ. °श्रामाभ्य° । ४ च. ढ. °हुतेरन्नं । ५ क. च. °न्ते ते लो° । ६ क. घ. ज. लोकप्र° । ७ घ. °नः सो° । ८ ञ. °ता भ्रमन्तीत्य° । ९ ञ. °लभोगि° ।

माह—ततो धूमादिनेति । सोमलोके फलभोगानन्तरं पुनरेतल्लोकप्राप्तिमाह—पुनरिति । पौनःपुन्येन विपरिवर्तनस्यावधिं सूचयति—उत्तरमार्गायेति । पाग्ज्ञानात्संसरणं षष्ठेऽपि व्याख्यातमित्याह—इति स्विति ।

अथ पुनर्य उत्तरं दक्षिणं चैतौ पन्थानौ न विदुस्तेऽत्तरस्य दक्षिणस्य वा पथः प्रतिपत्तये ज्ञानं कर्म वा नानुतिष्ठन्तीत्यर्थः । ते किं भवन्तीति । उच्यते—ते कीटाः पतङ्गा यदिदं यच्चेदं दन्दशूकं दंशमशकमित्येतद्भवन्ति । एवं ह्ययं संसारगतिः कष्टाऽस्यां निमग्नस्य पुनरुद्धार एव दुर्लभः । तथा च श्रुत्यन्तरम्—" तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ति जायस्व म्रियस्व " इति । तस्मात्सर्वोत्साहेन यथाशक्ति स्वाभाविककर्मज्ञानहानेन दक्षिणोत्तरमार्गप्रतिपत्तिसाधनं शास्त्रीयं कर्म ज्ञानं वाऽनुतिष्ठेदिति वाक्यार्थः । तथा चोक्तम् " अतो वै खलु दुर्निष्प्रपतरं तस्माज्जुगुप्सेत " इति श्रुत्यन्तराद्मोक्षाय प्रयतेतेत्यर्थः । अत्राप्युत्तरमार्गप्रतिपत्तिसाधन एव महान्यत्नः कर्तव्य इति गम्यते । एवमेवानुपरिवर्तन्त इत्युक्तत्वात् । एवं प्रश्नाः सर्वे निर्णीताः । असौ वै लोक इत्यारभ्य पुरुषः संभवतीति चतुर्थः प्रश्नो यतिष्यामाहुत्यामित्यादिः प्राथम्येन । पञ्चमस्तु द्वितीयत्वेन देवयानस्य वा पथः प्रतिपदं पितृयाणस्य वेति दक्षिणोत्तरमार्गप्रतिपत्तिसाधनकथनेन । तेनैव च प्रथमोऽप्यग्नेरारभ्य केचिदर्चिः प्रतिपद्यन्ते केचिद्धूममिति विप्रतिपत्तिः । पुनरावृत्तिश्च द्वितीयः प्रश्न आकाशादिक्रमेणेमं लोकमागच्छन्तीति । तेनैवासौ लोको न संपूर्यते कीटपतङ्गादिप्रतिपत्तेश्च केषांचिदिति तृतीयोऽपि प्रश्नो निर्णीतः ॥ १६ ॥

इति बृहदारण्यकोपनिषद्भाष्ये षष्ठाध्यायस्य
द्वितीयं ब्राह्मणम् ॥ २ ॥

स्थानद्वयमावृत्तिसहितमुक्त्वा स्थानान्तरं दर्शयति—अथेत्यादिना । स्थानद्वयात्तृतीये स्थाने विशेषं कथयति—एवमिति । तृतीये स्थाने छान्दोग्यश्रुतिं संवादयति—तथा चेति । अमुष्या गतेरतिकष्टत्वे परिशिष्टं वाक्यार्थमाचष्टे—तस्मादिति । सर्वोत्साहो वाक्कायचेतसां प्रयत्नः । यदुक्तमस्यां निमग्नस्य पुनरुद्धारो दुर्लभो भवतीति तत्र श्रुत्यन्तरमनुकूलयति—तथा चेति । अतो वीक्षा

१ ख. ग. च. छ. झ. ढ. °नं चानु° । २ घ. ढ. तीत्यन्तश्चतु° । ३ ढ. °यानस्य ।

दिभावादित्यर्थः । तस्मादित्यतिकष्टात्संसारादित्यर्थः । दक्षिणोत्तरमार्गप्राप्तिसाधने यत्नसाम्यमाशङ्क्याऽऽह—अत्रापीति । पञ्च प्रश्नान्प्रस्तुत्य किमिति प्रत्येकं तेषां निर्णयो न कृत इत्याशङ्क्याऽऽह—एवमिति । निर्णीतं प्रकारमेव संगृह्णाति—असावित्यादिना । प्राथम्येन निर्णीत इति संबन्धः । देवयानस्येत्यादिः पञ्चमः प्रश्नः । स तु द्वितीयत्वेन दक्षिणादिमार्गोपपत्तिसाधनोक्त्या निर्णीत इत्यर्थः । तेनैव मार्गद्वयप्राप्तिसाधनोपदेशेनैवेति यावत् । मृतानां प्रजानां विप्रतिपत्तिः प्रथमप्रश्नस्तस्य निर्णयप्रकारमाह—अग्नेरिति । द्वितीयप्रश्नस्वरूपमनूद्य तस्य निर्णीतत्वप्रकारं प्रकटयति—पुनरावृत्तिश्चेति । आगच्छन्तीति निर्णीत इत्युत्तरत्र संबन्धः । तेनैव पुनरावृत्तेः सत्त्वेनेत्यर्थः । अमुष्य लोकस्यासंपूर्तिर्हि तृतीयः प्रश्नः । स च द्वाभ्यां हेतुभ्यां प्रयुक्ताभ्यां निर्धारितो भवतीति भावः ॥१६॥

इति बृहदारण्यकोपनिषद्भाष्यटीकायां षष्ठाध्यायस्य
द्वितीयं ब्राह्मणम् ॥ २ ॥

अथ षष्ठाध्यायस्य तृतीय ब्राह्मणम ।

स यः कामयेत महत्प्राप्नुयामित्युदगयन आपूर्यमाणपक्षस्य पुण्याहे द्वादशाहमुपसद्व्रती भूत्वौदुम्बरे कꣳसे चमसे वा सर्वौषधं फलानीति संभृत्य परिसमुह्य परिलिप्याग्निमुपसमाधाय परिस्तीर्याऽऽवृताऽऽज्यꣳ सꣳस्कृत्य पुꣳसा नक्षत्रेण मन्थꣳ संनीय जुहोति । यावन्तो देवास्त्वयि जातवेदस्तिर्यञ्चो घ्नन्ति पुरुषस्य कामान् । तेभ्योऽहं भागधेयं जुहोमि ते मा तृप्ताः सर्वैः कामैस्तर्पयन्तु स्वाहा । या तिरश्ची निपद्यतेऽहं विधरणी इति तां त्वा घृतस्य धारया यजे सꣳराधनीमहꣳ स्वाहा ॥ १ ॥

स यः कामयेत । ज्ञानकर्मणोर्गतिरुक्ता । तत्र ज्ञानं स्वतन्त्रं कर्म तु दैवमानुषवित्तद्वयायत्तं तेन कर्मार्थं वित्तमुपार्जनीयम् । तच्चाप्रत्यवायकारिणोपायेनेति तदर्थं मन्थाख्यं कर्माऽऽरभ्यते महत्त्वप्राप्तये। महत्त्वे च सत्यर्थसिद्धं हि वित्तम् । तदुच्यते—स यः कामयेत स यो वित्तार्थी

१ घ, ण. °दिना मा° ।

कर्मण्यधिकृतो यः कामयेत । किम् । महन्महत्त्वं प्राप्नुयां महाँस्यामिति यावत् । तत्र मन्थकर्मणो विधित्सितस्य कालोऽभिधीयते—उद्गन आदित्यस्य तत्र सर्वत्र प्राप्ताषापूर्यमाणपक्षस्यं शुक्लपक्षस्य । तत्रापि सर्वत्र प्राप्तौ पुण्याहेऽनुकूल आत्मनः कर्मसिद्धिकर इत्यर्थः । द्वादशाहं यस्मिन्पुण्येऽनुकूले कर्म चिकीर्षति ततः प्राक्पुण्याहमेवाऽऽरभ्य द्वादशाहमुपसद्व्रती । उपसत्सु व्रतमुपसदः प्रसिद्धा ज्योतिष्टोमे । तत्र च स्तनोपचयापचयद्वारेण पयोभक्षणं तद्व्रतम् । अत्र च तत्कर्मानुपसंहारात्केवलमितिकर्तव्यताशून्यं पयोभक्षणमात्रमुपादीयते । ननूपसदो व्रतमिति यदा विग्रहस्तदा सर्वमितिकर्तव्यतारूपं ग्राह्यं भवति तत्कस्मान्न परिगृह्यत इति । उच्यते—स्मार्तत्वात्कर्मणः । स्मार्तं हीदं मन्थकर्म । ननु श्रुतिविहितं सत्कथं स्मार्तं भवितुमर्हति । स्मृत्यनुवादिनी हि श्रुतिरियम् । श्रौतत्वे हि प्रकृतिविकारभावस्ततश्च प्राकृतधर्मग्राहित्वं विकारकर्मणो न त्विह श्रौतम् । अत एव चाऽऽवसथ्याग्नावेतत्कर्म विधीयते । सर्वा चाऽऽवृत्स्मार्तैवेति । उपसद्व्रती भूत्वा पयोव्रती सन्नित्यर्थः ।

ब्राह्मणान्तरमवतार्य संगतिमाह—स य इति । तत्रेति निर्धारणे सप्तमी कथं तर्हि वित्तोपार्जनं संभवति तत्राऽऽह—तत्रेति । तदर्थं वित्तसिद्ध्यर्थमिति यावत् । ननु महत्त्वसिद्ध्यर्थमिदं कर्माऽऽरभ्यते महत्प्राप्नुयामिति श्रुतेस्तत्कथमन्यथा प्रतिज्ञातमिति शङ्कते—महत्त्वेति । परिहरति—महत्त्वे चेति । उक्तेऽर्थे श्रुत्यक्षराणि योजयति—तदुच्यत इत्यादिना । स यो वित्तार्थी कामयेत तस्यैदं कर्मेति शेषः । कस्यचिद्वित्तार्थिनस्तर्हीदं कर्म स्यादित्याशङ्क्याऽऽह—कर्मण्यधिकृत इति । तत्र वित्तार्थिनि पुंसीति यावत् । उपसदो नामेष्टिविशेषाः । ज्योतिष्टोमे प्रवर्ग्याहःस्विति शेषः । किं पुनस्तासु व्रतमिति तत्राह—तत्र चेति । यदुपसत्सु स्तनोपचयाभ्यां पयोभक्षणं यजमानस्य प्रसिद्धं तदत्रोपसद्व्रतमित्यर्थः । प्रकृतेऽपि तर्हि स्तनोपचयापचयाभ्यां पयोभक्षणं स्यादिति चेन्नेत्याह—अत्र चेति । मन्थारूपं कर्म सप्तम्यर्थः । तत्कर्मेत्युपसदुपकर्मोक्तिः । केवलमित्यस्यैवार्थमाह—इतिकर्तव्यताशून्यमिति । समासान्तरमाश्रित्य शङ्कते—नन्विति । कर्मधारयरूपं समासवाक्यं तदित्युक्तम् । मन्थाख्यस्य कर्मणः स्मार्तत्वाद्न्र श्रुत्युक्तानामुपसदामुपसंग्रहाभावान्न कर्मधारयः सिध्यतीत्युत्तरमाह—उच्यत इति । मन्थकर्मणः स्मार्तत्वमाक्षिपति—नन्विति ।

---

१ ख. ग. घ. ङ. च. छ. ज. ढ. °मित्य° । २ झ. तस्य क° । ३ क. तमुपसद्व्रतमु° । ४ ख. ग. घ. ङ. छ. ज. ढ. °सदिष्टिविशेष उपसुदः । ५ च. ढ. °तं कर्मम° । ६ ख. छ. कृतं ध° । ७ ञ. तत्राऽऽह । ८ ख. छ. ढ. °दन्यश्च° ।

परिस्तरणपरिलेपनाभ्युपसमाधानादेः स्मार्तार्थस्यात्रोच्यमानत्वादियं श्रुतिः स्मृत्यनुवादिनी युक्ता । तथा चैतत्कर्म भवत्येव स्मार्तमिति परिहरति—स्मृतीति । ननु श्रुतेर्वा स्मृत्यनुवादित्वं वैपरीत्यादतो भवतीदं श्रौतमित्याशङ्क्याऽऽह—श्रौतत्वे हीति । यदीदं कर्म श्रौतं तदा ज्योतिष्टोमेनास्य प्रकृतिविकृतिभावः स्यात् । समभाङ्मन्त्रयुक्ता प्रकृतिर्विकलाङ्गन्त्रयुक्ता च विकृतिः । प्रकृतिविकृतिभावे च विकृतिकर्मणः प्राकृतधर्मग्राहित्वादुपसद एव व्रतमिति विगृह्य सर्वमिति कर्तव्यतारूपं सकर्मं ग्रहीतुं न चात्र श्रौतत्वमस्ति परिलेपनादिसंबन्धात् । न च पूर्वमाविष्ट्वाः श्रुतेरुत्तरभाविस्मृत्यनुवादित्वासिद्धिस्तस्यास्सैकाल्यविषयत्वाभ्युपगमादिति भावः । मन्थकर्मणः स्मार्तत्वे लिङ्गमाह—अत एवेति । तत्रैव हेत्वन्तरमाह—सर्वा ओषधीरिति । मन्थगतेतिकर्तव्यताऽत्राऽऽवृदित्युच्यते । उपसद एव व्रतमिति विग्रहासंभवादुपसत्तु व्रतमित्यस्मदुक्तं सिद्धमुपसंहर्तुमितिशब्दः । पयोव्रती तन्वहमाज्येन क्रमेण जुहोतीति संबन्धः ।

औदुम्बर उदुम्बरवृक्षमये कंसे चमसे वा तस्यैव विशेषणं कंसाकारे चमसाकारे वौदुम्बर एव । आकारे तु विकल्पो नौदुम्बरत्वे । अत्र सर्वौषधं सर्वासामोषधीनां समूहं यथासंभवं यथाशक्ति च सर्वा ओषधीः समाहृत्य तत्र ग्राम्याणां तु दश नियमेन ग्राह्या व्रीहियवाद्या वक्ष्यमाणाः । अधिकग्रहणे तु न दोषः । ग्राम्याणां फलानि च यथासंभवं यथाशक्ति च । इतिशब्दः समस्तसंभारोपक्षयप्रदर्शनार्थः । अन्यदपि यत्संभरणीयं तत्सर्वं संभृत्येत्यर्थः । क्रमस्तत्र गृह्योक्तो द्रष्टव्यः । परिसमूहनपरिलेपने भूमिसंस्कारः । अग्निमुपसमाधायेति वचनादावसथ्येऽग्नाविति गम्यते । एकवचनादुपसमाधानश्रवणाच्च । विद्यमानस्यैवोपसमाधानम् । परिस्तीर्य दर्भानावृता स्मार्तत्वात्कर्मणः स्थालीपाकावत्परिगृह्यते । तयाऽऽज्यं संस्कृत्य पुंसा नक्षत्रेण पुंनाम्ना नक्षत्रेण पुण्याहसंयुक्तेन मन्थं सर्वौषधफलपिष्टं तत्रौदुम्बरे चमसे दधनि मधुनि घृते चोपसिच्यैकयोपमन्थन्योपसंमथ्य संनीय मध्ये संस्थाप्यौदुम्बरेण स्रुवेणाऽऽवापस्थान आज्यस्य जुहोत्येतैर्मन्त्रैर्यावन्तो देवा इत्यादेः ॥ १ ॥

चाम्नमौदुम्बरमिति शङ्कां वारयति—उदुम्बरवृक्षमय इति । तस्यैवेति

---

१ घ. ञ. ढ. ण. °त्वं । २ क. ख. च. ञ. ढ. ण. °कृतक° । ३ क. ख. छ° ञ. ढ. °तकर्म° । ४ घ. °म्बरे वृ° । ५ क. ख. ग. घः ङ. छ. ज. झ. °त्वे । स° । ६ ङ. ञ. ढ. °त्यास्तु द° । ७ क. ख. घ. छ. ढ. ण. °ति । ठ° ।

प्रकृतपात्रपरामर्शः। औदुम्बरत्वे विकल्पमाशङ्क्याऽऽह—आकार इति। अत्रेति पात्रनिर्देशः। असंभवादशक्यत्वाच्च सर्वौषधं समाहृत्येत्ययुक्तमित्वाशङ्क्याऽऽह—यथासंभवमिति। ओषधिषु[1] नियमं दर्शयति—तत्रेति। परिसंख्यां वारयति—अधिकेति। इति संभृत्येतिशब्दस्य प्रदर्शनार्थत्वे फलितं वाक्यार्थं कथयति—अन्यदपीति। ओषध्यादीनां संभरणानन्तरं परिसमूहनादिकमे किं प्रमाणमित्याशङ्क्याऽऽह—क्रम इति। तत्रेति परिसमूहनाद्युक्तिः। होमाधारत्वेन चेताग्निपरिग्रहं वारयति—अग्निमिति। आवसथ्येऽग्नौ होम इति शेषः। कथमेतावता चेताग्निपरित्यागस्तत्राऽऽह—एकवचनादिति। कथमुपसमाधानश्रवणं चेताग्निनिवारकं तत्राऽऽह—विद्यमानस्येति। आहवनीयादेश्चाऽऽधेयत्वान्न प्रागेव सत्त्वमिति भावः। मध्ये स्वस्याग्नेरिति शेषः। आवापस्थानमाहुतिविशेषपक्षेपदेशः। भो जातवेदस्त्वदधीना यावन्तो देवा वक्रमतयः सन्तो ममार्थान्मतिवध्नन्ति तेभ्योऽहमाज्यभागं त्वय्यर्पयामि ते च तेन तृप्ता भूत्वा सर्वैरपि पुरुषार्थैर्मां तर्पयन्तु। अहं च त्वदधीनोऽर्पित इत्याद्यमन्त्रस्यार्थः। जातं जातं वेत्तीति वा जाते जाते विद्यत इति वा जातवेदाः। या देवता कुटिलमतिर्भूत्वा सर्वस्यैवाहमेव धारयन्तीति मत्वा त्वामाश्रित्य वर्तते तां सर्वसाक्षिणीं देवतामहं घृतस्य धारया यजे स्वाहेति पूर्ववदेव द्वितीयमन्त्रार्थः॥ १॥

ज्येष्ठाय स्वाहा श्रेष्ठाय स्वाहेत्यग्नौ हुत्वा मन्थे स्रुवमवनयति प्राणाय स्वाहा वसिष्ठाय स्वाहेत्यग्नौ हुत्वा मन्थे स्रुवमवनयति वाचे स्वाहा प्रतिष्ठायै स्वाहेत्यग्नौ हुत्वा मन्थे स्रुवमवनयति चक्षुषे स्वाहा संपदे स्वाहेत्यग्नौ हुत्वा मन्थे स्रुवमवनयति श्रोत्राय स्वाहाऽऽयतनाय स्वाहेत्यग्नौ हुत्वा मन्थे स्रुवमवनयति मनसे स्वाहा प्रजात्यै स्वाहेत्यग्नौ हुत्वा मन्थे स्रुवमवनयति रेतसे स्वाहेत्यग्नौ हुत्वा मन्थे स्रुवमवनयति॥२॥ अग्नये स्वाहेत्यग्नौ हुत्वा मन्थे स्रु-

१ ख. ग. छ- ढ. ण. °षधीषु। २ घ. ञ. ण. °ति च म।

स्रुवमवनयति सोमाय स्वाहेत्यग्नौ हुत्वा मन्थे
सꣳस्रुवमवनयति भूः स्वाहेत्यग्नौ हुत्वा मन्थे स-
ꣳस्रुवमवनयति भुवः स्वाहेत्यग्नौ हुत्वा मन्थे स-
ꣳस्रुवमवनयति स्वः स्वाहेत्यग्नौ हुत्वा मन्थे सꣳ-
स्रुवमवनयति भूर्भुवः स्वः स्वाहेत्यग्नौ हुत्वा मन्थे
सꣳस्रुवमवनयति ब्रह्मणे स्वाहेत्यग्नौ हुत्वा मन्थे
सꣳस्रुवमवनयति क्षत्राय स्वाहेत्यग्नौ हुत्वा मन्थे
सꣳस्रुवमवनयति भूताय स्वाहेत्यग्नौ हुत्वा मन्थे
सꣳस्रुवमवनयति भविष्यते स्वाहेत्यग्नौ हुत्वा मन्थे
सꣳस्रुवमवनयति विश्वाय स्वाहेत्यग्नौ हुत्वा
मन्थे सꣳस्रुवमवनयति सर्वाय स्वाहेत्यग्नौ हुत्वा
मन्थे सꣳस्रुवमवनयति प्रजापतये स्वाहेत्यग्नौ
हुत्वा मन्थे सꣳस्रुवमवनयति ॥ ३ ॥

ज्येष्ठाय स्वाहा श्रेष्ठाय स्वाहेत्यारभ्य द्वे द्वे आहुती हुत्वा मन्थे संस्रुवमवनयति । स्रुवावलेपनमाज्यं मन्थे संस्रावयति । एतस्मादेव ज्येष्ठाय श्रेष्ठायेत्यादिप्राणलिङ्गाज्ज्येष्ठश्रेष्ठादिप्राणविद एवास्मिन्कर्मण्यधिकारः । रेतस इत्यारभ्यैकैकामाहुतिं हुत्वा मन्थे संस्रवमवनयत्यपरयोपमन्थन्या पुनर्मथ्नाति ॥ २ ॥ ३ ॥

ज्येष्ठायेत्यादिमन्त्रेषु ध्वनितमर्थमाह—एतस्मादेवेति । द्वे द्वे आहुती हुत्वेत्युक्तं तत्र सर्वत्र द्वित्वप्रसङ्गं प्रत्याचष्टे—रेतस इत्यारभ्येति । संस्रवः स्रुवावलिप्तमाज्यम् ॥ २ ॥ ३ ॥

अथैनमभिमृशति भ्रमदसि ज्वलदसि पूर्णमसि
प्रस्तब्धमस्येकसभमसि हिंकृतमसि हिंक्रियमा-
णमस्युद्गीथमस्युद्गीयमानमसि श्रावितमसि प्रत्या-

---

१ ख. घ. ङ. च. छ. ज झ. ट. °पमा° । २ घ. ण. स्रुवाघमिति° ।

श्रावितमस्यार्द्रे संदीप्तमसि विभूरसि प्रभूरस्यन्न-
मसि ज्योतिरसि निधनमसि संवर्गोऽसीति ॥ ४ ॥

अथैनमभिमृशति भ्रमदसीत्यनेन मन्त्रेण ॥ ४ ॥

मन्थदव्यस्य प्राणदेवताकत्वात्प्राणेनैकीकृत्य सर्वात्मकत्वं तथा च सर्वदेहेषु प्राणरूपेण त्वं भ्रमदसि प्राणस्य चलनात्मकत्वात्तद्रूपत्वाच्च । तत्राग्निरूपेण च त्वं ज्वलदसि प्रकाशात्मकत्वादग्नेस्तद्रूपत्वाच्च । तदेतु ब्रह्मरूपेण त्वं पूर्णमसि । नभो-रूपेण प्रस्तब्धं निष्कम्पमसि सर्वैरविरोधित्वात्सर्वमपि जगदेकसमभवदात्मन्यन्तर्भा-व्यापरिच्छिन्नतया स्थितं वस्तु त्वमसि । प्रस्तोत्रा यज्ञारम्भे त्वमेव हिंकृतमसि । तेनैव यज्ञमध्ये हिंक्रियमाणं चासि । उद्गात्रा च यज्ञारम्भे तन्मध्ये चोद्गीथमुद्गी-यमानं चासि । अध्वर्युणा त्वं श्रावितमसि । आग्नीध्रेण च प्रत्याश्रावितमसि । आर्द्रे मेघोदरे सम्यग्दीप्तमसि । विविधं भवतीति विभुः । प्रभुः समर्थो भोग्यरू-पेण सोमात्मना स्थितत्वादन्नं भोक्तृरूपेणाग्न्यात्मना ज्योतिःकारणत्वान्निधनं लयोऽध्यात्माधिदैवयोर्वागादीनामग्न्यादीनां च संहरणात्त्वं संवर्गोऽसीत्यभिमर्शनमन्त्रस्यार्थः ॥ ४ ॥

अथैनमुद्यच्छत्यामꣳस्यामꣳहि ते महि स हि राजेशा-
नोऽधिपतिः स मा राजेशानोऽधिपतिं करोत्विति ॥५॥

अथैनमुद्यच्छति सह पात्रेण हस्ते गृह्णात्यामंस्यामंहि ते महीत्य-नेन ॥ ५ ॥

आमंसि त्वं सर्वं विजानासि । वयं च ते तत्र महि महत्तरं रूपमामंहि मन्या-महे । स हि प्राणो राजादिगुणः स च मां तथाभूतं करोत्वित्युद्यमनमन्त्रस्यार्थः ॥ ५ ॥

अथैनमाचामति तत्सवितुर्वरेण्यम् । मधु वाता ऋता-
यते मधु क्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः ।
भूः स्वाहा । भर्गो देवस्य धीमहि । मधु नक्तमुतो-
षसो मधुमत्पार्थिवꣳ रजः । मधु द्यौरस्तु नः पिता ।

---

१ छ. विभुर° । २ छ. ड. प्रभुर° । ३ क. ञ. तवाग्नि° । ४ ञ. तव । ५ च. ढ. सचेमसं हस्ते । ६ ञ. °स्तेन गृ° ।

भुवः स्वाहा । धियो यो नः प्रचोदयात् । मधुमान्नो वनस्पतिर्मधुमाꣳ अस्तु सूर्यः । माध्वीर्गावो भवन्तु नः । स्वः स्वाहेति । सर्वां च सावित्रीमन्वाह सर्वाश्च मधुमतीरहमेवेदꣳ सर्वं भूयासं भूर्भुवः स्वः स्वाहेत्यन्तत आचम्य पाणी प्रक्षाल्य जघनेनाग्निं प्राक्शिराः संविशति प्रातरादित्यमुपतिष्ठते दिशामेकपुण्डरीकमस्यहं मनुष्याणामेकपुण्डरीकं भूयासमिति यथेतमेत्य जघनेनाग्निमासीनो वꣳशं जपति ॥ ६ ॥

अथैनमाचामति भक्षयति गायत्र्याः प्रथमपादेन मधुमत्यैकया व्याहृत्या च प्रथमया प्रथमग्रासमाचामति । तथा गायत्रीद्वितीयपादेन मधुमत्या द्वितीयया द्वितीयया च व्याहृत्या द्वितीयं ग्रासम् । तथा तृतीयेन गायत्रीपादेन तृतीयया मधुमत्या तृतीयया च व्याहृत्या तृतीयं ग्रासम् । सर्वां सावित्रीं सर्वाश्च मधुमतीरुक्त्वाऽहमेवेदं सर्वं भूयासमिति चान्ते भूर्भुवः स्वः स्वाहेति समस्तं भक्षयति । यथा चतुर्भिर्ग्रासैस्तद्द्रव्यं सर्वं परिसमाप्यते तथा पूर्वमेव निरूपयेत् । यत्पात्रावलिप्तं तत्पात्रं सर्वं निर्लिज्य तूष्णीं पिबेत् । पाणी प्रक्षाल्याप आचम्य जघनेनाग्निं पश्चादग्नेः प्राक्शिराः संविशति । प्रातःसंध्यामुपास्याऽऽदित्य मुपतिष्ठते दिशामेकपुण्डरीकमित्यनेन मन्त्रेण । यथेतं यथागतमेत्याऽऽगत्य जघनेनाग्निमासीनो वंशं जपति ॥ ६ ॥

तत्सवितुर्वरेण्यं वरणीयं श्रेष्ठं पदं धीमहीति संबन्धः । वाता वायुभेदा मधु सुखमृतामते वहन्ति । सिन्धवो नद्यो मधु क्षरन्ति मधुररसान्स्रवन्ति । ओषधीश्चास्मान्प्रति माध्वीर्मधुररसाः सन्तु । देवस्य सवितुर्भर्गस्तेजोऽन्नं वा प्रस्तुतं पदं चिन्तयामः । नक्तं रात्रिरुतोषसो दिवसाश्च मधु प्रीतिकराः सन्तु । पार्थिवं रजो मधुमदनुद्वेगकरमस्तु । द्यौश्च पिता नोऽस्माकं मधु सुखकरोऽस्तु । यः सविता नोऽस्माकं धियो बुद्धीः प्रचोदयात्प्रेरयेत्तस्य तद्वरेण्यमिति संबन्धः । वनस्पतिः

१ घ. ज. ण. °युप्रभं° । २ ख. छ. ट. ण. °रसा° । ३ क. ख. छ. ढ. जोऽनन्ताप्र° ।

सोमोऽस्माकं मधुमानस्तु। गावो रश्मयो दिशो वा माध्वीः सुखकराः सन्तु। अन्तशब्दादितिशब्दाच्चोपरिष्टादुक्त्वेत्यनुषङ्गः। एवं ग्रासचतुष्टये निर्वृत्ते सत्यवशिष्टे द्रव्ये किं कर्तव्यं तत्राऽऽह-यथेति। पात्रावशिष्टस्य परित्यागं वारयति-यदिति। निर्णिज्य प्रक्षाल्येति यावत्। पाणिप्रक्षालनवचनसामर्थ्यात्पात्रं शुद्धयर्थं स्मार्तमाचमनमनुजानाति-अप आचम्येति। एकपुण्डरीकशब्दोऽखण्डश्रेष्ठवाची ॥ ६ ॥

ॐ हैतमुद्दालक आरुणिर्वाजसनेयाय याज्ञवल्क्यायान्तेवासिन उक्त्वोवाचापि य एनꣳ शुष्के स्थाणौ निषिञ्चेज्जायेरञ्शाखाः प्ररोहेयुः पलाशानीति ॥ ७॥

एतमु हैव वाजसनेयो याज्ञवल्क्यो मधुकाय पैङ्ग्यायान्तेवासिन उक्त्वोवाचापि य एनꣳ शुष्के स्थाणौ निषिञ्चेज्जायेरञ्छाखाः प्ररोहेयुः पलाशानीति ॥८॥

एतमु हैव मधुकः पैङ्ग्यश्चूलाय भागवित्तयेऽन्तेवासिन उक्त्वोवाचापि य एनꣳ शुष्के स्थाणौ निषिञ्चेज्जायेरञ्शाखाः प्ररोहेयुः पलाशानीति ॥ ९ ॥

एतमु हैव चूलो भागवित्तिर्जानकय आयस्थूणायान्तेवासिन उक्त्वोवाचापि य एनꣳ शुष्के स्थाणौ निषिञ्चेज्जायेरञ्शाखाः प्ररोहेयुः पलाशानीति ॥ १० ॥

एतमु हैव जानकिरायस्थूणः सत्यकामाय जाबालायान्तेवासिन उक्त्वोवाचापि य एनꣳ शुष्के स्थाणौ निषिञ्चेज्जायेरञ्छाखाः प्ररोहेयुः पलाशानीति ॥ ११ ॥

एवमु हैव सत्यकामो जाबालोऽन्तेवासिभ्य उक्त्वोवाचापि य एनꣳ शुष्के स्थाणौ निषिञ्चेज्जायेर-

---

१ घ. निर्वृत्ते। २ घ. ञ. ण. °वलितस्य।

ञ्छाखाः प्ररोहेयुः पलाशानीति तमेवं नापुत्राय
वाऽनन्तेवासिने वा ब्रूयात् ॥ १२ ॥

तं हैतमुद्दालक इत्यादि सत्यकामो जाबालोऽन्तेवासिभ्य उक्त्वोवाचापि य एन शुष्के स्थाणौ निषिञ्चेज्जायेरन्नेवास्मिञ्शाखाः प्ररोहेयुः पलाशानीत्येवमन्तमेनं मन्थमुद्दालकात्प्रभृत्येकैकाचार्यक्रमागतं सत्यकाम आचार्यो बहुभ्योऽन्तेवासिभ्य उक्त्वोवाच । किमन्यदुवाचेत्युच्यते—अपि य एनं शुष्के स्थाणौ गतप्राणेऽप्येनं मन्थं भक्षणाय संस्कृतं निषिञ्चेत्प्रक्षिपेज्जायेरन्नुत्पद्येरन्नेवास्मिन्स्थाणौ शाखा अवयवा वृक्षस्य प्ररोहेयुश्च पलाशानि पर्णानि यथा जीवतः स्थाणोः किमुतानेन कर्मणा कामः सिध्येदिति । ध्रुवफलमिदं कर्मेति कर्मस्तुत्यर्थमेतत् । विद्याधिगमे षट्तीर्थानि तेषामिह सप्राणदर्शनस्य मन्थविज्ञानस्याधिगमे द्वे एव तीर्थे अनुज्ञायेते पुत्रश्चान्तेवासी च ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥

तमेतं नापुत्रायेत्यादेरर्थमाह—विद्येति । शिष्यः श्रोत्रियो मेधावी धनदायी प्रियः पुत्रो विद्यया विद्यादातेति षट् तीर्थानि संप्रदानानि ॥ ७ ॥ ८ ॥ ९ १० ॥ ११ ॥ १२ ॥

चतुरौदुम्बरो भवत्यौदुम्बरः स्रुव औदुम्बरश्चमस
औदुम्बर इध्म औदुम्बर्या उपमन्थन्यौ दश
ग्राम्याणि धान्यानि भवन्ति व्रीहियवास्तिलमाषा
अणुप्रियंगवो गोधूमाश्च मसुराश्च खल्वाश्च खल-
कुलाश्च ताँन्पिष्टान्दधनि मधुनि घृत उपसिञ्च-
त्याज्यस्य जुहोति ॥ १३ ॥

इति बृहदारण्यकोपनिषदि षष्ठाध्यायस्य
तृतीयं ब्राह्मणम् ॥ ३ ॥

---

१ च. त्राय नान° । ढ. °त्रायान° । २ च. ढ. °वमेतमे । ३ च. ढ. एते । ४ च. तान्सार्धं पिष्ट्वा दध्ना नृतेनोप° ।

चतुरौदुम्बरो भवतीति व्याख्यातम् । दश ग्राम्याणि धान्यानि भवन्ति ग्राम्याणां तु धान्यानां दश नियमेन ग्राह्या इत्यवोचाम । के त इति निर्दिश्यन्ते–व्रीहियवास्तिलमाषा अणुप्रियंगवोऽणवश्चाणुशब्दवाच्याः । क्वचिद्देशे प्रियंगवः प्रसिद्धाः कङ्गुशब्देन । खल्वा निष्पावा वल्लशब्दवाच्या लोके खलकुलाः कुलत्थाः । एतद्व्यतिरेकेण यथाशक्ति सर्वौषधयो ग्राह्याः फलानि चेत्यवोचामायाज्ञिकानि वर्जयित्वा ॥ १३ ॥

इति बृहदारण्यकोपनिषद्भाष्ये षष्ठाध्यायस्य
तृतीयं ब्राह्मणम् ॥ ३ ॥

॥ १३ ॥

इति बृहदारण्यकोपनिषद्भाष्यटीकायां षष्ठाध्यायस्य
तृतीयं ब्राह्मणम् ॥ ३ ॥

(अथ षष्ठाध्यायस्य चतुर्थं ब्राह्मणम्) ।

एषां वै भूतानां पृथिवी रसः पृथिव्या आपोऽपामोषधय ओषधीनां पुष्पाणि पुष्पाणां फलानि फलानां पुरुषः पुरुषस्य रेतः ॥ १ ॥

यादृग्जन्मा यथोत्पादितो यैर्वा गुणैर्विशिष्टः पुत्र आत्मनः पितुश्च लोक्यो भवतीति तत्संपादनाय ब्राह्मणमारभ्यते । प्राणदर्शिनः श्रीमन्थं कर्म कृतवतः पुत्रमन्थेऽधिकारः । यदा पुत्रमन्थं चिकीर्षति तदा श्रीमन्थं कृत्वेतुंकालं पत्न्याः प्रतीक्षत इत्येतद्रेतस ओषध्यादिरसतमत्वस्तुत्याऽवगम्यते । एषां वै चराचराणां भूतानां पृथिवी रसः सारभूतः । सर्वभूतानां मध्विति ह्युक्तम् । पृथिव्या आपो रसः । अप्सु हि पृथिव्योता च प्रोता च । अपामोषधयो रसः । कार्यत्वाद्रसत्वमोषध्यादीनाम् । ओषधीनां पुष्पाणि । पुष्पाणां फलानि । फलानां पुरुषः । पुरुषस्य रेतः । " सर्वेभ्योऽङ्गेभ्यस्तेजः संभूतम् " इति श्रुत्यन्तरात् ॥ १ ॥

प्राणोपासकस्य वित्तार्थिनो मन्थाख्यं कर्मोक्त्वा ब्राह्मणान्तरमुत्थापयति–

---

१ क. ख. ग. ङ च. छ. झ. ढ. °ह्याणीत्य° । २ क. ग. ङ. च. ढ. °म । ताम्येतानीति । ख. छ. °म । तान्येतानि नि° । झ. °म । कानि तानीति । ३ ज. °का व° । ४ छ. °षां भू° । ५ झ. ढ. °तीक्षेतेत्ये° । ६ स. घ छ. झ. °षां च° । च. ज. ढ. °षा वा एषां च° ।

यादागीति । उक्तगुणः स कथं स्यादित्यपेक्षायामिति शेषः । तच्छब्दो यथोक्तपुत्रविषयः । यदस्मिन्ब्राह्मणे पुत्रमन्थाख्यं कर्म वक्ष्यते तद्भवति सर्वाधिकारविषयमित्याशङ्क्याऽऽह–प्राणोति । पुत्रमन्थस्य कालनियमाभावमाशङ्क्याऽऽह–यदेति । किमत्र गमकमित्याशङ्क्य रेतःस्तुतिरित्याह–इत्येतादिति । पृथिव्या सर्वभूतसारत्वे मधुब्राह्मणं प्रमाणयति–सर्वभूतानामिति । तत्र गार्गिब्राह्मणं प्रमाणमित्याह- अप्सु हीति । अपां पृथिव्याश्च रसत्वं कारणत्वाद्युक्तमोषध्यादीनां कथमित्याशङ्क्याऽऽह–कार्यत्वादिति । रेतोऽसृजतेति प्रस्तुत्य रेतस्तत्र तेजःशब्दप्रयोगात्तस्य पुरुषे सारत्वमैतरेयके विवक्षितमित्याह–सर्वेभ्य इति ॥ १ ॥

स ह प्रजापतिरीक्षांचक्रे हन्तास्मै प्रतिष्ठां कल्पयानीति स स्त्रियꣳ ससृजे तांꣳ सृष्ट्वाऽध उपास्त तस्मात्स्त्रियमध उपासीत स एतं प्राञ्चं प्रावाणमात्मन एव समुदपारयत्तेनैनामभ्यसृजत ॥ २ ॥

यत एवं सर्वभूतानां सारतममेतद्रेतोऽतः का नु खल्वस्य योग्या प्रतिष्ठेति स ह स्रष्टा प्रजापतिरीक्षांचक्रे । ईक्षां कृत्वा स स्त्रियं ससृजे । तां च सृष्ट्वाऽध उपास्त मैथुनाख्यं कर्माधउपासनं नाम कृतवान् । तस्मात्स्त्रियमध उपासीत । श्रेष्ठानुश्रयणा हि प्रजाः । अत्र वाजपेयसामान्यकल्पमिमाह–स एतं प्राञ्चं प्रकृष्टगतियुक्तमात्मनो प्रावाणं सोमाभिषवोपलस्थानीयं काठिन्यसामान्यात्प्रजननेन्द्रियमुदपारयदुत्पूरितवान्स्त्रीव्यञ्जनं प्रति तेनैनां स्त्रियमभ्यसृजदभिसंसर्गं कृतवान् ॥ २ ॥

श्रेष्ठमनुश्रयन्तेऽनुसरन्तीति श्रेष्ठानुश्रयणाः पशुकर्माणि स्वारस्यन प्राणिमात्रस्य प्रवृत्तेर्वृथा विधिरित्याशङ्क्याऽऽह–अत्रेति । अवाच्यं कर्म तदभ्यर्थः ॥ २ ॥

तस्या वेदिरुपस्थो लोमानि बर्हिश्चर्माधिषवणे समिद्धो मध्यतस्तौ मुष्कौ स यावान्ह वै वाजपेयेन यजमानस्य लोको भवति तावानस्य

---

१ च. ढ. °नैताम° । २ झ. °यक्त्व° । ३ क. ख. ङ. छ. ढ. °मान्यात्कल्पमि° । ५ ख. घ. ङ. एतमात्मन° प्रा° । ५ ख. छ. °ञ्चं प्रा° । ६ क. घ. °मात्मानं प्रा° । ७ घ. ङ. च. छ. ढ. °नैता स्त्रि° । ८ घ. ञ. ण °तेर्व्यर्थो वि° ।

लोको भवति य एवं विद्वानधोपहासं चरत्यासाꣳ
स्त्रीणाꣳ सुकृतं वृङ्क्तेऽथ य इदमविद्वानधोपहासं
चरत्याऽस्य स्त्रियः सुकृतं वृञ्जते ॥ ३ ॥

तस्या वेद्यिरित्यादि सर्वं सामान्यं प्रसिद्धम्। समिद्धोऽग्निर्भ्यतः स्त्रीभ्यञ्जनस्य तौ मुष्कावधिषवणफलके इति व्यवहितेन संबध्यते। वाजपेययाजिनो यावाँल्लोकः प्रसिद्धस्तावान्विदुषो मैथुनकर्मणो लोकः फलमिति स्तूयते। तस्माद्वीभत्सा नो कार्येति। य एवं विद्वानधोपहासं चरत्यासां स्त्रीणां सुकृतं वृङ्क्त आवर्जयति। अथ पुनर्यो वाजपेयसंपन्नं न जानात्यविद्वान्रेतसो रसतमत्वं चाधोपहासं चरति। अंऽस्य स्त्रियः सुकृतमावृञ्जतेऽविदुषः ॥ ३ ॥

मुष्कौ वृषणौ योनिपार्श्वयोः कठिनौ मांसखण्डौ तत्राधिषवणशब्दिवतोमफलकदृष्टिः। यच्चाऽऽनुडुहं चर्म सोमकण्डनार्थं तद्दृष्टी रहस्यदेशस्य चर्मणि कर्तव्येत्याह—ताविति। उपास्तिप्रकारमुक्त्वा फलोक्तेस्तात्पर्यमाह—वाजपेयेति। स्तूयते मैथुनाख्यं कर्मेति शेषः। स्तुतिफलमाह—तस्मादिति। श्रुतिशब्दः स्तुतिफलदर्शनार्थः। उपास्तेरधिकं फलमाह—य एवमिति। अविदुषो दुर्व्यापारनिरतस्य प्रत्यवायं दर्शयति—अथेति ॥ ३ ॥

एतद्ध स्म वै तद्विद्वानुद्दालक आरुणिराहैतद्ध स्म
वै तद्विद्वान्नाको मौद्गल्य आहैतद्ध स्म वै तद्विद्वा-
न्कुमारहारित आह बहवो मर्या ब्राह्मणायना नि-
रिन्द्रिया विसुकृतोऽस्माल्लोकात्प्रयन्ति य इदमविद्वा-
ꣳसोऽधोपहासं चरन्तीति बहु वा इदꣳ सुप्तस्य वा
जाग्रतो वा रेतः स्कन्दति ॥ ४ ॥

एतद्ध स्म वै तद्विद्वानुद्दालक आरुणिराहाधोपहासाख्यं मैथुनकर्म वाजपेयसंपन्नं विद्वानित्यर्थः। तथा नाको मौद्गल्यः कुमारहारितश्च। किं त आहुरित्युच्यते—बहवो मर्या मरणधर्मिणो मनुष्या ब्राह्मणा अयनं येषां ते ब्राह्मणायना ब्रह्मबन्धवो जातिमात्रोपजीविन इत्येतत्। निरिन्द्रिया विश्लिष्टेन्द्रिया विसुकृतो विगतसुकृतकर्माणोऽ-

---

१ स. ग. छ. म। २ घ. छ. वृङ्क्तेऽर्ज°। ३ ग. आस्य। ४ घ. °शस्थे च°। ५ ग. छ. ट. °हारीत। ६ ग. छ. ज. झ. °हारीत°।

विद्वांसो मैथुनकर्मासक्ता इत्यर्थः। ते किमस्माल्लोकात्प्रयन्ति परलोकात्परिभ्रष्टा इति। मैथुनकर्मणोऽत्यन्तपापहेतुत्वं दर्शयति—य इदमविद्वांसोऽधोपहासं चरन्तीति। श्रीमन्थं कृत्वा पत्न्या ऋतुकालं ब्रह्मचर्येण प्रतीक्षते यंदीदं रेतः स्कन्दति बहु वाँऽल्पं वा सुप्तस्य वा जाग्रतो वा रागप्राबल्यात् ॥ ४ ॥

अविदुषामतिगर्हितमिदं कर्मेत्यत्राऽऽचार्यपरम्परासंमतिमाह—एतद्धेति। पशुकर्मणो वाजपेयसंपन्नत्वमिदंशब्दार्थः। अविदुषामवाच्ये कर्मणि प्रवृत्तानां दोषित्वमुपसंहर्तुमितिशब्दः। विदुषो लाभमविदुषश्च दोषं दर्शयित्वा क्रियाकालात्यागेव रेतःस्खलने प्रायश्चितं दर्शयति—श्रीमन्थमिति। यः प्रतीक्षते तस्य रेतो यदि स्कन्दतीति योजना ॥ ४ ॥

तदभिमृशेदनु वा मन्त्रयेत यन्मेऽद्य रेतः पृथिवीमस्कान्त्सीद्यदोषधीरप्यसरद्यदपः। इदमहं तद्रेत आददे पुनर्मामैत्विन्द्रियं पुनस्तेजः पुनर्भगः। पुनरग्निर्धिष्ण्या यथास्थानं कल्पन्तामित्यनामिकाङ्गुष्ठाभ्यामादायान्तरेण स्तनौ वा भ्रुवौ वा निमृज्यात् ॥ ५ ॥

तदभिमृशेदनुमन्त्रयेत वाऽनुजपेदित्यर्थः। यदाऽभिमृशति तदाऽनामिकाङ्गुष्ठाभ्यां तद्रेत आर्दत्त आदद इत्येवमन्तेन मन्त्रेण पुनर्मामित्येतेन निमृज्यादन्तरेण मध्ये भ्रुवौ भ्रुवोर्वा स्तनौ स्तनयोर्वा ॥ ५ ॥

मे ममाद्याप्राप्तकाले यद्रेतः पृथिवीं प्रत्यस्कान्त्सीदागातिरेकेण स्कन्नमासीदोषधीः प्रत्यप्यसरदगमद्यच्चापः स्वयोनिं प्रति गतमभूत्तदिदं रेतः संप्रत्यादेऽहमित्यादानमन्त्रार्थः। केनाभिप्रायेण तदादानं तदाह—पुनरिति। तत्पुनारेतोरूपेण बहिर्निर्गतमिन्द्रियं मां प्रत्येतु समागच्छतु। तेजस्त्वग्गता कान्तिः। भगः सौभाग्यं ज्ञानं वा। तदपि सर्वं रेतोनिर्गमात्तदात्मना बहिर्निर्गतं सन्मां प्रत्यागच्छतु। अग्निर्धिष्ण्यं स्थानं येषां ते[11] देवास्तद्रेतो यथास्थानं कल्पयन्त्विति मार्जनमन्त्रार्थः ॥ ५ ॥

---

१ च. ङ. °न्थं कर्म कु°। २ क. ख. ग. ङ. च. झ. ढ. °क्षतो य°। ३ घ. ज. यदेदं। ४ च. ङ. यदिदं। ४ च. ढ. वा स्वल्पं। ५ घ. ण. °ना ॥ ४ ॥ यन्मेऽद्या°। ६ ग. च. ज. °र्मामेत्वि°। ७ घ. ज. ढ. °पेद्रेत्य°। ८ ख. ङ. च. छ. °दद इ°। ९ क. ख. च. छ. °ति। यत्पु°। १० घ. ञ. ढ. ण. °गमनात्त°। ११ क. ख. छ. ढ. ते धिष्ण्या द्°।

अथ यद्युदक आत्मानं पश्येत्तदभिमन्त्रयेत मयि तेज इन्द्रियं यशो द्रविणꣳ सुकृतमिति श्रीर्ह वा एषा स्त्रीणां यन्मलोद्वासास्तस्मान्मलोद्वाससं यशस्विनीमभिक्रम्यो-पमन्त्रयेत ॥ ६ ॥

अथ यदि कदाचिदुदक आत्मानमात्मच्छायां पश्येत्तत्राप्यभिमन्त्र-येतानेन मन्त्रेण—मयि तेज इति । श्रीर्ह वा एषा पत्नी स्त्रीणां मध्ये यद्यस्मान्मलोद्वासा उद्वृतमलवद्वासास्तस्मात्तां मलोद्वाससं यशस्विनीं श्रीमतीमभिक्रम्याभिगत्योपमन्त्रयेतेदमद्याऽऽवाभ्यां कार्यं यत्पुत्रोत्पा-दनमिति त्रिरात्रान्त आप्लुताम् ॥ ६ ॥

अयोनौ रेतःस्खलने प्रायश्चित्तमुक्तं रेतो योनावुदके रेतःसिचश्छायादर्शने प्रायश्चित्तं दर्शयति—यथेत्यादिना । निमित्तान्तरे प्रायश्चित्तान्तरप्रदर्शनफलमर्थोऽ-थशब्दः । मयि तेजःप्रभृति देवाः कल्पयन्त्विति मन्त्रयोजना । प्रकृतेन रेतःसिचा यस्यां पुत्रो जनयितव्यस्तां स्त्रियं स्तौति—श्रीरित्यादिना । कथं सा यशस्विनी न हि तस्याः ख्यातिरस्ति तत्राऽऽह—यदिति । रजस्वलाभिगमनादि प्रतिषिद्ध-मित्याशङ्क्य विशिनष्टि—त्रिरात्रेति ॥ ६ ॥

सा चेदस्मै न दद्यात्काममेनामवकीर्णीयात्सा चेदस्मै नैव दद्यात्काममेनां यष्ट्यां वा पाणिना वोपहत्या-तिक्रामेदिन्द्रियेण ते यशसा यश आदद इत्ययशा एव भवति ॥ ७ ॥

सा चेदस्मै न दद्यान्मैथुनं कर्तुं काममेनामवकीर्णीयादाभरणादिना ज्ञापयेत् । तथाऽपि सा नैव दद्यात्काममेनां यष्ट्या वा पाणिना वोपहत्यातिक्रामेन्मैथुनाय । शप्स्यामि त्वां दुर्भगां करिष्यामीति प्रख्याप्य तामनेन मन्त्रेणोपगच्छेदिन्द्रियेण ते यशसा यश आदद इति । सा तस्मात्तदभिशापाद्वन्ध्या दुर्भगेति ख्याताऽयशा एव भवति ॥ ७ ॥

---

१ क. ख. घ. ङ. छ. ज. ट ठ. ड. °नं परिप° । २ म. °शदाऽभि° । ३ च. ढ. °ध्ये या मलोद्वासा रजस्वला यशस्विनी च सा तद्धि यशो यद्दतुसंप्राप्तिः स्त्रीणां य° । घ. ज. °ध्ये या मलोद्भासा रजस्वला यशस्विनी च सा तद्धि यशो यद्दतुसंप्राप्तिः स्त्रीणां तां मलोद्वास° । ४ घ. ज. झ. ढ. °गम्योप° । ५ घ. ण. तद्धीति । ६ च. ढ. °ष्ट्या पा° । ७ क. घ ज. झ. ढ. °ति । त° ।

ज्ञापयेदात्मीयं प्रेमातिरेकमिति शेषः । बलादेव वशीकृतां भार्यां पशुकर्मार्थं कथमुपगच्छेदित्याकाङ्क्षायामाह—शप्स्यामीति ॥ ७ ॥

सा चेदस्मै दद्यादिन्द्रियेण ते यशसा यश आदधामीति यशस्विनावेव भवतः ॥ ८ ॥

सा चेदस्मै दद्यादनुगुणैव स्याद्भर्तुस्तदाऽनेन मन्त्रेणोपगच्छेन्द्रियेण ते यशसा यश आदधामीति तदा यशस्विनावेवोभावपि भवतः ॥ ८ ।'

॥ ८ ॥

स यामिच्छेत्कामयेत मेति तस्यामर्थं निष्ठाय मुखेन मुखꣳ संधायोपस्थमस्या अभिमृश्य जपेदङ्गादङ्गात्संभवसि हृदयादधिजायसे । स त्वमङ्गकषायोऽसि दिग्धविद्धामिव मादयेमामभूं मयीति ॥ ९ ॥

स यां स्वभार्यामिच्छेदियं मां कामयेतेति तस्यामर्थं प्रजननेन्द्रियं निष्ठाय निक्षिप्य मुखेन मुखं संधायोपस्थमस्या अभिमृश्य जपेदिमं मन्त्रमङ्गादङ्गादिति ॥ ९ ॥

भर्तुर्भार्यावशीकरणप्रकारमुक्त्वा पुरुषद्वेषिण्यास्तस्यास्तद्विषये भीतिसंपादनप्रक्रियां दर्शयति—स यामित्यादिना । हे रेतस्त्वं मदीयात्सर्वस्मादङ्गात्समुत्पद्यसे विशेषतश्च हृदयादन्नरसद्वारेण जायसे स त्वमङ्गानां कषायो रसः सन्विषलिप्तशरविद्धां मृगीमिवामूं मदीया स्त्रियं मे मादय मद्वशां कुर्वित्यर्थः ॥ ९ ॥

अथ यामिच्छेन्न गर्भं दधीतेति तस्यामर्थं निष्ठाय मुखेन मुखꣳ संधायाभिप्राण्यापान्यादिन्द्रियेण ते रेतसा रेत आदद इत्यरेता एव भवति ॥ १० ॥

अथ यामिच्छेन्न गर्भं दधीत न धारयेद्गर्भिणी मा भूदिति तस्यामर्थमिति पूर्ववत् । अभिप्राण्यापानं प्रथमं कृत्वा पश्चादपान्यादिन्द्रियेण ते रेतसा रेत आदद इत्यनेन मन्त्रेणारेता एव भवति न गर्भिणी भवतीत्यर्थः ॥ १० ॥

---

१ ग. च. छ. °निष्ठाप्य । २ ग. च. निष्ठाप्य । ३ ग. च. निष्ठाप्य । ४ ङ. च. झ. ञ. गर्भधारिणी ।

तस्याः स्वविषये प्रीतिमापाद्यावाच्यकर्मानुष्ठानदशायामभिप्रायविशेषानुसारेणानुष्ठानविशेषं दर्शयति—अथेत्यादिना। तत्र तत्राथशब्दस्तत्तदुपक्रमार्थो नेतव्यः। पशुकर्मकाले प्रथमं स्वकीयपुंस्त्वद्वारा तदीयस्त्रीत्वे वायुं विसृज्य तेनैव द्वारेण ततस्तदादानाभिमानं कुर्यादित्याह—अभिप्राण्येति ॥ १० ॥

अथ यामिच्छेद्दधीतेति तस्यामर्थं निष्ठाय मुखेन मुखꣳ संधायापान्याभिप्राण्यादिन्द्रियेण ते रेतसा रेत आदधामीति गर्भिण्येव भवति ॥ ११ ॥

अथ यामिच्छेद्दधीत गर्भामिति तस्यामर्थमित्यादि पूर्ववत्। पूर्वविपर्ययेणापान्याभिप्राण्यादिन्द्रियेण ते रेतसा रेत आदधामीति गर्भिण्येव भवति ॥ ११ ॥

भर्तुरेवाभिप्रायान्तरानुसारिणं विधिमाह—अथ यामित्यादिना। स्वकीयपञ्चमेन्द्रियेण तदीयपञ्चमेन्द्रियादेतः स्वीकृत्य तत्पुत्रोत्पत्तिसमर्थं कृतमिति मत्वा स्वकीयरेतसा सह तस्मिन्निक्षिपेत्तदिदमपानं प्राणनं च तत्पूर्वकं रेतःसेचनम् ॥ ११ ॥

अथ यस्य जायायै जारः स्यात्तं चेद्द्विष्यादामपात्रेऽग्निमुपसमाधाय प्रतिलोमꣳ शरवार्हिस्तीर्त्वा तास्मिन्नेताः शरभृष्टीः प्रतिलोमाः सर्पिषाऽक्ता जुहुयान्मम समिद्धेऽहौषीः प्राणापानौ त आददेऽसाविति मम समिद्धेऽहौषीः पुत्रपशूꣳस्त आददेऽसाविति मम समिद्धेऽहौषीरिष्टासुकृते त आददेऽसाविति मम समिद्धेऽहौषीराशापराकाशौ त आददेऽसाविति स वा एष निरिन्द्रियो विसुकृतोऽस्माल्लोकात्प्रैति यमेवंविद्ब्राह्मणः शपति तस्मादेवंविच्छ्रोत्रियस्यैव दारेण नोपहासमिच्छेदुत ह्येवंवित्परो भवति ॥ १२ ॥

---

१ ग. च. निष्ठाप्य। २ क. ख. घ. च. छ. ज. ठ. ड. ढ. °कृदसा°। ३ च. °स्य जायया उपहास नेच्छे°।

अथ पुनर्यस्य जायायै जार उपपतिः स्यात्तं चेद्द्विष्यादभिचरिष्याम्येनमिति मन्येत तस्येदं कर्म । आमपात्रेऽग्निमुपसमाधाय सर्वं प्रतिलोमं कुर्यात्तस्मिन्नग्नावेताः शरभृष्टीः शरेषीकाः प्रतिलोमाः सर्पिषाऽक्ता घृताभ्यक्ता जुहुयान्मम समिद्धेऽहौषीरित्याद्या आहुतीरन्ते सर्वासामसाविति नामग्रहणं प्रत्येकम् । स एष एवंविद्यं ब्राह्मणः शपति स विसुकृतो विगतपुण्यकर्मा प्रैति । तस्मादेवंविच्छ्रोत्रियस्य दारेण नोपहासमिच्छेन्नर्मापि न कुर्यात्किमुताधोपहासं हि यस्मादेवंविदपि तावत्परो भवति शत्रुर्भवतीत्यर्थः ॥ १२ ॥

संप्रति प्रासङ्गिकमाभिचारिकं कर्म कथयति—अथ पुनरिति । द्वेषवताऽनुष्ठितमिदं कर्म फलवदिति वक्तुं द्विष्यादित्यधिकारिविशेषणम् । आमविशेषणं पात्रस्य प्रकृतकर्मयोग्यत्वरूपनार्थम् । अग्निमित्येकवचनादुपसमाधानवचनाच्चाऽऽवसथ्याग्निरत्र विवक्षितः । सर्वं परिस्तरणादि तस्य प्रतिलोमत्वे कर्मणः प्रतिलोमत्वं हेतूकर्तव्यम् । मम स्वभूते योषाग्नौ यौवनादिना समिद्धे रेतो हुतवानसि ततोऽपराधिनस्तव प्राणापानावाददे फडित्युक्त्वा होमो निर्वर्तयितव्यः । तदन्ते चासाविति आत्मनः शत्रोर्वा नाम गृह्णीयात् । इष्टं श्रौतं कर्म सुकृतं स्मार्तम् । आशा प्रार्थना वाचा यत्प्रतिज्ञानं कर्मणा नोपपादितं तस्य प्रतीक्षा पराक्प्रशः । यथोक्तहोमद्वारा शापदानस्य फलं दर्शयति—स एष इति । एवंवित्त्वं मन्थकर्मद्वारा प्राणविद्यावत्त्वम् । तस्मादेवंवित्त्वं परदारगमने यथोक्तदोषज्ञातृत्वम् । तच्छब्दोपात्तं हेत्वन्तरमाह—एवंविदपीति ॥ १२ ॥

> अथ अस्य जायामार्तवं विन्देत्र्यहं कꣳसेन पिबेदहतवासा नैनां वृषलो न वृषल्युपहन्यात्त्रिरात्रान्त आप्लुत्य व्रीहीनवघातयेत् ॥ १३ ॥

अथ यस्य जायामार्तवं विन्देदृतुभावं प्राप्नुयादित्येवमादिग्रन्थः श्रीर्ह वा एषा स्त्रीणामित्यतः पूर्वं द्रष्टव्यः सामर्थ्यात् । त्र्यहं कंसेन पिबेदहतवासाश्च स्यात् । नैनां स्नातामस्नातां च वृषलो वृषली वा नोपहन्यान्नोपस्पृशेत् । त्रिरात्रान्ते त्रिरात्रव्रतसमाप्तावाप्लुत्य स्नात्वाऽ-

---

१ घ. ङ. ज, मन्यते । २ ख. ङ. ज. ट. ड. ढ. आप्लूय । ३ झ. °दिर्यन्थः ;

हतवासाः स्यादिति व्यवहितेन संबन्धः । तामाप्लुतां व्रीहीनवघात-येद्व्रीह्यवघाताय तामेव विनियुञ्ज्यात् ॥ १३ ॥

आभिचारिकं कर्म प्रसङ्गागतमुक्त्वा पूर्वोक्तमृतुकालं ज्ञापयति—अथेति, श्रीर्ह वा एषा स्त्रीणामित्येतदपेक्षया पूर्वत्वम् । पाठक्रमादर्थक्रमस्य बलवत्त्वे हेतु-माह—सामर्थ्यादिति । अर्थवशादिति यावत् ॥ १३ ॥

स य इच्छेत्पुत्रो मे शुक्लो जायेत वेदमनुब्रुवीत
सर्वमायुरियादिति वर्षशतं क्षीरौदनं पाचयित्वा
सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवै ॥ १४ ॥

स य इच्छेत्पुत्रो मे शुक्लो वर्णतो जायेत वेदमेकमनुब्रुवीत सर्व-मायुरियाद्वर्षशतं क्षीरौदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ स-मर्थौ जनयितवै जनयितुम् ॥ १४ ॥

किं पुनरवघातनिष्पन्नैस्तण्डुलैरनुष्ठेयं तदाह—स य इति । बलदेवतादृश्यं वा शुद्धत्वं वा शुक्लत्वम् ॥ १४ ॥

अथ य इच्छेत्पुत्रो मे कपिलः पिङ्गलो जायेत द्वौ
वेदावनुब्रुवीत सर्वमायुरियादिति दध्योदनं पाचयि-
त्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवै ॥ १५ ॥

दध्योदनं दध्ना चरुं पाचयित्वा द्विवेदं चेदिच्छति पुत्रं तदैवमश्न-ननियमः ॥ १५ ॥

॥ १५ ॥

अथ य इच्छेत्पुत्रो मे श्यामो लोहिताक्षो जायेत त्रीन्वे-
दाननुब्रुवीत सर्वमायुरियादित्युदौदनं पाचयित्वा सर्पि-
ष्मन्तमश्नीयातामीश्वरौ जनयितवै ॥ १६ ॥

केवलमेव स्वाभाविकमोदनम् । उदग्रहणमन्यप्रसङ्गनिवृत्त्यर्थम् ॥ १६ ॥

स्वाभाविकमोदनं पाचयति चेत्किमर्थमुदग्रहणं तदप्यतिरेकेणौदनपाकासंभवा-दित्याशङ्क्याऽऽह—उदग्रहणमिति । क्षीरादेरिति शेषः ॥ १६ ॥

---

१ क. ख. ग. ङ. च. छ. झ. ढ. °दकम°। २ क. ख. छ. ढ. ण. °दकम°। ३ क. ख. छ. ढ. ण. °दकम° ।

अथ य इच्छेद्दुहिता मे पण्डिता जायेत सर्वमा-
युरियादिति तिलौदनं पाचयित्वा सर्पिष्मन्तमश्नी-
यातामीश्वरौ जनयितवे ॥ १७ ॥

दुहितुः पाण्डित्यं गृहतन्त्रविषयमेव वेदेऽनधिकारात् । तिलौदनं क्षुरम् ॥ १७ ॥

वेदविषयमेव तत्पाण्डित्यं किं न स्यादत आह–वेद इति ॥ १७ ॥

अथ य इच्छेत्पुत्रो मे पण्डितो विगीतः समितिं
गमः शुश्रूषितां वाचं भाषिता जायेत सर्वान्वेदान-
नुब्रुवीत सर्वमायुरियादिति मांसौदनं पाचयि-
त्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवा औक्षे-
ण वाऽऽर्षभेण वा ॥ १८ ॥

विविधं गीतो विगीतः प्रख्यात इत्यर्थः । समितिंगमः सभां गच्छतीति प्रगल्भ इत्यर्थः । पाण्डित्यस्य पृथग्ग्रहणात् । शुश्रूषितां श्रोतुमिष्टां रमणीयां वाचं भाषिता संस्कृताया अर्थवत्या वाचो भाषितेत्यर्थः । मांसमिश्रमोदनं मांसौदनम् । तन्मांसनियमार्थमाह–औक्षेण वा मांसेन । उक्षा सेचनसमर्थः पुंगवस्तदीयं मांसम् । ऋषभस्ततोऽप्यधिकवयास्तदीयमार्षभं मांसम् ॥ १८ ॥

समितिर्विद्वत्सभा तां गच्छतीति विद्वानेवोच्यतामिति चेन्नेत्याह–पाण्डित्यस्येति । सर्वशब्दो वेदचतुष्टयविषयः । औक्षेणेत्यादितृतीया सहार्थे । देशविशेषापेक्षया कालविशेषापेक्षया वा मांसानियमः । अथशब्दस्तु पूर्ववाक्येषु यथारुचि विकल्पार्थः ॥ १८ ॥

अथाभिप्रातरेव स्थालीपाकावृताऽऽज्यं चेष्टित्वा
स्थालीपाकस्योपघातं जुहोत्यग्नये स्वाहाऽ-

---

१ खं. °हकृत्यवि° । २ क. ख. ङ. छ. ज. झ. ढ. विजिगीतः । घ. च. ठ. ठ. विजिगीथः । ३ क. ख. ग. घ ङ. छ. ट ठ. ड. औक्षेण । ४ घ. च. छ. °घं वि° । ङ. °घं जिगीथ. पुरः प्र° । ५ ख. घ. च. छ. ज. झ ढ. विजिगी° । ६ घ. ज. °गीथः प्र° । ७ झ. °तः पुरः प्र° । ८ घ ङ. °म् । मांस° । ९ ख. छ. °यममाह । १० क घ. ङ. ज. झ. औक्षेण । ख. गवां मांसं तेन । ११ ख. ढ. औक्षेणेत्या° ।

नुमतये स्वाहा देवाय सवित्रे सत्यप्रसवाय
स्वाहेति हुत्वोद्धृत्य प्राश्नाति प्राश्येतरस्याः
प्रयच्छति प्रक्षाल्य पाणी उदपात्रं पूरयित्वा
तेनैनां त्रिरभ्युक्षत्युत्तिष्ठातो विश्वावसोऽन्या-
मिच्छ प्रपूर्व्यां सं जायां पत्या सहेति ॥१९॥

अथाभिप्रातरेव कालेऽवघातनिर्वृत्तांस्तण्डुलानादाय स्थालीपाकावृता स्थालीपाकविधिनाऽऽज्यं चेष्टित्वाऽऽज्यसंस्कारं कृत्वा चरुं श्रपयित्वा स्थालीपाकस्याऽऽहुतीर्जुहोत्युपघातमुपहत्योपहत्याग्नये स्वाहेत्याद्याः। गार्ह्यः सर्वो विधिर्द्रष्टव्योऽत्र हुत्वोद्धृत्य चरुशेषं प्राश्नाति स्वयं प्राश्येतरस्याः पत्न्यै प्रयच्छत्युच्छिष्टम्। प्रक्षाल्य पाणी आचम्योदपात्रं पूरयित्वा तेनोदकेनैनां त्रिरभ्युक्षत्यनेन मन्त्रेणोत्तिष्ठात इति सकृन्मन्त्रोच्चारणम् ॥ १९ ॥

कदा पुनरिदमोदनपाकादि कर्तव्यं तदाह—अथेति। कोऽसौ स्थालीपाकविधिः कथं वा तत्र होमस्तत्राऽऽह—गार्ह्य इति। गृहे प्रसिद्धो गार्ह्यः। अत्रेति पुत्रमन्थकर्मोक्तिः। अतो मद्भार्यातः सकाशाद्धो विश्वावसो गन्धर्व त्वमुत्तिष्ठान्य च जायां प्रपूर्व्यां तरुणीं पत्या सह संक्रीडमानामिच्छाहं पुनः स्वामिमां जायमुपेमीति मन्त्रार्थः ॥ १९ ॥

अथैनामभिपद्यतेऽमोऽहमस्मि सा त्वꣳ सा त्वमस्यमोहं
सामाहमस्मि ऋक्त्वं द्यौरहं पृथिवी त्वं तावेहि सꣳर-
भावहै सह रेतो दधावहै पुꣳसे पुत्राय वित्तय इति
॥ २० ॥

अथैनामभिमन्त्र्य क्षीरौदनादि यथापत्यकामं भुक्त्वेति क्रमो द्रष्टव्यः। संवेशनकालेऽमोऽहमस्मीत्यादिमन्त्रेणाभिपद्यते ॥ २० ॥

अभिपत्तिरालिङ्गनम्। कदा क्षीरौदनादिभोजनं तदाह—क्षीरेति। भुक्त्वाऽभिपद्यत इति संबन्धः। अहं पतिरमः प्राणोऽस्मि सां त्वं वागसि कथं तव प्राणत्वं मम वाक्त्वमित्याशङ्क्य वाचः प्राणाधीनत्ववत्तव मदधीनत्वादित्यभिप्रेत्य सा त्वमित्यादि पुनर्वचनम्। ऋगाधारं हि साम गीयते। अस्ति च मदाधारत्वं तव। तथा च मम सामत्वमृक्त्वं च तव। द्यौरहं पितृत्वात्पृथिवी

१ ङ. झ. °र्वोऽपि वि°। २ ख. °न्योऽत्रामन्त्रतो हु°। ३ छ. °त्र मन्त्रतो हु°। ४ ख ञ. ट. तत्राऽऽह। ५ ख. छ. °मोऽत्र द्र°।

मातृत्वात्तयोर्मातापितृत्वासिद्धेरित्यर्थः । तावावां संरभावहै संरम्भमुद्यमं करवावहै । एहि त्वमागच्छ । कोऽसौ संरम्भस्तमाह—सहेति । पुंस्त्वयुक्तपुत्रलाभाय रेतोधारणं कर्तव्यमित्यर्थः ॥ २० ॥

अथास्या ऊरू विहापयति विजिहीथां द्यावापृथिवी इति तस्यामर्थं निधाय मुखेन मुखꣳ संधाय त्रिरेनामनुलोमामनुमार्ष्टि विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिꣳशतु । आसिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते । गर्भं धेहि सिनीवालि गर्भं धेहि पृथुष्टके । गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजौ ॥ २१ ॥

अथास्या ऊरू विहापयति विजिहीथां द्यावापृथिवी इत्यनेन । तस्यामर्थमित्यादि पूर्ववत् । त्रिरेनां शिरःप्रभृत्यनुलोमामनुमार्ष्टि विष्णुर्योनिमित्यादि प्रतिमन्त्रम् ॥ २१ ॥

ऊर्वोः संबोधनं द्यावापृथिवी इति । विजिहीथां विशिष्टे भवेतं युवामित्यर्थः विष्णुर्व्यापनशीलो भगवान्भवत्या योनिं कल्पयतु पुत्रोत्पत्तिसमर्थां करोतु । त्वष्टा सविता तव रूपाणि पिंशतु विभागेन दर्शनयोग्यानि करोतु प्रजापतिर्विराडात्मा मदात्मना स्थित्वा त्वयि रेतः समासिञ्चतु प्रक्षिपतु । धाता पुनः सूत्रात्मा त्वदीयं गर्भं त्वदात्मना स्थित्वा दधातु धारयतु पुष्णातु च । सिनीवाली दर्शाहर्देवता त्वदात्मना वर्तते । सा च पृथुष्टका विस्तीर्णस्तुतिर्मोः सिनीवालि पृथुष्टके गर्भमिमं धेहि धारय । अश्विनौ देवौ सूर्याचन्द्रमसौ स्वकीयरश्मिमालिनौ तव गर्भं त्वदात्मना स्थित्वा समाधत्ताम् ॥ २१ ॥

हिरण्मयी अरणी याभ्यां निर्मन्थतामश्विनौ । तं ते गर्भं हवामहे दशमे मासि सूतये । यथाऽग्निगर्भा पृथिवी यथा द्यौरिन्द्रेण गर्भिणी । वायुर्दिशां यथा गर्भ एवं गर्भं दधामि तेऽसाविति ॥ २२ ॥

---

१ क. °सिद्धिरि° । २ ढ. °स्तत्राऽऽह । ३ च. निष्ठ°य । ४ ग. ङ. च. झ. ढ. °न मन्त्रेण । त° । ५ घ. ञ. ण. °मौ च दे° । ६ च. ढ. दशमहे । ७ क. च. सूतवे ।

अन्ते नाम गृह्णात्यसाविति तस्याः ॥ २२ ॥

द्यावापृथिव्यावरणौ प्रागासतुर्याभ्यां गर्भमश्विनौ निर्मथितवन्तौ तं तथाभूतं गर्भं ते जठरे दधावहै दशमे मासि प्रसवार्थम्। आधीयमानं गर्भं दृष्टान्तेन दर्शयति—यथेति। इन्द्रेण सूर्येणेति यावत्। असाविति पत्युर्वा निर्देशः। तस्या नाम गृह्णातीति पूर्वेण संबन्धः ॥ २२ ॥

सोष्यन्तीमाद्भिरभ्युक्षति। यथा वायुः पुष्करिणीꣳ
समिङ्गयति सर्वतः। एवा ते गर्भ एजतु सहावैतु
जरायुणा। इन्द्रस्यायं वज्रः कृतः सार्गलः सपरि-
श्रयः। तमिन्द्र निर्जहि गर्भेण सावराꣳ सहेति
॥ २३ ॥

सोष्यन्तीमाद्भिरभ्युक्षति प्रसवकाले सुखप्रसवनार्थमनेन मन्त्रेण। यथा वायुः पुष्करिणीं समिङ्गयति सर्वतः। एवा ते गर्भ एजत्विति ॥ २३ ॥

समिङ्गयति स्वरूपोपघातमकृत्वैव चालयतीत्येतत्। एवा त एवमेव तव स्वरूपोपघातमकुर्वन्नेजतु गर्भश्चलतु। जरायुणा गर्भवेष्टनमांसखण्डेन सहावैतु निर्गच्छतु। इन्द्रस्य प्राणस्यायं वज्रो मार्गः सर्गकाले गर्भावानकाले वा कृतः। सार्गल इत्यस्य व्याख्या सपरिश्रय इति। परिवेष्टनेन जरायुणा सहित इत्यर्थः। तं मार्गं प्राप्य त्वमिन्द्र गर्भेण सह निर्जहि निर्गच्छ। गर्भनिःसरणानन्तरं या मांसपेशी निर्गच्छति सावरा तां च निर्गमयेत्यर्थः ॥ २३ ॥

जातेऽग्निमुपसमाधायाङ्क आधाय कꣳसे पृषदाज्यꣳ
संनीय पृषदाज्यस्योपघातं जुहोत्यस्मिन्सहस्रं पुष्यास-
मेधमानः स्वे गृहे। अस्योपसंन्या मा च्छैत्सीत्प्रजया
च पशुभिश्च स्वाहा। मयि प्राणाꣳस्त्वयि मनसा जु-
होमि स्वाहा। यत्कर्मणाऽत्यरीरिचं यद्वा न्यूनमिहाक-
रम्। अग्निष्टत्स्विष्टकृद्विद्वान्स्विष्टꣳ सुहुतं करोतु नः
स्वाहेति ॥ २४ ॥

---

१ ख. घ. छ. ढ. ण. °ति। द्यौरिन्द्रे°। २ क. ख. घ. ङ. छ. ज. ट. ठ ढ. ढ. समिङ्गयति। ग. समेजयति। ३ ग. समेजयति। ४ घ. ङ. च. ज. °मिङ्गय°। ५ घ. °मिङ्गय°। ६ क. ग. ङ. च. ठ. ट. °सर्यां मा। ७ घ. ढ. °र्मण्यत्य°।

अथ जातकर्म । जातेऽग्निमुपसमाधायाङ्क आधाय पुत्रं कंसे पृषदाज्यं संनीय संयोज्य दधि घृते पृषदाज्यस्योपघातं जुहोत्यस्मिन्सहस्रमित्याद्यावापस्थाने ॥ २४ ॥

घृतमिश्रं दधि पृषदाज्यमित्युच्यते । उपघातमित्याभीक्ष्ण्यं पौनःपुन्यं विवक्षितम् । पृषदाज्यस्याल्पमल्पमादाय पुनः पुनर्जुहोतीत्यर्थः । अस्मिन्स्वे गृहे पुत्ररूपेण वर्धमानो मनुष्याणां सहस्रं पुष्यासमनेकमनुष्यपोषको भूयासमस्यं मत्पुत्रस्योपसंधां संततौ प्रजया पशुभिश्च सह श्रीर्मा विच्छित्ता भूयादित्याह—अस्मिन्निति । मयि पितरि ये प्राणाः सन्ति तान्पुत्रे त्वयि मनसा समर्पयामीत्याह—मयीति । अत्यरीरिचमित्यतिरिक्तं कृतवानस्मीह कर्मण्यकरमकरवं तत्सर्वं विद्वानग्निः स्विष्टं करोतीति स्विष्टकृद्भूत्वा स्विष्टमनधिकं सुकृतमन्यूनं चास्माकं करोत्वित्यर्थः ॥ २४ ॥

अथास्य दक्षिणं कर्णमभिनिधाय वाग्वागिति त्रिरथ दधि मधु घृतꣳ संनीयानन्तर्हितेन जातरूपेण प्राशयति । भूस्ते दधामि भुवस्ते दधामि स्वस्ते दधामि भूर्भुवःस्वः सर्वं त्वयि दधामीति ॥ २५ ॥

अथास्य दक्षिणं कर्णमभिनिधायँ स्वं मुखं वाग्वागिति त्रिर्जपेत् । अथ दधि मधु घृतं संनीयानन्तर्हितेनाव्यवहितेन जातरूपेण हिरण्येन प्राशयत्येतैर्मन्त्रैः प्रत्येकम् ॥ २५ ॥

अस्य जातस्य शिशोरित्यर्थः । त्वयीलक्षणा वाक्त्वयि प्रविशतिति जपतोऽभिप्रायः । एतैर्मन्त्रैर्भूस्ते दधामीत्यादिभिरिति शेषः ॥ २५ ॥

अथास्य नाम करोति वेदोऽसीति तदस्य तद्गुह्यमेव नाम भवति ॥ २६ ॥

---

१ घ. ञ. ण. °स्य सत्पु° । २ क. °सद्या स° । ३ ख. छ. ञ. ढ. °नं वाऽस्मा° । ४ च. भूस्त्वयि द° । ५ च. तस्त्वयि द° । ६ च. स्वस्त्वयि द° । ७ ङ. च. झ. ढ. °य स्वमु° । ८ ख. छ. °यति भूस्त्वयि दधामीत्ये° । ग. घ. ज. ढ. °याते भूस्ते दधामीत्याद्यैर्मं° । ९ ख. छ. ढ वागिह प्र° ।

अथास्य नामधेयं करोति वेदोऽसीति । तदस्य तद्गुह्यं नाम भवति वेद इति ॥ २६ ॥

वेदनाम्ना व्यवहारो लोके नास्तीत्याशङ्क्याऽऽह—तदस्येति । यत्तद्वेद इति नाम तदस्य गुह्यं भवति । वेदनं वेदोऽनुभवः सर्वस्य निजं स्वरूपमित्यर्थः ॥ २६ ॥

अथैनं मात्रे प्रदाय स्तनं प्रयच्छति यस्ते स्तनः शंशयो[1] यो मयोभूर्यो रत्नधा वसुविद्यः सुदत्रः[2] । येन विश्वा पुष्यसि वार्याणि सरस्वति तमिह धा[3]तवे कर्[4]रिति ॥ २७ ॥

अथैनं मात्रे प्रदाय स्वाङ्कस्थं स्तनं प्रयच्छति यस्ते स्तन इत्यादिमन्त्रेण ॥ २७ ॥

हे सरस्वति यस्ते स्तनः शंशयः[5] शयः फलं तेन सह वर्तमानो यश्च सर्वप्राणिनां स्थितिहेत्वन्नभावेन जातो यश्च रत्नधा अन्नस्य पयसो वा धाता यश्च वसु कर्मफलं तद्विन्दतीति वसुवित् । यश्च सुष्ठु ददातीति सुदत्रो येन च स्तनेन विश्वा विश्वानि वार्याणि वरणीयानि देवादीनि भूतानि त्वं पुष्यसि तं स्तनं मदीयपुत्रस्य धातवे पानाय मदीयभार्यास्तने प्रविष्टं कुर्वित्यर्थः ॥ २७ ॥

अथास्य मातरमभिमन्त्रयते । इ[6]लाऽसि मैत्रावरुणी वीरे वीरमजीजनत् । सा त्वं वीरवती भव याऽस्मान्वीरवतोऽकरादिति । तं वा एतमाहुरतिपिता बताभूरतिपितामहो बताभूः परमां बत काष्ठां प्रापच्छ्रिया यशसा ब्रह्मवर्चसेन य एवंविदो ब्राह्मणस्य पुत्रो जायत इति ॥ २८ ॥

इति बृहदारण्यकोपनिषदि षष्ठाध्यायस्य
चतुर्थं ब्राह्मणम् ॥ ४ ॥

---

१ च. सशयो । २ घ. ज. क. इति । ३ घ च. ज ढ °स्थ तनय स्तं° । ४ घ. ञ. ण. सशयः । ५ क. ख. घ. छ. ढ. °यः फ° । ६ ख. ञ. ढ. °न स्तं° । ७ च. इहाऽसि ।

अथास्य मातरमभिमन्त्रयत इलाऽसीत्यनेन । तं वा एतमाहुरित्यनेन विधिना जातः पुत्रः पितरं पितामहं चातिशेत इति श्रिया यशसा ब्रह्मवर्चसेन परमां निष्ठां प्रापादित्येवं स्तुत्यो भवतीत्यर्थः । यस्य चैवंविदो ब्राह्मणस्य पुत्रो जायते स चैवं भवतीत्यध्याहार्यम् । २८ ॥

इति बृहदारण्यकोपनिषद्भाष्ये षष्ठाध्यायस्य
चतुर्थं ब्राह्मणम् ॥ ४ ॥

इला स्तुत्या भोग्याऽसि । मित्रावरुणाभ्यां संभूतो मैत्रावरुणो वसिष्ठस्तस्य भार्या मैत्रावरुणी सा चारुन्धती तद्वत्त्व तिष्ठसीति भार्यां संबोधयति—मैत्रावरुणीति । वरे पुरुषे मयि निमित्तभूते भवती वीरं पुत्रमजीजनत् । सा त्वं वीरवती जीववहुपुत्रा भव । या भवती वीरवतः पुत्रसंपन्नानस्मानकरत्कृतवतीति मन्त्रार्थः । पितरमतीत्य वर्तत इत्यतिपिता । अहो महानेव विस्मयो यत्पितरं पितामहं च सर्वमेवं वंशमतीत्य सर्वस्मादधिकस्त्वं जातोऽसीत्यर्थः । न केवलं पुत्रस्यैवेयं स्तुतिरपि तु यथोक्तपुत्रसंपन्नस्य पितुरपीत्याह—यस्येति ॥ २८ ॥

इति बृहदारण्यकोपनिषद्भाष्यटीकायां षष्ठाध्यायस्य
चतुर्थं ब्राह्मणम् ॥ ४ ॥

(अथ षष्ठाध्यायस्य पञ्चमं ब्राह्मणम्) ।

अथ वंशः । षौतिमाषीपुत्रः कात्यायनीपुत्रात्कात्यायनीपुत्रो गौतमीपुत्राद्गौतमीपुत्रो भारद्वाजीपुत्राद्भारद्वाजीपुत्रः पाराशरीपुत्रात्पाराशरीपुत्र औपस्वस्तीपुत्रादौपस्वस्तीपुत्रः पाराशरीपुत्रात्पाराशरीपुत्रः कात्यायनीपुत्रात्कात्यायनीपुत्रः कौशिकीपुत्रात्कौशिकीपुत्र आलम्बीपुत्राच्च वैयाघ्रपदीपुत्राच्च वैयाघ्रपदीपुत्रः काण्वीपुत्राच्च कापीपुत्राच्च कापीपुत्रः ॥ १ ॥

---

१ ङ. इडाऽसी° । २ क. ख. घ. ङ. च. छ. ज. झ ट. °हं वाऽति° । ३ ख. ज.

आग्नेयीपुत्रादाग्नेयीपुत्रो गौतमीपुत्रादगौतमीपुत्रो भार-
द्वाजीपुत्राद्भारद्वाजीपुत्रः पाराशरीपुत्रात्पाराशरीपुत्रो
वात्सीपुत्राद्वात्सीपुत्रः पाराशरीपुत्रात्पाराशरीपुत्रो
वाकांकणीपुत्राद्वाकांकणीपुत्रो वाकांकणीपुत्राद्वा-
कांकणीपुत्र आर्तभागीपुत्रादार्तभागीपुत्रः कौण्डि-
न्यीपुत्राच्छौङ्गीपुत्रः सांकृतीपुत्रात्सांकृतीपुत्र आलम्बा-
यनीपुत्रादालम्बायनीपुत्र आलम्बीपुत्रादालम्बीपुत्रो
जायन्तीपुत्राज्जायन्तीपुत्रो माण्डूकायनीपुत्राम्माण्डू-
कायनीपुत्रो माण्डूकीपुत्राम्माण्डूकीपुत्रः शाण्डि-
लीपुत्राच्छाण्डिलीपुत्रो राथीतरीपुत्राद्राथीतरीपुत्रो
भालुकीपुत्राद्भालुकीपुत्रः कौशिकीपुत्राभ्यां कौशि-
कीपुत्रो वैदभृतीपुत्राद्वैदभृतीपुत्रः कौशिकेयीपुत्रा-
त्कौशिकेयीपुत्रः प्राचीनयोगीपुत्रात्प्राचीनयोगीपुत्रः
सांजीवीपुत्रात्सांजीवीपुत्रः प्राश्नीपुत्रादौदंबिवासिनः
प्राश्नीपुत्र आसुरायणादासुरायण आसुरेरासुरिः ॥२॥
याज्ञवल्क्याद्याज्ञवल्क्य उद्दालकादुद्दालकोऽरुणाद-
रुण उपवेशेरुपवेशिः कुशेः कुशिर्वाजश्रवसो वाज-
श्रवा जिह्वावतो बाभ्रवोगाज्जिह्वाबाभ्रवाद्बाभ्रवोऽसि-
ताद्धार्शगणादसितो धार्शगण्यो हरितात्कश्यपाद्धारितः
कश्यपः शिल्पात्कश्यपाच्छिल्पः कश्यपः कश्यपाद्वि-

---

१ घ. ठ. 'र्यणी' । २ घ. ठ. 'र्यणि' । ३ घ. ट. ड. 'कार्के' । ४ ख. ठ. ड. 'काकार्के' । ५ ख. ग. छ. ट. ठ. ढ. 'त्रात्माश्री' । ६ घ. छ. ज. ठ. 'धुरिक्ष' ।

ऋग्वेः कश्यपो नैध्रुविर्वांचो वागाम्भिण्या अम्भिण्या-
दित्यादादित्यानीमानि शुक्लानि यजूंषि वाजसनेयेन
याज्ञवल्क्येनाऽऽख्यायन्ते ॥ ३ ॥
समानमा सांजीवीपुत्रात्सांजीवीपुत्रो माण्डूकायने
र्माण्डूकायनिर्माण्डव्यान्माण्डव्यः कौत्सात्कौत्सो मा-
हित्थेर्माहित्थिर्वामकक्षायणाद्वामकक्षायणः शाण्डि-
ल्याच्छाण्डिल्यो वात्स्याद्वात्स्यः कुत्सेः कुत्सिर्यज्ञवच-
सो राजस्तम्बायनाद्यज्ञवचा राजस्तम्बायनस्तुरात्का-
वषेयात्तुरः कावषेयः प्रजापतेः प्रजापतिर्ब्रह्मणो ब्रह्म
स्वयंभु ब्रह्मणे नमः ॥ ४ ॥

इति बृहदारण्यकोपनिषदि षष्ठाध्यायस्य
पञ्चमं ब्राह्मणम् ॥ ५ ॥

इति वाजसनेयके बृहदारण्यकोपनिषदि षष्ठोऽध्यायः ॥ ६ ॥
इति वाजसनेयकबृहदारण्यकक्रमेणाष्ट-
मोऽध्यायः ॥ ८ ॥

अथेदानीं समस्तप्रवचनवंशः । स्त्रीप्राधान्यात् । गुणवान्पुत्रो भवतीति प्रस्तुतम् । अतः स्त्रीविशेषणेनैव पुत्रविशेषणादाचार्यपरम्परा कीर्त्यते । तानीमानि शुक्लानीत्यग्निश्राणि ब्राह्मणेन । अथवा यानीमानि यजूंषि तानि शुक्लानि शुद्धानीत्येतत् । प्रजापतिमारभ्य यावत्सौनिमाषीपुत्रस्तावदधोमुखो नियताचार्यपूर्वक्रमो वंशः समानमा सांजीवीपुत्रात् । ब्रह्मणः प्रवचनाख्यस्य । यच्चैतद्ब्रह्म प्रजापतिप्रवन्धपरम्परयाऽऽगत्यास्मास्वनेकधा विप्रसृतमनाद्यनन्तं स्वयंभु ब्रह्म

ॐ °काऽऽतयामानी° । २ ग, च. ज. झ. ढ. °यंपर्वे° । ३ क. ख. छ. °शः । ॐ° ।

नित्यं तस्मै ब्रह्मणे नमः । नमस्तदनुवर्तिभ्यो गुरुभ्यः ॥ १ ॥ २ ॥ ३ ॥ ४ ॥

इति बृहदारण्यकोपनिषद्भाष्ये षष्ठाध्यायस्य
पञ्चमं ब्राह्मणम् ॥ ५ ॥

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीशंकरभगवतः कृतौ बृहदारण्यकोपनिषद्भाष्ये षष्ठोऽध्यायः ॥ ६ ॥

सांनिध्यात्खिलकाण्डस्य वंशोऽयमिति शङ्कां निवर्तयन्वंशब्राह्मणतात्पर्यमाह—अथेति । विद्याभेदादतीतस्य काण्डद्वयस्य प्रत्येकं वंशभाक्त्वेऽपि नास्य पृथक्त्वभागित्वं खिलत्वेन तच्छेषत्वात् । तथा च समाप्तौ पठितो वंशः समस्तस्यैव प्रवचनस्य भविष्यतीत्यर्थः । पूर्वौ वंशौ पुरुषविशेषितौ तृतीयस्तु स्त्रीविशेषितस्तत्र किं कारणमित्याशङ्क्याऽऽह—स्त्रीप्राधान्यादिति । तदेव स्फुटयति—गुणवानिति । कीर्त्यते ब्राह्मणेनेति संबन्धः । शुक्लानि यजूंषीत्यस्य व्याख्यानपरत्वादिश्राणीति । दोषैरसंकीर्णानि पौरुषेयत्वदोषद्वारामावादित्यर्थः । अपातयामान्यदुष्टान्यगतार्थानीत्यर्थः । पाठक्रमेण मनुष्यादिः प्रजापतिरन्तो वंशो व्याख्यातः । संप्रत्यर्थक्रममाश्रित्याऽऽह—प्रजापतिमिति । अधोमुखत्वं पाठक्रमापेक्षयोच्यते । तत्रापि प्रजापतिमारभ्य रुांजीवीपुत्रपर्यन्तं वाजसनेयिशाखासु सर्वास्वेको वंश इत्याह—समानमिति । प्रवचनाख्यस्य वंशात्मनो ब्रह्मणः संबन्धात्प्रजापतिर्वैद्यां लब्धवानित्याह—ब्रह्मण इति । तस्याधिकारिभेदादवान्तरभेदं दर्शयति—तच्चेति । प्रजापतिमुखप्रबन्धः प्रपञ्चः सैव परम्परा तयेति यावत् । तस्य परमात्मरूपं स्वयंभूत्वमभिदधाति-अनादीति । तस्यापौरुषेयत्वेनासंभाविदोषतया प्रामाण्यमभिप्रेत्य विशिनष्टि—नित्यमिति । आदिमध्यान्तेषु कृतमङ्गला ग्रन्थाः पंचग्रन्थिनो भवन्तीति मन्वानः सन्नाह—तस्मै ब्रह्मणे नम इति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥

इति बृहदारण्यकोपनिषद्भाष्यटीकायां षष्ठाध्यायस्य
पञ्चमं वंशब्राह्मणम् ॥ ५ ॥

---

१ ग. °स्य प्रत्येकं भ° । २ घ. ञ. ण. °तिप्रमु° । ३ घ. ञ. ण. °रूपस्व° । ४ क, ख, ङ. प्रसरि° ।

नमो ब्रह्मादिसंबन्धहेतुविध्वंसहेतवे ।
हरये परमानन्दपरिज्ञानवपुर्भृते ॥ १ ॥
नमस्तत्त्वन्ततंदोहसरस्तीरहमानवे ।
गुरवे परपक्षौघध्वान्तध्वंसपटीयते ॥ २ ॥

इति श्रीपरमहंसपरिव्राजकशुद्धानन्दपूज्यपादशिष्यभगवदानन्दज्ञानकृतायां
बृहदारण्यकोपनिषद्भाष्यटीकायां षष्ठोऽध्यायः ॥ ६ ॥

समाप्तेयं सटीकशाङ्करभाष्योपेता बृहदारण्यकोपनिषत् ।
ॐ तत्सत् ॥

---

१ क. °बन्धविध्वंवि° । ख. छ. ट. °बन्धहे° । २ ज. °ल्पबन्धवि° ।